॥ अथ श्रीमद्भगवद्गीता ॥

श्रीमदानन्दतीर्थगीताभाष्य-जयतीर्थकृतटीकासहिता श्रीनिवासतीर्थ-कृष्णाचार्यकृत-

टिप्पणीसमेता दुर्बोधस्थलेषु अभिनवटिप्पणीयुता च प्रकाश्यते.


अर्जुन

श्रीवेदव्यासायनमः ॥ श्रीलक्ष्मीव्यंकटेशायनमः ॥ हरिःओं ॥ लक्ष्मीनारायणं नत्वा पूर्णबोध [illegible] ॥ कुर्मःश्रीकृष्णगीतायाःभाष्यादुक्तार्थसंग्रहम् ॥ १ ॥ स्त्रीशूद्रब्रह्मबंधूनां त्रयी न श्रुतिगोचरा ॥ इति भारतमाख्यानं कृपया मुनिना कृतमिति भा[illegible]क्त्या वेदार्थज्ञानानधिकारिणांस्त्रीशूद्रादीनां धर्मज्ञानद्वारा मोक्षो भवेदिति भगवान् वेदव्यासः संभवसभारण्यविराटोद्योगभीष्मद्रोणकर्णशल्यगदासौप्तिकशांतिआनुशासनिकाश्वमेधिकमौसलमहाप्रस्थानस्वर्गारोहणभविष्यत्पर्वभेदेनाष्टादशपर्वात्मकं भारतं कृत्वा तत्र भीष्मपर्वणिभारतपारिजातमधुभूतां सर्वभारततात्पर्यार्थसंग्रहभूतां कृष्णार्जुनसंवादरूपां भगवद्गीतामुपनिबबंध ॥ तत्र पूर्वषट्केज्ञानोपायोक्तिः द्वितीयषट्के तत्साध्यज्ञानस्योक्तिः तृतीयषट्के प्रागुक्तस्य प्रपंचनं क्रियत इति विवेकः ॥ तत्राद्याध्यायो द्वितीये कतिपयश्लोकाश्च कृष्णेनार्जुनबोधने प्रसक्तिसंपादनाय प्रवृत्ताः ॥ तत्रायमर्थःधृतराष्ट्र उवाच ॥ कि

ॐ ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥ मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥ संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा ॥ आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥ पश्यैतांपांडुपुत्राणामाचार्य महतींचमूम् ॥ व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता ३

मित्याह ॥ धर्मेति ॥ धर्मसाधनभूमौ कुरुक्षेत्रे युयुत्सवो युद्धमिच्छंत एवसमवेता मीलिताःसंतो मामकाःमदीया दुर्योधनादयःपांडवाश्च हे संजय किमकुर्वत ॥ इति शब्दो योज्यः ॥ पांडवानां भगवत्प्रियत्वं सर्वसाक्षिकमप्यजानन्धृतराष्ट्रःस्वपुत्राणां विजयविविदिषया संजयं पप्रच्छेत्यर्थः ॥ १ ॥ धृतराष्ट्रप्रश्नस्य संजयःउत्तरमुक्तवानित्याहवैशंपायनोजनमेजयं प्रति संजय उवाचेत्यादिनवभिःश्लोकैः ॥ दुर्योधनकृतव्यापारमाह ॥ दृष्ट्वात्वित्यादिना दुर्योधनस्तुराजा तदा युद्धार्थं मीलितसमयेव्यूढंव्यूहात्मना रचितं पांडवसैन्यंदृष्ट्वातुदृष्ट्वैवेतिवा तोरन्वयः ॥ द्रोणाचार्यसमीपमागत्य वचनमुवाच ॥ २ ॥ तद्वचनमेवानुवदति संजयः ॥ पश्यैतामित्यादिना ॥ हेआचार्य तव शिष्येण धीमता धृष्टद्युम्नेन व्यूढां पांडुपुत्राणामेतां महतीं चमूं सेनां पश्य ॥ ३ ॥

अत्र सेनायां महेष्वासाः महाधनुष्काः भीमार्जुनसमाः शूराः संति ते के इत्यत आह ॥ युयुधान इत्यादिना ॥ महारथ इति प्रत्येकमन्वेति वीर्यवानिति विशेषणमपि नरपुंगवो मनुष्यश्रेष्ठ इत्यपि त्रयाणां विशेषणम् ॥ ४ ॥ ५ ॥ महारथत्वं नाम एकादशसहस्राणां योधयेद्यस्तु धन्विनाम् ॥ शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृत इत्युक्तरूपम् ॥ विक्रांतः पराक्रमवान् सौभद्रोभिमन्युः द्रौपदेयाः द्रौपदीपुत्राः ॥ ६ ॥ अस्माकं त्विति पांडवव्यावर्तकस्तुशब्दः अस्माकं संबंधिनो विशिष्टाः बलिष्ठाः मम सैन्यस्य नायकाः नेतारः ये तान्निबोध बुध्यस्व जानीहि ते तव सम्यग्ज्ञानार्थं

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ॥ युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ॥ पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥ सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७ ॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ॥ अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ॥ पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥ ॥

तान् ब्रवीमि द्विजोत्तमेत्याचार्यसंबोधनम् ॥ ७ ॥ तानाह द्वाभ्याम् ॥ भवानित्यादिना ॥ समितिंजयो युद्धे जयशीलः ॥ सोमदत्तसुतो भूरिश्रवाः ॥ ८ ॥ शूरा एवेति मदर्थ एवेति वा अवधारणान्वयः ॥ त्यक्तजीविताः प्राणत्यागे कृतनिश्चया इत्यर्थः ॥ प्र[illegible]ह्रियंते एभिरिति प्रहरणान्यस्त्राणि नानाविधानि शस्त्राणि प्रहरणानि च येषां ते नानाशस्त्रप्रहरणाः युद्धविशारदाः युद्धकुशलाः ॥ ॥ ॥ [illegible] बलिष्ठपरिगणनं पांडवविजये मम

संदेहोस्ति ततो भवदादयः सर्वे बहुसन्नद्धा भवतेति वक्तुमितिभावेनाह अपर्याप्तमिति ॥ ... भिरक्षितमस्माकं तत्प्रागुक्तबलिष्ठो पेतं बलमपर्याप्तं पांडवजये न समर्थ प्रतीयते॥१०॥हि यस्मादेवमतो भवंतः सर्व एव सर्वेष्वयनेषु व्यूहप्रदे... यथाभागमवस्थिताःस्वस्वरणभूमि स्थानेषु दृढमवस्थिताः संतः भीष्ममेवाभिरक्षंतु॥अन्यैर्युध्यमानो भीष्मः पृष्ठतोऽरिभिर्यथा न हन्येत तथा रक्षंत्विति द्रोणाचार्यमुक्त्वा विषसाद॥११॥ एवं विषादिनस्तस्य दुर्योधनस्य हर्ष संजनयन् जनयितुं लक्षणहेत्वोः क्रियाया इति हेतौ शत्रंतं प्रतापवान् कुरुवृद्धः पितामहः भीष्मः सिंहनाद

अयनेषु च सर्वेषु यथाभागमवस्थिताः ॥ भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥ ११ ॥ संजय उवाच॥तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः॥सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्॥१२॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥ सहसैवाभ्यहन्यंत स शद्बस्तुमुलोभवत् ॥ १३ ॥ ततः श्वेतहयैर्युक्ते महति स्यंदने स्थितौ ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः ॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः ॥ नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

मुच्चैः विनद्यशंखं दध्मौ ॥ ध्माशब्दे ॥ १२ ॥ ततः तच्छंखध्मानानंतरं पणवानकगोमुखाः वाद्यविशेषाः सहसैव युगपदेव ॥ तुमुलः सर्वत्र परिपूर्णोऽभवत् ॥ १३ ॥ ततः तेषां घोषानंतरं श्वेतहयैर्युक्ते श्वेतवर्णाश्वैर्युक्ते स्यंदने रथे पांडवोऽर्जुनः स्थितावेवेत्यन्वयः ॥ १४ ॥ तद्विवृणोति ॥ पांचजन्यमिति ॥ हृषीकेशशद्बार्थ उक्तो गीताभाष्ये एकादशे ॥ हृषीकाणामिंद्रियाणामीशत्वाच्च हृषीकेश इत्यादि ॥ दध्मावित्यन्वयः ॥ १५ ॥ अनंतविजयाख्यं नकुलः सुघोषाख्यं शंखं सहदेवो मणिपुष्पकाख्यं दध्मतुरित्यन्वयः ॥ १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमेष्वासो महाधनुर्धरः काश्यः महारथः शिखंडीच अपराजितः सात्यकिश्च ॥ १७ ॥ पृथिवीपते हे धृतराष्ट्र महाबाहुः सौभद्रोऽभिमन्युश्च शं
खमिति समुदायाभिप्रायंस्वस्वशंखान् दध्मुरिति ॥ १८ ॥ स घोषस्तुमुलो व्याप्तो भूत्वा नभश्च पृथिवीं च व्यनुनादयंस्तत्र प्रतिध्वनिं जनयन्नेव
धार्तराष्ट्राणां त्वत्पुत्राणां हृदयानि व्यदारयत् अद्यैव नष्टं कुरुकुलमिति त्वत्पुत्रा मेनिर इत्यर्थः ॥ १९ ॥ तत्त्वोपदेशप्रसङ्गकमर्जुनविषादं वक्तुमेता
वानुपोद्घातः प्रवृत्तः एवं दुर्योधनव्यापारं दलद्वयगतव्यापारं चोक्त्वाऽधुना अर्जुनव्यापारमाह अथेति चतुर्भिः श्लोकैः अनंतरं कपिध्वजोऽर्जुनः

काश्यश्च परमेष्वासः शिखंडी च महारथः ॥ धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ॥ सौभद्रश्च महाबाहुः शंखं दध्मौ पृथक् पृथक् ॥ १८ ॥ स
घोषो धार्तराष्ट्राणांहृदयानि व्यदारयत् ॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥ १९॥अथ व्य
वस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥ २० ॥ हृषी
केशं तदा वाक्यमिदमाह महीपते ॥ अर्जुन उवाच ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत
॥ २१ ॥ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥ कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥
॥ २२ ॥ योत्स्यमानानवेक्षेऽहं य एते त्र समागताः ॥ धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥२३॥

व्यवसितान् युद्धैकतनिश्चयान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसंपाते शस्त्रप्रहरणे प्रवृत्ते वर्तमानसामीप्ये वर्तमानवद्वा प्रवर्तितुमुद्युक्ते सति ॥ २० ॥ तदा
शस्त्रसंपातप्राक्काले इदं वक्ष्यमाणं किमाहेत्यतः सार्धश्लोकद्वयेन तद्वाक्यमाह सेनयोरिति ॥ २१ ॥ अभि[illegible]नयैर्योगेकैः सह मया योद्धव्यम् ॥
॥ २२ ॥ दुर्बुद्धेर्धार्तराष्ट्रस्य प्रियं कर्तुमिच्छंतो येत्र समागतास्तान्योद्धुकामानवस्थितान्योत्स्यमानान् ब्रह्मवादिन [illegible]मि तावदुभयोः सेनयोर्मध्ये मे रथं
॥

स्थापयेत्यर्थः ॥ २३ ॥ एवं गुडाकेशेन गुडाकायाः निद्रायाः ईशेन जितनिद्रेणार्जुनेनोक्तो हृषीकेशः सर्वेंद्रियप्रेरकः श्रीकृष्णः दलद्वयमध्ये ॥ ॥ २४ ॥ भीष्मद्रोणप्रमुखतस्तदभिमुखेन तथा सर्वेषांच महीक्षितांराज्ञां प्रमुखत इति बुद्ध्या विविक्तेनान्वयः ॥ रथं स्थापयित्वा हे पार्थ अत्र अवृद्धाभ्योनदीमानुषीभ्यस्तन्नामिकाभ्य इति पृथाशद्बादपत्यैर्थे अण्प्रत्यये पार्थेतिरूपं ध्येयं समवेतान् युद्धार्थ मीलितानेतान् कुरून् पश्येत्युवाचेति ॥ ॥ २५ ॥ तत्रेत्यस्य विवरणं सेनयोरुभयोरपीति ॥ तथेति समुच्चये ॥ २६ ॥ तानवस्थितान् सर्वान् बंधून् समीक्ष्यैवेत्येवकारान्वयः ॥ २७ ॥ विषी

संजय उवाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ॥ उवाच पार्थपश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान् ॥ आचार्यान्मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा ॥ २६ ॥ श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान् बंधूनवस्थितान् ॥ २७ ॥ कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमंस्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥

दन्विषादं कुर्वन् विषादो नाम मोहनिमित्तकाच्छोकायन्मनोदौर्बल्यं यस्मिन् सति सर्वव्यापारोपरमो भवति स इति ज्ञेयम् इदमब्रवीदित्युक्तमर्जुनवाक्यमाह दृष्ट्वेमामित्यादिनाध्यायसमाप्ति हे कृष्ण सर्वलोककर्षक तदुक्तं गीताभाष्ये पंचमेऽध्याये नियमनादिना सकललोककर्षणात् कृष्णः ॥ तच्चोक्तं ॥ यतः कर्षसि देवेश नियम्य सकलं जगत् ॥ अतो वदंति मुनयः कृष्णं त्वां ब्रह्मवादिन इति च महाकौर्मे इत्युक्तेः युयुत्सुं योद्धुमिच्छंतं सम्यगवस्थितमिमं बंधुजनं दृष्ट्वा ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

मम गात्राणि हस्ताद्यवयवाः सीदंति विशीर्यंते ॥ षद्लृ विशरणगत्यवसादनेष्विति धातोः मुखे म्लानता च जायते। शरीरे कंपो रोमांचश्चजा
यते ॥ २९ ॥ धनुर्हस्तात्पतति त्वक् च परितप्यत एव अवस्थातुं च न शक्नोमि मनश्च मे भ्रमतीव ॥ ३० ॥ विपरीतानि निमित्तानि पश्यामि
केशव ब्रह्मरुद्रप्रवर्तक कश्च ईशश्च केशौ सृष्ट्यादिना प्रवर्तयतीतिव्युत्पत्तेः केशपदोपपदात् वृतुवर्तन इत्यतोंतर्णितण्यर्थात् डप्रत्यये रूपसिद्धेः॥
उक्तं हि स्थितप्रज्ञस्य का भाषेत्येतद्भाष्ये हिरण्यगर्भः कः प्रोक्तः ईशः शंकर एव च ॥ सृष्ट्यादिना वर्तयाति तौ यतः केशवो भवानिति ॥ युद्धे

सीदंति मम गात्राणि मुखं च परिशुष्यति ॥ वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥
गांडीवं स्रंसते हस्तात्त्वक् चैव परिदह्यते ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३० ॥
निमित्तानि च पश्यामि विपरीतानि केशव ॥ न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥
न कांक्षे विजयं कृष्ण न चराज्यं सुखानि च ॥ किन्नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥
॥ ३२ ॥ येषामर्थे कांक्षितन्नो राज्यं भोगाः सुखानि च ॥ त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा ध
नानि च ॥ ३३ ॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः ॥ मातुलाः श्वशुराःपौत्राः श्या
लाः संबंधिनस्तथा ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न श्रेयो लभ्यत इत्यत आह न चेति श्रेयश्च न पश्यामि ॥ आहवे युद्धे ॥ ३१ ॥ विजयादि फलं च नेच्छामि ॥ ३२ ॥ येषां प्रयोजननिमित्तं रा
ज्याद्यपेक्षितं नोऽस्माकं त इमे बांधवाः प्राणान् धनानि च त्यक्त्वा युद्धेऽवस्थिताः ॥ ३३ ॥ ते के इत्यत आह ॥ आचार्या इति नैवेच्छामीत्येव
कारान्वयः ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यदि मां युद्धान्निवृत्तमेते हन्युस्तर्हि घ्नतोपि हंतूनपि नैव हंतुमिच्छामीत्यर्थः ॥ हे मधुनामदैत्यमर्दनकैमुत्यन्यायेनाप्याह अपीति त्रैलोक्यराज्यस्या
पि हेतोः एतान् हंतुं नेच्छामि किमुत महीमात्रनिमित्तमिति ॥ ३५ ॥ किं च धार्तराष्ट्रान् निहत्य नोस्माकं का प्रीतिःकिमैहिकं सुखं न किमपि
नापि पारत्रिकं प्रत्युत पारत्रिकदुःखहेतुः पापमेवास्मानाश्रयेत् न जायत इति जनः अर्दयति संसारमित्यर्दनः जनश्चासावर्दनश्च जनार्दनः तस्य
संबुद्धिःउक्तं ह्येवमेव दशमगीताभाष्ये आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहृत् ॥ क्षेत्रदारापहारी च षडेते ह्याततायिन इत्युक्तलक्ष
णान् ॥ ३६ ॥ तस्मात्सीदंति मम गात्राणीत्यादिनोक्तोपपत्तिबलात् सबांधवान् धार्तराष्ट्रान् हंतुं वयं नार्हाः आततायिनमायांतं हन्यादेवाविचा

एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥३६॥
तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान् सबांधवान्॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥३७॥
यद्यप्येते न पश्यंति लोभोपहतचेतसः ॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥ कथं न
ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ॥ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

रयन् ॥ नाततायिवधे दोषो हंतुर्भवति कश्च नेत्युक्तेस्तेषामाततायित्वेन हंतव्यतया प्राप्तत्वेपि तद्धननप्रसक्त्याबंधूनामपि हननप्राप्तेर्न हंतुं वयं यो
ग्या इति भावः ॥ बंधुत्वेप्याततायिसंबंधित्वात्तेपि बंधुजना हंतव्या एवेत्यत आह स्वजनं हीति ॥ स्याम भवेम तद्दर्शनस्पर्शनसंभाषणादेरभाव
प्राप्तेरिति भावः ॥ ३७ ॥ कुत एवं बुद्ध्या तेऽनिवृत्ता इत्यत आह ॥ यद्यपीति ॥ एते दुर्योधनादयो राज्यलोभेनोपहतचेतसो नष्टधर्मज्ञानाः दोषं
पातकं च नपश्यंति यद्यपि॥३८॥तथापि हे जनार्दन जननरहितसंसारार्दन कुलक्षयकृतं दोषं प्रपश्यद्भिरस्माभिरस्माद्दोषान्निवर्तितुं कथं न ज्ञेयम्॥३९॥

कः कुलक्षयकृतो दोष इत्यत आह । कुलक्षय इति ॥ सनातनाःपरंपराप्राप्ताः कुलधर्माः क्षत्रियादिकुलधर्माः उतशब्दोऽप्यर्थेअवशिष्टं कृत्स्नमपि कुलमधर्मोभिभवति अधर्माक्रांतं भवति ॥ ४० ॥ वार्ष्णेय वृष्णिकुलोद्भव ॥ ४१ ॥ कुलस्यचेति पुत्रपौत्रसंतानस्य चेत्यर्थः ॥ एषां कुलघ्नानां पितरः लुप्तपिंडा लुप्तोदकाक्रियाश्च संतः नरके पतंति ॥ ४२ ॥ उक्तदोषमुपसंहरति दोषैरिति द्वाभ्याम् ॥ जातिधर्माः क्षत्रियत्वादिजातिप्रयुक्तधर्माः कुलधर्माश्च शाश्वताः परंपराप्राप्ताः ॥ ४३ ॥ उत्सन्नकुलधर्माणामुत्सन्नजातिधर्माणां चेत्यपि ज्ञेयम् अनुशुश्रुम प्रायाश्चित्तमकुर्वाणाः पापेषु नियता नराः ॥

कुलक्षये प्रणश्यंति कुलधर्माःसनातनाः ॥ धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥ संकरो नरकायैव कुलघ्नानां कुलस्य च ॥ पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ॥ उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ॥ नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥ अहो बत महत् पापं कर्तुं व्यवसिता वयम् ॥ यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥ ४५ ॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

अपश्चात्तापिनः कष्टान्निरयान्यांति दारुणानित्यादिवदाद्भिः वृद्धैः श्रुतवंतः स्म ॥ ४४ ॥ एवं बंधुवधस्य दोषहेतुत्वाध्यवसायेन संतप्यमानोऽर्जुन आह ॥ अहोबतेति राज्यसुखलोभेन स्वजनं हंतुं वयमुद्यता इति यत् तदेतन्महत् पापं कर्तुमध्यवसिताः निश्चयवंतो वयमहो बत महत्कष्टमिति ॥ ४५ ॥ एवं संतप्तः सन् मृतिमेवार्थयमान आह । यदीति । अकृतप्रतीकारमशस्त्रं तूष्णीमासीनं मां यदि शस्त्रपाणयो धार्तराष्ट्राः रणे हन्युस्तर्हि तत् हननं मे क्षेमतरमत्यंतं हितमेव भवेत् । बंधुवधदोषाभावाद्रणे हननेन गतिसंभवाच्चेति भावः ॥ ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ततः किं जातमिति धृतराष्ट्रहार्दं परिहरन्नि संजय इत्याह ॥ संजय उवाचेति ॥ संख्ये रणे रथोपस्थे रथमध्ये उपाविशत् ॥ कथं शोकेन कंपितचितः सन् सशरं चापं विसृज्येति ॥ ४७ ॥ इतिश्रीमद्भगवद्गीतार्थसंग्रहेराघवेंद्रयतिकृतेप्रथमोध्यायः ॥ १ ॥ ओं ततः किं जातमिति धृतराष्ट्रस्यापेक्षायां संजय उवाच तं तथेति ॥ ॥ उक्तदिशा कृपयाविष्टमेवं विषण्णमर्जुनं भगवानुवाच ॥ कुत इत्यादिद्वाभ्यांश्लोकाभ्याम् ॥ १ ॥ हेअर्जुन कुतो हेतोस्त्वा त्वां विषमे संकटे इदं कश्मलमुपस्थितमयं मोहः प्राप्तः ॥ यतः आर्यैरसेवितमस्वर्ग्यं स्वर्गविरोधि अयशस्करं च ॥ २ ॥ तस्मात् क्लैब्यं

संजय उवाच ॥ एवमुक्त्वा र्जुनः संख्ये रथोपस्थ उपाविशत्॥विसृज्य सशरंचापं शोकसंविग्न मानसः ॥ ४७ ॥ इतिश्रीमद्भगवद्गीतायामर्जुनविषादयोगोनामप्रथमोध्यायः ॥ १॥ संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ॥ विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ श्रीभगवानुवाच ॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ॥ अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ २ ॥ क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते ॥ क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठपरंतप ॥ ३ ॥ अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ॥ इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥४॥

कातर्यं मास्मगमः नैव प्राप्नुहि हे पार्थ तत् क्लैब्यं त्वयि नोपपद्यते योग्यं न भवति ॥ क्षुद्रं लाघवकरं हृदयदौर्बल्यं कातर्यं त्यक्त्वोत्तिष्ठ युद्धाय सन्नद्धोभव हेपरंतप परं शत्रुं तापयतीति शत्रुतापन द्विषत्परयोस्तापेरिति खशि खित्यनव्ययस्येति मुमागमः ॥३॥ पुनः स्नेहकारुण्यतया व्याकुलो भगवदुक्तं हितमजानन् अर्जुन उवाचकथमित्यादिपंचभिः श्लोकैः हे मधुदैत्यघातक ॥ शत्रुनिवर्हण संख्ये युद्धे भीष्मं द्रोणं कथमहमिषुभिर्बाणैः प्रतियोत्स्यामि कुतः यतस्तौ पूजार्हौ पूजनीयौ तौ ततइति ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥

नतु चैतदहनने राज्याप्राप्तेर्देहनिर्वाहोन स्यादित्यत आह ॥ गुरूनिति ॥ महानुभावान् भगवद्भक्त्यादिगुणसंपन्नान् द्रोणादिगुरून् अहत्वाइह लोके भैक्ष्यं भिक्षयोपलब्धमन्नं भोक्तुं श्रेयः परंपारत्रिकदुःखाभावादिति भावः ॥ हि यतोतो न योत्स्यामीत्यन्वयः ॥ न केवलं तेषां हनने पारत्रिकदुःखं इहाप्यतिदुःखमित्याह हत्वेति॥ अर्थ कामयंत इत्यर्थकामान् गुरून् हत्वा तैर्भुज्यमानान् तानेवभोगान्तद्रुधिरेण प्रदिग्धान् प्रकर्षेण लिप्तान् तदीयासनेष्वेवोपविश्य भुंजीय अनुभवेयं तदेतत्परलोकदुःखादतिशयितमितिभावः ॥ ५ ॥ पापमंगीकृत्य युद्धकरणेपि जयः संदिग्ध एवेत्याह न चेतदिति ॥ द्वयोर्मध्ये नोस्माकं कतरत् किंनाम गरीयः अधिकतरं भविष्यतीति न विद्मःतदेव द्वयमाह । यद्वा एतान् वयं जेष्यामःयदि

गुरूनहत्वा हि महानुभवान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ॥ हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान् ॥५॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ॥ यानेव हत्वा न जिजीविषामस्तेवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वा धर्मसंमूढचेताः ॥ यच्छ्रेयःस्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मांत्वां प्रपन्न म् ॥ ७ ॥

वा नोस्मान् एते जयेयुः जेष्यंतीति । किं चास्माकंजयोपि पराजय एव फलत इत्याह । यानेवेति यानेव हत्वा जीवितुंनेच्छामस्त एवैते धार्तराष्ट्राः संमुखेवस्थितास्तस्मात् ॥ ६ ॥ कार्पण्यदोषेण एतान् हत्वा कथं जीविष्याम इति कृपणतादोषेणाभिभूतशौर्यलक्षणस्वभावः धर्मसंमूढचेताः धर्मे संमूढं संदिग्धं चेतो यस्य स तथोक्तः । तादृशोहं त्वा त्वां पृच्छामि यच्छ्रेयः स्यात् भिक्षाटनयुद्धयोर्मध्ये निश्चितं तत् मेब्रूहि किं चाहं ते शिष्यः शासनार्हः अतस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्वमेव विचार्य यदुक्तं तत्कुर्वित्याहार्जुनः नहीति ॥ इंद्रियाणामुच्छोषणमतिशोषकरमदीयं शोकं यत्कर्मापनुद्यात् अपनयेत्तदहं न प्रपश्यामि राज्यलोभहेतुयुद्धकर्मैव तादृशमित्यत आह अवाप्येति॥यद्यपि भूमौ निष्कंटकं समृद्धं राज्यं प्रपश्यामि । तथा सुराणां देवानामाधिपत्यं च प्राप्स्यामि एवमभीष्टं सर्वमवाप्यापि शोकापनोदनोपायं न प्रपश्यामीत्यर्थः हत्वार्थकामानित्युक्तदिशा सर्वस्यापि दुःखहेतुत्वादितिभावः ॥ ८ ॥ ततः कि

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् ॥ अवाप्य भूमावसपत्नमृद्धंराज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥ संजय उवाच ॥ एवमुक्त्वाहृषीकेशं गुडाकेशः परंतपः ॥ न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषीकेशः प्रहसन्निव भारत ॥ सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ १० ॥

मकरोदर्जुन इति धृतराष्ट्राकांक्षां निरासयन्नाह संजयः एवमुक्त्वेति ॥ हृषीकेशं सर्वेंद्रियप्रेरकं गुडाकेशोजितनिद्रः परंतपः शत्रुतापनः गोविंदं गाः वेदवाचः प्रतिपादकत्वेन लभत इति गोविंदः तम् हत्याश्चर्यमाह शौर्यधैर्यादिगुणवतोप्येवं बुद्धिर्जातेति ॥ ९ ॥ ततः किं जातमित्यत आह तमुवाचेति ॥ हेभारतेति धृतराष्ट्रसंबोधनम् । प्रहसन्नेवेति परिहासकरवाक्योक्तिद्योतकत्वं हासस्य सूचनाय इवशब्दः ॥ १० ॥ श्रीगोपीवल्लभायनमः

श्रीनिवासतीर्थी श्रीव्यंकटेशहयग्रीवाभ्यांनमः॥श्री आदिगुरुभ्योनमः॥नमामितकौमयचक्रशंखपाणीमदामध्वकराभिपूज्यौ॥श्रीव्यासकृष्णौपरिपूर्णबोधांस्तथाजयार्यानितरान्गुरूंश्च॥१॥विदेश्च योगिनंवंदेयादवार्यगुरोर्गुरुम् ॥ छांदोग्यभाष्यटीकायाः कर्तारमहमादरात् ॥ २ ॥ अध्यात्मदर्शनेदक्षान्शापानुग्रहयोःपटून् ॥ कृष्णनाम्नःपितॄन्वंदेकृष्णपादाब्जदर्शिनः ॥ ३ ॥ श्रीमन्न्यायसुधायायैर्भावःसम्यक्प्रकाशितः ॥ तान्वंदेयादवाचार्यानिमद्विद्यागुरूनमम ॥ ४ ॥ अथैतत्कृपयाश्रीनिवासाख्यागुतसूरिणा ॥ गीताभाष्यस्यटीकायाःक्रियतेभावदीपिका ॥ ५ ॥ बुधैरपिसुदुर्बोधग्रंथेयन्ममसाहसम् ॥ तत्पारयंतुनिपुणागुरुपादरजःकणाः ॥ ६ ॥ ओं ॥सर्वज्ञकल्पाष्टीकाकाराजयतीर्थश्रीचरणाः श्रीमद्गीताभाष्यंयथावद्व्याख्यातुकामाविघ्नविघातादिप्रयोजनंस्वेष्टदेवतायालक्ष्मीपतेस्तथामूलगुरोरादिगुरोः परमगुरोः स्वगुरोश्चवंदनरूपमंगलंकृत्वाशिष्यशिक्षायैग्रंथादावुपनिबध्नंति **गुणगणानिलयमिति** वाङ्मनसव्यापाररूपग्रंथारंभसमयेसकलवाङ्मनसेदेवतायारमायावंदनस्यावश्यंकर्तव्यत्वात्पृथग्वंदनस्यचक्लेशोभिकतरस्तेषामव्यक्तामक्तचेतसामित्यादिनोक्तत्वात्भगवतानिराकरणान्नारायणविशेषणत्वेनैवसावंदनीयेतिसूचयितुंरमायाः पतिमित्युक्तम् **वासवीसूनुमिति** वसोरपत्यंस्त्रीवासवीसत्यवतीतत्सूनुंकानीनंबादरायणमित्यर्थः चशब्दाद्गुणगणनिलयमितिरमापतिविशेषणस्यात्राप्यनुकर्षः व्याचिख्यासितभाष्यमूलभूतगीताकर्तृत्वोपाधिनापृथङ्नतिरितिद्रष्टव्यम् व्याचिख्यासितभाष्यकर्तृत्वोपाधिनापूर्णबोधान्प्रणमति **मुनीति** मुनिमंडलालंकारभूतम् चशब्दाज्जगदघदहनमित्यस्यविशेषणस्यानुकर्षः परमगुरुम्

॥ टीका ॥ श्रीगुरुभ्योनमः श्रीवेदव्यासायनमः गुणगणनिलयंपतिरमायाजगदघदहनंचवासवीसूनुम् ॥ मुनिकुलतिलकंचपूर्णबोधंगुरुमपिपरमगुरुंचमेवंदे ॥ १ ॥

कृष्णाचार्य॥ श्रीगुरुभ्योनमः ॥ श्रीवेदव्यासायनमः॥श्रीकृष्णायनमः॥ओंश्रीशेषशायनंनौमिनिःशेषगुणबृंहितम्॥अशेषदोषरहितंविशेषज्ञंविमुक्तिदम्॥१॥वेदयन्वेदसारार्थंखेदयन्दुष्टद्रतंतमः मोदयन्साधुसंघातंकृष्णोष्णांशुःप्रसीदतु ॥ २ ॥ ध्वंसितान्यमतध्वांतंश्रीमध्वद्युमणिंमाश्रये ॥ जयतीर्थंनमुक्तार्थंमत्मार्थीत्यर्थसंस्तुतम् ॥ ३ ॥ रघुनाथपदाम्भोजभृंगमुत्तममुनीश्वरम् ॥ भावबोधकृतंवंदेभावबोधप्रसिद्धये ॥ ४ ॥ समस्तसल्लोकनुतोरुकीर्तिप्रशस्तविद्यांशुमसेनमूर्तिम् ॥ निरस्तनिःशेषजनांतरार्तिश्रीतिर्मलाचार्यमहंप्रपद्ये ॥ ५ ॥ भावबोधकृदुक्तार्थवदन्नेवतदुज्झितम् ॥ वाक्यादिव्याकरिष्येहंसफलस्तेनमेश्रमः ॥ ६ ॥ प्रारिप्सितग्रंथाविघ्नपरिसमाप्त्याद्यर्थंकृतमिष्टदेवतादिस्तुतिनतिरूपं मगलं शिष्यशिक्षार्थंग्रंथादौ निबध्नाति **गुणगणेति** ग्रंथस्य वाङ्मुखव्यापारसाध्यत्वात्तद्देवतात्वेनावश्यंवंदनीयारमापृथङ्नवंदनीयेति ज्ञापयितुंरमायाःपतिमित्युक्तम् नारायणप्रणामवद्व्यासप्रणामोप्यवश्यंकार्यःव्याचिख्यासितभाष्यमूलगीताकर्तृत्वादितिभावेनाह **जगदघदहनंचेति** वासवीसूनुं चेत्यन्वयःअत्रापि पूर्वविशेषणं ग्राह्यमिति ग्राहयितुं विशेषणानंतरं चशब्दप्रयोगःपरमगुरुमपिपद्मनाभतीर्थादिकं च मे गुरुंचअक्षोभ्यतीर्थं चेत्यर्थः १॥

१ स्मृत्वागुरुंपूर्वंगुरुमादिमूलगुरूंस्तथा ॥ देवतांवासुदेवंचविद्याभ्यासीतुसिद्धिभागितितंत्रसारोक्तेरितिभावः २ सूर्यम्

श्री. पद्मनाभ [illegible] ॥ [illegible] ॥ [illegible] पञ्चार्थः [illegible]
[illegible] यामाद्यौक्त्याऽन्यद्व
[illegible]
[illegible] ॥ [illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible] नम्यत्वप्रयोजनमिनि
टी० आनंदतीर्थ [illegible] ॥ [illegible] ॥ २ ॥ [illegible] विधानादिप्रयोजनं समुचित

भा० [illegible] ॥ [illegible] ॥ १ ॥

[illegible] देवताशब्दपर्यायः ॥ [illegible]
[illegible] ॥ [illegible] । देवशब्दो देवताशब्दपर्यायः [illegible]
[illegible] ॥ आनंदति ॥ [illegible] माण्यंसाचितम् ॥ गीताभा
[illegible] ॥ [illegible]
[illegible] ॥ [illegible] ॥ यच्चनिद्व प्राख्या
[illegible] ॥ ४ ॥ [illegible] ॥ [illegible] ॥ अत्र
[illegible]
[illegible]
१ [illegible]

श्री० देवताशब्दो [illegible] प्रतिपाद्य [illegible] इत्यादिवचनादभिमानिदेवतावाच्यपि भवति एवं च प्रकृते देवशब्दो देवताशब्दपर्याय इत्येवोक्ते अभिमानिदेवताप
रत्वापि [illegible] तत्रश्चामंगलं स्यात् [illegible] देवशब्दस्य प्रतिपाद्यार्थकत्वाभावाद्देवताशब्दपर्याय इत्युक्तमिति ज्ञातव्यम् देवताशब्दस्य प्रतिपाद्या
र्थकत्वेपि [illegible] देवताशब्द [illegible] देवशब्दो देवतापर्याय इति ॥ ननु गीताप्रतिपाद्यत्वस्य [illegible] मितिनज्ञायते नचगीतायाइतिवाच्यं
[illegible] ॥ सन्निधानादिति ॥ [illegible] गीतार्थमिति [illegible] ॥ तेनेति ॥ गीतायां देवं प्रतिपाद्यमिति कथनेनेत्यर्थः ॥ वी
त्युत्सर्गस्य [illegible] विशेषेणेति [illegible] ॥ सर्वदोषेत्यादिना [illegible] आह ॥ परमवैष्णवस्येति ॥ तस्यैकान्तभक्तोत्तम
त्वादिति भावः ॥ जीवत्वेति ॥ [illegible] निर्विशेष वादीति [illegible] निर्गुणं गुणमे [illegible] प्रतिपादनादिति भावः सर्वदे [illegible] युक्तयानजीवत्वरूपेण त

प्रतिपाद्यमाह ॥ सन्निधानाच्च भगवद्गीताया इति लभ्यते तेनेदानीं नारायणस्य प्रणामे समुचितमाचष्टे अज्ञानपारतंत्र्यादिभिः सर्वदोषैर्विशेषेण सर्व
दा सर्वात्मना वर्जितम् परिनोदिशनकालतो गुणतश्च पूर्णमिति विशिष्टमाचष्टे ॥ परमवैष्णवस्य भगवतो भाष्यकारस्य विष्णुरिष्टदेवतेति प्रसिद्धमेव यद्वा
भगवद्गीताप्रतिपाद्यत्वं नारायणस्य न परमस्य जीवत्वा [illegible] विशेषत्वादिरूपेण ॥ ॥ ॥ ॥ ॥

[illegible] दोषित्वापत्तेरित्याख्याति [illegible] जीवत्वनिर्विशेषत्व [illegible] प्रतीयमानानां कथानामन्यथाव्याख्यास्यमानत्वादित्याशय
कृ० ॥ अयमाशय ॥ [illegible] भगवद्गीताया [illegible] अतो देवशब्दोपि प्रतिपाद्यार्थः ॥ य स्वार्थिकप्रत्य
यांतशब्दप्रकृतिभूत [illegible] स्वार्थिकप्रत्ययांतदेवताशब्दप्रकृ
तित्वात् सामान्येनगुण [illegible] पर्याय इत्युक्तम् [illegible] प्रतिपाद्यार्थत्वसाधनेनविबुधादिशब्दव्यभि
चारः देवशब्दः [illegible] ॥ सन्निधानादिति ॥ [illegible] सन्निधानादित्यर्थः ॥ वीत्युत्सर्गार्थ
माह ॥ विशेषेणेति ॥ [illegible] ॥ सर्वदेति ॥ [illegible] आह ॥ परमेति ॥ ॥ ॥ ॥

१ एकान्तानान [illegible] ॥ [illegible] २ परमत्वं च मुलाक्षतारूपैः कदापिप्रतीपानाचरणादिना ज्ञेयम्

श्री० तन्नामगृणानीति॥ [illegible] ॥ महाभारतनिर्माताकर्त्ताद्वैपायनः बादरायणः ॥ कृष्णद्वैपायन सर्वपुरुषार्थैकबोधक ॥ वेदांतकर्ताब्रह्मैकत्वव्यंजकः पुरुषेशकृदित्यर्थः [illegible] बहुवचनमित्यत आह ॥ बहुवचनमिति गौरवादिति ॥ ननुद्रौण्यादिव्यासांतरसाहित्येन यत्नेतषामपि भाष्यकारस्य [illegible] गीतानामाह ॥ गीतनीति ॥ नकाञ्चिगादिगीतित्यर्थः ॥ कुत इत्यत आह ॥ मुख्यत्वेति ॥ मुख्यत्वेन [illegible] विशेषणशब्देनैव पाविशेषणे. यथाव्यासत्वेसकृष्णकृष्णस्यान्योविशेषणादित्युक्तन्यायेनद्रष्टव्यं ननुक्लेशतइत्ययंनसिस्मात्तृतीयांतात् [illegible] ॥ अत्र तृतीयैव कथम् कर्तृकरणयोस्तृतीयानकर्त्तरिकरणेनतृतीयाविहितायामेणबाणेनहतोवालीतिप्रयोगदर्शनात् ॥ प्रकृते [illegible] तृतीया ॥ कथं तर्हि नाच्छब्दात्तसिरित्याशंकायांनकर्तृकरणयोस्तृतीयेतिसूत्रप्राप्ततृतीयांतात्तसिः किं त्वन्यस्मादेवेत्याह ॥ इत्थंभूतलक्षणार्थतृतीयांतात्तसिरिति ॥ [illegible] तृतीयायास्तुक्लेशशब्दात्तसिरित्यर्थः अयंभावः॥इत्थंभूतलक्षणे ॥ कंचित्प्रकारंप्राप्तइत्थंभूतस्त

टी० किन्नामसर्ववेदोपवर्जितनयापरिपूर्णतया गेतिपदद्वयेनाख्यानि आनव्यासान ॥ अआअंअःपुराणविष्यासःशाखासहस्रकृदित्यकारस्यतन्नामसुपाठाद्बहुवचनं चगौरवादेव गीतेति भगवद्गीतेव। भिप्रयन ॥ मुख्यामुख्ययोर्मुख्येकार्यसंप्रत्ययइतिन्यायात् यद्यपिबह्वीगीताशक्तश्चाहं तद्वचने तथापि श्रोतृणांमंदां मतिमपेक्ष्याल्पमेवोच्यतइतिभावेनोक्तं॥क्लेशतइति॥इत्थंभूतलक्षणार्थतृतीयांतात्तसिः कृ० तन्नामास्मिति॥व्यासनामस्वित्यर्थः॥ननु व्यासस्यैकत्वात्तत्रैकवचनंयुक्तंबहुवचनंतुकथमित्यत आह ॥ बहुवचनंगौरवादेवेति ॥ [illegible] ननुबहुवचनगौरवादिति कथंमुनित्रयानुक्तत्वादितिचेत् नेदंव्याकरणशास्त्रीयंबहुवचनं [illegible] शिष्टप्रयोगरूपज्ञापकसिद्धम् तथाहि श्रुतौप्रयोगः नवैनुसवावं [illegible] ॥ [illegible] प्रयोगः कृत ॥ अत एव प्रयोग प्रामाण्यमाश्रित्य [illegible] केचित् आत्मनिगुरवे [illegible] आचार्याणांवचनाद्बहुवचनंयुक्तमित्याहुः ॥इत्थंभूतेति ॥ [illegible] गीतार्थत्वंवाप्रकारंप्राप्तइतिइत्थंभूतस्य लक्षणं [illegible] अतस्तत्रतृतीयेतिभाव. ननु [illegible] विशिष्टज्ञापकमेवविवक्षितंछात्रेणोपाध्यायो [illegible] कथमुक्तसूत्रेणात्रतृतीयेति चेत् सत्यं तथापिप्रकारविशिष्टप्रतिव्यावर्त

१ देशभेदात्कृत [illegible] ॥नीतिसिद्धो सततमासितिभार०ता० २ ससमीरं [illegible] इत्यादिबहुत्वंयाद्यर्थं [illegible]

[illegible] गध्यात्मप्रानीदिग्युदाहरणम् [illegible] पाध्यायत्वरूपप्रकारमानः प्रमानित्यं [illegible]

[illegible] त्वकत्वा [illegible]

[illegible] क्रियामात्यकत्वं [illegible]

[illegible] त्वव्यात्वकाखिलाभि [illegible]

[illegible] इत्यर्थः नन्वकन्यैवव्य [illegible] ॥ इ [illegible] ॥

उच्यते ॥ [illegible] सामान्यविशे [illegible]

[illegible] पेयम् ॥ यद्वागीतार्थवस्था

मीत्यत्रवचनं [illegible]

द्रष्टव्यः वचनस्य [illegible] काम्त्वमभिनित्योक्तं विवृणोति ॥ अथ [illegible] ॥ अथैतां

अ [illegible] ॥ [illegible] शिष्यशिक्षणार्थं प्रति

ज्ञानुकिमर्थमथैनिबद्धानीधा [illegible] प्रयोजनमस्याः अ

न्यैःस्वपक्षनिक्षिप्त [illegible] ॥ ॥ ॥

[illegible] अन्यथा [illegible] शिष्यशास्त्र [illegible]

[illegible] ननित्वंमूलक्षणइ [illegible] समभिव्याहारात्म

कार [illegible] ज्ञापक [illegible] ज्ञापकमिति [illegible] व्याख्यानपदिहापीत्यर्थः

स्यव्याहृतिज्ञापकमितिव्याख्यानोपपत्तेः॥ममभि [illegible]

[illegible] देनप्रत्याय [illegible]

[illegible]

१ [illegible] देशस्यत्रगीतार्थकानिष्ठत्वेनसामानाधिकरण्यमितिभाव

श्री० मुख्यार्थस्य [illegible] ॥ [illegible] ॥ [illegible] मुक्तिरूपपक्षमतत्त्वेनैसमासः ॥
[illegible] ॥ तस्येति ॥ [illegible] ॥ [illegible]
[illegible] ॥ [illegible] विशेषणइत्येवमादः ॥ उपाधिर्वार्तिककारादि
[illegible] ॥ [illegible] दर्शनात् ॥ [illegible] ॥ [illegible] ॥ विशेषणस्यसंबं
[illegible] ॥ [illegible] ॥ [illegible] विशेषणस्य संबंधवतिप्रत्य
[illegible] विशेषणयुक्तोऽपि [illegible] शुद्धसाध्यएवोपाधिः ॥
ततश्चवह्निद्रव्यत्वावच्छिन्नो [illegible] ॥ [illegible] विशेषणमात्रेण [illegible] शुद्धसाध्यव्यापक

टी० नचात्वर्शनिभंगोदोषः नस्यक्त्वाव्यविषयत्वात् [illegible] यदुपाधिलिंगनिमाध्येसंबंधविशेषणद्वयाद्यभियुक्तवाक्येदर्शनादिति॥१॥ननुप्राधान्ये नव्याख्येयताप्रामाण्येअधिकारिविषयप्रयोजनाभिसंबंधदुर्गमार्थत्वेचसतिसंभवतितत्कथंभगवद्गीतायाः प्रामाण्यादिकं सतिवातास्मिन्तथाविधग्रं

॥ नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेंद्रादिभिरर्थितोज्ञानप्रदर्शनायभगवान्व्यासोवततार ॥

थांतरपरिहारेणास्याएवव्याख्यानेकोहेतुरित्याशंक्यमहाभारतांतर्गतत्वाद्भगवद्गीतायास्तस्यप्रामाण्यादिसिद्धौतस्याअपि तत्सिद्ध्यतीत्याशयवान्महाभारतस्यप्रामाण्यादिकंसाधयितुमाहनष्टधर्मज्ञानेति ॥ ॥ ॥ ॥ ॥ ॥

[illegible] ॥ १ ॥ [illegible] ॥ अनन्यार्थतयाव्याख्येयेत्यर्थः ॥ इतरपरित्या
[illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] इत्यर्थः ॥ गोपालकृष्णानयः ॥ ॥
कृ० यतिभंगइति [illegible] गुणालंकारमहितौ शब्दार्थौ दोषव
र्जितौ [illegible] काव्या
[illegible] ॥ [illegible] तद्विशेषणयुक्ततदभावाभ्युक्तेत्यत्र [illegible]
धिः ॥ अवच्छिन्नसाध्य [illegible] ॥ [illegible] ॥ विशेषणस्य [illegible] विशेषणं आहितास्यादिस्य

श्री० अनयाकुटिलिकयेति । महाभारतांतर्गतत्वेनगीतायाः [illegible] । पृथ्वीति [illegible] । अ[illegible]
[illegible]
यथोक्तमिति ॥ [illegible] स्वधर्मादिनाह।
स्वकर्मक्षीयतइतिव्याक्यबलेननष्टत्वार्थंगाश्चाचष्टे नष्टश [illegible]
कर्मणिक्तप्रत्ययइतिभावः । केचित्तुनष्टश [illegible] धर्मस्यावनप्रवृत्तवमग्रहणतस्याद्दर्शनोक्त्वानिवृत्तधर्माचरणस्यैवासिद्धात [illegible] ॥ धृष्ठेति ॥
उत्तरत्रज्ञानवदर्शन [illegible] । ज्ञानस्यप्र [illegible]
[illegible]

किमनयाकुटिलिकया [illegible] ॥ मंत्र ॥ [illegible]
नपायचितुमशक्यत्वात् ॥ यथोक्तं ॥ [illegible] साध्येनहेतुनेति ॥ नष्टशब्दोऽदर्शनवाची नशअदर्शनइतिस्मरणात् धर्मोनिष्ट
निलक्षणः ज्ञानशब्देन [illegible] प्रकृत्यादिकंलक्ष्यते ॥ ॥ ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
ज्ञानशब्देनेति ॥ [illegible] ॥ ॥ ॥
[illegible]

क्तिरेवनलक्षणा । यद्वापुनर्ज्ञानशब्देनैवपरापरतत्त्व [illegible] परापरतत्त्व [illegible] शब्दस्यपरापरतत्त्वेलक्षणेव तथा [illegible] विवक्षित [illegible] अभिप्रायेणलक्ष्यत इत्युक्तमितिसंप्रदायविदः ॥ लक्षणायामिति ॥ [illegible] प्रयोजनमित्यर्थः उत्पादनीय पुरुषकृत्यातिशय. इदं ज्ञानशब्दोक्तं परापरतत्त्वरूपं ज्ञेयंधर्मवद्ज्ञात्वानोत्पादनीयमित्य त्वादित्याशय ॥ लक्षणाबीजसंबंधःप्रयोजनायोक्तंज्ञेयमिति ॥ अनुकंपा । दया । असज्जन ब्रह्मादीनांकृपालुतायाअयोगादाह ॥ लोकइति ॥ स्पृहिगृहीत्यादिनेति । स्पृहिगृहिदयिनिद्रा तंद्राश्रद्धाभ्यआलुच् । [illegible] । स्पृहयालुः । गृहयालुः । [illegible] । निद्रालुः । तंद्रालुः ॥ श्रद्धालुरित्युदाहरणानि ॥ व्याकरणांतरबलादिति ॥ पाणिनीय व्याकरणभिन्नचंद्रादिकृतव्याकरणांतरबलादित्यर्थः ॥ [illegible] प्रत्ययविधिरित्यभिमानः ॥ इदमुपलक्षणम् ॥ स्पृहिगृहीत्यत्रैवलुश विधानमात्रेणैवस्पृहयालुरित्यादिरूपनिष्पत्तिसंभवे [illegible] [illegible] कृपालुरितिसिद्धमित्युक्तत्वात्तद्दोषइत्यपिद्रष्टव्यम् अतएवास्वरसादाह ॥ कलशेति । [illegible] इत्यर्थः ॥ अन्यपदार्थानामिति ब्रह्मरुद्रेंद्राआदयोयेषामित्यत्रयेषामित्यन्यपदार्थत्वाद्देवाएवावश्यंवाच्याः संकीर्णबुद्धयो देवाइत्यन्यत्रोक्तेः ॥ अत कृपालुभिर्देवैरर्थित [illegible] ब्रह्मरुद्रेंद्रादिभिरिति [illegible] इत्यर्थः ॥ यद्वाविशेष्यभूतान्यपदार्थानांदेवानांच (अग्रिमपृष्ठेपश्यत)

लक्षणायां च प्रयोजनं ॥ यथा धर्मज्ञानत्वेनोत्पादनीयो न तथेदम् किंतु ज्ञानपरंपरैव तद्विषयानुष्ठेयतिज्ञापनं ॥ लोक इति सज्जनो विवक्षितः ॥ नष्टे अदर्शनं गते धर्मज्ञाने यस्य तस्मिन्लोके विषये कृपालुभिः ॥ यद्यपि स्पृहिगृहीत्यादिना कृपेरालुच् प्रत्ययो न विहितः ॥ तथापि व्याकरणांतरबलादवगंतव्यः ॥ कलशवाची वालुशब्दः ॥ कृपापूर्ण कलशैरित्यर्थः मोक्षसाधनयोर्धर्मज्ञानयोरदर्शनात्संसारेक्लिश्यमानान्सज्जनानवलोक्य उत्पन्नकृपैरिति यावत् ॥ अन्यपदार्थानांदेवानां ब्रह्मरुद्रेंद्रादिभिरिति यद्विशेषणम् ॥

कृत्यल्युटोबहुलमितिबाहुलकाश्रयणेनकर्मणिल्युट्टीकाश्रैतु ननएवधर्मस्यापिज्ञानभंगभवात्कर्मणइत्यर्थस्यादिनिभाव ॥ असज्जनस्य ब्रह्मादिकृपाविषयत्वाभावादाह ॥ सज्जनोविवक्षितइति ॥ धर्मज्ञानलोकेनिर्द्वंद्वः ततोनष्टशब्देनकर्मधारयइतिभ्रांतिनिरासः ॥ नष्टइति ॥ स्पृहिगृहीत्यादिनेति ॥ स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्यआलुजितिसूत्रेणेत्यर्थः ॥ ननुव्याकरणांतरमिदानीं ग्राह्यम् । मनोरमायांयङ्लुक्प्रकरणे [illegible] व्याकरणस्येदानीं ग्राह्यत्वाभावात् [illegible] ॥ कलशेति ॥ मृदां [illegible] ॥ कर्कर्यालुर्गलंतिकेत्यमरोक्तेरिति भावः ॥ ननुलोकस्यदुःखाभावाच्चिरकालाभ्यास [illegible] कृपा [illegible] ब्रह्मादिष्वयुक्ता ॥ [illegible] ॥ आगंतुकत्वेवास्वरूपमतस्तस्याहेतुत्वात्कृपोत्पत्त्ययोग एवेत्यत आह ॥ मोक्षसाधनयोरिति ॥ ननु ब्रह्मरुद्रेंद्रादिभिरित्यत्र देवाअन्यपदार्थाः संकीर्णबुद्धयोदेवा इत्युक्तेः ॥ ततश्चदेवैरि त्येवोच्यतां किमुक्तविशेषणेनेत्यतआह ॥ अन्यपदार्थानामिति ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्ब्रह्मरुद्रेंद्रादिरिति विशेषणं व्यावर्तकधर्मकथनमित्यर्थः ॥ प्रसिद्धप्रभावानामपीति । तदप्रसिद्धजगत्कर्तृत्वसंहर्तृत्ववर्षणादिप्रभाववतामित्यर्थः ॥ इदंकार्यं ज्ञानप्रदर्शनरूपम् ॥ नष्टधर्म ज्ञानलोके कृपालुभिर्ब्रह्माद्यैः प्रार्थितो मामिति ज्ञानप्रदर्शनाय यदा कृतवा धर्मनष्टनेत्येतत्किमिति शंकायामाह ॥ ज्ञानपदेनेति ॥ ननु धर्मज्ञानप्रदर्शनायेत्येवकस्मान्नोक्तमि त्यत आह ॥ मम्येति ॥ मोक्षजनकत्वे धर्मज्ञानयोर्भयं गितिभिप ॥ ननु धर्मोऽपि ज्ञानस्य मोक्षजनकत्वादि समाचलनत ज्ञानप्रदर्शनायेत्येवोक्तमितिभावः ॥ स्वशब्देनेति ॥ स्ववा चकधर्मशब्देनेत्यर्थः ॥ वक्तनुकूल्यमुपपादयति तु भगवच्छब्दं व्याचष्टे ॥ भगवानिति ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणेति वचनादित्यर्थः

तत्प्रसिद्धप्रभावानामपि भगवादितरेषामशक्यमिदं कार्यमिति ज्ञापनार्थं ॥ ज्ञानपदेन धर्मोऽप्युपलक्ष्यते ॥ समकक्षत्वनिरासाय स्वशब्देनाग्रहणं प्राप्य च पूर्णेनोत्तरेण च संबध्यते ॥ ज्ञानप्रदर्शनायार्थितो ज्ञानप्रदर्शनायावततारेति ॥ भगवान् समग्रज्ञानैश्वर्यवैराग्यादिगुणसंपन्नो नारायणो

ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदार्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महाभारतसंहितामचीक्लृपत्॥ ॥ ॥

व्यासरूपेणावततारेत्यर्थः ॥ ततः किं प्रकृत इत्यत आह ॥ ततश्चेति ॥

धर्मज्ञानेतिपूर्ववाक्यानुसारादाह ॥ धर्मोऽप्युपलक्ष्यत इति ॥ भगवच्छब्दस्य पदार्थत्वेन व्यासस्य परमात्मत्वलाभ इत्यत आह ॥ भगवानिति आप्त्यंतर्गततत्त्वज्ञानप्रदर्शनाय समग्रज्ञा नेत्युक्तम् ॥ षट्करणत्वं ज्ञानयितुमैश्वर्येति ॥ अविवक्षितपूर्वां सूचयति ॥ वैराग्येति ॥ भगवान्व्यासोऽवततारेत्यत्र व्यासस्य रूपान्तरेणावतारकर्तृत्वप्रतीतिनिरासाय भगवानिति उद्देश्यम् ॥ व्या सोऽवततारेति विधेयमितिभावेन व्याचष्टे ॥ नारायण इत्यादिना ॥ ननु तेश्चव्यासस्य तथामतीत्यर्थस्तत्रतत्र दृष्टत्वद्ग्रहणं च नगामावतारे सतिभारतंचकारेति वाक्यार्थः स्यात् ॥ नचासौयु क्तः ॥ गोषु दुह्यमानासु गत इतिवद्भारतकरणस्य व्यासावतारसमानकालत्वप्राप्तौ भारततात्पर्यनिर्णयविरोधात् ॥ तत्र द्वैपायनः सोऽथजगाम मेरुमित्यादिना मेरुगमनवेदोद्धरणसर्वशास्त्रब्र ह्मसूत्रकरणानंतरं चक्रे महाभारतनामधेयमिति (अग्रिमपृष्ठे पश्यत)

---

१ कामपूरकत्वादि

चशब्दएवार्थे इत्याशयेनोक्तम् ॥ **अवतीर्णत्वादेवेति** ॥ तत एवेत्यस्यार्थमाह ॥ **अवतारानंतरमेवेति** ॥ ननु द्वैपायनः सोऽग जगाम मेरुं चतुर्मुखाद्यैरनुगम्यमान इति महाभारततात्पर्यनिर्णये मेरुगमनानंतरं वेदोद्धारं कृत्वा पुराणादिसर्वशास्त्राणि विधाय ब्रह्मसूत्राणि च कृत्वा पश्चाच्चक्रे महाभारतनामधेयमिति भारतनिर्माणोक्तेः कथमवतारानंतरमेव महाभारतसंहिताभचीक्लृपदित्युच्यत इत्यत आह ॥ **विजानीयेति** ॥ [illegible] वेदोद्धारादेर्ज्ञानसाधनव्यापारत्वेन विजानीयत्वाभावादितिभावः ज्ञानप्रदर्शनायेत्येतदत्राप्यनुवर्तत इतिभावेनाह ॥ **धर्मज्ञानेति** ॥ पूर्वज्ञानपदेन धर्मस्याप्युपलक्षितत्वाद्धर्मेत्युक्तं कृपूसामर्थ्ये इति धातुव्याख्यानात्समर्थितवानित्युक्तं ॥ क्रियावाचित्वमाख्यातुमेकैकोर्थः प्रदर्श्यते प्रयोगतोऽनुगंतव्या अनेकार्था हि धातव इति वचनात् ॥ अचीक्लृपदित्यस्यकृतवानिति तात्पर्यार्थे अ.घ्र.प.॥ कृ.॥ भारतनिर्माणोक्तेरित्याशंक्य तत. शब्दस्तच्छब्दप्रकृतिक. पूर्वपरामर्शकश्चशब्दश्चावधारणार्थ इतिव्याचष्टे ॥ **तस्मादिति** ॥ यद्वा ननु शास्त्रे तत्र तत्र वक्तव्यं सर्वमुक्त्वा संहाराग्र्यं तत एवेत्युक्तेदर्शनात्प्रकृतेच वक्तव्यस्यासमाप्तत्वात्कथं तत एवेत्युक्तमित्यत आह ॥ **तस्मादिति** ॥ तच्छब्दपरामर्शे प्रतिपत्तिगौरवमित्यरुच्या व्यासो भूत्वा चेति प्रमाणस्याद्यव्याख्यामनुसृत्य तत एवेत्यस्यार्थमाह ॥ **अवतारेति** ॥ अनेन तत इत्यानंतर्यार्थो निपातश्चशब्दश्चावधारणार्थ इत्युक्तं भवति ॥ ननु भारततात्पर्यनिर्णये स लोकधर्माभिरिरक्षया [illegible] ज्ञानदानप्रत्यक्षत्वरूपदानमेरुगमनवेदोद्धरणतदुपदेशसर्वशास्त्रब्रह्मसूत्रकरणतदुपदे

तस्माद्धर्मज्ञानप्रदर्शनार्थमवतीर्णत्वादेव अवतारानंतरमेवाविजानीयव्यापारव्यवधानमंतरेणेति यावत् ॥ धर्मज्ञानप्रदर्शनाय महाभारतसंहितां महाभारताख्यं शास्त्रमचीक्लृपत् समर्थितवान्व्यासेति [illegible]

[illegible] भारतनिर्माणोक्तेः कथमवतारानंतरमेवेत्युक्तमित्यत आह ॥ **विजानीयेति** ॥ [illegible] ॥ अयं भाव ॥ [illegible] ज्ञानं हि व्याख्यानेन स्यात् व्याख्याने उपनयनं प्रयोजकं ॥ नह्यस्मिन्विद्यते कर्म किंचिदामौंजिबंधनात् ॥ [illegible] ॥ लोकधर्माभिरक्षया तदवश्यंभाव [illegible] तन्यायसंपादकत्वात्प्रयोजकम् ॥ अन्यथा [illegible] ज्ञानदानस्यासिद्धेः ॥ [illegible] ॥ व्याख्येयापस्थित्यभावेन व्याख्यानप्रवृत्त्ययोगात् ॥ अतो द्विजत्वप्राप्त्यादिकं सर्वं भारतनिर्माण [illegible] ॥ एतेन [illegible] धर्मादिप्रदर्शनार्थमवतीर्णस्य व्यासस्य प्रथममेव तत्प्रदर्शनमित्याद्युक्तं [illegible] ॥ उक्तरीत्या [illegible] विना तस्य कर्तुमशक्यत्वादिति दिक् ॥ भारतसंहितादिशब्दस्य सामवेदाद्यतिरिक्तग्रंथविशेषार्थत्वमशुभारतसंहिताशब्दस्यापि [illegible] शंकां निरस्यति ॥ **महाभारताख्यं शास्त्रमिति** ॥ कृपसामर्थ्य इति धात्वर्थानुगमायाह ॥ **समर्थितवानिति** ॥

१ मनगृत्कुलवासादिः ॥ तेनत्वस्यज्ञानरूपत्वं [illegible] सूचितइत्यपिकेचिदाहुः ॥

धर्मादीत्यत्रादिपदेन परमात्मतत्त्वग्रहणम् ॥ अपुरुषार्थमिति ॥ मृगतृष्णिकासाधनत्वमहानत्यन्ततत्त्वाभावादिति भावः ॥ द्वारेणेति ॥ तथा च मुक्त्यादिसाधनत्वात्पुरुषार्थत्वं युक्तमित्यवधे यम् ॥ धर्मज्ञानशब्दस्य ज्ञेयपरत्वं व्याख्यानतत्त्वादप्यत्र प्रत्यक्षतां वाग्यति ॥ अत्रेति ॥ मुख्यार्थ एव विषयस्य एव न ज्ञेयस्य इत्यर्थः ॥ कृपालुरितीति ॥ निरुपाधिपरदुःख प्रहाणेच्छा कृपा तद्वानित्यर्थः ॥ मोक्षस्वरूपनिर्णयेनापि किं प्रयोजनमित्यत उक्तम् ॥ वादिविप्रतिपत्तेरिति ॥ स्वर्गादीष्टाहितकाद्यनिष्टप्राप्तिपरिहारसाधनदर्शनमेवास्तीत्यत आह ॥ आत्यंतिकेति ॥ आत्यंतिकेष्टं मोक्षमुक्तमेव ॥ आत्यंतिकानिष्टनिवृत्तिरेव एवेति श्रेयस् ॥ धर्मज्ञानरूपमिति ॥ अत्र ज्ञानशब्दो ज्ञेयपरः ॥ ज्ञानार्थत्वे तस्यादर्शनादित्ये तद्युक्तं स्यादित्यज्ञानकमत्त्वादिति भावः ॥ वेदतुल्यत्वाच्चेति ॥ वेदस्थानीयत्वादित्यर्थः ॥ ननु वेदसमत्वादि यदि समस्तशास्त्रार्थनिदर्शनात्मकं चक्रे महाभारतनामधेयम् ॥ वेदोक्त

धर्मादिज्ञानमपुरुषार्थं कथं शास्त्रप्रयोजनमभिप्रेतवानित्यत उक्तं धर्मज्ञानलक्षणया द्वारा सज्जनानां मोक्षो भवेदित्यभिप्रायेणेति ॥ अत्र ज्ञानशब्दो मुख्यार्थ एव ॥ ग्रंथनिर्माणे भगवतः किं प्रयोजनमित्यत उक्तं कृपालुरिति ॥ संसारे स्वाभाविके मोक्षार्थं प्रयत्नःकार्कीयकाष्ण्यापनयनार्थप्रयत्नतुल्यइत्यत उक्तं इष्टानिष्टप्राप्तिपरिहारसाधनादर्शनात्संसारे क्लिश्यमानानामिति॥ मोक्षस्य पुरुषार्थतासमर्थनार्थवादिविप्रतिपत्तेस्तत्स्वरूपनिर्धारणार्थं चेष्टत्याद्युक्तं ॥ आत्यंतिकेति चोपस्कर्तव्यम्॥साधनं च धर्मज्ञानरूपं॥ ननु वेदानामुत्पन्नत्वात्तत एव धर्मादिप्रतीतिसंभवात्किं भारतनिर्माणेनेत्यत उक्तं ॥ सर्ववेदार्थेति ॥अनेन वेदाधिकारिणां त्रैवर्णिकानां पुंसां वेदार्थज्ञानोपायो भारतमिति सूचयति ॥ वेदानधिकारिणां वेदतुल्यत्वाच्चतन्निर्माणं युक्तमित्याशयवानाह॥ वेदेति ॥तदनेन परमाप्तिमूलत्वान्महाभारतस्य प्रामाण्यम् ॥

मं तत्त्व विधातृशंकरप्रधानकैस्तन्मुखतः श्रुतमिति महाभारततात्पर्यनिर्णयविरोधादिति संप्रदायांतर ॥ नन्वेतावता प्रबंधेन व्यासस्यावतरणे महाभारतकरणे च प्रयोजनमुक्तम् प्रामाण्यादिसिद्धिस्तु कथमत आह ॥ तदनेनेति ॥ परमाप्तेति ॥ वक्तृश्रोतृप्रसक्तीनामनुकूलता यत्र तथाभिस्तन्मूलत्वादित्यर्थः ॥ तथाहि महाभारतं प्रमाणं आप्तवाक्यत्वात् ॥ विमतमाप्तवाक्यमनुकूलेन वक्तानुकूलान् श्रोतॄन् प्रति तदीयहितसाधनत्वेनायोपदिष्टत्वात्संप्रतिपन्नवदिति ॥ तत्र भगवान्व्यास इति वक्त्रनुकूल्यमुक्तम् ॥ प्रमादाज्ञानसंशयविपर्यया॥भ्रिमपृष्ठेपश्यत॥ (कृष्णाचार्य) ॥ यद्यपि भारतं स चकार हेत्युक्तं कृतवानिति वक्तव्यम्॥तथाऽपि निर्माणव्याख्यानरूपार्थद्वयलाभायैवमुक्तम्॥निर्माणमात्रस्य धर्मादिज्ञानजनकत्वेन वैयर्थ्यात् ॥ननुइष्टानिष्टप्राप्तिपरिहारसाधनादर्शनादित्ययुक्तम् ॥ सर्वेषां तथाभूतानां दर्शनादित्यत आह आत्यंतिकेतीति॥ ॥ ॥ ॥

१ दर्शनंज्ञानं ॥ एवंचसाधनादर्शनादित्यस्य धर्मज्ञानाज्ञानादित्यर्थः ॥ तत्रधर्मश्चज्ञानंचेतयोरज्ञानंतस्मादितिविग्रहः ॥ अत्रधर्मस्यज्ञानाविषयत्वेऽज्ञानस्यज्ञानाविषयत्वंनयुज्यतेदर्शनज्ञानयोरैकार्थ्यात् ॥ ज्ञानशब्दस्यज्ञेयपरत्वेनधर्मपरमात्मतत्त्वानामदर्शनादज्ञानादित्यर्थस्मृतेरितिभावः ॥ २ दर्शनस्य

णां व्यासेऽसंभवाद्भगवत्त्वादेवातो विवक्षितार्थतत्त्वज्ञानकरणपाटवासिद्धिः ॥ विप्रलंभस्य श्रोतृदोषानिबंधस्य तदभावेनाभावनिर्णयादविशिष्यासिद्धिः ॥ एतत्रयं तत्कानुकूल्यम् ॥ ब्रह्मरुद्रा दिभिः संसारे क्लिश्यमानानामिति श्रोत्रानुकूल्यमुक्तम् ॥ वक्तृसाम्यादेव तत्त्वज्ञानयोग्यत्व न वक्तृ ब्रह्मादयो मोक्षयोग्याश्च सर्वे वक्तृप्रेमास्पदत्वेन तत्त्वज्ञानयोग्यत्वेन च प्रसिद्धाः अर्थितइतिश्रोतुः प्रयोजनोद्देशरूपं प्रसंगानुकूल्यमुक्तम् ॥ क्लेशनिवृत्तिगणस्य प्रसक्तत्वेन प्रसक्तदोषाभावादिति ॥ आप्तः परमत्व च विवक्षितार्थतत्त्वज्ञान [illegible] नवधिकत्वादिनाद्रष्टव्यम् ॥ नष्ट धर्मेत्यादिनेत्यत्रादिपदेन ज्ञानप्रदर्शनाय [illegible] मोक्षो [illegible] संग्रहः ॥ पर्यवसितमिति ॥ तयोर्विषयप्रयोजनयोरनन्यलभ्यत्वमहाभारतान्यग्रंथालभ्यत्वं सूचितमित्यन्वयः ॥ ॥ एतेनेति ॥ अवतारप्रयोजनोक्त्या [illegible] ॥ अतएव [illegible] ॥ प्रस्तुतइति ॥ निष्प्रयोजनत्वप्रयुक्तानारंभणीयताशंकानिरासायेति शेषः ॥ अवतारप्रयोजनाभिधानमिति ॥ नष्टधर्मेत्यादिना [illegible] ॥ संकरः [illegible] ॥ [illegible] परमकारुणिको भगवान् [illegible] ज्ञानादिनु भितशोकमोहभ्राशितविवेकतयानिजधर्मत्यागेनपरधर्माभिमानमर्जुनमज्ञानरहस्योपदेशकत्वेनतस्मान्छोकमोहसागरादुद्धार ॥ तमेवभगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिब

धर्मः परमपंचतत्त्वं विषयःतज्ज्ञानं चावांतरप्रयोजनं मोक्षःपरमं ॥ सज्जनाश्चाधिकारिण इत्युक्तं भवति ॥ नष्टधर्मेत्यादिना बहुशो विषयप्रयोजनाभिधानेनतयोरनन्यलभ्यत्वं सूचयति ॥ यदभावात्सततंसंसारो ब्रह्मादीनां प्रार्थनं यदर्थश्च भगवतोवतारः तद्भारतनिर्माणेनैवपर्यवसितमिति ॥ एतेनतदपि प्रत्युक्तं ॥ यदाह भास्करः ॥ शास्त्रप्रयोजनाभिधाने प्रस्तुतेऽवतारप्रयोजनाभिधानमसंगतमिति ॥ संकरः ॥ कृष्णावतारपुरस्कारेण गीतायाः संगतिमाह ॥ तदतिक्रमेण व्यासावतारपुरस्कारेको हेतुरिति चेत् ॥ कृष्णस्य बलकार्यत्वेन ज्ञानोपदेशस्य प्रासंगिकत्वं व्यासस्य ज्ञानकार्यत्वेन प्राधान्यमिति

ग्रंथेनिर्गीताभाष्येसंकरः कृष्णावतारपुरस्कारेण गीतायाः संगतिमाहेत्यर्थः ॥ बलकार्यत्वेनेति ॥ कृष्णावतारस्य [illegible] जनार्दन इत्युक्तेः ॥ प्रासंगिकत्वं ॥ हेतुरितिचेदिति ॥ ज्ञानकार्य त्वेनेति ॥ [illegible] ॥ प्राधान्यमित्यत्र [illegible] ॥ तथाचकृष्णस्यबलकार्यत्वेनज्ञानकार्यस्यप्रासंगिकत्वात्तदवतारपुरस्कारमतिक्रम्य व्यासावतारस्यज्ञानकार्यत्वेनज्ञानप्रवर्तनेतस्यप्राधान्यात् [illegible] व्यासावतारपुरस्कारेणसंगतिरुक्तेतिभावः (अ.ए.प.)॥ कृ०॥एतेनेति ॥ नष्टधर्मेत्यादिभाष्यस्य प्रामाण्यादिसूचकत्वकथनेनेत्यर्थः ॥ प्रासंगिकत्वमिति ॥अप्राधान्यमित्यर्थः ॥

॥ तर्हीति ॥ वेदानुक्तार्थयुक्तत्वेनेदमुत्पन्नत्वाभावादित्यर्थः ॥ नन्वीश्वरदृष्टार्थयुक्तत्वेनेश्वरज्ञानविषयीकृतार्थत्वमर्थलाभात्ज्ञानादमतिरिच्यत इत्यत आह ॥ ज्ञानदृष्टइति ॥ विशिष्टपराणांश
ब्दानांविशेषणांतरसमवधाने विशेष्यमात्रपरतायादृष्टत्वादत्रज्ञानदृष्टपदश्रवणात् दृष्टपदेनविषयीकृतत्वमेवग्राह्यमितिभावः ॥ स्वेत्यत्रस्वशब्देनव्यासः ॥ कुतःप्रामाण्यमिति ॥ अ
स्मदादिज्ञानवत्तज्ज्ञानस्यापि [illegible] निरिंद्रियत्वेन [illegible] प्रामाण्यस्यापिसंभवादितिभावः ॥ अनेनेति ॥ अस्य केवलेश्वरज्ञानदृष्टार्थयुक्तत्वकथ
नेनान्यग्रंथानांएतादृशमहिमाभावस्यलाभेनेत्यर्थः ॥ यथोक्तं ॥ महाभारतनामधेयंनिर्णयइति शेषः ॥ वेदोत्तममित्यस्य पूर्वार्धः समस्तशास्त्रार्थनिदर्शनात्मकं चक्रेमहाभारतनाम
धेयमिति ॥ एतदुभयमिति ॥ मंदाधिकारिकत्वं ब्रह्मादिसर्वाधिकारित्वं चकथं न कथमपियुज्यत इत्यर्थः ॥ मंदाधिकारिके न ब्रह्मादीनामधिकारःअर्थित्वाभावेनवैयर्थ्यात् ॥

वेदादिसंवादेनापि भारतस्य प्रामाण्यनिश्चय इत्याशयेनाह ॥ सर्वेति ॥ नैतावता वेदादिसमं भारतं किंतु तदनुक्तार्थस्यापि प्रतिपादनेन
ततोऽधिकमितिभावेनाह ॥ तदिति ॥ तर्हि निर्मूलत्वेनाप्रामाण्यं प्रसज्यत इत्यत उक्तं ॥ ईश्वरेति ॥ ज्ञानदृष्टो ज्ञानविषयीकृतः ॥ सर्व
ज्ञस्य झडिति स्फुरणार्थं स्वेत्यनुक्त्वा ईश्वरेत्युक्तं॥ईश्वरज्ञानस्य कुतःप्रामाण्यमित्यत उक्तं केवलेति ॥इंद्रियाद्यनपेक्षम् अनेन सत्स्वप्यन्येषु
ग्रंथेषु किमेतद्व्याख्यानेनेति परिहृतं ॥ ननु नष्टधर्मेत्यादिनामंदानुप्रतीदं निर्मितमिति सूचितं ॥ते च वेदैकदेशार्थमपि ज्ञातुमशक्तास्त
त्कथं सर्ववेदाद्युक्तानुक्तार्थवतोऽस्य प्रणयनं ॥ मैवं ॥ ब्रह्मादीनामप्यत्राधिकारित्वात् ॥ यथोक्तं ॥ वेदोत्तमं तच्च विधातृशंकरप्रधानकैस्त
न्मुखतः सुरैः श्रुतमिति ॥ कथमेतदुभयमित्यत आह ॥ सर्वेति रूपशब्दोऽभिधेयार्थः ॥ स्वंरूपं शब्दस्येत्यत्र रूपशब्देन प्रसक्तस्य बाह्यार्थस्य

ब्रह्माद्यधिकारिके न मंदानांसामर्थ्याभावेनासंभवस्तनापरिहृतं [illegible] कथमेतदुभयमित्याशयः रूपशब्दस्याभिधेयार्थे [illegible] निमित्तमितिमाह ॥ स्वंरूपमिति ॥ स्वंरूपं शब्दस्याश
ब्दसंज्ञा ॥ इहशब्दशास्त्रेस्वंस्वरूपं शब्दस्वरूपमेव प्रतिपाद्यं [illegible] बाह्योर्थः ॥ [illegible] शब्द एवग्राह्योनतुबहिः ॥ अशब्दसंज्ञेतीति ॥ दा
धाघ्वदाबित्यत्र घुशब्देन संज्ञा ग्रहणमेव स्यात् ननु [illegible] तदर्थमशब्दसंज्ञेति युक्तं ॥ शब्दानां धात्वादीनामधुरित्यादिसंज्ञा विधीयते तत्रतां संज्ञांविनेत्यर्थः ॥ तथाच तत्रार्थ
एवग्राह्य इति भावः ॥ यद्यत्ररूपशब्दोऽभिधेयपरोनस्यात् तदा बाह्यार्थप्रसक्त्यभावेन सूत्रे स्वशब्दग्रहणमनर्थकं स्यात् ॥ [illegible] ऽभिधेयार्थोरूपशब्दइति ॥ बाह्यार्थस्येति ॥
शब्दस्वरूपातिरिक्तार्थस्येत्यर्थः (अ०पृ० १०) ॥ कृष्णाचार्ये कैवल्य प्रामाण्योपपादकं यथास्यात्तथाव्याचष्टे॥इंद्रियाद्यनपेक्षमिति॥ अनेनप्रामाण्यापवादकानामिंद्रियादिदोषाणामभावादुत्प
न्नईश्वरज्ञानस्य प्रामाण्यमितिसूचितम्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ ननु भागवतस्यावगाह्यत्वानवगाह्यत्वे [illegible] आह ॥ सर्वेति ॥ [illegible] शब्दस्यार्थः ॥ [illegible] सामान्येनेत्यादिना ननु भागवतं दशार्थं यस्मिन्दशार्थाः सर्वत्राविवक्ष्यमाण [illegible] सामान्येनेत्युक्तम् ॥ [illegible] तदेव दर्शयति ॥तत्रैकोर्थ इति ॥ अपरोर्थः ॥ ननु सर्वप्राणिनामनवगाह्यरूपत्वे निरधिकारिकत्वं स्यादत आह ॥ केषां चिदेवेति ॥ [illegible] ॥ कश्चिदिति ॥ [illegible] वा व्याख्यानरूपो वेत्यर्थः ॥ अनवगाह्यरूपतायां अनवगाह्यार्थवत्तायां ॥ अनेकविषयत्वे ॥ [illegible] ॥ कथमेकवाक्यतेति ॥ [illegible] नैमित्तिकप्रादेशवाक्यताया अर्थैकगतविषयत्वादनेक विषयकत्वे मानस्यात्रिस्पष्टः ॥ तादृश्येन ॥ [illegible] आह ॥भगवदिति ॥ संकीर्णनयेति तदितरसाधारणधर्मवत्तयेत्यर्थः ॥ निष्कृष्टनयेति ॥ [illegible] प्रमाणोक्तत्वानुक्तत्वञ्चेत्ययुक्तमित्यतश्चाह

व्यावृत्तये स्वमित्युक्तत्वात ॥ स च व्याघातपरिहारार्थः सामान्येन द्व्यर्थं भागवतं तत्रैकोर्थः सर्वप्राणिनामवगाह्यः अपरः सर्वप्राणिनां नावगाह्यः किंतु केषांचिदेवेति कश्चिद्दोष इति ॥ अनवगाह्यरूपताया हेतुमाह ॥ परोक्षेति ॥ परोक्षोत्यंतगूढः ॥ ननु धर्माद्यनेकविषयत्वेस्य कथमेकवाक्यतेत्यत आह ॥ केवलेति ॥ केवलमेव भगवत्स्वरूपं परं मुख्यप्रतिपाद्यं यस्याःसा ॥ तथोक्ता ॥ धर्मादिकं तु तादर्थ्येना

तच्चोक्तम् लोकेशा ब्रह्मरुद्राद्याः संसारे क्लिशितं जनम् ॥

मुख्यप्रतिपाद्यमितिभावः॥भगवत्प्रतिपादनं च न संकीर्णनयाअपि तु निष्कृष्टनयेतिज्ञापनाय स्वरूपेत्युक्तं॥कुत एतत्प्रतिपत्तव्यमित्यत आह ॥ तच्चोक्तमिति ॥यदेतत्सुधर्मेत्यादिनोक्तम् तल्लोकेशा इत्याद्यागमचतुष्टयेनोक्तं॥नकेवलमस्माभिरुच्यते श्लो भिन्नक्रम इत्याह ॥ यदेतादित्यादिना ॥

॥ रु० ॥ इत्युक्तत्वादिति ॥ [illegible] शास्त्र [illegible] न बाह्योर्थः [illegible] वर्णयित्वेत्यर्थः काशिकादावुक्तः॥ एवं च रूपशब्दस्यार्थस्वार्थत्वलाभः ॥ [illegible] बाह्योर्थ इति [illegible] स्यादितिभावः ॥ ननु परोक्षत्वं नानवगाह्यरूपत्वे हेतुः ॥ [illegible] आह ॥ परोक्षोत्यंतगूढ इति ॥ संकीर्णनयेति ॥ तदितरसाधारणधर्मवत्तयेत्यर्थः ॥ निष्कृष्टनयेति ॥ स्वरूपपदेनान्य[illegible] ॥ ॥ ॥ ॥ ॥ ॥

१ अनवगाह्यरूपमर्थोस्येति [illegible] श्रवणाद्यधिकारजनकत्वेनैव उपोध्यं

॥ श्री० ॥ नन्वधिकारेतिवक्तव्येऽधीकारेति दीर्घः कुतो नियामकाभावादित्यत आह ॥ उपसर्गस्येति ॥ उपसर्गस्य घञ्यमनुष्ये बहुलम्॥अत्र ढ्रलोपेपूर्वस्य दीर्घोण इति पूर्वसूत्राद्दीर्घ इत्यनुवर्तते घञंतोत्तरपदे परेऽमनुष्येऽभिधेये प्रादेरुपसर्गस्य बहुलंदीर्घः स्यात् परिहासः परीहासः अमनुष्येतिकिं निषादः तथाचप्रकृतेकरणे अस्मानुपश्चितस्य लोपे अकारमात्रे उ वेरिति ऋवर्णस्य अचोञ्णितीति ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यादि तिपराकाररूपवृद्धौ कारशब्दस्य घञंतस्य निष्पन्नत्वात्तस्य परतः सत्त्वान्मनुष्यस्याभिधेयत्वाभावादधी त्युपसर्गस्य दीर्घे सति अधीकारेतिरूपम् ॥ ननुस्त्रियादिकमितिकथम् ॥ स्त्रीआदिकमिति स्थिते इकोयणचीति यणादेशे स्त्र्यादिकमिति स्यात् नच वाच्यं स्त्रियाः स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये पर इति ईकारस्य इयङादेशे स्त्रियादिकमिति युक्तमिति तत्राजादिप्रत्ययपर एवेयङो विधानात् प्रकृते च आदीत्यस्याजादित्वेपि शब्दत्वेन प्रत्ययत्वाभावादत आह ॥ स्त्रियादिकमितीति ॥१॥ च शब्दादन्यावतारे भूत्वेति प्रतीयते तथात्वेऽन्यावताररूपैश्चेति पुनरुक्त्यापत्तेरतोऽवधारणार्थश्चशब्द इत्याह॥व्यासो भूत्वैवेति ॥ एवकाराभिप्रायमाह ॥ विलंबमिति ॥ अभूत्वेति ॥ अत्रापि चशब्द एवार्थ ॥ तथा च भगवान्मूलरूपी व्यासोऽभूत्वा च व्यासत्वेनानवतीर्यैव मूलरूपेणेति यावदित्यर्थः ॥२॥३॥ ॥ ॥

उपसर्गस्य घञ्यमनुष्ये बहुलमित्यतोऽधीकारेतिदीर्घः ॥स्त्रियादिकमिति छांदस इयङ् १ व्यासो भूत्वा च व्यासो भूत्वैव विलंबमकृत्वा

वेदार्थज्ञमधीकारवर्जितं च स्त्रियादिकं॥१ ॥ अवेक्ष्य प्रार्थयामासुर्देवेशं पुरुषोत्तमम् ॥ ततःप्रसन्नो भगवान् व्यासो भूत्वा चेतेन च॥२॥अन्यावताररूपैश्च वेदानुक्तार्थभूषितं॥केवलेनात्मबोधेन दृष्टंवेदार्थसंयुतम्॥ ३ ॥

अभूत्वा मूलरूपेणचेतिवा॥ तेन व्यासरूपेण २ अन्यावताररूपैश्च ३

ऋ० उपसर्गस्येति ॥ उपसर्गस्य घञंते उत्तरपदे बहुलं दीर्घः उपसर्गघञंतसमुदायेनामनुष्येऽभिधेय इति सूत्रार्थः ॥ छांदस इयङिति॥तन्वादीनां छंदसि बहुलमिति यांकादिति भावः नन्वार्षग्रंथे छंदसि विहितस्य कार्यस्य कथं प्रवृत्तिः गौणमुख्यन्यायेन मुख्ये छंदस्येव तत्प्रवृत्तेरिति चेन्न ॥ प्रकृतवार्तिके छंदःशब्दस्य स्वरितत्वेन प्रतिज्ञानात्स्वरितत्वप्रतिज्ञास्थले चगौणमुख्यन्यायाप्रवृत्तेः यथोक्तं महाभाष्ये स्वरितेनाधिकार इति सूत्रे विशेषायाधिकं कार्यमिति ॥ स्वरितत्वप्रतिज्ञास्थले न गौणमुख्यन्यायो न प्रवर्तत इति तदर्थः ॥ तथा च स्त्रियादिकमित्यस्यार्षत्वेन छंदःसदृशत्वात्तत्रापि छांदसकार्यप्रवृत्तेरिति १. ननु समुच्चेयाभावाच्चशब्दो व्यर्थ इत्यत आह॥भूत्वैवेति ॥ एवकारार्थमाह ॥ विलंबमकृत्वेति ॥ विजातीयव्यापारव्यवधानमकृत्वेत्यर्थः ॥ अवतारानंतर्यरूपविशेषसूचकत्वात्साधकर्त्वमितिभावः ॥ नन्वेवं तर्ह्यनेनैव व्यासकृतत्वस्याप्ति लाभात्तेनचेति व्यर्थमित्यतो योजनांतरं दर्शयति ॥ अभूत्वेति ॥ तदर्थमाह ॥ मूलरूपेण चेतीति ॥ चशब्दा अन्योन्यसमुच्चयार्था इतिसूचयितुं मौलिकचशब्दानुवादः ॥ ननु तेनेत्यनेन भगवत्परामर्शीमूलरूपार्थकेण व्यासोभूत्वेत्यनेन पुनरुक्तिरित्यत आह ॥ तेनव्यासरूपेणेति ॥ २ ॥ मूलरूपव्यासरूपान्यावताररूपाणामन्योन्यसमुच्चयसूचनायान्यावताररूपैश्चेत्यनुवादः ॥ ३ ॥

श्री० ॥ परशब्दस्य भिन्नार्थत्वं वारयति ॥ **परमिति** ॥ फलितार्थकथनम् **अतिशयेनेति** ॥ कोऽसौ पंचमो वेद इत्यस्य वेदमुत्तरमित्यतः पूरयति ॥ **पंचमवेदाख्यइति** ॥ वचनव्यत्यय दोषो ऽप्यनेन परिहृतो भवतीति ध्येयम् ॥ इतीति ॥ अयमेको विधिः स च संभिन्नइति द्वितीयो विधिरिति ज्ञेयम् भेदस्य स्वतःसिद्धत्वादाह ॥ **एकार्थतयेति** ॥ मिश्रीभावाख्यसंगतत्वा र्थांगादिकार्थतयेत्युक्तम् इति ग्रंथाः संभिन्ना इति वाच्ये इति शास्त्र पुंगवः संभिन्न इत्येकवचनं कुत इत्यत आह ॥ **इत्यनेकेष्विति** ॥ एकार्थतया संगतत्वाभिप्रायेणेत्यर्थः ॥ प्रसिद्धभा रतस्य व्यासकृतस्य ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितमिति वेदसमत्वोक्त्या वेदादि परत्वायोगादाह॥ **आदिभागवतमिति**॥भारतं व्यासरूपेण कृतमिति सिद्धत्वान्नोक्तम् ॥ ४ ॥ ब्रह्मशब्देन चतुर्मुखग्रहणे स्वयं व्यासो हिरण्यगर्भो ब्रह्मा वा तत्प्रसादत इति वचनविरोधः परिहाराय ब्रह्मशब्दार्थमाह ॥ **ब्रह्मेति** ॥ ब्रह्मशब्दस्य बृहस्पतिवाचित्वं च यस्मिन्ब्रह्मागज नि पूर्वेणेति वैदिकप्रयोगसिद्धमिति भावः ॥ अपिशब्दस्तु उपनारदीयग्रंथे पूर्वप्रकृतसमुच्चायकइति द्रष्टव्यम् ॥ ननुतर्हिभारतस्य दैवैरवगाह्यार्थत्वं किंविरोधइत्यत आह ॥ **कृत्स्नमिति**

परमतिशयेनोत्तमं ॥ कोऽसौ पंचमो वेद इत्यत आह ॥ भारतमिति ॥ पंचमवेदाख्यः शास्त्रपुंगव इति संभिन्नः प्रभिन्नः ॥ अथवेतिशा

वेदादपिपरंचक्रेपंचमंवेदमुत्तमं ॥ भारतंपंचरात्रंचमूलरामायणंतथा ॥ पुराणंभागवतंचेतिसंभिन्नःशास्त्रपुंगवइ तिनारायणाष्टाक्षरकल्पे ॥४॥ ब्रह्मापितन्नजानाति ॥ ॥ ॥

स्त्रपुंगवः सचसंभिन्नः एकार्थतया संगत इत्यनेकेष्वपि ग्रंथेष्वेकवचनमिति योज्यं ॥ अत्र पंचरात्रं नारायणावतारेण कृतं ॥ मूलरामायणं हयग्रीवावतारेण कृतं॥आदिभागवतं मूलरूपेण ४ ब्रह्मापि बृहस्पतिरपि कृत्स्नमितिशेषः॥ ॥ ॥

॥ कृ० ननु परशब्दस्योत्तमार्थत्वादुत्तमशब्देन पुनरुक्तिरित्यत आह ॥ **अतिशयेनेति** ॥ इदंचोत्तममित्यनेनान्वेतीति वक्तुमुत्तममित्यनूदितम् ॥ ननु शास्त्रपुंगवो भारतादिभेदे न भिन्न इत्ययुक्तम्॥ ऋगाद्या भारतं चैव पंचरात्रमथाखिलम्॥ मूलरामायणं चैव शास्त्रमित्यभिधीयत इत्यादिविरोधात् ॥ अनुपयुक्तश्च कोऽसौपंचमो वेद इति प्रश्नोत्तरालाभादित्यत आ ह ॥ **पंचमवेदाख्यइति** ॥ ननु भारतादिभेदेन पंचमवेदस्यानेकतया पंचमवेदमित्येकवचनानुपपत्तिरित्याशंकानिरासकतयापि व्याख्येयं ॥ **अथवेति** ॥ ननु मूलरूपादीनां भारतादीनां च विषमसंख्यात्वात्स्मृतिविरोधाच्च न यथासंख्यमन्वयः यथायोगमन्वयस्तु दुर्ज्ञेय इत्यत आह ॥ **अत्रेत्यादिना** ॥ **नारायणावतारेण कृतमिति**॥ पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति भारतोक्तेरिति भावः ॥ भारतोक्तं वक्तृत्वं च कर्तृत्वमेव ॥नारायणस्य स्वतः सर्वज्ञत्वेन सजातीयोच्चारणमनपेक्ष्योच्चारयितृत्वात् ॥तस्यैव च कर्तृशब्दार्थत्वात् ॥ तेन प्रकृतासिद्धि रिति बोध्यं ननु बृहद्ब्राह्मे पंचरात्रसंहिता इत्युक्त्वा इदं सर्वं जगन्नाथ निःसृतंतु रमाननादिति पंचरात्रस्य हयग्रीवकृतत्वोक्तेस्तद्विरोधइति चेन्न ॥ तत्र कतिपयसंहितानामेव तत्कृतत्वोक्तेः ॥ १ भागवतंचेतिइतिशब्देन एतेग्रंथाःपंचमोवेदइत्यन्वयः सूचितः ॥ तथाचवचनव्यत्ययदोषइतिभावः २ भेदेपिप्रकर्षोमिथोऽविरोधेन ३ पंचमंवेदमुत्तममिति ॥ ॥ ॥

श्री० तत्कृत्स्नं भारतोक्तं [illegible] ॥ सोऽयं [illegible] ॥ जानाति ॥ पूर्वोक्तेनेति ॥ [illegible] ॥ ५ ॥ ॥ ॥ कृष्णाचार्य अत
[illegible] ॥ अत पुनः [illegible] विरोध इत्यलम् ॥ हयग्रीवरूपेणे
ति ॥ [illegible] हयग्रीव [illegible] परिशेषेण मृ
[illegible] ॥ अतएव मूलरूपादिपु
[illegible] ॥ कपिलमहिदासादेरपि [illegible] तदुपपत्ते-
[illegible] पंचरात्रादिकर्तृत्वोपपत्ते ॥ श्रीमायामत [illegible] स्यापि पंच
[illegible] ॥ यो च टीकायां विशेषत
[illegible] परिहरन्नाह

सर्वोऽपि जनो जानाति जानाति ॥ [illegible] प्रवदंति ॥ भारतं चापीति पूर्वोक्तेन समुच्चयः ॥ ५ ॥ ॥

ईषत्सर्वोऽपिजानाति ॥ बह्वर्थम्हापयस्तुभारतंप्रवदंतिहीत्युपनारदीये ॥ ५ ॥

आदिभागवतमिति ॥ इदं चद्वितीयस्कंधोक्तरीत्या [illegible] ग्रंथविशेष इत्यप्याहुः ॥ भारतं पुराणं च व्यासकृ
तं कृतमिति प्रसिद्धत्वात् [illegible] ॥ कपिलादिकृतभा
रतादौ [illegible] कपिलादिकृतभारतादिक्रमसदृश एव सर्गे
सर्गेन्यथैव तु इति [illegible] ॥ ननु [illegible] स्वयं व्यासो हि नेदृश ब्रह्मा वा तत्प्रसादत इति वा
[illegible] इत्यत आह ॥ [illegible] ॥ ईषत्सर्वोऽपि जानातीत्यत्रो
[illegible] इत्यत आह ॥ [illegible] ॥ जानाती
ति ॥ ननु [illegible] बह्वर्थं भारतं [illegible] बह्वर्थज्ञानाभावे तत्क
[illegible] ॥ नच भारतं बह्वर्थं [illegible] इत्यत आह ॥ बह्वर्थमिति प्रवदंतीतिः पूर्वोक्तेनेति

श्री० दशभ्योऽवराइति प्रतीतिवारणायाह॥ दशेति॥ येषु अर्थेषु तेऽर्थाः तथा दशावरा॥६॥ ननु बुध अवबोधने ऽस्मात्कर्तरिण्वुल्प्रत्यये युवोरनाकावित्यकादेशे गुणे च सति बोधकेति रूपम् ॥ तथा च तृजकाभ्यां कर्तरि ॥ कर्तरि तृजकाभ्यां योगे षष्ठी न समस्यते अपांस्रष्टा सतामर्चक इतिवत् विष्णोर्बोधकमित्येव स्यान्नतु विष्णुबोधकमिति षष्ठ्या समास इत्यत आह॥

॥ याजकादेरिति ॥ याजकादिभिश्च याजक इति षष्ठी समस्यते ॥ द्विजस्य याजको द्विजयाजक इति प्रतिप्रसवादत्रापि षष्ठ्या समासो युक्त इति भावः ॥ याजकादिगणे पाठाभावादुक्तम् ॥याजकादेराकृतिगणत्वादिति ॥ एवमुक्त्वा एवमाकारेण ये शब्दाः सर्वेऽप्यत्र गणस्था इत्याकृतिगणशब्दार्थ इत्याह ॥ करणार्थेति ॥ बुध अवगमने ऽस्मात्बुध्यते ऽनेनेति करणे घञि तस्य लोपे उपधाभूतस्या कारस्य लघूपधगुणे बोध इति रूपम् तथा च करणार्थ घञंतेन बोधशब्देन षष्ठ्यंतविष्णुशब्दस्य समासोपपत्तिरितिभावः॥

कृ० ॥ स्कंदपुराण एव पूर्वोक्तमित्यर्थः ॥ ७ ॥ दशभ्यो ऽवरा इति व्याख्याने यस्मिन्दशार्था इति स्मृतिविरोध इत्यत आह॥दश अवरा येष्विति ॥नन्वनेनावरपक्षे भारतं दशार्थं न तुततो न्यूनार्थकमिति प्राप्तं तथा च भारतार्थस्त्रिधाप्रोक्तः। भारततात्पर्यनिर्णयविरोध इति चेन्न यतस्तत्र सत्यामितिकोपरितनस्वरूपमवर्प्राण्यवगाह्यानवगाह्यार्थविवक्षया त्रित्वमुक्तम् अत्र पुनरापरितनस्वरूपमवर्प्राण्यनवगाह्यार्थपक्षएव भारतस्थानि सर्वाण्यपि पदानि प्रत्येकं दशार्थानीत्यभिमतम् अत एव सर्वत्रेति नज्ञेयाः सर्वजंतुभिरिति चोक्तम्॥ ततश्च न कोपि विरोधः ननु दशार्थापेक्षयाधिकार्थत्वे प्रमितेऽवरपक्षे दशार्थत्वं वाच्यम् तदेव कुत इति चेत ॥ भारतांतर्गतविष्णुसहस्रनाम्नः विष्णोः सहस्रनामापि निरंतरशतार्थकमिति शतार्थकत्वस्य प्रमितत्वेन सर्वसामंजस्यात्॥ ६ ॥ ननु कथं विष्णुबोधकमिति समासः तृजकाभ्यां कर्तरीतिसूत्रेण कर्त्रर्थतृजकाभ्यां षष्ठ्याः समासनिषेधादित्याशंक्य याजकादिभिश्चेति प्रतिप्रसवसूत्रेण समास इत्याह ॥ याजकादेरिति ॥

दशअवरा येषु तेतथा ॥ ते अर्थायेष्विति विग्रहः ॥६॥याजकादेराकृतिगणत्वाद्विष्णुबोधकमिति समासः ॥ करणार्थघञंतेन वा समासः

ब्रह्माद्यैःप्रार्थितोविष्णुर्भारतंसचकारह॥यस्मिन्दशार्थाः सर्वत्रनज्ञेयाः सर्वजंतुभिरितिनारदीयेद्भारतंचापिकृतवान्

॥ आकृतिगणत्वादिति॥ ॥ शिवशमरिष्टस्य करे इत्यादौ करे इत्यादिनिर्देशात्पचादेराकृतिगणत्वे तत्प्रयोजकौ हेतुश्चेत्यादिनिर्देशाद्याजकादेरप्याकृतिगणत्वस्यांगीकार्यत्वादितिभावः उपलक्षणमेतत् जनिकर्तुः प्रकृतिः ॥ तत्प्रयोजको हेतुश्चेतिनिर्देशात्तृजकाभ्यामिति निषेधोऽनित्य इति वा शेषषष्ठ्या समास इति वा समाधानमवधातव्यम् आकृतिगणत्वस्य शाब्दिकैरनंगीकारात्पक्षांतरमाह ॥ करणार्थेति ॥ बुध अवगमन इत्यस्य बुध्यतेऽनेनेति करणे घञि लघूपधगुणे च निष्पन्नेन बोधशब्देन विष्णुशब्दस्य षष्ठीसमास इत्यर्थः न नु कथं करणे घञ् ल्युटा बाधात् न च वासरूपविधिः क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीत्युक्तेरिति चेत् ॥ उच्यते ल्युडपवादेनात्र हलश्चेति घञ् न च पुंसि संज्ञायामित्यतः संज्ञायामित्यनुवृत्तेः प्रकृते चासंज्ञात्वात्कथं हलश्चेति घञिति वाच्यम् ॥ बाहुलकाश्रयणात् ॥

॥ श्री० ॥ कप्रत्ययवैयर्थ्यमाशंक्याह ॥ पश्चादिति ॥ [illegible] समासान्तः आदिपदादज्ञानरूपित्वयोर्ग्रहणम् ॥ [illegible] नतिक्रमणात्परतः प्राक् कप्रत्ययाधिकार
इत्युक्त्वा अल्पे अल्पार्थे प्रागादिकृतः कप्रत्ययः स्यात् [illegible] कम्यानम [illegible] कुत्सिते [illegible] कुत्सितोश्वः अश्वकः
एव च प्रकृतेऽल्पार्थकप्रत्ययेऽल्पोविष्णो [illegible] सम्भवार्थमित्यर्थोद्रष्टव्यः न नु [illegible] इत्युक्त्वात् अज्ञानाद्यर्थोपपादनं कथमिति चेन्न ॥ अज्ञानाद्यर्थोपपादनाय नात्रादिपद
किंनाम वस्तुत अल्पाद्यर्थे कप्रत्ययो [illegible] इत्यर्थः ॥ एवं च प्रकृते [illegible] कप्रत्ययो द्रष्टव्यइत्याहु वस्तुतस्तु आदिपदात् स्वार्थे
कप्रत्ययो ग्राह्य स्तथा च विष्णुर्[illegible] ॥ [illegible] ॥ यथासंभवमिति॥
लोकेशा ब्रह्मरुद्राद्याः [illegible] क्लिश्यमाना [illegible] मित्यनेन वेदार्थाज्ञानाचेत्यस्य अवि
कारवत्तिं च [illegible] नष्टधर्मज्ञानलोककृपालुर्भगवान्तः प्रसन्न इत्यनेन
ज्ञानप्रदर्शनार्थेत्यस्य भगवान्व्यासो [illegible] वेदानुक्ता

पश्चादल्पाद्यर्थकः॥ ७ ॥उत्तमामित्युक्तस्यैवविवरणं वेदादप्युत्तमामिति ॥ एतेषु वाक्येषु यथासंभवं पूर्वोक्तोर्थोविगंतव्यः

पंचमवेदमुत्तमं ॥ दशावरार्थसर्वत्रकेवलंविष्णुबोधकं ॥ ७ ॥

र्थभपितं [illegible] वेदार्थंसंगृह्य [illegible] तदनुक्तेत्यनेनाथीत्रअस्य वेदो
त्तममित्यस्य ब्रह्मापि तन्न जानातीति [illegible] दशावरार्थं [illegible] ग्राह्यरूपामित्यस्य केवलं विष्णु
बोधकमित्यनेन [illegible] महाभारतसंहितामचीक्लृपदित्यस्य समा
नार्थत्वमवगंतव्यमित्यर्थः ॥ [illegible] मित्युक्तम्॥

॥ कृ० ॥ अल्पाद्यर्थइति ॥ आदिपदादज्ञानार्थसंग्रहः ॥ [illegible] भारतेनापि विष्णुगताशेष विशेषा
प्रातिस्विककारेण न बोध्यंते किंतु [illegible] ॥ [illegible] ॥ ७ ॥

१ एवंचेत्यादिफलितार्थकथनेबोधशब्दोभाववचनः ॥ ॥ ॥ ॥- ॥

॥ श्री० ॥ ननु तद्धितार्थोत्तरपदसमाहारे चेति समाहारे च वाच्ये संख्यापूर्वस्य द्विगुसंज्ञाया द्विगुरेकवचनमित्येकवचने अकारांतो द्विगुः समाहारः स्त्रियामिष्ट इति स्त्रीलिंगत्वे द्विगो रितिङीपि प्राप्तौ चतुर्णां वेदानां समाहारश्चतुर्वेदीति स्यात् ॥ न च पात्रादित्वात् ङीबभावः तथात्वे पंचपात्रमितिवत् चतुर्वेदमिति भवेत् चतुर्वेदानिति तत्कथमत आह ॥ चत्वारश्चेत इति ॥ न समाहारोत्र विवक्षितः येन द्विगुप्राप्तिः किंनाम विशेषणं विशेष्येण बहुलं भवति येन समस्यत इति सूत्रप्रापककर्मधारयोऽयमिति भावः ॥ अंगानिचोपनिषदश्चेत्यनंतरं तयोः समाहार इति शेषः ननु तर्हि अंगोपनिषदिति स्यात् ॥ कथं अंगोपनिषदमित्यत आह ॥ तेनेति ॥ समाहारद्वंद्वाश्रयणेन ॥ द्वंद्वादिति ॥ चवर्गांतात् दांतात् षांतात् हांताच्च द्वंद्वात् टच् स्यात् समाहारे ॥ वाक्च त्वक्च तयोः समाहारो वाक्त्वचम् ॥ शमीदृषदोः समाहारः शमीदृषदम् ॥ वाग्विपोः समाहारः वाग्विपम् ॥ छत्रोपानहोः समाहारः छत्रोपानहम् ॥ समाहारेति किम् ॥ कृष्णाचार्य ॥ ननु चतुर्णां वेदानां समाहार इति विग्रहे तद्धितार्थोत्तरपदसमाहारेचेति समासः संख्यापूर्वोद्विगुरिति द्विगुसंज्ञायां अकारांतोत्तरपदो द्विगुः स्त्रियामिष्ट इति स्त्रीत्वेद्विगोरिति ङीपिच सति चतुर्वेदीमितिस्यात् ॥ चतुर्वेदानिति कथमित्यत आह ॥ विशेषणसमासएवायमिति ॥ तद्धितार्थेतिसूत्रेण समाहारप्राधान्य एव समासः नतु समासंघातप्राधान्ये समाहा

यदि विद्यादित्यादिभारतवाक्यपर्यालोचनयाचोक्तंतद्व्यवसीयते इति संबंधः ॥ चत्वारश्च ते वेदाश्चेति विशेषणसमास एवायं द्विगुः ॥

परीक्षार्थं तु सर्वत्र वेदादप्युत्तमं च यदिति स्कांदे ॥ यदिविद्याच्चतुर्वेदान् सांगोपनिषदान्द्विजः ॥ नचेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥ ८ ॥

अंगानि च उपनिषदश्चांगोपनिषदमिति समाहारद्वंद्वः ॥ तेन द्वंद्वाच्चुदषहांतात्समाहारइति समासांतोऽकारः ॥ ततोबहुव्रीहिः

रेवाच्यइत्युक्तत्वात् समासेएकवचनप्रयोगाच्च ॥ प्रकृते च समाहारप्राधान्यस्याविवक्षितत्वाद्विशेषणं विशेष्येण बहुलमिति विशेषणसमास एवेत्यर्थः ॥ न च संज्ञात्वात्कथं विशेषणसमासः दिक्संख्येसंज्ञायामित्यनेन संज्ञायामेव संख्याशब्दस्यविशेषणसमास इति नियतत्वादिति वाच्यम् ॥ अन्वर्थत्वेपि समुदायरूढ्या पंचाम्राः सप्तर्षय इतिवत् चतुर्वेदशब्दस्यापि संज्ञात्वानपायात् ॥ असंज्ञात्वेपि बहुलग्रहणबलेन समासोपपत्तेश्च ॥ अत एव शब्दकौस्तुभे एकवीर इत्यत्र पूर्वकालैकेति बाधित्वा परत्वात्पूर्वापरप्रथमेति समाहारे वीरैक इति स्यादित्याशंक्य बहुलग्रहणबलेन समाहितामिति भावः ॥ समाहारद्वंद्व इति ॥ स नपुंसकमिति समाहारे यौ द्विगुद्वंद्वौ तयोर्नपुंसकत्वं समाहारस्यैकत्वादेकवचनं च युक्तमिति बोध्यम् ॥ द्वंद्वादिति ॥ चवर्गांताद्दकारषकारहकारांताच्च द्वंद्वाट्टच् स्यात्समाहार इति सूत्रार्थः ॥ टकारचकारयोर्लोपेऽकारमात्रमवशिष्यत इत्यभिप्रेत्यसमासांतोकार इत्येवोक्तम् ॥ बहुव्रीहिरिति ॥ अंगोपनिषदेन सह सांगोपनिषदा इति बहुव्रीहिरित्यर्थः ॥ तेनसहेतितुल्ययोग इति सहशब्दस्य सत्वामिति बोध्यम् ॥

॥श्री०॥ प्राहुटशब्दौ ॥ तयोः कर्त्वेरेकदा समाहाराभावात्॥तथा चांगोपनिषत् अस्मात् झलांजशोंत इति नकारस्य दत्वे द्वंद्वादिति समासांतटच्प्रत्यये चुटू इति टकारलोपे अकारमात्रे उर्वरिते हल्ङ्याभिति चकारलोपे अंगोपनिषदित्यकारांतप्रातिपदिकनिष्पत्तौ सर्वोद्वंद्वो विभाषयैकवद्भवतीति परिभाषयैकवद्भावे स नपुंसकमिति नपुंसकत्वेऽगोपानिषदमिति जातेऽगोपनिषदेन सह विद्यमाना सांगोपानिषदाम्नातानिति सहपूर्वपदोयं बहुव्रीहिरिति भावः॥ननु सहपूर्वपदत्वबहुव्रीहित्वे महांगोपनिषदानिति स्यादिति चेन्न वोपसर्जनस्य उपसर्जनभूतस्य सहेत्यस्य सो वा स्यात् ॥ पुत्रेण सहागतः सपुत्र आगतः सहपुत्रो वागत इति विहितत्वादत्रापि सहेत्यस्य सादेशोसति सहपूर्वपदत्वेऽपि सांगेति साधितमिति मंतव्यम् ॥ ननु चलधातोरकर्मकत्वान्मामिति कथं कर्मोक्तिरित्यत आह ॥ प्रचालयिष्यतीति ॥णिजंताश्च सकर्मका इति भावः॥ मत्वर्थइति ॥ भारशब्दान्मोऽस्यास्तीति मत्वर्थे तप्रत्यये भारतमिति रूपं ननु भारतप्रामाण्यवादिनं प्रति तस्योत्तमत्वनिश्चयाय कथं भारतवाक्योदाहरणमित्यत आह ॥ भारतेति॥ इतरत ॥ वेदार्थज्ञानोपायवेदोत्तमत्वादिकमित्यर्थः ॥ इदं ॥उत्तमत्वम् ॥ दर्शयिष्यतीति

प्रचलिष्यति प्रचालयिष्यतीति॥९॥१०॥११॥भारवत्त्वादित्यनेन मत्वर्थे तप्रत्यय इत्युक्तं भवति॥१२॥१३॥भारतप्रामाण्यमंगीकृत्यैवेतरदनंगीकुर्वाणं प्रतीदमुक्तं॥ युक्त्यनुसंधानेन विनाभिप्रेतार्थोत्र नप्रतीयतेऽतः पर्यालोचनयेत्युक्तम्॥अनुसंधानप्रकारं च लेशेन दशयिष्यति॥ ॠ

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥ बिभेत्यल्पश्रुताद्वेदो मामयंप्रचलिष्यति ॥ ९ ॥ मन्वादिकेचिद्ब्रुवते ह्यास्तीकादितथापरे ॥ तथोपरिचराद्यन्ये भारतंपरिचक्षते ॥ १० ॥ भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ॥ देवैर्ब्रह्मादिभिःसर्वैर्ऋषिभिश्च समन्वितैः ॥ ११ ॥ व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ॥ महत्वाद्भारवत्वाच्च महाभारतमुच्यते॥१२॥निरुक्तमस्ययो वेद सर्वपापैःप्रमुच्यते॥यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥१३॥विराटाद्योगसारवानित्यादिनद्वाक्यपर्यालोचनयाॠपिसंप्रदायात्कोह्यन्यःपुंडरीकाक्षान्महाभारतकृद्भवेदित्यादिपुराणग्रंथांतरगतवाक्यान्यथानुपपत्त्या नारदाध्ययनादिलिंगैश्चावसीयते ॥

षीणांवैशंपायनादीनां संप्रदायात्शिष्येभ्यः प्रदानाच्चैतदवसीयते ॥ कृ०॥ ननु मामयं प्रचलिष्यतीति कथम् । चलतेरकर्मकत्वादित्यतोऽतर्णितण्यर्थोऽयमतो नोक्तानुपपत्तिरित्यभिप्रेत्याऽह ॥ प्रचालयिष्यतीति ॥ ९ १० ११ मत्वर्थे तप्रत्यय इति ॥ तद्धिता इति बहुवचनस्यानुक्ततद्धितसंग्रहार्थत्वादिति भावः ॥ १२ १३ ननु भारतप्रामाण्यमनंगीकुर्वाणं प्रति कथं तत्साधनाय भारतवाक्योदाहरणमित्यत आह ॥ भारतप्रामाण्यमिति॥ इतरदिति ॥ विषयादिसंबंधदुर्गमार्थत्वं चेत्यर्थः ॥ दर्शयिष्यतीति ॥

श्री०॥कथमन्यथेत्यादिना अनुपदमेवेति शेष उदाहृतेषु सर्वेषु वाक्येषु पर्यालोचनाया अक्रियमाणत्वात् लेशनेत्युक्तम् शिष्येभ्यो जनमेजयादिभ्यः प्रामाण्यादीत्यत्रादिपदेनोत्तमत्वं ग्राह्यम् ॥ तत् ॥ उत्तमत्वादि ॥ वक्ष्यतीति ॥ ग्रंथांतरगतत्वाच्चेत्यनेनेति शेषः ॥ वाक्यस्येति ॥ को ह्यन्य इति वाक्यस्येत्यर्थः ॥ तत्रेति ॥ अन्यथानुपपत्तिकथनम् ॥प्रदर्शयिष्यत इति॥ कथं चान्यस्येत्यनेनेति शेषः अध्ययनादीत्यत्रत्यादिपदार्थमाह ॥ व्याख्यानादीति ॥ अध्ययनं श्रवणं॥ व्याख्यानं मननम् ॥ आदिपदेन तदुक्तप्रकारेण ध्यानं ग्राह्यम् ॥ ऋषीति ॥ नारदस्यापि देवर्षित्वादितिभाव ॥ अन्यविषयइति ॥ अप्रमाणानुत्तमग्रंथविषय इत्यर्थ ॥ एव मुत्तरत्रापि ज्ञेयम् ॥ व्यवहारः ॥ व्याख्यानादिरूपः ॥ कथं चिदिति अन्यथा शिष्याणां श्रेयसे कथं व्याकुर्युरित्युक्तविरोधः स्यादित्याशय ॥ अतएवेति ॥ऋषीणां गृहस्थत्वेन परार्थान्यविषयव्यापारसंभावनासूचनाय संप्रदायादित्युक्तम् परमहंसस्य नारदस्य स्वार्थव्यापारोनान्यविषय इति सूचनायाध्ययनेत्युक्तमिति भाव ॥

न हि प्रामाण्यादिरहितमृष्यादयः शिष्येभ्यः श्रेयसेव्याकुर्युरिति युज्यते ॥ को ह्यन्य इत्यादिपुराणलक्षणग्रंथांतरगतवाक्यार्थान्यथानुपपत्याच तदवसीयते ग्रंथांतरेतिविशेषणस्य प्रयोजनं स्वयमेव वक्ष्यति ॥ वाक्यस्योक्तार्थे सामर्थ्याभावात् अन्यथानुपपत्त्येत्युक्तं तच्च प्रदर्शयिष्यते ॥ नारदस्याध्ययनव्याख्यानादिलिंगैश्चोक्तार्थोवसीयते ॥ ऋषिसंप्रदायादित्यनेनैव गतमेतदितिचेत् ॥ न ॥ ऋषीणां गृहस्थत्वे

कथमन्यथा भारतनिरुक्तिज्ञानमात्रेणसर्वपापक्षयः

न परार्थोन्यविषयोपिव्यवहारः कथंचित्संभाव्येतापि॥नारदस्य तुपरमहंसस्य स्वार्थोपि व्यापारोन्यविषयो न भवतीतिज्ञापनार्थत्वात् अत एवसंप्रदायादित्यध्ययनेति चोक्तम् ॥ तद्वाक्यपर्यालोचनयेत्युक्तम् कीदृशी सापर्यालोचनेत्यतो लेशेनदर्शयति ॥ कथमिति ॥

॥ रू० ॥ कथमन्यथा भारतनिरुक्तिज्ञानमात्रेण सर्वपापक्षय इत्यादिनेति शेषः ॥ वक्ष्यतीति॥ ग्रंथांतरगतत्वाच्चेत्यादिनेतिशेष ॥ प्रदर्शयिष्यतइति ॥ कथं चान्यस्य कर्तुं न शक्यत इत्यनेनेति शेषः ॥ व्याख्यानादीति आदिपदाच्छ्रवणसंग्रह अक्षरोच्चारणपूर्वकमर्थग्रहणमध्ययनं तद्विनार्थग्रहणं श्रवणमिति तयोर्भेदात् ननु ऋषीणां गृहस्थत्वेऽपि तद्व्यवहारोऽन्यविषय इत्ययुक्तम् मोक्षार्थव्यवहारस्य तथात्वाभावादित्यत उक्तम् ॥ परार्थइति ॥ शिष्यार्थ इत्यर्थ ॥ माभून्मोक्षार्थो व्यवहारः तथापि परार्थव्यवहारोऽन्यविषयोऽपि संभाव्यते ॥ दधीच्यादिव्यवहारस्य परार्थस्यान्यविषयत्वदृष्टेरितिभावः ॥ ननु शिष्याणां श्रेयसे प्रामाण्यादिरहितस्य व्याख्यानमयुक्तमित्यत उक्तम् ॥ कथंचिदिति॥ स्वार्थइति॥ स्वमोक्षार्थ इत्यर्थः॥ ॥ अत एवेति ॥ यत एवं ऋषिव्यापार परार्थः नारदव्यापारस्तु स्वार्थोऽत एवेत्यर्थः ॥ संप्रदायशब्दस्य प्रदानार्थत्वेनाध्ययनस्य च स्वार्थत्वेनोक्तव्यवस्थासूचनादिति भावः ॥

॥ श्री० ॥ तथाऽन्युत्तरश्रवणादयर्थाने आदौ भगवान्येन ॥ अभिधेयत्वेनेति ॥ नामवाच्यत्वे नारायणस्य ॥ तथायमपीति ॥ भारतशब्दनिरुक्तज्ञानेनोक्तः सर्वपापक्षयो भार तस्योत्तमत्वं विना न संभवतीत्यर्थः अनेन भारतं सर्वशास्त्रोत्तमं सर्वपापक्षयानुभवज्ञाननिवर्तकनिरुक्तिमच्छब्दवाच्यत्वात् नारायणवदित्यनुमानमुक्तं भवति ॥ अत्राप्रयोजक नाशंकायां विपक्षे हेतुनिष्ठसिद्धबाधककथनमन्यथानुपपत्तिः मर्त्यस्यापि ॥ अन्यथेति ॥ अनुमाने ज्ञानसिद्धिमार्गं हते ॥ स्यादेतदिति ॥ प्रमापकप्रमाणाभावादिति भावः ॥ ननु म हत्वादिनिर्वचनमेव प्रमापकं प्रमाणमित्यत आह ॥ अयथार्थेति ॥ अन्यथासिद्धेरिति ॥ अयथार्थप्रशंसायाः वेनान्यथासिद्धिरित्यर्थः ननु न गंगा न गया काशीत्याद्यर्थवादानां स्वार्थेऽप्रामाण्यदर्शनादस्यापि वचनस्य तथात्वमित्यर्थवादत्वमेव बाधकमस्तीत्यत आह ॥ अर्थवादानांचेति ॥ अत्र प्रामाण्यस्य स्वतस्त्वेनेतरप्रमापकापेक्षाभावात् ॥ चशब्द एवार्थे

महत्वादिनिर्वाक्यैर्भारतशब्दं निरुच्य तज्ज्ञानात्सर्वपापक्षयोऽभिधीयते न तु भारतस्योत्तमत्वं साक्षात्तथापि पर्यालोचनया गम्यत एव ॥ यथा हि नारायणादिभगवन्नामनिरुक्तिज्ञानात्सर्वपापक्षयोऽभिधेयस्य सर्वोत्तमत्व एव तथायमपि ॥ अन्यथा भारतस्य सर्वशास्त्रोत्तमत्वाभावे कथं तच्छब्दनिरुक्तिज्ञानमात्रेण सर्वपापक्षयः स्यात् शब्दान्तरनिरुक्तिज्ञानेन तदभावादिति स्यादेतदनुमानं ॥ यदि हेतुक्तोर्थः प्रमितः

प्रसिद्धश्चसोर्थः

स्यात् ॥ नचैवं ॥ अयथार्थप्रशंसाया अपि दर्शनेनवचनस्यान्यथासिद्धेरित्यत आह प्रसिद्धश्चेति ॥ धियांतावत्प्रामाण्यंस्वतोबाधकादप्रामाण्यं न चात्र तदस्ति ॥ अर्थवादानांचाबाधितस्वार्थेप्रामाण्यमस्त्येव ॥ अतोहेतुक्तो योर्थो भारतशब्दनिरुक्तिज्ञानेन सर्वपापक्षयःस प्रसिद्धःप्र मित एवेति ॥ सर्वपापक्षये तदैवमुक्तिःस्यादितिचेत् ॥ नहि सर्वशब्दार्थ एव संकोच्यतां न तु सर्वो वाक्यार्थः॥

इत्यभिप्रेत्याह॥प्रमित एवेति॥बाधकमाशंकते॥सर्वपापक्षय इति॥ क्र० ॥स्यादेतदनुमानमिति॥ भारतं सजातीयोत्तमं सर्वपापनिवर्तकज्ञानविषयनिर्वचनोपेतशब्दवाच्यत्वान्नारायणवदित्य नुमानमित्यर्थः ननु निरुक्तमिति वाक्यमेव प्रमापकमित्यत आह॥अयथार्थेति॥दर्शनेनेति॥प्रयागमरणेन वेत्यादाविति शेषः नन्वर्थवादस्य स्वार्थे प्रामाण्याभावो बाधक इत्यत आह ॥अर्थ वादानां चेति॥प्रयागमरणेन वेत्याद्यर्थवादस्य स्वार्थे प्रामाण्याभावादाह॥अबाधित इति॥अनेनैतत्सूचितम् द्विविधोऽर्थवादो बाधिताबाधितभेदात् तत्राद्यः प्रयागेत्यादिर्न स्वार्थे मानं दृष्टत्वेन तं मुच्यत इति स्मृतिबाधात्॥किं तु नाशस्य लक्षकः अंत्या निरुक्तमस्येत्यादिः स्वार्थे प्रमाणमेवेति । सर्वशब्दार्थ एव संकोच्यतामिति त्यजेदेकं कुलस्यार्थे इति न्यायादिति भावः

१ सर्वपापक्षयेऽनुभवोऽतिविशदपर्यालोचनीयम् ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ उत्तरत्र ॥ इतिहासपुराणाभ्यामितिवाक्ये गृहीतत्वात् भारतस्येति शेषः ॥ उपलक्षणमिति ॥तथा च न चेत्पुराणं भारतं च सांविद्यादिति द्रष्टव्यमिति भावः ॥
॥अनुक्तस्येति ॥ यदि विद्यादितिवाक्ये उपलक्षणतया भारतं यदि नोक्तं स्यात्तदा पुराणमात्रज्ञानिनः विचक्षणत्वाभावोक्तौ तत्कथमिति शंकायामितिहासेत्युत्तरवाक्ये पुराणमात्रंवि
हाय इतिहासस्यापि सर्ववेदार्थज्ञानोपायत्वरूपसंपादनं क्रियमाणमयुक्तं स्यादित्यनुक्तस्योपपादनायोगादित्यर्थः वेदस्य चाचेतनत्वात्कथं बिभेतीति भयेत्किरन आह॥ अचेतनत्वेति॥ भय
युक्तपुरुषसादृश्याद्गौणोऽयं व्यपदेश इति भावः॥ तदेवसादृश्यं दर्शयति॥स्वार्थमिति।यथाहि चेतनो भयवान्कश्चित्स्वार्थं धनादिकमंतर्धायाच्छादयति एवं वेदोपि स्वाभिधेयामितिहासपु
राणाज्ञं प्रति न ज्ञापयतीत्याशयः ॥ अनेनापिसर्ववेदार्थज्ञानोपायत्वमुक्तंभवति ॥ आपाततइति ॥ प्रमाणांतरेणवाक्यार्थविचारदशायां ॥ प्रकृतंकमपीति ॥ उत्तमत्वादिरूपमित्यर्थः॥
॥ अन्यत्रेति ॥ सकृष्णान्पांडवान् गृह्ययोयमर्थः प्रवर्तते ॥ प्रातिलोम्यादिवैचित्र्यात्तमास्तीकं प्रचक्षते ॥ धर्मो भक्त्यादिदृशकः श्रुतादिः शीलवैनयौ ॥ सब्रह्मकास्तुतेयत्र मन्वादितं
विदुर्बुधाः ॥ नारायणस्य नामानिसर्वाणि वचनानितु ॥ तत्सामर्थ्याभिधायीनितमोपरिचरं विदुरिति महाभारततात्पर्यनिर्णये उदाहृतस्येत्यर्थः आदिपदेन धर्मदेवतापरत्वग्रहणम्

एवमन्यान्यपिभारतवाक्यानि पर्यालोचनीयानि ॥ तथा हि ॥ यदि विद्यादितिवाक्ये यद्यपि भारतंनोक्तंतथाप्युत्तरत्रेतिहासशब्देन गृही
तत्वात्पुराणपदं तदुपलक्षणमिति ज्ञायते ॥ न ह्यनुक्तस्योपपादनं युक्तम्॥ ततश्च भारतस्य वेदार्थज्ञानोपायताऽनेन सिध्यति ॥ अचेतनत्व
पर्यालोचनया बिभेतीत्येतद्बिभेतीवस्वमर्थमंतर्धापयतीति ज्ञेयम् ॥ यद्यपि मन्वादीत्येतदापाततो न प्रकृतं कमप्यर्थं प्रत्यापादयति॥ तथापि
भगवत्पादैरन्यत्रोदाहृतस्यएतद्व्याख्यानरूपवाक्यस्यानुसंधाने भारतस्य भगवत्परत्वादि गमयति ॥ ॥ ॥ ॥

॥ कं० ॥ मन्वादीत्येतदिति ॥ अयमर्थः मन्वादीतिश्लोके आदिशब्दस्तात्वदादीयते प्रतिपाद्यते इति व्युत्पत्त्या प्रतिपाद्यवाची प्रभृत्यर्थत्वे भारततात्पर्यनिर्णये भारतार्थस्त्रिधा प्रोक्तइति
प्रतिज्ञाय मन्वादीतिश्लोकोदाहरणविरोधात् अर्थषट्कादिलाभेपित्रित्वाभावात् ॥ मन्वादीत्येतद्व्याख्यानरूपेण धर्मोभक्त्यादिदशक इत्यादिश्लोकत्रयेण मन्वास्तीकोपरिचररूपार्थत्रय
कथनवदादिपदोक्तार्थकथनप्रसंगाच्च ॥ ततश्च मन्वादीतिवाक्यं भारतं मन्वर्थकमास्तीकार्थकमुपरिचरार्थकमित्येव प्रतिपादयति नतुभारतस्य परोक्षार्थत्वादिकमिति ॥ ननु सकृष्णान्पां
डवानित्यादिश्लोकत्रयपर्यालोचनया मन्वादीति वाक्यमपि प्रकृतप्रतिपादकमेवेत्यतउक्तं ॥ आपाततइति ॥ अन्यत्रेति ॥ भारततात्पर्यनिर्णय इत्यर्थः॥वाक्यस्येति ॥ सकृष्णान्पां
डवान्गृह्ययोयमर्थः प्रवर्तते प्रातिलोम्यादिवैचित्र्यात्तमास्तीकं प्रचक्षते ॥ १ ॥ धर्मोभक्त्यादिदशकः श्रुतादिः शीलवैनयौ ॥ सब्रह्मकास्तुतेयत्रमन्वादितं विदुर्बुधाः ॥ २ ॥ नाराय
णस्य नामानि सर्वाणि वचनानि तु ॥ तत्सामर्थ्याभिधायीनि तमोपरिचरं विदुरिति वाक्यत्रयस्येत्यर्थः ॥ भगवत्परत्वादीति ॥ आदिपदेन धर्मदेवतापरत्वस्य सर्वप्राणिनामवगाह्यरूप
त्वस्य परोक्षार्थत्वस्य च संग्रहः ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ ननु भारतस्य महत्वात् भारवत्वादित्यनेनोच्यमानं भारवत्वं कुतोवगम्यते ॥ नच भारतं सर्ववेदाश्चतुलामारोपिताः पुरा ॥ देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः । तस्य
सस्यैवाज्ञया तत्रात्यरिच्यतभारतामिति वाक्यादितिवाच्यम्॥वर्णानाममूर्तत्वेन व्याप्तत्वा तदात्मकभारतादौ तुलारोपणस्य भारते वर्णात्मके गुरुत्वगुणाभावेनातिरिच्यतेत्यस्य चायोगेन
वाक्यस्यात्राभिमतार्थत्वादित्यत आह ॥ तुलारोपणमिति ॥ भारतमर्ववेदसंज्ञकं समभरं मणिद्वयं समभ्यर्च्य तस्य तुलारोपणे भारतसंज्ञकोमणिरतिरिच्यतेत्यर्थः ॥ ननुभारतो
क्तस्यान्यत्र वेदादौ सत्वेपि ततोधिकस्यापि तत्र सत्वे भारतस्य सर्ववेदाद्यर्थोपबृंहितत्वं न सिध्यतीत्यत उक्तम् तदेवेति॥ कृष्णाचार्य ॥ तथा हि नारायणस्य नामानीति श्लोके पुरुषावेश
षेण सर्वाणि पदवर्णस्वरात्मकवचनानि यतस्तत्सामर्थ्याभिधार्याणि तस्मान्नारायणस्य नामानीत्येवंपदसमन्वयगम्यो योर्थः तं विष्णुं सर्वेषामुपरि चरतीति उपरिचरः स एवौपरिचर इति
व्युत्पत्त्या औपरिचरं विदुरित्युक्तम् तथा च भारतस्यौपरिचरादित्वोक्त्या भगवत्परत्वं पदसमन्वयस्य सर्वाधिकारिकत्वेन सर्वप्राणिनामनवगाह्यरूपत्वं परोक्षार्थत्वं च सिद्धम् ॥ एवं सक
ष्णानिति श्लोके आस्तीकशब्दार्थ उक्तः ततश्च भारतस्यास्तीकादित्वोक्त्या सर्वप्राणिनामनवगाह्यरूपत्वं परोक्षार्थत्वं च सिद्धम् पांडवानां देवत्वेन देवतारूपापन्नतत्प्रतिपादकत्वं च सिध्य
ति ॥ तथा धर्मो भक्त्यादिदशक इत्यत्र श्लोके यत्र ग्रंथे धर्मादयः प्रतिपाद्यंते तंभारतग्रंथं मन्वादिं विदुः ॥ अवबोधकरणत्वेन धर्मादीनांमनुशब्दवाच्यत्वादित्यभिहितं तेन भारतस्य म
न्वादित्वोक्त्या धर्मादिपरत्वं लब्धम् एवं च मन्वादीनिश्लोको भारतस्य भगवत्परत्वादि गमयतीति दिक् ननु तथापि भारते प्रदेशभेदेनैव मन्वादित्वमास्तीकादित्वं चोपलभ्यते न सर्वत्रात ए

तुलारोपणं भारवत्वं च प्रतिनिधिद्वारेणोपपादनीयम्॥यदिहेत्यस्य स्तुतिपरत्वोपपत्तये तदेवान्यत्रेति व्याख्याने.

कस्यैव विरुद्धानेकार्थत्वाभावान्मन्वादीनिश्लोके केचिदित्याद्युक्तिरयुक्तेति चेत् अत्र ब्रूमः मन्वादित्वं तावत्सर्वस्यैव भारतस्य यत्र त्वास्तीकार्थ उच्यतेतत्रापि मन्वादित्वमस्त्येव सोमं रा
जानं जुव्हति तं देवा भक्षयंतीत्यत्र सोमशब्देन तदभिमतदेवताग्रहणवत् युधिष्ठिरादिशब्दैस्तत्तदभिमतस्य धर्मादेर्ग्रहणात् अनेनैवाभिप्रायेण भारततात्पर्यनिर्णये भीमादीनां भक्त्यादिदशकाद्यभिमा
नित्वस्योक्तत्वात् यत्र च भारतैकदेशेऽज्ञानमिथ्याज्ञानाद्युक्तिस्तत्रापि मनुतात्पर्यकत्वमस्त्येव धर्मादिरूपमनुप्रशंसार्थमेवतन्निवर्त्याज्ञानादिकीर्तनात् दुर्योधनाद्यर्थकभागे च तदभिमताज्ञानादि
ग्रहणान्मनुतात्पर्यकत्वलाभः ततश्च सर्वभारतस्य मन्वादित्वसिद्धिः॥ तदुक्तम् एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते इति एवमास्तीकादित्वमपि सर्वभारतस्यैव न तु तदेकदेशस्य यत्र तु
धर्मादिकमुच्यते तत्रापि अभिमान्यधिकरणन्यायेन पांडवग्रहणात् दुर्योधनाद्यर्थकभागेऽपि पांडवतात्पर्यकत्वरूपमास्तीकादित्वमस्त्येव अहो बाहुशालिनः पांडवा यदेवंविधानपि पांडवा ॥ १८ ॥
हतवंत इति पांडवप्रशंसार्थमेव दुर्योधनादिवर्णनात् अज्ञानाद्यर्थकभागे च तत्तदभिमानिदुर्योधनादिग्रहणात्पांडवतात्पर्यकत्वलाभः एवं च सर्वस्यापि भारतस्याधिकारिभेदेन मन्वादित्वादा
स्तीकादित्वाच्च केचिदित्याद्युक्तिर्युक्तैवेत्यलम् ॥ स्तुतिपरत्वोपपत्तयइति॥ ॥ ॥ ॥

॥ श्री० ॥ अन्यत्र वेदादौ स्थितं सर्वमत्रास्त्येव न तत्रत्यं सर्वमप्यन्यत्रास्त्यमिति प्रागुक्त्या सर्ववेदाद्यर्थोपबृंहितत्वमादिपदात् वेदानुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तत्वं च सिध्यतीत्यर्थः ॥ विराटेत्येतद्वाक्यं भारतस्य कल्पतरुतां प्रतिपादयत्सर्वपुरुषार्थहेतुतां भारतस्यावगमयतीत्यन्वयः ततश्च सर्वशास्त्रोत्तमत्वमनेन सिध्यतीत्याशयः कथमित्यत उक्तम् ॥ पूर्वोत्तरवाक्यानुसंधान इति ॥ संग्रहाध्यायबीजोयं पौलोमास्तीकमूलवान् ॥ संभवस्कंधविस्तारः सभारण्यविटंकवान् ॥ अरण्यपर्वरूपाढ्यो विराटोद्योगसारवान् ॥ भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ॥ कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगंधिभिः ॥ स्त्रीपर्वैषीकविश्रामः शांतिपर्वमहाफलः अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः ॥ मौसलः श्रुतिसंक्षेपः शिष्टद्विजनिषेवितः ॥ पर्जन्य इव भूतानां अक्षयो भारतद्रुमः॥सर्वेषां कविमुख्यानामुपजीव्यो भविष्यतीत्यादिपर्वाणि व्यासं प्रति ब्रह्मवाक्यम् एवं विराटेत्यतः पूर्वोत्तरवाक्यानुसंधान इत्यर्थः ॥ कु० ॥ अन्यथा यदि हेत्युक्तान्वयव्यतिरेकवत्वाद्भारत वेदाद्यनूनानतिरिक्तार्थकमिति लभ्येतेति भाव सर्ववेदाद्यर्थोपबृंहितत्वादिकमिति ॥ आदिपदात्तदनुक्तार्थयुक्तत्वग्रहणम् तथाहि तदेवान्यत्रेत्यस्य भारतप्रतिपाद्यमेवान्यप्रतिपाद्यमिति फलितार्थः एतेन च भारतप्रतिपाद्यत्वमित्युक्तं भवति तथा च भारतप्रतिपाद्यत्वमन्यप्रतिपाद्यतताऽधिकं नास्तीति यदिहेत्यस्य स्फुटत्वलाभः ततश्च भारतस्य सर्ववेदाद्यर्थोपबृंहितत्वं तदनुक्तार्थयुक्तत्वं च सिध्यतीति बोध्यम् पूर्वोत्तरवाक्येति ॥ संग्रहाध्यायबीजोवै पौलोमास्तीकमूलवान्॥संभवस्कंधविस्तारः सभारण्यविटंकवान् अरणीपर्वरूपाढ्यो

सर्ववेदाद्यर्थोपबृंहितत्वादिकं सिध्यति विराटेत्येतत्पूर्वोत्तरवाक्यानुसंधानेन भारतस्य कल्पतरुतांप्रतिपादयद्भारतस्यसर्वपुरुषार्थहेतुतांगमयतीति

विराटोद्योगसारवान् भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगंधिभिः ॥ स्त्रीपर्वैषीकविश्रामः शांतिपर्वमहाफलः अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः ॥ मौसलश्रुतिसंक्षेपः शिष्टद्विजनिषेवितः ॥ सर्वेषांकविमुख्यानामुपजीव्यो भविष्यति ॥ पर्जन्य इव भूतानां पक्षिणां भारतद्रुम इत्यादिपर्वगतपूर्वोत्तरवाक्येत्यर्थः ॥ यद्यप्युक्तवाक्यं भारतस्य वृक्षत्वमात्रं प्रतिपादयति ॥ तथाऽपि यदश्वमेधामृतरस इति अमृतरसोपेतत्वमुक्तम् ॥ यच्च सर्वेषामित्यनेन सर्वकविमुख्योपजीव्यत्वमुक्तम् ॥तदन्यथाऽनुपपत्त्या कल्पवृक्षत्वं प्रतिपादयत्येवेति भावेनोक्तम् ॥ अनुसंधानेनेति ॥ यद्यपि चोक्तरीत्योत्तरवाक्यानुसंधानेन भारतस्य कल्पतरुताप्रतिपादनं गम्यते न तु पूर्ववाक्यानुसंधानेन ॥ तथाऽपि भारतस्य द्रुमत्वप्रतिपादनात्पूर्वं त्वया भारतसूर्येण नृणां विनिहतं तम इत्यादिना सूर्यत्वादेः प्रतिपादनात्तदनुसारेणाव कल्पतरुत्वप्रतिपादनमेवाभिप्रेतम् अन्यथा तत्माहात्म्यविरोधादित्याशयेन पूर्ववाक्यानुसंधानेनेत्युक्तम् सर्वपुरुषार्थहेतुतामिति ॥ यद्यपि मोक्षहेतुत्वमेव प्राक् प्रतिज्ञातत्वात्प्रमाणेन साधनीयम् तथाऽपि वस्तुस्थितिकथनायैवमुक्तम्॥ ॥ ॥ ॥

१ चतुर्मुखोपदिष्टचतुर्वेदानुक्तकेवलेश्वरबुद्धिस्थवेदोक्तज्ञानदृष्टार्थयुक्तत्वमित्यर्थः ॥ ॥ ॥ ॥

॥ श्री० ॥ ननु कर्तृकरणयोस्तृतीया तिङाद्यनुक्ते कर्तरि करणे च तृतीया स्यात ॥ रामेण बाणेन हतो वाली ॥ तिङाद्युक्तौ तु निषेधः ॥ हरिः करोतीति ॥ एवं च प्रकृतेशक्यत इति तिङा कर्तुरन्यस्यानुक्तत्वात्तत्र तृतीयायां सत्यां अन्येनेति स्यात् नत्वन्यस्येत्यत आह ॥ अन्यस्येतीति ॥ व्यत्ययेनेति ॥ विभक्तिव्यत्ययेनेत्यर्थः ॥ व्यत्ययस्वीकारः पक्षांतरमाह॥यद्वेति षष्ठीत्यनुवर्तते ॥ कर्तुमित्येवंरूपस्य कृत्प्रत्ययांतशब्दस्ययोगेकर्तर्यन्यस्मिन् कर्तृकर्मणोः कृति ॥ कृद्योगकर्तरिकर्मणि च षष्ठीस्यादिति षष्ठीत्यर्थः ॥ ननु कर्तुमित्यस्य तुमुन्प्रत्ययांतत्वेन कथं कृत्प्रत्ययांतत्वम् न हि तुमुन्प्रत्ययः कृदितिचेदुच्यते कर्तरिकृत् अतः परं कर्तरि ये प्रत्यया विहितास्ते सर्वे कृत्संज्ञाः स्युरित्यधिकृत्य तुमुन उक्तत्वादुक्तं तस्य कृत्त्वम् ननु कर्तृकर्मणोः कृतीति कृद्योगे उक्ता षष्ठी न संभवति कृन्मेजंत कृद्यो मांत एजंतश्चाव्ययं स्यात् कर्तुं स्मारं जीवसे इति कृदंतस्याव्ययत्वोक्तिस्तुमुनश्च कृत्त्वेन तदंतस्य कर्तुमित्यस्याव्ययत्वे तद्योगे नलोकाव्ययेति षष्ठ्यानिषेधादन्यस्येत्ययुक्तमत आह॥नलोकेति॥प्रसंगात् सूत्रार्थउदाहरणानि च कथ्यन्ते न लोकाव्ययनिष्ठाखलर्थतृनाम् लउकअव्ययनिष्ठाखलर्थ तृन् तद्योगे कर्तरि कर्मणि च षष्ठी न स्यात् लेत्यनेनलटः शतृशानचाविति परस्मैपदात्मनेपदलादेशभूतौ शतृशानचौग्राह्यौ परस्मैपदलादेशशतृप्रयोगे ग्रामंगच्छन् आत्मनेपदलडादेशशानचि

को ह्यन्य इति पुराणवाक्यस्यान्यथानुपपत्त्येत्युक्तं कीदृशी सान्यथानुपपत्तिरित्यतआह॥कथमिति ॥ अन्यथेति च वर्तते॥ अन्यस्येति

कथं चान्यस्यकर्तुं नशक्यते॥

व्यत्ययेन तृतीयार्थे षष्ठी यद्वा कर्तुमिति कृद्योगे कर्तरि न लोकाव्ययेतिप्रतिषेधश्च नञानिर्दिष्टमनित्यमित्यनित्यः

अन्नं भुंजानः उ हरिंदिदृक्षुःसन्नंतत्वात्सनाशंसाभिक्ष उरितिउप्रत्ययांत उक ग्रामंगामुकः अव्यये जगत्सृष्ट्वात्क्तातोसुन्कसुन इतिक्त्वाप्रत्ययांतानामव्ययत्वम् सुखं कर्तुं तुमुनः कृत्त्वात् कृन्मेजंत इत्यव्ययत्वम् निष्ठा क्तक्तवतुप्रत्यययोर्निष्ठा संज्ञा क्तस्य योगे विष्णुना हता दैत्याः क्तवतोर्योगे दैत्यान् हतवान् खलर्था ईषदर्थाः कृच्छ्रार्था अकृच्छ्रार्थाश्च ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् कृच्छ्रेत्येत दुरो विशेषणम् अकृच्छ्रेत्येतत् सोर्विशेषणं ईषद्दुःसुउपपदेषुतथा दुःसुइत्येतयोः कृच्छ्राकृच्छ्रार्थयोरुपपदयोःसतोः खल्भवति ॥ ईषदःईषत्करः प्रपंचोहरिणा कृञ्धातोः खल्प्रत्ययेतस्य लोपेऽकारउर्वरितोभवति ॥ दुरः कृच्छ्रार्थे दुष्करं वनंकृच्छ्रेण कर्तुमशक्यमित्यर्थः ॥ सोरकृच्छ्रार्थे सुकरं भोजनं ॥ अकृच्छ्रेणकर्तुमशक्यमित्यर्थः तृनः ॥ घटंकर्तेति ॥ कृ० ॥ ननु कर्तृकरणयोस्तृतीयेतिसूत्रेण तिङाद्यनभिहिते कर्तरि करणे च तृतीयाविधानात्प्रकृते च कर्तुस्तिङाऽनभिहितत्वादन्येनेतिभाव्यमित्यत आह ॥ अन्यस्येतीति ॥ व्यत्ययोबहुलमितिसूत्रादिति भावः ननूक्तसूत्रेणछंदस्येवव्यत्ययोक्तेःप्रकृतेचछंदस्त्वाभावात्कथंव्यत्ययइत्यत आह यद्वेति॥ कर्तृकर्मणोः कृतीत्यनेन कृद्योगकर्तरि कर्मणि च षष्ठीविधानादितिभावः ॥ननु तुमुनोऽव्ययत्वात्कथंतद्योगे षष्ठी ॥ नलोकाव्ययेति निषेधादित्यत आह॥नलोकेति॥नलोकाव्ययनिष्ठाखलर्थतृनामित्यत्र उश्च उकश्च उकौलश्च उकौ चाव्ययं चेत्यादिविग्रहः लादेशादीनां योगेषष्ठी नेतिसूत्रार्थः

॥ श्री० ॥ अनित्यतायांज्ञापकमाह ॥ अतएवेति ॥ नञानिर्दिष्टस्यानित्यत्वादेवेत्यर्थः ॥ उत्पूर्वकातइणगतौअस्मात् तोसुन्प्रत्ययेउरित्यस्यलोपेतस्यदत्वेइकारस्यगुणेसोरुत्वे विसर्गेचउदेतोरि
तिभवति ॥ तथाचाव्ययभूततोसुन्योगेसूर्यस्योदेति षष्ठीदृश्यते ॥ क्रमस्यविसृपोगमनिनापरिहारकइतियावत् ॥ विपूर्वकात् सृप्लृगतावस्मात्कसुन्प्रत्ययेककारस्यमकारंविहायसर्वस्यापिलोपेवि
सृपइतिषष्ठीभाष्यकारेणनप्रयुज्येतप्रयुज्यते नषष्ठीनतज्ज्ञापयेनेन नञानिर्दिष्टस्यानित्यत्वमिति॥ उपलक्षणंचैतत्॥ कर्मेरकप्रत्यययोगेपिषष्ठीदृश्यते लक्ष्म्याःकामुकइतीतिद्रष्टव्यं॥ ननुअव्यययोगेष
ष्ठीनिषेधस्यानित्यत्वात् कर्तरिषष्ठीयुक्तेवेत्यत्रदृष्टान्तत्वेनतोसुन्कसुनोर्योगेषष्ठीदर्शनोदाहरणमयुक्तम् ॥ नलोकाव्ययेतिसामान्यतोव्यययोगेषष्ठीप्रतिषेधेपितोसुन्कसुनोरप्रतिषेध इतिवार्तिकेन
तोसुन्व्यतिरिक्ताव्यययोगएवषष्ठीनिषेधस्यव्यवस्थापनात् तथाचतत्रनिषेधप्राप्तेरभावेननञानिर्दिष्टस्यानित्यत्वे उपोद्बलकत्वेनतदुदाहरणमयुक्तमितिचेन्न अव्ययशब्दस्यासंकुचितार्थत्वपरि
त्यागेहिपुरासूर्यस्योदेतोरित्याद्यभियुक्तप्रयोगस्यैवानिमित्तत्वेनतत्रतद्व्यतिरिक्ताव्ययत्वेनसंकोचेननञानिर्दिष्टमितिपरिभाषायाएवनियामकत्वात् तथाच प्रकृतेपि सैव परिभाषा निमित्तमिति अ
व्यययोगेपि कर्तरिषष्ठी युक्तैवेति द्रष्टव्यमित्याहुः ॥ वस्तुतस्तु तोसुन्कसुनोरप्रतिषेध इतिवत् कमेरकप्रत्यययोगेषष्ठीप्रतिषेधकवार्तिकाभावेन तत्र तावत् नञानिर्दिष्टस्यानित्यत्वमेवसमाधा

॥ अत एवतोसुन्कसुनोर्योगे षष्ठी दृश्यते ॥ सूर्यस्योदेतोः ॥ क्रमस्यविसृप इति ॥ को ह्यन्य इतिवाक्ये तावद्भारतस्य नारायणादन्येन कर्तु
मशक्यत्वमुच्यते ॥ तत्कथमन्यथा केवलेश्वरज्ञानदृष्टार्थयुक्तत्वाभावे न युज्यते ॥ तथाविधानामन्यैःकर्तुं शक्यत्वस्यदर्शनादिति ॥नन्व

ग्रंथांतरगतत्वाच्च नाविद्यमानस्तुतिः ॥

न्यैःकर्तुमशक्यत्वमिति हेतुरसिद्धः ॥ कोह्यन्य इतिवाक्यस्याविद्यमानार्थस्तुतिपरत्वोपपत्तेरित्यत आह ॥ ग्रंथांतरेति ॥ ॥ ॥

नमाश्रयणीयं॥तेनैव तोसुन्कसुनोर्योगेपि षष्ठ्युपपत्तौ तदर्थं पृथग्वार्तिककरणस्य व्यर्थत्वादित्याशयात् तथाविधानां केवलेश्वरज्ञानदृष्टार्थयुक्तत्वाभाववत्ता तथा च भारतं केवलेश्वरज्ञानदृष्टा
र्थयुक्तं नारायणादन्येन कर्तुमशक्यत्वाद्व्यतिरेकेणरघुवंशादिवदित्यनुमान सूचितं भवति॥ननु कोह्यन्यइतिवाक्यात्तत्सिद्ध्युपपत्तेरिति चेत्तत्राह कोह्यन्य इति ॥यद्यप्यत्र कोह्यन्य इति वाक्यात्तात्
ज्ज्ञानमुपपद्यते विधीनां च प्रामाण्यं स्वतएव बाधकादप्रामाण्यं नचात्र तदस्ति अर्थवादानां वाक्याभिन्ने स्वार्थेप्रामाण्यमस्त्येवेत्युक्तरीत्येयशंकैवानुपपन्ना तथापि अधिकं समाधानं तत्क्रमप्रदर्शितमिति
ध्येयं ननु गुणख्यापकशब्दस्य स्तुतित्वात्कथं स्तुतिर्गुणोत्कर्षं इत्युच्यत इति चेन्न॥स्तुतिशब्दस्य कर्मणि क्तिन्प्रत्ययांतत्वेन तदर्थाभावात् तस्या विद्यमानगुणोत्कर्षोत्र वाक्येनोच्यतइत्यर्थः ॥श्लो०॥
॥अतएवेति॥ अन्यथा तोसुन्कसुनोरव्ययत्वात्तद्योगे नलोकेतिषष्ठीनिषेधः स्यादितिभावः॥ननु अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति प्रतिप्रसववार्तिकादुक्तोदाहरणे षष्ठीसंभवात्कथं
तद्बलेनानित्यत्वंसाध्यते ॥ सत्यं ॥ नलोकेतितिनिषेधस्य नित्यत्वेउक्तवार्तिकस्यैवानुत्थानात् सूत्र एव तुतत्सर्वं यद्वृत्तौ यच्च वार्तिक इति शाब्दिकोक्तेरित्याशयात् उपलक्षणमेतत् ।नलोकेति
निषेधोऽनित्यः तृजकाभ्यामित्यत्र त्रकाभ्यामिति वक्तव्ये तृनो निवृत्त्यर्थं तृचः सानुबंधकस्यग्रहणाज्ज्ञापकादिति न्यायमकारोक्तमपिसमाधानमवधातव्यं वाक्यार्थमाह॥को ह्यन्य इति ॥

॥ श्री० ॥ ननुपूर्वमर्थशब्दस्याध्याहृतत्वादविद्यमानार्थगुणोत्कर्ष इत्यसंगतमत आह ॥ अत्रेति ॥ अस्यां योजनायामित्यर्थः ॥ प्रयोजनं ॥ अविद्यमानार्थस्तुतित्वाभावरूपम् ॥ यथा न दृहं गत्वा तत्स्तुतौ अविद्यमानगुणोत्कर्षकथनं संभावितं दृष्टं परगृहं गत्वा प्रसंगादन्यस्तुतौ वास्तवत्वमेव तस्य दृष्टं तद्वदिति भावः ॥ बाधकेति ॥ एतद्वाक्यप्रतिपाद्यप्रमेये बाधकाभावादादिपदात् संवादसद्भावाच्चेत्यर्थः ॥ उत्तरत्र ॥ को ह्यन्य इतिवाक्ये ॥ व्यतिरेकव्याप्तेरिति ॥ कृष्णद्वैपायनो नारायणो भवितुमर्हतीत्यत्र पुंडरीकाक्षादन्यः को महाभारतकृद्भवेत् कोपीत्यर्थः को ह्यन्य इत्यर्थे पुंडरीकाक्षादन्य इतिमाध्यामावोक्तव्यतिरेकव्याप्तिप्रतिपादकोयमर्थ इति भावः उह्यः अत्र पूर्वार्धोक्तप्रतिज्ञायां हेतुः ॥ उह्यइति शेषः ॥ ॥
॥ कृ० ॥ नन्वविद्यमानस्तुतिरित्यत्र षष्ठीतत्पुरुषात्कर्मधारयस्यलघुत्वेन तदभ्युपगमे विद्यमानत्वे सति स्तुतित्वं लभ्यते तच्च न निषेधार्हवाक्याविद्यमानत्वस्यानाशंकितत्वाद्धेत्वसिद्धु

अविद्यमानेत्यतःपरमर्थशब्दोध्याहार्यः ॥ इदं वाक्यमिति शेषः ॥ यद्वा स्तुतिर्गुणोत्कर्षः ॥ अत्रोच्यत इति शेषः अत्रनार्थशब्दाध्याहारः ॥ अनेन प्रागुक्तस्य ग्रंथातर्गतविशेषणस्य प्रयोजनमुक्तं ॥ इयं च संभावनायुक्तिः ॥ निश्चययुक्तिस्तु चशब्दसूचिता बाधकरहितत्वादिः न नुभवेयत्र भारतस्यान्येन कर्तुमशक्यत्वलक्षणास्तुतिरुच्येत ॥ नचैवं ॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं परमिति भारत

नचकर्तुरेव

कर्तुर्व्यासस्यनारायणत्वलक्षणायाः स्तुतेरुपक्रमात् ॥ उत्तरत्रतस्यैवार्थस्योपपादनादित्यत आह ॥ नचेति॥कर्तुरेवात्र स्तुतिरुच्यत इति न वाच्यं ॥ किंतु भारतस्यापि ॥ कथमिति चेत् ॥ अत्रह्यनुमानेन व्यासस्य नारायणत्वं साध्यते ॥ कृष्णद्वैपायनमिति पूर्वार्धः प्रतिज्ञारूपः॥ कोह्यन्यइतिद्वितीयार्धो व्यतिरेकव्याप्तेः प्रतिपादकः ॥ ॥ ॥ ॥ ॥ ॥

पपादनायार्थविद्यमानत्वस्यैव शंकनादित्यत आह ॥ अर्थशब्दोध्याहार्य इति ॥ धर्म्यनुक्ते न्यूनतामाशंक्य ग्रंथातरगतत्वादितिहेत्वनुसारेणाध्याहार्यं दर्शयति ॥ इदंवाक्यमिति शेष इति ॥ स्तुतिशब्दश्च स्तूयतेऽनयेतिकरणे क्तिन्नंत इतिभावः । स्तुतिर्गुणोत्कर्ष इति ॥ स्तुतिशब्दस्य स्तुतिविषये लक्षणाश्रयणेन वा स्तूयतेसाविति कर्मणिक्तिन्नंतत्वाश्रयणेन वोक्तार्थलाभ इति भावः।पूर्वयोजनायां पदत्रयमध्याहार्यम् अत्र तु द्वयमिति विशेषः ॥ स्तुतिशब्दस्य करणे प्रयोगप्राचुर्यात्तदनुसारेण पूर्वयोजनाप्यावश्यकीतिध्येयम् ॥ बाधकरहितत्वादिरिति ॥ आदिपदात्संवादित्वसंग्रहः अत्रोक्तस्य वायुप्रोक्तवाक्यस्य कृष्णद्वैपायनं व्यासं विद्धिनारायणं भुवि कोह्यन्यः पुरुषव्याघ्र महाभारतकृद्भवेदिति मोक्षधर्मेण च संवादसद्भावादिति भावः ॥ व्यतिरेकव्याप्तेरिति ॥ सामान्येन वस्तुस्थितिमात्रमिदमुक्तम् यथा चास्य व्यतिरेकव्याप्तिप्रतिपादकत्वं तथाग्रे वक्ष्यामः ॥ ॥

असिद्ध इति॥नारायणादन्येन कर्तुमशक्यस्य कार्यस्यैवासिद्ध्या तद्विशिष्टहेतोरप्यसिद्धिरितिभावः तथात्वात्नारायणादन्येन कर्तुमशक्यकार्यत्वात् ननुव्याप्तिवचनसामर्थ्यादेव हेतोरूह्यत्वे न तेनच भारतकृत्त्वमात्रस्य हेतुत्वलाभेन नारायणादन्येन कर्तुमशक्यकार्यकृत्त्वस्य हेतुत्वोक्तिरनुपपन्नेत्यत आह ॥व्याप्तिवाक्यंचेति॥तदभिप्रायं नारायणादन्येनकर्तुमशक्यत्वरूपभारतविशेषणाभिप्रायकम् अयं भावः इदं वाक्यं व्याप्तिकथनपरमिति तदपि संमतं तच्च यथाव्याप्त्युपपादकं स्यात्तथाव्याख्येयं भारतकृत्त्वमात्रस्यैव हेतुत्वेतिप्रसंगादिना व्याप्त्युपपादकत्वासंभवात् नारायणादन्येन कर्तुमशक्येति भारतविशेषणमावश्यकंभवति व्याप्तिवचनवशात् विशिष्टहेतुत्वाभटाति ॥ तथा च कृष्णद्वैपायनः नारायणो भवितुमर्हति तदन्यकरणाशक्यभारतकृत्त्वाद्यः नारायणान्यः स तदन्यकरणाशक्यभारतकृत्त्वाभाववान् यथा कालिदासादिरिति व्यतिरेकव्याप्तिमूलकानुमानमिह द्रष्टव्यम् ॥ ननु नावगम्यत एव साक्षाद्भारतस्तुतेः को ह्यन्य इति

अनुक्तोहेतुर्व्याप्तिवचनसामर्थ्यादूह्यःतत्र ननावद्ग्रंथकृत्त्वं हेतुः ॥ कुत इत्यत आह ॥ इतरत्रापीति ॥ ग्रंथकृत्त्वस्य नारायणवादितरत्रापि साम्यादनैकांत्यप्रसंगात ॥ नापि भारतकृत्त्वंकुत इत्यत आह ॥ इतरत्रापीति॥ग्रंथविशेषकर्तृत्वेन नारायणत्वसाधनस्य इतरत्र कालिदासादावपि साम्यादतिप्रसंगात् ॥ तस्मान्नारायणादन्येन कर्तुमशक्यस्य कार्यस्य कर्तृत्वमत्रहेतुः॥ न चासावसिद्धः ॥ भारतस्यतथात्वादित्युक्तं

इतरत्रापि साम्यात् ॥ तत्र च

व्याप्तिवाक्यं च तदभिप्रायं मंतव्यं ॥ तथा च कथमत्र भारतस्य स्तुतिर्नैविगम्यते॥ श्रुत्यानवगमेप्यर्थादवगमादिति अस्त्वेवंविधं भारतं व्यासविरव्यासितायास्तु गीतायाः किमायातमित्यत आह ॥ तत्रचेति ॥ ॥ ॥ ॥ ॥

वाक्येऽदर्शनादित्यतआह ॥ श्रुत्येति ॥ अर्थादिति ॥ भारतस्योत्तमत्वाभावे तत्कर्तृव्यासस्य नारायणत्वलक्षणस्तुत्यनुपपत्तिरूपान्यथानुपपत्तिबलादित्यर्थः॥पूर्वार्धेइतरत्र॥ (अ. प्र. प.) ॥ कृ० ॥ ऊहप्रकारं दर्शयति ॥ तत्रेत्यादिना ॥ अतिप्रसंगादिति ॥ कालिदासो नारायणः रघुवंशकर्तृत्वात् व्यतिरेकेण चैत्रवदित्याभाससाम्यादित्यर्थः नन्वेवं सति कथमुत्तरार्धस्य व्यतिरेकव्याप्तिप्रतिपादकत्वं नारायणत्वाभावस्य भारत कर्तृत्वाभावेन सह व्याप्तिप्रतिपादनेपि विशिष्टहेत्वभावेन सह तदप्रतिपादनादित्यत आह ॥ व्याप्तिवाक्यंचेति ॥ यो नारायणो न भवति स नारायणादन्येन कर्तुमशक्यस्य महाभारताख्यकार्यस्य कर्ता नभवतीत्यतदभिप्रायकमित्यर्थः अर्थादिति ॥ को ह्यन्य इति श्लोके ॥ व्यासस्य नारायणत्वलक्षणस्तुतौ तात्पर्यम् ॥ तदुपपादनाय नारायणादन्येन कर्तुमशक्यत्वं भारतविशेषणमभिप्रेतम् ततश्चार्थापत्त्यातदवगमादित्यर्थः ॥ ॥

॥ श्री० ॥ कालिदासादौ॥अतिप्रसंगात् कालिदासोनारायणोरघुवंशकृत्त्वादित्यपिसाधनप्रसंगादित्यर्थः॥किमियमिति॥प्रमाणभूतभारतांतर्गतत्वाख्या॥तत्प्रसंगादिति॥प्रामाण्यप्रसंगादित्यर्थः
अन्यथातत्रैवव्यभिचारापत्तेरितिभावः ॥ अनुवाद इति ॥ प्रमाणभूतभारतांतर्गतत्वेपिकलिंगदुर्योधनसंवादानुवादपरत्वान्नकलिंगोपदेशस्य स्वार्थप्रामाण्यमित्यर्थः ॥अयमपीति॥ वासुदेवोपदे
शोपि प्रमाणभूतभारतांतर्गतत्वेपिवासुदेवार्जुनसंवादानुवादपरत्वान्नस्वार्थेप्रामाण्यमित्येतदपिस्यादितिभावः॥ ॥ रूपयतीति ॥ प्रतिपादयतीत्यर्थः ॥ नहिवासुदेवार्जुनसंवादस्यस्वार्थेता
त्पर्यमितिभावः ॥ भारतैकदेशांतरेति ॥ वासुदेवार्जुनसंवादप्रतिपादकेत्यर्थः ननुव्यधिकरणबहुव्रीह्याश्रयणंकथंतस्यार्थागमकत्वेनजघन्यत्वादित्यतआह ॥ गमकत्वादिति ॥ समाना
धिकरणबहुव्रीहिवत्तुव्यधिकरणबहुव्रीहेरपि अर्थगमकत्वस्यचक्रपाणिशब्दादौदर्शनादित्याशयः ॥ एतावता सर्वभारतार्थसंग्रहरूपत्वेन सर्ववेदाद्यर्थोपबृंहितामित्याद्युक्त्यादुर्गमार्थत्वमपिलब्ध
मित्याशयेनदुर्गमार्थत्वाच्चेत्युक्तं ॥ विषयप्रयोजनयोः संबंधमुपपादयति ॥ तत्रेत्यादिनाग्रंथप्रतिपाद्योधर्मोद्विविधः ज्ञानात्पूर्वमनुष्ठितस्तदुत्तरमनुष्ठितश्चेति॥ ॥ ॥

तत्रैवंविधप्रामाण्याद्युपेते भारते गीतामुपनिबबंध व्यासः किमियंगीतायाःप्रामाण्यादेःसंभावनोत निश्चययुक्तिः नद्वितीयःतथात्वे कलिंगोपदेशा
देरपितत्प्रसंगात्॥अनुवादोसाविति चेत् अयमपितथैव॥आद्येनिश्चायकं वाच्यमित्यत उक्तं॥वासुदेवेति॥संवादं रूपयतीति संवादरूपा॥तथापि
भारतैकदेशांतरपरिहारेणास्या एव व्याख्याने को हेतुरित्यत उक्तं सर्वेति॥सर्वभारतार्थस्य संग्रहो यस्यामिति गमकत्वात् व्यधिकरणो बहुव्रीहिः

वासुदेवार्जुनसंवादरूपां सर्वभारतार्थसंग्रहां भारतपारिजातमधुभूतां गीतामुपनिबबंध ॥ तच्चोक्तं॥

एतद्व्याख्याने सर्वमपि भारतंव्याख्यातप्रायंभवतीतिभावः ॥ नैतावता भारतसमा गीता किंतु ततोधिका चेत्याशयवानाह॥भारतेति ॥कुत
एतदित्यत आह॥तच्चोक्तमिति॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ रूपयतीति ॥ संवादशब्दोपपदाद्रूपधातोर्णिच्यनादृपरूपक्रियायामित्यस्मान्मूलविभुजादित्वात्कप्रत्यये णेरनिटीति णिलोपेऽजाद्यतष्टाबिति टापि समासेच संवादरूपेति
भवतीतिभावः ननु संग्रहशब्दो न करणसाधनः ग्रहवृदृनिश्चिगमश्चे युक्तापप्रत्ययबाधित्वा परत्वाल्ल्युट्प्रसंगात् ॥ न न वासरूपविधिः॥क्तल्युट्तुमुन्खलर्थेषु तन्निषेधात् किंतुभावसाधनः
तस्य च भारतार्थशब्देनसह षष्ठीसमासाभ्युपगमे स्त्रीलिंगत्वानुपपत्तिः घञबंत इति लिंगानुशासनेन पुंस्त्वविधानात् ॥ गीतायाः संग्रहक्रियारूपत्वाभावेन सामानाधिकरण्यानुपपत्तेश्चेत्यत
आह ॥ सर्वभारतार्थस्येति ॥ ननु समानाधिकरणानां बहुव्रीहिरिष्यत इति वार्तिकविरोध इत्यत उक्तं ॥ गमकत्वादिति ॥ विग्रहेणैवार्थस्य प्रत्यायकत्वादित्यर्थः ॥ समासपदं
विग्रहार्थाभिधायकं चेत्तदाकृत्तद्धितसमासाद्यर्थगमकशब्दे भवंति ॥ नसर्वत्र ॥ अभिधानलक्षणाहि कृत्तद्धितसमासा इति ॥ पंचभिर्भुक्तमस्येत्यत्र समानाधिकरणस्थलेवानेकमन्यपदार्थइति ॥
समासो न भवति अनभिधानादितिच ॥ प्रकृते च विग्रहार्थगमकत्वात्समासः ॥ वार्तिकं तु प्रायिकाभिप्रायकमिति भावः ॥ व्याख्यातप्रायमिति ॥

॥ श्री० ॥ तत्रज्ञानात्पूर्वमनुष्ठितधर्मस्य कथं साक्षान्मोक्षसाधनत्वमतो न जन्यजनकभावसंबंधस्तयोर्युक्त इत्यत आह॥धर्मस्त्विति॥इदं कुत इत्यतो ज्ञानमेवेति पूर्ववाक्यं अत्र मोक्षो लिंगभंगरूपो विवक्षितः ॥ अतो ज्ञानमेवेति युक्तं ॥ अंतःकरणशुद्ध्यादीत्यादिपदेन वैराग्यादिग्रहणं ॥ कर्मणाशुद्धसत्त्वस्यवैराग्यंजायतेत्यादीत्यादिवचनात् ॥ ज्ञानं जनयन्निति ॥ यथोक्तं ॥ पूर्वभाविशुभानां हि ज्ञानेनैव कृतार्थतेति ॥ आनंदोत्कर्षहेतुरिति ॥ यथोक्तं ज्ञानोत्तरकर्मणां मुक्तावनुप्रवेशः स्यादिति ज्ञानसाहित्येनेति शेषः आनंदोत्कर्षहेतुरिति समुच्चयसाध्यतांगीकारात् इमं संबंधमाक्षिप्य समाधानमुत्तरवाक्यमित्याशयेनावतारयति ॥ केचिदिति ॥ मायिन इत्यर्थः ॥ धर्मानुष्ठानमेवेति ॥ कस्यानंदोत्कर्षहेतुत्वं स्यादित्यर्थः ॥ अन्ये ॥ भास्कराः तर्हि धर्मादिप्रतिपादकशास्त्रस्यान्यस्याभावात्तत्सिद्धिर्नस्यादित्यत आह ॥ तदर्थानामिति ॥ स धर्मादिरर्थो विषयो येषांतानि तदर्थानि तेषां तत्प्रतिपादकानामित्यर्थः ॥ मन्वादीति ॥ तत्प्रणीतेत्यर्थः ॥ सनकादीति ॥ तत्प्रणीतेत्यर्थः ॥ तत्र मन्वादिशास्त्रं धर्मादिप्रतिपादकं सनकादिप्रणीतयोगशास्त्रं ज्ञानादियोगप्रतिपादकमिति विवेकः नन्वस्मिन्कल्पे तेषामभावात्तदर्थं गीतारंभोऽस्तु युक्त इत्यत उक्तं ॥ प्रतिकालमिति ॥ प्रतिकल्पमित्यर्थः ॥ ॥ ॥ कृ० प्रायः स्यात्ताडनेमृत्यौ तुल्यनात्तुल्यशोरपीति विश्वः

सर्वशास्त्रेषुवरं तदेवमाप्तिमूलत्वादिना प्रामाण्याद्धर्मादिप्रतिपादनेन सविषयत्वान्मोक्षार्थत्वेन सप्रयोजनत्वात्सधिकारित्वाद्दुर्गमार्थत्वाच्चव्याख्ये यागीतेतिस्थितं तत्रज्ञानमेवकेवलंमोक्षसाधनम् धर्मस्तुज्ञानात्प्रागनुष्ठितोंतःकरणशुद्ध्यादिद्वारा ज्ञानंजनयन्मोक्षसाधनम् ज्ञानोत्तरस्तु मुक्तावानंदोत्कर्षहेतुरित्येवं विषयप्रयोजनयोः संबंधोऽभिमतः ॥ केचित्तु ज्ञानोत्तरकालंधर्मानुष्ठानमेव नास्तीतिब्रुवते अन्येतुज्ञानकर्मस

भारतं सर्व शास्त्रेषु भारते गीतिका वरा॥विष्णोःसहस्रनामापि ज्ञेयं पाठ्यं च तद्द्वयमिति महाकौर्म्ये॥

मुच्चयसाध्यत्वान्मोक्षस्य तत्प्रतिपादनाय गीतारंभो न धर्मादिप्रतिपादनार्थं तदर्थानां मन्वादिधर्मशास्त्राणां सनकादियोगशास्त्राणां च प्रतिकालं विद्यमानत्वादित्याचक्षते ॥ ॥ कृत्स्नाख्यातातुल्यामित्यर्थः साकांक्षत्वात्सर्वशास्त्रेष्वित्यतः परं लिंगव्यत्ययेनवरशब्दसंबंध इत्याह ॥ सर्वशास्त्रेषुवरमिति ॥ ॥ आप्तिमूलत्वादिनेति ॥ वेदादिसंवादसंग्रहार्थं आदि शब्दः अयंभावः ॥ वासुदेवार्जुनसंवादरूपामित्यनेनाप्तिमूलत्वं वेदादिसंवादित्वं च सूचितं ॥ वासुदेवस्यार्जुनं प्रत्याप्तत्वात्॥ वासुदेवेन स्वोक्तार्थे न जायतइत्यादिसंप्रवर्णसंमतिकथनाच्च ॥ न च व्यासोक्तगीतायाः कथं वासुदेवाप्तिमूलत्वमिति वाच्यं ॥ अनुवादत्वात् ॥ यथोक्तमगमापि तथैवेति ॥ एवं वासुदेवेनार्जुनमोक्षार्थं धर्माद्युपदेशाद्धर्मादिप्रतिपादकत्वंमोक्षार्थत्वं च तेनैवाविशेषणेन सूचितम् । अर्जुनग्रहणेन सत्सिद्धाधिकारित्वं दुर्गमार्थत्वं च सूचितम् । अर्जुनस्यसत्त्वात् ॥ अर्जुनेनव्यासिश्रेणैव वाक्येनेत्यादिना कृष्णवाक्यस्यदुर्गमार्थत्वकथनाच्च । एवं भगवताभिमतं वासुदेवार्जुनसंवादरूपत्वं प्रामाण्यादिनिश्चायकमिति तद्युक्तमेवेति ॥ तत्रेति ॥ व्याख्येयायांगीतायामित्यर्थः अंतःकरणशुद्ध्यादीति आदिपदाच्छ्रवणादिसंग्रहः ॥ केचिदिति ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ सपर्याप्तमुक्ति ॥ आनंदाभिन्नाऽद्वैतरूपसंपूर्णमुक्तेः ॥ भगिमन्युस्तनयं अर्जुनं प्रति भगवता मोक्षे गीतायामनुगीता ॥ तदुपक्रमे भगवता कृष्णेनार्जुनं प्रत्युक्त मित्यर्थः ॥यथोक्तमाश्वमेधिके पर्वणि ॥ न च शक्य पुनर्वक्तुमशेषेण धनंजय ॥ स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने ॥ यगहि ब्रह्मकथितं योगयुक्तेन तन्मयाऽद्य ॥ उदाहरिष्यंते चात्रेति ॥ कथमनेनोभयनिराकरणमित्यत प्रथमव्याख्यां दूषयति ॥ नचेति ॥ तथाविधज्ञानोत्तर कर्मानुष्ठानमेवनास्तीत्येवं प्रतिपादकं ॥ ननुयस्त्वात्मरतिरेवेतिश्लोके तस्यकार्यं न विद्यते इतिज्ञानिनः सर्वथाकर्माभावोक्तेरिति चेन्न ॥ तद्वाक्यस्यान्यथा व्याख्यास्यमानत्वादित्याशये नाह ॥ तथाचेति ॥ तृतीयाध्याये आत्मरतिरेवेत्यवधारणादित्यादिनावक्ष्यत इत्यर्थः द्वितीयव्याख्यांनिराह ॥ मन्वादीनि ॥ अत्रेत्यादावपि ॥ गीतायामिति शेष ॥ कुत इत्यत आह ॥श्रुत्यादीति ॥ अंतमः प्रविशंतीतिश्रुतिः ॥ आदिपदेन यथान्नंमधुमयुक्तं मधुनान्नमयुत ॥ एवंतपश्चविद्याचसमयुक्त भेषजंमहादात स्मृतिर्ग्राह्या ॥अभ्युपगमादिति॥ समुच्चयवादिना भास्करेणत्वयेत्यर्थः

तदुभयंनिराकर्तुमाह॥सहीति॥स गीतोक्तोधर्मो ब्रह्मणःस्वरूपज्ञाने सुपर्याप्तोऽज्ञानात्प्रागनुष्ठितो ब्रह्मणः पदवेदने जाते अनुष्ठितःसुपर्याप्तः सुप

॥ स हि धर्मःसुपर्याप्तोब्रह्मणः पदवेदन इत्यादिच ॥ ॥

र्याप्तमुक्तिहेतुरित्यनुगीतोपक्रमे भगवतैवोक्तं उदाहरिष्यंतेचात्र स्पष्टार्थानि वाक्यानि॥नच गीतायां तथाविधमेकमपि वाक्यंदृश्यतेतथाचवक्ष्यते

॥ कृ० ॥ अत्र नास्तीत्यनंतरं इतिप्रतिपादनाय गीतारंभइति शेष । अत एव यावानर्थइति श्लोके पदव्याख्यानद्वयानुवादः ॥ ननु तच्छब्दः पूर्वोक्तपरामर्शकः तथा च सहिधर्मइतिवाक्यात्पूर्वं गीतोक्तधर्मस्यानुक्तत्वात् । कथं तत्परामर्शइत्यत उक्तम ॥ अनुगीतोपक्रम इति । तथाच गीताया भीष्मपर्वस्थत्वादनुगीतायाश्चाश्वमेधपर्वस्थत्वाद्युक्तमितिभावः । अनुगीतायामेव पूर्वोक्तं परामृश्यतामित्यत उपक्रमपदंपुरुषांतरोक्तस्य कथं पुरुषांतरेण परामर्श इत्यत उक्तम ॥भगवतैवेति॥ अनुगीताया अपि कृष्णार्जुनसंवादरूपत्वादिति भावः ॥ ननुकथमिदं वाक्यं मतद्वयनिरासकं विवक्षितार्थस्यास्माद्वाक्यात् स्फुटमप्रतीतेः ॥ व्याख्यानस्य च ब्रह्मणः पदवेदने सत्येव तत्समुचित एवेति यावत् ॥ धर्मः सुपर्याप्तमुक्तिहेतुरित्यादिप्रकारेणकर्तुंशक्यत्वेनातिप्रसंगित्वादित्यत आह ॥ उदाहरिष्यंते चेति ॥ आद्ये प्रथमे निवृत्तादीनि कर्माणि ह्यपरोक्षशब्दइत्येवमादीनि ॥ द्वितीये तुनहास्य कर्म क्षीयतेऽस्माध्द्येवात्मना यद्यत्कामयते तत्तत् सृजतेइत्यादीनिवाक्यान्युदाहरिष्यंत इत्यर्थः ॥ अपव्याख्यानद्वयंयुगपदेव निराह ॥ नचेति ॥ तथाविधमिति ॥ ज्ञानोत्तरकालंकर्मानुष्ठानाभावपरं ज्ञानकर्मसमुच्चयपदं वेत्यर्थः ॥ ननु कथंनदृश्यते यावानर्थ इत्यत्र तथाविधार्थस्यदर्शनादित्यत आह ॥ तथा च वक्ष्यत इति ॥ ज्ञानिफलं समुद्रोदकमिवमहत् । कर्मिफलं तु कूपोदकमिवाल्पं अतः कुतस्तयोःसाम्यं ।

॥ श्री० ॥ श्रुत्यादौ समुच्चयस्यास्फुटं प्रतिपादनाभावात्स्फुटप्रतिपादनार्थी गीतेति शंका ॥ तत्रेति ॥ ममेति ॥ तत्र मन्वादिशास्त्रेष्वपि धर्मादेः स्फुटं प्रतिपादनाभावात्तदर्थं गीतेति वयमपि वदाम इत्यर्थः मन्वादिशास्त्रेष्वेतादृशेन धर्मादेः प्रतिपादनाभावात्तदर्थं भारतनिर्माणमित्यत्रोपष्टंभकमाह ॥ यथोक्तमिति ॥ वेदेति ॥ श्रुत्यस्यादिवेदशब्देन सर्वशास्त्राणि गृह्यंते ॥ भारतनिर्माणस्य स्फुटप्रतिपादनार्थत्वे गीताया अपि तदर्थत्वमिति भावः ॥ प्राप्त इति ॥ कर्तव्यतयाऽवगमस्य प्राप्त [illegible] ॥ [illegible] प्रामाण्यशंकया प्रतिबद्धमभूत्तत्प्रामाण्यसमर्थने मति प्रतिबंधकाभावात् [illegible] भवति ॥ तत्र परमपर्यवसानमिति ॥ [illegible] इत्यन्यथाप्रतिपत्तिश्चेति ॥ बांधवादिविषय इति ॥ तद्विषयमोहः कीदृश इत्यतस्तं दर्शयति ॥ ममैत इत्यादिना ॥ दृष्ट्वेमं स्वजनं [illegible] कम्य जनशब्दार्थस्याचार्याः पितरः पुत्रा इत्यादिश्लोकानुवादो ममेते संबंधिनोऽहं चैषां संबंधीति ॥ येषामर्थे कांक्षितमित्यादेस्तात्पर्यानुवाद एते चेति ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधवेत्यादेस्तात्पर्यानुवादः ॥ [illegible] न पश्यामीत्यस्य कारणं गरीय इत्यंतस्य तात्पर्यं पापं चेति ॥ यद्वा जयेमेत्यादेस्तात्पर्यं जयश्चेति ॥ तत्र गुरूनहत्वेत्यादेरयमर्थः ॥ अत्र पक्षद्वयमस्ति महानुभावान्द्रोणादिगुरूनहत्वा राज्याद्यभावेनेहलोके भैक्ष्यमपि भोक्तुं श्रेय परलोके महासुखमद्भावादित्येकः पक्षः

मन्वादिशास्त्राणां विद्यमानत्वेन धर्मादेः प्रतिपाद्यत्वेऽप्युच्चयेऽपि न प्रतिपाद्यः ॥ श्रुत्यादिप्रतिपाद्यत्वाभ्युपगमात् ॥ तत्र च न स्फुटं प्रतिपादनमिति चेन्न ॥ समं ॥ यथोक्तं वेदार्थाज्ञानाच्चेति ॥ तस्माद्यत्किंचिदेतदित्युक्तमेव विषयादिकमिति ॥ इदानीं गीताव्याख्यानावसरे प्राप्ते धर्मक्षेत्र इत्यारभ्याशोच्यानन्वशोचस्त्वमित्यतः प्राक्तनस्य ग्रंथस्य तिरोहितार्थत्वात्तात्पर्यमाह ॥ तत्रेति ॥ तत्र गीतिकायां कैश्चन श्लोकैरिदमुच्यत इति शेषः ॥ नन्वत्र धर्मो नापि तत्त्वं प्रतिपाद्यते तत्कुतोऽस्य गीतायामनुप्रवेशः ॥ मैवं ॥ भगवताऽर्जुनस्य बांधवे प्रसक्तिं दर्शयताऽस्य ग्रंथस्य तादर्थ्यात्तत्र प्रवेशोपपत्तेः ॥ बांधवादिविषयो मोहो ममैतेऽहमेतेषां ॥ एते च मन्निमित्तं नंक्ष्यंति ॥ कथमेतैर्विनाऽहं भवेयं ॥ पापं च मे भविष्यति जयश्च संदिग्ध—

॥ तत्र सेनयोर्मध्ये बांधवादिमोहजालसंवृतं विषीदंतमर्जुनं भगवानुवाच ॥

॥ कृ० ॥ तथा चाल्पास्थिरफलकर्मनिंदया महानंतफलसाधने योगे प्रेरणं युक्तमेवेत्यभिप्रायकत्वात्तच्छ्लोकस्यापव्याख्या ॥ नतूक्तवक्ष्यमाणन्यायान्निरस्तमिति न वदाम इत्यर्थ । यदप्युक्तं तदर्थानां मन्वादिशास्त्राणामित्यादि तदपि दूषयति ॥ मन्वादिशास्त्राणामिति ॥ वेदार्थाज्ञानाच्चेतीति । अनेन भारतस्य वेदार्थज्ञानोपायत्वमुक्तं भाक् श्रुत्यादौ धर्मादेः स्फुटप्रतिपादने च तदनुपपन्नं स्यादिति भावः बांधवादिनिष्ठमोहग्रहणे तत्संवृतत्वं नार्जुनस्य संभवतीत्यत आह ॥ बांधवादिविषय इति ॥ भवेयमिति ॥ सुखीति शेषः ॥ इत्यादिरूप इति ॥ श्रेयश्च न पश्यामीत्यादिरादिपदार्थः ॥ अत्र दृष्ट्वेमं स्वजनं आचार्याः पितर इत्याद्युक्त्या ममैतेऽहमेतेषामिति द्वयमवगम्यते ॥ हंतुं स्वजनमुद्यताः ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ पापमेवाश्रयेदस्मान् यद्वा जयेम यदि वा नो जयेयुः ॥ न च श्रेयोऽनुपश्यामीत्यादिभिरेतन्मन्निमित्तं नंक्ष्यंतीत्याद्यर्था अवगम्यंत इति ज्ञातव्यम ॥

१ कर्तरिषष्ठी बांधवादिकर्तृकइत्यर्थः २ भाव्ये कर्मणि षष्ठ्या वा विषयसमस्या वा समास इति भावः

॥ श्री० ॥ अर्थकामादिसर्वपुरुषार्थसाधनभूतान्गुरून् हत्वेहैव लोके तद्रुधिरेण प्रदिग्धानाकान्भोगान् राज्यादिविषयान्भुंजीय परलोके तु सुखादु स्वमनुभोक्तव्यमित्यपरः पक्षः॥एवं चेहलोके दुःखमनुभूय परलोके सुखमनुभोक्तव्यमित्येतच्छ्रेय उत इह लोके सुखमनुभूय परलोके महादुःखमनुभोक्तव्यमित्येतच्छ्रेय इत्येतयोर्मध्ये किं गरीय इत्येतद्द्वयं नाविद्मः॥इहलोके सुखमनुभूय परलोके दुःखमप्यनुभवामो यदीहलोकेऽस्माकं जयो निश्चितः स्यात॥नचैवं॥ किन्नाम जयम्स् संदिग्ध इत्याह ॥ यद्वा ॥ वयं तान् जयेम यदि वा नोऽस्मांस्ते जयेयुरिति जय निश्चयाभावेन त्वां पृच्छामि यच्छ्रेयःस्यात्तन्निश्चितं ब्रूहीत्यादिना ॥ जालपक्षिबंधनभूता मिक्र ॥ अत्र यद्यपि समासप्रत्यय योगनियमाभावान्नीत्यादिविभक्तेः प्रत्ययपूर्वाभि तायाश्च विभक्तेर्लोपविधानात्कृष्णं श्रितः कृष्णश्रित महानमगस्येति वाक्ये महानमनदिति प्रयोगदर्शनात्तत्र जालशब्दस्येवशब्देन समासोद्धिर्यायविभक्तिलोपेन भाव्यं ॥ जालमिवेति स्थिते विभक्तिलोपेगुण न माति जालेनैवेतिकल्प्य।तथापि इवेनसहनित्यसमासोविभक्त्यलोपश्चेति वार्तिके इवशब्देन नियमसमासस्य विभक्त्यलोपस्य च विधानाज्जालमिवेतियुक्तं

इत्यादिरूपो मिथ्याप्रत्ययोबांधवादिमोहः तेषु स्नेहो वा॥सजालमिवतेन संवृतं तत एव विषीदंतं॥विषादोनाम मोहनिमित्तःशोकायन्मनोदौर्बल्यं॥यस्मिन्सति सर्वव्यापारोपरमो भवति॥नन्विदानीमेव कुतोर्जुनस्य मोहसमुत्पत्तिः॥नह्येते बांधवादय इतिप्राङ्नाज्ञासीत॥ येन युद्धाय महां

॥ प्रज्ञावादान् स्वमर्नोपोत्थवचनानि ॥ कथमशोच्याः ॥ गतासून् ॥ ११ ॥ ॥

॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥
॥ गतासूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥ ॥

तमुद्योगमकार्षीदित्यत आह॥ सेनयोरिति॥महाऽपकारस्मरणेनानुवर्तमानोऽपि कोपो मृदुमनसां बांधवादिष्वंतकाले निवर्तते स्नेहश्चोत्पद्यते

॥ कृ० ॥ गीतातात्पर्यानुसारेणाह ॥ तेषुस्नेहइति ॥ मोहपदेनमोहहेतुः स्नेहोलक्ष्यतइतिभावः ॥ तद्धेतुत्वं नच तु स्नेहादर्भत्वेनाशंक्येतितात्पर्यनिर्णयस्पष्टम् ॥अस्मिन्व्याख्यानेसंवृतत्वंनाम मूढत्वं ॥ अतएववक्ष्यति ॥ ततोमोहइतिप्रसिद्धमेवेति ॥ ननु जालशब्दस्यसमूहार्थत्वेमोहसमूहसंवृतत्वं लभ्यते ॥ तच्चज्ञानित्वान्नार्जुनस्ययुक्तमित्यतआह ॥ सजालमिवेति ॥ मत्स्यबंधनमिवे त्यर्थः ॥ जालंगवाक्षआनायेक्षारकदंबकेदंबयोरितिनिश्चोक्तजालशब्दस्यानायापरपर्यायमत्स्यबंधार्थत्वादितिभावः ॥ ननुमसदु स्वसुखंभीरमित्येतावद्व्याख्यानावसरं विषादोनाम दुःखजन्यो विक्रियाविशेषइत्युक्तम ॥ तस्यच विषादस्य भ.ष्य:कमोहप्रभवत्वं ॥ अननसाधनप्रयोजकत्वंतु अनुभवविरुद्धमित्याशंक्यसुद्धत्वदौर्बल्यामिति गीतानुसारेण विषादपदार्थमाह॥ विषादोनामेति ॥ मोहप्रयोज्यत्वप्रदर्शनायोक्तं ॥ मोहनिमित्तःशोकइति ॥ अनुभवाबाधनायोजकत्वप्रकटनायाह ॥यस्मिनसतीति

१ धात्वर्थेनाविवेकनतत्कार्यमन्यथाज्ञानं लक्ष्यतइतिभावः २ अविवेकहेतुर्लक्ष्यतइतिभावः.

श्री०॥ ॥ इदं च समस्तमेकमेव पदमितिमंतव्यं ॥ ततो मोह इति ॥ उत्कर्षं इत्यर्थः ॥नन्वर्जुनस्येंद्रादेर्नारायणेनापरोक्षज्ञानित्वात्कथं मोहजालसंवृतत्वोक्तिरित्यत आह अर्जुनस्येति ॥ ज्ञानित्वात् ॥ पार्थाद्वेषेण इत्यादिना ज्ञानिषु गणनादिति भावः ॥ इयादीति ॥ भूयमानपापसंभोगादिनिमित्तं किंचिदित्यर्थः ॥ ननु यो धर्माधर्मौ ... ॥ अर्जुनवादोपि एतादृग्बुद्धिमत्त्वधर्मगो आचार्यश्च ... बाधितायक ... मित्रद्रोहे च पातकमित्यधर्मविषयकत्वादित्यत आह ॥ नचेति ॥ बौद्धादेरपीति ॥ आहुः ... ॥ ... पाटिका मोगनादि परमोधर्मस्तद्विरुद्धोऽधर्म इति धर्माधर्मविषयकत्वेन बौद्धादेरपि बुद्धिमद्वादत्वप्रसंगादित्यर्थः ॥ तद्बौद्धादेरपि तत्त्वप्रसंगात् बुद्धिमत्त्वप्रसंगस्तथा च तद्वाक्यस्यापि बुद्धिमद्वादत्वं स्यादितिभावः ॥ तस्माद्धर्माधर्मा ... बुद्धिमद्वादे प्रयोजक ॥ तच्चार्जुनवादे नास्ति ॥विष्णुद्वेषवदनुबंधिनिग्रहस्य परमधर्मत्वेन तद्विरुद्धत्वादितिध्येयम ॥ कार्यकारणभावइति ॥ नदितरषष्ठ्यर्थमंतभस्य प्रकृतानुपयोगादितिभावः ॥ ननु कार्यकारणभावे षष्ठी कुत इत्यत आह ॥ नहीति ॥ यइति ॥ व्यवहारस्य व्यवहर्तव्यज्ञानसाध्यत्वादित्यर्थः तर्हि प्रज्ञापदस्य वैयर्थ्यं स्यात् ... ज्ञानपूर्वक इति ... इत्यर्थः ॥ अब्भक्ष इति ॥ अप्मात्रभक्ष इत्यर्थः ॥ अन्यथेति ॥ सावधारणत्वाभावे स्वमनीषयाऽजन्यवादाभावेन व्यावर्त्याभावात् ॥ ततश्च स्वमनीषापदवैयर्थ्यं स्यादतोव्यर्थ ... न्यायेनावधारणं गमयति ॥ श्रुतवाक्यादिवादेष्वपि अंततः पदार्थज्ञानपूर्वकत्वनियमादितिभावः ॥

ततो मोहं इति प्रसिद्धमेवेतिभावः ॥ अर्जुनस्य ज्ञानित्वान्मोहजालसंवृतत्वमीषदेवेति मंतव्यं ॥ प्रज्ञावादानित्यतःप्रज्ञावतां बुद्धिमतां वादान् वचनानीति कश्चिद्व्याख्यातवान् ॥ तदसत् ॥ नहि दृष्ट्वेमंस्वजनमित्याद्यर्जुनवाक्येषुकश्चिद्बुद्धिमद्वादोदृश्यते ॥ नहि बुद्धिमंतोनारायणाद्विट्तदनुबंधिनिग्रहमधर्मं वदंति ॥ नच धर्माधर्मविषयत्वमात्रेण बुद्धिमद्वादो भवति ॥ बौद्धादेरपि तत्त्वप्रसंगादित्याशयेनान्यथा व्याचष्टे॥ प्रज्ञावादानिति॥स्वस्या एव मनीषाया उत्थितानि ननु शास्त्राचार्योपदेशप्राप्तानि कथमेतल्लभ्यते ॥ उच्यते ॥ प्रज्ञायाःवादाःप्रज्ञावादाः॥कार्यकारणभावेषष्ठी॥ नहि स वादोऽस्ति यः प्रज्ञापूर्वोनभवतीति ॥ सामर्थ्यात्स्वेतिलभ्यते ॥ सावधारणंचैतत् अब्भक्ष इति यथा ॥ अन्यथा पुनर्वैयर्थ्यादिति ॥ कथमशोच्या इत्यतआहेति शेषः ॥ गतासूनित्यतःपरमितिशब्दः ॥

॥कृ०॥प्रज्ञावतामिति प्रज्ञाशब्दस्तद्वल्लक्षक इति भावः ॥ बौद्धादेरपीति॥तद्वाक्यस्यापीत्यर्थः तस्याप्यहिंसापरमोधर्मस्तद्वधर्म. प्राणिनांवध इत्यादिना धर्माधर्मप्रतिपादकत्वादिति भावः प्रमाणवाक्यस्यापि स्वमनीषोत्थत्वात्तद्व्यावृत्त्यर्थमाह ॥ स्वस्या एवेति॥ पुनर्वैयर्थ्यादिति॥नहि स वादोऽस्ति यः प्रज्ञापूर्वो न भवति ततः पदार्थज्ञानपूर्वकत्वनियमादितिभावः

१ मिथ्याप्रत्ययरूप. २ अत्र मोहशब्दोऽविवेकपरोमिथ्याप्रत्ययपरश्च

॥ श्री० ॥ इदानीमपि तेषां गतासुत्वाभावादाह ॥ आसन्नेति ॥ उक्तं ॥ पूर्वोपीविहितं ॥ नत्कथमिति ॥ विहितस्यैवाक्षेपकत्वस्यादित्याशयः ॥ कुतोनहीत्यतआह ॥ असिद्धस्येति ॥
अशोच्यप्रज्ञावादत्वयोरर्जुनेनानंगीकृतत्वेनासिद्धत्वादित्यर्थः ॥ सिद्धस्येति ॥ शोकस्य शोकसंविग्नमानस इत्यादिना सिद्धत्वाद्भाषणस्याप्यर्जुन उवाचेत्यादिनासिद्धत्वादित्यर्थः ॥ ११ ॥
अर्जुनस्यज्ञानित्वेनेश्वरनित्यत्वनिश्चयमत्वात्तंप्रतितत्साधनमयुक्त मित्यत आह॥ अर्जुनमिति॥योजनेति॥गीतातात्पर्योक्तेत्यर्थः॥अनेनतद्विरोधोऽपिपरिहृतः॥ननु जीववदीश्वरस्यापि पक्षको
टिनिक्षेपेदृष्टांताभावेनानुमानाप्रवृत्तिरित्यत आह॥कु० ॥ कथमशोच्याइति नन्वशोक्या इति युक्त॥ऋहलोर्ण्यदिति ण्यतिचजोः कुघिण्यतोरितिप्राप्तेरिति चेन्न॥ण्यआवश्यक इति आवश्यका
र्थेण्यपरे कुत्वनिषेधात् न चावश्यकार्थस्यावश्य शब्दस्याप्रयोगात् कथंण्यस्यावश्यकार्थत्वमत्रेति वाच्यं प्रयोगाभावेऽपि आवश्यकार्थो यत्र गम्यते तादृशेऽपिण्यपरं कुत्वं नेत्यभियुक्तैर्व्याख्याना

आसन्नविनाशाःकथमशोच्याइत्यर्थः॥ननुप्रागशोच्यत्वानुवादेनान्वशोच इत्येवोक्तं ॥ नत्वशोच्यत्वं ॥ तत्कथमेवमाक्षेपः ॥ मैवं ॥ नहि
यथाश्रुतैवाऽत्रवाक्यप्रवृत्तिः ॥ असिद्धस्यानुवादः सिद्धस्यबोधनमित्यापत्तेः ॥ किंतुयानन्वशोचस्त्वंतेऽशोच्यास्तस्मात्तान्प्रति न शोकः कार्यः
॥ यांश्चभाषसे ते प्रज्ञावादाः अतो न भाषणीया इति ॥तथाचाशोच्याः कुतोऽवगंतव्या इति प्रश्नो वा आक्षेपो वा युज्यत एव ॥ ११ ॥

किमिति॥ न त्वेवाहंईश्वरनित्यत्वस्याप्रस्तुतत्वाद्दृष्टांतत्वेनाह॥नत्वेवेति॥यथा हं नित्यः सर्ववेदांतेषु प्रसिद्धः

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः ॥ नचैवनभविष्यामः सर्वेवयमतःपरम् ॥ १२ ॥

॥एवं॥त्वमतेजनाधिपाश्च नित्याः ॥१२ ॥ किमिति कस्मात्कारणात्पंडिताअप्यगतासूनिव गतासूनासन्नविनाशान्नानुशोचंतीति
शेषः॥अत्र नित्यत्वादित्युत्तरं॥कुतो नित्यत्वमित्यत आहेतिवाक्यंचाध्याहार्यं॥नत्वेवाहमित्यतःपरमितिशब्दश्च॥अर्जुनं निमित्तीकृत्यप्राप्तलोको
पकारार्थं हि भगवतोपदेशःक्रियते॥तत्रये भगवतःकृष्णस्येश्वरत्वं नित्यत्वंचनजानंतितान् प्रति यथाश्रुतैव योजना॥ ॥ दित्याहुः ॥शुनियुज्योर्घञ्जीत्युरसं
ख्यानस्य घञ्येन कुत्वं न ण्यतीति नियमार्थत्वाद्भिवर्ज्योश्चेत्यत्र नकारस्यानुक्तसमुच्चयार्थत्वाद्वा न कुत्वाभावइत्यप्याहुः॥यथाश्रुतैवेति॥नायमव्ययीभाव.नपुंसकत्वापत्तेः किंतुयथाऽनतिक्रांतं
श्रुतंश्रवणंयस्यतितृतीयार्थेबहुव्रीहिः अव्ययार्थप्राधान्येऽव्ययीभावस्तद्भावेसम भांतगमित्यस्यानियमस्य मद्र.गांममृद्धिःसुमद्रंममृद्धामद्रा.सुमद्र इत्यादौ दृष्टत्वादितिबोध्यम् ॥असिद्धस्येति॥अशो
च्यप्रज्ञावत्त्वयोरर्जुने नांगीकृतत्वादिति भावः॥प्रश्नइति।आसन्नविनाशान् गव्यहेत्वप्रतीतिदशायामिदं तत्प्रतीतौत्वाह॥आक्षेपोवेति॥ननुनत्वेवाहं जातुनासमिति ईश्वरनित्यत्वोपदेशो नार्जुनं प्रति
तस्येश्वरनित्यताज्ञानित्वात् अप्राप्ते शास्त्रमर्थवदित्युक्तेः नापि तदन्यप्रत्नंनं प्रतितस्यापीश्वरनित्यत्वज्ञानसंभवेन सजनमात्रं प्रत्येवोपदेशायोगादित्यत आह ॥ अर्जुनं निमित्तीकृत्येति॥

दृष्टांतस्त्विति॥ अविनाशित्वादृष्टांतत्वेनोक्तं यत्तत्प्रकृतस्यात्मनः दृष्टांतो भविष्यतीत्यर्थः ॥ अनाशंकितत्वात् निश्चितत्वादित्यर्थः ॥ अत एवेति ॥ ईश्वरनित्यत्वस्य सम्मतत्वादेवेत्यर्थः॥ पूर्वार्धइति॥ आसीत्समस्तिरिति पदद्वयाध्याहारेणेत्यर्थः ॥ यथा अहं जातु कदाचिदपि नासमिति नासं किंत्वासमेव॥ एवं त्वं नासीरिति नासीः किंत्वासीरेव इमे जनाधिपाश्च नासन्निति नासन् किंत्वासन्नेवेति योज्यम ॥ दृष्टांतत्वज्ञापकयथैवशब्दयोरध्याहारे ज्ञापकाभावात् कथमित्यत आह ॥ अत एवाध्याहारेऽसिद्धस्याप्रसिद्धस्येत्यादिना ज्ञापकं वक्ष्यति ॥ एकवाक्यत्वादिति ॥ न भविष्याम इत्येकक्रियासंबंधस्यैव सर्वेवयमतः परं न भविष्याम इति क्रियासंबंधस्य भावादितिभावः ॥ वाक्यभेदेनेति यथा अहं न भविष्यामीति न किंतु भविष्याम्येव एवं त्वं न भविष्यसीति न किंतु भविष्यस्येव एते सर्वे जना भविष्यंतीति न किंतु भविष्यंत्येवेति वाक्यभेदेनेत्यर्थः ॥ एतेन सर्वे वयमत अहं त्वं इमे च जनाधिपा इति महावाक्यस्य परस्परविशिष्टत्वाद्वयं भविष्याम इत्युपपन्नम ॥ यथैवेंशब्दयोर्दृष्टांतत्वज्ञापकयोरध्याहारे ज्ञापकमाह यदुक्तं ॥ सिद्धस्येति ॥ अत्र प्रसिद्धस्य प्रसिद्धत्वादित्यर्थः ॥ दोषायेति ॥ कृ ॥ निश्चितत्वं लोकत्वात्कृष्णे प्राप्तमिति उपदेशार्थं प्राप्तः तद्योग्य शंकास्यादिति यावत् ॥ अभक्तजनप्रवृत्तेर्योग्यत्वेन ॥ भक्तजनार्थं कृष्णस्य नित्यत्वं जानंतोऽप्यर्जुनस्य विशेषदर्शनार्थं नित्यत्वाज्ञानायोगादित्यत

॥ दृष्टांतस्तूत्तरत्र भविष्यति ॥ येनु तज्ज्ञात्वा जीवनित्यत्वमेव न जानंति तान्प्रत्यन्यथा योज्यमित्याह ॥ ईश्वरेति ॥अप्रस्तुतत्वादनाशंकितत्वाद्दृष्टांतत्वेनाह ॥ जीवनित्यतायांसाध्यायामीश्वरमिति शेषः ॥ अत एव कृष्णेत्यनुक्त्वेश्वरेत्युक्तं ॥ नन्वीश्वरनित्यत्वं कुतः सिद्धं ॥ पूर्वार्द्धवाक्यत्रयसद्भावात् ॥ कथं चियोजनासंभवेपि उत्तरार्द्धस्यैकवाक्यत्वात्कथं योजनेत्यत आह॥यथेति वेदांता उपनिषदः ॥ सिद्धस्यार्थस्य साध्यत्वेन निर्देशो दोषायेति सामर्थ्याद्यथैवंशब्दाध्याहारेण वाक्यभेदेन च योज्यमितिभावः॥

उक्तं ईश्वरत्वमिति ॥ नजानंतीति ॥ युद्धगतत्वेन कृष्णस्यापि विनाशशंकाविषयत्वादितिभावः ॥ दृष्टांतस्तूत्तरत्रेति ॥ प्रकृ यादिकृतो दृष्टांतो नामतइत्येतस्यास्याः संभवति भविष्यतीत्यर्थः ॥ नन्वीश्वरस्यकुतो दृष्टांतत्वं पक्षत्वमेव किं न स्यादित्यत उक्तं भाष्ये ॥ ईश्वरनित्यत्वस्याप्रस्तुतत्वादिति तत्राप्रस्तुतत्वं भावकत्व॥ईश्वरनित्यत्वस्याप्रकृतत्वेऽपीश्वरपक्षीकारेण नित्यत्वसाधनोपपत्त्याप्रयोजकत्वप्रसंगादित्यत आह ॥ अनाशंकितत्वादिति ॥ तथा च नाशित्वशंकाभावेनाशंकितस्येति भावः ॥ एवं सति दार्ष्टांतिकत्वेनाश्नित्यशंका प्रदर्श्य प्रतिज्ञेयं जनाया अकरणहेतुं वदन्नेव यथाहमिति समग्रवाक्यनिवर्त्यशंकां दर्शयति ॥ पूर्वार्धइति वाक्यत्रयसद्भावादिति ॥ नासमिति आसमेव नासीरिति नासन्निति पदद्वयाध्याहारे वाक्यत्रितापत्तेरितिभावः ॥ नत्वेनेमे जनाधिपाइति वाक्यद्वयेनत्वं चाहमिति तत्रोऽनुवृत्तिर्मीश्वरदृष्टांतत्वप्रदर्शनाय यथैवशब्दयोरध्याहारमासीरासन्निति पदद्वयाध्याहारं चाभिप्रेत्य दर्शितमित्युक्त सर्वे वेदांतप्रत्ययमित्यादौ वेदांतशब्दस्य वेदनिर्णयार्थत्वात्तद्ग्रहे वेदांतेष्वितिकथंसप्तमी ॥ वेदांतानां करणत्वात् ॥ यद्वक्ष्यति वेदांतैरीश्वरनित्यत्वं जानत इत्युच्यते॥ करणस्याधिकरणत्वविवक्षया सप्तमी ॥ नचवेदांतशब्देनवेदनिर्णयग्रहणे पि एषैवोपपत्तिः ॥ वाक्यभेदेऽधिकरणत्वलक्षणसाध्याहुल्यकाले तदभावात् ॥ दोषायेति ॥ सिद्धसाधनत्वरूपदोषायेत्यर्थः ॥ वाक्यभेदेनेति ॥

॥ श्री० ॥ सिद्धसाधनतारूपदोषापत्तेरित्यर्थः ॥ इति न्यायसामर्थ्यात् ॥ परमनित्यत्वमिति॥ आसांगत्वांसध्येकृष्णागीः [illegible] इत्यर्थः॥ज्ञानिनो देहानित्यत्वेनैव परमनित्यत्वप्रतिपत्त्यंनीत्यतोमंदाइत्युक्तं ॥ नाश्वत्स्यवानिति ॥ [illegible] प्रतीतपरमनित्यत्वं [illegible] इत्यर्थ ॥ माध्यवडति ॥ जीवानित्याअनादित्वादीश्वरत्वादिति माध्यतइत्यर्थः ॥ अनादित्वामिति ॥ नामाभाव [illegible] इत्यर्थः ॥ माध्येति ॥ न भविष्यामः [illegible] माध्याभिधानमित्यर्थः ॥ ननु जीवेश्वरयोरेकत्वात्कथं [illegible] ॥ ननम इति [illegible] ॥ [illegible] आह ॥ अत्रेति ॥ इमे जनाधिपा इति बहुवचनेन परस्पर [illegible] ॥बहुवचनं ॥ [illegible] बहुवचनं शरीरोपाधिकमित्यर्थः ॥ आत्मशब्देन चैतन्यं भविष्यतीति नित्य [illegible] इत्यर्थ ॥ १२ ॥ कृ०॥ अहं न भविष्यामीति न त्वं च न भविष्यसीति न [illegible] इत्यर्थः ॥ [illegible] महात्मा यत्वं [illegible] वार्तिकात् ॥ तेन

ननुवेदांतेरीश्वरनित्यत्वंजानंत स्तवंयोक्तं जीवनित्यत्वकथनेनजानति ॥ उच्यते ॥ नित्योनित्यानामितिनिर्धारणसामर्थ्याज्जीवानां नित्यत्वमीश्वरस्य परमनित्यत्वमवगम्य मंदाः प्रतिपद्यन्ते।नित्यत्वं हि विनाशाभावः।नचाभावस्तारतम्यवान् [illegible] जीवेषु तूपचार इतितान्प्रत्यनुमानेन जीवनित्यत्वं [illegible] ॥ [illegible] ॥ नत्वमित्यादिनातस्यपक्षधर्मतामाह ॥ नचेवत्यादि [illegible] अत्रभगवता [illegible] बहुवचनं शरीरापेक्षया॥ ॥

वयमित्युपपन्नमितिभावः ॥ निर्धारणात् ॥ [illegible] ॥ भक्तौ च [illegible] समुदाय साधारणत्वाच्च कथं तत [illegible] ॥ तथाच [illegible] ॥ नच परमनित्यत्वस्य ध्वंसाप्रतियोगित्वरूपस्य [illegible] जीवानां तुयत्कि चिद्विनाशाभावइति [illegible] ॥ [illegible] व्याख्यानंयुक्तं अध्याहारापत्तेः वाक्यभेदप्रसंगाच्च किंतुपरकीय मेकवाक्यतयाव्या [illegible] देहचेष्टोपपत्तेरप्रतिदेहमात्मभेदे प्रमाणमस्तीति [illegible] ॥ [illegible] ॥ शरीरभेदाभेदाविवक्षितावित्यत आह ॥ अत्रेति ॥

॥ श्री० ॥ देहादिरित्यत्रेति [illegible] ॥ [illegible] कर्मण्ये ॥ नंचामिति ॥ तंत्रमाभमादिष्टं तंत्र [illegible]

[illegible] ॥ देहिन इत्ये

विरोष इत्याशयेनोक्तम भगवता [illegible] यथानुपपत्तेरिति भाव: [illegible] पृथग्वचनादिदं [illegible]

॥ अत्र [illegible] ॥

नत्वात्मा [illegible]

यो:प्रत्यक्ष [illegible]

त्मन: भावं॥सद्भावं एतावि [illegible] तश्चाश्रया

[illegible] ॥

दर्हिनो [illegible] ॥१३॥

सिद्धिरिति॥ अस्य [illegible] एवात्मेत्य

स्याधस्य [illegible] तथाचदेहात्पत्त्यादि

त्तिमतस्तदहि [illegible] च [illegible]

[illegible] कर्मस्युत्तरं देहिन इति श्लो

कव्याख्यानावसर [illegible]

न प्रत्याख्यानस्य [illegible]

तानिप्रत्ययेन [illegible] ॥

१ वटस्यरूपाभावात् [illegible] ॥

॥ श्री॰ ॥ कृतार्थमुभयथाभाष्यं योजयन्नाह ॥ उभयस्यापीति ॥ देहातिरिक्त आत्मैव नास्ति ॥ सन्नेवापि पूर्वोत्तरदेहयोर्विद्यमानो नैकइति शंकाद्वयस्यापीत्यर्थः ॥ परिहारेति ॥ देहीतदीक्षिता सिद्ध: देहातिरिक्तात्मसाधनं समस्तभाष्य श्लोके च पादत्रयं पूर्वोत्तरदेहयोरस्थितस्यदेहिन एकत्वसाधनमिति द्रष्टव्यम ॥ तन्निर्देशं जनाधिपा इति बहुवचनानुसारेण देहिनां भाव इत्येव वक्तव्यं तथा चास्मद्वयन्त्यक्तद्वितीयशंकायोजनाज्ञापक नास्तीत्यत आह ॥ अथद्वयेति ॥ अंततर्देहिनइत्येकवचनं चेतिप्रकृते तु न भवति ॥ ज्ञापकोत्तरं चाह ॥ तथेति ॥ प्रकृतेपीति ॥ तथा च स एवात्मा सिद्धइति वाक्यार्थमित्याशय ॥ सामान्येनेति । द्वितीयशंकानतायां पूर्वोत्तरदेहयोरात्मैकत्वपरामर्शज्ञापनार्थं । सामान्येन नपुंसकमित्यंगीकृत्य तत्र देहेत्युक्तमिति भाव. ॥ अत्र तदीक्षितेत्यत्र तत् इक्षितात तदीक्षितेति कर्मणि द्वितीयाप्राप्ता तत्र क्षितृशब्दस्य तत्प्रत्ययश्च ॥ तत्रतत्प्रत्ययेन द्वितीयापवाद केन कर्तृकर्मणो: कृति कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् ॥ व्यासस्य कृति: भारतस्य श्रवणमिति दर्शनादत्रापि कर्मणि तस्यैव षष्ठीप्राप्तावत्र तत्प्रत्यये निषिद्धा षष्ठीप्रतिषेधस्यात्राप्रवृत्ते. कृदान्तिर्देनेति तत्प्रत्ययस्य कृत्त्वोक्तिस्तुचापि तथात्वेन कृत्त्वात्तदन्तदीक्षितृशब्दयोगे प्राप्तायाः षष्ठ्याः ॥ षष्ठी ॥ समर्थेन सुबन्तेन षष्ठ्या समस्यते इति समासेन तदीक्षितेति भवति ॥ तत्र समाशंका ॥ कर्तरि च ॥ कर्त्रर्थतृजकाभ्यां षष्ठी न समस्यते ॥ अपां स्रष्टा सतां पालक इति वदत्रापि कर्त्रर्थतृजन्तक्षितृशब्दयोगेन स्येति षष्ठ्या समासप्रतिषेधात्तस्य दीक्षितेत्येवस्यादिति तत्राह ॥ याजकादिन्वादिति ॥ याजकादिभिश्च ॥ याजकादिभिः षष्ठी समस्यते द्विजस्य याजको द्विजयाजक इति व याजकादेराकृतिगणत्वेन अस्यापि याजकादिगणान्तर्गततत्वात्तदीक्षितेति समासो युक्त इत्यर्थः ॥ तृजन्तत्वपक्षसंगतिकृत्य समाधत्ते ॥ द्वितीयांतस्येति ॥ तृजन्तेन दीक्षितृशब्देन समासः ॥ तदीक्षितेति समासः द्वितीया श्रितेति सूत्रेण निशेष ॥ तृजन्तशब्दयोगे तत्प्रत्यये षष्ठीप्रतिषेधात् कथमत्र षष्ठीति सूत्रेण षष्ठ्या समासः षष्ठीप्रसक्तेरभावादिति यत उक्तं ॥ द्वितीयांतस्येति ॥

उभयस्यापि परिहारदर्शनादेवं योज्यं ॥ अथद्वयानुगुण्यायैव बहुवचनप्रकृतेप्येकवचनं तथा भाव इतिपुंल्लिंगे प्रकृतेपि तदेवेति सामान्यग्रहणाय नपुंसकनिर्देशः ॥ नेत्याहेति शेषः ॥ देहिनोस्मिन्नित्यतः परमिति शब्दश्च आक्षेपद्वयपरिहाराय पादत्रयं व्याख्याति ॥ यथेति ॥ अत्र देहीतितदीक्षिता सिद्धइतिदेहातिरिक्तात्मसाधनं तदितिकौमारादिपरामर्शः ॥ याजकादित्वात्समासः ॥ द्वितीयांतस्यतृजन्तेनवासमासः ॥ अस्तितावत्कौमारादिविषयमीक्षणं ॥ । । ॥

॥ कृ॰ ॥ स्वरूपासिद्ध्यादीनि ॥ आदिपदात्तात्पर्यपरिग्रहसंग्रहः ॥ उभयस्यापीति ॥ यथाशब्दस्यान्येनदेहिनइतिपरोक्तेन देहीतितेनैतावन्मात्रेण भाष्येण चाद्यशंका या देहिनइति पादत्रयेण यथा कौमारादिशरीरभेदेप्यात्मादिसमग्रभाष्येण न द्वितीयशंकाया: परिहारदर्शनादित्यर्थ: निस्तस्तु भावतोपि ज्ञेय: बहुवचनइति त्वमंते जनाधिपाश्चेतिबहुवचन इत्यर्थ: ननु तदीक्षितेति कथं षष्ठीसमास: तृजकाभ्यां कर्तरि कर्त्रर्थतृजन्तेनषष्ठ्या समासनिषेधादित्याशंक्य याजकादिभिश्चेति प्रतिप्रसवविधानात्समासइत्याह याजकादित्वादिति ॥ याजकादेनियतगणत्वात्पक्षांतरमाह ॥ गम्यादीनामुपसंख्यानमिति ॥ द्वितीयांतस्येति ॥ द्वितीयेति योगविभागाद्वा समास इति भाव:

॥ श्री० ॥ तच्छब्दस्येत्यर्थः द्वितीयाश्रितेतिसूत्रेणेति शेष ॥ द्वितीयायाश्च समासप्रतिषेधकं किमपि नास्तीत्याशयः ॥ ननु तृतीयेति कृत्वास्तदोगे कर्मणि प्राप्तद्वितीयापवादकत्वेन कर्तृकर्मणो रिति षष्ठीप्राप्तौ तस्याः समासोऽभावाद्यतीति चेन्न । तृतीयेति योगेन केवलेति पष्ठी निषेधनप्रतिज्ञानिषेधाभावात्तस्याः समासो दुर्निवारस्त इति सूचयितुमेव तृन्नेतिनैवेत्युक्तं ॥ ननु द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरितिश्रितादिभिरेव द्वितीयाया समासविधानात् ईक्षितृशब्देन तदानात्कथंतेन द्वितीयायाः समास इति चेन्न ॥ ग्रामगमीग्रामगमीत्यादिप्रयोगसिद्ध्यर्थं गम्यादीनामिष्टि त्युक्तत्वात्तस्य चाकृतिगणत्वेन तन्मध्ये ईक्षितृशब्दस्यापि पठनीयत्वादक्रमेण द्वितीयायाः समास इति न किंचिदत्रानुपपन्नमिति द्रष्टव्यम ॥ नचेक्षणमिति ॥ कार्यस्य सकर्तृकत्वनियमादिति भावः सचेईक्षिता ॥ वक्ष्यमाणादिति ॥ नहि जडस्येक्षादिनेति शेष नहि तदीक्षितेति च्छेदेन कौमारादिग्रहणं व्यर्थ मित्यत आह ॥ अत्रेति ॥ कौमारादिग्रहणमिति ॥ तदीक्षितेत्यत्र तच्छब्देनेत्यर्थः ॥ विवक्षितार्थसाधकमित्यत आह ॥ ज्ञानेति ॥ कौमारादिदेहज्ञानमात्रेण तदतिरिक्तो ज्ञाताऽस्तीत्यनुमेयदेहातिरिक्तत्वं सिद्धमतोऽतिरिक्तः कौमारादिज्ञातास्तीति वचनमन र्थकमित्यतंत्रमितिभाव. ननु देहीत्युक्त्यादेहातिरिक्तात्मसिद्धावपिनेंद्रियादिव्यतिरिक्तात्मासिद्धिरतस्तदर्थं देहाद्यतिरिक्त सिद्ध इति वाच्यमिति चेत्तत्राह ॥ देहशब्दश्चेति ॥ ननुईक्षणेनदेहाति रिक्तात्मसाधनतयादेहीति श्लोकोव्याख्यातस्तदयुक्तम ॥ श्लोके लक्षणानुक्तरित्यत आह ॥ श्लोकेति ॥ विपर्ययेणयुक्त्या विषयविषयीभावो लक्षणार्थीसमबंध इत्युक्तंभवति ननुईक्षिणोक्ता वपितत्साध्यंनोक्तमत आह ॥ नहीति ॥ तस्मात ॥

नचेक्षणमीक्षितारंविनासंभवति ॥ सचवक्ष्यमाणात्परिशेषः प्रमाणाद्देहीदेहातिरिक्तः सिद्धइति अत्रकौमारादिग्रहणमतंत्रं ॥ ज्ञानमात्रेणज्ञातुः

यथा कौमारादिशरीरभेदपिदेहीतदीक्षितासिद्धः॥

सिद्धेः ॥ देहशब्दश्चेंद्रियादिसहितशरीरवाचिः श्लोकेचकौमार्यौवनं जरेतिविषयेणविषयीक्षणमुपलक्ष्यते ॥ तद्देहिनोदेहातिरिक्तस्येत्युक्तंभवति यथेत्यादिसमस्तंवाक्यंश्लोकेचपादत्रयंदेहभेदेप्यात्मैकत्वे साधनं ॥

॥ कृ ॥ वक्ष्यमाणादिति ॥ न हि जडस्य शरीरस्येत्यादिना काष्ठादिवच्चेत्यंतेन वक्ष्यमाणादित्यर्थ. ॥ कौमारादीति ॥ तच्छब्देनेत्युपस्कर्तव्यम ॥ अतंत्रं अविवक्षितं ननु देहीत्य नेनात्मभेदसिद्धावपि नेंद्रियादिभेदसिद्धिरित्यत आह ॥ देहशब्दश्चेति॥देहीतिसमुदायांतर्गतदेहशब्दइत्यर्थः ॥ ननु भाष्येकथमीक्षणेन देहातिरिक्तात्मसिद्धिरित्येवंपरत्वेन देहिनइति श्लोको व्याख्यातः तत्रेक्षणस्यानुक्तेरित्यत आह ॥ श्लोकेचेति ॥ शक्यसबंधप्रदर्शनाय विषयेण विपर्यात्युक्तम इदं चार्थनिष्ठालक्षणेति मतेन ॥ शब्दनिष्ठेतिपक्षे तु विषयवाचकशब्देनेत्यर्थः ॥

१ गीतायांदेहशब्द उपचयापचयसाधारणधर्मवाचक इतिसूचितं दिह उपचयइतिधातुपाठे उपचयशब्दोपचयस्याप्युपलक्षकइतिभाव. अन्यथाशरीरोपादानमनर्थकंस्यादिति

॥ श्री० ॥ [illegible] देहांतरस्यैकस्यप्राप्तौ [illegible] आह ॥ अनेकेति ॥ प्रत्यग्रजातस्याशिशो
[illegible]
[illegible] नेपांगमेद्रेषाविति ॥ रागद्वेषयोरेवम
[illegible]
[illegible]
[illegible]
[illegible]

कौमार [illegible] ॥

[illegible] ॥

देहांतर [illegible]
धानसिद्धेरित्याशयः

॥ ह० ॥ [illegible] इत्युक्तेरित्यत आह ॥ कौमारादिमच्छरीरभेदादिति ॥ कौम [illegible] देहोत्पत्त्यदे [illegible] क्रमाभावत्वा [illegible] नचैतद्युक्तं ॥ [illegible] ॥ अनेकेति [illegible] देहस्यानेकत्वमिति भावः ॥ [illegible] प्रत्यग्रजातस्येति [illegible] स्येत्यर्थः ॥ जातमात्रस्येति यावत ॥ आहाराद्यभिलाषणादि ॥ [illegible] जातमात्रस्य स्तनपाना [illegible]

॥श्री०॥ नहि श्रोतारंविनोपदेशसामर्थ्यमनुभूयत इति संगतिः ॥ अथ सद्यभिः श्रुतिभिरात्मा देहादिभिन्नो ज्ञातः ॥ एवं पूर्वदेहस्यान्वयव्यतिरेकविशिष्टसामानाधिकरण्यघटकाधिकरणावच्छेदकत्वात्तदनुभवेऽनु
भवेऽनुभवोऽवश्यं वाच्यः ॥ स्वकर्तृकस्तनपानरूपाधिकरणावच्छेदेन हि पूर्वजन्मस्तनपानस्यानुभवः ॥ तथा सौकर्तृविशेषणतयाऽधिकरणावच्छेदकदेहानुभवे युक्तः ॥ अत एवं पूर्वदेहस्यापि
देशादिसमानयोगक्षेमत्वात्पूर्वदेशादिस्मरणेऽनुस्मरणमप्यावश्यकमेव ॥ ननु देहांतरस्मरणं जातमात्रस्य स्यात्तदा तद्विशिष्टान्वयादिस्मरणमपि स्यात् ॥ तदभावे चानुमानाद्यभावेनेष्टानिष्टकारण
ताज्ञानं नोत्पद्येत ॥ तदनुत्पादे च रागाद्यनुत्पादात्प्रवृत्त्यनुपपत्तिरापाद्यते ॥ कारणाभावे कार्याभावस्य सुलभत्वात् ॥ अदृष्टवशात्प्रवृत्त्यादीति चेन्न ॥ इष्टसाधनतादिज्ञानस्यैव प्रवृत्त्यादिहेतुता
या दृष्टत्वेन दृष्टातिक्रमदोषात् ॥ एतावांस्तु दृष्टो व्यापारो यज्जन्मान्तरानुभूतं सर्वं स्मर्यते न तावत्स्मरति ॥ यादृच्छिकं प्रवृत्त्यादि भवत्विति चेन्न ॥ अनंतानां तदनुपपत्तेः ॥ अतोऽस्ति प्रत्यग्रजातस्य पू
र्वदेहस्मरणं ॥ तथा च यदैव सैव देहस्तदा नैतत्स्मरणं केन उपायेन देह किंतु प्रागन्योऽप्यधुनाऽपि देहांतरस्मरणं प्रमितं तदैतद्देहेन तस्यैकता वक्तव्या कुतः स्यात् किंत्वनेकमणिष्वनुस्यूतं सूत्रमिवानेकदेहा
नुस्यूतमात्मानं पश्यतः स्वस्य नित्यत्वं युक्तितः प्रतिपादनं द्रष्टव्यं ॥ तदेवाभिप्रेत्योक्तमनुव्याख्याने ॥ जातमात्रा मृगा गावो हास्तिनः पक्षिणो झषाः ॥ भयाभय

एवमात्मनो देहातिरिक्तं देहभेदेऽप्येकत्वं च प्रसाध्य धीरस्तत्र न मुह्यतीत्युच्यते ॥ तस्यैव वैयर्थ्यमित्याशंक्य येऽस्मिन्विषये ऽन्येऽपि मोहास्ते धीरेण स्वयं निरा
कार्या इत्येवमर्थत्वान्न वैयर्थ्यमित्याशयवांस्तत्प्रदर्शनार्थमुत्तरं प्रकरणमारभते ॥ तत्रेक्षणेन कथं देहातिरिक्तात्मसिद्धिः ॥ ईक्षिता हि तेन सिध्यति ॥
स च शरीरप्राणजाठरानलेंद्रियमनोविषयसंनिधावीक्षणदर्शनात्तेषामन्यतमः किं न स्यादित्यतः शरीरस्य तावदीक्षणं निषेधति ॥ नहीति ॥

स्यभोगादी कारणानि विजानते ॥ अस्मृतौ पूर्वदेहस्य विज्ञानं तत्कथं भवेत् ॥ यदा देहांतरज्ञानं देहैक्यावमितिः कुत इति ॥ अस्मिन्विषय इति ॥ देहात्मैक्यविषय इत्यर्थः ॥ तेन ईक्षणेन ॥ स ईक्षिता
॥ कु० ॥ अन्यथा तत्र प्रवृत्त्ययोगात् ॥ स च स्वेष्टसाधनताज्ञानसाध्यः ॥ अन्येष्टसाधनताज्ञाने तदभावात् ॥ तच्च व्याप्तिज्ञानं लिंगपरामर्शजन्यं ॥ साधनतायाः सहजशक्तिरूपत्वेना
तींद्रियतया तज्ज्ञानस्यानुमितित्वात् ॥ व्याप्तिज्ञानं परामर्शश्च स्मृतिरूपः ॥ जातमात्रे तदनुभवायोगात् ॥ स्मृतिश्चानुभवजन्या ॥ अतः प्राग्भवीययत्नसत्कृतिसाध्यस्तन्यपानं ॥ तस्मादिष्ट
साधनं मत्कृतिसाध्यस्तन्यपानं चेदमिति व्याप्त्यनुभवस्तद्विशिष्टपक्षधर्मतानुभवश्च वाच्यः ॥ यदा च प्राग्भवानुभूतव्याप्तितद्विशिष्टपक्षधर्मतास्मृतिस्तदा पूर्वदेहस्मृतिरपि वाच्या ॥ समानयो
गक्षेमत्वात् ॥ न चेद्देहांतरस्मृतिस्तदा तद्विशिष्टव्याप्त्यादिस्मृतिरपि न स्यात् ॥ तदभावे चोक्तप्रकाराद्याप्रवृत्त्यनुपपत्तिरित्येवमाहाराद्यभिलाषेण पूर्वदेहानुसंधानसिद्धिरित्यर्थः ॥ एवं देहांत
रस्मृतौ योऽहं प्रागेकशरीरवानभूवं सोऽहमिदानीमन्यशरीरवानस्मि इति प्रत्यभिज्ञासिध्या तद्व्यतिरिक्तत्वसिद्धिरिति भावः ॥ ॥ ॥ ॥ ॥

१ आदिपदार्थो निवृत्त्यादिः २ मृगादीनां जातमात्राणां नियमेनाहारादिप्रवृत्त्यादिरिति शेषः यादृच्छिकानुपपत्तेरित्यर्थः ॥ ॥ ॥ ॥ ॥

॥श्री०॥विशेषनिषेधः शेषविध्यनुज्ञापक इति न्यायेन जडस्य शरीरस्य कोमारादनुभवनिषेधादितरानुभवप्रसक्तौ तेषामाद्यभावात्सिद्धमित्यत आह॥अत्रापीति॥ननु शरीरं नानुभवितृ जडत्वादित्यनुमाने जडत्वं चाप्रमातृत्वमेवेति भगवत्पादीयवचनात्साध्याविशिष्टता स्यादित्यत आह ॥ जडत्वं चेति ॥ न त्वनुभवरहितत्वं येन साध्याविशिष्टता स्यादिति भावः ॥ अप्रयोजकत्वाभिप्रायेणेति ॥ शरीरं नानुभवितृ इत्यनुमाने वाय्वाद्यपगमरूपोपाध्यभिप्रायेण सोपाधिकमित्युक्तं स्यात् ॥ तत्तु न सम्भवति ॥ साधनव्यापकत्वादिति द्रष्टव्यं ॥ यद्वा मृतस्यादर्शनादिति व्यभिचारेण साध्याव्यापकत्वादिति ध्येयम्॥ ननु जीवच्छरीरमृतशरीरयोर्भौतिकत्वशरीरत्वरूपैकधर्मोपपन्नयोः सित्व तदभावरूपं वैचित्र्यमयुक्तमिति शंकायां बाधकमाह ॥ माहि भूदिति ॥ नहि भवतीत्यर्थः ॥ अन्यथा पृथिवीत्वादेकधर्मोपपन्नानां घटपटादीनामवांतरकारणवैचित्र्यादवांतरवैचित्र्यं न स्यादित्यतिप्रसंगः स्यादिति भावः ॥ एकत्वेन प्राणादिवाय्वादिसद्भावासद्भावरूपावांतरकारणवैचित्र्यमेवास्तीत्याशयः ॥ अहंमनुष्य इत्यादीत्यादिपदेन कृष्णोहमित्यादि संग्रहः ॥ देहधर्माणामात्मनिष्ठत्वप्रतीतिरस्त्येवेत्यर्थः ॥ अहं मनुष्य इत्याद्यनुभवात् ॥ इयं च प्रतीतिर्देहात्मनोर्धर्मिणोरैक्याभावेन संभवतीति भावः ॥ ईक्षितृत्वेमयोजकमिति ॥ ईक्षणसामग्रीत्यर्थः धर्मोणामित्युक्त्या विशेषशब्दो धर्मपर इत्युक्तं भवति ॥ ॥ ॥

अत्रापि कौमारादीत्यतंत्रं ॥ शरीरस्यानुभवो न संभवतीति प्रतिज्ञा ॥ जडस्य शरीरस्येति हेतुद्वयं ॥ मृतस्यादर्शनादिति दृष्टांतोक्तिः ॥ जडत्वं च भौतिकत्वं विवक्षितमिति न साध्याविशिष्टता ॥ अप्रयोजकत्वाभिप्रायेण शंकते ॥ मृतस्येति ॥ जीवच्छरीरमृतशरीरयोर्भौतिकत्वे शरीरत्वे च समानेपि माभून्मृतशरीरस्येक्षणं ॥ प्राणादिवायूनां जाठरानलस्येंद्रियाणां चापगमात् ॥ जीवतस्तु प्राणादिसन्निधानाद्भविष्यति ॥ को विरोधः माहि भू

मृतस्यादर्शनात् ॥ मृतस्य वाय्वाद्यपगमादनुभवाभावः ॥ अहं मनुष्य इत्याद्यनुभवाच्चैतत्सिद्धमिति चेन्न ॥

देकधर्मोपपन्नानामवांतरकारणवैचित्र्याद्वैचित्र्याभावः ॥ न केवलमिदमाशंकते ॥ किंतु अहं मनुष्य इत्याद्यनुभवादेतद्देहस्येक्षितृत्वं सिद्धं प्रमितं चेत्यर्थः ॥ दूषयति ॥ नेति ॥ न प्राणादिसन्निधानं शरीरस्येक्षितृत्वे प्रयोजकं वाच्यं ॥ ॥ ॥ ॥ ॥

॥कृ०॥अत एवाग्रे प्रत्यभिज्ञानमसिद्धमिति वक्ष्यति ॥ प्रतिज्ञेति ॥ अत्र शरीरपदेन जीवच्छरीरमेव विवक्षितं अत एव वक्ष्यति जीवच्छरीरेति ॥तेन न मृतशरीरे सिद्धसाधनं ॥नापि शरीरत्वस्यैव हेतुतया वक्ष्यमाणत्वेन पक्षतावच्छेदकहेत्वोरैक्यमिति मन्तव्य ॥ ननु न मृत शरीरस्येति सामान्योक्तिः कथं ॥ तत्र ॥ ... इति ... न्यायेन हेतुसमनकत्वाद्धेतुत्वं च न मिलितस्य वैयर्थ्यादिति भावेनाह ॥ हेतुद्वयमिति ॥ ननु अनुभवरहितत्वं जडत्वमिति साध्याविशिष्टत्वं ... ॥ जडत्वं चेति ॥ भौतिकशरीरस्यैव पक्षत्वान्न प्राकृतशरीरे भागासिद्धिरिति भावः ॥ अप्रयोजकत्वाभिप्रायेणेति ॥ सोपाधिकत्वाभिप्रायेणेत्यर्थः । अप्रयोजकत्वाभिमानित्वान्नैतदर्थो ... । अप्रयोजकत्वस्यासिद्धौ न सोपाधीइति गंगशोक्तश्चेति भावः

१ अन्यः अर्थ अर्थांतरं तन्न भवतीत्यनर्थांतरं समित्यर्थ

॥श्री॥ ननु तद्दीक्षितृसिद्धस्य [illegible] ॥ ज्ञानग्रहणमिति ॥ [illegible] ज्ञानग्रहणमीक्षणपदेन [illegible] उपलक्षणमित्यर्थः ॥ उपलक्षणत्वं दर्शयति ॥ सुखेत्यादिना ॥ [illegible] प्राणाद्यभावेन ज्ञानाद्यभावसाधनमप्रयोजकमित्यत आह ॥ मृतादाविति ॥ [illegible] ॥ ज्ञानादीनामिति ॥ ननु [illegible] तिरिक्तात्मसाधनमयुक्तं प्राणादिमत्त्वादि [illegible] ज्ञानादर्शनात् ॥ [illegible] त्वोपपत्तेरित्येतद्दूषयितुं नैवमित्याह ॥ एतेनेति ॥ [illegible] त्यर्थः ॥ चैतन्यमीक्षितृत्वं ननु [illegible] यातादिसमानयोगक्षेमत्वाद्देवाकिमर्थमनिर्देशो [illegible] ॥ एवं तर्हीति ॥ आ मार्गेति ॥ [illegible] मत्यप्यात्मनि ज्ञानादर्शनादित्याशयः ॥ तर्हीति आत्ममनःसन्निकर्षस्य ज्ञानकारणत्वादिति भावः ॥ मनसोपीति ॥ [illegible] ज्ञानादर्शनगुणमित्यर्थः ॥ नार्थादिति ॥ [illegible] वः ॥ दोषांतरमिति ॥ तथाच दोषांतरकथनमिति [illegible] ॥ ॥ कृ० ॥ न च [illegible] ॥ सुखादिशरीरे साध्यव्यापकत्वादितिवाच्यं

सुप्तिमूर्छयोः शरीरप्राणाद्यपगमलक्षणरहितेऽस्त्येव ज्ञानादीनां धर्माणामदर्शनात् ॥ ज्ञानग्रहणमुपलक्षणं ॥ सुखदुःखेच्छाद्वेषप्रयत्नैरप्यात्मा साध्य इ तिसूचयितुमादिपदं ॥ मृतादौ ज्ञानाद्यभावश्च तत्कार्यादर्शनात्सिद्ध इति दर्शयितुं ज्ञानादिविशेषेत्युक्तं ॥ ज्ञानादीनां विशेषः कार्यमिति ॥ एतेन सं

सत्येवाविशेषे देहे सुप्त्यादौ ज्ञानादिविशेषादर्शनात् ॥ समश्चाभिमानो मनसि काष्ठादिवच्च ॥

घातचैतन्यपक्षः प्राणादिचैतन्यपक्षश्च परास्तो वेदितव्यः ॥ मनस ईक्षितृत्वमनिर्देशेन निराचष्टे ॥ समश्चेति ॥ मनोविषय ईक्षितृत्वाभिमानश्च पूर्वेण समः ॥ सुप्त्यादौ सत्यपि मनसि ज्ञानादर्शनात् ॥ एवं तर्ह्यात्मापि ज्ञानाद्य नस्यादिति चेन्न ॥ तदा तस्य मनसा सन्निकर्षाभावात् ॥ मनसोपि तथास्त्विति चे त्सिद्धस्तावदात्मा ॥ मनसो ज्ञातृत्वे दोषांतरमाह ॥ काष्ठादिवच्चेति ॥ ॥ सिद्धांते वक्ष्यमाणव्यभिचारेण पूर्वपक्षे उपाधित्वनिरासायोगात् ॥ यत्किंचिदप्रयोजकत्वोक्त्य नंतरमुपाध्युद्भावनं तदप्रयोजकस्य सोपाधिकत्वप्रकटनार्थं ॥ ज्ञानग्रहणमिति ॥ तद्दीक्षितृत्ववत् धातुना ज्ञानग्रहणं सुखाद्युपलक्षणमित्यर्थः ॥ आत्मा साध्य इति ॥ अस्ति तावत्सुखादिकं न च तत्कर्तारं विना संभवति ॥ सचोच्यमान परिशेषाद्देहातिरिक्त इति देहातिरिक्तत्वेनात्मा साध्य इत्यर्थः ॥ संघातेति ॥ कणादीनां प्रत्येकं मदजनकत्वाभावेपि समुदाये तज्जनकत्ववद्भूता नां प्रत्येकं चैतन्याभावेपि संघातस्य चैतन्यं संभवतीति पक्ष इत्यर्थः ॥ अनिर्देशस्याभ्यधिकाशंकापूर्वकत्वात्तामाह ॥ एवं तर्हीति ॥ तदा तस्येति मनसः कदाप्यात्मवियोगाभावस्य वक्ष्यमाण त्वादित्यग्रिमवाक्यविरोधं तु तद्व्याख्यावसर एव वक्ष्याम ॥ दोषांतरमिति ॥ अनेन दोषांतर वक्तुमित्यनिर्देशस्य प्रयोजनांतरमुक्तं भवति ॥ ॥ ॥ ॥

॥ श्री० ॥ **काष्ठानीति** ॥ काष्ठैःपचतीतिकाष्ठानांपचनक्रियाकरणत्वावगमादितिज्ञेयं ॥ **मनसेति** ॥ करणेतृतीयाविहितत्वादितिभावः ॥ **एतेनेति** ॥ मनसाजानामीतिमनसः करणत्वावगमेनेत्यर्थः ॥**मनोनिष्ठमिति**॥ तथाचमनसएवकर्तृत्वमितिभावः ॥ **किंत्वात्मैवेति** ॥ अंतःकरणोपादानकज्ञानंप्रत्यपिआत्मैवकर्ता अहंजानामीतिआत्मकर्तृत्वस्यसाक्षिसिद्धत्वात् यथाहिक्षेत्रोपादानकानामपिसस्यानांकृषीवलएवकर्तानक्षेत्रंतद्वदित्यर्थः ॥ तन्निष्ठत्वमात्रेणतत्कर्तृकत्वंनेत्यत्रदृष्टांतमाह ॥ **यथेति** ॥ **निरस्तइति** ॥ एतेनेत्युक्तंदर्शयति ॥ **चक्षुषेति** ॥ इंद्रियाणांज्ञानकरणत्वेनकर्तृत्वाभावादित्याशयः ॥ आदिपदेनश्रोत्रेणशृणोमीत्यादिग्रहणं ॥ **अतीतादीति** ॥ विषयस्यचक्षुरादेर्वाऽतीतादिज्ञानंनस्यात् ॥ कर्तुर्विषयस्याभावात् ॥ कर्त्रभावेनचक्रियायाअदर्शनादितिभावः ॥ ननुदेहातिरिक्तात्मसिद्धावपिनस्यदेहोत्पत्त्यनुत्पत्तेस्तन्नाशेनाशान्ननित्यत्वं ॥ तत्प्रत्यग्रजातस्यशिशोःस्तनाहाराद्यभिलाषादिनापूर्वदेहानुसंधानसिद्धिरितिवाच्यं ॥ कुतइत्यत आह ॥ **तस्येति** ॥ अत्रप्रत्यभिज्ञाशब्देनपूर्वदेहानुसंधानग्रहः ॥ **प्रमाणांतरमिति** ॥ प्रत्यभिज्ञातिरिक्तमित्यर्थः ॥विजातीयानांसर्वेषामेकस्वभावत्वानुपपत्तेरिति जातमात्रामृगागावोहस्तिनःपक्षिणोझषाइतिनतिपादिलभिः॥शिश्वैकत्र्यनामित्यृच्यपमाणांतरमेवाहेत्यर्थः ॥ **अतएवेति** ॥ देहातिरिक्तस्यानित्यस्यात्मनः सिद्धत्वेनपूर्वदेहानुसंधानसंभवादेवेत्यर्थः ॥ **नहीति**॥बोधकत्वस्यानुभवासिद्धत्वादितिभावः ननुबौद्धादिवदित्यत्रबौद्ध आदिर्यस्यचार्वाकस्यासौबौद्धादिस्तद्वदित्यर्थप्रतीतेःश्रुतेरप्रामाण्यंशङ्कनीयंबौद्धादेःपुरुषस्यदृष्टांतत्वायोगाद्व्याचष्टे ॥ **बुद्धस्येदंबौद्धमिति**॥

मनोनज्ञातृज्ञानकरणत्वात् ॥ यद्यस्यांक्रियायांकरणंनतत्तत्रकर्तृयथापाकेकाष्ठानि ॥ छिदायांकुठारोवा ॥ नचासिद्धोहेतुः ॥ मनसाजानामीत्यनुभवात् ॥ एतेनात्मसन्निकर्षेणमनोज्ञात्रितिनिरस्तं ॥ ननुजन्यज्ञानंमनोनिष्ठमितिसिद्धांतः ॥ तत्कथमेतत्सेवं ॥ मनोनिष्ठस्यापिज्ञानस्यनमनःकर्तृकिंत्वात्मैवयथावयवविच्छेदलक्षणस्यपाकस्यनतंडुलाःकर्तारः ॥ किंतुदेवदत्तइति ॥ एतेनेंद्रियचैतन्यपक्षोपिनिरस्तः ॥ चक्षुषापश्यामीत्यादौतेषामपिकरणत्वप्रतीतेरिति ॥ अतीतादिज्ञानदर्शनाद्विषयचैतन्यपक्षः स्फुटदूषणइतिननिराकृतः एवंपरिशेषप्रमाणेनदेहातिरिक्तात्मासिद्धः ॥

॥ श्रुतेश्च ॥ प्रामाण्यंचप्रत्यक्षादिवत् ॥ ॥

तस्यस्वभावादेवाहाराद्यभिलाषोपपत्तेः प्रत्यभिज्ञानमसिद्धमितिवदंतंप्रतिआत्मनित्यत्वेप्रमाणांतरंचाह॥श्रुतेश्चेति ॥अस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्स्वर्गेलोकेइत्यादिश्रुतेश्चदेहातिरिक्तोनित्यआत्मासिद्धः॥अतएवनस्वभाववादावकाशइति ॥ननुबौद्धचार्वाकादीन्प्रतिदेहातिरिक्तनित्यात्मसाधनमिदं॥ नचतेश्रुतेः प्रामाण्यमंगीकुर्वते ॥तत्कथंश्रुत्युदाहरणमित्यतआह ॥ प्रामाण्यंचेति॥बौद्धेनतावत्प्रत्यक्षानुमानयोश्चार्वाकेणचप्रत्यक्षस्यप्रामाण्यमंगीकृतं ॥ तत्कुतइतिवक्तव्यं॥ बोधकत्वेनेतिचेत्तर्हितद्वच्छ्रुतेरप्यंगीक्रियतां ॥ ॥ कृ० ॥ ननुबुद्धोभक्तिरस्येत्यर्थे भक्तिरितिसूत्रेणाणूप्रत्यये सति निष्पन्नोबौद्धशब्दो बुद्धशिष्यवाची ॥ भज्यते सेव्यत इति भक्तिरितिसौत्रभक्तिशब्दव्याख्यानात् ॥ तत्कथंवाक्ये बौद्धशब्दप्रयोग इत्यत आह॥ बुद्धस्येदमिति॥

॥ श्री० ॥ बुद्धशब्दात्तस्येदमित्यणिणित्वाद्स्यौकारस्य वृद्धौ बौद्धमिति तस्य तंत्रं वाक्यमुच्यते तथा न बौद्धादिवदित्यस्य बुद्धवाक्यवत् ॥ आदिशब्दाच्चार्वाकवाक्यवदित्यर्थो द्रष्टव्यः ॥ ननु वे-
दाप्रामाण्यशंकाकर्ता बौद्धे न बौद्धवादिनि स्ववाक्यमेवाप्रामाण्ये कथं दृष्टांतीक्रियते उन्मत्तत्वप्रसंगादित्यत आह ॥ चार्वाकइति ॥ अत्र बौद्धवादिनि शंकाने बौद्धस्य येनोक्तदोषः स्यात्किंतु चार्वाकस्य
मतु चार्वाको वेदाप्रामाण्ये दृष्टांतत्वेन बौद्धवाक्यमुदाहरतीत्यर्थः ॥ ननु पदार्थ बौद्धस्य शंकानशंकार्थामित्याशंकायामादिपदाभिप्रायमाह ॥ बौद्धस्त्वन्यदिति ॥ यदा तु वेदाप्रामाण्यशंकाकर्ता बौ-
द्धस्तदायं बौद्धो वेदाप्रामाण्ये ऽन्यच्चार्वाकवाक्यदृष्टांतत्वेनोदाहरतीत्यर्थः ॥ संप्रतिपन्नयोः ॥ प्रमाणत्वेनेति शेषः ॥ ननु श्रुतेर्भिन्नत्वादपौरुषेयायामिति भवेदपौरुषेयेति कथमुक्तमित्यत
आह ॥ सामान्योक्तित्वादिति ॥ यद्यपि प्रकृतत्वादपौरुषेयाज्ञानादय कल्पयितुं शक्यास्तथापि सामान्यस्याभिकथनार्थैवेदं वाक्यं प्रवृत्तं न तु प्रकृतां श्रुतिमपेक्ष्य ॥ तथा च सामान्योक्तित्वात्सामान्ये नपुं-
सकमिति नपुंसकलिंगापौरुषेयशब्दस्य समपौरुषेयेति प्रमत्तस्य तत्र न तमिति भावः ॥ ननु प्रकृता श्रुतिमपेक्ष्यैवेदं वाक्यं प्रवृत्तं तत्तदा कथं स्यादित्यत आह ॥ अन्यथेति ॥ दोषमूलत्वेनेति वाक्यनिष्ठाबो-
धकत्वादिदोषमूलकत्वेनेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

ननुवाक्यत्वेसमेपि केषांचिद्बौद्धादिवाक्यानामप्रामाण्यदर्शनात्वेदेपितदाशंक्यत इत्यत आह ॥ नचेति ॥ बुद्धस्येदंबौद्धं ॥ चार्वाकोबौद्धमुदा
हरति ॥ बौद्धस्त्वन्यदितिद्रष्टव्यं ॥ अप्रामाण्येनेति शेषः ॥ तथासतिइंद्रियलिंगयोरपि क्वाचित्कप्रामाण्यदर्शनात्संप्रतिपन्नयोरपिप्रत्य
क्षानुमानयोस्तच्छंकाप्रसंगादितिभावः ॥ प्रमत्तापि शंकातत्रनिर्दोषत्वेनापर्नेत्यत इतिचेत्समंप्रकृतेपीत्याह ॥ अपौरुषेयत्वादिति ॥ अपौरुषेय

नचबौद्धादिवत् ॥ अपौरुषेयत्वात् ॥ नह्यपौरुषेयेपौरुषेयाज्ञानादयःकल्पयितुंशक्याः ॥

त्वेपिदोषित्वंकिंनस्यादित्यत आह ॥ नहीति ॥ सामान्योक्तित्वादपौरुषेये नपुंसकत्वोक्तिः ॥ अन्यथाश्रुतेःप्रकृतत्वात्स्त्रीलिंगंस्यात् ॥ शब्दस्य
बोधकत्वादयोदोषाःनचवक्तृपुरुषाश्रिताऽज्ञानादिमूलाः॥यस्यतुवक्तापुरुषएवनास्तितत्रकथंवक्तृपुरुषाश्रिताज्ञानादयोदोषमूलत्वेनकल्पयितुंशक्याः

॥कं०॥तथा च तस्येदमितीदमर्थेऽण्णंतत्वाद्वाक्येपि बौद्धशब्दप्रयोगो युक्त एवेति भावः ॥ननु बौद्धादिभिः स्ववाक्याप्रामाण्यानंगीकारात्कथमित्थं शंकेत्यत आह॥चार्वाक इति॥बौद्धं बुद्धवा-
क्यं ॥ अन्यच्चार्वाकवाक्यं ॥ सामान्योक्तित्वादिति ॥ स्त्रीत्वविवक्षांविहायापौरुषेयत्वमात्रविवक्षापूर्वकोक्तित्वादित्यर्थः ॥ यदाप्रवृत्तिनिमित्तमात्रं विवक्षितं न तु स्त्रीत्वादि तदाऽनियत
लिंगशब्दस्यसामान्येनपुंसकत्वमितिनपुंसकत्वविधानादितिभावः ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ ननु पौरुषेयाज्ञानादय इत्यर्थः ॥ तथाहि ॥ सर्वशब्दात्पुरुषशब्दाच्च ढञ्प्रत्यये तस्य यादेशे वृद्धौ सार्वीयं पौरुषीयमिति रूपसिद्धिः कारिकाभ्यां विहितं ॥ सर्वपुरुषाभ्यां णढञौ ॥ सर्वपुरुषश
ब्दाभ्यां यथासंख्यं णढञौ स्तस्तस्मै हितमित्यर्थे छस्यापवादेन प्रत्यये यस्येति च लिति तद्धिते णप्रत्यये परे भस्य रकारस्थस्याकारस्य लोपे वृद्धौ सार्वं तस्मै हितं सार्वं तथा पुरुषशब्दात्तस्मै हितमित्यर्थे ढञ्प्रत्य
ये आयनेयीनीयियः फढखछघां प्रत्ययादीनां प्रत्ययादीनां फादीनां क्रमादायन् एय् ईन् ईय् इय् इत्येते आदेशाः स्युरिति ढस्य एयादेशे यस्येति चेति तद्धिते ढप्रत्यये परे भस्य षकारस्थस्याकारस्य लोपे ञित्वा
त्तद्धितेष्वचामादेरिति उकारस्यौकाररूपवृद्धौ पुरुषाय हितं पौरुषेयमिति भवति ॥ अत्र सूत्रवार्तिकं ॥ पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यमिति ॥ पुरुषशब्दाद्वधादिचतुर्ष्वर्थेषु विवक्षितेषु सत्सु
ढञ् प्रत्ययो भवतीति अत्र सूत्रे वक्तव्यमिति वार्तिकार्थः ॥ तथाहि ॥ पुरुषशब्दाद्वधार्थे पुरुषसंबंधिवधः पौरुषेय इति भवति तथा पुरुषशब्दाद्विकाररूपार्थे पुरुषसंबंधिविकारः पौरुषेय इति
भवति तथा पुरुषशब्दात्समूहार्थे पुरुषसमूहः पौरुषेय इति भवति तथा पुरुषशब्दात्तेनकृतवाक्यरूपग्रंथरूपेऽर्थे पुरुषकृतवाक्यरूपो ग्रंथः पौरुषेय इति भवति॥ एवमतिप्रवृत्ते अज्ञानादी
नां पौरुषेयत्वं न संभवति ॥ ढञ्प्रत्ययार्थभूतस्य सर्वपुरुषाभ्यामित्यत्र सूत्रोक्तस्य तस्मै हितमित्यर्थस्याज्ञानादिष्वभावात् ॥ अज्ञानादेः पुरुषहितत्वाभावात् ॥ तथा वार्तिकोक्तस्य ढञ्प्रत्ययार्थस्य वधादे
रपि अज्ञानादिष्वयोगात् ॥ न च विकारार्थे प्रत्ययः अज्ञानादेर्मनोविकारत्वेन पुरुषशब्दोक्तात्मविकारत्वाभावात् ॥ न चाज्ञानादेः पुरुषकृतत्वेन तत्कृतार्थे प्रत्ययः ॥ कृतशब्देन तत्कृतवाक्यस्यैव वि

॥ व्याहतेरिति ॥ अत्राज्ञानादीनां पौरुषेयत्वोक्तिरुपचारात् ॥ पुरुषशब्दात्तत्कृतवाक्यादिष्वेव ढञः स्मरणात् ॥

वक्षितत्वात् ॥ अत एव पौरुषेयो ग्रंथ इत्युदाहरणमत्र वार्तिके वक्तव्यमित्याह ॥ **अत्राज्ञानादीनामिति** ॥ तथा चोक्तानां तस्मै हितमित्यादिढञ्प्रत्ययार्थानामभावेऽपि स प्रत्ययोऽत्र विवक्षित इत्यर्थः
उपचारो गौणीवृत्तिः॥ वाक्यादाविवाज्ञानेऽपि पुरुषसंबंधित्वगुणयोगादिति भावः ॥ उपचारबीजं मुख्यार्थासंभवं स्वयमेव दर्शयति ॥ **पुरुषशब्दादिति**॥ आदिपदेन वधविकारसमूहतस्मै हितमित्यर्था ग्रा
ह्याः॥ढञः स्मरणादिति पाठस्तु प्रामादिकः॥न हि सूत्रवार्तिकाभ्यां पुरुषशब्दात् ढञ्प्रत्ययो विहितः. किं तु ढञेवेति द्रष्टव्यं॥ अपौरुषेयत्वमेवेति॥तद्बलाददोषत्वकल्पनं तु सुतरां न संभवतीति भावः ॥
प्रकृ०॥**उपचारादिति**॥यथा पत्नीशब्दप्रवृत्तिनिमित्तस्य यज्ञसंयोगस्य ब्राह्मणादिभार्यायां सत्त्वात्तत्र पत्नीशब्दो मुख्यः शूद्रभार्यायां तु तदभावात्पाणिग्रहणसाम्येनोपचारात्प्रयुज्यते॥तथा पुरुषकृत
त्वाख्यप्रवृत्तिनिमित्तसद्भावाद्वाक्ये पौरुषेयशब्दो मुख्यः ॥ अज्ञानादिषु तु पुरुषसंबंधित्वेन वाक्यसादृश्यादुपचारात्प्रयुज्यत इत्यर्थः॥ उपचारबीजं मुख्यार्थानुपपत्तिमाह॥ **पुरुषशब्दादिति** ॥सर्वपुरु
षाभ्यां णढञाविति सूत्रेण पुरुषशब्दात्तस्मै हितमित्यर्थे विहितः ॥ पुरुषाद्वधविकारसमूहतेनकृतेष्विति वार्तिकेन कृतार्थे ग्रंथेऽर्थे विहितत्वादित्यर्थः ॥ तथा चाज्ञानादिषु पौरुषेयशब्दमुख्यार्थो बा
धित इति भावः ॥यद्यपि वार्तिकानुसाराद्वधादिष्वप्ययं वक्तव्यं तथापि तेन कृतमित्यर्थे पुरुषशब्दात् ढञः प्रचुरप्रयोगदर्शनात्तत्कृतवाक्यादिष्वित्युक्तं॥ ॥ ॥ ॥

॥ श्री० ॥ चार्वाकमतिमस्मामिनोपादानर्श्चिनत्नाह ॥ किमपीति ॥ धर्मादिवदाश्रमर्गीकृत्येनिशेष ॥ सर्वास्मतानीति ॥ नाधर्मादमगीकारेणंमांप्रतीनिशेष ॥ नैतापीति ॥ चार्वाकेणा पीत्यर्थः ॥ अंगीकारयित्वा ॥ अनन्यलभ्यामीति ॥ अन्यलभ्यत्वेशास्त्रेणमवंधानाव स्यादितिभाव ॥ तत्साधनामीति ॥ अन्यथाऽसगत्यापत्तेरितिभावः ॥ तथाविधमनन्यलभ्यं ॥ अन्यथाऽपूर्वनाचाअन्यासइतिभावः ॥ अन्यथेति ॥ एतादृशस्यशास्त्रत्वाभावेलौकिकोक्तसदृशत्वापत्तिरित्यान्यप्रसंग इतिभावः ॥ तथापि ॥ शास्त्रप्रतिपाद्यादि ॥ ननुमास्त्विति कथं ॥ माङिलुङ माङ्योगे लुङ्स्यात्सर्वलकारापवादोऽयं ॥ तथाचमाऽभूअस्मात्कुटिलस्यनिवाङ्शोकारप्रकारेण अंतःकाल्येपिचमाभूदितिनिर्भरत ॥ अतोमास्मिन्नालोक्युक्तिःकथं ॥ माङ्योगेलुङःसर्वलकारापवादकत्वादितिचेत्सत्यमित्याशयेनाह॥मायंनमाङिति॥तत्रश्च अमानोनाप्रतिषेधइति निषेधार्थ मास्तु एवायंनमाङ्येननद्योगेलोडूलकारानुपपत्ति॥माशब्दयोगेतुलोडूलकारानिषेधात्रदोषइतिभाव

ननुश्रुतेरपौरुषेयत्वमेवनास्ति ॥ वाक्यत्वात् ॥ लौकिकवाक्यवदितिचेत्किमेवंवदतः किमपिवाक्यमपौरुषेयंनास्तीतिमतंउतकिंचिदस्तीति ॥ आद्येदोषमाह ॥ विनेति ॥ कस्यचिद्वाक्यस्यापौरुषेयत्वाभावेधर्माधर्मयोरनिश्चयः प्रसज्येत ॥ निश्चायकप्रमाणाभावात् ॥ नचतथास्त्वितिवक्तुं शक्यं ॥ तत्सद्भावस्यसर्वैःसमयिभिर्निश्चितत्वादिति ॥ ननुप्रत्यक्षैकप्रमाणवादीयश्चार्वाकोधर्माधर्मौनांगीकुरुतेतस्यनेदमनिष्टं ॥ किमप्यपौरुषेयंवाक्यंअनंगीकृत्यवेदापौरुषेयत्वं प्रत्याचक्षाणान्सर्वान्प्रतिचायंप्रसंगइत्यतस्तेनापिधर्मादिकमंगीकार्येतंप्रसंगंवक्ष्यामइत्याशयेनाह ॥ यश्चेति

॥ विनाचकस्यचिद्वाक्यस्यापौरुषेयत्वंनसर्वसमयाभिमतधर्मादिसिद्धिः ॥ यश्चतौनांगीकुरुते ॥
॥ नासौसमयी ॥ अप्रयोजकत्वात् ॥ मास्तुधर्मोनिरूप्यत्वादितिचेन्न ॥ ॥ ॥ ॥ ॥

तौधर्माधर्मौ ॥ इतिप्रसज्येतेइतिशेषः ॥ धर्मायनंगीकारेकृतस्तच्छास्त्रस्याशास्त्रत्वप्रसंगोयेनासौशास्त्रीनस्यादित्यतआह ॥ अप्रयोजकत्वादिति ॥ प्रयुज्यतेप्रवर्त्यतेप्रणेताप्रणयनेश्रोताचश्रवणेशास्त्रियाभ्यांतेप्रयोजकेविषयप्रयोजनेअविद्यमानेप्रयोजकेयस्यशास्त्रस्यतत्तथा ॥ अनन्यलभ्यं कमपिपुरुषार्थमधिकृत्यतत्साधनंतथाविधमर्थंप्रतिपादयन्वाक्यसमूहोहिशास्त्रं ॥ अन्यथाऽतिप्रसंगात् ॥ नचातींद्रियस्याभावेऽन्यत्तथानुभूतंशक्यनिरूपणं ॥ अतःशास्त्रत्वसिद्ध्येविषयादित्वेनधर्मादिकंकिमप्यंगीकार्यमितिभावः ॥ शंकते ॥ मास्त्विति ॥ मायंनमाङ् ॥ ॥ ॥

॥ कु० ॥ धर्मादीति ॥ निरंकुशादिपदेनातींद्रियमात्रग्रहणेऽत्र धर्मादिपरामर्शकतच्छब्दद्विवचनानुपपत्तिरित्यतो व्याचष्टे ॥ धर्माधर्मयोरिति ॥ प्रयुज्यत इति ॥ अत्र याभ्यामिति कर्तरि तृतीयातेन कर्तृव्युत्पत्तिरेवेयं ॥ एवं च कर्त्रर्थकण्वुलूप्रत्ययोपपत्तिरित्याहु ॥ पर्यवसितार्थकथनमिदं व्युत्पत्तिस्तु प्रयोजयतीति प्रयोजकमिति द्रष्टव्येति तु तत्त्वम् ॥ ननुकथंमास्त्विति लोट् ॥ माङिलुङितिमाङ्योगेसर्वलकारबाधेन लुङएवविधानादित्यतोव्याससमाधत्ते ॥ मायमिति ॥ निषेधार्थकमाशब्दयोगमित्यर्थः ॥ ॥ ॥

॥ श्री० ॥ समाधानांतरमाह ॥ अस्तित्वव्ययंवेति ॥ अस्मिन्नर्थेऽयंगाढेवनमाशब्दइतिध्येयं ॥ नचनद्योगेऽभिमानिलोकइकागयोग इतिवाच्यं नात्रास्ति येनलोकेरूपमित्युच्यतेयेनो कञोपापानि किन्नामाव्ययमिति ॥ नहिमात्र्योगजुइदरलकागपवादइवाव्ययापवादोप्यस्ति ॥ अतोऽव्ययमनस्यापि नत्वस्योत्तरत्रयोगपूर्वमाङ्नवंध दोपाभावान्माऽस्त्विति युक्तमितिभावः ॥ उपलक्षणमिति ॥ स्वर्गादिरूपस्य तत्साध्यप्रयोजनस्यापीत्यर्थः ॥ प्रमाणेनप्रतिपादनंकस्मान्नकार्यमित्यतआह ॥ वाङ्मात्रस्येति ॥ ननिष्टानिष्टप्राप्तिपरिहारहेतुत्वाभावाल्लोकोपकारः क थंप्रेणतु:प्रयोजनमित्यतआह ॥ उपकर्तारंप्रत्युपकुर्वंतिलोकाइति ॥ अनेनास्माकंमहानुपकारः कृतइतिबुद्ध्यालोकास्तस्मिन्ननुरज्यंतेऽनुरागेणचतस्यसंपत्प्राप्तिर्भवति ॥ यथोक्तंचार्वाकेण ॥ जि

अस्तित्वव्ययंवा ॥ धर्मइत्युपलक्षणं ॥ अनिरूप्यत्वात् ॥ तत्प्रमाणाभावेनप्रतिपादयितुमशक्यत्वात् ॥ इदमुक्तंभवति ॥ विषयप्रयोजनेहितेभ वतःयेप्रमाणेनप्रतिपादयितुंशक्येनवाङ्मात्रस्यश्रोतृभिरनादरणात् ॥ नचधर्मादिकंप्रमाणेनप्रतिपादयितुंशक्यं ॥ प्रत्यक्षागोचरत्वात् ॥ अनुमाना देश्चप्रामाण्याभावात् ॥ अतोनशास्त्रस्याविषयत्वादिनाधर्मादिकमंगीकर्तुमुचितं ॥ नचैतावतानिर्विषयत्वाद्यापत्तिः ॥ यतोधर्माद्यभावोविषयोभ विष्यति ॥ प्रयोजनंचश्रोतृणांधर्माद्यनुष्ठानप्रसक्तक्लेशनिवृत्तिः ॥ धर्मादिसद्भावभ्रमोपरुद्धविषयसुखावाप्तिश्च ॥ प्रणेतुश्चलोकोपकारः ॥ उपक

॥ सर्वाभिमतस्यप्रमाणंविनानिषेद्धुमशक्यत्वात् ॥

तारंचप्रत्युपकुर्वंतिलोकाइतिनिराकरोति ॥ नेति ॥ एवंवदताधर्माद्यभावोपिनशास्त्रविषयत्वेनशक्यतेवक्तुं ॥ सर्वाभिमतस्यधर्मादेः प्रमाणं विनावाङ्मात्रेणनिषेद्धुंनास्तीतिप्रतिपादयितुमशक्यत्वात् ॥ घटाद्यभावइवप्रत्यक्षेणचधर्माद्यभावोनिश्चेष्यतइतिचेत् ॥ स्यादेवं ॥ यद्यत्रनका चिद्विप्रतिपत्तिः ॥ यत्रत्वस्तित्वाभिमानस्तत्रपिशाचादाविवप्रत्यक्षानुपलंभः संदेहहेतुरेवभवतिइति ॥ तदिदमुक्तंसर्वाभिमतस्येति ॥

तेंद्रियत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवाप्यते॥गुणाधिकेपुंसिजनोऽनुरज्यतेजनानुरागप्रभवाश्रमंपदइति॥तथा च परंप्रत्युपकारकत्वात् तदुक्तं प्रयोजनत्वमितिभावः ॥अत्रेति धर्मादौवादिना मितिशेषः॥अस्तित्वाभिमानोवादांतराणां॥पिशाचादाविवेति ॥प्रत्यक्षेणानुपलंभात्स्वंभविशाल्तेनास्थेर्वोनास्तिसंशयाप यदि निःसंदेहमार्गः।संदेहात्प्रत्यक्षेणानुपलंभान्नास्त्येव धर्मादिकमुतवास्त्यंत रोकरीत्याऽस्तीति प्रत्यक्षानुपलंभोमध्यस्थस्यसंदेहहेतुरेवभवतीतिनधर्माद्यभावनिश्चायक इतिभावः॥सर्वाभिमतस्येतीति॥अस्तित्वेनसर्वेषामभिमतस्येत्यर्थः॥ कृ० अस्तित्वव्ययंवेति॥तिदंतप्र तिरूपकमव्ययमित्यर्थः॥संदेहहेतुरेवेति॥धर्मादिकमस्तिनवेतिसंदेहहेतुरित्यर्थः॥ अत्रायं कोटिनाप कमुक्तं यत्रत्विनिषेधसुपपादनाय यथोपयुक्तं ॥ द्वितीयकोटिसाधकमुक्तं॥प्रत्यक्षानुपलंभइति ॥

॥ श्री० ॥ आविपालेत्यत्र आ अभिविधौ तदुच्छेदः आविपालगोपालमाभ्युत्याविपालगोपालमितितदर्थः ॥ अहंकारकार्याभिमानस्य कथंप्रमाणत्वमित्यतआह ॥ अभिमानइति ॥ अभिशब्दो मानस्यसम्यक्कार्थकइतिभावः ॥ तद्दर्शयति ॥ नचेति ॥ तत्प्रमाणं ॥ प्रमाणविशेषस्यार्थ ॥ व्यर्थाचिंतया ॥ प्रमाणविशेषचिंतया ॥ नचेति ॥ नतीत्यर्थः ॥ आगमस्येति ॥ पूर्वेण पू ण्यत्वोकंनयतीत्यादिरित्यर्थः ॥ तत आगमरूपंप्रमाणंतत्सहकारिणस्यतत्तत्सहकारित्वेति विग्रहः ॥ यज्ञादिकंसफलंभवत्वित्युक्तिरित्याद्यागमानुमानयोरित्यर्थः ॥ ननु सर्वाभिमतेरेवधर्मादिप्रामाणिकत्वंकिमर्थमित्यतआह ॥ अतएवेति ॥ धर्मादिरागमादेः इतिसर्वाभिमते प्रमाणमूलकत्वादित्यर्थः ॥ प्रमाणसामान्यसिद्धेरिति ॥ सर्वाभिमतेरित्युक्तप्रमा

पुनःशंकते ॥ नचेति ॥ माभूद्धर्माद्यभावस्यविषयत्वंतत्साधकप्रमाणाभावात् ॥ तथापिधर्मादेर्विषयत्वादिकंनघटते ॥ अप्रामाणिकस्यप्रमित्य नुपपत्त्यासाधयितुमशक्यत्वादिति ॥ निराकरोति ॥ नेति ॥ अस्तितावद्धर्मादिविषयेसर्वेषामविपालगोपालमस्तित्वाभिमानः ॥ अभिमानो ज्ञानमेव नचतस्यबाधकंकिंचित् ॥ धर्माद्यभावप्रतिपादकप्रमाणाभावस्योक्तत्वात् ॥ अतःसर्वाभिमतेरेवधर्मादेःप्रमाणत्वात्तत्करणस्यचप्रमाण

॥ नचसिद्धिरप्रमाणकस्येतिचेतन्न ॥ सर्वाभिमतेरेवप्रमाणत्वात् ॥ अन्यथासर्ववाचनिकव्यवहारासिद्धेश्च ॥

त्वात् ॥ धर्मादेःप्रामाणिकत्वसिद्धेःकिमनयाव्यर्थाचिंतया ॥ नचततप्रमाणविशेषोऽशक्यनिरूपणः ॥ आगमस्यतत्सहकारिणोऽनुमानस्यचसत्त्वा त् ॥ अतएवतांचपरंपरापि ॥ आगमादेःप्रामाण्यंनास्तीतिउक्तमित्यतआह ॥अन्यथेति ॥यदाऽऽगमस्यानुमानस्यचनप्रामाण्यंतदासर्वस्यवाचा निर्वर्त्यस्यव्यवहारस्यासिद्धिःस्यात् ॥ परप्रत्यायनार्थोहिवाग्व्यवहारः ॥ सयदिनपरंप्रत्यायर्येत्व्यर्थोनाक्रियेतैवेति ॥ चशब्दःप्रमाणसामान्यसि ध्यातद्विशेषसिद्धेःसमुच्चये ॥ ॥ ॥ णसामान्यसिध्येत्यर्थः ॥ वचनप्रयोगः ॥ वादिनान्वयाक्रियमाणः ॥

॥ कं० ॥ वाचानिर्वर्त्यस्येतितृतीयांताद्धातुशब्दात्तेननिर्वृत्तमित्यर्थेनिर्वृत्तेऽक्षद्यूतादिभ्यइतिठक् ॥ निर्वृत्तेत्वंगमन्त्राभ्यांद्वैत्रिगांगिकमान्त्रिकेऽत्यमरटीकायामंगमन्त्रशब्दाभ्यामक्षद्यूतादित्वाट्ठगि त्युक्तित्वेनाक्षद्यूतादेराकृतिगणत्वावगमात ॥ नचांगमन्त्रशब्दावक्षद्यूतादौपठितावित्याच्यं ॥ काशिकादावदर्शनादितिभावः ॥ एतेननात्रतेननिर्वृत्तमितिठक् ॥ तत्रकालादित्यधिकृतत्वेनकालवाचि शब्दादेवठग्विधानादितिनिरस्तंनिर्वृत्तइतिनिष्ठार्थोविवक्षितइति भावेननिर्वर्त्यस्येत्युक्तम ॥ ॥ ॥ ॥

॥ श्री० ॥ समव्ययफलमिति ॥ असत्यानिदुरंतानिसमव्ययफलानिच ॥ अशक्यानिचवस्तूंनिनारंभेतविचक्षणइतिअभियुक्तवचनादितिभावः ॥ सर्वेपीति ॥ परस्परहिंसादिनास्वेषामपकारप्राप्तेचेत्यर्थः॥तदभावेपीति ॥ सर्वैरप्यपकारस्यकर्तुमशक्यत्वेपीत्यर्थः॥अनेनतावदस्मद्धितायोद्यमः कृतस्तत्र यद्धिंसादिकमस्माभिःप्राप्तंतदस्मदशक्तिजंतत्रायंकिंकरिष्यतीतिभावेनेतिद्रष्टव्यं

भवत्वागमप्रामाण्येवाचनिकव्यवहारासिद्धिः ॥ अनुमानाप्रामाण्येतुकथमित्यतआह ॥ नचेति ॥ त्वदीयंवाक्यंमयाश्रूयतेइतिज्ञात्वामांप्रतित्वया वाग्व्यवहारःक्रियतेऽन्यथावा ॥ द्वितीयेनिष्फलोनकर्तव्यः स्यात् ॥ नाद्यः ॥ परचित्तवृत्तीनांपरस्याप्रत्यक्षत्वेनमयाश्रुतमिति तवज्ञातुमशक्यत्वात् ॥ मदीयंप्रत्युत्तरमेवतज्ज्ञानोपायइत्येववक्तव्यमितिभावः ॥ अस्त्वेवमित्यतआह ॥ अन्यथावेति ॥ वाशब्दोऽवधारणे ॥ प्रत्युत्तरंहिलिंगतयाज्ञापकं ॥ नचतवमतेऽनुमानंप्रमाणं ॥ अतःप्रत्युत्तरमन्यथैवाज्ञापकमेवस्यादिति ॥ ननुलिंगशब्दयोःप्रामाण्यमेवनांगीक्रियते ॥ ज्ञापकत्वमात्रमंगीक्रियतएव ॥ अतःकथंवाचनिकव्यवहारासिद्धिरित्यतआह ॥ भ्रांतिर्वेति ॥ ज्ञापकत्वमंगीकृत्यप्रामाण्यानंगीकारेशब्दलिंगाभ्यांजायमानःप्रत्ययस्तवमतेभ्रांतिर्वास्यात्संशयोवा ॥ गत्यंतराभावात् ॥ नचपरस्यभ्रांत्याद्यर्थंवचनप्रयोगः ॥ नापिप्रत्युत्तरेणभ्रांतःसंदिग्धोवावाक्यप्रवृ

नचमयाश्रुतमितितवज्ञातुंशक्यं ॥ अन्यथावाप्रत्युत्तरंस्यात् ॥ भ्रांति
र्वातयस्यात् ॥ सर्वदुःखकारणत्वंवास्यात् ॥ एकोवान्यथास्यात् ॥

त्तइतियुक्तम् ॥ अतोवाचनिकव्यवहारसिध्यर्थमागमानुमानप्रामाण्यमंगीकार्यमिति॥ एवंचार्वाकशास्त्रस्याविषयंनिराकृत्यप्रयोजनमपिनिराकुर्वन्श्रोतृप्रयोजनंतावन्निराचष्टे ॥ सर्वेति ॥ यथाशास्त्रस्यसर्वेषांश्रोतॄणांसुखकारणत्वं ॥ तथाधर्माद्यभावज्ञानेसर्वमर्यादातिक्रमेपरस्परहिंसादिनासर्वदुःखकारणत्वंचस्यात् ॥ तथाचसमव्ययफलंनिष्प्रयोजनमेवेति ॥ इदानींशास्त्रप्रणेतृप्रयोजनंनिराकरोति ॥ एकोवेति ॥ धर्मादिज्ञानशून्याःपशुप्रायानोपकारिणमुपकुर्वंति ॥ अपितुसर्वेप्यपकर्तुमलं ॥ तदभावेप्येकोवाऽन्यथाऽपकारकःस्यादितिभावः ॥ तदेवंधर्माद्यनंगीकारेशास्त्रस्यविषयाद्यभावेनाशास्त्रत्वप्रसंगात्सर्वैर्धर्मादिकमंगीकार्यमिति ॥ ॥ एकोवेति ॥ कृतघ्नतानिमित्तापत्यवाद्यानुसंधानेसत्येवमेतत्॥तत्तुतेनवानिःशेषितमितिभावः॥

॥ कृ० ॥ वाशब्दोवधारणइति ॥ वास्याद्विकल्पोपमयोरेवार्थेपिसमुच्चयइतिविश्वोक्तेरितिभावः ॥ पशुप्रायाइति ॥ प्रायःस्यात्ताडनेमृत्यौतुल्यबाहुल्ययोरपीतिविश्वोक्तेःपशुतुल्याइत्यर्थः

१ इदमुत्तलक्षणं कर्माण्यपिग्राह्याणि

॥ श्री॰ ॥ अतिप्रसंगादिति ॥ अस्माकमप्यस्मद्वाक्याददोषत्वसिद्धेरित्यतिप्रसंगादित्यर्थः ॥ ननुपौरुषेयवाक्यात्तन्निश्चयायोगेऽपिप्रमाणांतरेणतत्सिद्धिर्भविष्यतीत्यतआह ॥ नचप्रत्यक्षादिनेति ॥ अतींद्रियत्वान्नप्रत्यक्षेणसिद्धिः ॥ नाप्यनुमानेनतत्प्रतिबद्धलिंगाभावात् ॥ नाप्यागमेनअपौरुषेयस्यानंगीकारात् ॥ पौरुषेयस्यचनिरस्तत्वादितिभावः ॥ ननुशौद्धोदनिप्रभृतीनांतेषांप्रसिद्ध्याकथमपौरुषेयत्वमंगीकृतमित्यतआह ॥ शौद्धोदनीति ॥ वाक्यत्वहेतोरपौरुषेयत्वाभावसाधकस्य ॥ नचेति ॥ अपौरुषेयत्वेनबौद्धाद्यंगीकृतेनापुनस्तत्समयोगित्यर्थः ॥ अनुमानस्येति ॥ श्रुतिवाक्यंनापौरुषेयवाक्यत्वाल्लौकिकवाक्यवदितिपूर्वोक्तानुमानस्येत्यर्थः ॥ अनैकांत्यादिति ॥ बौद्धस्यस्वसमयापौरुषेयत्वस्यास्माभिरनंगीकारात्तद्दृष्ट्यैवानैकांत्यंनान्यथानैकांत्यादित्यर्थः ॥ कर्तुरप्रसिद्धिरिति ॥ तथाचवेदोऽपौरुषेयोऽप्रमितकर्तृकत्वाद्गगनवदित्यर्थः ॥ ॥ ॥ ॥

ननुस्वीकृतंधर्मादिकंपौरुषेयवाक्यात्तन्निश्चयइत्यतआह ॥ रचितत्वेचेति ॥ ततश्चनधर्मादिनिश्चयइतिभावः ॥निर्दोषत्वेनप्रमितोऽसावितिचेत् तस्यनिर्दोषत्वंकिंतद्वाक्यात्सिद्धं प्रमाणांतरेणवा ॥ नद्वितीयः ॥ तदभावात् ॥ आद्यंदूषयति ॥ नचेति ॥ अतिप्रसंगादितिभावः ॥ नचप्रत्यक्षादिनाधर्मादिसिद्धिः ॥ अतःसर्वैःकिमप्यपौरुषेयंवाक्यमंगीकार्यं॥अंगीकृतंचबौद्धादिभिःस्वसमयापौरुषेयत्वं ॥ शौद्धोदनिप्रभृतयःसंप्रदायप्रव

॥ रचितत्वेचधर्मप्रमाणस्यकर्तुरज्ञानादिदोषशंकास्यात् ॥ नचादोषत्वंस्ववाक्येनैवसिध्यति ॥

र्तकाइत्युक्तत्वात् ॥ ततःकिमितिचेद्वाक्यत्वहेतोस्तत्रानैकांत्यमिति ॥ अस्त्वेवमनुमानस्यान्यतरानैकांत्याच्छ्रुतेरपौरुषेयत्वेबाधकाभावः ॥ तत्साधकंतुकिमितिचेत्कर्तुरप्रसिद्धिरपौरुषेयत्वप्रसिद्धिश्चेतिब्रूमः ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ॰ ॥ अतिप्रसंगादिति अस्मद्वाक्येनास्माकमपिनिर्दोषत्वप्रसंगादित्यर्थः ॥ किमेतंवदतःकिमप्यपौरुषेयंवाक्यंनास्तीतिमतंउतकिंचिदस्तीतिवाविकल्पितं ॥ द्वितीयपक्षमंगीकारयन्नेवोपसंहरति ॥ अतइति ॥ नकेवलमस्माभिःकिंचिदपौरुषेयंवाक्यमंगीकार्यमापाद्यतइत्येवाकिंतर्हीत्यतआह ॥ अंगीकृतंचेति ॥ शौद्धोदनीति ॥ यःशाक्येषुजातोबुद्धावतारःसशौद्धोदनिरितिक्षीरस्वामी॥शाक्यमुनिस्तुयः॥सशाक्यसिंहःसर्वार्थसिद्धःशौद्धोदनिश्चसइत्यमरश्च॥तद्बलाच्छौद्धोदनिशब्दार्थोज्ञेयः॥वाक्यत्वहेतोरिति ॥श्रुतेरपौरुषेयत्वमेवनास्तिवाक्यत्वादितिप्रागुक्तहेतोरित्यर्थः ॥ श्रुतेःपक्षत्वात्तदन्यवाक्यस्यचास्माभिरपौरुषेयत्वानंगीकारात्कथमनैकांत्यमित्यतउक्तं ॥ अन्यतरेति॥कर्तुरप्रसिद्धिरिति॥अप्रमितकर्तृकत्वमित्यर्थः ॥तेनकर्तृभ्रांतिमादायनासिद्धिः ॥ नापिगूढकर्तृकेव्यभिचारः॥अन्यैरप्रमितेकर्तृत्वेपिगूढकर्त्रातदभावात॥एवंवेदकर्तुरप्रसिद्धेरितितत्त्वनिर्णयानुसारेणहेतुमुक्त्वाऽग्रिमभाष्यानुसारेणहेत्वंतरमाह ॥अपौरुषेयत्वप्रसिद्धिश्चेति ॥

१ ग्रंथे अप्रमितकर्तृत्वस्येतिशेषः। २ तस्यग्रंथस्येतिशेषः

॥ श्री० ॥ नन्वर्जुनंप्रतिभगवतात्वंमोहितोमाभवइतिवक्तव्येनमुह्यतीतिकथंप्रथमपुरुषप्रयोगइत्यतआह ॥ नस्कइति ॥ तथाचार्जुनस्यात्मनित्यत्वप्रतिपत्तिस्तद्वचनबलेनसिद्धत्वात्तंप्रत्येतत्किंत्व र्जुनंनिमित्तीकृत्य प्रासंगिकोऽयंश्लोकाभिप्रायेणवेदमतं प्रथमपुरुषप्रयोगइतिभावः ॥ पूर्ववादिति ॥ अपेक्ष्यशोकःकार्यइतिशेषइत्यर्थः ॥ अनेनेति ॥ व्याख्यानाकरणेनेत्यर्थः ॥ शोकाभावंप्रति जरादिप्राप्तदेहांतरप्राप्तेश्चाविकारणत्वाभावादाह ॥ जरादिप्राप्ताविवत्यादि ॥ ॥ [illegible] ॥ हितायेहितान्यभिचारंकृतं ॥ गृढकर्तृकस्येति [illegible] प्रदर्शनार्थविशेषणम् ॥ नवहनुमुपपादयति

एवंतर्हिगूढकर्तृकस्यकृतापौरुषेयत्वप्रसिद्धिकस्याप्यपौरुषेयत्वप्रसंगइत्यतआह ॥ नचेति ॥ केनचित्कृतमितिशेषः ॥ उक्तवाक्यसमंवेदवदपौ रुषेयमित्यर्थः अनादिकालेपरिग्रहःप्राक्तनमेवेनादिनिजानंतेनविपर्यीकृतत्वात्कृतेतिरस्य [illegible] भावादपौरुषेयत्वप्रसिद्धिरेवनत्वभंगेतिभावः ॥ अ पौरुषेयत्वसिद्धोसिद्धमर्थमुपसंहरति ॥ अतइति ॥ एवंचतुर्थपादोपयुक्तंप्रमेयमुक्त्वानिदानींविवृणोति ॥ अतइति ॥ यतएवंनित्यत्वादिभिरु

नचैवंकेनचिदपौरुषेयमित्युक्तमुक्तवाक्यसमं॥अनादिकालपरिग्रहासिद्धत्वात्॥अतःप्रामाण्यंश्रुतेःअतः कुतर्कैर्धीरस्तत्वनमुह्यति॥अथवाजीवनाशंदेहनाशंवा अपेक्ष्यशोकः॥नजीवनाशं॥नित्यत्वादित्याह॥नत्वेव ति॥नापिदेहनाशमित्याह ॥ देहिनइति ॥यथाकौमारादिदेहहानेनजरादिप्राप्तावशोकएवंजीर्णादिदेहहा नेनदेहांतरप्राप्तावपि ॥ १३ ॥ [illegible]क्षिताःकुतर्काः ॥अतस्तैःकुतर्कैर्धीरोधीमांस्तत्त्ववेदहानिरिक्तनित्यात्मसद्भावविषयेनमोहमाप द्यते॥तस्केनियतंवासइत्यार्जुनवचनेनतस्यनित्यात्मप्रतिपत्तिसिद्धेःप्रथमपुरुषप्रयोगः॥ अतःकार्यांगीतिनिदर्शयितुंश्लोकद्वयंप्रकारांतरेणव्याचष्टे॥ अथवेति॥नजीवनाशमपेक्ष्यशोकःकार्यइतिशेषः॥नित्यत्वाज्जीवस्य॥अनेनयोजनापूर्वार्धेयोजितापरापि॥नापीत्यत्रापिपूर्ववच्छेषः॥अत्रपूर्वयोजना नसंगच्छते॥अतोन्यथापादत्रयंव्याख्याति॥यथेति ॥जरादिप्राप्तदेहांतरप्राप्तावितिनिमित्तसप्तम्यौ ॥ [illegible]कृतापौरुषेयत्वप्रसिद्धिकस्येति ॥नन्वत्रार्जुनस्यबोध्य त्वान्नम् [illegible]इत्यतआह ॥ तस्केनियतमिति ॥ तस्यार्जुनस्य ॥ निमित्तसप्तम्याविति ॥ [illegible] ॥ यथापि जरादिप्राप्तदेहांतरप्राप्तावित्युभयत्र सत्यामितिशेषः ॥ अशोकइत्यत्रतुल्यइति ॥ [illegible] ॥ [illegible] सिद्धमाध्यममित्याहारसिद्धसाध्यायोप युज्यतइतिच्या[illegible] ॥ ॥ ॥

१ कृपालुशब्दवदुपपात्ति

॥ श्री० ॥ प्रतिविधानमिति ॥ समाधानमित्यर्थः ॥ ननु जीर्णदेहलाभस्य पूर्वावस्थामात्रहानिर्मरणेन जीर्णावस्थावतां देहस्यापीति वैषम्यमित्यत आह ॥ अनुपयुक्तमिति ॥ शोकाहेतुत्वाभावादितिभावः ॥ ननु यथाकथंचित्स्वपर्यायस्य द्रव्यहानेन वस्त्वंतरस्य प्राप्तत्वाच्छोको माभविष्यत्येवेति चेत्तत्राह ॥ निष्केति ॥ अन्यथैतस्यापि शोकहेतुत्वं स्यादितिभावः ॥ १२ ॥ विकृततद्दर्शनं॥ वैवर्ण्यछेदादिविकारयुक्तदेहदर्शनं ॥ विषये ॥ शब्दादौ ॥ ॥ कृष्णाचार्य ॥ एवादिनित्यादावपीतिनप्रतिबंधी ॥ तत्कस्यहेतोरिति ॥ निमित्तकारणहेतुप्रयोगे सर्वासां प्रायदर्शनामिति

ततश्चायमर्थः ॥ कौमाराद्यवस्थाविशिष्टदेहहानेतावन्नास्तिशोकइतिप्रसिद्धं ॥ तत्कस्यहेतोरितिवाच्यं ॥ जरादिविशिष्टदेहांतरलाभात् ॥ समानलाभेनहानिर्हिसमाधीयतइतिचेत् ॥ तर्हिमरणेपिशोकोनकार्यः ॥ देहांतरस्यलाभादेव ॥ यदातुजीर्णलाभेनसमीचीनहानेः प्रतिविधानं ॥ तदातुनुतरांसमीचीनलाभेनजीर्णहानेरिति ॥ तत्रावस्थामात्रहानिरत्रत्ववस्थावतोपीत्येतदनुपयुक्तंवैषम्यं ॥ निष्कप्रदानेनपटग्रहणदर्शनादिति भावेनोक्तंधीरइति ॥ १३ ॥ प्रकारांतरेणशोकंशंकते ॥ तथापीति ॥ यद्यपिबांधवादीनांहानिर्भविष्यतीतिधियानशोकोयुक्तः ॥ उक्तविधयाऽ

तथापितद्दर्शनाभावादिनाशोकइतिचेन्नेत्याह ॥ मात्रास्पर्शाइति ॥ मीयंतइतिमात्राविषयाः

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः ॥ आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत ॥ १४ ॥

त्महानेरभावात् ॥ देहहानावपिप्रतिनिधिलाभात् ॥ तथापितन्मरणे ममैवसुखहानिर्दुःखावाप्तिश्चभविष्यतीतिधियामेशोकः समुत्पतितः ॥ कथं ॥ तद्दर्शनाभावादिना ॥ तदितिबांधवादिपरामर्शः ॥ आदिपदेनविकृततद्दर्शनंचगृह्यते ॥ प्रेमास्पदानांहिदर्शनस्पर्शनालापादिकंसुखहेतुः॥ तेषुमृतेषुतद्दर्शनाद्यभावात्सुखहानिः ॥ तथातेषांछेदभेदादिदर्शनेनदुःखावाप्तिश्चेति ॥ एतन्निषेधपूर्वकंश्लोकमवतारयति ॥ नेति ॥ मीयंतेविषयाएभिरितिमात्राइंद्रियाणिइतिव्याख्यानमसत् ॥ पुराणादौमात्राशब्दस्यविषयेरूढत्वादित्याशयवान्व्याचष्टेमीयंतइति ॥

हेतुशब्दप्रयोगेसर्वविभक्तिविधानात्कस्माद्धेतोरित्यर्थः ॥ दृश्यमानदेहनिवृत्तत्वंयस्यजीर्णेयुक्तंतदभिप्रायमाह ॥ यदात्विति ॥ विषयायैरिति ॥ माङ्मानेइत्यस्मात्हुयामाश्रुभसिभ्यस्त्रन्नित्युणादिसूत्रेणकरणेत्रन्प्रत्ययइतिभावः ॥ पुराणादाविति ॥ तेषांशब्दादीनामाश्रयाह्येषाप्रकृतिश्चगुणत्रयं ॥ मूलंमात्राशिफास्तस्येतिवायुपुराणादावित्यर्थः ॥ रूढत्वादिति ॥

॥ श्रीनिवासतीर्थी ॥ ॥ द्वंद्वे ॥ ऐकपद्यमंगीकृत्येतिशेष ॥ एवंतर्हीति ॥ स्पर्शशब्दस्यसंबंधार्थकत्वइत्यर्थः ॥ किमिति ॥ ऐकपद्यमंगीकृत्येतिशेषः ॥ भिन्नपदत्वादावपीति॥ भिन्नपदत्वंएकपदत्वंचांगीकृत्यद्वंद्वएवाश्रीयतांस्पर्शपदस्यसंबंधार्थकत्वेनपुनरुक्तिदोषाभावादित्याशयः ॥ ननुकथमनेनोक्तशंकापरिहारइत्यतआह ॥ नहीति ॥ विषयाणांसंबंधानांचसकाशा दितिशेषः ॥ एतत्कार्यं ॥ अनुभवद्वारासुखादिरूपंकार्यं ॥ यदिभिन्नपदत्वमेकपदत्वेपिद्वंद्वोवाश्रियेत ॥ तदाविषयाणांसंबंधानांनप्रत्येकमनुभवादिकारणत्वमुक्तंस्यात् नचैवमिंद्रियाद्यसंबद्ध विषयाद्विषयास्पृष्टेंद्रियसंबंधाद्वाऽनुभवादिरूपकार्यदर्शनादतएकपद्यमंगीकृत्यषष्ठीसमासएवाश्रयणीयइतिभावः ॥ साक्षात ॥ अनुभवद्वारमंतरेणेत्यर्थः ॥ प्रतिसंबंधीति ॥ अधिकरणमि त्यर्थः ॥ कुत्रददतिभागायत्तनेमिमितियावदितिभावः ॥ नन्विंद्रियार्थसन्निकर्षस्यैवानुभवहेतुत्वात्कथंदेहविषयसंबंधस्यानुभवहेतुत्वमुच्यतइत्यतआह ॥ देहशब्देनेति ॥ देहाश्रितत्वंलक्षणा बीजसंबंधः ॥ अनेनेति ॥ देहशीतोष्णादीत्यादिपदप्रयोगेणेत्यर्थ ॥ लक्षितलक्षणेति ॥ लक्षितमर्थद्वारीकृत्ययालक्षणासाल्लक्षितलक्षणा ॥ अत्रहिमात्रास्पर्शानांशीतोष्णदत्वद्वारासुखादि दत्वमुच्यते ॥ तत्रविषयसंबंधानांशीतोष्णविशेषा[illegible]शीतोष्णशब्देनसकलविषयालक्ष्यंते ॥ इदमप्यनुपपन्नं ॥ विषयसंबंधानांसमस्तविषयस्यापिबाधितत्वादतस्तेनतत्साक्षा

ननुगंधरसरूपस्पर्शशब्दाविषयाः॥अतोभिन्नपदत्वेद्वंद्वेवास्पर्शानांविषयांतर्गतानांपुनरुक्तिरित्यतआह॥तेषामिति॥विषयाणां॥तथाप्यनुपपत्तिः॥ विषयाणांस्पर्शाभावादित्यतआह ॥ संबंधाइति ॥ एवंतर्हिकिंषष्ठीसमासपरिग्रहणेनभिन्नपदत्वादावपिदोषाभावादित्यतोवाक्यंयोजयति ॥ त

तेषांस्पर्शाःसंबंधास्तएवशीतोष्णसुखदुःखदाः॥देहेशीतोष्णादिसंबंधाद्धिशीतोष्णाद्यनुभवआत्मनः ॥

एवेति ॥ तुशब्दार्थएवेति ॥ नहिविषयाणांसंबंधानांचपृथगेतत्कार्यंसंभवतीतिभावः ॥ ननुशीतोष्णशब्दौविषयविशेषवचनौतत्कथंविषयसंबं धाविषयविशेषंदद्युः ॥ कथंचसाक्षात्सुखदुःखेकस्यप्रतिसंबंधीकस्मैददतीत्यतआह ॥ देहइति ॥ देहशब्देनात्रेंद्रियाणिलक्ष्यंते ॥ अनेनशीतोष्ण शब्दौसकलविषयोपलक्षकौविषयोक्त्याचतत्साक्षात्कारोलक्ष्यतेइतिलक्षितलक्षणेयं ॥ त्कारोलक्ष्यतेइतिलक्षितलक्षणेतिभावः ॥ कृ० ॥ प्रसिद्धत्वादित्यर्थः ॥ योगरूढत्वादितिवा॥अतोनसाध्येयोगोक्तिविरोधः ॥ भाष्येमीयंतइतिकर्मणित्रन्प्रत्ययइतिभावः ॥ गंधस्मेति॥रूपंशब्दोगंधरसस्पर्शाश्चविषयाअमीत्याद्युक्तेरितिभावः ॥ तेषामित्यनेनस्त्री लिंगमात्रापरामर्शः कथमित्यतआह ॥ विषयाणामिति ॥ शरीरविषयसन्निकर्षस्यनविषयानुभवहेतुत्वंसुप्तस्याशीत्याभिचारादित्यतआह ॥ देहशब्देनेति ॥ अनेनेति ॥ देहेशीतोष्णादी तिभाष्यवाक्येनेत्यर्थः ॥ तत्रादिपदेनसकलविषयलक्षकत्वंसूचितं ॥ अनुभवपदेनतत्साक्षात्कारलक्षकत्वं॥ततश्चात्मनेनानुभवद्वारेत्यर्थः ॥ सूचितःदेहइतिप्रतिसंबंधीसूचितः आत्मनइत्यनेनात्म नेदानमित्येतत्सूचितमितिविवेकः ॥ ननुसकलविषया नत्विंद्रियसंबंधन्याइतिलक्षितार्थस्याप्यनुपपत्तावाह ॥ विषयोत्क्याचेति ॥ विषयमात्रलक्षकशीतोष्णपदेनेत्यर्थः ॥

१ मात्रास्पर्शाइतिगीतायांशरीरशरीरत्वाद्धिसर्गलोपः २एतयोरेवगीतायांस्वशब्देनग्रहणं प्राणाग्रयएवैतस्मिन्पुरेजाग्रतीतिश्रुतिस्त्वगिंद्रियस्यप्राणाभिमन्यमानत्वाच्चतस्यसुप्तावनुपरमः

॥ श्री० ॥ **अनुभवद्वारेति** ॥ मूलेविवक्षितमित्यर्थः॥ **कथंमेतस्यपरिहारोर्य** ॥ ननुविषयसंबंधाअनुभवद्वारासुखदुःखेकुत्रकस्यददतिइतिप्रतिसंबंध्याकांक्षायाः किमुत्तरमतआह॥ **प्रतिसंबंधीसादि** ॥ तथापितद्दर्शनाभावादिनाशोकइत्याशंकापरिहारस्यपूर्वार्धेऽदर्शनात्तस्यैवैश्यमित्यतआह ॥ **एतेनेति** ॥ पूर्वार्धेनेत्यर्थः ॥ अनुवादप्रकारं दर्शयति ॥ **तत्तदिति** ॥ **परयेति** ॥ तदनंतरमध्याहृतयेत्यर्थः ॥ **काकेति** ॥ स्वरविशेषयुक्तकिंशब्देनेत्यर्थः ॥ काकुःस्त्रिया विकारोयःशोकभीत्यादिभिर्ध्वनेरित्यभिधानात ॥ विषयसान्निकर्षमात्रस्य दुःखादित्वाभावादाह ॥ **दुःखादिरिति** ॥ तथाच स्वतोविषयसन्निकर्षमात्रेणसाक्षात्कारद्वारा दुःखादिर्नहि संभवतीत्यर्थः ॥ तुशब्दार्थानुवाद एव ॥ **केवला इति** ॥ काकुप्रदर्शनम् ॥ **किमिति** ॥ पूर्वमभिमानशब्दस्यज्ञानार्थकतया व्याख्यातत्वादत्र तदर्थत्वभ्रमं वारयति ॥ **अभिमान इति** ॥ ॥ ॥

अनुभवद्वारेवसुखदुःखदानं ॥ प्रतिसंबंधीदेहः ॥ दानंचआत्मनइत्युक्तंभवति ॥ एतेनलौकिकीप्रतीतिरर्जुनेनशंकिनानूद्यते ॥ तत्तद्विषयाणांते

ततश्चसुखदुःखे ॥ नह्यात्मनः स्वतोदुःखादिःसंभवति ॥

स्तैरिंद्रियैर्येयेसंन्निकर्षास्तैस्तैस्तत्तद्विषयसाक्षात्कारभवंति ॥ तत्रेष्टविषयसाक्षात्कारात्सुखंभवति॥ अनिष्टविषयसाक्षात्कारात्दुःखंभवतीति ॥ भवेदेवंततः किंइतिकुतःशंकायाइत्यतस्तुशब्दात्परयाकाक्वा सिद्धमर्थमाह ॥ नहीति ॥ स्वत इति ॥ विषयेंद्रियसन्निकर्षमात्रेण ॥ दुःखादिरिति विषयसाक्षात्कारः सुखदुःखेच ॥ अनेनमात्रास्पर्शाएवकेवलाःकिंशीतोष्णसुखदुःखदाः ॥ नहि ॥ किंत्वाभिमानसहिताइत्युक्तंभवति ॥ अभिमानो नामात्रविषयेषुशोभनत्वाध्यासनिमित्तस्नेहः ॥ अग्नित्वादिभ्रमनिमित्तोद्वेषश्चशरीरेंद्रियाणां करणेषुममतातिशयहेतुकोऽविवेकइत्यादि॥

॥ कृ० ॥ ननुविषयेंद्रियसंबंधाद्विषयानुभवद्वारासुखादिप्रदाइतिनविधि तुशब्दात्परयाकाक्वानिनिषेधात॥नाप्यर्जुनेनाशंकितस्यनिषेधायानुवादः तत्त्वज्ञानित्वेनार्जुनस्यैवंविधशंकानुदयादित्यतआह ॥ **एतेनेति** मात्रास्पर्शाइतिश्लोकार्धेनेत्यर्थः अनुवादप्रकारमेवदर्शयन्मात्रास्पर्शाइत्यस्यार्थमाह ॥ **तत्तदिसादिना** ॥ **काकेति** ॥ यद्यपिकाकुःस्त्रियांविकारोयः शोकभीत्यादिभिर्ध्वनेरित्यमरोक्ते काकुशब्दः शोकादिजन्यध्वनिविकारार्थः नचविकारस्यतुशब्दात्परत्वंयुक्तंध्वनिधर्मत्वात् ॥ तथापिपरभाषणजन्यविकारवद्ध्वनिव्यंग्यः ॥ किंशब्दोत्रकाकुशब्देनग्राह्यः॥ तस्यचतुशब्दानंतरमध्याहारात्तुशब्दात्परत्वंयुक्तं ॥ अतएवाग्रिमकिमित्येतदध्याहृतमितिमंतव्यं ॥ नन्वभिमानो नाम ज्ञानमेवेत्युक्तं प्राक् ॥ तच्च ज्ञानं यदि स्वविषयं तदाऽसिद्धिः ॥ मात्रास्पर्शानां स्वरूपसत्तामेव हेतुत्वात ॥ यदि च शीतोष्णादिविषयं तदा विषयानुभवं प्रति तस्यैवहेतुत्वप्राप्तेरात्माश्रय इत्यत आह ॥ **अभिमानो नामेति** ॥ स्नेहो राग इत्यर्थांतरम् ॥ ममतातिशयेनानात्मीयेऽप्यात्मीयत्वभ्रमः ॥ **अविवेक इति** ॥ स्फुटतरविवेकाभाव इत्यर्थः॥ देहात्मैक्यभ्रमस्यान्यत्रनिरस्तत्वात् ॥ आदिपदात्स्वात्मन्यनन्याधीनस्वातंत्र्यभ्रमोग्राह्यः ॥

---

१ काकुस्वरशिरस्कावधारणार्थकतुशब्देनेतिभावः ग० श्रीपादानां श्री० कृ० आभ्यांभिन्नरीत्याव्याख्यातं २ कोशेशोकभीत्यादिइत्यादिपदेनग्राह्यं ध्वनिविकारजनकमेतत्प्रकृतोपयुक्तमितिभावः

॥ श्री० ॥ सुखदुःखयोश्चेति ॥ ज्ञानद्वारेति शेषः ॥ नन्विति ॥ आगमापायिन इत्यस्यागमापायित्वादिति व्याख्यानं कथं लभ्यते हेतुत्वज्ञापकत इत्यादिपदस्य गीतायामभावादिति भावः ॥ अध्याहारेण समाधानस्यजघन्यत्वादाह हेत्वर्थेति ॥ यत इत्यध्याहारेण वा हेत्वर्थगर्भत्वेन वेदं हेतुतया किमर्थंव्याख्यायत इत्यत उक्तं॥प्रयोजनान्तरेति ॥ एवं च वैयर्थ्यमेव स्यादित्याशयः ॥ नन्वर्जुनशंकापरिहाराहेतुत्वान्मात्रास्पर्शानामुत्पत्तिविनाशकथनमसंगतमित्यतआह ॥ सविशेषणेहीत्यादिना ॥ अत्र सति विशेष्येबाधे इति पूर्णायम् ॥ अन्यथा स्वाचारादिमान्ब्राह्मणो भोजयितव्यो न हंतव्यश्चेत्यादावतिप्रसंगादिति ध्येयम् ॥ लोहितोष्णीषाऋत्विजः प्रचरंति न जीर्णमलवद्वासाः स्नातकःस्यात् ॥ स्वर्गी ध्वस्त इत्याद्युदाहरणम् ननु प्रकृते मात्रास्पर्शेषु आगमापायित्वस्यसिद्धत्वेन कथं विशेष्यबाधइतिचेत् ॥ उच्यतेप्राप्तबाधोऽप्राप्तबाधः प्रत्याम्नायाद्वाधो वैयर्थ्याच्चेति ॥ तत्राद्यो यथा ॥ घटो नास्तीति ॥ द्वितीयो यथा शशविषाणंनास्तीति ॥ तृतीयो यथा ॥ शरैःकुशानामाभिचारिके कर्मणिप्रत्याम्नायात् ॥ चतुर्थोयथा ॥ कृष्णोऽलचरावववातस्य ॥ तत्र तुषीभावस्यासंभवेनावहननस्य वैयर्थ्यादिति

विषयेंद्रियसन्निकर्षाएवज्ञानस्यसुखदुःखयोश्चकारणंकुतोनस्युः येनाभिमानोऽधिकः कारणसामग्र्यांनिवेश्यतइति शंकापूर्वकमुत्तरपादं व्याचष्टे॥ कुत इति ॥ ननुकथमिदंलभ्यते ॥ यतइत्यध्याहारादितिभ्रमः प्रयोजनांतराभावाद्धेत्वर्थगर्भत्वेनवा ॥ सविशेषणेहिविधिनिषेधौविशेषणमुप

कुतः ॥ आगमापायित्वात् ॥ यद्यात्मनः स्वतः स्युःसुप्तावपिस्युः ॥

संक्रामतइतिन्यायात् शीतोष्णसुखदुःखदत्वविशिष्टानांमात्रास्पर्शानामिदं विशेषणंभवच्छीतोष्णसुखदुःखदत्वमुपसंक्रामति॥ मात्रास्पर्शानां शीतोष्णसुखदुःखदत्वं यत्तस्यागमापायित्वादित्यर्थः ॥ अनेनकथमुक्तशंकापरिहारइत्यतोऽतिप्रसंगमुखेनव्याचष्टे॥ यदीति ॥ मात्रास्पर्शायदि स्वतःस्वयमेवाभिमानमनपेक्ष्यात्मनः शीतोष्णसुखदुःखदाःस्युः ॥ तर्हिसुप्तावपिस्युः ॥ ॥ ॥ ॥

॥ कृ० ॥ अत्रयद्यपिविषयाभिमान एव वक्तव्यः ॥ तस्य रागादिरूपत्वेन सुखादिप्रयोजकतायाः सर्वसंमतत्वात ॥ तथापि देहाद्यभिमानस्तावद्विषयाभिमानहेतुः ॥ इंद्रियाद्यभिमानाद्विषयादिसंग इति तृतीयेवक्ष्यमाणत्वात् ॥ एवमात्माभिमानोपि तद्धेतुः स्वातंत्र्यादिकमविद्यमानमेवोपदर्श्य रागाद्युत्पादनद्वारा ईश्वरो दुःखमनुभावयतीति सुधोक्तेः ॥ अतउक्ताभिमानस्य विषयाभिमानद्वारा दुःखादिप्रयोजकत्वाद्ग्रहणमिति मंतव्यम॥ नन्वध्याहारो नामाश्रुतशब्दकल्पनम ॥ तथा च धर्मिकल्पनागौरवमित्यतो लक्षणामाश्रित्याह ॥ प्रयोजनांतरेति ॥ इदं चाविशेषणमेवास्तुकिंहेत्वर्थगर्भत्वेनेति शंकानिरासार्थमुक्तम ॥ हेत्वर्थगर्भत्वेनेति ॥ आगमापायित्वादिति यद्धेतुवाक्यं तस्वयोर्थोविशेषणविशेष्यभावापन्नागमापायित्वज्ञापकहेतुत्वरूपस्तद्गर्भत्वेनलक्षणयातत्प्रतिपादकत्वेनेत्यर्थः ॥ ननुविषयेंद्रियसंबंधाआगमापायिन इत्ययुक्तम ॥ स्पर्शत्वगिंद्रियसंबंधस्य सदासत्त्वादित्यतआह ॥ सविशेषणइति॥ ॥

१ गीतायामागमापायिनइत्यस्येतिशेषः २ गुंजाइतिप्रसिद्धस्यनामैतत्

श्री० ॥मीमांसकसमंतत्वात् प्रकृतेपि मात्रास्पर्शोन्नागमापायित्वस्य सिद्धत्वेन तत्कथनस्यवैयर्थ्याद्दाभ इति ॥यथोक्तमन्यथानुमितौ चेत्यत्रिकरणीयमुक्ताटिप्पण्यामस्मद्गुरुचरणैः ॥निरवयव
स्यांगीकारविषयविशेषणत्वं वैयर्थ्यप्रसंगेनबाधितमितिभातीतिभावइति ॥ कारणसामग्रीति ॥ कारणसाकल्यरूपविशिष्टार्थपरः सामग्रीशब्दः कारणरूपविशेषणांशस्यासमवधानाद्विशेष्यभूत
साकल्यमात्रपरः तथा च कारणसाकल्यमित्यर्थः ॥ विशिष्टपराणांशब्दानांविशेषणांशस्यासमवधाने विशेष्यपरतायाःसकलचर्मोरुतपुर्गकेलिग्याःहो हृष्टत्वादितिध्येयम् ॥ तथाचसुतौ अभिमान
रहितमात्रास्पर्शरूपकारणसाकल्यस्यसत्त्वात्कार्यंदुःखादिस्यादेवेतिभावः ॥ स्पर्शत्वगिंद्रियेति ॥ भूम्यांकशिप्वादौहि शयनं कृतवतस्तत्र निर्गतिदृष्टामिति भावः॥ अतएवेति॥ स्पर्शत्वगिं
द्रियसंबंधस्यावर्जनीयत्वादेवेत्यर्थः ॥ गीतायांविषयसामान्यग्रहणे कार्येनद्विहायशब्दोनोष्णादिरूपविषयविशेषग्रहणं कृतं तद्विषयेंद्रियसन्निकर्षस्यसुप्तौसद्भावं सूचयितुमेवेति भावः ॥ न
न्विंद्रियमनःसन्निकर्षस्यज्ञानद्वारासुखादिहेतोः सुप्तावभावात् ज्ञानाद्यभावोऽस्त्वितिमनेनेत्यत आह ॥ एतेनेति त्वगिंद्रियमनःसन्निकर्षसत्त्वेनेत्यर्थः ॥ नन्वात्ममनःसन्निकर्षाभावात् ॥ सुप्तौज्ञाना
द्यभावइत्यत आह ॥ नचेति ॥ वक्ष्यमाणत्वादिति ॥ अष्टमाध्यायेमनोहृदिनिरुध्यचेत्यस्यव्याख्यानसमयेयत्रप्राणोमनस्तत्रतत्रजीवः परस्त्वेतिप्रमाणेनवक्ष्यमाणत्वादित्यर्थः ॥ ॥

नहिकारणसामग्री कार्यं व्यभिचरतीत्यर्थः ॥ नच वाच्यं सुप्तौविषयेंद्रियसंबंधाएवन संतीति ॥ स्पर्शत्वगिंद्रियसंबंधस्यावर्जनीयत्वात्॥अतएव
शीतोष्णग्रहणंकृतम्॥ एतेनेंद्रियमनःसन्निकर्षाभावोपि प्रत्युक्तः॥नचात्मनःसन्निकर्षाभावः ॥मनसःकदाप्यात्मवियोगाभावस्य वक्ष्यमाणत्वात्

॥ कृ० ॥ एतेनेति ॥ त्वगिंद्रियसंबंधस्यावर्जनीयत्वेनेत्यर्थः ॥ त्वगिंद्रियंतावत्सर्वशरीरव्यापिमनश्चशरीरएवास्ति ॥ अतस्तयोःसंबंधोऽवर्जनीयइतिभावः ॥ ननुत्वचोनशरीरव्यापित्वम् ॥
अणवश्चेत्यत्रेंद्रियाणुत्वोक्तेरिति चेन्न ॥ तत्रैव तेजसाव्याप्तिरप्युक्तत्वात् ॥ आत्मवियोगाभावस्येति ॥ ननुहृदिह्येषआत्मेति श्रुतेरात्मा हृदयस्थःमनसस्तुतावाएताः शीर्षन्निःश्रयः श्रिताश्च
क्षुःश्रोत्रंमनोवाक्प्राणइत्यत्राशिरस्थत्वमुक्तम् ॥ तत्कथमात्ममनसोरवियोगइतिचेन्न ॥ मनसोऽपिहृदयस्थत्वात्॥यथोक्तमृग्भाष्यटीकायां हृदये मनसःप्रादुर्भावेणवृत्तिरितिश्रुतौच चंद्रमामनोभू
त्वाहृदयंप्राविशदित्युक्तम् ॥ तस्यचमनसोरश्मिविशेषेणात्मदक्षिणाक्षिसन्निहितत्वाच्छिरस्थत्वंश्रुतिरप्युपपद्यते ॥ एतेनकंठस्थानागमो यदत्युक्तः ॥ कंठस्थस्यतैजसस्यमनस्यंतस्तुतैजसइतिश्रु
तिविरोधपरिहारायमंदिरे मणिमालेतिवत्कंठेमनस्तत्वतैजसइत्येवंकंठस्थितमनस्त्वंकल्पनीयम् ॥ ततश्च मनसोहृदयस्थत्वेउक्तश्रुतार्थापत्तिविरोधइत्यपास्तम् ॥ स्वप्नकालेमनसः कंठसन्निधान
विशेषांगीकारात् ॥ वक्ष्यमाणत्वादिति ॥ अष्टममनो हृदिनिरुध्यचेति वाक्यव्याख्यानावसरेयत्रप्राणोमनस्तत्रतत्रजीवः परस्त्वेतिवक्ष्यमाणत्वादित्यर्थः ॥नन्वेवं समश्चाभिमानोमनसीत्येत
द्भाष्यीयटीकाविरोधः ॥ एवंतर्ह्यात्मापिज्ञातानस्यादितिचेन्न ॥ तद्ग्रंथस्यपरमतानुवादत्वात् ॥ अत्रोक्तस्यत्वयत्रप्राणइतिप्रमाणसिद्धत्वेनस्वमतत्वात् ॥ ॥ ॥

॥ श्री० ॥ अभिमानवतोरभिमानापादकयोः ॥ नेतर ॥ तइत्यनूद्यतथाविधाइतिव्याख्यानंवा ॥ तथाविधाः ॥ अभिमानसहिताः ॥ शीतोष्णेति ॥ ज्ञानद्वारेतिशेषः ॥ तृणाद्यभिमाना भावेपिइंद्रियसन्निकर्षमात्रेणज्ञानोदयदर्शनाद्व्यभिचार इति नाभिमानस्यज्ञाननिमित्तत्वमितिशंकते ॥ नन्विति ॥ सुखेति॥तृणादिज्ञानं न तादृगितिभावः ॥ उपप्लवइति ॥ ज्ञानद्वारा दिपीडाहेतुरित्यर्थः ॥ ननुसंबंधाभावेपिविक्रियाहेतवःकथं स्युरित्यतआह॥तथाचेति ॥ ननुअभिमानस्यापिदुःखाद्याकारेण परिणामरूपाविक्रियाहेतुत्वंकुतइत्यतआह ॥ प्रसिद्धंचेति ॥ स्वाभिमतगृहेति ॥ स्वकीयाभिमानविषयगृहइत्यर्थः ॥ दुःखीकरोतीति ॥ ॥ ॥

अतिप्रसंगस्य विपर्यये पर्यवसानं वदन्साक्षादर्थं दर्शयति ॥ अत इति ॥ अतो मात्रास्पर्शा नात्मनःस्वतःस्वयमेव केवलाःशीतोष्णसुखदुःखदा भवंतीति संबंधः ॥ अत इत्युक्तस्य विवरणं यतस्तन्निमित्ताएवेति ॥ तदित्यभिमानपरामर्शः ॥ तेन निमित्तेन सहिता एव शीतोष्णसुखदुःखदा यत इत्यर्थः ॥ तत्कृत इत्यत उक्तम् ॥ मात्रेति ॥ मात्रास्पर्शा जाग्रत्स्वप्नयोरभिमानवतोरेव ते तथाविधाःशीतोष्णसुखदुःखदाः

अतोयतोमात्रास्पर्शाजाग्रदादावेवतेसंति नान्यदेतितदन्वयव्यतिरेकित्वात्तन्निमित्ताएवनात्मनःस्वतः॥आत्मनश्चैते

संतिसंभवंति ॥ नान्यदा अभिमानरहिते सुप्त्यादाविति मात्रास्पर्शानां शीतोष्णसुखदुःखदत्वस्याभिमानान्वयव्यतिरेकानुविधायित्वादित्यर्थः न चाभिमानहीनेऽपि ज्ञानोत्पत्तिस्तृणादौ दृश्यते ॥ सत्यं ॥ सुखदुःखहेतुभूतज्ञानमत्राधिकृतमित्यदोष इति ॥ इतश्चाभिमान एवात्मन उपप्लव इत्याह आत्मनश्चेति ॥ अत्र तैरितिज्ञानसुखदुःखपरामर्शः ॥ आत्मनो ज्ञानादिभिः संबंधोनास्ति ॥ तेषां मनोवृत्तित्वात् ॥ तथा चान्यगतधर्माः कथमन्यस्यविक्रियाहेतवो विनाभिमानात् ॥ प्रसिद्धं च स्वाभिमतगृहदाहे देवदत्तं दुःखीकरोतीति॥ ॥

॥ कृ० ॥ सुप्त्यादाविति ॥ नन्वभिमानाभावेसुप्त्यादौ सुखादिहेतुविषयानुभवो माभूत् उदासीनतृणादिज्ञानाभावस्तुकुतः ॥ नहितत्राप्यभिमानोहेतुःसुखदुःखहेतुभूतं ज्ञानमत्राधिकृतमित्यग्रिमटीकाविरोधादितिचेत् ॥ अत्रब्रूमः ॥ अनेकविधोऽभिमानः ॥ विषयाभिमानःशरीरेंद्रियाद्यभिमानः आत्माभिमानश्चेति ॥ तथैवपूर्वग्रंथोक्तेः॥ सर्वोप्ययमभिमानः सुखादिजनकज्ञानहेतुः अन्वयव्यतिरेकाभ्यां तथैवावधृतेः ॥ पूर्वोत्तरग्रंथस्वारस्याच्च ज्ञानमात्रेतु विषयाभिमानं विनाऽन्योहेतुः ॥ अभिमानहीनेऽपितृणादावित्यग्रिमग्रंथे विषयाभिमानमात्रस्य त्याजितत्वात् ॥ अभिमानमात्राभावविवक्षायां त्वभिमानाभावेपि तृणादावित्यवक्ष्यत ततश्च सुप्तौमानरूपभावात्तृणाद्यज्ञानं ॥ युक्तमिति ॥ अव्यवहितोक्तमात्रास्पर्शपरामर्शैतैः महात्मनोविषयविषयिभावायोगइत्यतआह ॥ अत्रतैरितीति ॥ दुःखीकरोतीति ॥ ॥ ॥

१ दुःखीकरोतीतिपाठेच्विप्रत्यय आरोपणेवतिमतं अत्रतु आरोपोनास्तीतिसंनादनः

॥ श्री० ॥ अभूततद्भावेकृभ्वस्तियोगेसंपद्यकर्तरिच्विः ॥ संपद्यतेर्धात्वर्थे कर्तरिवर्तमानात्शब्दात् च्विप्रत्ययो भवति ॥ कृभ्वस्तिभिर्योगे ॥ कृभ्वस्तीनां योगे अन्यथा भूतस्य तथा भावे गम्ये॥ अस्य च्वौ अवर्णस्य ईत्स्यात्च्वौ परे ऽव्ययत्वं च ॥ अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति ॥ अब्रह्म ब्रह्म संपद्यते तद् ब्रह्मी भवति ॥ अगंगा गंगा संपद्यते सा गंगी स्यादित्युदाहरणं ॥ एवं प्रकृतेपि दुःखशब्दात् च्विप्रत्ययं तस्य सर्वस्य लोपः च्वौ परे अकारस्य ईत्वं च अव्ययत्वाद् दुःखी भवति ॥ तथा च दुःखं संपद्यते तं करोतीति दुःखीकरोतीत्यर्थः ॥ गृहदाहो देवदत्तं दुःखाकरोतीत्यपि पाठः साधीयानेव ॥ दुःखात्प्रातिलोम्ये प्रातिलोम्यं चित्तपीडा ॥ दुःखशब्दात्प्रातिलोम्ये विवक्षिते डाच् प्रत्ययो भवति ॥ दुःखाकरोति ॥ स्वामिनं भृत्यः तच्चित्तं पीडयतीत्यर्थः ॥ एवं गृहदाहो देवदत्तं दुःखाकरोति तच्चित्तं पीडयतीत्यर्थः ॥ दुःखशब्दात्प्रातिलोम्ये विवक्षिते डाचि टेरकारस्य लोपे आकारमात्रं शिष्यते दुःखआ दुःखेति रूपम् ततश्च दुःखाकरोतीति युक्तमिति ध्येयम् ॥ अनुभव आत्मन इति ॥ षष्ठ्यर्थस्य संबंधस्य ... ॥ इत्यादीत्यादिपदेन आत्मनः सुखदुःखे आत्मनो दुःखादिरित्यस्य ग्रहणम् ॥ नन्वात्मनो विषयत्वात्कथं विषयित्वमित्यत आह ॥ साक्षीति ॥ चेतनस्य ज्ञानघनो भावश्चैतन्यं ... ॥ नाद्विषयत्वादिति ॥ ज्ञानादिविषयकत्वाद्विषयित्वं युक्तमिति भावः ॥

ज्ञानादिभिरात्मनः संबंधाभावे कथमुक्तं शीतोष्णाद्यनुभव आत्मन इत्यादीत्यत उक्तं ॥ विषयेति ॥ मनोवृत्तिरूपाणि ज्ञानादीनि विषयभूतानि॥ आत्मा च विषयी साक्षिचैतन्यस्य तद्विषयत्वात् ॥ एतमेव संबंधमभिप्रेत्यात्मनो ज्ञानमित्यादिव्यवहारः ॥ उपलक्षणं चैतत् ॥ ईश्वराधीनं स्वा

विषयविषयीभावादन्यः संबंधो नास्ति ॥

मित्वमपि ग्राह्यं तादात्म्यसमवायिनिरासे तात्पर्यात् ॥ ॥ ॥ ॥ ॥ ॥

एतमेवेति ॥ विषयविषयीभावमेवेत्यर्थः ॥ नन्वेवं तर्हि अन्य संबंधो नास्तीत्ययुक्तं ॥ अभिमानद्वारक विषयीभावसंबंधान्यस्य स्वस्वामिकभावसंबंधस्य सत्त्वादित्यत आह ॥ तादात्म्येति ॥ अयं भावः ॥ अत्र ह्यात्मनोऽभिमानव्यतिरिक्तो ज्ञानसुखदुःखादिरूपविकारकारणीभूतः संबंधो निराक्रियते तत्र तार्किकरीत्या ज्ञानादीनामात्मधर्मत्वात्तेषां चात्मना समवायसंबंधांगीकारात्तस्यैव विकारहेतुत्वमस्तु किमभिमानद्वारकसंबंधेनेति शंकायां तन्मते समवायाभावेन तस्य विकारहेतुता नास्तीति समवायनिराकरणे तात्पर्यम् ॥ मीमांसकरीत्या ज्ञानादीनामात्माभिन्नत्वेन तादात्म्यरूपसंबद्धस्यैवात्मनो ज्ञानादिविकारहेतुत्वमस्तु किमभिमानेनेति शंकायां चेतनस्यात्मनो दुःखाद्यचेतनाकारणपरिणामासंभवेन तस्य विक्रियाहेतुत्वमिति तादात्म्यनिरासे तात्पर्यं न तु स्वामित्वनिरास इति न दोषः ॥ तथा च विषयविषयीसंबंधादन्य इत्यत्र तादात्म्यसमवायाविवक्षितौ ... ॥ कृ० ॥ पीडयतीत्यर्थः ॥ दुःखात्प्रातिलोम्य इति दुःखशब्दात्पीडायां कृञो योगे डाच्प्रत्ययविधानादिति भावः ॥ कथं तर्ह्यन्यसंबंधो नास्तीत्युक्तमित्यत आह ॥ तादात्म्येति ॥ आत्मनो मनोवृत्तिज्ञानादिभिस्तादात्म्यसंबंधश्चेतनाचेतनयोस्तदयोगात् ॥ नापि समवायः अप्रामाणिकत्वादित्येवं तादात्म्यसमवायनिरास इत्यर्थः ॥

१ अर्शआद्यजन्तः दुःखवानित्यर्थः अतः पुंस्त्वमुपपद्यते गुणान्तरत्वान्नपुंसकतया ... २ प्रकृतेन्यसंबंधे प्रकारोभाव इत्युक्तेः ३ तानि ज्ञानादीनि विषया यस्येति बहुव्रीहिः

॥ श्री० ॥ मात्रास्पर्शानामिति ॥ तस्यमात्रास्पर्शानांशीतोष्णसुखदुःखदत्वस्यासंभवात्प्रवाहरूपेणनित्यत्वासंभवादित्यर्थः ॥ मात्रास्पर्शानांशीतोष्णसुखदुःखदत्वंनप्रवाहतोनित्यंतथात्वेमात्रास्पर्शानांशीतोष्णादिदत्वप्रसंगात् ॥ ओमितिचेन्न ॥ सुप्त्यादावभावादिति भावः ॥ प्रकृतेति ॥ ज्ञानादिकारणसामग्र्यांमात्रास्पर्शरूपायांअभिमानस्य निवेशनरूपंयत्प्रकृतं तदुपपादकत्वं नास्तिमात्रास्पर्शानांशीतोष्णसुखदुःखदत्वप्रवाहानित्यत्वस्येत्यर्थः ॥ शीतोष्णसुखदुःखदत्वस्यप्रवाहतोनित्यत्वेऽपिअभिमानरहितानामेवमात्रास्पर्शानामनुभवद्वारासुखादिदत्वसंभवेनाप्रयोजकत्वादितिभावः ॥ सुप्त्यादाविति ॥ सुप्त्यादौमात्रास्पर्शानांशीतोष्णसुखदुःखदत्वाभावेनमात्रास्पर्शानांसुखदुःखदत्वस्यस्वरूपतोऽनित्यत्वसंभवादिति भावः ॥ उक्तरीत्येति ॥मात्रास्पर्शानांसुखदुःखदत्वस्यनित्यत्वे तुकेवलानांविषयेंद्रियसंबंधानांसुखदुःखदत्वेतेषांसुप्त्यादावपिसत्त्वेनसुखदुःखदत्वाभावेनव्यभिचारापत्त्याऽभिमानसहितानामेव तेषांसुखादिदत्वमित्येवमभिमानस्यकारणसामग्र्यांप्रवेशनरूपप्रकृतोपयोगादित्यर्थः॥ननुकेवलानामेवमात्रास्पर्शानांसुखदुःखदत्वेप्रलयादावपितेषांसत्त्वेपिसुखदुःखदत्वाभावेन व्यभिचारापत्त्यातावन्मात्रस्य कारणत्वासंभवादभिमानसहितानामेवकारणत्वमित्युक्तंतदयुक्तम्॥प्रलयेदेहाद्यभावेन मात्रास्पर्शानामसत्त्वेनैवसुखाद्यभावस्यासंभवेन सुखाद्यभावस्याभिमानप्रयुक्ताभावात्इत्यतः प्रलयपदंव्याख्याति॥प्रलयोमूर्छेति ॥

नन्वभिमानसहितानामेव मात्रास्पर्शानां ज्ञानादिहेतुत्वं न केवलानामित्युपपादितमेतत् ॥ ततो नित्या इति व्यर्थमिति चेन्न ॥ आगमापायित्वस्यैवानेन व्याख्यानात् ॥ व्याख्यानेपि किंप्रयोजनमित्यतआह ॥ नचेति॥आगमापायिशब्दोह्ययोःप्रयुज्यते ॥ यत्प्रवाहरूपेण नित्यं व्यक्तिरूपेणानित्यं यथागंगोदकं ॥ तदेकमागमापायीत्युच्यते ॥ यस्य तु प्रवाहोपिछिद्यते ॥ यथाकिंशुककुसुमानां तदपरमिति

नचागमापायित्वेपिप्रवाहरूपेणापिनित्यत्वमस्ति ॥ सुप्तिप्रलयादावभावादित्याह ॥

तत्रागमापायिशब्दादुभयप्रतीतौ आगमापायित्वेप्यागमापायिशब्दार्थेपि यत्प्रवाहरूपेण नित्यत्वं तदत्रविवक्षितंनास्तिनभवति॥मात्रास्पर्शानां शीतोष्णसुखदुःखदत्वेसंभवात्॥प्रकृतानुपयोगाच्च॥किंतु द्वितीयमेव॥सुप्त्यादावभावेन संभवादुक्तरीत्या प्रकृतोपयोगाच्चइत्येतदनित्याइत्यनेनाह भगवानित्यर्थः॥प्रलयोमूर्छा॥आदिपदेनासंप्रज्ञातसमाधेर्ग्रहणम् ॥ ॥तथाचमूर्छाकाले मात्रास्पर्शसत्त्वेपि तत्कार्यसुखाद्यभावेनतस्याभिमानप्रयुक्तत्वंसंभवतीत्याशयः ॥

॥ कु० ॥ तदसंभवादिति सुप्त्यादौशीतोष्णसुखदुःखदत्वप्रवाहविच्छेदादितिभावः ॥ प्रकृतेति ॥ सुप्तौव्यभिचारात्केवलानां मात्रास्पर्शानांशीतोष्णादिप्रदत्वं नास्तिकित्वभिमानसहितानामेवेति यत्प्रकृतं तदनुपयोगादित्यर्थः ॥मात्रास्पर्शानांशीतोष्णादिप्रदत्वस्य प्रवाहरूपेणनित्यत्वेसुप्तौव्यभिचारोक्त्ययोगात् ॥ अभिमानव्यतिरेकेज्ञानादिव्यतिरेकइति व्यतिरेकलाभाच्चेतिभावः ॥ उक्तरीत्येति ॥ जाग्रदादावेवतेसंतीत्याद्युक्तरीत्येत्यर्थः ॥ ननुकेवलानांमात्रास्पर्शानांज्ञानादिहेतुत्वं नसंभवतिप्रलयेव्यभिचारादित्ययुक्तं ॥ महाप्रलये मात्रास्पर्शानामेवाभावादित्यतो ॥ ३७ ॥
व्याचष्टे ॥ प्रलयोमूर्छेति ॥ असंप्रज्ञातसमाधेरितिबाह्यार्थानुसंधानंयत्रनास्तिसोऽसंप्रज्ञातसमाधिरिति योगशास्त्रेप्रसिद्धिः ॥ ॥ ॥

॥ श्री० ॥ आगमापायिशब्दस्यानेकार्थत्वात्तत्पदानिवर्त्यशंकानिरासायअनित्याइत्युक्तमित्युक्तम ॥ तदयुक्तम ॥ अनित्यशब्दस्यापि आगमापायिशब्दोक्तयोः प्रयुज्यतेइत्युक्तरीत्यायत्प्रवाहरूपेण नित्यंव्यक्तिरूपेणानित्यं तदेकमनित्यंयस्यप्रवाहोपिविच्छिद्यतेतदपरमनित्यमितिसंभवेनव्याख्यानेपि किं प्रयोजनमित्युक्तशंकाया अनिवारणादिति भावेन शंकते ॥ नन्विति ॥ पुनः प्रयत्नादीति ॥ सिद्धे सत्यारंभो नियमार्थइतिन्यायान व्यर्थं सत्किंचिज्ज्ञापयतीतिन्यायाद्वेत्यर्थः ॥ यद्यप्यागमापायिपदेन न चागमापायित्वेपि प्रवाहरूपेणेत्युक्तप्रयोजनस्यानित्यपदेनाप्यलाभात ॥ व्यर्थमेवानित्यपदं तथापि प्रयुक्तं तेन ज्ञायते न चेत्युक्ताभिप्रायेण आगमापायिपदव्याख्यानरूपमेवानित्यपदमिति ॥ एतदपीति ॥ न केवलमागमापायित्वंकित्वेतदनित्यत्वमपि मात्रास्पर्शानां यच्छीतोष्णसुखदुःखदत्वरूपं विशेषणं तदुपसंक्रामतीत्यर्थः ॥ नन्वेवं सति आगमापायिशब्दःसुप्त्यादौ प्रवाहविच्छेदादिपरत्वेन गीतायामेवानित्या इति पदे न व्याख्यातो भाष्यकारैरतो यत इत्यादिना पूर्वमेव कस्माद्व्याख्यात इत्यत आह ॥ आगामीति ॥ गीतायामनित्या इति पदेन करिष्यमाणेत्यर्थः भ्रमएवेति ॥ ॥

नन्वनित्यपदमनेकार्थमेव ॥ सत्यम् ॥ तथापि पुनः प्रयत्नाद्यालोचनादेतत्सिद्धिः ॥ एतदपिविशेषणोपसंक्रांतं विशेषणम् ॥ आगामिव्या

॥ अनित्याइति॥अतआत्मनोदेहाद्यात्मभ्रमएवदुःखकारणं॥

ख्यानमपेक्ष्य भाष्यकृतायमर्थःप्रागुपन्यस्त इतिज्ञेयम् ॥ उक्तमर्थंपिंडीकृत्योपसंहरति ॥ अतइति ॥ उक्तप्रकारेण देहादावात्मनो ममेत इत्यादिभ्रम एवभ्रमसहिता एव मात्रास्पर्शा इत्यर्थः॥ ॥ ॥ ॥

॥ क० ॥ अनेकार्थमेवेति ॥ गंगोदकेकिंशुककुसुमेचानित्यपदप्रयोगादितिभावः ॥ पुनःप्रयत्नादीति ॥ आदिपदेनानित्यपदावयवार्थपरिग्रहः ॥ अयमर्थः ॥ आगमापायिशब्देनानित्यत्वे सिद्धेपिपुनरनित्यपदप्रयोगोनित्येमवनंकेनापि रूपेणनित्यमितिनियमेनानित्यत्वंबोधयति ॥ सिद्धेसत्यारंभोनियमार्थइतिन्यायात ॥ तथाचसर्वप्रकारेणानित्यत्वसिद्धिः ॥ एवमनित्यपदावयवार्थपर्यालोचनाच्चैतत्सिद्धिः ॥ तथाहि ॥ नित्यपदंध्रुवार्थं ॥ त्यब्नेर्ध्रुवइतिवार्तिकात ॥ ततोऽनित्यपदंध्रुवभिन्नार्थंकंनचकेनचिद्रूपेणध्रुवत्वे तद्भिन्नत्वंयुक्तंविरोधात ॥ ततःसर्वप्रकारेणानित्यसिद्धिरिति ॥ अथवादिपदेनप्रकृतोपयोगोग्राह्यः ॥ तथाचप्रकृतोपयोगपर्यालोचनयाचविवक्षितार्थसिद्धिरितिव्याख्येयं ॥ उपपत्त्यनुसंधानं विनानोक्तार्थलाभइत्यालोचनादित्युक्तं ॥ नन्वेवमानित्यशब्दस्यप्रवाहविच्छेदादिपरत्वेअतोयतइत्यादिभाष्येण सुप्त्यादौप्रवाहविच्छेदादिपरत्वेनागमापायिशब्दः कथंव्याख्यायतइत्यतआह ॥ आगामीति ॥ अनित्यपदेनकरिष्यमाणमागमापायिशब्दव्याख्यानमित्यर्थः ॥ उक्तप्रकारेणदेहादाविति ॥ आदिपदेनेंद्रियांतःकरणयोर्विषयाणांचग्रहः इत्यादीत्यादिपदेन शोभनत्वादिग्रहणं ॥ तत्रदेहेंद्रियांतःकरणेषुआत्मनो ममैतदितिभ्रमःविषयेषु शोभनत्वादिभ्रमइतिविवेकः ॥ ननु भ्रमएवयदिसुखादिकारणंतदाभिमानसहिता एवमात्रास्पर्शाःसुखादिहेतवइतिगतः पक्षइत्यतआह ॥ भ्रमसहिताएवेति ॥

॥ श्री० ॥ विषयेषुशोभनत्वभ्रमनिमित्तकः स्नेहरूपः अस्त्वादिभ्रमनिमित्तद्वेषरूपश्च योऽभिमानः स एवात्र भ्रमशब्देन गृह्यते ॥ निमित्तेन नैमित्तिकोपलक्षणात ॥ अन्यथाऽभिमानमाहित्यस्यैव पूर्वमुक्तत्वेनात्र भ्रममाहित्योक्तौ तद्विरोधापत्तेरितिध्येयम ॥ प्राक्शंकितमिति ॥ तथापितद्दर्शनाभावादिनेत्यनेनेचर्थः ॥ नन्वभिमानाविमुक्तस्य मात्रास्पर्शमात्रेणैव बंधुमरणादिदुःखंकस्मान्न स्यादित्यतआह ॥ नहीति ॥ दुःखादीनामभिमानसहितमात्रास्पर्शरूपसामग्रीकार्यत्वादभिमानरहितमात्रास्पर्शरूपसामग्र्येकदेशमात्रेणेत्यनुपपत्तेः ॥ दंडमात्रेण घटोत्पत्त्यदर्शनादित्यर्थः ॥ युक्तमिति ॥ कारणानामेव विफलीकरणमुचितं ननु कार्याणामतः कारणीभूतमात्रास्पर्शानामेव विफलीकरणे वक्तव्ये तत्कार्याणां शीतोष्णाद्यनुभवसुखादीनां तत्कथनमयुक्तमितिभावः ॥ शीतोष्णादिहेतूनाम ॥ तदनुभवहेतूनां शीतोष्णादीनीतिशब्देनेत्यर्थः ॥ लक्षणाबीजसंबंधोपपादनाय शीतोष्णादिहेतूनामित्युक्तमिति द्रष्टव्यम॥ १४ ॥कुलेति॥युद्धमिति शेषः

ततःकिमित्यतश्चतुर्थपदं व्याख्यातुमुपोद्घातमाह॥अतइति॥तद्विमुक्तस्यभ्रमविमुक्तस्य बंधुमरणादिदुखं यत्प्राक् शंकितं न हि सामग्रीकार्यमेकदेशेन भवतीति भावः॥ततःकिमित्यतश्चतुर्थपादं व्याख्याति अतइति॥तितिक्षस्वविफलीकुर्विति भावः॥ननु तानितिमात्रास्पर्शानां परामर्शो युक्तः ॥ तत्कथं शीतोष्णदीनित्युक्तम ॥ नैवम ॥ शीतोष्णहेतुनां मात्रास्पर्शानामेव तच्छब्देनोपलक्षणात् ॥ १४ ॥ अतोमात्रास्पर्शानांविफली

अतस्तद्विमुक्तस्यबंधुमरणादौदुःखंनभवति ॥ अतोभिमानंपरित्यज्यतान्शीतोष्णादींस्तितिक्षस्व ॥ १४ ॥ अ

यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ ॥ समदुःखसुखंधीरंसोऽमृतत्वायकल्पते ॥ १५ ॥

तःप्रयोजनमाह ॥ यंहीति ॥ ॥ ॥ करणतोभवत्प्रयोजनमाह

॥ अत इति ॥ दुःखाभावस्य युद्धाकरणेनैव संभवात्किंतत्कृत्वा प्रसक्तदुःखाभावायाभिमानत्यागेनेत्येतदाशंकापरिहारायेतिशेषः ॥ पूर्वश्लोके तितिक्षस्वेतिपदं सहस्वेति केश्चिद्व्याख्यानम ॥ तदसत् ॥ तदनुवादेविफलीकणस्यैवप्रतीतेरितिभावेनाद्यपादंव्याख्याति॥यमिति॥

॥ छ० ॥ प्रागिति ॥ तथापितद्दर्शनाभावादिनेत्यत्रेत्यर्थः ॥ शक्यसंबंधप्रदर्शनायोक्तं ॥ शीतोष्णादिहेतनामिति ॥ तदनुभवद्वारासुखादिहेतूनामित्यर्थः ॥ तच्छब्देनेति ॥ शीतोष्णादीनीतिशब्देनेत्यर्थः ॥ प्रयोजनमाहेति ॥ इतः परमतइतीतिक्वचित्पाठः ॥ तत्रप्रयोजनमाहेत्यस्यानंतरमित्याहेति शेषः ॥ किंतत्कृत्वेति ॥ प्रक्षालनाद्धिपंकस्यदूरादस्पर्शनंवरमितिन्यायादितिभावः ॥ सहस्वेनीति ॥ तितिक्षाशब्दस्यक्षमायांवृत्तिः क्षमार्थोतिनिर्गुप्तिनृकिद्वयः सन्निनिस्वार्थमन्युकार्यलाभादितिभावः ॥

॥श्री॥नचालयंतीति ॥ व्यथभयमंचलनयोरिति धातुव्याख्यानादिति भाव.॥ननु पूर्वश्लोके न तितिक्षस्वेत्यनेन चलनाभावस्यानुक्तत्वात्कथमस्य तदनुवादरूपत्वमित्यतस्तत्तात्पर्यमाह ॥
॥ नशीतोष्णेति ॥ तथाचशीतोष्णसुखदुःखलक्षणरहितानाम ॥ अमृतत्वश्रवणादिति ॥ अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयीच कात्यायनीचेत्यारभ्य सा होवाच मै
त्रेयी येनाहं नामृतास्यांकिमहं तेन कुर्यां यदेव भगवानेवदनदेव मे ब्रूहीत्यादिना बृहदारण्यके श्रवणादित्यर्थः ननु मुक्तानामपि शरीरसंबंधित्वेन मात्रास्पर्शकृतव्यथाभावसद्भावेनामृतत्वं
स्यादित्यत आह ॥ शरीरदर्शनवंतमिति ॥ मुक्तस्य तु शरीरसंबंधे सत्यपि तद्दर्शनं नास्तीतिभावः ॥ प्राकृतानामपीति ॥ सर्वाणामपीत्यर्थः ॥ कक्ष्याऽवस्था ॥ अत एवं पूर्वग्रंथे
त्युत्तरग्रंथः॥समदुःखसुखवतो धीरस्यैवह्यभिमानत्यागोऽन्यथा तदनुपपत्तेरित्यत्र समदुःखसुखत्वधीरत्वयोरभिमान त्यागापेक्षयापूर्वावस्थागतत्वादभिमानत्याग वतइदंविशेषणद्वयं कथं युक्त
मित्यर्थः॥तदुपायेति॥अभिमानत्यागोपायेत्यर्थ ॥पूर्वावस्थेति॥अभिमानत्यागापेक्षया पूर्वावस्था समदुःखसुखत्वादिरूपा तदनुवाद इत्यर्थःसुखदुःखयोर्विलक्षणत्वात्कथं साम्यमित्यत आह॥

न व्यथयंति न चालयंति न शीतोष्णसुखदुः खलक्षणवैषम्यवंतं कुर्वंतीत्यर्थः ॥ स्त्रीणामप्येवंविधानां मैत्रेयीप्रमुखानाममृतत्वश्रवणात्पुरुष मितिविशेषणमयुक्तमित्यतोऽन्यथाव्याचष्टे ॥ पुरीति ॥ शरीरसंबंधिनमेव संतंशरीरदर्शनवंतमित्यर्थः ॥ एतदपि किमर्थं विशेषणमित्यतआह शरीरेति ॥ सुप्त्यादौ सर्वेषां प्राकृतानामप्यभिमानाभावेन व्यथाभावादमृतत्वप्रसक्तिरित्याशंकानिवृत्त्यर्थमित्यर्थः ॥ ननु यस्यदेहादावभि

यमेतेमात्रास्पर्शानव्यथयंति॥पुरिशयमेवसंतं॥शरीरसंबंधाभावे सर्वेषा व्यथाभावात्पुरुषमिति विशेषणम्॥

मानोनास्ति तस्य दुःखं सुखं च नास्तीत्युक्तं तस्य कथं समदुःखसुखंधीरमिति विशेषणद्वयम्॥अस्य पूर्वकक्ष्यागतत्वादित्याशंक्य तदुपायप्रद र्शनार्थं पूर्वावस्थानुवादोयमिति क्रमेण पृच्छापूर्वकमाशयमाह ॥ ॥ ॥ ॥ ॥

॥कृ०॥ननुतास्तितिक्षस्वेत्यत्राभिमानत्यागे कृतमात्रास्पर्शाविषयानुभवद्वारःसुखादिहेतवोनभवंतीत्युक्तं॥अत्रतुमात्राशाद्दुःखमात्राहेतुत्वमुच्यते ॥ तत्कथमयमंतिमपादस्तदनुवादरूपइत्यतआह
॥ नचालयंतीति ॥ पर्यवसितमाह ॥ नशीतोष्णेति ॥ तथाचगीतायांभाष्येचव्यथधातुर्विषयानुभवद्वारकसुखादिवैषम्यपर इत्यनुवादत्वोपपत्तिरितिभावः ॥ अस्यपूर्वकक्ष्यागत
त्वादिति ॥ समदुःखसुखत्वस्याभिमानत्यागहेतुत्वेन तत्पूर्वभावित्वात ॥ धैर्यस्य चसमदुःखसुखत्वं प्रति पूर्वभावित्वादित्यर्थः ॥ इदं च हेत्वंतरं ॥ समदुःखसुखत्वं च न विशेषणमित्यत्र
सुखं दुःखं च नास्तीत्युक्तमित्यनेनैकस्य हेतोरुक्तत्वात ॥ न च चशब्दाभावोदोषः अहरहर्नयमानो गामश्वं पुरुषं पशुमित्यादौ तदभावेपिसमुच्चयावगमात् दुःखंयावत्तावत्सुखं यस्येत्यन्य
थाप्रतीतेर्व्याचष्टे ॥ दुःखं यथेति ॥दुःखहेतुषु सुखाभावहेतुषु चानुमतद्वेष्यतावच्छेदकत्वाभावयद्दुःखहेतुष्वित्यनुक्त्वा तद्विरोधिष्वित्युक्तं नतु सुखाविरोधित्वेनैव दुःखहेतुषु द्वेषोत्पादप्रदर्शनार्थं
दुःखस्य द्वेष्यत्वेन तद्धेतुत्वेनैव तत्र द्वेषोत्पादसंभवादितिबोध्यं ॥ १५ ॥ ॥ ॥ ॥ ॥

१ येनाविस्तादिनाहममृतानस्यांतेनाहंकिंकुर्यांततोमोक्षसाधनत्वेनभगवानूयद्वेदतदेवमब्रूहीति २ पंचध्यायेचतुर्थब्राह्मणे

॥ श्री॰ ॥ दुःखंयथेति ॥ अमृतत्वविरोधित्वादपुरुषार्थभूतं ततश्चानुपादेयमिति योज्यं ॥ तथा चानुपादेयत्वेन तयोः साम्यमितिभावः समदुःखसुखत्वस्याभिमानत्यागे हेतुत्वं दर्शयति ॥ एवं भावे चेति ॥ समदुःखसुखत्वे सतीत्यर्थः॥ उत्सेकः उच्चत्वं ॥ विषादो नीचता ॥ १५ ॥ पक्षे निक्षिप्त इति ॥ तस्य भगवदनादिनित्यतायाः असमतेरिति भावः एतदकथने दृष्टांतसंभवेन वक्ष्यमाणाक्षेपायोगादिति ज्ञेयम् ॥ आक्षेप्तुमिति ॥ किमात्मैवेत्यत्र दृष्टांताभावेन व्याप्तिग्रहासंभवेनानुमानाप्रवृत्तिरित्याक्षेप्तुमित्यर्थः ॥ ननु पूर्वमात्मनो नित्यत्वं न त्वेवाहमित्यनादित्वहेतुनाऽनुमितमेव नागमेन साधितमत उक्तमित्यनुवादः कथमित्यत आह ॥ उक्तमिति ॥ परार्थानुमानस्य वचनात्मकत्वादुक्तमित्युक्तमिति भावः अनुवादेन्यूनतां परिहरति ॥ अनादिश्चेत्यपीति ॥ आद्यइति ॥ जीवोनित्योऽनादित्वादित्यनुमान इति शेषः विदिताभिप्रायः एवं विदितपूर्वपक्षाभिप्रायः ननु द्वितीयपक्षोपादानं किमर्थम् ॥ आद्यपक्षमंगीकृत्य तत्र च घटादेर्व्यतिरेकदृष्टांतस्यसंभवेन व्याप्तिग्रहसंभवादत उक्तम॥ऋजाविति॥ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण च साधनायोगादिति भावः॥उक्ताभिप्रायेणेति॥

कथमिति ॥ येनाभिमानत्यागेन मात्रास्पर्शा नव्यथयंति स कथं केनोपायेन भवतीत्यर्थः ॥ दुःखं यथानुपादेयमपुरुषार्थत्वात् तथा वैषयिकंसुखमप्यमृतत्वविरोधित्वादनुपादेयं यस्य स समदुःखसुखः ॥एवंभावे च कथं सुखहेतुषु शोभनाध्यासलक्षणस्तद्विरोधिषु द्वेषलक्षणोभिमानःस्यादितिभावः ॥ तत्समदुःखसुखत्वमेव कथं केनोपायेन भवतीत्यर्थः ॥ धैर्येणेति ॥ सुखे दुःखे च प्राप्ते सति तत्कार्ययोरुत्सेकविषादयोस्तं

कथं न व्यथयंति ॥ समदुःखसुखत्वात्तत्कथं धैर्येण ॥ १५ ॥ नित्य आत्मेत्युक्तम् ॥ किमात्मैव नित्यआ

नासतो विद्यतेऽभावो नाभावो विद्यते सतः ॥ उभयोरपि दृष्टोंतस्त्वनयोतत्त्वदर्शिभिः ॥१६॥

होस्विदन्यदपि अन्यदपि ॥ तत्किमिति आह ॥ नासतइति ॥

भकेन प्रयत्नेनेत्यर्थः ॥ १५ ॥ न त्वेवाहमित्यत्र भगवान्कृष्णोपि यं प्रति पक्षे निक्षिप्तःस आक्षेप्तुंप्रसक्तिं दर्शयति नित्य इति ॥ उक्तमनादित्वेन हेतुनाऽनुमितम् ॥ ततः किमित्यतआह ॥ किमिति ॥ अनादिश्चेत्यपिग्राह्यम् ॥ आद्येदृष्टांताभावेनव्याप्तिग्रहासंभवः ॥ द्वितीयस्त्वप्रामाणिकत्वादशक्योपन्यासइतिपूर्वपक्ष्यभिप्रायः ॥ विदिताभिप्रायः सिद्धांतीकिमृजावन्वयेसंभवतिवक्रेणव्यतिरेकेणेतिमन्यमानोद्वितीयपक्षमुपादत्ते॥अन्यदपीति॥उक्ताभिप्रायेणपृच्छति॥तादिति॥इतिशंकायामिति शेषः॥ ॥ कृ॰ ॥ अनुमानेद्वयस्योत्तरत्रवक्ष्यमाणत्वात्पूर्वत्र चानुमानस्यैव प्रकृतत्वात्तदनुसारेणाह ॥ अनुमितमिति ॥वक्रेणव्यतिरकेणेति ॥ घटादौगृहीतया व्यतिरेकव्याप्त्येत्यर्थः ॥ सिद्धांतिव्यतिरेकव्याप्तेः साक्षादनुमित्यनंगत्वाद्वक्रेणेत्युक्तं ॥ उक्ताभिप्रायेणेति ॥

॥ श्री० ॥ असतो [illegible] ॥ दुर्गमार्थत्वा [illegible] ॥ यथा [illegible] सतो [illegible] ब्रह्मणश्च [illegible]
[illegible] ॥ असतो इति ॥ [illegible] प्रागभावोविद्यत इत्यनेनान्वयः
[illegible] ॥ [illegible] ननु कारण
[illegible] ॥ पुरुष इति ॥ [illegible] ब्रह्मशब्देनपर
मात्मा [illegible] इत्यर्थो द्रष्टव्यः ॥ ननु [illegible]
इति कथं [illegible] ॥ [illegible] प्रागभावप्रतिषेधन
व्याख्यानम्॥ अत एवेति ॥ [illegible] ॥ [illegible] ॥

दुर्गमार्थत्वात्पूर्वार्धंव्याचष्टे ॥ असत इति ॥ कारणस्य प्रकृतेः ॥ अभावः प्रागभावः प्रध्वंसश्च ॥ कृतपूर्वार्धव्याख्यानो भाष्यकारस्तावत्प्रमाणमाह प्रकृतिरिति ॥ पुरुषः परमात्मा ब्रह्मशब्दोक्तः ॥अनादित्वे [illegible] ॥ ननु असत सतश्चाभावो नविद्यतइत्येकेनैव वाक्येनद्वयोरभावप्रति

अमतः कारणस्य सतो ब्रह्मणश्चाभावोनविद्यते ॥ प्रकृतिःपुरुषश्चैवनित्यौकालश्चस
त्तमेति वचनाच्छ्रीविष्णुपुराणे ॥ पूर्वमिद्यतइत्यादेरर्थः ॥ ॥ ॥

षेधकर्तुं शक्येकिमेवं पृथक्प्रतिषेधइत्यतआह ॥ पृथगिति ॥ विद्यतइति वाक्यद्वयग्रहणम् ॥ असतोभावोन विद्यते ॥ सतश्चाभावोनविद्यतइति
द्वयोःपृथगभावप्रतिषेध आदरार्थइतिशेषः ॥ आदरश्चानुमानस्यासिद्धत्वे ॥ अतएवानेकदृष्टान्तप्रदर्शनम्

॥ कृ० ॥ अप्रामाणिकार्थ [illegible] ॥ [illegible] ॥ अभावश [illegible] दृष्टान्तं साध्यसाधनप्रदर्शनाभावइत्यतआह ॥
अभावइति ॥ नीवव्याख्यानमाह ॥ परमात्मेति ॥ [illegible] ॥ ब्रह्मशब्दोक्तइति ॥ पुराणेपरब्रह्मशब्देनपरमात्मनःप्रकृतत्वात्पुरुषशब्देनतद्ग्रहणं युक्तमितिभावनो
क्तंब्रह्मशब्दोक्तइतीत्यप्याहु ॥ दृष्टान्त [illegible] ॥ सदादिवदिति ॥ [illegible] ॥

॥ श्री० ॥ इतितु कथमिति ॥असच्छब्दस्य कारणार्थकत्वे मानाभावादिति भावः ॥ नन्वसच्छब्दस्य कारणार्थकत्वेऽसत इति श्रुत्युदाहरणमयुक्तम् ॥ देवानां पूर्व्ये युगेऽसतःसदजाय
तेति ब्रह्मवा असदिदमग्र आसीत् प्राणइति श्रुत्या एतेन सर्वे व्याख्याता व्याख्याता इति सूत्रकारैश्चासच्छब्दस्य ब्रह्मपरतया व्याख्यातत्वादित्यत आह॥ असतइति ॥ श्रुतेरिति ॥ यत्रान्यवाच
कत्वेप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते यत्र विरोधस्तत्र ब्रह्मैवोच्यतइति नियमेनात्र प्रकृत्यादिरूपात् कारणात् कार्यं प्रजायतेइत्यर्थः कथनेबाधकाभावेन असच्छब्दस्य प्रकृत्यादिकारणा
र्थकत्वेएतच्छ्रुत्युदाहरणं नासंगतमिति भावः॥असच्छब्दस्याव्यक्तार्थत्वमुपपादयति॥गत्यर्थस्येति॥षद्लृविशरणगत्यवसादनेष्विति धातुव्याख्यानाद्गत्यर्थस्येत्युक्तम्॥ज्ञानार्थस्येत्यर्थः॥क्विपःस
र्वात्मना लोपोद्रष्टव्यः॥तदंतत्वंप्रातिपदिकसंज्ञार्थमिति ध्येयम॥कर्मणीति॥साद्यतेव्यक्तमवगम्यतेयत् तत् सत् नसत् असदित्यर्थः॥अत्रार्थइति॥ईश्वरस्यानादिनित्यत्वेप्रकृतेरपिअनादिनित्य
त्वइत्यर्थः ॥ अन्यदर्शनस्यतत्त्वदर्शिनांप्रत्यक्षलक्षणाबीजसंबंधप्रदर्शनायदर्शनमूलकेत्युक्तं ॥ नन्वितःपूर्वमात्रार्थेगीताकारेणप्रमाणस्यानुक्तत्वाच्चशब्दोव्यर्थइत्यतआह ॥चशब्दइति ॥ प्रकृतिः
पुरुषश्चैव नित्याविति भाष्यकारोदितंप्रमाणं ॥ ननु संप्रदायस्याप्यागमत्वात्समुच्चयायोगः भिन्नयोरेकक्रियासंबंधोहिसमुच्चयोनामदेवदत्तः समागतोयज्ञदत्तश्चेतियथा ॥ नहिभवतिवसिष्ठःसमा
गतोऽरुंधतीपतिश्चेतितत्राह ॥ आगमइति ॥ उपदेशेति ॥ अनिर्णीतमूलकं वाक्यमित्यर्थः ॥ केचिदिति ॥ नरहरितीर्थाः ॥ उभयोरपीति ॥ ॥

॥ननुसतोब्रह्मणइत्यस्तु॥असतःकारणस्येतितुकथमितिअतआहअसत इति॥असच्छब्दार्थस्य कारणत्वंच भागवतेप्रसिद्धमित्यर्थः॥असतोसच्छ
ब्दस्य कारणत्वं कारणार्थत्वमितिवा॥सदसद्रूपयाकार्यकारणरूपया ॥असतइतिश्रुतेरनेकार्थत्वादत्रोदाहरणम्॥ कारणस्याव्यक्तेश्चअसच्छब्दार्थ

असतःकारणत्वंच ॥ सदसद्रूपयाचासौगुणमय्याऽगुणो विभुरितिभागवते ॥ असतःसदजा
यतेतिच ॥ अव्यक्तेश्च ॥ संप्रदायतश्चेत्तसिद्धमित्याह ॥ उभयोरपीति ॥ अंतोनिर्णयः ॥ १६॥

त्वम्॥गत्यर्थस्य सदेःकर्मणि क्विबंतस्य हिसदितिरूपम्॥असदव्यक्तरूपत्वात्कारणं चापिशब्दितमितिवचनात्॥अत्रार्थेभगवताप्रमाणमुच्यते
॥ उभयोरपीति ॥ ॥ क० ॥ असतःकारणत्वं प्रमाणविरुद्धमित्यतोव्याचष्टे ॥ असच्छब्दार्थस्येति ॥ असच्छब्दस्यकारणवाचित्वंकथमित्याक्षेपानुगुण्यायययोजनांतरमाह
॥ असच्छब्दस्येति ॥ ननु सतइतिश्रुतेर्ब्रह्मपरत्वात्कथंप्रकृतिपरत्वमित्यतआह ॥अनेकार्थत्वादिति ॥ एतेनसर्वेव्याख्याताइत्यत्रासच्छब्दस्यमुख्यवृत्त्यापरब्रह्मपरत्वोक्तावप्यमुख्यवृत्त्या
प्रकृत्यादिपरत्वस्याप्रतिषेधादितिभावः ॥ यथोक्तंभाष्ये ॥ सर्वशब्दानांब्रह्मणिसमन्वयेपितदधीनत्वादर्थवदित्यादिनान्यस्यापि वाच्यत्वेनांगीकारादिति ॥ नन्वस्तुसदितिसदेरूपंतथापि
कथमसच्छब्दस्याव्यर्थत्वमित्यतउक्तं ॥ गत्यर्थस्येति ॥ गत्यर्थानामवगत्यर्थत्वादितिभावः ॥ कर्तरिक्विपिसति असच्छब्दस्याव्यक्तिवाचकत्वं नस्यादित्यतउक्तं ॥ कर्मणिक्विबंतस्येति ॥ संपदा
देश्चेति कर्मणिक्विप् ॥ सुपिताइत्यमरटीकायां तोपणंतुट्संपदादित्वात्क्विबिति निरुपपदादपिधातोःसंपदादित्वेन क्विब्विधानात् ॥ क्विपःसर्वापहारीलोपः ततः सदितिरूपमितिभावः ॥ ॥ ४० ॥

॥ श्री० ॥ गीतागतापिपदस्योभयोरनयोरनादिनित्यत्वयोर्निर्णयोदृष्टोपीति भिन्नक्रमत्वमंगीकृत्य नकेवलं तत्त्वदर्शिभिर्दृष्टः किंतु प्रकृतिं पुरुषं चैवागमसिद्धोपीत्येवमपिशब्दसूचितं प्रकृतिः पुरुषश्चैवेति प्रमाणं भाष्यकारैरुदाहृतमिति वर्णयंतीत्यर्थः ॥ तद्धेतुव्याख्यानमसंगतमेवापिशब्दसूचितप्रमाणस्य वक्तव्यतया आदौ तत्कथनमसंगतमित्यस्वरसः केचिदित्यनेन सूचितो द्रष्टव्यः ॥ विनाशादिरित्यादिपदेन प्रागभावग्रहणम् ॥ विरोध इति ॥ पूर्वं प्रकृतिपुरुषयोरभावोनास्तीति प्रतिपाद्योत्तरार्धंतत्रैव प्रमाणं वाच्यम् ॥ तद्विहायादृष्ट इत्यभावमात्र एव प्रमाणमुच्यत इति विरोध इत्यर्थः ननु मत्कार्यवादपरत्वं सदसद्वैलक्षण्यपरत्वं वापरोक्तरीत्यैतच्छ्लोकार्थः कस्मान्न स्यादित्यत आह ॥ अपव्याख्यानं त्विति ॥ अन्यत्र गीतातात्पर्ये ॥ निराकृतमिति ॥ न चाविद्यमानविद्यमानयोरित्यादिना ग्रंथेनेत्यर्थः ॥ १६ ॥ ॥ ॥

तदसत् ॥ अन्यदर्शनस्यान्यान्प्रत्यप्रत्यायकत्वात् इत्याशंक्यदर्शनमूलकः संप्रदायःउपदेशपरंपरारूपोलक्षणयात्रप्रमाणत्वेनोच्यत इत्याह ॥ संप्रदायतश्चेति॥चशब्दोभाष्यकारोदितप्रमाणसमुच्चये॥आगमो ग्रंथनिबद्धंवाक्यं संप्रदायस्तु उपदेशपरंपरामात्रमितिभेदः॥एतत्प्रकृतिपुरुषयोरनादिनित्यत्वम्॥केचिदपिशब्दस्य भिन्नक्रमत्वमंगीकृत्य तेन सूचितं प्रमाणंप्रागुदाहृतमितिवर्णयंति ॥ नन्वंतोविनाशादिःपरिच्छेदोवातत्त्वदर्शिभिर्दृष्ट इत्युच्यते तत्कथं न विरोध इत्यतआह अंतइति॥ निर्णयोनादिनित्यत्वावधारणम्॥ अपव्याख्यानंत्वन्यत्र निराकृतम्॥ १६॥

॥ कृ० ॥ भिन्नक्रमत्वमिति ॥ तत्त्वदर्शिभिरपीतिसंबंधमित्यर्थः ॥ यथोक्तनरहरितीर्थैः ॥ नकेवलमुक्तागमसिद्धोऽनयोरुभयोर्निर्णयः किंतुतत्त्वदर्शिभिरपि दृष्टइतिभावइति ॥ स्वपक्षेतु यथापिःपदार्थसंभावनेति सूत्रउदाहृतेअपिसिद्धआपि स्तुहिइत्यत्रापिसिद्धचस्तुहीत्यर्थस्तथाऽपिदृष्टइत्यत्रापि दृष्टश्चेत्यर्थलाभाद्यथाश्रुतक्रमेपि नदोषइतिभावः ॥ प्रागिति ॥ प्रकृतिःपुरुषश्चेति भाष्यइत्यर्थः ॥ ननुभाष्योक्तरीत्याश्लोकोनावतारणीयः ॥ तथामतिनत्वेवाहमिति श्लोकानंतरमेवायं श्लोकः स्यात् ॥ दृष्टांतप्रतिपादकत्वात् ॥ किंतुननुशीतोष्णादिकमतिदुःखावहंकथंसोढव्यंअत्यंतमसह्ने कदाचिदात्मनाशस्यापि संभवादित्याशंक्यतत्त्वविचारयतः सर्वंसोढुंशक्यमित्याशयेनाह ॥ नासतइतीत्येवावतारणीयः प्रकरणानुगुण्यादित्यतआह ॥ अपव्याख्यानं त्विति ॥ असतोऽविद्यमानस्य भावोऽस्तितानविद्यते तथासतोऽभावोऽविद्यमानता नविद्यते ॥ एवमसदसतोरुभयोरपि सत्सदेवअसदसदेवेति अंतोनिर्णयस्तत्त्वदर्शिभिरुपलब्धःअतस्त्वमपि तत्त्वदर्शिनांदृष्टिमाश्रित्य शोकंमाकार्षीरित्यपव्याख्यानं तुसदिति व्यवह्रियमाणमेव पदार्थस्वरूपमुत्पत्तेः प्राङ्नाशोत्तरं चनास्तीति हि सर्वोलोकोव्यवहरति॥ गीतातात्पर्येप्यागमतोपि पश्चात्सत्त्वस्य पूर्वसतोपि पश्चादसत्त्वस्य चप्रत्यक्षसिद्धत्वोक्त्यानिराकृतमित्यर्थः ॥ तस्मादस्मद्व्याख्यानमेवादरणीयमितिभावः ॥ १६ ॥ ॥ ॥

॥ श्री० ॥ प्रकृतेनेति ॥ [illegible] ॥ [illegible] भिर्वाणीति ॥ [illegible] इत्यतः
[illegible] वाक्यमेव [illegible] ॥ वाक्यानामिति ॥ तथाचोपासनार्थमविद्य
[illegible] चाम्म [illegible] धिकस्य सादित्वादनित्यत्वाच्चकथं दृष्टांतत्वमित्य
तआह ॥ वेदशब्देनेति ॥ [illegible] ग्राह्यम ॥ प्रत्यभिज्ञाना [illegible]
त्यभिज्ञा जायते [illegible] उच्चारणमन्दत्व [illegible] एवंपूर्वं पूर्वगमित्यनादिनित्यतैव वर्णानांप्रत्यभिज्ञया सिध्यती
[illegible] प्रकृतोपयोगं सूचयन्व्याचष्टे॥ किंबहुनेति॥वाक्याना
[illegible] भावान्नुनरन्यस्य व्याप्त्यभिसिद्धेर
[illegible] ॥ वेद [illegible] ॥ अविनाशीति ॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ॥ विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

[illegible] नित्यमेवत्येवसंग्राह [illegible] गृहीतवेदादि
कं [illegible] ॥आदिपदेनाकाशादयः॥एवंचप्रत्यभिज्ञानादि
ना नित्यत्वसिद्धिः॥ [illegible] नित्यः [illegible] नादिनित्य
तासिद्धिर्द्रष्टव्या ॥ कु० ॥ नन्वविनाशित्वमत्रवेदा [illegible] प्रमाणानामेववेदत्वात्॥
[illegible] प्रत्यभिज्ञानादिनेति [illegible] आकाश [illegible] नित्य.
[illegible] ॥ [illegible] लक्षणादयः
[illegible] ॥ [illegible] अतःसर्वगताएव एवंका
[illegible] कदेशत्वरूपकाला
[illegible] ॥ [illegible] ॥

॥श्री० ॥ नानित्या इति ॥ [illegible] उपलक्षणमात्रमिति [illegible] तुशब्दार्थ एवेति ॥ नित्यमेवेत्येवशब्देनाविना [illegible] ॥ अविनाशी [illegible] विनाशशीलो न भवती [illegible] ॥ कश्चिदिति [illegible] इत्यर्थः ॥ उपलक्षणमात्रमिति ॥ [illegible] ॥ [illegible] ॥२०॥ प्रतिप [illegible] इत्यर्थ इत्यत आह ॥

ननु कालादयोऽपि [illegible] सर्वेऽपि अपि [illegible] ॥ [illegible] ॥ किं तु वदेति [illegible] उपलक्षणमात्रमिति ॥ तुशब्दार्थ एवेति ॥ तथा [illegible] पुनरुक्तत्वमित्याह ॥ नापीति ॥ [illegible] ॥ अविनाशीति [illegible] ॥ अवतरन्ति निमित्तकः ॥ कश्चि त्कर्तुं नार्हतीति वचनात् ॥ प्रागनुक्तस्य [illegible] आह ॥ अव्ययमिति ॥ [illegible] शापादिना विनाश

नापि शापादिना विनाश इत्याह ॥ विनाशमिति ॥ अव्ययं ततम् ॥१७॥ भवतु देहस्य [illegible] नित्यत्वमिति ॥ नेत्याह

स्याभावं साधयितुमिति भावः ॥ १७ ॥ देहानामनत्वं प्रागनुक्तं [illegible] आह ॥ भवत्विति ॥ आत्मनित्यत्वानुमानस्य प्रतिपक्षं वक्तुं स्वाभिप्रेतस्य हेतोः सिद्धान्तिनाभ्युपगतत्वे [illegible] नित्यत्वं भवतीति [illegible] इत्यर्थः ॥

॥ कृ० ॥ उपलक्षणमात्रमिति ॥ [illegible] ॥ [illegible] इत्यर्थः ॥ [illegible] ॥ [illegible] यथोक्तं महाभाष्ये ॥ सुप्तिङि नत्वे सामान्येपुनः सुप्ग्रहणं किमर्थं ॥ अनुपसर्ग [illegible] ॥ प्रागनुक्तत्वात् [illegible] ॥ नाश सामान्याभावो ऽव्ययत्वं तच्च प्रागनुक्तमेव ॥ अविनाशीत्यनेन [illegible] ॥ १७ ॥ प्रागुक्तमिति ॥ तथा देहान्तरप्राप्तिरित्यत्रोक्तमित्यर्थः

॥श्री०॥ सिद्धार्थतेति॥ प्रश्नस्येतिशेष.॥तथाचदेहो नित्योभवत्वित्येव प्रश्नोन संभवति॥ प्रसिद्धदेहेष्वनित्यत्वस्य प्रमितत्वया एककोटिनिश्चयस्य विद्यमानत्वेन नित्यत्वानित्यत्वकोटिक संदेहासंभवात्॥ तदसंभवेच तन्मूलक.प्रसिद्धदेहनित्यत्वविषयक:प्रश्नो न संभवति॥अनित्यत्वेन सिद्धार्थो योदेहस्तद्विषयकत्वादित्यर्थत:कस्याचिदित्युक्तं ॥प्रसिद्धदेहविलक्षणस्यकस्यचिद्दे हस्यानित्यत्वंभवत्वित्यर्थ इति भाव:॥सिद्धार्थताया.प्रश्नदोषत्वं चाप्रश्नदोषाहिचत्वार: स्वव्याहतिरसंगति: सिद्धार्थता च नैष्फल्यं तत:स्यात्तत्त्वनिर्णय इत्यनुव्याख्याने भगवत्पादैरेव प्रतिपादितमस्तीति द्रष्टव्यम ॥ ननु भवत्विति वाक्यस्योक्त एवाभिप्राय. कुतइत्याशंक्य॥अतिप्रसंगइति॥ यद्यात्मा नित्य: स्यात्तर्हि परिदृश्यमानो देहोपि नित्य:स्यात्पदार्थत्वाविशे षादित्यतिप्रसंगरूप: प्रतिकूलतर्क एवास्तु ॥ न च प्रसिद्धदेहेषु नाशस्यैव प्रमाणसिद्धत्वेनतदभावापादने प्रमाणबाध. स्यादिति वाच्यम् ॥ आपादने तस्यालंकारत्वेन दोषत्वा भावादित्यर्थ: ॥ वैयर्थ्यादिति ॥ अतिप्रसंगपक्षे कस्याचिदिति विशेषणवैयर्थ्यमित्यर्थ: ॥ प्रतिपक्षइति ॥ प्रतिबिंबभूत आत्मा नित्योन भवति ॥ अनित्यदेहाख्योपाधिमत्त्वात् दर्पण नाशेन नश्यमानमुखप्रतिबिंबवदिति प्रतिपक्ष इत्यर्थ. ॥ अनेनेति ॥ यद्यपि मे परिदृश्यमाना देहा अंतवंतस्तथाप्यात्मा नित्यइतिवाक्यवृत्तिर्वाक्यव्याख्यानंमचितमित्यर्थ: ॥ ननु नित्य स्यात्मनो देहाअंतवंत इत्यनुवाद: कस्मात्रस्यादित्यत आह ॥ अनुवादइति ॥ ननु कथमनेन शंकापरिहारइत्यत आह॥ येदेहाइति ॥ देहाख्योपाधेरनित्यत्वाविशेषणमसिद्धमिति भाव: ॥ विशेषणासिद्धिर्गीतासूचितेत्याह ॥ तदिदमुक्तमिति ॥ इमइतीति ॥

सिद्धार्थतापरिहाराय कस्यचिदित्युक्तम् ॥ नन्वतिप्रसंगोयं कस्मान्नभवति ॥ कस्यचिदिति विशेषणवैयर्थ्यप्रसंगात्॥ नित्यस्येत्यात्मनित्यत्वं पुनः कस्मादुच्यत इत्यत आह अस्त्विति ॥ एवं देहानित्यत्वंसिद्धांतिनोपि सिद्धंकृत्वा तर्हिप्रतिबिंबस्यात्मन उपाधेर्देहस्य नाशान्नाशोस्तु

अंतवंतइमेदेहानित्यस्योक्ताः शरीरिणः॥ अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥१८॥

अंतवंतइति ॥ अस्तुर्नाहिदर्पणनाशात्प्रतिबिंबनाशवदात्मनाश इत्यत आह ॥ नित्यस्येति ॥

दर्पणनाशान्मुखप्रतिबिंबस्येवेति पूर्वपक्षिणा प्रतिपक्षेभिहितेतत्प्रतिषेधायेदमाहेत्यर्थः ॥ अनेनतथाप्यात्मानित्य इतिवाक्यवृत्तिः सूचिता ॥ अनुवादेप्रयोजनाभावात् ये देहा अनित्या नतेषामुपाधित्वम् ॥यस्योपाधित्वं ॥नासावनित्य इति भावः ॥ तदिदमुक्तमिम इति ॥

॥ कु०॥सिद्धार्थतापरिहारायेति॥ देहस्यानित्यत्वमनित्यत्वंवेतिप्रश्नस्यानित्यत्वेनसंमतेषु अस्मदादिदेहेषुसिद्धार्थत्वपरिहारायेत्यर्थ:॥ अतिप्रसंगइति ॥ आत्मनो नित्यत्वे देहस्यापि नि त्यत्वंस्यादविशेषादिति प्रतिकूलतर्क इत्यर्थ: ॥विशेषणवैयर्थ्यादिति ॥ तर्कप्रमाणबाधस्यालंकारत्वेन नित्यत्वेन प्रमितदेहव्यावर्तकस्य कस्याचिदिति विशेषणस्य वैयर्थ्यप्रसंगादित्यर्थ: ॥

श्री०॥तथा च इमे परिदृश्यमाना देहा अन्तवंत इति [illegible] [illegible] ॥ [illegible] नित्य [illegible] ।ननु [illegible] नाशी [illegible] नादृशो [illegible]
दित्यत आह ॥ व्यक्तीकरिष्यतइति ॥ [illegible] ॥ [illegible] ॥ [illegible] शरीरिण [illegible] ॥नित्यस्य देहा इति [illegible]
रीरत्वसिद्धेरितिभावः ॥ ईश्वरस्यापीति ॥ नित्यस्य [illegible] ॥ [illegible] आह ॥ [illegible] ॥ प्राणीतु चेतनो ज
न्मी जंतुर्जन्यशरीरिणि इत्यभिधाना [illegible] इत्यर्थः ॥ पुनरुक्तिरिति ॥ [illegible] भाव ॥ विनाशिन इतीति ॥ [illegible] ॥ ननु दे
हा नांतवंतइत्यनेन स्वाभाविकनाश प्रतिपाद्य [illegible] विनाशिनइत्यनेन नैमित्तिक [illegible] आह ॥ कथंचिदिति ॥ तत्समाधाने ॥ [illegible] ॥यथास्थितपाठेपि नित्यस्ये
त्यनेन न पुनरुक्तिः स्वाभाविकनैमित्तिकनाशाभावप्रतिपादनार्थं [illegible] ॥ नाशाभावपाति ॥ [illegible] ॥ नाशोभविष्यतीति ॥ तथा च प्रतिबिंबस्

व्यक्तीकरिष्यतेचेतनत् ॥ ननु शरीरिणो देहाइतिव्यर्थम् ॥ अशरीरस्यदेहाभावादित्यतआह ॥ शरीरिणइति ॥ नित्यस्यदेहाअंतवंतइत्युच्यमा
नेईश्वरदेहस्याप्यंतवत्त्वं प्रसज्येतेतद्व्यावृत्त्यर्थं शरीरिण इति विशेषणम् ॥ जंतुर्जन्यशरीरिणि इत्याभिधानाच्छरीरिशब्दस्य जीवे प्रसिद्धेः ॥ त
थाप्यनाशिन इति पुनरुक्तिरिति ॥ अत्र केचित्तत्परिहाराय विनाशिन इतिपाठांतरं कुर्वंति ॥तदसत् ॥ अंतवंतइत्यनेन पुनरुक्तितादवस्थ्या

शरीरिणइति ॥ ईश्वरव्यावृत्तये ॥ नचनैमित्तिकनाश इत्याह ॥ अनाशिन इति ॥

त् ॥ कथंचित्समाधानेऽन्यत्रापि तत्समत्त ॥ किमन्यथापाठेनत्याशयवानाह ॥ नचेति ॥ उपाधिनाशेन नाशाभावेपि उपाधिबिंबसन्निधि
नाशान्निमित्तात्प्रतिबिंबस्यात्मनो नाशो भविष्यति ॥ नचासिद्धिः शंक्या ॥ परिछिन्नस्यैव प्रतिबिंबसंभवेन सन्निधिनाशप्राप्त्यादिति पुनः प्र
तिपक्षिते तत्प्रतिषेधायेदमिति भावः ॥ ॥ ॥

त आत्मा न नित्यः उपाधिबिंबसन्निधिनाशप्रयुक्तनाश [illegible] इत्यर्थः ॥ अशरीरिणइति ॥ ईश्वरस्यापरिच्छिन्नत्वेन उपाधिबिंबसन्निधिनाशस्यैवाभावेन तत्प्रयुक्तनाशस्य
जीवेऽभावादसिद्धिरित्यर्थः ॥ प्रतिबिंबसंभवेनेति ॥ [illegible] इत्यर्थः यदा जीवस्य प्रतिबिंब स्वीकृत तदा बिंबस्य परिच्छिन्नत्वमंगीकृत स्यात ॥परिच्छिन्नस्यैव प्रतिफलनसं
भवेनापरिच्छिन्नस्यतदसंभवात ॥ परिच्छिन्नस्य [illegible] बिंबोपाधिसन्निधिनाशप्रयुक्ता प्रतिबिंबभूतजीवनाश आवश्यकइति नासिद्धिरितिभावः ॥ तत्प्रतिषेधायेति ॥
॥ कृ०॥ ननूपाधिनित्यत्वे मोक्षो न स्यादुपाधिनिवृत्तिलक्षणत्वात् [illegible] आह॥व्यक्तीकरिष्यतइति ॥ द्विविध उपाधिरात्मनो नित्योऽनित्यश्च ॥ तत्रनित्यस्यावस्थानमनित्यस्य निवृ
त्तिर्मुक्ताविति नित्यश्चोपाधिः कश्चिदस्तीत्यादिना व्यक्तीकरिष्यतइत्यर्थः ॥ कथंचिदिति ॥ स्वाभाविकनैमित्तिकनाशप्रतिपादकत्वेनेत्यर्थः ॥

॥ श्री० ॥ एवं नैमित्तिकनाशप्रसक्तिपरिहारायानाशिन इति विशेषणमित्यर्थः ॥अप्रमेयस्येति॥ सर्वगतत्वरूपाप्रमेयत्वस्वरूपाणी नैवेऽसंभवादित्यर्थः ॥ घटादेरिति॥ येन परिच्छिन्नस्य घटादेर्बिंबस्योपाधिसन्निधिनाशेन प्रतिबिंबात्मनाश शक्यतेति भाव ॥ इदमिति ॥ अप्रमेयस्येति पदात्सारूप्यमित्यर्थः ॥ उत्तरमाह ॥ अत इव इति ॥ तद्गात्मकत्वाभावेपीत्यर्थः ॥ तत्सामानाधिकरण्यं ॥ भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिरित्यर्थः॥ प्रसिद्धमेवेति॥ सिंहो देवदत्तोऽग्निर्माणवक इत्यादाविनित्यर्थः ॥ प्रतिबिंबेति ॥ प्रतिफलनेत्यर्थः॥ तदधीनसारूप्यस्येति ॥ तदधीनत्वेमति तत्सारूप्यस्येत्यर्थ ॥ प्रतिबिंबत्वात ॥ प्रतिबिंबशब्दार्थ एव तथा च सर्वगतस्य प्रतिफलनरूपप्रतिबिंबासंभवेपि तदधीनत्वेमति तत्सदृशत्वरूपप्रतिबिंबसंभवान्नोक्तदोष इति भावः ॥ तत्सरूपत्वादिति ॥ सूत्र तदधीनत्वे सति इति पूरणीयमिति भाव ॥ जात इत्याहेत्यत्र सर्वशंकोद्धार इति वर्तते ॥ बिंबेति ॥ अनेन भाष्ये सतिचेति चशब्दप्रदर्शके चेत्यन्वितो बिंबसमुच्चयार्थ इत्युक्तं भवति ॥ ननु प्रकृते उपाधिबिंबसन्निधेरुपाधेर्बिंबस्य चानाशः कथं येन प्रतिबिंबनाश स्यादित्यत आह ॥ उपपादितश्चेति॥ अत्रेति ॥ गीतायामेवेत्यर्थः अप्रमेयस्येत्यनेन बिंबोपाधिसन्निध्यनाश नित्यस्येत्यनेनोपाध्यनाशः नत्वेवाहमित्यादिना बिंबानाशश्चोपपादित इत्यर्थः ॥ नन्वेकस्यैवोपाध्युपाधिमत्त्वं न संभवति तस्य भेदगर्भत्वादित्यत आह ॥ उपाधीति ॥ वस्तुतस्त्वभेदेपि भेदकारित्वैव धर्मिग्राहकमानसिद्धत्वादितिभावः ॥ अदृष्टमिदमिति ॥ एकस्यैवोपाधित्वमुपाधिमत्त्वं चेत्यर्थः ॥ मुखप्रतिबिंबादावदर्शनादिति भावः ननु बिंबेपि उपाधिप्रतिबिंबयोरत्यंताभेदः कुत इत्यप्रयोजकताशंकां परिहरति ॥ ॥ रु० ॥ प्रसिद्धमेवेति ॥ सिंहोदेवदत्त इत्यादाविति शेषः

॥अप्रमेयस्येत्येतदसंभवविविशेषणम्॥व्यर्थं चेत्यनस्तानित्यामाशंकांदर्शयित्वाव्याचष्टे॥कुत इति॥न हि प्रतिपक्षोवाङ्मात्रेण निषेद्धुं शक्यत इति भावः॥अप्रमेयेत्यनेन प्रतिपक्षहेतोरसिद्धिमाचष्टे॥नायमात्माघटादेःकस्यचित्प्रतिबिंबः॥किंत्वीश्वरस्यस चाप्रमेयः सर्वगत इतिकथं तस्योपाधिसन्निधिनाश इति॥ननु कथमिदंलभ्यते अत इवेत्सामानाधिकरण्यं सारूप्यं गमयतीति प्रसिद्धमेव॥न च सर्वगतस्य प्रतिबिंबासंभवः॥तदधीनसारूप्यस्यप्रतिबिंबत्वात्॥तदिदमुक्तं सरूपत्वादिति॥ननु वक्तव्यं सर्वमुक्तोपसंहारःक्रियते तत्किमात्मनित्यत्वविषयेसर्वशंकोद्धारो जातो येन त

कुतः अप्रमेयेश्वरस्वरूपत्वात्॥नह्युपाधिबिंबसान्निध्यनाशे प्रतिबिंबनाशः॥सतिचप्रदर्शके॥स्वयमेवात्रप्रदर्शकः॥

स्माद्युध्यस्वेत्युपसंह्रियत इत्यतो जात इत्याह ॥ नहीति ॥ उपाधिबिंबसान्निध्यनाशे प्रदर्शके आदर्शे उपाधौ बिंबे चाविनष्टेसतिप्रतिबिंबनाशो नह्यस्ति उपपादितश्चात्र त्रयस्यानाश इति भावः ॥ ननु विनाशिनां देहानामप्युपाधिकत्वात्कोत्रोपाधिरित्यत आह ॥ स्वयमिति उपाध्युपाधिमद्भावोविशेषबलेनेति भावः॥लोकेऽदृष्टमिदं कथमंगीकार्यमित्यत आह ॥ प्रतिबिंबत्वादिति॥ प्रतिबिंबशब्दार्थत्वादित्यर्थः ॥ भाष्ये च शब्दः प्रदर्शके चेति भिन्नक्रमोऽनुक्तसमुच्चयार्थश्चेति भावेनाह ॥ बिंबे चेति ॥ अत्र विशेषो भावबोधे ज्ञातव्यः अभिन्नयोरप्युपाध्युपाधिमद्भावो लोके दृष्टोपि प्रयोजकभेदादंगीकार्य इत्याह ॥

॥ श्री० ॥ **जडेष्विति** ॥ जडेष्वात्मिषु प्रतिबिंबेषु च सर्वत्र प्रतिबिंबानाम्॥चिदचिदात्मत्वेनायावद्वस्तुभावित्वाद्भेदाभेदौ ॥ चिद्रूपे उपाधौ प्रतिबिंबे च सर्वत्र जीवाख्यप्रतिबिंबस्य याव स्वरूपभूतदेहाख्योपाधिभावित्वादत्यताभेद इत्यर्थः ॥ चशब्दसूचितं द्वैविध्यं दर्शयति ॥ **द्विविध इति** ॥ यथोक्तं ॥ उपाधिर्द्विविधो ज्ञेयः स्वरूपं बाह्य एव च ॥ बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः ॥ स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पनेति ॥ प्रतिपत्त्यानुशासनायामित्यन्यथाप्रतीतिवारणाय तदर्थमाह ॥ **प्राप्तामिति** ॥ **उपाध्येति कथमिति** ॥ स्त्री लिंगप्रयोगः कथमित्यर्थः ॥ कुत इत्यत आह ॥ **किप्रत्ययांतस्येति** ॥ डुधाञ् धारणपोषणयोरितिधातोः दाधाघ्वदाप् ॥ दारूपा धारूपाश्च धातवो घुसंज्ञाःस्युरिति घुसंज्ञायां ॥ उपस र्गेघोः किः ॥ उपसर्गे उपपदे घुसंज्ञकस्य धातोः किप्रत्ययः स्यादिति उप आङित्युपसर्गपूर्वकस्य धा धातोः किप्रत्ययांतत्वमिति द्रष्टव्यं ॥ **पुंल्लिंगतानियमादिति**॥ घुघोः किःप्रादितो न्यत इत्यभिधानग्रंथे किप्रत्ययांतस्य पुंल्लिंगत्वानुशासनादित्यर्थः ॥ अत एवोदधिः प्रधिः जलधिः प्रणिधिरित्युदाहरणेषु किप्रत्ययांतेषु पुंल्लिंगतैव दृष्टेति ध्येयं ॥ सिद्धांती प्रतिबंध्योत्त

चित्वादिति ॥ जडेष्वयावद्वस्तुभावित्वात्सर्वत्र भेदाभेदौ ॥ चित्स्वरूपे तु यावद्वस्तुभावित्वादभेद एवेतिभावः ॥ स्वस्यैवोपाधि त्वे मुक्तावात्मनिवृत्तिः स्यात ॥ उपाधिनिवृत्तिलक्षणत्वान्मुक्तेरित्यतआह ॥ नित्यइति ॥ द्विविध उपाधिरात्मनः ॥ नित्योऽनि

चित्वात् नित्यश्चोपाधिः कश्चिदस्ति ॥ प्रतिपत्तौविमोक्षस्य नित्योपाध्या स्वरूपया ॥

त्यश्च॥तत्रनित्यस्यावस्थानं अन्यस्यनिवृत्तिर्मुक्ताविति कुतएतादित्यत आह॥प्रतिपत्ताविति॥प्राप्तौ सत्यां युतस्तित्प्रतीति शेषः॥ननूपाध्येति कथं किप्रत्ययांतस्य पुंल्लिंगतानियमात्॥तर्हिइषुधिद्व्योः कथम्॥प्रयोगदर्शनादपवादः॥यथाह॥लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितइति ॥

स्माशंकते ॥ यदिकिप्रत्ययांतस्य पुंल्लिंगतानियमस्तर्हि इषुधिशब्दः स्त्रीलिंगपुंल्लिंगरूपोभयलिंगवान्कथं तस्यापि धारूपत्वेन घुसंज्ञायां कर्मण्यधिकरणे चेति सूत्रेण इषवो धीयंतेऽत्रेति अधिकरणेकिप्रत्यये सति निष्पन्नस्येषुधिशब्दस्यापि पुंल्लिंगता नियम एव स्यात ॥ न चेष्टापत्ति ॥ तणीरोपासंगतूणीरनिषंगा इषुधिर्द्वयोर्लिंगयोः प्रयुज्यत इत्युक्तमयुक्तं स्यादिति भावः ॥ इषुधिर्द्वयोरित्यमरकोशकारवचनं कथमिति तदर्थः ॥ अत्र पक्षपर्क्षी उत्तरमाह ॥ **प्रयोगेति** ॥ इषुधिर्गुणपञ्चकर्तेत्यादिस्त्रीलिंगप्रयोगदर्शनेन किप्रत्ययांतस्य पुंल्लिंगतानियमस्यौत्सर्गिकत्वा दपवाद इत्याशयेनेषुधिर्द्वयोरित्युक्तमिति भावः ॥ अत्रलिंगानुशासनसंमतिमाह॥**यथाहेति** ॥ पाणिनिरिति शेषःविशेषः तथा च लिंगः सार्वत्रिकः कदैत्याशंकायामुक्तं ॥ **विशेषैरिति** ॥ ॥ कृ० ॥ **जडेष्विति** ॥ चशब्दोनुक्तसमुच्चयार्थ इति भावेनाह ॥ **द्विविधउपाधिरिति** ॥ **पुंल्लिंगतानियमादिति** ॥ घोः किप्रादितोऽन्यत इत्यमरेण प्राद्युपसर्गादन्यस्माद्धापरोयो घुसंज्ञक धातुस्तस्माद्यः किप्रत्ययस्तदंतः पुंल्लिंग इत्युक्तमिति भाव॥नेति॥इषुधिर्द्वयोरित्यमरेणैव किप्रत्ययांतस्येषुधिशब्दस्य स्त्रीत्वंपुंस्त्वं च कथमुक्तमित्यर्थः ॥**लिंगशेषविधिरिति**॥

यदि विशेषैर्विशेषप्रयोगादिरूपापवादकप्रमाणैर्बाधितं स्यादित्यर्थः ॥ तथा च क्तिप्रत्ययांतस्य पुंल्लिंगताविधानेपि सर्वत्रापि क्तिप्रत्ययांतस्य पुंल्लिंगत्वमेवेति न नियमः स्त्रीलिंगप्रयोगरूपापवादकप्रमाणसद्भावादिपुंविशब्दस्योभयलिंगत्वं युक्तमिति अवधेयम् ॥ सिद्धांतीशास्यमुत्तरमाह ॥ सर्मामिति ॥ भगवद्वचनत्वेनास्यापि विशेषप्रमाणत्वेनतद्बलान्न क्तिप्रत्ययांतस्याप्युपाधिशब्दस्य पुंल्लिंगतानियमोऽतो नित्योपाध्येति युक्तमिति भावः ननु पाधेर्नित्यत्वं कुत इति पृष्टे चक्रोक्तहेतुरुक्त इत्यत आह ॥ चिद्रूपत्वादिति ॥ चिद्रूपया स्वरूपया नित्योपाध्येतिपदानां हेतुहेतुमद्भावेन योजना द्रष्टव्येत्युक्तं भवति ॥ १८ ॥ ननु गीताभाष्यविरोध ॥ गीतायानायत्वेनेत्यादिना ज्ञानेन ज्ञातस्य भ्रमत्वोक्तिभाष्ये तु व्यवहारस्य भ्रमत्वोक्तिरत आह ॥ व्यवहारोऽत्रेति ॥ पुनरुक्तिरिति ॥ न विजानीत इति ज्ञानस्य भ्रमत्वोक्तर्यवार्थाभावसिद्धौ पुनरर्थाभाववचनं पुनरुक्तमित्यर्थः ॥ अर्थाभावनिश्चयरूपबाधप्रतिपादनायेति शेषः ॥

समंप्रकृतेपि ॥ स्व आत्मा रूपं यस्याः सास्वरूपा चिद्रूपत्वात ॥ स्वरूपत्वं स्वरूपत्वान्नित्यत्वम् ॥ १८॥यएनमिति पुनरात्मनित्यत्वं किमित्युच्यत इति अतोनास्य नित्यत्वप्रतिपादने तात्पर्यम् ॥ किं तु निष्टंकितं चेदात्मनो नित्यत्वं तर्हि कागतिस्तद्धननव्यवहारस्येत्याशंक्य

चिद्रूपया युतो जीवः केशवप्रतिबिंबकइति भगवद्वचनात् ॥ १८ ॥व्यवहारस्तु भ्रांतइत्याह॥ यएनमिति ॥

यएनं वेत्ति हंतारं यश्चैनं मन्यते हतं ॥ उभौतौ नविजानीतो नायं हंति न हन्यते ॥ १९ ॥

तस्य भ्रांतत्वमनेनोच्यत इत्याह॥व्यवहारस्त्विति॥व्यवहारोऽत्रज्ञानम्॥तथापिनायंहंति न हन्यते इति पुनरुक्तिरेवेतिचेन्न॥

॥कु०॥यद्यप्यमरटीकायां योक्तिः प्राद्रितोऽन्यत इत्यादिस्त्रीशिष्टलिंगविधिर्यदि टापरिष्टयोरित्यादि विशेषवचनेन बाध्येत तर्हि कांडत्रयस्य व्यापकउत्सर्गत्वादित्यर्थः उक्तःतथाच प्रयोगदर्शनादपवाद इत्यत्र नेयं संमतिर्युक्ता ॥ तथापि विशेषैरित्यनेनपुंविशेषैरित्यादिर्विशेषवचनरूपापवादवच्छिष्टप्रयोगरूपापवादस्यापि ग्रहणं कार्यम् ॥ शेषं तु ज्ञेयं शिष्टप्रयोगत इति तृतीयकांडांतिमवाक्ये शिष्टप्रयोगस्यापिलिंगज्ञापकत्वोक्तेरन्यथाप्ययमनादरत्वादभिप्रेत्येयं संमतिरुक्ता ॥ १८ ॥ ननु नात्र व्यवहारोऽभिलापः य एवं वेत्तीत्यादिना ज्ञानस्यैवोक्तेरित्यत आह ॥ व्यवहारोऽत्र ज्ञानमिति ॥ पुनरुक्तिरेवेति ॥ नाभिजानीत इति ज्ञानस्य भ्रमत्वोक्तौ अर्थाद्धननाभावसिद्धेरिति भावः ॥ यद्वा तात्पर्यार्थस्य पादत्रयेण प्रतिपादितत्वान्नायं हंतेत्यादिनाऽऽत्मनित्यत्वोक्तौ नत्वेवाहमित्यादिना पुनरुक्तिरिति व्याख्येयं ॥ बाधकैकापोद्यत्वादिति ॥ अत्रापित्युपसर्गप्रतिरूपकं ॥ अतोनवद सुपिक्त्यप्रत्ययनेनोपसर्गभिन्ने सुबंते उपपदे वदतेः क्यब्विधानविरोधः ननु तथाप्युक्तसूत्रेण भाव एवक्यबुक्तः ॥ सिद्धातकौमुद्यामुत्तरसूत्रादिह भावइत्याकृष्यत इत्युक्तत्वात् ॥ तत्कथं कर्मणि प्रत्यय इति चेन्न॥सिद्धांतकौमुद्यामेव कर्मणि प्रत्ययावित्येक इत्युक्तत्वेन कर्मण्यपि ॥ तदुपपत्तेः ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ **स्वपक्षसाधकानामिति** ॥ नित्यस्येत्यादिनोक्तानां जीवनित्यत्वरूपस्वपक्षसाधकानामुपाधिविवेकतत्सन्निधिविनाशाभावानामित्यर्थः ॥ **एतद्बाधनेपीति** ॥ आत्महननादिरूपविनाशाख्यपरपक्षबाधनेपीत्यर्थः ॥ **हननमेकमेवेति** ॥ तथा च हननरूपैकधर्मावच्छिन्नात्मविषयकभ्रांतिमतां पुरुषाणां समुदायविवक्षा चेदेकवचनं भवेत ॥ पुरुषव्यक्तिबाहुल्यापेक्षाचेत् बहुवचनापत्तिरत उभाविति द्विवचनं कथमित्यर्थः ॥ **कथंचेति** ॥ हननज्ञानस्य भ्रमत्वोपपादनायार्थाभावनिश्चयरूपबाधप्रतिपादनस्योक्तहेतुभ्यो नहन्यत इत्येतावतैव सिद्धेर्नायं हंतीति व्यर्थमित्यर्थः ॥ **एकस्याः** ॥ हननरूपायाः ॥ [illegible] ॥ [illegible] ॥ **एवमुक्तिः** ॥ नायं हंतीति कर्तृकारकोक्ति ॥ न हन्यत इति कर्मकारकोक्तिरित्यर्थः ॥ **करणाधिकरणोक्तिरपीति** ॥ अत्र [illegible] ॥ हननक्रियायां संप्रदानापादानयोः प्रसक्त्यभावादनुक्तिरिति ध्येयम ॥ **यथोक्तमिति** ॥ यद्यपि नित्यत्वं जीवस्याप्यस्ति तथापि सर्वप्रकारेणाविनाशित्वं विष्णोरेवेत्यादिना तस्मादनाशिनोऽप्रमेयस्य विष्णोः पूजार्थं युध्यस्वेत्यनेनाविनाशित्वेत्यादि श्लोकार्थतयाऽऽश्वरस्य स्वातंत्र्यं जीवस्यास्वातंत्र्यं

ज्ञानानां प्रामाण्यस्य बाधकापोद्यत्वात ॥ कुतो बाधकादस्य भ्रांतत्वमित्याशंक्य स्वपक्षसाधकानामेवोक्तहेतूनामेतद्बाधनेपि व्यापारप्रदर्शनार्थत्वादस्येत्याह कुत इति ॥ नन्वत्र हननमेकमेव तत्कथमुभाविति ॥ कथं च नायं हंति नहन्यत इति ॥ अथैकस्या अपि क्रियायाः का

॥ कुतः॥ उक्तहेतुभ्यो नायंहंति न हन्यते ॥

रकभेदादेव मुक्तिस्तर्हि करणाधिकरणोक्तिरपि प्रसज्येत इति ॥ उच्यते ॥ आत्मनोनित्यत्वमिदास्वातंत्र्यमाभिप्रायं प्रतिपादितम् ॥ यथोक्तं तात्पर्यनिर्णये ॥ तत्रहनन व्यवहारवत्त्वात्तव्यवहारस्यापि भ्रान्तत्वमनेनोच्यत इति उभावित्याद्युपपद्यते ॥ [illegible] ॥ **अनेनोच्यत इति**

॥ कृ० ॥ **स्वपक्षसाधकानामिति** ॥ [illegible] ॥ **एतद्बाधनेपि** [illegible] ॥ **एकमेवेति** ॥ एकस्मिन्विषये भ्रांतिमतां जातिविवक्षयैकवचनं ॥ व्यक्तिविवक्षया बहुवचनं वा [illegible] ॥ उभाविति द्विवचनं [illegible] ॥ **कथंचेति** ॥ हननज्ञानस्य भ्रमत्वोपपादकार्थाभावस्य न हन्यत इत्येकेनैव वाक्येन प्रतिपादनसंभवादिति भावः ॥ **करणाधिकरणेति** ॥ अत्र [illegible] ॥ हननक्रियायाः संप्रदानापादानशून्यत्वात्करणाधिकरणमात्रग्रहणं ॥ **प्रागिति** ॥ अविनाशित्वित्यत्रेत्यर्थः ॥ **तात्पर्यनिर्णयइति** ॥ यद्यपि नित्यत्वं जीवस्याप्यस्ति तथापि सर्वप्रकारेणाविनाशित्वं विष्णोरेवेत्यादौ तस्मादनाशिनोऽप्रमेयस्य विष्णोःपूजार्थं युध्यस्वेत्यंते तात्पर्यनिर्णयइत्यर्थः ॥ सर्वप्रकारेणाविनाशित्वोक्त्या पूज्यत्वोक्त्या च विष्णोः स्वातंत्र्यमर्थात् तद्विपरीतस्य जीवस्यास्वातंत्र्यं प्रतिपादितप्रायमिति भावः ॥ **अनेनेति** ॥ ॥

॥ श्री० ॥ तथा न य एनं जीवं स्वातंत्र्येण हननादिकर्तारं वेत्ति यश्चैनं जीवं हत मनित्यं वेत्ति तावुभौ तत्त्वं न विजानीतः भ्रांताविति यावत् ॥ कुतो बाधकादिति चेत् ॥ यतस्तदधीनत्वे सति तत्सदृशत्वाख्यप्रतिबिंबत्वरूपात्स्वातंत्र्याद्धेतोर्नायं हंति स्वातंत्र्येण हननादिकर्ता न भवति ॥यतश्च बिंबानित्यत्वादिहेतुभ्यो न हन्यते न विनश्यतीति स्वातंत्र्यानित्यत्वरूपार्थाभावनिश्चयलक्षणबाधोस्तीति श्लोकार्थो द्रष्टव्यः ॥ अतएवेति ॥ हननव्यवहारस्वातंत्र्यव्यवहारयोरुभयोरपि भ्रांतत्वप्रदर्शनरूपं प्रयोजनमस्ति यतोऽत एवेत्यर्थः॥ ननु गीतायांहंतारं हंतीति हननक्रियायामेवास्वातंत्र्योक्तेस्तदनुसारेण भाष्येपि न हि प्रतिबिंबस्य हननक्रियेतिवाच्ये क्रियेति सामान्योक्तिः कुत इत्यत आह ॥ क्रियेति वदतेति ॥ क्रियामात्रे जीवस्यस्वातंत्र्यप्रातिषेधाय क्रियांतरोपलक्षकं गीतायांहंतारं हंतीति पदद्वयमभिप्रेत्याचार्यैः क्रियेत्युक्तमिति भावः ॥ पदद्वयमिति ॥ विनिगमनाविरहादुभयोरपि लक्षकत्वमिति भावः॥ प्रतिबिंबस्यापीति ॥ सूर्यकादेरित्यर्थः ॥ तथा च तद्दृष्टांतेन प्रतिबिंबस्यापि जीवस्य क्रियावत्त्वमेवेति न हीतिनिषेधोन युक्त इति भावः॥ इतरत्र दर्शनेपि जीवाख्यप्रतिबिंबे सा मास्त्विति चेत्तर्हि सूत्रकार

अतएव भाष्यकारो व्यवहारस्त्विति सामान्येनाह ॥ न तु हननव्यवहार इति निष्कृष्य ॥ ननु नित्यत्वेबिंबानित्यत्वादयो हेतव उक्ताः ॥ अस्वातंत्र्ये तु न कोपि ॥ तत्कथमुक्तहेतुभ्य इयुक्तमिति चेन्न ॥ प्रतिबिंबत्वस्योक्तत्वात् ॥ तस्य कथमस्वातंत्र्ये हेतुत्वमित्यत आह ॥ नहीति॥क्रियेति वदता हंतारं हंतीति पदद्वयमुपलक्षणार्थमितिसूचितम् ॥ ननु प्रतिबिंबस्यापि लोके क्रिया दृश्यते जीवस्य च क्रियाभावे कर्तृ शास्त्रार्थवत्त्वादित्यादिविरोध इत्यत आह ॥ स हीति ॥ ॥ ॥ ॥ वचनविरोध इत्याह॥ जीवस्य चेति॥

न हि प्रतिबिंबस्य क्रिया ॥ स हि बिंबक्रिययैव क्रियावान् ॥ ध्यायतीवेतिश्रुतेश्च ॥ १९ ॥

॥ कृ०॥ ततश्चायं गीतार्थः ॥ य एनं जीवं स्वातंत्र्येण हननकर्तारं वेत्ति ॥ यश्चैनं जीवहननं अनित्यं वेत्तितावुभौ तत्त्वं न विजानीतो भ्रांताविति यावत् ॥कुतो बाधकादिति चेत् यतस्तदधीनत्वे सति तत्सदृशत्वाख्यप्रतिबिंबत्वरूपाद्धेतोर्नायं हंति ॥ हननस्वतंत्रो न भवति ॥ यतश्चबिंबनित्यत्वादिहेतुभ्योन हन्यते न नाश्यते तस्मादित्येवं स्वातंत्र्यानित्यत्वरूपार्थाभावनिश्चयलक्षणबाधोस्तीति ॥ **बिंबानित्यत्वादय इति** ॥ ननु सन्निधिनित्यत्वमेव प्रतिबिंबनित्यत्वसाधकं नतु बिंबनित्यत्वमुपाधिनित्यत्वेन तथात्वेपि तदुभयसन्निधिनाशेन प्रतिबिंबनाशोपपत्त्या प्रयोजकत्वादितिचेन्न ॥ योयत्प्रतिबिंबः सोऽसतिबाधके तत्समानधर्मेति व्याप्तिबलेनबिंबधर्मेश्वरत्वानवकाशात ॥ एवमुपाधिनित्यत्वेपि नाप्रयोजकता उपाधेः स्वरूपत्वेतान्नित्यत्वे॥ जीवानित्यत्वध्रौव्यात् ॥ नचात्रसाध्याविशिष्टत्वं ॥ उपाध्युपाधिमद्भावनाद्विशेषबलेन साध्यसाधनभावापपत्तेरित्याशयः ॥उक्तत्वादिति ॥ अप्रमेयस्येत्यत्रोतिशेषः ॥ उपलक्षणार्थमिति॥

१ अ० २ पा० ३ अ० १७ सू० १ ज्ञो जीवोविधिनिषेधरूपशास्त्रस्यार्थवत्त्वात्कर्तेतिसूत्रार्थः २ आदिपदेनैतदधिकरणस्थसूत्रांतराणांतदुपात्तश्रुत्यादिनांग्रहणम् ॥

॥ श्री० ॥ ननु बिंबक्रियाया बिंबनिष्ठत्वात्तया जीवस्य क्रियावत्त्वोक्तिरयुक्तेत्यत आह ॥ बिंबाधीनेति ॥ ननु न हंति पर्यायवाक्ये प्रतिबिंबे क्रियानास्तीत्युक्तम् ॥ इदानीं तु शास्त्रवैयर्थ्य परिहाराय जीवस्य क्रियास्तीत्युच्यते अतः पूर्वापरविरोध इत्यत आह ॥ तथा चेति ॥ न हंतीत्यादिना पूर्वं कृतः क्रियाप्रतिषेधः स्वातंत्र्याभावापेक्षयेत्यर्थः ॥ भवतीति ॥ जलाद्युपाधिच लनेन सूर्यकादौ चलनदर्शनादित्यर्थः ॥ स्वातंत्र्येति ॥ प्रतिबिंबे स्वातंत्र्येण क्रिया नास्तीति स्वातंत्र्यप्रतिषेध एवैतत्कारस्य तात्पर्यं नतूपाध्यधीनक्रियानिषेध इत्यर्थः ॥ पृथगुपाधीति ॥ अ न्यत्र प्रतिबिंबक्रियां प्रतिउपाधिक्रियाया हेतुत्वेपि प्रकृते उपाधिप्रतिबिंबयोरभेदेन प्रतिबिंबातिरिक्तोपाध्यभावेनोपाधिक्रियाया हेतुत्वासंभवात् बिंबक्रियाया एव हेतुत्वमिति भावेनाबिंब क्रिययैवेति प्रकृताभिप्रायेणैवोक्तमिति भावः ननु ध्यायतीवेति श्रुतिर्जीवस्येश्वराधीनक्रियायां प्रमाणमित्युक्तम् ॥ ध्यायतीवेतीवशब्दात् जीवस्येश्वराधीनक्रिया नास्तीति प्रतीतेरित्यत आह ॥ इवशब्द इति ॥ दशरात्रे भुक्तमिव न सम्यक् स्वल्पभोजनादिति प्रयोगदर्शनादिति भाव एवं चेश्वराधीनमल्पमेव स्वस्वरूपाध्यायनं न संपूर्णमिति श्रुत्यर्थो द्रष्टव्यः ॥१९॥ ॥

बिंबक्रियया बिंबाधीनक्रियया ॥ तथा च पूर्वं स्वातंत्र्याभावापेक्षया क्रियाप्रतिषेध इति ज्ञातव्यम् ॥ननूपाधिक्रिययापि प्रतिबिंबे क्रिया भवति ॥ तत्कथमुच्यते बिंब क्रिययैवेति ॥ मैवम् स्वातंत्र्यप्रतिषेधे तात्पर्यात् ॥ जीवस्य पृथगुपाध्यभावाच्च ॥ जीवस्येश्वराधीनक्रियत्वे श्रुतिं चाह ॥ध्याय

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥ अत्र मंत्रवर्णोऽप्यस्तीत्याह ॥ न जायत इति ॥ तीवेति ॥ ईश्वरो जीवं ध्यायतीत्यर्थः इव शब्दोऽल्पार्थे ॥ १९ ॥ तथापि न जायत इति पुनरुक्तमित्याशंक्यनेदं भगवद्वाक्यं किं तूक्तार्थे संमतित्वेन मंत्रवर्णोऽयमुदाह्रियत इत्याह अत्रेति॥

॥क्र०॥क्रियामात्रे जीवस्य स्वातंत्र्यनिषेधात् क्रियानंगीकारोऽयुक्तमित्यर्थः ॥ननु बिंबप्रतिबिंबयोर्भेदात् क्रियायोगेपि स्वतः कथं बिंबक्रियया तत् क्रियावत्त्वं युक्तमित्यत आह॥बिंबाधीनक्रिययेति॥नन्नु श्रुतावीश्वरस्य ध्यानकर्तृत्वमुक्तमात्मैवास्य ज्योतिरिति तस्यैव प्रकृतत्वात् ॥ नचायुक्तं ॥ तस्य नित्यज्ञानत्वेन ध्यानायोगात् ॥ अनुपयुक्तंच प्रकृतेतदुदाहरणम् ॥जीवस्येश्वराधी नक्रियात्वालाभादित्याशंक्य स्वातंत्र्याध्यायतीत्यस्य ध्यायत्यन्तर्भावितणिजर्थमिति तदुपसर्जनतयापि ध्यायत्यन्तर्णीतण्यर्थमभिप्रेत्य व्याचष्टे ॥ ईश्वर इति ॥ ननु चंद्र इव मुखमितिवत् ध्या यतीवेत्युक्ते वस्तुतो न ध्यायतीति प्राप्नोति॥तथा चेत्युक्तमन्यत्र सदृशाधिकरणे तथाह्यर्थगतिरिति न्यायादित्यत आह॥इवशब्दोल्पार्थ इति॥इवोपमायां स्वल्पत्वे इत्यमरोक्तेरिति भावः॥तथाच ध्यायतीत्युक्तेऽल्पध्यानवत्त्वं करोतीत्यर्थो लभ्यते॥दशरात्रे भुक्तमिव न सम्यक् स्वल्पभोजनादित्यादौ तथादर्शनादिति द्रष्टव्यम् ।नचैवमुक्तन्यायस्तत्रभावाचीवशब्दस्थलइतिमंतव्यम् ॥१९॥

१ अन्यत्रोपाधिप्रतिबिंबयोरुपादानोपादेयत्वादुपादानकारणकार्ययोरत्यन्तभेदाभावाच्चाभिन्नभेदाभेदादुपाधिक्रियायाः प्रतिबिंबक्रियाहेतुत्वं युक्तमितिभावः २ अत्यंताभेदेन ३ अंतर्णितण्य र्थायम ॥ ध्यायतीत्यर्थः ४ इवत्वस्यतात्पर्यनसम्यागित्यादितिनवशब्दोल्पार्थः

॥ श्री० ॥ स्वरूपेणभूत्वेति ॥ स्वरूपेणविद्यमान एवेत्यर्थः ॥ वर्जितं भूत्वा वर्जितं सद्विद्यमानमेव ॥ कयाचित् लोकविलक्षणया ॥ तन्निमित्तः अचिन्त्यशक्तिनिमित्तः ॥ उक्तप्रकारं वृद्धिह्रासवर्जितं सद्विद्यमानस्यैवाचिन्त्यशक्तिनिमित्तकत्वरूपं ॥ कुतः प्रमाणात् ॥ तथाभावेति ॥ भूत्वा भवनेत्यर्थः ॥ भवनामीति ॥ सर्वदा ज्ञानवतईश्वरस्येक्षतेतिज्ज्ञानस्य भवनमुच्यते ॥ भूतं जातमित्युच्यते इतिवत् ॥ सदाविद्यमानस्येदं कादाचित्कं भवनमचिन्त्यशक्तिविना नोपपद्यतइत्यर्थः ऐक्षतेति लङा ज्ञानस्य भूतत्वमेवोच्यते नत्विदानीं भवनमत एतदर्थे तदैक्षतेति श्रुत्युदाहरणमयुक्तमित्यतो लङंगादपि वर्तमानार्थः प्रतीयते इत्यत्रोदाहरणमाह ॥ देवदत्तइति ॥ लोकदर्शनस्येति ॥ ईश्वरज्ञानापेक्षयाऽधिकस्य तत्राविद्यमानस्य लोककर्तृकहरिकर्मकप्रत्यक्षस्येश्वरे उत्पादादित्यर्थः ॥ तथा चेश्वरवदित्युक्तेऽन्यथासिद्धिशंकास्यात् ॥ अचिन्त्यशक्त्यभावेपि प्रत्यक्षत्वं हरेर्जन्मेत्यादिप्रमाणानुसारेणेश्वरजननव्यवहारस्य प्रादुर्भावेनलोकप्रत्यक्षत्वाभिप्रायेणापि संभवेनेश्वरजननव्यवहारस्याचिन्त्यशक्तिमात्रनिर्वाह्यत्वाभावात्॥नचजीवेपि लोकप्रत्यक्षत्वाभिप्रायेण भवनप्रसक्तौ तन्निषेधः क्रियत इति वाच्यं ॥ देहोत्पत्त्या लोकदर्शनस्यात्रापि सत्वेनष्टापत्त्या तन्निषेधायोगात्॥ईश्वरज्ञाने तु लोकप्रत्यक्षप्रवृत्त्या तत्रजननव्यवहारस्याचिन्त्यशक्तिमात्रनिर्वाह्यत्वमेववक्तव्यमिति भावः॥यथोक्तं ॥ प्रत्यक्षत्वंहरेर्जन्मेति

ननु जीवःस्वरूपेण भूत्वादेहसंबंधेन भाविनेव तत्कथमुच्यते भूत्वा भविता नेतीत्यतोऽन्यथा व्याचष्टे ॥ नचेति ॥ जीवो न जायते चेत्तर्हि यथेश्वरज्ञानं वृद्धिह्रासादिवर्जितं भूत्वेव कयाचिदचिन्त्यया शक्त्या भूतमिति व्यवहारालंबनं तथा जीवेपि किंजननव्यवहारस्तन्निमितकइति पृच्छायां नेत्यनेनोच्यत इत्यर्थः॥ नन्वीश्वरज्ञानस्योक्तप्रकारं भूत्वा भवनं कुतः सिद्धम्॥येन जीवस्य तथाभावासंभवनायोदाह्रियत इ

नचेश्वरज्ञानवद्भूत्वा भविता ॥ तद्धि तदैक्षत ॥ देशतः कालतो योसाववस्थातः स्वतोऽन्यतः ॥
अविलुप्तावबोधात्मेत्यादिश्रुतिस्मृतिसिद्धं ॥

त्यत आह ॥ तद्धीति ॥ तदीश्वरज्ञानस्योक्तप्रकारेणभूत्वा भवनं श्रुतिस्मृतिसिद्धं हीति संबंधः ॥ तदैक्षतेति भवनमुच्यते देवदत्तोऽपश्यदितिवत् ॥ देशत इति ॥वृद्धिह्रासादिराहित्यम्॥नन्वीश्वरवदित्येव कस्मान्नोक्तम् ॥ नैवं शंक्यम् ॥ लोकदर्शनस्याधिकस्य तत्रोत्पादात् ॥

॥ कृ० ॥ नन्वैक्षतेत्यत्र धातुना दर्शनमात्रमुच्यते ॥ ईक्षदर्शन इत्युक्तः॥ लङा तु अतीतत्वं अनद्यतनेलङिति स्मृतेर्भवनंतु न केनापि ॥ तत्कथं तदैक्षतेति भवनमुच्यत इत्युक्तमित्यतआह ॥देवदत्तोऽपश्यदिति वदिति ॥ सर्वत्र धातुभागेन साध्यं ... ॥ क्रियेत्यर्थे ॥यथोक्तं धात्वर्थेन क्रिया तत्र धातुरूपनिबंधनेति अतो भवनमुच्यत इत्युपपन्नमिति भावः ॥ वृद्धिह्रासादिति ॥ आदिपदादुत्पत्त्यादिसंग्रहः॥ देशत इति स्मृत्या यथा देशकालादिभिरस्मदाद्यवबोधस्य लोपो न तथा भगवत्स्वबोधस्येत्युक्ततयाऽर्थाद्वृद्ध्याद्यभावावगमादिति भावः ॥ लोकदर्शनस्येति॥प्रत्यक्षत्वं हरेर्जन्मेति प्रमाणप्रसिद्धस्य कृष्णो जात इत्यादिव्यवहारावलंबनस्य लोककर्तृकहरिकर्मकदर्शनस्येत्यर्थः ॥ ॥ ॥ ॥

॥ श्री० ॥पुनरुक्तमिति॥ नजायते म्रियत इतिअनेन पुनरुक्तमित्यर्थः ॥ अस्तीति ॥ तथाचतन्निबंधन एवजननव्यवहार इति भावः॥ पुनरुक्तिरिति ॥नम्रियतइत्यनेनेत्यर्थः ॥पूर्वाभि प्रायेणेति ॥ योदेह उपाधित्वेनांगीक्रियते नासौनाशवान् यश्चनाशवानयं परिदृश्यमानो देहो नासावुपाधिरित्यर्थः ॥ २० ॥ अविनाशित्वादिनात्मानं योवेदसकंकथं घातयतिन कथमपी त्यन्यथाप्रतीतिंवारयितुमाह॥एवंभावमिति॥अविनाशित्वादिनेनं योवेदस पुरुषः॥अयमन्येन कर्मेण घातयति स्वयं कं हंतीत्येवं भावं कथं कुर्यान्न करोति ॥ जीवानित्यत्वास्वातंत्र्यविष

अजो नित्य इति पुनरुक्तमित्याशंक्यतान्निवर्त्यामाशंकामुक्त्वाऽन्यथा व्याचष्टे ॥ कुत इति ॥न जायते म्रियते इत्येतस्मात्कारणादित्यर्थः ॥ अजादीत्यनेनाजोनित्यः शाश्वत इति व्याख्यातम् ॥ शाश्वत इत्येतन्नित्य इत्यनेन गतार्थमित्यन्यथा व्याचष्टे ॥ शाश्वत इति ॥ तथा चा जो नित्य इत्याभ्यां विवेत्पत्तिनाशनिमित्ता शाश्वत इत्यनेनोपाधिविवसन्निधिजनननाशनिमित्तौ जन्मनाशौन स्त इत्युक्तं भवति॥तथाप्य ज इत्युक्तत्वात्पुराण इति पुनरुक्तिरिति चेत ॥ न ॥ भूत्वा भविता वा नेत्युक्तम् ॥ तत्कुतः ॥ किंनिमित्तश्च तर्हि जननव्यवहार इत्याशंक्य

कुतः अजादिलक्षणश्वरसरूपत्वात् ॥ शाश्वतः सदैकरूपः ॥ पुरं देहमणतीति पुराणः ॥ तथापि न ह न्यतेहन्यमानेपि देहे ॥ २०॥ अतो य एवं वेद सकथं घातयति हंतिवा ॥

वेदाविनाशिनं नित्यं यएनमजमव्ययम् ॥ कथं सपुरुषः पार्थकं घातयतिहंति कम् ॥२१॥

देहांतरप्राप्तिरस्यास्तीत्यनेनोच्यत इत्याह ॥ पुरमिति ॥ एवमपि न हन्यत इति पुनरुक्तिरिति चेन्न ॥ यदि पुराणस्तर्हि उपाधिभूतदेहना शाद्दर्पणनाशात्प्रतिबिंबनाशवदात्मनाशः स्यादित्याशंकात्र पूर्वाभिप्रायेण परिन्हियत इति भावेनाह ॥ तथापीति ॥ पुराणत्वेपि ॥ २० ॥ वे दाविनाशिनमिति पुनरात्मनोऽविनाशित्वादिकं किमर्थमुच्यत इत्यतोऽस्य तात्पर्यमाह ॥ अत इति॥उक्तैः प्रमाणैरेवमविनाशित्वादिरूपं कं घातयति हंति वेत्येवं भावं करोतीत्यर्थः ॥ ॥ ॥ ॥ ॥ ये भ्रांत्यभावादित्यर्थः ॥

॥ क०॰ ॥ नहन्यत इति॥पुनरुक्तिरिति ॥ नम्रियत इत्युक्तत्वादिति भावः॥पूर्वाभिप्रायेणेति॥उपाधेर्द्वैविध्याभिप्रायेणेत्यर्थः ॥२०॥ननु गीतायां वेदाविनाशिनमित्यादिनाविनाशित्वा दिविशेषदर्शनवंतमनूद्य कथं स पुरुष इत्यनेन तस्यैव हननकर्तृत्वाद्यभाव उक्तः॥न चासौ युक्तः॥जीवमात्रे स्वातंत्र्येण कर्तृत्वादिनिषेधस्य प्रकृतत्वेन प्रकरणविरोधात॥अविनाशित्वादि ज्ञानस्य स्वातंत्र्येणकर्तृत्वाद्यभावे हेतुत्वाभावेन यो वेद स कथं हंतीत्यत्रायोगाच्चेत्यतोभिप्रायमाह ॥एवंभावमिति॥जीवस्वातंत्र्यानित्यत्वादिभावनां नकरोतीत्यर्थः ॥ भ्रांतेनभवतीतियावत्॥

॥ श्री० ॥ असंगतमेतत्किमर्थमुच्यते ॥ य एनमिति पुनरुक्तं चेत्यत आह ॥ **जीवस्येति**॥ इत्युक्तं य एनमिति श्लोकेन ॥ **इत्युच्यत इति** ॥ तथा च न [illegible] दोषयोगरहितमिति व्याख्यानमयुक्तम् ॥ अत्राविनाशिनं वेदेत्यादिना पूर्वोक्तस्यैवानुवादः क्रियते तत्र दोषयोगराहित्यस्य पूर्वमनुक्तत्वादनुवादायोगादित्यत आह [illegible] **नेनेत्यादिना** ॥ इत्यनेन ॥ एतदर्थकेनाविनाशिनमिति पदेनेत्यर्थः ॥इतीति॥तथा चाभिमानपरित्याग उक्त इति [illegible] तस्याभिमानादिदोषयोगरहितत्वस्य [illegible] क्रियत [illegible] त्यर्थः ॥ ननु नष्टशब्दाद्दोषयुक्तत्वप्रतीतिः कथम् ॥ णश अदर्शन इति धातोः कर्मणि क्तप्रत्यये निष्पन्नस्य नष्टशब्दस्यादृष्ट इत्यर्थकत्वात्॥दोषस्य णशधात्वर्थत्वं [illegible] इत्यत आह अनेकार्थत्वादिति॥विनाशशब्दस्य नष्टशब्दसमानार्थकत्वादित्याशय ॥क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः॥प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः [illegible]

जीवस्यानित्यत्वादिकं मन्यमानोन जानातीत्युक्तम् ॥ इदानीं तु ज्ञानी नैवं मन्यत इत्युच्यतइति ॥ अविनाशिनं नित्यमिति पुनरुक्तिमाशं क्य द्वेधार्थभेदमाह ॥ अविनाशिनमिति ॥ नैमित्तिको विनाशादिनिमित्तकः स्वाभाविकः कालकृतः ॥ दोषयोगरहितमित्यनेन मात्रास्पर्शा

अविनाशिनंनैमित्तिकविनाशरहितम् ॥ नित्यंस्वाभाविकनाशरहितम् ॥ अथवाऽविनाशिनंदोषयोग रहितम् ॥ नित्यंसदाभाविनमितिसर्वत्रविवेकः ॥ दोषयुक्तपुरुषादिषुनष्टशब्दप्रयोगात् ॥ २१ ॥

इत्यत्र यदुक्तमाभिमानिकमेवात्मनोदुःखादिकं न तु स्वाभाविकमिति तस्यानुवादः क्रियते पूर्वव्याख्यानप्रकारमन्यत्राप्यतिदिशति इतीति॥विवेकः शब्दार्थयोः॥अविनाशिनं दोषयोगरहितमिति कुतो लभ्यमित्यत आह॥दोषेति॥अनेकार्थत्वाद्धातूनामिति भावः ॥२१॥ णशधात्वर्थ इति भावः ॥२१ ॥

॥ कृ० ॥ नन्वेवं स्वातंत्र्यादिभावनां न करोतीति व्याख्यानान्नित्यत्वाद्युक्तत्वा पुनरुक्तिर्माभूत ॥ तथापि भीतो न बिभेतीति इत्यनेन स्यादेव ॥उभयत्र तथाज्ञाननिषेधप्रतीतेरित्याशंक्य त त्तात्पर्यमनुवदन्नतत्तात्पर्यमाह ॥ जीवस्येति ॥ तथा चोभयत्रपर्योक्तविशेषणभेदात्तात्पर्यभेदाच्च नपुनरुक्तिरिति भावः ननु यच्छब्दश्रवणाद्वेदाविनाशिनमित्यर्थानुवादः ॥ तथाच दोषयो गरहितत्वस्य प्रागनुक्तत्वात्कथमविनाशिनमित्यनेनतदनुवाद इत्यत आह ॥ दोषयोगेति ॥ **अनुवादइति** ॥ न चैवमप्यनुक्तानुवाददोष एव॥अव्ययत्वस्य प्रागनुक्तेरिति वाच्यम् ॥ ना शसामान्याभावरूपस्य तस्य नत्वेवाहमित्यादावेवोक्तत्वादित्याशयात ॥ २१ ॥ ॥ ॥ ॥ ॥

१ बृहदारण्ये अ० ६ ब्रा० ३ श्रुति ७

॥ श्री० ॥ अनिमित्तत्वाभावादिति । अनेनास्यापि प्रत्युक्तिरिति भावः ॥ स्वतो वाहिकनगमिति । अत्यन्ते प्रतिपत्तिरित्यर्थः ॥ कश्चिन्स्वादिति ॥ उत्तरार्धेनेति शेषः ॥ २२ ॥ प्रागिति ॥ विनाशमव्ययस्यास्य नकश्चित्कर्तुमर्हतीत्यत्रेत्यर्थः ॥ प्रायः शब्दस्यार्थं दर्शयति ॥ शंक्यमानेति ॥ केनचिन्निमित्तेन शंक्यमानेत्यर्थः ॥ प्रायः शब्दाभावे स्वतो निमित्तैश्चाविनाशिनोपि निमित्तविशेषेण नाशः स्यादित्युक्तिर्विरोधापत्तिरिति ध्येयम ॥ ननु प्रागेव निमित्तैश्चेत्यत्र प्रायः शब्दस्य शब्दत्वे भिन्नपदत्वेन प्रायैरिति स्यात् समस्ते तु प्रायनिमित्तैरिति भवेत ॥ प्रायोनिमित्तैरिति तु कथमित्यत आह ॥ अव्ययमिति ॥ स्वतः प्रायोनिमित्तैश्चाविनाशिनोपि केनचिन्निमित्तविशेषेण नाशः शंका कुतोप्यदृष्टत्वादसंभावितेत्यर्थः ॥ नापि वीरभद्रस्येत्यादि ॥ यथोक्तं ॥ भागवते चतुर्थस्कंधे ॥

देहानामुपगमापगमयोरप्येक एवायमात्मेत्येनदेहिनोऽस्मिन्नित्यत्रैव सदृष्टांतमुक्तमतो वासांसीति व्यर्थोयं श्लोक इत्यत आह ॥ देहेति ॥ कौमारादिदेहानामनतिभिन्नत्वान्न तेन देहात्मनोर्विवेको विनाशित्वाविनाशित्वलक्षणः स्पष्टमनुभवारूढो भवतीति भावः ॥ दृष्टांतं पूर्वोक्ताहिलक्षणमिति शेषः ॥ दृष्टांतमित्युपलक्षणं दार्ष्टांतिकस्यापि कथितत्वात् ॥ २२ ॥ नैमित्तिकनाशस्य प्राङ्निरस्तत्वात्किं नैनमिति श्लोकेने

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि॥तथाशरीराणि विहाय जीर्णान्यन्यानिसंयाति नवानिदेही ॥२२॥ देहात्मविवेकानुभवार्थंदृष्टांतमाह॥वासांसीति॥२२॥स्वतःप्रायो निमित्तैश्चाविनाशिनोऽपि केनचिन्निमित्तविशेषेण स्यात्ककच्छेदादिवत्

त्यतस्तन्निवर्त्यशंकाप्रदर्शनपूर्वकं तात्पर्यमाह ॥ स्वत इति ॥ स्वतः कालतःप्रायो बाहुल्येन शंक्यमाननिमित्तत्यात्रत्यर्थमेतदव्ययम् ॥ केनचिच्छस्त्रादिना स्याद्विनाश इतिशेषः ॥ असंभावितशंकया नपश्यमानमित्यतो दृष्टांतमाह ॥ ककच्छेदवदिति ॥यथा दक्षस्य प्रजापतेः शिरश्छेदो न स्वतो जातो नापि वीरभद्रस्यायुधेन निमित्तेन किं तु यज्ञपशुभावनाख्येन निमित्तविशेषेण तथेत्यर्थ. ॥ ॥ ॥

॥ कृ० ॥ अनतिभिन्नत्वादिति ॥ अवस्थितस्यैवद्रव्यस्यावयवोपचयापचयाभ्यां तत्परिमाणस्या विक्रियमाणत्वादितिभावः ॥ एतच्चसौगतपरीक्षायामभेदेपिविशेषेणेत्यनुव्याख्यानसुधायांस्पष्टं ॥ २२ ॥ प्रागिति ॥ नित्यस्यानाशिन इत्यादावित्यर्थः ॥ ननु प्रायःस्यात्तादंत मृत्यां तुल्यबाहुल्यसंयोग्यपीति विश्वोकोरीदी वा प्रायदर्शनादिति प्रयोगाच्च बाहुल्यार्थः ॥ प्रायशब्दोऽकारांतस्तस्मात्प्रकृत्यादित्वात्तृतीयायां प्रायेणेति स्यात्प्राय इति तु कथमित्यत उक्तम ॥ अव्ययमिति ॥ बाहुल्यार्थे प्रायइति सांतमव्ययमप्यस्ति ॥ अल्पे नीचैर्महत्युच्चैः प्रायोभूम्न्यद्रुते शनैरित्यमरेण सांताव्ययैः सहोक्तेः तत.प्रायोइत्युपपन्नमिति भाव. ॥ यज्ञपशुभावनाख्येनेति ॥ ॥ ॥ ॥

॥ श्री० ॥ शस्त्रैरस्त्रान्वितैरेनमानिर्भिन्नत्वनंहरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ दृष्ट्वा संज्ञपनं योगं पशूनां मपतिर्मिते ॥ यजमानपशोः कस्य कायात्तेनाहनाच्छिरइति ॥ ननु विशेषानिमित्तानीत्ययुक्तम् ॥ तथात्वे विशेषाणामेव निमित्तरूपाप्रसक्त्या प्रकृतासंगतः ॥ निमित्तविशेषानित्यत्वं पूर्ववदुक्तव्यमित्यत अथेत ऐक्यमेवत्याशयेनाह ॥ विशिष्यंत इति॥ विपर्तिकाच्छिपुच्यामावित्यस्मात्कर्मणि याजि गुणे च कृते विशेष इति भवति ॥ विशिष्टनिमित्तानि ॥ इतरविलक्षणनिमित्तानीत्यर्थः ॥ २३ ॥ लटइति ॥ पूर्वश्लोके नैनंछिंदंतीत्यादिल्टोवर्तमानार्थकत्वादिति भावः ॥ वर्तमानेलडिति स्मरणादितिज्ञेयम ॥ ननतत्र नाशशंकाकस्मान्नभवतीत्यत आह ॥ इदानीमित्यादि ॥ इदमच्छेद्यइत्यादिकम ॥ नन्वनेनछेदादियोग्यताभावः कथंसिद्धइत्यत आह ॥ अर्हेकृत्यतृचश्चेति ॥ कृत्यास्तृनश्च अर्थे भवंतीत्यर्थः ॥ कृत्याः प्राङ्ण्वुलतिण्तृचाविन्यन प्राग्विहितानां कृत्यत्वेन यत्प्रत्ययस्यापि तथात्वे ॥ कृत्यत्वाद्यत्प्रत्ययांतस्याच्छेद्य इत्यस्य छेदाद्ययोग्यत्वमेवार्थं सिध्यतीति भाव

इत्यत एवं शंकितत्वात् ॥ विशिष्यंत इति विशेषाः ॥ विशिष्टनिमित्तानिविनाशस्य ॥ २३॥ तह्यच्छेद्योयमित्यादिपुनरुक्तमित्यत आह ॥
॥ वर्तमानेति ॥ लटः प्रयोगेन वर्तमानस्यैव छेदादिनिषेधादिदानीं दृश्यमानत्वेनात्मनः प्राग्विनाशाभावेप्युत्तरत्र शस्त्रादिना विनाशः स्या

नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः ॥ नचैनंक्लेदयंत्यापोनशोषयतिमारुतः ॥ २३ ॥
अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्यएवच ॥ नित्यःसर्वगतस्थाणुरचलोयंसनातनः ॥२४ ॥

इत्यतो विशेषनिमित्तानिनिषेधति॥नैनमिति॥२३॥वर्तमाननिषेधात्स्यादुत्तरत्रेत्यतआह॥अच्छेद्यइति
दितिशंकायां छेदादियोग्यत्वमात्मनोनास्तीति प्रतिपादनायेदमुदितम् ॥ अर्हेकृत्यतृचश्चेतिकृत्यस्याहार्थत्वस्मरणादितिभावः

॥ कृ० ॥ यद्यपि चतुर्थस्कंधे दध्यौपशुपतिश्चिरमिति ध्यानमात्रमुक्तम ॥ न तत्फलं तथापि दृष्ट्वा संज्ञपनं योगं पशूनां मपतिर्मिते॥यजमानपशोः कस्य कायात्तेनाहराच्छिर इत्युत्तर श्लोकेमत्र इत्युक्तेर्यजमानस्य पशुत्वोक्तश्लोकत्रकाख्यानमेव दध्यावित्यनेनग्राह्यमित्यभिप्रेत्येवमुक्तम ॥ ननु भावसाधनस्य विशेषशब्दस्य कथंनिमित्तशब्दसामानाधिकरण्यमित्यतआह ॥ विशिष्यंत इति ॥ कर्मणि घञंतोऽत्र विशेषशब्द इति भावः ॥ २३ ॥ ननुतत्रैविव पूर्वत्रेति कुतोनशंक्यत आह ॥ इदानीमिति ॥ ॥

१ ध्यानफलंदर्शनंतत्रयाऽऽकृतिःमिध्यानेऽर्थितिभाव मत्रशूर्ग[illegible]मनंतशूनानंदृश्नेहनंनमंत्राद्यागणपूर्वकोपायंदृष्ट्वातेनउपायेन यजमानरूपपशोदेहस्यदेहाच्छिरआहरदित्यन्वयः

॥ श्री० ॥ तर्हितेनैवेति ॥ अच्छेद्यइत्यनेनैवछेदाद्ययोग्यत्वस्यप्रतिपादितत्वात्तेनैवेति श्लोकस्यवैयर्थ्यमित्यर्थः ॥ प्रसक्तावित्यत्रशस्त्रादिना छेदादेरिति पूरणीयम् ॥ औत्तराधर्येति ॥ उत्तरशब्दः पश्चात्तनार्थकः अधरशब्दः पूर्वतनार्थकः तथाच उत्तराधरयोः भवोपि औत्तराधर्यं ॥ एतच्छेदाद्ययोग्यत्वरूपसाध्यप्रतिपादनपरस्याच्छेद्योयमित्युत्तरश्लोकस्य पूर्वतनत्वंस्यात् छेदाद्ययोग्यत्वे हेतुकथनेन युक्ततां प्रतिपादयति नैनमितिपूर्वकस्य पश्चात्तनत्वंस्यात् इत्येवमनयोः श्लोकयोः पौर्वापर्यप्रसंग इत्यर्थः ॥ उपोद्घातेति ॥अच्छेद्यइत्यनेन छेदाद्ययोग्यत्वरूपसाध्यं वक्तुं तत्रहेतुत्वेन वर्तमाननिषेधस्यादुक्ततेति प्रायस्त्याशंका नन्वयोक्तत्वांशशंकातत्र ज्ञायते साधनमात्रकथनाभिप्रायं भगवतोन जानातीति ॥ तथाच तादृशस्य शंकांवर्तमाननिषेधादित्यादिना नृत्यन्वन आहेत्यच्छेद्योयमिति श्लोकस्य मित्यादित्यर्थः ॥ ननुभाष्यकारैस्तशंकामनुद्भाव्यनापिस्वेननाप्राप्ति औत्तराधर्यशंका या अभावेऽपि भगवतो गीताकारस्यापि अच्छेद्यइति छेदाद्यभावं पश्चात्प्रतिपादयतः कोभिप्रायः अत आह ॥ स्वाभिप्रायेणत्विति ॥ गीताकाराभिप्रायेणेत्यर्थः ॥ ननु कुतोहेतोः शंक स्याच्छेदाद्ययोग्यतानिश्चयेति शंकानयुक्ता ॥ नैनमित्यनेन वर्तमानछेदाद्यदर्शनस्यहेतुत्वेनोक्तत्वादित्यत आह॥वर्तमानेति पश्चादिति॥ तथाच वर्तमानकाले छेदादेरदर्शनेपि उत्तरत्र स्यादि

तर्हितेनैवालंकिमाद्येन श्लोकेनेत्यत आह ॥ वर्तमानेति ॥ प्रवृत्ते शस्त्रसंपात इति वचनात्प्रसक्तौ सत्यामपि वर्तमानस्य छेदादेरदर्शनाच्छेदाद्ययोग्यत्वमात्मनो युक्तमिति दर्शयति प्रथमश्लोकेन ॥एवं तर्ह्यौत्तराधर्यप्रसंग इति चेन्न ॥ उपोद्घाताभिप्रायेण भगवतोक्तेऽभिप्रायमजानानस्य शंकामनुद्भाव्यनारभ्यकत्वात् ॥ स्वाभिप्रायेण तूपोद्घातमुक्त्वा साध्यमाहेत्यवतारःकर्तव्यः॥ नित्यः सर्वगत इत्यादिकं जीवेऽसं

वर्तमानादर्शनाद्युक्तमयोग्यत्वमितिनिश्चयतिवर्तमानापदेशेन॥कुतोऽयोग्यता॥नित्यसर्वगतादिविशेषणेश्वरसरूपत्वात्

भावितमित्याशंक्यतन्निवर्त्यशंकाप्रदर्शनपूर्वकं व्याचष्टे॥कुतइति॥वर्तमानछेदाद्यदर्शनमात्मनःछेदाद्ययोग्यतायां किं निश्चययुक्तिः उतसंभावनायुक्तिः नाद्यःकदाचिददृष्टस्यापि पश्चाद्दर्शनात॥द्वितीये तु कुतो योग्यतानिश्चय इति शंकार्थः॥नित्यसर्वगतेति भावप्रधानो निर्देशः॥ईश्वरस्य तावच्छेदाद्ययोग्यत्वंसिद्धम् ॥ नित्यसर्वगतत्वादिविशेषणवत्वात् ॥ नह्येवं भूतस्यछेदादिकं संभवति ॥अतस्तत्प्रतिबिंबस्यापि जीवस्य तदयोग्यत्वमिति भावः ॥

ति शंकास्यादेवेत्यर्थः ॥ कृ० ॥ औत्तराधर्येति ॥नैनंछिंदंतीत्यस्योत्तरत्वमच्छेद्योयमित्यस्यपूर्वत्वंस्यादित्यर्थः ॥ उपोद्घातेति ॥ नैनंछिंदंतीत्युक्तस्य वर्तमानछेदाद्यभावस्याच्छेद्योयमिति वक्ष्यमाणछेदाद्ययोग्यत्वंप्रति हेतुत्वाभिप्रायेणेत्यर्थः ॥ एवंतर्हिवर्तमाननिषेधादित्यादि शंकानवकाश इत्यत आह ॥ अभिप्रायमजानानस्येति ॥ शंकामिति ॥ वर्तमाननिषेधादित्यादिभाष्योक्तामित्यर्थः ॥ स्वाभिप्रायेणेति ॥ भगवदभिप्रायेणेत्यर्थः ॥ननु वर्तमानदर्शनादित्यनेन छेदाद्ययोग्यताया हेतोरुक्तत्वात् कुतोऽयोग्यतेति शंकानवकाशइत्यतोभिप्रायमाह ॥ वर्तमानेति ॥ नित्यसर्वगतत्वादीति ॥आदिपदात्स्थाणुरचलइत्यादिनाविकार्योयमुच्यतइत्यंतेनोक्तविशेषणसंग्रहः ॥ छेदादिकर्मेति ॥ छेदादिकर्महेतुमित्यर्थः ॥अयमाशयः ॥ अच्छेद्योयमित्यादिकृत्यप्रत्ययोऽर्हेकर्मणि॥अर्हमात्रार्थत्वेतयोरेवैत्यवधारणाविरोधात्

॥ श्री० ॥ मंत्रवर्णेशाश्वतइतीति ॥ ननुमंत्रवर्णगतपदेनगीतापदस्यैकार्थत्वंगुणएवातः कथमिदमितिचेन ॥ उच्यते ॥ नात्रमंत्रवर्णगतशाश्वतपदेनस्थाणुपदस्यार्थभेदकथनेतात्पर्यंकिंतु उपा धिविंबमन्निभिनाशप्रयुक्तनाशशंकापरिहारायपूर्वमप्रमेयस्येति विशेषणमुक्तं ॥ तेनमंत्रवर्णगतंशाश्वतपदंममानार्थंतेनापिउपाधिविंबमन्निभिनाशप्रयुक्तनाशशंकायाएवपरिहारात ॥ अतोयस्मि न्गीतागतप्रमेयपदेमंत्रवर्णगतंशाश्वतपदंममतिरूपंतस्याप्रमेयपदस्यस्थाणुपदस्यार्थभेदउच्यतइतिज्ञातव्यम् ॥ एवमुत्तरत्रापि ॥ अजोनित्यइतिनित्यत्वमीश्वरस्यप्रागुक्तमित्युच्यतेतस्याप्येवमे वार्थः ॥ अजोनित्यइतिमंत्रवर्णोयत्रनत्वेवंत्यत्रमंमतित्वेनोच्यतेतद्गीतोक्तमेवविशेषणंग्राह्यमितिद्रष्टव्यम् ॥ भेदमाहेति ॥ अर्थभेदमाहेत्यर्थः ॥ सामान्येति ॥ अजोनित्यइत्यादिसामान्य प्रकरणत्वादित्यर्थः ॥ **नैमित्तिकेति** ॥ नैनंछिदंतीत्यादिनिमित्तनिषेधपरप्रकरणांतर्गतत्वादित्यर्थः ॥ नन्वेवमर्थभेदकथनस्यकःप्रकृतोपयोगइत्यतआह ॥ **अस्येति** ॥ नित्यत्वस्यसर्वगतत्व विशेषणत्वेनित्यसर्वगतेतिसमस्तंपदंस्यातनह्येवमास्तिकिंतुनित्यइत्यसमस्तमेवातः कथमेतदित्यतउक्तम् ॥ **भिन्नपदोक्तमपीति** ॥ **विशिष्टस्येति** ॥ सर्वगतत्वस्थाणुत्वविशिष्टस्येश्वरस्येत्यर्थः विशेषणंसर्वगतत्वम् ॥ ननुस्थाणुत्वविशिष्टस्येदंविशेषणंभवतविशेषणंस्थाणुत्वमुपसंक्रामतीतिकस्मान्नस्यादित्यतआह ॥ **सन्निधानादिति** ॥ नित्यःसर्वगतइतिशब्दसन्निधानादित्यर्थः ॥ ॥

मंत्रवर्णेशाश्वतइतीश्वरविशेषणमुक्तम् ॥ अतस्थाणुरितितयोर्भेदमाह ॥ शाश्वतइति ॥ एकरूपत्वमात्रंसामान्येनान्यथात्वाभावः ॥ तस्यसा मान्यप्रकरणत्वात् ॥ स्थाणुरित्यस्यनैमित्तिकनिषेधप्रकरणत्वात् ॥ अस्यार्थभेदकथनस्योत्तरत्रोपयोगंवक्ष्यामः ॥ नित्यइतीश्वरविशेषणंप्रतिभा

शाश्वतइत्येकरूपत्वमात्रमुक्तम् ॥ स्थाणुशब्देननैमित्तिकमप्यन्यथात्वंनिवारयतिनित्यत्वंसर्वगतत्वविशेषणम्

तितदन्यथाव्याचष्टे॥नित्यत्वमिति॥ भिन्नपदोक्तमपिविशिष्टस्यविशेषणंविशेषणमुपसंक्रामति॥सन्निधानाच्चसर्वगतत्वमितिभावः॥ ॥

॥ कृ० ॥ कर्मचचतुर्विधं ॥ उत्पाद्यंचविकार्यंचप्राप्यंसंस्कार्यमेवचेत्युक्तेः ॥ तत्रनतावदीश्वरस्यप्राप्यत्वरूपंछेदादिकर्मत्वंनित्यत्वेनक्रियाजन्यप्राप्त्याश्रयत्वरूपप्राप्यत्वायोगात् ॥ नापिवि कार्यत्वरूपंछेदादिकर्मत्वं ॥ ईश्वरस्यनैमित्तिकान्यथाभावशून्यत्वरूपस्थाणुत्वेनसुवर्णकुंडलंकरोतीतिवत्क्रियाजन्यविकाराश्रयत्वाभावात् ॥ नापिसंस्कार्यत्वरूपंतत् ॥ अचलत्वात् ॥ सक्रिय स्यैवदर्पणादेःसंस्कार्यत्वात् ॥ नाप्युत्पाद्यत्वात्मकंकर्मत्वं ॥ त्रैकालिकत्वरूपसनातनत्वेनघटंकरोतीतिवत्तदयोगात् ॥ नकेवलंयावद्विशेषाभावमात्रेणछेदादिकर्मत्वसामान्याभावः॥ किंतुतद्ग्रा हकप्रमाणाभावाच्च ॥ नतावत्प्रत्यक्षंछेद्यत्वादौमानम् ॥ अव्यक्तत्वात् ॥ नाप्युमानंअचिंत्यत्वात् ॥ नाप्यागमःअविकार्यत्वेनवेदादिभिरुक्तत्वात् ॥ तथाचेश्वरस्यछेद्यत्वादिकंनसंभवतीति सिद्धमिति ॥ ननुमंत्रवर्णस्थपदेनगीतापदस्यैकार्थत्वंगुणएवमंत्रवर्णस्योक्तार्थसंमतित्वात् ॥ तत्कथंपुनरुक्तिचोद्यमितिचेन्न ॥ एकत्रोक्तस्येश्वरप्रतिबिंबत्वस्यान्यत्रापिहेतुत्वेनशिष्यैरेवज्ञातुंशक्य त्वात्किंपुनर्वचनेनेत्याशयात् एवमग्रेपि नन्वीश्वरप्रतिबिंबत्वमनेकसाध्यसिद्धयेहेतुत्वेनगीतायामुक्तम् अतःप्रमेयभेदेनपुनरुक्तिचोद्यानवकाशादर्थभेदकथनमयुक्तमित्यतआह॥**अस्योति** **उत्तरत्रे** ति ॥ ऐकयोक्तावपीत्यग्रिमवाक्यव्याख्यावसरेएतदापेनास्तीत्यादावित्यर्थः ॥ ननुयदिनित्यत्वविशेषणमुपसंक्रामतितदास्थाणुत्वंकुतोनोपसंक्रामेदविशेषादित्यतआह ॥ **सन्निधानाच्चेति** ॥

॥ श्री० ॥ द्व्यं ॥ नित्यत्वंसर्वगतत्वंचेत्यर्थः ॥ ननुनित्यत्वस्यसर्वगतत्वविशेषणत्वकथनस्यकुत्रोपयोगइत्यतआह ॥ अस्यापीति ॥ नित्यत्वस्यसर्वगतत्वविशेषणस्यापि ॥ ननुक्षणादिरूप
कालनिष्ठसर्वगतत्ववदीश्वरनिष्ठसर्वगतत्वस्याप्यनित्यत्वेउपाधिबिंबसन्निधिनाशात्प्रतिबिंबभूतजीवनाशोस्त्वितिशंकाननिरस्तास्यादतोनित्यत्वंसर्वगतत्वेविशेषणमित्यंगीकार्यम ॥ तथाचतच्छंका
निरस्ताभवतीत्युत्तरत्रपुनरुक्तिपरिहारेउपयोगोभविष्यतीत्यर्थः ॥ बहुवारमिति ॥ अप्रमेयस्य अजोनित्यः सर्वगतइतिबहुवारामित्यर्थः ॥ जीवस्येश्वरैक्ये ॥ जीवस्येश्वरेणैक्ये ॥ तत्रतत्र ॥ प्र
मेयविशेषे ॥ जीवस्यब्रह्मणोऽत्यतभिन्नत्वात्कथमैक्योक्तावित्युक्तामित्यतआह ॥ ऐक्यमत्रेति ॥ सारूप्येणत्यर्थः ॥ कथमनेनपुनरुक्तिदोषपरिहारइत्यतआह ॥ विशेषणेति ॥ अजत्वादिवि
शेषणभेदादजत्वादिरूपभिन्नभिन्नविशेषणघटितसादृश्यरूपप्रतिबिंबरूपस्यापिभेदान्नपुनरुक्तिरितिभावः ॥ विशेषणभेदोऽसिद्धइत्याशंकते ॥ नन्वाति ॥ एतदपि ॥ भिन्नभिन्नविशेषणत्व
मपीत्यर्थः ॥ प्राचीनोग्रंथइति ॥ अनेनास्यार्थभेदकथनस्योत्तरत्रोपयोगंवक्ष्यामइत्युक्तंप्रदर्शितंभवतीतिद्रष्टव्यम ॥ तटस्थःशंकते ॥ नन्विति ॥ तत्तत्साध्येति ॥ छेदाद्ययोग्यत्वादिरूप

द्वयंपृथगीश्वरविशेषणंकिंनस्यादित्यतआह ॥ अन्यथेति ॥ अजोनित्यइतिनित्यत्वमीश्वरस्यप्रागुक्तं ॥ अप्रमेयस्येतिसर्वगतत्वंच ॥ अतस्ताभ्यांपु
नरुक्तेरित्यर्थः अस्याप्युत्तरत्रोपयोगः ॥ ननुजीवस्येश्वरप्रतिबिंबत्वमत्रबहुवारमुक्तम् ॥ अतःपुनरुक्तिरित्यतआह ॥ ऐक्योक्ताविति ॥ जीवस्ये
श्वरैक्यविषये नपुनरुक्तिदोषः ॥ कुतः ऐक्यमात्रस्य पुनःपुनरुक्तावपि पूर्वपूर्वानुक्तानांतत्र तत्रोपयुक्तानामीश्वरविशेषणानामुत्तरत्रोपादानादिति

अन्यथापुनरुक्तेः ॥ ऐक्योक्तावप्यनुक्तविशेषणोपादानान्नेश्वरैक्ये पुनरुक्तिः ॥

ऐक्यमत्र गौणंविवक्षितम् ॥ विशेषणभेदाद्विशिष्टभेद इति भावः ॥ ननुएतदपि नास्ति ॥ शाश्वत इत्युक्तस्यैव स्थाणुशब्देनग्रहणादित्यादि
शंकानिरासाय शाश्वत इत्येकरूपत्वमात्रमित्यादिकः प्राचीनोग्रंथः ॥ ननुप्रतिबिंबत्वंतत्तत्साध्यसिद्धयेहेतुत्वेनोक्तम् ॥ नचैकस्यैवहेतोरनेकसा
ध्यसिध्यर्थं पुनःपुनरुपन्यासेदोषोऽस्ति ॥ ॥ ॥ ॥ ॥

साध्यसिद्धयइत्यर्थः ॥ ॥कु० ॥ अस्याप्युत्तरत्रेति॥भवतागिकादिप्राग्वत॥ऐक्यमत्रगौणमिति॥सादृश्यमेवगौणैक्यं ॥ सादृश्याभेदसंश्रयात्इत्यादौतथैवव्यवहारादितिभावः॥इत्यादि
शंकेति आदिपदेनाजोनित्यइत्युक्तमीश्वरस्यनित्यत्वमप्रमेयस्येत्युक्तंसर्वगतत्वंचनित्यःसर्वगतइत्यनेनोच्यतइतिशंकासंग्रहः ॥ इत्यादिकइति॥नित्यत्वंसर्वगतत्वविशेषणमितिग्रंथआदिपदार्थः

॥ श्री० ॥ सिद्धांतीत्युक्तमिति ॥ तत्कस्येति ॥ अनेकसाध्यभेदत्वेन पुनरुक्त्याभिकम्माल्पुनरुक्तिदोषोनास्तीत्यर्थः ॥ तस्मादुत्तरमाह ॥ प्रमेयेति ॥ छेदाद्ययोग्यत्वादिरूपसाध्यभेदादित्यर्थः ॥ कथमियंशंकेति ॥ प्रतिबिंब [illegible] ॥ [illegible] ॥ नास्या पुनरुक्तोभावइत्याशयेनोत्तरम ॥ उच्यतइति ॥ स्वयंवचनेनेति ॥ कठोगीताकारेणपुन स्ववचनेनप्र [illegible] इत्यर्थः ॥ तत्वदृशिप्रश्नशंकेति ॥ [illegible] तद्विलक्षणशंकेत्यर्थः ॥ तत्तद्दोषपर्यकेति ॥ तत्तद्विलक्षणशंकानिरासोपयुक्तस्यर्थः ॥ स्वयमुपादानमिति ॥ [illegible] नामित्यर्थः ॥ परिहारेति ॥ [illegible] परिहारेत्यर्थः ॥ नियमाभावादिति ॥ मुख्यप्रतिबिंबस्यमानत्वेनमुख्यनिष्ठावदातत्वादिधर्मवत्त्वाभावेनव्यभिचार [illegible] ॥ बिंबसमानेति ॥ बिंबधर्मसमानेत्यर्थः ॥ अमतिविरोधइति ॥ प्रतिमुखत्वावदातत्वादुर्गीकारेभन्यस्य [illegible] ॥ ॥ ॥ ॥ ॥

तत्कस्यहेतोः ॥ प्रमेयभेदात ॥ अतःकथमियंशंकेति ॥ उच्यते ॥ पूर्वोक्तमीश्वरप्रतिबिंबत्वमन्यत्रापिहेतुत्वेनशिष्यैर्ज्ञायतांकिंस्वयंवचनेनेति शंकितुरभिप्रायः ॥ ईश्वरप्रतिबिंबत्वमात्मन्यतत्वदृशिप्रश्नशंकानिरासासामर्थ्यात ।तत्तद्दोषपर्यकविशेषणप्रदर्शनार्थस्वयमुपादानमितिपरिहा

युक्ताश्चबिंबधर्माःप्रतिबिंबेऽविरोधे ॥

राभिप्रायः ॥ नन्वीश्वरस्यानित्यसर्वगतत्वादिविशेषणवत्वादस्त्वच्छेद्यत्वादिकंजीवस्य तुकुतः॥ तथाविधेश्वरप्रतिबिंबत्वादितिचेन्न ॥ योयत्प्रतिबिंबःसतद्धर्मेति नियमाभावादित्यत आह॥युक्ताइति बिंबधर्माःबिंबसमानधर्माः॥योयत्प्रतिबिंबःसोऽसतिविरोधतद्धर्मेतिव्याप्तिरभिप्रेतेतिभावः

॥ कृ० ॥ तद्धर्मेतीति ॥ धर्मादिनित्यत्व [illegible] नित्यत्वादित्यर्थः ॥ ननु [illegible] प्रतिबिंबयोर्भेदात्कथंबिंबधर्माणाप्रतिबिंबनिष्ठत्वमित्यतआह ॥ बिंबसमानेति ॥ बिंबधर्मसमानधर्माइत्यर्थः ॥ एतदपिनास्तिबिंबत्वादिसमानधर्माणाप्रतिबिंबअभावादित्यत उक्तम ॥ अर्थानांविरोधइति ॥ ॥ ॥ ॥ ॥

१ तच्छब्देनबिंबस्योचितमनुलक्षणयातद्धर्मसमानार्थक ॥तथाचबिंबसमसमानाधर्माइत्यर्थितद्धर्माइति ॥अन्यथायत्तच्छब्दार्थयोः कार्येनस्याद्इतिज्ञेयम ॥

॥ श्री० ॥ ननुकुतोविरोधइत्यत प्रतिबिंबत्वांगीकारेंशत्वेनसहविरोधमुपपादयति ॥ प्रतिबिंबोहीत्यादिना ॥ पक्षद्वयेपीति ॥ प्रतिबिंबत्वांगीकारेस्मृतिसिद्धांशत्वेनविरोधः ॥ अंशत्वांगीकारे
चश्रुत्यादिसिद्धप्रतिबिंबत्वविरोधइत्यर्थः ॥ ईश्वराधीनेति ॥ भावप्रधानोनिर्देशः ॥ ईश्वराधीनत्वेसतितत्सादृश्योपेतत्वमित्यर्थः ॥ ननुबिंबनात्यंताभिन्नस्यजीवस्यकथंतदधीनत्वादिघटितंप्रति
बिंबत्वमित्यतआह ॥ अभेदमनपेक्ष्येति ॥ तदेवेति ॥ तदधीनत्वेसतितत्सादृश्यरूपंप्रतिबिंबत्वमेवेत्यर्थः ॥ जीवेदर्शनादितिभावः ॥ तत्कथमिति ॥ भवद्भिरत्यंतभेदघटितंप्रतिबिंबत्वं॥
भेदाभेदघटितमंशत्वंचकथमेकस्यसिद्धमितिभावः ॥ एकस्याभिन्नत्वमाह ॥ नकेवलमिति ॥ प्रतिबिंबत्वरूपमित्यादावुच्यते ॥ तदंशत्वम ॥ अंशोनानेत्यादिना ॥ अनेकार्थत्वादिति ॥

स्यादिदंव्याख्यानंयदिजीवस्येश्वरप्रतिबिंबतास्यात ॥ सैवकुतःसिद्धेत्यतआह ॥ नचेति ॥ ननुजीवस्येश्वरप्रतिबिंबत्वांगीकारेंऽशोनानाव्यपदे
शात्ममैवांशो जीवलोकइत्यादिवाक्यसिद्धेनतदंशत्वेनविरोधःस्यात ॥ प्रतिबिंबोहिबिंबादत्यंताभिन्नइतिकेषांचिन्मतंअत्यंतभिन्नइत्यपरेषां॥
अंशस्तुतदेकदेशः ॥ तेनभिन्नाभिन्नःयथापटांशस्तंतुःपटेन ॥ ततःपक्षद्वयेपिकथंनविरोधइत्यतआह ॥ नचेति ॥जीवस्येश्वरप्रतिबिंबत्वांगीकारे
पितदंशत्वविरोधः ॥ कुतइत्यतआह ॥ तस्येति ॥ प्रतिबिंबत्वस्यैवांशशब्दप्रवृत्तिनिमित्तत्वात् ॥ अयंभावः ॥ अत्यंतभिन्नस्यजीवस्ययदी
श्वराधीनतत्सादृश्योपेतत्वंतत्प्रतिबिंबत्वमुच्यते ॥ अभेदमनपेक्ष्यनिराकरिष्यमाणत्वात ॥तदेवतदंशत्वमितिकुतोविरोधइति ॥ नन्वंशत्वंतदेकदे

तताचरूपंरूपंप्रतिरूपोबभूव ॥ आभासएवचेत्यादिश्रुतिस्मृतिसिद्धा॥नचांशत्वविरोधः ॥ तस्यैवांशत्वात् ॥
नचैकरूपतैवांशता ॥ प्रमाणंचोभयविधवचनमेव ॥ शत्वंतत्कथमुच्यतेप्रतिबिंबत्वमेवांशत्वमितितत्राह॥नचेति॥ अंशतांशश

ब्दप्रवृत्तिनिमित्तं॥नकेवलमेकदेशत्वमंशशब्दप्रवृत्तिनिमित्तम्॥अपितुप्रतिबिंबतापीतिभावः॥अस्तुनामानेकार्थत्वमंशशब्दस्यतथाप्यंशोनानेत्या
दौ प्रतिबिंबत्वमेवांशत्वमित्यत्र किंप्रमाणंतदेकदेशत्वं किंनस्यादित्यतआह॥प्रमाणमिति॥जीवस्येश्वरप्रतिबिंबत्वंतदंशत्वं च तावदुच्यते॥नच
परस्परविरुद्धःशास्त्रार्थोभवितुंयुक्तः॥नचानेकार्थस्यांशशब्दस्याविरुद्धार्थं परित्यज्यार्थांतरंगृह्यतइत्यर्थापत्तिस्त्वत्रप्रमाणमितिभावः॥

ततश्चसावकाशमेवेत्यर्थः ॥ इदंचोत्तरत्रस्पष्टं ॥ ॥ क० ॥ निराकरिष्यमाणत्वादिति ॥ तत्तर्कतात्त्वनस्याविरोधस्योक्तपक्षस्यामइत्यादिनिर्दोषः ॥ एवशब्दलब्धार्थमाह ॥ नकेवलमिति॥

१अ०२पा०३अ०१८सूत्र१ अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके ॥ जीवोवपरस्यांशः तद्रूपजीवत्वेनतच्छेपभूत तदधीनत्वेसतिकिंचित्तत्सदृशरूपइतिच ॥
नानात्वेनव्यपदिशंतिपितापुत्रनिभ्रातेतिनानासंबंधव्यपदेशात इति भावः ॥ तस्यजीवस्य ब्रह्मदाशाब्रह्मकितवाब्रह्मैवेदाश इति ब्रह्माभेदमधीयते एकेशाखिनः ॥ अन्यःपरोऽन्यो
जीवइतिभेदंचयतःअतइतिद्वितीयेहेतुर्गतिमर्थःसत्यग्राहिणःवंचकाःदाशभिन्नाअन्येपिब्रह्मैवेतिश्रुत्यर्थः॥२अ०२पा०३अ० १८ सू०८जः जीवईशप्रतिबिंबएवअतोनमत्स्यादिसमइ०

॥ श्री० ॥ तत्त्वं ॥ अंशत्वं ॥ तदेव ॥ प्रतिबिंबत्वमेव ॥ तत्त्वं ॥ प्रतिबिंबत्वं ॥ तदेव ॥ एकदेशत्वमेव ॥ बाहुरूप्यमनेकरूपत्वं ॥ विशेषएवंति ॥ अंशेऽंशेकार्यकारीभिन्नांशशब्दप्रवृत्तिनिमित्त मित्यर्थः ॥ ननुतत्त्वंशेपटइवतदेकदेशत्वरूपंभिन्नाभिन्नत्वमेवांशशब्दप्रवृत्तौनिमित्तंकस्मान्नस्यादित्यतआह ॥ भेदाभेदेति ॥ आदिपदादत्यंतभेदसंग्रहः ॥एकदेशत्व ॥ भेदाभेदसहाभावादिना भावः ॥ चक्षुर्गोलिकं ॥ तदधीनसादृश्यं ॥ यमित्याभावादित्यस्तदेततत्रिवृतत्रिवृद्दिवचैचक्षुःशुक्लंकृष्णंकनीनिकेतिश्रुत्युक्तसादृश्यमित्यर्थः ॥ द्विरूपाविति॥ द्विरूपावंशकौतस्यपरस्यहरेर्विभोः ॥ प्रतिबिंबांशकश्चायस्वरूपांशकएवचेतिवाक्यशेषेणांशशब्दस्यानेकार्थत्वप्रतीतेरितिभावः॥स्थाणुत्वंनयुज्यतइति॥ नैमित्तिकान्यथाभावराहित्यंहिस्थाणुत्वं ॥ तच्चक्रियावेशात्मककर्तृत्वांगीकारेविरुद्धं ॥ क्रियावेशेनान्यथात्वस्यैव प्राप्तेरित्याशयः ॥ इत्यादीति ॥ इत्यादिश्रुतिप्रतिपादितक्रियावेशात्मककर्तृत्वेत्यर्थः ॥ ॥ ॥

स्यादेतत् ॥ तथाप्रतिबिंबत्वमेवतत्त्वं अंशशब्दस्यापि तदेवप्रवृत्तिनिमित्तमिति वचनद्वयविरोधशांत्यर्थं कल्प्यते तथैकदेशत्वमेव तत्त्वंप्रतिबिंबशब्दस्यापितदेवप्रवृत्तिनिमित्तमिति कुतोनकल्प्यम् ॥ वचनद्वयविरोधस्यैवमपिशांतेरित्यतआह ॥ नचेति ॥ अंशस्यांशत्वस्यैकदेशत्वस्य प्रतिबिंबत्वंप्रतिबिंबशब्दप्रवृत्तिनिमित्तत्वंनकल्प्यं ॥ कुतइत्यतआह ॥ गाधीति ॥ गाध्यादिष्वंशशब्दाभिधेयेषुअंशत्वस्यबाहुरूप्यदृष्टेः ॥ इ

नचांशस्यप्रतिबिंबत्वंकल्प्यं॥ गाध्यादिष्वंशबाहुरूप्यदृष्टेरितरत्रादृष्टेः॥ स्थाणुत्वेप्यैक्षतेत्याद्यविरुद्धमीश्वरस्य

तरत्रप्रतिबिंबशब्दाभिधेयेषुसूर्यकादिषुप्रतिबिंबत्वस्यानेकरूपत्वादृष्टेः ॥ इदमुक्तंभवति ॥ इंद्रांशोगाधीत्युच्यते ॥ तत्रविशेषएवांशशब्दप्रवृत्तिनिमित्तंभेदाभेदादेःप्रमाणबाधितत्वात् ॥ पटांशस्तंतुरित्यत्रैकदेशत्वंसूर्यांशश्चक्षुरित्यत्रात्यंतभिन्नस्यतदधीनसादृश्यं ॥ एवमंशशब्दोनेकार्थःप्रयोगेषुदृश्यते ॥ तथाचोक्तंद्विरूपावंशकौ तस्येत्यादि ॥ नचैवंप्रतिबिंबशब्दस्यानेकं प्रवृत्तिनिमित्तं दृश्यते ॥ तथाचसावकाशस्यांशशब्दस्यनिरवकाशेनप्रतिबिंबशब्देनबाधोयुक्तोनतुविपरीतयामिति॥नन्वीश्वरस्यस्थाणुत्वंनयुज्यते॥तदैक्षतसोकामयतेत्यादिकर्तृत्वविरोधादित्यतआह॥स्थाणुत्वेपीति॥

॥ कृ० ॥ द्विरूपावंशकौतस्येत्यादीति ॥ परमस्यहरेर्विभोः ॥ प्रतिबिंबांशकश्चायस्वरूपांशकएवचेतिश्लोकशेषः ॥ आदिपदादंशभागौतुवंटकइतिकोशसंग्रहः ॥ तत्रप्रमाणबलादंशशब्दस्याद्यांत्यार्थत्वंकोशाच्चद्वितीयार्थवाचित्वंसिध्यतीतिबोध्यम ॥ ॥ ॥ ॥ ॥

१ विशेषः तदधीनत्वेसतितत्सादृश्यमित्यर्थकत्वम् ॥ २ एकदेशार्थकत्वम् ॥

॥ श्री० ॥ द्वयोः ॥ स्थाणुत्वकर्तृत्वयोः ॥ परस्परविरहव्याप्यत्वंवापरस्परविरहरूपत्वंवेतीतिविकल्पद्वयार्थः ॥ यत्रस्थाणुत्वंतत्रकर्तृत्वाभावइतिपरस्परपरिहारेणवृत्तिदर्शनादित्येतद्युक्तंकुत इत्यतआह ॥ **कर्तृत्वरहितस्येति** ॥ स्थाणुत्ववतइतिशेषः ॥ निरुक्तस्थाणुत्ववतःचेतनस्यकर्तृत्वरहितस्याभावात् ॥ नचवर्णेषुकथमितिवाच्यम ॥ स्वतंत्र कर्तेत्यादिपारिभाषिककर्तृत्वस्यत त्रापिसत्वादित्याहुः ॥ **महादृष्टं** ॥ कर्तृत्वेनसहादृष्टंपरस्परविरहरूपत्वमित्यर्थः ॥ ननुयथाकथंचिदुभयमपिविरुद्धमितिचेत्तत्राह ॥ **कल्पितेति** ॥ **त्वयीति** ॥ विशेष्यस्यपृथगभिहि तत्वाद्ब्रह्मणीत्येतदपिविशेषणपरमित्यन्यथाप्रतीतिर्व्याख्याति॥**संपूर्णैश्वर्यइति** ॥ संपूर्णयऐश्वर्येऐश्वर्यंतस्मिन्नितिविग्रहेतन्नहुव्रीहिरयम ॥ ब्रह्मत्वऐश्वर्यत्वविशिष्टस्यविशेषणंभवतिविशेषणीभू तेईश्वरत्वेऽन्वेति ॥ संपूर्णैश्वर्येस्येवाविर्गाभषट्कत्वादिनिध्येयम ॥ विशेषणद्वयमैश्वर्यभागस्यैकमेवविशेषणमित्याह ॥ ब्रह्मणीश्वरइतिइत्यैवमाहुः ॥ **नयोगित्वादेति** ॥ नतस्यप्राकृता मूर्तिर्मांसमेदोस्थिसंभवा ॥ नयोगित्वादीश्वरत्वात्सत्वरूपोऽच्युतोविभुर्गीतश्लोकमांसमेदोस्थिसंभवाप्राकृतामूर्तिर्देहस्तस्यनास्तीत्युक्तार्थेहस्वाकांक्षायांतत्रयोगसामर्थ्यंहेतुः कस्मान्नस्यादित्यतउ क्तंयोगित्वात्प्राकृतामूर्तिर्नास्तीतिकिंत्वीश्वरत्वादेवेतिश्लोकार्थः ॥ ॥ ॥ ॥

कुतइतिचेत् ॥ किंद्वयोःपरस्परपरिहारेणवृत्तिदर्शनाद्विरोधश्चोद्यते उतसहादर्शनात् ॥ नाद्यः ॥ कर्तृत्वरहितस्यकस्याप्यदर्शनात् ॥ नद्वितीयइ त्याह ॥ उभयेति ॥ अन्यत्रसहादृष्टं स्थाणुत्वंकर्तृत्वंचकुतोभगवतीत्यतआह ॥ अचिंत्येति ॥ मायावदीतु कर्तृत्वस्थाणुत्वयोरेकं कर्तृत्वंमाया

उभयविधवाक्यात् ॥ अचिंत्यशक्तेश्च ॥ नचमाययैकं ॥त्वयीश्वरेब्रह्मणिनोविरुध्यते॥ नयोगित्वादीश्वरत्वात्

मयंस्थाणुत्वंतुपारमार्थिकं काल्पनिकपारमार्थिकयोश्चगगने नीलत्वनिरूपत्वयोरिवनविरोधइतिविरोधसमाधानं मन्यतेतदसदित्याह॥ नचेति॥ कुतइत्यतआह ॥ त्वयीति ॥ ब्रह्मणिईश्वरइतिसंपूर्णैश्वर्येनयोगित्वात्॥किंतुईश्वरत्वात् ॥ ॥ ॥ ॥

॥ कृ० ॥ त्वयीतिविशेष्यस्यपृथगुक्तेर्ब्रह्मणीत्यादिकंन तत्परंकिंतुविरोधाभावेहेतुप्रतिपादकं ॥ तत्रापिसविशेषणेहीतिन्यायेनब्रह्मणीत्यैश्वर्यविशेषणमितिव्याचष्टे ॥ संपूर्णैश्वर्येति ॥ ॥

१ कर्मधारयांगीकारेब्रह्मणीश्वरइत्येतद्व्याख्यानायोगादन्यपदार्थप्राधान्यपरित्यज्य स्वघटकपदार्थप्राधान्यस्वीकाराद्बहुव्रीहौवैपरीत्यंज्ञेयम् ॥ २ विभक्तेर्लुक्आर्षः ॥ ३ अपिपदेन कृष्णाचार्यकृतयोजनायाःसमुच्चयः ॥ ४ त्वयीतिविशेष्यस्येत्येतदारभ्यैतदंतंआहुरितिज्ञेयम् ॥ ॥

॥ श्री० ॥ नन्वकार्यप्रतिकारणत्वासंभवात्कारणपदेनैवकार्यकारणत्वलाभात्कार्येतिविशेषणंव्यर्थमित्यत आह ॥ सकलेति ॥ ननुइत्यादीन्ययुक्तमित्यादिनेतिवक्तव्यत्वादित्यत आह ॥ इत्यादीति ॥ इत्यादियथाभवतितथोक्तमित्यर्थः ॥ नन्वाश्चर्येविरुद्धानांकथंतत्रैवाविरोधइत्यत आह ॥ विरुद्धानामिति ॥ एवंविधेति ॥ विरुद्धयोःस्थाणुत्वकर्तृत्वयोर्मध्येएकंपारमार्थिकमपरंकाल्पनिकमितिसमाधानमित्यर्थः ॥ तदयुक्तमिति ॥ ईक्षणकर्तृत्वादिधर्माणांकाल्पनिकत्वकल्पनमित्यर्थः ॥ सकलेति॥ अनेनेक्षणादिभगवद्गुणजातंनमायामयंतद्महातात्पर्यविषयत्वाद्ब्रह्मस्वरूपवदित्यनुमानमुक्तंभवति ॥ भगवद्गुणजातस्यतद्महातात्पर्यविषयत्वेप्रमाणाभावादसिद्धिरित्याशंकते ॥ ॥ ॥

कार्यकारणेसकलकार्योत्पादनसामर्थ्येपीतइत्यादीतिक्रियाविशेषणम् ॥ विरुद्धानामन्यत्रसहानवस्थितानां धर्माणांभगवत्यविरोधस्य सहानव

चित्रंनचैतत्त्वयिकार्यकारणइत्याद्यैश्वर्येणैवविरुद्धधर्माविरोधोक्तेः ॥ महातात्पर्याच्च ॥

स्थानस्योक्तेः ॥ तथाचबादरायणीयं मतमवलंब्यमानस्यैवंविरोधसमाधानंअसांप्रदायिकमितिभावः ॥ इतश्चतदयुक्तमित्याह ॥ महातात्पर्याच्चेति ॥ सकलवेदानांपरमेश्वरगुणोत्कर्षे महातात्पर्यं॥ तत्रेक्षितृत्वादीनांमिथ्यात्वकल्पने तद्विरोधःस्यादित्यर्थः ॥ ॥

॥टी०॥ननुकार्यकारणइतिविशेषणंचित्रंनचैतदित्यत्रहेतुगर्भमितिवक्तव्यम॥फलांतरादर्शनात॥नचतद्युक्तम॥व्यभिचारेणहेतुप्रयोगादित्यत आह॥सकलेति ॥ नन्वविरोधप्रतिपादनंप्रतित्वयीश्वरइत्यादिवाक्यानांकारणत्वाद्बहुत्वाच्चतत्प्रतिपादकइत्यादिपदेतृतीयाबहुवचनेसतीत्यादिभिरितियुक्तम इत्यादीतिकथमित्यत आह ॥ क्रियाविशेषणमिति ॥ उक्तिशब्दोत्रक्रियाविशेषणमित्यर्थः ॥ तथाचक्रियाया असत्त्वरूपत्वेनकरणत्वादिशक्त्यनाश्रयत्वाद्बहुत्वादिसंख्यानाश्रयत्वाच्चतद्विशेषणानामपितथात्वं ॥ अतस्तृतीयाबहुवचनाभावः ॥ एकवचनंतुक्रियाव्ययानांभेदकान्येकत्वेपीत्यसरेणक्रियाविशेषणानांक्लीबत्वैकवचनांतत्वोक्तेर्युक्तं ॥ अतएवक्लीबत्वमपीतिभावः ॥ नचैवंमृदुपचतीत्यादौक्लीबत्वंप्रकृतेस्त्रीलिंगत्वंपंचम्येकवचनांतत्वंचस्यात् ॥ उक्तेरितिविशेष्यपदस्यतथात्वादितिवाच्यं ॥ भावानवबोधात ॥ उक्तिपदेहिद्वौभागौधातुःप्रत्ययश्चेतितत्रधातुनाऽसत्त्वभूताक्रियोच्यते ॥ प्रत्ययेनतुसत्त्वभूता ॥ यथोक्तंशब्दकौस्तुभे ॥ भूवादिसूत्रेपाकइत्यादौप्रकृत्यासाध्यावस्थाया असत्त्वरूपायाः क्रियायाउपस्थितिरिति ॥ सत्त्वभावस्तुयस्तस्याःसाधनादिनिबंधनइतिच ॥ तत्रधातुप्राप्तक्रियाविशेषणमेवेत्यादीतिपदस्योच्यतेइतिनोक्तदोषः ॥ व्याघातपरिहारायव्याचष्टे ॥ अन्यथेत्यादिना ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ **समस्तेति** ॥ भगवद्गुणोत्कर्षेवेदमहातात्पर्यविषय तन्मुख्यप्रयोजनीभूतमोक्षसाधनज्ञानविषयत्वादित्यनुमानमेवप्रमाणमित्यभिप्रेत्यव्याप्तितावदाह ॥ **यस्यहीति** ॥ अनेनयोय
च्छास्त्रप्रयोजनसाधनज्ञानविषयः सतच्छास्त्रविषयोयथाधर्मादिरितिसामान्यव्याप्तिरुक्ताभवति ॥ व्याप्तिसिध्यर्थमनुकूलतर्कमाह ॥ अन्यथेति ॥ अन्यथातत्प्रयोजनसाधनज्ञानविषयस्यापि
तच्छास्त्राविषयत्वेविषयप्रयोजनत्वेनाभिमतयोर्यः संबंधःप्रयोजनस्यतच्छास्त्रविषयविषयकज्ञानमन्यत्तद्विषयस्यत् तच्छास्त्रप्रयोजनकज्ञानविषयत्वमित्येवरूपःसनस्यादित्यर्थः ॥ इष्टापत्तिंप
रिहरति ॥ **तथाचेति** ॥ ज्ञानार्थज्ञानसंबंधश्रोतृंश्रोताप्रवर्तते ॥ शास्त्रादौतत्तत्कथ्य संबंध सप्रयोजनमित्यभियुक्तवचनादितिभावः ॥ इदानींपक्षधर्मतामुपपादयन्निगमयति ॥ **वेदस्यचेत्या
दिना** ॥ हेतुशरीरप्रविष्टस्यमोक्षनिष्ठवेदमुख्यप्रयोजनत्वस्यासिद्धिमाशंक्यतत्प्रतिपादनपरतयाभाष्यमवतारयंव्याचष्टे ॥ **सर्ववेदानांमोक्षइत्यादिना** ॥ **तत्रापीति** ॥ तत्रापिमोक्षएवार्थआ
त्यंतिकतयेष्यतइतिपूर्वंप्रतिसंतःक्रमाद्वचन ॥ **पुरुषार्थेष्वपीति** ॥ धर्मार्थकाममोक्षाणांयदत्यतविधानकमितिपूर्ववाक्येधर्मादीनां पुरुषार्थानांप्रकृतत्वादितिभावः ॥ अत्रमोक्षस्यार्थत्वमात्रमेवो

समस्तवेदानांभगवद्गुणोत्कर्षे तात्पर्यमित्येतदेवकुतइतिचेत ॥ उच्यते यस्यहिशास्त्रस्ययत्प्रयोजनंतत यज्ज्ञानाद्भवतिसतस्यविषयःइतिनियमः॥
अन्यथाविषयप्रयोजनयोः संबंधोनस्यात ॥ तथाचतत्प्रेक्षावतांप्रवृत्तिर्नभवेत ॥ वेदस्यचमोक्षःप्रयोजनम्॥ सचगुणोत्कर्षज्ञानादेवभवतीति
तत्रैवतस्यमहातात्पर्यंयुक्तमिति प्रतिपादयिष्यन्सर्ववेदानांमोक्षः प्रयोजनमित्येवाविरुद्धंनस्वर्गादेः फलांतरमितिकैश्चिदंगीकृतत्वादित्यतस्तत्ताव
मोक्षोहिमहापुरुषार्थः॥तत्रापिमोक्षएवार्थः॥अंतपुरेमिरेधीरानतेमध्येपुरेमिरे॥अंतप्राप्तिंसुखंप्राहुर्दुःखमंतरमेतयोः
त्साधयति ॥ मोक्षइति ॥ वेदोहिमहच्छास्त्रंवेदशास्त्रात्परं नास्तीतिवचनात ॥ तस्यचमहापुरुषार्थेनैवप्रयोजनेन भवितुंयुक्तम् ॥मोक्षश्चमहापुरु
षार्थः ॥ अतःसएवतस्यप्रयोजनमितिभावः ॥ मोक्षस्यमहापुरुषार्थत्वंकुतइत्यतआह ॥ तत्रापीति ॥ पुरुषार्थेष्वपिअत्रनिर्धारणेनमहत्त्वंगम्य
ते ॥ अंतेपुधर्ममोक्षपुमध्येपुअर्थकामपुअंतयोरंतरंमध्यम् ॥ ॥ ॥ ॥

च्यते अतःकथंधर्मादिमध्यतस्यमहत्त्वंमोक्षस्येतिअतआह ॥ **अत्रनिर्धारणेन** ॥ आसांगवांमध्येकृष्णागौः संपन्नक्षीरेत्यादौनिर्धारणेनमहत्त्वावगमादितिभावः ॥ **अंतेष्विति** ॥ नन्वत्रमो
क्षस्यैवांतत्वात्तस्यचैकत्वात्कथमंतेष्विति बहुवचनंकथंचांतयोरितिद्विवचनंधर्मस्यादित्वा कथंचतस्यांतत्वकामार्थयोर्मध्यत्वात्तयोश्चद्वित्वात्तत्रापिमध्येष्वितिकथंबहुवचनमितिचेत् ॥ अत्राहुरस्म
द्गुरुचरणाः॥ ॥ कृ० ॥ **अंतेष्विति** ॥ धर्ममोक्षयोःसाधनपूर्वकत्वेनांतत्वंतद्व्यक्तिबहुत्वाद्बहुवचनं चयुक्तमितिभावः ॥ यद्वाद्वावत्रांतशब्दावेकशेषानिर्दिष्टौ ॥ तत्रैकःप्रतीतार्थएव
अपरस्तुलक्षणयाऽद्यत्वार्थः ॥ यथाप्रथमयोःपूर्वमवर्णइत्यत्रान्यतरस्याद्वितीयालक्षकत्वेनप्रथमाद्वितीययोरितिव्याख्यायतेतद्वत् ॥ तत्रसाक्षात्परंपरयावार्थादीनांधर्मप्रयोज्यत्वाद्धर्म आद्यःमोक्ष
स्तुधर्मादीनामंत्यइतिसिद्धमेव ॥ तथाचधर्ममोक्षयोराद्यंतत्वादुक्तंयुक्तम ॥ ॥ ॥ ॥

॥ श्री० ॥ धर्ममोक्षव्यक्तीनांबाहुल्याद्‌तोध्वितिबहुवचनंयुक्तम् ॥ एवमेवमध्येप्वित्येतदपिअर्थकामव्यक्तिबाहुल्यादेव अंतयोरितिद्विवचनंतुसमुदायापेक्षंधर्मार्थकाममोक्षाणांधर्मादित्वेननिर्देशे मोक्षस्यांतत्ववन्मोक्षादित्वेन निर्देशेधर्मस्याप्यंतत्वाद्‌नोष्विति अंतयोरितिधर्मस्याप्यंतत्वोक्तिर्युज्यतइतिनकश्चिद्दोषइति ॥ एतावतेति ॥ अंतेपुगेमिरेअंतप्राप्तिसुखंप्राहुरितिमोक्षसमकक्षतयानिर्देशेनेत्यर्थः ॥ ननुमोक्षस्यभगवत्प्रसादसाध्यत्वएववाक्यान्युदाहर्तव्यानि भगवत्प्रसादान्यसाध्यत्वाभावप्रतिपादकस्यवासुदेवमनाराध्येत्यस्यकृतइत्यस्यचवाक्यस्योदाहरणमयुक्तमित्यत आह ॥ मोक्षस्येत्यादिना ॥ प्रसादादेवेत्येवशब्दार्थमाह ॥ अन्येति ॥ यथायोगमिति ॥ वासुदेवमनाराध्यकृतेभवत्प्रसादादितिवाक्यद्वयम् ॥ अन्यसाध्यत्वाभावेप्रमाणम् ॥ इतरद्वाक्यजातंप्रसादसाध्यत्वप्रमाणमित्यर्थः ॥ छद्मनाविनेति ॥ व्यलीकंत्वप्रियेऽनृतइत्यभिधानादनृतस्यैवछद्मरूपत्वादितिभावः ॥ ॥ ॥

नैतावताधर्मोमोक्षसमः ॥ क्षयिफलत्वादित्याह ॥ पुण्येति ॥ चितःप्राप्तः ॥ अस्त्वेवंततःकिमित्यतआह ॥ सचेति ॥ मोक्षस्यभगवत्प्रसादसा

पुण्यचितोलोकःक्षीयतइत्यादिश्रुतिस्मृतिभ्यः ॥ सचविष्णुप्रसादादेवसिध्यति ॥ वासुदेवमनाराध्यकोमोक्षंसमवाप्नुयात् ॥ तुष्टेतुतत्रकिमलभ्यमनंतईशे ॥ तत्प्रसादादवाप्नोतिपरांसिद्धिंनसंशयः ॥ येषांसएवभगवान्दययेदनंतःसर्वात्मनाऽश्रितपदोयदिनिर्व्यलीकं ॥ ॥ ॥ ॥

ध्यत्वंअन्यसाध्यत्वाभावश्चेतिद्वेएतेप्रमेये॥तत्रयथायोगंवाक्यान्येतानिज्ञातव्यानि॥यदिनिर्व्यलीकं छद्मनाविनासर्वात्मनासर्वेणप्रकारेणआश्रितपदो भगवान्येषां दययेद्दयांकुर्यात् ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ अथवैकशेषनिर्दिष्टयोरेकःसमीपवाचीअपरस्तुस्वरूपार्थः ॥ अंतंस्वरूपेनाशे नानस्त्रीत्वेऽतिकेत्रिलिंगति मेदिनीकोशात ॥ तत्रधर्मःसमीपवर्तीमोक्षस्तुस्वरूपभूतः ॥ ततउक्तव्याख्यानंयुक्तम ॥ बहुवचनंचप्राग्वदेवेतिदिक् ॥ अर्थकामयोर्मध्यत्वंतुकरूपधर्ममोक्षमध्यवर्तित्वादितिबोध्यम ॥ अंतप्राप्तिसुखंप्राहुरित्यत्रमोक्षस्य सुखत्वंधर्मस्यतुतत्साधनत्वामिति द्रष्टव्यंभाववोधेतुधर्मार्थकाममोक्षाणांधर्मादित्वेननिर्देशेमोक्षस्यांतत्वं मोक्षादित्वेननिर्देशेधर्मस्याप्यंतत्वाद्‌तोष्वित्युपपन्नमित्युक्तम् ॥ द्वयमेवइति ॥ विष्णुप्रसादादेवेत्येवशब्दादितिभावः ॥ यथायोगमिति ॥ वासुदेवमनाराध्यकृतेभवत्प्रसादादितिवाक्यद्वयमन्यसाध्यत्वाभावेप्रमाणंतदन्यत्सर्वंप्रसादसाध्यत्वइतियथासंभवमित्यर्थः ॥ श्रितपदइति ॥ अनेनसर्वात्मनाभगवत्पादाश्रयणंदयाकारणमुक्तं वेदितव्यम् ॥ ॥ ॥ ॥ ॥ ॥

१ धर्मसमुदायएकःमोक्षसमुदाय एकइतिद्वित्वादितिभावः ॥ २ श्रीमद्भागवतेस्कंध २ अ० ७ श्लोक ४२ ॥ ३ श्रितपदोइत्यपिपाठांतरं ॥ ॥

॥ श्री० ॥ देवमायाशब्दस्यैवार्थांतरमाह ॥ संसारमिति ॥ ऋतेयदस्मिन्नित्यस्योत्तरार्धं आत्मन्लभंतेभगवंस्तवांघ्रिछायांशविद्यामतआश्रयेमेति ॥ अत्रऋतइत्यस्याविनेत्यर्थकत्वेउत्तरत्रछायांशविद्यामाश्रयेमेत्युक्तत्वाद्यामृतनिवान्यंस्यात ॥ यच्छायांशविद्याश्रयणम ऋतइत्यर्थकरणेपि अन्यारादितरर्तइतिऋतेयोगेपंचमीविधानादतएवोत्तरत्रऋतेभवत्प्रमादादादिति प्रयोगादत्रापियस्माद्दित्येवप्रयोगःस्यात ॥ ज्ञानसूर्यमृतेब्रुयादित्यत्रविनाचनमित्यादिप्रयोगाद्विनायोगइवऋतेयोगेपिद्वितीयाभवत्येवेति सुधोक्तप्रकारस्यागतिकगतित्वात् ॥नचयद्यस्माच्छायांशविद्याश्रयणादितिविभक्तिव्यत्ययेनव्याख्याइतिवाच्यम ॥ उत्तरार्धे अतइतिश्रवणात्तस्य नयच्छब्दमापेक्षत्वेनयद्यस्मात्कारणादित्यन्वयार्थकत्वस्यैवौचित्यादतोऽत्रऋतइत्येतन्नविनेत्यर्थकंकिंतुऋतंसत्यमित्याद्युत्तरत्रवक्ष्यमाणाभिधानबलात्सत्यइत्यर्थकं मद्वस्वरूपकथनपरंविशेषणमित्याशयेनव्याचष्टे ॥ ऋतेसत्यइति ॥ यद्यस्मात्कारणात ॥ तथाचेहभगवन्ईशयद्यस्मात्कारणात्तापत्रयेणोपहताजीवाऋतेसत्यभूतेस्मिन्भवेसंसारे आत्मन्नात्मनिशर्मसुखनलभंते तस्मात्कारणात्तवांघ्रिश्छायांशविद्यामाश्रयेमेतियोजना ॥ छायांशविद्याशब्दार्थस्तुब्रह्मविद्याहरेश्छायेति तृतीयस्कंधतात्पर्यानुसारेणद्रष्टव्यः ॥ अतस्तवांघ्रेश्छायांशविद्यामाश्रयेमेतिसंबंधइत्येवपाठः ॥ छायामाश्रयेमेतिपाठस्तुनिचार्यः ॥ ॥ ॥

तर्हियेषांश्वशृगालभक्ष्येदेहे ममाहमितिधीर्न भवतितेदेवमायां देवस्यमहिमानंविदंति अतितरंतिचसंसारमित्यर्थः ॥ ऋतेसत्ये ॥ यद्यस्मात् ॥

तेवैविदंत्यतितरंतिचदेवमायांनैषांममाहमितिधीःश्वशृगालभक्ष्ये ॥ तस्मिन्प्रसन्नेकिमिहास्त्यलभ्यंधर्मार्थकामैरलमल्पकास्ते ॥ ऋतेयदस्मिन्भवईशजीवास्तापत्रयेणोपहतानशर्म ॥ आत्मल्लँभंते ॥ ॥

ईशेतिसंबुद्धिः ॥ अतस्तवांघ्रेश्छायार्म् ॥ आश्रयेमेतिसंबंधः॥ ॥ ॥ ॥

॥ क्र० ॥ देवमायाम ॥ विदंतिसंसारमतितरंतिचेति द्वितीयस्कंधतात्पर्यानुसारेणव्याख्याति ॥ तेदेवमायामित्यादिना ॥ संसारमिति ॥ देवमायाशब्दस्यार्थांतरमिदम् ॥ नन्वेवमपिनप्रकृतसिद्धिरित्यतआह ॥ अतस्तवेति ॥ अत्रछायांशविद्यामाश्रयेमेति संबंधइत्येवपाठः ॥ तृतीयस्कंधतात्पर्येछायांशविद्यामित्यस्यैकपदत्वेनव्याख्यानात ॥ ॥

१ अनेनविशेषणेनज्ञानमात्रात्सत्यस्यानिवृत्तेरसंभवस्तस्माज्ज्ञानेनप्रमादआक्षिप्यतइतिभावः ॥ २ विनास्तुकृष्णाचार्यैरकारितवद्रष्टव्यः ॥ ३ एकविधमायाशब्दार्थांगीकारेभगवन्महिमातिक्रमोऽन्येषांप्रमाणबाधितः अन्यमायाज्ञानस्यैवयथ्योश्चोभयविधाप्यत्रगृहीता ॥ तथाचज्ञानस्यसंसारतारकत्वंतमेवंविद्वानमृतइहेत्यादि श्रुतिसिद्धहेतुत्वेनानसंगृहीतमइतिभावः ॥ ४ अतीत्युपसर्गेणपुनरावृत्त्यभावः ॥ ५ उपादानकारणभूतशैवलीमायासंबंधाभावादितिभावः ॥ नकाराद्यथाज्ञानेप्रसादःकारणंतथैवमोक्षेसाक्षात्इतिज्ञेयम ॥एतेनज्ञानंप्रत्येवप्रसादःकारणंमोक्षस्तुज्ञानादेवनप्रसादसापेक्षइतिपरास्तम्॥ ६ देवस्यमायाम्स्वरूपशक्तिंतदधीनांसंसारहेतुभूताम्शैवलींच॥आद्यांविदंतिद्वितीयामतितरंतिचेतिसंबंधः॥ ७स्कंध ३ अ० ६ श्लोक १८॥८ छायांशविद्यामितिपाठः॥

॥ श्री० ॥ ननुतमेवंविद्वानितिवाक्येमोक्षस्यज्ञानसाध्यत्वोक्तत्त्वाप्रसादसाध्यत्वानुक्तेरसंगतंतदुदाहरणमतआह ॥ **ज्ञानमिति** ॥ अनुपदंवक्ष्यते ॥ सचेत्यनेनेत्यर्थः ॥ **विष्णुप्रसादश्चेति** ॥ उत्तमप्रसादइत्यर्थः ॥ कर्मणात्वधमःप्रोक्तःप्रसादःश्रवणादिभिः ॥ मध्यमोज्ञानसपत्त्याप्रसादस्तूत्तमोमतइतिप्रमाणादितिध्येयम ॥ **अनुमानादिति** ॥ विष्णुप्रसादोगुणोत्कर्षज्ञानसाध्यः ॥ सत्पुरुषप्रसादत्वाद्राजादिप्रसादवदित्यनुमानादित्यर्थः ॥अन्यथेति॥अनुमानेनलोकप्रसिद्धस्याप्यंगीकार्यत्वेईश्वरोऽज्ञानादिमान्पुंस्त्वाद्देवदत्तवदित्यनुमानेनाज्ञानादिकमप्यंगीकार्यंस्यादित्यर्थः ॥ **अन्यथेति** ॥ अविरुद्धस्याप्यनुमानेनानंगीकार्यत्वेइत्यर्थः ॥ **मीमांसेति** ॥ युक्त्यनुसंधानात्मकमननापरपर्यायत्वान्मीमांसायाइत्यर्थः ॥ ॥ ॥

ज्ञानंप्रसादसाधनमित्यनुपदंवक्ष्यते ॥ अतस्तमेवमित्याद्युदाहरणं ॥ ततोपिकिमित्यतआह ॥ सचेति ॥ विष्णुप्रसादश्चलोके सत्पुरुषप्रसादो गुणोत्कर्षज्ञानसाध्यःप्रसिद्धः ॥ तद्दृष्टांतेनानुमानादित्यर्थः॥नन्वीश्वरस्यानुमानाविषयत्वात्कथं तत्र लोकप्रसिद्धमंगीकार्यं ॥ अन्यथाऽज्ञा

ऋतेभवत्प्रसादाद्धिकस्यमोक्षोभवेदिह ॥ तमेवंविद्वानित्यादिश्रुतिस्मृतिभ्यः[1] ॥ सचोत्कर्षज्ञानादेवभवति लोकप्रसिद्धेः ॥ लोकप्रसिद्धमविरुद्धमत्राप्यंगीकार्यं ॥ ॥ ॥ ॥

नादिकमंगीकार्यं स्यादितिअतआह ॥ लोकेति ॥ अन्यथामीमांसारंभानुपपत्तिरितिभावः ॥ ॥ ॥

॥ कृ० ॥ अन्यादृशस्तुप्रामादिकइतिसंप्रदायविदः ॥ केचित्तुज्ञानमित्यस्यपृथक्पदत्वमपिटीकाकृदभिप्रेतम ॥ नतत्राग्निमित्यनन्वय ॥ शशब्दःश्रेयोवाची ॥ अथशंश्रीविशास्त्रेश्रेयसि मंगलइतिनानार्थरत्नमालोक्तेः ॥ शिवज्ञानंसंपदादित्वात्क्विप् ॥ शंचासौज्ञानंचेति अस्यास्तइतिमत्वर्थयप्रत्यय ॥ शंतप्रशंसयोगेनितिसूत्रे अन्येभ्योपिदृश्यतइतिवार्तिकेनयप्विधानात् ॥ मत्वर्थश्चहेतुत्वम ॥ तथाचश्रेयोज्ञानजनिकामित्यन्वयोपपत्तिः ॥ नचतृतीयस्कंधनापर्यविरोधः॥ नित्यःसर्वगतःस्थाणुरिति गीताभाष्येभिन्नपदत्वेनव्याख्यातत्वेपितात्पर्यनिर्णये एकपदत्वेनव्या ख्यानांतरवदत्राप्युपपत्तेः ॥ उभयप्रतिपत्त्यर्थाउपायाअव्यवस्थितइतिन्यायादित्याहुः ॥ **अनुपदमिति** ॥परमपश्चादनुपदं ॥ अन्वगंनिभक्तीत्यादिनापश्चादर्थेऽव्ययीभावः ॥ अव्यवहितो त्तरवाक्यइत्यर्थः ॥ **इत्याद्युदाहरणमिति** ॥ आदिपदाद्दृष्टतमदस्मिन्नितिवाक्यग्रहणं ॥ **विष्णुप्रसादश्चेति** ॥ उत्तमइतिशेषः ॥ अधममध्यमप्रसादयोः कर्मश्रवणसाध्यत्वात् ॥ **अनुमाना दिति** ॥ विष्णुप्रसादोगुणोत्कर्षज्ञानसाध्यः ॥ सत्पुरुषप्रसादत्वात्संप्रतिपन्नवदित्यनुमानादित्यर्थः ॥ ॥ ॥ ॥

१ श्रुतेःपूर्वंस्मृतीनामुदाहृतत्वेपि अभ्यर्हितत्वात्पूर्वनिपातः ॥

॥ श्री० ॥ अहल्यायै इतिचतुर्थीषष्ठ्यर्थे ॥ भग्नव्याप्तिकमिति ॥ इंद्रप्रमादेसत्पुरुषप्रमादत्वेप्यत्वेपि तस्यनिंदासाध्यत्वेन गुणोत्कर्षज्ञानसाध्यत्वाभावाद्व्यभिचारइतिभावः ॥ दोषकृतो पितइति ॥ अहल्याधर्षणादिदोषकारिणस्तवेत्यर्थः ॥ बहुतरोलेपोनासीदित्युक्त्याऽल्पोलेपआसीदित्यन्यथाप्रतीयते तदयुक्तम् ॥ इंद्रस्यापरोक्षज्ञानिनउत्तरगात्रसंश्लेषाभावात् अहल्यायाः इंद्राधमत्वेन तद्धर्षणस्यादोषत्वाच्चेत्यतोऽन्यथाव्याचष्टे ॥ तत्फलमिति ॥ दोषफलंयोबहुतरो लेपोनरकदुःखानुभवः सनासीदित्यर्थः ॥ देवाम्नुनिरयं विनादेवानांनिरयोनास्तीति वचनादि तिभावः ॥ एवमेवलेपशब्दार्थउत्तरत्रद्रष्टव्यः ॥ अत्यंतेति ॥ प्रमादस्यनिंदासाध्यत्वमत्यंतं लोकविरुद्धंतत्कल्पनादित्यर्थः ॥ एवंकल्पनस्येति ॥ अहल्याजारत्वादिप्रतिपादकवाक्यस्यो करीत्या गुणोत्कर्षप्रतिपादकत्वकल्पनस्येत्यर्थः॥ सकलेति ॥ ॥ ॥ ॥ ॥

नन्विंद्रप्रसादकामोऽहल्यायै जारेतितन्निंदामेवकरोति ॥ ततोभग्नव्याप्तिकमिदमनुमानमित्यतआह ॥ अहल्येति ॥ अहल्याजारत्वादिप्रतिपाद

अहल्याजारत्वाद्यपिदोषकृतोपिते नबहुतरोलेपआसीदित्युत्कर्षमेववक्ति॥बहुनरकफलोह्यसौ॥ कं वाक्यमप्यु

त्कर्षमेववक्ति॥कथंदोषकृतोपिते यस्तत्फलंबहुतरोलेपः सनासीदित्यस्यार्थस्य अनेनव्यंजनादित्यर्थः॥कुतएतत्॥ अत्यंतालौकिककल्पनादेवं

कल्पनस्यज्यायस्त्वात्॥तत्फलंबहुतरोलेपइत्येतत्कुतइयत आह॥बहुहीति ॥ असौपरनारीधर्षणदोषः ॥हीतिसकलधर्मशास्त्रप्रसिद्धिंद्योतयति

॥ कृ० ॥ अहल्यायैजारेतीति ॥ चतुर्थ्यर्थे बहुलंछंदसीतिसूत्रे चतुर्थीति योगविभागादत्रचतुर्थी ॥ महाभाष्येयोगविभागस्यकृतत्वात् ॥ षष्ठीप्रकरणात्षष्ठ्यर्थे चतुर्थीभवतीतिकैयटेन वाक्यार्थकथनाच्चेतिभावः ॥ बहुतरोलेपो नासीदिति ॥ विशिष्टनिषेधनाल्पो लेपोस्तीति प्रतीयतेतच्चतस्यतल्लोमनेतिश्रुतिविरुद्धमित्यतोव्याचष्टे ॥ यस्तत्फलमिति ॥ तत्फलनिषेधएवा त्रक्रियते फलस्वरूपकथनायबहुतरोलेप इत्युक्तमितिभावः ॥ अत्यंतालौकिकेति ॥ निंदायाः प्रमादसाधनत्वस्यलोकविरुद्धत्वादितिभावः ॥ ननुजारत्वादिपरामर्शतस्यनपुंसकलिंगतयाप्रकृ तत्वादसाविति पुल्लिंगानुपपत्तिरित्यतआह ॥ असौपरनारीधर्षणदोषइति ॥ यद्यप्यत्रस्वोत्तमानांनारीधर्षणंनाभिप्रेतम् ॥ तस्यैकादशस्कंधतात्पर्येतद्गतिः सुमहत्तरेतिसुमहत्तरपापमुक्त्वातत्प राणांपातकानांफलमंधंतमःस्मृतमितितमःफलकत्वोक्तेस्तद्विरोधापातात् ॥ तथापिस्वसमाधमानानारीधर्षणंविवक्षितं ॥ तच्चत्रिविधं ॥ परदारधर्षणंवर्णबाह्यदारधर्षणंपित्रादिदारधर्षणंचेति ॥ य थोक्तम् ॥ उपपातकंतद्गतिश्चवर्णबाह्येपुपातकम् ॥ महापातकसंज्ञं तुपित्रादिदारधर्षणमिति ॥ तस्यचत्रिविधस्यधर्षणस्यसंभूयनरकत्रयफलकत्वाद्भाष्येबहुनरकफलकत्वोक्तिः ॥ ॥

॥ श्री० ॥ यथाहि विराटपर्वणि कीचकं प्रतिद्रौपदीवचनं ॥ परदारेषु तेबुद्धिर्नैव कार्या कथंचन ॥ परदाराभिमर्शाद्धि नरः पापं समश्नुते ॥ अयशः प्राप्नुयात् घोरं महद्वा प्राप्नुयाद्भयमिति ॥ तथा भा गवते पंचमस्कंधे अष्टाविंशतिनरकाविविधयातनाभूमय इत्युपक्रम्य ॥ यस्तु परकलत्राण्यपहरति ॥ यस्तु गभित्वा पुरुषं परदारादीन् भुंक्ते ॥ यस्त्विह वाऽगम्यां स्त्रियमभिगच्छतीत्यादिना परना रीधर्षणस्य बहुनरकफलत्वमुक्तमस्तीति द्रष्टव्यं ॥ मीढ्वस्य रतिश्चातो गतिर्भावः ॥ ननु भगवत्प्रमादस्य गुणोत्कर्षज्ञानसाध्यत्वाद्ययोमामसत्वामिति गीतोदाहरणमसंगतं तत्र भगवद्गुणोत्कर्षज्ञानिनः स र्वज्ञत्वमात्रप्रतिपादनादित्यत आह ॥ अत्रमसर्वविदिति ॥ भगवद्गुणोत्कर्षो वेदमहातात्पर्यविषय इत्यनुमाने आश्रयासिद्धिमाशंक्य परिहरति ॥ नन्वित्यादिना ॥ वक्ष्यमाणमिति ॥ विष्णु माहात्म्येत्यादिनेत्यर्थः ॥ सर्वत्रेति ॥ अनेन विष्णुमाहात्म्यलेशस्य कोटिधा विभक्तो योलेशस्तस्य लेशस्य पुनश्चानंतधा ॥ विभक्तो योलेशस्तस्य लेशस्य पुनश्चाप्यनंतधा विभक्तो यो लेशस्तस्य

सलेपस्तस्य नासीदित्येतत्कुत इत्यत आह ॥ तस्येति ॥ अहल्याधर्षणेन तस्येंद्रस्य लोमापि नक्षीयत इत्यर्थः ॥ भगवत्प्रसादस्तद्गुणोत्कर्षज्ञान साध्य इत्येतन्न केवलमनुमानात्सिद्धं किंतर्हि तद्वचनाच्चेत्याह ॥ यइति ॥ अत्र सर्वविदित्यादिस्तुत्या प्रसादोऽवगम्यते ॥ तदेवं भगवद्गु

तस्य न लोम चमीयत इति श्रुत्यंतराच्च ॥ योमामेवमसंमूढो जानाति पुरुषोत्तमामिति तदुक्तेश्च ॥ सत्यं सत्यं पु नःसत्यं शपथैश्चापि कोटिभिः ॥ विष्णुमाहात्म्यलेशस्य विभक्तस्य च कोटिधा ॥ ॥

णोत्कर्षे महातात्पर्यं सर्वागमानामिति प्रमितम् ॥ ननु ब्रह्मरुद्रादीनां सर्वोत्कृष्टत्वप्रसिद्धेर्विष्णोः सर्वोत्कर्ष एव नास्ति कुतस्तत्र सर्वागमानां म हातात्पर्यमिति चेतन् ॥ तत्प्रसिद्धेर्भ्रांतित्वात् ॥ तत्कुत इत्यत आह ॥ सत्यमिति ॥ सत्यं वक्ष्यमाणम् ॥ तस्य लेशस्येति सर्वत्र संबध्यते ॥

लेशस्यैकांशसममाहात्म्या न हीति योजना सूचिता भवति ॥ ॥ कृ० ॥ प्रमितमिति ॥ भगवद्गुणोत्कर्षो वेदमहातात्पर्यविषयः वेदमहाफलमोक्षजनकज्ञानविषयत्वात् ॥ योयत्फलजनकज्ञा नविषयः सतन्महातात्पर्यविषयः यथा संप्रतिपन्न इत्यनुमानमस्त्यादिति भावः ॥ मोक्षजनकत्वं चप्रमादद्वारेति नानुपपत्तिः ॥ अत्र मोक्षस्यैव वेदमहाफलत्वं प्रसादजन्यत्वं प्रसादस्य गुणोत्कर्षज्ञानजन्य त्वं साधयितुं मोक्षो हीत्यादि भाष्यमित्यवगंतव्यम् ॥ तस्येत्यस्यार्थांतरं वदन्नेवाह ॥ तस्य लेशस्येतीति ॥ विष्णुमाहात्म्यलेशस्य कोटिधा विभक्तस्य मध्ये योलेशस्तस्य लेशस्य पुनरप्यनंतधा विभक्त स्य मध्ये योलेशस्तस्यापि लेशस्य पुनरप्यनंतधा विभक्तस्य मध्ये लेशस्तस्य लेशस्यैकांशसममाहात्म्या इत्येवं सर्वत्र संबध्यत इत्यर्थः ॥ ॥ ॥

१ घोरमिति विशेषणान्नरकारव्यम् ॥ वाशब्दः समुच्चये ॥ प्रोपसर्ग एकनरकभोगानंतरमन्यनरकप्राप्तिं द्योतयतीति बहुनरकफलत्वमिति भावः ॥ २ भारतवाक्ये स्पष्ट बहुनरकफलत्वानुपलंभादाह

॥ श्री० ॥ ननुपुराणेष्वेवान्येषामुत्कर्ष उच्यत इति शंकितेनस्यैवमहाभारतविरुद्धत्वात् इमन्तंवक्तव्यमेवयशंकातस्यमहाभारतविरुद्धत्वेनामत्त्वकथनं चासंगतमित्यतआह ॥ अत्रैक्यमिति ॥ विष्णुप्रशंसेति ॥ यदितत्प्रशंसोपक्रमः स्यात्तर्हि अविद्यमानप्रशंसापिस्याद्भाव्येतेत्यर्थः ॥स्वरूपेति ॥ वास्तवस्वरूपतारतम्येत्यर्थः ॥ एवमेवेति ॥ साधारणप्रश्नावसरएवेत्यर्थः ॥ यद्यतरंतु येशशांकयोर्दिवीत्यवप्रमाणेसूर्यशशांकशब्दाभ्यां मंडलमेवग्राह्यंस्वरूपेणममत्वेन तयोस्तारतम्याभावात ॥ अष्टाशीतिसहस्राणिविस्तीर्णायोजनानितु ॥ प्रमाणंतत्वविज्ञेयंकलाःइति चंद्रमंडल

ननुपुराणविरोधाल्लौकिकीप्रसिद्धिरस्तु भ्रांतिःपुराणेष्वेवान्येषां सर्वोत्कर्षोभगवदैक्यंचउच्यते ॥ तत्कथम् ॥ नहिपुराणस्यपुराणंबाधकम् ॥ सास्यादित्यतआह ॥ अन्येति ॥ अन्योत्कर्षऐक्यंचपुराणप्रतीतमपि महाभारतविरुद्धमतोनग्राह्यमित्यर्थः ॥ अत्रैक्यंप्रसंगोदुक्तम् ॥ महाभारतस्यपुराणबाधकत्वंकुतइत्यतउक्तम ॥ तथैवेति ॥ इत्यादिनाग्रंथांतरेणसिद्धः प्रमितउत्कर्षःसर्वशास्त्रोत्तमत्वं यस्यतत्तथोक्तम् ॥ कथंमहाभारत

पुनश्चानंतधातस्यपुनश्चापि ह्यनंतधा ॥ नैकांशसममाहात्म्याःश्रीशेषब्रह्मशंकराइति नारदीये॥अन्योत्कर्षऐक्यं च तथैवसर्वशास्त्रेषुमहाभारतमुत्तमम् ॥कोह्यन्यःपुंडरीकाक्षान्महाभारतकृद्भवेदित्यादिग्रंथांतरसिद्धोत्कर्षमहाभारतविरुद्धम् ॥ तत्रहिनास्तिनारायणसमंनभूतं नभविष्यति ॥ एतेनसत्यवाक्येनसर्वार्थान्साधयाम्यहम् ॥ यस्य प्रसादजोब्रह्मारुद्रश्चक्रोधसंभवः ॥ नत्वत्समोस्तीत्यादिषुसाधारणप्रश्नावसरएवमहांतमुत्कर्षं विष्णोर्वक्ति ॥ अन्यत्रयत्किंचिदुक्तावप्यसाधारण एवावसरे॥ विरुद्धत्वमित्यतआह॥तत्रहीति॥ततमहाभारतेइत्यादिषुवाक्येषु॥वक्तिभगवान्व्यासः इतोऽपिमहाभारतस्यपुराणबाधकत्वंयुक्तमित्युक्तमसाधारणेति॥कःसर्वोत्कृष्टइत्यादिसाधारणप्रश्नरूपेऽवसरे विष्णुप्रशंसामनुपक्रम्यस्वरूपकथनावसर इतियावत॥पुराणेऽप्येवमेवान्योत्कर्षादुक्तावसाम्यमेवेत्यतआह॥अन्यत्रेति॥ अन्यत्रपुराणेयत्किंचिदुक्तावप्यन्योत्कर्षाद्युक्तावप्यसाधारणएवावसरे तत्स्तुतिप्रसंगतदुक्तमितिशेषः॥ स्यमुपमंडलनिरूपोक्तेः ॥ अतएवदिवीत्यादिहंतिद्रष्टव्यं ॥ ॥ कृ० ॥ इतीपोति ॥ निरवकाशित्वादपीत्यर्थः ॥ उत्तरत्रभारतनिरवकाशत्वस्यस्तुतित्वेनाप्युपपत्त्यापुराणसावकाशत्वस्यचप्रतिपादनादितिभावः ॥ साधारणप्रश्नावसरेउक्तत्वेपिबाधकत्वापरोगिप्राबल्यंकथमित्यतआह ॥ विष्णुप्रशंसामिति ॥ तथाचनिरवकाशत्वेनप्राबल्यंसिद्धमित्याशयः ॥ वाक्यत्वत्रयोमरुद्वीत्यालाभादाह ॥ तत्स्तुतीति ॥ तथाचस्तुतित्वेनसावकाशंपुराणंदुर्बलमितिभाव: ॥ ॥

१ नतात्पर्यविषयमितिभावः ॥ अन्यथाव्यासोक्तग्राह्यत्वानुपपत्तेः ॥ २ प्रसंगश्च अग्राह्यत्वस्य ॥ साम्यंचेश्वराद्वितस्यसर्वसंमतत्वान्नपृथगुपात्तम् ॥

॥ श्री० ॥ ननुजान्हविसूर्यकन्ययोरिति कथंन्हस्वः ॥ जान्हवीशब्दस्यङीबंतत्वेनईकारांतत्वात् ॥ जान्हवीसूर्यकन्ययोरितिवक्तव्यत्वादित्यतआह॥ङ्यापोरिति ॥ कौपन आपन्तश्चापौ तदंतशब्दौ अत्रग्राह्यौ ॥ तथाङीबंतस्यावंतस्यचशब्दस्यसंज्ञाछंदसोर्बहुलंन्हस्वोभवति ॥ङ्यंतस्यसंज्ञायांरेवतिपुत्रः रोहिणिपुत्रः भरणिपुत्रः ॥ बहुलग्रहणात्क्वचिन्नभवतिनांदीघोषः ॥ नांदीकरः । नदीविशालं ॥ ङ्यंतस्यछंदसि ॥ कुमारिदारा । नचभवति । फाल्गुनीपौर्णमासी । जगतीछंदः आबंतस्यसंज्ञायां॥शिलवहंशिलपस्थंडमनचभवति। लोमकागृहम.लोमकाखंडः। आबंतस्यछंदसि । अजक्षीरेणजुहोति । नचभवति । ऊर्णासूत्रेणकवयोवयंति । कुशालिनःपटंकुर्वंतीत्यर्थः ॥ एवंचप्रकृतेजान्हवीशब्दस्यङीबंतत्वेन ङ्यंतत्वाद्वरुणपत्न्याःसंज्ञात्वाच्चन्हस्वेजातेरोहिणिपुत्रइत्यादिवत् जान्हाविसूर्यकन्ययोरित्युपपन्नामित्यर्थः ॥ ॥ ॥ ॥

असाधारणावसरोक्तमपिरुद्रादेरुत्कृष्टत्वादि कुतोदुर्बलमित्यतआह ॥ तद्धीति ॥ यत्स्तुतिप्रस्तावोक्तं सर्वोत्कृष्टत्वंवेदादावग्न्यादेरप्यस्ति ॥ तस्यापिग्राह्यत्वंस्यादित्यर्थः ॥ इतश्चनपुराणोक्तंरुद्रादेरुत्कृष्टत्वंग्राह्यमित्याह॥तद्ग्रंथेति॥तद्ग्रंथःशैवपुराणम्तत्कथमित्यतआह ॥ तथाहीति॥

तध्द्यग्न्यादेरपिवेदादावस्ति ॥ त्वमग्नइंद्रोवृषभःसतामसित्वं विष्णुरुरुगायोनमस्यः ॥ विश्वस्मादिंद्रउत्तरइत्यादिषु ॥ तद्ग्रंथविरोधाच्च ॥ तथाहिस्कांदेशैवे ॥ यदंतरंव्याघ्रहरींद्रयोर्वने ॥यदंतरंमेरुगिरींद्रविंध्ययोः ॥ यदंतरं सूर्यसुरेड्यबिंबयोस्तदंतरंरुद्रमहेंद्रयोरपि ॥ यदंतरंसिंहगजेंद्रयोर्वने यदंतरंसूर्यशशांकयोर्दिवि ॥ यदंतरंजान्हविसूर्यकन्ययोस्तदंतरंब्रह्मगिरीशयोरपि ॥ यदंतरंप्रलयजवारिविप्लुषोर्यदंतरं स्तंबहिरण्यगर्भयोः ॥ स्फुलिंगसंवर्तकयोर्यदंतरंतदंतरं विष्णुहिरण्यगर्भयोः ॥ अनंतत्वान्महाविष्णोस्तदंतरमनंतकम् ॥माहात्म्यसूचनार्थायह्युदाहरणमीरितम् ॥ तत्समोह्यधिकोवापिनास्तिकश्चित्कदाचन ॥एतेनसत्यवाक्येनतमेवप्रविशाम्यहमित्याह

तद्ग्रंथेत्युक्तप्रदर्शनायशैवइत्युक्तम् ॥ ङ्यापोःसंज्ञाछंदसोर्बहुलमितिजान्हवीतिन्हस्वः ॥ ॥ ॥

॥ कृ० ॥ ङ्यापोरिति ॥ ङ्यंतस्यावंतस्यचबहुलंन्हस्वःसंज्ञायांछंदसिचेतिसूत्रार्थः ॥ ततश्चजान्हवीत्यस्यसंज्ञात्वाद्ध्रस्वइत्यर्थः ॥ ॥

१ बृहस्पतेर्बिंबं तेजोमंडलं सूर्यतेजोमंडलस्याधिक्यं प्रत्यक्षं तदेवग्राह्यम् ॥ उत्तमस्यप्रथमतोनिर्देशइतितुननियमः अनुत्तमस्यापि व्याघ्रस्य प्रथमतो निर्देशात् ॥ अत्रप्रत्यक्षसिद्धदृष्टांतात् ॥ वस्तुतोभूर्यापेक्षयागुरोरुत्तमत्वम्॥बिंबशब्देनस्वरूपग्रहणेनचैवदृष्टांतोज्ञेयः ॥

॥ श्री० ॥ **नाहमिति** ॥ नाहंनचशिवोन्येचतच्छक्त्येकांशभागिनः ॥ बालःक्रीडनकैर्यद्वत्क्रीडतेऽस्माभिरच्युतइति ब्राह्मपुराणवचनंभाष्योदाहृतंद्रष्टव्यमित्यर्थः ॥ **संकुचितार्थइति** ॥ विश्वशब्दस्यरुद्राद्यवरपरत्वेन संकोचः ॥ आदिपदेनरुद्रादिपदानांविष्णुपरत्वं ग्राह्यमित्याहुः ॥ विश्वोवायुरभिकोयस्यरुद्रस्यासौविश्वाधिक इति योजनाआदिपदेन ग्राह्येत्यप्याहुः ॥ **विष्णोरिति** ॥ नामभिः रुद्रादिनामभिः विष्णोर्वैशिष्यात् विशिष्टत्वादित्यन्वयः विशिष्टत्वादित्यस्य मुक्तत्वादित्यर्थमभिप्रेत्याह ॥ रुद्रादीनि ॥ अप्रामाणिकत्वादित्यादौ अन्योत्कर्षस्येतिशेषः

तत्रैवस्कांदएव ॥ शिवान्मुक्तिंनिषिध्य ॥ इतश्चनपुराणोक्तंशिवादेरुत्कृष्टत्वंग्राह्यमित्याह ॥ समेति ॥ समं॥ शैववैष्णवपक्षयोः॥नाहंनचशिवोन्येचेत्यादितद्वचनम्॥अस्तुलौकिकीप्रसिद्धिर्भ्रांतिःपुराणंचविप्रलंभमूलं व्यामोहनार्थम्॥तथापिविश्वाधिकोरुद्र इत्यादिवेदविरोध इत्यतआह॥ वेदश्चेति ॥ संकुचिताद्यर्थो व्याख्यातव्यःकुतइत्यतआह ॥ यदीति ॥ इतिहासाद्यननुरुध्य यथाश्रुतवेदव्याख्यानेऽनिष्टमाह॥ अनिर्णयाच्चे

तत्रैवशिवंप्रतिमार्कंडेयवचनं ॥ संसारार्णवनिर्मग्नइदानींमुक्तिमेष्यसीत्यादि॥ पाद्मेशैवेमार्कंडेयकथाप्रबंधे शिवान्निषिध्यविष्णोरेव मुक्तिमाह ॥ अहंभोगप्रदोवत्समोक्षदस्तुजनार्दनइत्यादि ॥ समब्राह्मविरोधाच्च ॥ वेदश्चेतिहासाद्यविरोधनयोज्यः ॥ यदिविद्यादितिवचनात् ॥ अनिर्णयाच्चेंद्रादिशंकयाऽन्यथा ॥ तत्रापीष्टसिद्धिः ॥ नामवैशेष्यात् ॥ अतोभगवदुत्कर्षएवसर्वागमानां महातात्पर्यं ॥ ॥ ॥

ति ॥ नकेवलंविश्वाधिकइत्यादिवेदो विष्णोःसर्वोत्कर्षस्याविरोधी किंतुप्रत्युततत्रवेदेऽस्मदिष्टस्य विष्णोः सर्वोत्कर्षस्य सिद्धिरपीत्याह ॥ तत्रापीति ॥ कुतइत्यतआह ॥ नामेति ॥ विष्णोर्नामभिर्वैशेष्याद्विशिष्टत्वाद्रुद्रादिसर्वनामवत्वादित्यर्थः ॥ महातात्पर्याच्चेत्यादिनोक्तमर्थमुपसंहरति ॥ अतइति ॥ अप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चेत्यर्थः ॥ ॥ ॥ ॥

॥ रु० ॥ शिवादित्यनंतरंशेषपूरयति ॥ **शिवान्मुक्तिमिति** ॥ **नाहंनचेति** ॥ नाहंनचशिवोऽन्येचतच्छक्त्येकांशभागिनः ॥ बालःक्रीडकैर्यद्वत्क्रीडतेऽस्माभिरच्युतइतिवचनमित्यर्थः ॥ **संकुचिताद्यर्थइति** ॥ विश्वशब्दस्यरुद्रावरजगत्परत्वेनसंकोचः ॥ विश्वोवायुरधिकोयस्येतियोजनादिपदग्राह्या ॥ विश्वोवायुःसमुद्दिष्टःपूर्णत्वाज्जीवसंघतइतिबृहद्भाष्योक्तेरितिभावः ॥ ॥

---

१ भाष्येब्राह्मइति ब्रह्मवैवर्तविशेषणम् ॥ तथैवचतत्रत्यटीकायांब्राह्मेब्रह्मविषये इतिव्याख्यातम् अत्रच समेतिविशेषणात् पुराणवाचकंब्राह्मेति ॥ एवंचब्राह्मब्रह्मवैवर्तोभयपुराणस्थंनाहमितिवाक्यमितिभावः अतएवभाष्येवाक्ययोदाहरणेपितट्टीकायांतेषामितिबहुवचनम् ॥

॥ श्री० ॥ तद्धि गेयमहातात्पर्यविरोध ॥ स महातात्पर्यविरोध ॥ ननु गुणोत्कर्षस्यमन्ते गुणोत्कर्षसत्य वेदमहातात्पर्यविषयत्वाद्ब्रह्मस्वरूपवदित्यनुमानमेव मानमस्त्विति चेन्न ॥ अप्रयो
जकत्वादित्याह ॥ नचेति ॥ मोक्षोपक्षयमोक्षेच्छया नकर्मयमोक्षेच्छया सत्त्वादिनियामक ॥ उत्कर्षस्य गुणोत्कर्षस्य कुत इत्यत आह ॥ संवादाभावेनेति ॥ नतावद्गुणोत्कर्षप्रतिपादकवेदस्य सा
क्षात्स्वविषयविषयकमानांतरसंवादरूपः सजातीयसंवादोऽस्ति तदर्थस्य प्रमाणांतरागोचरत्वात् नापि स्वनिष्ठप्रामाण्यव्यवस्थापनद्वारा स्वविषयविषयकमानांतरसंवादरूपोऽर्थक्रियाख्यविजाती
यसंवादोऽस्ति ॥ तस्य फलोत्तरकालीननिश्चयत्वेनेदानीमभावादितिभाव । ज्ञानग्राहकेणैव ॥ साक्षिणेत्यर्थ ॥ वेदजन्यगुणोत्कर्षादिज्ञानप्रामाण्यस्य साक्षिवेद्यत्वेपि वेदप्रतिपाद्यगुणोत्कर्षस्यास
त्त्वं किं नस्यादित्यत आह ॥ नहीति ॥ यथार्थस्थितत्वस्य यथार्थत्वरूपप्रामाण्यस्यार्थसत्त्वघटितत्वादितिभाव ॥ एवंमतीति ॥ प्रामाण्यस्य स्वतस्त्वइत्यर्थः । सर्वस्यादिति ॥ आर्ह
गापरमोधर्मइत्यादिबौद्धाद्यागमजन्यज्ञानं तावत्साक्षिवेद्य तत्प्रामाण्यमपि साक्षिगृहीत नचानिषेधस्तत्स्वभंगः ॥ आत्मबौद्धाद्यागमविषयस्यापि सत्त्वप्रसंगः । विषयसत्त्वघटितत्वात्प्रामाण्यशरीर
स्येतिभावः ॥ नदीति बौद्धाद्यागमजन्यज्ञानग्रहणं । अयभाव । ज्ञानग्राहकसा क्षिप्रामाण्यं गृहणाति तस्य ... तद्विरोधिप्रामाण्यं न गृहणाति तदिहापि साक्षीबौद्धवाक्यजन्यज्ञानमात्रं गृ
हणन तत्रबलवद्विरोधरूपाप्रामाण्यग्राहकसामग्र्यासन्निधेः तत्प्रामाण्यग्रहणाय नेष्टं । यथार्थस्वमसमर्थागमो ... दिना प्रतिबद्धो नचलितुंक्षमतेतद्वत् ॥ नचस्वतस्त्वहानिः ॥ अप्रा
माण्यग्राहकसामग्र्यसमवहितज्ञानग्राहकसामग्रीग्राह्यत्वस्यैव ... दिति ॥ नचतथेति ॥ गुणोत्कर्षप्रामाण्यस्य वेदजन्यज्ञानप्रामाण्यग्रहणापवादकभूतो विरोधोनास्तीत्यर्थः

अस्त्वेवंतथाऽपीक्षितृत्वादेर्नमायामयत्वेनद्विरोधः ॥ गुणोत्कर्षस्यसत्त्वेहिसस्यात् ॥ नचवेदतात्पर्यविषयत्वमात्रेणसत्यता ॥ मोक्षापेक्षयेश्वरं प्र
सादयितुमुक्तस्यगजाद्युत्कर्षस्येवासत्त्वसंभवात् ॥ संवादाभावेनसत्यत्वनिश्चयायोगादित्यत आह ॥ तथापीति ॥ फलापेक्षयाप्रसादयितुंप्रतिपा

तथापिस्वतःप्रामाण्यात्सन्नैवोच्यते ॥ अविरोधात् ॥

दितत्वेपिस्वतः प्रामाण्यात्संवादमनपेक्ष्यज्ञानग्राहकेणैव प्रामाण्यस्यनिश्चितत्वात् ॥ नहिप्रामाण्यनिश्चयेविषयासत्त्वशंकासंभवति ॥ एवंसति
बौद्धाद्यागमविषयस्यापिसत्त्वंस्यादितिचेन्न॥प्रसक्तस्यापितत्प्रामाण्यग्रहणस्यबलवद्विरोधेनापोदितत्वात्॥नस्वतथाप्रकृतेपीत्याह॥अविरोधादिति॥

॥ क० ॥ असत्त्वसंभवादिति ॥ तथाचभगवद्गुणोत्कर्ष सत्य वेदतात्पर्यविषयत्वादितिहेतुरप्रयोजकइतिभाव ॥ ननु यदि गुणोत्कर्षोऽसत्यस्तर्हि तत्तात्पर्यकवेदजन्यज्ञानस्य प्रामाण्यनिश्चयो
नस्यात् ॥ प्रामाण्यस्यविषयसत्तामूर्तिकत्वादितितर्कबाधान्नाप्रयोजकत्वमित्यत आह ॥ संवादाभावेनेति ॥ सत्त्वनिश्चयेति ॥ सत्त्वघटितप्रामाण्यनिश्चयेत्यर्थः ॥ तथाचप्रामाण्यग्राहकाभावादे
ष्टापादनमेतादितिभावः ॥ ननुस्वतः प्रामाण्यादित्यत्रस्वशब्दस्यप्रामाण्यपरत्वे तदाश्रयपरत्वे वासंगतिरित्याशंक्य स्वशब्दः प्रामाण्याश्रयग्राहकपरः प्रामाण्यपदं चतन्निश्चयपरमिति भावेनव्याच
ष्टे ॥ ज्ञानग्राहकेणैवेति ॥ एवकारव्यावृत्त्यर्थमुक्तम् ॥ संवादमनपेक्ष्येति ॥ एवंसतिप्रागुक्ततर्कबाधान्नाप्रयोजकत्वशंकेत्याशयवानाह ॥ नहिप्रामाण्यनिश्चयइति ॥ ॥

१ विरोधोद्विविधःज्ञानग्रहणात्पूर्वंगृहीतः तदनंतरंगृहीतश्चेति॥तत्राद्ये विरोधेगृहीतस्यापिप्रामाण्यस्य अप्रमादनम्॥आद्येनुअयंमत्सदृश्यादि अयंतप्रामाण्यंनगृह्णातीति॥श्रीनिवासयामुक्तमितिवेदितव्यम्॥

॥ श्री० ॥ **अनुमानेनेति** ॥ ईश्वरोनसर्वोत्कृष्टश्चेतनत्वाद्देवदत्तवदित्यनुमानेनेत्यर्थः ॥ **अर्थानांधर्मवैचित्र्यमिति** ॥ गवादिरूपाणामर्थानांसास्नादिरूपधर्मैस्तावत् । स्वरादिनैचित्र्यमस्तितद पिनस्यात् । तत्रापिगौः सास्नादिमतीनभवति पशुत्वात्खरवदित्यप्यनुमानसंभवादित्यर्थः ॥ पंडितमूर्खापेक्षयापिद्रष्टव्यः ॥ **असंभावनेति** ॥ देवदत्तादावदृष्टंसर्वोत्कृष्टत्वंईश्वरेप्यसंभावितमि त्यसंभावनारूपविरोधामित्यर्थः ॥ **दर्शयति** ॥ धर्मवैचित्र्यादितिमूलेनेत्यर्थः ॥ पूर्वैवयोजना तथाच लोकेऽर्थानांधर्मवैचित्र्यदर्शनेनासंभावनाया अभावादितिभावः ॥ **नहींति** ॥ प्रयोजनापेक्षायेअभा वेवेदानांभगवद्गुणोत्कर्षपरत्वमेवनसिध्येदित्यर्थः ॥ कुतइत्यतआह ॥ **प्रयोजनेति** ॥ **प्रागिति** ॥ मोक्षोहिमहापुरुषार्थइत्यादिनेत्यर्थः ॥ तत्साधनम ॥ भगवद्गुणोत्कर्षपरत्वसाधनम ॥ **वक्ष्यमाणेति**

नन्वन्यत्रपुरुषेसर्वोत्कर्षस्यादर्शनात्तदृष्टांतेनेश्वरेपि तदभावस्यसाधयितुंशक्यत्वात् ॥ अनुमानविरोधोऽस्तीत्यतआह ॥ नचेति ॥ कालातीतमनु मानमितिभावः ॥ प्रमाणविरुद्धस्याप्यनुमानत्वेऽतिप्रसंगंसूचयति ॥ धर्मेति ॥ धर्मवैचित्र्यंधर्मवैचित्र्यम् ॥ एवमनुमानेऽर्थानांधर्मवैचित्र्यंनस्यादि तिभावः ॥ यद्वाऽनेनग्रंथेनासंभावनाविरोधंपरिहृत्यसंभावनांदर्शयति ॥ भवेदेवंयदिस्वतएवप्रामाण्यग्रहःस्यात्॥ तदनंगीकारेकिमुत्तरमित्यतआह स्वतइति॥संवादाधीनःप्रामाण्यग्रहइत्यंगीकारेतुप्रामाण्यनिश्चयायसंवादकमानोक्तौ तस्याप्यदोषत्वंप्रामाण्यमन्यसंवादेनसाधयेदित्यनवस्थालक्ष

न च प्रमाणसिद्धस्य अन्यत्रादृष्ट्यापन्हवो युक्तः॥धर्मवैचित्र्यादर्थानाम् ॥ स्वतःप्रामाण्यानंगीकारे मानो क्तादावप्यदोषत्वंच साधयेदित्यतिप्रसंगः ॥ अनन्यापेक्षयाच तत्परत्वंसिद्धमागमानाम् ॥ नारायणपरावेदाः ॥

णेतिप्रसंगइत्यर्थःइतोपिनवेदतात्पर्यगोचरस्यभगवद्गुणोत्कर्षस्यासत्त्वंशंकनीयमित्याह ॥ अनन्येति॥ प्रयोजनानपेक्षयाचेत्यर्थः॥ तर्हितत्परत्वमे वनसिध्येत् ॥ प्रयोजनपर्यालोचनयाहितत्प्राक्साधितमित्यतआह ॥ सिद्धमिति॥कथमित्यतआह ॥ नारायणेति ॥ प्रयोजनापेक्षयाभगवद्गुणो त्कर्षपरत्वपक्षेप्रयोजनेनतत्साधनंकृतम् ॥ प्रयोजनानपेक्षापक्षेत्वागमैरेवनत्सिद्धम् ॥पक्षद्वयंचसर्वेवेदास्तुदेवार्थाइत्यादिवक्ष्यमाणप्रमाणसिद्धम्॥

॥ कु ॥ ननु धर्माणां वैचित्र्यमितिकृतेर्थानामित्यनन्वयः ॥ अर्थानां ये धर्मा इतिकृते तु असामर्थ्येन समासायोगइत्यत आह ॥ **धर्मवैचित्र्यमिति** ॥ ननु संति च तेप्यर्था येप्रमाण प्रमिता अपि असंभावनयाऽपोद्यंते यथा देवगवानामुत्तानानांवहनंतद्वद्गुणोत्कर्षस्यप्रमितत्वेप्यन्यत्रादृष्टत्वेनासंभावनयापवादःस्यादित्याशंक्य तन्निरासपरत्वेनापि योजना कार्येत्याह **यद्वानेन ग्रंथेनेति** ॥ न च प्रमाणसिद्धत्वेत्यादिवाक्यद्वयेनेत्यर्थः ॥ **तत्प्राक्साधितमिति** ॥ मोक्षोहिमहापुरुषार्थइत्यत्रेत्यर्थः ॥ **सर्वे वेदास्तु देवार्था इत्यादीति** ॥ सर्वे वेदास्तु देवार्था देवा नारायणार्थकाः ॥ नारायणस्तु मोक्षार्थे मोक्षो नान्यार्थ इष्यते ॥ एवं मध्यमभक्तानामेकांतानां न कस्य चित ॥ अर्थे नारायणो देवः सर्वमन्यत्तदर्थकामिति सप्तमे वक्ष्यमाणप्रमाणेनेत्यर्थः ॥ अत्र वेदादेवप्रतिपत्त्यर्थाः प्रतिपन्ना देवा नारायणज्ञानार्थाः नारायणस्तु मोक्षार्थे ज्ञातव्यः मोक्षो न पुरुषार्थांतरार्थः ॥ ॥ ॥

१ उत्ताना वै देवगवा वहंतीतिश्रुत्युक्तम् ॥ देवगवानामित्यत्र गोरतद्धितलुकीतिटच् ॥ अधःपृष्ठत्वमत्यूर्ध्वपादत्वमुत्तानत्वंप्रसिद्धंतद्वथा असंभावनयाऽपोद्यते ॥ ॥

॥ श्री० ॥ सर्ववेदास्तु वेदार्थो देवा नारायणार्थकाः ॥ नारायणस्तु मोक्षार्थो मोक्षो नान्यार्थ इष्यते ॥ एवं मध्यमभक्तानामेकांतानां न कस्यचित् ॥ अर्थं नारायणो देव सर्वमन्यत्तदर्थकमिति नसन्ना
ध्यायांते वक्ष्यमाणप्रमाणसिद्धामिति प्रामाणिकमित्यर्थः ॥ तथा च मध्यमभक्तान्प्रति मोक्षो हीत्यादिना प्रयोजनेन तत्परत्वमाधनं कृतं प्रयोजननिरपेक्षांस्तूत्तमभक्तान्प्रति तु नारायणपरा वेदा इत्यागमे
न तत्परत्वं साधितमिति भावः कुतो न चेत्यत आचार्याभिप्रेतं हेतुमाह ॥ प्रतिपत्त्रिति ॥ प्रयोजनापेक्षया वेदानां तत्परत्वप्रतिपत्तारो मध्यमाः ॥ तन्निरपेक्षया आगमैरेव तत्परत्वप्रतिपत्तार उत्तमा इति मध्य
मोत्तमाधिकारिरूपप्रतिपत्तृभेदान्न विरुद्धमित्यर्थः ॥ एतान् मध्यमान् एवं प्रयोजनापेक्षया प्रतिपादयिष्यामि गुणोत्कर्षम् एतान् उत्तमान् एवं प्रयोजननिरपेक्षतया ॥ ईश्वरेतीति ॥ मध्यमान्प्रति प्रयोजना
पेक्षया गुणोत्कर्षं प्रतिपादयितुमुत्तमान्प्रति तु प्रयोजननिरपेक्षयेतीश्वरप्रेरणादित्यर्थो द्रष्टव्यः ॥ अन्यत्रेति ॥ अस्मदादावित्यर्थः प्रयोजकत्वशब्दार्थो नियामकत्वमिति ॥ पक्षद्वयेपीति ॥ प्रयोजनाप
क्षया तदनपेक्षया च गुणोत्कर्षप्रतिपादकत्वं वेदस्यापि पक्षद्वयेपीत्यर्थः ॥ अन्यथानुपपत्त्येति ॥ स्थाणुत्वमीक्षितृत्वस्य मायिकत्वं विनानोपपद्यत इति एतदीक्षितृत्वस्य मायिकत्वं कल्प्यत इत्यर्थः ॥ प्रागे
ति ॥ स्थाणुत्वेप्यैक्षतेत्याद्यविरुद्धमीश्वरस्येत्यादिग्रंथेनेत्यर्थः । मृत्स्थाणुत्वेक्षितृत्वयोर्मध्ये एकमीक्षितृत्वं न मायामयमित्यर्थः ॥ ॥ ॥

एकस्यैव वाक्यस्य प्रयोजनसापेक्षत्वमनपेक्षत्वं च विरुद्धमित्यत आह ॥ नचेति ॥ प्रतिपत्तृभेदादिति भावः ॥ ननु जडस्य वेदस्यैतान्प्रति
एवं प्रतिपादयिष्याम्येतान्प्रत्येवमिति कथं चेतनवत्प्रवृत्तिरित्यत आह ॥ ईश्वरेति॥ अनादिर्वेद इत्युक्तम् ॥ तत्र कथमीश्वरस्य नियमनमित्यत
आह॥ अनादौ चेति ॥अनादिपदार्थविषये नियामकत्वमन्यत्रादृष्टं कथमीश्वरस्येत्यत आह ॥ प्रयोजकत्वं चेति ॥ अनादेर्नियोजकत्वमीश्वर

सर्ववेदा यत्पदमामनंति॥वासुदेवपरा वेदा इति॥नचैतद्विरुद्धम्॥ईश्वरनियमात् अनादौ च तत्सिद्धम्॥द्रव्यं कर्म च कालश्च
त्यादौ॥प्रयोजकत्वं तु पूर्वोक्तन्यायेन॥अतः सिद्धमेतत्॥तच्चानन्यापेक्षाचिंत्यशक्तित्वादेव युक्तम्॥अतो न मायामयमेकम्॥

स्याचिंत्यशक्त्यायुक्तम्॥ अनन्यापेक्षया चेत्यादिनोक्तमुपसंहरति ॥ अतइति ॥तथा च पक्षद्वयेपि महातात्पर्यविरोधान्नेश्वरस्येक्षितृत्वादिकं माया
मयमिति भावः ॥ अप्रामाणिकं चैतन्मायामयत्वं ॥ तथा हि॥किं स्थाणुत्वे ईक्षितृत्वान्यथानुपपत्त्यैतत्कल्प्यते उत प्रमाणांतरात् ॥ नाद्यः॥अन्यथै
वोपपत्तेरुक्तत्वादित्याह ॥ तच्चेति ॥ स्थाणोरपीक्षितृत्वम् अनन्यापेक्षा स्वतंत्रा ॥ न द्वितीयः ॥ तददर्शनादिति भावेनोपसंहरति॥अतइति॥

॥कृ०॥एव मध्यमभक्तानां चित्तवृत्तिरित्यर्थकेन सपादश्लोकेनाद्यपक्षः प्रमीयते ॥ एकांतानां नियतानां उत्तमभक्तानां न कस्यचिदर्थे नारायणो देवः स एव परमपुरुषार्थ इति यावत् इत्यर्थकेनै
कांतानां न कस्यचिदित्यादिपादत्रयेण द्वितीयः पक्षः प्रमीयत इति विवेकः ॥ एतान्मनीति ॥ मध्यमभक्तान्प्रति तन्मोक्षार्थं गुणोत्कर्षं भगवंतं प्रतिपादयिष्यामीति प्रथमवाक्यार्थः एकांतान्प्र
ति स्वप्राधान्येनैव गुणोत्कृष्टं भगवंतं प्रतिपादयिष्यामीति द्वितीयवाक्यार्थः॥अनादिर्वेद इत्युक्तमिति॥अविनाशि तु तद्विद्धीत्यत्रेति शेषः ॥ यद्यपि नित्यत्वमेव तत्रोक्तं तथापि दृष्टांतस्य साध
नवत्त्वोपपादनायानादित्वमप्युपलक्षणीयम् ॥ अतएव तन्निवर्त्याशंकाप्रदर्शनाय जीवादन्यस्यानादिनित्यस्याभावादित्यनादित्वग्रहणं कृतमितिमंतव्यम् ॥ यद्वा पौरुषेयत्वादित्यादावुक्तमित्यर्थः ॥

॥ श्री० ॥प्रकृतमिति ॥ नित्यः सर्वगतस्थाणुरचलोयं सनातन इतिगीताव्याख्यानमित्यर्थः ॥ एतानीति ॥ क्वचिद्वाक्येऽप्रहर्षमिति श्रूयते क्वचिदनानंदमित्यादीन्यत एतानीत्युक्तमिति द्रष्टव्यं
लौकिकसत्तादीति॥लौकिका या सत्ता जातिःलौकिकं यद्विनित्यज्ञानंलौकिकं यद्विनित्यविषयजन्यसुखादि तद्रहितमिति हेतोरसदित्याद्युच्यत इत्यर्थः अनानंदत्वादिकमित्यत्रत्यानंदपदस्य
प्रहर्षत्वमर्थःतथाचाप्रहर्षमितिवाक्येऽप्रहर्षमित्यस्य सर्वथा प्रहर्षशून्यमित्यर्थः स्यात् ॥ तथा च अनानंदमिति वाक्ये चानानंदमित्यस्य सर्वथाऽनंदशून्यत्वमर्थः स्यादित्यादिद्रष्टव्यं ॥ अविशे
षादिति ॥ अचलपदव्याख्यानन्यायस्यात्राप्यविशेषादित्यर्थः ॥तथाव्याख्येयानीति ॥ असदित्यादिलौकिकसत्तादिरहितमित्यादिप्रकारेणव्याख्येयानीत्यर्थः ॥कुतः ॥ प्रमाणात् ॥निरवकाशानीति॥
सत्यज्ञानादिस्तत्स्वरूपत्वेन ब्रह्मधर्मत्वाभावादिति ज्ञेयम तथा च तत्प्रतिपादितानि सत्यानीति भावः ॥ सावकाशत्वमेव दर्शयति ॥ सर्वस्येति ॥ क्रियादेरपितदंतर्गतत्वादिति भावः

प्रकृतमनुसरन्नचल इत्येतत्पदं यदन्यैःपरिस्पंदरहित इतिव्याख्यानम् ॥ तदसदितिभावेनाह अचलत्वमिति ॥ इत्यादिवद्व्याख्येयमितिशेषः स
त्यज्ञानानंदस्वरूपं ब्रह्माभ्युपगच्छता यथैतानि वाक्यानि व्याख्यायंते लौकिकसत्तादिरहितमिति तथाचलइत्येतदपिलौकिकक्रियाप्रतिषेध

अचलत्वंत्वप्रहर्षमनानंदमदुःखमसुखमप्रज्ञमसद्वेत्यादिवत् ॥
क्रियादृष्टेःतपोमे हृदयं साक्षात्तनुर्विद्याक्रिया कृतिरित्याद्युक्तम् ॥

परंव्याख्येयम् ॥ सर्वथा परिस्पंदाभावार्थत्वेऽप्रहर्षमित्यादेरपि सर्वथाऽनानंदत्वादिकमर्थःस्यात् ॥अविशेषादिति भावः॥ननु विषमोयमुपन्यासः
॥ विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमित्यादिभिरानंदरूपत्वादेःप्रमितत्वेन तथाव्याख्यानोपपत्तेरिति चेत् ॥समंप्रकृतेपीत्याह ॥ क्रियेति॥ कुतःक्रिया
दृष्टिरित्यत आह॥तप इति॥तप आलोचनं॥विज्ञानमानंदमित्यादीनि निरवकाशानि क्रियावाक्यानि सावकाशानि सर्वस्य ब्रह्मधर्मस्य मायामयत्वात्

कृ० ननु कृच्छ्रचांद्रायणादिसतापःतप तपसंतापइत्युक्तेःतप कृच्छ्रादिकम चत्यसंगतेश्च ॥ न चेश्वरस्य संतापोस्ति ॥ प्राप्तकामत्वात् ॥ अप्राप्तकामस्यैव लोके संतापदर्शनात् ॥ अत
स्तपसोभगवद्धृदयात्मकत्वोक्तिरयुक्तेति अत आह ॥ आलोचनमिति ॥ तप आलोचन इत्यपिस्मृतेरिति भावः ॥ न चात्र यस्य तपो ज्ञानमयं तत्वालोचनात्मकं ॥ अज्ञो ह्यालोचत
इति॥ कर्मनिर्णयटीकाविरोध इति वाच्यं ॥ अज्ञानप्रयुक्तालोचनस्य तत्र निषेधात् ॥ अज्ञोह्यालोचत इत्युक्तेः ॥ ज्ञानात्मकालोचनस्योभयत्राभिप्रेतत्वादिति ॥ ननु क्रियाया भगवत्स्वरू
पत्वे कथं तपोमय इतिवाक्यं मानम ॥ तपोभिमानीरुद्रस्तुविष्णोर्हृदयमाश्रितः ॥ विद्यारूपा तथैवोमा विष्णोस्तनुमुपाश्रिता शृंगाराद्याकृतिगतः क्रियात्मा पाकशासन इतिषष्ठस्कंधता
त्पर्येऽस्यान्यथाव्याख्यातत्वादितिचेत् ॥ अत्राहुर्नरहरितीर्थाः ॥ अंगदेवताधर्माणां भगवद्गतत्वस्य समाहारसूत्रात्सिद्धत्वादत्रैतदुदाहरणमिति ॥ तेषामयंभावः ॥ अंगैःपराद्यैर्हि देवा विसृष्टा
स्तत्तद्गुणान्परमेसंहरेत ॥ तांश्चापितत्रैव विचिंत्य देवान् स्थानं मुमुक्षुः ॥परमंत्रजेतेति सूत्रे भाष्ये भगवदंगाश्रितत्वेनांगदेवतोपासनातः ॥पार्थक्येनांगदेवतागुणोपासनस्योक्तयोक्तार्यलाभ इति ॥

१ स्कं६ आदिपदादंगानिकृतवइ० २ ओंसमाहारात ओं अंगैःपराद्यैर्हीतिश्रुतौप्रकाशादिगुणानांतत्तद्देवानांतत्तदंगेषूपसंहाराश्रितत्वोपास्त्योरग्रस्थानात्फलोकेदेवैस्तथोपास्तिःकार्येत्यर्थः ॥

॥ श्री० ॥ अत इति॥क्रियादेः प्रमितत्वाभावादित्यर्थः ॥ मूले सर्वक्रियादीत्यर्थः ॥ एवकारेणेति ॥ ऐश्वर्यस्यसमग्रस्य वीर्यस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णांभगइतीरणे त्यैश्वर्यादिगुणवाचकभगशब्देनैव नन्वर्शआद्यजंतेन गुणवद्वाचकेनेत्यन्ययोगव्यवच्छेदपरैवकारेणेत्यर्थः । ननुभगोऽस्यास्तीत्यर्थेऽर्शआदिभ्यो॥जित्यनेनाच्प्रत्यये भगशब्दोधर्मिवा चकःकिं न स्यादित्याशंकायामाह ॥ नियामकेति॥अश्रुतेति ॥ भगेत्यत्र प्रत्ययाश्रवणादित्यर्थः । स्वाभाविकत्वादीत्यादिपदेनपरत्वग्रहणं ॥२४ ॥ अतोनंतेनेति॥ व्याख्यातमेतद्भाष्यानु व्याख्यानयोः युज्यते च तस्यानंतशक्तित्वात । अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिरिति ॥ २५ ॥ ॥ ॥ ॥ ॥

अतःपुनर्वैषम्यमित्यत आह॥अतश्चेति॥अतएव महातात्पर्याविरोधादेव इतश्चनेश्वरधर्माणांमायामयत्वमित्याह॥ऐश्वर्यादिति ॥संबोधनादीश्वरस्यअ र्शआद्यजंतोयंशब्द इत्येवकारेणव्यवच्छिनत्ति॥नियामकाभावेनाश्रुतप्रत्ययकल्पनायोगात्॥एवंसंबोधनेनतत्स्वरूपत्वमेवैश्वर्यादीनां स्यात्नत्वमा

अतश्चनमायामयं सर्वं ॥ ऐश्वर्यादिवाचिभगशब्देनैव संबोधनाच्च तं त्वा भगेत्यादौ ॥स्वरूपत्वान्नमायाम यत्वं युक्तम् ॥ विज्ञानशक्तिरहमासमनंतशक्तेः ॥ मय्यनंतगुणेऽनंते गुणतोनंतविग्रहेपराऽस्य शक्तिर्वि

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ॥ तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥

विधैवश्रूयते स्वाभाविकीज्ञानबलक्रिया चेत्यादिवचनात्॥२४॥अतएवाव्यक्तादिरूपः॥ २५॥ यामयत्वमित्यत आह॥स्व रूपत्वादिति॥अनंतत्वस्वाभाविकत्वादिवचनाच्च नेश्वरशक्त्यादीनांमायामयत्वम्॥मायामयस्यानंतत्वाद्यनुपपत्तेरित्याह॥विज्ञानेति॥२४॥ननुज्ञा निभिर्भगवान्दृश्यतेचिंत्यतेचतत्कथमुच्यतेऽव्यक्तोयमचिंत्योयामितितत्राह॥अतएवेति॥अचिंत्यशक्तित्वादेव॥यथोक्तंअतोनंतेनतथाहिलिंगमिति॥२५॥

॥कृ० ॥व्यवच्छिनत्तीति॥भगशब्देनैवेत्येवशब्देन केवलेनभगशब्देनेत्यर्थसूचनादितिभावः ॥२४॥ अव्यक्तोयमचिन्त्योयमिति॥यद्यप्यव्यक्तादिशब्दो व्यक्तादिलक्षणेश्वरस्वरूप इत्येवं जीवविषयो न त्वीश्वरविषयः प्रकरणविरोधात् ॥ तथापीश्वरव्यक्तत्वादिविशेषणसमर्पणद्वारा जीवपर इत्येवमाक्षेप कृतः ॥ अव्यक्तस्वभावस्यापि अचिन्त्यशक्त्याऽव्यक्तत्वमित्यत्रसूत्र संमतिमाह ॥ अतोनंतेनेति ॥ अतः व्यक्तत्वे ऽव्यक्तत्वे च प्रमाणभावादनंतेन तत्प्रसादेनैव व्यक्तत्वं पुरुषप्रयत्नेनाव्यक्तत्वं चज्ञायते ॥तस्याभिध्यानादिति श्रुतमोक्षस्य प्रसादसाध्यत्वाल्लिं गंचभगवत्प्रसादात्तद्दर्शनभावं ज्ञापयति ।।दृष्टेवैवतंमुच्यतइतिमोक्षस्यदर्शनसाध्यत्वश्रवणात्तत्प्रसादाद्दर्शनंदर्शनान्मोक्ष इत्यंगीकार्यत्वादिति सूत्रार्थः ॥ यद्यप्यचिन्त्यशक्तित्वादव्यक्तत्वादिकमि त्यर्थो नसूत्राल्लभ्यते ॥ तथापि पदांतरंविनाऽनंतपदस्यैवप्रयोगप्रयोजनान्व्याख्यानपरं तद्भाष्यं युज्यते च तस्यानंतशक्तित्वादिति तद्बलाल्लभ्यत एवेतियुक्तं सूत्रोदाहरणम ॥ २५ ॥ ॥

१ स्कं०३अ०१०श्लो०२४विज्ञानशक्तिश्च मुमुक्षुस्तद्बुद्धिरियम् ॥ २सुबोधिनी०ज्ञानबलक्रियाणांनिज्ञानबलाभ्यामित्याक्रियेतिसमस्तंवाचानप्राणस्वाभाविकेयंवति

॥ श्री० ॥ युद्धेचेत्यतः पूर्वं नित्यस्याप्यात्मन इति शेषः । मृतिर्नियतेत्यत्र साधारणमृतिमनंतं जनिरपि नियतेति ग्राह्यम । अतएवेति ॥ पूर्वार्धव्याख्यानसूचनार्थमेव पूर्वार्धस्य जनिमृ-
तिशब्दौ देहसंयोगवियोगात्मकेति व्याख्यातावित्यर्थ । एवं व्याख्यानसूचनाभावेइत्थ भगवत्पादैः प्रयोज्यमित्याह ॥ अन्यथेति ॥ अवधारणार्थो नियमार्थः । नित्यं सनातनं प्रोक्तं नित्यं
नियतमेव चेति शब्दनिर्णये । अत्र तुनियतमिति तात्पर्यकारीति ध्येयम ॥ इदमन्यत इति॥ अथचैनमित्यनेन शोकपरिहार उच्यत इत्यर्थः। जातस्य हि ध्रुव इत्यादिप्रकाशनादिति तात्पर्यं
मनसि निधायाहध्रुवंजन्मेति॥ स्वरूपेण स्थितस्यैवात्मनो देहयोगवियोगकथनेन तन्नित्यत्वावगमेनानित्यत्वस्वीकारे तद्विरोधः स्यादित्यर्थः । अव्यक्तादिनीत्यनेनापीति॥अत्र नित्यस्यै
वात्मनो जननमरणस्वरूपनिरूपणेन तन्नित्यत्वादित्यर्थः ॥ २६ ॥अनेनैवेति ॥ आत्मनित्यत्वांगीकाराभिप्रायेणेत्यर्थः । शंकामनूद्येति ॥ अथ चैनमितिश्लोकेपूर्वार्धेनेत्यर्थः ॥ तथा
पीति ॥उत्तरार्धेनेत्यर्थ ॥ २७॥ ॥क्रि०॥जनिमृतीति॥साधारणमृत्यनंतरं जनिर्नियतेति तद्ग्रहणं।उत्तरवाक्यविरोधादिति।तत्र मरण प्रति यो धर्मी तस्यैव जन्मोक्त्या नित्यत्वावगमः

ननुसर्वशंकोद्धारणात्मनित्यत्वं प्रतिपाद्यतस्मादेवमित्युपसंहृतंतत्किमथचेतिपुनरुच्यतइत्यतोंगीकृत्यात्मनित्यत्वंप्रकारांतरेणशोकशंकेयमित्या
शयेनाह॥अस्त्वेवमिति॥युध्देच मृतिर्नियताजनिमृतिनिमित्तंचदुःखंमदीयानांभविष्यतीतिममैवशोक इतिशंकाशेषः अनेनपूर्वार्धोपि व्याख्यातः॥
अतएवदेहसंयोगवियोगात्मकजनिमृतीइत्युक्तम्॥ अन्यथादेहसंयोगवियोगावित्येववा जनिमृतीइत्येव वाब्रूयात् स्तएवेत्यनेन नित्यशब्दोवधार

अस्त्वेवमात्मनो नित्यत्वं ॥ तथापिदेहसंयोगवियोगात्मकजनिमृतीस्तएवेत्यत आह अथचेति ॥ २६ ॥ कुतोऽ

अथ चैनं नित्यजातं नित्यं वामन्यसे मृतम् ॥ तथापित्वं महाबाहो नैवंशोचितुमर्हसि ॥२६ ॥

जातस्यहि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्यच ॥ तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

शोकः ॥ नियतत्वादित्याह ॥ जातस्येति ॥ २७ ॥ णार्थ इत्युक्तंभवति॥अस्त्वेवमात्मनोनित्यत्वमिति वदताआत्मनोनित्यत्व
मभ्युपगम्येदमुच्यतइतिमायावादिनो व्याख्यानंनिरस्तंभवति॥ध्रुवंजन्ममृतस्यचेत्युत्तरवाक्यविरोधात् अव्यक्तादीनीत्यनेनापि विरोधात् ॥ २६ ॥
अनेनैवाभिप्रायेणतदेकवाक्यतयोत्तरंश्लोकद्वयंक्रमेणावतारयति॥कुतइति॥शंकामनूद्यतथापिनशोचितुमर्हसीत्युक्तम् ।तत्रकोहेतुरित्यर्थः॥ २७ ॥
दिति भावः॥अव्यक्तादीनीत्यनेनापीति॥अव्यक्तादीनीत्यत्र श्लोके भूतानां देहयोगलक्षणं जन्मोक्त्वादेहवियोगलक्षणं मरणमुक्तम ॥ आत्मानित्यत्वे च स्वरूपोत्पत्तिविनाशसंभवाद्देहयोगवि
योगकथनाविरोधःस्यादित्यर्थः ॥ २६ ॥ अनेनैवाभिप्रायेणेति ॥ अंगीकृत्यात्मनित्यत्वंप्रकारांतरेण शोकशंकयमित्याभिप्रायेणेत्यर्थः ॥शंकामनूद्येति॥अथ चैनमित्यनेनेति शेषः ॥२७॥

१ अपरोक्षज्ञानोत्तरंउत्क्रांतिरूपमृतीपुनर्जनेरभावात्साधारणेत्युक्तम ॥ २ जातस्यमृतस्येतिपदोपस्थितजनिमृतिशब्दावित्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री०॥ स्पष्टं ॥ अशोकस्पष्टं॥जन्ममरणेति । अनेनाव्यक्तं प्रकृतिरादिर्देहकारणं येषांतान्यव्यक्तादीनीति प्राकृतशरीर प्राप्तिलक्षणं जननं । व्यक्तं प्रकृतिकार्यं शरीरं मध्य मध्य खभोगेहेतुर्येषांतानिव्यक्तमध्यानीतिस्थितिः । अव्यक्तेप्रकृतौ निधनं देहलयो येषांतान्यव्यक्तनिधनानीति मरणमिति जन्ममरणस्वरूपनिरूपणेनेत्यर्थ ॥२८ ॥तत्तु नश्वरेति । देहा ।त्या इति श्लोकश्चेत्यर्थः। आत्मनित्यतायाः पूर्वप्रतिपादितत्वादितिभावः। ननु देहयोगवियोगयोरिति वक्तव्यं देहयोगवियोगस्येति तुकथमित्यत आहरितिद्वंद्वेति॥सर्वोद्वंद्वो विभाषयैकवद्भवतीति व चनात् द्वंद्वैकवद्भावो नपुंसकत्वं चेत्यर्थः ॥ ननुजीवनित्यत्वोपसंहारायेश्वरप्रतिबिंबत्वमेववक्तव्यं । ईश्वरसामर्थ्यवचनस्यकथमुपयोगः येन तद्वचनस्योपसंहर्तुमित्युपसंहारार्थत्वमुच्यत इत्यत आह ॥ ईश्वरस्वरूपत्वेपीति ॥ ईश्वरप्रतिबिंबत्वेपीत्यर्थः ॥ परिहारहेतुत्वातऐश्वरसामर्थ्यवचनस्येति शेष ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्पष्टंच जन्ममरणस्वरूपनिरूपणेन ॥ २८ ॥आश्चर्यवदिति श्लोकस्य न प्रकृतसंगतिर्दृश्यते तदुत्तरश्च पुनरुक्तइत्यतआह॥देहयोगेति ॥
द्वंद्वैकवद्भावोयम् सर्वथेतिविविनाशाभावादिभिः सर्वैः प्रकारैरित्युपसंहर्तुमुत्तरेण श्लोकेन ॥ ईश्वरस्वरूपत्वेपि कथमनाश इत्याशंकापरिहा

तदेव स्पष्टयति ॥ अव्यक्तादीनीति ॥ २८ ॥ देहयोगवियोगस्य नियतत्वादात्मनश्चेश्वरस्वरूपत्वात्स

अव्यक्तादीनिभूतानि व्यक्तमध्यानिभारत ॥ अव्यक्तनिधनान्येव तत्रकापरिवेदना ॥ २८ ॥
आश्चर्यवपश्यति कश्चिदेनमाश्चर्यवद्वदति तथैवचान्यः ॥ ॥ ॥

र्वथाऽनाशान्न शोकःकार्य इत्युपसंहर्तुमैश्वरं सामर्थ्यंपुनर्दर्शयति ॥ आश्चर्यवदिति ॥ ॥

रहेतुत्वादुपसंहर्तुमित्युक्तम ॥ अप्रमेयस्येत्यादिनाप्रागुक्तत्वात्पुनरिति ॥ ॥ रू० ॥ जन्ममरणस्वरूपेति ॥ अव्यक्तं कारणीभूतं शरीरं आदिर्येषांतानि अव्यक्तादीनि ॥ आद्यत्वार्थकादिशब्दस्य विशेष्यनिघ्नतयाऽमरप्रसिद्धेः ॥ अव्यक्तं कार्यं शरीरं मध्यं मध्यप्राप्तं येषां तानि अव्यक्तमध्यानि पूर्वं कारणीभूतलिंगदेहविशि ष्टान्येवभूतानि सृष्ट्यादौ कार्यदेहयुक्तानि भवंतीति यावत॥अनेन देहयोग एवजन्मेति निरूपितं ॥ अव्यक्ते कारणीभूतशरीर एव निधनं कार्यदेहलयोयेषामिति मरणस्वरूपनिरूपणमि ति विवेक्तव्यं ॥२८॥ इतरेतरयोगद्वंद्वे द्विवचनापत्तिरित्यत आह ॥ द्वंद्वैकवद्भावोयमिति ॥ इतरेतरयोगद्वंद्वे सर्वो द्वंद्वोविभाषयैकवद्भवतीति ॥ समस्यमानपदार्थयोरेकवद्भाव इत्यर्थः ॥ ततश्चैकवचनं युक्तमिति भावः।ननूपसंहर्तुं दर्शयतीत्यनेनोपसंहारं प्रतीश्वरसामर्थ्यप्रदर्शनस्य प्रयोजकत्वमुक्तम ॥ तुमनण्वुलौक्रियायां क्रियार्थायामिति क्रियाफलकक्रियावाचिशब्दे उपपदे सति तुमन्प्रत्ययविधानात ॥ नच साक्षात् प्रयोजकत्वं संभवतीत्याशंक्य परंपरया तत्संभवतीत्याह॥ईश्वरस्वरूपत्वेपीति ॥ ईश्वरसामर्थ्यदर्शनस्येत्युपस्कर्तव्यम ॥ ॥

॥ श्री० ॥ **आश्चर्यशब्दप्रवृत्तौनिमित्तमिति** । अनेनैनं जीवं यः कश्चित्तु पश्यति वदति शृणोति स आश्चर्यवदाश्चर्येणेत्युक्ते जीवद्रष्टृत्वादिमति आश्चर्यशब्दप्रवृत्तौ किंनिमित्तमित्याकांक्षायां ईश्वरप्रतिबिंबत्वादिना जीवद्रष्टृत्वादिमतो दुर्लभत्वेन दुर्लभत्वप्रतिपादनार्थमभाव उच्यते दुर्लभं हिनास्तीत्युच्यत इति गीतार्थ इतिभाष्याभिप्राय इत्युक्तं भवति । अत्र सर्वत्रापि विशिष्टद्रष्टृ विशेषणं दुर्लभत्वादिकं विशेषणीभूतदर्शनविशेषणमितिज्ञेयम् । श्रवणवचनयोर्दर्शनार्थत्वात्प्राधान्येनद्रष्टृत्वस्यैव भाष्ये टीकायां चग्रहणमिति च ज्ञातव्यम् मूले तध्दीत्यस्य दुर्लभं हीत्यर्थः ॥ **आश्चर्यमनित्यइति** ॥ पूर्वमदृष्टत्वेनाग्रे चाभावित्वेन निमित्तेनानित्यशब्दवाच्येऽर्थे आश्चर्यशब्दोनिपात्यत इति सूत्रार्थः । सर्वेषामिति । मामहं जानामीति स्वात्मनः साक्षिसिद्धत्वात् परात्मनोपि चेष्टादिलिंगैरवगतत्वादित्येवं सर्वेषामप्यात्मज्ञानित्वादित्यर्थः । दुर्लभोपीति ॥ आश्चर्यशब्दप्रवृत्तिनिमित्तदुर्लभत्ववानपि कथमित्यर्थः आश्चर्यशब्दप्रतिपाद्यत्वं त्वनाश्चर्यस्यापि संभवतीतिभावः । ईश्वरसरूपत्वादेनत्यादिपदेन सूक्ष्मत्वादित्युक्ताणुत्वसंग्रहः ॥ इत्युच्यत इति । नत्वाश्चर्य इव विद्यमान आश्चर्यवदित्युच्यत इत्यर्थः । तथा च स्वार्थे वतिरिति भावः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं यः कश्चित्पश्यति स आश्चर्यवदित्याद्युक्त्वाचतुर्थपादेन तदुपपादनं क्रियते तं व्याचष्टे॥ दुर्लभत्वेनेति॥ दुर्लभत्वमाश्चर्यशब्दप्रवृत्तौनिमित्तमित्यर्थः तत्कथमित्यत आह ॥ तद्धीति॥आश्चर्यमनित्ये इत्यादिस्मृतिं हिशब्देन सूचयति ॥ सर्वेषामात्मद्रष्टृत्वात्कथमात्मद्रष्टा दुर्लभोपि येना

आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥

दुर्लभत्वेनेत्यर्थः॥ तद्ध्याश्चर्यंलोके ॥ दुर्लभोपीश्वरसरूपत्वात्सूक्ष्मत्वा च्चात्मनस्तद्द्रष्टा ॥ २९ ॥

श्चर्यमुच्यत इत्यत आह ॥ दुर्लभोपीति ॥ ईश्वरसरूपत्वादिनाऽत्मद्रष्टा दुर्लभइति भावः ॥ अनेन आश्चर्य एवाश्चर्यवदित्युच्यत इत्युक्तंभवति ॥

॥ कृ० ॥ **आश्चर्यमनित्यइति** ॥ अनित्यशब्देनानित्यविशेषोद्भुतं गृह्यते तस्मिन्नाश्चर्यमिति निपात्यतइति सूत्रार्थो ज्ञेयः ॥ यद्यप्येवंसति दुर्लभत्वस्य नाश्चर्यशब्दप्रवृत्तिनिमित्तत्वलाभ ॥ इत्यसंगतमेतत् ॥ तथाप्यद्भुतत्वमाकस्मिकत्वम ॥ तथामनोरमायामुणादिवृत्तौ-स्पष्टप्रतीतेः ॥ आकस्मिकत्वं च दुर्लभत्वमेवेति प्रकृतसंगतिरिति भावः॥ आदिपदेन विस्मयोद्भुतमाश्चर्यमिति कोशसंग्रहः ॥ **आत्मद्रष्टृत्वादिति** ॥ अत्र भाष्ये च द्रष्टृत्वस्यैव ग्रहणं श्रवणवचनयोर्दर्शनार्थत्वेन प्राधान्यादिति बोध्यम् ॥ नन्वात्मद्रष्टुर्दुर्लभत्वोक्तौगीताविरोधः ॥ तत्राश्चर्यवदिति दुर्लभसाम्योक्तिरित्यतआह ॥ **अनेनेति**॥ विचित्रातद्धितगातिरिति वचनात्स्वार्थिकोवतिरितिभावः॥ ॥ ॥ ॥ ॥ ॥

१ सूत्रे स्मृतिशब्दप्रयोगवत् आर्षप्रयोगस्मृतिमूलकत्वात्कोशस्यापीतितत्रापिस्मृतित्वमितिभावः ॥ ॥ ॥ ॥ ॥

॥ श्री ॥ ननु कथमनेनैश्वरसामर्थ्यप्रदर्शनमित्यत आह । यत्प्रतिबिंबस्येति ॥ ईश्वरप्रतिबिंबस्येत्यर्थः ॥ व्याख्यातइति ॥ वथाभावः शोकाभावस्यनिमित्तमितिकथनेनेत्यर्थः ॥ एव मिति ॥ येश्लोकानव्याख्यातास्ते सर्वेप्यतिरोहितार्था द्रष्टव्याः । ॥ २९ ॥ ॥३०॥ ॥३१॥ ॥३२॥ ॥३३॥ ॥३४॥ ॥ ॥ ॥ ॥ ॥

यत्प्रतिबिंबस्य जीवस्यद्रष्टापि दुर्लभः ॥ किंतत्सामर्थ्यं वर्णनीयमितीश्वरसामर्थ्यदर्शनम् देहयोगवियोगस्येत्यादिना देहीनित्यमिति श्लोको

देहीनित्यमवध्योऽयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ॥ ३० ॥ स्वधर्म मपिचावेक्ष्यनविकंपितुमर्हसि ॥ धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते ॥ ३१ ॥ यदृच्छया चोपपन्नंस्वर्गद्वारमपावृतम् ॥ सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशम् ॥ ३२ ॥ अथचेत्त्वमिमंध र्म्यंसंग्रामंनकरिष्यसि ॥ ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ॥३३॥ अकीर्तिंचापिभूतानि कथयिष्यंतितेऽव्ययाम् ॥ संभावितस्यचाकीर्तिर्मरणादतिरिच्यते॥३४॥ भा०३०।३१।३२।३३।३४॥

व्याख्यातः ॥ स्वधर्ममित्यादयःश्लोका अतिरोहितार्थत्वान्न व्याख्याताः ॥ एवमुत्तरत्रापि ॥ २९ ॥ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

॥ क्र० ॥ कथमेतच्छ्लोकेईश्वरसामर्थ्यप्रदर्शनमित्यनआह ॥ यत्प्रतिबिंबस्येति ॥ इत्याशंकापरिहारहेतुत्वादिति ॥ आश्चर्यवदितिश्लोके ईश्वरस्य सर्वगतत्वनित्यत्वादिसामर्थ्यमुच्यते तच्चाप्यत्र हिताग्रिमवाक्ये स्फुटं ॥ तथा च बिंबोपाधिमन्निधिनाशाभावादिहेतुना जीवस्यानाशइति परिहारहेतुत्वादित्यर्थः ॥ व्याख्यात इति ॥ हेभारत यस्मादयं जीवो देहेऽपगतेपीतिशेषः ॥ देही ॥ संसर्गेइनिः ॥ देहसंयोगवान इत्येतन्नित्यंनियतम ॥ तथा सर्वस्य तृतीयार्थे षष्ठी ॥ सर्वेण बिंबनित्यत्वादिहेतुना ऽवध्यश्च तस्मात्त्वंसर्वाणि भूतानि प्रति जनिमृतिनिमित्तं दुःखं मदीयानां भविष्यतीति बुद्ध्येतियावत ॥ शोचितुं नार्हसीति एवं व्याख्यात इत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ ॥

१ यत्पूर्वंपार्थेनोक्तं वेपथुश्च शरीरेमइति न च श्रेयोनुपश्यामीति तत्र क्रमेण पूर्वोत्तराभ्यामुत्तरमाह ॥ २यच्च पूर्वमुक्तं स्वजनंहिकथं हत्वा सुखिनःस्यामेतितत्रोत्तरमेतत् ॥ सुखसाधन पुण्यवंतइत्यर्थः ॥ ३ यदप्युक्तं पापमेवाश्रयेदस्मानितिमात्रभ्रांतिः वस्तुतो धर्मसाधनयुद्धाकरणात्पापम ऐहिकदुःखस्वधर्मत्यागश्चेत्याहश्लोकचतुष्टयेन ॥ ॥
४ सर्वस्यदेहिनः देहेजात्येकवचनम् ॥ स्थूलसूक्ष्मलिंगाभिदेहेषु अयं प्रकृतोहरिरस्तीत्यतो देही जीवः नित्यमवध्यः ॥ तस्मात् देहयोगवियोगयोरवर्जनीयत्वात्आत्मनश्चेश्वरसरूपत्वेनस र्वथाऽनाशादितिव्याख्यातः रा. श्रीपादैः ॥ अत्रतुगीत्यंतरंप्रदर्शितम् उभयोरपिभाष्याभिप्रतमिति ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ॥३५॥३६॥ ३७॥ ॥ ३८ ॥ भाष्येप्रयोगादिति ॥ चतुर्थस्कंधप्रयोगादिति भावः । पृथुं प्रति भूम्या वचनमिदं ॥ एतौत्विति ॥ गीतोक्तौ तुसांख्ययोगौ उपादेयत्वेनविवक्षिता
वित्यर्थः । कुत इत्यत आह ॥बुद्धचेति । यया सांख्ययोगविषयिण्या बुध्यायुक्तः कर्मबंधं प्रहास्यसीति कर्मबंधलक्षणमसारहानिसाधनबुद्धिविषयत्वोक्तेरुपादेयात्वेनविवक्षितावित्यर्थः ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ॥ पूर्वप्रकरणोपसंहारपूर्वकं तत्संगतत्वेनोत्तरप्रकरणारंभप्रतिज्ञार्थमेषातेभिहितेत्युक्तम् ॥ तत्र सांख्ययोग

॥३५॥३६॥३७३८॥सांख्यंज्ञानम्॥शुद्धात्मतत्त्वविज्ञानंसांख्यमित्यभिधीयतइतिभगवद्वचनाद्व्यासस्मृतौ॥योगउपा

भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः ॥ येषांचत्वंबहुमतोभूत्वायास्यसिलाघवम् ॥ ३५॥ अवाच्य वादांश्चबहून्वदिष्यंतितवाहिताः ॥ निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिम् ॥ ३६ ॥ हतोवाप्राप्स्य सिस्वर्गंजित्वावाभोक्ष्यसेमहीम् ॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ॥ ३७॥ सुखंदुःखेसमेकृ त्वालाभालाभौजयाजयौ ॥ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ॥ ३८ ॥ एषातेऽभिहितासां ख्येबुद्धिर्योगेत्विमांशृणु ॥ बुध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ॥ ३९ ॥ ॥ ॥

यःदृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धयइतिप्रयोगाद्भागवते॥ नेतरौसांख्ययोगौउपादेयत्वेनविवक्षितौ ॥

शब्दौ कापिलपातंजलशास्त्रवचनाविति प्रतीतिनिरासाय व्याचष्टे सांख्यमिति ॥ प्रतीतार्थावेव कुतो नस्यातामि त्यतआह ॥ नेतराविति

इतरौ शास्त्रलक्षणौ ॥ कुत्रचिदागमे एतौ तूपादेयौ ॥ बुद्ध्या युक्त इत्यादिवचनात् ॥ ॥ ॥ ॥

॥ कं० ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ बुद्ध्यायुक्तइत्यादीति ॥ तत्रसांख्ययोगबोधकवाक्यस्य कर्मबंधनिवर्तकत्वप्रतिपादनादिति भावः ॥ ॥ ॥ ॥

१ अ०१८श्लो०३॥२॥यदप्युक्तंनचैतद्विद्मइत्यादितत्रपक्षद्वयेपिनहानिरित्याह हतोवेति जित्वा महींस्वर्गंच येयुध्यंतेप्रधनेषुशूरास इत्यादिश्रुतेः त्वदुक्ताशेषशंकानांनिरस्तत्वात्युद्धायकृत
निश्चयःसन्नुत्तिष्ठेत्यर्थः ॥ ३ यत्त्वयापूर्वंपापमाशंकितंतत्वैराग्यभक्तचोरभावेस्वधर्माननुसंधानेचेत्याह ॥ सुखदुःखेत्यादि ॥ ॥ ॥

॥ श्री ॥ तदुपादेयत्व इति । तयोः सांख्ययोगशास्त्रयोरुपादेयत्व इत्यर्थः । सौगतादेरिति । सर्वज्ञ : सुगतो बुद्ध इत्यभिधानात्सुगतोबुद्धस्तन्निमित्तं शास्त्रं सौगतं तदादेरित्यर्थः॥प्रत्यक्षानुमानप्रामाण्यस्य पंचस्कंधातिरिक्ताकाशस्थायित्वस्य चतदुक्तस्योपादेयत्वादिति भावः । अस्मिन्नेवयोग इति । योगे त्विमां शृण्विति प्रतिज्ञात एवयोगे इत्यर्थः ॥ प्रयोगादिति॥ कर्मलक्षणोयोग उपायइत्यभिप्रायेणेत्यर्थः ॥ ज्ञानानीति ॥ ज्ञानसाधनानि शास्त्राणि भिन्नानि परस्परविरुद्धार्थप्रतिपादकानीत्यर्थः।ननु पंचरात्रस्तुत्या कथमितरयोर्निंदितत्वंगम्यत इत्यतआह ॥ विरुद्धानामिति ॥ पार्थक्योक्तेरिति॥वेदारण्यकस्य पंचरात्राविरुद्धार्थप्रतिपादकत्वोक्तेरित्यर्थः।ननु कुतः सांख्याद्यपेक्षया विरुद्धार्थप्रतिपादकत्वरूपपार्थक्यंपंचरात्रापेक्षयेति किं न स्यादित्यत आह॥युक्तमित्यनेनेति ॥प्रकृतत्वादिति॥सांख्यं योगःपाशुपतं वेदारण्यकमेव च।ज्ञानान्येतानि भिन्नानि उताहो एक एवात्विति।जनमेजयप्रश्नवाक्ये सांख्यादीनामेव प्रकृतत्वादित्यर्थः ॥

अतो न तावत्रविवक्षिताविति वाक्यशेषः ॥ प्रकृतिपुरुषविवेकादेस्तदुक्तस्योपादेयत्वात्कथमेतदित्यत उक्तम् ॥सामस्त्येनेति ॥ एकदेशस्योपादेयतयातदुपादेयत्वे सौगतादेरपि तत्प्रसंग इति भावः॥इतोपि न योगः पातंजलशास्त्रमित्याह॥ कर्मेति ॥ अस्मिन्नेवयोगे कर्मयोगो विशिष्यत इत्यादिप्रयोगाच्च ॥ न हिशास्त्रे कर्मयोगशब्दोऽस्तीति ॥ न केवलमुपादेयत्वाभावान्नेतरौ विवक्षितौ किंत्वित्यत आह ॥ निंदितत्वादिति

कुत्रचित्सामस्त्येन ॥ कर्मयोगइत्यादिप्रयोगाच्च ॥ निंदितत्वाच्चेतरयोर्मोक्षधर्मेषु भिन्नमतत्वमुक्त्वा पंचरात्रस्तुत्या ॥ वेदानांत्वेकार्थत्वान्नविरोधः ॥ पार्थक्यंतुसांख्याद्यपेक्षयायुक्तम्

॥ कथं निंदितत्वमित्यत आह ॥ भिन्नेति ॥ सांख्यंयोगः पाशुपतं वेदारण्यकमेव च ॥ ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणेति सांख्यादीनां विरुद्धमतत्वमुक्त्वा पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ॥ ज्ञानेष्वेतेषु राजेंद्रसर्वेष्वेतद्विशिष्यत इति पंचरात्रस्तुत्या विरुद्धानामेकस्तुतिरपरानिंदां गमयतीतिप्रसिद्धमेवेतिभावः॥एवंतर्हि वेदारण्यकस्यापिनिंदास्यादित्यत आह ॥ वेदानां त्विति॥एकार्थत्वात्पंचरात्रेण ॥ ज्ञानान्येतानि भिन्नानीतिपार्थक्योक्तेः कथमेकार्थत्वमित्यत आह ॥ पार्थक्यं त्विति॥ युक्तमित्यनेनतेषामेव प्रकृतत्वादित्यभिप्रेति

१करणेल्युडिति भावः २सांख्यादिशास्त्राणिकिंपरस्परविरुद्धज्ञानसाधनानि उतअयंशास्त्रसमुदाय एकः अविरुद्धार्थप्रतिपादकईतिप्रश्नवाक्यार्थः॥ ३ करणे ल्युट् ज्ञानसाधनेषु॥ ४ पंचरात्रम्॥

॥ श्री ॥ ननु तर्हि पूर्वश्लोके पंचरात्रस्याप्रकृतत्वाज्ज्ञानेष्वेतद्विशिष्यतइ त्युक्तिःकथं किं तर्हिवेदारण्यकस्यैव स्यादित्यत आह ॥ **तथाचेति** ॥ ननु तर्हिपूर्वं प्रकृतस्यापि वेदारण्यकस्योत्तरश्लोके ग्रहणात्पंचरात्रस्तुत्या वेदारण्यकस्यापि निंदाकृतेति किं नस्यादित्यत आह ॥ **उत्तरवाक्ये चेति** ॥ तयोरैक्यादिति भावः ॥ **वाक्यार्थान्यथानुपपत्त्येति** ॥ वेदपंचरात्रयोरेकार्थत्वाभावे सांख्यमितिपूर्वश्लोके वेदारण्यमेव गृहीतं न पंचरात्रमिति पंचरात्रस्येत्युत्तरश्लोके पंचरात्रस्तुतिरसंगता स्यादिति वाक्यार्थस्यान्यथानुपपत्त्येत्यर्थः सप्तमी षष्ठ्यर्थ इति भावेनाह ॥ **चित्रशिखंडिशास्त्रस्येति** ॥ **असंगतमिति**॥अनेन वेदपंचरात्रयोरेकार्थत्वाल्लाभादित्याशयः । अत्रापिसप्तमी षष्ठ्यर्थ इत्यभिप्रेत्याह ॥ **पंचरात्रमूलकस्येति** ॥ तथा च यदा पंचरात्रमूलकस्य वेदैकार्थत्वेन वेदैक्यं तदा मूल भूतपंचरात्रस्यापि वेदैक्यं सिद्धांते अन्यथानतस्यादिति भावः । ननु तत्तद्वाक्यस्थितानां सांख्यशब्दानां योगशब्दानां चबहुत्वाच्छब्द इत्येकवचनं कथमित्यत आह ॥ शब्दइतीति ॥ सिद्धांते अनुगतजातेरभावात जातिपदं समुदायपरमिति मंतव्यं ॥ ॥ ॥ ॥ ॥

तथा चाद्यवाक्येवेदारण्यकपदेनपंचरात्रमुत्तरवाक्येच पंचरात्रपदेन वेदारण्यकमुपलक्ष्यतइति भावः वेदपंचरात्रयोरेकार्थत्वंकुतइतिचेत्‌उदाहृतमोक्षधर्मवाक्यार्थान्यथानुपपत्त्या तावत् ॥ अपरंप्रमाणमाह ॥ तत्रैवेति ॥ मोक्षधर्मएव योहिते यतयःख्याताःसप्तचित्रशिखंडिनः तैरेकमतिभिर्भूत्वायत्प्रोक्तं शास्त्रमुत्तमम् वेदैश्चतुर्भिःसमितंकृतंमेरौमहागिरावित्यादिना चित्रशिखंडिशास्त्रस्यवेदैक्योक्तेश्चअसंगतमेतदित्यतआह ॥ पंचरात्रेति॥पंचरात्रमूलैकस्येत्यर्थःएतच्चवैखानससंहितोपक्रमएव प्रसिद्धम्॥अतएतद्व्याख्यानं ज्ञानयोगेन सांख्यानां सांख्ययौगोपृथग्बालाइत्यादावप्यतिदिशति ॥ एवमेवेति॥शब्दइतिजात्यभिप्रायमेकवचनं ॥ ॥ ॥ ॥ ॥ ॥

तत्रैवचित्रशिखंडिशास्त्रेपंचरात्रमूले वेदैक्योक्तेश्चएवमेवसर्वत्रसांख्ययोगशब्दःउपादेयवाचको वर्णनीयः॥

॥कु० ॥ **वाक्यार्थान्यथानुपपत्त्येति** ॥ वेदपंचरात्रयोरेकार्थत्वाभावे पूर्वश्लोके वेदारण्यकमात्रग्रहणादुत्तरश्लोके पंचरात्रस्तुतिरसंगतास्यादिति वाक्यार्थानुपपत्त्येत्यर्थः॥ **चित्रशिखंडिन इति**॥ सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखंडिन इत्यमरोक्तेर्मरीच्यादय इत्यर्थः ॥तैर्महामेरौगिरौ यच्छास्त्रं कृतं तद्वेदैश्चतुर्भिः समितं ॥ अतएवोत्तमं प्रोक्तमित्यन्वयः ॥ ननुवेदैक्योक्तिप्रतिमोक्षधर्मस्यैवाधिकरणत्वात्कथं चित्रशिखंडिशास्त्र इति सप्तमीत्यतआह ॥ **चित्रशिखंडिशास्त्रस्येति** ॥ संबंधिनोप्यधिकरणत्वविवक्षयामूले सप्तमीप्रयोगइतिभावः॥ चित्रशिखंडिशास्त्रशब्दस्य षष्ठ्यंततयाव्याख्यातत्वादाह॥**पंचरात्रमूलकस्येत्यर्थइति** ॥**जात्यभिप्रायमिति** ॥व्यक्तिबाहुल्येपि जातेरेकत्वात्तदभिप्रायमित्यर्थः॥इदंचपरमतेनस्वमते तुजातेरप्यनेकत्वात्समुदायाभिप्रायमितिव्याख्येयम् ॥

१ कप्रत्ययेनभाष्ये बहुव्रीहिः सूचितः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ॥ अत्रेति ॥ एषाते भिहिता मांख्ये बुद्धियोंगेत्विमां शृण्वित्यत्रेत्यर्थः । नन्वनादिनित्यत्वेश्वरप्रतिबिंबत्वादिरूपं जीवमंबंधितत्त्वमेवोक्तं न तु जीवविषयकं ज्ञानं तत्कथं जैवं ज्ञानमि त्युक्तमित्यत आह ॥ जीवस्यतत्त्वमिति ॥ ज्ञान विषयत्वेन ज्ञानशब्दवाच्यं जीवसंबंधितत्त्वमित्यर्थः ॥ तादर्थ्येनेति ॥ जीवस्यानादिनित्यत्वे दृष्टांतत्वादिनोक्तमित्यर्थः॥ नत्वत्रेति ॥ अभिधानविषयत्वं वाचएव न ज्ञानस्येति भावः ॥ श्राव्यतइति ॥ येन विषयिणी बुद्धिर्नाम ज्ञानं तन्नश्राव्यतइत्यर्थः ॥ किमर्थामिति ॥ कस्मै प्रयोजनायेत्यर्थः ॥ अविशदमिति ॥ तथा च वागभिहितेत्युक्ते तव बोधजनकरूपंवाङ्मात्रामितिप्रतीयेत तथा नोक्तमित्यर्थः॥ बुद्धिशब्देति ॥ करणसाधनेत्यर्थः॥३९॥४०॥

॥ इत्योप्यत्रसांख्ययोगशब्दौ ज्ञानोपायवाचिनावित्याह ॥ युक्तेश्चेति ॥ तामेवयुक्तिंदर्शयति ॥ ज्ञानंहीति ॥अत्रोक्तवक्ष्यमाणयोरर्थयोःसांख्ययोगशब्दौप्रयुक्तावुक्तवक्ष्यमाणार्थौज्ञानोपायावेवेति तदर्थावेतौयुक्ताविति ॥ जैवंज्ञानमिति॥जीवस्यतत्त्वमित्यर्थः॥ यद्यपीश्वरतत्त्वंचोक्तंतथापि तादर्थ्येनेत्यदोषः॥ ननु बुद्धिर्ज्ञानं तदुत्पाद्यत एव न त्वत्राभिहितं नापि श्राव्यते ॥ तत्कथमुच्यते सांख्ये बुद्धिरभिहिता योगे त्विमां शृण्विति तत्राह ॥ बुध्यत इति ॥ वागिति शेषः । ननु सांख्यं न वाचोधिकरणं तत्कथंसप्तमी किमर्थं च प्रसिद्धवाक्शब्दपरित्यागेनाप्रसिद्धबुद्धिश

युक्तेश्चज्ञानंपूर्वंजैवमुक्तम् ॥ उपायश्चवक्ष्यते ॥ बुध्यतेऽनयेतिबुद्धिः॥ सांख्यविषयो यया वाचा बुध्यसेतावागभि

नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते ॥ स्वल्पमप्यस्य धर्मस्यत्रायते महतोभयात् ॥ ४०॥

हितेत्यर्थः॥ ३९ ॥ ४० ॥ ॥ ॥ ॥ ॥ ॥

ब्दोपादानमित्यत आह॥सांख्येति ॥सांख्यं चासौ विषयश्च अनेन विषयसप्तमीयमित्याह । नाविशदं वाङ्मात्रमुक्तं किं तु तव बोधो यथोत्पद्यते तथेत्यप्रसिद्धपदोपादानप्रयोजनमित्युक्तं भवति ॥ ३९॥४० ॥ ॥ ॥

॥ कृ० ॥ ननुजैवंज्ञानमुक्तमिति कथंजीवतत्त्वस्यैवप्रागुक्तत्वाऽज्ञानस्यौक्तिकर्मत्वाभावाच्चेत्यत आह ॥ जीवतत्त्वमित्यर्थइति॥तादर्थ्येनेति॥जीवनित्यत्वादिप्रतिपादनार्थं दृष्टांतत्वाबिंबत्वादिनेश्वरतत्त्वप्रतिपादनादितिभावः॥ बुद्धिकरणस्येंद्रियादिग्रहणे ऽभिहितत्वाद्ययोगादाह॥वागितिशेषइति॥३९॥ ४०॥

१ यथार्थस्वरूपम् २ येन श्रावणेन योगविषयिणी बुद्धिर्नामाज्ञानं तच्छ्रावणं न क्रियतइतिभावः ॥

॥श्री॥तत्कथमेकत्रनिष्ठांकरोमीतिभाष्यानुसारेणाह ॥ श्रुत्वेति ॥ ननु शृण्वित्यस्य श्रवणमात्रमेवार्थः किं तस्यां निष्ठाकरणं कुतो विधेयमित्यत आह॥श्रवणमात्रस्येति॥विधिना विनेति ॥ श्रवणमात्रं शृण्वितिलोड्रूपविधिना विनापि संभवति । तत्र निष्ठाकरणं तु न विधिनाविना संभवतीति शृण्वित्युक्तविधिनैव तत्र निष्ठाकरणे तात्पर्यं ज्ञापितमिति भावः ॥ स्वे स्वे ॥ स्वप्रतिपादिते । सर्वेषां वादिनाम् । केषांचिन्मतानां प्रत्यक्षागमाभ्यामपि निर्णीतत्वाद्युक्तिग्रहणमयुक्तमित्यत आह ॥ युक्तिरितीति ॥ यत इतीति ॥ यस्माद्विप्रतिपत्तिरूपात्कारणात्संदेहात्पस्येत्यर्थः ॥ अभिप्रायमाह । अप्रामाणिकेष्विति । अत इति शेषः ॥४१ ॥

ननु व्यवसायात्मिकेति श्लोकेन प्रतिज्ञातोयोग उच्यते ॥ नापिबुद्ध्या युक्तइत्यादिवत्प्रशंसा तत्किमर्थोयमित्यत आह ॥ योग इति ॥ ज्ञानोपायविषयामिमां वक्ष्यमाणां वाचं शृणु श्रुत्वा तत्र निष्ठां कुर्वित्युक्तमित्यर्थः ॥ श्रवणमात्रस्याविधिना विनाऽसंभवात् ॥ बह्व्योहिबुद्धयोज्ञानोपायविषयावाचःपरस्परविरुद्धाःसंति ॥ कथं ॥ मतभेदात् एकमतमवलंबमानाःकिंचिज्ज्ञानसाधनमाचक्षते ॥ अपरंमतमाश्रितास्तत्प्रतिषेधेनान्यदाहुः ॥ तत्रचेदमेवतत्त्वंनेदमितिविनिगमकंनास्ति ॥ तत्तस्मात्कथमेकत्रत्वदीयायामेववाचिनिष्ठांविश्वासंकरोमि ॥ ननु सर्वाण्यपि

योगइमांबुद्धिंशृण्वित्युक्तम् ॥ बह्व्योहिबुद्धयोमतभेदात्॥तत्कथमेकत्रनिष्ठांकरोमीत्यतआह॥व्यवसाया

व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन ॥ बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

त्मिकेति॥सम्यग्युक्तिनिर्णीतानांमतानामैक्यमेवेत्यर्थः॥४१॥स्युर्वैदिकानिमतानिअव्यवसायात्मकानि॥

मतानि व्यवसायात्मकान्येव स्वे स्वेऽर्थे सर्वेषां संदेहाभावात् ॥ अतःकथमुच्यते व्यवसायात्मिका अव्यवसायिनां बुद्धयइतितत्राह ॥ सम्यगिति ॥ युक्तिरिति प्रमाणसामान्यमुच्यते ॥ प्रमाणत्वेन निर्णीतत्वमेवात्र व्यवसायशब्दार्थो न निश्चयमात्रमित्यर्थः ॥ प्रामाणिकमेव मतं ग्राह्यं तत्र न कदाचिद्विप्रतिपत्तिःयतस्तत्रैकत्र निष्ठाभावः ॥ अप्रामाणिकेषु विद्यमानापि विप्रतिपत्तिः किंकरिष्यतीति भावः ॥ ४१ ॥

यामिमामितिश्लोकस्य प्रकृतोपयोगादर्शनात्संगतिमाह ॥ स्युरिति ॥ न तु वैदिकान्यप्यव्यवसायात्मकानि ॥ ॥ ॥

॥ कृ० ॥ गीतायांशृण्वित्युक्तत्वेपि श्रुत्वेत्यादियदुक्तंतत्रहेतुमाह॥श्रवणमात्रस्येति ॥ व्यवसायात्मकानीति ॥ व्यवसायमूलकान्येवेत्यर्थः ॥ प्रमाणसामान्यमुच्यतइति ॥ मतानांयथायथमागमादिमूलकत्वेन युक्तिमात्रमूलकत्वाभावादितिभावः ॥ प्रमाणेननिर्णीतत्वमेवेति ॥ प्रमाणजन्यनिर्णयएवेत्यर्थः ॥ ४१ ॥ ॥ ॥ ॥

॥ श्री ॥ प्रकृतेति ॥ योगनिरूपणेत्यर्थः ॥ तेषामप्यर्थमाह ॥ व्यवसायात्मकमित्यादि ॥ अभिप्रेतीति ॥ कर्मसंबंधसाम्यमीति कर्मरूपयोगस्य मोक्षसाधनत्वोक्त्या तज्जनकज्ञानं तु त्वमप्यभिप्रेतमिति भावः ॥ स्पष्टं तथात्वं कर्माभिप्रेतत्वमुक्तम् ॥ अन्यथेति ॥ तथाच नित्यसाम्येत्यत्र तच्छब्देन तावन्निर्देश इत्यनेन योगनिरूपणमर्यादामिति नाकांक्षितच्छब्दोऽनन्वितः स्यादित्यर्थः ॥ प्रसिद्धपुष्पफलयोः स्वर्गमोक्षयोरपि जन्यजनकभावं तदनन्तरमिति श्रुतिरस्यर्थः ॥ अत्यल्प त्वेनेति ॥ यथा फलापेक्षया पुष्पस्याल्पत्वं तथैव मोक्षापेक्षया स्वर्गस्यात्यल्पत्वात् पुष्पत्वोपमेत्यर्थः ॥ एवमपीति ॥ कर्मादिवाचकवेदस्य तदापातत्वमित्यर्थः ॥ वक्ष्यते चात्रेति ॥ वादोऽविपयकत्वं समस्तवचनं स्मृतमित्यत्र प्रदेशेन वक्ष्यत इत्यर्थः ॥ अत्र मुख्यतो वचनमित्यापाततः प्रतिपादनस्योक्त्वादिति द्रष्टव्यम ॥ ननु कथमनेन निंदागम्यत इत्यत आह ॥ सावधारणमिति ॥ तदेवं स्वर्गादिकरणेन निंदागम्यत इति भावः ॥ ॥ ॥ ॥

ततः किं प्रकृत इत्यत उक्तम् ॥ तेऽपीति ॥ व्यवसायात्मकं मतं वैदिकमतमवलंबमाना अपि केचित् वैदिकानि सर्वाण्येव कर्माणि स्वर्गादिफलान्याहुः॥भवांस्तु काम्यान्येव स्वर्गादिफलकानि निष्कामानीश्वरार्पणबुद्ध्याऽनुष्ठितानि तु ज्ञानार्थानीत्यभिप्रैति॥ तथाच त्वद्वचने निष्ठाऽनुपपत्तिस्तदवस्थेति भावः॥आह॥ तेषां वैदिकाभासप्रदर्शनाय निंदामिति शेषः॥ भोगैश्वर्यगतेरपि प्रकृतत्वात्तयेतितत्परामर्शभ्रांतिं वारयति

ननुवैदिकानि ॥ तेऽपिहिकेचित्कर्माणिस्वर्गादिफलान्येवाहुरित्यतआह ॥ यामिमामिति ॥ यामाहुस्तये

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः ॥ ४२ ॥

त्यन्वयः॥ मोक्षफलमपेक्ष्यस्वर्गादिपुष्पयुक्तांवाचंप्रवदंति ॥ वेदवादरताः ॥ कर्मादिवाचकवेदवादरताः॥

वेदैर्यन्मुखत उच्यतेतत्रैवरताः ॥ यामिति ॥ अन्यथा यच्छब्दःसाकांक्षोऽनन्वितःस्यादिति भावः ॥ वाचःपुष्पितत्वं कथमित्यत आह ॥ मोक्षेति ॥ अत्यल्पत्वेनोपमा ॥ वेदवादरता इत्येतत्कथं निंदावचनमित्यत आह ॥ वेदेति॥कथमेतस्मात्पदाल्लभ्यते कथंचेषाऽपि निंदेत्यत आह ॥वेदैरिति ॥वादशब्दोऽत्रापाततः प्रतिपादने वर्तते ॥ वक्ष्यते चात्राभिधानम् ॥ आपाततः प्रतिपाद्यं च कर्मादि ॥ सावधारणं चैतत् ॥ अब्भक्षो वायुभक्षइति यथेत्यर्थः ॥कः॥स्वर्गादिफलानीति॥ सर्वाण्यपीत्यर्थः कामनाति नस्वर्गादेः फलांतरं॥हतोवाप्राप्स्यसि स्वर्गमित्याद्युक्तेरिति तेषांभावः॥अभिप्रैतीति ॥ हतोवाप्राप्स्यसिस्वर्गं ॥ स्वल्पमप्यस्यधर्मस्यत्रायते महतोभयादितिव्यामिश्रोक्त्यन्यथानुपपत्त्या काम्यानिस्वर्गादिफलानि अकाम्यानिज्ञानार्थानि ज्ञानंविनामहाभयरूपसंसारनिवर्तकत्वायोगादिति ॥ उक्तार्थद्वयावगमादभिप्रैतीत्युक्तमननुपुष्पफलवत्स्वर्गमोक्षयोर्जन्यजनकत्वाभावात्कथमुपमेत्यत आह ॥ अत्यल्पत्वेनेति ॥ फलापेक्षयापुष्पवत् मोक्षापेक्षयास्वर्गस्यात्यल्पत्वेनेत्यर्थः ॥ वक्ष्यतेचेति ॥ वादोऽविपयकत्वंच मुख्यतोवचनंस्मृतमितीतिशेषः ॥ एतमपिनिंदात्वगमादाह ॥ सावधारणंचेति ॥ ॥ ॥

॥ श्री ॥ कोसौ ॥ अर्थः ॥ कुत ॥ प्रमाणात ॥ अतएवेति ॥ कचित्प्रकारस्वचनाभिप्रायेण प्रयुक्तश्रौते वशब्दव्याख्यानसूचनार्थमेवेत्यर्थः॥ननुदेवानां परोक्षप्रियत्वेवेदानांकिमायात मित्यत आह ॥ देवाइति ॥ तत्प्रकारेति ॥ वेदानांपरोक्षार्थत्वेनिगदकत्वप्रकारमित्यर्थ मां विधत्ते अभिधत्ते मां विकल्प्यापोह्य इत्यहम॥इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चनेति अस्य श्लोकस्यायमर्थः॥कर्मविधात्री श्रुतिर्मा प्रत्येवविधत्ते इंद्रादिरभिधात्री चमामेवाभिधत्ते॥ कल्याणिवागित्यादिश्रुत्याहंविविधरूपत्वेनकल्प्यः॥नसुरांपिबेदित्यादिश्रुत्याहमेवाप्रियादपोह्यः॥एवंभूताया अस्याःश्रुतेरभिप्रायमहमेवतद्वेदनमत्तोऽन्यइति ॥ ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सावधारणत्वंकुतइतिचेत उत्तरपदबलादितितातिपठति॥नान्यदिति।आपाततःप्रतीतार्थादन्यस्यसद्भावेभवेदेषांनिंदा॥कोऽसौकुतश्चेत्यतआह॥प

नान्यदस्तीतिवादिनः ॥ परोक्षविषयावेदाः ॥ परोक्षप्रियाइवहिदेवाः ॥ मांविधत्तेऽभिधत्तेमा मित्यादिभिःपारोक्ष्येणप्रायोभगवंतंवदंति ॥ ४२॥

रोक्षेति।कचित्प्रकटवचनादित्युक्तम् ॥अतएवप्रायइत्याह।देवावेदाभिमानिनः ॥तत्प्रकारसूचनार्थमांविधत्तइत्याद्युदाहृतम्॥वदंतिवेदाः॥४२॥

॥क्र०॥तत्प्रकारेति ॥ वेदानांपरोक्षार्थत्वनिगदकत्वप्रकारमित्यर्थ ॥ मांविधत्तेअभिधत्तेमांविकल्प्यापोह्यइत्यहम॥इत्यस्याहृदयंमासाक्षान्नान्योमद्वेदकश्चनेत्यस्यार्थः ॥कर्मविधात्रीश्रुतिर्मांप्रत्येवविधत्ते इंद्राद्यभिधात्रीचमामेवाभिधत्ते॥कल्याणिवागित्यादिश्रुत्याऽहंविविधरूपत्वेनकल्प्यः नसुरांपिबेदित्यादिश्रुत्याहमेवाप्रियादपोह्यः॥एवंभूताया अस्याः श्रुतेरभिप्रायमहमेव वेदनमत्तोऽन्यइति॥४२॥

१ भास्कं० ११ अ० २१ श्लो० ४३ तत्रपूर्वार्धोत्तरार्धयोरर्थव्यासेनपाठ साक्षात्स्थानेलोकइतीति ॥ अत्रत्य समन्वयप्रकरणभाष्यावली ॥ यथापाठमन्वयाभावादन्वयप्रदर्शनार्थंभाष्येव्यत्यासदर्तिसुमतींद्रस्वामिनः ॥मुख्यप्राणोऽपिमत्प्रसादादेवेदार्थंजानाति॥निगूढत्वात्सर्वेवेदार्थेनत्वमत्समानामीतिभागश्टीकायामवतरणेमुच्यत इत्युक्तत्वाल्लोकेविहउजनमध्येइतिचोक्तत्वाभाक्षात्लोकइतिपाठद्वयमपितट्टीकासंमतमितिभाति ॥२ कर्माणिशेषः ॥ मत्प्रीत्यर्थमित्यर्थः ॥ ३ इंद्रादिनामभिरितिशेषः ॥ ॥ ॥

४नप्रियंफलंयस्मात्तदप्रियं॥अपरितोषणंतस्मादपोह्यइतिगूढार्थदीपिका॥भगवत्प्रीतिकरत्वात्सुरापानादेर्गोह्योव्यावर्तनीयः॥सुरापानादिकुर्वताऽहमप्राप्यइतिबोधनीयइतियावदितिसुमतींद्रस्वामिनः

॥ श्री० ॥ अन्यथेति ॥अन्यथा गतिशब्दस्यावगत्यर्थकत्वे कर्मणोभोगैश्वर्यरूपस्वर्गसाधनत्वस्यैव नस्वर्गादेः फलांतरमितिवदद्भिरंगीकृतत्वेनभोगैश्वर्ये[illegible]
स्यादिति भावः ॥ केचित्तु कर्मणो भोगैश्वर्यावगतिसाधनत्वमित्यर्थांगीकारे उत्तरत्र भोगैश्वर्यप्रसक्तानामित्यस्यासदनुवादत्वप्रसंग इत्यर्थइत्याहु ॥ [illegible] ॥ [illegible]
त्युक्तिरपीत्यर्थः॥अवधारणोक्त्या निंदागम्यत इत्यभिप्रायेणोक्तम ॥भाष्ये तत्प्राप्तिफला एव वेदा इति वदंतीति ॥तत्रैवकारार्थमाह ॥मोक्षमिति ॥ ४३ ॥ [illegible] बुद्धिशब्द[illegible]

गतिशब्दस्यावगतिरप्यर्थः प्रतीयेतेत्यतआह ॥ भोगेति ॥ अन्यथाऽसदनुवादप्रसंगादितिभावः ॥ एषाऽपिकथंनिंदेत्यतआह ॥ तत्प्राप्तीति

भोगैश्वर्यगतिंतत्प्राप्तिंप्रति॥तत्प्राप्तिफलाएववेदाइतिवदंतीत्यर्थः ॥ ४३ ॥ तयांसम्यग्युक्तिनिर्णयात्मि

कामात्मानःस्वर्गपराजन्मकर्मफलप्रदाम् ॥ क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानांतयापहृतचेतसाम् ॥ व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ॥ ४४॥

काबुद्धिःसमाधौसमाध्यर्थेनविधीयते॥ ॥ ॥ ॥

मोक्षंवेदफलंनमन्यंतइत्यर्थः ॥ ४३ ॥ तयापहृतेत्यादेरप्रतीतिनिरासायार्थमाह ॥ तेषामिति ॥ तेषांबुद्धिर्मनोवृत्तिर्व्यवसायात्मिकासम्यग्यु
क्तिनिर्णयात्मिकानभवति ॥ ततएवेश्वरेसम्यक्समाधानार्थेन विधीयतइत्यर्थः ॥ ॥ ॥ ॥

वाचोगृहीतत्वादत्रापि तत्परत्वभ्रांतिंवारयति ॥ बुद्धिर्मनोवृत्तिरिति॥ ज्ञानमिति यावत् ॥१॥अन्यथेति॥प्राप्त्यर्थ[illegible]इत्यर्थ ॥ असदनुवादेति॥भोगैश्वर्यप्रसक्तानामित्यनेनेतिशेषः ४३ ॥ ६५ ॥

१ ज्ञानम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ॥ **सम्यग्युक्तिनिर्णयात्मिकेति** ॥ समीचीनप्रमाणनिर्णीतार्थविषयिणीत्यर्थः ॥ **अनेनेति** ॥ मनःसमाधानमिति वचनेनेत्यर्थः ईश्वरे मनःसमाधानस्य मोक्षसाधनत्वेपितदभा वस्य कथं निंद्यत्वमित्यत आह ॥ **मोक्षाभावश्चेति** ॥ ईश्वरेमनःसमाधानं तावन्मोक्षसाधनत्वेन श्रुत्यादिप्रसिद्धम् तत्रेश्वरे मनःसमाधानानंगीकारे न मोक्ष एवानंगीकृतप्रायःस्या न्मोक्षाभावांगीकारश्च महानिंद्यत्याशयः ॥ भाष्ये उक्तंचेत्यत्र तद्धिमोक्षसाधनमित्येतत्पगमर्थे प्रमाणेऽस्यार्थस्य प्रतिपादनादर्शनाद्व्याचष्टे ॥ **सम्यगित्यादिना** ॥ उक्त चेत्यत्र त्यचशब्दार्थमाह ॥**न केवलमिति** ॥ ननु वरीयसीत्यस्य वाग्विशेषणत्वाद्वरीयस्य इति भवेद्वरीयसीरिति द्वितीयाबहुवचनं कथमित्यत आह ॥ **वरीयसीरिति** ॥ **सुपामिति** ॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ सुश्च लुक्च पूर्वसवर्णश्च आच्च आत् च शे च या च डा च ड्या च याच्च आल् च तेसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल इति इतरेतरयोगद्वंद्वः ॥ सुपां

सम्यग्युक्तिनिर्णयात्मकत्वाभावेकुतःसमाध्यभावइत्यतआह॥सम्यगिति॥अनेनसमाधिशब्दार्थोऽपिविवृतोभवति॥किमीश्वरेमनःसमाधानेनयेन तदभावेनिंदास्यादित्यतआह तद्धीति॥मोक्षाभावश्चमहानिंदेतिवक्ष्यति॥सम्यग्निर्णीतार्थानामित्युक्तम्॥नकेवलमानुभाविकंकिंतुपुराणेप्युक्तमित्याह॥उ

सम्यग्निर्णीतार्थानामीश्वरेमनःसमाधानंसम्यग्भवति ॥ तद्धिमोक्षसाधनम् ॥ उक्तंचैतदन्यत्र ॥ नतस्य[1] तत्त्वग्रहणायसाक्षाद्वरीयसीरपिवाचःसमासन्[2] ॥ स्वप्नेनिरुक्त्यागृहमेधिसौख्यंनयस्यहेयानुमितंस्वयंस्यात् ॥४४॥

क्तंचेति॥वरीयसीः॥वरीयस्यः॥सुपांसुलुगित्यादिनाजसःपूर्वसवर्णःवाचोवेदवाचः॥स्वप्नेनिरुक्त्यास्वप्नप्रतीतार्थदृष्टांतेनहेयानुमितंहेयत्वेनानुमितम्

स्थाने एते आदेशाःस्युरिति सूत्रार्थः ॥ ऋजवःसंतु पंथाः ॥ पंथान इति प्राप्ते जसःसुः ॥ आर्द्रे चर्मन् ॥ चर्मणीति प्राप्तेलुक् ॥ मती ॥ मत्या इति प्राप्ते पूर्वसवर्णदीर्घः ॥ सखाया सखायाविति प्राप्ते औकारस्य आ ॥ नताद्ब्राह्मणम ॥ नतमिति प्राप्ते अम आत् ॥ अस्मे इंद्राबृहस्पती नयुष्मे वाजबंधवः ॥ वयंयूयमितिप्राप्तेजसःशे ॥यूयवयादेशाभावश्चछांदसत्वात्॥ ॥ कृ० ॥ लक्ष्यतीति॥कृपणाः फलहेतवइत्यत्रनिशेषः ॥ ४४ ॥ ॥ ॥ ॥ ॥ ॥

१भा०स्कं०५अ०१२श्लो०३साक्षात्तत्त्वग्रहणायब्रह्मज्ञानायेत्यर्थः ॥ २समभवन् ॥ भूतकालिकनिषेधोवर्तमानभविष्यकालोपलक्षणम् ॥अतएवस्यादिति त्रैकालिकसाधारणलिङ्प्रयोगः॥

॥ श्री ॥ उरुया ॥ उरुणेति प्राप्ते या ॥ नाभा पृथिव्याः ॥ नाभाविति प्राप्ते डा ॥ अनुष्टुया नयामसि ॥ अनुष्टुभा इति प्राप्ते इया ॥ साधुया ॥ साध्विति प्राप्ते याच् ॥ वसंता यजेत ॥ वसंते इति प्राप्ते आल् च इत्युदाहरणानि ॥ अत्र वरीयसी जस् इति स्थिते जकारलोपे वरीयसी अस् इति जाते यणादेशे वरीयस्यस इति जाते रुत्वे विसर्गे च वरीयस्य इति भवति ॥ प्रकृते च वरीयसी अस् इत्यत्र यणादेशाभावे जसः जस्प्रत्ययांतर्गतस्य अकारस्य पूर्वसवर्णः पूर्वविद्यमानो य ईकारः स एव जातः ॥ तथा च वरीयसीस् इति जाते रुत्वे विसर्गे च वरीयसीरित्यत्र जसि रूपं भवतीति वाच्य इत्यतद्विशेषणत्वं वरीयसीरित्यस्योपपन्नमित्यर्थः ॥ ननु प्रमाणे सम्यग्ज्ञानिर्णीतस्य मोक्षसाधनत्वं न प्रतीयतेऽत आह ॥ इदमेवहीति ॥ ननु तद्धिमोक्षसाधनमित्यत्र प्रमाणानुक्तेरप्रामाणिकत्वादित्यत आह ॥ तद्धीति ॥ ४४ ॥ प्रतिज्ञातामिति ॥ योगोऽनिमां शृण्विति प्रतिज्ञातामित्यर्थः ॥ कथं सूचनमित्यत आह ॥ सप्तमेति ॥

इदमेवहिसम्यग्ज्ञाननिर्णीतार्थत्वम् ॥ यद्धेयोपादेयविवेकेनहेयहानमुपादेयोपादानंच ॥ तद्धिमोक्षसाधनमित्येतत्तुश्रुत्यादिप्रसिद्धमेव ॥ ४४ ॥
यथेपाचतुःश्लोकीनप्रतिज्ञातंयोगमाह तथात्रैगुण्येत्येनदर्पातिप्रतीतिनिरासायाह ॥ तामिति ॥ प्रतिज्ञाताम् ॥ आदिग्रहणेनापष्ठसमाप्तेरितिसू

तांयोगबुद्धिमाह ॥ त्रैगुण्यविषयाइत्यादिनेतरदपोह्य

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन ॥ ॥ निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान् ॥ ४५ ॥

चयति ॥ सप्तमेोपक्रमेपुनःप्रतिज्ञानात् ॥ तर्हिप्रतिज्ञानंतरमेवकुतोनावोचदितिमंदाशंकानिरासायोक्तमितरदिति ॥ स्वोक्तौनिष्ठाभावेकारण मेवमपोह्येदानीं प्रतिज्ञानमाह ॥ अन्यथानत्प्रतिबंधेनास्यानवसरादिति भावः॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रतिज्ञानादिति ॥ साधनं प्राधान्येनोक्तमनीतिस्पष्टार्थः ॥ इतरत् षड्भिर्भगवत्माहात्म्यं प्राधान्येनाहेति प्रसंगात्कथनस्य पुनः प्रतिज्ञानत्वादित्यर्थः ॥ मंदाशंकेति ॥ चतुःश्लोक्याः सम्यग्व्याख्यातत्वात् बुद्धिमतां शंकानुदयादित्यर्थः इतरदित्यस्यार्थमाह ॥ स्वोक्ताविति ॥ एवमिति ॥ व्यासमापनमिति श्लोकत्रनुष्टयेन ॥ प्रतिज्ञानमाह ॥ त्रैगुण्येत्यादिनेति शेषः ॥ अन्यथेति ॥ इतरस्यापोहनाकरणे ॥ तत्प्रतिबंधेन ॥ स्वोक्तौ निष्ठाभावकरणशंकाप्रतिबंधेन ॥ अस्य ॥ प्रतिज्ञातयोगकथनस्य ॥ ॥ ॥
॥ कृ० ॥ मंदाशंकेति चतुःश्लोक्या व्याख्यातत्वात्तत्पर्यालोचनायां बुद्धिमतां शंकानुदयादिति भावः ॥ ॥ ॥ ॥

॥ श्री० ॥ बहव्यो बुद्धय इत्यादिशंकाप्रतिवंधेन योगनिरूपणेऽवसराभावाद्बहुत्वंकथनद्वयेन तदुक्तंकानिगमेमत्येवावसरसंगत्या प्रतिज्ञातयोगनिरूपणसंभवतीत्याशय ॥ वृत्ति ॥ व्याख्यानं ॥ इतरदपोह्येत्यस्यार्थः प्रासंगिकं विहायेति ॥ अन्यव्याख्यानद्वये ज्ञापकमाह ॥ तथा चेति ॥ प्राधान्येनेत्युक्त्या बहूनीत्यादेः प्रासंगिकत्वं सूचितमित्यर्थः ॥ तद्विनायमिति ॥ तथा च त्रिगुणशब्दात्तस्येदमिति संबंधार्थे ष्यञ्प्रत्यये षकारचकारयोरित्संज्ञायां वृद्धौ त्रैगुण्यमिति भवति ॥ ननु गुणवचनब्राह्मणादिभ्यः कर्मणि चेति भावे कर्मणि वा ष्यञो विधानात् त्रिगुणानां भावः कर्म वा त्रैगुण्यमिति स्यात् न तु संबंधार्थे ष्यञ् विहितोऽतस्तस्येदमित्यर्थे तद्धितोयमिति कथमित्यत आह ॥ विचित्राहीति ॥ तथा च तद्धितस्थितेर्विचित्रत्वात् संबंधार्थेपि ष्यञ्युक्त इति भावः ॥ कार्यमिति ॥ कार्यकारणभावः षष्ठ्यर्थः ... ॥ मुक्तेः स्वर्गादीत्युक्तादिपदार्थकतया धर्मादिकर्मार्थेन तदनुसारेणार्थः प्रतिपाद्यमित्युक्तम् ॥ निस्त्रैगुण्यो भवेति गीताव्याख्यानपरत्वात् इति भाष्यस्यार्थमाह ॥ अत इति ॥ प्रासीति ॥ ... स्वर्गतत्कारणादिविषयतया ... प्रासीत्यर्थः ॥ कथमेतदनेन लभ्यत इति ॥

अथवा वक्ष्यमाणानां वाक्यानां द्वैधावृत्तिमनेनाचष्टे ॥ कश्चिद्वाक्यस्यांगित्वेनाथ योगविरुद्धमपरः कश्चिद्योगमाहेति ॥ यद्वा बहूनि मेव्यतीतानि इत्यादि प्रासंगिकं विहायान्ययोगविषयं ज्ञातव्यमित्यर्थः ॥ तथा च वक्ष्यति साधनं प्राधान्येनोक्तमिति ॥ वेदास्त्रैगुण्यविषयास्त्वेवं तु निस्त्रैगुण्यो भवेत्यनेन वेदपरित्यागो विधीयते इत्यन्यथाप्रतीतिनिरासायाचष्टे ॥ वेदानामिति ॥ त्रिगुणसंबंधीत्यनेनतस्येदमित्यर्थेतद्धितोऽयम् ॥ विचित्राहितद्धि

वेदानांपरोक्षार्थत्वात्रिगुणसंबंधिस्वर्गादिप्रतीतोऽर्थइवभाति ॥ परोक्षवादोवेदोयमितिह्युक्तम् ॥

अतःप्रातीतिकेऽर्थेभ्रांतिमाकुर्वित्यर्थः ॥

तगतिरितिवचनादितिसूचयति ॥ संबंधिकार्यम् ॥ प्रतीतितः ॥ आपाततःप्रतीतितः ॥ अर्थःप्रतिपाद्यप्रयोजनंच ॥ वेदानांपरोक्षार्थत्वंकुतइत्यतआह ॥ परोक्षेति ॥ यतएवभवतिअतःप्रातिभद्वावात्प्रसक्तांभ्रांतिमाकर्षीः ॥ कथमेतदनेनलभ्यतेइत्यतआह ॥ ॥

॥कृ०॥तथाचवक्ष्यतीति ॥ सप्तमोपक्रमइतिशेषः ॥ तद्धितोयमिति ॥ ष्यञ्प्रत्ययइत्यर्थः ॥ तस्येदमित्यर्थे ष्यञोविध्यभावादाह ॥ विचित्रेति ॥ स्वर्गादिप्रतीयमानविषयस्याग्रहणात्तदानुकूल्यायव्याचष्टे ॥ प्रतिपाद्यंप्रयोजनंचेति ॥ कथमेतदनेनेति ॥ ॥ ॥ ॥ ॥ ॥

१ पाठक्रमापेक्षया प्रयोजनंप्रतिपाद्यंचेतिवक्तव्येसत्यपि अमरकोशेअर्थोभिधेयमितिप्रथमतः प्रतिपाद्यरूपार्थाभिधानादत्रतथोक्तिः ॥ मुक्तेःस्वर्गस्यकंठतउक्तेःधर्मस्यादिपदेनग्रहणंततस्य नस्वर्गवत्त्याज्यत्वमितिसूचनाय ॥ अग्रे कर्मण्येवाधिकारःमाकर्मफलहेतुर्भूरित्युक्तेरितिभावः मा० ... वालानामनुशासनम् ॥ कर्मसंगाय कर्माणि ... श्लोकशेषः ॥ अर्थवेदः मुख्यवृत्त्याब्रह्मवक्ति अमुख्यया कर्मचहि अल्पज्ञानां शिक्षांकुर्वन्ब्रह्मार्पणबुद्ध्या कर्माणि विधत्ते ॥ यथा ... इत्यर्थः ॥ एतेनपूर्वश्लोकोक्तवेदस्यभगवत्तात्पर्यनिरूपणम् ॥

॥ श्री ॥ त्रिगुणसंबंधि स्वर्गादिप्रतीतार्थ इत्येतत् त्रैगुण्यविषया वेदा इतिवाक्येन कथं लभ्यत इत्यर्थः ॥ वादइतीति ॥ वादो विषयकत्वं चोतिपदाभ्यां मुखतो वचनं प्रतिपाद्यतया स्मृत मित्यर्थः ॥गातायां तु विषयकत्वार्थ हविर्वशब्दोऽन्येन ॥ विषयकारित्वं हि विषयकत्वशब्दार्थः त्रैगुण्यविषया इत्यत्रापि विषयशब्देन बहुव्रीहिणा त्रैगुण्यविषयका इत्यर्थलाभेन मुखतस्त्रैगुण्यवचना इत्यर्थः प्राप्नोत्येवेति द्रष्टव्यम ॥ एतदेवचेति ॥ अनेन वक्ष्यते चात्राभिधानीमित्युक्तं प्रदर्शितं भवति ॥ प्रतीत एवार्थ इति ॥ वेदपरित्यागविधिरूपः ॥ उत्तानार्थ इति ॥ अनेनप्रागुक्त अर्थ इवेतीवशब्दो वेदमुख्यार्थत्वाभिप्रायेणेत्युक्तं भवति ॥ ननूत्तानार्थोऽपि कथं निषेधार्ह इत्यत उक्तम् ॥ योगविरोधित्वादिति ॥ सर्ववेदानां विष्णु परत्ववर्णनं ॥ वेदविहितधर्माचरणं निषिद्धधर्मत्यागश्चयोगस्तद्विरोधीत्यर्थः ॥ क्षीणे[1] पुण्ये मर्त्यलोकं विशंतीति वचनेनतंत्रभकत्वावगमान्मोक्षोपायाविरोधित्वामिति द्रष्टव्यम् ॥ धर्ममूलमित्यत्र धर्मोत्पादकामित्यन्यथाप्रतीतिनिरासायाह ॥ धर्मज्ञप्तेरिति ॥ मनोगतिरिति ॥ धर्मस्वरूपनिरूपत्वाद्योयोदेवमनोगतः ॥ स एव धर्मो विज्ञेयो न त्वेते लोकसंमिताः ॥ प्रायः सतां न मनः पापमार्गे गच्छेदित्यादिवचनादितिभावः ॥ देहयात्रार्थं सद्भिरनुष्ठितस्य लशुनभक्षणादेर्धर्मत्वाभावाद्धर्मबुद्ध्येत्युक्तम् ॥

वादइति वेदवादरताइत्यत्राप्येतदेवचाभिधानम् प्रतीतएवार्थोऽस्तुइत्यतआह ॥ नत्विति ॥पक्षः परमसिद्धांतः॥उत्तानार्थोवेदोनिषिध्यत एव॥योग विरोधित्वादित्यतःपक्ष इत्युक्तम् ॥ कुतइत्यत आह ॥ वेदइति ॥ धर्ममूलं धर्मज्ञप्तेः कारणम् ॥ तद्विदां वेदविदां मन्वादीनाम् ॥ स्मृतिग्रं

वादोविषयकृत्वंचमुखतावचनंस्मृतमित्यभिधानम् ॥ नतुवेदपक्षोनिषिध्यते ॥ वेदेरामायणेचैवपुराणे भारतेतथा ॥ आदावंतेचमध्येचविष्णुःसर्वत्रगीयते ॥ सर्ववेदायत्पदम् ॥ वेदोऽखिलोधर्ममूलंस्मृतिशी लेचतद्विदाम् ॥ आचारश्चैवसाधूनामात्मनोरुचिरेवच

थः ॥ शीलं मनोगतिः ॥ आचारोधर्मबुद्ध्यानुष्ठानम्॥आत्मनःमनसोरुचिः ॥

॥ कु० त्रैगुण्यविषयाइतिविषयशब्दांतबहुव्रीहिणातद्विषयकत्वमात्रलाभेव्यापाततः प्रतिपादनंकथं लभ्यतइत्यर्थः ॥ अभिधानेविषयकृत्वमित्यनेनविषयीकारित्वार्थकविषयशब्दांतबहुव्रीहिग्रहाः ॥ तथाचवादः विषयशब्दांतबहुव्रीहिश्रोत्याभ्यामापाततः प्रतिपादनमुच्यतइत्यर्थः ॥ उत्तानार्थइति ॥ काम्यकर्माद्यापातार्थइत्यर्थः ॥ धर्मकारणत्वाभावादाह ॥ धर्मज्ञप्तेरिति ॥ ननुशुचौ तु चरिते शीलमित्यमरोक्तेराचार इत्यनेन पुनरुक्तिरित्यत आह ॥ शीलं मनोगतिरिति॥ शीलसमाधान इत्यस्माद्धात्व घञर्थे कविधानम् ॥ अर्धर्चादित्वात्क्लीबत्वम् ॥ समाधानं च मनोवृत्तिविशेष इत्युक्तार्थलाभ इतिभावः लौकिकव्यापारव्यावृत्त्यर्थमुक्तम धर्मबुद्ध्येति ॥

१ भाष्यइतिशेषः २ तथापिप्रकृतापयुक्तमर्थमाहक्षीणेत्यादिना ॥ ॥ ॥ ॥ ॥ ॥

॥श्री०॥**विकल्पविषय इति** ॥ युगपदनुष्ठानाद्ययोग्यधर्मयोर्मध्ये यत्रत्वमनसो रुचिस्तदेवकार्यमिति मनसोरुचिरेव धर्ममूलमित्यर्थः ॥ ननु वेदविहितस्य वेदपरमसिद्धांतत्वे प्रवृत्तधर्म स्यापिवेदपक्षत्वं प्राप्तमत आह ॥ **धर्मइति** ॥ **यत्कर्मेति** ॥ यावत्कर्मेत्यर्थः ॥ ननु गीतायां यथेवंशब्दयोरभावात्कथं यथा यावान ॥ एवंसर्वेष्वितिभाष्यतेकथं च पूर्वार्धे द्वितीयपादे तावानिति उत्तरत्र यावानिति भाष्यत इत्यत आह ॥ **सामर्थ्यादिति** ॥ अर्थाबाधरूपयोग्यताप्राप्तेरित्यर्थः ॥ **आवृत्तिश्चेति** ॥

विकल्पविषये ॥ प्रणिहितो विहितः ॥ तद्विपर्ययःप्रतिषिद्धः विवक्षितयोगविरोधे हि वेदे सिद्धांतो निषेध्यःस्यात ॥ नचैवंप्रत्युत तदनुगुण एवेति भावः ॥ धर्मशब्दोऽत्रै निवृत्तिधर्मपरः ॥ ४५ ॥ योगोपदेशप्रसंगे ज्ञानफलकथनस्य क उपयोगइत्यत आह ॥ तथाऽपीति ॥ यामि मामित्यत्र काम्यकर्मिणां निंदा कृता निस्त्रैगुण्यो भवेतिचतत्त्यागो विहितः ॥ तत्र प्रष्टव्यम् ॥ किन्निमित्तमेतादीति॥ ननूक्तंकाम्यकर्मिणां

वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः ॥ इतिवेदानांसर्वात्मनाविष्णुपरत्वोक्तेस्तद्विहितस्यतद्विरुद्धस्य

यावानर्थउदपानेसर्वतः संप्लुतोदके ॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्यविजानतः ॥ ४६ ॥

चधर्माधर्मोक्तेश्च॥ ४५ ॥ तथापिकाम्यकर्मिणांफलंज्ञानिनांनभवतीतिसाम्यमेवेत्यतआह ॥ यावानर्थ

इति॥यथायावानर्थःप्रयोजनमुदपानेकूपेभवति ॥ तावान्सर्वतःसंप्लुतोदकेऽतभवत्येव

समाध्यभावेनज्ञानाभावान्मोक्षो न भवतीति ॥ अत्रेदमुच्यते ॥ यद्यपि ज्ञानफलं काम्यकर्मिणां न भवति तथाऽपितन्निंदादिकं नोपपद्यते ॥ कुतः काम्यकर्मिणां फलं स्वर्गादिकंज्ञानिनांनभवति इति ज्ञानकर्मणोःसाम्यमेवेति योगानुष्ठाननियमाक्षेपे सत्याहेत्यर्थः ॥ केचिदस्य श्लोकस्य कर्ममात्रत्यागे तात्पर्यमाहुः ॥ अपरे तुयत्कर्मसमुच्चितं ज्ञानं मोक्षसाधनं तत्कर्मपर एव वेदभागोऽधिगंतव्यः ॥ न तु समस्तवेदा भ्यासेनायुः समापनीयमिति तन्निरासाय व्याचष्टे॥ यथेति ॥ सामर्थ्याद्यथेवंशब्दयोरध्याहारः ॥ यावांस्तावानित्येतयोरावृत्तिश्च ॥ ॥

॥रु०॥निषिद्धविषये रुचिव्य.वृत्त्यर्थमुक्तम ॥ विकल्पविषय इति ॥ युगपदनुष्ठानायोग्यकर्मद्वयविषय इत्यर्थः ॥ ननु वेदविहितस्यधर्मत्वे काम्यधर्मस्य धर्मत्वं न स्यात ॥ वेदनिषिद्धत्वा दित्यतआह ॥ धर्मशब्दोऽत्रेति ॥ ४५॥सामर्थ्यादिति ॥ अर्थाबाधरूपसामर्थ्यादित्यर्थः ॥ ॥ ॥ ॥ ॥

१ पूर्ववाक्यअविलेति वेदविशेषणादत्रप्रणिहितनिप्रोपसर्गादितिभाव ॥२ शुद्धोदकमहाप्रुद्रे ३ तच्चेष्टम् ॥ अ० ३ पा० १ सुकृतदुष्कृतेएवेति तुबादरिरित्यत्रभाष्येधर्मंचरतमाधर्ममित्युद हरणात् ॥तत्रच धर्मशब्दः काम्यकर्मपरः अन्यथागतागतफलककर्मप्रतिपादनप्रकरणेतदुदाहरणासंगते ॥ ४ वेदोऽखिलोधर्ममूलंवेदप्रणिहितोधर्मइत्यत्रेत्यर्थःतेनान्यत्रान्यपरत्वेनक्षातिरिति भावः

॥श्री॥पूर्वार्धे द्वितीयपादे तावानिति उत्तरार्धे आद्यपादे च यावानिति च माह्यम ॥ अध्याहारावृत्त्योरभावे संगतिःस्यादिति भावः ॥ शंक्येति॥ विशेषोक्तिः शेषनिषेधं गमयतीति न्याया
दितिभावःननु ब्रह्म अणतीति निर्वचने सवर्णदीर्घे ब्रह्माण इति स्यादित्यत आह॥वर्णविपर्यय इति ॥ ब्रह्मन्नृत्तरत्र स्थितो दीर्घः पूर्वाक्षरस्य बकारस्य परो द्रष्टव्यः॥तथा च ब्राह्मण
इति भवतीति ध्येयम ॥ किमत्र नियामकमित्यत आह ॥ निरुक्तत्वादिति ॥ वर्णागमो वर्णविपर्ययश्च तथा परौ वर्णविकारनाशौ ॥ धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं
निरुक्तमिति ॥ भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ॥ गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरमित्याद्युदाहरणानि च द्रष्टव्यानि ॥ एवं तर्हीति ॥ अणपणगतौ गतिश्च प्राप्तिस्तथाच
ब्राह्मणो ब्रह्मप्राप्त इत्याशयेनेयं शंकेति ध्येयम ॥ स हीति ॥ तथा चात्र ब्रह्मप्राप्तो न विवक्षितः किं तु ब्रह्मप्राप्तियोग्यस्तादृशश्चापरोक्षज्ञान्येवेति भावः ॥ अपरे तु प्रागुक्ताभिप्रा
येण शंका ॥ गत्यर्थानां ज्ञानार्थत्वमभिप्रेत्य परिहारस्त्वर्थं च गच्छतीत्यस्य जानातीत्यर्थो द्रष्टव्य इत्याहुः ॥ अनुपपन्नमिति ॥ ज्ञानादेव स्वर्गइति श्रुत्याऽपरोक्षज्ञानस्य यथास
वैफलकत्वं यथा वा मोक्षाख्यमहाफलकत्वं तथा न परोक्षज्ञानस्येत्यनयोः समकक्षतया ग्रहणमनुपपन्नमित्यर्थः ॥ नन्वपरोक्षज्ञानस्य परोक्षज्ञानफलत्वं प्रसिद्धमेवेतीह कस्माद्वक्तव्यमि
त्यत आह ॥ एतच्चेति ॥ नन्वनेन तथात्वोक्तिर्न कृता साम्यमात्रं कथमित्यत आह ॥ यद्यपीत्यादिना ॥ अन्योन्येति ॥ ज्ञानिफलं न कर्मिणः कर्मिफलं च न ज्ञानिनइत्यन्यो

सर्वेषुवेदेष्विति तदुक्तकाम्यकर्मिणामित्यर्थः ॥ ब्राह्मणस्येति न क्षत्रियादिव्यावृत्तिःशंक्येति भावेनाह ॥ ब्रह्मेति ॥ वर्णविपर्ययोनिरुक्तत्वात्
एवं तर्हिब्राह्मणशब्दो मुक्तवाचीति स्यात ॥ न च मुक्तस्यफलमस्तीत्यत आह ॥ अपरोक्षेति ॥ तदुपपादयति ॥ सहीति ॥ तर्हिविजानत
इति पुनरुक्तिरितिचेन्न ॥ तस्य परोक्षज्ञानिवाचित्वात ॥ उभयग्रहणमनुपपन्नमित्यत आह ॥ विजानतइति ॥ तस्यापरोक्षज्ञानस्यपरोक्षज्ञा

॥ एवंसर्वेषुवेदेषुयःफलंतद्विजानतोऽपि ज्ञानिनोब्राह्मणस्यफलेंऽतर्भवति ॥ ब्रह्मअणतीतिब्राह्मणोऽपरो
क्षज्ञानी॥सहिब्रह्मगच्छति॥विजानतइतिज्ञानफलत्वंतस्यदर्शयति॥४६॥ नफलत्वं ॥ एतच्च स्वरूपकथनम् ॥ यद्यपिज्ञा
निनःकर्मिणश्चान्योन्यफलाभावः तथापि ज्ञानिनःफलं महासमुद्रोदकमिव महत्वात् ॥ कर्मिणांफलंतुकूपोदकमिवात्यंताल्पम् ॥ अतस्तयो
र्नसाम्यम्॥तथा चाल्पास्थिरकर्मनिंदया महानंतफलज्ञानसाधने योगे प्ररणंयुक्तमेवेति भावः ॥अपव्याख्यानंतूक्तवक्ष्यमाणन्यायानिरस्तम्॥४६॥

न्येत्यर्थः॥अपव्याख्यानं तूक्तवक्ष्यमाणन्यायेति॥ ॥ कृ० ॥ ननु ब्रह्म अणतीति निर्वचने ब्रह्माण इति स्यात ॥ अकः सवर्णेदीर्घ इति सूत्रादित्यत आह ॥ वर्णविपर्ययइति॥
दीर्घविपर्यय इत्यर्थः ॥निरुक्तत्वादीति॥ वर्णागमोवर्णविपर्ययश्चद्वे चापरौ वर्णविकारनाशौ ॥ धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तमित्युक्तेरितिभावः ॥ नचमुक्तस्यति॥
मुक्तस्यमुक्त्यातिरिक्तफलकत्वात्तदतिरिक्तफलकत्वं नास्ति ज्ञानादेव स्वर्ग इत्यादिश्रुतेः ॥ तच्च न परोक्षज्ञानस्येति तयोः समकक्षतया ग्रहणमनुपपन्नमित्यर्थः ॥ उक्तवक्ष्यमाणेति ॥

१ पूर्वत्र स्वामित्वेनहरिस्मरणस्ययोगशब्दितज्ञानोपायत्वप्रकटनाय ॥मरूपेत्याद्युक्तस्त्वभ्युपगमवादेनेति ० श्रीपादाः ॥ ॥ ॥ ॥

॥ श्री० ॥ ज्ञानिनः कर्ममात्रत्यागोऽत्रश्लोके प्रतिपाद्यत इति व्याख्यानं गीतायामेव ज्ञानिनं अर्जुनं प्रत्येव तस्माद्युद्ध्यस्वेत्याद्युक्तन्यायेन कर्मण्येवाधिकारस्ते ॥ तस्मात्कर्म समाचरेत्यादिवक्ष्यमाणन्यायेन च निरस्तम् ॥ द्वितीयापव्याख्याने तु लिंगभंगरूपमोक्षस्य समुच्चयसाध्यत्वांशः स हि धर्मः सुधर्मेति इत्युक्तन्यायेन अपरोक्षशब्दाष्टिस्तु मुक्तौकिंचिन्न मार्गत इति वक्ष्यमाणन्यायेन च भाष्ये निरस्त ॥ कर्म सकोचांशस्तु एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानिच॥ कर्तव्यानीति मेपार्थैत्यादिवक्ष्यमाण न्यायेन गीतायामेव निरस्त इत्यर्थः॥४६॥ ननु यजेतेति यजनस्यैव विवक्षितत्वात् स्वर्गकामस्यापि कथं विहितत्वं वर्ततीत्यत उक्तम् ॥ विशिष्टेति ॥ सोमेन यजेतेत्यादिवत्स्वर्गकामादिविशिष्टं यजनंकर्तव्यमिति विधीयतइत्याशयः ॥ किंलक्षणयेति ॥ लक्षणायां किंप्रयोजनमित्यर्थः ॥ फलकाम कर्तव्यो यस्यासौ फलकामकर्तव्यः आनीतस्यभावः ॥ फलकामकर्तव्येति बहुव्रीहिमभिप्रेत्य व्याख्याय प्रकारांतरेण व्याचष्टे ॥ फलकामस्येति ॥ तत्वेत्यनुवादस्यार्थमाह ॥ तवकर्तुरिति ॥ कर्मकर्तुरित्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

ज्ञानिनःकर्माभावमुक्त्वा इदानीमज्ञानिनः कर्मोच्यतइत्यन्यथाव्याख्याननिरासायाह ॥ कामात्मनामिति ॥ येषांकर्मिणांसकामतयाकर्म कुर्वतां या निंदा कृतायामिमामित्यादिना सार्ने युक्तत्यर्थः ॥ कुतः ॥ स्वर्गकामो यजेतेत्यादौ यजनवत्स्वर्गकामस्यापि विहितत्वान्न हि विहितं

कामात्मनांनिंदाकृता ॥ कथमेषांस्वर्गकामोयजेतेत्यादौकामस्यापिविहितत्वादित्यतआह ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥ मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥४७॥

कर्मण्येवेति ॥ तइत्युपलक्षणार्थम् ॥ तवज्ञानिनोऽपिनफलकामकर्तव्यताकिम्वन्येपाम् ॥

कुर्वतां निंद्यत्वम् ॥ तथात्वे यजनस्यापि निंद्यत्वप्रसंगादिति वदन्विशिष्टविधित्वं मन्यते पूर्वपक्षी ॥ त इत्येतदर्जुनमात्रविषयमित्यन्यथा प्रतीतिनिरासायाह ॥ त इति ॥ सर्ववर्णाश्रमोपलक्षणमर्थः प्रयोजनमस्येति तथोक्तम् ॥ वक्तर्यायत्तेशब्दप्रयोगे वाचकमेवप्रयुज्यतांकिंलक्षणयेत्यत आह ॥ तवेति ॥ फलकामः कर्तव्योयस्यासौ तथोक्तस्तस्य भावस्तत्ता ॥ फलकामस्य कर्तव्यता तवकर्तुरितिवा ॥ ॥

॥कु०॥ज्ञानिनःकर्ममात्रत्याग इतिव्याख्यानं ज्ञानिनमर्जुनंप्रत्येव तस्माद्युद्ध्यस्वेत्याद्युक्तन्यायेन कर्मण्येवाधिकार इत्यादिवक्ष्यमाणन्यायेनच निरस्तम्॥ कर्मसंकोचांशस्तु ॥एतान्यपि तु कर्माणीत्यादिवक्ष्यमाणन्यायेन गीतायामेव निरस्तइत्यर्थः॥४६॥इत्युपलक्षणार्थमित्यस्य व्यावर्तकविशेषणवाचकमिति व्याख्यानमयुक्तमनुपयुक्तंचेत्यत आह॥ **सर्ववर्णेति** ॥ लक्षणयासर्ववर्णाश्रमप्रतिपादनमित्यर्थः ॥ न तूपलक्षणायेदमिति चतुर्थीसमासोऽपि युक्तः ॥ ब्राह्मणार्थं पय इतिवत् सर्वप्रकारांतरमेतत् उपेयप्रतिपत्त्यर्था उपाया अवव्यस्थिता इत्युक्तेः ॥ **वक्तर्यायत्तइति** ॥

१ माप्येकथमित्याक्षेपइतिभावः २ एतेनाक्षयंदद्दोषोनास्तीतिभावः ॥ ३ अर्थशब्दोऽभिधेयवाचीतिभावः ॥ ४ तइत्यस्यतद्वाचकत्वाभावात् ॥ ५ वाचकत्वकथनस्यानुपयोगात् ॥

॥ श्री० ॥ कर्तरीयंषष्ठी ॥ कर्मकर्तुर्ज्ञानिनस्तवफलकामस्य कर्तव्यतानास्ति॥कर्ममात्रकरणेऽधिकारिणा ज्ञानिनात्वयाफलकामोनकर्तव्यइति यावत् ॥ ननुमोक्षएवप्रतिबंधनीयइत्यतआह ॥ मोक्षस्यचोनिनियतत्वादिति॥अपरोक्षज्ञानिनोमोक्षोनियतएव॥ अपरोक्षशब्दाष्टिस्तुमुक्तौ किंचिन्नमागंत इतिवचनादितिभावः॥मोक्षविलंबेति॥काम्यकर्मकरणे तत्फलभोगस्यावश्यकत्वेनमोक्षविलंबइतिभावः ॥ तत्कथमिति ॥ तथाचगीतानुसारेणभाष्ये ज्ञानिनोपितेननफलकामकर्तव्यता किंतुकर्मण्येवाधिकार इत्यपिवक्तव्यमित्यर्थः ॥ तर्हिकर्मण्येवाधिकार इत्युक्तिर्गीतायां किमर्थं त्यतआह ॥ कर्मणीति ॥ तदर्थः ॥ फलकामकर्तव्यतानिषेधार्थ ॥ अनुवाद ॥ कथनमित्यर्थः ॥ त्वयाफलकामोन कर्तव्यइत्युक्तौकुत इत्यपेक्षायांयत स्तवकर्मण्येवाधिकार इतिफलकामनिषेधार्थमेव कर्मण्यधिकार उच्यत इत्यप्राधान्यं कर्माधिकारकथनस्येति ज्ञापयितुं तन्नोक्तम ॥ कि तु प्राधान्यातफलकामना निषेध एवोक्त इति भावः ॥ ननु गीतायां मा फलेष्विस्यत्राधिकार इत्यस्यानुवृत्तिस्तदनुवादपरं भाष्ये न फलकामनाधिकार इत्येव वाच्यं कर्तव्यताग्रहणं किमर्थमित्याशंकते ॥ तथापीति॥ साध्यस्यैवेति ॥ अत्रगीतायांकर्मैवकर्तव्यं फलकामोनकर्तव्यइति कर्तव्यत्वाकर्तव्यत्वरूपं साध्यद्वयमभिप्रेतकृतस्तयोःकर्तव्यत्वाकर्तव्यत्वे इत्याशंकायांतत्र हेतुत्वेन यतस्तव कर्मण्येवाधिकारभावा फलेपुनदभावइति अधिकारभावाभावौगीतायांकंठतःकथितौ ॥ भाष्येनचफलकामकर्तव्यंतत्यंतनगीतायां भेदन कर्तव्यत्वरूपं साध्यमेवोक्तमित्यर्थः ॥ अधिकारभावाभावयोरपि कोहेतुरित्यत आह ॥ तथाचेति वक्ष्यति ॥ अतःकर्मण्येवाधिकारइत्यनेनेत्यर्थः ॥ यद्वागीतायांसाध्यस्यैवोपादानादित्येतत्कुतइत्यत आह॥तथाचेति॥अतस्तदेवकार्यमित्यनेनेत्यर्थ.॥केषांचिज्ज्ञानिनां॥केवलंतइति॥ज्ञानिनस्तवैवेत्यर्थः॥निषेधादिति॥

कृतोपि फलकामोज्ञानिनो नात्यंतबाधकः ॥ तत्प्रतिबंधनीयस्य ज्ञानस्याभवात् मोक्षस्यचनियतत्वात् ॥ तथाऽपिमोक्षविलंबहेतुत्वात्तस्यापि नकर्तव्यः किम्वन्येषामज्ञानिनामितिप्रदर्शनार्थोपलक्षकपदप्रयोगइतिभावः॥ ननुकर्मण्येवाधिकारोमाफलेष्वितिह्ययमुक्तम् ॥ तत्कथंनफलकाम कर्तव्यतेत्येकस्यैवग्रहणम् ॥उच्यते ॥ फलकामकर्तव्यतानिषेधस्यैवात्रप्राधान्यात्कर्मण्यधिकारइतितदऽनुवादः ॥ तथाऽपिनफलकामाधिकारइ

नत्वस्तिकेषांचिन्नतेऽस्तीति ॥

तिवक्तव्यम ॥मेवम्॥अधिकारभावाभावयोः कर्तव्यत्वाकर्तव्यत्वसमर्थनार्थमुक्तत्वेनसाध्यस्यैवोपादानात ॥ तथाच वक्ष्यति ॥ तइत्युपलक्षणार्थमित्युक्तस्यव्यावर्त्यमाह ॥ नत्विति ॥ केषांचित्फलकामकर्तव्यतास्ति केवलं तेनास्तीत्यर्थस्तुनेत्यर्थः ॥ कामान्यः कामयतइत्यादौसर्वेषांनि न षेधादिति भावः॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥आयतत इत्यायत्तः ॥ अकर्मकत्वात्कर्तरिक्त. ॥तथाचायत्तपदप्रकृत्यर्थक्रियाश्रयं शब्दप्रयोगरूपकर्तारं प्रति तत्कर्मधिकरणत्वाद्भक्तरीति समस्युपपन्नेति बोध्यं ॥ अर्जुनजीवे तद्देहे वा फलकामकार्यत्वस्याप्रसक्तेस्तन्निषेधो नुपपन्न इत्यतो द्वेधा व्याचष्टे ॥ फलकाम इतिवक्ष्यतीति ॥ अतस्तदेवकार्यमित्यनेनेति शेषः ॥

॥ श्री ० ॥ सकामभिर्जीयतेतत्रतत्रेतिवंभकत्वोक्त्या।निषिद्धत्वमभिप्रेतमितिज्ञातव्यम॥नरशब्दार्थस्तु।विष्णोर्वायोरनंतस्यविधिर्शर्नरः स्मृतइतिप्रमाणानुसारेणज्ञेयः ॥ मूलगत।ईशब्दार्थमाह ॥ **कथंचेति॥प्रश्नेति** ॥ तस्य संदेहमुक्तत्वाज्ज्ञानिनोऽर्जुनस्य संदेहाभावादितिभावः ॥ प्रारब्धकर्मादिनेत्यत्रादिपदेन भूसंबंधमानुषान्नोपभोगादिकसंग्रहः ॥ विशेषज्ञानादित्यत्रादिपदेन ज्ञातस्य स्थिरीकरणं ग्राह्यम जानंतोऽपि विशेषार्थज्ञानाय स्थापनाय वा ॥ पृच्छंति माधवो यस्मात्तेन पृच्छामि पांडवेति वचनादितिभावः ॥ अनेनाद्यादिपदेनप्रश्नस्य ग्रहणम ॥ द्वितीयादिपदेन चाप्राप्तविशेषज्ञानप्राप्तज्ञानस्थिरीकरणयोर्ग्रहणमिति ज्ञातव्यमित्युक्तं भवति ॥ इंद्रादीनामेवेति ॥ आदिपदेन नरग्रहणं येन तदंशत्वेनार्जुनस्यापि ज्ञानित्वं स्यादिति भावः ॥ **कारणेति** ॥ ज्ञानकारणेत्यर्थः ॥ एतद्धहेवेंद्रइति ॥ इंद्रस्याज्ञानित्वे क्वापि प्रत्युपदेशासंभवादिति भावः ॥ **प्रजापतौ ब्रह्मचर्यमिति**॥इंद्रो ह वै देवानां प्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रतिप्रजापतिमकाशमाजग्मतुस्तौ ह द्वात्रिंशतं वर्षाणिब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाचेत्यादिनेंद्रस्य प्रजापतौ चतुर्मुखे ब्रह्मचर्यं तदुपदेशश्च श्रूयते ॥ यदि चेंद्रो न ज्ञानी स्यात्तदा चतुर्मुखोपदेशयोग्यत्व न स्यात् ॥ ज्ञानिनामेव चतुर्मुखोपदेशयोग्यत्वादतः सिद्धमिंद्रस्य ज्ञानित्वमिति भावः ॥ ॥ ॥

नन्वर्जुनस्य ज्ञानित्वे स्यादिदं तदेव कुत इत्यत आह ॥ सहीति ॥ हिशब्दसूचितांप्रमाणसिद्धिमेव दर्शयति ॥ नरांशइति ॥ कथं तर्हि यज्ज्ञात्वा न पुनर्मोहमित्यर्जुनस्य मोह उच्यते कथं च प्रश्नकरणमित्यत आह ॥ मोहादिरिति ॥ बलवता प्रारब्धकर्मादिना ज्ञानस्याभिभवान्मोहः ॥ विशेषज्ञानाद्यर्थः प्रश्न इत्यर्थः ॥ नन्विंद्रादीनामेवकुतोज्ञानित्वमित्यतआह ॥ यदीति ॥ सत्त्वंहिज्ञानकारणम् ॥ सत्त्वात्संजायते

सहिज्ञानीनरांशइंद्रश्च ॥ मोहादिस्त्वभिभवादेः ॥ यदितेषांशुद्धसत्त्वानांनस्याज्ज्ञानं

क्वान्येषाम्॥ उपदेशादेश्च सिद्धं ज्ञानंतेषाम् ॥

ज्ञानमितिवचनात् ॥ देवाश्चशुद्धसत्त्वाः ॥ अतःकारणसद्भावायुक्तंतेषांज्ञानम् ॥ अन्यथानकस्यापिस्यात् ॥ इतश्चेंद्रादयोज्ञानिनइत्यतआह ॥ उपदेशेति ॥ एतद्धहवेंद्रोविश्वामित्रायप्रोवाचेत्यादिरुपदेशः[1] ॥ आदिपदेनप्रजापतौब्रह्मचर्यं ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ **विशेषज्ञानाद्यर्थइति** ॥ आदिपदेन प्राप्तज्ञानस्थिरीकरणसंग्रहः ॥ **प्रजापतौ ब्रह्मचर्यमिति** ॥ अपरोक्षज्ञानिनामेव चतुर्मुखोपदेशयोग्यत्वात् ॥ इंद्रस्य ज्ञानित्वाभावे तदर्थं तौ ह द्वात्रिंशतंवर्षाणि ब्रह्मचर्यमूषतुरित्याद्युक्तमिंद्रस्य प्रजापतौ ब्रह्मचर्यन्न स्यादित्यर्थः ॥ ॥ ॥ ॥ ॥

१ ऐतरेयारण्यक २ अ २ खंड १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ॥ न च प्रजापतिनाथ एषोऽतरक्षणीत्यादिना । रोचनं प्रत्यग्नुपदिष्टत्वात्तस्यापि ज्ञानित्वप्राप्तिरिति वाच्यम ॥ अत्र समीचीनोपदेशस्य योग्यतायाश्च विवक्षितत्वात ॥ यथोक्तं सर्वथापि त त एवोभयलिंगादिति ॥ अर्जुनस्येति ॥ पूर्वमिंद्रादीनां ज्ञानित्वात्तदंशभूतस्यार्जुनस्यापि ज्ञानित्वमित्युक्तमिदानीं तु साक्षादर्जुनस्यैवज्ञानित्वे प्रमाणांतरमाहेत्यर्थः ॥ ज्ञानिभिर्गणनादित्यन्यथा प्रतीतिनिरासायाह ॥ ज्ञानिष्विति ॥ वेदाहमंगपरमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च मनुश्चतदात्मजाश्च प्राचीनबर्हि ऋभुरंग उत ध्रुवश्च ॥ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिपृथ्वंबरीषसगरा गयनाहुषाद्याः ॥ मांधात्रलर्कशतधन्वनरंतिदेवदेवव्रता बलिरमूर्तरयो दिलीपः ॥ सौभर्युदंकशिबिदेवलपिप्पलाद्याः सारस्वतोद्धवपराशरभूरिषेणाः ॥ येऽन्ये विभीषणहनूमदुपेंद्रदत्ताः पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्याः ॥ ते वै विदंत्यतितरंति च देवमायामिति द्वितीयस्कंधेब्रह्मणा नारदं प्रति ज्ञानिगणन कालेऽर्जुनस्य ज्ञानित्वप्रतिपादनेनाज्ञानिनः कर्मात्रोच्यत इत्यपव्याख्यानं निरस्तमित्यर्थः ॥ कुत इति ॥ मुख्येनाधाभावादित्यर्थः ॥ करण इति ॥ फलसंपादन इत्यर्थः ॥ अकरणे ॥ फलासंपादने इत्यर्थः ॥ तद्विरोधीनि ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अर्जुनस्यज्ञानित्वेप्रमाणांतरमाह ॥ पार्थेति ॥ ज्ञानिषुगणनात ॥ एतेनापव्याख्यानमपिनिरस्तम ॥ नन्वत्रमाफलेष्वितिफलविषयोनिषेधःकृतः तत्कथमुक्तंफलकामेतितत्राह ॥ कामेति ॥ फलशब्देनतद्विषयंकाममुपलक्ष्यतद्विषयोनिषेधोऽत्रक्रियतेनफलविषयइत्यर्थः ॥ कुतोलक्षणाश्रय णमित्यतआह॥फलानीति॥यत्रहिपुरुषस्यकर्तुमकर्तुंवास्वातंत्र्यंतत्रैवनिषेधोनान्यत्रप्रसक्तेरभावात ॥ नचफलेपुस्वातंत्र्यमस्तिअतोमुख्येबाधकाल्ल

पार्थार्ष्टिषेणेत्यादिज्ञानिगणनाच्च ॥ कामनिषेधएवात्र ॥ फलानिह्यस्वातंत्र्येणभवंति ॥ नहिकर्मफला निकर्माभावेयत्नतोभवंति ॥ भवंतिचकाम्यकर्मिणांविपर्ययंयत्नेऽप्यविरोधे ॥

क्षणाश्रयणमित्यर्थः ॥ कथमस्वातंत्र्यमित्यतःकरणेतावदाह ॥ नहीति ॥ अकरणेऽपितदाह ॥ भवंतिचेति ॥ चोऽवधारणे ॥ अविरोधेब्रह्मद र्शनादितत्तद्विरोध्यभावे ॥ तदनेनतद्वनिफलेष्वितिचपदद्वयंव्याख्यानम् ॥ ॥ ॥ ॥ ॥

॥कृ॥अत्र तत्त्वज्ञानंहतुत्रय्यैवविवक्षितमिति न विरोचने व्यभिचार ॥ज्ञानिकर्तृकं पार्थादिकर्मकंगणनंमपार्थादिज्ञानित्वेमानामित्याशंक्य सप्तमीति योगविभागान्निर्धारणसप्तमीसमासमभिप्रेत्याह ज्ञानिषु गणनादिति ॥ पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्या इति द्वितीयस्कंध इति शेषः ॥ एतेनेति ॥ ज्ञानिन एवार्जुनस्य कर्मण्येवाधिकार इतिकर्माधिकारप्रतिपाद नेनाज्ञानिनः कर्मोच्यत इत्यपव्याख्यानं निरस्तमित्यर्थः ॥ ब्रह्मदर्शनादिति ॥ आदिपदात्कर्मनाशाजलस्पर्शादिग्रहणम् ॥ ॥ ॥

१ अ. ३ पा. ४ अ. ५ सू. १ देशकालगुरूपसत्तिश्रवणाद्यनेकोत्साहेऽपियोग्या एवज्ञानमाप्नुवंति ॥ मायोग्याः ॥ तुनातिविपरीतंज्ञानमाप्नुवंतीतिग्राह्यम ॥ कुतः ॥ योग्यायोग्ययोरिंद्रविरोचन योः प्रजापत्युपदिष्टयोर्ज्ञानप्राप्त्यप्राप्त्युभयलिंगदर्शनादितितदर्थः ॥ २ तच्छब्दः प्रसिद्धवाचकस्तेनमनुः स्वायंभुवः ॥तत्पत्नीशतरूपा॥तत्पुत्राःप्रियव्रतादयः॥एवंक्रमः॥३ अ७श्लो. ४३।४४।४५

॥श्री०॥ काम्यफलविरोधीत्यर्थः ॥भाष्ये विपर्ययप्रयत्नशब्देन वैराग्यविषयप्रयत्नो ग्राह्यः ॥ काम्यं कर्म कृत्वा एतत्फलं मम मास्त्विति वैराग्ये कृतेऽपि काम्यकर्मफलमैश्वर्यादिकं तस्य भवत्येवेति अकरणेऽपि न स्वातंत्र्यमित्यर्थः ॥इदं च ब्रह्मदर्शनादिविरोध्यभावदशायामेव ॥ तत्सद्भावे तु अनिष्टकाम्यकर्मणः फलमदत्त्वैव संचितवन्नाशांगीकारादिति ज्ञेयम् ॥ आदिपदेन विष्णुर्वैष्णववाक्यसंग्रहः ॥ कथं प्रत्यवायाभाव इति ॥ इष्टाप्राप्तिरूपः प्रत्यवायोऽस्तीति भावः ॥ खेदः ॥ इष्टाप्राप्तिरूपः प्रत्यवायः ॥ ॥ ॥

स्यादेतत्॥स्वर्गकामोयजेतेत्यादौस्वर्गादिकामनाविशिष्टंयजनादिकंकर्मकार्यतयोच्यते॥ अतोनकामात्मनांनिंदोचितेतिशंकायांकिमेतत्कर्मण्येवाधिकारइत्याद्यसंगतमुच्यते॥यश्चकर्मवत्कामनायाअपिकार्यतांमन्यते॥कुतस्तस्यफलकामनायामधिकाराभावःसिद्धः॥फलेष्विति लाक्षणिकशब्दप्रयोगेचकिंप्रयोजनमित्याशंक्यपूर्वार्धंव्याचष्टे॥अतइति ॥अतइत्यस्यवक्ष्यमाणेनभूत्वेत्यतःपरेणेत्यर्थइत्यनेनान्वयः॥ अतउक्तन्यायेनपदद्वयस्यलाक्षणिकत्वेसतीत्यर्थः ॥श्लोकार्थःसंपद्यतइतिशेषः॥ तत्रतावत्कर्मण्येवाधिकारःसर्ववर्णाश्रमिणांनफलकामनायामित्युक्तेऽर्थद्वयेहेतुद्वयमाहकर्माक

अतःकर्माकरणएवप्रत्यवायोनतुज्ञानादिनावाऽकामनयाफलाप्राप्तौ ॥

रणइति ॥कुर्वन्नेवेहकर्माणीत्युक्त्वाएवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरइत्युक्तत्वात् ॥कर्माकरणएवप्रत्यवायोऽनिष्टप्राप्तीष्टानवाप्तिलक्षणः ॥ नत्वकामनयाप्रत्यवायःप्रमाणाभावात् ॥ननुकामाभावेतत्तत्फलानवाप्तेःकथंप्रत्यवायाभावइत्यतउक्तम्॥ फलाप्राप्ताविति॥काम्यकर्मफलाप्राप्तावपिनप्रत्यवायइत्येतदुपपादनायोक्तम् ॥ ज्ञानादिनावेति ॥ वाशब्दउपमायाम् ॥यथाज्ञानादिनासाधनेनमोक्षंगच्छतःस्वर्गाद्यलाभोनखेदहेतुः महाफललाभेऽल्पफलहानेरकिंचित्करत्वात् ॥ तथाऽकामनयाफलाप्राप्तावपिनखेदः ॥निष्कामेनकर्मणामहाफलस्यज्ञानादेर्लाभादितिभावः ॥

॥२॥ननु पूर्ववाक्यार्थस्यानुकूल्येनतदुपसंहारार्थोऽतःशब्द इत्याशंक्य सम्यग्ज्ञानाद्याप्तिस्वात्तत्सिद्धिर्यभिप्रेत्यात इत्येतदनूद्य व्याचष्टे ॥अत उक्तन्यायेनेति ॥ नन्वर्जुनादिसर्ववर्णाश्रमिणां कर्मण्येवाधिकारः कर्माकरणे प्रत्यवायादित्यर्थोऽत्र विवक्षितः ॥ तत्र प्रत्यवायो न पापम् ॥ अर्जुनादिज्ञानिनां पापलेपाभावात् ॥ ज्योतिष्टोमाद्यकरणे प्रत्यवायाभावाच्च ॥ तस्यापि ब्राह्मणादिवर्णोचितत्वेन कर्मपदेन विवक्षितत्वादित्यत आह ॥ अनिष्टप्राप्तीति ॥ अत्रायं विवेकः ॥ अज्ञस्य स्वोचितकर्माकरणे प्रागुत्तरपापचाभरूपानिष्टप्राप्तिः ज्ञानरूपेष्टाप्राप्तिश्च ॥ तथैवेशावास्यटीकायामुक्तः ॥ ज्ञानिनस्तुमौक्तानंदन्हासरूपानिष्टप्राप्तिः यावत्स्वरूपाविर्भावरूपेष्टाप्राप्तिश्चेतिकुर्वन्नेवेतिमंत्रस्येशावास्यटीकायामज्ञानिपरत्वेन तत्त्वप्रकाशिकायां नियमाच्चेत्यत्र ज्ञानिपरत्वेन च स्पष्टं व्याख्यानादत्र तदुदाहरणमुपपन्नमिति ध्येयम् ॥ ॥ ॥ ॥ ॥ ॥

१ अ० ३ पा० ४ अ० १ सू० ७ कुर्वन्नेवेहेतिश्रुत्याज्ञानिनोपिकर्मणोनियमितत्वाच्चेत्यर्थः ॥ अकरणेप्रत्यवायाच्चनलीलात्वमितिभावः ॥

॥ श्री ॥ उक्तस्य हेतुद्वयस्येति ॥ कर्माकरणेप्रत्यवायरूपस्य कामनाकरणे प्रत्यवायाभावरूपस्य हेतुद्वयस्येत्यर्थः॥ ननु कृतिविषयत्वरूपकार्यत्वस्य कर्मणीव कामनायामपि सत्वात्कथं कर्मैव कार्यं न कामनेत्युच्यत इत्यतआह ॥ कार्यं विधिविषय इति ॥ तत्र ॥ फलप्राप्तये कामो न कार्य इत्यत्र ॥ ज्ञानादिकं परित्यज्येति ॥ ज्ञानादिसाधनीभूतं निष्कामकर्म कृत्वेति यावत् ॥ तथा च निष्कामकर्माकृत्वा काम्यकर्मकरणेन स्वर्गादिफलसंपादनं यथा प्रेक्षावता न क्रियते तथा ज्ञानिनाऽपि ज्ञानादिसाधनं निष्कामकर्माकृत्वा काम्यकर्मकरणेन स्वर्गादिफलं नसंपाद्यमित्यर्थः ॥ कर्मैव कार्यं कामना तु न कार्येति यदि तर्हिकामितफलाप्राप्त्या खेदःस्यादित्यतआह ॥ पूर्वोक्तएवेति ॥ अकामनया फलाप्राप्तावपि न खेदः निष्कामकर्मणा महाफलस्य ज्ञानादेर्लाभात महाफललाभनाल्पहानेर्गकिंचित्करत्वादिति पूर्वोक्त एवाभिप्राय इत्यर्थः ॥ कर्मणि निवृत्ते ॥ ॥ ॥

ततःकिमित्यतउक्तस्यहेतुद्वयस्यगीतोक्तंसाध्यद्वयमाह ॥ अतइति ॥ नतुफलकामनायामितिचवक्तव्यम् ॥ यतएवंकर्माकरणेप्रत्यवायोऽतःकर्मण्येवाधिकारः ॥ यतःकामाकरणेनप्रत्यवायोऽतोनकामेऽधिकारइत्यर्थः ॥ ततःकिंप्रकृतइत्यतःपरमसाध्यद्वयमाहअतइति ॥ यतः कर्मण्येवाधिकारोतस्तदेवकार्यविधिविषयइत्यर्थः ॥ यतःकामेनाधिकारोऽतःकामेनफलप्राप्तिःफलप्राप्तयेकामइतियावत् ॥नकार्यः ॥ तत्रदृष्टांतः ॥ ज्ञानादिनिषेधेनवेति ॥ अत्रापिवाशब्दउपमायाम् ॥ यथाप्रेक्षावताज्ञानादिकंपरित्यज्यफलप्राप्तिर्नक्रियतेतथेत्यर्थः ॥ पूर्वोक्तएवाभिप्रायः यदिकर्मैव

अतःकर्मण्येवाधिकारः॥ अतस्तदेवकार्यम् ॥नतुकामेनज्ञानादिनिषेधेनवाफलप्राप्तिः॥ कामवचनानां तुतात्पर्यंभगवतैवोक्तम् ॥ रोचनार्थंफलश्रुतिः॥ यथाभैषज्यरोचनमितिभागवते ॥

विधिविषयोनकामः ॥ तर्हिस्वर्गकामोयजेतेत्यादिवाक्यानांकिंतात्पर्यमित्यतआह ॥ कामेति ॥ अनादिविषयवासनावासितांतःकरणानसहसाज्ञानसाधनेकर्मणिप्रवर्तितुंशक्यंते ॥ अतस्तेषांकर्मण्यभिरुचिजननार्थंस्वर्गकामइत्यादिश्रुतिःप्रवृत्ता ॥ कर्मणिप्रवृत्तांस्तुशनैःकामंत्याजयिष्यामीत्यभिप्रायवतीयथाफलेनप्रलोभ्यबालानांभैषज्यरोचनंक्रियतेतथेत्यर्थः ॥ ॥

॥कृ॥कर्माकर्तव्यत्वे हेतोरुक्तत्वात्कामो न कार्य इति वाच्यम् ॥ न तु कामेन फलप्राप्तिरिति साध्यनिर्देशः कथमित्यतआह॥फलप्राप्तये कामइति॥यावदिति॥ननु फलप्राप्तिर्न क्रियतेयथेत्ययुक्तं फले पुरुषस्य कर्तुः स्वातंत्र्याभावेन कार्यत्वाप्रसक्तेर्मर्तान्नपेधायोगादित्यत आह ॥ पूर्वोक्तएवेति ॥ यथा प्रेक्षावता फलप्राप्तये ज्ञानादिपरित्यागो न क्रियत इत्यभिप्रायइत्यर्थः ॥

१ एवपदव्यावर्त्यमेतत् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ॥ **योजनेति** ॥ स्वर्गकामो यजेतेत्यादिवाक्यानाम ॥ **कामानुवादेनेति** ॥ अत्रेषु कामस्य सिद्धत्वेन यः कामी स यजेतेति कामस्यानुवाद्यत्वमेव न विधेयत्वं ॥ तयोर्विरोधा दित्याशयः ॥ **एवशब्देति** ॥ अतइत्येवार्थ इतिभाष्यस्थैवशब्देत्यर्थः ॥ ननुस्यादेतादित्यादिनोक्तशंकात्रयपरिहारः ॥ अतः कर्माकरणएवेत्यारभ्य भुक्तेत्यर्थ इत्यंतेन भाष्येणकथंजातइ त्यतआह ॥ **एतदुक्तंभवतीति** ॥ **फलेष्विति** ॥ लाक्षणिकशब्दोपादानप्रयोजनंदर्शयति ॥ **एतदुपपादनायेति** ॥ काम्यफलरूपेष्टानवाप्तिरूपप्रत्यवायाभावरूपप्रयोजनोपपादनायेत्यर्थः ॥ उपपादनप्रकारस्त्वित्थम ॥ फलेष्वित्यनुक्त्वाकामनायामित्येवोक्तौ फलानुपस्थित्या कामनायामधिकाराभावेतेनुतयाऽकरणेप्रत्यवायाभावोक्तौ काम्यफलरूपेष्टानवाप्तिलक्षणप्रत्यवायसद्भावशं कानुदयेनैवेत्यनेन तदभावप्रतिपादनमभवादिति ॥ **नित्यनैमित्तिकानि**॥ यदकरणेप्रत्यवायोब्राह्मण्यादिकंनिमित्तीकृत्य प्रवृत्तंतन्नित्य यथा संध्यावंदनादि ॥ यदकरणे प्रत्यवायः पितृमरणा द्यागंतुकं निमित्तीकृत्यप्रवृत्तंतन्नैमित्तिक यथा पितृश्राद्धादि ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अस्त्वेवंतात्पर्ययोजनातुकथमित्यतआह ॥ अतइति ॥ यतएवंन्यायेनकर्मणएवकार्यत्वंनकामस्येतिप्राप्तमतःकामीयजेतेत्येवश्रुत्यर्थः ॥ कामानुवादेनयजनंविधीयतइतियावत्॥ एवशब्दव्यावर्त्यमाह ॥ नत्विति ॥ कामविशिष्टयजनविधानंतुनेत्यर्थः ॥ एतदुक्तंभवति ॥ विशिष्टविधानशंकायांनेदंविशिष्टविधानंकिंतुकामानुवादेनयजनस्यैवेति परमसाध्यमत्राध्याहार्यम् ॥ तत्कुतइत्यपेक्षायांकर्मणएवकार्यत्वात्कामस्यतदभावादिति

अतएवकामीयजेतेत्यर्थः ॥ ननुकामीभूत्वेत्यर्थः ॥ वाहेतुवचनंचोपस्कर्तव्यम्॥तदपिकुतइत्यपेक्षायांकर्मण्येवाधिकारोनफलकामइतिगीतोक्तयोर्हेत्वोरुपस्थानम् ॥ तदपिकुतइत्यपेक्षायांकर्मकामाकरणाकरणयोःप्रत्यवायाभावाभावयोर्हेत्वोरध्याहारः ॥ एतदुपपादनायलाक्षणिकफलशब्दोपादानमिति ॥ भास्करस्त्वाह ॥ नित्यनैमित्तिकान्येवकर्माणिमुमुक्षुणानिष्कामतयाकर्तव्यानि ॥ ॥

॥ कृ ॥ विशिष्टविधित्वभ्रांतिं निरस्यति ॥ **कामानुवादेनेति** ॥ ननु सोमेन यजेतेत्यनेन सोमविशिष्टोयागो विधीयते सोमवता यागेन भावयेदिति ॥ तत्र किं भावयेदितिफलाकांक्षायां ज्योतिष्टोमवाक्येन सोमयागानुवादेन फलसंबंधमात्र विधीयते ज्योतिष्टोमेन यागेन स्वर्गं भावयेदितीति मीमांसकप्रक्रिया ॥तत्कथं यजनं विधीयतइतिचेत ॥सत्यं क्रिययैव सह विधेरन्वय इति नियमः अतोत्र फलविशिष्टं यजनं विधीयते ॥ एवं च प्रतीतितो विशिष्टविधिरयं तात्पर्यतस्तु फलविधिरिति न मीमांसकप्रक्रियाविरोध इति दिक् ॥स्यादेतदित्यादिना यच्छंकात्रयं कृतं तन्निरासप्रकारं गीतारूढं करोति ॥**एतदुक्तं भवतीति**॥**एतदुपपादनायेति**॥कामाकरणेइष्टाप्राप्तिरूपप्रत्यवायाभावोपपादनायेत्यर्थः॥फलेष्वित्युक्तौ हि फलोपस्थित्याफलकामनाया मधिकाराभावे करणेप्रत्यवायाभावरूपेहेतुक्तौ च फलानुपस्थित्योक्तशंका न स्यात ॥ ततश्च ॥ प्रसक्तत्वात्प्रत्यवायाभावप्रतिपादनं नस्यादितिभावः ॥ नित्यनैमित्तिकानीति॥यदकरणेप्रत्यवायो ब्राह्मण्यादिकमेव च निमित्तमादाय विहितं तन्नित्यं यथा संध्यावंदनं ॥ यदकरणे प्रत्यवायः पितृमरणाद्यागंतुकं च निमित्तमादाय विहितंतन्नैमित्तिकम ॥ यथा श्राद्धादीति विवेकः ।

१ सिद्धत्वविधेयत्वयोः २ भाष्येअतएवेतिएवशब्दइत्येवेतिसंबध्यतइतिभावः ॥

॥ श्री ॥ **कामाधिकारेति** ॥ कामिनमधिकारीकृत्यविहितानीत्यर्थः ॥ **यज्ञादिकमेवेति** ॥ कामाधिकारविहितं ज्योतिष्टोमादिकमेवेत्यर्थः ॥ **प्रक्रम्येति** ॥ प्रमाणइत्यर्थः ॥ **अनुष्ठानवचनादीति** ॥ निवृत्तंसेवमानस्त्वित्यनुष्ठानवचनादित्यर्थः ॥ **कामप्रसक्तीति** ॥नित्यनैमित्तिके कुर्यात्प्रत्यवायजिघांसयेति वचनादितिभावः ॥ **तत्प्रतिषेधेति** ॥निष्कामंसंगंत्यक्त्वेतिक्रियमाणप्रतिषेधेत्यर्थः ॥ **गुणविधानायेति** ॥ ज्योतिषेत्यनेन नामैकदेशग्रहणे नामग्रहणमिति न्यायेन ज्योतिषां स्तोमरूपो ज्योतिष्टोमयागोऽनूद्यते ॥ तथा च ज्योतिषा ज्योतिष्टोमेनयजेतेति यत् तत्र वसंत इति वसंतकालरूपो गुणो विधीयत इत्ययमपि कामाधिकारविहित एवेति भावः ॥ **न संमतमिति** ॥ अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरित्यादौ शब्दांतरात्कर्मभेदः कृतानुबंधत्वादिति जैमिनीयद्वितीयाध्याये द्वितीयपादे शब्दभेदेन कर्मभेदस्य निर्णीतत्वात् ज्योतिष्टोमज्योतिषोरपि शब्दभेदेन भिन्नयागत्वात्तयोरज्योतिष्टोमानुवादेन गुणविधानमत्रेति मीमांसकानां न संमतमिति भावः ॥ नामैकदेशन्यायस्त्वगतिका गतिरिति ध्येयम् ॥ **विश्वजितेति** ॥ अयं तु यागः फलकामनां विनैव विहितः नापि कामाधिकारविहितविश्वजिद्यागानुवादेनात्रगुणविधानं शक्यं तदभावादिति भावः ॥ नन्वयं यागः कामाधिकारविहित एवेत्याशंकते ॥ **तत्रापीति** ॥ **निर्णीत इति** ॥ ॥ ॥

नतुज्योतिष्टोमादीनिकामाधिकारेविहितानि॥तेषांनिष्कामतयाकरणेप्रमाणाभावादतोऽसदिदंव्याख्यानमितितत्राह ॥निष्कामामिति ॥यज्ञादिकमेवप्रक्रम्यतस्यनिष्कामतयाऽनुष्ठानवचनाद्युक्तमिदंव्याख्यानम्॥एतान्यपितुकर्माणिसंगंत्यक्त्वेत्यादिवक्ष्यमाणवचनेभ्यश्च॥नचैतानिनित्यनैमित्तिक

निष्कामंज्ञानपूर्वंचेतिवचनात् ॥ वक्ष्यमाणेभ्यश्च ॥ वसंतेवसंतेज्योतिषायजेतेत्यादिभ्यश्च ॥

विषयाणि॥तत्रकामप्रसक्त्यभावेनतत्प्रतिषेधानुपपत्तेः ॥किंचनित्यनैमित्तिकातिरिक्तस्यज्योतिर्नामकयज्ञस्यफलकामनयाविनाऽविधानाच्च ॥ज्योतिष्टोमस्यैवायंगुणविधानायानुवादइतितुनसंमतम्॥आदिपदेनविश्वजितायजेतेत्यादेर्ग्रहणम्॥तत्रापिस्वर्गकामपदाध्याहारोनिर्णीतइतिचेत्सत्यम्

ननु ज्योतिषेत्यनेन ज्योतिष्टोममनूद्य वसंतकालाख्यो गुणो विधीयत इत्यत आह ॥ **ज्योतिष्टोमेति** ॥ **नसंमतमिति** ॥ अनेन प्रतितत्त्वमित्यांतोयमिति सत्यम् ॥ निर्णीत इति॥ विश्वजिद्यागेन भावयेदित्युक्ते किंभावयेदित्याकांक्षायां फलमंतरेणापूर्तेरवश्यंफले कल्पनीये सर्वाभिलषितत्वेन स्वर्गफलं कल्प्यते ॥ न चार्थकल्पनामात्रेणाकांक्षानिवृत्तिः ॥ किं तु शब्दकल्पनयैव ॥ शाब्दीह्याकांक्षाशब्देनैव शाम्यतीतिन्यायात् ॥ अथफलवाचिशब्दोध्याहार्यः ॥ न च तावतापि पूर्तिः निरभिकारिकत्वेन यागानुष्ठानप्रसंगात् ॥ अतोधिकारिसमर्पकस्वर्गकामपदाध्याहार एवेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ विश्वजिता यजेतेत्यत्र [illegible] न [illegible] क्रियया विना कार्यमित्यादि [illegible] ॥ इह तु विपर्ययेण कार्यस्यान्विताभिधा
नपर्यवसानादनध्याहारे प्राप्ते उच्यते॥ अत्र [illegible] न [illegible] न प्रवर्तते मा यथा [illegible] निरूप्या ए
वं स्वाश्रयनरानिरूप्या तदेवं प्रकृते [illegible] कार्ये [illegible] निरूप [illegible] विनियोगवी [illegible]
संबध्यतेस्वसंबंधिकार्यबोद्धा च नियोज्य [illegible] इति ॥ नच स्वर्गकामपदाध्याहार [illegible] पूर्वमीमांसायां जैमिनिना निर्णीत इत्यर्थः ॥ कामिनांतुतथेति ॥ कर्मणिषष्ठी ॥ [illegible]
ऽस्ति येषां तान्प्रति स्वर्गकामपदाध्याहारः क्रियत इत्यर्थः ॥ ननु [illegible] मा [illegible] कामनाया [illegible] आह ॥ स्ववचनेनेति ॥ वि
श्वजिता यजेतेतिवेदेन साक्षात्कामना [illegible] कामनायाश्च [illegible] ॥ तदपि [illegible] कामनाया [illegible] प्रत्यवायाभावरूपं [illegible]
मा फलेष्वित्यनेन गीतायामुक्तमित्यर्थः ॥ शंकाया इति ॥ [illegible] शंकाया इत्यर्थः ॥ अप्रसक्तमिति ॥ [illegible] कर्मफलहेतुत्व प्रसक्तयेन मा कर्मफलहे
तुर्भूरिति निषेधः संगतः स्यादित्यर्थः ॥ न नु नार्हे मा कर्म [illegible] ॥ शाकपार्थिवादिवदिति ॥ शाकप्रिय पार्थिवः शाकपार्थिव इत्यत्र यथा
प्रियपदलोप एवं तत्कृतिपदलोपोऽत्रेत्यर्थः ॥ तथा च मध्यमपद [illegible] ॥ अनेकार्थत्वादिति ॥ [illegible] ॥

कामिनांतुतथास्ववचनेनानुक्तौकारणमिहोक्तमिति ॥ ननुपूर्वार्धेनैवशंकायानिरस्तत्वात्किमुत्तरार्धेनेत्यतःक्रमेणपादद्वयोपयोगमाह ॥ अतइति॥

फलकामस्याकर्तव्यत्वात्कर्मफलहेतुत्वमप्रसक्तंकिमितिप्रतिषिध्यतइत्यतआह ॥ कर्मेति ॥ शाकपार्थिवादित्वात्तत्कृतिपदलोपोऽत्रेतिभावः ॥

अतोमाकर्मफलहेतुर्भूः ॥ कर्मफलंतत्कृतौहेतुर्यस्यसकर्मफलहेतुःसमाभूःतर्हिनकरोमीत्यतआह ॥ मात

इति ॥ कर्माकरणेस्नेहोमास्त्वित्यर्थः ॥ तर्हीति ॥ यदिफलंनाकांक्ष्यमित्यर्थः ॥ नकरोमिस्वर्गेक्लेशरूपत्वादितिभावः ॥ अकर्म

पदस्यानिषिद्धेऽपिप्रवृत्तेःसंगशब्दस्यचानेकार्थत्वात्प्रकृतोपयुक्ततयाव्याचष्टे ॥ कर्मेति ॥ ॥ ॥ ॥

॥कृ० ॥ स्ववचनेनेति ॥ स्वर्गकाम इतिपदेनेत्यर्थः ॥ कारणमिति ॥ काम्यस्यापि कामना विना कर्तव्यत्वरूपमित्यर्थः ॥ [illegible] आह ॥
शाकपार्थिवादिवदिति ॥ ननु शाकपार्थिवादीनामुत्तरपदलोपश्चेत्यनेन तत्पुरुष एव [illegible] उक्तो न बहुव्रीहौ [illegible] ॥ [illegible]
युक्तो हस्तो यस्या इति विगृह्य शाकपार्थिवादित्वान्मध्यमपदलोपे [illegible] तत्पुरुष एवेति नियमाभावात् ॥ [illegible] बहुव्रीहावपि शाकपार्थिवादित्वेनोत्तरपदलोप [illegible] ॥
अन्येतु लोपमात्रे दृष्टांतोऽयं ॥ पृषोदरादीनियथोपदिष्टमित्यनेन तत्कृतिपदलोपः ॥ तेन [illegible] लोपः ॥ ॥ ॥ ॥

॥ श्री० ॥ मूले स्नेहो मास्त्वित्यस्य कर्म न करोमीत्याभक्तिरागग्रहविशेषो मास्त्वित्यर्थो द्रष्टव्यः ॥ **सोपपत्तिकमिति** ॥ फलस्यानाकांक्षत्वे क्लेशरूपं कर्म न करिष्यामीति सोपपत्तिक मित्यर्थः ॥ भक्तिमन्विच्छत इति वक्ष्यमाणानुरोधादाह ॥ **प्रसादशब्देनेति** ॥ **प्रसंगादिति** ॥ कर्तव्यताप्रसंगादित्यर्थः कामत्वाविशेषादिति भावः ॥ मूले तस्यापि कारणो भगवत्प्रसाद च्छायुक्तेत्यर्थः ॥ **महदाचारेणेति**॥ आचारप्रतिपादकं वाक्यमाचार इति व्याख्येयम् ॥ एवमुत्तरत्रापि ॥ बहिस्पृशयथापिस्मृतेराचाराच्चेत्यत्र तत्त्वप्रकाशिकायामाचारप्रतिपादकं वाक्य माचार इति व्याख्यानात् ॥ तथा च यत्नः स्वभीतंगुरवःप्रमादितास्त्रिप्राश्चवृद्धाश्च मदानुवृत्त्या ॥ आर्या ह्यनार्याः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनुकंपयैव ॥ यत्र सुतमतपरतदोदश निरंधसौकालमदभ्रमप्सु ॥ सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहेते परितोषणायेतिमहतां दशप्रचेतसां भगवंतं प्रति प्रार्थनारूपाचारप्रतिपादक चतुर्थस्कंधभागवतवाक्येनेत्यर्थः **भगवत्परि तोषणस्येति** ॥ भगवत्प्रीतिकामनाया इत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सोपपत्तिकमाक्षिप्तेकथमिदमुत्तरमित्यतोभगवदभिप्रायमाह ॥ अन्येति ॥ प्रसादशब्देनभक्तिज्ञानादिकमप्युपलक्ष्यते ॥ एवंतर्हिभगवत्प्रसा दादीच्छयाकर्मकर्तव्यमित्युक्तंस्यात् ॥ नचनयुक्तम् ॥ कामस्यनिंदितत्वात्॥ अन्यथास्वर्गादिकामनायाअपिप्रसंगात् ॥ अतोनेदंभगवदभि

अन्यफलाभावेऽपिमत्प्रसादास्यफलभावात्॥इच्छाचतस्ययुक्ता॥वृणीमहेतेपरितोषणायेतिमहदाचारात्

प्रायवर्णनंयुक्तमित्यतआह ॥ इच्छाचेति ॥ तेतवपरितोषणायसकलंकर्मवृणिमहइति महदाचारेणभगवत्परितोषणस्यकर्तव्यतावगमात् ॥

॥ क ॥जीवनं जलं मूतं बद्धं येन स जीमूत इत्यत्र बनमित्यस्य सर्वतंतुर्मखः क्रतुरित्यमरटीकायां मुकुटेन समार्चिस्तंतुर्मूलकारणं यस्यासौ सप्ततंतुरित्यत्रार्चिरितिपदस्य च पृषोदरादित्वेन लोपोक्तेरित्याहुः॥ **सोपपत्तिकमिति** ॥ स्वयंक्लेशरूपत्वादिति प्रागुक्तत्वादिति भावः ॥ भक्तिमन्विच्छंत इत्यादिप्रमाणानुसारेणाह ॥ **प्रसादशब्देनेति** ॥ ॥

१ अध्या० ३ पा० ४ अ० ६ सूत्र ३ देवादिपदैर्भ्योबाहिर्भूतज्ञानभक्त्यादिष्वास्तिविशेषः ॥ आकांक्षायामनाकांक्षायागपिनपतनमिति ॥ देवऋषिगंधर्वाणामितिस्मृतेः ॥ नानात्वमेव क मानामितिआचारप्रतिपादकवाक्याच्चेतितदर्थः ॥ २ वृद्धास्त्रियोमृतभर्तृकाः ॥ ३ अनल्पंकालंयथास्यात्तथानिरन्नानामुपोषितानामितियावत् ॥ ४ अ० ३० श्लो० ३९ । ४० । ५ पूर्वोदा हृतवचनेआचारस्यधर्ममूलकत्वकथनादितिभावः ॥ तत्रसाधूनामित्युक्तत्वमहदित्युक्तम् ॥ ६ पूर्वोदाहरणेनासैदेशन्यायेनापिनिर्वाहादुदाहरणांतरं ॥ ॥ ॥

॥ श्री० ॥ **तदकर्तव्यतायामपीति** ॥ भगवत्प्रीतिकामनाया अकर्तव्यतायामपीत्यर्थः ॥ **कामनिंदावचनमिति** ॥ सामान्यतःकामनिंदापरंकामान्यः कामयत इत्यादिवचनमस्ति ॥ तच्च संकोचे कारणाभावात्सर्वविषयमित्यर्थः ॥ **विशेषविषयइति** ॥ असाधारण्येनापि भगवत्प्रीतिकामनायाः कर्तव्यताज्ञापक इत्यर्थः ॥ नतथेति ॥ भगवत्प्रीतिकामनाया अकर्तव्यताप्रतिपादकं न भवतीत्यर्थः ॥ **सामान्येति** ॥ अविशेषितकामानिंदाप्रतिपादकमित्यर्थः ॥ बाध्यतइति ॥ भगवत्प्रीतिकामनेतरकामनिंदापरत्वेनसंकोच्यत इत्यर्थः ॥ तद्वत ॥ भगवत्प्रसादकामवत् ॥ **स्वर्गादीति** ॥ कामित्वाविशेषादित्यर्थः ॥ **विशेषतइतीति** ॥ भाष्ये विशेषत इति पदं देहलीदीपन्यायेन पूर्वोत्तरवाक्ययोः संबध्यत इत्युक्तं भवति ॥ **प्रमाणाभावमिति** ॥ स्वर्गादिकामनायाःकर्तव्यत्व इति शेषः ॥ वृणीमह इति॥भगवत्प्रसादकामनायाः कर्तव्यत्व इव स्वर्गकामनायाः कर्तव्यत्वे प्रमाणाभावादिति भावः ॥ ननु विशेषवचनस्य सामान्यवचनबाधकत्वे पुरोवस्थितपृथुबुध्नोदराकारवति पदार्थे प्रवृत्तयोरियं पृथिवी अयं घट इति वाक्ययोरपि बाध्यबाधकभाव स्यादित्यत आह ॥ **विरोधे सतीति** ॥ पृथिवीघटइत्यनयोर्न विरोधः ॥ प्रकृते त्वस्ति विरोध इति भावः ॥ **उक्तमिति** ॥वृणीमह इति प्रमाणं भगवत्प्रीतिकामनाकर्तव्यताप्रतिपादनपरत्वे बाधकपरिहारेणोपपादितमित्यर्थः ॥ अत्रेति ॥ भगवत्प्रसादेच्छायाःकर्तव्यत्व इत्यर्थः॥ ननुदेवहूतिंप्रतिभगवताकपिलेनोक्तेनैकात्म्यतामितिवाक्येभगवत्प्रीतिभक्तिज्ञानादन्यतरेच्छाकर्तव्यताया अनुक्तत्वात्प्रकृतासंगतमित्यत आह॥ अस्यैवेति॥नैकात्म्यतामित्यस्यैवेत्यर्थः ॥

ननुतदकर्तव्यतायामपिकामनानिंदावचनंप्रमाणमस्तीत्युक्तमित्यतआह ॥ अनिंदनादिति ॥ यथामहदाचारोविशेषविषयोनतथाकामनिंदावचनं किंतुसामान्यविषयमेव ॥ अतोमहदाचारेणबाध्यतइतिभावः ॥ तर्हितद्वत्स्वर्गादिकामनापिकार्येतियदुक्तंतत्राह ॥ विशेषतइति ॥ चशब्देनप्रमाणाभावंसमुच्चिनोति ॥ अस्त्वाचारोविशेषविषयः ॥ कामनिंदावचनंतुसामान्यविषयम् ॥ तथापिकुतोबाध्यबाधकभावइत्यतआह

अनिंदनाद्विशेषतइतरनिंदनाच्च ॥ सामान्यंविशेषोबाधतइतिचप्रसिद्धं ॥ सर्वानानयनैकमैत्रमित्यादौ ॥

अतोनैकात्म्यतामिस्पृहयंतिकेचित् ॥ भक्तिमन्विच्छंतः ॥

सामान्यमिति ॥ सामान्यविशेषशब्दौतद्विषयप्रमाणपरौ ॥ चशब्दाद्विरोधेसति ॥ उक्तंचप्रमाणम् ॥ उपसंहरन्प्रमाणांतराण्यप्यत्राह ॥ अत इति ॥ एकात्मतांसायुज्यम् ॥ अस्यैवशेषोभक्तिमन्विच्छंतइति ॥ ॥ ॥ ॥ ॥

॥ क्व ॥ननु संकोचनीयार्थकत्वं बाध्यत्वं संकोचकत्वं बाधकत्वम ॥ नचेदं द्वयमर्थनिष्ठं ॥ किं च यत्र विरुद्धयोर्मध्येऽन्यतरस्याप्रामाण्यं तत्रार्थसंकोचोपि नास्तीत्यत आह ॥ **सामान्यविशेषशब्दाविति** ॥ एकस्मिन्नेव वस्तुनीयं पृथिवी घटोयमिति वाक्ययोर्बाध्यबाधकतापत्तिरित्यतआह ॥ **विरोधे सतीति** ॥ ऐक्यार्थत्वभ्रांतिं निरस्यति ॥ **सायुज्यमिति** ॥ एक आत्मा देहोययोस्तावेकात्मानौ तयोर्भाव एकात्मतेति कृते उक्तार्थ लाभादिति भावः ॥ नैकात्मतामित्यस्य प्रकृतानुपयोगादाह ॥ **अस्यैवशेष इति** ॥ ॥ ॥

॥ श्री० ॥ नैकात्म्यतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामदीहाः ॥ येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥ पश्यंति मे रूपाणि [illegible] प्रसन्न [illegible] लोचनानि ॥ रूपाणि दिव्या
निवरप्रदानि साकं वाचं स्पृहणीयां वदंति ॥ [illegible] सिनतामसृ [illegible] ॥ [illegible] भक्तिमन्विच्छ [illegible] गतिमण्वीं प्रयुंक्त इति वा [illegible] किमन्विच्छत इति भक्तीच्छाया
कर्तव्यतोक्तिः ॥ ननु तर्हि नैकात्म्यतामित्येतत् [illegible] ॥ [illegible] रूपाणि [illegible] अभावप्रदर्शनार्थ
मेवतदुदाहरणमिति ज्ञातव्यम ॥ जिज्ञासाशब्दइति ॥ [illegible] जिज्ञासाशब्द इत्यर्थः ॥ न ज्ञानेच्छेति ॥ [illegible] इति भावः ॥ विचारस्योपलक्षकइति ॥
तथा च विचारस्यैव विधिविषयत्वेन [illegible] कर्तव्यत्वमित्याशयः ॥ तत्र [illegible] इति ॥ [illegible] इत्यर्थः ॥ ब्रह्मज्ञानं [illegible] इच्छायां मत्यां
विचारे मति पश्चाद्ब्रह्मज्ञानं भवतीति विचार [illegible] विशिष्टस्य [illegible] ज्ञानेच्छाया अपि क
र्तव्यत्वं लक्षणमित्याशयः ॥ ननु विचारमात्र [illegible] ॥ अन्यथेति ॥ ज्ञानेच्छापरत्वपरिहारेण विचारमात्र [illegible]
लक्षणाबीजसंबंधाभावाद्विचारलक्षणा [illegible] ॥ ज्ञानेच्छापरत्वे जिज्ञासापदे
न लक्ष्यत इति ॥ विज्ञाय प्रज्ञा [illegible] लोकसिद्धव्याप्तिकानुमानादिति ॥ ॥ ॥

ननु न ब्रह्मजिज्ञासाशब्दो ज्ञानेच्छापरः ॥ किंतु विचारस्योपलक्षकः ॥ सत्यम् ॥ तथापि तत्पूर्वक एव विचारो लक्ष्यते ॥ अन्यथा संबंधाभावात् ॥ लोकसिद्ध

ब्रह्मजिज्ञासा ॥ विज्ञाय प्रज्ञां ॥ द्रष्टव्य इत्यादिवचनेभ्यः ॥ स्वार्थसेवकं प्रति न तथा स्नेहः ॥ किं ददामीत्युक्ते सेवादि

याचकं प्रति बहुतरस्नेह इति लोकन्यायाच्च भक्तिज्ञानादिकार्यं ति सिद्धम ॥ ४७ ॥ न्यायात् ॥ लोकसिद्धव्याप्तिकानुमानात ॥ ४७ ॥

॥ कृ० ॥ यद्यपि तृतीयस्कंधे आधुनिकपुस्तकेषु नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहा इत्यादि [illegible] ॥ मनो [illegible] भक्तिमन्विच्छतो गतिमण्वीं प्रयुंक्त इति षष्ठ्येकव
चनांत एव पाठो दृश्यते ॥ न तु प्रथमा बहुवचनांतः ॥ तथापि [illegible] भक्तिमन्विच्छत [illegible] ॥ ये एवं विधास्तेषामण्वीं गतिं प्रयुंक्त इत्यन्वयस्वारस्यात् ॥
षष्ठ्येकवचनांतपाठे तु बहुवचनांतशब्देन प्रकृतानामेकवचनांतशब्देन परामर्शः कर्तव्य इति [illegible] ॥ किंतु [illegible] मदीहा इति विशेषणद्वयस्य
स्वार्थानुवादोयं भक्तिमन्विच्छत इतीत्याहु ॥ न ज्ञानेच्छापर इति ॥ [illegible] ॥ अन्यथेति ॥ इच्छापरत्वं विना लक्षणाबीजशक्यसंबंधाभावादित्यर्थः ॥
अत्र विचारलक्षणोक्तिः परीत्या ॥ सूत्रादौ जिज्ञासा [illegible] ॥ [illegible] ॥ द्रष्टव्य इत्यादि [illegible]
द्रष्टव्य इति वाक्योदाहरणं [illegible] सूत्रोदाहरणं [illegible] ॥ [illegible] लोकसिद्ध [illegible] ॥ ॥

१ स्कं. ३ अ. २६ ॥ २ पूर्वं बहुवचनेन प्रकृतानामेकवचनेन [illegible]

॥ श्री० ॥ विष्णुदास्यादिरूपभक्तिगुणोत्कर्षज्ञानादिकं स्वर्गाद्यपेक्षयैव वैष्णवैः प्रार्थनीयम् ॥ परमप्रीतिसाधनत्वात् ॥ यद्यत्परमप्रीतिसाधनं तत्तदीयैः प्रार्थनीयं यथा राजभृत्यैः राजसेवादिकमित्यनुमानादित्यर्थः ॥ ४७ ॥ कर्मण्येवयोगइति ॥ [illegible] ॥ ज्ञानोपायमिति ॥ [illegible] ॥ पूर्वेणैवेति ॥ इच्छाचतस्यमुक्त्यादिना भगवत्प्रसादकामनायाःकर्तव्यतानिषिद्धेत्यर्थः ॥ [illegible] ॥ ततएवेतीति ॥ अन्यथा संगत्यागादेवेति [illegible]स्यागौरवापत्तेरितिभावः ॥ तथासति [illegible] ॥ [illegible] ॥ ॥ ॥ ॥ ॥ ॥

कर्मण्येवेत्यनेनयोगस्थइत्यस्यगतार्थतापरिहारार्थमाह ॥ पूर्वोक्तनिष्कामनादिविशिष्टानिकर्माण्येवयोगः ॥ अतोयोगस्थइत्यनेनैवलब्धेपुनःकुरु कर्माणीतिकिमर्थमुच्यतइत्यतआह ॥ योगस्थइति ॥ ज्ञानोपायमनुतिष्ठन्नित्यर्थः ॥ कर्मसंबंधंत्यक्त्वाकर्माणिकुर्वित्येतद्व्याहतमित्यतआह ॥ संगमिति ॥ ईश्वरोमेप्रसीदत्वित्यभिसंधिमपित्यक्त्वेत्यर्थोपूर्वोक्तार्थनिरस्तम् ॥ ततएवेतिपरामर्शसौकर्यायत्यक्त्वेत्यनुवादःकृतः ॥ संगं

पूर्वश्लोकोक्तंस्पष्टयति ॥ योगस्थइति ॥ योगस्थः ॥ उपायस्थः ॥ संगंफलस्नेहम् ॥

योगस्थः कुरु कर्माणि संगंत्यक्त्वाधनंजय ॥ सिद्ध्यसिद्ध्योःसमोभूत्वा समत्वं योगउच्यते॥४८॥

त्यक्त्वा ॥ ततएव सिध्यसिध्योःसमोभूत्वा ॥

त्यक्त्वासिद्ध्यसिध्योःसमोभूत्वेतिद्वयमुक्त्वासमत्वंयोगउच्यतइतिएकस्यैवग्रहणमयुक्तम्॥तथासतिसंगत्यागस्यायोगत्वप्रसंगादित्यतआह॥तत इति ॥ संगत्यागादेव ॥ एतयोःकार्यकारणाभावात्कार्येगृहीतेकारणमर्थाद्गृहीतमिति भावः ॥ ॥ ॥ ॥

॥ क ॥ विष्णुभक्त्यादिकं वैष्णवैः प्रार्थनीयं तत्परमप्रीतिसाधनत्वात् ॥ यद्यत्परमप्रीतिसाधनं तत्तदीयैः प्रार्थ्यं यथा राजभृत्यैः राजसेवादिकमित्यनुमानादित्यर्थः ॥ ४७ ॥ उपाय स्याधिकरणत्वाभावादाह ॥ ज्ञानोपायमिति ॥ पूर्वेणैवेति ॥ इच्छा च तस्य मुक्त्यादिनेत्यर्थः ॥ संगशब्दव्याख्यानार्थं फलस्नेहमित्यनन्तरकृत्ये यत्त्यक्त्वेत्यभिहितमुक्तं तस्य कृत्यमाह ॥ तत एवेतीति ॥ अन्यथा ततएवेत्यनेन भाष्योक्तपरामर्शोयोगाद्वीतोक्तसंगत्यागपरामर्शे कार्ये परामर्शस्यायाससाध्यत्वं स्यादिति भावः ॥ त्यागमात्रपरामर्शे ॥ यत्कि चित्त्यागस्यापि समभवनहेतुत्वंभाति तच्चायुक्तम् अननुभवादित्यत आह ॥ संगत्यागादेवेति ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥श्री०॥**कोयोगइति**॥ज्ञानोपायःकइत्यर्थः॥ **पृथगेवेतइति** ॥संगत्यागः समभवनंचयोगस्थत्वरूपविशेषणापेक्षयापृथक्स्वतंत्रविशेषणांतरमेवननुयोगस्वरूपव्याख्यानरूपमितिमंदाः कल्पयिष्यंतीत्यर्थः॥संगत्यागसमभवनयोरेववस्तुगत्यायोगत्वातयोगस्थःसंगंत्यक्त्वासिद्ध्यासिद्ध्योःसमोभूत्वेत्यनयोः पुनरुक्तिपरिहाराय व्याख्यानव्याख्येयभावाश्रयणे संगत्यागसमभवनयोर्योगत्वंसुमतयःकल्पयिष्यंतीतिसिद्धत्वान्मंदा इत्युक्तम्॥यत्समत्वंसएवेतिशैत्यंहियत्साप्रकृतिर्जलस्येतिवत द्रष्टव्यम ननुनिष्कामतादिविशिष्टकर्मकरणस्यैवज्ञानोपायरूपयोगत्वादत्रनसंगत्यागसमभवनयोर्योक्तत्वेनांगिनः॥ कर्मकरणस्यानुक्तेः कथं स एवेत्युक्तमित्यत आह ॥ **योगैकदेश इति** ॥ ४८ ॥ **उपक्रम्यंति** ॥ योगे त्विमां शृण्वित्युपक्रम्येत्यर्थः ॥ **कर्मफलस्येत्यादि** ॥ काम्यकर्मफलस्य स्वर्गादेर्ज्ञानफलापेक्षयाऽल्पत्वेन काम्यकर्मणो निंद्यत्वे ज्ञानोपायाय युज्यस्वेत्युक्तम ॥अत्र तु तत्रैव काम्यकर्मणो निंद्यत्वएव तत्कर्तॄणां कृपणत्वादिरूपं हेत्वंतरमुच्यत इत्यर्थः

ननुसमत्वयोगयोर्भेदःकेनशंकितः येनसमत्वंयोगउच्यतइतितयोरैक्यमुच्यतइत्यतआह ॥ सएवेति ॥ योगस्थइत्युक्तेकोयोगइत्यपेक्षायांभगवतासंगंत्यक्त्वासिद्ध्यासिध्योः समोभूत्वेतियोगोव्याख्यातः ॥ मंदास्तुपृथगेवेतिविशेषणंकल्पयिष्यंतीतितदनुजिघृक्षयाइदमुदितमितिभावः ॥ सएवयत्समत्वमितिशेषः ॥ योगैकदेशोयोगशब्दः ॥ ४८ ॥ ननुयोगोपदेशमुपक्रम्यकर्मणोवुद्धियोगादवरत्वंकिमर्थमुच्यतइत्यतआह॥इतश्चे

दूरेणह्यवरं कर्म बुद्धियोगाद्धनंजय ॥ बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ॥ ४९ ॥

सएवचमयोक्तोयोगः॥४८॥इतश्चयोगाययुज्यस्वेत्यतआह ॥दूरेणेति॥ ति ॥ युज्यस्वप्रयतस्व ॥ यावानर्थइतिकर्मफलस्य ज्ञानफलापेक्षायाऽल्पत्वाद्योगाययुज्यस्वेत्युक्तम् ॥ ॥ क ॥ **मंदास्त्विति** ॥ संग त्यक्त्वासिद्ध्यसिद्ध्योःसमो भूत्वा कर्माणि कुर्वित्युक्ते संगत्यागसमभवनयोः कर्मांगत्वं ज्ञायते त्क्काप्रत्ययात ॥ कर्मांगस्य च योगत्वं सुमतीनां सिद्धमेवेत्यतो मंदा इत्युक्तम ॥ यद्वा योगस्थ इति व्याख्येयम् ॥ संगं त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वेति तद्व्याख्यानम अन्यथा संगत्यागसमभवनयोर्योग विशेषत्वेन पुनरुक्तः॥ इति पर्यालोचनेन संगत्यागसमभवनयोर्योगत्वं सुमतीनां सिद्धमेवेत्यतो मंदा इत्युक्तम् ॥ **पृथगेवेति** ॥ योगस्थत्वविशेषणादिति शेषः ॥ **एते** ॥ संगत्यागसमभवने॥तथाचसंगत्यागादिकं नांगं नाप्यंगी किं तु योगादन्यदेवेति कल्पयिष्यंतीत्यर्थः ॥ **यत्समत्वमिति** ॥ शैत्यं हियत्साप्रकृतिर्जलस्येत्यादिवदिदं ज्ञातव्यम् ॥ ननु निष्कामतादिविशिष्टकर्मैव योगः ॥ तत्रांगिनः कर्मणः संकल्पत्यागादेरंगांतरस्य चानुक्तेः कथं स एवेत्युक्तमित्यत आह ॥ **योगैकदेशइति** ॥ ४८ ॥ ननु युज्यस्वेति युजसमाधावित्यस्य रूपम ॥ श्यन्प्रयोगात ॥ समाधिर्नाम चित्तवृत्तिनिरोधः ॥ ततःश्चसमाधेरपि योगांगभूतत्वात् योगाययुज्यस्वेत्ययुक्तमित्यत आह ॥ **यतस्वेति** ॥ धातूनामनेकार्थत्वादिति भावः ॥ इतश्चेत्यनेन प्रागेको हेतुरुक्त इति सूचितम ॥ तद्विवृण्वन्नेवाह ॥ **यावानर्थइतीति** ॥ ॥ ॥ ॥

१ अंगपरइतिभावः ॥ अन्यथाकर्मस्थःकर्माणिकुर्वित्यनुपपन्नमिति ॥ २ तच्छब्देनसमत्वपरामर्शेप्यत्रविधेयलिंगता ॥ णेरणाविातिसूत्रेसकर्तेतिवत् ॥ ३ त्यागोपेतसमत्वमितिरा.श्रीपादाः॥

॥ श्री ० ॥ ज्ञानलक्षणादितिमूले ज्ञानस्य यल्लक्षणमसाधारणो धर्मइति प्रतीतिवारणाय लक्षणशब्दार्थमाह ॥ लक्षणब्द इति ॥ ननु बुद्धेर्योगादिति षष्ठीसमासत्वेपि ज्ञानोपाय रूपनिवृत्तकर्मापेक्षया काम्यकर्मणोऽतीवावरत्वेन प्रकृतोपयोगसद्भावात् किमर्थं बुद्धिश्चासौ योगश्चेति कर्मधारयाश्रयणमित्यतोऽभिप्रायमाह ॥ पुरुषार्थसंबंधिनेति ॥ स्वर्गरूपपुरुषार्थ संबंधिनाकाम्यकर्मणेत्यर्थः ॥ तथाभूतस्य ॥ मोक्षरूपपुरुषार्थसाधनस्य ॥ अयमर्थः ॥ स्वर्गमोक्षौ द्वावेव पुरुषार्थौ प्रसिद्धौ तत्रावरं कर्मबुद्धियोगादिति सहनिर्देशात् स्वर्गरूपपुरुषार्थ साधनकर्मापेक्षया मोक्षरूपपुरुषार्थसाधनस्य ज्ञानस्यैव कथनं संगतम ॥ उभयोः पुरुषार्थसाधनत्वसाम्यात् इदं च कर्मधारयसमास एव घटते नषष्ठीसमासे ॥ यदि च स्वर्गमोक्षाविव ज्ञानमपिस्वतः पुरुषार्थः स्यात् तदोक्तरीत्या षष्ठीसमासमंगीकुर्मो न चैवमिति ॥ विप्रकर्षो देशव्यवधानम् ॥ तस्यात्रेति ॥ कर्मणोऽवरत्वे कथं देशतो विप्रकर्षरूपदूरत्व संबंध इत्यर्थः ॥ तदुपाययोगानुष्ठानेति॥ज्ञानोपायभूतनिवृत्तकर्माख्ययोगानुष्ठानेत्यर्थः ॥ अनुपयुक्तमिति ॥ कृपणशब्दस्य दीनपर्यायत्वात्फलहेतवःकृपणा इति फलकारणानां कर्मणां दीनत्वकथन मयुक्तम्॥पुरुषाणामेव दीनत्वाख्यकृपणत्वकथनौचित्यादिति भावः॥इत्यत आहेति॥फलहेतुशब्देन बहुव्रीहिणा पुरुषा एव गृह्यंतेऽतस्तेषां कृपणत्वकथनं युक्तमित्याशयेनाहेत्यर्थः ॥४९॥

अत्रतुतत्रैवहेत्वंतरमुच्यते॥बुद्धियोगादितिषष्ठीसमासप्रतीतिनिरासायाह॥बुद्धीति॥लक्षणशब्दःस्वरूपार्थःपुरुषार्थसंबंधिनाकर्मणासहनिर्देशोतथा भूतस्यज्ञानस्यैवग्रहणंयुक्तमितिभावः ॥ उपायात्पुरुषार्थस्य ॥ दूरशब्दोविप्रकर्षवाचीतस्यात्रकथमन्वयइत्यतआह ॥ दूरेणेति ॥ उक्तंकर्मणो

बुद्धियोगाज्ज्ञानलक्षणादुपायात् ॥दूरेणातीव॥अतोबुद्धौशरणंज्ञानेस्थितिम्॥फलंकर्मकृतौहेतुर्येषांतेफलहेतवः॥४९॥

ज्ञानादतीवावरत्वम् इदानीमुपपादनीयंतद्धि॥यत्किमिदंतृतीयपादेनोच्यतेइत्यतः साध्यनिर्देशोयमितिसूचयन्व्याचष्टे ॥ अतइति ॥ ज्ञानेस्थि तिंतदुपाययोगानुष्ठानलक्षणाम् ॥ फलहेतूनांकृपणत्ववर्णनमनुपयुक्तमित्यतआह ॥ फलमिति ॥ ४९ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ ज्ञानस्योपायासाधारणधर्मत्वाभावादाह ॥ लक्षणशब्द इति ॥ षष्ठीसमासपक्षेऽपिज्ञानोपायरूपनिवृत्तकर्मापेक्षया काम्यकर्मणोतीवावरत्वरूपप्रकृतसिद्धेः किं कर्मधारयोक्त्योत्य ताभिप्रायमाह ॥ पुरुषार्थेति ॥ स्वर्गमोक्षवज्ज्ञानस्य स्वतोऽपुपार्थत्वादिति भावः ॥ ज्ञानस्य प्रसिद्धेःस्थितिप्रत्यनधिकरणत्वादाह ॥ तदुपायेति ॥ ४९ ॥

१ निवृत्तकाम्यकर्मणोः पुरुषार्थसंबंधितया समत्वप्राप्तौ काम्यकर्मणोवरत्वकथनंप्रकृतोपयुक्तमिति ॥ २ टीकायामयुक्तमितिपाठेत्वाह ॥ ३ हेतुशब्दश्चोपादाननिमित्तोभयवा ची ॥ तत्रोपादानस्यकार्याव्यवहितपूर्वक्षणवृत्तित्वनियमपि न निमित्तेऽयंनियमःअध्ययनेन वसतीत्यादिवदसफलस्योत्तरकालीनत्वे प्रवृत्तोहेतुत्वंयुक्तमितिभावः ॥ ४ अवांतरेश्वराणामिन्द्रा दीनांभागवते भगवताइंद्रयागप्रकरणेकृतं तदत्रानुपयुक्तमितिभावः ॥ ॥ ॥ ॥ ॥

॥ श्री ० ॥ बुद्धियुक्त इत्यस्य व्याख्यानं ॥ प्रेक्षावानिति ॥ परोक्षज्ञानीत्यर्थः ॥ योगस्वरूपेति ॥ काम्यकर्मदुष्कृतयोस्त्यागोपि योग एवेत्यर्थः ॥ दीनाः दुःखिनः ॥ कुतो दी
नत्वमवगम्यत इत्यत आह ॥ इममिति ॥ क्षयिफलश्रवणादिति भावः ॥ तथापीति ॥ काम्यकर्मिणां कृपणत्वेऽपीत्यर्थः ॥ कथमिति ॥ ज्ञानिनामपिकृपणत्वसंभवेन साम्यस्यापि
संभवादिति भावः ॥ कर्मफलात् ॥ काम्यकर्मफलात ॥ ननु योगस्वरूपरूपः प्रतीतार्थएव किं न स्यादित्यत आह ॥ प्रतीतार्थ इति ॥ उत्तरत्रेति ॥ अतो योगायेत्यादिना तृतीयपाद
व्याख्यानेनेत्यर्थः ॥ अस्याधस्यास्मद्रीत्या ज्ञानफलकथनपरत्वे तस्मात ज्ञानस्यैव महाफलकत्वाज्ज्ञानोपायाय युज्यस्वेति तृतीयपादःसंगच्छते बुद्धियुक्तः प्रेक्षवानित्युक्तरीत्या स्वरूपनि
रूपणपरत्वे तु बुद्धियुक्त सुकृतदुष्कृते जहाति ॥ तस्माद्योगाय युज्यस्वेत्यसगतं सुकृतदुष्कृते जह्यादिति योगस्य विहितत्वेन तस्मादिति पुनर्विधानस्यासंगतत्वात ॥ किं च यद्युक्तः
सन यज्जहाति तदुपायार्थमेवयतेतेति विधानमेव संगतमित्युत्तरत्र प्रदर्शयिष्यतीति द्रष्टव्यम ॥ मूले मानुष्यादिफलं मानुष्यादिफलमित्यर्थः अत्र सुकृतदुष्कृतशब्दौ अदृष्टपरौ ज्ञातव्यौ
॥ व्यावर्त्यमिति ॥ अप्रियमिति विशेषणस्य व्यावर्त्यमाहेत्यर्थः ॥ तथाभूतं सुकृतमिति ॥ आनंदाभिवृद्ध्यादिफलकं पुण्यमित्यर्थः ॥ कुत इत्यत आह ॥ कारणेति ॥ तादृश

बुद्धियुक्तःप्रेक्षावान्काम्यंसुकृतं दुष्कृतंचजह्यादितियोगस्वरूपनिरूपणपरतांनिराकर्तुमाह ॥ ज्ञानेति ॥ कथंकर्मणोज्ञानादतीवावरत्वमित्यतः
काम्यकर्मिणः कृपणाः दीनाः इमंलोकंहीनतरंवाविशंतीत्युक्तम् ॥ तथापिकथंदूरेणावरमित्यपेक्षायांकर्मफलाद्विलक्षणं ज्ञानफलमाहेत्यर्थः ॥
ज्ञानफलमाह॥बुद्धियुक्तइति॥सुकृतमप्यप्रियम् ॥ मानुष्यादिफलम् ॥ जहाति ॥ नत्वबृहत्फलमुपासनादिनिमित्तम् ॥

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते ॥ तस्माद्योगाययुज्यस्वयोगः कर्मसुकौशलम् ॥ ५० ॥

प्रेतातीथऽनुपपत्तिंतूत्तरत्रदर्शयिष्यति ॥ अत्रदुष्कृतवत्सुकृतस्यापि सर्वात्मनाहानंप्रतीयतेतत्संकोचनव्याचष्टे॥सुकृतमिति ॥ अप्रियसुकृ
तंकीदृशमित्यतआह॥ मानुष्येतिव्यावर्त्यमाह ॥ नेति ॥ बृहतप्राङ्मुक्तेर्ज्ञानादिगुणवृद्धिलक्षणं तदनंतरंचानंदवृद्धिरूपंफलंयस्यतत्बृहत्फलं
तथाभूतंसुकृतमेवनास्तिकारणाभावादित्यतआह ॥ उपासनेति ॥ ॥ ॥ ॥ ॥

पुण्यजनकसाधनाभावादित्यर्थः । कृ ० ॥ काम्यकर्मिण इति ॥ फलहेतव इत्यनेनोक्ता इत्यर्थः ॥ अनेनास्योपयोगोऽप्युक्तो भवति ॥ ननु काम्यकर्मिणामौदार्यमेव दृश्यते तत्कथं
कृपणत्वमित्यत आह ॥ दीना इति ॥ ननु दीना इत्युक्तेपि न काम्यकर्मफललाभ इत्यत आह ॥ इमं लोकमिति ॥ देवेभ्य उत्तमं विष्णुं राजवद्यस्तु मन्यते ॥ याजी स मानुषं
यातिसाम्यहीनत्वविसत्तम इति प्रमाणद्वयं व्यवस्थितविकल्पोऽवगंतव्यः ॥ उत्तरत्रेति ॥ तस्मादिति तृतीयपादीये योगायेत्यादिभाष्य इत्यर्थः ॥ ॥ ॥

१ ज्ञानयुक्तः २ काम्यं सुकृतंदुष्कृतंच ३ ज्ञानोपायार्थं ४ पुण्यपापपरौ तयोरेवफलप्रापकत्वात् ॥ कर्मणोस्तदैवनष्टत्वात्तत्त्यागोक्त्यनुपपत्तेः ॥ ॥ ॥

॥ श्री ॥ **नहास्येनेति** ॥ ज्ञानात्पूर्वं कृतस्य ज्ञानाभिवृद्धिजननद्वाराऽक्षयत्वं ज्ञानोत्तरस्य तु मुक्तावानंदाभिवृद्धिहेतुत्वेनेति द्रष्टव्यम् ॥ जुहोति ॥ यजतीति पदयोः पुनरुक्तिपरिहराथाह ॥ **ददातीति** ॥ यजदेवपूजासंगतिकरणदानेष्विति धातोरिति भावः ॥ तपस्तप्यत इतिश्रुतौ तपनं तप इति न भावव्युत्पत्तिः ॥ किंतु तप्यते येन पुमानिति व्युत्पत्त्या तपःशब्देन कृच्छ्रचांद्रायणादिकं ग्राह्यम् ॥ **तप्यतेऽनेनेति** ॥ कृच्छ्रादिरूपं तपोऽनेन पुंसा तप्यते आर्ज्यते क्रियत इत्यर्थः ॥ ननु तप्यतेऽनेनेति कथमुक्तम् ॥ तपस्तपः कर्मकस्यैव तप तपसंतापे इति धातोः कर्ताकर्मवद्भवतिसत्वकर्मवद्भावस्तपः कर्मकस्यैवेति संतपनकर्तुः कर्मसंज्ञायां कर्मणियगिति यक्प्रत्यये तप्यत इतिरूपं संपद्यते तथाच तापसः स्वर्गीय संतपनरूपं तपःतप्यते आर्जयतीत्यर्थः ॥ तस्य कर्तुः कर्मवद्भावोऽत्र विधीयतेतप्यतेतपस्तापसइत्युक्तं काशिकायां ॥ तथान्यत्र गीतायामपि तप्यंते ये तपो जना इत्युक्तम् ॥ एवं च प्रकृतेपि तपस्तप्यते इत्यत्र कर्मभूतस्य संतपनरूपस्य तपसस्तप्यत इति तिङाऽभिहित्त्वं यद्यप्राप्तं तदा संतपनकर्तुरपि कर्मसंज्ञात्वेन कर्मत्वसद्भावात्तिङाभिहितत्वं प्राप्तमेवेति कर्तृकरणयोस्तृतीयेति तिङाद्यनुक्ते कर्तरि करणे च तृतीयाया विहितत्वाद्रामेण बाणेन हतो बाली त्यत्र बालिन इव कर्तुस्तापसस्य तप्यत इतितिङा परंपरयाऽभिहितत्वात्प्रथमैवयुक्तेति चेन्न॥तपस्तप्यत इत्यत्र तपः शब्देन न संतपनरूपं तपो गृह्यते येनोक्तसूत्रेण संतपनकर्तुः कर्मवद्भावेन तिङाऽभिहितत्वात्तृतीया न स्यात् ॥ किं तु संतपनकारणीभूतं कृच्छ्रादिकमेव तथा चानेनसूत्रेण संतपनकर्तुरेव कर्मवद्भावविधानेनतपनकारणीभूतकृच्छ्रादिकर्तुः कर्मवद्भावाविधानात्तपोरूपकर्मण एव तिङाभिहितत्वेन कर्तुस्तापसस्यरामेण बाणेनेतिवत् तिङाऽनभिहितत्वात्तृतीया युक्तेति ॥ अनेनैवाभिप्रायेण भावबोधे तप्यत इत्यत्र कर्तुस्तिङाद्यनुक्तत्वेनोक्तमित्यवगंतव्यम् ॥ ॥ ॥ ॥ ॥ ॥ ॥

आदिपदेननिवृत्तंकर्मकुतःसंकोचइत्यतआह॥नहास्येति॥यजतेददाति॥तप्यतेऽनेनेतिशेषः॥अत्राविदित्वेतिविशेषणाज्ज्ञानिनःसुकृताक्षयःप्रतीयते

नहास्यकर्मक्षीयते ॥ अविदित्वाऽस्मिन्लोकेजुहोतियजतेतपस्तप्यते

॥ कृ ० ॥ जुहोतीत्यनेन पुनरुक्तिनिरासाय व्याचष्टे ॥ ददातीति ॥ यज देवपूजासंगतिकरणदानेष्विति धातुव्याख्यानादिति भावः ॥ यद्यपि देवतोद्देशेन द्रव्यत्यागो यागः त्यक्तस्य वन्हौ प्रक्षेपो होम इति शास्त्रदीपिकादौ यागहोमयोर्भेदोक्तेर्न पुनरुक्तिः ॥ तथापि होमांतर्गतत्वेन यागस्यत्वाभावप्रदर्शनार्थत्वमुक्तमिति ज्ञेयम् ॥ तप्यत इत्यत्र कर्तुस्तिङानुक्ते श्रुतेण घटः क्रियतइतिवत्कर्तरि तृतीयैव युक्तेतिभावेनानेनेत्युक्तम् ॥ ननु तपस्तपः कर्मकस्यैवेत्यनेन तपः कर्मकस्य तपतेर्थः कर्ता तस्य कर्मवद्भावोक्तेः कर्मकर्तर्येवाऽयं लकारः ॥ तत्र च कर्तुस्तिङोक्तत्वान्न तत्र तृतीयोचिता कर्मवद्भावाच्च यगात्मनेपदोपपत्तिः ॥ तथा च तप्यते तपस्तापस इतिवदुपपत्तेरनेनेति कथमध्याहृतम् ॥ उच्यते ॥ कर्मण्येव लकारोऽयं न तूक्तसूत्रेणात्रकर्मवद्भावः अतिदेशिकमनित्यमिति तस्यानित्यत्वात् ॥ न च तिदेशिकस्यानित्यत्वे प्रमाणाभावः ॥ यत्तदेतेभ्य इति निर्देशस्यैवात्र प्रमाणत्वात् ॥ ॥

१ बृह० अ० ३ब्रा० ४श्रु० १५ परमात्मनः सर्वाश्रयत्वेनोपासकस्यज्ञात्युश्च॥ २ बृहदारण्य० अ० ९ ब्रा० ८ श्रु० १०

॥ श्री० ॥ मनु ज्ञानिकृतस्याक्षयफलवत्त्वस्याश्रवणादेतच्छ्रुत्युदाहरणमसंगतमत आह ॥ अत्रापीति ॥ विशेषनिषेधः शेषविध्यनुज्ञापक-इति न्यायादिति भावः ॥ अत एवास्वरसादाह ॥ उत्तरत्र वेति ॥ अतः कर्मक्षयश्रुतिरज्ञानिविषया सर्वत्रेत्युत्तरत्रोच्यते तत्र कासौ कर्मक्षयश्रुतिरित्यपेक्षायामियमुदाहृतेत्यर्थः ॥ नास्त्यकृतःकृतेनेति ॥ अकृतो मोक्षः कृतेन कर्मणा नास्तीत्युक्त्या संपादितस्य सुकृतस्य क्षयोऽर्थात् प्रतीयत इति सत्प्रतिपक्षाः[1] अकर्मक्षयश्रुतयइत्यर्थः ॥ विशेषश्रुतेरिति ॥ न हास्येति श्रुतेर्ज्ञानिकृतकर्माक्षयत्वप्रतिपादनपरत्वेनाविशेषवचनतयासमबलत्वाभावे न सत्प्रतिपक्षत्वमिति भावः ॥ ननु सर्वत्रेत्यस्य वाक्येष्वित्यर्थत्वात् श्रुतिग्रहणं व्यर्थमित्यत आह श्रुतिरिति॥ ज्ञानिनोपि तस्मिन् दृष्टे परावरइतिवाक्यशेषात स्मिन्दृष्टे सति अस्य कर्माणिक्षीयंत इतिज्ञानिनः कर्मक्षयवचनात्पुनः सत्प्रतिपक्षत्वमिति भावः ॥ निरवकाशश्रुतीति ॥ न हास्येति श्रुतेरर्थांतरे घटनाभावेननिरवकाशत्वादित्यर्थः ॥ उक्तंवेति न हास्येति निरवकाशश्रुतिविरोधाद्दुष्कृतस्य सर्वात्मना नाशः पुण्यस्य चानिष्टस्यैव नाश इति संकोचः कार्य इति भावः ॥ ॥ ॥

उत्तरत्रवाऽस्याःश्रुतेरुपयोगः ॥ ननुनास्त्यकृतःकृतेनेत्यादिश्रवणात्सत्प्रतिपक्षाएताःश्रुतयइत्यतआह ॥ अतइति ॥ विशेषश्रुतेर्बलवत्त्वादिति भावः ॥ श्रुतिःश्रवणम् ॥ क्षीयंतेचास्यकर्माणिइतिज्ञानोपिकर्मक्षयःप्रतीयतइतिचेन्न ॥ निरवकाशश्रुतिविरोधेनास्यदुष्कृतविषयत्वात् ॥ तदा बह्वनिवर्षसहस्राण्यंतवदेवास्यतद्भवतीत्याश्रुतिभ्यःअतःकर्मक्षयश्रुतिरज्ञानिविषयासर्वत्रउभयक्षयश्रुतिरप्यनिष्टविषया विद्वान्पुण्यपापेविधूयेतिज्ञानिनोऽपिउभयक्षयश्रुतिरस्तीत्यतआह ॥ उभयेति ॥ उक्तंवयुक्तिः ॥ युक्तिविरुद्धंचज्ञानिनःसर्वसुकृतहानम् ॥ तथा हि ॥ उपासनादिजनितंसुकृतंज्ञानिनः किमिष्टमुतानिष्टम् ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ तथा हि ॥ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत इत्युक्तेरेतेभ्य इति वक्तव्ये यत्तदेतेभ्य इतीनिर्देशःप्रकृतिवदनुकरणमित्यतिदेशस्यानित्यत्वं ज्ञापयति ॥ तत्र ज्ञापकंसामान्यापेक्षमाश्रीयते ॥ तेनातिदेशिकमनित्यमिति सिद्धम् ॥ अवश्यं च सामान्यापेक्षत्वमाश्रयणीयम् ॥ दुर्घटवृत्तावुक्तपरिभाषाश्रयणेन बहुप्रयोगसमर्थनादिति दिक् ॥ आर्यास्तुशाब्दिकानां विवक्षाप्रधानकत्वात्कर्मवद्भावाविवक्षायामुक्तप्रयोगोपपत्तिरिति वदंति ॥ ननु ज्ञानिनः सुकृताक्षयप्रतीतिराार्थिका ॥ न तु श्रौतीत्यतः पक्षांतरमाह ॥ उत्तरत्र वेति ॥ अतः कर्मक्षयश्रुतिरज्ञानिविषयेत्यत्रेत्यर्थः ॥ ननु सर्वत्रेत्यस्यवाक्येष्वित्यर्थोऽर्थांतरासंभवात् ॥ न च वाक्यानांश्रुत्यधिकरणत्वं युक्तमित्यत आह ॥ श्रुतिः श्रवणमिति ॥ प्रतिपादनमित्यर्थः ॥ दुष्कृतेति ॥ अप्रारब्धदुष्कृतेत्यर्थः ॥ उक्तंवेति ॥ न हास्य कर्मक्षीयतइति निरवकाशश्रुतिविरोधरूपेत्यर्थः ॥

---

१ सत्प्रतिपक्षो विरुद्धपक्षो यासांताः अक्षयकर्मप्रतिपादकाः

॥ श्री ० ॥ तदिच्छयेति ॥ इष्टमपिसुकृतं क्षीयतामिति ज्ञानीच्छयेत्यर्थः ॥ अपुरुषार्थतेति ॥ इष्टविघातित्वेनेत्यर्थः ॥ कारणमाशंकते ॥ निष्फलत्वादिति सर्वऔदासीन्यमभि
प्रेत्याह ॥ यशस्वीति ॥ परमात्मनस्तदनुग्रहात् ॥ अनया श्रुत्येति ॥ यद्यत्कामयते तत्कर्म सृजत इति स्पष्टमुक्तेरितिभावः ॥ अनयेति ॥ अस्माद्ध्येवेत्यस्मात्पूर्वमात्मानमेव लो
कमुपासीतेत्युपासनोक्तेः स य आत्मानमेवलोकमुपास्ते न हास्य कर्म क्षीयत इति उपासनाजनितसुकृतस्यानाशवचनादिति भावः ॥ ज्ञानेन ॥ अपरोक्षज्ञानेन ॥ आवरणेति ॥ स्वगुणा
च्छादिकेत्यर्थः ॥ अज्ञानाविद्यापदाभ्यां लिंगशरीरंविवक्षितम् ॥ ननु मुक्तानां जन्यसुखसद्भावात्तदर्थंविषयानिच्छंतीति चेत्तत्राह ॥ पृथक् सुखस्येति ॥ स्वरूपसुखभिन्नसुखस्येत्यर्थः ॥
जन्यसुखस्येति यावत्॥यदर्थं विषयभोगोपेक्षितस्यादिति भावः॥अविद्येति॥लिंगशरीरस्यैव दुःखापादकत्वादिति भावः ॥ नन्वीश्वरेच्छाया आवरणत्वमप्रामाणिकमित्यत आह ॥ तथा चेति

आद्येकिंतदिच्छयाक्षीयतेउतज्ञानस्वभावात् आद्यंदूषयति ॥ नहीति ॥ येनज्ञानीतत्क्षयमिच्छेतइतिशेषः ॥ द्वितीयंनिराकरोति ॥ नचेति ॥
ज्ञानस्यापुरुषार्थताप्रसंगादितिभावः ॥ नांत्यःअनिष्टत्वेकारणाभावात् ॥ निष्फलत्वादनिष्टमित्यतआह ॥ इष्टाश्चेति ॥ केचिदित्यलौकिकः
॥ मुक्तावलौकिकाविषया इष्टा भवंतितत्प्राप्तिःसुकृतफलमिति भावः ॥ मुक्तो विषयानिच्छतीत्येतत्कुतइत्यतआह॥ सयदीति ॥ यशो

नहीष्टपुण्यक्षयेकिंचित्प्रयोजनम् ॥ नचेष्टनाशोज्ञानिनोयुक्तः ॥ इष्टाश्चकेचिद्विषयाः॥सयदिपितृलोकका
मोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंति ॥

यशस्वी ॥ ब्राह्मणानांसकाशात् ॥ मुक्तोयद्यत्कामयतेतत्कर्मास्मात्परमा
त्मनःसृजते ॥ इष्टविषयप्राप्तिः ॥ सुकृतफलमित्येतदपि अनयाश्रुत्योच्यते ॥ उपासनादिकमेवज्ञानीकरोति॥कृतेनवासुकृतंनजायतेइत्येदप्य
नयानिराकृतम् ननुमुक्तःकिमर्थंविषयानिच्छेत्॥ नतावत्सुखार्थम्॥ज्ञानेनावरणरूपाविद्यानिवृत्तौआत्मनः स्वरूपसुखस्यव्यक्तत्वात्॥पृथक्सुख
स्यानंगीकारात् ॥नापिदुःखनिवृत्त्यर्थम्॥अविद्यानिवृत्त्यैवतत्सिद्धेरिति॥मैवम् ॥ नाविद्यैवात्मस्वरूपावरणम्किंत्वीश्वरेच्छापि ॥तथाचवक्ष्यति ॥

॥ कृ ० ५ ननु केचिद्विषया इष्टा इत्ययुक्तम् ॥ असाकल्येतु चिच्चनेत्यमरोक्तेश्चिच्छब्देन यत्किंचिद्विषयाणामिष्टत्वोक्तेरित्यत आह ॥ अलौकिका इति ॥ यशस्वीतिछंदसि
दृष्टस्यैवानुविधेयत्वाद्विनिप्रत्ययलोपं इतिभावः ॥ निर्धारणषष्ठीपक्षे मुक्तस्यापि ब्राह्मणपरत्वं प्रतीयते ॥ तच्चायुक्तं ॥ श्रुतेर्मुक्तमात्रपरत्वादित्यत आह ॥ सकाशादिति ॥ वक्ष्यतीति ॥ सप्तमे
नाहं प्रकाश इत्येतद्व्याख्यावसरे आत्मनः प्रावृतिं चैव लोकचित्तस्य बंधनम् ॥ स्वसामर्थ्येन देव्या च कुरुते सम्महेश्वर इतीति शेषः ॥ ॥ ॥ ॥

१ क्वचित्सांता अप्यदंता भवंतीतिस्वीकृत्य २ सलोपश्चेत्यपिग्राह्यम्

॥ श्री ० ॥ योगी तावन्नमुक्तः स्यादित्युत्तरत्ववक्ष्यमाणप्रमाणे ईश्वरेच्छारूपावरणान्नमुक्तःस्यादित्यर्थस्याविवक्षितत्वेनेश्वरेच्छाया अप्यावरणत्वंगम्यत इत्याहुः तथा च ज्ञानेनेत्यनंतरं क्षीणकर्मणां कार्यात्यये तदध्यक्षेण सहगतानां गुणत्रयात्परतः स्थितायां विरजायां स्नानेनेति शेषः ॥ अशेषेति ॥ ज्ञानेनलिंगशरीरस्य दग्धपटवज्जातत्वात्प्रारब्धकर्मशेषस्तु विरजातरणावधिरित्युक्तेर्विरजास्नानेन दग्धपटवत्स्थितस्यापि तस्यनाशेऽशेषानिष्टनिवृत्तिर्जातेत्यर्थः ॥ व्यज्यत इत्यनंतरं प्रलये भगवदुदरे स्थितानामिति शेषः ॥ परमेश्वर इत्यनंतरं सृष्ट्यनंतरं श्वेतद्वीपाविर्भावे सति तवत्स्थभगवद्दर्शनानंतरंइच्छारूपावरणमपसार्येतिशेषः ॥ विषयानिति ॥ मुक्तानां विषयभोगार्थशुद्धसत्वावस्थानस्यतत्र सत्वैकवलंस्यादितिप्रमाणमितत्वेनतेन विषयानमुक्तानांभोगायोत्पादयतीति संप्रदायविदः ॥ ततश्चायंसंग्रहः ॥ येऽपरोक्षज्ञानानंतरंक्षीणकर्माणोऽर्चिरादिपथावैकुंठगतं भगवंतं सत्यलोकगतंहिरण्यगर्भंचप्राप्तास्तेये च ब्रह्मांडलयेस्वोत्तमप्रवेशेनत्यक्तदेहाः स्वोचितेनपथापुनर्नामकंहिरण्यगर्भंचप्राप्तास्तेसर्वेऽपिपुन्नामकेनहिरण्यगर्भेण सहविरजास्नानेनभिन्नलिंगशरीराः अत्यंतनिवृत्तानिष्टा महाप्रलयेभगवदुदरे स्थित्वाबहुतरमाभिव्यक्तंस्वरूपसुखं भुंजानाःपुनःसृष्टौभगवल्लोकाविर्भावेसतिश्वेतद्वीपगतभगवद्दर्शनेनापरोक्षज्ञानोत्तरानुष्ठितसत्कर्मणाचापगतभगवदिच्छावरकाः ज्ञानोत्तरकृतकर्मजनितभगवत्प्रसादानुसारेण प्राप्तशुद्धसत्वजन्यविषयभोगेन सम्यगभिव्यक्तस्वरूपसुखाः संतः स्वस्वस्थानेषु व्यवतिष्ठंतइति ॥

तथाचज्ञानेनाविद्यायांनिवृत्तायामशेषानिष्टनिवृत्तिर्भवति ॥ स्वरूपसुखंचबहुतरंव्यज्यते ॥ ननुसर्वम् ॥ ज्ञानोत्तरमनुष्ठितेननिवृत्तकर्मणाप्रसन्नः

प्रजापतेःसभांवेश्मप्रपद्ये ॥ यशोहंभवानिब्राह्मणानाम् ॥ स्त्रीभिर्वायानैर्वा॥अस्माद्ध्येवात्मानो यद्यत्कामयतेतत्तत्सृजते ॥ कामान्नीकामरूप्यनुसंचरन्सएकधाभवतिइत्यादिश्रुतिभ्यः ॥

परमेश्वरोमुक्तोविषयानुत्पाद्यतद्भोगेनज्ञानानभिव्यक्तमपिस्वरूपसुखंव्यक्तीकरोति ॥

॥ क ० ॥ ज्ञानानभिव्यक्तमिति ॥ नन्वेवं सति अग्निहोत्रादि तु तत्कार्यायैवेतिसूत्रविरोधः ॥ तत्राग्निहोत्रादिव्यंग्यसुखस्य तत्कार्यपदेन ज्ञानकार्यत्वोक्तेरितिचेन्न ॥ ज्ञानानभिव्यक्तपदेन केवलज्ञानानभिव्यक्तत्वस्य विवक्षितत्वात ॥

१ अ० ४ पा० ३ अ० ६ सू० ४ ओं कार्यात्ययेतदध्यक्षेणसहातः परमभिधानात ओं एतदर्थं मनामि निनायाहकार्य यस्यइत्यादि ॥ कार्याणां नाशरूपे प्रलये तदुर्गां स्वामिना चतुर्मुखेनसह चतुर्मुखात्परं ब्रह्मज्ञानी गच्छति ॥ तेहि ब्रह्माणमभिपद्य यद्ब्रह्मलोकेन प्रथमह ब्रह्मणा परमभिगच्छंति इतिश्रुतौ तथाऽभिधानादिति हि सूत्रार्थः ॥

२ अ० ४ पा० १ अ० ८ सू० ४ ज्ञानिन एव अग्निहोत्राद्यकाम्यकर्म ज्ञानाख्यकार्यायैव ॥ ज्ञानात्पूर्वकृतम ॥ पाश्चात्यं मोक्षेऽतिशयानुभवायैव ॥ स आत्मानमेवलोकमुपास्ते ॥ नहास्यकर्मक्षीयत इति बृहच्छ्रुतौ उक्तार्थस्य दर्शनादितिसूत्रार्थः ॥

॥ श्री० ॥ अत्रचेति ॥ज्ञानेनाविद्यानिवृत्तिर्ज्ञानोत्तरकृतकर्मणाच स्वरूपसुखाभिव्यक्तिरित्यादौ अर्थे सर्वदुःखनिवृत्तिस्तुज्ञानिनोनिश्चितैव हि॥उपासयाकर्मभिश्च भक्त्याचानंदांवित्रितत्वोज्ञानि प्रमाणानि तत्र तत्र ब्रह्मसूत्रभाष्यादावुदाहृतानि द्रष्टव्यानीत्यर्थः ॥ नन्वेवंमति तमेवंविद्वानित्यादौ मुक्तेर्ज्ञानमात्रसाध्यत्वं विद्यांचाविद्यां चेत्यादौज्ञानकर्मसमुच्चयसाध्यत्वं चोच्यतेतद्विरोधः स्यादित्यतआह ॥ अनेनैवाभिप्रायेणेति ॥ बहुतरसुखाभिव्यक्तिसहिताशेषानिष्टनिवृत्तेः स्वोत्तरकर्मानपेक्षज्ञानमात्रसाध्यत्वं ईश्वरेच्छावृतज्ञानानभिव्यक्तस्वरूपसुखांशस्य ज्ञानोत्तरकर्म साध्यत्वमित्यभिप्रायेणेत्यर्थः ॥ कर्मसुख इति ॥ ज्ञानोत्तरकृतकर्मसाध्यविषयभोगव्यंग्यसुखेऽंगीकृते सतीत्यर्थः ॥ अनुभवतीति ॥ प्रसन्नश्चेश्वरः स्वदेहमेव भोगाय प्रयच्छतीत्यर्थः ॥

अत्रचभाष्यकृतैव तत्र तत्र प्रमाणान्युक्तानि ॥अनेनैवाभिप्रायेणश्रुत्यादिषुमुक्तेर्ज्ञानमात्रसाध्यत्वंज्ञानकर्मसमुच्चयसाध्यत्वंचोच्यते ॥ न तु ज्ञान

बहुत्वेप्यात्मसुखस्यपुनरिष्टत्वात्कर्मसुखे न विरोधः ॥ अनुभवशक्तिश्चेश्वरप्रसादात् ॥

मात्रसाध्यंयत्स्वरूपसुखंतदेवबहुतरमस्ति ॥ अतःकर्मसाध्यविषयभोगाभिव्यंग्यसुखांगीकारः किमर्थमित्यतआह ॥ बहुत्वेपीति॥ कर्मसुखेऽंगी कृतइतिशेषः ॥ शरीरेंद्रियरहितस्यमुक्तस्यकथंविषयानुभवेशक्तिरित्यतआह ॥ अनुभवेति ॥ ॥ ॥ ॥

॥ कृ० ॥ अत्रचेति ॥ तथाचेत्याद्युक्तार्थ इत्यर्थः तत्र ज्ञानेनाशेषानिष्टनिवृत्तिरित्यत्रस्वतो दोषलयो दृष्ट्वा त्वितरेणां प्रयत्नत इति प्रमाणंबहुतरं स्वरूपसुखंव्यज्यत इत्यत्र ॥ ये त्वां पश्यंतिभगवंस्तत्रैव सुखिनः परमिति मानम् ॥ परमिति विशेषणात ॥ ज्ञानोत्तरानुष्ठितकर्मणेश्वरः प्रसन्नोभवतीत्यत्र स्थितप्रज्ञस्यापि कार्योदेहादिर्दृश्यते यदा ॥ स्वधर्मो मम तुष्ट्यर्थ इति ईश्वरो मुक्तौ विषयानुत्पादयतीत्यत्रास्मान्द्वचेवात्मनो यद्यत्कामयते तत्तत्सृजत इति॥एवं तद्योगेनेत्यत्रविशिष्टार्थोपि ब्रह्मादिपदादप्यधिक सुखं मोक्ष इत्यग्रिमभाष्योक्तरीत्या प्रमाणमुन्नेयम् एषांच प्रमाणानामेकत्राध्याये संकलय्याकथनात्तत्र तत्रेत्युक्तम ॥ अनेनैवाभिप्रायेणेति ॥ अशेषानिष्टनिवृत्तिसहितबहुतरसुखाभिव्यक्त्यभिप्रायेण ज्ञानानभिव्यक्तस्वरूपसुखाभिव्यक्त्य भिप्रायेण चेत्यर्थः ॥ श्रुत्यादिष्विति॥ ज्ञानेनैवामृती भवति ॥ सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण चेतीत्यादि श्रुतिष्वित्यर्थः ॥ आदिपदेनापरोक्षेशब्दष्टिस्त्क मुक्तौ किंचिन्नमार्गते ॥ तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतमित्यादिस्मृतिग्रहणम् ॥

---

१ बिंबापारोक्ष्येण २ आदिपदेनज्ञानात्पूर्वमुपासनयानिवृत्तकर्मणाभक्त्याचज्ञानंबहुतरसुखाभिव्यक्तिश्चास्वयोग्यापरोक्षज्ञानोत्तरंउपासनादिभिःश्वेतद्वीपगतरूपविशेषापरोक्षंअशेषस्वरूपसुखाभिव्यक्तिश्चेतिविशेषाग्राह्याः ॥

३ एतेनज्ञानात्पूर्वानुष्ठितोपासनाद्यपेक्षासूचिता॥ ४ साचज्ञानद्वाराऽत्मसुखाभिव्यक्तेर्हेतुरितिनमात्रशब्दव्यावृत्त्या ५॥पूर्वश्वेतद्वीपगतरूपविशेषापारोक्ष्यस्येच्छावरणानिवर्तकत्वोक्तेर्नोक्तमात्रशब्दः

॥ श्री० ॥ अत्र सूत्रं प्रमाणयति॥तदुक्तमिति॥ब्राह्मेणेति॥सर्वैरुपन्यासेन मुक्तः सैनो ब्राह्मेणैव देहेन भोगान्भुंक्त इति जैमिनिर्मन्यते॥स वा एष ब्रह्मनिष्ठ इदं शरीरंमर्त्यमतिसृज्य ब्रह्माभिसंपद्य ब्रह्मणापश्यति ब्रह्मणाश्रृणोति ब्रह्मणैवेदं सर्वमनुभवतीति माध्यंदिनायनश्रुतावुपन्यासात्॥ आदृत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति॥गच्छन्हरिपादेन मुक्तस्यैषा स्थितिर्भवेदिति स्मृतेश्चेति सूत्रार्थः सगुणब्रह्मज्ञानमेव भोगादि संकल्पमपि मुक्तानां तथानुभवं दर्शयितुमाह ॥ किंचेति ॥ रूपशब्दो देहपरः ॥ स्वेच्छया गृहीतरूपीत्यर्थः ॥ पूर्वकालीनामिति॥ जीवन्मुक्तावस्थायामेव भोगो न परममुक्ताविति भावः ॥ इत्याशंक्याह तत्रेति ॥ अंतरंगसाधनेन। चरमशरीरपातादनंतरंतत्रैतद्व्याख्यानं भवति ॥ चरमशरीरपातानंतरं परममुक्तौ विषयभोगादि कल्पयंतस्ते स तत्रपर्येति एतमानंदमिति श्रुत्योः प्रत्यय... प्रशस्तादित्यादि श्रुत्योः पर्यालोचनमत्रावगंतव्यं ॥ क्रियाविशेषणमिति ॥ तथाचेत्यादिश्रवणा दित्यन्वयो द्रष्टव्य इति भावः ॥ उपाधिभेदेति ॥ अविद्यादिकारणशरीरभेदेत्यर्थः ॥ एके मायावादिनः ॥ अन्ये भास्कराः ॥ विषयभोगो मुक्ताविति शेषः ॥ प्रविलयात्॥ प्रवि लयस्योभाभ्यामप्यंगीकारादित्यर्थः ॥ ॥ ॥ । ॥ ॥ ॥

तदुक्तं ॥ ब्राह्मेणजैमिनिरिति ॥ किंचकामरूप्यनुसंचरन्नित्यादिलीलाविग्रहग्रहणश्रुतेश्चमुक्तस्यविषयानुभवोयुज्यतइत्याह ॥ श्रुतेश्चेति ॥ ननु यदेतदुदाहृतासुश्रुतिषुविषयेच्छादिकंश्रूयतेतच्चरमशरीरपातात्पूर्वकालीनं किंनस्यादित्यतआह ॥ नचेति ॥ अस्माच्छरीरादुत्थायसतत्रपर्येति अस्माल्लोकात्प्रेत्यएतमानंदमयमात्मानमित्यायुत्तरत्रश्रवणात ॥ इत्यादीतिक्रियाविशेषणम् ॥ अद्वैतवादिनस्त्वाहुः ॥ ब्रह्मैकमेवतत्वम् ॥ तदे

श्रुतेश्च ॥ नचशरीरपातात्पूर्वमेव ॥ सतत्रपर्येति ॥ एतमानंदमयमात्मानमुपसंक्रम्येत्याद्युत्तरत्रश्रवणात् ॥

वोपाधिभेदभिन्नंजीवभावंप्रतिपद्यते ॥ गगनमिवघटाद्युपाधिभिन्नंघटाकाशादित्वम् ॥ तत्रयस्यजीवस्यज्ञानमुत्पन्नम् ॥ सब्रह्मणैकीभवति ॥ घटनाशेघटाकाशइवमहाकाशेनेति ॥ तत्रैकजीवब्रह्मभेदस्योपाधेश्चमिथ्यात्वंमन्यंते ॥ अन्येचसत्यत्वम् ॥ यदाचसज्ज्ञानीब्रह्मणैकीभूतःतदास कलस्यक्रियाकारकलक्षणफलभेदस्यप्रविलयात्कुतोविषयभोगोयदर्थं सुकृतस्यात्रस्थानमिति ॥ तद्दूषयति ॥ ॥ ॥

॥कृ०॥तदुक्तं ब्राह्मेण जैमिनिरिति॥यद्यप्यत्र सूत्रे मुक्तो ब्राह्मेण देहेन भोगान्भुंक्त इत्युक्तम् ॥तत्वीश्वरप्रसादादनुभवशक्तिरिति॥तथाप्येतदधिकरणीयभाष्यादुदाहृते यथेष्टंपरिवर्ततेत स्यैवानुग्रहेरितेत्यादिप्रमाणे ईश्वरानुग्रहस्यकारणत्वोक्तेःब्राह्मेणब्रह्मसमानेनभोगान्भुंक्तइत्यपिसूत्राभिप्रेतत्वाद्वेतत्सूत्रोदाहरणंयुक्तमितिबोध्यम् ॥अत्रैतदुदाहरणान्यथानुपपत्त्येश्वरप्रसादा दिति गीताभाष्यस्येश्वरप्रसादलब्धैश्वर्यदेहव्याप्तिरित्यर्थोव्याख्येयइतिभावः ॥ उत्तरत्रेति ॥ चरमशरीरपातादुत्तरत्रेत्यर्थः ॥ क्रियाविशेषणमिति ॥ श्रवणरूपक्रियाविशेषणमित्यर्थः ॥

१ अ० ४ पा० ४ अ० २ सू० १ ब्राह्मेणजैमिनिरुपन्यासादिभ्यः ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ निराकरोतीति ॥ तथा च स जीवो ब्रह्मणएकीभूत एव न भिन्नाभिन्न इति मायिमतं न नेत्यर्थः ॥ स्फुटीकरिष्यतीति ॥ आमं दुःखीत्यादिनेत्यर्थः ॥ परे निविडे ॥
आचार्येणोक्तम ॥ परमात्मानमासाद्य तद्भूता इत्युक्तमैक्यम ॥ युधिष्ठिरेकदूषणेनासंदेति तत्राह ॥ परिहार इति ॥ आशयेनाति ॥ तथाच त्वदीयदूषणं ममापि संमतमिति भावः ॥
मोक्षे दोषः सतस्य हीनत्वादिना यदि युधिष्ठिरउक्तदोषपरिहारार्थं परिहारउक्तो तथापि तदसमाधानमित्यत आह॥यद्यपीदमिति॥परमात्मानमासाद्येत्यनेन यन्मयोक्तं तदिदं दुर्बोधमित्यर्थः ॥
स्वदेहशब्दस्य योगेनार्थद्वयमाह ॥ परमात्मानंमुक्तमिति ॥ देहिनइत्युपलक्षणमित्याशयेन ह ॥ विषयांश्चेति ॥ ॥ ॥ ॥

नचेति ॥ एवशब्देनभेदाभेदौनिराकरोति ॥ परमात्मानमासाद्यतद्भूतायतयोऽमलाः ॥ अमृतत्वायकल्पंतेननिवर्तंतिचाभिभोगिनिभीष्मेणतस्मि
न्भूतास्तद्भूताइत्यभिप्रायेणोक्तमुक्तास्तद्ब्रह्मैवभूताइत्यर्थीनरमात्राकर्ण युधिष्ठिरेणआजन्ममरणं वानेस्मरंत्युतनवाऽनयेतिविकल्प्यपृष्टम् ॥यदिज्ञा
निनोमुक्तोब्रह्मणैकीभवंतितदेवंवाच्यम् ॥ किंतस्मसारानुभूतंदुःखंस्मरंति उत नेति ॥ आद्यस्यदूषणमुक्तम् ॥मोक्षेदोषोमहानेषःप्राप्यसिद्धिंगतानृ
षीन् ॥ यदितत्रैवविज्ञानेवर्ततेयतयःपरे ॥ पूर्वसिद्धिंगतानृषीन्प्राप्यपरेऽपि यतयोयदितत्रमुक्तौविज्ञाने विज्ञानेनप्रागनुभूतदुःखस्मरणेनयुक्ताव
र्तंततर्हिमोक्षेमहानेषःप्रसिद्धोदोषइति ॥ दोषंचभाष्यकारःस्फुटीकरिष्यति ॥ द्वितीयोऽपिदूषितः ॥ मग्नस्येति ॥ पूर्वानुभूतस्मरणाद्यभावेपरेऽ

नचैकीभूतएवब्रह्मणाऽमः ॥ मग्नस्यहिपरेऽज्ञानेकिन्नुदुःखतरंभवेदित्यादिनिंदनान्मोक्षधर्मे ॥

ज्ञानेमग्नस्यचेतनस्य दुःखतरंदुःखातिशयोनभवेत्किंभवेदेव ॥ तदेवंमोक्षधर्मेऽस्यपक्षस्यनिंदितत्वान्नज्ञानीब्रह्मणैकीभूतइत्यर्थः ॥ ननुपूर्वपक्षस्थे
नयुधिष्ठिरेण निंदितत्वेऽपि कथं भीष्माचार्येणोक्तमसत्स्यात ॥ परिहारे तदुक्त दोषस्योद्धारसंभवादित्यतआह ॥ परिहारइति ॥ नमये
तदुक्तंकिंतुत्वमन्यथागृहीत्वादूषितवानसीत्याशयेनपरिहारंभीष्मेणपरमात्मनः पृथक्त्वेनमुक्तानांभोगाभिधानाच्च न ज्ञानीब्रह्मणैकीभूतइत्यर्थः ॥
त था हि भीष्मवचनम् ॥ तथाऽपितत्त्वं परमं शृणु सम्यङ्मयेरितम् ॥ इंद्रियाणि च बुध्यंतेस्वदेहं देहिनो नृप ॥ करणान्यात्मनस्तानिसूक्ष्मःप
श्यति तैस्तु सइति ॥ यद्यपीदं दुर्बोधंतथाऽपिस्वःस्वरूपभूतो देहोयस्यतंस्वदेहं परमात्मानं मुक्तमन्यान्देहान्विषयांश्चमुक्तस्यइंद्रियाणिबुध्यंते ॥

॥ क ॥ व्याख्यातेमतत्प्राक् ॥ नतिवर्तंतीति ॥ अभिभवंतिमवंतीत्यभिभुः सर्वोत्तमः ॥ भिनंद्गुणादित्वाद्प्रत्ययः ॥ तस्मान्ननिवर्ततीत्यन्वयः ॥ स्फुटीकरिष्यतीति ॥ नचैकीभूतस्येत्या
दिनेति शेषः ॥ परेऽज्ञानेमग्नस्येति ॥ सर्वथाज्ञानशून्यस्येत्यर्थः ॥ तदन्यात्स्यर्थमाह ॥ चेतनस्येति ॥ भवेदेवेति ॥ अभावेदर्शनादितिभावः ॥ निंदितत्वमात्रंनासत्त्वप्रयोजकंब्रह्म
णोऽपितत्प्रसंगात् ॥ किंतुसिद्धांतिनानिंदितत्वमेवतत्त्वतत्प्रकृतेऽस्ति ॥ किंतुतद्विपरीतमेवेतिभावेनोक्तम ॥ पूर्वपक्षस्थेनेति ॥ आचार्येणेतिच ॥ तथापितत्त्वंपरममितिभीष्मवचनेतथापीत्य
स्यसाकांक्षत्वादाह ॥ यद्यपीदमिति ॥ परमात्मानमासाद्येत्यनदित्यर्थः ॥ स्वदेहमित्यस्यार्थद्वयमाह ॥ परमात्मानंमुक्तमिति ॥ देहिनइत्युपलक्षणमितिभावेनाह ॥ विषयांश्चेति ॥

॥ श्री॰ ॥ कस्तर्हीति ॥ पूर्वार्धे बुध्यंते जानंतीति इंद्रियाणां कर्तृत्वप्रतीतेरितिभावः ॥ सूक्ष्म इतीति ॥ तथाच स सूक्ष्मो जीवस्तैः पश्यतीत्युक्त्या करणेषु कर्तृत्वोपचार इत्याशयेन पूर्वार्धे तथोक्तमिति भावः ॥ अनेनेति ॥ शुकादीनामितिवाक्यत्रयेणेत्यर्थः तत्र शुकादीनामित्यनेन प्रत्यक्षं जगद्व्यापारवर्जमिति मुक्तानामैश्वर्यमर्यादोक्त्या निरुद्धधर्माधिकरणत्वानुमानमिदं ज्ञानमिति गीतारूपआगमश्चोक्त्या इत्यवधेयम ॥ तदुपपादयति॥शुकादयोऽपीति ॥ अविनष्टेति ॥ अधुनाऽपि प्रारब्धकर्मानाशादिति भावः ॥ननु निरंशतयैकमेव गगनंघटाद्युपाधिभिन्नं सत्पृथक् ज्ञायते तद्दृष्टांतेनैकमेव ब्रह्मोपाधिवशाद्भिन्नं सत शुकादिभावेन ज्ञास्यत इति ॥ चेत्तत्राह ॥ गगनादीति ॥ क॰ ॥ पूर्वार्धस्येति ॥ इंद्रियाणिचबुध्यंतेइत्यस्येत्यर्थः ॥

किंतानि कर्तॄणि नेत्याह ॥ करणानीतिकस्तर्हि पूर्वार्धस्यार्थ इत्यत उक्तम् ॥ सूक्ष्मइति ॥ इतश्च न ॥ ज्ञानिनो ब्रह्मैक्यमित्याह ॥ शुकादीनामिति ॥ अनेन वाक्यत्रयेण मुक्तानां ब्रह्मभेदे क्रमेण प्रत्यक्षानुमानागमा उपन्यस्ताः ॥ तत्र प्रत्यक्षं न बाधकम् ॥ शुकादयो यद्यपि ज्ञानिनस्तथापीदानीमविनष्टोपाधित्वात्तन्निमित्तभेदवत्तयादृश्यंते॥प्रारब्धकर्मक्षयादुपाधिनाशे ब्रह्मैव संपन्ना(भूताः)नपृथक् द्रक्ष्यंत इत्यत आह॥उपाधिना

परिहारेपृथग्भोगाभिधानाच्च ॥ शुकादीनांपृथग्दृष्टेश्चजगव्द्यापारवर्जमित्यैश्वर्यमर्यादोक्तेश्च ॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताइतिच ॥ उपाधिनाशेनाशाच्चप्रतिबिंबस्य ॥ नचैकीभूतस्यपृथग्ज्ञानेमानंपश्यामः ॥

शइति ॥ जीवास्तावद्ब्रह्मणःप्रतिबिंबा इतिसमर्थितम् ॥ तत्र यदि तदीयस्योपाधेर्नाशोंऽगीक्रियते तदा तेषांनाशःप्रसज्यते ॥ दर्पणाद्युपधिनाशेमुखादिप्रतिबिंबस्य नाशदर्शनादित्यर्थः ॥ यच्चोक्तम् ॥ शुकादयोऽविनष्टोपाधित्वाद्ब्रह्मणः पृथक्दृश्यंतइतितदसदित्याह ॥ नचेति॥ वस्तुत एकीभूतस्योपाधिनापिपृथक् ज्ञाने नमानं पश्यामः ॥ गगनादिदृष्टांतस्यासंमतत्वातसत्योपाधिभेदमतस्यचेदंदूषणम् ॥ किंचोपाधिकएव जीवब्रह्मणोर्भेदःवास्तवं त्वैक्यमिति वदन्प्रष्टव्यः ॥ ॥ समर्थितमिति॥तथाचरूपंरूपंप्रतिरूपइत्यादिनेतिशेषः ॥उपाधिनाऽपिपृथग्ज्ञानेइति ॥उपाधिकृतंपृथक्त्वंयत्तज्ज्ञानइत्यर्थः ननुब्रह्मोपाधिकृतभेदवदेकत्वाद्गगनवदित्यनुमानमस्तीत्यत्रान्मानंनपश्यामइत्ययुक्तमित्यत आह ॥ गगनादीति ॥तथाऽपिस्वाभाविकप्रदेशांगीकारेणभेदस्यतत्प्रतिनिधिविशेषस्येनोपाधिज्ञाप्यत्वेऽपितत्कृतत्वाभावात्साध्यवैकल्यप्रसंगादितिभावः॥ननुसत्योपाधिकृतसत्यभेदवादिनांमायावादिनांचमतमाधारणदर्पणदूषयतुनत्वेकीभूतइत्यादिनोप्यमततायव्याख्यातम् ॥ अन्यथाप्रकृतद्वयानुवादायोगात् ॥नचप्रकृतभाष्योक्तदूषणंसाधारणंमायावादिनांगुल्यवदृष्टंभादिनाचद्रंभेदाध्यासांगीकारेणचंद्रदृष्टांतेनब्रह्मण्यप्युपाधिना भेदावभासअनुमानसंभवादित्यत आह॥सत्योपाधीति॥चोऽवधारणेसत्यंमिथ्यात्ववादिमतवस्तुतएकीभूतस्योपाधिवशाद्भेददर्शनमस्तीतितथा ऽपिसत्योपाधिकृतसत्यभेदवादिमतेवस्तुतएकीभवउपाधिकृतभेदस्यज्ञानमस्तीत्यत्रनमानंपश्यामइत्युक्तेनोक्तदोषइतिभावः॥एवंयस्यज्ञानमुत्पन्नसब्रह्मणैकीभवतीत्यंशोदूषितः॥अधुनाब्रह्मैकमेवतत्त्वंतदेवोपाधिभेदाभिन्नं जीवभावंप्रतिपद्यतइतियदुक्तं तदपिदूषयितुमुत्तरमूलमितिभावेनाह ॥ किंचेति ॥

॥ श्री ० ॥ उपाधेर्विद्यमानभेदज्ञापकत्वेनाविद्यमानभेदकारकत्वानंगीकारेणगगनादौ न स्वाभाविकप्रदेशांगीकारेण विद्यमानएव प्रदेशभेदः उपाधिभिर्ज्ञाप्यत इत्यंगीकृतम् ॥ नह्येवं ब्रह्मण्यंगीक्रियते ॥ तस्य स्वतो निरंशत्वादिति भावः ॥ ननु मायिनाऽविनष्टोपाधित्वाच्छुकादयो ब्रह्मणः पृथग्दृश्यंत इति न शंकितुं शक्यते तन्मते ज्ञानेन जगद्बाधांगीकारात् ॥ तत्त्वमस्यादिवाक्यार्थः सम्यग्धीजन्मभावनः ॥ अविद्यासहकार्येण नासीदस्तिभविष्यतीत्युक्तेः ॥ तथा च शुकादीनामैक्यसाक्षात्कारेणोपाधेर्बाधितत्वेन प्रविलयात्कथमविनष्टत्वं शुकादीनां भिक्षाटनादौ प्रवृत्तिश्चाविद्यासंस्कारादित्यंगीकृतमत्रेति ॥ ननु ॥ जीवगतं दुःखमपि ब्रह्मैवानुसंधत्त इत्यर्थः ॥ हस्तपादादीति ॥ वस्तुतः ॥ जीवेन एकीभूतस्य ब्रह्मण उपाधिभेदेन पृथक्ज्ञानेपृथगनुसंधाने जीवगतदुःखानुसंधानाभावे न मानं पश्यामः ॥ स्वाभाविकैक्ये सति उपाधिभेदस्याननुसंधानप्रयोजकत्वं नास्तीति यावत् ॥ कुतःहस्तपादाद्युपाधिभेदेपि भोक्तुरेक कत्वानुसंधातुरैक्यदर्शनादित्याशयः ॥ नन्वत्र जीवगतदुःखेनाहं सदा दुःखी नाहं दुःखीत्येव वक्तव्यम् ॥ आसं नासमिति भूतार्थकलङ्प्रयोगेन तेन पूर्वं दुःख्यासं पूर्वं दुःखी नासमित्यं वप्राप्त्या वर्तमानानागतकालीनतादृशज्ञानालाभादित्यतआह ॥ लङत्रेति ॥ सर्वकालेति ॥ वर्तमानानागतकालेत्यर्थः तथा चासंदुःखी नासं दुःखी दुःख्यस्मि नास्मिदुःखी भविष्यामि दुःखी न भविष्यामीति सार्वकालीनज्ञानप्राप्त्या विरोध इति ध्येयम् ॥ जीवरूपेणेत्यादि अनेन रूपेणेत्यस्यार्थकथनम् ॥ स्वरूपेणब्रह्मरूपेण ॥भेदेतीति ॥ जीवस्वरूपब्रह्मरूपयोर्भेदा भावादिति मूलार्थः ॥ ननूपाधिभेदात्तद्दोऽस्त्वित्यत आह ॥ उपाधेरिति ॥ उक्तत्वादिति ॥ न चैकीभूतस्येत्यनेनेत्यर्थः ॥ पृथक् स्मरतीति ब्रह्माभिन्नं स्मरतीत्यर्थ ॥ ॥

किं ब्रह्मनिर्दुःखं स्वरूपमेवानुसंधत्ते न जीवगतं दुःखं तन्नु जीव एवानुसंधत्तइति पक्षःउततदपीति ॥ आद्यं दूषयति ॥ नचैकीभूतस्येति ॥ हस्तपादाद्युपाधिभेदेपि भोक्तुरेकत्वदर्शनादिति भावः ॥ द्वितीयं निराकरोति ॥ आसमिति ॥ लङत्रसर्वकालोपलक्षणार्थः ॥ जीवरूपेणदुः

आसंदुःखानासमितिज्ञानविरोधाच्चेश्वरस्य॥ अनेनरूपेणेतिच ॥

ख्यासंस्वरूपेण तुनेतिव्यवस्थयाऽनुसंधानान्नविरोधइत्यत आह ॥ अनेनेति ॥ इतिचयुक्तमितिशेषः ॥ कुतइत्यत आह ॥ भेदेति ॥ उपाधेरभेद कत्वस्योक्तत्वादितिभावः ॥ अपरे तुब्रह्मणैक्यमापन्नस्यमुक्तस्य पूर्वदुःखानुस्मरणमस्तिन वा ॥ नेतिपक्षेमग्नस्य हीत्युक्तो दोषः ॥ आद्येकिमसौ पृथक्स्मरति उत ब्राह्मत्मक एव ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ ननुपरोक्तस्यवास्तवैक्यस्यसदातनत्वात्तदंगीकारेविकल्पितमनुसंधानमपिसदातनमेव ॥ अत कथमासमितिभूतार्थकलङ्प्रयोगइत्यतआह ॥ लङत्रेति ॥ भूतवर्तमानभविष्यत्वरूपल कारार्थोपलक्षकइत्यर्थः ॥ लकारार्थत्वेनस्वार्थस्याप्युपलक्ष्यत्वम् ॥ अन्यथायुगपद्वृत्तिद्वयप्रसंगादितिभावेनसर्वेत्युक्तम्॥सर्वकालार्थइतिपाठेतुछंदसिलुङ्लङ्लिट इत्यनुशासनात्सर्वकालवाचीत्यर्थः उक्तत्वादिति ॥ नचैकीभूतस्येत्यनेनेतिशेषः॥ अपरेत्विति ॥ नरहरितीर्थश्रीचरणाइत्यर्थः ॥ द्वितीयव्याख्यायांआसमित्यत्रलङो नोपलक्षकत्वंप्रतीतार्थेनैवसामंजस्यादितिबोध्यम् ॥ अने नेतिनरहरितीर्थीयरीत्याव्याख्यानेनचैकीभूतस्येत्यादिभाष्येणेत्यर्थः ॥ अतएवस्वव्याख्यानांतेऽतिदेशमकृत्वाऽत्रैतदुक्तमितिमंतव्यम् ॥ ॥ ॥ ॥

॥ श्री० ॥ ॥ अनेनेति ॥ आमं दुःखीत्यनेनेत्यर्थः ॥ यदि मुक्तो ब्रह्मणैकीभूतः पूर्वानुभूतं च दुःखादिकं स्मरति तर्हि मोक्षेसदा दुःखी न दुःखी चेत्यनुभवप्रसंग इति दोषः प्रदर्शितो भवति ॥ दोषं च भाष्यकारः स्फुटीकारिष्यतीत्युक्तमनेन प्रदर्शितं भवति ॥ अत एव मोक्षे दोष इत्यस्यामं दुःखीत्यनेनैकार्थत्वात्पक्षत्रयं विकल्प्य तत्परिहारत्वेन भाष्यंतरह रितीर्थश्रीचरणैर्योजितमित्यभिप्रेत्यापरे त्वित्यादिना तद्व्याख्यान लिखितमित्यवगंतव्यम् ॥ पूर्वा ॥ प्रतिबिंबत्वस्य कोपाधिनाशेन प्रतिबिंबनाश इत्येतत् ॥न चैवमिति ॥ बिंबप्रतिबिंबयोः स्वाभाविको भेदो न चेत्यर्थः ॥ तदेवेदमिति यत्र स्वलक्षण मुखं ग्रीवायां प्रतिपन्नं तदेवादर्शे प्रत्यमीति प्रत्यभिज्ञानादित्यर्थः ॥ उदयादाविवेति ॥ उद्यंतमादित्यमिति ॥ उदयं ग च्छति आदित्ययथा तथेत्यर्थः तर्हिबिंबप्रतिबिंबयोर्भेदः कथमित्यत आह ॥ भेदस्त्विति ॥ एवमिति ॥ जीवस्यापि ब्रह्मप्रतिबिंबत्वात्तन्नाशेन भेदस्यैव नाशाज्जीवस्य कुतो नाश इत्यर्थः ॥ मुक्तौ स्थितेरिति ॥ जीवस्येश्वरप्रतिबिंबत्वस्य कोपाधिः स्वरूपत्वात्तन्निबंधनभेदस्य स्वाभाविकत्वाद्धर्ममानेन मुक्तौस्थितिसंभवादिति भावः॥ स्मरणादीति ॥ मुक्तौ देहें द्रियाद्युपाध्यभावे कारणाभावेन पूर्वस्मरणादिकं न स्यात् स्वरूपोपाधिस्त्वनिर्वाच्यादिति भावः ॥

प्रथमस्यदूषणं न चैकीभूतस्येति ॥ द्वितीयस्यासमित्यादीति व्याचक्षते ॥ अनेन मोक्षे दोषो महानेष इत्युक्तो दोषःप्रदर्शितोभवति ॥ ननूपा धिनाशे नाशाच्च प्रतिबिंबस्येति यदुक्तं तदसत् ॥ भेदे हि बिंबप्रतिबिंबयोरेतत्स्यात् ॥ न चैवं किंतुबिंबमेव प्रतिबिंबंतदेवेदमिति प्रत्यभिज्ञा नात्॥नेक्षेतोद्यंतमादित्यनास्तंयंतं कदाच न॥नोपरक्तंनवारिस्थं नमध्यंनभसो गतामितिस्मृतावुदयादाविव वारिस्थप्रतिबिंबेऽपिआदित्यशब्दप्रयो गदर्शनात् ॥ भेदस्तु दर्पणाद्युपाधिकृतः॥ तथा चोपाधिनाशे भेद एव नश्यति ॥ प्रतिबिंबस्य कुतो नाशः ॥ एवं जीवस्यापीत्याशंक्य प्रत्य

भेदाभावात् ॥ नचप्रतिबिंबस्यबिंबैक्यंलोकेपश्यामः॥ उपाधिनाशेमानंवा ॥मग्नस्यहिपरेऽज्ञानइतिदुःखात्मकत्वोक्तेश्च

भिज्ञानं तावदसिद्धमित्याह ॥ नचेति ॥ न पश्यामोनप्रत्यभिजानीमः ॥ प्रत्युतप्रत्यग्भावादिनातयोर्भेदमेव पश्याम इति चार्थः॥ यथोक्तम् जीवब्रह्मणोर्बिंबप्रतिबिंबयोरौपाधिको भेदइति तन्नास्माकमनिष्टम् ॥ किं तु परस्यैव ॥ जीवोपाधि नाशेप्रमाणाभावेन नित्यत्वात्तन्निमित्तस्या पि भेदस्य मुक्तौस्थितेरित्याशयवानाह ॥ उपाधिनाशइति ॥ न पश्याम इत्यनुवर्तते ॥ नकेवलमुपाधिनाशेप्रमाणाभावः ॥ किंतुतन्नाशां गीकारेबाधकमस्तीत्याह ॥ मग्नस्येति॥ उपाध्यभावेस्मरणादिविलोपात् ॥ न केवलमेतावत् ॥ ॥ कृ० ॥ प्रत्यभिज्ञाय आशंकितत्वात्तदनुसारेणाह ॥ नप्रत्यभिजानीमइति ॥ मुक्तौस्थितेरिति ॥ स्वरूपस्यैव जीवोपाधित्वेनतादृ भिन्नस्यभेदस्यस्वाभाविकत्वादिति भावः ॥ स्मरणादिविलोपादिति ॥ कारणाभावादितिभावः ॥

१ उपाधिनाशेन २ आदिपदेनकोदादि ॥

॥ श्री ० ॥ यावदिति ॥ [illegible] ॥ [illegible] नित्यो जीवोऽनित्यास्तस्यभातव इत्यादि
भाष्यानुसारेण द्रष्टव्यः ॥ न विवादइति ॥ [illegible] किं तु सर्वेषामपि संमतमित्यर्थः [illegible] किं तु परमतेऽ
पीत्याह ॥ वारिस्थमितीति ॥ [illegible] त्वयावक्तव्यमेव
त्यर्थः ॥ननु वारिस्थप्रतिबिंबस्य [illegible] सहपाठो नास्ति [illegible] आह॥ अनौपचारिकैरिति ॥ यथाब्रह्मज्ञा
नेन वामुक्तिः प्रयागमरणेन वा ॥ अथ वा [illegible] ब्रह्मज्ञानेन [illegible] मुक्तिजनकत्वं [illegible]
ब्रह्मज्ञानमाहश्येनौपचारिकत्वमेवं [illegible] सहपठितेऽपि [illegible] त्यर्थः ॥प्रत्यक्षमस्मदादी
नाम॥नाभिरपेक्षमिति ॥ [illegible] एकधा भवति त्रिधा
भवति पंचधा सप्तधानवधापुनश्चैकादशस्मृतः ॥ शतं [illegible] तथास पंचधा सप्तधा दशधा
भवति शतधा च सहस्रधा च [illegible] तं यथा यथेश्वरः कुरुते तथा तथा
भवति सोऽनित्यः परमो [illegible] ॥कत्या भगवताभेदेन मक्ताः प्रतीयत इत्यर्थ

उपाधिनित्यत्वेप्रमाणंचास्तीत्याह ॥ यावदिति ॥ [illegible] बिंबप्रतिबिंबयोरैक्येप्रमाणमित्यतआह॥ अतइति ॥ प्रत्यक्षेण
भेदस्यप्रतीयमानत्वात्प्रतीयमान[illegible] [illegible]ऽपिनविवादोस्तीत्याहवारिस्थमिति ॥ न परस्यमुख्यंसंभवतीत्यतो

यावदात्मभावित्वादित्युपाधिनित्यताभिधानाच्च अतोनन्यवचनंप्रतीयमानस्यौपचारिकम्‌दृष्टाश्चैतंभगवतोभिन्ना
नारदेन पचारिकैः सहपाठेऽपि[illegible]वशादौपचारिकत्वं ब्रह्मज्ञानेनवा मुक्तिरित्यादौदृष्टमिति॥एवं शुकादीनामित्युक्तंप्रत्यक्षमुपपादितम्॥अधुना

ऽस्तांतावदुपपादनसापेक्षप्रत्यक्षंतन्निरपेक्षंचास्तीत्याह॥[illegible]ति ॥ ॥ ० ॥ [illegible] ॥
प्रत्यक्षेणभेदस्यप्रतीयमानत्वादिति ॥ औपचारिकत्वकथनं[illegible] ॥ [illegible] ॥वारिस्थमितिचेति ॥ [illegible]दित्यस्यवारिस्थत्वाभावादितिभावः
ननुसहपाठविरोधइत्यतआह ॥ अनौपचारिकैरिति ॥ [illegible] ब्रह्मज्ञानमत्र[illegible] प्रयागमरणादेः [illegible] रिकत्व[illegible]
णत्वादितिभावः ॥ [illegible] ॥ ॥

अ२पा३अ१९सू१ज्ञस्य उपाधश्च [illegible] आत्मा नित्यः सुखदुःख[illegible] स्मरणं

॥ श्री ० ॥ बलवत्त्वेऽपि किमायातमित्यत आह ॥ बलवदिति॥ भेदवाक्यानां युक्तिमत्त्वेनैव न प्राबल्यं किं नामेत्यत आह ॥ प्रत्यक्षेति॥नारदादिप्रत्यक्षेत्यर्थः॥एकीभाववाक्यस्य का गतिरिति शंकिते जले जलैकीभाववत् मुक्तस्वरूपयोरेकीभाव इत्यनयोरर्थकथनमयुक्तमिति यत आह॥उभयत्रेति ॥ दृष्टान्ते दार्ष्टान्तिके चेत्यर्थः ॥ तद्वादीनि ॥ तत्प्रतिपादकेत्यर्थः॥स्थानैक्यमिति ॥ तथा च यथा जलं जलैनैकीभवतीति वचनं एकस्थानस्थितिनिमित्तमेव मुक्तानामपि भगवदैक्यवचनं श्रीगाब्ध्याद्येकस्थानस्थितत्वनिमित्तं स्थानगतमैक्य स्थानिषूपचर्यत इत्याशय ॥ दृष्टान्तोक्तिरिति॥यथा जले जलैनैकीभवतीति वचनं स्थानैक्यनिमित्तं प्राशणिक मा न रूढलक्षणा तत्र न प्रयोजनं मृग्यते एवं प्रकृतेऽपीति दर्शयितुं दृष्टान्तोक्तिरित्यर्थ. ॥ इयं गति ॥ गतिर्गमकता स्थानैक्यनिमित्तकं त्यागर्थानमित्यर्थं ॥ न्यायेति ॥ लौकिकदृष्टान्तोक्तिरत्र न्याय इत्यर्थ. ॥

तेनिवृत्तसकलकर्माणोमुक्ताः ॥ एतच्चमोक्षधर्मेस्पष्टमुक्तम् ॥ प्राङ्मुक्तस्वरूपभेदस्मृतिरुदाहृता ॥ श्रुतिंचोदाहरति ॥ प्रतिज्ञास्वामिति ॥ ननुभेदवाभेदेपि परब्रह्मसवएकीभवंतीत्यादिवाक्यानिसंतितत्कथंनिर्णयइत्यतः सामान्यन्यायं तावदाह ॥ विरोधेत्विति ॥ बलवद्विरोधेनदुर्बलं बाध्यतेइतिभावः ॥ ततः किं प्रकृतइत्यतआह ॥ युक्तयइति ॥ अत्रभेदपक्षे उपलक्षणमेतत् ॥ प्रत्यक्षानुकूल्यंचभेदवाक्यानांप्राबल्याय

॥ प्रतिज्ञास्वंचसएकधाभवतीत्यादिषुभेदनप्रतीयते ॥ विरोधेतुयुक्तिमतामेवबलवत्त्वम् ॥ युक्तयश्चात्रोक्ताम स्यर्हात्यादयः ॥ अतोजलेजलैकीभाववदेकीभावः ॥ उक्तंच

ग्राह्यम् ॥ तर्ह्येकीभवंतीत्यस्यकागतिरित्यतआह ॥ अतइति ॥ उभयत्रैकीभाववादेन तद्वादिवाक्यंगृह्यते ॥ स्थानैक्यविषयमेकत्ववाक्यमित्यर्थः ॥ इयंचरूढलक्षणेति न प्रयोजनमन्वेषणीयमिति दृष्टान्तोक्तिः ॥ न केवल मियंगतिर्न्यायप्राप्ता किं तु श्रौती चेत्याह ॥ उक्तंचेति॥

॥ कृ०॥ निवृत्तेति ॥ननुनारदस्यभेदप्रत्यक्षमस्तीतिकमानमित्यत आह ॥एतच्चेति॥दर्शनात्यद्भुतमुक्तरूपंशरीरं ... ॥ श्वेतमनाम्नाप्रथितोनिशान्त्यत्यक्त्वा आर्नाद्रयाश्चानशना श्वतत्रनिष्पंदहीनाः सुसुगंधयस्ते ॥ श्वेताः पुमांसोगतसर्वपापाश्चक्षुर्मुषः पापकृतांनराणाम ॥ ... ॥ भक्त्यांशद्भिः ... ॥ ... श्वेतद्वीपंददर्श ॥ तत्रपरमात्मानंभक्त्याजिज्ञासि स्तुवतोऽनेकविशेषणयुक्तान्मुक्तान्श्रद्दधोऽन्यत्यते ॥ तनमुक्तान्भगवान्ब्रह्मलनाराणदक्षान्नगम्यते ॥ नाहंमशक्यो ... इत्युक्तत्वानुपपन्नेतिभावः स्मृतिरुदाहृतेति ॥ इदंज्ञानमुपाश्रित्येत्यत्रनेनाविशेष ॥ प्रकृतवक्तव्यत्वादि परामर्शोऽनन्यमाशंक्य ... ॥ अत्रभेदपक्षइति ॥ ननुत्वंदृश्यविहुलत्वेन प्राबल्यमभिप्रेतम ॥ तच्च नवाक्यबाहुल्येन तथास्त्यैक्यश्रुतीनामपि बाहुल्येनाप्राबल्यानिर्णयायोगात ॥ किंतु भेदग्राहिप्रमाणांतरसाहित्येन ॥ न च युक्तिसाहित्यामात्रान्तो बाहुल्यंसिद्धतीत्यतआह ॥ उपलक्षणमेतदिति ॥ वाक्यगतिकथनावसरेऽधिकोः साम्यवर्णनमयुक्तमित्यत आह ॥ उभयत्रेति ॥ भाष्ये उक्तंचेति ॥ ॥ ॥ ॥ ॥

॥ श्री ० ॥ मुक्ते यथोदकं शुद्धे शुद्ध यथा नद्य इत्यादावित्ति ॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्माभवति गौतमेति काठकवाक्यस्य यथाशुद्धे उदके शुद्धमुदकमासिक्तं तादृगेव तेन संहैकस्थानस्थितमेव भवति न तु तेन ॥ एवं विजानतां मुनीनामात्मा स्वामी हिरण्यगर्भोऽपि मुक्तः सन् तादृगेव भवति किमन्ये मुक्ता इत्यर्थः ॥ यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपेऽविहाय तथा विद्वान नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमित्याथर्वणवाक्यं यथा स्यंदमाना (प्रस्रवन्त्यः) नद्यः स्वकीये नामरूपेऽविहाय अपरित्यज्य समुद्रेऽस्तं अदर्शनं गच्छंति मिश्रीभूयैकस्थानस्थिता भवंति तथा विद्वान षोडशकलाभिमानिदेवतानां नामसहितादूपाद्विमुक्तोऽमुक्तस्तत्सहित एव परात्परं दिव्यं पुरुषमुपैतीत्यर्थ ॥आदिपदात् यथेमाः स्यंदमानाः समुद्रं प्राप्यास्तं गच्छंति भिद्येते नामा नामरूपे समुद्र इत्येवं प्रोच्यते एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंति ॥ भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते इति षट्प्रश्नवाक्यसंग्रहः ॥ अनुपलंभस्येति ॥ समुद्रे तद्भावसाधकस्येत्यर्थः ॥ नदीनां द्वारीति॥ गंगादिनदीनां समुद्रेणसंगमस्थले तु समुद्रप्रवेशात्प्राक् नीरविभागस्य भासमानतया नदीजलानामेव भिन्नतया तत्र वृद्धिर्दृश्यत इत्यर्थः ॥ वृद्धिलिंगकेति ॥ समुद्रोदकादि स्वप्रविष्टनद्युदकाद्भिन्नं वृद्धिमत्वात्यावादिस्थोदकवदित्यनुमानादित्यर्थः ॥

उदकेऽप्यैक्यादसंमतो दृष्टांत इत्यतआह ॥ तत्रापीति ॥ नास्त्येवसमुद्रेवृद्धिरनुपलंभादित्यतआह ॥ अस्तीति ॥ समुद्रेऽपि वृद्धिरितिशेषः

यथोदकंशुद्धेशुद्धं ॥ यथानद्यइत्यादौ ॥ तत्राप्यन्योन्यात्मत्वेवृद्ध्यसंभवः ॥

अस्तिचपत्समुद्रेऽपिद्वारि ॥ महत्वादन्यत्रादृष्टिः

॥ अनुपलंभस्यासिद्धिमाह ॥ द्वारीति ॥ नदीनां द्वारि दृश्यते चेतिशेषः ॥ अन्यत्र कुतो न दृश्यते इत्यत आह ॥ महत्वादिति ॥ सामुद्रस्योदकस्य महत्वात् ॥ न केवलं वृद्धिलिंगादनुमानादुदकभेदःसिद्धःकिंतर्हि

॥कृ०॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेवभवति ॥ एवंमुनेर्विजानत आत्माभवतिगौतमेतिकाठके ॥ यथा नद्यः स्यंदमानाः समुद्रायणाः समुद्रं प्राप्यास्तंगच्छंति नामरूपेऽविहाय ॥तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमित्यत्रचोक्तं चेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१ विनिर्भेदपृथग्भावेइत्यभिधानम् ।. २ षष्ठ प्रश्ने प्रस्रवंत्योनद्यः समुद्रं प्राप्य अदर्शनं गच्छंति अज्ञानां ॥ तासां नामरूपे विविक्ते एव तिष्ठतः समुद्रे इत्येव प्रोच्यते विद्वद्भिः ॥ एवमेव मुक्तस्य जीवस्य कलाभिमानिदेवता मुक्ताः परमपुरुषाश्रिताः संत्यः तंप्राप्य अदर्शनं गच्छंति ॥ तथापि पुरुषे स्थितानामासां कलादेवतानां नामरूपे विविक्ते एवांतेष्ठत इत्येव विद्वद्भिः प्रोच्यत इति श्रुत्यर्थः ॥

॥ श्री० ॥ ननु दानमात्रेण कथं जलभेददर्शन मिद्धिरित्यत आह ॥ भेददर्शन इति ॥ अभेदानिषेधेति ॥ भगवत्सर्वोत्तमत्व प्राप्तेरेव तदभेदरूपत्वादिति भावः ॥ वक्तुम् ॥ बलवा श्चात्यत्र ॥ बहवः पुरुषाः ब्रह्मन्नित्यादिनेति ॥ बहवः पुरुषा ब्रह्मन् [illegible] एव तु ॥ [illegible] को ह्यत्र पुरुषः श्रेष्ठः स्तंमवान् वक्तुमर्हतीति जनमेजयप्रश्ने नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वहेति पुरुषैक्यपक्षं निषिध्य बहुत्व[illegible] नव [illegible] बहूनां पुरुषाणां हि यथैकात्म्यं निरूप्यते ॥ तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमिति वैशं पायनेन प्रतिज्ञायोक्तत्वादित्यर्थः ॥

प्रत्यक्षादपीत्याह ॥ ताइति ॥ [illegible] इति महाकोर्मवचनात्समर्थानां वसिष्ठादीनां जले भेददर्शनाच्च ॥ भेददर्शने [illegible] कथं [illegible] ॥ [illegible] प्रबलम् ॥ अभेदनिषेधात्मकत्वादित्याह ॥ नैवे

ताएवोपाददेतस्यम [illegible] माहाकौर्मे ॥ समर्थानां भेदज्ञानाच्च ॥ नैवतत्प्राप्नुवं

त्येतेब्रह्मेशानादयःसुराः ॥ यत्तेपदंसकैवल्यमितिनिषेधाच्चनारदीये ॥ सविचारश्चनिर्णयः

ति ॥ कैवल्यं सर्वोत्तमत्वम् ॥ [illegible] ॥ [illegible] ॥ पूर्वोत्तरपक्षबलाबलचिंताविचारः ॥ निर्णयोजीवेशभेदा वधारणम् ॥ बहवःपुरुषा ब्रह्मन्नित्यादिनेति शेषः ॥

॥ टि० ॥ इतश्चेति ॥ अपवादरूपत्वाच्चेत्यर्थः ॥ [illegible] शब्दः ॥ नैवतत्प्राप्नुवंतीति वाक्यं [illegible] ब्रह्मादीनां सर्वोत्तमत्वप्राप्तिनिषेधकं तत्रैव तत्प्रसक्तेः ॥ ब्रह्मादीनां समष्टिजीवत्वेन परमेत्र्मुक्तत्वाच्चेति भावेनाह [illegible] ॥ [illegible] ॥ परेऽव्ययइत्यस्यमुक्तांवेक्य प्रतिपादकत्वेन तत्रैव भेदप्रतिपादकस्य [illegible] निषेधकत्वेन विषयकत्वाभावादित्यत आह ॥ अभेदनिषेधात्मकत्वादिति ॥ [illegible] ॥ अपवादत्वेनात्रप्राब ल्यसाधनात ॥ ननु मुक्तः [illegible] विशेषणादीश्वरस्वरूपभूतं मो क्षंनप्राप्नुवंतीत्यर्थइति वाच्यम ॥ न [illegible] ॥ तथापि कथमभेदनिषेधात्मकत्वलाभः ॥ इत्यत ॥ अ अभेदो नाम तादात्म्यं तच्च ॥ [illegible] ॥ [illegible] भेदप्रतिपादकत्वेन बहव इत्यादिवक्ष्यमाणवाक्यस्य निरवकाशत्वं [illegible] निर्णयःकृत इत्यनेनविचारःकृत इत्युच्यते ॥ विचारश्च युक्त्यनुसंधानम् ॥ [illegible] आह ॥ पूर्वोत्तरेति ॥ [illegible] प्रकृतानुपयोगादाह ॥ निर्णय इति ॥ ॥ ॥

॥ श्री ० ॥ ननु बहव इत्यादिमविचारनिर्णयेन संसारभेदसिद्धावपि न मुक्तौ भेदसिद्धिरित्यत आह ॥ न हीति ॥ यथोक्तमनुव्याख्याने ॥ नहि भिन्नमभिन्नतां ॥ गच्छेददृष्टं कचिदिति॥ यतो न दृष्टं यद्भून्न पूर्वं पश्चात्तदा[illegible]मिति कुतश्च किंचिदिति च यत्रेत्यादीति॥यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति श्रुत्यर्थो यत्र मुक्तिरूपतुरीयावस्थायां यः स्वान्य न्न पश्यतीत्यादिस्वभिन्नस्याभावादेव स भूमा तन्निर्गुणं ब्रह्मेति भूमनाम्नो निर्गुणब्रह्मणो [illegible] कथमानमनुपपन्नं स्यात् यदि मुक्ता ब्रह्मणो भिन्नाः स्युरित्यर्थः ॥ ननु भगवद न्यस्यैवाभावात् ॥ कस्य तदधीनसत्तादिवाचि स्यादित्यत उक्तम ॥ विद्यमानस्येति ॥ [illegible] सतोऽपि [illegible] ॥ नन [illegible] सकाशात ॥ भूमप्रकरण एवेति ॥ यत्र नान्यदित्यादिना [illegible] भूम्नो महिमानमुक्त्वा तज्ज्ञानिनः [illegible] पश्यत एव [illegible] इत्यादिना प्राणाद्युपासनारूपं फलमुक्त्वा तत्र तदेव [illegible] संमार्ति चोक्त्वा पुनर्भूमज्ञानिन एव स एकधेत्यादिफलकथ्यते । न ह्यत्र प्रकरणे [illegible] इत्यर्थः ॥ ॥ ॥ ॥ ॥

न हि भिन्नयोर्मुक्तावभेदः संभवतीति भावः ॥ ततः किमित्यत आह ॥ बलवानिति ॥ निर्णयश्चेति संबंधः ॥ वाक्यमात्रादेकीभवंतीत्या देः ॥ कथं तर्हि यत्रेत्यादि भूमलक्षणमुच्यते इत्यत आह ॥ अत इति ॥ सविचारनिर्णयविरोधादेव ॥ विद्यमानस्याप्यन्यस्य भगवधीनसत्ता दित्ववाचि ॥ इतश्चैवमित्याह ॥ अन्यथेति॥ यद्यन्यदेव न स्यात्तर्हि कथमीश्वरस्य सर्वेश्वरत्वसार्वज्ञादिकं श्रुत्यादिसिद्धं स्यात् ॥ मायामय

कृतोमोक्षधर्मेपुबलावांश्चसविचारोनिर्णयोवाक्यमात्रात् ॥ अतोयत्रनान्यत्पश्यतीत्याद्यपितदधीनसत्ता दिवाचि॥अन्यथाकथमैश्वर्यादिस्यात्॥न च तन्मायामयामित्युक्तम्॥अन्यथाकथंतत्रैवसएकधेत्यादिब्रूयात्

मेवतच्छ्रुत्यादावुच्यते इत्यत आह ॥ नचेति ॥ बाधकांतरमाह॥ अन्यथेति ॥ यदि भूमाद्वितीयःस्यात् ॥ कथंतर्हि त ज्ज्ञानान्मुक्तस्य स एकधेत्यादिभेदेनावस्थानं श्रुतिर्ब्रूयात् ॥ न तद्भूमज्ञानफलम् ॥ किंतु सगुणविद्योपासनफलमित्यत उक्तम् ॥ तत्रैवेति ॥ भूमप्रकरण एव

॥ क ० ॥ बहवःपुरुषाइत्यादिनेति॥बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ॥ को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति ॥ वैशंपायन उवाच ॥ नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह ॥ बहूनां पुरुषाणां हि यथैकायोनिरुच्यते॥ तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमित्यादिनेत्यर्थः ॥ ननु बहव पुरुषा इत्यादेः संसार एव भेदप्रतिपादकत्वान्मुक्तौ किमायात मित्यत आह ॥ न हि भिन्नयोरिति ॥कथं तर्हीति ॥ यदि भेदपक्षस्य प्रबलत्वान्मुक्तस्य ब्रह्माभिन्नत्वं तर्हि यत्रेत्यादिना भूम्नोऽद्वितीयत्वं यल्लक्षणमुक्तं तत्कथमुपपन्नं स्यात् ॥ मुक्त जीवेन सह द्वितीयत्वप्राप्तिरसंभवप्रसंगादित्यर्थः ॥ भगवदधीनेति ॥ यदधीनं विना नान्यत्किंचिदस्ति कथंचन ॥ स भूमोक्तोऽतिपूर्णत्वादिति प्रमाणेनैव श्रुतिव्याख्यानादिति भावः ॥ स एकधेत्यादीति ॥ स एकधा भवति त्रिधा भवतीत्यादौ तावन्मुक्तस्यानेकरूपत्वमुच्यते ॥ तत्र विशेषबलेन त्वन्मते न निर्वोढुं शक्यम् ॥ निर्विशेषब्रह्माभिन्नत्वात् ॥ नाप्यविद्याबलेन निवृत्तत्वात्तस्याः किं तु ब्रह्मभेदमंगीकृत्यविशेषबलेनैव तन्निर्वाह्यम ॥ तथा च भेदेनावस्थानं श्रुतिस्तात्पर्यतः कथं ब्रूयादित्यर्थः ॥ ॥ ॥

॥ श्री ० ॥ श्रुतिविरोध इति ॥ सशरीरत्वेप्रियाप्रियोपहतिर्नियता न ह वै सशरीरस्येत्यादिश्रुते प्रियाप्रियोपहतिमतां च मुक्तत्वंविरुद्धमित्यर्थः ॥ ननु मास्तु मुक्तशरीराणां भौतिकत्वं प्राकृतत्वं किं नस्यादित्यत आह ॥ अजडानीति ॥ ननु षोडशकलात्मकलिंगशरीरस्य नष्टत्वात् मुक्तानां शरीरं षोडशकलया जायत इति कथमुक्तमित्यत आह ॥ नित्योपाधिरेवेति ॥ स्वरूपोपाधिरित्यर्थः ॥ भाष्ये तेषां स्वरूपं जायते व्यज्यत इत्यर्थः ॥ संसारे लिंगशरीरावृतत्वात् जीवस्वरूपमल्पं तेजो ह्यल्पपरिमाणमवतिष्ठते मुक्तौ तु तदभावे ईश्वरः स्वशक्त्या विशेषबलात्तदेव महत्करोति कार्यमिवत ॥ यथोक्तंबृहद्भाष्ये ॥ अल्पतेजस्त्वथैवाल्पं जीवरूपं हि संसृतौ ॥ तदेव सुमहत्तेजः करोतीशो महत्तदेति ॥ नेति नात्रानुपपत्तिरिति संप्रदायविद ॥दुःखानपहति वचनं॥दुःखत्ववचनमित्यर्थ ॥ननु नारदेन दृष्टानि चिन्मयानीति कुत ॥भावं जैमिनिर्विकल्पाम्नानात् इति सूत्रे स्वेच्छया वा शरीराणि तेजोरूपाणि कानि चित्॥

॥ ननु नारदेन श्वेतद्वीपे भगवता भिन्ना दृष्टास्ते मुक्ता एव न भवंति ॥ सशरीरत्वात् ॥ सशरीराणामपि मुक्तत्वांगीकारे न हवै सशरीरस्य सतःप्रियाप्रिययोरपहतिरस्तीत्यादिश्रुतिविरोधइत्यत आह ॥ नचेति ॥ कुतोनेत्यत आह ॥ वैलक्षण्यादिति ॥ किंतदस्मदादिशरीरेभ्य

॥ न च न ह वै सशरीरस्येत्यादिविरोधः ॥ वैलक्षण्यात्तच्छरीराणाम् ॥ अभौतिकानि हि तानि ॥ नित्योपाधिविनिर्मितानि ईश्वरशक्त्या ॥ तथाचोक्तम् ॥ तेषां वैलक्षण्यमित्यत आह ॥ अभौतिकानीति ॥ अजडानीत्यर्थः ॥

तर्हि किमात्मकानीत्यत आह॥नित्योपाधीनि॥ विकारित्वाद्विनाशःस्यादित्यत उक्तम् ॥ ईश्वरशक्त्येति॥कुतएतदित्यत आह ॥ तथाचेति॥ नित्योपाधिरेव षोडशीकला ॥ एतदुक्तं भवति ॥ यच्छ्रुतौ सशरीरस्यदुःखानपहातिवचनम् ॥ तत्कर्माधीनजडशरीराभिप्रायम् ॥ ॥

॥ कृ ० ॥ भौतिकत्वाभावेपि प्राकृतत्वं किं न स्यादित्यत आह ॥ अजडानीत्यर्थइति ॥ ईश्वरशक्त्येतीति॥ नित्योपाधिविनिर्मितत्वेन विकारित्वेऽपीश्वरशक्त्या विनाशाभाव इत्यर्थः ॥ न च प्राग्णोर्जीवस्य मुक्तावप्यणुत्वात्कथं जीवस्वरूपस्य मुक्तौ विनिर्मितत्वोक्तिरिति वाच्यम ॥ अणुस्वरूपस्यापि जीवस्य मुक्तौ महत्वेन विनिर्मितत्वसंभवात ॥ न चात्र प्रमाणाभावः ॥ शरीरं जायतइत्यस्यैव तथात्वात ॥ एवं तर्हि प्रागेव निराकारस्य जीवस्य देहाकारेण निर्माणमत्रोच्यते ॥ इत्यस्तु महत्वेन निर्मितत्वं कुत इति चेन ॥ अकृतिमत्वात्तस्यांऽहस्थानपरमादिति न्यायविवरणरीत्या प्रागपि देहाकारस्यावश्यवक्तव्यत्वात ॥ अल्पतेजस्त्वथैवाल्पं जीवरूपं हि संसृतौ ॥तदेव सुमहत्तेजः करोति भगवान्महदिति ॥ स्पष्टप्रमाणाच्च ॥महत्वेन ॥ विनिर्मितत्वं गम्यते ॥ अत्र सुमहत्तेज इति तेजसो महत्वमुक्त्वा पुनर्महदित्युक्त्या परिमाणतोपि महत्वावगमातिदि ॥ ननु नित्योपाधिनिर्मितत्वे कथमिय स्मृतिः प्रमाणम् ॥ अत्र षोडशकलानिर्मितत्वोक्तेरित्यत आह ॥ नित्योपाधिरेवेति ॥ जीवस्वरूपमेवेत्यर्थ ॥ ॥ ॥ ॥ ॥

१अ.४.पा४.अ.८सू.२कदाचिद्भोगार्थं मुक्तानां चिन्मात्रदेहान्यप्राकृतदेहमत्वं जैमिनिर्मन्यते॥चितावाऽनितोवति श्रुतौ विकल्पाम्नानात् दर्शितदर्थः ॥ २बृहद्भाष्ये अ.६ शारीरब्राह्मणे

॥ श्री ० ॥ स्वीकृत्य नागग्निवद्युत्कात्याग: कथंचनेति प्रमाणे च मुक्तानां चिच्छरीरव्यतिरिक्तजडशरीरग्रहणस्याप्युक्तेर्जडशरीराण्येव दृष्टानीति किं न स्यादित्यत आह ॥ जडान्यपीति ॥ न दुःखकारणानीति ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिण: ॥ भुंजते सुसुखान्येव न दुःखादीन् कदाचनातीर्णा हि सर्वशोकान्सपुण्यपापादिवर्जिता इत्यादिवचनादिति भाव:॥ ननु स द्धर्मभूताया: निरुक्ते:प्रसिद्धशरीरेष्वप्यभावात् किं विशिष्योच्यते मुक्तशरीरेषु निरुक्त्यभावान्नतानि शरीराणीत्यत उक्तम ॥ निरुक्तिलभ्यार्थस्येति ॥ प्रक्रियासंपादनेति ॥ शृ हिंसायामित्यस्मादौणादिके ईरन्प्रत्यये नकारलोपे ऋवर्णस्य गुणे तस्य च रपरत्वेशरीरमिति भवतीत्यौणादिकप्रक्रियाकल्पनेत्यर्थ: ॥ तत्परं शरीरशद्बनिरुक्तिपरं ॥ तच्छरीरशद्बामिति॥

श्वेतद्वीपे नारदेन दृष्टानि तु शरीराणि चिन्मयानिजडान्यपिनकर्माधीनानि ॥ अतो न दुःखकारणानि ॥ तथा च न तेषांशरीराणामपि मुक्तत्वे श्रुतिविरोधइति ॥ यदि मुक्ता:सशरीरास्तर्हि कथं तेषु अशरीरंवा वसंतं नप्रियाप्रिये स्पृशत इति शरीराभाववचनमित्यत आह॥वदंतिचेति ॥

शरीरंजायतेतेषांषोडश्याकलयैवहि इतिनारायणरामकल्पे ॥ वदंतिचलौकिकाद्वैलक्षण्येऽभावशब्दमप्रहर्षमना नंदंसुखदुःखवाह्यइत्यादिषु ॥ निरुक्त्यभावाच्चनतानिशरीराणि ॥तथा हि श्रुति:॥अशारीतोऽतच्छरीरमभवत् ॥

लौकिकाद्वैलक्षण्ये सति तद्वदत्रापीतिशेष: ॥ इतश्चाशरीरत्वोक्तिर्युक्तेत्याह ॥ निरुक्तीति ॥ निरुक्तिलभ्यार्थस्य तत्राभावादित्यर्थ: ॥ काऽसौ निरुक्तिरित्यत: प्रक्रियासंपादनगौरवपरिहाराय श्रुतिमेव तत्परां दर्शयति ॥ तथाहीति ॥अशारि शीर्णभवदितिहेतोस्तच्छरीरशद्बमभवदित्यर्थ:

॥ कृ ० ॥ योयमेवंवित्पुरुषस्तस्य वित्तमेव पंचदशकलास्यैवास्य षोडशीकलेति बृहदारण्यकोक्तरीत्या जीवस्वरूपदेहस्य षोडकलात्वमवभातव्यम् ॥ न च ध्रुवतदेहउच्यत इति ॥ तद्बाध्येजडदेहस्य षोडशकलात्वोक्तिविरोधइति वाच्यम् ॥ चंद्रसंबंधिध्रुवकलासाम्यान्नयन्यथाऽनुपपत्त्या देहपदेन चिन्मयदेहस्यैवग्राह्यत्वात ॥ जडदेहस्य विनाशित्वेन ध्रुवत्वायोगा दिति दिक् ॥ चिन्मयानीति ॥ मोक्षधर्मेनारदृष्टमुक्तेषु अनिंद्रियाश्चानशनाश्चेत्यादिना शरीराद्यभावमुक्त्वा तत्रास्थिकाद्या इत्यनेन पुनस्तदन्यथानुपपत्तेरिति भाव: ॥ ननु यदि नि रुक्त्यभावात्तान्यशरीराणि तर्हि संप्रतिपन्नान्यपि तथा स्यु:निरुक्ते:सद्धर्मत्वेनोभयत्र तदभावाविशेषादित्यत आह ॥ निरुक्तिलभ्येति ॥ प्रक्रियासंपादनेति ॥ औणादिकप्रत्ययादि कल्पनेत्यर्थ: ॥ शरीरशद्बामिति ॥ बहुव्रीहिरयम ॥ शरीरशद्बवाच्यमित्यर्थ: ॥ ॥ ॥ ॥ ॥

॥ श्री ० ॥ तत्र शीर्णं वस्तु शरीरशब्दवाच्यमभवदित्यर्थः ॥ अयंलोकविलक्षणदेहसद्भावः ॥ ननु प्रयोगादित्यनेनप्रमाणमुक्तमित्यत उक्तम ॥ अन्यथाऽनुपपत्त्येति ॥ दृष्टदेहेष्वित्युक्त्या देहवत्त्वं प्रत्यक्षसिद्धमित्युक्तम ॥ अनिंद्रिया इत्यादिवाक्यद्वये च देहाभाव उच्यते तथा च प्रत्यक्षशब्दाख्यप्रमाणद्वयाविरोधस्यलोकविलक्षणदेहाकल्पनेऽनुपपत्तेर्लोकविलक्षणोदेहोऽस्तीत्ययमर्थः सिद्ध इत्यन्यथानुपपत्तिरूपं प्रमाणमनेनोक्तमित्यर्थः ॥ चशब्दार्थमाह ॥ नकेवलमिति ॥ प्रत्यक्षविरोधः ॥ भेदग्राहिनारदप्रत्यक्षविरोधः ॥अत्रैव ॥ राजसूयादिस्थल एव ॥ दृष्टा भवद्भिर्ननुराजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिरित्यादिवचनादित्यर्थः ॥ मूले पश्चादिति ॥ सर्वेऽपि लिंगभंगानंतरं प्रलये भगवदुदरे स्थित्वा पश्चात् सृष्टौ श्वेतद्वीपाभिमानि तत्रत्यं नारायणं दृष्ट्वा तदनंतरंमुच्यंते इच्छावरकान्मुक्ताः सतः संपूर्णानंदव्यक्तिप्राप्नुवंतीत्यर्थः॥इत्यनुक्तेति ॥ ॥ क ० ॥ नारदादिभिरिति ॥देहेंद्रियेति सप्तमस्कंधवाक्यस्य

कथं निरुक्तिलभ्योऽर्थस्तेषु नास्तीत्यतआह॥नहीति॥एवंतर्हि कथं तेषु शरीरंजायते तेषामिति शरीरशब्दप्रयोग इत्यतआह॥साम्यादिति॥ अस्मदादिशरीरैःकरचरणादिमत्त्वसाम्यात्प्राण इत्यर्थः॥कुतोऽयमशरीरशब्दस्याभिप्रायः॥सर्वथाविग्रहराहित्यमेवाकिन्नस्यादित्यत आह॥प्रयोगाच्चेति॥नारदादिभिर्दृष्टदेहेष्वेवमुक्तेष्वेतद्वाक्यद्वये देहाभावप्रयोगादन्यथाऽनुपपत्त्याऽयमर्थःसिद्धः॥नकेवलंसंभवमात्रेणेति चार्थः॥इत्यादीतिक्रियाविशेषणम्॥प्रयोगादित्यनेन संबध्यते॥संतु नारदेनदृष्टाःश्वेतद्वीपवासिनो मुक्ताः॥तथाऽपि नास्माकं प्रत्यक्षविरोधः॥एतएषांश्वेतद्वीपप्राप्तिरूपा निर्गुणमुक्तेरन्यागौ

नहितानिशीर्णानिभवंति॥सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिचेतिवचनात्॥साम्यात्प्रयोगः ॥ प्रयोगाच्च॥अनिंद्रिया अनाहारा अनिष्पंदाःसुगंधिनः॥देहेंद्रियासुहीनानां वैकुंठपुरवासिनामित्यादिदृष्टदेहेष्वेव॥नचैषाऽन्यागौणी मुक्तिः॥बहुनात्र किमुक्तेनयावच्छ्वेतं नगच्छति॥योगीतावन्नमुक्तःस्यादेषशास्त्रस्यनिर्णयइत्यादित्यपुराणे॥तदन्यमुक्तिनिषेधात्॥येत्वत्रैवभगवंतंविशंतितेऽपिपश्चात्तत्रैवयांति॥णी मुक्तिः॥निर्गुणायामेवमुक्तौ वयमैक्यं ब्रूम इत्यतआह॥नचेति॥

श्वेतद्वीपप्राप्तिव्यतिरिक्तमुक्तिनिषेधादियमेवमुक्तिरित्यर्थः ॥ ननुशिशुपालादयःश्वेतद्वीपगमनेन विनैवात्र भगवंतं प्रविश्य मुच्यंते तत्कथमेतदित्यतआह ॥येत्विति ॥ते न तदा मुच्यंते इति शेषः ॥तर्हि कदेत्यत आह तेऽपीति ततो मुच्यंत इतिशेषः ॥ननुकेचिदत्रैव मुच्यंत इत्याद्युक्ता॥

युधिष्ठिरवाक्यत्वात्तत्संग्रहायादिपदम ॥ इत्यादीनि भाष्योक्तादिपदसंगृहीतवाक्यांतरदृष्टसंग्रहाय नारदादिभिरितिबहुवचनमिति बोध्यम् ननु दृष्टदेहेष्विति देहविषयकप्रत्यक्षमुक्ताप्रयोगादित्यनेन देहाभावप्रमाणोक्ते व्याघात इत्यत आह॥ अन्यथानुपपत्त्येति ॥ प्रमाणद्वयविरोधरूपार्थापत्त्येत्यर्थः ॥ ततो मुच्यंत इति शेष इति ॥ इच्छावरकान्मुच्यंत इत्यर्थः॥

१ मोक्षधर्मवाक्यम् ॥ २ ॥ भागवतवाक्यम् ॥

॥ श्री ० ॥ केचिदत्रैव मुच्यंतेनोत्क्रामंति कदाचन ॥ अत्र च स्थितिस्तेषां अंतरिक्षे च केत्र न ॥ केचित्स्वर्गे महर्लोके जने तपसिचापरे ॥ केचित्सत्ये इत्युक्तेत्यर्थः॥अयं नियम इति ॥ तेऽपि पश्चात्तत्र यांतीति सर्वेषां श्वेतद्वीपप्राप्तिनियमइत्यर्थ ॥ अत्र ॥ श्वेतद्वीपे ॥ नन्वनेन शंकैव दृढीकृतास्यात न तत्परिहार इत्यत आह ॥ निवास इति शेष इति अत्रैव च स्थितिस्तेषामिति निवासस्य प्रकृतत्वादिति भाव ॥ अत्रानवासे श्वेतद्वीपनिवासे ॥ यथाक्रम ॥ श्वेतद्वीपं ततो गत्वा दृष्ट्वा विष्णु च ते ततः ॥ अनुज्ञाताः प्रमोदंते निर्वृत्तास्तु भरादिष्वितिनत्यनंतरमन्यैति शेषं. मूले युधिष्ठिरेति ॥ सगुणमुक्तितरनिर्गुणमुक्ते प्रश्नसमये युधिष्ठिरेण सम्प्रस्यहीत्यादिना निंदनादित्यर्थः ॥ आत्मनः ॥ मुक्तनात्मस्य॥ सायुज्यशब्देनेति सयुजां भाव सायुज्यमितिसायुज्यशब्दात्तद्व एव ज्ञायत इति भाव ॥ ॥ ॥ ॥ ॥ ॥

महाज्ञाना गच्छंति क्षीरसागरमिति महायोग्यतावतामेव श्वेतद्वीपगमनोक्तेः कथमयं नियम इत्यत आह ॥ योग्यत्वमिति ॥ अत्र निवास इति शेषः ॥ अस्तिसर्वेषां श्वेतद्वीपप्राप्तिः ॥ महाज्ञानत्वलक्षणंयोग्यत्वं त्वत्रनिवासेविवक्षितमित्यर्थः ॥ नन्विदंवाक्यंश्वेतद्वीपप्राप्तिं विना

योग्यत्वं चात्र विवक्षितम् ॥ युधिष्ठिरप्रश्ने इतरनिंदनाच्च ॥ सायुज्यं च ग्रहवत् ॥ तदुक्तेश्च ॥ ॥ ॥

गुणमुक्तिर्नास्तीत्येतन्परम् ॥ निर्गुणमुक्तिस्त्वन्याऽस्तीत्यत आह ॥ युधिष्ठिरेति ॥ सायुज्यं तावत्प्रसिद्धम् सैव निर्गुणमुक्तिः ॥ तत्रात्मनो ब्रह्मणैकत्वमित्यत आह ॥ सायुज्यं चेति ॥ यथा ग्रहस्य पुरुषांतरं प्रविश्य भोगः ॥तथा मुक्तस्येश्वरं प्रविश्य भोगएव सायुज्यं न त्वैक्य मित्यर्थः ॥ कुत एतत ॥ सायुज्यशब्दसामर्थ्यादागमवाक्याच्चेत्याह ॥ तदुक्तेश्चेति ॥ ॥ ॥ ॥ ॥

॥क्र०॥निवास इति शेष इति॥अत्रैव च स्थितिस्तेषामिति निवासस्यप्रकृतत्वादिति भाव.॥**महाज्ञानत्वलक्षणमिति**॥नित्यं किंचिदधिकं मुहूर्तकाले यद्भगवद्द्रूपापरोक्ष्यं तद्भत्वमित्यर्थः॥न दुक्तमेकादशस्कंधतात्पर्ये ॥ नि यशो भगवद्रूपस्यापरोक्ष्येण दर्शनम ॥ मुहूर्तमात्रं ज्ञानं स्यान्महाज्ञानं ततोधिकमिति ॥ **सायुज्यशब्दसामर्थ्यादिति** ॥ सह युंजंतीति सयुजःयुजियोग इत्यतः सत्सूद्विषेत्यादिना क्विप् ॥ सहस्य स संज्ञायामिति सहशब्दस्य सादेशः सयुजां भावःसायुज्यम तथा च सायुज्यशब्दात्सहयोगमात्रलाभेऽपि सहयोगः केन कुत्रेत्याकांक्षायां सायुज्य बाधकपुराणवलादीश्वरेण सह तद्देहेयोगइति लभ्यतइति भावेन सामर्थ्यादित्युक्तम ननु सालोक्यादिमुक्तेरपि. जीवन्मुक्त्यपेक्षयोत्तमत्वात्तमत च ग्रहवद्भोगाभावाद्बाध इत्यतो व्याचष्टे ॥

१ एतेनटीकायां निर्गुण मुक्तिस्त्वन्यास्तीतिपाठो नास्तीति भाति

॥ श्री० ॥ बाह्यान् भोगान् भुंजते इत्युक्त्या तरतमभावं विहाय ब्रह्मादिदेवतासाम्येन समस्तबाह्यविषयभोगानां प्राप्तिरित्याह ॥ बाह्येष्वपीति ॥ भुंजते पुरुषं प्राप्य यथा देवग्रहादयः ॥ तथा मुक्तावुत्तमायां विष्णुमाविश्य भुंजते विष्णोर्विशाश्चते सर्वे सर्वदा दुःखवर्जिता ॥ न तु विष्णुगुणान् सर्वे भुंजते ते कदा चन ॥ बाह्यान् भोगान् भुंजते च तारतम्येन कांश्चन ॥ विष्णोर्देहाद्बहिश्चापि निर्गच्छंति यथेष्टत इत्येतरेयोपनिषद्भाष्योदाहृतस्कांदपुराणरूपाद्वचनांतरात् बाह्यान् कांश्चिदेव भोगान् तरतमभावेन भुंजत इति विभागोऽवसेय इत्यर्थः ॥ विशेषेणेति ॥ तादृशानिष्टवियोग एतादृशानिष्टेनेति विशेषवचनाभावादित्यर्थः ॥ ननु मोऽस्त्येव सर्वात्मनेति सोऽनिष्टवियोगोऽपरोक्षज्ञानेनोच्यते तथा सुकृतमप्यप्रियमित्यप्रियसुकृतहानं च ॥ अस्य च हिरण्यगर्भेतरमुक्तेषु संभवेऽपि हिरण्यगर्भे कथमिदं युज्यते अपरोक्षज्ञानेन क्षीयमाणस्य प्रारब्धपापस्य तस्मिन्नसंभवात् अनिष्टफलस्य सुकृतस्य चाभावात् ॥ न कर्हिचिन्मे मनसो मृषा गतिरिति भागवते चतुर्मुखवचनादिति चेत्सत्यम् ॥ हिरण्यगर्भेतररुद्रादिसमस्तजनविषयत्वमस्यैवांगीकारात् तदर्थपाकानन्तमित्यादिश्रुतिरपि तदितरविषयैवेति संप्रदायविदः ॥ एतानि वाक्यानीति ॥

उत्तमायां मुक्तौ सायुज्यलक्षणायामीश्वरं प्रविश्येति शेषः ॥ ईश्वरानंदव्युदासाय बाह्यानितीति ॥ बाह्येष्वपि विभागो वचनांतरादवसेयः सुकृतमप्यप्रियमित्यादिनोक्तमर्थमुपसंहरति ॥ अत इति ॥ यथा सुकृतत्यागे संकोचस्तथाऽनिष्टत्यागेऽप्यस्तिकिमिति जिज्ञासायामाह ॥ स

भुंजते पुरुषं प्राप्य यथा देवग्रहादयः ॥ तथा मुक्तावुत्तमायां बाह्यान्भोगांस्तु भुंजते इति नारायणाष्टाक्षरकल्पे ॥ अतोऽनिष्टस्यैववियोगः सोऽस्त्येव सर्वात्मना ॥ अदुःखम् ॥ सर्वदुःखविवर्जिताः अशोकमहिमम् ॥ यत्र गत्वा न शोचतीत्यादिभ्यः ॥ विशेषवचनाभावाच्च ॥ येषांत्वीपद्दृश्यते न सायुज्यं प्राप्ताः ॥

इति ॥ प्राचुर्याभिप्रायाण्येतानि वचनानि किन्न स्युरित्यत आह ॥ विशेषेति ॥ संकर्षणादयः समष्टि जीवास्तावन्मुक्ताः ॥ तेषां च वललक्ष्मणादिरूपेषु दुःखं दृश्यते तदेवविशेषप्रमाणमित्यत आह ॥ येषामिति ॥ न सायुज्यं प्राप्ताः ॥ न मुक्ता इत्यर्थः ॥ ॥

॥ कृ० ॥ सायुज्यलक्षणायामिति ॥ अवश्यविशेषानुपादानादुत्तममुक्तिशब्देन सर्वमुक्तगुत्तमग्रहणेन सायुज्यस्यैव ग्रहणमिति भावः ॥ ननु जगद्व्यापारस्यापि बाह्यत्वान्मुक्तानां च तद्योगाभावात्कथं बाह्यानित्युक्तमित्यत आह ॥ बाह्येष्वपि विभाग इति ॥ न मुक्तस्य सर्वबाह्यार्थभोगः किंतु जगद्व्यापारादिभिन्नविषयभोग इति विभाग इत्यर्थः ॥ तथा च जगद्व्यापाराद्यभोगस्य प्रमितत्वात् बाह्यानित्यस्य तद्व्यतिरिक्तबाह्यभोगपरत्वं वर्णनीयमिति भावः ॥ वचनांतरादिति ॥ सयुजः परमात्मानं प्रविश्य च बहिर्गताः ॥ चिद्रानन्दाकृतांश्चापि विना भोगांस्तु कांश्चनेति वचनांतरादित्यर्थः ॥ कांश्चन विनेत्यस्य जगद्व्यापारादीन्विनेत्यर्थकत्वात्प्रकृतसिद्धिरिति ध्येयम् ॥ संकर्षणादीनां मुक्तत्वं कुत इत्यत उक्तम् ॥ समष्टिजीवा इति ॥ एतेनापरोक्षज्ञानिन इत्यर्थः ॥ यथोक्तं संकर्षेण ॥ समष्टिदृष्टचात्वेकत्वव्यष्टिदृष्टचात्वनेकतेति ॥ यदप्युक्तरूपं समष्टित्वं ब्रह्मादेरप्यस्तीति ब्रह्मादय इति वक्तुमुचितमिति ॥ तथाप्यग्निमप्रमाणानुसारेण संकर्षणादय इत्युक्तम् ॥ ननु माभूत्सायुज्यं तथापि मुक्तत्वात्सायुक्तदोषतादवस्थमित्यत आह ॥ न मुक्ता इत्यर्थ इति ॥ ॥ ॥ ॥

॥ श्री ० ॥ अदुःखमित्यादीनीत्यर्थः ॥ भगवत्समीपवर्तिनो जीवाः समिष्टिजीवा इत्याद् तेषाम् मुक्तसंकर्षणादीनामित्यर्थः ॥ ननु सायुज्यभावे कथं मुक्त्यभावः ॥ सामीप्यादिमुक्तिसं भवादित्यत आह ॥ **सायुज्ययोग्या नामिति** ॥ **बीजमिति** तथा च सामीप्यरूपमुक्तिसाम्येन तेषां मुक्तत्वोक्तिरौपचारिकीति भावः अत इत्यस्यार्थः दुःखदर्शनादिति॥ **तत्किमिति**॥ येन तावन्मात्रोपसंहार एवयुक्तःस्यादिति भावः ॥ **अनुमानेनेति** ॥ मोक्षो न दुःखनिवृत्तिमात्ररूप इ स्वर्गादिभिरपि ब्रह्मादिभिः प्रार्थ्यमानत्वात ॥ यद्यस्य सिद्धं न तत्तेन प्रार्थ्यते यथा भुक्तवता भोजनमित्यनुमानमिह द्रष्टव्यम ॥ न चाप्रयोजकोहेतुः ॥ सिद्धस्य प्रार्थनीयत्वशंकाया व्याहतत्वात ॥ नच विशेषणासिद्धिः ॥ ब्रह्मादिनिगभिमानित्वाच्छरीर्यप्यरीरत्वात ॥दुःखा संपीडितत्वात्तु मध्यमो वायुरुच्यते इत्यादिप्रमाणेन दुःखाभावसिद्धेः ॥ न च विवक्षितार्थासिद्धिः ॥ दुःखनिवृत्तिमात्रत्वाभावे सिद्धेऽर्थात्सुखरूपत्वस्यैवसिद्धेरिति भावः ॥ परब्रह्मत्वमिच्छा मीत्यैक्येच्छोक्तेर्व्याचष्टे ॥ **मुक्तत्वमिति** ॥ परब्रह्माणि मुक्तिगा इत्यादिवचनादितिभाव ॥ ॥ ॥ ॥ ॥

सायुज्ययोग्यानां तदभावे मुक्त्यभावात् ॥ तेषां मुक्तत्वोक्तिस्तर्हिकागतिरित्यत आह ॥सामीप्यादीति ॥ मुक्तत्वोक्तौ बीजमिति शेषः ॥कुतस्ते न मुक्ता इत्यतआह ॥ अत इति ॥ दुःखदर्शनात्तद्धेतुभूतप्रारब्धकर्मभावात्न मुक्ताः ॥ कदा तर्हि मुच्यंत इत्यत आह ॥ तदिति ॥ अत्रागम

सामिप्याद्येव तेषाम् ॥ अतःप्रारब्धकर्मशेषभावात् ॥ तद्भुक्त्वा सायुज्यंगच्छंति ॥ तच्चोक्तम् ॥ संकर्षणादयःसर्वेस्वाधिकारादनंतरम् ॥ प्रविशंति परं देवं विष्णुं नास्त्यत्र संशयइतिव्यासयोगे॥ अतोऽनिष्टस्यसर्वात्मना वियोगः ॥ परब्रह्मत्वमिच्छामि परब्रह्मन्जनार्दनेत्यादिना

संमतिमाह ॥ तच्चोक्तमिति ॥ सोऽस्त्येवेत्याद्युक्तमुपसंहरति ॥ अत इति ॥ तत्किमनिष्टनिवृत्तिमात्रं मुक्तिरित्यतोऽनुमानागमाभ्यां परमसुखं चे त्याह ॥ परब्रह्मत्वमिति ॥ ॥ मुक्तत्वं

॥ कृ० ॥ विशेषानिर्देशेसामान्यमात्रलाभःकथमित्यतआह ॥**सायुज्येति** ॥ **बीजमिति** ॥ तथाचेदानींतनस्यसामीप्यादेःसामीप्यादिमुक्तिसाम्यने तेषां मुक्तत्वोक्तिरौपचारिकीतिभावः ॥ **अनुमानेनेति** ॥ ब्रह्मादिमोक्षो ब्रह्मादिपदादप्यधिकसुखरूपः॥ प्राप्तब्रह्मादिपदैःप्रार्थितत्वात ॥ यद्यत्प्राप्तौ ॥ सत्यामपि प्रार्थ्यते तत्तदपेक्षयाधिकसुखरूपम् यथाऽश्वादिसुखवता राज्ञा प्रार्थितं गजादिसुखमिति सामान्यतो दृष्टं वा व्यतिरेकेण दुःखाभाववत् ब्रह्मादिपदवच्चेति व्यतिरेकि वा नुमानमनुमानशब्दार्थः॥ ब्रह्मादिपदे व्यभिचारनिरासायप्राप्तब्रह्मादिपदैरिति विशेषणंम् अनेनैव दुःखाभावव्यावृत्तिःतस्यासिद्धत्वेनप्राप्तब्रह्मादिपदैःप्रार्थितत्वाभावादिति बोध्यम् ननुपरब्रह्मत्वमिच्छामीत्ययुक्तम् अयोग्यमिच्छन्पुरुषःपतत्येवनसंशय इत्यनर्थहेतुत्वोक्तेरित्यतआह॥ **मुक्तत्वमिति** ।।परब्रह्माणि मुक्तिगा इत्युक्तेरितिभाव

॥ श्री ०॥अपिशब्दार्थमाह ॥ दुःखहीनैरिति॥ननुब्रह्मादीनामुत्तमाधिकारिणां कथं मोक्षेच्छोक्तिरेकांतित्वविरोधादित्यत आह॥ मोक्षेसक्तीति॥ यदा ब्रह्माद्यैरपिमोक्षोऽर्थ्यते तदेतरपुरुषार्थे सक्त्यपेक्षया मोक्षे सक्तिरितरेषांप्रशस्तेति मोक्षेसक्तिस्तुत्यर्थमेवोच्यत इति तत्रैव तात्पर्यं न ब्रह्मणा प्रार्थितत्वेऽतो नास्त्येकांतित्वविरोध इत्यर्थः उपलक्षणं चैतत् ॥ सर्वमन्यत्तदर्थकामिति येषामपवर्गोपि परमपुरुषावबोधार्थमेवाभ्यर्थनीय इत्युक्तरीत्या विष्णुमेवार्थत्वेनैव ब्रह्मादिभिर्मोक्षस्य प्रार्थ्यमानत्वाच्चनैकांतित्वविरोध इत्यपि समाधानमुक्तानुमानेविशेष्यासिद्धिशंकापरिहाराय ग्राह्यम् ॥ अन्यथा मोक्षेसक्तिस्तुत्यर्थमेवादिति समाधाने विशेष्यासिद्धिशंका दृढीकृतैव स्यान्नपरिहृता भवतीतिज्ञातव्यम् ॥ ननुवाङ्मनोगोचरमितिकथम् ॥ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ समासांताचप्रत्ययांताःपंचविंशतिर्निपात्यंत इति सूत्रार्थः॥ तथा च वाङ्मनसशब्दः ॥ समासांताचप्रत्यये वाङ्मनसेतस्याकारांतत्वात् वाङ्मनसागोचरमिति वक्तव्यत्वादित्यत आह ॥समासांतविधेरिति॥

ब्रह्मादिभिर्दुःखहीनैरपिमोक्षे सक्तिस्तुत्यर्थमेवादिति न ब्रह्मण एकांतित्वविरोधः ॥ समासांतविधेरनित्यत्वाद्वाङ्मनोगोचरमित्युक्तम् ॥ ॥

ब्रह्मादिभिरपिप्रार्थितत्वात्॥नमोक्षसदृशंकिंचित् अधिकं वासुखंक्वचित् ॥ऋतेवैष्णवमानंदं वाङ्मनोगोचरंमहदित्यादेश्च

॥ कृ ॥ननु दुःखनिवृत्तीच्छयाऽपि मोक्षस्य ब्रह्मादिप्रार्थितत्वोपपत्तेन सुखरूपत्वसिद्धिरित्याशंक्यादिशब्दाभिप्रायमाह ॥ दुःखहीनैरपीति ॥ इदंचाप्रयोजकतानिरासार्थमुक्तम् मोक्षेऽस्त्वंतर्गतं वैष्णव्यादिति विवेचनीयम् ॥ ननु कथं दुःखहीनत्वं पुराणादौ रुद्रादीनामश्वत्थामादिरूपेण दुःखोक्तेः ॥ ब्रह्मणोऽप्यल्पदुःखस्यादितिवृहद्भाष्ये दुःखभयादिकाद्योपानीब्रह्मणःश्रुतिरहतिकरभाष्यटिकायां च ब्रह्मणोऽपि दुःखेनेकारिनिषिद्ध ॥ भाविनी यात्यंतिकदुःखनिवृत्तिस्तन्निश्चयवत्वं दुःखहीनत्वमिति विवक्षितत्वात् ॥ उक्तनिश्चयस्यच ॥ सर्वदुःखनिवृत्तिश्च ज्ञानिनोनिश्चितैव हीत्यपरोक्षज्ञानिमात्रेऽपि सत्वेनब्रह्मादिषु सुतरां विद्यमानत्वात् ॥ मोक्षसक्तिस्तुत्यर्थमिति ॥ मध्यमाधिकारिणां स्वर्गादिविषयसक्त्यपेक्षया मोक्षे सक्तिः प्रशस्तेति प्राशस्त्ये तात्पर्यम् न तु प्रतीतार्थे ॥ अतो ब्रह्मादिमोक्षेच्छायामेकांतत्वं न स्यात् एकांतानां न कस्य चिदर्थे नारायणो देव इत्युक्तरीति परास्तमित्यर्थ उपलक्षणं चैतत् ॥ सर्वमन्यत्तदर्थकामिति ॥ येषामपवर्गोऽपि परमपुरुषावबोधाभिवाभ्यर्थनीय इत्युक्तरीत्या विष्ण्वर्थत्वेनैव मोक्षस्य ब्रह्मादिभिः प्रार्थ्यमानत्वाच्च नैकांतिकत्वविरोध इत्यपि ग्राह्यम् तेन न विशेष्यासिद्धिशंकाऽपीति ज्ञातव्यम् ननु अचतुरविचतुरसचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसेत्यादिसूत्रेणाच्प्रत्ययांततया निपातनाद्वाङ्मनसागोचरमितिवक्तव्यम् ॥ वाङ्मनोगोचरमिति तु कथमुक्तमित्यत आह समासांतविधेरनित्यत्वादिति ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ तथा चात्रा च्प्रत्ययस्थानात्वेनसकारांतत्वाद्वाङ्मनोगोचरमिति युक्तमिति भावः ॥ महदित्यस्यानंदविशेषणत्वासंभवादाह ॥ **महदिति** ॥ मोक्षादधिकंवामहत्सुखं नास्तीति यो ज्यम्॥ननु मोक्षे शेषादीनां ब्रह्मपदादप्याधिकसुखाभावात् कथं ब्रह्मादिपदादप्याधिकंसुखं मोक्ष इत्युक्तमित्यत आह ॥**ब्रह्मण इति**॥ब्रह्मणः मुक्तस्य॥ब्रह्मपदात पदस्थादमुक्तात ब्रह्मणः॥शे षस्य ॥ मुक्तस्य ॥ शेषपदात् ॥ पदस्थादमुक्तशेषात् ॥ **उक्तविधयेति** ॥ बुद्धियुक्तः प्रेक्षावान ॥ काम्यं सुकृतं दुष्कृतं च जह्यादित्युक्तरीत्येत्यर्थः ॥ **अस्मदुक्तार्थे** ॥ ज्ञानफलप्रदर्शन परत्वरूपे ॥ **संगतेरिति** यद्युक्तः सन् यज्जहाति तस्योपायार्थमेव यतेति संगतमित्यर्थः ॥ ननु गीतानुसारेण तस्मादिति पठितव्यमत इति कस्मात पठितमत आह ॥ **नेति** ॥ ज्ञापयितु मत इत्युक्तमित्यन्वयः॥ तच्छब्दस्य प्रकृतपरामर्शकत्वात् प्रकृते तस्मादिति न दूरस्थस्य यस्यकस्य चिद्धेतोः परामर्शः किं तु पूर्वार्धप्रकृतं यत ज्ञानस्याभियसुकृतदुष्कृतनिवृत्तिसाधनत्वं तस्यै वात्र परामर्श इतिज्ञापयितुमत इत्युक्तम् ॥ इदमःसंनिहितपरामर्शकत्वादिति भाव. ॥ ॥ ॥ ॥ ॥ ॥ ॥

महदित्येतत्सुखमित्यनेन संबध्यते ॥ ब्रह्मादिपदादप्यधिकतममिति ॥ ब्रह्मणो ब्रह्मपदादप्यधिकं शेषस्य शेषपदादप्यधिकमित्यादि ज्ञेयम् ॥ए वं ज्ञानफलप्रदर्शनत्वेन पूर्वार्धो व्याख्यातः ॥ उक्तविधयायोगस्वरूपनिरूपणपरःकिन्त्वस्यादित्यतोऽस्मदुक्तार्थे तृतीयपादसंगतेरन्यथातदसंगते

॥ब्रह्मादिपदादप्यधिकं सुखं मोक्षइति सिद्धम् ॥ अतोयोगाययुज्यस्व ॥

रित्यभिप्रेत्य तं पठति॥अत इति॥नदूरस्थहेतुपरामर्शोऽयमितिज्ञापयितुं तस्मादिति पठितव्येऽत इत्युक्तम्॥ज्ञानस्यमहाफलत्वाद्योगाय युज्यस्वेति

॥क्त॥अश्वादिगणे राजन्शब्दपाठाल्लिंगादिति भावः ॥तथाहि॥प्रतेरश्वादयस्तत्पुरुषइत्युक्ताश्वादिगणेराजन्शब्दपाठः कृतःस च प्रतिराजेति तत्पुरुषेऽतोदात्तार्थः॥न चासौ समासांतविधेर्नित्य त्वेयुक्तःवैयर्थ्यात् ॥ राजाहःसखिभ्यष्टजिति ॥ प्रतिराजेत्यत्र टच्प्रत्यये चितइत्यनेनैवांतोदात्तत्वसिद्धेः ॥ अतो ज्ञायते समासांतविधिरनित्य इति ॥ नन्वानंदशब्दस्य घञंतत्वात घञंतस्य च घञंबंतइति पुंस्त्वविधानात्ताद्विशेषणत्वे महदिति क्लीबत्वायोग इत्यत आह ॥ **महदित्येतदिति** ॥ संनिधानादपियोग्यताया बलीयस्त्वादिति भावः ॥ ननु यानिर्वृत्तिरित्यादिनोत्तमा धिकारिश्रवणादिजन्यसुखस्य स्वाधममोक्षसुखापेक्षयाऽधिक्योक्तेः ॥ कथं ब्रह्मादिपदादप्याधिकतममित्युक्तमित्यत आह ॥ **ब्रह्मण इति उक्तविधयेति** ॥ बुद्धियुक्तःप्रेक्षावान् ॥ काम्यं सुकृतं दुष्कृतं च जह्यादित्युक्तविधयेत्यर्थः ननु गीतानुसारात्तस्मादिति वक्तव्यम् अत इतिकथमुक्तमित्यत आह ॥ **दूरस्थेति** ॥ अतःशब्दे प्रयुक्ते संनिकृष्टपरामर्शोऽयमिति ज्ञायते ॥

॥ श्री० ॥ व्याचष्ट इति ॥ योगशब्दस्य ज्ञानोपायार्थत्वं युक्तो हेतुहेतुमद्भाव इत्याशयेन व्याचष्ट इत्यर्थः ॥ भाष्ये कर्मकौशलं कर्मसुकौशलमित्यर्थः ॥ तथा च योगः ज्ञानोपाय भूतं सांगं निवृत्तं कर्म कर्मसु मध्ये काम्यकर्मापेक्षया कौशलं कुशलं समीचीनमितियोज्यम ॥ ५० ॥ पूर्वार्धेन ज्ञानसाधनोक्तेरुत्तरार्धेन ज्ञानफलोक्तेस्तदुपायमित्येतत् द्वेधा व्याचष्टे॥ तस्येत्यादिना ॥ व्याचष्ट इति ॥ कामनात्याग एव फलत्याग इत्याशयेनेत्यर्थः ॥ नन्वकामनायास्त्यागे कर्तृत्वकरणत्वयोरभावात् कथं कर्तृकरणयोस्तृतीयेतिसूत्रेण तृतीया ॥ नापीत्थंभू तलक्षणतृतीयात्रोपपद्यत इत्यत आह ॥ प्रकृत्यादिभ्य इति ॥ कर्तृकरणयोस्तृतीयेति ॥ सूत्रे वार्तिकं प्रकृत्यादिभ्यस्तृतीयेति प्रकृत्याचारुरित्याद्युदाहरणम् ॥ एवं च प्रकृत्यादेराकृ तिगणत्वादकामनाशब्दस्यापि तद्गणांतःपठितत्वस्त्वादनेन वार्तिकेनतृतीयोपपद्यत इत्यर्थः ॥ एतत ॥ कामनात्यागरूपफलत्यागस्वरूपम् ॥ प्रागुक्तमिति ॥ संगंत्यक्त्वेत्यादावित्यर्थः ॥

कथंहेतुहेतुमद्भाव इत्यतो योगायेत्यनद्व्याचष्टे॥ज्ञानेति ॥ ननु समत्वं योग उच्यत इति योगो व्याख्यातः॥योगःकर्मसु कौशलमिति पुनर्व्या ख्यायते इत्यतस्तुतिरियं योगस्यक्रियत इतिभावेनाह ॥ तद्धीति ॥ तद्योग इति शेषः ॥ ५० ॥ ननु कर्मजमितिश्लोकःपूर्वोक्तान्न विशि

ज्ञानोपायाय॥तद्धिकर्मकौशलम् ॥ ५० ॥ तदुपायमाह ॥ कर्मजमिति कर्मजंफलं त्यक्त्वाऽकामनयेश्वरायसमर्प्य

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः॥जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयम् ॥५१॥

ष्यत इत्यत आह ॥ तदिति ॥ तस्य ज्ञानस्य उपायं योगं तज्ज्ञानमुपायो यस्यतंमोक्षं चाह॥ विवृणोतीत्यर्थः ॥ व्यवहितत्वादन्वयमाह ॥ कर्मजं फलं त्यक्त्वा ॥अप्राप्तस्य फलस्य कथं त्याग इत्यतो व्याचष्टे ॥ अकामनयेति ॥ प्रकृत्यादिभ्य उपसंख्यानात्तृतीया ॥ एतत्प्रागुक्त मित्यतःप्रकारांतरेण व्याचष्टे ॥ ईश्वरायेति ॥ ॥ ॥ ॥ ॥ ॥

॥क्र॥तस्यैतच्छब्दप्रकृतिकत्वात् एतच्छब्दस्य च समीपतरवर्तिचैतदोरूपमित्युक्तेः ॥संनिकृष्टत्ववाचकत्वादिति भावः॥संनिकृष्टं चात्र पूर्वार्धप्रकृतम ज्ञानस्यानिष्टनिवर्तकत्वं तदेवात्र परामृश्य मिति हृदयम् ॥५०॥ पूर्वोक्तान्नविशिष्यत इति ॥ संगं त्यक्त्वेत्यत्र बुद्धियुक्त इत्यादौ च यदुक्तं तावत एवात्रोक्तत्वादिति भावः ॥ कर्मजमितिश्लोके पूर्वार्धे ज्ञानसाधनोक्तेरुत्तरर्धे ज्ञानफलोक्तेस्तदुभयानुगुण्याय तदुपायमित्येतत द्वेधाव्याचष्टे तस्य ज्ञानस्येत्यादिना ॥ पूर्वोक्ताविशेषंपरिहरति विवृणोतीत्यर्थ इति न च कामनायाःत्यागे करणत्वाद्यभावात्कथं तृतीयेत्यत आह प्रकृत्या दिभ्य इति ॥ ॥ ॥ ॥ ॥ ॥ ॥

१ त्यागोदानेचवर्जने इति मेदिनी

॥ श्री० ॥ **अनेनेति** ॥ बुद्धियुक्ता इत्यस्य परोक्षज्ञानिवाचकत्वकथनेनेत्यर्थः ॥ **सूचितमिति** ॥ अन्यथा पुनरुक्तिप्रसंगादिति भावः ॥ ननु मनीषिण इत्येतदेव परोक्षज्ञानिपरतया कुतो न व्याख्यातं भाष्यकारेणेत्यत आह ॥ **प्रशंसायामिति** ॥ मनीषाऽस्यास्तीति मत्वर्थे इनिप्रत्ययस्य विहितत्वात् मत्वर्थीयस्येनेः प्रशंसायामपि विधानमस्ति ॥ भूमनिंदाप्रशंसासु भवंति मतुबादय इत्युक्तत्वादत्रापरोक्षज्ञानित्वरूपप्रशंसाया अभिप्रेतत्वात्तदर्थे मत्वर्थीयेनिप्रत्यये मनीषिपदमेवापरोक्षज्ञानिपरमिति भावः ॥ **वाक्यार्थद्वयस्येति** ॥ तस्य ज्ञानस्योपायमाह ज्ञानमुपायो ॥ यस्य मोक्षस्य तमाहेत्युक्तवाक्यार्थद्वयस्येत्यर्थः ॥ **मोक्षस्वरूपेति** ॥ जन्मबंधेत्युत्तरार्धेनेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

बुद्धियुक्तामनीषिण इति पौनरुक्त्यपरिहारायाह॥बुद्धीति॥सम्यग्ज्ञानिन इति शास्त्रजनिततत्वज्ञानिनः॥अनेन मनीषिण इत्यपरोक्षज्ञानिन इति

बुद्धियुक्ताःसम्यक् ज्ञानिनो भूत्वा पदं गच्छंति ॥

सूचितम् ॥ प्रशंसायां मत्वर्थीयविधानात् ॥नन्विदमेकं वाक्यं कथं वाक्यार्थद्वयस्य विवरणम्॥मोक्षस्वरूपविवरणेऽपियोगो न सम्यग्वित्तः

॥ क ॥ प्रकृत्यादेराकृतिगणत्वादिति भावः न चानन्वयः ॥ अकामनारूपत्यागं कृत्वेत्यकामनात्यागयोरभेदान्वयोपपत्तेःयथोक्तम् नाम्नोर्द्विवैवसंबंधःसर्वत्रावये व्यवस्थितः॥ सामानाधिकरण्येन षष्ट्या वाऽपि क्वचिद्भवेदिति नामपदं च शब्दमात्रपरम् अन्यथा सर्ववाक्ये व्यवस्थित इत्युक्तयगोगात् तेन प्रकृतसंगतिरिति बोध्यम **प्रागिति** ॥ संगं त्यक्त्वेत्यत्रेत्यर्थः ॥ **प्रशंसायामिति** ॥ यद्यपि तदस्यास्तीत्यस्मिन्नस्तीति वाऽर्थमतुबादयो विधीयंते तथैवानुवृत्तेः ॥ तथापि भूमनिंदेतिवार्तिके आस्तिविवक्षायां येविहिता स्तेभूमादिषु विषयेषु भवंतीत्युक्तेरेवमुक्तम् ॥ तथाच प्रकृते मत्वर्थीयस्येनिप्रत्ययस्य प्रशंसायां विधानात्प्रशस्तामनीषास्तीति लभ्यते ॥ अपरोक्षज्ञानमेवच तथाऽतोयुक्तमुक्तमिति बोध्यम्॥**वाक्यार्थद्वयस्येति** ॥ संगं त्यक्त्वेति वाक्यस्यार्थ एकःबुद्धियुक्त इत्यादिवाक्यार्थश्च द्वितीय इत्येवं वाक्यार्थद्वयस्येत्यर्थः**मोक्षस्वरूपविवरणेपीति** ॥

॥ श्री० ॥ एवंच कथं वाक्यार्थद्वयस्य विवरणमित्याक्षेपः ॥ एकसत्वे द्वयमिह नास्तीति प्रतीत्यनुसारेणेति ज्ञातव्यम् ॥ **अंगिन इति** ॥ फलत्यागाख्यांगस्यैवाभिधानादित्यर्थः ॥ अंगाभिधानेपि न्यूनताऽस्तीत्याह ॥ **अंगानां चेति** ॥ संकल्पत्यागः ॥ एतदर्थमिदं करिष्य इति संकल्पस्तत्याग इत्यर्थः ॥ एतत्संकल्पत्यागे हेतुत्वेन फलकामनात्यागः ॥ समायातीति तयोर्भेद इति ज्ञेयम् ॥ अनभिधानादिति वर्तते ॥ **द्वे वेदितव्ये इति** ॥ कर्मजं फलं त्यक्त्वा संकल्पत्यागादिपूर्वकं कर्म च कृत्वाबुद्धियुक्ता भूत्वा मनीषिणो भवंतीत्येकं वाक्यम् ॥ तथा च मनीषया जन्मबंधविनिर्मुक्ताः ॥ संतोऽनामयंपदं गच्छंतीत्यपरं वाक्यमित्यर्थः ॥ननु भाष्ये योगशब्देन समस्तांगग्रहणेऽपि गीतायां कर्मजं फलं त्यक्त्वेति फलकामनात्यागरूपस्यैवांगस्याभिधानेन संकल्पत्यागादीनामंगानामनभिधानान्न्यूनता स्यादेवेत्यतआह ॥ **योगश्चेति** ॥ संकल्पत्यागाद्यंगसमुदाय इत्यर्थः ॥ **लक्षितः** ॥ गीतायामिति शेषः ॥ ५१ ॥ ॥

अंगिनः कर्मण एवानभिधानात् ॥ अंगानां च संकल्पत्यागादीनामित्यत आह ॥ स इति ॥ समस्तांगसंग्रहाय योगग्रहणम् ॥ तज्ज्ञानं य

सयोग कर्म ज्ञानसाधनम् ॥ तन्मोक्षसाधनमितिभावः ॥ ५१ ॥

यपि योजनावशादिदमेकं वाक्यं तथाप्यर्थद्वय वशात्द्वेवेदितव्ये॥योगश्च कर्मजं फलं त्यक्तेत्यनेन समग्रोलक्षित इतिभावः॥ ५१ ॥

॥ कृ० ॥ बुद्धियुक्तो जहातीत्याद्युक्ताशेषानिष्ठानिवृत्ति जन्मबंधविनिर्मुक्ताइत्यनुद्यानामयं पदं गच्छंतीत्यभिकस्योक्तिरिति भावः अत्रानामयशब्देन ब्रह्मग्रहणाज्ज्ञानिनोब्रह्मप्राप्तिरुक्तेति टीकावाक्यं स्थित्वास्यामंतकालेपीत्येतदवतारिकागतं संगच्छत इत्यवधेयम् ॥ **द्वे वेदितव्ये इति** ॥ कर्मजं फलं त्यक्त्वा बुद्धियुक्ता भूत्वा मनीषिणोभवंतीत्येकम् तया च मनीषयाजन्मबंधविनिर्मुक्ताःसंतःपदं गच्छंतीत्यपरम् इत्येवं द्वेवाक्ये वेदितव्ये इत्यर्थः ॥**योगश्चेति** ॥ तथा च कर्मजं फलं त्यक्त्वेत्यस्य संकल्पत्यागादिपूर्वकंकर्म कृत्वेत्यर्थोवगंतव्य इति भावः ॥५१ ॥

---

१ अतएवउत्तरश्लोके टीकायां फलकामनादीत्युक्तम् २ आदिपदेन अनभिमानादयः ३ न आमयो दोषो यस्मिंतदनामयं तदस्य स्वामित्वेनास्तीतितस्येदं पदमिति अर्शआद्यजंतमितिभावः ॥

॥ श्री० ॥ कुत इत्यत आह ॥ **नियतेति** ॥ **तल्लक्षणम्** ॥ साधनलक्षणम् ॥ साध्यप्राप्तिपर्यंतं साधनस्यानुष्ठेयत्वेतदव्यवाहितपूर्वक्षणवृत्ति कारणत्वमुक्तं स्यात ॥ तदभावे च साधनत्व मेव न स्यादिति भावः ॥ **योगः** ॥ सांगकर्म ॥ तर्हि ज्ञानसाधनं किमिति पृच्छति ॥ **किं त्विति** ॥ उत्तरयति॥ **श्रवणादिकमेवेति**॥ कुतः श्रवणादिकमेव ज्ञानसाधनमित्यत आह ॥ **प्रमितेरिति** ॥ अपरोक्षज्ञानरूपायाः प्रमितेः श्रवणादिरूपप्रमाणफलत्वमेव न्याय्यं न तु योगफलत्वं निवृत्तकर्मादिरूपस्य योगस्य प्रमाणत्वाभावादिति भावः॥ तत्र श्रवणमागम ॥ मननमनुमानं निदिध्यासनं प्रत्यक्षमिति विवेकः॥ तर्हि योगोऽव्यर्थ इत्यत आह ॥ **योगस्त्विति** ॥ सत्वशुद्धिमंतःकरणशुद्धिम ॥ श्रवणादीनाम ॥ श्रवणमनननिदिध्यासनसाक्षात्कारसंप्रज्ञातसमाध्यसंप्रज्ञातसमाधीनामित्यर्थः ॥ ननु तथाऽपिऽयमाकांक्षा ॥ कथमनुपपन्ना जातेत्यत आह ॥ **उपकारकस्य चेति**॥ द्वयी गतिः ॥ सकृदनुष्ठेयत्वं असकृदनुष्ठेयत्व चेतिद्वयी गतिः ॥ अंगभूतमुपकारकं द्विविधम ॥स्वरूपोपकारकं फलोपकारकं चेति॥ व्रीहीनवहन्यादित्यादाववहननादीनां यागस्वरूपनिष्पादकत्वेनांगत्वं प्रधानयोगेन फलजननीये समीधो यजति इडो यजति बर्हिर्यजतितनूनपातं यजति स्वाहाकारं यजतीत्युक्तानां पंचप्रयाजानां पंचापूर्वजननद्वाराफलोपकारकत्वेनांगत्वम ॥ एवं प्रकृते योगस्यावहननादिवदसकृदनुष्ठेयस्य श्रवणादि

यदात इति श्लोके योगसंबंधि न किमप्युच्यत इत्यतस्तत्संगतिमाह॥ कियदिति ॥ एवं फलकामनादिवर्जितानीश्वराराधेन रूपाणीत्याकांक्षायामाहेत्यर्थः ॥ नन्वियमाकांक्षैवानुपपन्ना॥ योगे हि ज्ञानफलसाधनतयोपदिष्टः ॥ साधनं च साध्यप्राप्तिपर्यंतमनुष्ठेयमिति प्रसिद्धमेव॥ नियतपूर्वक्षणवृत्ति कारणमिति हि तल्लक्षणम्॥ उच्यते ॥ योगो हि न साक्षाज्ज्ञानसाधनम् ॥ किं तु श्रवणादिकमेव ॥ प्रमितेः प्रमाणफल

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

कियत्पर्यंतमवश्यंकर्तव्यानि मुमुक्षुणैवं कर्माणीत्याह ॥ यदेति ॥ निर्वेदं नितरां लाभम् ॥

त्वात्॥योगात्स्वदृष्टद्वारा सत्वशुद्धिमुत्पाद्य श्रवणादीनामुपकारोतिउपकारस्य च द्वयीगतिर्दृष्टा॥अतो युक्तैवेयमाकांक्षेति॥तथाऽपि जिज्ञासुनेति वक्तव्यम् ॥ सत्यम् ॥ मोक्षसाधनज्ञानार्थिनेत्येतावतोऽर्थस्य ग्रहणाय मुमुक्षुणेत्युक्तं॥निर्वेदं वैराग्यमित्यन्यथाप्रतीतिनिरासायाह॥निर्वेदमिति॥

स्वरूपोपकारकांगत्वं उत सकृदनुष्ठितप्रयाजादेरिव फलोपकारकांगत्वं चेति शंकाभिप्रायः ॥ योगस्य श्रवणादिस्वरूपोपकारकत्वेनासकृदनुष्ठेयत्व इति उत्तरं भवति मोहकलिलमिति ॥ वचनादिति ज्ञेयम ॥ **जिज्ञासुनेति** ॥ज्ञानेच्छुना क्रियमाणयोगस्य श्रवणादिजन्यज्ञानस्वरूपोपकारकांगत्वं वाफलोपकारकांगत्वंवेत्याशयेन जिज्ञासुनेति वक्तव्यं न मुमुक्षुणेत्यर्थः ॥ ननु पांडित्यादितिस्यात इति कथं पंचम्यापादानम् ॥ अपादानेपंचमीति अपादाने पंचमीविधानात् ॥ ध्रुवमपायेपादानम् ॥ अपाये विश्लेषे सति यत्ध्रुवं तदपादानसंज्ञं भवति ॥ शृंगाच्छरो जायत इति दर्शनात् ॥ ॥ क्र ॥ **सत्वश्शुद्धिमिति** ॥ अंतःकरणश्शुद्धिमित्यर्थः **द्वयीगतिरिति** ॥ अवघातादिवदसकृदनुष्ठयेत्वंप्रोक्षणादिवत्सकृदनुष्ठेयत्वंचेत्येवंरूपेत्यर्थः ॥

१ आदिपदेनसंकल्पादयः ॥ २ भाष्ये स्वकृते त्यस्येश्वरायसमर्प्येत्यर्थांतरकथनात् ॥

॥ श्री॥नह्येतादृशमपादानत्वं पांडित्ये संभवतीत्यत आह ॥ जुगुप्सेत्यादि ॥ विरामो वैराग्यम् ॥ जुगुप्साद्यर्थानां धातूनां योगोऽस्य शब्दस्य तत्राप्यपादानत्वमुपसंख्येयमित्यर्थः ॥ पापाज्जुगुप्सते ॥ दुःखाद्विरमति ॥ आधीतात्प्रमाद्यतीत्युदाहरणम् ॥ पांडित्यस्य ॥ पांडित्यशब्दस्य ॥ विरामार्थकधातुयोगेनेति ॥ वैराग्यार्थविदेः ॥ गीतायां विद्धातोर्वैराग्यार्थत्वं कस्मान्न स्याद्बाधकाभावादित्यत आह ॥ इदमत्राभिप्रेतमिति ॥ निरुपसर्गः ॥ निर् इत्ययमुपसर्गः ॥ तं विद्धातुम् ॥ कुत इत्यत आह ॥ निर्विद्यतइति ॥ कर्तरीति विरक्तिकर्तरीत्यर्थः ॥ इदमुपलक्षणम् ॥ प्रत्युतसत्ताकर्तरि विद्यमाने वस्तुनि निर्विद्यत ॥ इति प्रयोगादर्शनादित्यपि ग्राह्यम् ॥ विद्यते विद्सत्तायामिति ह्युक्तम्॥ विद् सत्तायामस्मात् लट्प्रत्यये आत्मनेपदिनि लस्यतकारे सत्तार्थकविदः श्यन् विकरणत्वेन यकारं विना शकारनकारयोर्लोपे टित आत्मनेपदानां टेरे लट्लिट्लोट्लृट् एते टितः एतदात्मनेपदानां संबंधिनष्टेरेत्वं स्यादिति टिभूतस्य तकारस्थस्याकारस्य एत्वविधान इति विरक्तिकर्तरि प्रयोगो भवति ॥ धात्वर्थं बाधते कश्चिदित्युक्तेरित्याशय. ॥ लाभार्थस्येति ॥ ॥ ॥ ॥ ॥

ननु निःपूर्वो विदिर्वैराग्ये रूढः ॥ तत्कुतो लाभार्थतेत्यत आह॥ प्रयोगादिति ॥ अस्यामपि श्रुतौ वैराग्यार्थता किं न स्यादित्यत आह ॥ न हीति ॥ कुतो नोपपद्यतइत्यत आह ॥ तथासतीति ॥जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति कात्यायनवचनात्पांडित्यस्य विरामार्थधा

प्रयोगात्॥ तस्माद्ब्राह्मणःपांडित्यं निर्विद्येत्यादि ॥ न हि तत्र वैराग्यमुपपद्यते ॥ तथा सति पांडित्यादिति स्यात् ॥

तुयोगबलेनापादानत्वप्राप्तौ अपादाने पंचमीस्यात् न द्वितीयेत्यर्थः॥इदमत्राभिप्रेतम्॥निरुपसर्गः सत्तार्थस्यैव विदेरर्थंबाधित्वा तं वैराग्यार्थं व्यवस्थापयति ॥ निर्विद्यत इतिकर्तरि प्रयोगदर्शनात् ॥ लाभार्थस्य विदेरर्थं विशिनष्ट्येव केवलम् ॥ ॥ ॥

॥ कृ ॥ लाभार्थत्वेऽनुमानविरोधं शंकते ॥ ननु नि पूर्व इति अत्रायं प्रयोग निर्वेदशब्दांतर्गतो विद्धातुः वैराग्यार्थे निरित्युपसर्गविशिष्टत्वादिति ॥ नचाप्रयोजकता उपसर्गेण धात्वर्थो बलादन्यःप्रतीयते ॥ प्रहाराहारसंहारविहारपरिहारवदिति ॥ मैवं उपसर्गमात्रस्य धात्वर्थबाधकत्वे सत्यर्थांतरव्यवस्थापकतया तादृशोपस्य निरःसुतरां तदुपपत्तेःन चैवमपि वैराग्यार्थव्यवस्थापकत्वं कुत इति वाच्यम् ब्राह्मणो निर्वेदमायान्निर्वेदं कृत्वा वनमित्यादिप्रयोगात् ॥ जुगुप्सेति ॥ जुगुप्सा निंदा॥ विरामो विरतिः प्रमादोऽनवधानता ॥ एतदर्थानां धातूनां योगे जुगुप्सादयो यतो भवंति तस्यावधेरपादानत्वं वक्तव्यमित्यर्थः ॥ ननु प्रयोगादित्यनेनपूर्वपक्ष्युक्तानुमाननिरास कथमित्यत आह ॥ इदमत्रेति ॥ विद्धातवोबहवः तत्र किं ज्ञानार्थक विद्धातुं पक्षीकृत्य माध्यंतविचारणार्थकं वा सत्तार्थकं वा लाभार्थकंवा [illegible] नन्वेवमिति विकल्पाद्यपक्षत्रयं [illegible] माह ॥ निरुपसर्गइति ॥ अत्र सत्तार्थस्येत्यादिना तृतीयपक्षोसिद्धसाध्यतोक्ता एतत्करणाद्यपक्षद्वयबाधः सूचित इति बोध्यम् ननु निर्विद्यत इति लाभार्थस्य विदेःकर्मणि रूपं किं न स्यादित्यत उक्तम् कर्तरीति ॥ विरक्तिकर्तरीत्यर्थः॥युज्यते सत्तार्थस्य निर्विद्यत इति रूपम् दिवादिगणस्थात्तस्माच्छ्यन्प्रत्ययप्राप्तेःलाभार्थस्यतु तुदादिगणस्थत्वेन शप्रत्यये कर्तरि निर्विदति यादिरूपं स्यान्नतुनिर्विद्यत इतीति भावः ॥ उपलक्षणमेतत् निर्विण्णइतिप्रयोगदर्शनादित्यपिग्राह्यं निर्विण्ण .इत्यपिसत्तार्थस्यैव रूपम् विदेर्न विन्न इष्यत इतिवचनात् चतुर्थं निराकरोति ॥ लाभार्थस्येति ॥ ॥ ॥

॥१०॥

॥ श्री ० ॥ विंदेरित्यर्थः ॥ विशिनष्टि ॥ निरुपसर्ग इति वर्तते ॥ कश्चित्तमनुवर्तेत इतिवचनादिति भाव ॥ वैराग्ये ॥ वैराग्यवाचि विरक्तिकर्तरीति यावत ॥ तत्प्रयोगेति ॥ निः पूर्वकविदधातुप्रयोगेत्यर्थः ॥ इदमुपलक्षणम ॥ प्रत्युत लाभार्थएव गङ्गां निर्विंदनिद्रव्यमित्यादौ प्रयोगदर्शनादिति च बोध्यम ॥ विद लाभे इत्यस्माच्छे परे नुमिति तस्यानिवादेशे लाभार्थस्य विदेरनुपसर्गाच्छिपविदेत्यादिना शविकरणत्वात शकारलोपे अकारे उवर्णे मतिविदति इति गते ३.मुचादीनाम ॥ मुचादिविदन्तानां शे परे नुमागमः स्यात ॥ मुचति लुंपति ॥ विदति ॥ सिंचति ॥ कृंतति ॥ खिदति ॥ तथा चात्र शे परे विदो नुमागमे विन्दति विन्दतीति लट परस्मैपदेति रूपम ॥ आत्मनेपदेति तु विद अस्माच्छे तस्य तादेशे शविकरणत्वात नुमागमे टेरेत्वे विंदते इति भवति ॥ तस्यैव धात्वर्थस्य विशेषकनिरुपसर्गसंयोगे सतिनिर्विंदति निर्विंदत इति भवति ॥ नितरां इत्यर्थः ॥ लाभे विंदतिविंदते इति युक्तम ॥ अत्रैकस्यैव निरो धात्वर्थबाधकत्वं तद्विशेषकत्वं चनियामकाभावेनायुक्तमित्याशङ्क्याह ॥ अथ वाऽस्त्विति ॥ सर्वत्रेति ॥ तथा च निरुपसर्ग सत्तार्थस्यैव विदेरर्थं बाधित्वा तं वैराग्यार्थव्यवस्थापयतीति नियमो माऽस्त्वित्यर्थः ॥ क्वचिदिति ॥ प्रयोगविशेष इत्यर्थः ॥ तथा च श्रीगीतायां न धात्वर्थबाधकत्वमिति भावः ॥ नन्वेकस्यैवोपसर्गस्य धात्वर्थबाधकत्वंतद्विशेषकत्वं चादर्शनादयुक्तमित्यत आह ॥ व्याददातीत्यादाविति ॥ ॥ ॥ ॥

निर्विंदति निर्विंदत इति वैराग्ये तत्प्रयोगादर्शनादिति ॥ अथवाऽस्तु सर्वत्र निरोधात्वर्थबाधकत्वम् ॥ विशेषकत्वमपि क्वचित् किं न स्यात् ॥ व्याददातीत्यादावुभयदर्शनादिति ॥ न केवलंगीतायां प्रयोगाल्लाभार्थता ॥ ॥ ॥

॥क॥तथा च चतुर्थपक्षेबाध इति भाव ॥नन्वस्तु निरुपसर्गस्यधात्वर्थाविशेषकत्वं व्याख्यानं पाणिनेः निर्विंदति प्रयोगात धात्वर्थबाधकत्वाभावे तु नियामकं नास्ति ततो विशिनष्टिचेत्यत्र कारण विरोधइत्यत आह निर्विंदतीति॥विदिसामान्यं पक्षीकृत्य साध्यत इतिपञ्चमपक्षस्तु पूर्वेणैव निरस्त ॥अत्र बाधात अंश सिद्धसाधनमितिबोध्यम ननु निरुपसर्गोल्लाभार्थस्यापिविदेरर्थबाधकएव न तु विशेषकः अन्यथोपसर्गेणेत्यादिप्रागुक्तविरोधात॥न च पाण्डित्यं निर्विंदेति प्रयोगविरोधः तत्रापि निरुपसर्गो ज्ञानार्थस्तेन लाभार्थत्वस्याप्युपगमे बाधकाभावात ॥ प्रयोगादर्शनस्यपुरुषदोषत्वेन धात्वर्थबाधकत्वाभावानिर्णायकत्वायोगाच्च॥ तथा च चतुर्थपक्षे नानुमानस्य दूषणमस्तीत्यस्वरसादुक्तानुमानस्याप्रयोजकतामाह ॥ अथवेति ॥ व्याददातीत्यादाविति॥ आदिपदेन विद्यामादत्त इत्यादेःसंग्रहः ॥ इदमिहाभिप्रेतम आङुपसर्गो विद्यामादत्त इत्यत्र ददातेरर्थं दानं बाधित्वा तं आदानार्थं व्यवस्थापयति स एव व्याददातीत्यत्र व्युपसर्गेण मुखविवृतिरूपददात्यर्थं व्यवस्थापिते तस्य विशेषको दृष्टः॥न च व्याददातीत्यत्राङुपसर्ग एव ददातेरर्थं दानं बाधित्वा तं मुखविवृतिपर व्यवस्थापयति॥व्युपसर्गस्तु तद्विशेषक इति किं न स्यादिति वाच्यम॥तत्र व्युपसर्गस्यैव प्रथमप्राप्तत्वेन मुखविवृति व्यवस्थापकत्वे वक्तव्ये पारिशेष्याङो विशेषकत्वस्यैव वक्तव्यता॥अन्यथा विनिगमकाभावेनैकस्य बाधकत्वमपरस्य विशेषकत्वमिति व्यवस्था न स्यात विद्यामादत्त इत्यादिप्रयोगबाहुल्येनाङुपसर्गस्यादानार्थव्यवस्थापकत्वमेवेति निश्चयेन मुखविवृतिव्यवस्थापकत्वायोगाश्च गीतायांप्रयोगादिति ॥

१ अत्राप्येवंबाधकत्वेऽङ्गीकृते भाष्ये नितरामित्युक्तिर्नस्यादिति भावः ॥

॥ श्री० ॥ काले प्राप्तायातिथयेव्याददाति भनं प्रभुरिति प्रयोगे वि आङ् इत्युपसर्गयोर्दानरूपधात्वर्थविशेषकत्वं दृष्टं विशेषेणमभ्यग्ददातीत्यर्थात् ॥ व्याददाति मुखं कृष्णो मात्रे लोकान् प्रदर्शितुमिति प्रयोगे विआङित्युपसर्गयोर्दानरूपधात्वर्थबाधकत्वं दृष्टं मुखप्रसृतिं करोतीत्यर्थात् ॥ तथा च दर्शनबलात् अत्राप्यविरोध इत्याशयः ॥ अत एवोक्तधात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते इति ॥ तस्मादिति श्रुतौ निर्वेदशब्दस्य लाभार्थे प्रयोगात् गीतायां लाभार्थता इत्येव केवलं न किं त्विति योज्यम् ॥ **अनेनेति**॥ निर्वेदगंतॄणां ज्ञानित्ववचनेनेत्यर्थः ॥ **तदुपयुक्तम्** ॥ भगवन्महिमोपयुक्ततद्भक्तमहिमादिकम् ॥ चरितं वैष्णवानां च विष्णुद्रेकाय कथ्यत इति वचनादिति भावः॥ आत्मारामेत्यत्र भगवन्महिमादिश्रवणस्यकर्तव्यत्वानुक्तेः कथमिदं तत्र प्रमाणमित्यत आह ॥ **भक्तिमिति** ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यं सख्यमात्मनि वेदनमिति वचनादादिपदेन कीर्तनादिकं ग्राह्यम् ॥ अत्रश्रवणादीनां भक्तिज्ञापकतयैव भक्तित्वंज्ञानव्यं श्रवणकीर्तनादिभक्तिलिंगरहित इति हि नवमे वक्ष्यति ॥ किमत्रज्ञापकमित्यतः अंतरंगं ज्ञापकं तावदाह ॥ **कस्यवेति** ॥ कस्य प्रयोजनस्यार्थे **एताम्** ॥ भागवतसंहिताम् ॥ आत्मारामः ॥ शुकः ॥ **समभ्यसत्** ॥ वारंवारं श्रवणाद्यभ्यासं कृतवान् ॥ इत्यस्य ॥ शौनकादिप्रश्नस्य ॥ **उत्तरत्वात्** ॥

किं तु वैराग्यार्थता नुपपत्ते श्चेत्याह ॥ न चेति ॥ अनेनांतःकारणस्य मोहकलीलातिक्रमो नाम ज्ञानप्राप्तिरिति सूचितं भवति ॥ आदि

नचज्ञानिनांभगवन्माहिमादिश्रवणे विरक्तिर्भवति ॥ आत्मारामा[1] हिमुनयोनिर्ग्रंथाअप्युरुक्रमेकुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरितिवचनात् ॥ अनुष्ठानाच्च शुकादीनाम् ॥

पदेन तदुपयुक्तं गृह्यते ॥

कुतो न भवतीत्यत आह ॥ आत्मारामा इति ॥ भक्तिं श्रवणादिलक्षणाम्॥ कस्यवा महतीमेतां आत्मारामः समभ्यसदित्यस्योत्तरत्वात्

॥ कृ० ॥ गीतायां लाभार्थतेत्यत्र हेतुःप्रयोगादिति योज्यम ॥ **अनेनेति** ॥ **ज्ञानिनामिति** ॥ निर्वेदगंतॄणां ज्ञानित्ववचनेनेत्यर्थः ॥ अन्यथा ज्ञानित्वमप्रकृतं न वक्तव्यमिति भावः ॥ तदुपयुक्तमिति ॥ भगवन्महिमश्रवणोपयुक्तं भागवतधर्मतन्महिमादिकमित्यर्थः॥ न चात्मारामा इत्यत्र भगवच्छ्रवणादिकं कुर्वंतीत्यनुक्तेःकथमिदं ज्ञानिनां श्रवणादौ विरक्तिर्न भवतीत्यत्र प्रमाणमित्यत आह ॥ **भक्तिम्** ॥ **श्रवणादिलक्षणामिति** ॥ श्रवणादीनां भक्तिज्ञापकतयोपचारेण भक्तित्वोक्तिरियम् ॥ तेन भक्तेःस्नेहरूपत्वात्कथंश्रवणादिरूपत्वमिति निरस्तम् ॥ अत एव श्रवणकीर्तनादिभक्तिलिंगत्यग्रिमग्रंथाविरोधोपीति ध्येयम्॥ भक्तिशब्देनश्रवणादेर्ग्रहणेऽतरंगज्ञापकमाह ॥ **कस्य वेति** ॥ कस्य हेतोर्महतीमेतां भागवतसंहितां समभ्यसत् तद्विषयकश्रवकणादिकं कृतवानित्यर्थकतत्प्रश्नवाक्यं प्रत्यात्मारामा इत्यस्य प्रत्युत्तरवाक्यत्वादित्यर्थः ॥ नन्वस्तुशुकादीनां श्रवणाद्यनुष्ठानस्य फलभावः ॥ ॥

१ अपरोक्षीकृतपरमात्मान्येवसम्यक् रमत इत्यर्थः ॥ २ शौनककृतप्रश्नः सत्रस्थानांसर्वेषांसंमत इतिसूचयत्यादिपदेन ॥ ३ भा० स्कं० १ अ०७ श्लो०१० आत्मारामाश्चेतिविजयध्वजपाठःहीतिपाठोत्रबहुपुस्तकेषु ॥ यतइत्यर्थः ॥ तस्योत्तरश्लोकेनान्वयः ॥ ४ भागवतधर्मश्च तन्महिमा भागवतमहिमाच आदी यस्येत्यर्थः ॥

॥ श्री० ॥ उत्तरत्वेनात्मारामाइतिश्लोकस्य प्रवृत्तत्वादित्यर्थः॥एवं चात्र भक्तिशद्बेन श्रवणाद्यग्रहणे प्रश्नोत्तरयोर्वैय्यधिकरण्यापत्तेः ॥किमर्थं श्रवणाद्यभ्यासं कृतवानीतिपृष्टे भक्तिं कुर्वंति त्युत्तरस्य व्यधिकरणत्वादतोऽत्रभक्तिः श्रवणादिरूपैव विवक्षितेति भावः ॥ मूले निर्ग्रंथा ॥ अन्यत्र कुत्राप्याग्रहशून्या अपि उरुक्रमे तद्विषये अत्याग्रहेण भक्तिं कुर्वंति ॥ कुत इत्यत उक्तमित्थंभूतगुणो हरिरिति ॥ एतादृशानामपि स्वश्रवणादिविषयकबुद्धिप्रेरकत्वरूपगुणवानित्यर्थः ॥ तत्फलस्य ॥ श्रवणाद्यनुष्ठानफलस्य ॥ तर्हि प्रकृते किमायातमित्यत आह ॥ फलाभावेति ॥ तदा निर्वेदं वैराग्यं गंताऽसि श्रुतं श्रोतव्यं च सर्वं निष्फलमित्यनुसंधानवान् भविष्यसीत्यर्थः ॥ श्रुतादीनां निष्फलत्वानुसंधाने शुकादीनां तदनुष्ठानं व्यर्थं स्यादित्यत आह ॥ अनुष्ठानं त्विति ॥ संस्काराद्वेति ॥ ज्ञानात्पूर्वं फलाऽनुसंधानेनानुष्ठानं कृतमभूत्तत्संस्कारादिदानीमप्यनुतिष्ठंतीत्यर्थः ॥ ननु आन्महतः समानाधिकरणजातीययोः ॥ महत आकारांतादेशः स्यात् समानाधिकरणे एकविभक्त्यंतपदे जातीये चपदे परे ॥ प्रकारवचने जातीयरिति प्रकारवाची जातीयशद्बः ॥ महाकाशम् ॥ महाजातीयः ॥ महतो वस्तुनः प्रकार इत्यर्थः ॥ एवं च कर्मधारयविग्रहे समानाधिकरणे सुखपदे परे महत आकारांतादेशे भाति महच्च तत्सुखं च महासुखं तस्य भावास्तत्वं तस्मात् महासुखत्वादिति वाच्यं महत्सुखत्वादिति तु कथमित्यत आह ॥ स्थान्यादेशोक्तिव्यत्ययेनेत्यादि ॥

अनुष्ठानाच्च श्रवणादेरिति शेषः॥ननु शुकादीनां श्रवणाद्यनुष्ठानेऽपि फलंनास्ति तत्फलस्य ज्ञानस्य प्राप्तत्वात् फलाभावानुसंधानमेव चात्र वैराग्यशद्बेनाभिप्रेतम् यथाऽह मायावादी ॥ तदा श्रोतव्यं श्रुतंच निष्फलंप्रतिपद्यत इत्यभिप्राय इति॥अनुष्ठानं तु लोकसंग्रहार्थं संस्काराद्वे

नचैतेषां फलं सुखंनास्ति ॥ तस्यैव महत्सुखत्वात् ॥

त्यत आह ॥ न चेति ॥ कुतो नेत्यत आह ॥ तस्यैवेति ॥ तस्यैवश्रवणादेरेव स्थान्यादेशोक्तिव्यत्ययेन ॥ ॥ ॥

॥ कृ० ॥ तथाऽपि ज्ञानिनां श्रवणादौविरक्तिर्नभवतीत्यत्र किमायातमित्यत आह ॥ फलाभावानुसंधानमेवेति ॥ ननु महत्सुखत्वादित्ययुक्तम् ॥ आन्महतःसमानाधिकरणजातीययो रिति महच्छद्बस्यात्वे महासुखत्वादिति वक्तव्यत्वादित्यत आह ॥ स्थान्यादेशोक्तिव्यत्ययेनेति ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ अयमर्थः ॥ आन्महत इत्ययं विधिरनित्यः ॥ किं तत्र ज्ञापकमिति चेत् ॥ स्वयमेवसूत्रकृताऽस्य विधेरनित्यत्वं ज्ञापितमित्युच्यते ॥ **स्थानीति** ॥ इको यणचीत्यादावादौ महतइति स्थानिनं निर्दिश्य पश्चादादिति आदेशो निर्देष्टव्यः ॥ न चैवमुक्तं किं नाम आन्महत इति व्यत्यासेनैव तेन ज्ञायते एतत्सूत्रोक्ते विधिर्न नित्य इति किं च समानाधिकरणं च जातीय चेति हि द्वंद्वसमासः ॥ द्वंद्वे चाल्पाच्तरं पूर्वं प्रयोज्यं वैश्यब्राह्मणाविति प्रयोगात् ॥ एवं प्रकृतेऽपि जातीयपदस्य समानाधिकरणपदापेक्षयाऽल्पाच्तरत्वात् जातीयसमानाधिकरणयोगितिवाच्येऽल्पाच्तरस्य जातीयपदस्य परनिपातकरणे नचान्महतइति विधिरनित्य इति स्वयमेवज्ञापितं सूत्रकृता ॥ किं च समानाधिकरणेतत्वपदेपरेऽपिअकारांतादेशमनंगीकृत्य महत्तत्त्वाद्विकुर्वाणादिति भागवते प्रयोगात् प्रकृतेप्याकारांतादेशो न जात इति महत्सुखत्वादिति युक्तमिति ॥ ननु अस्य समाधाने सुधाविरोधः ॥ तत्रचमहत्सत्वगुणत इत्यनुव्याख्यानव्याख्यानसमये महत्तत्त्वमिति द्रव्यविशेषस्य संज्ञा तेनान्महतइति एष विधिर्न भवतीत्युक्तत्वात् ॥ अत्र च महच्च तत् तत्वं चेति विग्रहमंगीकृत्य समानाधिकरणपदे परेऽप्याकारांतादेशाभावोक्तेरिति चेत् ॥ सत्यम् ॥ महत्तत्वशब्दस्य योगरूढत्वाद्रूढिमंगीकृत्य सुधाप्रवृत्ता योगमंगीकृत्येदं समाधानं प्रवृत्तमिति न कोऽपि विरोध इतिसंप्रदायविदः । महासुखजनकत्वेनांशदोपचारादित्यभिप्रेत्योत्तरमाह ॥ **उत्तरक्षण एवेति** ॥ ननु शुकाद्यनाष्ठितश्रवणादिना मोक्षे सुखाभिव्यक्तेः कथं तस्यैवेत्युच्यत इत्यत आह **तिष्ठत्विति** ॥ ॥

द्वंद्वेऽल्पाच्तरस्य परनिपातेन चान्महतःसमानाधिकरणजातीययोरित्यस्य विधेरनित्यत्वज्ञापनान्महत्तत्त्वाद्विकुर्वाणादित्यादिप्रयोगदर्शनाच्च ॥

॥ तेषाम् ॥

महत्सुखत्वादित्युक्तम् ॥ तथाऽपि श्रवणादिकमेव कथं सुखम्॥उत्तरक्षण एवमहासुखोदयादैक्योपचार इत्यदोषः॥तिष्ठतुतावत्कालांतरभावि महत्फलमित्येवशब्दः ॥ नन्वस्मदादीनां श्रवणोत्तरक्षणे सुखं नोत्पद्यत इति अत आह॥ तेषामिति ॥

॥ कृ० ॥ इको यणित्यादिवन्महत आदितिनिर्देशे कर्तव्ये आन्महतइति ॥ स्थान्यादेशोक्तिपौर्वापर्यनियमो यदि स्यात्तदा तदुक्तिव्यत्यय उक्तरीत्याऽनित्यत्वज्ञापकः स्यात् ॥ नन्वेवं ॥ सोराजिसमः ॥ ईदग्नेरित्यादौव्यभिचारात ॥ किं च स्थान्यादेशयोः पौर्वापर्यनियमेउद्देश्यविधेययोः पौर्वापर्यनियम एव मुख्यत्वेन वाच्यः न चासावप्यस्ति ॥ वृद्धिरादैच् ॥ आर्धधातुकं शेषः ॥ कृदतिङित्यादौ व्यभिचारादित्यस्वरसादाह ॥ अल्पाच्तरस्येति ॥ जातीयस्येत्यर्थः ॥ अल्पाच्तरमितिसूत्रेण द्वंद्वेऽल्पाच्तरस्य पूर्वनिपातो विहितः ॥ तथाप्यत्र परप्रयोगो व्यर्थसादितिन्यायेनात्वविधेरनित्यत्वं ज्ञापयतीति भावः ॥ ननु लक्षणहेत्वोः समुद्राभ्राद्घ इत्यादिनिर्देशात् पूर्वनिपातप्रकरणमनित्यमितिशाब्दिकानां संप्रदायः ॥ अतः परनिपातस्यानुरक्तत्वाभावान्नानित्यत्वज्ञापकतेत्यरुच्याऽह ॥ इत्यादिप्रयोगदर्शनादिति ॥

१ प्रयोगानुसारेणएवमेवसूत्रकृदाशयः ॥ एतेनस्थान्यादेशपौर्वापर्यपूर्वनिपातप्रकरणंचानित्यमित्येवज्ञाप्यतां न तु आत्वविधिरितिनिरस्तमितिभावः ॥ २ भिन्नं पदम् तेन नात्वशंका॥

॥ श्री ० ॥ कालांतरभावि फलम ॥ मोक्षगतसुखरूपम ॥ या निर्वृतिरिति चतुर्थस्कंधे साक्षात्कृतभगवंतं प्रति ध्रुववचनम ॥ ततश्चायं श्लोकार्थ ॥ हे नाथ तनुभृतां ब्रह्माद्युत्तमाधिकारिणां तव पादपद्मध्यानात भवतो भवज्जनानां च कथाश्रवणेन वा निर्वृतिः सुखं भवति सा स्वमहिमनि आविर्भूतस्वरूपेऽपि आब्रह्मणि अल्पमुक्ते मा भूत न भवति यदा तदा अंतकासिलुलितात् विमानात पततां स्वर्गादिस्थाना तत्सुखं न भवतीति किमुवाच्यमिति ॥ तथा च शास्त्रे समागतब्रह्मादिदेवतापेक्षया नीचा अपि भक्ताः तद्भक्तिप्रसंगेन स्वस्वरूपसुखं भुंजानाः संतः सुखसंतोजाताः संति तत्स्वरूपसुखापेक्षया उत्तमानां देवानां समाजे श्रवणादिजन्य सुखमेवाधिकम ॥ ननु तेषामाविर्भूतस्वरूपसुखेभ्यो ... सुखमेवाधिकमिति चेन्न ॥ न हि निर्णिक्तकांस्यं अनिर्णिक्त सुवर्णादधिकमिति संभवतीति भाव ॥ तिष्ठतु तात्कालिकानंतरभावि फलमित्येवशब्द इत्युक्तम ॥ तात्कालिकानंतरभावि फलमित्यनेन प्रदर्शनपरमसूत्रवाक्यमित्याशयेनाह ॥ न केवलमिति ॥ तत्कालिकम् ॥ शुकादीनां श्रवणोत्तरक्षणभावीत्यर्थ ॥ न फलम श्रवणादिफलम ॥ ॥ ॥ ॥ ॥

रसिकानामित्यर्थः ॥ न हि पित्रजीवनादिवार्ताश्रवणेनान्येषामिव पुत्रस्यापि न सुखेनोत्पत्तव्यमिति ॥ अस्तु संभावनानिश्चयस्तु कुत इत्य

या निर्वृतिस्तनुभृतां तवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात् ॥ सा ब्रह्मणिस्वमहि

मन्यपि नाथमाभूत्किम्वंतकासिलुलितात्पततांविमानादित्यादिवचनात् ॥

त आह येति ॥ भवतो भवज्जनानां च स्वमहिमन्याविर्भूतस्वरूपे आब्रह्मण्यल्पमुक्ते ॥ न केवलं तात्कालिकं सुखंतत्फलं ॥

॥ कु० ॥ आदिपदेनपरममहत्परिमाणमित्यादेर्ग्रहणम ॥ यथा खलु पुरोग्रतोग्रपुरोरित्यत्राग्रशब्दस्यैदन्त निपातितेऽपि यथं अग्रमग्रविलक्षणमागमिति प्रयोगात्क्वचित्तदभावः ॥ यथा वा अप्सुमनः समासिकतावर्षाणां बहुत्वंचेति पाणिनिनासिकताशब्दस्य नित्यबहुवचनांतत्वोक्तावपि सिकतैत्याद्यपि शिष्टप्रयोगदर्शनात्सिध्यतीति प्रयोगबला त्क्वचित्तदभाव उक्तस्तथात्राप्युपपत्तिरिति भावः ॥ सुधायां तु प्रकारांतरेणोक्तेनेतद्विरोध ॥ कथमनेनोक्तशकानिराम इत्यत आह ॥ रसिकानामित्यर्थ इति ॥ ननु भगवन्माहिमादिश्रवणेनसुखं भवतीत्यत्र कथमिदं मानम् ॥ अत्र भगवद्भक्तकथाश्रवणेन सुखोक्तिरित्यतोभवदित्येतत्तंत्रेणोपात्तं बोध्यमित्यभिप्रेत्य व्याचष्टे ॥ भवतइति ॥ स्वस्मिन्योऽनुभवयोग्यो महिमा यस्येति विग्रहमभिप्रेत्य फलितमाह ॥ अविर्भूतस्वरूप इति ॥ सा ब्रह्मणीत्यत्राद्यपक्षपमभिप्रेत्य व्याचष्टे अल्पसुखेऽपीति ॥

१ अ० १० श्लो० १० २ भवांश्चजनाश्च भवज्जनाइत्येवविग्रहः ॥ निरुपपदजनशब्देनश्रेष्ठजना भगवद्भक्ताएवग्राह्या प्रत्यासत्त्येतिभावः ३ ल्यब्लोपेपंचमीविमानंप्राप्येत्यर्थःपततांगच्छतां ॥

४ आङ् इषदर्थकत्वात् ब्रह्मशब्दस्यमुक्तवाचकत्वात् ॥ परब्रह्माणिमुक्तिगाइति ॥ विजयध्वजटीकायांतुस्वमहिमनिअनन्याधारलक्षणमहात्म्यपरब्रह्मणिस्थितस्यजीवस्येति व्याख्यातम् ॥ तथैवतत्रत्यतात्पर्यात ॥

॥श्री०॥ऐकविध्येति॥श्रवणाद्यनुष्ठाने तारतम्यस्यापि दर्शनात्तन्माध्ये आनंदाभिवृद्धिरूपापवर्गेऽपितारतम्यं स्यादित्यर्थः॥प्रमाणेति॥परमं साम्यमुपैतीति प्रमाणेत्यर्थः ॥मोक्षमात्रं॥लिंगभंगए वफलम नतरतम भावो येनानंदाभिवृद्धिरित्यर्थः॥तदेवासायुज्यमेव॥नात्यंतिकमित्यादीनि तृतीयस्कंधगतानि वाक्यानि ॥तत्रनात्यंतिकामिति हरिं प्रति सनकादीनां वाक्यम् ॥नैकात्म्यतामितिदेवहूतिं प्रति कापिलवाक्यम्॥सालोक्यसार्ष्टिसामीप्यसारूप्यैकमप्युत॥दीयमानं न गृह्णंति विना मत्सेवनं जना इत्यपि देवहूतिं प्रति कापिलस्यैव वाक्यमिति ज्ञेयम्॥ननु आविर्भूतं स्वरूपं येषां तेइतिबहुव्रीहिणै वाविर्भूतस्वरूपवत्त्वरूपार्थलाभात मत्वर्थीयेनेवैयर्थ्यनबहुव्रीहिनिर्वाह्य भवंति मत्वादय इति वचनादत आविर्भूतस्वरूपाणामितिवाच्यामाविर्भूतस्वरूपिणामिति तु कथमित्यत आह॥आविर्भूतेति॥

किं तु मुक्तावानंदवृद्धिश्चेत्याह ॥ तेषामिति ॥ ज्ञानिनामपि ज्ञानोत्तरस्याप्यनुष्ठानस्य यदि फलं स्यात्तर्ह्यनुष्ठानस्यैकविध्यनियमासंभवात्स्वर्गवदपवर्गेपि तारतम्यंप्रसज्येत ॥ नचैतद्युक्तमप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चेत्यतोनेदमनिष्टमितिभावेनाह ॥ तारतम्येति ॥ प्रमाणविरोधाभावाच्चेतिचार्थः कुतःप्रमाणान्मुक्ततारतम्याधिगतिरित्यतोर्थापत्तितावदाह ॥ तथाहीति॥यदिमुक्तानांतारतम्यंनस्यात् ॥ तदामुक्तिमप्यनिच्छतामे

तेषामप्युपासनादिफलस्य साधितत्वात्॥तारतम्याधिगतेश्च॥तथाहि ॥यदि तारतम्यं न स्यात्नात्यंतिकं विगणयंत्यपितेप्रसादं॥ नैकात्मतांमेस्पृहयंति केचित्॥ एकत्वमप्युत दीयमानंनगृह्णतीतिमुक्तिमभ्यनिच्छतामपिमोक्षएवफलम्॥नमिच्छतामपि भवति सुप्रतीकादीनाम्॥कथमनिच्छतांस्तुतिरूपपन्ना स्यात्॥वचनाच्च॥

कांतिनांमोक्षमात्रफलंतंमोक्षमिच्छतामपिसुप्रतिकादीनांमोक्षो भवतीत्यंगीकार्यंस्यात्॥ तथाचनात्यंतिकमितिमोक्षमनिच्छतांस्तुतिःकथमुपपन्ना स्यात् ॥ निमित्ताभावात् ॥ अतःस्तुत्यन्यथानुपपत्त्येच्छतांमुक्ते रनिच्छतां मुक्तिरधिकेतिगम्यतइत्यर्थः आत्यंतिकंमुक्तिहेतुम् ॥ एकात्मतांसायुज्यम् एकत्वमपितदेव ॥ आगमाच्चतारतम्याधिगतिरित्याह ॥ वचनाच्चेति ॥ आविर्भूतस्वरूपिणामितिकर्मधरयादतिशयार्थेइनिः ॥

॥ कृ०॥ परब्रह्मस्थितस्यापि ध्यानादिकं विना न भवति मुक्तौ दृष्टत्वादिति तृतीयस्कंधतात्पर्यनिर्णये तु यां जनानां कर्तामित्यविरोधः ॥ प्रमाणविरुद्धत्वाच्चेति ॥परमं साम्यमुपैतीत्यादिप्रमाणविरुद्धत्वाच्चेत्यर्थः॥सुप्रतीकादीनामिति॥सुप्रतीको नामपूर्वविशेषः॥ स्वर्गनियतानि न वा दृष्टफलत्वप्रवेशनात ॥मोक्ष तारतम्यमित्याहुर्नतु तदनंतःकांतादिति प्रमाणतारतम्यवाचकशब्देन सायुज्यमोक्ष उच्यते इत्युक्तमन्तदनुसारेणाह ॥ सायुज्यमिति ॥ एकत्वमपितदेवेति॥सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णंति विना मत्सेवनं जनाइति तृतीयस्कंधश्लोकोक्तमेकत्वमपि सायुज्यमेवेत्यर्थः॥अत्र श्लोके सार्ष्टिसमानैश्वर्यमितिबोध्यम अतिशयार्थइति तथाऽनातिशयप्रतीत्यैइति प्रयोगाद्बहुव्रीहिनिर्वाह्येकथं मत्वर्थीयइति शंका निरस्तेतिभावः ॥

१ भा० स्कं० ३ अ० १६ श्लो० ४८ २ भा० स्कं० ३ अ० २९ श्लो० ३४ ३ भा० स्कं० ३ अ० २० श्लो० १३ ४ अतिशयेन अंत शरः लिंगदेहनाशः पुनर्देहाप्राप्तेःतस्मिन्भवःविद्यमान आत्यंतिकोमोक्षःमोक्षस्यास्तिफलत्वेनत्वात्यंतिकः तं इति प्रसादविशेषणम् ॥सविशेषणंतिनगायेनमोक्षेच्छैवावनिषिध्यत इतिभावः ॥ ५ ऐकात्म्यतामितिपाठस्वार्थेष्यञ् ॥

॥ श्री ० ॥ आविर्भूतं ॥ तत्स्वरूपं च विर्भूतस्वरूपं तत एषामतिशयेनास्तीत्याविर्भूतस्वरूपिणस्तेषामिति कर्मभाग्यादिनिर्व्यामित्यायत इति न कोपि दोष इति भाव ॥ साम्यमिति ॥ भगवत्साम्यस्यसर्वमुक्तेष्वेकप्रकारत्वान्मुक्तानामपि साम्य प्राप्तमेवेत्यर्थः ॥ ननु साम्य ... विषयमित्युक्तं बहूल्यत मुक्ताना साम्यमेवमसाम्यं तत्वमित्यन्यथाप्रतीतिव्याचष्टे ॥ पूर्णत्वमिति ॥ कुत इति ॥ पूर्णत्वादिनैव साम्यं कुतःसर्वैरपि गुणैः सर्वथा साम्यमेव मुक्तानां किं न स्यादित्यर्थ उक्तनिऽयथाभक्ति... दुःखाभावइति प्रमाणे मुक्तानंदस्य सासांरिकानंदविलक्षणत्वात्परत्व परमत्वं न कथ्यत इति द्रष्टव्यम ॥ मुक्ताना परानंद ... च व्याहतमित्यतोव्याचष्टे ॥ यद्यपीति ॥ किंचितापीत्यत्रापि संभावना ॥ श्रौतप्रयोगे ॥ तस्माद्ब्राह्मणःपांडित्य निर्विद्येत्यादिरूपे ॥ असच्छास्त्रेपि ॥ श्रोतव्यश्रुतपदाभ्यातस्यापि प्राप्तिरित्यर्थ ॥ ॥ ॥ ॥ ॥

अनेनजीवन्मुक्तावैश्वर्यतारतम्येनार्थापत्तरन्यथोपपत्तिः परिहृतालिंगभेदनेभिन्नलिंगानामित्याद्युक्तेः ॥ परमंसाम्यमुपैतीत्यादिवचनविरुद्धं मुक्ततारतम्यमित्यतआह ॥ साम्येति ॥ प्राचुर्यपूर्णत्वं ॥ कुतएतत् ॥ उक्तप्रामाणविशेषात ॥ विशेषवचनाचेत्याह ॥ तथाचेति ॥ यद्यपि परानंदोलंबुद्धिगोचरत्वमात्रेणसमस्तथापि नचज्ञानिनामित्यादिनोक्तमर्थमुपसंहरति ॥ अतइति ॥ अस्तुतर्हिभगवन्महिमादिव्यतिरिक्तश्रु

यथाभक्तिविशेषोऽत्रदृश्यतेपुरुषोत्तमे ॥ तथामुक्तिविशेषो पि ज्ञानिनांलिंगभेदन इति ॥योगिनांभिन्नलिं गानांमाविर्भूतस्वरूपिणाम् ॥ प्राप्तानांपरमानंदंतारतम्यं सदैवहीति ॥ न त्वामतिशयिष्यंतिमुक्तावपि कदाचन ॥ मद्भक्तियोगाज्ज्ञानाच्चसर्वानतिशयिष्यसीतिचसाम्यवचनंतुप्राचुर्यविषयम्॥दुःखाभावविषयं च॥तथाचोक्तम्॥दुःखाभावःपरानंदोलिंगभेदःसमोमतः॥तथाऽपिपरमानंदोज्ञानभेदात्तु भिद्यतइतिनारा यणाष्टाक्षरकल्पे अतोनवैराग्यंश्रुतादावत्रविवक्षितम्नचसंकोचे प्रानंकिंचिद्विद्यमानइतरत्र प्रयोगेमहद्भिः

तादेवैराग्यमत्राविवक्षितमित्यतआह ॥ नचेति ॥ निर्वेदशब्दस्यवैराग्यार्थकत्वेनिश्चितेतद्बलाच्छ्रोतव्यादिशब्दस्यार्थसंकोचःक्रियतापि ॥ इतरत्र नितरांलाभेतस्यप्रयोगेविद्यमानेनिर्मूलसंकोचकल्पनमित्यर्थः॥ननु लाभार्थतायामप्यसच्छास्त्रादिव्युदासायसंकोचःकार्यएवेत्याह॥महद्भिरिति ॥

॥ कृ ० ॥ अनेनेत्युक्तंविवृणोति ॥ लिंगभेदन इति ॥ आदिपदेनाविर्भूतस्वरूपाणामित्यादेर्ग्रहः ॥ उक्तेति॥यथाभक्तिविशेषोत्रेत्याद्युक्तत्यर्थः ॥व्याघातपरिहारायोक्तमलंबुद्धीति ॥

॥ श्री ० ॥ श्रोतुं योग्यं श्रोतव्यमिति शद्वार्थमभिप्रेत्याह ॥अयोग्यतयैवेति ॥ असच्छास्त्रश्रवणस्यासच्छास्त्राधिगमनमिति महापातकेषु परिगणितत्वेन श्रोतुं योग्यत्वरूपंश्रोतव्यत्वं नैव बाधितमिति श्रोतव्यपदात्तनिरामलाभान्नलाभार्थतापक्षे संकोचः कार्य इति भावः॥ प्रकरणाद्वेति त्रैगुण्यविषया वेदाइति वेदादिमच्छास्त्रप्रकरणान्नासच्छास्त्रस्य प्रसक्तियेन संकोचः कार्यः स्यादितिभावः ॥५२॥ अधममध्यमोत्तमावस्थादीति ॥ बुद्धेःश्रुतिविप्रतिपन्नत्वावस्थाऽधमा ॥ परोक्षतत्वानिश्चयावस्थामध्यमा अपरोक्षज्ञानावस्थोत्तमेत्यर्थः ॥ आदिपदेनासंप्रज्ञातसमाध्यवस्थाग्रहणम् ॥ कथमुच्यतइत्यतःश्रुतिर्वस्त्वंतरश्रवणं तस्माद्विप्रतिपन्ना विरक्तेति भास्करेण व्याख्यातत्वादित्याह ॥ यथाहेति पूर्वत्रापीति ॥ तदा गंताऽसि निर्वेदमित्यत्रापीत्यर्थः ॥ इयमवस्था समाधावचलेत्युक्ताऽवस्था ॥ सामर्थ्येति ॥ पूर्वावस्थायांबुद्धेःश्रुतिविप्रतिपन्नत्वे उत्तरावस्थायां श्रुत्याऽनुकूल्यमर्थाल्लब्धमित्यर्थः ॥ काष्ठेति ॥ विपरीतवाग्भिरपि निश्चलत्वावस्थाप्राप्तिः परोक्षज्ञानस्यावधिः फलमित्यर्थः ॥ समाधावचलेत्युक्ते तत्र कारणापेक्षायां भाष्ये ततश्चेत्युक्तं तेन च पूर्वं परोक्षतत्वनिश्चयस्य प्रकृतत्वात्तस्यैव कारणत्वेनानुवृत्तिः प्रतीयतेऽतआह ॥ परोक्षेति ॥ ॥ क ० ॥ अयोग्यतयेति ॥ श्रोतव्यस्य श्रुतस्यचेत्यत्राभ्यंतर्हितत्वान्महाद्भिरिति कर्तृध्याहारेऽसच्छास्त्रादौ महद्भिःश्रोतव्यत्वादेर्बाधितत्वेने

अयोग्यतयैवतन्निरासःप्रकरणाद्वेतिभावः ॥५२॥ ननूत्तरश्लोकेपियोगानुष्ठानविधिरेवोच्यतेऽतःपुनरुक्तिदोष इत्यतआह ॥ तदेवेति ॥ किंतन्मोहकलिलंकीदृशंचतदतितरणमित्याकांक्षायांपुंसामधममध्यमोत्तमावस्थादिप्रदर्शनेनपूर्वश्लोकोक्तमेवयोगानुष्ठानावधिमनेनस्पष्टंकरोतीत्यर्थः ॥ नन्वत्र श्रुतिविप्रतिपन्नेति श्रवणादितोवैराग्यमुच्यते ॥ यथाहभास्करः ॥ वस्त्वंतरश्रवणाद्विरक्तेति ॥ ततःपूर्वत्रापिवैराग्यमर्थःस्यात् ॥

श्रवणीयस्यश्रुतस्यच वेदादेःफलं प्राप्स्यसीत्यर्थः॥ ५२ ॥ तदेव स्पष्टयति ॥श्रुतिविप्रतिपन्नेति॥ पूर्व

श्रुतिविप्रतिपन्ना ते यदा स्थास्यतिनिश्चला ॥ समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि॥५३॥

श्रुतिभिर्वेदैर्विप्रतिपन्नाविरुद्धासतीयदावेदार्थानुकूलेन तत्वनिश्चयेनविपरीतवाग्भिरपि निश्चलाभवति ततश्च समाधावचला ॥

निश्चलाचलेतिचपुनरुक्तिश्च ॥ योगावाप्तेरुत्तराचेयमवस्थातत्कथमुच्यते ॥ तदायोगमवाप्स्यसीतिशंकायांश्लोकंव्याचष्टे ॥पूर्वमिति ॥ पूर्वावस्थायाःसामर्थ्यलब्धंवैलक्षण्यंदर्शयितुमुक्तम् ॥ वेदार्थेति ॥ चलनप्रसक्तिंदर्शयति ॥ विपरीतेति ॥ असच्छास्त्रैरित्यर्थः ॥ अनेनपरोक्षज्ञानकाष्ठादर्शिता ॥ परोक्षतत्वनिश्चयानु ॥ ॥ ॥

त्यर्थः ॥ प्रकरणाद्वेति ॥ श्रोतव्यं श्रुतं चवेदाद्येव मोक्षोपयोगि ज्ञानप्रकरणात ॥ वेदादेरेवज्ञानप्रयोजकत्वात् ॥ तथा च प्रकरणादेवासच्छास्त्रव्युदास इत्यर्थः ॥ ५२ ॥ उत्तमावस्थादीति ॥ आदिपदेनावस्थाकारणसंग्रहः ॥ अनेनेति ॥ असच्छास्त्रश्रवणेपि निश्चलत्वकथनेनेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री ० ॥ एवं च ततश्चपरोक्षत्वनिश्चयानंतरं जातेन ब्रह्मप्रत्यक्षदर्शनेन बुद्धिःसमाधावचला भवतीति भाष्यं योज्यम ॥ एतदिति ॥ भेरीताडनादावप्यचलत्वमित्यर्थः ॥ काष्ठेति ॥
भेरीताडनादावपि निश्चलत्वरूपाऽसंप्रज्ञातसमाध्यवस्थाप्राप्तिरपरोक्षज्ञानस्यावधि फलमित्यर्थः ॥ नन्वत्र योगमवाप्स्यसीति योगावाप्तिर्वोच्यते न तु योगफलावाप्तिस्तत्कथमिदं व्याख्यान
मित्यत आह ॥ योगशब्देनेति ॥ ननु योगस्य कीदृशांगत्वामिति निशंकितस्य श्लोकद्वयेन किमुत्तरं जातमित्यत आह ॥ श्लोकद्वयेपीति ॥ एतदवस्थेति ॥ असंप्रज्ञातसमाध्यवस्थेत्यर्थः
॥ तथा चैतदवस्थाप्राप्तिपर्यंतं योगस्य वारंवारमनुष्ठेयत्वादवहननादिवत् स्वरूपोपकारकांगत्वमित्युक्तं भवतीति भावः ॥ ५३ ॥नन्त्तरश्लोकस्य पूर्वेण संगतेरनुक्तत्वाद्न्यूनतेत्यत आह ॥
ज्ञानिनीति ॥ प्रकृत इति ॥ पूर्वश्लोकेनेत्यर्थः ॥ लब्धावसर इति ॥ शंकाकर्तुंलब्धावकाशइत्यर्थः प्रतिष्ठां निश्चलताम ॥ अर्थांतरामिति ॥ तथा चनपुनरुक्तिरिति भावः ननु
व्यवहारकारणलक्षणशब्दस्य नपुंसकत्वाद्नेनेति तत्कथ्यतेऽनयेति कथमुक्तमित्यत आह ॥ भाषाशब्दस्येति ॥ योगदृत्त्या लक्षणवाचिभाषाशब्दस्येत्यर्थः ॥ ॥ ॥ ॥

वृत्तिव्युदासायोक्तम् ॥ ब्रह्मेति ॥ अत्रापिचलनप्रसक्तिमाह ॥ भेरीति ॥ एतत्कथमित्यतआह ॥ परमेति ॥परमानंदे उपायसिद्धोभवसीत्य र्थः॥
एतेनापरोक्षज्ञानकाष्ठादर्शिता॥उपायेनासिद्धःप्राप्तफलः ॥ योगशब्देनतत्फलमुपलक्ष्यतइतिभावः ॥ श्लोकद्वयेप्येतदवस्थाप्राप्तियोगानुष्ठाना

ब्रह्मप्रत्यक्षदर्शनेनेभेरीताडनादावपि परमानंदमग्नत्वात् ॥ तदायोगमवाप्स्यसि उपायसिद्धोभवसीत्य

॥अर्जुन उवाच ॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्यकेशव ॥ स्थितधीः

किं प्रभाषेत किमासीतव्रजेतकिम् ॥५४॥

र्थः ॥ ५३ ॥ स्थिता प्रज्ञा ज्ञानं यस्य स स्थितप्रज्ञः ॥ भाष्यतेऽनयेति भाषा लक्षणमित्यर्थः

वधिरितितात्पर्यम् ॥ ५३ ॥ ज्ञानिनिप्रकृतेलब्धावसरोऽर्जुनःपृच्छतीति प्रसंगतः स्पष्टं ह्यनुक्त्वा प्रज्ञाशब्दस्य बुद्धिमात्रार्थत्वप्रतीतिनिरासाय
स्थितप्रज्ञशब्दार्थमाह ॥ स्थितेति ॥ प्रतिष्ठां प्राप्ता ॥ ज्ञानमपरोक्षम् ॥ किं प्रभाषेतेत्यतःका भाषेत्यस्यार्थांतरमाह ॥ भाष्यत इति ॥

॥ कृ ० ॥ एतेनेति ॥ भेरीताडनेप्यचलत्वकथनेनेत्यर्थः ॥ ५३ ॥अर्थांतरमिति ॥ तथा चअर्थांतरत्मिति ॥ तथा च न पुनरुक्तिरिति भावः ॥ मूलेभाष्यतेऽनयेति ॥ गुरोश्चहल
इति करणेऽप्रत्ययेऽजाद्यतष्टाबिति टापि च भाषेति रूपसिद्धिरिति बोध्यम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१मात्रशब्दःकार्त्स्न्ये तथा चबुद्धिशब्दःज्ञानेंद्रिय जीवाद्यनेकार्थकः तावतामत्रानुपयोगादिति भावः

॥ श्री० ॥ अनेकत्वादिति ॥ वागिंद्रियशब्दज्ञानानामपि व्यवहारकारणत्वादित्यर्थः॥लब्धसमाधिप्रज्ञस्य॥लब्धासंप्रज्ञातसमाध्यवस्थावत इत्यर्थः ॥ ज्ञानिसामान्येति ॥ संप्रज्ञातसमाधि-
भयावस्थावज्ज्ञानिसामान्येत्यर्थः इत्यनेनोक्तम् असंप्रज्ञातसमाध्यवस्थावत्त्वरूपम्॥ लक्षणत्वं कुत इत्यत आह ज्ञानिमत्रेति ॥ ततश्चातिव्याप्तिशून्यत्वेनासाधारणधर्मत्वाल्लक्षणमित्यर्थः ॥
अन्यथेति ॥ लक्षणांतरंपृच्छामीत्यभिप्रायाभाव इत्यर्थः ॥ सिद्धप्रश्नोपमिति ॥ समाधिस्थस्य ज्ञानिनः समाधिस्थत्वमेव लक्षणमिति सिद्धत्वात् समाधिस्थस्य किं लक्षणमिति प्रश्नः सि
द्धार्थत्वेनोपेक्ष्यः स्यादिति भावः ॥ यथाक्रम ॥ प्रश्नदोषा हि चत्वारः स्वव्याहतिरसंगतिः ॥ सिद्धार्थता च वैफल्यमिति ॥ न तादिति ॥ असंप्रज्ञातसमाध्यवस्थापन्नस्वरूपलक्षणस्य
संप्रज्ञातसमाध्यवस्थापन्नज्ञानिन्यसाविनायावल्लक्ष्यभावित्वेना व्याप्तत्वान्न सार्वत्रिकव्यवहारोपयोगित्वमित्यर्थः ॥ सम्यग्व्यवहारः सार्वत्रिकव्यवहारः ॥ सार्वत्रिकव्यवहारोपयोगि यतोऽ
तस्तादृशं लक्षणं ज्ञास्यमीति योज्यम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ज्ञानीति व्यवह्रियत इत्यर्थः॥भाषेति॥भाषाशब्दस्य स्त्रीलिंगत्वादनयेत्युक्तम् ॥ व्यवहारकारणानामनेकत्वात्कस्यायं प्रश्नऽइति न ज्ञायतेऽत आह ॥ लक्षणमिति ॥ सास्नादिमत्वं लक्षणं दृष्ट्वा हि गौरिति व्यवह्रियते॥ ज्ञानिमात्रव्युदासाय समाधिस्थस्येति विशेषणमिति प्रतीयते ॥ समाधिकुर्वत इति ॥यथाऽहसंकरः ॥ लब्धसमाधिप्रज्ञस्य लक्षणत्वबुभुत्सया अर्जुन उवाचेति तदसादिति भावेनाह ॥ उक्तमिति ॥ ज्ञानिसामान्यलक्षणविषयएवायं प्रश्नः ॥ किमर्थं तर्हि समाधिस्थस्येत्युक्तमिति चेत्समाधावचलाबुद्धिरित्यनेनोक्तं ज्ञानिसमान्यलक्षणमने

उक्तं लक्षणमनुवदति ॥ लक्षणांतरं पृच्छामीति ज्ञापयितुं ॥

नानुवदतीति ब्रूमः ॥ न हिइदं न लक्षणं ज्ञानिमात्रनिष्ठधर्मत्वात् ॥ किमर्थोऽनुवाद इतिचेत ॥ तज्ज्ञानंममेति ज्ञापनायमिति वदामः ॥ एतज्ज्ञापने किं प्रयोजनमितिचेत् ॥ लक्षणांतरं पृच्छामीति ज्ञापयितुम् ॥ अन्यथासिद्धप्रश्नोऽयमित्युपेक्ष्यः प्रसज्येतेति भावः ॥ लक्षणांतर प्रश्नस्य चेदं प्रयोजनं ॥ अयावल्लक्ष्यभावित्वान्नतत्सम्यग्व्यवहारोपयोगि यावल्लक्ष्यभावि तु सार्वत्रिकव्यवहारोपयोगि ज्ञास्यामीति ॥

॥ क० ॥ अनेकत्वादिति लक्षणवदुपदेशादेरपि व्यवहारकारणत्वादिति भावः ॥ ॥ ॥ ॥ ॥ ॥

१सिद्धेज्ञाते विषय सप्तमी प्रश्न इति विग्रहः॥

॥ श्री ० ॥ **अत एवेति** ॥ सार्वत्रिकव्यवहारोपयोगिलक्षणज्ञानस्य प्रश्नप्रयोजनस्य विद्यमानत्वादित्यर्थः ॥ **भाषेति** ॥ भाष्यते व्यवह्रियतेऽनयेति सार्वत्रिकव्यवहारहेतुभूतलक्ष
णवाचिभाषाशब्देनोक्तं प्रयोजनं सूचितमिति भाव. ॥ कश्च अश्चेत्यत्र पूर्वरूपे सति क इत्येव भवतीति ज्ञातव्यम ॥ **अवयवभूता इति** ॥ यस्यावयविभूतस्य ॥ कृष्णस्यावयवभूता इत्य
र्थः ॥ अवयवभूता इतिमत्वर्थीयवप्रत्ययार्थः तथा ह्युक्तम ॥ केशाद्वोऽन्यतरस्यामिति । केशशब्दान्मत्वर्थे वप्रत्ययः स्यात्पक्षिकल्पेनेति सूत्रार्थः एवं च केशशब्दात्त अस्य संतीति मत्वर्थे वप्र
त्यये केशवेति रूपम॥तत्र तद्वत्त्वं कथमस्येति शंकायां अवयविनोऽवयवत्वं प्रसिद्धमित्यभिप्रेत्य मत्वर्थविवरण कृतं तेयस्यावयवभूता इति नन्वेतच्छ्लोकव्याख्यानपरे भास्करीयभाष्ये
केशवशब्दस्यानिरुक्तत्वात्कथं भास्करो निरुक्तवानिति असदनुवाद क्रियत इत्यत आह ॥ **एतच्छ्रुत्वेति** ॥ सर्वदेहिषु ॥ विषये ईशः ॥ संभूतौ च ॥ त इतिशेषः ॥ व्याख्यातिमसमुच्चया
र्थकयोर्विरुद्धयोरेवचशब्दयोरेकवान्वयायोगादध्याहृतात शब्देनान्वय इत्याशयेनाह ॥ **अतइतीति** ॥ यच्छब्दस्याऽसिति भावः ।**तेनेति**॥ तथा चात एवमतोत्र ॥केशव इति संबंधो द्रष्टव्य.
अतःशब्दाध्याहारेपि नतेनैवशब्दसंबंध इत्येवं पक्षांतरमाह ॥ **हिरण्यगर्भ एवेति** ॥ हिरण्यगर्भ एव कशब्देनोक्तः न त्वन्यः प्रजापतिर्दक्षस्तथा शंकर एवेशशब्देनोक्तो न त्वन्यः कश्चि
त्समर्थो राजादिरित्यर्थः ॥ **अंतर्णीतेति** ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अत एव प्रसिद्धलक्षणपदपरित्यागेनाप्रसिद्धभाषापदोपादानमिति॥ कश्चाश्चेशश्च केशाःब्रह्मविष्णुमहेश्वराः ते यस्यावयवभूताःसंकेशवःपरमा
त्मेति भास्करो निरुक्तवानेतच्छ्रुत्वा वचनं केशवस्येत्यत्र तदसदिति भावेनाह ॥ कामिति ॥ कुत इयं निरुक्तिरित्यत आह ॥तथाहीति॥
कोब्रह्मेतिसमाख्यातईशोऽहं सर्वदेहिषु आवांतवांगे संभूतौ ततःकेशवनामवानिति हरिवंशवचनं वचनांतराच्चेयमेव निरुक्तिःस्वीकार्येत्याह ॥

समाधिस्थस्येति॥कंब्रह्माणंईशंरुद्रंचवर्तयसीतिकेशवः॥तथाहि निरुक्तिःकृता हरिवंशेपूर्वैकैलासयात्रायां॥
हिरण्यगर्भःकःप्रोक्त ईशःशंकर एवच॥ सृष्ट्यादिनावर्तयति तौयतः केशवो भवानिति वचनांतराच्च॥

हिरण्यगर्भ इति ॥ अत इति लभ्यते ॥ तेनैवशब्दस्यान्वयः ॥ हिरण्यगर्भ एव न त्वन्यः प्रजापतिः ॥ शंकर एव नत्वन्यसमर्थ इति वा ॥
अनेन केशयोः कर्मणोरुपपदयोरंतर्णीतण्यर्थाद्वृतुवर्तन इत्यस्माद्धातोर्डोऽन्यत्रापि दृश्यत इति डप्रत्यय इत्युक्तं भवति ॥ ॥

॥ क ० ॥ **सकेशव इति** ॥ केशाअस्य संतीत्यर्थे केशाद्वोन्यतरस्यामिति वप्रत्ययः प्रकृतेकेशशब्दस्याद्गुणइतिएकादेशेन लाक्षणिकतयासंप्रकेशशब्देन गृहीतुमशक्यत्वात् लक्षणप्रति
पदोक्तयोःप्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाविरोधात् किंतूक्तसूत्रेऽन्येभ्योपि दृश्यत इति यद्वार्तिकं तेनात्र वप्रत्ययः अवयवभूताइत्युक्तिस्तु ॥ पर्यवसितार्थाभिप्रायेणेति बोध्यम् ॥
डोन्यत्रापि इति ॥ एतद्वार्तिकस्यांतात्यंतेति डप्रकरणस्थत्वात्प्रकरणलब्धप्रत्ययकथनाय ॥ ड इत्युक्तम ॥ न त्वेवमेव वार्तिकपाठ इति ज्ञेयम ॥ ॥ ॥ ॥

॥ श्री ० ॥ अत एव सृष्ट्यादिना वर्तयतीतिणिजर्थो दर्शित इति ज्ञातव्यम् ॥ ननु सप्तम्यां जनेर्डः पंचम्यामजाताविति सप्तम्यंते पंचम्यंते चोपपदे डप्रत्ययविधानात्पंकजमित्युदाहृतत्वाच्च कथमत्र कर्मण्युपपदे सति डप्रत्यय इत्यत आह ॥ डोऽन्यत्रापीति ॥ अन्यत्रापि द्वितीयांते उपपदेऽपि डप्रत्ययो दृश्यत इत्यर्थः ॥ तथाच केशयोः शब्दयोः कर्मणोरुपपदयोः सतोः हनुवर्तने अस्माड्डप्रत्यये तस्य लोपे टीभूतस्यऋत्वित्यस्य लोपे प्रत्ययाकारे च मिलिते सति केशव अ केशवेति रूपम् ॥ आसेः ॥ अस्भुवीतिधातोः ॥ कथमिति ॥ किमासीतेति कर्मप्रश्नः कथमित्यर्थः ॥ अध्याहृतेति ॥ किमित्यत्र न कर्मणि द्वितीया किं तु लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति कर्मप्रवचनीयसंज्ञकप्रतिशब्दाध्याहारेण कर्मप्रवचनीययुक्ते द्वितीयेतिसूत्रेण द्वितीयेति भावः ॥ समाधानम् ॥ गमनादिप्रवृत्तिरित्यादिरूपं यातिशेत्यादिना वक्ष्यमाणम् ॥ नन्वर्जुनस्य लक्षणादिज्ञाने तद्विषयकप्रश्नकरणं न युक्तं तस्य संदेहमूलकत्वादित्यत आह॥प्रश्नस्येति॥अन्यथोपपत्तेरिति॥जानतोऽपि विशेषार्थज्ञानाय स्थापनाय वा॥पृच्छंति साधवो यस्मात्तेन पृच्छसि पांडवेतिवचनाद्विशेषज्ञानाद्यर्थत्वेनोपपत्तेरित्यर्थः

आसेरकर्मकत्वात्कथं कर्मप्रश्न इत्यत आह ॥ किमासीतेति ॥ अध्याहृतप्रतियोगनिमित्तात् द्वितीया न कर्मणीत्यर्थः ॥ प्रश्नकरणादर्जुन

किमासीतकिं प्रत्यासीत ॥ नचार्जुनो न जानाति तल्लक्षणादिकम् ॥

स्याज्ञत्वंप्रतीतं नचिवाच्यति ॥ नचेति ॥ तल्लक्षणादिकम् ॥ ज्ञानिलक्षणं तत्प्रवृत्त्यनुपपत्तिसमाधानं च ॥ प्रश्नस्यान्यथोपपत्तेरिति भावः॥

॥कृ० ननूक्त वार्तिकेनोपपदांतरेसति गमेरेव डो विहितो गमश्चेत्यधिकारात्ग्रामग इत्याद्युदाहरणाच्च तत्कथमत्र तेनड इतिचेन्सत्यं॥तथाऽप्युक्तवार्तिके धात्वंतरादपिडोऽभिप्रेतः॥काव्यदुर्घटवृत्तौ अरिहयोगविचक्षणइत्यत्रारिशब्दोपपदाद्धंतेरन्यत्रापि दृश्यत इति डइत्युक्तत्वात सर्वोपाधिव्यभिचारार्थापिशब्दप्रयोगाच्च ॥ वस्तुतस्तु अन्येष्वपि दृश्यत इति सूत्रस्यार्थानुवादोऽयम्डोऽन्यत्रापिदृश्यत इतीति॥ तथा चान्येष्वपिदृश्यत इतिसूत्रेणात्र डप्रत्यय ॥तेनोपपदांतरेपि धात्वंतरादपि डप्रत्ययविधानादिति बोध्यम ॥ नन्वर्जुनस्याज्ञानित्वे लक्षणादिप्रश्नोऽनुपपन्न इत्यत आह प्रश्नस्यान्यथोपपत्तेरिति ॥ गुर्वादिष्वयात्याद्यर्थत्वेनोपपत्तेरित्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

॥श्री०॥ननु पूर्वेरा नन्शब्दात् राजाहः सखिभ्यष्टजिति टच्प्रत्यये टिभ्रतानित्यस्य लोपे पूर्वराजेत्यकारांतप्रातिपदिके सति जसि पूर्वराजा इति भाव्यं पूर्वराजान इति तु कथमित्यत आह समासांत इति ॥ अनित्यत्वात्तद्वटच् न जात इति नकारांतमेव प्रातिपदिकमिति भाव ॥ तथैवेति ॥ पूर्वराजवज्जानंत्येवेत्यर्थः ॥ ज्ञानिलक्षणादिकं जानंतीत्यत्र कथमिदं मानमित्यत आह ॥ धर्मानिति ॥ ज्ञानिलक्षणादिकमपि ग्राह्यमिति भावः ॥ कथं भवतीत्यन्वय ॥ व्याकरणत्वादित्याशयः ॥ उपपादयंतीति ॥ तत्प्रश्नोत्तरस्य पुराणेषूपनिबंधनेन भविष्यतीत्याशयेनोपपादयंतीत्यर्थः ॥ ननु बुद्धि आमिति स्थिते ह्रस्वनद्यापो नुट् ह्रस्वांतान्नद्यंतादाबंताच्च परस्यामो नुडागमः स्यादिति सूत्रेण नामि परे ऽनडुद्धस्यांगस्य बुद्धीत्यत्रेत्यस्य इकारस्य दीर्घेऽल्पबुद्धीनामिति स्यादित्यत आह ॥ छंदसीति ॥ छंदसि विषये सौत्र विधिरुभयथा भवती यथः ॥तथा च कदाचिद्दीर्घो भवति कदाचिन्नेत्यथः ॥ अस्यापि वचनस्य छंदःकल्पत्वान्नामि परे दीर्घस्याजातत्वादल्पबुद्धीनामिति युक्तमिति भाव ॥ नन्वकृतस्यापि प्रश्नस्योत्तरेन तोऽस्मि तानि नेत्यत्राह ॥ न च प्रश्नाकरणं इति ॥ तथासति प्रतारकत्वप्रसंगादिति भावः ॥ एतेनेति ॥ प्रश्नकरणंलोकानां गुह्यवित्तये इति प्रमाणोपन्यासेन यथं मोहादिस्वाभिभवादित्यत्राद्यादिपदेन प्रश्नाकरण द्वितीयादिपदेन विशेषज्ञानादिरूपनिमित्तग्रहणं तथा च मोहोऽभिभवात्प्रश्नकरणं च गुह्यवित्तये इति यत्पूर्वमुक्तं तत्प्रमाणोपन्यासेन प्रपंचितं भवति ॥ आदिपदद्वयोक्तार्थेऽस्य प्रमाणत्वादिति भावः ॥ ५४ ॥

कुत इत्यत आह ॥ जानंतीति ॥ समासांतोविधिरनित्यः अतः पूर्वराजान इति साधु ॥ देवर्षयश्च तथैव जानंत्येव धर्मानित्युपलक्षणम् ॥ वार्तायै गुरोरात्मनां च स्थात्यै ॥ लोकस्य गुह्यार्थवित्तये ॥ एतेषां प्रश्नकरणं लोकानां कथं गुह्यार्थवित्तये भवतीत्यतो व्यतिरेकमुखेनोप

जानंतिपूर्वराजानो देवर्षयस्तथैवच ॥ तथापि धर्मान्पृच्छंतिवार्तायैगुह्यवित्तये ॥ नते गुह्याःप्रतीयंते पुराणेस्वल्पबुद्धिनामिति वचनात् ॥५४॥

पादयंति ॥ न त इति ॥ छंदस्युभयथेत्यतोल्पबुद्धीनामिति दीर्घत्वाभावः गुह्यास्तेऽर्थाः पुराणादिषु प्रश्नोत्तरोपनिबंधनेन विनोक्तिमात्रेणाल्पबुद्धीना व्यक्तं न प्रकाशंते ॥ न च प्रश्नाकरणे तदुपनिबंधनं संभवतीति भावः॥एतेन मोहादिस्वाभिभवादित्येतत्प्रपंचितं भवति॥५४॥क० ॥ननु राजाहःसखिभ्यष्टजितिटच्प्रत्यये पूर्वराजा इति स्यादित्यत आह॥समासांत इति॥ननु ज्ञानिलक्षणादिकं जानातीत्यत्र कथमिदंमान लक्षणादिज्ञानित्वानुक्तेरित्यत आह॥धर्मानित्युपलक्षणमिति॥ नन वार्ताशब्देन वृत्तान्तग्रहणे संगतिरित्यत आह वार्ताया इति॥ वृत्तिर्गुरोरात्मनां च वृत्तमस्यामस्तिविषयतयेतिवार्ता ॥ प्रज्ञाश्रद्धार्चाभ्यो णः इतिणप्रत्यये आदिवृद्धिः तथा च योगेनोक्तार्थलाभ इतिभाव नन् स्वस्यगुह्यार्थवित्तये इति व्याख्याने जानंतीत्यनेन व्याहतिः नतंगुह्याइत्युपपादनाननुगुण्यंचेत्यत आह लोकस्येति ॥ छंदस्युभयथेतीति नामि यो दीर्घस्तत्करणस्थानिदं सूत्रम् अस्यार्थः ॥ सिद्धांतकौमुद्यामुक्तः ॥ नामि दीर्घो व स्याच्छंदसीति ननु न चार्जुन इत्यादिग्रंथो मोहादिस्वाभिभवादित्यनेनैव गतार्थः तत्रादिपदाभ्यां प्रश्नस्य कथ्यात्याद्यर्थत्वसूचनादित्यत आह एतेनेति॥ प्रश्नस्यकथ्यात्याद्यर्थत्वप्रतिपादनेनेत्यर्थः ॥ तथा च मोहादिरितिवाक्यप्रथमादिपदेन प्रश्नो द्वितीयेन तु न केवलंप्रमाणांतरबलाद्विशेषज्ञानंस्थापनं च ग्राह्यम्॥किं त्वेतत्स्मृतिबलात्कथ्यात्याद्यपीति पूर्वोक्तस्यैव प्रपंचनान्नगतार्थतेतिभावः॥५४॥

॥श्री० ॥अनंतरप्रकरणेति॥श्री भगवानुवाच प्रजहातीत्युत्तरप्रकरणेत्यर्थः॥इषदभिसंधिः॥देहयात्रार्थमिति शेषः॥ननु गीतानुसारेण भाषणादीति वक्तव्यं वैपरीत्येन व्रजेतेत्युक्तगमनस्यादित्वेन वचनं किं प्रयोजनमित्यत आह ॥ प्रवृत्तिमात्रमिति ॥ प्रवृत्त्युद्देश्योऽर्थोऽयमिति प्रतिवक्तुं कस्मान्नशक्य इत्यत आह ॥ अनेकेषामिति ॥ पुरुषाणामित्यर्थः॥एकरूपस्य ॥ एकप्रकारस्य ॥ उत्तरस्थानेति ॥ या निशेत्यादिरूपेत्यर्थः ॥ अन्यथेति ॥ प्रवृत्त्युद्देश्यप्रश्नस्य व्यर्थत्वेनोपेक्षितत्वाभावे यथोत्तरत्र महदुद्देश्यं नः प्रवृत्तौ कथ्यते एवमल्पमप्युद्देश्यं तत्प्रवृत्तावस्ति तदपि वक्तव्यं स्यादित्यर्थः ॥ तथा चाल्पमुद्देश्यं यथा नोक्तमेवं महदुद्देश्यमपि नोक्तमित्येवास्तु किं तदुत्तरस्थानप्रदर्शनेनेति भावः न कुर्यादित्यतः परं कारणाभावादिति शेषः ॥ उक्तम ॥ परमानंदतृप्तत्वम ॥ सुखतः ॥ आपाततः ॥ अतः आक्षेपरूपत्वात ॥ अर्हतीति ॥ किंतु परमानंदतृप्तत्वेऽपि प्रवृत्तिर्घटते मत्तादिवत इत्याशयेन गमनादिप्रवृत्तिरित्यादिनात्वदुत्तरस्थानप्रदर्शनं कार्यमिति ज्ञेयम ॥ नन्वाक्षेपगर्भत्वं प्रश्नस्य किमिति कल्प्यते प्रश्नमात्रमेवतत किं न स्यादित्यत आह ॥ एतच्चेति ॥

लक्षणप्रश्नस्यैवोत्तरं प्रतीयते न तु स्थितधीरित्यादेरित्यतस्तदुत्तरस्थानं दर्शयन्ननंतरप्रकरणार्थं दर्शयति ॥ गमनादीति ॥ अभिसंधिः प्रयोजनोद्देशः ॥ इषदभिसंधिसूचनायानिशब्दः ॥ प्रवृत्तिमात्रमिहाभिप्रेतं न भाषणादिकमेवेति ज्ञापनाय भाषणादीति नोक्तम् ॥ व्यवहाराय लक्षणप्रश्नो घटते ॥ प्रवृत्त्युद्देशप्रश्नस्तु व्यर्थ एव ॥ न च शक्यः प्रतिवक्तुम् ॥ अनेकेषां प्रवृत्त्युद्देश्यस्यैकरूपस्याभावादित्यभि

गमनादिप्रवृत्तिर्नात्यभिसंधिपूर्विका मात्तादिप्रवृत्तिवदिति या निशेत्यादिना दर्शयिष्यन्लक्षणं प्रथमत आह ॥ एवंपरमानंदतृप्तःकिमर्थमेवं प्रवृत्तिंकरोतीति प्रश्नाभिप्रायः ॥

प्रायेण भगवतोपेक्षितोऽसाविति किं न स्यात्किंतदुत्तरस्थानप्रदर्शनेन ॥ अन्यथाऽल्पमप्युद्देश्यं वक्तव्यमित्यत आह ॥ एवमिति ॥ एवं भेरीताडनादावपि ॥ अचलेत्युक्तप्रकारेण परमानंदतृप्तश्चेत्किमर्थं प्रवृत्तिं करोति न कुर्यात् ॥ करोति च तस्मादुक्तमसदित्युक्ताक्षेपएवात्राभिप्रेतप्रश्नस्तुमुखत एव ॥ अतोनोपेक्षामर्हतीतिभावः ॥ एतच्चार्जुनस्य प्रेक्षावत्वाद्गम्यते ॥ ॥ ॥

॥कृ०॥ ननु अभिसंधिरभिप्रायो ज्ञानमेव तथा च गमनादिप्रवृत्तेर्ज्ञानपूर्वकत्वात्कथमभिसंधिपूर्वकत्वनिषेध इत्यत आह ॥ अभिसंधिरिति ॥ ननु पाठक्रमेण भाषणादीतिवक्तव्यं गमनादीति कथमुक्तमित्यत आह प्रवृत्तिमात्रमिति ॥ उक्तमिति ॥ परमानंदतृप्तत्वमित्यर्थः ॥ ॥ ॥ ॥

॥श्री०॥प्रश्नस्याक्षेपगर्भत्वम्॥ न हि प्रेक्षावान्नर्थमनर्थं प्रवृत्त्युद्देश्यप्रश्नं कुर्यात ॥ तथात्वे प्रेक्षावत्त्वहानिःस्यादतस्तदन्यथाऽनुपपत्त्यैतत्कल्प्यत इति भावः॥एवं चेत् ॥ आक्षेपगर्भप्रश्नश्चेत् न पूर्णः उक्ताक्षेपपरिहारासमर्थः ॥ द्वितीयं प्रश्नमिति ॥ ननु गमनादिप्रवृत्तिप्रश्नस्य चतुर्थत्वात् चतुर्थं प्रश्नमितिवक्तव्यम् ॥ सत्यम् ॥ प्रवृत्तिप्रश्नत्वेन भाषणादिप्रश्नानामेकरूपत्वाभिप्रायेण द्वितीयमित्युक्तमित्याशयः ॥ प्रवृत्ति लिंगेनेति ॥ दैत्यानां वरदानादिरूपप्रवृत्तिलिंगेनत्यर्थः ॥ आगमाच्चेति ॥ कश्चिद्विरुद्धकामोऽपि यथा युध्यद्वरो हरिमित्यागमाच्चेत्यर्थः उपलक्षणमेतदिति॥ ज्ञानादिविषयकेच्छायामपि प्राक्ब्रह्मजिज्ञासेत्यादिप्रमाणोपन्यासात् ज्ञानादिकमपीच्छतीति ग्राह्यम् बहुतरेति ॥ अहल्याधर्षणादिरूपेत्यर्थः ॥ तथाभूताः ॥ बहुतरविरुद्धकामवंतोऽपि ॥ प्रकृतिविशेषमंज्ञेति ॥ पदस्थानामज्ञेत्यर्थः ॥ के ते प्रकृतिविशेषा इत्यत आह ॥ प्रजापाश्चतथादेवा इत्यादिवचनादिति ॥ प्रजापाश्च तथा देवा महाधिकारिणः स्मृताः ॥ ऋष्यप्सरसस्तथा मत्र पितरोऽप्सरसांगतम ॥ गंधर्वाणां तथा राज्ञां विशद्रन्यासु जातिषु ॥ अल्पाधिकारिणः प्रोक्ता अनधिकारिणः पर इति पंचमस्कंधतात्पर्यादिहब्रह्मांडपुराणवचनादित्यर्थः ॥ रा० ॥द्वितीयं प्रश्नमिति ॥ भाषणादिप्रश्नानां प्रवृत्त्युद्देश्यप्रश्नत्वेनैकत्वादेकवचनमिति बोध्यम् ॥ ईषदित्यनंतरमध्याहार्यमाह॥ विरुद्धकाम्यस्ये

एवं चेद्गमनादिप्रवृत्तिरित्युक्तःपरिहारो न पूर्णः ॥ प्रवृत्तिकारणानुक्तेरित्यत आह ॥ प्रारब्धकर्मणेति ॥ ईषत्तिरोहितं ब्रह्म यस्यासौ तथोक्तः परिहरति द्वितीयं प्रश्नम् यानित्यादाविति शेषः ॥ ननु सर्वकामप्रहाणं ज्ञानिलक्षणत्वेनोच्यते ॥ तत्कथमल्पाभिसंध्यंगीकार इत्यत आह प्राय इति ॥ कुतःसर्वशब्दसंकोच इत्यत आह ॥ शुकादीनामिति ॥ विरुद्धकामस्येति शेषः तच्च प्रवृत्तिलिंगेनागमाच्च ज्ञातव्यम् ॥ अनुकू

प्रारब्धकर्मणेषत्तिरोहितब्रह्मणःवासनया प्रायोऽल्पाभिसंधि प्रवृत्तिःसंभवतीत्याशयवान् परिहरति ॥ प्रायः

॥श्रीभगवानुवाच॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ॥ आत्मन्येवात्मना तुष्टःस्थितप्रज्ञस्तदोच्यते ॥५५॥

सर्वान्कामान्प्रजहाति॥शुकादीनामपीपद्दर्शनात॥त्वत्पादभक्तिमिच्छंतिज्ञानिनस्तत्त्वदर्शिन इत्युक्तेस्तामिच्छंति॥ लकामस्तु सर्वथास्त्येवातोऽपि संकोच इत्यत आह ॥ त्वत्पादेति ॥ तां भक्तिम् ॥ उक्षणमततेपल ॥ प्रायेण विरुद्धकामत्यागो ज्ञानिनो लक्षणं चेदिंद्रादीनां ज्ञानित्वं न स्यात्॥बहुतरविरुद्धकामदर्शनात ॥ ति शेष इति प्रवृत्तिलिंगेनेति॥कृष्णेनोत्तरगर्भविषयेऽस्त्रंविनिवर्तितेत्युक्तेऽपिद्रौणेरस्त्रनास्त्रपातनादिरूपविपरीतप्रवृत्तिलिंगेनेत्यर्थः ॥ आगमादिति॥कश्चिद्विरुद्धकामोऽपियथा युध्यद्वरोहरिमित्याद्यागमादित्यर्थः॥उपलक्षणमिति॥ज्ञानादिकामनाथा॥ अपि प्राक्साधितत्वादिति भावः

१शुकशब्दोरुद्रावतारोपलक्षक इति भावः २ न केवलमवतारोपलक्षको मूलरूपकश्चेति भावः

श्री०॥एतदागमोक्तादेवेति बहुप्रारब्धकर्मवत्त्वाख्यबृहत्कर्मत्वरूपवैलक्षण्यादेव॥ अनेन॥ आग्रहादीत्यादिपदेन॥भाष्ये क्रोधादीनां संगृहीतत्वेन प्रजहाति यदा कामानित्यत्र कामशब्द क्रोधादीनामुपलक्षकइति सूचितमित्यर्थ. समंजसं स्यादिति॥पूर्वोक्तानुवादरूपत्वाभावादिति भावः॥ असंप्रज्ञातसमाधिस्थस्य ज्ञानिनो लक्षणमेतदितिव्याख्याने इंद्रादीनां बहुतरविरुद्धकामदर्शनात ज्ञानित्वं न स्यादित्याक्षेपस्य प्रसक्तिरेव नास्तीन्द्रादीनामसंप्रज्ञातसमाध्यवस्थाभावात ॥ तथात्वे जगद्व्यापारविलयापत्ते. । तथा च लक्ष्यतावच्छेदकानाक्रांतत्वेन लक्ष्यतया निरूपयितुं सर्वकामप्रहाणिरूपलक्षणस्येंद्राद्यसंभवो न दोषायेत्याशयेनाह ॥ इंद्रादीति ॥ ॥ ॥ ॥ ॥ ॥

तैथाभूता अपि चेद्ज्ञानिनस्तर्हि देवदत्तादयोऽपि किं न स्युरित्यत आह॥यदेति॥ आग्रहो विरुद्ध कामाभिनिवेशः ॥ एतत्प्रमाणेन स्थापयति तच्चोक्तमिति ॥ आधिकारिका इतिपुरुषविशेषसंज्ञा ॥प्रजापाश्च तथा देवा इत्यादिवचनात्॥देवदत्तादिप्रतिबंदीमोचयति॥अत एवेति॥एतदागमोक्तादेव ॥ आदिपदेन विरुद्धक्रोधादिग्रहणम् ॥ अनेनकामशब्दःक्रोधादीनामुपलक्षणार्थ इतिसूचितं भवति ॥ ननु समाधिं कुर्वतो ज्ञानिनो

यदा त्विंद्रादीनामाग्रहो दृश्यतेतदाऽभिभूतंतपांतच्चोक्तम् ॥ अधिकारिकपुंसातुबृहत्कर्मत्वकारणात् ॥ उद्भवाभिभवौज्ञानेततोऽन्येभ्योविलक्षणाइति ॥अतएववैलक्षण्यादनधिकारिणामाग्रहादिचेदस्तिनतेज्ञानिनइत्यवगंतव्यम् ॥ नचात्रसमाधिकुर्वतोलक्षणमुच्यते ॥ यःसर्वत्रानभिस्नेह इत्यादिस्नेहनिषेधात् ॥

लक्षणमेतदिति व्याक्रियताम् ॥ तथासति प्रश्नवाक्यस्थं समाधिस्थस्येतिपदं समंजसं स्यात ॥ सर्वशब्दश्चासंकुचितार्थः स्यात्॥इंद्रादिविषयाक्षेपाप्रसक्तिश्चेत्यत आह ॥न चेति समाधिंकुर्वतःस्नेह निषेधोऽनुगुण एवेत्यत आह नहीति नात्रस्नेहनिषेधमात्रमुच्यते॥किंतु तत्तत्प्राप्यशुभाशुभामिति शुभाशुभार्थप्राप्तिपूर्वकम्

॥कृ०॥पुरुषविशेषानि ॥ महाधिकारिणोऽल्पाधिकारिणश्चेति द्विविधपुरुषेत्यर्थः ॥इत्यादिवचनादीति॥प्रजापाश्च तथा देवा महाधिकारिणः स्मृताः॥ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम ॥ गंधर्वाणातथाराज्ञा विंशदन्यासु जातिषु ॥ अल्पाधिकारिणः प्रोक्ता अनधीकारिण पर इति पंचमस्कंधतात्पर्यवचनादित्यर्थ. ॥ विरुद्धक्रोधादीति आदिपदेनाविरुद्धमत्सरादेः संग्रहः ॥ कामशब्द इति प्रजहाति यदाकामानितिकामशब्द इत्यर्थः ॥ इंद्रादीति ॥ तेषामाग्रहकालेसमाध्यभावेनालक्ष्यत्वादेतव्याप्तिशंकाभाव इत्यर्थः ॥ ॥

१ तथा भूतेत्यारभ्य प्रजापाश्चतथा देवा ॥ इत्यादिवचनादित्यंतटीकोपरि श्रीनिवासतीर्थीय व्याख्या एतत्पृष्ठस्यनिम्नपृष्ठे द्रष्टव्या ॥

॥ श्री० ॥ असंभवीति ॥ शुभाशुभप्राप्तिपूर्वकं तत्र स्नेहशून्यत्वलक्षणमसंप्रज्ञातसमाध्यवस्थापन्ने लक्ष्ये नास्तीत्यसंभव इत्याशयः ॥ यत्र नास्तीति॥ किं तु केवलं भगवदनुसंधानमे वास्तीति शेषः ॥ इतर इति ॥ बहुतरं भगवदनुसंधानमस्ति बाह्यार्थानुसंधानं चेषदित्यर्थः ॥ ननु असंप्रज्ञातसमाध्यवस्थावत एवेदं लक्षणम् ॥ न च यः सर्वत्रेति लक्षणस्यासंभवदोष इति वाच्यम ॥ समाधिस्थस्येति विशेषणबलात् तथा प्रजहाति यदा कामान सर्वानिति सर्वशब्दबलात् तदर्थं प्रायेण विरुद्धकामत्यागस्य लक्षणत्वे इंद्रादौ बहुतरविरुद्धकामदर्शनेनज्ञा नित्वं न स्यात्तथाभूतानामपि ज्ञानित्वे देवदत्तादीनामपि तथात्वापत्तेरिति बहुभ्योऽज्ञापकेभ्योऽसंभवरूपस्यैकस्य दोषस्य बाधमसत्वादित्यत आह ॥ सावकाशेभ्य इति ॥ अत्रास्यानुवा दपरत्वेनाद्वितीयस्य सर्वशब्दसंकोचेन तृतीयस्येंद्रादीनामभिभूतज्ञानत्वेन सावकाशत्वं ज्ञातव्यम ॥ उक्तदोषाभावादिति ॥ यः सर्वत्रेति लक्षणस्यासंभवाख्यदोषाभावादिति भावः ॥ प्रजहा तीत्युक्तं कामादिहानं तूभयानुगतं लक्षणमस्त्विति वाक्यशेषः॥विरोधो दोष ॥ कामादिहानमिति ॥ प्रजहातीत्यनेनोक्तमुभयानुगतं लक्षणमिति तूक्तं कामादिहानमित्यर्थः

॥ न च तत्प्राप्तिः समाधिंकुर्वतो ज्ञानिनोऽस्ति कुत इत्यत उक्तम् असंप्रज्ञातेति ॥ असंप्रज्ञातःसमाधिर्यस्यासौ तथोक्तः ॥ बाह्यार्थानुसं धानं यत्र नास्तिसोऽसंप्रज्ञातसमाधिः ॥ इतरःसंप्रज्ञातसमाधिरिति योगशास्त्रे प्रसिद्धिः ॥ तथा च लक्षणमसंभवि प्रसज्जेत ॥ सावकाशे

नहिसमाधिंकुर्वतस्तस्य शुभाशुभप्राप्तिरस्ति ॥ असंप्रज्ञात समाधेःसंप्रज्ञाते त्वविरोधस्तथापि न तत्रैवेति नियमः ॥

भ्यो बहुभ्यो निरवकाशस्यैकस्य बलवत्वामिति भावः ॥ एवं तर्हि संप्रज्ञातसमाधिस्थस्यैतल्लक्षणमस्तु तत्रोक्तदोषाभावादित्यत आह ॥ संप्रज्ञाते त्विति ॥यद्यपि संप्रज्ञातसमाधौ शुभाशुभप्रतीतिसंभवेनासंभवित्वंनाम लक्षणविरोधो नास्ति ॥ तथापि कामादिहानं

॥कु०॥सावकाशेभ्यो बहुभ्य इति॥ अनुवादत्वेन संकोचावश्यंभावेनाभिभूतज्ञानत्वेन च सावकाशेभ्यः ॥ समाधिस्थ पदसामंजस्यादिभ्यो बहुभ्य इत्यर्थः ॥ उक्तदोषेति ॥ असंभवेत्यर्थः

॥ श्री० ॥ ॥ **समाधिस्थएवेतीति** ॥ संप्रज्ञातासंप्रज्ञातरूपोभयविधसमाध्यवस्थापन्ने ज्ञानिनीत्यर्थः ॥ **असमाधिस्थेऽपीति** ॥ प्रारब्धकर्मानुसारेण लोकयात्राव्याख्याना दिना विक्षिप्तचेतसउभयविधसमाधिशून्येऽपरोक्षज्ञानिनीत्यर्थः ॥ **कामादय इतीति** ॥ विक्षिप्तचेतसामित्यनेन समाध्यभावोक्तेः कामादय इतिवाक्यं असमाधिस्थेपि ज्ञानिनि कामाद्यभावसद्भावे प्रमाणमिति ज्ञातव्यम् **तदर्थमिति** ॥ असमाधिस्थेऽतिव्याप्तिपरिहाराय सर्वथाकामादिहानं लक्षणतया विवक्षितम् ॥ विक्षिप्तचेतस्यसमाधिस्थे कदाचित कथंचित् कियांश्चित् चाविरुद्धकामः संभवतीति तद्व्यावृत्तिरिति भावः ॥ **पुरुषविशेषेति** ॥ उत्पन्नापरोक्षज्ञानि ऋजुगण इत्यर्थः ॥ तत्र लोकयात्राव्याख्यानादिनोभयसमाध्यभा वदशायामप्यच्छिन्नधर्मत्वेन विरुद्धकामसंभावनाया अप्यभावात ॥ यथोक्तं ब्रह्मणा ॥ न भारती मेऽङ्गमृषोपलक्ष्यते न कर्हिचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे य न्मे हृदौत्कंठ्यवतो धृता हरिरिति ॥ अस्मन्मत इति ॥ संप्रज्ञातरूपोभयविधसमाध्यवस्थापन्नज्ञानिनो लक्ष्यत्वमिति मते तत्तत्प्राप्य शुभाशुभमिति लक्षणस्यासंप्रज्ञातसमाध्यवस्थाविशिष्टेऽ व्याप्तिदोष इत्यर्थः ॥ **असंप्रज्ञातसमाधिस्थव्यतिरिक्तेति** ॥ संप्रज्ञातसमाधिस्थेत्यर्थः ॥ **विषयत्वादिति** ॥ तत्तत्प्राप्य शुभाशुभमिति लक्षणस्येत्यर्थः ॥ तर्हिसंप्रज्ञातसमाध्यवस्थावतः किंलक्षणमित्यत आह ॥ **संभवतइति** ॥ प्रजहातीत्याद्युक्तस्य प्रायो विरुद्धकामरहितत्वादेः संभवतः असंभवरहितस्य लक्षणस्य तद्विषयत्वात् असंप्रज्ञातसमाधिस्थविषयत्वादित्यर्थः ॥

समाधिस्थ एव पुंसि इति नियमो नास्ति । असमाधिस्थेऽपि ज्ञानिनिविद्यमानत्वात् तथाच्चातिव्याप्तिःस्यादित्यर्थः ॥ असमाधिस्थेऽपि ज्ञानिनि कामाद्यभावः कुत इत्यत आह ॥ कामादय इति ॥ तदर्थंसर्वथेतिविशेषणप्रक्षेपेऽपि पुरुषविशेषेऽतिव्याप्तिपरिहारो दुर्घट एव ॥

कामादयो न जायंतेह्यपि विक्षिप्तचेतसाम् ॥ ज्ञानिनां ज्ञाननिर्धूतमलानां देवसंश्रयादितिचस्मृतेः ॥ मनोगताहिकामाः ॥ अतस्तत्रैव तद्विरुद्धज्ञानोत्पत्तौ युक्तं हानं तेषामिति दर्शयति॥

न चास्मन्मतेऽप्यव्याप्तिदोषः ॥ असंप्रज्ञातसमाधिस्थव्यतिरिक्तविषयत्वात् ॥ संभवतस्तु तद्विषयत्वादिति ॥

॥क्रु०॥**सर्वथेति**॥असमाधिस्थज्ञानिनांतु कदाचित्कियांश्चिद्विरुद्धकाम संभवत्येवेतितद्व्यावृत्तिरिति भावः पुरुषविशेष इति॥अपरोक्षज्ञानिऋजुगण इत्यर्थः॥तत्र लोकयात्रादिनोभयविधसमा ध्यभावदशायामप्यच्छिन्नधर्मत्वेन विरुद्धकामसंभावनाया अप्यभावात ॥ न च तेषामुभयविधसमाध्यभावासिद्धिः ॥अज्ञानं तु चतुर्विधमित्यादिनातत्सिद्धेरितिभावः ॥ प्रजहातीत्युक्तापरो क्षज्ञानिलक्षणस्यानपरोक्षज्ञान्यृजुषु यथा नातिव्याप्तिस्तथैवान्यत्र ज्ञानोपायानामित्येतद्व्याख्यानसमं स्पष्टम् ॥ व्यतिरिक्त विषयत्वादिति ॥ तत्तत्प्राप्य शुभाशुभमित्यादेरिति शेषः ॥ ॥ **संभवतस्त्विति** ॥ प्रजहातीत्याद्युक्तस्येत्यर्थः ॥ ॥ ॥

॥श्री०॥ इदमत्राकूतम्॥उभयावस्थाविशिष्टस्यापिज्ञानिनः प्रजहातीत्युक्तप्रायःसर्वकामप्रहाणिर्लक्षणं इदमेव च सार्वत्रिकव्यवहारोपयोगि॥न च प्रायःपदवैयर्थ्यं शंक्यम॥असंप्रज्ञातसमाधिस्थेऽपि भक्तिज्ञानादिकामनायाः सत्त्वेन तद्व्यावृत्त्यर्थत्वात् ॥ अत एव त्वत्पादेत्यादिप्रमाणोदाहरणं कृतम संप्रज्ञातावस्थाविशिष्टज्ञानिमात्रस्य तु तत्तत्प्राप्त्येत्युक्तं लक्षणमिति द्रष्टव्यम् ननु रुद्रादौ बहुतरविरुद्धकामसत्तादशायां प्रायः सर्वकामप्रहाणिर्नास्तीत्यसंभव इति चेन्न ॥ इष्टत्वात् ॥ अत्रानभिभूतज्ञानित्वं लक्ष्यतावच्छेदकं तस्य तदनाक्रांतत्वात॥ रुद्रादिदेवानां तावदसंप्रज्ञातसमाधिर्नास्त्येव तथात्वे जगद्व्यापारविरहप्रसंगात ॥ यथोक्तं या निशेत्यत्र तात्पर्ये ॥ देवेष्वोऽन्ये यदा ब्रह्म पश्यंत्यन्यत्र दृश्यत इत्यादि ॥ तथा च संप्रज्ञातसमाधिना यदाज्ञानित्वावस्थातदानीमेव लक्ष्यत्वं न तु ज्ञानाभिभवेन विरुद्धकामात्तदशायाम ॥ यथोक्तं तात्पर्ये ॥ अपरोक्षदृशोऽपि स्याद्यदा नास्त्यपरोक्षदृक् ॥ कश्चिद्विरुद्धकामोऽपि यथा युध्यद्धरो हरिम ॥ अतोऽनभिभवो यावद्धर्मस्तावत्त्रिगम्यते लिंगात्मक इत्यादि ॥ अतोऽत्र नाननुगमादिशंकेति द्रष्टव्यम ॥ केचित्तु प्रजहातीत्युक्ततत्प्राप्त्येत्युक्तलक्षणवदन्यान्यत्वंसर्वत्रास्तीति नानुगम इत्याहुः ॥ ननु कामस्य ज्ञानेन विरोध इत्यत्र कथमिदंमानम ॥ रसशब्दस्य कामवाचित्वाभावादित्यत आह ॥ रसो राग इति वक्ष्यतीति ॥ रसो रागस्तथा रक्तिः शोभनाध्यास एव चेत्यभिधानं वक्ष्यतीत्यर्थः ॥ अनुमानादिति ॥ ज्ञानिनः न सर्वकामप्रहाणिमंतःपुरुषत्वादस्मदादिवदितिज्ञानिषु सर्वकामप्रहाण्यभावस्यानुमानादित्यर्थः ॥ उदाहृत इति ॥ कामादयोन जायंत इत्युदाहृतेत्यर्थः ॥ ॥ ॥ ॥ ॥

कामानां मनोगतत्वाद्व्यर्थं विशेषणमित्यतोनेदं विशेषणं किं तु सर्वकामत्यागस्यासंभवित्वमाशंक्य तदुपपादनाययुक्तिरियमुक्तेत्याह॥मनोगता इति ॥ तत्रैव मनस्येव ॥ कामज्ञानयोर्विरोधः कुत इत्यत आह ॥ विरोधश्चेति ॥ रसो राग इति वक्ष्यति ॥ ननु सर्वकामप्रहाणमस्मदादिषु

मनोगतानिति ॥ विरोधश्चोच्यते ॥ रसोप्यस्यपरंदृष्ट्वानिवर्ततइति ॥ नचैतददृष्ट्या अपलपनीयम् ॥

नदृष्टम् ॥ तद्दृष्टांतेन ज्ञानिष्वपि तदभावानुमानादसंभवित्वं लक्षणस्येत्यत आह ॥ न चेति ॥ कुत उदाहृतप्रमाणविरोधात् ॥

॥कृ० ॥कामानामिति ॥ इदं च परमीत्या स्वरीत्या तु स्वरूपभूतकामानां व्यावृत्त्यै मनोगताना इतिविशेषणंसार्थकमित्यन्यत्र प्रतिपादितम् ननु कामज्ञानयोर्विरोधे कथमिदं मानम ॥ अत्र रसज्ञानयोर्विरोधोक्तेरित्यत आह ॥ रसो राग इति वक्ष्यतीति ॥ वीतरागभयक्रोधा इत्येतद्व्याख्यावसर इति शेषः॥

॥ श्री० ॥ अपव्यापेति ॥ पुरुषत्वेन हेतुना पंडितस्यापि मूर्खत्वं मूर्खस्यापि पंडितत्वं अनुमातुं शक्यमिति तदुभयापलापोऽपि स्यादिति भाव. ॥ तृतीयांतेनेति ॥ आत्मन इत्ये- त्यर्थः ॥ तथा च ममम्यंतात्मशब्दस्य जीववाचीति भाव ॥ तथा चात्मनि स्वस्मिन्नात्मना मनसा तुष्ट इत्यर्थो द्रष्टव्य ॥ शेषोक्ति ॥ गीतायामित्यर्थ तस्मिन स्थितस्य सर्व... त्यतो व्याचष्टे ॥ तदेकाग्रेति ॥ अत्रेति ॥ प्रजहातीति श्लोके पूर्वार्धेन त्यक्तविषयत्वं उत्तरार्धेन तुष्टिरुच्यत इत्यर्थ ॥ परिग्रहे ॥ आत्मशब्दस्येति शेष ॥५५ ॥ अमानित्वमित्यादा- विति॥अमानित्वमित्यादौ असक्तिरनभिष्वंग पुत्रदारगृहादिष्वित्यत्युक्तवांत एतज्ज्ञानमिति प्रोक्तमिति ज्ञानसाधनत्वोक्तेरित्यर्थ..॥जिज्ञासौ॥ज्ञानेच्छावत्परोक्षज्ञानितेत्यर्थ ॥

प्रमाणविरुद्धार्थानुमाने पंडितमूर्खादिपुरुषवैचित्र्यापलापप्रसंगादित्याह ॥ पुरुषेति ॥ आत्मन्यात्मनेति पदद्वयेन जीवएवात्रोच्यत इति कश्चित् ॥ तृतीयांत नमनइत्यपरःतदुभयमसदिति भावेनाह ॥ आत्मनेति ॥ स्थितः संस्थित शेषोक्तिः ॥ वाक्यार्थ वदन्स्वव्याख्यानोपपत्तौ परव्याख्यानानुपपत्तौ च युक्तिमाह ॥ आत्माख्य इति ॥तस्मिँस्थितस्य तदेकाग्रचित्तस्य अत्र त्यक्तविषयस्यापि तुष्टिरुच्यते ॥ सा च परमात्मपरिग्रहे संभवति ॥ नान्यथेत्यर्थः ॥ कुत इत्यत आह ॥ विषयानिति ॥ ततः किमित्यत आह ॥ अत इति ॥ ५५ ॥ ननु

पुरुषवैशिष्ट्यात्॥आत्मना परमात्मना॥परमात्मन्येव स्थितः सन् ॥ आत्माख्ये तस्मिन्स्थितस्य तत्प्र सादादेव तुष्टिर्भवति॥विषयांस्तु परित्यज्य रामेस्थितिमतस्ततः॥देवाद्भवतिवैतुष्टिर्नान्यथातुकथंचनेति

तदेवस्पष्टयति उत्तरैस्त्रिभिःश्लोकैः ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगत स्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥ ॥ ॥

नारायणरामकल्पे ॥अतो नात्मा जीवः॥५५॥तदेवस्पष्टयति उत्तरैस्त्रिभिःश्लोकैः॥एतान्येवज्ञानोपायानि लक्षणस्येवानेनैवोक्तत्वात्किं दुःखेष्वित्यादिनेत्यत आह ॥ तदेवेति ॥ उक्तं लक्षणमेव ॥ स्पष्टत्वं च कामशब्दोपलक्षितदोषांतरत्यागक थनादिनेति ज्ञेयम् ।ननु कामत्यागादीनि ज्ञानसाधनत्वेनोच्यंतेऽमानित्वमित्यादौ॥ततो ज्ञानिलक्षणस्य जिज्ञासावतिव्याप्तिरित्यत आह॥एतानीति॥

॥ कृ० ॥ परमात्मस्थितत्वं सर्वसाधारणमित्यत आह ॥ तदेकाग्रेति ॥ ५५ ॥ कथनादिनेति आदिपदेन द्वेषत्वसंजनकप्रदर्शनम ॥ द्वेषाभावकारणप्रदर्शनं न संगृह्यते ॥

१ एवशब्दार्थोयम्

॥श्री०॥ननूपायशब्दस्य नित्यपुंलिंगत्वादुपायानीति कथमित्यत आह॥उप समीप इति फलेति॥ज्ञानाख्यफलस्यर्थः॥तथा नरूढस्यैवोपायशब्दस्यपुंलिंगत्व नियमेन यौगिकस्य तस्य तु [illegible] विशेष्यनिघ्नत्वम॥ अयं तूपायशब्दो यौगिक इत्याह [illegible] प्रदर्शित [illegible] ॥सत्यमेतदिति॥एतान्येवज्ञानोपायानीति ज्ञानिनः [illegible] जिज्ञासावतिव्याप्तिरिति यद्यपीत्यर्थः ॥स्वभाव सिद्धानीति॥प्रकृते च स्वभावसिद्धान्येव [illegible] निर्दिष्टानीति न जिज्ञासावति व्याप्तिरिति भाव. मूले ज्ञानिनां [illegible] मुमुक्षुभिः साध्य ज्ञानिनां तु स्वभावसिद्धमिति शेष ॥ तान्येव कामादर्शनान्येव ॥ ज्ञ [illegible] निर्दिष्टानीति शेष ॥ समुच्चयवादीप्रष्टव्यः ॥ एतेषां काम त्यागादीनामपवर्गसाधनत्व [illegible] त्वया [illegible] पवर्गशब्देन किं विवक्षितमिति लिंगभंगो वा आनंदावृद्धिर्वा ॥ नाद्य इत्याह ॥ नापवर्गेति ॥ [illegible] ॥ कुत इत्यत आह ॥ कामकारेण चैक इति ॥ कामचाराः कामभक्षाः कामवादाः कामेनैवेमं लोकं देहमु त्सृज्याथ परात्परमीयुरिदा [illegible] मिति चैके पठंतीति सूत्रार्थः ॥ ॥ ॥ ॥ ॥ ॥

उप समीपे ऽयः फललाभो येषां तान्युपायानि साधनानि ॥ सत्यमेतत् ॥ तथापि जिज्ञासौ प्रयत्नसाध्यानि ज्ञानिनि तु स्वभावसिद्धा नित्यदोष इति भावः ॥ अत्र प्रमाणमाह ॥ तच्चोक्तमिति ॥ समुच्चयवादीत्वाह यानीह स्थितप्रज्ञलक्षणान्युच्यंते तान्येवापवर्ग साधनानीति

तच्चोक्तम् ॥ तद्धिजिज्ञासुभिःसाध्यं ज्ञानिनायत्तुलक्षणमिति ॥

तद्दीनिनदूषयति ॥ ज्ञानसाधनान्येव नापवर्गसाधनानि ॥ यथोक्तम् ॥ कामकारेण चैके इति ॥

॥कु०॥ननूपपूर्वादिणःकरणे घञंतत्वादुपायशब्दः पुंलिंगः॥तथ्वंत इति लिंगानुशासने घञंतस्य पुं [illegible] नाज्ञानोपायानी [illegible] आह॥उपसमीप इति ॥ दिगंतरालक्षण भिन्नबहुव्रीहिस्तावाद्विशेष्यनिघ्नबहुव्रीहिः ॥ अमेयणतथोक्तत्वात ॥ उपायशब्दो ऽस्मिन्नादृशो बहुव्रीहिः अतो न पुंस्त्वनियम॥न च तथाऽपि नपुंसकत्वे विनिगमकाभावः ॥ सामान्येन नपुंसकमिति तद्रूपपत्तेरिति भावः ॥ तद्धिजिज्ञासुभिरित्यग्रिमप्रमाणानन्यार्थाभिप्रायमाह ॥ सत्यमेतदिति ॥ स्वभावसिद्धानीति ॥ तथाच स्वाभाविकस्य कामत्यागादेर्लक्षणत्वान्नाति व्याप्तिरिति भावः ॥ अपवर्गसाधनत्वे किमनिष्टनिवृत्त्यादिरूपापवर्गस. [illegible] नानंदाद्रिरूप तत्सा [illegible] मिति विकल्प्याद्य आह ॥ यथोक्तमिति ॥ यथेष्टाचारेणापि ज्ञानिनोमोक्ष मेके शाखिनः पठंतीति सूत्रार्थः ॥ तथा च सुतराविरुद्धकामादित्यागाभावेऽपि ज्ञानिनो नियमेन मोक्षोक्तिरुक्तमयुक्तमिति भावः ॥

१अ० ३ पा० ४ अ० सू० २॥ २ नित्यम् ॥ ३ शाखिनः ज्ञानिनो मोक्षमिति शेष ॥ ४ अस्यां योजनायां न भाष्ये वाक्याध्याहार इति भावः ॥ ५ भाष्ये एवशब्दो ज्ञानो पायान्येवेति संबध्यते तद्व्यावर्त्यमेतत ॥

॥ श्री० ॥ ॥ तथा चानेन सूत्रेणापरोक्षज्ञानोत्तर विहिताकरणे निषिद्धकरणे च ज्ञानिनो लिंगभंगरूपा मुक्तिर्भवत्येवेत्युच्यते समुच्चयसाध्यत्वे नाद्रियेथ स्यादिति भावः ॥ द्वितीये स्थि
तप्रज्ञः स्थितधीरित्याह॥ आनंदेति॥ इदम् ॥ कामत्यागादिरूपं लक्षणम् ॥ इदमुदितम् एतान्यर्थवंति वाक्यम।तथा च यानि स्वभावसिद्धानि ज्ञानिलक्षणानि तान्येव जिज्ञासुना साधितानि साधि
ज्ञानोपायान्यपि भवंतीति योगस्त युक्तमित्याशयः ॥ रसवर्जम् रागरहितत्वं तृष्णाभिधानादसंगतमित्यत्र तदयमाशयः । अत्र न तदनुक्तमनर्थमध्याहारेण योजयति काम इत्या
दिना ॥ ५६ ॥ सकारणमिति ॥ पूर्वं कोपत्यागमात्रमुक्तं अत्र तु सर्वत्रानभिस्नेहत्वेन सकारणमहेतुं द्वेषवर्जनमुच्यत इति न पुनरुक्तिरित्यर्थः ॥ ५७ ॥ ॥ ५८ ॥

आनंदवृध्यर्थता त्वंगीकृतैव ॥ योगे त्विमा शृण्वित्युक्त्वा कथमिदं योगादन्यदुच्यत इत्यतो वेदमुदितमिति ॥विगतस्पृहमित्यनेनैव वीतराग
इत्येतद्गतार्थमित्यत आह ॥ शोभनेति ॥ अशोभनेषु विषयेषु शोभनत्वभ्रांतिः ॥ रसो रागो रक्तिः इत्येतैः काम उच्यते ॥ तथा शोभनाध्य स
शोभनाध्यासो रागः ॥ रसो रागस्तथा रक्तिः शोभनाध्यास इष्यत इत्यभिधानम् ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता
॥५७ यदा संहरते चायं कूर्मोंगानीव सर्वशः॥इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता५८॥

सर्वत्रानभिस्नेहत्वाच्छुभाशुभंप्राप्य नाभिनंदति नद्वेष्टि ॥ ५७ ॥ ॥ ५८ ॥

उच्यते ॥ इत्यर्थः ॥५६॥वीतक्रोध इत्युक्तत्वान्न द्वेष्टीति पुनरुक्तिरित्यत आह॥ सर्वत्रेति ॥ सकारणकद्वेषवर्जितत्वमत्रोच्यत
इत्यर्थः ॥ ५७ ॥ ५८ ॥ ॥ ॥ ॥ ॥ ॥

॥कृ०॥द्वितीयेत्वाह ॥ आनंदेति ॥ तथा शब्दस्वारस्यायेत्यत्राति ॥ रसो राग इति ॥ एतेन रसो राग इति वक्ष्यतीति यत्प्रागुक्तं तत्प्रमापितम ॥ ५६ ॥ ५७ ॥ ५८ ॥ ॥१०३॥

१ अस्मिन्पक्षे एव शब्दो न भिन्नक्रमोऽपि २ जिज्ञासोरपि ज्ञानिन इंद्रियप्रत्याहारो न यत्नसाध्यः किं तु स्वभावेनैवेति ज्ञापयितुं दृष्टांत इति रा. श्रीपादाः ॥

॥ श्री० ॥ प्रजहातीत्यादिना ज्ञानिन एव लक्षणमुक्तं न ज्ञानस्यात एतत् लक्षणं यस्येति षष्ठ्यर्थगर्भबहुव्रीहिरयोगात् पंचम्यर्थगर्भो बहुव्रीहिरित्याह ॥ एतदिति ॥ यस्मादिति ॥ कामप्रहाणादेरपरोक्षज्ञानसाध्यत्वादिति भावः ॥ नन्वयत्नतो न भवतीत्युक्त्या यत्नतो भवतीति प्राप्तं तथा चाल्पयत्नतोऽपि भवतीति प्राप्त्या [illegible] इत्यत आह ॥ ॥ अयत्नत इति ॥ [illegible] आह ॥ अनुराग कन्येति ॥ अल्पोदरयर्थः ॥ तदिति ॥ [illegible] साधनं ज्ञानमित्यर्थः ॥ ॥उपोद्घातप्रक्रियेयमिति ॥ ज्ञानस्याल्पप्रयत्नसाध्यत्वं [illegible] ॥ इंद्रियाणीति ॥ [illegible] विषयाणां निरीक्षणमुख्यत्वात् विषयविषयिभावलक्षणस्य [illegible] इति भावः ॥ तानीत्यनुवर्तते ॥

विषया विनिवर्तंत इत्यादिश्लोकत्रयात्मेपि तस्यप्रज्ञाप्रतिष्ठितेत्युक्त्वादिदमपि लक्षणविवरणमिति भ्रांतिः स्यात्तन्निरासार्थमाह ॥ न चेति एतल्लक्षणं यस्माद्भवति तदेतल्लक्षणम् ॥ अयत्नतोऽल्पयत्नतः ॥ अनुदरा कन्येति यथा ॥ यद्येवं लक्षणकं ज्ञानं तर्हि सर्वोऽपि जनः कस्मान्न तत्साधयति ॥ कामाद्युपद्रवपरिहारार्थम् ॥ किं इदं लक्षणमार्गावरोध इव वंभ्रमीति ॥ अतो नास्त्येवेदं ज्ञानिषु लक्षणमित्याशंकापरिहारार्थमिति शेषः ॥ त्रिभिरित्यनुवर्तते ज्ञानस्याल्पप्रयत्नासाध्यत्वमत्र न प्रतीयत इत्याशंक्योपोद्घातप्रक्रियेयंद्रियजयस्यतावन्महाप्रयत्नसा

नचैतल्लक्षणं ज्ञानस्ययत्नतोभवतीत्याहोत्तरश्लोकैः ॥ निराहारत्वेनविषयभोगसामर्थ्याभाव एव भवति॥

ध्यत्वमाथेन श्लोकेनोच्यत इति भावेन तं व्याचष्टे ॥ निराहारत्वेनेति ॥ एतेन रसवर्जमित्येतदंतस्य वाक्यस्यार्थ उक्तः ॥ एवशब्देन रसवर्जमित्येतद्व्याचष्टे ॥ तथा हि ॥ निराहारस्य देहिनः तेन निराहारत्वेनेति यावत् ॥ विषया रूपादयः ॥ तद्भोगसामर्थ्यानीइंद्रियाण्यनेनोपलक्ष्यंते तानि विनिवर्तंते ॥ रसवर्जं रसो रागः तं वर्जयित्वा विषयाभिलाषश्चेतसिको निराहारत्वेन न निवर्तत इति

॥ कृ०॥ प्रजहातीत्यादिना ज्ञानिन एव लक्षणमुक्तं न तु ज्ञानस्य॥ अतएव एतल्लक्षणमित्यत्र पंचम्यर्थे बहुव्रीहियोगादाह॥एतल्लक्षणं यस्मादिति॥ कामप्रहाणादेरपरोक्षज्ञानजन्यत्वादिति भावः ॥ नन्वपरोक्षज्ञानस्य सर्वमोऽपि यत्नजन्यत्वादयत्नजन्यत्वमसंभवि कथं निरूप्यत इत्यत आह ॥अल्पप्रयत्न इति ॥नञ्सादृश्यमभावश्चतदन्यत्वं तदल्पता॥ अप्राशस्त्यं विरोधश्च नञर्थाःषट् प्रकीर्तिता इत्युक्तेर्नञोऽल्पार्थत्वादिति भावः ॥ अल्पार्थत्वे प्रयोगमप्याह ॥ अनुदरेति ॥ अल्पोदरीत्यर्थः ॥उपोद्घातेति॥ ज्ञानस्याल्पप्रयत्नसाध्यत्वं यत्प्रकृतं तदुपयुक्तत्वेनेत्यर्थः ॥ ननु रसवर्जपदार्थस्यैवानुक्तत्वात्कथमुच्यते रसवर्जमित्येतदंतस्यार्थ उक्त इत्यत आह ॥ एवशब्देनेति ॥ निराहारत्वेन विषयनिवृत्त्यभावादाह ॥ उपलक्ष्यंतइति॥ तानि निवर्तंत इति ॥ सविशेषणे हीतिन्यायेनेंद्रियाणां विषयभोगशक्तयो निवर्तंत इत्यर्थः ॥

॥ श्री० ॥ तेषां विषयभोगशक्तिः [illegible] इंद्रियाणां ॥ [illegible] विषयपंचकविषयकमानसिकरागः ॥ पंचानां बाह्येंद्रियाणां स्वस्वविषयभोगशक्तिक्षयो निराहारत्वेन भवति ॥ विषयपंचकविषयकमानसिकरागक्षयो निराहारत्वेन [illegible] ॥ अप्यर्थ ॥ विषया [illegible] ॥ भोगशक्त्यर्थो [illegible] ॥ रसनेंद्रियव्यतिरिक्तानां चतुर्णां इंद्रियाणामित्यर्थः ॥ योजनेति ॥ [illegible] ॥ इतरत्वस्याविभिसोपेक्षत्वाद्रसादिति रइ युक्तम ॥ विषया इत्यनूद्य तस्य लक्षणया ऽर्थद्वयमाह ॥ तद्भोगशक्त्यइत्यादि ॥ चतुर्णामिंद्रियाणां विषय [illegible] ॥ आशय निराहारत्वेनेंद्रियाणां विषयभोगसामर्थ्याभाव एवभवतीत्यादेरर्थ ॥ स इत्यनूद्य रस इति व्याख्यानम [illegible] ॥ [illegible] तेत्युक्तार्थः ॥ स इत्यस्य रस इत्यर्थमुक्का तस्याप्यर्थ उच्यते ॥ तद्भोगशक्तीति रसनेंद्रियस्य रसभोगशक्तिमेनतस्ताद्विषयकाकांक्षा [illegible] मनसो विषयचतुष्टयविषयकाकांक्षायाश्च क्षयो निराहारत्वेन भवति ॥ रसनेंद्रियस्य रसभोग [illegible] मनसस्तद्विषयकरागक्षयश्च ब्रह्मसाक्षात्कारेणैव भवतीत्याशय ॥ द्वितीयार्थ ॥ इतरविषयाकांक्षाभावो वेत्युक्तार्थः ॥ जयंतीत्यादि ॥ मनीषिणो [illegible] राहारत्वेन [illegible] मनसस्तद्विषय [illegible] ॥ [illegible] षिण च जयंति असा रसना तु रसनेंद्रियं तु रसे स्वविषये प्रकारद्वयेन रसभोगशक्त [illegible] वर्धते इति यावादति याऽशय ॥ [illegible] अस्यैवेति ॥ [illegible] ॥

अस्यैवार्थ [illegible] ॥ रसवर्जमित्यस्यार्थो [illegible] निराहारत्वेन रसादितरे विषयाः तद्भोगशक्तयः तदाकांक्षाश्चेति यावत् विनिवर्तंते रसं वर्जयित्वा मनसो [illegible] रसनेंद्रियस्य तद्भोगशक्तिश्च न निवर्तते इति

इतरविषयाकांक्षाभावो [illegible] रसाकांक्षादिर्निवर्तते रसतु अपरोक्षज्ञानादेव निवर्तत इत्याह ॥ विषया इति

विषया विनिवर्तन्ते निराहारस्य देहिनः ॥ रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

इंद्रियाणि जयंत्याशु निराहारा मनीषिणः वर्जयित्वा तु रसनं [illegible] इति वचनाद्भागवते ॥

रसोऽपीत्यस्यार्थमाह ॥ सत्विति ॥ आद्येऽर्थे [illegible] विषयविषयो रागः ॥ द्वितीये [illegible] भोगशक्तिस्तदाकांक्षा च ॥ उक्तमर्थं श्लोकारूढं करोति ॥ इत्याहेति ॥ द्वितीयार्थे प्रमाणमाह ॥ इंद्रियाणानि ॥ जयंति भोगशक्तिक्षयेण [illegible] रसना तु [illegible] द्वयेन च वर्धते ॥ ॥१०२॥

रसाकांक्षादिरित्याद्यग्रिमभाष्ये ॥ [illegible] भोगशक्त्यपीति [illegible] नेत्यर्थः

१ रसनामितिप्रकृतत्वाद् [illegible] कथमित्यत आह ॥ रसेति ॥ [illegible]

॥ श्री०॥ आद्यमर्थमिति ॥ निराहारत्वेन विषयभोगसामर्थ्याभाव एव भवति रस वर्जं रसो रागस्तं वर्जयित्वा विषयाभिलाषश्चैतस्मिंको निराहारत्वेन न निवर्तत इत्याद्यमर्थमित्यर्थः ॥ ॥ उपपादयतीति ॥ स्यादाद्योऽर्थो यदि रसशब्दस्य रागवाचित्वं स्यात्तदेव कुत इत्यत पूर्वोदाहृतमभिधानं मनसि निधायोपपादयतीत्यर्थः ॥ उभयत्रेति ॥ भागवते एकादशस्कंधे इति वचनादितरविषयेष्वर्थांतरकथनं युक्तं रसशब्दस्य रागवाचित्वाच्च निराहारत्वेनेत्याद्यर्थकथनं युक्तमित्युभयत्रशेष इत्यर्थः ॥ ननु रसस्याचेतनत्वात्कथं दृष्ट्वा निवर्तत इति दर्शननिवृत्तीप्रतिकर्तृत्वमित्यत आह ॥ अचेतनेति॥ एतत् द्वय चेति ॥ शक्तिक्षयो रागक्षयश्चेति द्वयम ॥ उक्तप्रकारद्वयेन निराहारत्वेन विषयभोगसामर्थ्याभाव एव भवति ॥ इतरविषयाकांक्षाभावो वेत्युक्तप्रकारद्वयेन भवतीत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

आद्यमर्थमुपपादयति ॥ रसेति ॥ उक्तंयुक्तमित्युभयत्र शेषः ॥ रसशब्दस्य रागवाचित्वंउक्ताभिधानादवगंतव्यम्॥ अचेतने चेतनवदुपचाराद्रसःपरं दृष्ट्वा निवर्तते इति युक्तम् ॥ अयमर्थसंग्रहः ॥ यदा बाह्येंद्रियाणि विषयैःसंनिकृष्यंते तदा तद्राग मनस्तत्प्रवर्तते प्रवृत्ते च मनसि रागो भवति ॥ तत आत्मनःक्षोभ इति एवं इंद्रियाणामविजयः ॥ यो हि यं व्याकुलं करोति स तेन जित इत्युच्यते यदा तु बा

रसशब्दस्य रागवाचित्वाच्च ॥ ५९ ॥

ह्येंद्रियाणि विषयसन्निधानेऽपि न तैः संनिकृष्यंते ॥ संनिकृष्टान्यपि न मनस्तदाऽभिमुखे (ख्ये) नाहरंति ॥आहतेऽपि मनसि न विषयरागो जायते ॥ तदानात्मनः क्षोभो भवतीत्येष इंद्रियजयः सोऽयं संग्रहेण द्वेधा॥बाह्येंद्रियाणां शक्तिक्षयान्मनसो रागक्षयाच्च ॥ एतत् द्वयं च

॥ कृ० ॥ वचनादिति वाचित्वाच्चेति च पंचम्युपपत्त्यर्थमाह ॥ उक्तंयुक्तमित्युभयत्र शेष इति ॥ ननु दर्शननिवृत्ति प्रतिरसस्य कथंकर्तृत्वं अचेतनत्वादित्यत आह ॥ अचेतनइति ॥ सोऽयमिति॥ इंद्रियजयः कारणद्वयेनभवतीत्यर्थः ॥ मत्परो युक्तआसीतेत्यादिना साधनांतरस्य वक्ष्यमाणत्वात्तदभिमतदित्यतउक्तम ॥ संग्रहेणेति ॥ कारणद्वयमेवाह ॥ बाह्येति ॥

॥ श्री० ॥ ननु निराहारत्वेन पंचानामपि बाह्येंद्रियाणां स्वस्वविषयभोगशक्तिक्षय एव भवति॥विषयपंचकविषयकमानसिकरागक्षयस्त्वपरोक्षज्ञानेनैवेत्येक प्रकार तथा [illegible]
णांतत्तद्विषयभोगशक्तेर्विषयचतुष्टयविषयकमानसिकरागस्य न क्षयो निराहारत्वेन भवति रसनेंद्रियस्य रसभोगशक्तिक्षय. रसविषयकमानसिकरागस्यापरोक्षज्ञानेन [illegible]
चैतत्प्रकारद्वयस्य परस्परविरुद्धत्वेन नैकस्मिन पुरुषे समावेशोऽयुक्त इत्यत उक्तम्॥ पुरुषभेदेनेति ॥पुरुषाणांविचित्रस्वभावत्वेन केषां चिदाद्य प्रकार केषां चित् द्वितीय [illegible]
पपन्नत्वान्नदोष इति भावः ॥ ५९ ॥ ॥ यततः ॥ निराहारत्वरूप. ॥ ज्ञानमपरोक्ष ताभ्यामित्यर्थ ॥ प्रत्याहार. ॥ विषयेभ्यो मनस आहरण [illegible] तत्संभवत्वादिंद्रिय [illegible]
॥ तदुपपत्तेः ॥ इंद्रियजयोपपत्ते. ॥ तन्निषेधइति ॥ साधारणयत्नज्ञानयोर्निषेध इत्यर्थ. ॥ ननु यततोऽपीत्यादौ व्याख्येयम ॥ तद्विरुद्ध [illegible]
कस्माद्व्याख्यातमित्यतआह ॥ ज्ञानस्येति ॥साधारणप्रयत्ननित्यानित्यविवेकज्ञानयोर्मध्ये नित्यानित्यविवेकज्ञानस्यप्राधान्यसूचनायेत्यर्थः ॥

पुरुषभेदेनोक्तप्रकारद्वयेन निराहारत्वब्रह्मसाक्षात्काराभ्यां भवतीत्येवमिंद्रिय जयस्य महाप्रयत्न साध्यत्वमिति ॥ ५९ ॥ ननु यतत ज्ञानाभ्या मिंद्रियजयमुक्त्वा यततोऽपीति तद्विरुद्धं कथमुच्यत इति चेन्न॥ इंद्रियजयार्थं किं निराहारत्वलक्षणेन महाप्रयत्नेन प्रत्याहारादिना साधारणे

अपरोक्ष ज्ञानरहितज्ञानिनोऽपि

न प्रयत्नेन तत्संभवात् ॥ तथा किमपरोक्षज्ञानेन नित्यानित्यविवेकज्ञानेनापि तदुपपत्तेरित्याशंक्य तन्निषेधोऽत्र क्रियत इत्याशयवाह्याचष्टे॥
॥अपरोक्षेति॥ज्ञानस्य प्राधान्यसूचनाय विपश्चितोऽपीत्येतत्पश्चादुक्तमपि अपरोक्षेत्यादि व्याख्यातम् ॥ यततोऽतीत्यस्यार्थः ॥

॥ कृ० ॥ उक्तप्रकारद्वयेनेति ॥ निराहारत्वेन विषयभोगसामर्थ्याभाव एव भवति इतरविषयाकांक्षाभावो नेत्युक्तप्रकारद्वयेनेत्यर्थः ॥ ननु निराहारत्वेन बाह्येंद्रियाणां भोग
शक्तिक्षयः ॥ अपरोक्षज्ञानेन तु मानसिकरागक्षय इत्येकप्रकार. निराहारत्वेन रसेतरविषयभोगशक्तेस्तदाकांक्षायाश्च निवृत्तिः ॥ अपरोक्षज्ञानेन तु रसभोगशक्तेस्तदाकांक्षायाश्च निवृत्ते
रिति द्वितीयः अनयोश्च परस्परविरुद्धत्वात्कथमेकत्र समावेश इत्यत उक्तम ॥ पुरुषभेदेनेति ॥ पुरुषाणां विचित्रस्वभावत्वात्केषांचिदाद्यः प्रकारः केषांचिद्द्वितीय इति भाव॥ ५९ ॥
॥ प्रत्याहारादिनेति ॥ इंद्रियाणां विचरतांविषयेषु स्वभावत ॥ बलादाहरणंतेषां प्रत्याहार. स उच्यत इत्युक्तप्रत्याहारेत्यर्थः ॥ आदिपदेन नियताहारत्वस्य संग्रहः ॥ चतुर्थ अध्या
नियताहारा इत्यादिना तस्येंद्रिय जयहेतुत्वोक्तेः ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ सन्निकृष्टानि ॥ इंद्रियाणि ॥ द्वितीयांतस्य मनःपदस्याध्याहारः कार्यः तदभिमुखम् ॥ विषयाभिमुखम ॥ तद्रागि ॥ विषयविषयकाकांक्षायुक्तम ॥ एवंभावात् ॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मन इत्युक्तमेयस्य भावादित्यर्थः ॥ उक्तोपपादनार्थमिति॥ प्रत्याहारादिसाधारणप्रयत्ननित्यानित्यवस्तुविवेकज्ञानवतोऽपि इंद्रियजयाभावे शरीराभिमान एव कारणमित्युक्तोपपादनार्थं पुरुषस्येति विशेषणमित्यर्थः ॥ मन ॥ ततः ॥ इंद्रियाणां मनोहरणात ॥ को दोष इत्यस्याशयमाह ॥ एतावतेति ॥ इंद्रियाणि मनोहरंतीत्येतावतेत्यर्थः ॥ तदविजयः ॥ प्रमथनशीलानीत्यस्य भावमाह ॥ मनोहरंतीति ॥ हरंतीति संति तेनात्मना न जितानि ॥ तथा चात्मनस्तदविजय इति भावः ॥ उभयत्रेति ॥ पुरुषस्य प्रमाथीनि पुरुषस्य मनोहरंतीत्युभयत्रेत्यर्थः ॥६०॥ ननु निराहारत्वेनेंद्रियजयस्य सम्भवित् शक्यत्वे कथमशक्यत्वमित्यत आह॥ निराहारस्येति ॥अस्तु तर्हि ब्रह्मसाक्षात्कारेण तज्जय इतिचेत्तत्राह॥ब्रह्मापरोक्षज्ञानस्य चेति ॥ इतरेतराश्रय इति॥ इंद्रियजयसाध्यस्यब्रह्मापरोक्षज्ञानस्येंद्रियजयंप्रति साधनत्वांगीकारे इंद्रियजये सत्यपरोक्षज्ञानं तस्मिन् सतींद्रियजय इत्यन्योन्याश्रयः स्यादित्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

॥ साधारणेति ॥ हरंति विषयसंनिकृष्टानितदभिमुखं कृत्वा तद्रागीकुर्वंतीत्यर्थः॥पुरुषस्येति व्यर्थं स्त्रीणामप्येवंभावादित्यत आह॥पुरुषस्येति॥ एतच्चोक्तोपपादनार्थम् ॥ प्रमाथीनीत्यस्य प्रयोजनं वक्तुमाह ॥को दोष इति एतावताऽत्मनस्तदविजयः कथमित्याशयः॥मनोहरंतिपुरुषस्य क्षोभणशीलानीति तेन विजितानीतिभावः ॥ पुरुषस्येत्यनेनोभयत्रास्यान्वयंदर्शयति ॥ ६० ॥ उपोद्घातस्य साध्ये वक्तव्ये तानि सर्वा

साधारणयत्नवतोऽपि मनोहरंतींद्रियाणि ॥ पुरुषस्य शरीराभिमानिनः ॥ कोदोषस्ततः प्रमाथीनि

यततोह्यपिकौंतेयपुरुषस्य विपश्चितः ॥ इंद्रियाणि प्रमाथीनिहरंति प्रसभं मनः ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥

प्रमथनशीलानि पुरुषस्य ॥ ६० ॥ तर्ह्यशक्यान्येवेत्यत आह ॥ तानीति ॥

णीति किमुच्यत इत्यतोऽनगपतितां शंकां निवर्तयितुमेतदिति भावेनाह ॥ तर्हीति ॥ यदि साधारणविवेकज्ञानाभ्यां न जीयंते इत्यर्थः ॥ अशक्यान्येव जेतुमिति शेषः॥निराहारस्य देहावस्थानासंभवात् ब्रह्मापरोक्षज्ञानस्य चेंद्रियजयसाध्यतयाऽभिप्रेतत्वेनेतरेतराश्रयप्रसंगादिति भावः

॥ ६० ॥ उक्तोपपादनार्थमिति ॥ प्रत्याहारादिसाधारणप्रयत्ने नित्यानित्यवस्तुविवेकज्ञाने च सत्यपींद्रियजयो न भवतीत्यत्र शरीराभिमानस्य हेतुत्वादिति भाव. ॥ उभयत्रेति ॥ मन इत्यत्र प्रमाथीनीत्यत्र चेत्यर्थः ॥ ६० ॥

॥ श्री० ॥ तथा चेति । इंद्रियाणां जयमुक्त्वा मनोजयं मनस्यर्थे वक्ष्यते । इंद्रियजये ॥ एवोक्तम् ॥ [illegible] ॥ अस्मदुक्तम् ॥ [illegible] देहाद्यभ्यासानामभ्यासेनान्यत्र [illegible] । तत्प्रतिनिधिना । [illegible] । [illegible] महता प्रयत्नेनेत्यर्थः । तत्स्थानीति ॥ [illegible] शक्यार्थ इत्युक्तत्वात् तेन शक्यानीत्यर्थः । एतदपीति इंद्रियजयरूप [illegible] प्रयत्नसाध्यत्वमपि ज्ञानस्याल्पप्रयत्नासाध्यत्वेन [illegible] ज्यत इत्यर्थः ॥ युंजित इति ॥ युजिर योगे । युक्त इत्यत्र [illegible] शिष्टमनुक्तार्थम् । युक्त अस्मात्कर्तरि क्तप्रत्यये युक्त इति रूपम् ॥ प्रतिसंबंधीति ॥ युक्त इत्यस्य [illegible] इत्यपे क्षत्वात् केनेति करणकारकाकांक्षाया तस्यात्र [illegible] शेषः स्यादित्यर्थः ॥ समाध्यर्थस्येति ॥ मनःसमाधानार्थकस्येत्यर्थः ॥ युज समाधौ ॥ अत्रापि [illegible] र्थः ॥ अत्रापि कर्तरि क्तप्रत्यये युक्त इतिरूपम् । तथा च युक्त इत्यस्य मनःसमाधानयुक्त इत्यर्थ इति भावेनेत्यर्थः ॥ ननु युज समाधावित्येतद्रूपत्वे मनःसमाधियुक्त [illegible] वायास्यति ॥ मयीति कस्मादुक्तं न ह्ययं भान्वर्थ इत्यत आह ॥ मत्पर इति ॥ [illegible] मनः [illegible] युक्त वक्ष्यमाणमत्पर इत्युक्तमयुक्त स्यादतस्तद्ब्रात मयीत्युक्तमिति भावः ॥ उत्कृ ष्टायस्येत्यत्र उत्कृष्ट इति ज्ञानं यस्येत्यर्थो विवक्षितः ॥ अन्यथा [illegible] ॥ [illegible] प्रत्यपि मतेन यस्येति विशिष्योक्तययोगादत उत्कृष्ट इति ज्ञात्वेत्युक्तम् ॥

तथा च तज्जयस्य ज्ञानसाधनत्वं यद्विवक्षितं तन्नसंभवतीति शंकाशेषः इंद्रियसंयमोऽशक्य एवेति शंकायां तानि सर्वाणि संयम्यासीनेतिकिमे तदुच्यत इत्यत आह ॥ बहुयत्नेति ॥ यत्नं बहु मिति शेषः ॥यद्यपितज्जये नपरोक्तं साधनं अस्मदुक्तं वा शक्यं तथापि तत्प्रतिनिधिना

बहुयत्नतःशक्यानि ॥ अतो यत्नं कुर्यादित्याशयः ॥ युक्तो मयि मनोयोगयुक्तः

महाप्रयत्नेन जय्यानीत्यर्थः॥एतदप्युपोद्घातत्वेनैवोक्तमिति ज्ञातव्यम्॥युक्त इति॥ नैतद्युजिरोरूपम् येन प्रतिसंबंध्याकांक्षायां तदनुक्तिदोषः स्यात् किं तु समाध्यर्थस्य युजेरिति भावेनाह ॥ युक्त इति ॥ मत्पर इत्युत्तरत्र श्रवणान्मयीत्युक्तम् ॥ मत्पर इत्यद्वैतज्ञानं इत्यन्यैर्व्याख्यातं

॥ कृ० ॥ नन्वस्मदुक्तसाधनप्रतिनिधिभूतमहाप्रयत्नसाध्यत्वोक्तिरसंगतेत्यत आह ॥ एतदपीति ॥ उक्तमहा प्रयत्नसाध्यत्वम् ॥ ज्ञानस्याल्पप्रयत्नासाध्यत्वेनोक्तमित्यर्थः ॥ अद्वैतज्ञानामि ति ॥ अहं वासुदेवः सर्वप्रत्यगात्मा पर उपास्यो यस्य स मत्परः ॥ मान्योऽहं तस्मादिति बुद्धिमानितिव्याख्यातमित्यर्थः ॥

॥ श्री० ॥ नन्वेवमिंद्रियाणां महाप्रयत्नेन जेतुं शक्यत्वे विषया विनिवर्तंत इत्यादिना निराहारत्वब्रह्मसाक्षात्कारयोरिंद्रियजयंप्रति साधनत्वकथनमनुपपन्नमापन्नमित्यत आह ॥ निराहारत्वादिकं त्विति ॥ निराहारत्वब्रह्मसाक्षात्काराभ्यामपींद्रियजयस्य जायमानत्वाभिप्रायेण विषया विनिवर्तंत इत्युक्तम् ॥ ननु तादृशेंद्रियजयस्यापरोक्षज्ञानसाधनत्वाभिप्रायेण ॥ अत्र चापरोक्षज्ञानसाधनीभूतेंद्रियजयप्रकार उक्त इत्यदोषइत्याशयः ॥ यथैवामीति ॥ इंद्रियजयस्य महाप्रयत्नसाध्यत्वमित्यर्थः ॥ न तत्साधयति ॥ ज्ञानं न साधयति अतएव कामाद्युपद्रवपरिहारार्थं दह्यमानशिराः सन् संभ्रमतीति शेषः॥न त्वित्यादि॥उक्तलक्षणसाधनत्वाभावादिति न त्वित्यन्वयः ॥ तथा च प्रजहातीत्यादिनोक्तं ज्ञानिनां लक्षणं युक्तमेवेति शेषः॥६१॥

तत्राक्षरानुसारीत्याशयवान्व्याचष्टे ॥ अहमेवेति ॥ भगवानेव सर्वस्मादुत्कृष्ट इति ज्ञात्वा तस्मिन्नेव निरंतरं मनसो योजनं इंद्रियजये परंसाधनमिति भावः ॥ निराहारत्वादिकं तु वस्तुगतिप्रदर्शनार्थमेवोक्तमिति मंतव्यम् ॥ यदर्थमयमुपोद्घात उक्तः तत्प्रदर्शनपरतयो

वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ ६१॥

अहमेवपरःसर्वस्मादुत्कृष्टो यस्य समत्परः ॥ फलमाह ॥ वशेहीति ॥ ६१ ॥

त्तरार्धतात्पर्यमाह ॥ फलमिति ॥ यद्येवं ततःकिमित्याशंकायां इंद्रियजयस्य ज्ञानंफलमाहेत्यर्थः यतएवं ज्ञानं महायाससाध्येंद्रियजयफलं अतएवायासभीरुर्जनो न तत्साधयति न तु ज्ञानस्योक्तलक्षणत्वाभावादिति श्लोकत्रयतात्पर्यार्थः ॥ ६१ ॥

॥ कृ० ॥ तर्हि निराहारत्वादिसाधनोक्तिर्व्यर्थेत्यत आह ॥ निराहारत्वादिकमिति ॥ वस्तुगति प्रदर्शनार्थमेवेति ॥ महानुभावानां ज्ञानिनां निराहारत्वब्रह्मसाक्षात्काराभ्यामपींद्रियजयइति प्रदर्शनार्थमित्यर्थः निराहारत्वादिसाध्येंद्रिय जयस्यापरोक्षज्ञानसाधनत्व प्रदर्शनव्यवच्छेदायैवकारः ॥६१ ॥

॥ श्री० ॥ गीतायां विषयध्यानसंगरूपस्य रागादिदोषकारणस्य संमोहादिरूपरागादिफलस्य च निरूपणात् तदनुसारेण भाष्यं द्वेधा व्याचष्टे ॥ रागादीत्यादिना ॥ कारणम् ॥ विषयध्यानादि ॥ यस्य क्रोधस्य परमं साधनम् ॥ तस्मिन्नेव मनो योजनरूपम् ॥ वक्ष्यति ॥ रागद्वेषवियुक्तैस्त्वित्यनेनेति शेषः ॥ सः रागद्वेषपरिहारः ॥ उपोद्घातेति ॥ रागादिदोषपरिहारे तत्कारणतत्फलयोः परिहारस्य हेतुत्वात् साध्यं वक्तुं उपोद्घातप्रक्रियया तद्धेतुमाहेत्याहेत्यर्थः ॥इदम्॥ध्यायत इत्यादिना रागादिदोषकारणम् ॥ न संगच्छतइति ॥ क्रोधेन मूर्छाया अजननादिति भावः ॥ अकार्यस्य रागनादेरिच्छेत्यन्यथाप्रतीतिवारणायाह ॥अधर्मेति॥ अधर्मशब्देनादृष्टं ग्राह्यम् ॥ तथा च तद्धेतुभूतब्रह्महननादिरूपपापकर्मेच्छेत्यर्थः ॥ अधर्मस्य कर्तुमयोग्यत्वेनाकार्यत्वादितिभावः ॥ ननूपगीतायां मोहशब्दार्थकथनेऽपि संमोहशब्दार्थाकथनादाह॥ संशब्दस्त्विति ॥ उपसर्गाणांचान्वर्थव्यंजकत्वादिति भावः ॥

ध्यायत इत्यादिनाप्रकृतानुपयुक्तं किमनदुच्यत इत्यत आह ॥ रागादीति ॥ रागादिदोषस्य कारणं रागादिदोषकारणम् ॥ तथा रागादिदोषः कारणं यस्य तद्रागादिदोषकारणं परिहाराय रागादिदोषस्य इदमुक्तं भवति॥मत्परेयुक्त आसीतेतींद्रियजयस्य परमसाधनमुक्तम् ॥ रागद्वेषपरिहारोऽप्यपरं साधनमिति वक्ष्यति तत्र स एव कथं स्यादित्या शंकायां(कांक्षायां) उपोद्घातप्रक्रिययेदमुच्यत इति॥संमोहोमुर्च्छा

रागादिदोषकारणमाह परिहाराय श्लोकद्वयेन ॥ संमोहः अधर्मेच्छा ॥ तथा हि मोहशब्दार्थउक्त

ध्यायतो विषयान्पुंसःसंगस्तेषूपजायते॥संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः॥

उपगीतासु ॥ मोहसंज्ञितम् अधर्मलक्षणंचैव नियतं पापकर्मस्विति ॥ ॥ ॥ ॥

ऽत्र न संगच्छत इत्यतोऽन्यथा व्याचष्टे॥संमोह इति॥अकार्येच्छा अधर्मेच्छा॥कुत इत्यत आह॥तथा हीति॥सं शब्दस्तु तस्यैव विशेषक इति भावः

॥ कृ ॥ ध्यायत इत्यादिना रागादिदोषहेतोस्तत्फलस्य चोक्तत्वात्तदनुरोधेन भाष्यं द्वेधाव्याचष्टे ॥ रागादिदोषस्येत्यादिना ॥ वक्ष्यतीति ॥ रागद्वेषवियुक्तैस्त्वित्यत्रेतिशेषः ॥ नसंगच्छतइति ॥ क्रोधाजन्यत्वादिति भावः ॥ ननु कर्तुमशक्यमकार्यम यद्वाऽकार्यमनादितदिच्छानक्रोधजन्या[illegible] आह॥ अधर्मेच्छेति ॥ ननु संमोहोऽकार्येच्छेत्यत्र कथमिदं मानम् ॥ अत्र मोहशब्दार्थस्यैवोक्तेरित्यत आह ॥ संशब्द इति ॥ नन्वधर्मलक्षणमित्यनेन यदि मोहस्याधर्मरूपत्वमुच्येत तदा विरोधः ॥

१ हितबुध्येति २ अधिकोभवतीति ३ प्रतिहतादिति रा. श्रीपादाः ॥ ४ एतेनाकार्येच्छेत्यत्रनञो निषेधार्थकत्वं तथा च निषिद्धं यत्कार्यं तदिच्छेत्यर्थः

॥ श्री० ॥ यथोक्तं मीमांसकैः ॥ धातोरेव विशेषार्थं उपसर्गेण कथ्यते ॥ प्रहाराहारसंहारविहारपरिहारवदिति ॥ तद्धेतुषु ॥ अदृष्टहेतुषु ॥ प्रमाणे अधर्मस्य छाया ॥ मोहत्वाल्लाभाद्वक्ष्यमाण प्रमाणानुसारेण च नियतमित्यनंतरं अध्याहार्यमाह ॥ कामनमिति ॥ अनवस्थानमिति ॥ भ्रमसंचलन इति धातोरिति भावः ॥ कथमिति ॥ बुद्धिनाशे ज्ञानाधारस्वरूपं चेतनत्वमेव न स्यादिति भावः ॥ सर्वात्मनेति ॥ स्मृतिविभ्रमे तु सर्वात्मना प्रतिषेधादिस्मृतिनाशो न विवक्षित इति भावः ॥ विस्मृतेः पूर्वं दोषदर्शनसद्भावाद्दोषादृष्टेरिति कथमित्यत आह ॥ तदेति ॥ विस्मृत्यवस्थायामित्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥

अदृष्टरूपाधर्मविषयम् ॥ तद्धेतुषु पापकर्मसु च नियतं कामनं मोहसंज्ञितमित्यर्थः ॥ स्पष्टं चात्र प्रमाणमाह ॥ तथा चेति ॥ यत्किंचिद्विषयस्यस्मृतिविभ्रमस्य प्रकृतानुपयोगात्सम्यग्व्याचष्टे ॥ स्मृतिविभ्रम इति ॥ विभ्रमोऽनवस्थानं नाश इति यावत् ॥ चेतनस्य कथं बुद्धिनाश

तथाचान्यत्र संमोहोऽधर्मकामितेति ॥ स्मृतिविभ्रमः ॥ प्रतिषेधादिस्मृतिनाशः ॥ बुद्धिनाशः ॥ सर्वात्मना

स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रण [ह्नि] श्यति

दोषबुद्धिनाशः ॥ विनश्यति ॥ नरकाद्यनर्थं प्राप्नोति ॥ तथा ह्युक्तम् ॥

इत्यत आह ॥ बुद्धिनाश इति ॥ स्मृतिविभ्रम एवायमित्यतः सर्वात्मनेत्युक्तम् नित्यआत्मेत्युक्तम् तत्कथं विनश्यतीत्यत आह ॥ विनश्यतीति उक्तार्थे प्रमाणमाह ॥ तथा हीति ॥ तदा दोषादृष्टेः ॥ एतदुक्तं भवति ॥

॥ कृ० ॥ यद्यधर्मविषयत्वम् ॥ तदानियतं पापकर्मस्वित्यनेन पुनरुक्तिः ॥ अधर्मपापशब्दयोः पर्याय त्वादित्याशंक्याधर्मपापशब्दाभ्यां कार्यकारणग्रहणान्न पौनरुक्त्यमिति भावेनाह ॥ अदृष्टरूपेत्यादिना ॥ यत्किंचिद्विषयस्य स्मृतिविभ्रमस्येति ॥ अत्र द्वावाक्षेपौ स्मृतिविभ्रमपदेन स्मृतिरूपभ्रमएव ग्राह्यः ॥ स्मृतिर्विभ्रमो भ्रांतिरित्यस्यार्थस्य सान्निध्ये भ्रांत्यभावेन बाधितत्वात् ॥ तथा च प्रकृतानुपयोग इत्येक आक्षेपः ॥ यत्किंचिद्विषयस्येति द्वितीयः ॥ अत एव भाष्ये विपर्ययोक्तिः षष्ठीसमाससूचकस्य विभ्रमपदार्थोक्तिश्चेति ध्येयम् ॥ ननु विभ्रमशब्दस्य कथं नाशार्थत्वमित्यत आह ॥ विभ्रमोऽनवस्थानमिति ॥ भ्रमु अनवस्थान इति धातु व्याख्यानादिति भावः ॥ प्रकृतमाह ॥ नाश इति यावदिति ॥ उक्तमिति ॥

१ अजाद्यदंतत्वात्पूर्वनिपातः ॥

॥ श्री० ॥ यदेत्युक्तत्वात्तदेत्यस्य लाभः ॥ कार्यं फलम् ॥ तत्परिजिहीर्षायामित्यां ॥ तत्कारणं ॥ तयोः रागद्वेषयोः कारणम्॥तदकारणात् ॥ विषयध्यानात् ॥ तयोः ॥ रागद्वेषयोः ॥ ६२ ॥ ६३ ॥ आत्मवश्यैर्विधेयात्मेति तृतीयपादेन ॥ रागद्वेषपरिहारफलस्येंद्रियजयस्य तदुत्तरपादद्वयेनैकेनप्रमादादेरिंद्रियजयसाध्यत्वस्य चोक्तेस्तदनुरोधेन भाष्यं द्वेधा व्याचष्टे ॥ इंद्रियजयश्चेत्यादिना उक्तमितीति ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञाप्रतिष्ठितेत्युक्तत्वादिति भावः ॥ यथाभवति तथाहेति॥यथा येन प्रकारेण मनःप्रमादद्वारेणेति यावत्॥ तथा तं प्रकारं ज्ञानस्य मनःप्रमादद्वारेंद्रियजयजन्यत्वरूपंप्रसादमधिगच्छति प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठतीत्यनेनाहेत्यर्थः॥तथा च वशे हीत्युक्तविवरणरूपत्वान्न पुनरुक्तिरिति भावः ॥ विषयचरणस्यापि ॥ चरणमितिभक्षणयोरिति धातोर्विषयानुभवस्येत्यर्थः ॥ तथा शक्यमिति ॥ देहावस्थानासंभवान्निराहारत्वमशक्यमित्यर्थः

रागद्वेषयोः परंपरया नरकाद्यनर्थप्राप्तिःकार्यमिति ज्ञानेन तत्परिजिहीर्षायां विषयध्यानपरंपरया तत्कारणमिति ज्ञानेन तदकारणात्तयोरनुत्पादोभवतीति ॥ ६२ ॥ ६३ ॥ रागद्वेषेतिश्लोकद्वयस्य तात्पर्यमाह ॥ इंद्रियेति ॥ इंद्रियजयश्च तत्फलं चेंद्रिय जयफलं इंद्रियजयस्यफलमिंद्रियजयफलम् अस्त्वेवं रागद्वेषपरिहारः ॥ ततःकिमित्याकांक्षायां रागद्वेषपरिहारस्येंद्रियजयाख्यं फलमाह ॥ इंद्रियजयेन किं भवति ॥ वशे हि यस्येंद्रियाणीति ज्ञानं भवतीत्युक्तमितिचेत्सत्यम्॥तत्किं साक्षादिंद्रियजयफलमुतव्यवहितमित्याकांक्षायां इंद्रियजयस्यफलं ज्ञानं यथा भव

अधर्मकामिनः शास्त्रे विस्मृतिर्जायते यदा ॥ दोषादृष्टेस्तत्कृतेश्च नरकं प्रतिपद्यत इति ॥ ६२ ॥६३॥

इंद्रियजयफलमाहोत्तराभ्यां श्लोकाभ्याम् ॥ विषयाननुभवन्नपि विधेयआत्मायस्यसजितात्मेत्यर्थः ॥

ति तथाऽहेत्यर्थः ॥ रागद्वेषपरिहारवद्विषयचरणस्यापि इंद्रियजयसाधनत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ विषयानिति ॥ निराहारत्वमिंद्रियजये कारणं तच्चाशक्यमतः कथमिंद्रियजय इत्याशंक्य देहधारणमात्रोपयुक्तविषयानुभवो न दोषायेति तदभ्युपगममात्रमनेन क्रियत इति भावः ॥ इंद्रियजयवाचकं पदमत्र न श्रूयत इति अतस्तद्व्याचष्टे॥विधेय इति स विधेयात्मेति शेषः॥किमनेनापीत्यत आह॥जितात्मेति॥

॥कृ०॥नत्वेवाहमित्यादाविति शेषः॥६२॥६३॥आत्मवश्यैर्विधेयात्मेत्यनेन रागद्वेषपरिहारस्येंद्रियजयाख्यं फलमुच्यते प्रसादमधिगच्छतीत्यादिना चेंद्रियजयस्य फलमतस्तदुभयानुगुण्याय व्याचष्टे ॥ इंद्रियजयश्च तदित्यादिना ॥ ननु विधेय आत्मेत्यादिवाक्यं गीतायां नास्ति तेन तदनुवादेन जितात्मेत्यर्थ इतिव्याख्यानं न युज्यते ॥ न च विधेय आत्मेति समासार्थावबोधकमेतदिति वाच्यम् ॥ तथा सति समासपदप्रदर्शन प्रसंगादित्याशंक्य स इत्यस्यानंतरमध्याहार्यमाह ॥ स विधेयात्मेति शेषइति॥उक्तविधयेति॥ रागद्वेषयोः परंपरयेत्यादिनेतिशेषः

१ कर्मधारयः तच्छब्दस्य विधेय लिंगता २ स्वाधीनः॥

॥ श्री० ॥ **अनेनेति** ॥ विषयानिंद्रियैश्चरन्नित्यनेन देहधारणमात्रोपयुक्तविषयानुभवाभ्युपगममात्रं क्रियत इत्यर्थः॥ भाष्ये जितात्मा जितमना इत्यर्थः ॥ ननु रागद्वेषवियुक्तैरित्यादि पादत्रयेण रागद्वेषपरिहारस्येंद्रियजयाख्यं फलमुक्तमित्ययुक्तं ॥ पादत्रयस्यानुवादरूपत्वेन विधिरूपत्वाभावात् प्रसादमधिगच्छतीत्यस्यैव तथात्वात् ॥ अनुवादकस्यच न स्वार्थसत्तानिश्चय रूपत्वमित्याशंक्याह॥ **यद्यपीत्यादिना** ॥ **अप्राप्तत्वादिति** ॥ तथा चानुवादकत्वं नसंभवतीति भावः ॥ **अन्यथेति** ॥ विधेयत्वेनेत्यर्थः ॥ वाक्यवृत्तिः ॥ वाक्यव्याख्यानम् ॥ उक्त **विधेयेति** ॥ विषयध्यानसंगरूपकारणस्य संमोहादिरूपफलस्य च त्यागेनेत्यर्थः ॥ ननु रागद्वेषयोर्मनोधर्मत्वेनसर्वपुरुषबाह्येंद्रियाणां सदा तद्वियुक्तत्वाज्ज्ञानार्थिन एव किं विशिष्योच्यत इत्यत आह ॥ **ताभ्यामप्रयुक्तैरिति** ॥ रागद्वेषाभ्यामप्रवर्तितैः अप्रेरितैरित्यर्थः ॥ रागद्वेषयोश्च प्रवर्तकत्वम् ॥ प्रवर्तना लक्षणा स्युर्दोषा रागादयश्च त इत्याद्यभियुक्तवाक्येन सिद्ध मिति ॥ ज्ञातव्यम् ॥ **बाह्येंद्रियाणीति** ॥ अनेनात्मवश्यैरिति ॥ पदमुक्तार्थं भवति ॥ नन्वेवं वाक्यवृत्तावंगीक्रियमाणायां वाक्यभेदज्ञापनार्थमिंद्रियजयाख्यं फलमाहेति इंद्रियजयस्य फ लमाहेति क्रमेण तात्पर्यं भाष्यकारैः कस्मान्नोक्तमित्यत आह ॥ **अत एवेति** ॥ यत एवमनुवादकत्वस्यैकवाक्यत्वेन प्रतीयमानत्वेपि अप्राप्तरूपबाधकेनानुवादकत्वासंभवेनोक्तविधया वाक्यवृत्तेर्ज्ञातुं शक्यत्वादेवेत्यर्थः ॥ भाववोधे तु तात्पर्यविवशादुक्तरीत्याऽन्यथा वाक्यवृत्तावपि अन्वयमुखेन श्लोकद्वयस्यैकवाक्यत्वेन प्रतीयमानत्वादेवेत्यर्थइति व्याख्यातम् ॥ **वाक्य द्वयस्येति**॥पादत्रयात्मकमेकं वाक्यं प्रसादमधिगच्छतीत्याख्यं पंचपादात्मकमपरंवाक्यमिति वाक्यद्वयस्येत्यर्थः ॥ **द्वितीयाकांक्षेति** ॥ तज्ज्ञानं किंसाक्षादिंद्रियजयफलमुत व्यवहितमिति द्वितीयाऽकांक्षेत्यर्थः ॥ आत्मधर्मः॥ इच्छारूपः॥ ६४ ॥ ॥ क्रु० ॥ ननु रागद्वेषवियुक्तत्वं सर्वपुरुषबाह्येंद्रियसाधारणं तयोर्मनोधर्मत्वात् ॥ तत्किं जिज्ञासोरेव विशिष्यो

अनेन पादत्रयेण रागद्वेषपरिहारस्येंद्रियजयाख्यं फलमुक्तम्॥यद्यप्यनुवादोऽयं प्रतीयते॥तथाप्यप्राप्तत्वादन्यथा वाक्यवृत्तिः॥तथाहि ॥ य उक्त विधयात्यक्तरागद्वेषः सगरागद्वेषवियुक्तैस्ताभ्यामप्रयुक्तैः केवलशरीरधारणार्थं विषयांश्चरति स विधेयात्मा भवति तत एव बाह्येंद्रियाण्यपि तस्यवश्यानि भवंतीति ॥ अत एव क्रमेण वाक्य द्वयस्य पृथक् तात्पर्यं नोक्तम् ॥ द्वितीयाकांक्षोत्तरत्वेनेंद्रियजयस्यज्ञानं व्यवहितफलमिति

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥६४॥

प्रसादम् ॥ मनः प्रसादम् ॥ ६४ ॥

दर्शयितुं साक्षात्फलमुक्तम् ॥ विधेयात्मा ॥ प्रसादमधिगच्छतीति ॥ तत्र प्रसादो नामात्मधर्म इति प्रतीयते तन्निवृत्त्यर्थमाह ॥ प्रसादमिति ॥प्रसन्नचेतस इति वक्ष्यमाणत्वादिति भावः॥६४ ॥ च्यत इत्यत आह॥**ताभ्यामप्रयुक्तैरिति**॥आत्मवश्यैरित्यनुवादलभ्यार्थमाह॥ **तत एवेति** ॥ ननु यदि रागद्वेषेत्यादेः प्रसादमधिगच्छतीत्यादिश्लोक्तविधयाप्रथग्वाक्यत्वम् तर्हिरागादित्यागस्येंद्रिय जयाख्यं फलमाहेति ॥ इंद्रियजयस्यफलमाहेति न क्रमेणवाक्यद्वयस्य पृथक्तात्पर्यंवाच्यम्॥ इंद्रियजयफलमाहेत्येकोक्त्या वाक्यद्वयतात्पर्यकथने को हेतुरित्यत आह॥ **अत एवेति**॥तात्पर्यवशादन्यथावाक्यवृत्तावप्यन्वयमुखेन वाक्यद्वयस्यैकवाक्यतया प्रतीयमानत्वादित्यर्थः॥६४॥

॥ श्री० ॥तरतीति ॥ ज्ञानेनैव ॥ सर्वदुःखहानिश्रवणान्न मनःप्रसादेन सर्वदुःखहानिरित्याशयः ॥ व्यवधानांतरमिति ॥ प्रसादेन ज्ञाने जननीयेऽन्यद्व्यवधानं वा वक्तव्यमित्यर्थः ॥ ॥अवक्तव्यैवेति॥ सर्वदुःखहानेर्मनः प्रसादफलत्वाभावादिति भावः ॥ एतेनेति ॥ भाष्ये प्रसन्नचेतसो हीति हिशब्दसाहित्येनगीतानुवादकरणेनेत्यर्थः ॥ फलद्वयमिति ॥ प्रसादइति श्लोकेन सर्वदुःखहानिर्बुद्धिश्चेति स्वातंत्र्येण फलद्वयमित्यर्थः ॥ कथमित्यत आह ॥ प्रसादेसतीति ॥ हि यस्मात प्रसन्नचेतसः सर्वदुःखहानिहेतुभूता बुद्धिःपर्यवतिष्ठति ॥ एवं प्रसादे मनः प्रसादे सति जातया बुद्ध्या सर्वदुःखानां हानिरस्योपजायते इतियोज्यम् ॥ व्यवधानेनेति ॥ चित्तनिरोधाख्ययुक्तिद्वारेत्यर्थः ॥ भविष्यति ॥ नास्तिबुद्धिरयुक्तस्येति वक्ष्यमाणप्रकारेणेत्यर्थः ॥ अतोऽनेन वक्तव्यस्य व्यवधानस्यानुक्तिरित्यन्वयः ॥ ततो ज्ञानात ॥ प्रसादफलतयेति ॥ एवं परंपरामभिप्रेत्य प्रसादे सर्वदुःखानांहानिरित्युक्तमिति ॥ नावक्तव्योक्तिः ॥ सर्वदुःखहानेः परंपरया प्रसादफलत्वेनावक्तव्यत्वाभावादिति भावः ॥ ननु सत्यमेवं वस्तुगतिस्तथाप्यत्र सर्वदुःखहानेर्ज्ञानफलत्वोक्तौ का संगतिरित्यत आह ॥बुद्धीति॥अपुरुषार्थत्वादिति॥ इष्टप्राप्त्यनिष्टनिवृत्त्योरन्यतरत्वाभावादिति भावः ॥ परिहर्तुमिति ॥ अनिष्टनिवृत्तिरूपत्वादित्याशयेनेत्यर्थः ॥ प्रसंगादिदमिति ॥

प्रसादे सति किं स्यादित्यत उक्तम् ॥ प्रसाद इति ॥ तदाक्षिपति ॥ कथमिति तरति शोकमात्मविदित्यादि विरोधादिति भावः ॥ किं च प्रसादे सति ज्ञानं भवतीति वा व्यवधानांतरं वा वक्तव्यं तत्रोक्तम् ॥ सर्वदुःखहानिश्चावक्तव्यैवोक्तेति चाक्षेपशेषः ॥ एतत्परिहारत्वेनोत्तरार्धव्याख्याति ॥ प्रसन्नेति ॥ एतेन प्रसादस्यफलद्वयमुच्यत इत्यपि प्रतीतिर्निरस्ता भवति ॥ प्रसादेसति ब्रह्मापरोक्षज्ञानं भवति ॥

प्रसादेसर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसोह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

कथंप्रसादमात्रेणसर्वदुःखहानिः ॥ प्रसन्नचेतसोहि बुद्धिः पर्यवतिष्ठति ब्रह्मापरोक्ष्येण सम्यक्स्थितिं करोति॥ तच्च व्यवधानेनेति भविष्यति ॥ ततो भवति सर्वदुःखहानिः प्रसादफलतयोक्तेति न वक्तव्यानुक्तिः ॥ नाप्यवक्तव्योक्तिः ॥ बुद्धियुक्त इति श्लोके सुकृतदुष्कृतहानं ज्ञानफलमित्युक्तम् ॥ तदयुक्तम् ॥ अपुरुषार्थत्वादित्याशंकां परिहर्तुं प्रसंगादिदमुक्तमिति ॥

॥कृ०॥ इत्यतउक्तमिति ॥ गीतायामिति शेषः ॥ एतेनेति ॥ कथं प्रसादमात्रेण सर्वदुःखहानिरित्याक्षेपपूर्वकं प्रसन्नचेतसोहीत्यादिव्याख्यानेनेत्यर्थः ॥ हि यस्मात्प्रसन्नचेतसो बुद्धिः पर्यवतिष्ठति ॥ तस्मात्प्रसादे सति सर्वदुःखहानिर्भवतीत्येवमस्य श्लोकस्य मनः प्रसादे सति ज्ञान द्वारा सर्व दुःखहानिर्भवतीत्येतत्परत्वव्याख्याने कृत एवोक्ताक्षेपनिरासो नान्यथा तेनान्यथा प्रतीतिनिरास इति भावः ॥ अत एव भाष्ये हिशब्दसाहित्येन गीतानुवाद इति बोध्यम् ॥ व्यवधानेनेति ॥ नास्तिबुद्धिरयुक्तस्येति वक्ष्यमाणव्यवधानेनेत्यर्थः ॥

॥ श्री० ॥ ॥ प्रसंन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठतीति बुद्धिरूपमन प्रमादफलकथनेन तत्फलरूपाया दुःखनिवृत्तेरपिस्मारितत्वेन प्रसंगसंगत्योक्तमिति भावः ॥ उपनतिः ॥ प्राप्तिः॥ ॥ इंद्रियजयफलत्वमिति ॥ इंद्रियजयाभावेऽपि उक्तरूपमन प्रमादसद्भावादित्याशयः ॥ ज्ञानेति ॥ अभिलषितविषयोपनतौ च तादृशप्रमादस्य ज्ञानसाधनत्वं विरुद्धमिति भावः ॥ अप्रवृत्तिर्मनस इति शेषः ॥ ६५ ॥ इदमनिष्टम् ॥ तदुक्तमिति ॥ प्रमादाभावे दोषमाहेति कथमुक्तमित्यर्थः ॥ प्रकरणादिति ॥ न चायुक्तस्येत्याद्यनुवादप्रकरणादत्राप्ययुक्तस्येत्यनु वादाद्विधेयं प्रत्यनीत्याशयः ॥ ननु युक्तिलिंगव्याप्यमिति ॥ पर्यायान प्रमादाभावेऽनुमानाभाव इत्युक्तं स्यादिति मत्वा शंकते ॥ नन्विति ॥ निरोधशब्दार्थमाह ॥ एकाग्रतेति ॥

ननु यस्यानायासेनाभिलषितविषयोपनतिस्तस्य मनोऽव्याकुलं प्रसन्नमित्युच्यते॥ततः कथं प्रसादस्येंद्रियजयफलत्वं ज्ञानसाधनत्वं चोच्यत इत्यत आह॥ प्रसाद इति ॥अत्र विवक्षितेति शेषः॥स्वतोऽपि प्रयत्नं विनाऽपि विषयागतिर्विषयान्प्रत्यप्रवृत्तिः॥६५॥वक्तव्यस्योक्तत्वान्नास्ति बुद्धिरित्यादिकं किमर्थमित्यत आह॥प्रसादेति॥श्रवणमननाभ्यामुपकृतेन ध्यानेनैव ब्रह्मापरोक्षज्ञानसिद्धेः किमनेन प्रसादेन यदर्थमिंद्रियजयोऽ

प्रसादो नाम स्वतःप्रायो विषयागतिः ॥६५॥ प्रसादाभावे दोषमाहोत्तराभ्यां श्लोकाभ्याम्॥ न

नास्तिबुद्धिरयुक्तस्यन चायुक्तस्यभावना॥न चाभावयतःशांतिरशांतस्यकुतःसुखम्॥६६॥

हि प्रसादाभावे युक्तिश्चित्तनिरोधः

पेक्षित इत्याशंक्येति शेषः॥ नन्वत्र प्रसादाभाव इदं स्यादिति नोच्यते ततः ॥ कथमेतदुक्तमित्यतः प्रकरणप्राप्तमध्याहरति ॥ नहीति ॥ ननु प्रसादरहिता अनुमिमेते इत्यत आह ॥ चित्तेति ॥ एकाग्रतेत्यर्थः ॥

॥कृ०॥ ततःकथमिति॥अव्याकुलत्वाख्यप्रमादस्येंद्रियजयफलत्वं कथम॥अनायासेनाभिलषितविषयोपनति फलत्वाज्ज्ञानसाधनत्वं च कथं विषयोपनति जन्याव्याकुलत्वस्य ज्ञानसाधनत्व विरोधादित्यर्थः ॥ ६५ ॥ श्रवणमननाभ्यामिति ॥ ध्यानमेवापरोक्षज्ञानकारणम ॥ ततस्तु तं पश्यते निष्फलं ध्यायमान इति श्रुतेः ॥ श्रवणमनने तु ध्यानोपकारके ॥ तत्र श्रव णमज्ञाननिवृत्तिद्वारा तदंगम मननं तु संशयविपर्ययनिवृत्तिद्वारा ॥ शृण्याद्यावदज्ञानं मतिर्यावदयुक्ततेत्युक्तोरिति विवेकः ॥ चाक्षुषसाक्षात्कारे आलोकस्य चक्षुःसहकारित्ववद्ब्रह्मसाक्षात्का रे ध्यानस्य करणत्वेऽपि मनसः सहकारित्वमितिन मनसैवेदमाप्तव्यमित्यादिविरोध इति बोध्यम ॥ युक्तिशब्दस्यानुमानार्थत्वं गृहीत्वाऽह ॥ अनुमिमत इति ॥ ननु चित्तनिरोधो नाम चित्तस्य विषयागतिः ॥ तथा च चित्तनिरोधस्य प्रमादरूपत्वात्कथं कार्यकारण भाव इत्यत आह ॥ एकाग्रतेत्यर्थ इति

१ एतेनटीकायां प्रकरणात्प्राप्तमिति पाठोत्रा पंचमी समासांतर्गतनूद्यत इति वा ज्ञेयम् २ अनुमानं कुर्वंति ॥

॥ श्री० ॥ प्रकृतानुपयुक्तमिति ॥ अपरोक्षज्ञानस्यैव मनःप्रसादसाध्यत्वेनप्रसन्नचेतस इति प्रकृतत्वादनुपयुक्तम ॥ मनोहरणेऽपि ज्ञानमात्रस्य जायमानत्वात ॥ अयुक्तं चेत्यर्थः ॥
नन्वेवं न चायुक्तस्य ध्यानमिति वक्तव्यत्वेन न चायुक्तस्यभावनेति कथमुक्तमित्यत आह ॥ भावनेति ॥ ननु न चाभावयतः शांतिरित्ययुक्तम् ॥ ज्ञानेनैव शांत्युत्पादादित्यत आह॥
॥ अत एवेति ॥ भावनाया ध्यानत्वात्तस्यैव ज्ञानसाधनत्वाच्छांतिस्तु ज्ञानद्वारैव ध्यानसाध्यत्वादेवेत्यर्थः नकेवलमिति॥अनिष्टहानिरेवेत्यर्थः ॥ प्रसादे सर्वदुःखानां हानिरिति सर्वदुः
खहानेरेव प्राक् ज्ञानसाध्यत्वेनोक्तत्वादिति भावः ॥ सुखं चेति ॥ इष्टप्राप्तिश्चास्तीत्यर्थः ॥ ॥ कृ० ॥ प्रकृतानुपयुक्तमिति ॥ अपरोक्षज्ञानस्यैव मनः

एवमध्याहारे सति नास्तिबुद्धिरित्येतत्संबध्यत इति भावेनाह॥अयुक्तस्येति॥ज्ञानमात्रं प्रकृतानुपयुक्तमयुक्तंचेत्यत आह॥सम्यगिति ॥ ब्रह्मापरो
क्षज्ञानमित्यर्थः ॥ एतावताप्रसादाभावे दोषउक्तस्तत्किमर्थं न चायुक्तस्येत्येत दित्यत आह॥तदेवेति॥ध्यानेनैव ज्ञानोत्पादात्कथं नास्ति बुद्धिर
युक्तस्येत्याशंक्येति शेषः भावनाध्यानं॥ अत एव न चाभावयतोज्ञानम् ॥ न चाज्ञानिनः शांतिरितियोज्यम् ॥ननु शांतिःप्रसादः तस्य ज्ञानसा

अयुक्तस्य च बुद्धिःसम्यग्ज्ञानं च नास्ति ॥ तदेवोपपादयति ॥ न चायुक्तस्येति ॥ शांतिर्मुक्तिः शां
तिर्मोक्षोऽथ निर्वाणमित्यभिधानात् ॥ ६६ ॥

धनत्वे नोक्तत्वात्कथं ज्ञानोत्तरत्वमुच्यत इत्यत आह॥ शांतिरिति ॥ एतच्च न केवलं मुक्तौ सर्वदुःखहानिः किं तु संसारिभिरलभ्यं परमं
सुखं चेति ज्ञापयितुं प्रसंगादुक्तम् ॥ ॥ ॥ ॥

प्रसादसाध्यत्वेन प्रकृतत्वादिति भावः ॥ अयुक्तमिति ॥ चित्तकाग्रताभावेऽपि घटादिज्ञानोत्पत्तेरिति भावः ननु भावनैव प्रयत्नात्मेत्याद्यभियुक्तोक्तेः प्रयत्न एव भावनाप्रयत्नश्च चित्तै
काग्रताभावेपि भवतीति न चायुक्तस्य भावनेतिकथमुक्तमित्यत आह ॥ भावना ध्यानमिति ॥ अतएवेति ॥ ज्ञानस्यैव साक्षात ध्यानजन्यत्वाच्छांतेस्तु ज्ञानद्वारैव तज्जन्यत्वादि
त्यर्थः ॥ ननु ज्ञानिलक्षणस्यासंभवपरिहाराय ज्ञानस्य महाप्रयत्नसाध्येंद्रियनिग्रहसाध्यत्व प्रतिपादनानंतरं ज्ञानफलप्रतिपादनमसंगतमित्यत आह ॥ एतच्चेति ॥ चशब्देन सर्वदुः
खानां हानिरस्योपजायत इत्युक्तसमुच्चयः तदनेन टीकावाक्येन न चाभावयतः शांतिरित्यत्र व्यतिरेकमुखेन प्रागुक्तसर्वदुःखहानिमनूद्याशांतस्य कुतः सुखमित्यत्र व्यतिरेक मुखेन
मुक्तौ परमसुखं चास्तीति गीतायामुच्यत इत्युक्तं भवति ॥ ॥ ॥ ॥ ॥ ॥

१ विषयैर्मनस आकर्षणेऽपि ॥

॥ श्री० ॥ **एतदेवेति** ॥ गीतायां सर्वदुःखानांहानिरिति मोक्षस्य दुःखाभावरूपत्वमुक्त्वा पुनः शांतिपदेन परमसुखरूपत्ववचनमतत्यमभिप्रेत्यैव प्राक् ब्रह्मादिपदादन्यदप्यधिकतमं सुख मोक्ष इतिसिद्धमित्युक्तमित्यर्थः ॥ अनेन तद्भाष्यं गीतारूढं कृतं भवतीति ज्ञातव्यम् ॥ ६६ ॥ मुद्रितत्वात् समाप्तत्वादिति यावत् ॥ साधनाभावादेव ध्यानं न भवतीतिचेत्तत्राह ॥ **कृतेति** ॥ युक्त्यंभावेऽपीति शेषः ॥ **कर्ता चेति** ॥ केनानुविधीयत इति शंकायां कर्तृत्वेन जीवः प्रतीयत इत्यर्थ. ॥ ननु भाजः पोषणार्थत्वेन क्रियत इति व्याख्यानं कथमित्यत आह॥ ॥ **विपूर्व इति** ॥ नन्विंद्रियाणामन्वित्ययुक्तं ॥ अनुर्लक्षणेइति सूत्रविहितस्य लक्षणार्थकस्यानोर्लक्षणेत्थं भूताख्यानभागवीप्सासुप्रतिपर्यनव इति कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयायां इंद्रियाण्यन्विति स्यादित्यत आह ॥ **अत्रानुरिति** ॥ पृष्ठभावित्वार्थ इति ॥ तथा चेंद्रियाणामनु इंद्रियाणां पृष्टतः मनः ईश्वरेण विधीयते क्रियत इत्यर्थः॥इंद्रियाणां विषयान्प्रति चरणे तदनु मनोऽपि यथा गच्छेत् तथेश्वरःकरोतीति यावत् ॥ न भवति ॥ तथा चेंद्रियाणीति कर्मप्रवचनीययुक्ते द्वितीया न भवतीत्यर्थः ॥

एतदेवाविक्ष्य भाष्यकृता ब्रह्मादिपदादित्याद्युक्तम्॥ ६६ ॥एकेनैव श्लोकेन प्रमेयस्य समुद्रितत्वात् श्लोकाभ्यामिति किमर्थमुक्तमत आह ॥ कथमिति ॥ कृतश्रवणमननस्य ध्यानोपपत्तेरिति भावः ॥ न भवतीत्याशंक्येति शेषः ॥अनु विधानंसदृश भवनं तदत्रासंगतं कर्ता चात्र जी

इंद्रियाणांहि चरतां यन्मनोऽनुविधीयते ॥ तदस्यहरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥

कथमयुक्तस्य भावना न भवति ॥ आह॥ इंद्रियाणामिति ॥अनुविधीयते ॥ क्रियते॥

व इति प्रतीयतेऽत आह ॥ अनुविधीयत इति ॥ विपूर्वोदधातिः करोत्यर्थे वर्तते कर्ता चात्रेश्वर एवेत्यर्थः ॥ अत्रानुः पृष्ठ भावित्वार्थो न लक्षणाद्यर्थ इति कर्मप्रवचनीयो न भवति ॥ ॥ रु० ॥ ननु तथापि मोक्षस्य परमसुखरूपत्वं न वक्तव्यं भाष्यकृता प्रागेवोक्तत्वादित्याशंक्य तद्भाष्यस्यैतद्गीताव्याख्यानत्वान्न दोष इतिभावेनाह ॥ **एतदेवेति** ॥न चाभावयतः ॥ शांतिरशांतस्य कुतः सुखमित्येतदेवेत्यर्थः॥ ६६॥**लक्षणाद्यर्थ इति** ॥ आदिपदेनेत्थंभूताख्यानादेर्ग्रहणम् ॥ न भवतीति ॥ तथा च कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयाप्राप्तेरभावात्षष्ठ्युपपत्तिरिति भावः ॥

---

१ टीकायांप्रागिति शेषइतिभावः २ चित्तनिरोधाभावेपि ॥

॥ श्री० ॥ बुद्धिरितीति ॥ बुद्धिर्ज्ञानमसंमोह इत्याद्युक्ता भवंति भावा भूतानांमत्त एव पृथग्विधा इत्युक्तत्वादिंद्रियाणामनु मनःश्रवणरूपव्यापारस्याधीश्वराधीनत्वात्तगमादिति भावः॥ ॥ अयुक्तमिति ॥ प्रकृतानुपयोगादिति भावः॥ननु कथमयुक्तस्य भावना न भवति श्रवणमननाभ्यां तदुपपत्तेरितिशंकितस्य किमुत्तरमनेनेत्यतमित्यत आह ॥ चित्तेत्यादिना ॥ श्रवणेन ह्यज्ञाननिवृत्तौ सत्यां तत्वनिश्चयः मननेन तु संशयविपर्ययनिवृत्तौ सत्यामयमेव वेदार्थ इति नियमे पश्चाद्ध्यानं भवति ॥ यथाक्रम ॥ तन्निर्धारणार्थनियमस्तत् दृष्टेः पृथक्प्रतिबंधः फलमिति ॥ तथा श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ ॥ संशयं च पराणुद्य लभते ब्रह्मदर्शनमिति प्रोक्तमतश्चित्तनिरोधरहितश्रवणं ध्यानोपयोगितत्वनिश्चयं न करोति ॥ तथा चित्तनिरोधरहितमननमपि न ध्यानोपयोगिवेदार्थनियमं करोतीति न चायुक्तस्य भावनेत्युक्तंयुक्तमिति भावः ॥ ६७ ॥ असंभवेति ॥ यदि ज्ञानंकामप्रहाण्यादि जनकं तर्हि सर्वोऽपि जनः कस्मान्नतन्मावयति किमर्थं कामाद्युपद्रवपरिहाराय दंदह्यमानशिरा बंभ्रमीति अतो नास्त्येवेदं ज्ञानिषु लक्षणमित्यसंभवशंकापरिहारायेत्यर्थः ॥ श्रवणमनन्याभ्यामित्यनंतरं ॥ अज्ञानसंशयविपर्ययनिवृत्तिद्वारा तत्वज्ञानं भवति उपलक्षणमेतत ॥ वेदार्थनियमश्चेत्यपि ग्राह्यम ॥ ६८ ॥

नन्वितिसंप्रतिपत्तिमुक्त्वा(मुक्ता) सा कुत इत्यत आह॥बुद्धिरिति॥ग्रहणशक्तिःप्रज्ञा॥तद्ग्रणमत्रायुक्तमित्यत आह ॥प्रज्ञामिति॥परोक्षनिश्चयम् ॥ यस्य प्रज्ञानं नोत्पन्नं तस्य युक्त्यभावः किं करिष्यति ॥ विद्यमानस्य हि हरणमत आह ॥उत्पत्स्यदिति ॥ तर्ह्युत्पन्नपरोक्षज्ञानस्य युक्त्यभावोऽकिंचित्कर इत्यत आह ॥उत्पन्नस्यापीति॥चित्तनिरोधरहितश्रवणमनने अपि नध्यानोपयोगिनी तत्वनिश्चयवेदार्थनियमौ कुरुत

नन्वीश्वरेणेंद्रियाणामनु ॥ बुद्धिर्ज्ञानमिति वक्ष्यमाणत्वात् ॥ प्रज्ञाम्॥ ज्ञानम्॥उत्पत्स्यदपि निवारयतीत्यर्थः॥

तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥

उत्पन्नस्याप्यभिभवोभवति॥६७॥तस्मात्सर्वात्मना निगृहीतेंद्रियएव ज्ञानीति निगमयति॥तस्मादिति॥६८॥

इति भावः ॥ ६७ ॥ अत्र परमं प्रमेयं ज्ञानिलक्षणं प्रकृतं तस्यासंभवपरिहाराय ज्ञानस्यमहाप्रयत्नसाध्येंद्रियनिग्रहसाध्यत्वं च तत्र कस्यायमुपसंहार इति न ज्ञायतेऽत आह ॥ तस्मादिति ॥ज्ञानी जायत इति शेषः ॥यत एवं निगृहीतेंद्रियस्यैव प्रसादः प्रसादवत एव युक्तिः युक्तिमत एव श्रवणमननाभ्यां तत्वज्ञानं तत्वज्ञानवत एवापरोक्षज्ञानसाधनं ध्यानं नान्यथा तस्मादित्यर्थः ॥ ६८ ॥

॥कृ०॥अयुक्तमिति ॥यदा बाह्येंद्रियाणि विषयसंनिकृष्टानि मनश्च तद्द्वारा तत्र प्रवर्तेते तदा मनसो विषयग्रहणशक्त्यनुकूलत्वादिति भावः ॥तत्वनिश्चयेति॥यथाक्रमं श्रवणमननसाध्यौ ज्ञानविशेषावेतौ॥६७॥ननु निगृहीतेंद्रिय एव ज्ञानीत्यनेन व्याप्तिः प्रतीयते॥ शंख पांडुर एवेति वत्॥न त्विंद्रियनिग्रहज्ञानयोरन्यसमनकत्वमित्यत आह ॥ज्ञानी जायत इति शेष इति६८॥ ॥१०३॥

॥श्री० ॥ **अक्षरेति** ॥ पदवाक्ये तु दृगापास्ते इति भावः ॥ **प्रमाणविरोधाच्चेति**॥ ज्ञानी तु कर्माणि सदोदितानि कुर्यादित्यादिप्रमाणविरोधाच्चेत्यर्थः ॥ चतुः श्लोक्यां ॥ प्रजहातीत्याद्यायाम ॥ **अत्रोक्तमिति** ॥ अत्र यानिशेति श्लोके चतुःश्लोक्यामुक्तं ॥ न प्रतीयत इत्यर्थः ॥ ननु परमेश्वरस्वरूपनिशाकालयोः कथं साम्य सर्वभूतनिष्ठाज्ञानं प्रति ईश्वरस्वरूपस्य विषयत्वेन निशाकालस्य ॥ तु सुप्तभूताज्ञानं प्रति अधिकरणत्वेन ॥ वैलक्षण्यादित्यत आह ॥ **विषयत्वमित्यादि** ॥ विषयत्वम ॥ कर्मत्वम ॥ यद्यपीश्वरस्वरूपनिशाकालयोर्विषयत्वाधिकरणत्वाभ्यां वैलक्षण्येन न साम्यं तथाप्यज्ञानं प्रतियत्कारकत्वंतेनसाम्यं विवक्षितमित्यर्थः ॥ सुप्ते सुप्तानीत्यस्य सुप्तानि भूतानीवसुप्तजना इवेत्यर्थः ॥ ननु विषयनिशाकालयोः कथं साम्यं विषयाणां ज्ञानिनिष्ठज्ञानाभावरूपाज्ञानं ॥ प्रति विषयत्वात् निशाकालस्य च सुप्तभूतनिष्ठाज्ञानं प्रत्यधिकरणत्वेन वैलक्षण्यादित्यत आह ॥ **अत्रापीति** ॥ विषयत्वमधिकरणत्वं चाविवक्षित्वा कारकत्वमात्रविवक्षया साम्यमित्यर्थः ॥

ज्ञानिनः सर्वकर्मत्यागप्रतिपादनार्थाय यानिशेत्ययं श्लोक इति कश्चित ॥ तत्र तत्प्रतिपादकाक्षराश्रवणात्प्रमाणविरोधाच्चेत्याशयेन तत्प्रतिपाद्यमाह ॥ उक्तलक्षणामिति ॥ चतुःश्लोक्या विक्षिप्योक्तम् ॥नन्वत्रोक्तं किमपि न प्रतीयत इत्यत आह॥येति॥परमेश्वरस्वरूपस्य निशासाम्यमुपपादयति ॥ यस्यामिति॥ विषयत्वमधिकरणत्वं चाविवक्षित्वा कारकत्वमात्रविवक्षया साम्यमिदमुक्तम् ॥ संयमीत्यस्याक्षरार्थं इंद्रियेति

उक्तंलक्षणांपिंडीकृत्याह ॥ यानिशेति ॥ यासर्वभूतानां निशापरमेश्वरस्वरूपलक्षणा ॥ यस्यां सुप्तानी

यानिशा सर्वभूतानां तस्यांजागर्तिसंयमी ॥ यस्यांजाग्रतिभूतानि सा निशापश्यतोमुनेः ॥६९॥

वनकिंचिज्जानंति॥तस्यामिंद्रिय संयुक्तो ज्ञानीजागर्ति॥सम्यगापरोक्ष्येण पश्यति परमात्मानमित्यर्थः॥

यस्यांविषयल क्षणायांभूतानि जाग्रति तस्यां निशायामिव सुप्तः प्रायोनजानाति ॥

प्रकरणलभ्योऽर्थो ज्ञानीति ॥ उत्तरार्धार्थमाह ॥ यस्यामिति ॥ अत्रापि पूर्ववत्साम्यम् ॥ कृ० ॥ **प्रमाणविरोधाच्चेति** ॥ पश्यन्नपीममात्मानं कुर्यात्कर्मविचारयन्नित्यादि प्रमाणविरोधादित्यर्थः ॥ नन्वीश्वरस्याज्ञानविषयत्वेऽपि न तदधिकरणत्वं निशायास्त्वज्ञानाधिकरणत्वेऽपि नतद्विषयत्वं तत्कथं तयोः साम्यमुक्तमित्यत आह ॥ ॥ **विषयत्वमिति** ॥ **कारकत्वमात्रेति** ॥ विषयरूपकर्मणि अधिकरणे ॥ चानुगतं यत्कारकत्वसामान्यं तन्मात्रविवक्षयेत्यर्थः ॥ **अत्रापीति** ॥ विषयेषु ज्ञानाभावरूपज्ञानिनिष्ठाज्ञानविषयत्वं निशायां तदधिकरणत्वं चाविवक्षित्वाकारकत्वमात्रविवक्षया साम्यमुक्तमित्यर्थः ॥

॥ श्री० ॥ मूले निशायां सुप्त इवेत्यन्वयः ॥ संप्रज्ञातसमाध्यभिप्रायेण प्राय इत्युक्तमिति द्रष्टव्यम् ॥ तदुक्तमिनीति ॥ तृतीयस्कंधे देवहूतिंप्रति भगवता कापिलेनोक्तमित्यर्थः ॥ देहं तु तत्रचरमं स्थितमुत्थितं वा सिद्धोऽभिपश्यति यतोऽध्यगमत्स्वरूपम् दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ देहोऽपि दैववशगःखलु कर्म यावत्स्वारंभकं प्रति समीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तु इति तृतीयस्कंधगताविमौ श्लोकौ नैकादशस्कंधगतौ अतो देहं च नश्वरमिदामिति तत्स्कंधमूल तात्पर्यगतपाठेनैतद्भाष्यस्य पाठविसंवाद इति शंकानवकाश इति संप्रदायविदः ॥

मत्तादिवद्गमनादिप्रवृत्तिः ॥ तदुक्तम् ॥ देहंतु तत्र चरमम् ॥

॥ यदि न किंचित्पश्यति कथं तर्हि तस्यगमनादिप्रवृत्तिरित्यत आह ॥ मत्तादिवदिति ॥ कुत एतदित्यत आह ॥ तदुक्तमिति ॥

॥कृ०॥भाष्ये तदुक्तमिति॥देहं तु तत्रचरमंस्थितमुत्थितं वा सिद्धोऽभिपश्यति यतोऽध्यगमत्स्वरूपम ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ देहोऽपिकर्मवशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षतएव सासु ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तु इति तृतीयस्कंधश्लोकाभ्यामित्यर्थः ॥ यद्देहेऽपरोक्षज्ञानं जातं तं देहं चरमं ॥ ज्ञानानंतरामिति क्रियाविशेषणम ॥ अध्यगमत्स्वरूपम ॥ स्वतंत्रस्य भगवतो रूपं ज्ञानवानित्यर्थः ॥ यद्वा चैतन्यात्मकस्वदेह एवाभिमानवानित्यर्थः ॥ परिवृतं कटितटे परिवेष्टितम ॥

---

१ अत्रदेहंउत्तरश्लोकेदेहइति चजात्येक वचनम ॥ एतेन यस्मिन्देहे अपरोक्षज्ञानं तत्पातानंतरमेवमोक्ष इतिपरास्तम ॥ तथांगीकारेप्रमाणविरोधात् ॥ स्वारंभकंकर्मयावदित्यनेनप्रारब्धकर्मणायस्ययावत्परिमितदेहकल्पनितचरमदेहपातिमोक्षः यस्यतुएकएवकल्पमस्तस्यतत्पातात एवेतिज्ञेयम २ अ० २९ श्लो० ३६ । ३७ ॥ ३ ज्ञानोत्तरंक्रियमाणकर्मणोऽलेपाद्देहांतरारंभककर्माहेतुत्वादेवचरमत्वं ॥ ननुयस्मिन्देहेज्ञानं तदितरदेहाभावादितिज्ञेयम् ॥

॥ श्री० ॥ ननु चतुर्थाश्रम्येव मुनिस्तस्यैव ज्ञानमिति ॥ कुतो नेत्यत आह ॥ याज्ञवल्क्यादीनामिति ॥ तथैव याज्ञवल्क्याद्या मुच्यंते स्त्रीमहादिन इति वचनात् ॥ प्रागिति ॥ अपरोक्षज्ञानोत्पत्तेरित्यर्थः ॥ कथमिति ॥ पश्यतो मुनेरिति सामानाधिकरण्येनदर्शनमननयोः समानकालीनत्वं प्रतीयमानं कथमित्यर्थः ॥ साधनत्वेनेति ॥ तथा च पश्यत इत्यस्य पश्यत इत्यनेनोक्तस्य साधनमाह मुनिरित्यनेनेति भाष्यं योज्यम ॥ अत्रेतदुक्तौ का संगतिरित्यत आह ॥ एतच्चेति ॥ प्रागुक्तमिति॥गमनादि प्रवृत्तिर्नास्त्यभिसंधिपूर्विका मत्तादि प्रवृत्तिवादिति या निशेत्यादिना दर्शयिष्यन्नित्यनेनेत्यर्थः ॥ व्याख्यात इति ॥ उक्त लक्षणं [illegible] त्यवतारितत्वादिति भावः ॥ उत्तरमाह ॥ अन्यपरादपीति ॥ विदितलक्षणसंग्रहपरादपि श्लोकात् स्थितधीरित्यादि प्रवृत्ति विषय प्रश्नोत्तरलाभ इत्याशयेन पूर्वं गमनादिप्रवृत्तिरित्याद्युक्तमित्यर्थः ॥ अन्यथेति॥लक्षणपरादस्मात्प्रश्नोत्तर लाभ इत्याशयमनंगीकृत्य केवलं प्रश्नोत्तर परत्वमेवत्यगीकारे प्रजहातीत्यादि ग्रंथस्य ज्ञानिनो लक्षणमाहेत्यवतारिकां दत्वाया निशेत्यस्य किं प्रभाषेतेत्यादि प्रश्नोत्तरमाहेत्यवतारिका वक्तव्यास्यात् या निशेत्यादिना दर्शयिष्यन्निति तत्र द्वितीयप्रश्नोत्तरस्थान प्रदर्शनमयुक्तं स्यात् स्पष्टत्वेनानन्यत्वात् ॥ तदैवेदं युक्तं स्यात्यदीदं लक्षणपरं स्यात् ॥ तथात्वे हि द्वितीयप्रश्नोत्तरा भावान्न्यूनतायामाशंकितायां तन्न्यूनता येन लक्षणपरादपि या निशेति वाक्यात् द्वितीयप्रश्नोत्तरमपि लभ्यत इत्याशयेन स्थानप्रदर्शनं संगतं स्यादतोन्यपरादपि तल्लाभ इत्युक्त

मुनेरित्युक्तत्वाच्चतुर्थाश्रमिण एव ज्ञानमिति व्याख्यानमस्मादिति भावेनाह ॥ मननयुक्त इति ॥ याज्ञवल्क्यादीनामयतीनामपि ज्ञान श्रवणादिति भावः॥मननस्य प्राङ्निवृत्तत्वात्पश्यतोमुनेरिति कथमित्यत आह॥पश्यत इति ॥ दर्शनसाधनत्वेन मननमिहोक्तं न तु तत्समकालीनतयेत्यर्थः॥ एतच्च प्राङ्मननादेः स्पष्टदर्शनसाधनत्वानुक्तेः प्रसंगादिहोक्तम्॥ननु स्थितधीः किं प्रभाषेतेत्याद्यु(देरु)त्तरमयंश्लोक इति

देहोऽपि दैववशग इतिश्लोकाभ्याम् ॥ मननयुक्तोमुनिः ॥ पश्यत इत्यस्य साधनमाह ॥ ६९ ॥

प्रागुक्तं तत्कथमिदानीं लक्षणपरतया व्याख्यातः॥ अन्यपरादपि तल्लाभ इत्याशयेनेतिब्रूमः ॥ अन्यथाप्रभाषेत इत्यादेरुत्तरमाहेत्यनेनैवावेद्यत् ॥ किं तत्र स्थानप्रदर्शनादिनेति ॥ ६९ ॥

एवाशय इति भावः ॥ ६९ ॥

॥ श्री० ॥ नन्वेवं विधे देहे सति कथं मुक्तिरित्यत आह ॥ देहोऽपीति ॥ प्रतिसमीक्षते तिष्ठति ॥ तावदिति शेषः ॥ तेनैवशब्दसंबंधः ॥ सासुः इंद्रियसहितः ॥ एवं श्लोकद्वयं व्याख्येयम ॥ ननु पिंडीकृत्य ज्ञानिलक्षणोक्तिकाले मननस्य दर्शनहेतुत्वोक्तिरसंगतेत्यत आह ॥ ॥ एतच्चेति ॥ मननादेरिति ॥ अत्र मौनं तृपामना सिद्धिरिति बृहद्भाष्यानुसारेण मुनिशब्दस्यध्यानार्थत्वाद्ध्यानस्य च न चा भावयतः शांतिरित्युक्तत्वेपि तद्वाक्यस्य साक्षाच्छांतिसाधनत्वेप्युपपत्तेः स्पष्टं दर्शनसाधनत्वेनानुक्तत्वात्तदुक्त्यर्थं मुनिपदंध्यानयुक्तपरत्वेनापि व्याख्येयमिति सूचयितुमादिपदमिति बोध्यम् ॥ अन्यथाऽनुपपत्त्या दर्शन साधनत्वलाभेऽपि कंठरवेण तदलाभात्स्पष्टमित्युक्तम् ॥ ॥ प्रागुक्तमिति ॥ प्रजहाति यदा कामानित्येतद्व्याख्यानावसरे उक्तमित्यर्थः ॥ उत्तरमाह ॥ अन्यपरादपि तल्लाभइति ॥ किं प्रभाषेतेत्यादिप्रश्नोत्तरलाभ इत्यर्थः सा निशापश्यतो मुनेरित्यत्रावश्यवक्तव्येन प्रागइत्यनेनेन मत्तादिवद्गमनादिप्रवृत्तिरित्याशयस्य लाभादिति भावः ॥ किं तत्रेति ॥ गमनादिप्रवृत्तिर्नास्त्यभिसंधिपूर्विकेत्यादिभाष्येण प्रजहातीति श्लोकव्याख्यावसरे स्थानप्रदर्शनादिना किं फलमित्यर्थः ॥ आदिपदेनतच्छ्लोकाभिप्रायप्रदर्शनसंग्रहः ६९ ॥

॥ श्री० ॥ननु तस्येति वक्तव्यं तेन ॥ ज्ञानिनाविषयानुभवप्रकारमाहेत्यनन्वितामित्यत आह॥क्रियमाणेति॥ तथा च तेन ज्ञानिना क्रियमाणो यो विषयानुभवस्तत्प्रकारमाहेत्यर्थः ॥ ननु तर्हि क्रियमाणपदस्य तेनेत्यनेन सापेक्षत्वेनासमर्थत्वाद्विषयानुभवपदेन समासोऽयुक्तः॥सापेक्षमसमर्थवद्भवतीति वचनात् ॥ समर्थः पदविधिरिति समर्थस्य सूत्रतस्य समर्थेनैव सुत्रंतेन समासविधानादतस्तत्क्रियमाणेति वक्तव्यमित्यत आह ॥ नित्यसापेक्षत्वादिति ॥ क्रियमाणपदस्य विषयानुभवपदेन समासेऽपि पूर्वेण ज्ञानिनाचितच्छब्देनाकांक्षा न विहन्यते देवदत्तस्य गुरुकुलमित्यादौ दर्शनात् ॥ सापेक्षमसमर्थवद्भवतीति वचनमुत्थाप्याकांक्षारूपानित्यसापेक्षाविषयम ॥ प्रकृते तूत्थिताकांक्षारूपनित्यसापेक्षत्वांगीकारादृदोष इत्याशयः ॥ प्रवृत्तेरपि विषयानुसंधानाभावेऽयोगात्कथंचिदित्युक्तम् ॥ नियतसाधनेति ॥ इंद्रियार्थसंन्निकर्षरूपनियतसाधनेत्यर्थः ॥

पृष्टस्य समस्तस्योत्तरमुक्तं तत्किमापूर्यमाणमित्यनेनेत्यतआह ॥ तेनेति ॥ क्रियमाणेत्युपस्कर्तव्यम् ॥नित्यसापेक्षत्वादसामर्थ्याभावः॥बाह्यानुसंधानरहितस्य युज्येतापि कथंचिद्गमनादिकं विषयानुभवस्तु दृश्यमानः कथं स्यात् ॥ तस्य नियतसाधनसाध्यस्यानुसंधानेन विनाऽनुदया

आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् ॥ तद्वत्कामायंप्रविशंति
सर्वेसशांतिमाप्नोति न कामकामी ॥ ७० ॥

तेनविपयानुभवप्रकारमाह ॥ आपूर्यमाणमिति ॥

दित्याशंकापरिहारार्थमिति शेषः ॥ ॥

ननु तस्येति वक्तव्यं विषयानुभवेति कृद्योगे कर्तृकर्मणोः कृतीति षष्ठीप्राप्तेः तेनेति तु कथमुक्तमित्यत आह ॥ ॥ क्रियमाणेतीति ॥ तथा च क्रियमाणेति ॥ लादेशयोगे न लोकेति षष्ठीप्रतिषेधात्तृतीयैव युक्तेत्याशयः ननु क्रियमाणेत्यस्य तेनेत्यतःसापेक्षत्वेन क्रियामाणेत्यादिसमुदायस्य न विशिष्टैकार्थ वाचित्वं तथात्वे क्रियमाणत्वस्य शक्यैकदेशत्वेन तेनेत्यनेनानन्वयो न स्यात् ॥ न हि श्वशुरशब्दात्पितृविशेषणत्वेनोपस्थितायां भार्यायां सुशिलेत्यादिविशेषणान्वयः तथा च विशिष्टैकार्थवाचित्वरूपैकार्थी भावात्मकसामर्थ्याभावान्न समासः ॥ तादृशसामर्थ्ये सत्येव समास इति समर्थः पदविधिरितिसूत्रे सिद्धांतितत्वादित्यत आह ॥ नित्यसापेक्षत्वादिति ॥ क्रियमाणविषयानुभवेति ॥ समुदायस्य विशिष्टैकार्थ वाचित्वमस्त्येव ॥ न चैवं तेनेत्यनेन क्रियमाणत्वस्यानन्वयः ॥ शक्यैकदेशत्वादिति वाच्यम् ॥ नित्यसापेक्षत्वेन चैत्रस्यनप्तेत्यादाविवैकदेशान्वयस्याप्युपपत्तेः ॥ तथा चैकार्थीभावात्मक सामर्थ्यसंभवात्समासोपपत्तिरिति भावः ॥

॥ श्री० ॥ **कामशब्दस्येति** ॥ काम्यंत इति कर्मव्युत्पत्त्येत्यर्थः ॥ **अन्यथेति** ॥ कामनं काम इति भावव्युत्पत्त्या इच्छां गृहीत्वा विषयाणां कामशब्देनाग्रहणे विहायेत्यु त्तरश्लोके कामशब्देन विषयाणां गृहीतत्वात्तद्विरोधः स्यादित्यर्थ इत्याहुः ॥ तन्नु तन्नु ॥ अन्यथा तद्वत्कामा इति शब्दोक्तविषय प्राप्तावपि इच्छाभावेन नोत्सेकादिकं प्राप्नोतीति वि वरणाकरणे तद्वत् कामा यं प्रविशंति विहायकामानित्यनयोः परस्परं विरोधः स्यादिति भावः ॥ **प्रशंसार्थमेतदिति** ॥ प्रमादे सर्वदु खानामित्यादिना ज्ञानिनो मुक्तेः प्रतिपादितत्वेन पुनस्तदुक्तौप्रयोजनाभावादिति भावः ॥ **एतद्दृष्ट्वेति** ॥ प्रयोजनं शब्दं स शांतिमाप्नोतीति वचनं दृष्ट्वेत्यर्थः ॥ **ज्ञानिन एवेति** ॥नचाज्ञानिन इत्यर्थः ॥ **गतार्थत्वादिति** ॥ नचा भावयतः शांतिरित्यत्र नचाज्ञानिनः शांतिरित्यभिप्रेतत्वेन गतार्थत्वादित्यर्थः ॥ ७ ॥

॥ तद्वत्कामा यं प्रविशंतीति संक्षेपेणोक्तं तद्विवृणोति ॥ य इति ॥ कामशब्दस्यार्थो विषयैरिति ॥ अन्यथा विहाय कामानित्युक्तविरोधात् ॥ अचलप्रतिष्ठत्वस्यैव व्याख्यानंनोत्सेकमित्यादि ॥ कुत एषोऽर्थ इत्यतः समुद्रदृष्टांतोपादानसामर्थ्यादिति भावेनाह॥नहीति ॥ स शांतिमाप्नो

यो विषयैरापूर्यमाणोऽप्यचलप्रतिष्ठोभवति ॥ नोत्सेकं प्राप्नोति ॥ नच प्रयत्नं करोति ॥ नचाभावे शुष्यति ॥ न हि समुद्रःसरित्प्रवेशाप्रवेशनिमित्तौ वृद्धिशोषौ बहुतरौ प्राप्नोति ॥ प्रयत्नं वा करो ति ॥ समुक्तिं ॥ प्राप्नोतीत्यर्थः ॥ ७० ॥ ॥ ॥

ति इत्यस्यार्थमाह ॥ स इति ॥ ज्ञानिप्रशंसार्थमेतत् ॥ एतद्दृष्ट्वा केचिज्ज्ञानिन एव मुक्तिरित्यनेनाहेत्याहुः ॥ तदसद्गतार्थत्वात् ॥ ७० ॥

॥ कृ० ॥ **अन्यथेति** ॥ अवत्यकामशब्दस्य विषयार्थत्वाभाव इत्यर्थः ॥ **उत्तरविरोधादिति** ॥ तत्र निःस्पृह इति पृथगुक्ते कामशब्दस्य विषयवाचित्वावश्यंभावादिति भावः ॥ वैयर्थ्यमाशंक्याह ॥ **ज्ञानिप्रशंसार्थमिति** ॥ **गतार्थत्वादिति** ॥ नचाभावयतः शांतिरित्यादिनेति शेषः॥७० ॥

॥श्री०॥कामा इति ॥विहायकामानित्यत्र कामाः हीच्छैव भावव्युत्पत्त्येत्यर्थः॥निस्पृहइति॥ तेन पदेनापि स्पृहाशब्दोक्तकाम एव निषिध्यत इत्यर्थः॥इति कर्मव्युत्पत्त्या॥भक्षणार्थ इति।चरगतिभक्षणयोरितिधातोरित्याशयः॥ व्याघात इति॥विषयहानिविषयभक्षणयोः परस्परविरुद्धत्वादिति भावः॥व्यर्थ इति॥चरेर्गत्यर्थकत्वे विषयान् चरतीत्यस्य विषयाननुभवतीत्यर्थः॥स्यात् तथा च वैयर्थ्यपूर्वं विषयैरापूर्यमाणोऽपीति विषयभक्षणस्यैवोक्तत्वेन गतेरनुक्तत्वेन प्रपंचकत्वाभावादिति भावः॥यद्वा विषयान् विहाय इतस्ततो गच्छतीतिकथनस्य व्यर्थत्वादित्यर्थः॥ कामानितीति ॥तथा च काम्यन्त इति कामा विषयाः चरतिश्च भक्षणार्थ एव तत्र च व्याघातपरिहारार्थं निस्पृहतयेत्युक्तमिति भावः ॥ असंभवेति॥ज्ञानिनोऽप्यहमित्यात्मबुद्धेर्देहादौ ममेति बुद्धेश्च सत्वान्निर्ममत्वं निरहंकारत्वं च सम्भवतीत्यर्थः ॥ अहंप्रत्ययादीत्यादिपदेन ममेति प्रत्ययग्रहणम् ॥ येनासंभवः स्यादित्याशयः॥ अन्वयसमाप्तिमिति ॥ तथा चानेन स शांतिमधिगच्छतीति ज्ञानिप्रशंसार्थमेतदित्युक्तं भवति। दर्शितमिति ॥ गतार्थत्वादित्याशयः ॥ स्त्रीव्यावृत्त्यभावश्चेति। दर्शितोऽस्मन्मत इति शेषः॥ स हि पुमान् अन्यः पशुरिति प्रशंसाकरणेन स्त्रीव्यावृत्त्यभावः स्त्रीणां मुक्तिर्नेति मुक्तेर्निषिद्धाऽस्मत्व्याख्याने व्यावृत्त्यभावः प्रदर्शितो भवति॥समग्रश्लोकस्य एकान्वये स पुमान् शांतिमधिगच्छति इति विधौ पुमानित्यस्यानुवादत्वेन मुक्त्यधिगंतृः पुंस्त्वस्योक्तया स्त्रीणां मुक्तिर्गतिव्यावर्तिता स्यात् सा च निषिद्धाऽयुक्ता॥स्त्रीणामपि मैत्रेय्यादीनां मुक्तिश्रवणादिति भावः ॥ ७१ ॥

विहायेत्यनेनाप्ययमेवार्थ उच्यतेऽतः पुनरुक्तिरित्यत आह ॥ एतदेवेति॥ यद्यत्र कामा इच्छाविशेषास्तर्हि निस्पृह इति पुनरुक्तिः॥यदि काम्यंत इति विषयास्तदा चरतिर्यदि भक्षणार्थस्तदा व्याघातः ॥ अथ गत्यर्थस्तदाव्यर्थ इत्यतो व्याचष्टे ॥ कामानिति ॥ निर्ममो निरहंकार इत्येतदसंभवपरिहाराय व्याचष्टे ॥ भक्षयामीति ॥ कर्तृत्वाभिमान एवाहंकारः स्वामित्वाभिमान एवममता नत्वहंप्रत्ययादिमात्रमिति भावः ॥ स

एतदेवप्रपंचयति ॥ विहायेति ॥ कामान् ॥ विषयान् ॥ निस्पृहतया विहाय यश्चरति ॥ भक्षयति भक्ष

विहाय कामान्यःसर्वान्पुमांश्चरति निस्पृहः ॥ निर्ममो निरहंकारःस शांतिमधिगच्छति॥७१॥

यामीत्यहंकारममकारवर्जितश्च ॥ स हि पुमान् ॥ स एव च मुक्तिमधिगच्छतीत्यर्थः ॥ ७१ ॥

हि पुमान् अन्यःपशुरित्यर्थः ॥ कुत इत्यत आह ॥ सएवेति ॥ स पुमानित्यनेनैवान्वयसमाप्तिं वदता ज्ञानिन एवमुक्तिरित्येषोऽर्थोनात्र प्रतिपाद्यतइति दर्शितम् ॥ स्त्रीव्यावृत्त्यभावश्च ॥ ७१ ॥

॥ क्र० ॥ तदा व्याघात इति॥विषयत्यागतद्भक्षणयोर्विरुद्धत्वादिति भावः ॥ असंभवपरिहारायेति ॥ ज्ञानिनोऽपि देहादौममेदमिति बुद्धेरहमित्यात्मबुद्धेश्च सत्वादिति भावः ॥ स्त्रीव्यावृत्त्यभावश्चेति ॥ अपव्याख्याने पुमानित्यस्यानुवादत्वात्स्त्रीणां शांतिप्राप्तिर्न प्रतिपादिता स्यात् ॥ पुमानित्यस्य विधेयत्वे ॥ तु स्तुतिपरत्वेन स्त्रीव्यावर्तकत्वाभावात्तासामपि शांतिः प्रतिपादिता स्यादेति भावः ॥ ७१ ॥

॥श्री०॥ ननु लक्षणप्रश्नपरिहारोपसंहारेविभाषणादिप्रश्नपरिहारस्यानुपसंहृतत्वाद्न्यूनतेत्यत आह ॥ **किंप्रभाषेतेति** ॥**अर्थादिति**॥ अन्यपरादपि तल्लाभ इत्युक्तप्रकारेणेत्यर्थः ॥ साक्षात् कंठत उक्त एवार्थो ह्युपसंहार्य इति भावः ॥ **अप्रकृतत्वादिति** ॥ इदमशब्दस्याव्यवहितपूर्वप्रकृतपरामर्शकत्वात् पूर्वं च संन्यासो न प्रकृत इति भावः॥ **तद्देहेति** ॥ यस्मिन्देहे ज्ञानमुत्पन्नं तद्देहेत्यर्थः ॥ **अन्यथेति** ॥ जन्मांतराणि प्राप्येत्यर्थः ॥ इदमुच्यते ॥ स्थित्वाऽस्यामित्येतदुच्यते ॥ यस्मिन्देहे ज्ञानमुत्पन्नं तद्देहत्यागसमय एव यदि ब्राह्मयां स्थितौ स्थितो भवति सम्यक् ब्रह्मज्ञानवान् भवतीतियावत् ॥ तर्हि तद्देहपातानंतरमेव ब्रह्म प्राप्नोतीत्यर्थः ॥

ज्ञानी स्तूयते एषेत्यनेनेत्यसत्॥प्रथमवाक्ये तददर्शनादिति भावेनाह॥उपसंहरतीति॥प्रकरणं समापयतीत्यर्थः॥ब्रह्मधर्म भूतेति प्रतीतिनिरासायाह ॥ब्राह्मीति॥स्थितिर्नोक्ता कथमेवमुच्यत इत्यत आह॥लक्षणमिति॥ब्रह्मविषयज्ञानवतो लक्षणमुक्तमित्यर्थः॥किं प्रभाषेतेत्यादिप्रश्नपरिहारस्या

उपसंहरति ॥ एषेति ॥ ब्राह्मी स्थितिः ॥ ब्रह्मविषयास्थितिः ॥ लक्षणम् ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वाऽस्यामंतकालेऽपि ब्रह्म निर्वाणमृच्छति॥७२॥हरिः ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां सांख्ययोगो नाम द्वितीयोऽध्यायः॥ २ ॥

अंतकाले ऽप्यस्यां स्थित्वैव ब्रह्मगच्छति ॥ अन्यथा जन्मांतरं प्राप्नोति ॥

र्थादुक्तत्वादनुपसंहारः॥अंतकाले चरमे वयस्यपि यः परिव्रज्यास्यां स्थितौ तिष्ठति सोऽपि ब्रह्माप्नोतीति किमु ब्रह्मचर्यादेव प्रव्रज्येतिव्याख्यानमसत् ॥ अप्रकृतत्वादित्याशयवान्व्याचष्टे॥अंतकालेऽपीति॥ ज्ञानिनो ब्रह्मप्राप्तिरुक्तासा किंतद्देहपातानंतरमेवोतान्यथेत्यपेक्षायामिदमुच्यते॥

॥ कृ० ॥ अध्यायार्थोपसंहारप्रतीतिनिरासायाह॥ प्रकरणमिति अर्थादिति॥अन्यपरवाक्येन तल्लाभादिति भावः ॥

॥ श्रीं० ॥ ज्ञानिन इति॥ ज्ञानरूपपुष्कलकारणवत इत्यर्थः॥मोक्षं विनेति शेषः ॥सामग्र्याः ॥ ज्ञानरूपायाः॥क्षीणमिति ॥ तथा च ज्ञानप्रतिबंधकं कर्मैव नास्तीति भावः ॥ भोगेनेति ॥ इतरे अप्रारब्धादिनेर ॥ आरब्धपुण्यपापे भोगेन क्षपयित्वा ब्रह्म संपद्यते ॥ अथेति नियमसूचकइति तत्रार्थः ॥तथा च न ज्ञानात सर्वकर्मक्षय इत्याशयः ॥ ननु विशेषणं विशेष्येणबहुलमितिसूत्रेण सप्त च तानि जन्मानि चेति कर्मधारयसमासे सप्तजन्मास्विति भवेदित्यत आह॥सप्तजन्मनीति ॥ तथा च सप्तानां जन्मनां समाहार इति द्विगुसमासे द्विगुरेकवचनमिति एकवचने च सति सप्तजन्मनीति साधुरित्यर्थः ॥ ननु केषां चिच्छरीरद्वयेनापि भोगेन कर्मक्षयसंभवात् कथं बहुशरीरेष्वयुक्तमित्यत आह ॥ बह्वित्वति ॥

कुतोऽस्यार्थस्य भगवदभिप्रेतत्वमित्यत आह ॥ यं यमिति ॥ ननु ज्ञानमेव ॥ मोक्षसाधनम् ॥ कारणपौष्कल्ये च कार्यं भवत्येव अतःकथं ज्ञानिनः शरीरांतरप्राप्तिरित्यत आह ॥ ज्ञानिनामिति ॥ प्रारब्धकर्म सामग्र्याः प्रतिबंधकं तदेवांतकाले ब्रह्मानुसंधानं प्रतिबध्नातीति भावः ॥

यं यंवापीतिवक्ष्यमाणत्वात् ॥ ज्ञानिनामपि सति प्रारब्धकर्मणि शरीरांतरं युक्तम् भोगेनत्वितरइतिह्युक्तम् ॥ संति हि बहुशरीरफलानि कर्माणि कानिचित् ॥ सप्तजन्मनि विप्रस्यादित्यादेः ॥ दृष्टश्चज्ञानिनामपि बहुशरीरप्राप्तेः ॥

ननु ज्ञानादेव सर्वं कर्म क्षीणमित्यत आह ॥ भोगेनेति अस्तु प्रारब्धकर्मणो भोगेनैव क्षयः ॥ स च ज्ञानं यच्छरीरे जातं तत्रैवाभूत्॥ अतः कथंशरीरांतरारंभ इत्यत आह ॥ संति हीति ॥ तानि कथमेकेनैव शरीरेण भुज्येरन्निति शेषः ॥ सप्तजन्मनीति द्विगुः ॥ इतश्चैवमित्याह ॥ दृष्टश्चेति ॥ बह्वित्यनेकोपलक्षणम् ॥

॥ कृ० ॥ विशेषणसमासे बहुवचनप्रसंगादाह ॥ द्विगुरिति ॥ तथा च द्विगुरेकवचनमित्येकवचनं युक्तम् ॥ न च ऋन्नेभ्यइतिङीप्प्राप्तिः अदंतत्वाभावेन ॥ स्त्रीत्वाभावात् अकारांतोत्तरपदोद्विगुः स्त्रियामिष्ट इत्युक्तेरिति भावः ॥ ज्ञानिनामपि बहुशरीरप्राप्तिर्दृष्टेति प्रतिज्ञायोदाहृते महादेवपदे जन्मान्निति वाक्ये ज्ञानिनो जन्मद्वयोक्तेस्तदनुसारेणाह ॥ अनेकोपलक्षणमिति ॥

१ अ० ४ पा० १ अ०८सू०७ओं भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यते ओं॥तदुपमर्दं चेत्युक्त विशेषसूचकः २ ब्रह्मवातमोवाप्राप्नोतित्यर्थ इति रा०श्रीपादाः ३प्रयोग इति शेषः॥

॥ श्री० ॥ भाष्यस्थे प्रमाणे ऊर्ध्वं उन्नत उत्तमः रुद्रपदयोग्यः ॥ उग्रतपाः ॥ शुश्रावोग्रतपा नाम योग्यो रुद्रपदस्य य इति वचनात् ॥ पंचाशद्ब्रह्मकल्पानंतरं रौद्रपदं प्राप्य ॥ पंचाशद्ब्रह्मणस्तथा ॥ रुद्रस्येति वचनात् ॥ लुप्तशक्तिकामीति ॥ भर्जितबीजवज्ज्ञानिभाव ॥ यद्यु च नेत्यस्मात् ॥ पूर्ववाक्यम ॥ अथ यदु चैवास्मिंश्छव्यं कर्म कुर्वंतीति तद्व्याचष्टे ॥ अवसितेति ॥ शव्यांशवसंबंधि ॥ कर्मसंस्कारादिरूपं प्राप्नोति ॥ ज्ञानमाहिम्नेत्यर्थः ॥नैनां प्राप्येति ॥ ब्रह्मज्ञानरूपां स्थितिं प्राप्य कर्मवशात् प्राप्तगर्भवासादिदुःखैर्न निगृह्णाति ॥ तदीयज्ञानं लुप्तशक्तिकं सन्मोक्षजननं समर्थं न भवतीत्येतन्नेत्यर्थः ॥ विपाकानि ॥ फलकानि ज्ञानोत्पत्तिजन्मन्येवेति शेष ॥ ॥ रु० ॥ यावन्न

कथं ज्ञानिनां बहुशरीरप्राप्तिर्दृश्यत इत्यत आह ॥ तथाहीति ॥ ननु ज्ञानिनोऽपि यदि शरीरांतरप्राप्ति स्तर्हि गर्भवासादिभिर्दुःखैर्लुप्तशक्तिकं ज्ञानं न मोक्षाय पर्याप्तं स्यादित्यत आह॥निश्चितेति॥तस्यज्ञानिनस्तावदेव चिरं तावानेव विलंबो यावन्नविमोक्ष्ये विमोक्ष्यते प्रारब्धकर्मणा अवसितेकर्मणि ब्रह्म संपत्स्यत इत्यर्थः ॥ अवसितकर्माणि ज्ञानिनि विषये यदि पुत्रादयः शव्यं कर्म कुर्वंति यदु च न यदि वा न कुर्वंति ॥

तथा ह्युक्तम् ॥ स्थितप्रज्ञोऽपियस्तूर्ध्वःप्राप्यरुद्रपदंगतः ॥ सांकर्षणंततोमुक्तिमगाद्विष्णुप्रसादतइति गारुडे ॥ महादेवपरेजन्मंस्तव मुक्तिर्निरूप्यते इति नारदीये ॥ निश्चितफलं च ज्ञानम् तस्य तावदेव चिरम् ॥ यदुचनार्चिषमेवाभिसंभवतीत्यादिश्रुतिभ्यः ॥

सर्वथाऽर्चिषमभिसंभवतिप्राप्नोत्येवेत्यर्थः ॥तदिदमुक्तं नैनां प्राप्यविमुह्यतीति ॥ पाशुपतवैशेषिकादयस्त्वाहुः ॥ अनियतकालविपाकान्यपि कर्माणि ज्ञानी योगसामर्थ्यात्समाहृत्यानेकशरीरफलान्यपि कायव्यूहनिर्माणेन क्षपयित्वा प्रवृज्यते

विमोक्ष्येऽथ संपत्स्यत इति श्रुतिशेषं व्याचष्टे ॥ यावदित्यादिना ॥ सूत्रे कर्मणि लृट्प्रत्यये विमोक्ष्यत इति रूपं भवति ॥तत्र लोपस्त आत्मनेपदेष्वित्यनेनात्मनेपदेषु यस्तकारः तस्य छंदसि लोपेविमोक्ष्य इति श्रुतौप्रयुक्तमिति भावेन तदनूद्य प्रतिपद माह॥ न विमोक्ष्ये न विमोक्ष्यत इति॥अथ यदु चैवास्मिंश्छव्यं कुर्वंति यदु च नार्चिषमित्यादिश्रुतिं व्याचष्टे ॥ अवसितकर्मणीत्यादिना॥ननु भावादिकस्य भवतेरकर्मकत्वात्कथमर्चिषामितिकर्मोक्तिरित्यत आह ॥ प्राप्नोतीति ॥ तथा चानुभवतीत्यादिवत्सकर्मकत्वं ॥ सत्तार्थस्यैवाकर्मकत्वादितिभावः॥

१ तत इत्यस्यार्थोऽयम् २ छांदोग्ये पृष्ठप्रपाठके पंचदशखंडे ३ प्राप्येति पूरणीयम् ४ समस्तपदैकदेशमनूद्य बहुव्रीहिंसूचयितुं फलकानीति कप्रत्ययांतनिर्देशः ॥

॥ श्रीं० ॥ मा [illegible] ॥ [illegible]
ननु कथं बहुवचन [illegible] ॥ [illegible]
नेति व्युत्पत्त्या शास्त्रम् ; [illegible]

तत्कुतोऽस्य देहांतरमिति तत्राह ॥ न चेति ॥ ज्ञानिनः कर्मक्षयार्थमिति शेषः ॥ तथा हि ॥ अपारब्धकर्मक्षयार्थं वा [illegible] प्रारब्ध कर्मक्षयार्थं वा ॥नाद्यः ॥ तेषां ज्ञानेनैव क्षीणत्वात् ॥ इति भावेनाह ॥ तद्यथेति ॥ द्वितीये [illegible] ज्ञानी [illegible] करोति सर्वो वा ॥ आद्य

न च कायव्यूहापेक्षा ॥ तद्यथेषीकातूलम् ॥ तद्यथा पुष्करपलाशे ॥ ज्ञानाग्निः सर्वकर्माणि इत्यादिवचनेभ्यः ॥ प्रारब्धे त्वविरोधः ॥ प्रमाणाभावाच्च ॥ न च तच्छास्त्रं प्रमाणम् ॥

संप्रतिपत्तिमुत्तरमाह ॥ प्रारब्धे त्विति ॥ द्वितीयासंभवे हेतुमाह ॥ प्रमाणेति ॥ चशब्दात्प्रागुदाहृतप्रमाणविरोधाश्च ॥ पाशुपतादिशास्त्रेषु तथोक्तत्वात्कथं प्रमाणाभाव इत्यत आह ॥ न चेति ॥ तच्छिष्या अपि तच्छब्देनोच्यंत इति बहुवचनम् ॥

॥कु०॥ न च प्राप्त्यर्थस्य यौगादिकत्वाणिजात्मनेपदयोः प्रसंगः [illegible] स्मरणादिति वाच्यम् ॥ [illegible] प्राप्त्यर्थ [illegible] व्याभृपाद्धेति णिचो विकल्पितत्वेन णिचमनियोगेन आत्मनेपदमित्यक देशिभिः [illegible] उदाहृतप्रमाणेति ॥ [illegible] तत्वक्षपादकणादानामिति बहुवचनमयुक्तम् ॥ [illegible] ॥ न च [illegible] एकस्मिन्बहुवचनमन्यतरस्यामित्युक्तेर्जातौ बहुवचनमेवादिति वाच्यम् ॥ अक्षपादत्वकणादत्वयोरेकव्यक्तिकत्वेनाजातित्वादित्यत आह ॥ तच्छिष्या अपीति ॥

१ प्रत्येकंसंबंधः ॥ एकाव्यक्ति रविकरणं यस्येति ॥ तस्य भावस्तेन यथा ॥

॥श्री०॥ननूमापतिरित्यत्र पाशुपतशास्त्रस्यैवस्तुतिर्दृश्यते न तु शिवभक्तानां अतः कथमुच्यते शिवभक्तानांस्तुतिपरत्वमितितत्राह ॥**लक्षणयेति**॥पाशुपतशास्त्रस्य निंदितत्वेन मुख्यार्थासंभवा त ॥ ये पाशुपतशास्त्रस्वीकर्तारः शिवभक्ताः स्तत्स्तुतिपरत्वमेव लक्षणया वक्तव्यमित्यर्थः ॥ ननुमापतिरिति श्लोके कस्य पदस्य लक्षणयास्तुतिपरत्वं लक्षणायाः पदधर्मत्वेन वाक्ये तदभावादिति चेदुच्यते ॥ अत्र श्लोके उक्तवानित्यनंतरं अतस्तच्छास्त्रं समीचीनमिति तद्ग्रंथ एवोत्तरत्र वाक्यं भविष्यति तदभावेऽध्याहारोऽपि वा कर्तव्यः ॥ तथा च प्रधानभूतस्य समीचीनमिति पदस्योक्तार्थलक्षकत्वमिति द्रष्टव्यम ॥ वाक्य एव लक्षणासंगीकृत्येदमित्यन्ये ॥ नन्वेतदप्ययुक्तम अक्षपादकणादानामिति शिवभक्तानां निंदितत्वात्कथं तत्स्तुतिरंगीक्रियते इत्यत उक्तम् ।**वैष्णवशास्त्रोक्तप्रकारेण शिवभक्तानामिति**॥ विष्णुलक्ष्मीब्रह्मवाग्वसरस्वतीभारत्यपेक्षया नैच्यं ज्ञात्वा विष्णुभक्तत्वादिना रूपेण च शिवं ज्ञात्वा ये तत्र भक्तिं कुर्वंति तेषां स्तुतिः क्रियत इत्यर्थः ॥तथा च पूर्वं शिवभक्तानां निंदितत्वेन तद्विरोधिशिवभक्तस्तुतिरेवोचिता न तु पाशुपतशास्त्रस्य असंगतेरिति भावः ॥ ननु कुतः पाशुपतशास्त्रोक्तार्थस्य सत्यत्वाभाव इत्यत आह ॥ **उक्तनिंदाते** ॥ यदि तदुक्तार्थस्य सत्यत्वं तर्हि तन्मतावलंबिनां निंदा न स्यादित्यर्थः ॥ **शैवपुराणानि** ॥ व्यामकृतानीत्यर्थः ॥

उमापतिः पशुपतिःश्रीकंठो ब्रह्मणः सुतः ॥ उक्तवानिदमव्यग्रं ज्ञानं पाशुपतं शिव इत्यादौ तत्स्तुतिरपि दृश्यते इत्यत आह ॥ यत्रेति वैष्णवशास्त्रोक्तप्रकारेण शिवभक्तानां लक्षणयेति शेषः ॥ सत्यत्वं ॥ तदुक्तार्थस्येति शेषः उक्तनिंदाविरोधादिति भावः ॥ तर्हि शैवपुराणानि

अक्षपादकणादानां सांख्ययोगजटाभृताम्॥ मतमालंब्ययेवेदं दूषयंत्यल्पचेतस इति निंदावचनात्॥य त्र तु स्तुतिस्तत्रशिवभक्तानां स्तुतिपरत्वमेव न सत्यत्वम् ॥ न हि तेषामपीतरग्रंथविरुद्धार्थेप्रामाण्यम्

कायव्यूहानिर्माणनियमादौ प्रमाणानीत्यत आह ॥ न हीति ॥

॥कु०॥ननु शिवभक्तानांस्तुतिपरत्वमित्यनेनोमापतिरितिवाक्यस्य शिवभक्तकर्तृकस्तुति परत्वमुक्तम ॥ तदयुक्तम ॥ पाषंडे शिवभक्ते ॥शिवस्यब्रह्मसुतत्वानंगीकारादित्याशंक्य शिवभक्ताना मित्यतः प्रागध्याहार्यं दर्शयति ॥ **वैष्णवेति**॥उमापतिरित्यस्य वैष्णववैशंपायनवाक्यत्वादिति भावः ॥ ननु स्तुतिपरत्वमित्यनेन प्राशस्त्ये तात्पर्यमित्युक्तम तत्र तत्र शक्त्यभावाद्युक्तमि त्यत आह ॥ **लक्षणयेति** शेष इति ॥ अस्यस्तुतिपरत्वमेवेति ॥ वाक्यांत्यशेषत्वादवध्यप्रदर्शनम् ॥ **नियमादाविति** ॥ आदिपदेन कर्मक्षपणादि संग्रहः ॥

॥ श्री० ॥ उदाहृतेति ॥ स्थितप्रज्ञोऽपीत्याद्युदाहृतमित्यर्थः ॥ तत्र ज्ञानिनः क्रमादनेकजन्मप्राप्त्युक्त्या कामरूपहानियमप्रतिपादकशैवपुराणस्य तद्विरोध इत्याशयः ॥स्वार्थेणिजिति ॥ तथा च कुर्वित्यर्थः ॥ प्रसिद्धमिति ॥ तथा चात्मानं मा च प्रतीत्यर्थो द्रष्टव्यः ॥ सर्वथेति ॥ लिंगमूलान्वेषणादीनि ॥ व्यधिकरणानि ॥ सम्भुगम्याविष्णु निष्ठानि सर्वोत्तमत्वादीनि यद्रुद्रे प्रदर्श्यंते तानि व्यधिकरणानीत्यर्थः ॥ तेषु॥शास्त्रेषु॥ दर्शयस्व ॥ प्रतिपाद्यतयेति शेषः ॥ प्रसिद्धमिति ॥ तथाचात्मानं प्रति प्रकाशंप्रसिद्धं कुरु मां च प्रति अप्रकाशं अप्रसिद्धं कुर्वेति योज्यम् ॥ ॥ ॥ ॥ ॥ ॥ ॥

तेषामितिबुद्धिस्थशैवपुराणपरामर्शःइतरग्रंथाउदाहृतगारुडादयः ॥ शैवपुराणानां गारुडादिवैष्णवग्रंथानां च को विशेषो येन बाध्यबाधकभावइत्याशंक्य दुर्जनव्यामोहार्थं प्रणीतपाशुपतादिशास्त्राणां व्यामोहनार्थत्वे तावत्प्रमाणमाह॥तथाहीति ॥ कारयेति स्वार्थे णिच्॥अतथ्यानि

तथाह्युक्तम् ॥ एषमोहं सृजाम्याशु यो जनान्मोहयिष्यति॥त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ अतथ्यानि वितथ्यानि दर्शयस्वमहाभुज ॥ प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु इति वाराहे ॥

सर्वथाप्यविद्यमानानि वितथ्यानि व्यधिकरणानि च तेषु दर्शयस्व प्रकाशंप्रसिद्धम् ॥

॥ कृ० ॥ ननु प्रकाशंकुरु चात्मानमित्याद्यग्रिमवाक्यपर्यालोचनया रुद्रस्य मोहशास्त्रकर्तृत्वमत्रोच्यत इति प्रतीयते तत्कथं कारयेतिणिच्प्रयोग इत्यतआह ॥ स्वार्थेणिजिति॥ बहुलमेतन्निदर्शनमित्यनेनचगणीपाठितेभ्योऽपि स्वार्थे णिजुक्तिरिति भावः ॥ सर्वथाऽप्यविद्यमानानीति ॥ लिंगमूलान्वेषणादीनीत्यर्थः ॥ व्यधिकरणानीति ॥ पाञ्चाद्यन्यगतानि रुद्रस्यामर्दितसर्वविषभक्षणादीनीत्यर्थः ॥ प्रकाशोऽस्यास्तीति प्रकाश इत्यर्शआद्यजंतत्वमाश्रित्याह ॥ प्रसिद्धमिति ॥

॥ श्री० ॥ तन्मूलत्वम् ॥ पाशुपतशास्त्रमूलत्वम ॥ ननु पुराणशब्देनैव भागवतस्य गृहीतत्वात् ॥ किं विशिष्योच्यते भागवतमिति तत्राह॥भगवद्प्रियमिति ॥ ननु ज्ञानिनां तद्देहपा तानंतरं मुक्तिरुत जन्मांतरं प्राप्स्यति शंकायां अंतकालेऽस्यां स्थित्वैव ब्रह्म गच्छति अन्यथा जन्मांतरं प्राप्नोतीति प्रसंगस्यैतावत्प्रबंधेनोपपादितत्वात्तस्यैवोपसंहारे कार्ये ज्ञा निनां भवत्येवमुक्तिरित्यसंगतं किमुपसंह्रियत इत्यत उपसंहाराभिप्रायमाह ॥ ज्ञानिनामित्यादिना ॥ भीष्मादय इति ॥ इति मतिरुपकल्पितेत्यादिस्तोत्रकरणेन भीष्मादीनामंतकाले ब्राह्म्यां स्थितौ स्थितत्वं प्रसिद्धमिति भाव ॥ पूर्ववाक्यार्थं वदन्नेवोत्तरवाक्यमवतारयति ॥ साक्षादिति ॥ तत्क्षण इत्यस्यार्थोऽयम ॥ भाष्ये ॥ वर्तमानेति ॥ स्मरन्नित्यत्र वर्तमानार्थ कृत्प्रत्ययादेशस्य शानुवर्तमानार्थकत्वेन स्मरणस्य त्यजतीति वर्तमानार्थकलडंतशब्दोक्तत्यागस्य न समानकालीनत्वं लभ्यत इति भावः ॥ ॥ कृ० ॥ अनेकार्थत्वाद्धिवक्षित

इदानींतन्मूलत्वं शैवपुराणानां इतरेषां पंचरात्रादिमूलत्वमित्यत्र प्रमाणमाह॥कुत्सितानीति ॥तच्छास्त्रसमयेन॥तच्छास्त्रसिद्धांतमनुसृत्य वेदगिरिति वेदानामापात प्रतीतिमनुसृत्य॥ भागवतं भगवद्प्रियम् ॥ उक्तमुपसंहरति ॥ अत इति॥ ज्ञानिनां मुक्तिर्भवतीत्येव न तुतद्देहपातानंतरमिति

कुत्सितानि च मिश्राणि रुद्रो विष्णुप्रचोदितः॥चकारशास्त्राणि विभुर्ऋषयस्तत्प्रचोदिताः॥ दधीचाद्याः पुराणानि तच्छास्त्रसमयेनतु ॥ चक्रुर्वेदैश्च ब्राह्माणि वैष्णवाविष्णुवेदतः॥ पंचरात्रंभारतं च मूलरामाय णं तथा॥तथा पुराणं भागवतं विष्णुर्वेद इतीरितः॥अतःशैवपुराणानि योज्यन्यन्याविरोधतइति नारदीये ॥ अतो ज्ञानिनां भवत्येव मुक्तिः ॥ भीष्मादीनां तु तत्क्षणयुक्त्यभावः ॥स्मरंस्त्यजतीति वर्तमानव्यपदेशाहि कृतः ॥

नियम इत्युपसंहारार्थः ॥ननु भीष्मादयो ज्ञानिनोंतकालेऽस्यां ब्राह्म्यां स्थितौ स्थिताश्च न मुक्ताश्च तत्कथमेतदुक्तमित्यत आह॥ भीष्मादी नामिति ॥ साक्षाद्देहत्यागक्षणे युक्त्या परमेश्वरे मनोयोगेन भाव्यमित्येतत्कुत इत्यत आह ॥ स्मरन्निति

समयशब्दार्थं वदन् शास्त्रसमयस्य पुराणं प्रति कारणत्वाद्यभावात्तृतीयानुपपत्तिरित्याशंकां परिहरति ॥ तच्छास्त्रसिद्धांतमिति ॥अनुसृत्येति ॥ प्रतिपाद्यतयाऽश्रित्येत्यर्थः ॥ तथा च शास्त्रसिद्धांतस्य प्रतिपाद्यतया पुराणहेतुत्वोद्धताविति तृतीयेति भावः ॥ वेदानां कारणत्वाद्यभावादाह ॥ वेदानामिति ॥ वेदार्थप्रतीति मूलत्वे प्रामाण्यप्रसंग इत्यत उक्तम् ॥ ॥ आपातेति ॥ तथा च वेदशब्दस्य तदर्थापातप्रतीति लक्षकत्वात्तस्याश्च ब्राह्मपुराणहेतुत्वात्तृतीयोपपत्तिरिति भावः ॥ ननु भागवतशब्देन प्रसिद्धभागवतग्रहणे पुराणमिति व्यर्थम् ॥ भागवतस्य पुराणत्वाव्यभिचारात ॥ पुराणं भागवतं चेति व्याख्याने भागवतमिति व्यर्थम पुराणत्वेनैव तल्लाभात्पुराण शब्देन स्कांदादेरपि प्राप्तौ तस्य विष्णुवेदत्वानुपपत्तिश्चेत्यत आ ह॥ भगवत्प्रियमिति॥ ननुज्ञानिनां तद्देहपातानंतरमेव मुक्तिनियमो नास्तीत्युपक्रांतंज्ञानिनां मुक्तिनियममात्रं तूपसंह्रियत इत्युपक्रमोपसंहारयोर्भिन्नार्थत्वप्रसंग इत्यत आह॥ज्ञानिनामिति॥

॥ श्री० ॥ तत्संभवेन॥तत्क्षणे युक्तिसंभवेन ॥ ननु भक्तिज्ञानाभ्यामिति वक्तव्यमित्यत आह ॥ द्वंद्वैकवद्भाव इति ॥ स नपुंसकामिति नपुंसकत्वं च द्रष्टव्यम् ॥ तथा च भक्तिश्च ज्ञानं च भक्तिज्ञानं तेनेत्यर्थः ॥ शाकपार्थिवादित्वन्मध्यमपदलोपीसमासो वेत्याह ॥ भक्तीति सर्वप्रमाणोति ॥ नह्यानंदोनिजस्तेषांपरेभ्यः कथं च न ॥ किमु विष्णोः परानंदो न तेविष्णाविति श्रुतेरित्यादिप्रमाणेत्यर्थ.॥भिन्नामिति ॥ नात्र ब्रह्मनिर्वाणमित्येकं पदं किं नाम ब्रह्मनिर्वाणमिति भिन्नं पदं कार्यं तत्र यद्भिन्नं निर्वाणमिति ॥ ब्रह्मविशेषणीभूतं पदं तद्व्याचष्ट इत्यर्थः ॥ कार्यब्रह्मेति.॥ ब्रह्म ऋच्छतीत्युक्ते चतुर्मुखस्यापि ॥ प्राप्त्या तद्व्यावृत्त्यर्थमशरीरत्वार्थकनिर्वाणत्वविशेषणमित्यर्थः ॥अहंमतद्बाणमवष्टभ्येत्यादिष्वत्रश्वस्थं मुख्यप्राणवाक्यम ॥ अनेन ॥ अशरीरत्वार्थकनिर्वाणपदेन ॥ तत्रतस्यैवेति समस्यंतात् षष्ठ्यंतात्स्वार्थे व्रीविधानात् प्रकृते च निर्वाणशब्दस्य ॥ व्याख्यानं इत्यादाविति समस्यताद्रूप्यंगीकारेऽसंगतं दृष्टांतदार्ष्टांतिकयो. समानविभक्तिकतायाअपेक्षितत्वादत.षष्ठ्यंतादित्यत वातिरित्याह ॥ इत्यादेरिवेति ॥ भगवन इति ॥ ऐश्वर्यादिमतः शब्दस्येत्यर्थः ब्रह्मणः शुद्धस्य ॥ तस्य ॥ शुद्धब्रह्मण ॥ तदुत्तमत्वेन ॥ ॥ क्रं० ॥ इतरेतरयोग द्वंद्वाश्रिकारे द्विवचनप्रसंग

ननु तत्क्षणे युक्त्यामुक्तिश्चेदज्ञानिनामपितत्संभवेन मुक्तिरित्यत आह ॥न चेति॥भक्तिज्ञानेति द्वंद्वैकवद्भावः ॥भक्तिसहितं ज्ञानं भक्तिज्ञानमिति वा ॥ ब्रह्मनिर्वाणं ब्रह्मस्वरूपानंदमिति व्याख्यानं सर्वप्रमाणविरुद्धमित्याशयवान्निर्वाणमिति भिन्नं पदंव्याचष्टे ॥ निर्वाणमिति ॥ कथमेतदित्यत आह॥ काय इति ॥ कार्यब्रह्मव्यावृत्त्यर्थमेतत ॥ अनेन ब्रह्मणोनिराकारत्वं प्राप्तं तत्प्रतिषेधार्थमाह ॥ निर्वाणेति प्रतिपादनं

तच्चोक्तम् ॥ ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणेयदा ॥ विष्णुमायातदातेषां मनोबाह्यंकरोति हीति गारुडे ॥ न चान्येषांतदास्मृतिर्भवति ॥ बहुजन्मविपाकेन भक्तिज्ञानेन ये हरिम् ॥भजंति तत्स्मृतिर्वं तेदेवायातिनचान्यथेति ब्रह्मवैवर्ते ॥ निर्वाणमशरीरम् ॥ कायो वाणंशरीरंचेत्यभिधानात् ॥ एतद्बाणमवष्टभ्येति प्रयोगाच्च ॥ निर्वाणशब्दप्रतिपादनमनिंद्रियाइत्यादिवत् ॥ कथमन्यथासर्वेपुराणादिप्रसिद्धाऽकृतिर्भगवत उपपद्यते॥

व्याख्यानं इत्यादिवत् इत्यादेरिव प्राकृतादिविग्रहराहित्यार्थत्वेनेत्यर्थः ॥ किमनेन व्याख्यानेन निराकारमेव ब्रह्माकिं न भवेदित्यत आह॥ कथमिति ॥ भगवतो विष्णोः साकारत्वेऽपिब्रह्मणो निराकारत्वमेव न च भगवानेव ब्रह्म ॥ तस्य तदुत्तमत्वेन

इत्यत आह ॥ द्वंद्वैकवद्भाव इति ॥ समाहारद्वंद्व इत्यर्थः ॥ समाहारस्यैकत्वादेकवचनमिति भावः ॥ ननु ब्रह्म गच्छतीत्यनेनैवालं किं निर्वाणपदेनेत्यत आह ॥ कार्यब्रह्मेति ॥

॥ श्री० ॥ तस्माद्भगवत उत्तमत्वेन॥ततः शबलाद्भगवतः॥तस्यैव॥भगवत एव॥परमं यो महद्ब्रह्मेत्यत्रापूर्व॥यद्वनया पुंडरीकाक्षं सर्वेश्वरेश्वरः महेति वक्ते साकारं पुंडरीकाक्षं भगवंतं म इतिपरामृश्य तस्य महद्ब्रह्मत्वोक्तिरित्यर्थः॥ननु योऽसावित्यत्र भगवतो ब्रह्मत्वस्य सर्वोत्तमत्वस्यवाऽप्रतिपादनादित्याशंकायां सर्वोत्तमत्वं प्रतिपादितमित्याशयेन व्याचष्टे॥इंद्रियग्राह्यमिति॥ नचैतावतापि नसर्वोत्तमत्वप्राप्तिर्धर्मादेरपि इंद्रियग्राह्यमतिक्रांतत्वादित्यत आह॥सर्वमेवेति॥धर्मादेः सर्वस्यापि योगींद्रियग्राह्यत्वेन तदतिक्रांतत्वाभावादनन्तर एवेदं सर्वोत्तमत्वप्रतिपादकमिति भावः॥इत्यतः॥अशरीरत्वमविग्रहत्वरूपधर्मादित्यर्थः ॥ नन्वीश्वरस्य ब्रह्मणो भेदे ब्रह्मतीत्यादौ ईश्वरे ब्रह्मशब्दप्रयोग इत्यत आह ॥ अभेदस्यापीति ॥

ततोऽन्यत्वात् ॥ अतो न पुराणादिविरोध इत्यत आह ॥न चेति ॥महद्ब्रह्मेत्येतानिवाक्यानि भगवतो ब्रह्मत्वप्रतिपादकानि॥परमादित्यादीनि तस्यैव सर्वोत्तमत्वेन तदुत्तमाभावप्रतिपादकानि ॥ इंद्रियग्राह्यमतिक्रांतस्तदुत्तमः ॥ सर्वमेव योगींद्रियग्राह्यम् ॥ उत्तमाधमभावेन ब्रह्मे

॥ न चान्यद्भगवत उत्तमं ब्रह्म ॥ ब्रह्मेति परमात्मेतिभगवानिति शब्द्यत इति भागवते॥ भगवंतं परं ब्रह्म ॥ परंब्रह्मजनार्दन ॥ परमं योमहद्ब्रह्म ॥यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः ॥ योसावतींद्रियग्राह्यः॥ नास्ति नारायणसमं न भूतं न भविष्यति॥नत्वत्समोस्त्यभ्यधिकःकुतोन्य इत्यादिभ्यः ॥ नचतस्यब्रह्मणोऽशरीरत्वादेतत्कल्प्यम् ॥ ॥ ॥

श्वरयोर्भेदो माभूत् ॥ ब्रह्माशरीरं ईश्वरस्तु सविग्रह इत्यतो भेदोऽस्तु अभेदस्यापि सत्वाद्ब्रह्मशब्दोपपत्तिरित्यत आह ॥ न चेति ॥

॥कं०॥चतुर्मुखेत्यर्थः अंतकालेऽप्यस्यां स्थितौ स्थित्वैव ब्रह्म ऋच्छतीत्येवोक्तौ चतुर्मुख प्राप्नोतीति प्रतीयते तस्यापि ब्रह्मपदवाच्यत्वात्॥न च तदुक्तम॥ यंयं वाऽपि स्मरन्भावंत्यजत्यंते कलेवरम ॥तं तमेवेतीति वाक्यविरोधात॥ अतश्चतुर्मुखव्यावृत्त्यर्थं निर्वाणमिति विशेषणमिति भावः ॥ न च नपुंसकलिंगब्रह्मशब्दवाच्यत्वाभावादेवचतुर्मुखव्यावृत्तिरिति वाच्यम ॥ कोश प्रसिध्द्या तदभावेपि श्रौतप्रसिध्द्या तत्सत्वात ॥ अत एव कार्यं बादरिरितिसूत्रे स एनान्ब्रह्मगमयतीति श्रुतिरुदाहृता ॥ नन्वतींद्रियश्चक्षुरादिभिर्ग्राह्य इति वा ॥ अतिशयितेंद्रियग्राह्य इति वा नार्थः ॥ भगवतोऽतींद्रियत्वेनेंद्रियग्राह्यत्वाभावात अतिशयित इंद्रियग्राह्योयस्येत्यपि न योगि साधारण्यादित्यत आह ॥ इंद्रियग्राह्यमिति ॥ अत्यादयः क्रांताद्यर्थे द्वितीययेति समास इति भावः ॥ नन्वेतद्द्वतींद्रियधर्मादिसाधारणमित्यत आह ॥ तदुत्तम इति ॥ तथापींद्रियग्राह्योत्तमत्वमेव प्राप्तं न प्रतिपिपादयिषित सर्वोत्तमत्वमित्यत आह ॥ सर्वमेवेति ॥ ननूभयोर्भेदे भगवंतं परं ब्रह्मेत्यादौ कथं भगवति ब्रह्मशब्दप्रयोग इत्यत आह ॥ अभेदस्यापीति ॥

॥ श्री० ॥ भाष्योदाहृतश्रुतिभागे ॥ ब्रह्मप्रतिपादनाप्रतीतेराह॥ दहरोऽस्मिन्नित्यादिना ॥ अंतःस्थितमन्वेष्टव्यं च ब्रह्मैवेति भावः ॥ नन्वानंदशब्दस्य नित्यपुल्लिंगत्वात् कथमानंदमित्युक्तमित्यतः श्रुत्यनुसारादित्याह ॥ विज्ञानमानंदमिति ॥ ननु भाष्ये सुवर्णरूपत्वमिति ॥कथमुक्तं सुवर्णज्योतिरिति श्रुतौ सुवर्णज्योतिःशब्दस्यैवोक्तेरित्यत आह॥ ज्योतिःशब्द इति॥भास्वररूपस्य भास्वरवर्णविशिष्टदेहस्येत्यर्थः ॥ वाचको यत इति शेषः ॥ तदभिप्रायेण ॥ तथा च सुवर्णज्योतिर्भास्वरवर्णविशिष्टदेह इति श्रुत्यर्थः ॥ अरूपस्येति वर्तत इति वक्तव्ये तद्व्याख्यानाय विग्रहस्येत्युक्तमिति द्रष्टव्यम् ननु ब्रह्मणो दहरस्थत्वात्कथं दहरत्वमित्युक्तमित्यत आह ॥ दहरस्थत्वमिति ॥ भाष्ये केचिदिति॥केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं ॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणयास्मरंतीत्यादौ द्वितीयस्कंधे स्वदेहांतर्हृदयावकाशस्थे [illegible] चतुर्भुजत्वाद्युक्त्या विग्रहवानुच्यत इत्यर्थः ॥ व्याहतं चेति ॥ सर्वोत्तमत्वाद्यर्थकोऽपि [illegible] तथा च भगवत्यर्थं कृष्णस्य तस्य सर्वोत्तमत्वानर्गीकारे व्याहतमित्यर्थः ॥

तस्यपराभिमतस्य ॥ एतद्भगवतोऽन्यत्वम् ॥ कुत इत्यत आह ॥तस्यापीति ॥ दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यमित्येतं वाक्यं इह विवक्षितम्॥इत्यादिषु ब्रह्मविद्यात्वेन संमतेष्विति शेषः॥कथमत्र श्रवणमित्यत आह ॥यदीति॥रूपं विग्रहः ॥ विज्ञानमानंदं ब्रह्मेत्यानंदशब्दस्य नपुंसकत्वदर्शनात्तथोपादानम् ॥ज्योतिः शब्दो भास्वररूपस्य वाचकः॥ अत उक्तं सुवर्णरूपत्वमिति ॥ दहरत्वं दहरस्थत्वम् ॥

तस्यापिशरीरश्रवणात् ॥ आनंदरूपममृतम्॥सुवर्णज्योतिः॥दहरोऽस्मिन्नंतर आकाशइत्यादिषु ॥ यदि रूपं नस्यात् ॥आनंदमित्येवब्रूयात् नत्वानंदरूपमिति॥कथंसुवर्णरूपत्वंस्यादरूपस्य ॥ कथंदहरत्वम् ॥ दहरस्थश्च केचित्स्वदेहत्यादौरूपवानुच्यते ॥ सहस्रशीर्षापुरुषः ॥ रुक्मवर्णंकर्तारं ॥ आदित्यवर्णं तमसः परस्तात् सर्वतः पाणिपादंतत् ॥ विश्वतश्चक्षुरुतविश्वतोमुखइत्यादिवचनात् ॥विश्वरूपाध्यायादेश्च रूपवानवसीयते ॥ अतिपरिपूर्णतमज्ञानैश्वर्यवीर्यानंदयशश्रीशक्त्यादिमांश्चभगवान् ॥ अविग्रहस्येति वर्तते ॥ दहरस्थत्वंकथं अविग्रहस्यानुपपन्नमित्यत आह ॥दहरस्थश्चेति॥एवमुपपत्तिसापेक्षाणि वाक्यान्युदाहृत्य स्पष्टान्युदाहरति॥सहस्रशीर्षेति॥ ॥अवसीयते परमात्मा ॥ प्राग्भगवतोऽन्यस्योत्तमत्वं वाक्यविरुद्धमित्युक्तम् ॥ इदानीं व्याहतं च तदिति भावेनाह ॥ अतिपरिपूर्णतमेति ॥

॥कृ०॥भाष्योदाहृतभागमात्रस्य ब्रह्मशरीरप्रतिपादकत्वाभावाद्दहरादिश्रुतिवाक्येषु ईश्वर एव प्रतिपाद्य इति [illegible] एवमुदाहरति॥ अस्मिन् द्यात्वेनेति ॥ ननु पचसंतं इति पुंस्त्वविधानेनानंदशब्दस्य नित्यपुल्लिंगत्वात्कथमानंदमित्युक्तमित्यत आह ॥ विज्ञानमिति ॥ दहरस्थश्चेत्युत्तरवाक्यानुरोधादाह॥ दहरस्थत्वमिति॥

॥ श्री० ॥ ननु ज्ञानादिगुणानामतिशयितत्वमत्याद्येकैकेन प्रतिपादयितुंशक्यते अतिपरिपूर्णनमेति पदत्रयोपादानं तु किमर्थमित्यत आह ॥ अत्यादिशब्दैरिति ॥ सहस्रलक्षेति वक्ष्यमाणप्रमाणानुसारेणाह ॥ श्रीः कांतिरिति ॥ नन्वानंदं ब्रह्मण इत्यत्र आनंदमात्रस्य ब्रह्मणि सद्भावःप्रतीयते न तु तस्यानंदस्य निरतिशयत्वमत आह ॥ आनंदं ब्रह्मण इत्यत्रेति ॥ तथा च यतो वाच इति पूर्ववाक्ये आनंदस्य मनोवागगोचरत्वोक्त्या निरतिशयत्वं लभ्यत इतिभावः ॥ कृ० ॥ नन्वेकैकेनातिशयप्रतिपादनसंभवात्पदत्रयो

॥ अत्यादिशब्दैर्निरतिशयत्वं द्योत्यते ॥ ऐश्वर्यं वशित्वम् ॥ श्रीः कांतिः ॥ परमश्वरे भगवच्छद्वस्योपचारिकत्वपरिहारायैषां गुणानां सद्भावे

पराऽस्यशक्तिर्विविधैवश्रूयतेस्वाभाविकी ज्ञानबलक्रियाच ॥यःसर्वज्ञः॥ आनंदंब्रह्मणः॥ एतस्यैवआनंदस्य अन्यानि भूतानि मात्रामुपजीवंति ॥ अनादिमध्यांतमनंतवीर्यसहस्रलक्षामितकांतिकांतम् ॥ मध्यनंतगुणेऽनंते गुणतोऽनंतविग्रहे

प्रमाणान्याह ॥ परेति ॥ आनंदं ब्रह्मण इत्यत्र यतो वाच इति पूर्ववाक्यमभिप्रेतम् ॥

त्पादानं व्यर्थमित्यत आह ॥ अत्यादिशब्दैरिति ॥ अतिपरितमशब्दैरित्यर्थः ॥ उपसर्गाणां द्योतकत्वमंगीकृत्येदमुक्तम् ॥ स्वमतेवाचकत्वात् ॥ यथोक्तम् ॥ समितिसूपसर्गेण परमुख्यार्थतोच्यत इति ॥ नन्वैश्वर्यमष्टधा ॥ अणिमा महिमागरिमा लघिमा प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चेति ॥ तत्र न तावदणिमादिचतुष्टयमैश्वर्यपदेन विवक्षितं तस्य संयोगादिवत्सामान्यगुणस्य ज्ञानादिवदात्मविशेषगुणत्वाभावेन तत्समकक्षतया ग्रहणायोगात् ॥ नापि प्राप्तिः ॥ अन्येंद्रियैर्दर्शनादिरूपायास्तस्या ज्ञानग्रहणेनैव लाभात् ॥ नापि प्राकाम्यम् ॥ यथेष्टानंदसंप्राप्तिरूपस्यवासर्वेवदोदितज्ञानरूपस्यवा तस्य निरतिशयानंदज्ञानोक्त्यैव लाभात् ॥ नापीशत्वम् ॥ शक्त्युद्रेकरूपस्यतस्य निरतिशयशक्तिग्रहणेनैवोक्तत्वादित्यत आह ॥ ॥ ऐश्वर्यं वशित्वमिति ॥ स्वातंत्र्यमित्यर्थः ॥ प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टभूतय इत्यादिप्रसिद्ध्यानुगुण्याय स्वातंत्र्यमित्यनुक्त्वा वशित्वमित्युक्तम् तस्य च स्वातंत्र्यशक्तिविज्ञानसुखाद्यैरितिप्रमाणांतरे ज्ञानादिसमकक्षतया गृहीतत्वान्न काचित्क्षतिरिति बोध्यम् ॥ यद्यपि गुणेष्वसंगो वशितावशित्व चाप्यलोलतेत्येकादशस्कंध तात्पर्ययोर्विषयासक्त्यभावो वशित्वमित्युक्तम् ॥ तथाऽपि तस्य दोषाभावत्वाज्ज्ञानादिगुणसमकक्षतया ग्रहणं कृतमिति विवेक्तव्यम् ॥ ननु गुणप्रकरणे लक्ष्मीग्रहणमसंगतम् ॥ अग्रिमप्रमाणाननुगुण्यं चेत्यत आह ॥ ॥ श्रीःकांतिरिति ॥ भाष्योदाहृतभागमात्रेण निरतिशयत्वासिद्धेराह ॥ पूर्ववाक्यमिति ॥

१ द्योत्यतइतीति २ अ० १९ श्लो० ५ । ३ अत्रत्यंतात्पर्यं ४ श्रुत्यंशेनैवेत्यर्थः ॥

॥श्री०॥ ननु सहस्रलक्षामितचंद्रकांतिवत्कांतत्वं मनोहरत्वं एकमेवाधिकारिणं प्रति कथमयोग्यत्वादित्यत आह ॥ द्रष्टिति ॥ तथा च केषांचित्सहस्रचंद्रकांतिकांतः अन्येषां लक्षचंद्र कांतिकांतो परेषाममितचंद्रकांतिकांत इति द्रष्टव्यम् ॥ कांचित् अमितशब्दार्थे सहस्रत्वादेरंतर्भावात् सहस्रलक्षेति किमर्थमुक्तमित्यत आह ॥ द्रष्टृपुरुषेत्याहुः ॥ अनंतगुणे गुणतोऽनंत इति पुनरुक्तिरित्यत आह ॥ संख्येति ॥ अनंतगुण इत्यत्रानंतशब्देन गुणानामंतः संख्या नास्तीत्युच्यते ॥ गुणतोऽनंत इत्यत्र तु गुणानामंतःपरिमाणं परिमितिः सीमा नास्तीत्युच्यते एकैकोऽपि गुणः प्रत्येकं प्रत्येकमपरिच्छिन्न इत्यर्थः ॥ यथोक्तं षष्ठस्कंधगतेनतश्लोकतात्पर्ये प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते ॥ तदानंत्यं द्विगुणतस्ते चानंता हि संख्ययेति ॥ प्रागुक्त मिति ॥ पराऽस्य शक्तिरित्यनेनेत्यर्थः ॥ तदस्पष्टमिति ॥ परशब्दस्यानेकार्थत्वेनानंतत्वालाभादिति भावः ॥ विजानतीति ॥

अमितशब्दात्परश्चंद्रशब्दोऽध्याहार्यः ॥ द्रष्टृपुरुषभेदात्त्रिविधोक्तिः ॥ ऐश्वर्याद्यनंतगुणत्वे मयीति प्रमाणम् ॥ संख्यापरिमाणाभ्यां गुणानामा

॥ विज्ञानशक्तिरहमासमनंतशक्तेः ॥

नंत्यमनेनोच्यते ॥ शक्तेःपरत्वं प्रागुक्तं तदस्पष्टमित्यतो ॥ विज्ञानेति ॥ ॥कृ०॥अधिदैवे ज्वलत्कर्मा वन्हिः सूर्यस्तु तापकः ॥ सोमः कांती दृष्टिकर्मा वासव इति बृहदारण्ये कांतेः सोमव्यापारत्वस्योक्तत्वात्कांति शब्दस्याप्यध्याहार ॥ चंद्रशब्द इति ॥ अनेन सूर्यादिशब्दः ॥ कुतो नाध्याहृत इत्यपास्तम्॥एतेन स्मेरयामिनीनाथसहस्रामित कांतिमत् ॥ चन्द्रौघकांतिम ॥ स्वनंतचंद्राधिककांतिकांतम ॥ श्यामं गंधर्वमिनदीधितिकांतियुक्तमित्याद्याचार्यप्रयोगेषु कांतिचंद्रशब्दयोः सहप्रयोगो दीधितिपदवैयर्थ्याभावश्च समर्थितो ध्येयः ननु सहस्रलक्षेति व्यर्थम ॥ अमितत्येनैनतल्लाभादित्यत आह ॥ द्रष्टिति ॥ ऐश्वर्यादीति ॥ यद्यपि प्रमाणानुसारादनंतगुणत्व इत्येव वक्तव्यम् ॥ तथापि ज्ञानादौ विशिष्यप्रमाणोदाहरणवदैश्वर्ये तदभावादेवमुक्तम् ॥ नन्वनंतगुणगुणतोऽनंत इति पुनरुक्तमित्याशंक्य प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते ॥ तदानंत्यं तु गुणतस्ते चानंता हि संख्यया ॥ अतोऽनंतगुणो विष्णुर्गुणतोऽनंत एव चेति षष्ठस्कंधतात्पर्ये हृदिकृत्वा तयोरर्थभेदमाह ॥ संख्येति ॥ तदस्पष्टमिति ॥ परशब्दस्यानेकार्थत्वादिति भावः

१ अ० ३ सप्तान्नब्राह्मणं ६ श्रुति २२ अथाधिदैवतं ज्वलिष्याभीत्यादिव्याख्याने ॥ कांतौ शक्तिमानिति शेषः ॥

॥ श्री० ॥ तृतीयस्कंधे ब्रह्मवाक्यमिदम् ॥ अपरोक्षरूपत्वेति ॥ यः सर्वज्ञ इत्यत्र सर्वविषयकज्ञानमात्रलाभेन तस्यापरोक्षत्वालाभादिति भावः ॥ नात्मानमिति ॥ तथा च सर्वज्ञत्वं नै युक्तमिति भावः ॥ कर्तृकर्मेति ॥ कर्तृत्वकर्मत्वयोर्भेदव्याप्तत्वेन तयोरेकत्र समावेशो विरुद्ध इत्यर्थः ॥ आत्मानमितीति ॥ तथा च कर्तृकर्मणोर्भेद औत्सर्गिकः ॥ आपवाद प्रमाणे सत्यभेदोऽपि भवति प्रकृते च श्रुत्याऽभेदएवोच्यत इति न विरोध इति भाव ॥ यथोक्तम ॥ कर्मकर्त्रोरुत्सर्गतो भिदा ॥ अभेदोऽपि विशेषे स्यादिति ॥ अत्र विशेषोऽपवादक प्रमाणम् नन्वन्यतमोमुकुंदादित्यंशस्य भगवतो गुणवत्त्वाप्रतिपादकत्वात्किमर्थं तदुदाहरणमित्यत आह ॥ ईश्वर इति ॥ तच्छब्दार्थेति ॥ तच्छब्दमुख्यार्थेत्यर्थः ॥ तथा चैकत्र मुख्यार्थस्यैव शब्दस्यान्यत्रौपचारिकत्वदर्शनेन ॥ मुकुंदादन्यस्य भगवच्छब्दमुख्यार्थत्वाभावान्नमुकुंदे भगवच्छब्दस्यौपचारिकत्वं संभवतीति भावः ॥ नन्वन्यतमनिषेधेऽन्यसद्भावप्रासिस्त्वर्थेत्वन्यतम इत्यादाविव सप्तम्यंतपदस्यैवापेक्षितत्वेन मुकुंदादितिपंचम्यंतावश्युक्त्ययोगादतस्तमपः स्वार्थिकत्वमभिप्रेत्याह ॥ अन्य एवेति ॥ तत्राचान्यत्वस्यावधिसापेक्षत्वात मुकुंदादिति युक्तमिति भावः ॥ अयमेवेति ॥ अतिपरिपूर्णतमैत्यादिनोक्तएवेत्यर्थः ॥

ज्ञानस्यापरोक्षरूपताप्रतिपादनाय॥तुर्यमिति॥ईश्वरो नात्मानं वेत्ति कर्तृकर्मभावविरोधादित्येतन्निरासाय॥आत्मानमिति॥ईश्वरेभगवच्छब्दस्यौ

तुर्यंतत्सर्वदृक्सदा ॥ आत्मानमन्यंचसवेदविद्वान् ॥ अन्यतमो मुकुंदात्को नामलोके भगवत्पदार्थः ॥

पचारिकत्वासंभवं दर्शयितुं तदन्यस्य तच्छब्दार्थतानिरासायान्यतम इति॥अन्य एवान्यतमः भगवच्छब्दस्यायमर्थ इत्यत्रैश्वर्येति प्रमाणम्॥

॥क०॥ज्ञानस्येति॥सर्वज्ञपदेन सर्वविषयज्ञानमात्रलाभादिति भावः॥आत्मानमिति तावर्योदाहरणमैश्वर्यशंकां निरस्यति॥ईश्वरो नात्मानमिति॥नन्वन्य तमोमुकुंदादित्यनेनैश्वर्यगुणवत्त्वाप्रतिपादनाद्व्यर्थमुदाहरणमित्यत आह ॥ ईश्वरे भगवच्छब्दस्येति ॥ एकत्र मुख्यस्यैवान्यत्रौपचारिकत्वादिति भावः॥ नन्वन्यतमशब्दोऽव्युत्पन्नः स्वभावादेव बहुविषये निर्धारणे वर्तत इति कैयटादयः ततश्चान्यतम इति वाक्येन कथमीश्वरान्यस्य भगवच्छब्दार्थस्य निरासः कथं च मुकुंदादिति पंचमी ॥ तद्विधायकाभावादित्यत आह ॥ अन्यएवेति ॥ नायमन्यतमशब्दोऽव्युत्पन्नः ॥ किं तु स्वार्थिकतमप्प्रत्ययांतः ॥ सचान्यत्वार्थः ॥ तथाचेश्वरादन्यस्य भगवच्छब्दार्थत्वाभाव सिद्धिः ॥ अन्यारादितिसूत्रेणान्यत्वार्थकशब्दयोगे पंचमीविधानात्तदुपपत्तिश्चेति भावः ॥ न च तमपः स्वार्थिकत्वमप्रामाणिकं ज्ञापकसिद्धत्वात ॥ तथा हि शतृशानचप्रकरणे तौ सदितिवत् ॥ तरतमप्प्रकरण एवतादी घइति कर्तव्ये प्रकरणांतरे तरप्तमपौ घ इति संज्ञाकरणमन्योऽपि तरबस्तीति ज्ञापनाय स चा निर्दिष्टार्थत्वात्स्वार्थे भवतीत्युक्तं शब्दकौस्तुभादौ ॥ तेन सप्तानन्यायस्वात्तमबपि ॥ स्वार्थिकोस्तीति सिद्धमिति दिक् ॥

॥श्री०॥ननु पूर्वं शक्त्यादिमांश्च भगवानित्यैश्वर्याद्यनंतगुणवत्वं भगवच्छब्दार्थं इत्यभिप्रेतं तत्र कथं ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रिय ज्ञानवैराग्ययोश्चैव षण्णाम्भग इतीरणा वाक्यं प्रमाणीक्रियते अत्र गुणषट्कस्यैवाभिधानादित्यत आह ॥ अत्रषण्णामितीति ॥ पक्षांतरमाह ॥ षाड्गुण्य इति॥अत्र ष्यञ् स्वार्थे॥तथा च सुन्दरैव सौम्यमितिवत् ... व षाड्गुण्यं तत्र सर्वगुणानामंतर्भावात् षड्गुणानां भगशब्दार्थत्वे सर्वगुणानामपि तदर्थत्वं प्राप्तमेवेत्याशयः ॥ यथोक्तं यादवगिरिमाहात्म्ये॥विश्वान्यपि ... यथा हि ... षाड्गुण्यादस्मा॥श्रित्य वर्तंते गुणकोटय इति ॥ तत्प्रकारश्च ब्रह्मणैव वेद्य इति हृदयम् ॥ ननु भगवच्छब्दस्यायमेवार्थ इत्यत्र कथमिदं मानं प्रमाणं भगशब्दार्थस्यैवोक्तेरित्यत आह ... द्वानिति ॥ अन्यतम. ऐश्वर्यस्येति प्रमाणद्वयफलितार्थमाह ॥ भगवत्वादिति ॥ समग्रार्थ इति ॥ अतिपरिपूर्णतमेति प्रतिज्ञातं समग्रार्थ इत्यर्थः॥अन्येन स्मर्तुमित्याद्यन्वयः ... समुच्चयमाह ॥ बुद्धिस्थीकर्तुमिति ॥ अनुभवेन विषयीकर्तुमित्यर्थः ॥ शक्त इति ॥ अतस्त्वं परः सर्वोत्तम इत्यर्थ. भाष्ये ॥ सौभग मिति ॥ यस्मिन् सति ... भगं द्वात्रिंशल्लक्षणमेकामिति ऋग्भाष्यटीकायां क्वचिद्व्यासो भगत्यत्र प्रतिपादितमनुसंधेयम ॥ मतुपेति अतीतवाक्ये भगवानिति मतुपेत्यर्थः ॥ षण्णामिति बहुत्वसंख्याया ... भूत्वादिति भावः ॥ यथोक्तम ॥ बहुत्वेनाविनाभावाद्विन्नानियमाद्वेदिति ॥ आकृतिर्भगवत इत्युक्त्येति ॥कथमन्यथा सर्वगुणादिप्रसिद्धाकृतिर्भगवत उपपद्यत इति ... ॥

अत्रषण्णामित्युपलक्षणम् ॥ षाड्गुण्ये सर्वगुणांतर्भावोवा ॥ तद्वान् भगवानिति सिद्धमेव ॥ भगवत्वात्स एवसर्वोत्तम इति ॥समग्रार्थो त्वेति अतीवेति ॥ यदन्येनकरिष्यामीति स्मर्तुं बुद्धिस्थीकर्तुं वा युक्तं तत्वं कर्तुंशक्तः ॥ मतुपा ज्ञानादीनां भगवताभेदः प्रतीतः षण्णामित्यादिना

ऐश्वर्यस्य समग्रस्य ॥ अतीव परिपूर्णते सुखं ज्ञानंचसौभगम् ॥ यच्चात्ययुक्तं स्मर्तुंवाशक्तः कर्तुमतः
परइत्यादिभ्यः ॥ तानि सर्वान्यन्योन्यानन्यरूपाणि॥विज्ञानमानंदंब्रह्म ॥ आनंदो ब्रह्मेति व्यजानात्
॥ सत्यं ज्ञानमनंतं ब्रह्म ॥यस्य ज्ञानमयं तपः ॥ समा भग प्रविश स्वाहा ॥

परस्परं च तथाऽकृतिर्भगवत इत्युक्त्या कृतस्तन्निरासार्थमाह ॥ तानीति ॥ तत्र प्रमाणान्याह ॥ विज्ञानमिति ॥

॥ कृ० ॥ नन्वैश्वर्यस्येति वाक्यं कथमुक्तार्थे प्रमाणम ॥ आनंदादीनामनुक्तेरित्यत आह ॥ अत्रेति ॥ सर्वगुणांतर्भावोवेति ॥ तथाहि ऐश्वर्यमणिमादिभेदेनाष्टविधम् ॥ तत्र यथेष्टानंदसंप्राप्ति रूपप्राकाम्ये आनंदोऽतर्भवति ॥ शक्त्युद्रेकेशिवे च शक्तिः ॥ एवमन्यस्याप्यंतर्भावोऽस्य इत्यर्थ. ॥ ननु भगशब्दार्थ एवानेनोक्तो न तु भगवच्छब्दार्थ इत्यत आह ॥ ॥ तद्वानिति॥ननु भगवतोऽन्यस्योत्तमत्वं प्रमाणविरुद्धं व्याहतं चेत्युपपाद्योपसंहर्तव्यं न च तद्वाप्यस्तीत्यत आह॥भगवत्वादिति॥समग्रार्थ इति॥ अतिपरिपूर्णतमेत्याद्युक्तार्थं इत्यर्थ ॥

॥श्री०॥आकृतेर्देहाद्भगवतो भेदः प्रतीत इति वर्तते ॥कायक्लेशादिरूपतपःप्रतीतिवारणायाह॥आलोचनक्रियेति॥धर्माणामिति॥तथा चात्र क्रियाया ज्ञानरूपत्वोक्त्या धर्माणां परस्परम भेद इत्यवधेयम॥समाभगेत्यत्र ऐश्वर्यादिवाचिभगशब्देनैव विशेषणाद्गुणानां भगवताऽभेद उक्त इति ज्ञेयम॥ननु प्रकृतिशब्दात्तद्धितेऽणप्रत्ययेऽ ञ्प्रत्ययेवा णकारस्य ञकारस्य वा लोपे भसंज्ञकस्य तकारस्य इकारस्य यस्येतिचेति लोपे अचोञ्णितीति ॥ णित्वात् ञित्वाद्वा अकारस्य आकाररूपवृद्धौ सत्यां प्राकृत इतिजाते ॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप इत्यादिसूत्रेण ञित्वाद्वा णित्वाद्वा ङीपि ईकारमात्रं विहाय सर्वस्यापि लोपे प्राकृतई प्राकृतीति स्यात् प्राकृतेति तु कथमित्यत आह ॥ प्राकृतेति ङीवभाव इति ॥ तथा च टिड्ढाणित्यादिसूत्रप्राप्तङीपोऽभा वश्छांदस इत्यर्थः ॥ समाधानांतरमाह ॥ अणञ्भ्यामिति ॥

न तस्य प्राकृता मूर्ति मांसमेदोस्थिसंभवा ॥ नयोगित्वादीश्वरत्वात्सत्यरूपाच्युतो विभुः ॥

पत आलोचनक्रिया ॥ ज्ञानमयं॥ ज्ञानात्मकमिति॥ धर्माणां परस्परमभेदोक्तिः ॥ प्राकृतेति ङीवभावश्छदसःअणञ्भ्यामन्यो वा प्रत्ययः ॥

॥कृ०॥ननु तपः कृच्छ्रादिकर्मचैन्यमगेर्क्कः॥कृच्छ्रचांद्रायणादिकं तपः तस्यकथं ज्ञानात्मकत्वमित्यत आह॥आलोचनक्रियेति॥ननु यस्य ज्ञानमयंतप इति वाक्यं स तपस्तप्त्वेत्येतद्व्याख्यान रूपंतथैव कर्मनिर्णयटीकायामुक्तत्वात् तथा चालोचनस्येश्वरीयतया सदातनत्वात्तत्त्वेति श्रुतौ तपसः कदाचित्कत्वोक्त्ययोग इत्यत उक्तम॥ क्रियेति॥तथा च क्रियात्वात्सर्जनादिवद्व्यक्त्य व्यक्तियुक्तत्वेनव्यक्तय पेक्षया कदाचित्कत्वोक्तिरुपपन्नेति भावः ॥ ननु तस्य विकार इत्यणंतोऽयं प्राकृतशब्दः ॥तस्माट्टिड्ढाणिति ङीपि प्राकृतीति स्यात॥ आवंतत्वं कथमित्यत आह ॥ ङीवभाव इति भाषायां नित्योऽप्ययं ङीपछंदसि विकल्प्यते सर्वे विधयछंदसि विकल्प्यंत इत्युक्तेरिति भावः ॥ अणञ्भ्यामिति ॥

---

१ अयँतत्वादण्णंतत्वाद्धेत्यर्थः

॥ श्री० ॥ यदि प्रकृतिशब्दादणप्रत्ययोऽप्रत्ययो वाम्यात्तदोक्तसूत्रेण ङीपः प्राप्त्या प्राकृतीति भवेत् न चैवं किं नामाणप्रत्ययाप्रत्ययाभ्यामन्य एव कश्चित्प्रत्यय आनीयते स च णप्रत्ययः ॥ तथा च प्रकृतिशब्दात् ण प्रत्यये णकारलोपे नाकारमात्रे इत्वेति सति भसंज्ञकेकारलोपे णित्वादादिवृद्धौ प्राकृत॥आप्राकृतेतिप्रातिपदिकेसति पश्चात् स्त्रीत्वे विवक्षिते स्वाद्युत्पत्तौ प्राकृतेति रूपमित्यर्थः ॥ तथा चास्मिन्पक्षेऽणञ्भ्यामन्यस्यैव णप्रत्ययस्यांगीकारान्नोक्तसूत्रेण ङीपःप्राप्तिरित्यवधेयम ॥यद्वा अणञ्भ्यामन्यः प्रत्यय अकप्रत्यय आनेयः ॥ तथा च प्रकृतिशब्दादकप्रत्यये ककारलोपे ॥ किमिति ॥ अत्र तद्धितवचनामांदृगित्यनवर्तते ॥ तथा च कितिप्रत्यये परे अचामध्ये आदेरचो वृद्धिः स्यादिति सूत्रार्थस्तथा चाकप्रत्ययस्य कित्वात् कितिचेति वृद्धौ भसंज्ञके ककारलोपे प्राकृत अ प्राकृतेति प्रातिपदिके स्त्रीत्वे विवक्षिते सति स्वाद्युत्पत्तौ प्राकृतेतिभवति ॥ न चात्र कितिचेति कथं वृद्धि कृति तिच किति ङिति च प्रत्यये वृद्धिर्न स्यादिति निषेधादिति चेन्नत्यम । कितिचेति सूत्रस्याचां मध्ये आद्यचो वृद्धिन्यतिरिक्तवृद्धिनिषेधकत्वेनादिवृद्ध्यनिषेधकत्वात ॥ प्रकृते च कितिचेति आदिवृद्धेरुक्तत्वेन दोषाभावादिति ॥ अत एवाचामादेरिति विशिष्योक्तमिति ज्ञेयम नप्तः योगित्वा दित्यत्रेश्वरत्वादित्यत्रापि संबंधभ्रमं वारयति ॥ किंत्विति ॥

सदेहः सुखगंधश्च ज्ञानभाः सत्पराक्रमः ॥ ज्ञानज्ञानः सुख सुखः स विष्णुःपरमोऽक्षर इति पैंगिखिले ॥ देहोऽयं मेमदानंदो नायं प्रकृतिनिर्मितः ॥ परिपूर्णश्च सर्वत्र तेन नारायणोऽस्म्यहम् ॥

मांसमेदोस्थिभिः संभवो यस्याः सा तथोक्ता ॥ पुनश्च न योगित्वात्किं त्वीश्वरत्वात ॥

॥ कृ० ॥ ॥ प्रकृतिशब्दाद्धितार्थेऽत्ययमाद्धि त

इति बहुवचनस्यानुक्त तद्धितसंग्रहार्थत्वादिति भावः ॥ यद्यपि प्रकृतिशब्दादत्र प्रसंग एव नास्ति ॥ तस्य निःस्वरणाद्युदात्तनयाऽनुदात्तादिश्चेति लक्षणाभावात् ॥ तथापि पलाशादित्वेन रजतादित्वेन वा पलाशादिभ्यो वा प्राणिरजतादिभ्योऽञिति सूत्रयोः कथंचित्तत्प्राप्तिरिति मंदाशंकानिवृत्तयेऽग्रहण ॥ पलाशादौ रजतादौ चानुदात्तादि भिन्नत्वोऽस्येति काशिकोक्तेः ॥ यद्यपि च प्रकृतिशब्दादपि सति नाण ॥ अतोऽणपवादत्वात ॥ तथा चोभयग्रहणमनुपपन्नम ॥ तथाऽप्यन्यत्तरनिवारणस्य नायमनमरः ॥ ममतनात्तु विकारार्थे द्वयोरपीति भवितव्याणञ्भ्यामित्युक्तम॥अस्मिन्पक्षे श्रुतहानिरश्रुतकल्पनं च यतोऽ नास्यासूचनाय वा शब्द.॥ ईश्वरत्वादित्यत्र नान्वयभ्रांतिनिरासायाह॥किंत्वीश्वरत्वादिति ॥

१ टापीति शेषः

॥श्री०॥योगित्वान्नभवतिचेत्तर्ह्यन्यत्राविद्यमानोयं महिमा तस्यैव कुत इत्याशयेन किं त्विति प्रश्नः॥उत्तरमाह ॥ ईश्वरत्वादिति॥अघटितघटकसामर्थ्योपेतत्वान्न तस्यैत्थादिमहिमा युज्यत इति भावः ॥ अतएवेति ॥ प्राकृतमूर्तिरहितत्वादेव ॥ ईश्वरत्वादेवेति वेत्यर्थः ॥ सत्यरूपादच्युत इति विग्रहमभिप्रेत्याह ॥ निर्दोषेति ॥निर्दोषपूर्णानंदत्वाद्यमाहुः सत्यमच्युतमिति वचनात् गुणशब्द आनंदपरो द्रष्टव्यः ॥ तथा च विभोर्भगवतो निर्दोषगुणात्मकविग्रहादच्युतत्वे ईश्वरत्वादिकं हेतुरिति भावः॥ इत्यादेरिति ॥ सुखसुख इत्यस्यापि अतिशयितसुख इत्यर्थो ज्ञातव्यः ॥ सुखगंधः सुखकरगंधः ज्ञानभाः न तु तैजसभा इति सुखगंधज्ञानभाशब्दयोरर्थोऽवगंतव्यः ॥ निर्दोषत्वादिनेति॥ नायं प्रकृतिनिर्मित इत्यनेन निर्दोषत्वलाभः ॥ आदिपदेन परिपूर्ण इत्युक्तगुणपूर्णत्वस्य सग्रहः ॥ एवंभावे ॥ देहोऽयं मे सदानंदइत्युक्तरीत्यासदानंदात्मकत्वे ॥ तदेवेतीति॥

अत एव विभुः निर्दोषगुणात्मक विग्रहादच्युतः ॥ ज्ञानज्ञान इत्यादेरतिशयितज्ञानादिरित्यर्थः ॥ तेन निर्दोषत्वादिना ॥ भगवद्रूपस्यैवंभावे

इत्यादि ब्रह्मवैवर्ते ॥ तदेव लीलया चासौ परिच्छिन्नादिरूपेण दर्शयति मायया ॥

कथं परिच्छिन्नत्वगर्भवासादिसंसारि धर्मांश्च तद्दर्शयंत इत्यत आह ॥तदेवेति ॥किमर्थमित्यत उक्तम् ॥ लीलयेति ॥ माययामोहकशक्त्या॥

॥ कृ० ॥ अतएवेति ॥ ईश्वरत्वादेवेत्यर्थः ॥ तत्त्वबाध्यस्वरूपत्वं ॥ सत्यरूपत्वं तथा न विवक्षितं यद्विग्रहस्य गुणात्मकत्वम् ॥ तल्लाभः ॥ तथासत्यरूपेत्यत्र बहुव्रीहौ तद्रूपलाभाद्विवक्षितविग्रहाभेदाप्राप्तिरित्यत आह ॥ निर्दोषेति ॥ ज्ञानज्ञान इत्यादेरिति ॥ कृत्यल्युटो बहुलमित्युक्तेः कर्तरि ल्युडंतत्वेन वा अर्शआद्यजंतत्वेन वा ज्ञानशब्दो ज्ञातृरः ॥ ततो ज्ञानेषु ज्ञान इति निर्धारणे सप्तम्याः सप्तमीति योगविभागात्समासः ॥ तेनातिशयितज्ञानइत्यर्थः पर्यवस्यति ॥ एवं सुखसुख इत्यत्रापीति भावः ॥ न चाधिक्षेपस्य इति द्वित्वंतद्धार्तिकस्यैवाभावादिति मनोरमोक्तेरिति बोध्यम् ॥ सदानंददेहवत्त्वस्य नारायणपदेनालाभान्न तत्परामर्शः किं त्वविशिष्टस्यैवेति भावेनाह ॥ निर्दोषत्वादित्यादिनेति ॥ आदिपदेन गुणपूर्णत्वग्रहः ॥ नायं प्रकृतिनिर्मितः परिपूर्णश्चेति विशेषणाभ्यां तदुक्तेरिति भावः ॥ आरा दोषास्तद्रयनो नेत्याद्यर्थं व्युत्पत्तिः ॥ आराः दोषाः तद्विरुद्धा नाराः गुणा इति द्वितीयेऽर्थे इति विवेकः ॥ तथा सदर्शने कारणमुक्तं भाष्ये ॥ माययेति ॥ तदेंद्रजालिकाद्यर्थत्वप्रतीतिनिरासाय व्याचष्टे ॥ व्यामोहकशक्त्येति ॥

॥श्री०॥सदानंदात्मकंशरीरमेवेत्यर्थः ॥भाष्योदाहृते प्रमाणे राघवादित्यस्य रघुकुलोत्पन्नादशरथादित्यर्थः॥अमोघदर्शन इतिपदच्छेदपक्षेऽपि भगवद्रूपे गर्भवासादि [illegible]
याकारप्रश्लेषं विनैव व्याचष्टे॥ मोघमिति॥यस्मिन विषये भगवद्रतिविषये दर्शनं गर्भवासादिविषयकं लोकानां ज्ञानं ॥मोघं व्यर्थं भ्रमरूपमित्यर्थः ॥ [illegible]
वत् ॥ आत्मशब्दोदितपरमात्मवत्वस्य सर्वसाधारण्यादाह ॥ भागवतानामिति ॥ नन्वात्मशब्देनैव स्वामित्वस्योक्तत्वादधीश्वर इति पुनरुक्त मित्यत आह ॥ निरुपाधिकेत्यादि [illegible]
त इत्यत्र ॥ मुनिर्विश्रवाः ॥ कामं प्रयाहि नहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीमिति वचनादिति भावः ॥ ॥ कृ० ॥ ॥ [illegible]

अत्र प्रमाणमाह ॥ न चेति ॥ देव्यादेवक्याः एवं गर्भवासादि प्रदर्शनेन ॥ मोघंदर्शनं यस्मिन्विषयेसतथा ॥आत्मवतांभागवतानाम् [illegible]

न च गर्भे वसद्देव्यानचापि वसुदेवतः ॥ न चापि राघवाज्जातो न चापि जमदग्नितः ॥ नित्यानंदोऽव्य योप्येवं क्रीडते मोघ दर्शन इति च पाद्मे॥न वै स आत्माऽऽत्मवतामधीश्वरो भुङ्क्ते हि दुःखं भगवान्वासुदेवः ॥ स्वर्गादेरीशिताऽजःपरम सुखनिधिर्बोधरूपोऽथ बोधंलोकानां दर्शयन्यो मुनिसुतहृतात्मप्रियार्थे जगाम ॥ स ब्रह्मवंद्यचरणो जनमोहनाय स्त्रीसंगिनामिति रतिं प्रथयंश्चचार ॥ पूर्तराचिंत्यवीर्यो यो यश्चदाशरथिःस्वयं ॥ रुद्रवाक्यमृतं कर्तुमजितो जितवत्स्थितः ॥योऽजितो विजितो भक्त्या गांगेयं न जघानह ॥ न चांबां ग्राहयामास करुणःकोऽपरस्ततइत्यादिभ्यश्चस्कांदे ॥

निरुपाधिक प्रिय इति यावत् ॥

ह्या ॥ तस्याः पूर्वमदितित्वेन देवत्वात् ॥ देवक्यां देवरूपिण्यामित्युक्तेश्च वसुदेवशब्दसाहचर्याच्च ॥ न तु कौसल्या मनुष्यत्वात् ॥ नापि जमदग्निभार्या ऋषित्वादिति भावेनाह ॥
॥ देवक्या इति ॥ नन्वामोघदर्शन इति व्याख्यानमनुपयुक्तं विवक्षितस्य गर्भवासादिदर्शनभ्रांतित्वस्यालाभात् ॥ मोघदर्शन इति योजनायामपिषष्ठ्यर्थबहुव्रीहिरनुपपन्नः ईश्वर
कर्तृकदर्शनस्य मोघत्वप्राप्तेः ॥ गर्भवासादिदर्शनस्य भ्रांतित्वालाभाच्चेत्यत आह ॥ मोघमिति ॥ दर्शनमिति ॥ गर्भवासादिविषयमित्यर्थः ॥ नन्वात्मवतामधीश्वर इति संबंधो न
युज्यते भगवतः सर्वोत्तमत्वेनात्मवतामिति विशेषणवैयर्थ्यात् ॥ आत्मवतामात्मेत्यन्वयेऽपि देहभृतां स्वामीति यद्यर्थस्तदापूर्वोक्त एव दोष इत्यत आह ॥ आत्मवतां भागवताना ॥१२१॥
मात्मा निरुपाधिकप्रिय इति ॥

॥ श्री० ॥ ननु पुरातुलो नाम महासुरोऽभगवद्गत्म तु ब्रह्मण आप लोकताम् ॥ पुनश्च तं प्राह जगद्गुरुर्यदा हरिर्जितः स्याद्धि तदैव वध्यस इति महाभारततात्पर्यनिर्णये अतुलं प्रति ब्रह्मणो वरदानस्योक्तत्वात् ब्रह्मवाक्यमृतं कर्तुमिति वक्तव्यं रुद्रवाक्य मृतं कर्तुमिति कथमुक्तमित्यतआह ॥ ब्रह्मवाक्यवदिति ॥ यः परशुरामः ॥ पूर्तैः पूर्णत्वादचित्यवीर्यः यश्चदाशरथिः सः स्वयं परशुराम एवेत्यर्थः ॥ तथा च दाशरथिनाऽभिन्नोऽपि परशुरामः अजितोऽपिदाशरथिना जितवत्स्थितः किमर्थमित्यतो रुद्रवाक्यमृतं कर्तुमित्युक्तमिति योज्यम् ॥ अजितोऽपि यः परशुरामः ॥ गांगेयेन ॥ भक्त्या तदीयभक्त्या तदीयां भक्तिमपेक्ष्य ॥ तस्य यशोऽर्थं विजित एव जितो न तु तंजयानित्यर्थः ॥ अर्शआदिभ्योऽजिति ॥ तथा च करुणशब्दात् अर्शआदित्वात् मत्वर्थीयाच्प्रत्यये चकारलोपे भसंज्ञकस्य णकारस्थस्याकारस्यलोपे करुणेति भवतीत्यर्थः ॥

मुनिसुतोरावणः ब्रह्मवाक्यवत् रुद्रवाक्यमप्यतुलं प्रत्यस्तीत्यतो रुद्रवाक्यमित्युक्तम् ॥ करुणः करुणावान् अर्श आदित्वादच् ॥ तदेवेत्यायुक्तमुपसंहरति ॥ न तत्रेति ॥ अत इत्युपस्कर्तव्यम् ॥ यद्येवं तर्हि विश्वरूपं परं तदपेक्षयाकृष्णादिरूपाण्यप(व)राणीति कथं ग्रंथेषू

नतत्र संसार धर्मा निरूप्याःयत्र च परावरभेदोऽवगम्यते॥तत्राज्ञबुद्धिमपेक्ष्यावरत्वं विश्वरूपमपेक्ष्य अन्यत्र

च्यत इत्यत आह ॥ यत्र चेति ॥ यत्र ग्रंथे ॥ तत्र विश्वरूपमपेक्ष्यान्यत्र कृष्णादावपरत्वमज्ञबुद्धिमपेक्ष्योक्तं ज्ञातव्यमित्यर्थः ॥

॥ कृ० ॥ आत्मवच्छब्दांतर्गतात्मशब्दस्य भगवद्वाचित्वात्तेन भार्गवतानामिति लभ्यते द्वितीयात्मशब्दस्य स्वात्मवाचिनो गौण्या वृत्त्या निरुपाधिकप्रियार्थत्वम् ॥ स्वात्मनो निरुपाधिकप्रियत्वादिति भावः ॥ मुनिसुतमात्रस्य रामभार्यापहर्तृत्वाभावादाह ॥ रावण इति ॥ ननु पुनश्च तं प्राह जगद्गुरुर्यदा हरिर्जितः स्याद्धि तदैववध्यसे इति ॥ भारततात्पर्यनिर्णयाविरोधः॥ तत्रातुलं प्रति ब्रह्मवाक्यमस्तीत्युक्तत्वादित्यत आह ॥ ब्रह्मवाक्यस्यवदिति ॥ अतुलं प्रति द्वे ब्रह्मवाक्ये ॥ एवं लोकप्रवेशविषयम् ॥ अपरं च हरिर्यदा जितः स्यात्तदैव वध्यम इति ॥ तत्र यद्यपि द्वितीयं ब्रह्मवाक्यमादाय तद्ग्रंथ विरोधः प्रतीयते ॥ तथापि द्वितीयब्रह्मवाक्यवत्ताद्दशरुद्रवाक्यमप्यतुलस्यास्ति ॥ एतत्प्रमाणबलादित्यविरोध इति भावः ॥ ननु तथापि रुद्रवाक्यमृतं कर्तुमित्ययुक्तम् ॥ अयोग्येषु तु रुद्रादिवाक्यं तौ कुरुतो मृषेत्यनेन विरोधादिति चेन्न ॥ तस्य केवलं रुद्रवाक्यं मृषा कुरुत इत्येवपरत्वात् ॥ प्रकृतं च ब्रह्मवाक्यसहितमिति विरोधाभावात् ॥ ननु करुणो रसवृक्षयोरिति कोशप्रसिद्धार्थग्रहणेऽसंगतिरित्यत आह ॥करुणावानिति ॥अर्शआद्यजिति भावः ॥

१ आत्मवतामित्यत्र भागवतानामीत्यत्र च प्रत्ययार्थसंबंधः स्वस्वामीभावो विवक्षित इति पर्यायत्वं युक्तमिति भावः ॥

॥श्री०॥परमुत्तमम्॥अपराण्यवराणि ॥रूपशब्दो धर्मपर इत्याह ॥ धर्मैरिति ॥तसेः सार्वविभक्तिकत्वात्तृतीयांतादियं तामित्याशयेन धर्मैरित्युक्तमिति द्रष्टव्यम् ॥कर्तुमिति ॥अभक्तानां विमोहनं कर्तुं परावरं वदंतीत्यन्वयः ॥ अयं परिपूर्णानीतिप्रमाणोक्तार्थः माध्यस्थादिशब्दार्थमाह ॥ स्तुतिर्वेति॥सर्वरूपाणां परिपूर्णत्वेनाभेदाभिप्राये सर्वधर्मैःसमत्वोक्तिरयुक्ता विश्वरूपे महत्परिमाणदर्शनात्तदन्यत्र रामकृष्णादावल्पपरिमाणदर्शनात् ॥ अभेदे चैकस्मिन्नेव विरुद्धानेकपरिमाणस्य लोकेऽदर्शनेनश्वरेऽप्यसंभवादत सर्वधर्मैः समत्वरूपोऽयमर्थ उपचारो वाऽस्तुतिर्वाऽस्त्वित्यर्थः ॥ पदार्थवैचित्र्याच्चेत्यस्य तात्पर्यमाह ॥ अन्यत्रेति ॥ अतिप्रसंगः ॥ महिष्यादावदर्शनेन गोरपि सास्नादिमत्वं न स्यादित्यतिप्रसंग इत्यर्थः ॥ तथा च लोके पदार्थानां वैचित्र्यदर्शनेन दृष्टांतेनान्यत्राविद्यमानमपि लोकाविलक्षणे हरौ नासंभावितमिति भावः ॥ मूले इत्युक्तमिति ॥ धर्मवैचित्र्यादर्थानामिति पूर्वमुक्तमित्यर्थः ॥ अत्रैवेति ॥ बाधका भावादुपचारितादि नकल्प्यमित्युक्तं इदानीमत्रैव प्रमाणमाहेत्यर्थः ॥

कुत एतदित्यत आह ॥ तच्चेति ॥ अखिलरूपतोऽखिल धर्मैः ॥ विमोहनं कर्तुम् ॥ नन्वयमुपचारो वास्तुतिर्वा किं न स्यादित्यत आह ॥ न चेति ॥ असंभवे ह्येषा कल्पना ॥ अचिंत्यशक्त्या चैकस्यैवानेकपरिमाणत्वादिकं संभवति ॥अन्यत्रादर्शनेनत्वपलापेऽतिप्रसंग इत्यर्थः॥

॥ तच्चोक्तम् ॥ परिपूर्णानि रूपाणि समान्यखिलरूपतः ॥ तथाऽप्यपेक्ष्यमंदानां दृष्टिं त्वामृषयोऽपि हि ॥ परावरं वदंत्येवह्यभक्तानां विमोहनमिति गारुडे ॥ न चात्र किं चिदुपचारादिति वाच्यम् अचिंत्यशक्तेः ॥ पदार्थ वैचित्र्याच्चेत्युक्तम् ॥ रामकृष्णादिरूपाणि परिपूर्णानि सर्वदा ॥ न चाणुमात्रंभिन्नानि तथाऽप्यस्मान्विमोहसीत्यादेश्च नारदीये ॥ ॥ ॥ ॥

अत्रैव प्रमाणमाह ॥ कृष्णेति ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ अखिलरूपत इत्यनेनाखिलावतारग्रहणं रूपाणीति व्यर्थमित्यत आह ॥ अखिलैर्धर्मैरिति ॥

॥ श्री० ॥ विमोहसीत्यत्र त्वं विमुह्यसीत्यन्यथाप्रतीतिवारणाय णिजंतोऽयमित्याशयेनाह ॥ विमोहयसीति ॥ गीतायां ऋच्छतीति कथं ऋगतावित्यस्य रूपमिति चेदुच्यते ॥ पा घ्रा ध्मा स्था ॥म्ना ॥ दाण् ॥ दृशि ॥ अर्ति ॥ सर्ति ॥ शद ॥सदां ॥ पिब ॥ जिघ्र ॥ धम ॥ तिष्ठ ॥ मन ॥ यच्छ ॥ पश्य ॥ ऋच्छ ॥ धौ ॥ शीय ॥ सीदा ॥ प्यादीनांक्रमात्पि बादय आदेशाः स्युरिति सूत्रार्थ ॥ उदाहरणानि ॥ पा पाने तस्यपिबादेशे पिबतीति भवति ॥ घ्रा गंधोपादाने ॥ तस्य जिघ्रादेशे जिघ्रति ॥ध्मा शब्दाग्निसंयोगे तस्य धमादेशे धमति ॥ ष्ठागतिनिवृत्तौ तस्य तिष्ठादेशे तिष्ठति ॥ म्ना अभ्यासे तस्य मनादेशे मनति ॥ दाण् दाने तस्य यच्छादेशे यच्छति ॥ दृशि प्रेक्षणे तस्य पश्यादेशे पश्यति ॥ अर्ति ॥ ऋ गतौ तस्यऋच्छादेशे ऋच्छति ॥ सृ गतौ तस्यधौ इत्यादेशे धावति ॥ षद् स्वप्ने तस्य शीयादेशे शीयति ॥षद्लृ विशरणगत्यवसादनेषु तस्य सीद इत्यादेशे सीदतीति॥ एवंचार्तेः ऋगता विति धातोः ऋच्छादेशे लटः परस्मैपदेति तिबादेशे पकारलोपे ऋच्छतीति भवति प्राप्नोतीत्यर्थ ॥भाष्ये ज्ञान्यृच्छतीत्यत्र ज्ञानि ऋच्छतीति स्थिते इकोयणचीति इकारस्य यणादेशे सति ज्ञान्यृच्छतीति संधिर्भवतीति द्रष्टव्यम ॥ ॥ इति यदुवरगीताभाष्यटीकासुगुप्तापमन्त्रीदत्तासिर्गीभिरानंदगिरी॥ सुलक्षिताविवृतिर्यात्र ष्णिगद्वान चीर्णा समगमदयमध्यायोऽतमस्या ॥ ॥ ७२ ॥ इति द्वितीयोऽध्यायः समाप्त. ॥ २ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥

विमोहासि ॥ विमोहयासि ॥ श्लोकार्थ मुपसंहरति ॥ तस्मादिति ॥ ७२॥ श्रीवेंकटेशो विजयते ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्य

॥ तस्मात्सर्वदा सर्वरूपेष्वपरिगणितानंतगुणगणंनित्यानिरस्ताशेषदोषं च नारायणाख्यं परं ब्रह्मा परोक्षज्ञान्यृच्छतीति च सिद्धम् ॥ ७२ ॥ इतिश्रीमदानंदतीर्थ भगवत्पादाचार्य विरचिते श्रीमद्गीताभाष्ये द्वितीयोऽध्यायः समाप्तः॥२॥ श्रीमद्भीमसेनांतर्गतश्रीकृष्णाय नमः ॥

विरचितस्यश्रीमद्भगवद्गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायांद्वितीयोऽध्यायः ॥ २ ॥ श्रीकृष्णार्पणमस्तु ॥

॥ कृ० ॥ ननु विमुह्यसीति युक्तम् ॥ मुह्धातोः श्यान्विकरणत्वात् ॥ तत्कथंविमोहयसीति ॥ व्यत्ययेनगणकार्यानित्यत्वेन वा ॥ इत्विकरणत्वेऽप्यस्मानिति कर्मोक्तिरनुपपन्ना ॥ अक र्मकत्वादित्याशंक्य ण्यर्थांतर्भावमभिप्रेत्य व्याचष्टे ॥ विमोहयसीति ॥ अध्यायार्थोपसंहारप्रतीतिं निरस्यति ॥ श्लोकार्थमिति ॥ ७२ ॥ इति श्रीमत्तिर्मलाचार्यसूरिसूनुविर चिते प्रमेयदीपिकाभावप्रकाशे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥ श्रीकृष्णार्पणमस्तु ॥

॥ इति श्रीमद्भगवद्गीतायां द्वितीयोऽध्यायः ॥

॥ समाप्तः ॥

॥ श्री० ॥ श्रीवेंकटेशाय नमः ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ चतुर्थाध्यायटीकायां क्रियते भावदीपिका ॥ १ ॥ अत्र पूर्वाध्यायसंगतिस्तात्पर्यानुसारेण द्रष्टव्याऽतः साऽत्र नोक्तेत्याशयेनाह ॥ उक्तयोगमिति ॥ इहास्मिन्नध्याये ॥ ननु विष्णोर्माहात्म्यमित्ययुक्तं कर्मयोगाभिमानमित्यत आह ॥ आद्यस्येति ॥ प्रकरणस्येत्यर्थः ॥ पूर्वेणेति ॥ तृतीयाध्यायांतोक्तप्रकरणेनेत्यर्थः ॥ अन्यस्मात्प्रवृत्तकर्मणः ॥ इत्युक्तेन हेतुनेति ॥ स्वोक्तकरणे फलसद्भावरूपहेतोरुक्तत्वादिति भावः ॥

ॐ ॥ उक्तयोर्ज्ञानकर्मणोरुभयोर्विशेषविस्तरात्मकोऽयमध्याय इति पूर्वसंगताध्यायार्थस्थितौ इह प्रकरणभेदप्रतिपादनार्थमाह ॥ बुद्धेरिति ॥ एवं ज्ञात्वेत्यतः प्राक्तनेनग्रंथेन बुद्धेः परस्य विष्णोर्माहात्म्यमुच्यते ॥ आद्यस्य प्रकरणस्य पूर्वेण संगतिं सूचयितुं बुद्धेः परस्येत्युक्तम् ॥ श्रेयानित्यतः पूर्वेण कर्मभेदः ॥ निवृत्तस्य कर्मणोऽन्यस्याद्भेदः ॥ निवृत्त एव कर्मण्युपासनायज्ञादिरूपेण वा भेदः ॥ज्ञानमाहात्म्यं शेषेणेति॥

श्रीमदमलबोधाय नमः ॥हरिःॐ ॥ ॥ बुद्धेःपरस्य माहात्म्यं कर्मभेदो ज्ञानमाहात्म्यं चोच्यतेस्मिन्नध्याये ॥ पूर्वानुष्ठितश्चायं धर्म इत्याह ॥ इमामिति ॥

श्रीभगवानुवाच॥इमंविवस्वतेयोगंप्रोक्तवानहमव्ययम् ॥ विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवंपरंपराप्राप्तमिमंराजर्षयोविदुः॥ सकालेनेहमहतायोगोनष्टःपरंतप ॥२॥ सएवायंमयातेऽद्ययोगःप्रोक्तःपुरातनः ॥ भक्तोऽसिमेसखाचेतिरहस्यंह्येतदुत्तमम् ॥ ३ ॥

॥ १ ॥ २ ॥ ३ ॥

इमं विवस्वते योगमित्युपदेशपरंपराकथनं प्रकृतानुपयुक्तमित्यतस्तत्तात्पर्यमाह ॥ पूर्वेति ॥ पूर्वैरनुष्ठितः ॥ ये मे मतमित्युक्तेन हेतुना सहास्य समुच्चयार्थश्चशब्दः ॥ अयं धर्मो मयि सर्वाणीत्यनेनोक्तः ॥ ॥ कृ० ॥ ॐ पूर्वेणेति ॥ पूर्वाद्ध्यायेनेत्यर्थः ॥ एवं ज्ञात्वेत्यारभ्य श्रेयानित्यतः पूर्वस्मिन्प्रकरणे केश्चिन्श्लोकैर्निवृत्तकर्मणोऽन्यैर्लक्षणमुच्यते॥ इयमेवापरं इत्यादिभिस्तु निवृत्तकर्मणि न भेदः॥ अतस्तदुभयानुगुण्याय व्याचष्टे ॥ निवृत्तस्य कर्मण इत्यादिना॥ ननु पूर्वमनुष्ठित इति व्याख्याने कर्त्राकांक्षाया अनिवृत्तेः भूतार्थक्तप्रत्ययेनैवोक्तार्थतया पूर्वशब्दवैयर्थ्यं चेत्यत आह॥ पूर्वैरनुष्ठित इति॥ उक्तेन हेतुनेति॥ कारणाकरणयोरिष्टानिष्टप्राप्तिलक्षणेन हेतुमित्यर्थः॥

१ अव्ययफलकम् ॥ २ कर्मधारयः सप्तमीतत्पुरुषो वा ॥ अत्र प्रवचनवेदनशब्दैस्तेषामनुष्ठानमप्युपलक्ष्यम्॥ ३ यदुत्तमं तत्सख्युर्देयम् ॥यद्रहस्यं तद्भक्ताय॥ एतदुत्तमं रहस्यं च त्वं सखाभक्तश्चेति हेतोस्तवप्रोक्तमित्यर्थः ॥

॥ श्री० ॥ ननु गीतायां इमं विवस्वते योगमित्यादिना योगस्य पूर्वानुष्ठितत्वमुच्यते भाष्ये तु पूर्वानुष्ठितश्चायंधर्म इत्याहेति धर्मस्यातो गीताभाष्ययोर्विसंवाद इत्यत आह ॥ योगशब्दोऽप्यनेनेति ॥ उपदेशपरंपरायास्तात्पर्यकथनपरभाष्यस्य धर्मपदेन गीतागतोयोगशब्दोऽपि व्याख्यात इत्यर्थः ॥ ननु पूर्वानुष्ठितश्चेति कथमवतार्यते तत्रोपदेशपरंपराया एवोक्तेरित्यत आह ॥ न केवलमिति ॥ तेषां ॥विवस्वदादीनाम उपलक्षणेऽपि प्रयोजनमाह॥तच्चेति॥ उपलक्षणं चेत्यर्थः॥ इतोऽपीति ॥ आचारोऽप्यस्तीत्याहेत्यस्य श्लोकस्यावतारितत्वेन पूर्वानुष्ठानस्य प्रमाणतया तत्रोक्तत्वादितिभावः ॥ निवृत्तधर्मेति॥ सर्ववर्णाश्रमसाधारणेतिशेषः ॥ ननु लोकेऽस्मिन द्विविधानिष्ठेत्यत्रैव कर्मयोगेन योगिनामिति जनकाद्याचारस्योक्तत्वात् कर्मणेत्यस्य लोकेऽस्मिन्नित्यनेन पुनरुक्ततास्यादित्यन्यस्यामपि पुनरुक्तताशंकां पुनरुक्तिपरिहारप्रसंगात्परिहरति ॥ लोकेऽस्मिन्निति ॥ इत्यत्रोक्तस्य ॥ कर्मयोगेन योगिनामिति सामान्येनोक्तस्य॥ कर्मणैवेति ॥ वाक्येनेति शेषः ॥ कर्मणैवेत्युत्तरग्रंथानुरोधेनैव जनकादिवदिति भाष्यकारैरुदाहरणमुक्तमिति न दोष इत्यवधेयम ॥ १ ॥ २ ॥ ३ ॥ ननु नत्वेवाहमित्यादिनेति ॥ ईश्वरस्यापि गृहगतत्वात मोहात्तस्याप्युभयविधानित्यत्वशंकाप्राप्तौ तदपिनिवार्येत नत्वेवाहमितीति तात्पर्योक्तरीत्यानुशब्देनोक्तमित्यर्थः ॥ आदिपदात् अविनाशि त्वित्यत्रापि॥यद्यपि नित्यत्वं जीवस्याप्यस्ति तथाऽपि सर्वप्रकारेणाविनाशित्वं विष्णोरेवेति तुशब्दः ॥अनित्यत्वं देहहानिर्दुःखावाप्तिरपूर्णता ॥ नाशश्चतुर्विधःप्रोक्तस्तदभावो हरेःसदा ॥ तदन्येषां तु सर्वेषां नाशाः केचिद्भवन्तिहीति गीतातात्पर्योक्तरीत्या तुशब्देनोक्तमिति द्रष्टव्यम ॥ उक्त भगवत इति ॥ तुशब्देनेति शेषः ॥

योगशब्दोऽप्यनेन व्याख्यातः॥ न केवलमुपदेशपरंपराऽत्रोच्यते ॥ किं तु तेषामनुष्ठानमप्युपलक्ष्यते ॥ तच्चेतोऽपित्वयाऽनुष्ठेयमिति प्रतिपादनार्थमिति भावः॥ कर्मणैव हि संसिद्धिमित्यनेनैतद्गतार्थमिति चेन्न ॥ गृहस्थकर्मत्वया न त्याज्यमित्यस्योपपादनायाचारस्य तत्रोक्तत्वात् अत्र तु निवृत्तधर्मानुष्ठाने सदाचारस्योच्यमानत्वात् ॥ अत एव तत्राचारइत्येवोक्तमिह त्वेंय धर्म इति॥ लोकेऽस्मिन्द्विविधेत्यत्रोक्तस्य कर्मणैवेत्युदाहरणमुक्तमिति तत्रापि न दोषः॥ १ ॥ २ ॥ ३॥ननु न त्वेवाहमित्यादिना सर्वप्रकारेणोत्पत्तिविनाशराहित्यमुक्तं भगवतः तत् श्रुत्वा कथमपरामिति पृच्छतीत्यत आह॥ मयीति ॥

॥ मयि सर्वाणीत्युक्तम् ॥

॥ क्र० ॥ ॥ अनेन व्याख्यात इति ॥ भाष्यस्थधर्मपदेनेत्यर्थः ॥ उपदेशपरंपराकथनमसंगतमितिशंकां निरस्यति ॥ न केवलमिति ॥ अत्रापीति ॥ यद्यप्युभयत्र सदाचारहेतुनाऽनुष्ठेयत्वं साधितम॥ तथाऽपि पूर्वं गृहस्थकर्मत्वं पक्षतावच्छेदकम॥अत्र तु निवृत्तधर्मत्वम॥ न चानयोरभेदः काम्यकर्माणि प्रणवजपादौ च परस्परपरिहारेण वृत्तेः ॥ तथा च नगतार्थत्वमिति भावः ॥ ननु लोकेऽस्मिन्नित्यत्रैव कर्मयोगिनामित्याचारस्योक्तत्वात्कर्मणैवेत्यस्य तेन पुनरुक्तिरित्याशंकां पुनरुक्तिपरिहारप्रसंगात्परिहरति ॥ लोकेऽस्मिन्निति ॥ कर्मणैवेत्युत्तरग्रंथानुरोधाद्भाष्यकारैर्जनकादिवदित्युदाहरणमुक्तमिति भावः ॥ १ ॥ २ ॥ ३ ॥

---

१ कर्मणैव हीत्यस्य ॥ २ छलारिशपाचार्यमते गृहस्थस्यापि अधिकारात् गायत्र्याः पूर्वमिति पूरणीयम ॥ इतरमते यथाऽवस्थितमिति द्रष्टव्यम ॥

॥ श्री० ॥ भाष्ये ॥ तत्रतत्रेति ॥ गीतादावित्यर्थः ॥ तस्यान्यथेति ॥ सार्वत्रिकगुणोपसंहारो नैकं प्रत्येवोच्यते किं तु केन चिदानंदादयो ज्ञातव्याः केन चिदव्यक्तात्परत्वादयः केनाचिद्बुद्धेः परत्वादय इत्यन्यथाव्याख्यानेऽपीत्यर्थः ॥ भाष्योक्तप्रमाणेऽपौरुषेयवेदा ऋगाद्याश्चत्वारः ॥ विष्णुवेदाश्च पंचरात्रं भारतं च मूलरामायणं तथा ॥ तथा पुराणं भागवतं विष्णुवेद इतीरित इति द्वितीयाध्यायोदाहृतनारदीयवचनेन ज्ञातव्याः इतरसमुच्चयेतरनिषेधार्थकतया विरुद्धयोश्चैवशब्दयोरेकत्रान्वयासंभवादाह ॥ सर्वत्रैवेति वेदाद्यनुक्ता इति॥सदनुक्ता अपि गुणाः संतीति सामान्यतः उक्तावपि विशेषतोऽनुक्ता इत्यर्थः ॥ एतज्ज्ञानस्येति ॥बुद्धिपरत्वेनोक्तज्ञानस्येत्यर्थः ॥ भगवदिति ॥ सोऽप्यस्येति परमात्मापरोक्ष्येणैवकामविनाशोक्तेरत्रापि भगवत्परत्वमेवांगीकार्यमिति भावः ॥ अन्यथेति ॥ जीवस्यात्र प्रतिपाद्यत्वांगीकारे तज्ज्ञानस्य कामविनाशसाधनत्वोक्तेरघटनादित्यर्थः ॥ भाष्ये सत्तः परमविज्ञाय स्थितस्य पुंसः कामजयः कुत इत्यनेनाघटनोक्तेरिति ज्ञेयम् ॥

तस्या[3]न्यथाव्याख्यानेऽपि स्पष्टं प्रमाणमाह ॥ तथा चेति ॥ सर्वत्रै[1]वेति ॥ संबंधः ॥ वेदाद्यनुक्ता अपि भगवत्संप्रदायागतास्तै सह तैः सहितम् ॥ न च तत्रेत्युक्तमुपसंहरति ॥ तस्मादिति ॥ मायावादी तु यो बुद्धेः परतस्तु स इत्यनेन जीव उच्यत इत्याह॥ तन्निराकरोति॥

तथाचान्यत्र ॥ अपौरुषेयवेदेषु विष्णुवेदेषुचैव हि ॥ सर्वत्र येगुणाः प्रोक्ताः संप्रदायागताश्च ये ॥ सर्वैस्तैः सहविज्ञाय येपश्यंति परं हरिम् ॥ तएव भवेन्मुक्तिर्नान्यथा तुकथंचनेति गारुडे ॥ तस्मादव्यक्तादपि परत्वेन ज्ञेयः ॥ न चात्र जीवउच्यते ॥ रसोऽप्यस्य परंदृष्ट्वा निवर्ततइत्युक्तत्वात् ॥ अविज्ञाय ॥परं मनो जयः कामस्य वै कुत इतिच ॥

न चेति ॥ कुत इतिचेत् ॥ एवं बुद्धेः परमित्येतज्ज्ञानस्य कामविनाशसाधनत्वोक्तेः ॥ तस्याश्च भगवत्परिग्रहे घटनादन्यथाऽघटनादिति भवेनोभयत्र प्रमाणमाह ॥ रसोऽपीति ॥ ॥ कृ० ॥ अन्यथा व्याख्यानेऽपीति ॥ तत्तद्गुणोपासकानां तत्तद्गुणोपसंहारः ॥ न तु सर्वेषां सर्वगुणोपसंहारइति व्याख्यानेऽपीत्यर्थः ॥ ननु तैः सहेत्यस्य ये पश्यंतीत्युक्तकर्तृसंबंधे गुणानां ज्ञातृत्वप्राप्त्या बाधः ॥ हरिमित्युक्तकर्मसंबंधे तु पुत्रेण सहागतः पितेतिवद्गुणानां ज्ञातव्यत्वमात्रं लभ्यते ॥ न तु हरिविशेषणत्वेन ज्ञातव्यत्वमित्यतआह॥तैः सहितमिति ॥ तद्विशिष्टमित्यर्थः ॥

१ सर्वैस्तैः सहितमित्युक्त्या गणानामतःप्राप्तस्तन्निवारयति ॥ २ इदं ब्रह्मवचनं सत्तः सत्त्वकाशात् परं उत्तमं हरिमित्यर्थः ॥ ३ सार्वत्रिक गुणोपसंहारस्य ॥

॥ श्री० ॥ अत्रोच्यत इति ॥ यो बुद्धेः परतस्तु स इत्यत्रेत्यर्थः ॥ मनोधर्मस्येति ॥ बुद्धचतस्मनोधर्मस्येत्यर्थः॥तत्परत्वानुपपत्तेरिति ॥ बुद्धिपरत्वानुपपत्तेरित्यर्थः ॥ तारतम्योक्तेरिति ॥ योबुद्धेः परतस्तु स इत्यस्य भगवत्परत्वे तस्य सर्वोत्तमत्वज्ञापनार्थं इन्द्रियाणि पराणीत्यादिनातारतम्यकथनं सफलंजीवकामपरत्वपक्षे तु तारतम्यकथनं व्यर्थम् ॥ तयोः सर्वोत्तमत्वाभावादिति भावः॥ शब्दवाच्यामिति ॥ संस्तभ्येतिशब्दमहिम्ना न लभ्यमित्यर्थः ॥ गीतायां ॥ आत्मना बुद्ध्या ॥ आत्मानंमनः संस्तभ्येत्यस्य विषयेभ्यो नियम्येत्यर्थो द्रष्टव्यः ॥ इति यदुवरगीताभाष्यटीकासुपुक्ताशयमतिललितानाभिगीर्भिराविदयित्री ॥ मुललितविवृतिर्याबृणिगद्धावतीर्णासमगमद्यमध्यायोऽतमस्यां तृतीयः ॥ ४२ ॥४३ ॥ इति श्रीयदुपत्याचार्यपूज्यपादाराधकेनश्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावदीपिकाव्याख्यायां तृतीयोऽध्यायःसमाप्तः ॥

न चायेत्युक्तमुपसंहरति ॥ अत इति ॥ भास्करस्तु कामोऽत्रोच्यत इत्याह ॥ तदतीव मंदं ॥ कामः संकल्प इत्यादिश्रुतेः तस्य मनोधर्मस्य तत्परत्वानुपपत्तेः ॥ पक्षद्वयेऽपींद्रियाणि पराणीत्यादिना तारतम्योक्तेर्न प्रयोजनमस्तीति ॥संस्तभ्यात्मानमात्मनेत्यस्य(त्र)जीवात्मानं प

अतः परमात्मज्ञानमेवात्र विवक्षितम् ॥ आत्मानं मनः ॥ आत्मना बुद्ध्या॥४२ ॥४३ ॥इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये तृतीयोऽध्यायः ॥३॥

॥ श्रीमदमलबोधाय नमः ॥ श्रीकृष्णार्पणमस्तु ॥

रमात्मनैकीकृत्येतिव्याख्यानं शब्दवाच्यमित्याशयवानात्मशब्दद्वयं व्याख्याति॥आत्मानमिति ॥४२॥४३॥ इति श्रीमदानंदतीर्थभगवत्पादविरचितगीताभाष्यस्य टीकायां प्रमेयदीपिकायां तृतीयोऽध्यायः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

॥ कृ० ॥ मनोधर्मस्येति ॥ हेतुगर्भविशेषणमेतत् ॥ पक्षद्वयेऽपीति ॥मायावादिभास्करपक्षयोरपीत्यर्थः ॥४२॥४३॥इति श्रीमन्निर्मलाचार्यपूज्यपादसनुकृष्णविरचिते प्रमेयदीपिकाभावप्रकाशे तृतीयोऽध्यायः ॥श्रीकृष्णार्पणमस्तु॥

१ द्वंद्वः ॥

॥श्री०॥ प्रणम्य यादवाचार्यगुरूणां पादपंकजे ॥ क्रियते तृतीयाध्यायटीका भावप्रदीपिका ॥ १ ॥ **अस्मिन्निति** ॥ तृतीयाध्याय इत्यर्थः एकताम॥एकार्थप्रतिपादकत्वेनैकवाक्यताम॥ अर्थैकत्वादेकं वाक्यमिति जैमिनिवचनात् ॥ **तत्प्रतिपाद्यम्** ॥ पूर्वाध्यायप्रतिपाद्यम् ॥ आत्मशब्दार्थं माह ॥ **जीवेश्वरेति** ॥ न त्वेवाहमित्यादिनोभयस्वरूपोक्तेरात्मशब्द उभयपर इति भावः ॥ नन्वेषा तेऽभिहितां सांख्ये इति पूर्वं सांख्यस्यैकत्वेन कथं जीवेश्वरस्वरूपमुक्तं पूर्वत्रेत्युक्तमित्यत आह ॥ **सांख्येति** ॥ **योगाख्यमिति** ॥ पूर्वत्र काल इत्यन्यथाप्रतीतिर्याचष्टे ॥ **पूर्वस्मिन्नध्याय इति** ॥ के चित्तु पूर्वशब्देनाव्यवहितपूर्वाध्यायस्यैव विवक्षितत्वान्नप्रथमाध्यायप्रसक्तिरित्याशयेनाह ॥ पूर्वस्मिन्नध्याय इति ॥ पाठः ॥ **एतमिति** ॥ पूर्वाध्यायस्यात्मस्वरूपज्ञानसाधनोभयप्रतिपादकत्व इत्यर्थः ॥ ऐक्यानुपपत्तिः ॥ अर्थैक्याभावेनैकवाक्यत्वानुपपत्तिरित्यर्थः ॥ कुतो नेत्यत आह ॥ **साधनस्यैवेति** ॥ प्राचुर्यात् प्राधान्यात् तथा च प्राधान्येन साधनप्रतिपादकत्वादेकवाक्यत्वव्यपदेशो युक्त इत्यर्थः ॥ ननु प्राधान्येन साधनप्रतिपादकत्वेऽपि अप्राधान्येनात्मस्वरूपस्यापि प्रतिपादनात्तदपेक्षयैक्यत्वव्यपदेशः कस्मान्न स्यादित्यत आह ॥ **प्रचुरेणेति** ॥ योऽर्थो यत्र प्राधान्येनोच्यते सोऽध्यायस्तदर्थो यथा फलाध्याय इति भावः ॥ अस्त्वेवमथाप्यत्रोभयोरपि प्रतिपादनात् साधनमेव प्राधान्येनोक्तमित्यत्र किं ज्ञापकमित्यत आह ॥ **तथा चेति** ॥ सप्तमादौ सप्तमाध्यायस्यादौ ॥

॥ श्रीवेंकटेशाय नमः ॥ पूर्वोत्तराध्यायेभ्योऽस्य भेदं स्वस्मिन्नेकतां चदर्शयन्नेतदध्यायप्रतिपाद्यमर्थं पूर्वाध्यायार्थसंगतत्वेन विवक्षुस्तत्प्रतिपाद्यंतावदाह ॥ आत्मेति ॥ जीवेश्वरस्वरूपम् सांख्याख्यमित्यर्थः ॥ ज्ञानसाधनमात्मज्ञानसाधनं योगाख्यं पूर्वत्र पूर्वस्मिन्नध्याये न चैवं

श्रीमदृशप्रमतिगुरुभ्यो नमः ॥ आत्मस्वरूपं ज्ञानसाधनं चोक्तं पूर्वत्र ॥

द्वितीयस्याध्यायस्यैक्यानुपपत्तिः॥साधनस्यैव प्राचुर्यात प्रचुरेण च व्यपदेशात॥तथा च सप्तमादौ वक्ष्यति साधनं प्राधान्येनोक्तमतीतैरध्यायैरिति॥

॥ क्र० ॥ ननु योगे त्विमां शृण्विति प्रतिज्ञानत्वाद्यावत्प्रतिज्ञांतरं कार्ष्ण्येन तावत्तदेव प्रतिपाद्यमिति ज्ञास्यते तत्किं पुनः प्रतिपाद्यवर्णनेन ॥ किं च ज्ञानसाधनत्वेनेदयादिनैव प्रतिपाद्योक्तिलाभात्किमात्मस्वरूपामिति वाक्येनेत्यत आह ॥ पूर्वेति ॥ **तत्प्रतिपाद्यमिति** ॥ अबुद्धिस्थेन संगतिं दर्शयितुमशक्यत्वात्पूर्वाध्यायप्रतिपाद्यमाहेत्यर्थः ॥ नत्वेवाहमित्यादिना जीवेश्वरयोरुक्तत्वादाह ॥ **जीवेश्वरस्वरूपमिति** ॥ ननु जीवेश्वरस्वरूपमुक्तमित्ययुक्तम् ॥ एषा तेऽभिहिता सांख्ये इति वाक्यात्पूर्वाध्याये सांख्यस्यैवोक्तत्वावगमादित्यत उक्तम् ॥ **सांख्याख्यमिति** ॥ अव्यवहितपूर्वश्लोके आत्मस्वरूपज्ञानसाधनयोरनुक्तेराह ॥ **पूर्वस्मिन्नध्याय इति** ॥ प्राचुर्यात् प्राधान्यात् सप्तमादौ सप्तमोपक्रमे ॥

---

१ प्रथमपादे साधने प्रतिपादितेऽपीति ग्राह्यम् ॥

॥ श्री० ॥ ननु साधनस्यैव प्राधान्येज्ञानसाधनमुक्तंपूर्वेनेत्येतावदेव वक्तव्ये आत्मस्वरूपं ज्ञानसाधनं प्रोक्तं पूर्वत्रेति वाक्यविन्यासः कृत इत्यत आह ॥ आत्मेति ॥ ज्ञानसाधनं केन मार्गेणोक्तमिति शंकापरिहाराय गीतायांएषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणुविति प्रकरणभेदस्य प्रदर्शितत्वात्तदनुसारेण भाष्यकारैरपि प्रकरणभेदप्रदर्शनार्थमात्मस्वरूपमित्यादिकमुक्तमित्याशयः ॥ एतादिति ॥ पूर्वाध्यायेत्यर्थः ॥ तावदिति ॥ समाधियोगस्तु षष्ठाध्याये निरूप्यत इति भावः ॥ विपूर्वकस्य दधातेः ॥ करोत्यर्थत्वेन कर्म विधीयते क्रियते इत्यसंगतार्थत्वपरिहाराय व्याचष्टे ॥ कर्तव्यमेवेति ॥ के चित्तु संध्यामुपासीतेत्यादिवद्विधानाभावात्कथं विधीयत इत्युक्त मित्यत उक्तम् ॥ कर्तव्यमेवेतीत्याहुः ॥ अकर्म कर्मान्यज्ञानादिकं विनिंद्येत्यन्यथाप्रतीतिंव्याचष्टे ॥ कर्माकरणमिति ॥ सर्वथाऽहं कर्मैव न करिष्यामीति पक्षंपूर्वत्र विनिंद्येत्यन्यथाप्रतीतिवारणायाह ॥ विनिंद्यास्मिन्नध्याय इति ॥ नहि कश्चिदित्यादिनेत्यर्थः ॥ अनेनोत्तराध्याय इत्येतदपि व्याख्यानं भवति ॥ अन्यथैतदध्यायापेक्षयाऽप्युत्तराध्याये चतुर्थ इत्यन्यथाप्रतीतिः स्यादिति भावः ॥ नन्वेतदध्यायस्याकर्मनिंदाकर्मविधिरूपार्थद्वयप्रतिपादकत्वेनैकार्थत्वाभावादेकवाक्यता न स्यादित्यत आह ॥ अकर्मनिंदेति ॥

आत्मस्वरूपमित्यादि तु प्रकरणभेदप्रदर्शनायोक्तमिति॥एतत्संगतत्वेनतृतीयाध्यायार्थमाह॥ज्ञानेति॥योगो द्विविधः कर्मसमाधिभेदात् तत्र तावे

ज्ञानसाधनत्वेनाकर्म विनिंद्य कर्मविधीयत उत्तराध्याये ॥

ज्ज्ञानसाधनत्वेन कर्मविधीयते॥कर्तव्यमेवेति ज्ञाप्यते केश्चनवाक्यैरकर्म कर्माकरणं विनिंद्यास्मिन्नध्याये॥अकर्मनिंदापिकर्मविध्यर्थेत्येकार्थता

॥क०॥ननु योगे त्विमांशृणुविति प्रतिज्ञातत्वाज्ज्ञानसाधनत्वेनयोग एव वाच्यो न तु कर्मेत्यत आह॥योगोद्विविधइति॥ तथा च कर्मणोऽपियोगत्वाज्ज्ञानसाधनत्वेन तत्कथनं युक्तमिति भावः समाधिर्ध्यानम्॥तथैव न्यायदीपिकोक्तेः॥षष्ठ समाधिर्वक्ष्यत इति सूचयितुं तावदित्युक्तम्॥ ननु कर्मकर्तव्यत्वबोधके लोकेऽस्मिन्नित्यादौ विधिप्रत्यय एव न दृश्यते यत्र च दृश्यते नियतंकुरु कर्मेत्यादौ तत्रापि कर्मकरणस्यैव संध्योपासनवद्विधेयत्वं न तु कर्मणः ॥ यत्रापि युध्यस्वविगतज्वर इति विधेयत्वं प्रतीयते तत्रापि युद्धस्यैव न तु कर्ममात्रस्य तत्कथं कर्म विधीयते इत्युक्तमित्याशंक्य सर्वसंग्रहायाह ॥ कर्तव्य मेवेति ज्ञाप्यत इति ॥ नन्वर्थैक्याभावादध्यायस्यैकवाक्यता न स्यादित्यत आह ॥ अकर्मनिंदाऽपीति ॥ तथा च प्रधानार्थैक्यादध्यायस्यैकवाक्यतेति भावः ॥ ॥ ॥ ॥

१ आदौ ॥

॥श्री०॥अकर्मणि निंदिते मति कर्मविधौ प्रवर्तेत इति कर्मविध्यनुकूलत्वेनैवाकर्मणो निंदितत्वात्कर्मविधिरूपैकार्थत्वे प्राधान्यतः प्रतिपादनात्तदपेक्षयैकवाक्यतोपपन्नेति भावः॥ नन्वेवमेकार्थत्वाभिप्राये ज्ञानसाधनं कर्म विधीयत उत्तराध्याय इत्येव कस्मान्नोक्तम् ॥ अकर्म विनिंद्यत्यंशः कृत इत्यत आह॥तथापीति॥यद्यप्येवमेकार्थता तथाऽपीत्यर्थः ॥ननु न हि कश्चिदित्याद्यैः कर्मविधानाभावात् कथं समस्ताध्यायेनापि कर्मैव विधीयत इत्युच्यत इतिशंकापरिहाराय प्रकरणभेदज्ञापनायाकर्मविनिंद्येत्युक्तमिति भावः॥इति वदतेति॥ कर्मणो ज्ञानसाधनत्वं वदतेत्यर्थः ॥ ननु कर्मणो मोक्षसाधननिरासस्य का प्रकृतसंगतिरित्यत आह॥तेनेति॥कर्मणः सकाशात्॥बुद्धिर्ज्यायसी चेत् कर्माणि कस्मान्नियोजयसि तस्य मोक्षसाधनत्वाभावाद्बुद्धेरेव तद्भावात् मोक्षसाधनस्यैवाविकारिणा संगाद्यत्वादित्यर्जुनप्रश्नाशयवर्णनं तथा लोकेऽस्मिन्नित्यत्र कर्मयोगेन योगिनामित्यधिकारिविशेषाणां कर्मणैवमुक्तिरितिकर्मणो मोक्षसाधनत्वं भगवतोऽभिप्रेतामिति प्रतिवचनव्याख्यानं च यद्भास्करेण कृतं तज्ज्ञानात्पूर्वं कृतस्य कर्मणो ज्ञानेनैव कृतार्थत्वं न लिंगभंगरूपमोक्षसाधनत्वमिति ॥ स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने इत्यणुगीतोपक्रमे भगवतैव प्रतिपादितत्वेनापहस्तितमित्यर्थः ॥ नन्वथापि ज्ञानोत्तरकृतकर्मणः आनंदाभिवृद्धिरूपमसाधनत्वस्यापि स हि धर्म इति भगवतैवोक्तत्वेनानंदवृद्धिरूपमुक्तिसाधनत्वं ज्ञानोत्तरकृतकर्मणो नास्तीति प्रश्नाशयः ॥ तदस्तीति प्रतिवचनाभिप्राय इति व्याख्यायत इति चेत्तर्हि अनुज्ञया वर्तामह इत्यभिप्रेत्याह ॥ आनंदवृद्ध्यर्थतात्विति ॥

॥ तथाऽपि प्रकरणभेदार्थमेवमुक्तम् ॥ ज्ञानसाधनत्वेनेति वदता मोक्षसाधनता निरस्ता ॥ तेन प्रश्नप्रतिवचनाप्यव्याख्यानमप्यपहस्तितम्

कर्मणो ज्ञानमत्युक्तमित्यभिहितं भगवता दूरेण ह्यवरं कर्मेत्यादौ ॥

॥ आनंदवृद्ध्यर्थता त्वनुज्ञायत एव बीजं प्रदर्शयन्प्रश्नवाक्यतात्पर्यमाह ॥कर्मण इति ॥

॥कृ०॥एवमुक्तमिति ॥ अकर्म विनिंद्येत्याद्युक्त मित्यर्थः॥तेनेति ॥ मोक्षसाधनतानिरासेनेत्यर्थ ॥प्रश्नेति॥ बुद्धिः कर्मापेक्षयाज्यायसी चेन्मतातर्हि घोरेयुद्धाख्ये कर्मणि किमर्थं मां नियोजसि ज्ञानमेव संपादयिष्यामि ननुभयमित्यादिरूपेण प्रश्नापव्याख्यानं कर्मणामनारंभात ॥ मोक्षं नाश्नुतेऽतो ज्ञानकर्मणी समुच्चिते एव मोक्षसाधने इति प्रतिवचनापव्याख्यानं चेत्यर्थ इत्याहुः ॥ कर्मणो मोक्षसाधनत्वं किं ज्ञानवत्प्राधान्येन उतानंदाभिवृद्ध्यर्थत्वेन ॥ आद्यो भाष्यकृतैव ज्ञानसाधनत्वेनेत्यादिना निरस्तः द्वितीये त्विष्टापत्तिरित्याह ॥ आनंदवृद्ध्यर्थतात्विति ॥ बीजमिति ॥ प्रश्नबीजमित्यर्थः ॥

॥ श्री० ॥ अर्जुनादीनां ज्ञानोत्तरकृतयुद्धादिकर्मणआनंदवृद्धचर्थतायाः अस्माभिरंगीकारादिति भावः ॥ बीजम् ॥ प्रश्नबीजम् ॥ इत्यादीरिति ॥ बुद्धियुक्तो जहातीहेत्यादिना ज्ञानफलस्य कर्मफलाद्वैलक्षण्यकथनेन ॥ कर्मापेक्षयाऽप्युत्तमत्वमभिप्रेतमिति भावः ॥ ननु गीतायां भाष्ये च कर्मशब्देन यदि सामान्यतः कर्ममात्रं विवक्षितं तदपेक्षया ज्ञानस्योत्तमत्वमित्यर्थस्तर्हि निवृत्तधर्माणामपि कर्मांतर्गतत्वेन कर्मणि कस्मान्नियोजयसीत्येव वक्तव्यं निवृत्तधर्मान्विनेत्येतदसंगतमित्यत आह ॥ अत्रोभयत्रेति ॥ गीतायांभाष्ये चेत्यर्थः ॥ निवृत्तधर्मान्धवृत्तधर्मानित्यन्यथाप्रतीति निरासायाह ॥ निष्कामेति॥ निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यत इतिवचनादिति भावः ॥ ननु घोर इतिविशेषणं व्यर्थमित्यत आह ॥ अत्रेति ॥ द्वितीय इति ॥ श्रेयान् ॥ स्वधर्मो विगुण इतिपृथक्परिहारदर्शनादित्याशयः ॥ननु युद्धादिकर्मणांज्ञानद्वारा मोक्षसाधनत्वस्योक्तत्वेन तत्किंकर्मणीति कथमाक्षेपः संगच्छत इत्यत आह ॥ इदमुक्तं भवतीति ॥ आश्रमत्रयेति ॥ ब्रह्मचारिगृहस्थवानप्रस्थेत्यर्थः ॥

आदिपदेन कृपणाःफलहेतव इत्यादेर्ग्रहणम् ॥ घोरे रागद्वेषाद्युपेते अत्रोभयत्र कर्मशब्देन काम्यं कर्माभिप्रेतम्॥ निवृत्तधर्मान्निष्कामधर्मान्

ॐ अर्जुनउवाच ॥ ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन ॥ तत्किंकर्मणिघोरेमांनियोजयसिकेशव॥१॥व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे॥तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयाम् ॥२॥

एवं चेत्किमिति कर्मणि घोरे युद्धाख्ये नियोजयसि निवृत्तधर्मान्विनेत्याह ॥ ज्यायसीति ॥

यत्याश्रमविहितांच्छमदमादीन् अत्र कर्मणि किमिति नियोजयसीत्येकः प्रश्नः घोर इति द्वितीय इत्यवधेयम् इदमुक्तं भवति आश्रमत्रयविहितानि यज्ञादीनि

॥ कृ० ॥ इत्यादेरिति ॥ आदिपदेन बुद्धियुक्त इत्यादेर्ग्रहणम ॥ ननु घोरं भीमंभयानकमित्यमरोक्तेर्घोरत्वं भय हेतुत्वं न च युद्धस्य तदस्ति ॥ सुखिनः क्षत्रियाः पार्थलभंते युद्धमीदृशमिति क्षीरक्षत्रियाणां भयाभावावगमादित्यत आह ॥ रागेति उभयत्रेति ॥ गीतायां भाष्ये चेत्यर्थः ॥ अनीतधर्मानित्यन्यथाप्रतीतिनिरासायाह ॥ निष्कामधर्मानिति ॥ नन्वनुपलंभाद्युक्तधर्मा एव न संतीत्यत आह ॥ यत्याश्रमेति ॥ ननु कर्मणि नियोजनमयुक्तमित्यत्र ज्यायसीत्यनेन हेतोरुक्तत्वाद्घोर इति विशेषणं व्यर्थमित्याशंक्यश्लोकेऽस्मिन्निति श्रेयानिति च प्रथक् परिहारद्वयदर्शनानुरोधेनाह ॥ अत्रेति ॥ यज्ञादीनीति ॥

॥ श्री० ॥ ब्रह्मचारिणाऽश्वत्थाम्ना युद्धादेः कृतत्वादस्ति ब्रह्मचारिणोऽपि युद्धकर्तृत्वमिति ज्ञेयम् ॥ फलश्रवणादिति ॥ ज्ञानेतरधर्मफलश्रवणादित्यर्थः ॥ तदेव प्रदर्शयति ॥ सर्व एत इति ॥ पूर्वप्रकृता सर्वे यज्ञादिकारिणः स्वर्गादिपुण्यलोकभाजो भवन्तीत्यर्थः ॥ फलाश्रवणादिति ॥ ज्ञानेतरधर्मफलाश्रवणादित्यर्थः ॥ ननु आत्मानं पश्येदिति श्रुतौ कथं शमादीनां ज्ञानार्थत्वं श्रूयत इत्यत उक्तम् ॥ शांत इति॥ शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदित्यत्र शांतादिर्भूत्वा पश्येदित्युक्त्या शमादीनां ज्ञानफलकत्व लब्धमिति भावः॥ गीताभाष्ययोरर्थमनुवदति॥ ज्ञानं चेति ॥ यत्याश्रमविहितशमादिसाध्यं ज्ञानं चेत्यर्थः ॥ अभिहितम् ॥ दूरेण ह्यवरं कर्मेत्यादौ ॥ निवृत्तधर्मान्विनेति भाष्याभिप्राय माह ॥ किं त्विति चतुर्थाश्रमम् ॥ यत्याश्रमम्॥ तद्धर्मेति ॥ चतुर्थाश्रमविहितशमादिधर्मेत्यर्थः ॥ चतुर्थाश्रमविहितशमादिधर्मेत्यर्थः ॥ व्यामिश्रेणेवेति ॥ श्लोकनिवर्त्यशंकामाह ॥ न न्विति ॥ ज्ञानार्थमिति ॥ बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसीति ज्ञानद्वारा युद्धादिकर्मणो मोक्षसाधनत्वोक्त्या ज्ञानार्थत्वमुक्तमित्यर्थः ॥ तथा च तत्किमित्याक्षेपो युक्त इति भावः ॥ व्यामिश्रेणेति ॥ हतो वेत्यनेन युद्धादेः स्वर्गार्थत्वमुक्तं कर्मबंधं प्रहास्यसीति ज्ञानार्थत्वं चोक्तं तथा च विरुद्धार्थप्रतिपादकरूपव्यामिश्रेण ॥ वाक्येनेत्यर्थः ॥ ननु नास्ति वाक्यस्य व्यामिश्रता युद्धादेरधिकारिभेदेन स्वर्गज्ञानार्थत्वयोरुपपत्त्या विरोधाभावादित्याशंकते ॥ अथैवंमतमिति ॥ शुद्धेष्विति ॥

युद्धादीनि च कर्माणि काम्यान्येव फलश्रवणात् सर्वे एते पुण्यलोका भवंतीत्यादि॥ तथाऽत्रापि हतो वा प्राप्स्यसि स्वर्गमित्यादि चतुर्थाश्रमविहितानि शमादीन्यकाम्यानि ॥ फलाश्रवणात् ॥ शांतो दांत इत्युपक्रम्यात्मानं पश्येदिति ज्ञानार्थत्वश्रवणाच्च ॥ ज्ञानं च काम्यात्कर्मणोऽत्युत्तममित्यभिहितम् ॥ ततश्च काम्ये कर्मणि युद्धे युद्ध्यस्व भारतेति नियोजनमयुक्तं किंतु चतुर्थाश्रमं स्वीकृत्य तद्धर्मनिष्ठो भवेति ॥ नियोक्तव्यम्॥ननु युद्धमपि कर्मबंधं प्रहास्यसीत्युक्तत्वाज्ज्ञानार्थं भवतीति मतम्॥तदा व्यामिश्रेण वाक्येन बुद्धिमोहनमिवापद्यत॥अथैवं मतम् युद्धादीनि कर्माणि काम्यान्यकाम्यानि च तत्र यः सकामस्तंप्रति हतो वेत्याद्युक्तम् यः पुनर्ज्ञानार्थित मुद्दिश्य कर्मण्येवाधिकार इत्युक्तम् तत्र का व्यामिश्रतेति तथाऽपि शुद्धेषु॥

॥कृ०॥यज्ञदानतपांसीत्यर्थः ॥ एतेषां च त्रैवर्णिकसाधारणधर्मत्वात्क्षत्रियाद्यसाधारणधर्मेभ्यो युद्धादिभ्यः पृथक्कीर्तनम् ॥ युद्धादीनीति॥ अत्र युद्धमैश्वर्यं च क्षत्रियस्यासाधारणधर्मौ कृषिगोरक्षादिकं वैश्यस्य जीवनार्थं याजनमध्यापनं प्रतिग्रहश्च विप्रस्य ॥ एते धर्मा युद्धादिपदेन विवक्षिता इति बोध्यम् ॥ यज्ञादीनां फलश्रवणं दर्शयति ॥ सर्व एत इति ॥ युद्धादीनां तद्दर्शयति ॥ तथेति व्यामिश्रेणेति ॥ विरुद्धार्थप्रतिपादकेनेत्यर्थः ॥ हतो वेत्यनेन युद्धस्य स्वर्गाद्यर्थत्वप्रतिपादनात्कर्मबंधमित्यनेन च ज्ञानार्थत्वप्रतिपादनादिति भावः ॥ मोहनमिवेति ॥ परमकारुणिकस्य तव मोहकत्वं नास्त्येव ॥ तथाऽपि ममैवं प्रतिभातीति द्योतयितुमिवशब्दः ॥

॥ श्री०॥ मनोविक्षेपकारित्वाभावादधिकारिभेदेन काम्याकाम्योभयरूपत्वाख्यवैकल्पिकत्वाभावाच्च शुद्धत्वमिति द्रष्टव्यम् ॥ निवृत्तिलक्षणेषु ॥ निष्कामेषु वैकल्पिकेषु आधिका-
रिभेदेन काम्याकाम्यरूपेषु ॥ अत्रेति ॥ तथा च मनोविक्षेपकारित्वाद्युद्धादिकं न करोमीति भावः ॥ घोर इति द्वितीयप्रश्नं विवृणोति ॥ किं चेति नरकेति ॥ [illegible]
काम इत्याद्युक्ता विनश्यतीति नरकफलकत्वोक्तेः ॥ नियोजनमयुक्तमिति ॥ तथा च नरकहेतुभूतकामाद्युपेते युद्धादौ नियोजनमयुक्तं तथात्वे तव मां प्रत्याप्तत्वं न स्यादिति भावः ।
ननु रागाद्युपेतमपि युद्धं कर्तव्यं नरकफलप्राप्त्या जायमानस्य दुःखस्य चेह राज्यलाभेन जायमानसुखेन समीकर्तव्यत्वादित्याशंकते॥ नन्वस्येति॥ घोर इत्यनेनोक्तद्वितीयप्रश्नस्येत्यर्थः ।
॥ अशक्येति ॥ जीवितच्छुनाऽल्पबलेन युद्धादेः कर्तुमशक्यत्वादित्याशयः ॥ यद्वा रागादिकं विनाऽशक्यानुष्ठानेष्वित्यर्थः ॥ अयुक्तमिति ॥ तथात्वे मम नरकाद्यनर्थप्राप्तेरित्याशयः
॥ किंचिदिति ॥ त इत्यस्य तवेति तदित्यस्य तर्हीत्येव व्याख्यानादिति भावः ॥ आत्मेति ॥ जीवेश्वरेत्यर्थः ॥ कृ० ॥ वैकल्पिकेष्विति॥ अधिकारिभेदेन काम्याकाम्यरूपेष्वित्यर्थः.

निवृत्तिलक्षणेषु यत्याश्रमधर्मेषु सत्सु वैकल्पिकेषु नियोजनमयुक्तमेव ॥ तत्रमनोविक्षेपाभावादत्र तद्भावादिति किं च कामक्रोधादीनां नर
कफलत्वमुक्तम् युद्धे च कामादयोऽवर्जनीयाःततोऽपि तत्रनियोजनमयुक्तंनन्वस्योत्तरं सुखदुःखेसमेकृत्वेत्युक्तम्सत्यंतथाऽपिरागादिप्रसक्ति

कर्मणः सकाशाद्बुद्धिर्ज्यायसी चेत्ते तव ॥ मता तत् ॥ तर्हि ॥१॥२॥

हीनेषु शक्यानुष्ठानेषु यतिधर्मेषु सत्स्वशक्यानुष्ठाने युद्धे नियोजनमयुक्तमेवेति प्रथमश्लोके पदानां व्यवहितत्वादन्वयं दर्शयन्किंचिद्व्याचष्टे॥
कर्मण इति ॥ षष्ठीभ्रांतिनिरासाय सकाशादित्युक्तम् बुद्धिरात्मज्ञानम् ॥

उक्तमिति ॥ ध्यायतो विषयानित्यत्रेति शेषः ॥ किंचिदिति ॥ कर्मण इत्यस्य पंचम्यंतत्वसूचनाय सकाशादित्युक्तत्वात् तदित्यस्य तर्हीतिव्याख्यातत्वाच्चेति भावः ॥ एषा तेऽभि
हिता सांख्ये बुद्धिरितिवद्बुद्धिशब्दस्य बोधकवाक्यपरत्वे तस्य कर्मणोज्यायस्त्वानुवादोऽयुक्त इत्यत आह ॥ आत्मज्ञानमिति ॥ ननु ज्यायसीत्यस्यातिशयेनवृद्धेत्यर्थः ॥ तस्य
वृद्धशब्दप्रकृतिकत्वात् ॥ ॥१२६॥

॥श्री०॥ननु वृद्धस्य च वृद्धशब्दस्यापि ज्यादेशः स्यादिष्ठेयसुनोः परयोः ॥ अतिशयेन वृद्धो ज्येष्ठः ज्यायान्॥एवं च प्रकृते वृद्धशब्दस्य ज्यादेशे सति ज्यायसीतिरूपं तर्हि कर्मणः सकाशात् बुद्धिर्ज्यायसी अतिशयेनवृद्धेत्यर्थप्राप्त्या प्रकृतासंगतिरित्यत आह ॥ ज्यायसीप्रशस्यतरेति ॥ अतिशयेन प्रशस्तेत्यर्थः ॥ तथा च नात्र वृद्धशब्दस्य ज्यादेशे सतीदं रूपं येनासंगतिः किं तु प्रशस्यशब्दस्य ज्यादेशे सति ॥ तथा हि ॥ ज्य चेति सूत्रम् ॥ अत्र प्रशस्यस्य श्रइति पूर्वसूत्रात् ॥ प्रशस्यस्येत्यनुवर्तते ॥ तथा च प्रशस्यशब्दस्य ज्यादेशः स्यादिष्ठेयसुनोः परयोः ॥ अतिशयेन प्रशस्यो ज्येष्ठः ज्यायान् ॥ एवं च प्रशस्यशब्दस्य ईयसुनि परे ज्यादेशे उनित्यस्यलोपे ज्य ईयस् इति जाते ज्यादादीयसः ॥ ज्यात्परस्य ईयसः ईकारस्य आत् आकारादेशः स्यादित्याकारे ज्य आयस् इति जाते सवर्णदीर्घे ज्यायस् इति प्रातिपदिकनिष्पत्यनंतरं सुप्रत्यये उगितश्चेति ईयसुन उगित्वात् ङिपि इकारपकारयोर्लोपे हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हलिति ॥ ङ्यंतात्परस्य सोर्लोपे ज्यायस् ई ज्यायसीतिरूपम् तत्र प्रशस्यशब्दादेशभूतज्येत्यस्य प्रशस्तेति व्याख्यानम्॥तरपा ईयसुनो व्याख्यानम् द्विवचनविभज्योपपदे तरबीयसुनौ॥अथातिशायने तमबिष्ठनाविति पूर्वसूत्रादतिशायिन इति अनुवर्तते ॥ तथा ॥ चातिशायने तरबीयसुनोर्विधानात् अयमनयोरतिशयेनलघुर्लघुतरोलघीयांश्चेति प्रयोगदर्शनात् तरबीयसुनोरतिशयरूपैकार्थवाचित्वादित्यवधेयम् ॥ अतएवोक्तम् ॥ अमरकोशेवृद्धप्रशस्तयोर्ज्यायानिति॥ १॥२ ॥ एवं चेदिति ॥ उक्ताभिप्रायकश्चेदित्यर्थः ॥ संगच्छत इति ॥ भगवता स्वधर्मयुद्धादिकर्मणो निष्कामतया ज्ञानद्वारा मोक्षहेतुत्वादेरकथनादिति भावः ॥

ज्यायसी प्रशस्ततरा ॥ १ ॥ २ ॥ एवं चेत्प्रश्नस्तर्हि कथं परिहारवाक्यं संगच्छते तत्र निष्ठाद्वैविध्यकथनादित्यतस्तदभिप्रायं वदन्नवतारयति ॥ ज्यायस्त्वेपीति ॥ बुद्धिःकाम्यकर्मणो ज्यायसीति यदुक्तं तत्तथैव तथाऽपि त्वां तत्र वैकल्पिके युद्धादि कर्माणि प्रेरयामि कुतः आधि

श्रीभगवानुवाच ॥ लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ॥ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

ज्यायस्त्वेऽपिबुद्धेराधिकारिकत्वात्त्वंकर्मण्यधिकृतइति तत्र नियोक्ष्यामीत्याशयवान्भगवानाह ॥ लोक इति ॥

कारिकत्वात् त्वं कर्मण्यपि विक्षेपकारिण्यपि वैकल्पिकेऽधिकृत इति कृत्वा

॥कृ०॥न चासौयुक्तः ॥ बुद्धेस्तस्याविशेषरूपवृद्धत्वाभावादित्यत आह ॥ प्रशस्यतरेति ॥ नायंवृद्धशब्दप्रकृतिकः किं तुप्रशस्तवाचिप्रशस्यशब्दादतिशयार्थे इयसुनिज्य चेति ज्यादेशे ज्यादादीयसइति ईयसुनईकारस्यात्वे उगितश्चेति ङीपि च निष्पन्नः अत उक्तार्थलाभ इति भावः ॥ १ ॥ २ ॥

॥श्री०॥अधिकारिकेति पुरुषविशेषाणां संज्ञा॥ननु तथाऽपि रागादिप्रसक्तिहीनेषु शक्यानुष्ठानेषु यतिधर्मेषु सत्सु अशक्यानुष्ठाने युद्धे नियोजनमयुक्तमिति परिचोदनायाः किमुत्तरं मातमि त्यत आह॥**अयममत्रोत्तरक्रम इति**॥**शुद्धकाम्यानीति** ॥ सर्वास्वत्यपि नियमेन ज्ञानेतरस्वर्गादिफलकान्येवेत्येवं केवलकाम्यानीत्यर्थः ॥**स्वर्गाद्यर्थानीत्यादि**॥काम्यान्यकाम्यानि चेत्यर्थः॥ **काम्यकर्मणः** ॥ सकाशात् ॥ **संभवात्** ॥ ज्ञानार्थेनं प्रतीति शेषः ॥ **यतिधर्मान** ॥ रागादिप्रसक्तिहीनान् ॥शक्यानुष्ठानांश्च ॥ **एतेन** ॥ रागादिमतेत्यर्थः॥ **तद्विहितानि कर्माणि**॥ गृहस्थाश्रमविहितानि-युद्धादिकर्माणि ॥ **निष्कामतयेति** ॥ प्रसक्तमपिरागादिकं परित्यज्येत्यर्थः ॥ नन्वस्त्वाधिकारिकाणामेव भावः मम त्वनधिकारिकत्वादित्थं नियोजनमनुपपन्नमि त्यत आह ॥ **तत्र चेति** ॥ प्रजापाश्च तथा देवा महाधिकारिणः स्मृताः ॥ ऋष्यशीतिस्तथा मम पितरोऽप्सरसांशतम् ॥ गंधर्वाणां तथा राज्ञां विशदन्या सुजातिषु ॥ अल्पाधि कारिणः प्रोक्ता अनधिकारिणः पर इति पंचमस्कंधतात्पर्योदाहृतब्रह्मांडपुराणवचनेन देवानामधिकारिकत्वावगमात्तत्वार्पाद्रावतारतया देवत्वेनाधिकारिकत्वादित्यर्थः ॥

अयमत्रोत्तरक्रमः॥ आश्रमत्रयविहितानियज्ञादीनि युद्धादीनि च न शुद्धकाम्यानि किं तु कर्तुरिच्छया स्वर्गाद्यर्थानि ज्ञानाद्यर्थानि च भवंति॥ अतो बुद्धेः काम्यकर्मणो जायत्स्वेऽपि युद्धस्य बुद्ध्यर्थत्वसंभवात्तत्र नियोगो नानुपपन्नः ॥ यतिधर्मान्विना किमेतेन नियोगेनेतिचेत्॥अन धिकारिणामेव यत्याश्रमस्वीकाराधिकारो नाधिकारिकाणाम् ॥ तैर्गृहस्थाद्याश्रममपरित्यज्यैव तद्विहितानि कर्माणि निष्कामतयाऽनुष्ठेया नीतीश्वरनियमात् तव चाधिकारिकत्वादिति ॥

॥ कृ० ॥ ननु यति धर्मेषु सत्सु युद्धेनियोजनमयुक्तमिति पृष्टम ॥ तत्र युद्धेनियोजनमयुक्तमित्यस्यैव परिहारः प्रतीयते न तु यतिधर्माननुष्ठाने हेतुरित्यत आह ॥ अयमत्रेति ॥ ॥१२७॥

१ रागादिरस्मिन्नस्तीतिरागादिनातेन युद्धाविषयेणेति यावत् २ रागादिनाविक्षेपकारि युद्धाविषये प्रेरणम् ॥

॥ श्री० ॥ ननु प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ प्रउपेत्युपसर्गाभ्यां परस्य युजेर्धातोरात्मनेपदं स्यात ॥ प्रयुङ्क्ते उपयुङ्क्ते॥ अयज्ञपात्रेष्विति किम ॥ द्वंद्वं न्यंचि पात्राणि प्रयुनक्ति ॥ अत्र सूत्रे वार्तिकम ॥ स्वराद्यंतोपसृष्टाच्चेति ॥ तस्यार्थः ॥ स्वरास्वरमेवादौ अंते च यस्योपसर्गस्य सस्वराद्यंतोपसर्गः स उपसर्गोयस्य युजेः स स्वराद्यंतोपसृष्टस्तस्माद्युजेर्धातोरात्मनेपदं स्यात् ॥ यद्वा उपसृष्टमुपसर्गः भावे क्तः॥ तस्मात्परस्य युजेरात्मनेपदं स्यादिति शेष. ॥ उद्युङ्क्ते ॥उकारस्य स्वरत्वेन उदित्युपसर्गस्य स्वरादित्वात्स्वराद्युपसर्गसंयुक्तोऽयं युजि.नियुङ्क्ते इकारस्य स्वरत्वेन नीत्युपसर्गस्य स्वरांतत्वात्तदंतोपसर्गसंयुक्तोऽयं युजिः ॥ तथा च नियोक्ष्यामीत्यत्रापि युजेः स्वरांतत्वेन नीत्युपसर्गसंयुक्तत्वेनात्मनेपदित्वात् ॥ नियोक्ष्ये इतिस्यात भं विष्ये इति वत् ॥ तथा हि ॥ निपूर्वकात युजधातो. लृट्प्रत्यये तस्यात्मनेपदिनि उत्तमपुरुषैकवचने इडादेशे टकारलोपे नि युज् इ इति जाते स्यतासी लृलुटोः ॥ लृइतिलङ्लृटोर्ग्रहणम् ॥ धातोः स्यतासी प्रत्ययौ स्तः लृलुटोः परयोरिति स्यप्रत्यये युज् स्य इ इति जाते चोः कुरिति जकारस्य कुत्वे युग इति जाते खरिचेति ॥ सकाररूपे खरि परे झलो गकारस्य ककाररूपे चरि सति युक् इति जाते पुगंतलघूपधस्य चेति लघुपधत्वादुकारस्यौकाररूपगुणे योक् इति जाते आदेशप्रत्यययोरिति कवर्गात्परस्य स्यप्रत्ययस्य सकारस्य षकाररूपे मूर्धन्या

स्वराद्यंतोपसृष्टाच्चेति कात्यायनवचनमनित्यम् ॥

देशे कषयोर्गे क्षेतिजातेनियोक्ष्य इतिजाते टित आत्मनेपदानां टेरे ॥ लट् लिट् लुट् लृट् एते टितः एतदात्मनेपदानां आत्मनेपदिनिलादेशभूतानाम् ॥ तआतांझथासाथांध्वमिड्वहिमाहि इत्येतेषां टेरेत्वं स्यादिति टिभूतस्येकारस्य एकारादेशे नियोक्ष्य एइति जाते ॥ अतो गुणे ॥ अपदांताद्गुणे परतः अकारस्य पररूपं स्यादित्यनेन क्ष्य इत्यवयवस्य अकारस्य परस्य एकारस्य रूपे जाते नियोक्ष्ये इति रूपं भवन्न तु नियोक्ष्यामीति लृटः परस्मैपदिनि रूपमित्यत आह ॥ **स्वराद्यंतोपसृष्टाच्चेति कात्यायनवचनमनित्यमिति** ॥ ॥ कु० ॥ ननु प्रोपाभ्यां युजेरयज्ञपात्रेष्विति सूत्रेस्वराद्यंतोपसृष्टाच्चेति वक्तव्यमिति वार्तिककृतात्मनेपदविधानान्नियोक्ष्य इति वक्तव्यम् ॥ नियोक्ष्यामीति तु कथमित्यत आह ॥ **स्वरेति** ॥ स्वरोऽन्तआदिर्यतो वा यस्य तादृशेनोपसर्गेण संबंधाद्युजेरात्मनेपदंवक्तव्यमिति वार्तिकार्थः ॥

---

१ संबंधी २ भूप्राप्ता वात्मनेपदी ॥

॥श्री०॥अनित्यमित्यस्य क्वाचित् स्यात् क्वचिन्नस्यादित्यर्थः॥तथा प्रयुज्धातोःस्वरांतोपसर्गसंयुक्तत्वेऽपि नियोक्ष्यामीति परस्मैपदित्वमेवजातमित्यर्थः॥साधनप्रकारस्तु निपूर्वकात् युज् अस्मात् लृटि परस्मैपदिनिउत्तमपुरुषैकवचने॥मिपइत्यादेशे पकारलोपे स्यतासीलृलुटोरिति स्यप्रत्यये नियुज् स्य मि इति जाते चोः कुरिति चवर्गांतर्गतस्य जकारस्यकवर्गांतर्गतगकाररूपे कुत्वे नियुग् इति जातेखरिचेति गकारस्य ककाररूपे चर्त्वे लघुपधगुणे नियोक् इतिजाते आदेशप्रत्यययोरिति सस्य षत्वे कषयोगेक्षेति जाते नियोक्ष्यामीति अतो दीर्घो यञि॥अकारांतागस्य दीर्घः स्याद्य ञादौ सार्वधातुके पर इति मकारस्य यञ्प्रत्याहारांतर्गतत्वेन मिप्प्रत्ययोयञादिः तिङ् शित्सार्वधातुकमिति सार्वधातुकश्च भवति तिपमारभ्य महिङ्पर्यंतास्तिङो भवंति तिङ्प्रत्याहाररूप त्वात् ॥ एवं सार्वधातुकेयञादौ मिपि परे स्येत्यत्रस्य अकारस्य दीर्घे नियोक्ष्यामीति लृटः परस्मैपादिनि रूपे भवति भविष्यामीतिवदितिद्रष्टव्यम् ॥कात्यायनवचनस्यानित्यत्वे ज्ञापक

द्विविधा अपि जनाः संति

अत एव न पाणिनिरभाणीत् ॥ अयमाशयः श्लोकात्कथं लभ्यत इत्यतो व्याचष्टे ॥ द्विविधा अपीति ॥

माह ॥ **अत एव न पाणिनिरभाणीदिति** ॥ कात्यायनवचनस्यानित्यत्वादेवेत्यर्थः ॥ तथा हि ॥ यदिस्वराद्यंतोपसृष्टाच्चेति कात्यायनवचनं नित्यं स्यात्तर्हि पाणिनिः प्रोपाभ्यामिति सूत्रे प्रोपाभ्यामनुक्त्वा स्वराद्यंताभ्यां युजेरयज्ञपात्रेष्विति ब्रूयात् एवंवचनेऽपि प्रोपेत्युपसर्गयोरपि स्वरांतस्वराद्युपसर्गत्वेन संगृहीतत्वात्तत्परस्य युजेरात्मनेपदित्वोक्तिलाभात् ॥ ॥ कृ० ॥ **अतएवेति** ॥ अनित्यत्वादेवेत्यर्थः॥अन्यथा प्रोपाभ्यामित्यनुक्त्वा स्वराद्यंताभ्यामित्येवावक्ष्यत् न हि सूत्रानुक्तं ॥वार्तिककृतोच्यते॥ सूत्र एवं तु तत्संयत्कृत्तौ यच्च वार्तिक इति शाब्दिकोक्तेरिति भावः ॥

॥श्री०॥ न ह्येवमभाणीत किंतु प्रोपाभ्यामित्येवतेनेत्थं तदभिप्रायोऽवगम्यते स्वरांतस्वराद्युपसर्गा एव सर्वेप्रपरेत्याद्याः तन्मध्येप्रोपेत्युपसर्गाभ्यां परस्यैव युजेरात्मनेपादित्वं नियतम इतरोपसर्गात्परस्ययुजे स्त्वात्मनेपदित्वमानियतामिति ॥ एवं युजेः स्वरांतोपसर्गसंयुक्तस्वेऽपि परस्मैपादित्वमेवेतिध्येयम् ॥ अत एवैतत्सूत्रव्याख्यानावसरेकाणिभाणितभाष्ये स्वराद्युपसृष्टाच्चेति वक्तव्यमित्युक्त्वा स्वरांतोपसृष्टाच्चेत्यपरइत्युक्तं॥तत्र स्वराद्युपसृष्टयुजेरात्मनेपादित्वं नियतामिति स्वाभिप्रायः॥अपर इत्युक्त्या च स्वरांतोपसर्गसंयुक्तयुजेरपि आत्मनेपदित्वं नियतामिति यत्कात्ययनेनोक्तं तदनित्यमित्यस्वरससूचनादिति न किंचिदत्रानुपपन्नमित्यालोचनीयम् व्याकरणशौंडैरिति ॥ ॥ ननु गीतानुसारेण निष्ठाद्विविधेति व्याख्यातव्ये द्विविधा अपि जनाः संतीति जनानां द्वैविध्यं कुतो व्याख्यायत इत्यत आह ॥ **निष्ठा द्विविधेति** ॥ गीतानुसारेण निष्ठाद्वैविध्यस्यैव व्याख्याने एकस्यैव पुरुषस्य गृहस्थाद्याश्रमस्वीकारेण तद्विहितधर्मैर्ज्ञानं निष्ठाऽनंतरं यत्याश्रमस्वीकारेण पुनसदुक्तधर्मैर्ज्ञानसाधनस्य संभवात् कैश्चिदाधिकारिकपुरुषविशेषैरेव गृहस्थाश्रममपरित्यज्यैव तद्विहितकर्माणि निष्कामतयाऽनुष्ठेयानीत्येवंरूप उक्ताभिप्रायः श्लोकान्न लभ्यत इति तदर्थं जनानां द्वैविध्यं व्याख्यात मित्यर्थः ॥ **न केवलमिति** ॥ ज्ञाननिष्ठाः सांख्यरूपा एवेति एकविधा न किं तु योगिनोऽपीत्यपेरर्थ इत्यर्थः

निष्ठा द्विविधेति व्याख्याने क्रमेणैकस्यैवपुरुषस्य तत्संभवान्नोक्ताभिप्रायो लभ्यत इत्येवं व्याख्यातम् न केवलमेकविधाःसांख्या एवेत्यपेरर्थः॥

गृहस्थादि कर्मत्यागेन ज्ञाननिष्ठाः सनकादिवत् ॥ तस्था एव ज्ञाननिष्ठाश्च जनकादिवत् ॥

द्वैविध्यमेव सोदाहरणमाह ॥गृहस्थादीति ॥ यत्याश्रमपरिग्रहेणेत्यपि ग्राह्यम् ॥ ज्ञाननिष्ठाः ॥ यत्याश्रमविहितैरेव कर्मभिर्ज्ञानसाधनैर्युक्ताः

॥ क० ॥ **क्रमेणैकस्यैवेति॥** एकस्यैवपुरुषस्य गृहस्थाद्याश्रमविहितकर्मानुष्ठानानंतरं यत्याश्रमस्वीकारेण निष्ठाद्वैविध्योपपत्तौ गृहस्थादिकर्मत्यागेनेति तत्स्था एवेतिस्वोक्ताभिप्रायोन लभ्यत **इत्यर्थः** एकविधाः के इत्यतस्तानशृंगग्राहिकया दर्शययति ॥ **सांख्याइति** ॥ सर्वकर्मत्यागे ज्ञानमेव न स्यात ॥ कर्मणः ज्ञानसाधनत्वादित्यत आह ॥ **यत्याश्रमपरिग्रहेणेति** ॥ योगिनामपि ज्ञाननिष्ठात्वात्तत्प्रतीतिं निरस्यति ॥ **यत्याश्रमविहितैरिति** ॥ यद्वा गृहस्थादिकर्मत्याग यत्याश्रमपरिग्रहाभ्यां कथं ज्ञाननिष्ठत्वं ज्ञानसाधनकर्माभावादित्यत आह ॥ **यत्याश्रमविहितैरेवेति** ॥

१ स्वरूपेणस्थितिः नितरां संसारगति निवृत्तिर्वा द्विप्रकारसाधनसाध्या॥

॥ श्री० ॥ ननु तत्र तस्यैव समभ्यंतात षष्ठ्यंतात्त्वतिः स्यादित्यर्थे सतिप्राकारोमथुरावत ॥ मथुरायामिवेत्यर्थः ॥ चैत्रस्यगावश्चैत्रवत ॥ चैत्रस्येवेत्यर्थः ॥ एवंचानेन सूत्रेण सनकदिवदित्यादौ यदिवतिरंगीक्रियते तर्हि सनकादाविव सनकादेरिवेत्यर्थप्राप्त्याऽसंगत्यापत्तेरतः कथमनेन सूत्रेणावेत्यर्थवतिरित्यत आह ॥ **सनकादिभिस्तुल्यमिति** ॥ नात्र तत्र तस्येति सूत्रेणवार्थे ॥ वतिर्व्याख्यायते किं नामतेन तुल्यं क्रियाचेद्वतिरिति सूत्रेणक्रियातौल्ये एव ॥ सूत्रार्थस्तु तृतीयांताद्वतिः स्यात्तौल्यार्थे यत्तौल्यं साक्रिया चेत्क्रियया तौल्यं विवक्षितं चेत् ब्राह्मणो द्रोणः क्षत्रियवत ब्राह्मणस्यद्रोणस्य क्षत्रियेण क्रियातौल्यमस्तीतितदर्थे विवक्षिते सति तृतीयांतक्षत्रियशब्दाद्वतिर्जातः ॥ क्रियातौल्ये किम् गुणतौल्ये माभूत् ॥ स्थूलः कश्चित ॥ पुत्रेण तुल्यः ॥ अत्रकस्यचित्त पुत्रेणस्थूलत्वरूपगुणेनैवतौल्यं विवक्षितं न क्रिययेति पुत्रवदिति न जातं किं तु पुत्रेण तुल्य इत्येव.॥ एवं च प्रकृते जनानां सनकादिभिः क्रियातौल्यस्य विवक्षितत्वात्तेन तुल्यमितिसूत्रेण वतिरंगीक्रियत इत्यर्थः ॥ इममेव वत्यर्थं जनकादिवदित्यत्राप्यतिदिशति ॥ **एवमिति** ॥ ज्ञानमार्गस्य मुक्तिसाधनीभूतधर्मत्वान्मद्धर्मत्वमित्याशयेनमद्धर्मेपदार्थ उक्तो ॥ **ज्ञानमार्गेति** ॥ उत्तरमिति ॥

सनकादिभिस्तुल्यंवर्तंत इति सनकादिवत् ॥ एवं जनकादिवदित्यपि ॥ तत्स्था एवगृहस्थाद्याश्रमस्था एवतद्धर्मैर्युद्धादिभिर्ज्ञानसाधनैर्युक्ताःद्विविधा अपि जनाः संतीत्युक्ते कर्ममार्गस्था ज्ञानमार्गस्थाश्चेति द्वैविध्यं प्रतीयते ॥ तन्निवृत्त्यर्थमाह ॥ मद्धर्मेति ॥ ज्ञानमार्गस्था एव

मद्धर्मस्था एवेत्यर्थः

ततश्च मद्धर्मस्था एव जनाद्विविधा अपि संतीत्यन्वयः ॥ तत्कथमित्याकांक्षायामुत्तरं वाक्यद्वयम्

॥ कृ० ॥ तत्र तस्यैवेति सूत्रेण षष्ठ्यंतात्सप्तम्यंताद्विवार्थेवतिरित्यंगीकारे ज्ञाननिष्ठा इति प्रथमाविभक्त्यनन्वय इत्याशंक्य तेनतुल्यंक्रियाचेद्वतिरित्यनेनात्रवतिरित्याशयेनाह ॥ ॥ **सनकादिभिरिति** ॥ **उत्तरंवाक्यद्वयमिति**॥

श्री॥०॥गृहस्थादीति तस्था एवेति च वाक्यद्वयमित्यर्थः॥ यद्यपि मद्धर्मस्था इत्येतद्वाक्यापेक्षयाऽनयोर्वाक्ययोः पूर्वत्वमेव नोत्तरत्वं तथाऽपि मद्धर्मस्था इत्यस्य द्विविधा अपीति पूर्वेणान्वयमत्यनयोरुत्तरत्वमेवेति द्रष्टव्यम्॥ अन्यथाप्रतीतीति॥ कापिलपातंजलशास्त्रपरतया प्रतीतिरित्यर्थः॥ **तत्र भवा इति**॥ स्थिता असक्ता इत्यर्थः॥ तथा च संख्याशब्दात् तत्र भव इति सूत्रेण भवार्थे तद्धिताणप्रत्यये अचोञ्णितीति णित्वाद्वृद्धौ सांख्या अ इति जाते भसंज्ञकस्य आकारस्य यस्येति चेति सूत्रेण लोपे सांख्य् अ सांख्येति प्रातिपदिकनिष्पत्तिर्द्रष्टव्या॥ ॥**ज्ञाननिष्ठाः**॥ ततश्च तेऽपि सांख्या एवेति भावः॥ तत्कथमिति॥ तथा च जनकादीनामपि सांख्यशब्देनैव गृहीतत्वात् योगिन इति पृथक् तद्ग्रहणमयुक्तमिति भावः॥**ज्ञाननिष्ठा अपीति**॥ तथा च ज्ञाननिष्ठा अपि सांख्यरूपा अपि आधिकारिकत्वादित्युक्तप्रकारेण ये कर्मयोग्यास्ते योगिनोऽपि भवंतीति ज्ञापनाय योगिन इति पृथग्ग्रहणमिति भाष्यार्थः॥ **मुक्तीति**॥ अत्रोक्तसांख्ययोगानुष्ठानेनेति शेषः॥ न हि प्रसिद्धकापिलपातंजलशास्त्रोक्तानुष्ठानवतां मुक्तिरस्तीति भावः॥ **आहेति**॥ लोकेऽस्मिन् द्विविधा निष्ठेत्यत्रत्यनिष्ठाशब्दार्थमाहेत्यर्थः॥

सांख्यानां योगिनामिति पदद्वयमन्यथाप्रतीतिनिरासायव्याचष्टे ॥ सांख्यानामिति ॥ सम्यक् ख्यातिर्ज्ञानं संख्या तत्रभवाः सांख्याः ॥ तेषां ज्ञानिनां ज्ञाननिष्ठानामित्यर्थः ॥ननु जनकादयोऽपि ज्ञाननिष्ठास्तत्कथं योगिन इत्यत आह ॥ ज्ञाननिष्ठाअपीति ॥ कर्मयोग्याः गृहस्थादिकर्मयोग्याः ॥ सांख्ययोगशब्दौप्रसिद्धार्थौ किं न स्यातामित्यतो मुक्तिवचनादिति भावेनाह ॥ निष्ठेति ॥

सांख्यानांज्ञानिनां सनकादीनाम् ॥ योगिनामुपार्थानां जनकादीनाम् ॥ ज्ञाननिष्ठा अप्याधिकारिकत्वादीश्वरेच्छया लोकसंग्रहार्थत्वाच्च ये कर्मयोग्या भवंति तेऽपि योगिनः ॥ निष्ठा स्थितिः॥

॥क०॥द्विविधा अपि जनाः संतीति वाक्यात् उत्तर भाष्यवाक्यद्वयमित्यर्थः॥अन्यथाप्रतीतीति॥ कापिलपातंजलार्थत्वप्रतीतीत्यर्थः॥ **सम्यक्ख्यातिरिति**॥ समीचक्षिङश्चक्षिङः ख्याञ् इति ख्यादेशे आतश्चोपसर्गे इत्यङ्प्रत्यये संख्येति रूपसिद्धिरिति भावः॥ तत्र भवा इति॥ तत्र भव इति सूत्रेण भवार्थेऽण्प्रत्यये आदिवृद्धौ यस्येति चेत्याकारलोपे च रूपसिद्धिरिति भावः॥

॥ १ क्षीरे स्वल्पनीरनिक्षेपेऽपि क्षीरव्यवहारवत् सांख्या योगिन इति प्राचुर्याभिप्रायेण पृथगुक्तिरिति ग श्रीपादाः॥

॥ श्री०॥ स्थितिः कथं मुक्तिरित्यत आह ॥ स्वरूपेणेति ॥ मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति वचनात् स्वरूपेण व्यवस्थितिरेव मुक्तिरिति भावः ॥ अत्र ॥ अस्मिन् श्लोके ॥ जनकादय एव तादृशाः संतीति चेत्तत्राह ॥ जनकादयस्त्विति ॥ विनिवेशितः॥ स्थापितः ॥ अनेनेति ॥ ईश्वरेच्छयेति पंचमस्कंधभागवतवाक्येनेत्यर्थः ॥ ३ ॥

स्थितिः स्वरूपेणेति शेषः अस्त्वेवं श्लोकार्थस्तथाप्यधिकारिकत्वादित्यादिकम् ॥ अत्र न श्रूयत इत्यतोऽ ध्याहृत्याह ॥ त्वं त्विति ॥ सकर्मा गृहस्थादिकर्मवान् ॥ भवेदिदंव्याख्यानंयदि ते जनाः प्रमिताः स्युर्येषाम् ॥ ज्ञाननिष्ठानामपि गृहस्थादिकर्मस्वेवाधिकारो न यत्याश्रमकर्मसु ॥ जनकादयस्तु यत्याश्रमं नानुष्ठितवंत इत्येव प्रमितम् ॥ न तु तत्रानाधिकार इति तत्राह ॥ संति हीति ॥ विनि

त्वं तु जनकादिवत्सकर्मैव ज्ञानयोग्यः ॥ न तु सनकादिवत्त्यागेनेत्यर्थः ॥ संति हीश्वरेच्छयैव कर्मकृतः प्रियव्रतादयोऽ पि ज्ञानिन एव तथा ह्युक्तम्॥ईश्वरेच्छया विनिवेशितकर्माधिकार इति॥ ३ ॥

वेशितः कर्माधिकारो गृहस्थकर्माधिकारो यस्मिन्स तथोक्तः ॥ प्रियव्रतो ही यत्याश्रमं स्वीचिकीर्षुराधिकारिकत्वयुक्तया हिरण्यगर्भेण निवारित इत्यनेनोच्यते ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ०॥ स्थितिमात्रकथनान्मुक्तिवचनमेतत्कथमित्यत आह ॥स्वरूपेणेति शेषइति॥ मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिरित्युक्तेरिति भावः॥ननूदाहृतपंचमस्कंधवाक्यात्प्रियव्रतस्य गृहस्थकर्माधिकारमात्रं प्रतीयते न तु यतिकर्मानधिकार इत्यत आह ॥ प्रियव्रतोहीति ॥ निवारित इत्यतः परं गृहस्थकर्मपृथ्वीपालनं चकारेतिपूरणीयम् ॥ तेन हिरण्यगर्भकृत निवारणस्य किंचिद्व्यवहितवाक्यस्थत्वात्कथमेतदिति निरस्तम ॥ अनेनेति ॥ पंचमस्कंधाद्याध्यायस्थेनोदाहृतवाक्यपूर्वोत्तरप्रबंधेनेत्यर्थः ॥ तेनोदाहृतवाक्ये त्येवमात्रोक्तावपि न दोषः ॥३

१ भा. स्कं. ५ अ. १ श्लो. २३

॥श्री०॥ **कर्मसाध्यत्वमिति** ॥कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुत इत्युक्त्या कर्मणामारंभादेव नैष्कर्म्यं लक्षणमोक्षप्राप्तिरिति कर्मसाध्यत्वमुच्यत इत्यर्थः ॥ **प्रागिति** ॥युद्धादीनि कर्माणि न करिष्यामीत्याशयेन कृतस्य तर्हि कर्मणीत्यर्जुनस्याश्रयेति शेषः ॥ इत्युक्तम् ॥ इ पुनरमुक्तम ॥ **व्याचष्ट इति** ॥ अकरणे प्रत्यवायः स्यादित्यभिप्रेत्येत्यर्थः ॥ युद्धादिकर्माणि न कार्याणीति वदन् ॥ **तत्प्रतिबंधकानि**॥मोक्षप्रतिबंधकानि इति मत्वा कर्माणि त्यज्यंत॥इत्यन्वयः॥**नैष्कर्म्यशब्दवाच्यत्वमात्रमिति** ॥ कर्माभावो निष्कर्म तन्यतया तत्संबंधि नैष्कर्म्यमित्येवं मोक्षस्य नैष्कर्म्यशब्दवाच्यत्वान्यथानुपपत्तिरूपप्रमाणमाश्रित्य कर्माकरणमेव मोक्षसाधनमित्युच्यत इत्यर्थः॥बीजाभावादिति वक्ष्यमाणयुक्तिव्यावृत्त्यर्थं मात्रमित्युक्तम॥ **क्रिया** ॥

न कर्मणामिति मोक्षस्य कर्मसाध्यत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ इतश्चेति ॥ स्ववर्णाश्रमोचिते युद्धादाविति शेषः ॥ प्रागाधिकारिकत्वात्त्वया कर्म कर्तव्यमित्युक्तम् ॥ इदानीं कोऽपरो हेतुरुच्यत इत्यतो व्याचष्टे ॥ कर्मणामिति ॥ अयमभिप्रायः ॥ कर्माणि न कार्याणीति वदन्प्रष्टव्यः ॥ किं ज्ञानं न मोक्षसाधनम् ॥ अपि तु कर्माकरणमेवेति मत्वा कर्माणि त्यज्यंते ॥उत ज्ञानं मोक्षसाधनं भवत्येव

इतश्च नियोक्ष्यामीत्याह॥न कर्मणामिति॥कर्मणां युद्धादीनामनारंभेण नैष्कर्म्यं निष्कर्मतां काम्यक

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोऽश्नुते ॥ नचसंन्यसनादेवसिद्धिंसमधिगच्छति ॥ ४ ॥

॥ र्मपरित्यागेन प्राप्यत इति मोक्षं नाश्नुते ॥

किं तु कर्मणा बध्यते जंतुरित्यादेः ॥ कर्माणि तत्प्रतिबंधकानीति मत्वा ॥ आद्येऽपि किं मोक्षस्य नैष्कर्म्यशब्दवाच्यत्वमात्रमाश्रित्ये दमुच्यते ॥ अथ वा क्रिया ॥ ॥ ॥ ॥ ॥

॥कृ० ॥ नन्वेवमपि कर्मकर्तव्यमित्यत्रहेत्वलाभ इत्यत आह॥**अयमभिप्राय इति** ॥कर्माकरणे साधकाभाव एव कर्मकर्तव्यत्वे हेतुः स च न कर्मणामित्यारभ्य सहयज्ञा इत्यतः प्राक्तनेनोच्यत इति भावः॥**नैष्कर्म्यशब्देति**॥कर्माभावे निष्कर्म अर्थाभावे यदव्ययमित्यव्ययीभावः॥नपुंसकादन्यतरस्यामिति टच् ॥तज्जन्यं नैष्कर्म्यं विचित्रात्तद्धितगतिरितिवचनाज्जन्यत्वाथ ष्यञ् ॥

॥श्री०॥यागादिरूपा॥कारकम्॥आत्मादि॥फलम्॥स्वर्गादि॥अकरणे॥कर्माकरणे॥बीजाभावात्॥संसारबीजस्य कर्मणोऽभावात्॥इतियुक्तियोगेति॥ [illegible] कर्माकरणसाध्य [illegible]
राभावरूपत्वात॥यद्यज्जन्याभावरूपं तत्तदभावसाध्यं यथा दुःखाभावः सुखमिति मते सुखं पापजन्यदुःखाभावरूपमिति पापाभावसाध्यमित्यनुम [illegible] ॥अन्यथा [illegible]॥
काम्यकर्मपरित्यागेन प्राप्यत इति नैष्कर्म्यशब्दवाच्यत्वस्यान्यथानुपपत्याऽर्थापत्तिरुक्तेत्याशयः ॥ भाष्ये काम्यकर्मपरित्यागेन प्राप्यत इति [illegible]
क्तम् ॥ ज्ञानमेवेतिवाक्येनेत्युक्तम ॥ अन्यार्थतां ॥ काम्यकर्मसाध्यताम ॥ अस्य ॥ पुरुषत्वस्य ॥ व्याचष्ट इति ॥ यदा पुरुषत्वं प्राप्तं तदा कर्माकरणेन नास्तीत्याशयेन [illegible]
त्यर्थः ॥ संभवार्थं ॥ पुरुषत्वस्योपपत्त्यर्थं ॥ जीवः कर्माकरणेन नाश्नते पुरुषत्वादित्युक्ते प्रलयकालीने जीवे स्थूलशरीरयुक्तत्वाभावेन पुरुषत्वस्य स्वरूपासिद्धत्वात्तदाकर्माकरणान मु
क्तिः संभवतीत्याशंकापरिहारायेति वाक्यशेषः ॥ पूर्वोत्तराभ्यां ॥ मुक्तिस्थावरपदाभ्याम ॥ ननु पश्वादिजंगमदेहप्राप्तौ परामिमतकर्माकरणरूपमुक्ति साधनसंभवात् किं विशेष्यामिधी
यते स्थावराणामितीत्यत आह ॥ स्थावराणामितीति ॥ अनधिकृतेति ॥ कर्मकरणे येषामधिकारो नास्ति तेऽनधिकृतास्तदुपलक्षणं स्थावरपदमित्यर्थः ॥

कारकफलरूपस्य संसारस्य कर्मैव बीजम् ॥ अकरणे च बीजाभावात्संसारो न भविष्यतीति युक्तिमाश्रित्य ॥ आद्यस्येदं दूषणम् ॥ न कर्मणामिति ॥ नैष्कर्म्यशब्दस्यान्यथापि व्याख्यानान्नायं इत्यर्थः ॥ ततः किमित्यत आह ॥ ज्ञानमेवेति॥उक्तमाक्षिप्यसमाधत्ते॥कुत इति ॥ नैष्कर्म्यशब्दस्यान्यार्थतामंगीकृत्य कर्माकरणस्य मोक्षसाधनत्वनिराकरणे को हेतुरित्यर्थः ॥ कथमस्य हेतुत्वमित्यतो व्याचष्टे ॥ सर्वदेति ॥

ज्ञानमेव तत्साधनं न तु कर्माकरणमित्यर्थः ॥ कुतः ॥ पुरुषत्वात् ॥ सर्वदा स्थूलेन सूक्ष्मेण वा पूरेण
॥ युक्तो ननु जीवः ॥ यदि कर्माकरणेन मुक्तिः स्यात् स्थावराणाम् ॥

प्रलयेऽपि संभवार्थस्थूलेन सूक्ष्मेण वेत्युक्तम् ॥ तथाऽपि कथंहेतुत्वमित्यत आह ॥ यदीति ॥ स्यादित्यस्य पूर्वोत्तराभ्यां संबंधः ॥ स्थावराणामित्यनाधिकृतोपलक्षणम् ॥ ॥ ॥

॥ कृ० ॥ ततश्च नैष्कर्म्यशब्दादुक्तार्थलाभ इति भावः ॥ ननु कर्माकरणं मोक्षसाधनं न भवति ॥ तथासति सर्वेषामपि स्थावरदेहप्राप्तौ तत्र कर्माकरणसंभवेन मोक्षप्रसंगादिति
ह्यत्राभिप्रेतम् ॥ न च सर्वेषामपि स्थावरदेहो भवत्येव येनाग्निश्रायकभावात् ॥ तस्मादुक्तापादनमयुक्तमित्यत आह ॥ स्थावराणामितीति ॥ उपलक्षणतावच्छेदकसूचना
यानधिकृतेत्युक्तम् ॥ अनधिकृतदेहेषु स्थावरदेहस्य प्राधान्यादुपलक्षकतदुक्तिर्युक्तेति भावः॥

॥ श्री० ॥ अनधिकृतदेहेषु स्थावरदेहस्य प्राधान्यादुपलक्षकतया तद्ग्रहणमिति द्रष्टव्यम् ॥ अनाधिकृतदेहस्येति ॥ कर्मानधिकृतदेहस्येत्यर्थः ॥ ततश्च कर्माकरणस्य प्राप्तत्वात्तदामुक्तिप्रसंग इति भावः ॥ पुरुषत्वम् ॥ देहयुक्तत्वम् ॥ प्रथमपक्षवदत्रापि नैष्कर्म्यशब्दोऽन्यथानुपपत्तिरूपपरोक्षप्रमाणानुवाद इति प्रतीति वारयितुमाह ॥ अत्रेति ॥ मुक्तिनामैवेति ॥ मुक्तौ रूढ एव न तु पूर्ववद्यौगिको विवक्षितइत्यर्थः ॥योगलक्षणनैष्कर्म्यशब्दवाच्यत्वान्यथानुपपत्तिरूपप्रमाणस्यान्यथाप्युपपत्त्या निराकृतत्वेन द्वितीयपक्षे उपयोगाभावादिति भावः लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इतिसूत्रोक्तवीप्सायामयं प्रतिरित्याशयेनाह ॥ जन्मनिजन्मनीति ॥ पुरुषत्वेन ॥ देहयुक्तत्वेन ॥

ततश्चानादौ संसारेऽनधिकृतदेहस्य संभवेन मुक्तिप्रसंगादधुनापि दृश्यमानस्य पुरुषत्वं न स्यादिति भावः। द्वितीयनिरासेऽप्यस्यैवार्थस्य तात्पर्यमाह॥नचेति ॥कर्माभावात ॥ संसारबीजाभावात्॥अत्र नैष्कर्म्यमिति मुक्तिनामैव न तु परप्रमाणानुवादः ॥ कुतो न भवतीत्यतोऽत्रापि पुरुषत्वादिति हेतुमभिप्रेत्याह ॥ प्रतीति ॥ जन्मनिजन्मनि कृतानामित्यर्थः ॥ पुरुषत्वेनानादौ संसारेऽधिकृतानंतजन्मसंभवात्तत्रकृतानामनं

न चाकरणे कर्माभावान्मुक्तिर्भवति प्रतिजन्मकृतानामनंतकर्मणां भावात् ॥ न च सर्वाणि ॥ भुक्तानि एकस्मिंच्छरीरे बहूनि हि कर्माणि करोति ॥

तकर्मणां भावात्किमद्याकरणमात्रेण भवतीत्यर्थः ॥ ननु पूर्वपूर्वशरीरकृतानि कर्माण्युत्तरोत्तरशरीरे भुक्तानि तत्कुतोऽनंतकर्मणां भावइत्यत आह ॥ नचेति ॥ कुतो नेत्यत आह ॥ एकस्मिन्निति ॥ ॥ कृ० ॥ कर्माणितत्प्रतिबंधकानीति विकल्पितपक्षाद्भेदप्रदर्शनाय व्याचष्ट ॥ संसारबीजाभावादिति ॥ नैष्कर्म्यशब्दस्य पूर्ववद्यौगिकत्वे वैयर्थ्यप्रसंगादाह ॥ अत्र नैष्कर्म्यमितीति ॥ ननु प्रतिजन्मेत्ययंशब्दो जन्मनिजन्मनीति वीप्सायामव्ययीभावः ॥ तस्यच भावादित्यनेनान्वयः ॥ वैयर्थ्यात् ॥ अद्यकर्माकरणमात्रेण मोक्षो न भवति ॥ अनंतकर्मणां भावादित्युक्ते विवक्षितं न न तत्र प्रतिजन्मेति विशेषणप्रयोजनमस्तीत्याशंक्य प्रतिजन्मेत्यस्य कृतानामित्यनेनान्वयः तत्रचकर्मानंत्यसंभावनार्थविशेषणं सार्थकमेवेति भावेन व्याचष्टे ॥जन्मनिजन्मनीति ॥

॥ श्री० ॥ हेताविति ॥ यस्माद्बहुभिर्जन्मभिः कर्माणि कर्मीणि तस्मात्सर्वाणि कर्माणि न भुक्तानीतिस्वादिलेख्यं तानि च कानि चिदिति ॥ तथा अयं प्रस्तावः चिदिति यावत् ॥ तानि च कानिचिद्बहुजन्मफलानीत्युक्तया पूर्णे एकैकानीति व्यर्थमित्यत एकैकानीत्यस्य तात्पर्यमाह ॥ प्रत्येकमिति ॥ तेषां मध्ये कानिचित् कर्माणि स्वतः प्रत्येक बहुजन्मफलानि सन्तीत्यर्थः ॥ तथाविधानि ॥ प्रत्येक बहुजन्मसाधनान्यपि ॥ ननु भुंजानत्वे ॥ भुजपालनाभ्यवहारयोरिति धातोः पालनापरपर्यायावनविवक्षायाः अभ्यवहार विवक्षित आत्मनेपदं स्यात् पालनार्थतायां तु परस्मैपदमेव ॥ प्रकृते च पालनार्थत्वाभावादभ्यवहारार्थमेव तथा च भुज अस्मादात्मनेपदिनि लटः शानचादेशे शकारचकारयोर्लोपे भुज् आन इति जाते रुधादिभ्यः श्नम् ॥ रुधादिभ्योधातुभ्य आत्मनेपदिनि श्नम् स्यादित्यनेनास्यापि रुधादिगणांतर्गतत्वात् श्नमि शकारमकारयोर्लोपे मित्वादन्त्यादचःपरं जाते भुनजान इति जाते नश्चापदांतस्य झलीति नकारस्य अनुस्वारे जाते भुञ्जान इति भवेत् भुञ्जन्निति तु कथं तथात्वे परस्मैपदित्वापत्तेः ॥ तथा हि ॥ भुज अस्मात्परस्मैपदिनि शत्रादेशे शकारऋ वर्णयोर्लोपे भुज् अत् इति जाते श्नमि नकारस्यानुस्वारे च भुंजदिति जाते उगिदचां सर्वनामस्थानेऽधातोरिति शतृप्रत्ययांतर्गतऋवर्णस्योत्केन शतृप्रत्ययस्योगित्वानुमागमेन नकारे भुंजन् त् इति जाते संयोगांतस्य लोप इति तकारलोपे भुंजन्निति भवति अतः कथमेतदित्यतोव्यत्ययोबहुलमित्यात्मनेपदिनोपि धातोर्व्यत्ययेन परस्मैपदित्वमाश्रित्य भाष्यकारैर्भुंजन्निति प्रयुक्तमित्याशयेन शानजंतमेव प्रतिपदमाह ॥ भुंजान इति ॥ कर्मशेषेणेति ॥

हिशब्दो हेतौ॥बहून्यपि भुज्यतां को दोष इत्यत आह॥तानि च॥कानि चि दितिसंबंधः एकैकानीति प्रत्येकमित्यर्थः ॥ननुतथाविधान्यप्यनधिकृत

तानि चैकैकानि बहुजन्मफलानि कानिचित् तत्र चैकैकानि कर्माणि भुंजन्प्राप्नोत्येव शेषेण मानुष्यम्

जन्मभिर्भुक्तानीत्यत आह॥तत्र चेति॥तेषु कर्मसु भुंजन्भुंजानः॥शेषेणकर्मशेषेण॥श्री०॥ननु पिपीलिकत्वादीनि क्षुद्रपापार्जितानि च मानुष्यतुदुःखित्वं क्षुद्रपापफलत्वमित्याद्युक्तेः पिपीलिकात्वादीनां स्वल्पफलत्वात्कथं तानिचेत्यनेनबहुजन्मफलत्वमुक्तमित्यत आह ॥ तानि च कानिचिदितीति॥तेषां मध्ये कानिचिदित्यर्थः ॥ नन्वेकशब्दो नित्यैकवचनांतः एकत्वसंख्यावाचित्वेन प्रातिपदिकार्थस्यैकत्वात् ॥ तस्य च द्विर्वचने एकैकमिति स्यात् ॥ न तु द्विर्वचनांतरं बहूनां भावाद्बहुवचनं ॥ बहूनां भावेपि बहुत्वसंख्याया अभावात् ॥ अंतरंगभूतप्रत्येकनिष्ठैकत्वसंख्याभावेन प्रतिबंधात् ॥ अत एव वृक्षं वृक्षं सिंचतीत्यादौ प्रत्येकं सिंचनसंबंधप्रतीतिः तस्मादेकैकानीति बहुवचनमयुक्तमित्याशंक्यच्छांदसं प्रथमैकवचनस्य बहुवचनमिति भावेन तदर्थमाह ॥ प्रत्येकमित्यर्थ इति ॥ ननु भुंजानसन इति पालनभिन्नार्थभुजेरात्मनेपदविधानाद्भुंजान इति शानजंतेन भाष्यम् ॥ कथं भुजन्निति शतंततेत्यत आह ॥ भुंजान इति ॥ ॥ ॥ ॥

१ अंइति अचउत्तरंभाममानवर्णेपठाक्षितेऽनुस्वारे

॥ श्री० ॥ यथोक्तम ॥ कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यामिति ॥ ननु मानुष्यप्राप्तौ तत्र कर्माकरण संभवान्मुक्तस्तु प्राप्तिरित्यत आह ॥ मानुष्ये चेति ॥ ततश्चेत्यस्य भाष्यस्य ततश्च मानुष्यदेहप्राप्त्यनंतरं पुनर्बहुशरीरफलकर्माणि करोतीत्यसमाप्तिरित्यर्थो द्रष्टव्यः ॥ इदमुक्तम् ॥ एकस्मिन् शरीर इत्यादिकम ॥ चतुर्दशाद्दिनादित्यन्यथाप्रतीतेराह ॥ वर्षादिति ॥ दशक इति ॥ दशैव दशकः स्वार्थे कः दशसंख्याकं देहमित्यर्थः ॥ यद्यपि दशदेहापेक्षयाऽप्यधिकदेहसंपादकं कर्म करोति तथापि नीचपक्षे दशमानुषदेहापादककर्म संपादयति न तदपेक्षया न्यूनमिति भावः ॥ इदं तु ऋषिपुत्रतरुण्यादिविषयं मंतव्यम् ॥ ननु चतुर्दशोर्ध्वजीवीनीत्यस्य नपुंसकलिंगबहुवचनांतस्य कथं स्त्रीविशेषणत्वमित्यत उक्तम् ॥ ह्रस्वदीर्घव्यत्ययेनेति ॥ नीत्यत्रत्यस्य ह्रस्वस्य पूर्वत्र वीत्यत्रत्यस्य दीर्घस्य चोत्तरत्र संबंधे सति जीविनीति स्त्रीविशेषणत्वं युक्तमिति भावः ॥ भाष्ये मानुषं देहमार्जते ॥ मानुषदेहापादकं कर्म संपादयतीत्यर्थः ॥ तथा च कर्मणामनंतत्वं प्राप्तमिति भावः ॥ कुत इत्यत उक्तम ॥ संसारेति उपपादनमिति ॥ संसारस्य सादित्वे तन्मूलकर्मणामपि सादित्वे नाल्पतापत्त्या भोगेन समाप्तिः स्यान्न चैवं संसारस्यानादित्वात् तथा च तन्मूलकर्मणामनादित्वेनानंतत्वमंगीकार्यं ततश्च भोगेनासमाप्तिरित्युपपादनं द्रष्टव्यम् ॥ सोऽसिद्ध इति ॥

मानुष्ये चाकरणमसंभावितमित्याह ॥ ततश्चेति ॥ असमाप्तिर्भोगेन कर्मणामिति शेषः ॥ संभावनामात्रेणेदमुक्तं न तु प्रमितमित्यत आह ॥ तच्चोक्तमिति ॥ चतुर्दशवर्षात् ॥ अनूनो दशको यस्येति विग्रहः ॥ ह्रस्वदीर्घव्यत्ययेन चतुर्दशोर्ध्वजीविनीति स्त्रिया विशेषणम् ॥ संसारश्चेति

ततश्च बहुशरीरफलकर्माणीत्यसमाप्तिः ॥ तच्चोक्तम् ॥ जीवेंश्चतुर्दशादूर्ध्वं पुरुषो नियमेन तु ॥ स्त्री वाप्यनूनदशकं देहं मानुषमार्जते ॥ चतुर्दशोर्ध्वजीवीनि संसारश्चादिवर्जितः ॥ अतोऽवित्वा परं देवं मोक्षाशा का महामुने इति ब्राह्मे ॥ यदि सादिः स्यात्संसारः पूर्वकर्माभावादतत्प्राप्तिः ॥

कर्मणामनंतत्वोपपादनम् ॥ अतो भोगेन क्षयासंभवात् ॥ अवित्वा ॥ अविदित्वा पुरुषशब्देनानादिदेह संबंध उक्तः सोऽसिद्ध इत्यत आह ॥ यदीति ॥

॥ कृ० ॥ दिवसादिति विशेष्ये उक्ते आचतुर्दशमाद्वर्षादितिमानांतरविरोध इत्यत आह ॥ वर्षादिति ॥ ननु दशानां संघो दशकः ॥ तस्यानूनशब्देन कर्मभागे दशतोऽप्यधिकदेहप्रापककर्म प्रतिपादकपुराणादिविरोध इत्यत आह ॥ अनून इति ॥ ज्ञानार्थस्य विदेः सेट्कत्वादाह ॥ अविदित्वेति पुरुषशब्देनेति ॥ सर्वदा स्थूलेनेत्यादिभाष्येण ॥ पुरुषशब्दार्थोक्तेरिति भावः ॥

१ अ० ३ पा १ अ० ८ सू० १ कृतस्य कर्मणोऽत्यये स्वर्गादिभोगेन क्षयेऽनुशयवान् भुक्तकर्मशेषवानायाति ॥ कुतः ततः शेषेणेमं लोकमायातीति भुक्तशेषानुशयवानिमां ॥ आप्य भुवं पुनरिति श्रुतिस्मृतिभ्यामिति तदर्थः ॥

॥ श्री० ॥ देहसंबंधे सत्यपि तत्रानादित्वमसिद्धमित्यर्थः ॥ संसारो देहसंबंधः ॥ पुरुषत्वम ॥ अनादिदेहसंबंधः ॥ अनंतकर्माणिबंधकानीति शेषः ॥ तथाऽपीत्यनंतरं तादृश कर्माणि संतीत्यिनावनेति शेषः ॥ बंधकानि ॥ इतरत्र जन्मांतराणि ॥ क्रियेरन ॥ अद्यतनेऽपि जन्मनीति शेषः ॥ यद्यनादृशान्यपिकर्माणि क्रियेते तर्हि प्रेक्षावत्वं व्याहन्येत ॥ तथा चैतज्जन्मनि बंधहेतुभूतकर्माकरणेन मुक्तिर्भवतीति भावः ॥ ननुप्राक्तनकर्मसदृशान्येव कर्माण्यद्यतने जन्मन्यपि कस्मान्न क्रियेत इत्यत आह ॥ न हीति ॥ अकामादिनेत्यत्रादिपदेन ज्ञानपरिकल्पनसंग्रहः ॥ प्रत्यवायस्येति ॥ कुर्वन्नेवेह कर्माणीति श्रुतौ कर्माकरणे प्रत्यवायश्रवणादितिभावः ॥ तच्चेतीति ॥ यस्तुकर्म फलत्यागीसत्यागीत्यभिधीयत इतित्यागमनुवदेति अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम ॥ भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचिदितिश्लोके कर्म कृत्वा कामनात्यागम कुर्वतां अनिष्टादिबंधम् का न तु संन्यासिनामिति फलकामनात्यागेनकर्म कृतामनिष्टादिबंधाभाव उक्तोऽष्टमाध्याय इत्यर्थः ॥ कर्मणामबंधकत्वमकामेनैव भवति न त्वकरणेन प्रत्यवायप्राप्तेरित्यभिहितं तत्र शंकां दूषणमनूद्य परिहरति ॥ सकारणत्वात् असदिति ॥ प्रतियोगिप्राधान्यविवक्षयाऽत्यंताभावप्रतियोगित्वस्यैवासच्छब्दार्थत्वादसदत्यंताभावप्रतियोगी त्यर्थः ॥ अत्यंताभावप्रतियोगिनश्चाकरणस्य न शशविषाणादिवत् प्रत्यवायजनकत्वं संभवतीति भावः तथा च करणस्य प्रत्यवायजनकत्वात्तस्यैवमुक्तिसाधनत्वमस्त्वित्याशयः कुत इत्यत आह ॥ कथमिति द्रव्यविषयं यदि ॥ असतोऽपि प्रत्यवायजनकत्वमित्येतत्संभवति ॥ न च श्रुतिविरोधः ॥ सत् द्रव्यं घटादि असतः सकाशात् कथं जायेतेति श्रुतेर्द्रव्यविषयत्वात् प्रकृते च तदर्थत्वा ॥ [illegible] तस्मादसतोऽप्यकरणात्जनिर्भवत्येवेत्यर्थः ॥

अतत्प्राप्तिराकस्मिकस्य संसारस्याप्राप्तिः स्यात् अतः पुरुषत्वं सिद्धमिति॥ननु संतु प्राग्भवीयान्यनंतकर्माणि तथाऽपि बंधकानि कथं प्रेक्षावता क्रियेरन्॥न ह्यनंतानि पापानि प्राक्तनानि संतीत्येतावताऽद्यक्रियेत इत्यत आह ॥ अबंधकत्वं त्विति ॥कर्मणां बंधाहेतुत्वं त्वकामनादिनैव

॥ अबंधकत्वं त्वकामेनैव भवति ॥ तच्च वक्ष्यते अनिष्टमिष्टमिति ॥

भवति॥ न त्वकरणेन प्रत्यवायस्यैव प्राप्तेरित्यर्थः ॥ अकामेनाबंधकत्वं भगवत्संमतमिति भावेनाह तच्चेति॥संकरस्त्वकरणमसत्त्व संतं प्रत्यवायं जनयति ॥ कथमसतः सज्जायेतेति श्रुतेरित्यवादीत ॥ तद्भास्करः प्रत्यपधीत द्रव्यविषयाश्रुतिः ॥ गुणस्त्वसतोऽपि जायत इति ॥

॥ कृ० ॥ आकस्मिकस्येति ॥ हेतुराभसंतत ॥ अकामादिनेति ॥ आदिपदादीश्वरार्पणादेर्ग्रहः ॥ अकरणमसदिति ॥ अत्यंतासदित्यर्थः ॥ द्रव्यविषयाश्रुतिरिति ॥ तत्तेजोऽसृजतेत्यादिवाक्यशेषतेजःप्रभृति द्रव्यसृष्टेरेवोक्तत्वादसतः सकाशात्सद्द्रव्यम ॥ कथं जायेतेत्येषपरा श्रुतिरित्यर्थः ॥

॥श्री०॥ ननु गुणस्त्वमतोपि जायतइत्येतत्कथम॥ तत्राप्यदर्शनात् इति चेत्सत्यं॥तथाऽपि वाक्यद्वयात्यथानुपपत्त्या कल्पनीयत्वात्॥ असतोकरणात्प्रत्यवायजानिस्तावत्प्रमिता॥कथममतःसज्जाय
तेति तद्विशेषश्च।अतस्तयोर्वाक्ययोर्विरोधशांत्यैश्रुतिद्वैयविषयत्वेन संकोचमुक्त्वा गुणस्त्वसतोऽपिजायत इत्यंगीकार्यमिति तदभिप्रायः ॥ स्थूलदृश्वानां ॥ सूक्ष्मदर्शिनौ नभवतः सुर्वाविति
यावत् ॥संकरं प्रत्याह॥नहीति ॥ शशविषाणवत्त्रकालिकनिषेधरूपात्यंताभावप्रतियोगित्वमित्यर्थः ॥ तथा न प्रतियोगिप्राधान्यं न विवक्षितमिति भावः ॥ कुतो नहीत्यत आह ॥ तथा स
तीति ॥ कर्माकरणस्यात्यंताभावप्रतियोगित्वरूपासत्वांगीकारे कर्मकरणमेव प्रसज्यते करणस्यैव अकरणात्यंताभावरूपत्वात् ॥ तथा चाकरण समाहित्युक्तया करणंलभ्यते ॥ ननु सं
तं प्रत्यवायं न जनयतीत्युक्तं स्यात् न चैतद्दूषणं संगच्छते ॥ न ह्यस्माभि करणस्य प्रत्यवायजनकत्वं प्रागुक्तं येन त्वदीयं दूषणं संगतं स्यात् ॥ न चैव किं त्वकरणस्यैवेति भावः ॥ अ
करणमसन्न चेत् किं रूपं तदिति ॥ किंन्विति ॥ उत्तरमाह ॥ अभाव इति ॥ तथा चाकरणमसदित्यस्याभावप्राधान्यविवक्षया करणप्रतियोगिकात्यंताभावएव विवक्षित इति भावः॥
ननु करणात्यंताभावस्याप्यसत्वात् कथं सत्प्रत्यवायजनकत्वमित्यत आह ॥ सचेति ॥ तत्वमिति ॥ स्वतंत्रं परतंत्रं च द्विविधं तत्वमिष्यते ॥ स्वतंत्रो भगवान्विष्णुर्भावाभावौ द्विधे

उभावपि स्थूलदृश्वानां न ह्यकरणमसत्॥तथा सति करणप्रसंगात् किं त्वभावः स च भाववत्तत्वमेवेति कथमकारणम्॥गुणं प्रतिकारणत्वे
च द्रव्यकारणत्वं कुतो न भवेत्॥ननु चात्रोपादानत्वस्य विवक्षितत्वादकारणस्य चाभावरूपतयासत्वेऽप्यत्र विवक्षितोपादानत्वानुपपत्तेर्नप्र
त्यवायजनकत्वमित्यभिप्रायइत्यत आह ॥ नहीति ॥ नह्यत्रोपादानत्वविवक्षितं ॥

तत्र ॥ इति वचनात् ॥ भाववदभावस्यापि तत्वतया सत्वादकरणस्यापि करणात्यंताभावरूपतया तत्वांगीकारात्सत्वमेवास्तीति युक्तम् तस्य सत्प्रत्यवाय जनकत्वमिति संकरः स्फुट
श्चेवाशयः ॥ भास्करं प्रत्याह ॥ गुणंप्रतीति ॥ द्रव्यविषया श्रुतिर्गुणस्त्वसतोऽपि जायत इति वदता त्वयाऽसतो गुणं प्रतिकारणत्वांगीकारात्तद्वद्द्रव्यं प्रत्यपि कारणत्वं कुतोनभवेत्
उभयोरपि भावत्वाविशेषादतो द्रव्यविषया श्रुतिरित्येतदयुक्तमिति भावः ॥ ननु द्रव्यस्य सोपादानकत्वादसतश्च द्रव्यं प्रत्युपादानत्वासंभवादसतःसज्जनकत्वंनास्तीति द्रव्यविषया श्रु
तिरित्युक्तं युक्तमिति चेत्तत्राह॥नन्वत्रेतीत्यादि ॥तस्तुतस्तु भवन्मतेऽकरणस्याभावरूपत्वेन कथं प्रत्यवायं प्रत्युपादानत्वमित्यत आह॥न ह्यत्रेति॥अकरणेन कर्मणां बंधहेतुत्वेन प्रत्यवाय
स्यैव प्राप्तेरित्यकरणस्य प्रत्यवायहेतुत्वोक्तिप्रसंगे करणाभावरूपाकरणस्य प्रत्यवायंप्रत्युपादानत्वं न विवक्षितं किं तु निमित्तत्वमेवेति न कोऽपि दोष इति भास्करोऽपिस्थूलदृश्वेत्यर्थः॥
॥ कृ० ॥ करणप्रसंगादिति॥अत्यंताभावप्रतियोगित्वमेवात्यतासत्वंततश्चाकरणस्यात्यतासत्वे करणं सत्स्यात् ॥करणस्यैवाकरणात्यंताभावरूपत्वादिति भावः॥ संकरमतं दूषयित्वा भास्कर
मतं दूषयति ॥ गुणं प्रतीति ॥ असतिकारकद्वयस्यंगीकाराविशेषादिति भावः ॥ नन्वकरणस्याभावत्वपक्षेऽपि प्रत्यवायकारणत्वमयुक्तं तदुपादानत्वाभावादित्यत आह ॥ नह्यत्रेति ॥

॥ श्री० ॥ गुणस्त्वमतोऽपि जायेत इत्येतदंगीकृत्य गुणं प्रति कारणत्वे द्रव्यकारणत्वं कुतो न भवेदिति प्रतिबंदीगृहीता वस्तुतस्तु सकार्यार्थक्रियाविरुद्ध... गुण ... रणत्वं न संभवतीत्याशयेनाह ॥ इसलमिति ॥ पुनरुक्तम् ॥ पूर्वोक्तेनेतिशेषः ॥ कर्मसंन्यासस्यकर्मत्यागस्य॥मानव ॥ ननु प्रणीते ॥ फलाभावादित्येवेति ॥ ... त्यर्थः ॥ ननु प्राग्भवीयकर्मणां फलभोगस्यावश्यकत्वात्तेषां चानंतत्वेन कथमद्यतनजन्मनि कर्माकरणमात्रेणमोक्ष इत्यत आह॥ यत्प्राग्भवीयेति ॥ प्रतिजन्मकृतानां ... ॥ विनिगमन इति ॥ एवं पक्षद्वये समाने सति कर्माकरणमेव मोक्षसाधनं न निवृत्तं कर्मेति विनिगमनेकारणाभाव इत्यर्थः ॥ आयासाभावस्येति॥ विनिगमने कारणं ... र्माकरणं मोक्षसाधनमित्यस्मिन पक्षे आयासाभावोऽस्ति निवृत्तकर्मणो मोक्षसाधनत्वपक्षे कर्म कृत्वाऽपि पुनः फलत्यागः कार्योऽतो महानायासोऽस्तीत्यर्थः॥प्रत्यवायेति ॥ ... ण कुर्वन्नेवेहेति प्रत्यवायोक्तिरित्यर्थः ॥ अमुमुक्षुत्वाति ॥ अमुमुक्षोरेव कर्माकरणे प्रत्यवायो न मुमुक्षोरिति प्रत्यवायोक्तिरमुमुक्षुविषयिणीत्यर्थः ॥

किं तु निमित्तत्वमेवेत्युक्तम् ॥ न च संन्यसनादेवेति पुनरुक्तम् ॥ अत्रापि कर्मसंन्यसनस्य मोक्षसाधनत्वोक्तेरित्यत आह॥नन्विति॥निष्काम ज्ञानपूर्वं चेति मानवे वाक्ये तावन्निष्कामकर्मणामोक्षः स्मृतः॥स चोपपत्त्यंतरादर्शनान्निष्कामकर्मणः फलाभावादित्येव तत्रोपपत्तिर्गोक्का यत एवं फलाभावस्यैव प्राधान्यम् ॥ अतोऽकरणेऽपि फलाभावस्य साम्यान्मोक्षो भवत्येव ॥ यत्प्राक्भवीयकर्मफलमुक्तम् निष्काम

ननु निष्कामकर्मणः फलाभावान्मोक्षःस्मृतः ॥ निष्कामं ज्ञानपूर्वं तु निवृत्तमिहचोच्यते॥निवृत्तं सेवमान स्तु ब्रह्मेभ्येति सनातनमिति ॥ मानवे ॥ अतस्तत्साम्यादकरणेऽपि भवतीत्यत आह ॥ न चेति ॥

करणपक्षेऽपि तत्समानम् ॥ न च विनिगमने कारणाभावः ॥ आयासाभावस्य सत्वात्॥न च प्रत्यवायप्राप्तिः अमुमुक्षुविषयत्वसंभवात्॥ अतो न कर्माणि करोमीति भावः ॥

॥कृ०॥प्रकृतेऽकरणस्य प्रत्यवायोपादनत्वं न विवक्षितम् ॥ तार्किकमप्रत्यवायस्याधर्मत्वेनात्मोपादानकत्वात ॥ अस्मन्मते च प्रकृत्युपादानकत्वात् ॥ तर्ह्यकरणस्य प्रत्यवायजनकत्वमेव किमित्याशंयेन पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ निमित्तत्वमेवेति ॥ किं चाकरणस्य प्रत्यवायाजनकत्वोक्तिरयुक्ता श्रुत्यादिविरोधादिति भावेनाह ॥ इसलमिति ॥ ननु कर्माकरणे मोक्षो भवत्येवेत्यसत् ॥ प्राग्भवीयानंतकर्मफलस्यावश्यभोक्तव्यत्वादित्यत आह ॥ यत्प्राग्भवीयेति ॥ अमुमुक्षुत्वाति ॥ प्रत्यवायश्रवणस्येति शेषः ॥ ॥१३४॥

॥ श्री० ॥ निष्कामकर्मार्थिकसंन्यासादकृतात्मसिद्धिर्नास्त्येवेति सर्वसिद्धमत आह ॥ तेन चेति ॥ निष्कामकर्मार्थिकसंन्यासशब्देन तत्करणमुपलक्ष्यत इत्यर्थः ॥ तस्यैव परोक्तप्रतिबंदीपरिहारहेतुत्वादिति भावः ॥ गीताभिप्रायं वदन्नेवोत्तरभाष्यमवतारयति ॥ निष्कामेति ॥ स्मृतीति ॥ निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमिति मानववाक्यविरोध इत्यर्थः॥ अकामकर्मणां पुंसामकामकर्मभिर्जातयांऽतःकारणशुद्धा जाताज्ज्ञानान्मोक्षोभवतीति भाष्ययोजनां सूचयन्नेवोत्तरवाक्यमवतारयति ॥अकामकर्मणामिति ॥न तु ज्ञानमिति॥ तथा चांतःकरणशुद्ध्या ज्ञानादितिप्रागुक्तमयुक्तमिति भावः॥ प्रागपीति ॥ अंतःकरणशुद्ध्याज्ञानादिति पूर्ववाक्येऽपीत्यर्थः ॥ तथा चांतःकरणशुद्ध्या जाताद्वैराग्याज्जाताज्ज्ञानादित्यर्थोद्रष्टव्यः तथा च भाष्यप्रमाणयोर्नविसंवाद इत्याशयः ॥ विरोधपरिहार इति ॥ निवृत्तकर्मणो मोक्षसाधनत्वप्रतिपादकमानववाक्यविरोधपरिहार इत्यर्थः ॥

अनेन कथमस्य परिहार इत्यत आह॥संन्यास इति॥तेन च निष्कामकर्मकरणमुपलक्ष्यत इति भावः॥निष्कामकर्मकरणान्मोक्षं न प्राप्नोतीति॥ अतो न तत् प्रतिबंदीग्रहणं युक्तमित्यनेनोक्तम् ॥ तथा च स्मृतिविरोध इत्यतः स्मृतेरभिप्रायमाह ॥ अकामेति ॥ सकाशादिति शेषः

संन्यासःकाम्यकर्मपरित्यागः ॥ काम्यानां कर्मणामिति वक्ष्यमाणत्वात् ॥ अकामकर्मणामंतःकरणशुद्ध्या ज्ञानान्मोक्षो भवति॥ तच्चोक्तं कर्मभिःशुद्धसत्वस्य वैराग्यं जायते हृदीति भागवते॥विरक्तानामेव च ज्ञानमुक्तम् न तस्य तत्वग्रहणाय साक्षाद्वरीयसीरपि वाचःसमासन् स्वप्ने निरुक्त्या ॥ गृहमेधसौख्यं न यस्य हेयानुमितं स्वयं स्यादिति ॥

पुंसामिति वा ॥ अकामकर्मभिरंतःकरणशुद्धिद्वारा ज्ञानं जायत इत्येतत्कुत इत्यत आह ॥ तच्चोक्तमिति ॥ नन्वत्र वैराग्यं जायत इत्युच्यते न तु ज्ञानमिति तत्राह ॥ विरक्तानामेवेति ॥ प्रागपि वैराग्यद्वारेत्यभिमतमिति भावः ॥ तथाऽपि कथं विरोधपरिहारः ॥

॥कु०॥नन्वेवमपि पुनरुक्त्यपरिहारः प्राक्कर्मत्यागमात्रस्य मोक्षासाधनत्वोक्त्यैव कर्मविशेषकाम्यकर्मत्यागस्य मोक्षसाधनत्वलाभात् ॥ किं चैवमपि प्रतिबंदीनिरासाभावः ॥ अपि च ॥ कामकर्मणामित्युत्तरभाष्याननुगुण्यमित्यत आह ॥ तेन चेति ॥ काम्यकर्मपरित्यागपदेनेत्यर्थः॥ प्रागपीति ॥ अकामकर्मणामिति वाक्येपीत्यर्थः ॥

---

१ कर्मधारयांगीकारे॥ २ भागवतस्कंध ५ अ० ११ श्लो०३॥ ३ वरीयस्यः ॥ ४ सम्यगभवन् ॥ ५ स्वप्नदृष्टांतेन ६ हेयत्वेनानुमितम् ७ बहुव्रीह्यंगीकारे ॥

॥ श्री० ॥ अवधारणा दिति ॥ संन्यसनात् सिद्धिं नैवाधिगच्छतीत्यवधारणादित्यर्थः ॥ तथा चगीतायामेवकारस्य भिन्नक्रमेणान्वय इति सूचितं भवति कर्मणां निवृत्तकर्मणाम् ॥ न त्विति ॥ तथा चाकामकर्मणामित्युक्तप्रनाडया मोक्षसाधनत्वं त्वाभिप्रेतमेवेति भावः ॥ प्रतिबंदीम ॥ अतस्तत्साम्यादकरणेपि भवतीत्युक्तम् ॥ नचोऽनुवृत्तिमभिप्रेत्याह ॥ न मोक्ष इत्यर्थइति ॥ तद्धर्माणाम ॥ यत्याश्रमविहितधर्माणाम ॥ तत्साम्यादिति ॥ अकरणेऽपि फलाभावसाम्यादित्यर्थ. ॥ न च संन्यसनादेवेतीति ॥ अत्र संन्यासशब्दो यत्याश्रमपर इत्यवगंतव्यम् ॥ श्रुत्यादीति ॥ यत्याश्रमस्य मोक्षसाधनत्वप्रतिपादकश्रुत्यादीत्यर्थः ॥ ननु तथापि कथं विरोधपरिहारः गीतायां संन्यासस्य मोक्षसाधनत्वाभावावधारणादित्यतस्तदभिप्रायमाह ॥ फलाभावोपपत्तिकंत्विति ॥ फलाभावोपपत्तिकमेव मोक्षसाधनत्वं संन्यासस्य निषिध्यते न तु सर्वथाऽपि किं तूक्तप्रायत्यादिद्वारद्वयेनास्त्येवेति भावः ॥

गीतायामकामकर्मणां मोक्षसाधनत्वाभावावधारणादित्यतस्तदभिप्रायमाह ॥ न त्विति॥फलाभावोपपत्तिकं कर्मणां मोक्षसाधनत्वं निषिध्यते न तु सर्वथाऽपीत्यर्थः ॥ प्रतिबंदीमाचष्टे ॥ कर्माभावादिति ॥ अतः कर्माभावान्न मोक्षइत्यर्थः ॥ श्लोकतात्पर्यमुपसंहरति ॥ अत

॥ न तु फलाभावात् कर्माभावात् अतो नकर्मत्याग एव मोक्षसाधनम् ॥

इति ॥ ननु यत्याश्रमो मोक्षसाधनत्वेन श्रुत्यादिप्रसिद्धः तत्र चैयमेवोपपत्तिः ॥ यत्तद्धर्माणां फलाभावः ॥ अतस्तत्साम्यादकरणेऽपि मोक्षो भवतीत्यतच्छंकानिरासार्थं चोक्तम् ॥ न च संन्यसनादेवेति ॥

॥ कृ० ॥ ॥ गीतायामिति ॥ न च संन्यसनादेवेत्यत्र संन्यसनशब्दस्याकामकर्मोपलक्षकत्वादिति भाव ॥ न मोक्ष इत्यर्थ इति ॥ अनेन नञोऽनुवृत्तिरिति सूचयति ॥ श्रुत्यादिप्रसिद्ध इति ॥ तस्मान्न्यास एषात्यरेचयत् ॥ मोक्षाश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तित इतिश्रुतिस्मृति प्रसिद्ध इत्यर्थ ॥ उक्तामिति ॥ गीतायामितिशेषः ॥

॥ श्री० ॥ मोक्षसाधनम् ॥ साक्षादिति शेषः ॥ **उपपादयतीति** ॥ ज्ञानद्वारा मोक्षसाधनत्वमुपपादयतीत्यर्थः ॥ननु नाविरतोदुश्चरितान्नाशांतो नासमाहितः ॥नाशांतमनसो वापि प्रज्ञानेनैनमाप्नुयादिति ॥ काठकवाक्येनाशांतो नासमाहित एनमाप्नुयादिति अप्रयतानां मोक्षो न भवतीत्यत्र व्यतिरेकेणोपपादितत्वात्तेन च प्रयतानां मोक्षो भवतीति प्रायत्यस्य मोक्षसाधनत्वमेव सिद्धचति न त्वप्रयतानां च न ज्ञानमित्यनेनाभिप्रेतं प्रायतस्य ज्ञानद्वारा मोक्षसाधनत्वमतआह ॥ **प्रज्ञानेनेति** ॥ तथा च शांतादीनां ज्ञानाभावमभिप्रेत्यैव मोक्षाभावमुक्त्वा शांतादिः प्रज्ञानेनैनमाप्नुयादित्युक्ते प्रायत्यादीनां ज्ञानद्वारामोक्षसाधनत्वं सिद्धचतीत्यर्थः ॥ न च प्रयतानां न ज्ञानमित्यत्र कथमियंश्रुतिः प्रमाणम् ॥ तत्रशांतासमाहितानां ज्ञानाभावेन मोक्षाभावोक्त्याअप्रतानां ज्ञानाभावेन मोक्षाभावोक्तिः प्रकृतासंगतिरित्यत आह ॥ **अशांत इति** ॥ अभगवन्निष्ठो भगवद्भक्तिशून्यः ॥ तत्र ॥ भगवति ॥ तथा च समाहितप्रयतपदयोः पर्यायत्वमिति प्रकृतसंगतिरिति भावः ॥ यतयश्चतुर्विधाः ॥ कुटीचकबहूदहंसनिष्क्रियभेदात् ॥ यथोक्तं तृतीयस्कंधे ॥ न्यासे कुटीचकः पूर्वो बहूदो हंसनिष्क्रियाविति ॥ तदभिप्रायेणाह ॥ ॥**तुरीयं परमहंसाख्यमिति** ॥

एवं तर्हि श्रुत्यादिविरोध इत्यत आह ॥ यत्याश्रमस्त्विति ॥ प्रायत्यं प्रयतत्वमीश्वरे मनःसमाधानम्॥ यतद्वारद्वयेन मोक्षसाधनत्वं श्रुत्यादेरभिप्रेतम् ॥ फलाभावोपपत्तिकं तु गीतायां निवाग्निमतो न विरोध इति भावः ॥ आश्रमांतरेऽपि प्रायत्यसंभवात्किं तदर्थं यत्याश्रमेणेत्यत आह ॥ अप्रयतत्वमेवेति ॥ इतरकर्मसु यजनादिषु ॥प्रायत्यं कथं मोक्षसाधनमित्यतो व्यतिरेकमुखेनोपपादयति ॥ अप्रयतानां चेति ॥ प्रज्ञानेनैन

यत्याश्रमस्तु प्रायत्यार्थो भगवत्तोषणार्थश्च ॥ अप्रयतत्वमेव हि प्रायोगृहस्थादीनाम् इतरकर्मोद्योगात् ॥ अप्रयतानां च न ज्ञानम् तथा हि श्रुतिः नाशांतो नासमाहित इति॥महांश्च यत्याश्रमे भगवत ॥ स्तोषः ॥ तथा ह्याह॥यत्याश्रमं तुरीयं तु दीक्षां ममसुतोषिणीमिति नाराणाष्टाक्षरकल्पे ॥

माप्नुयादिति श्रुतिशेषः॥ अशातोऽभगवन्निष्ठः ॥ असमाहितस्तत्रचित्तसमाधानरहितः ॥ भगवत्तोषणस्याश्रमांतरेऽपि संभवात्किं यत्याश्रमेणेत्यत आह ॥ महांश्चेति ॥ तुरीयं परमहंसाख्यम् ॥

॥ कृ० ॥ **यजनादिष्विति** ॥ यजनाध्ययनदानेष्वित्यर्थः ॥ ननु नाशांत इति श्रुत्या व्यतिरेकमुखेन प्रायत्यस्य ज्ञानद्वारामोक्षहेतुत्वंकथंसिद्धयतीत्यत आह ॥ **प्रज्ञानेनेति** ॥ ननु यत्याश्रमस्य तुरीयत्वाव्यभिचारात् ॥ तुरीयमिति व्यर्थमित्यत आह ॥ **परमहंसाख्यमिति** ॥

॥ श्री०॥ निष्क्रियापरपर्यायमित्यर्थः ॥वाक्यशेषेणेति॥द्वितीयायाःनारायणाष्टाक्षरकल्पगतवाक्यशेषेणान्वयइत्यर्थः ॥ तद्राहितानां ॥यत्याश्रमरहितानाम्॥आधिकारिकाणां॥पदस्थानां गार्हस्थ्यादिमतां देवानामित्यर्थः ॥ तदुभयेति ॥ प्रायत्यभगवत्तोषेत्यर्थः ॥ स इतिपरामृष्टाधिकारस्य भगवत्तुष्टिरूपत्वाभावादाह ॥ तुष्यतीति ॥ तथा च तोषस्तुष्टिकरणम् इत्यर्थो द्रष्टव्यः ॥ ननु आदिश्चासौ राजा चेति कर्मधारयतत्पुरुषे पश्चात् राजाहस्सखिभ्य टच् ॥ एतदंतात्तत्पुरुषात् टच् स्यात् महाराजः ॥ उत्तमह ॥ कृष्णसखः ततश्चादिराजन्शद्वात् टच्प्रत्यये अकारमात्रं विहाय सर्वस्यापि लोपे ॥ नस्तद्धिते ॥ नांतस्य भस्य टेर्लोपः स्यादिति नांतस्य भस्यानित्यस्य टीभूतस्य लोपे आदिराज् अ आदिराजेत्यकारांतप्रातिपदिके सिद्धे पश्चात् स्वाद्युत्पत्तौ आदिराजानामिति स्याददिराज्ञामिति तु कथमित्यत आह ॥ समासांतविधेरिति ॥ समासांते तदंतटच्प्रत्ययो न जात इत्यर्थः ॥ समासांतविधेरनित्यतायां फणिभाषितभाष्यस्थप्रयोगं दर्शयति ॥ यथोक्तमिति ॥ यदि समासांतविधेर्नित्यत्वं महाभाष्यकाराभिप्रेतं स्यात्तदाशुच्यपानीति प्रयोक्तव्यंस्यात् ॥ तथा हि ॥ शुचयः आपो येष्विति विग्रहे ऋक्पूरब्धूःपथामानक्षे एषामप्रत्ययः स्यात् समासांतः ॥ धुरस्त्वनक्षे ॥ अर्धर्चः ॥ विष्णुपुरं ॥ विमलापंसरः ॥ राजधुरः ॥ अक्षत् ॥ अक्षधुः ॥ रम्यपथो देश ॥ तथा च समासांतशुच्यपशद्वादप्रत्यये शुच्यपेत्यकारांतप्रातिपादिके जाते पश्चाज्जसि नपुंसके जस्शसो शिरिति जरसः शिभावे शिः सर्वनामस्थानमिति ॥ तस्य सर्वनामस्थानसंज्ञायां लशक्वतद्धित इति शकारलोपे शुच्यप इतिजाते नपुंसकस्य झलचः ॥ झलंतस्याजंतस्य क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे इति नुमागमे उमित्यस्य लोपे शुच्यपन् इ इतिजाते ॥ क्र० ॥ तथा च यत्याश्रमस्य हंसादिभेदेन चतुर्विधत्वाद्धंसादिव्यावृत्त्यै तुरीयमिति सफलमिति भावः ॥

वाक्यशेषेणान्वयः ॥ यत्याश्रम एव चेत्प्रायत्यं महान्भगवतस्तोषश्च तर्हि तद्रहितानामाधिकारिकाणां तदुभयाभावप्रसंग इत्यत आह ॥ आधिकारिकास्त्विति ॥ तत्स्था अधिकारस्थाः स एव अधिकार एव ॥ तुष्यत्यनेनेतितोषः ॥ समासांतविधेरनित्यत्वादादिराज्ञामित्युक्तम् ॥ यथोक्तम्

आधिकारिकास्तु तथा एव प्रायत्यसमर्थाः ॥ स एव च महान्भगवतस्तोषः ॥ तच्चोक्तम् देवादीनामादिराज्ञांमहोद्योगोपिभोगिनः ॥ विष्णोश्चलतितद्भोगोत्यतीवहरितोषणमिति पाद्मे ॥४॥

हाभाष्ये शुच्यांपि तटाकानीति ॥ ४ ॥ ॥ वाक्यशेषेणेति ॥ तद्ग्रंथगतेन वाक्यशेषेणेत्यर्थः ॥ अधिकारस्य तोषत्वं विरुद्धमित्यतआह ॥ तुष्यत्यनेनेति ॥ ल्युडपवादो हलश्चेति करणेघञितिभावः ॥ननु राजाहस्सखिभ्यष्टजिति टचि आदिराजानामिति स्यादित्यत आह ॥ समासांतेति ॥ शुच्यांपीति ॥ अन्यथा ऋक्पूरब्धूःपथामानक्षे इतिसमासांतेऽप्रत्यये शुच्यपानीति स्यादिति भावः अत्रशुच्यंपीत्येव युक्तः पाठः॥अमृक्षिन्निति दीर्घबाधित्वापरत्वान्नपुंसकस्यझलच इति नुम्प्राप्तेः॥नचाक्षिन्नित्यस्य प्रातिपदविधित्वात्प्राबल्यं नित्यकाशत्वे सत्येव तस्यप्राबल्यहेतुत्वेन सावकाशत्वे तदभावात्॥एतच्च छादिरुपभिसूत्रे मनोरमायांस्पष्टम् ॥प्रातिपदोक्तत्वाद्दीर्घमाश्रित्य शुच्यांपीतिपाठो युक्त इतिपक्षस्तु दुर्बल इति दिक्॥४

॥ श्री०॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥ अत्रादीनामुपधाया दीर्घः स्यात् असंबुद्धौ सर्वनामस्थाने परे ॥ अलोऽन्त्यात्पूर्व उपधा ॥अंत्यादलः पूर्वो वर्ण उपधा संज्ञः स्या दिति उपधाभूतपकारस्थस्य अकारस्य दीर्घे शुच्यपान् इ शुच्यपानिति स्यात् न तु शुच्यांपीति तेन ज्ञायते समासत्वेऽपि तदंतात्प्रत्ययानाश्रयणात्समासांतोविधिरनित्य इति समासांताप्रत्य यानाश्रयणेतु शुच्यप्शब्दात् जाशितस्य शिभावे तस्य लोपे इकारे उर्वरिते अप्तृन्नित्युपधाभूतस्य च्यकारस्थस्य अकारस्य दीर्घे नुमागमेतस्यानुस्वारादेशेशुच्यांपइशुच्यांपीति रूपं भवतीति द्रष्टव्यम्॥४॥कर्मत्यागरूपादिति ॥ यज्ञादिकर्मत्यागरूपादित्यर्थः॥ज्ञानरहिताद्यज्ञादिकर्मत्यागरूपाद्यत्याश्रमात्सिद्धिं न समधिगच्छतीत्यत्र नहीत्ययंहेतुर्भवनज्ञानावश्यकत्वसाधकइतिवक्त व्यं न ह्यत्र ज्ञानस्यावश्यकत्वे किंचिदुपपादकमुच्यतेऽतो न प्रकृतसंगतिरित्याह॥ न ह्यत्रेति ॥नन्वथापि यथाकथंचित् प्रकृतसंगतिरस्त्येव तथा हि॥ यज्ञादिकर्मत्यागरूपाद्यत्याश्रमात्सिद्धि न समधिगच्छतीति पूर्वमुक्तं तत्कुत इति शंकायां न हीत्युच्यते कश्चित्पुमान् क्षणमपि अकर्मकृत् यज्ञादिकर्माकृत् न हि तिष्ठति अतो यज्ञादिकर्माकरणमसंभावितमस्तत्परित्यागो न संभ वति अतस्तत्परित्यागरूपाद्यत्याश्रमात्सिद्धि न समधिगच्छतीति प्रकृतसंगतिरस्त्येवेत्यत आह ॥ नापीति ॥ तर्हि किं विधीयते इतिपृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ शरीरेति ॥ ॥ अपरिहार्यत्वमिति ॥

ज्ञानरहितात्कर्मत्यागरूपायत्याश्रमात्सिद्धिं न समधिगच्छतीति किलपूर्वमुक्तम् ॥ तत्र हेत्वाकांक्षायां न हि कश्चिदित्युच्यत इति व्याख्या नमसदिति भावेन श्लोकतात्पर्यमाह ॥ न त्विति ॥ न ह्यत्र ज्ञानस्यावश्यकत्वे किंचिदुच्यते ॥नापि यज्ञादिकर्माकरणस्यासंभवोऽभिधीयते ये

॥ न तु कर्माणि सर्वात्मना त्यक्तुं शक्यानीत्याह ॥ न हीति ॥ ५ ॥

नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् ॥ कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ॥ ५ ॥

न प्रकृतसंगतिः स्यात् किं तु शरीरयात्राद्यर्थानां कर्मणामपरिहार्यत्वम् ॥

॥ कृ० ॥ ज्ञानरहितात्कर्मत्यागान्न मोक्ष इत्यर्थे हेतुप्रतिपादकत्वेनानेन वाक्येन ज्ञानस्यावश्यकत्वे किंचिद्वक्तव्यम् ॥ तथात्वे विशेषणविघटनेन विशिष्टविघटनात् ॥यद्वा यज्ञादिकर्मत्यागस्या संभवे विधेयः तथासति विशेष्यविघटनेन विशिष्टाभावसंपादनात् ॥ तत्राद्योऽत्र न संभवतीत्याह ॥ न ह्यत्रेति ॥ द्वितीयोऽपि न संभवतीत्याह ॥ नापीति ॥

॥ श्री० ॥ शरीरयात्रोपयुक्तकर्मपरीत्यागरूपादाल्पश्रमात्सिद्धिं न समधिगच्छतीति यदि किल पूर्वमुक्तं स्यात् तदैव शरीरयात्रोपयुक्तकर्माकरणस्यासंभवप्रतिपादकतया न हीति श्लोकस्य प्रकृतसंगतिः स्यान्न ह्येवं त्वयाऽव्याख्यातं किं तु यज्ञादिकर्मत्यागरूपादेवेति ॥ अतो न कथमपि प्रकृतसंगतिरिति भावः ॥ यस्तृतीयः पक्ष इति ॥ ज्ञानं मोक्षसाधनं भवत्येव किं तु कर्मणा बध्यते जंतुरित्यादेः कर्माणि तत्प्रतिबंधकानीति मत्वा कर्माणि त्यज्येत इति यः प्राग्विकल्पित इत्यर्थः ॥ यद्यप्यत्र द्वितीयपक्ष एव तथाऽपि आद्येऽपि मोक्षस्य नैष्कर्म्यशब्दवाच्यत्वमात्रमाश्रित्योच्यते उत बीजाभावयुक्तिमाश्रित्येति पक्षद्वयस्योक्तत्वात् तदभिप्रायेण द्वितीयस्यापि तृतीयत्वोक्तिरिति ध्येयम् ॥ यज्ञार्थादिति स्मृतेरिति ॥ यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबंधन इति गीतावाक्येन कर्मणा बध्यते जंतुरिति स्मृतेर्भगवदर्थकर्मणामेव बंधकत्वमित्यर्थसंकोचं वक्ष्यतीत्यर्थः ॥ उपोद्घातप्रक्रियान्यायेनेति ॥ चिंता प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षत इति न्यायेनेत्यर्थः ॥ स्मृतेरर्थसंकोचोपयोगित्वेनेति यावत् । कर्मशब्द इति कर्मणा बध्यते जंतुरितिस्मृतिस्थः कर्मशब्द इत्यर्थः ॥ परिस्पंदमात्रस्य त्यक्तुमशक्यत्वेनसंकुचितार्थस्यावश्यकत्वादित्याशयः नैवेत्युक्तया न हित्यत्रत्यस्तुशब्द एवार्थ इत्युक्तं भवति ॥ तथा च कर्माकरणान्मुक्तिरित्यसदितिहृदयं वक्तुमुत्तरश्लोक इति शेषः ॥ ५ ॥ अनुक्तत्वादिति ॥ मोक्षप्रतिबंधकत्वेनानुक्तत्वादित्यर्थः ॥

अतो नेदं व्याख्यानं अपि तर्हि कर्मणा बध्यते जंतुरिति स्मृतिमाश्रित्य यस्तृतीयः पक्षस्तमाशक्य यज्ञार्थादिति स्मृतेरर्थसंकोचं वक्ष्यति ॥ तत्र कुतःस्मृतेरर्थसंकोच इत्याकांक्षा स्यात् ॥ तामपाकर्तुमुपोद्घातन्यायेन कर्मशब्दस्तावदसंकुचितार्थः परेणाप्यंगीकर्तुमशक्य इति प्रतिपाद

॥ तथापि शक्तितः त्यागः कार्य इत्याह ॥ कर्मेंद्रियाणीति ॥

कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन् ॥इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते॥६॥

यितुं कर्माणि सर्वात्मना त्यक्तुं नैव शक्यानीत्यनेनाहेति भावः ॥ ५ ॥तथाऽपि कर्मेंद्रियाणीत्यसंगतम् ॥ तृतीयपक्षस्थेन मनसेंद्रियार्थस्मरण स्यानुक्तत्वादित्यत आह ॥ तथापीति ॥

॥ रु०॥ तृतीय पक्ष इति ॥ आद्यपक्षस्य द्विरूपत्वात्तदभिप्रायेण द्वितीयस्यैव तृतीयत्वमुक्तमिति ध्येयम् ॥ यज्ञार्थादिति स्मृतेरिति ॥ यज्ञार्थादित्यनेन कर्मणा बध्यत इति स्मृतेरित्यर्थः ॥ ६ ॥ तृतीयपक्षस्थेनेति ॥ कर्मणा बध्यते जंतुरिति स्मृतिमाश्रित्य यस्तृतीयः पक्षस्तत्स्थेनेत्यर्थः ॥इंद्रियार्थस्मरणस्येति॥ मोक्षप्रतिबंधकत्वेनेति शेषः॥

॥ श्री० नाशक्यविषय इति ॥ कर्मणा बध्यते जंतुरिति स्मृतेर्बंधकत्वात् कर्माणीत्यजानोत्याशयस्तत्र शरीरमात्रोपयुक्तकर्मणां त्यक्तुमशक्यत्वात् तेषां च बंधकत्वाभावाच्च तत्परित्यागार्थकत्वं कर्मणा बध्यत इति शास्त्रस्य न वक्तुं युक्तमशक्यविषये शास्त्रप्रवृत्त्यनुपपत्तेः न ह्याकाशमंथनं शक्यविधानमिति भावः ॥ तद्व्यतिरिक्तकर्मार्थ इति ॥ कर्मणा बध्यत इति स्मार्तः कर्मशब्दः शरीरयात्रोपयुक्त कर्मभिन्नयज्ञादिकर्मपरो भविष्यति तेषां बंधकत्व सुखे न त्यक्तु शक्यत्वादतो बंधकयज्ञादिकर्माकरणान्मुक्तिर्भविष्यतीत्याशयः ॥ न कर्मत्याग इति ज्ञापयितुमिति ॥ तथा च यज्ञादिकर्मणां प्रतिबंधकत्वेन तत्त्यागेऽपि मनोव्यापारस्य प्रतिबंधकस्य सत्वेन तदभावस्याप्रामत्वादित्याशयः ॥ भाष्ये ॥ इत्याहेति ॥ इतिशंकायामाहेत्यर्थः ॥ अनिगृहीतत्व इति ॥ मनोऽनिगृहीतं चेद्बंध इति बंधापेक्षया कर्मेंद्रियाणीत्याद्यश्लोकोऽन्वयपरः तत्र च मिथ्याचारो बंधवानिति व्याख्येयम् ॥ मनो निगृहीतं चेन् बंधाभाव इति बंधापेक्षया यस्त्विति द्वितीय श्लोको व्यतिरेकपरः ॥ तत्र च विशिष्यते बंधाभाववानिति व्याख्येयम ॥ मोक्षापेक्षयात्विति ॥ मनो निगृहीतं चेन्मोक्ष इति मोक्षापेक्षया यस्त्विति द्वितीयश्लोकोऽन्वयपरः ॥ तत्रचविशिष्यते मुक्तोभवतीत्यर्थः ॥ मनोऽनिगृहीतं चेन्मोक्षाभाव इति मोक्षापेक्षया कर्मेंद्रियाणीत्याद्यश्लोको व्यतिरेकपरः ॥ तत्र च मिथ्याचारपदं मोक्षाभावपरं द्रष्टव्यमिति व्यत्यास इत्यर्थः ॥ एतेनेति॥ कृ० ॥ अनेन कर्मशब्दार्थसंकोचे किं नियामकमुक्तमित्यत आह ॥ एतदुक्तं भवतीति ॥

यद्यपि शरीरयात्राद्यर्थानि कर्माणि त्यक्तुमशक्यानि ॥ तथाऽपिशक्तितः शक्यत्वाद्यज्ञादिकर्मणां त्यागः कार्यः॥ एतदुक्तंभवति ॥ नाशक्यविषये शास्त्रप्रवृत्तिरित्यस्तद(द्व्य)तिरिक्तकर्मार्थः स्मृतौ कर्मशब्दो भविष्यतीति॥एतच्छंकापरिहारः श्लोकेन दृश्यते ॥द्वितीयश्लोकश्चव्यर्थइत्यतआह ॥

मन एव प्रयोजकमिति दर्शयितुम् ॥ अन्वयव्यतिरेकावाह ॥ मनसा स्मरन् मनसा नियम्येति ॥

यस्त्विंद्रियाणिमनसानियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते ॥ ७ ॥

॥ मन एवेति ॥मन एव बंधमोक्षयोः प्रयोजकं न कर्मकरणाकरणे॥अतस्तन्निग्रह एव कार्यो न कर्मत्याग इति॥ज्ञापयितुमित्यर्थः अनिगृहीतत्वे मनसो बंधापेक्षयाऽद्योऽन्वयो द्वितीयोव्यतिरेकः ॥ मोक्षापेक्षया तु व्यत्यास इति॥एतेन स्मरणस्य मानसत्वव्यभिचारान्मनसेति व्यर्थमित्यपि परास्तम्॥

॥ आद्योऽन्वयइति ॥ अनिगृहीतमनसि सति बंध इत्यन्वयप्रदर्शक आद्यश्लोक इत्यर्थः ॥ द्वितीयो व्यतिरेक इति ॥ अनिगृहीतमनसोऽभावे बंधाभाव इतिव्यतिरेकपरो द्वितीयः श्लोक इत्यर्थः ॥ व्यत्यास इति ॥ निग्रहीतमनसः सत्वे मोक्ष इत्यन्वयप्रदर्शको द्वितीयः निगृहीतमनसोऽसत्वे मोक्षाभाव इति व्यतिरेकप्रदर्शक आद्य इत्यर्थः ॥ एतेनेति ॥

१ स्मृतौ उत्तरार्धेबंधकत्वाद्यतयःकर्मनकुर्वंतीत्युक्तम्॥ तेषांचचलनादिकर्मकर्तृत्वदर्शनादेतल्लभ्यते॥२ मृषामिथ्याशब्दयोःपर्यायत्वान्मृषाशब्दस्याभिन्नत्वादेषाश्रुतिरित्यादौवैयर्थ्यार्थिकत्वस्यमामितत्वान्मिथ्याशब्दोऽपितदर्थकः ॥ बंधनिवृत्यर्थमिंद्रियानिग्रहः ॥ तदलाभाद्यर्थं आचारोयस्येत्यर्थं इतिभावः ॥

॥ श्री० ॥ मनोऽनिगृहीतं चेद्बंध इति बंधापेक्षयाऽन्वयपरत्वेन मनोऽनिग्रहीतं चेन्मोक्षाभाव इति मोक्षापेक्षया च व्यतिरेककथनपरत्वेनेत्यर्थः ॥ मनसाम्यगनिग्रहस्य मनसः स्मरणं प्रतिकारणत्वोक्तौ न तात्पर्यं येन मानसप्रत्यक्षजा स्मृतिरिति वचनेन स्मरणस्य मानसत्वाव्यभिचारात्मनसेत्यस्य वैयर्थ्यशंका स्यात् ॥ न चैवम् ॥ किंतु उक्तरीत्या बंधमोक्षापेक्षयाऽन्वयव्यतिरेककथनाय मनसा नियम्येत्युक्तेति नोक्तदोष इतिभावः ॥ ननु कर्मयोगेनेति गृहस्थाद्याश्रमत्रयविहितकर्मणः प्रकृतत्वान्न तु गृहस्थाद्याश्रमकर्मैवेति वक्तव्यमित्यत एतदुपलक्षणपरमिति भावेनाह ॥ वनस्थकर्मैवेत्यादि ॥ यदि गृहस्थाद्याश्रमत्रयविहितं कर्मयोगशब्दार्थो नेति नियम्येत तदा संन्यासविधानादित्येव वक्तव्य संन्यासादीत्यादिपदं व्यर्थं तेन गृहस्थादिकर्मणोऽपिग्राह्यत्वात्तद्व्यापत्तेरित्यत आह ॥ संन्यासादीत्यादिपदेन योनियम्यत इति ॥ यदा गृहस्थकर्मैवेति नियम्यते तदा संन्यासस्य आदिपदेन वनस्थत्वब्रह्मचर्ययोः ॥ यदा न तु वनस्थकर्मैवेति नियम्यते तदा संन्यासस्यादिपदेन गार्हस्थ्यब्रह्मचर्ययोर्यदा न तु ब्रह्मचारिकर्मैवेति नियम्यते तदा संन्यासस्यादिपदेनगार्हस्थ्यवनस्थत्वयोर्ग्रहणमित्यर्थः ॥ कर्मयोगशब्द स्ववर्णाश्रमोचितकर्मपरत्वेनैव व्याख्येयो न तु गृहस्थकर्मरूपविशेषपरत्वेन कुत इत्यत आह ॥ कर्मयोगशब्दस्येति ॥ नन्वेव कर्मयोगशब्दस्य सामान्यशब्दत्वेन स्ववर्णाश्रमोचितकर्मपरतया व्याख्याने पर कर्मयोगेन योगिनामित्यत्र कथं गृहस्थकर्मपरतया व्याख्यान इत्यत आह ॥ पूर्वमिति ॥ ६ ॥ ७ ॥

कर्मयोगेनयोगिनामित्यत्र कर्मयोगशब्दस्य गृहस्थादिकर्मविषयत्वेन प्रकृतत्वादत्रापि तद्विषयत्वप्रतीतिः स्यात् ॥ न त्विगसार्थमाह ॥ कर्मयोगमिति॥ गृहस्थकर्मैव वनस्थकर्मैव ब्रह्मचारिकर्मैवेति नियमो न विवक्षित इत्यर्थः॥संन्यासादीत्यादिपदेन यो नियम्यतेतद्व्यतिरिक्तग्रहणं।कर्मयोग

कर्मयोगं स्ववर्णाश्रमोचितं ॥ न तु गृहस्थकर्मैवेति नियमः ॥ संन्यासादिविधानात् ॥ सामान्यवचनाच्च ॥ ६॥७॥

शब्दस्य सामान्यवाचित्वाच्च ॥ पूर्वं ज्ञानयोगेन सांख्यानामिति यत्याश्रमकर्मणः पृथगुक्तत्वात्सामान्यशब्दोऽपिविशेषः व्यवस्थापितः॥ न चात्र तथाविधं किंचिदस्तीति भावः ॥ ६ ॥ ७ ॥

॥ कृ० ॥ मनसो बंधमोक्षप्रयोजकत्वप्रदर्शनार्थं मनोग्रहणस्यावश्यकत्वेनेत्यर्थ ॥ ननु कर्मयोगशब्देन गृहस्थादिविषयकर्मणः प्रतीतत्वात्तावन्नियमो निषिद्धव्यः ॥ तत्कथं न तु गृहस्थकर्मैवेति नियम इत्युक्तमित्यतउपलक्षणमेतदिति भावेनाह ॥ वनस्थ कर्मैवेत्यादि ॥ यद्यत्र न तु गृहस्थादिविषयकर्मैवेति नियम इत्येवं रूपेणोच्यते तदासंन्यासादीत्यादिपदवैयर्थ्यं स्यात् ॥ अतः प्रत्येकमेवनिषेधःकृत इति बोध्यम ॥ नन्वेव यदि न तु गृहस्थकर्मैवेति नियम. संन्यासविधानादित्यादिरूपेण प्रत्येकमवहेतुहेतुमद्भावो वक्तव्यः ॥ अन्यथाऽऽदिपदवैयर्थ्यतादवस्थ्यात् न चासौ युज्यते ॥ हेत्वादिपदोक्तगार्हस्थ्यनागवैयर्थ्यात् ॥ नियमनिषेधाय संन्यासब्रह्मचर्यवनस्थविधानस्यैव सामंजस्यात ॥एवं प्रतिज्ञांतरेऽपि द्रष्टव्यमित्यत आह ॥ संन्यासादीत्यादिपदेनेति यो नियम्यते ॥ तद्व्यतिरिक्तग्रहणं संन्यासादीत्यादिपदेन कार्यमिति संबंधः ॥ तथा च यदा निषेधेन गृहस्थकर्मैवेति नियम्यते तदा संन्यासस्य स्वपदेनैवोक्तत्वादादिपदेन गार्हस्थ्यव्यतिरिक्तवनस्थत्वब्रह्मचर्ययोर्ग्रहणे संन्यासब्रह्मचर्यवनस्थत्वविधानादिति हेत्वर्थसंपत्त्या नोक्तदोषः ॥ एवं यदा वनस्थकर्मैवनियम्यते तदादिपदेन गार्हस्थ्यब्रह्मचर्ययोर्ग्रहणम् ॥ यदा तु ब्रह्मचारिकर्मैवेति तदा गार्हस्थ्यवनस्थत्वयोर्ग्रहणमित्यर्थः ॥ ६ ॥ ७ ॥

॥ उत्तरश्लोकेति ॥ तत्रनियतपदप्रयोगादित्यर्थः ॥ एवमेवेति ॥ कर्मयोगशब्द उक्तार्थ एवेत्यर्थः ॥ संगतिं सूचयन्निति ॥ अतःशब्देनेत्यर्थः ॥ अतः शब्दपरामृश्यं किमित्यत आह ॥अतःशब्देति ॥ यत कारणादकर्मणः सकाशात् कर्म स्ववर्णाश्रमोचितकर्मकरणमेव ज्यायोऽतो नियतं कर्म कुर्वित्यर्थः ॥ उच्यत इति ॥ गीताकारेण विव्रियत इत्यर्थः ॥ ८ ॥ तत्पुरुषत्वेति ॥ कर्मणो बंधकमिति पूर्वोक्तपुरुषत्वेऽत्यर्थः ॥ बंधनशब्दस्य नपुंसकत्वेन बहुव्रीहिसमासाकरणे पुंल्लिंगप्रयोगादप्रामाण्यमक्रम ॥ मूले यज्ञोविष्णुरिति ॥ यज्ञो विष्णुर्देवतेति श्रुतेर्यज्ञो यज्ञपतिर्यज्ञेतिस्मृतेश्चेति भावः ॥ नन संगरहितस्य कर्मणोऽबंधकत्वं युक्तं काम्यकर्मणो बंधकत्वात् ॥ यज्ञशब्दोक्तविष्णवर्थस्य कर्मणोऽबंधकत्वं कथं अवैष्णवकर्मणो बंधकत्वाद्दर्शनादित्यत आह ॥ अपि यज्ञयागस्यापीति ॥ न केवलं काम्यकर्मण एवेत्यपेरर्थः ॥ बंधकत्वात ॥ बंधकत्वावगमात ॥ असंगतेति ॥ यज्ञार्थकर्मणो बंधकत्वाद्यज्ञार्थं कर्म कुर्वित्येव वचनं सगतं न त यज्ञार्थकर्मान्यकर्मणो बंधकत्वाद्यज्ञार्थं कर्म समाचरेति वचनम ॥ तयोः साध्यसाधनभावेनासंगतत्वादित्यर्थः ॥ अर्थात्सिद्धमिति ॥ यज्ञार्थादन्यत्कर्म बंधकमित्युक्ते यज्ञार्थं कर्म न बंधकमित्यर्थात् सिद्धमित्यर्थः ॥ ॥ ८ ॥ सगतिर्मास्ति ॥ अतः शब्दप्रयोगादिति भावः ॥ उच्यत इति ॥ विव्रियत इत्यर्थः॥ ८॥ कर्माक

उत्तरश्लोकपर्यालोचनया चेत्येवेति भावेन संगतिं सूचयन्व्याचष्टे ॥ अत इति ॥ अतः शब्दपरामर्श्यं कर्मज्यायइत्यादिनैवोच्यते ॥ ८ ॥

इदानीं तृतीयं पक्षमाशंक्य तत्परिहाराय श्लोकमवतारयति ॥ कर्मणेति ॥ बंधकं मोक्षस्य प्रतिबंधकं अतो न करोमीति शेषः॥ तत्पुरुष

अतो नियतं वर्णाश्रमोचितं कर्म कुरु ॥ ८ ॥ कर्मणा बध्यते जंतुरिति कर्मबंधकं स्मृतमित्यत आह ॥

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः ॥ शरीरयात्राऽपिचतेनप्रसिद्ध्येदकर्मणः ॥ ८ ॥

यज्ञार्थात्कर्मणोऽन्यत्रलोकोऽयंकर्मबंधनः ॥ तदर्थंकर्मकौंतेयमुक्तसंगः समाचर ॥ ९ ॥

यज्ञार्थादिति कर्मबंधनं यस्य लोकस्य स कर्मबंधनः॥यज्ञो विष्णुः॥यज्ञार्थं संगरहितं कर्म न बंधकमित्यर्थः ॥

त्वभ्रांतिनिरासायाह ॥ कर्मेति ॥ तत्पुरुषत्वेऽसंगतिः स्यादिति भावः ॥ यज्ञशब्दस्य यागार्थत्वप्रतीतिमपाकर्तुमाह ॥ यज्ञ इति ॥ अवैष्णवयागस्यापि बंधकत्वादितिभावः ॥ तदर्थमित्युत्तरवाक्यस्यासंगतिपरिहारायार्थात्सिद्धं पूर्ववाक्यार्थमाह ॥ यज्ञार्थमिति॥

रणमेव मोक्षहेतुरित्याद्यपक्षे यो द्वितीयकल्पस्तेन गतार्थत्वनिरासायाह ॥ मोक्षस्य प्रतिबंधकमिति ॥ असंगतेति ॥ यज्ञार्थं कर्म कुर्वित्यत्र यज्ञार्थान्यकर्मणो बंधकत्वस्य हेतुत्वेन प्र[?]सा संगतीत्यर्थः ॥ अर्थादिति ॥ यज्ञार्थादन्यत्कर्मबंधकमित्युक्तेऽर्थाद्यज्ञार्थं कर्म न बंधकमिति सिद्धमित्यर्थः ॥

१ भाष्येबंधमबंधकमित्यर्थः ॥ कृत्यल्युटोबहुलमितिकर्तरिल्युट् ॥

॥श्री०॥अनुक्तमिति॥प्रथमवाक्यार्थकथनावसरे यज्ञार्थं कर्म न बंधकमित्येव वाच्यम्॥पूर्वार्धे तावत एव सत्वात् न तु संगराहितामिति॥पूर्वार्धेऽनुक्तत्वादित्यर्थः॥एषणमिष्टिरिच्छा सा च प्रकरणात् फलविषयिणी ग्राह्येत्याशयेनेष्टिशब्दार्थ उक्तः॥फलेच्छयेति॥यजनशीलो याजुक इति पदार्थमभिप्रेत्य यष्टेत्युक्तम् ॥तदुपपादयति॥अविद्यादीनामिति॥आदिपदेन कामादीनां ग्रहणम् ॥ अनुपात्तत्वादिति ॥ कर्मणा बध्यत इति स्मृतौ कर्मणेत्यनुक्त्वाऽविद्यादिभिरिति ॥ सामान्यतोनोक्तमिति भावः ॥ कर्मेति ॥ यज्ञार्थंकर्म न बंधकमित्यर्थकं यज्ञार्थादितीदं गीता वाक्यमपीत्यन्वयः ॥ तत्परिहारायेति ॥ कर्मणा बध्यत इति स्मृतिविरोधपरिहारायेत्यर्थः ॥ तथा च स्मृतिगीतावाक्ययोरुभयोरपि विशेषवचनत्वाविशेषात् स्मृत्यैव गीतावाक्यस्य बाधः किं न स्यादित्यभिप्रायः ॥ द्वयोः ॥ स्मृतिगीतावाक्ययोःइत्यादीत्यादिपदेन मुक्तसंग इति विशेषणसंग्रहः ॥ तदपेक्षया तादिति ॥ गीतावाक्यापेक्षया स्मृतिवाक्यमित्यर्थः ॥

संगराहितमित्यनुक्तं कस्मादुक्तमित्यत आह ॥ मुक्तेति ॥इष्टियाजुकः फलेच्छया यष्टा॥ननु कर्मणाबध्यते जंतुरित्यपि विशेषवचनम्॥अविद्यादीनामनेकेषां बंधकत्वेनाविद्यादिभिरिति सामान्यस्यानुपात्तत्वात्॥गीतावाक्यं कर्म न बंधकमितीदमपि विशेषवचनं तत्कथं तत्परिहाराया वतार्थ व्याख्यातमित्यत आह ॥ विशेषेति ॥ यद्ययुक्तविधया द्वयोर्विशेषवचनत्वं समंतथाऽपि गीतावाक्ये यज्ञार्थादित्यादिविशेषणमुच्यतेऽ

मुक्तसंग इति विशेषणात्॥ कामान्यः कामयत इति श्रुतेश्च॥अनिष्टमिष्टमिति वक्ष्यमाणत्वाच्च॥एतान्य
पि तु कर्माणीति च ॥तस्मान्नेष्टियाजुकः स्यादिति च ॥ विशेषवचनत्वे

स्तत्तदपेक्षया तत्सामान्यवचनमेव ॥ अतो युक्तमेतद्व्याख्यानमिति भावः अयमत्र प्रत्युत्तरक्रमः कर्मणा बध्यत इतिवाक्यमाश्रित्य न युद्धादिकर्मत्यागः कार्यः ॥

॥ कृ० ॥ ननु याजुक इत्यत्र योयजधातुस्तेनेष्टीति गतार्थमित्यत आह ॥ फलेच्छया यष्टेति ॥ इष्टिपदमिच्छार्थम ॥ इषु इच्छायामित्युक्तेः ॥ यस्माद्धुतप्रहुते देवान्ने तस्मान्न फलेच्छया यष्टा स्यादिति श्रुत्यर्थः ॥ अनेकेषां बंधकत्वेनेति ॥ प्रकृतिं स्वात्मसंश्लिष्टां गुणान्सत्वादिकानपि ॥ कर्माणि सूक्ष्मदेहं चेत्यनेकबंधकांस्तानिति भावः॥इत्यादिविशेषणमिति ॥मुक्तसंग इति विशेषणसंग्रहायादिशब्दः॥ बुद्ध्यारोहार्थं न हि कश्चिदित्यादिना यज्ञार्थादित्येतेनोक्तमर्थं संगृह्याह ॥ अयमत्रेति ॥ कुतः संकोच इति कोऽर्थः ॥ किं संकोच एव न कार्य इति किं वा वैष्णवकाम्यकर्मविषयत्वेन संकोचो न कार्य इति ॥

॥श्री०॥**तथा च**॥स्मृतेरेव गीतोक्तरीत्या संकोच इति भावः॥**नस्येति**॥तथा च संकोच इति भावः॥**असंकुचितार्थतायाः**॥स्मार्तकर्मशब्दस्येति शेषः॥वैयर्थ्यमेवोपपादयति॥**एवमपीति** ॥ कर्मणेति स्मृतेः शरीरयात्रार्थककर्मव्यतिरिक्तयजनादिकर्मविषयत्वं प्रकल्प्य तत्त्यागेऽपीत्यर्थः ॥ **मनोव्यापारस्येति** ॥ बंधापादकत्वेन मोक्षप्रतिबंधकस्येति ॥ वाक्यशेषः ॥ **तस्यैवेति** ॥ मनोव्यापारस्यैवान्वयव्यतिरेकाभ्यां बंधप्रयोजकत्वेन मोक्षप्रतिबंधकत्वावधारणात् ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोरिति वचनादित्यर्थः॥ननु परिस्पंदमात्रस्य त्यक्तुमशक्यत्वरूपाद्बाधकात् कर्मणेति स्मृतेः शरीरयात्रार्थकर्मव्यतिरिक्तकर्मविषयत्वमंगीक्रियत इत्यत आह ॥ **बाधकादिति** ॥ **अयमपि संकोच इति** ॥ वैष्णवनिष्कामकर्मव्यतिरिक्तावैष्णवकाम्यकर्मविषयत्वेनापि संकोचोऽङ्गीकार्य इत्यर्थः ॥ कुत इत्यत आह ॥ **विधानेति** ॥ तस्माद्युद्धस्व भारतेत्यादिविधानसामर्थ्याद्युद्धादिकर्मणामपि तत्तद्वर्णाश्रमोचितत्वेन निष्कामतया विष्णुप्रीत्यर्थमवश्यं कर्तव्यत्वादित्यर्थः ॥ अमुमुक्षिति मोक्षेच्छूनां चमत्वेमापि युद्धादिकं कर्म त्याज्यमेवेति भावः ॥ **इदमेवेति** ॥ युद्धादिकर्मणांबंधकत्वप्रतिपादकत्वं कर्मणेतिवाक्यमेवेत्यर्थः तथा च बंधकानिकर्माणि कथं मुमुक्षुः कुर्यादिति भावः तस्येत्यनंतरं क्रियमाणे कर्मणीतिशेषः ॥ ननु भवद्भिः कर्माणि अवैष्णवत्वकाम्यत्वरूपधर्मयोः परित्याग उच्यते ॥ मया तु धर्मिभूतकर्मण एवेति साम्यमेवेत्यत आह ॥ **धर्मीति** ॥ ९ ॥ ॥ क्रु० ॥ आद्ये आह

तस्यावैष्णवकाम्यकर्मविषयत्वात् कुतः संकोच इति चेत् परेणापि परिस्पंदमात्रस्य त्यक्तुमशक्यत्वेनासंकुचितार्थतायाः स्वीकर्तुमशक्यत्वात् ॥ तर्ह्यन्त एव बाधकाच्छरीरयात्रार्थकर्मव्यतिरिक्तविषयत्वं कल्प्यत इति चेत् न वैयर्थ्यात् ॥ एवमपि मनोव्यापारस्याल्पकत्वेनप्रतिबंधकाभावो नसिध्यति ॥ तस्यैवान्वयव्यतिरेकाभ्यां प्रयोजकत्वावधारणात् बाधकात्संकोचमंगीकुर्वतां चायमपि संकोचोऽङ्गीकार्यः ॥

॥ समेऽपिविशेषणं परिशिष्यते ॥ ९ ॥

विधानसामर्थ्याद्युद्धादीनामपि तत्तद्वर्णाश्रमोचितत्वात् ॥ न च विधानस्यामुमुक्षुविषयत्वम् ॥ कल्पकाभावात् ॥ नचेदमेववाक्यं कल्पकम् ॥ तस्यावैष्णवादिधर्मत्यागेन चरितार्थत्वात् ॥ धर्मिपरित्यागाद्धर्ममात्रपरित्यागस्यज्यायस्त्वात् ॥ अतो न कर्मस्वरूपंत्याज्यमिति ॥९ ॥

परेणापीति ॥ अशक्यत्वादिति ॥ अनेन न हि कश्चिदित्यस्योपयोगः सूचितः ॥ वैयर्थ्यमुपपादयति ॥ ॥ **एवमपीति** ॥ अनेन कर्मेंद्रियाणीति श्लोकद्वयस्य फलमुक्तम् ॥ द्वितीयेत्वाह ॥ **बाधकादिति** ॥ अनेन नियतमित्यस्योपयोगो दर्शितः ॥ ९ ॥

॥ श्री० ॥ स्तुतिरिति ॥ समग्रस्याप्यर्थवादस्य गीताया दर्शनादित्थं व्याख्यातमिति द्रष्टव्यं ॥ कौंडिन्येनेदं अनुष्ठितमित्यादिनामग्रहणपूर्वकवचनं परकृतिः ॥ पूर्वैरनुष्ठितमिति सामान्यतो वचनं पुराकल्प इति तयोर्भेदः ॥ केचित्तु एककर्तृकोपाख्यानं परकृतिः ॥ अनेककर्तृकोपाख्यानं पुराकल्प इति तयोर्भेद इत्याहुः ॥ तथा हि ॥ एष वोऽस्त्विष्टकामधुक् ॥ श्रेयः परमवाप्स्यथ ॥ इष्टान् भोगानिति स्तुतिः ॥ तैर्दत्तानित्यादि निंदा॥ पुरोवाच प्रजापतिरिति परकृतिः॥यज्ञशिष्टाशिन इति पुराकल्पः॥कथ्यत इति द्रष्टव्यम्॥१०॥११॥१२॥१३॥

सहयज्ञा इत्यादेर्नप्रकृते संगतिर्दृश्यते अत आह ॥ अत्रेति ॥वर्णाश्रमोचितस्य कर्मणः सर्वथा कर्तव्यत्वे स्तुतिर्निंदा परकृतिः पुराकल्पोऽ

॥ अत्रार्थवादमाह ॥ सहयज्ञा इति ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः ॥ अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक् ॥१०॥
देवान्भावयतानेन तेदेवाभावयंतुवः ॥ परस्परं भावयंतः श्रेयःपरमवाप्स्यथ ॥ ११ ॥
इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः ॥ तैर्दत्तानप्रदायैभ्योयो भुंक्तेस्तेनएवसः॥१२
यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मकारणात् ॥१३॥

र्थवादः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ ॥ न० ॥ बहूनामर्थानां प्रकृतत्वात्कस्यपरामर्श इत्यत आह ॥ वर्णाश्रमोचितस्येति ॥कर्तव्य तस्य विधिवाक्यबोध्यत्वान्न तत्रार्थवादोपयोग इत्यत उक्तम ॥ सर्वथेति ॥ स्ववर्णाश्रमोचित कर्मावश्यं कर्तव्यमेवेति ज्ञापयितुमि यर्थ ॥ स्तुत्या करणे लाभस्य निंदया चाकरणेऽनिष्टस्य सूचनादिति भावः॥ तेनार्थवादस्य न शब्दविषयोक्तार्थप्रतिपादकत्वम ॥ [illegible] ॥ नान्यनुमानविषया तात्पर्यविरुद्धत्वा ॥ नैव तस्य [illegible] प्रामाण्यादिति निरस्तम ॥अर्थवादस्य प्राशस्त्य प्रतिपाद्यावश्यकत्वज्ञापकत्वात ॥ परकृतिरिति ॥ एको यत्र कर्तृत्वेनोपाख्यायते सा परकृतिः ॥यथा [illegible] आमोनक इति॥अनेके यत्र कर्तृत्वेनोपाख्यायंते स पुराकल्पः ॥ यथा ॥ त्रयोहोद्गीथे कुशला बभूवुरिति ॥ प्रकृते चैष वोऽस्त्विष्टकामधुगित्यादिस्तुतिः स्तेन एवेत्यादिर्निंदा॥ पुरोवाचेति परकृतिरिष्टान्भोगानिति पुराकल्पस्य च सत्वात्स्तुतिरित्याद्युक्तम ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

१ वादिराजस्वामिनो गुर्वर्थदीपिकायां या परेषा कृतिरुच्यते सा परकृतिः ॥ पूर्वाचार्यकृतपर्यालोचकल्पना सा पुराकल्प इत्यप्याहुः २ इष्टान्कामानितिशेषः ३ तर्पयत ४ यज्ञेन ५ अन्नादीन्पदार्थान ६ यज्ञादिभिर्गृहीतं [illegible] ७ वैश्वदेवादियज्ञावशिष्टभोजिनः ८ कंडनी पेषणी चुल्ली उदकुंभीच मार्जनी ॥ पंचसूनागृहस्थस्य ताभिः स्वर्गंनगच्छती तिसर्वदोषैः ९ बृहदुपनिषदष्टाध्यायीत्रुक्का तदनुसारेणाय षष्ठाध्यायारंभ ॥ भाष्यानुरोधेनायं चतुर्थाध्यायारंभ ॥ १० छांदोग्ये तृतीये प्रपाठके खंडमष्टमम् ॥शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैबलिरिति वाक्यशेषः ॥

॥ श्री० ॥ अत्रेतीति ॥ वर्णाश्रमोचितकर्मणः कर्तव्यत्व इत्यर्थः ॥ मेघचक्राभिमानी च पर्जन्य इत्युत्तरभाष्यानुसारेण मेघ इत्युक्तम् ॥ इति वक्ष्यतीति ॥ अनुपदमेवेति शेषः ॥ तथा च परित्यागरूपक्रियायाः पर्जन्योपभोग्यत्वमयुक्तमिति भावः ॥ पर्जन्येनाद्यत इति पर्जन्यान्नमिति व्युत्पत्तिमभिप्रेत्य व्याचष्टे ॥ पर्जन्योपभोग्यत्वादिति॥ननु पर्जन्योपभोग्यत्वेऽपि कथं पर्जन्यकारणत्वमित्यत आह ॥ उपभुक्तेन चेति ॥ तस्य पर्जन्यस्य यज्ञाद्यात्मिकस्योपचयादित्यर्थः ॥ पर्जन्यत्वं ॥पर्जन्यपदं॥ स यज्ञ इति ॥ पर्जन्यपदप्राप्तिहेतुभूतो यज्ञ इत्यर्थः ॥ चक्रमापाद्यमिति ॥ अन्नादर्जन्यादित्युक्तक्रमेण संपाद्यमित्यर्थः ॥क ॥ पर्जन्यशब्देनादित्यमात्रविवक्षायां मेघचक्राभिमानी च पर्जन्य इति उत्तरभाष्याननुगुण्यादाह ॥ अत्र

अन्नादित्यादेः संगतिमाह ॥ हेत्वंतरमिति ॥ अत्रेत्यनुवर्तते ॥ अत्र पर्जन्यो मेघ आदित्यश्चाविवक्षितो ॥ तत्रादित्यस्य पूर्वसिद्धस्य कथं यज्ञाद्भवति पर्जन्यइति यज्ञः कारणत्वेनोच्यत इत्यत आह ॥ यज्ञ इति ॥ यद्यपियज्ञो देवतामुद्दिश्यद्रव्यपरित्याग इति वक्ष्यति तथाप्यत्र परित्यज्यमानं द्रव्यं गृह्यते ॥ तस्यपर्जन्यान्नत्वात्पर्जन्योपभोग्यत्वात उपभुक्तेन च तस्य बलाद्युपचयाद्यज्ञस्तस्य पर्जन्यस्य कारणमुच्यते॥

हेत्वंतरमाह ॥ अन्नादिति ॥ यज्ञः पर्जन्यान्नत्वात्तत्कारणमुच्यते पूर्वयज्ञविवक्षायां तस्य चक्रप्रवेशो न

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः ॥ यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

॥ भवति ॥ तद्व्यापाद्यं कर्मविधयो ॥

ननु पर्जन्यो देवतात्मा यज्ञेनपर्जन्यत्वंप्राप्तः स यज्ञो विवक्षितोऽत्रास्तु तथा सति यज्ञात्पर्जन्योद्भवो मुख्य एव संपत्स्यत इति ॥ नेत्याह ॥ पूर्वेति ॥ तस्य पर्जन्यपदप्राप्तिहेतोः ॥ यज्ञस्येतिशेषः॥ननु तदा चक्रं प्रवृत्तमेव अतः कथंपूर्वयज्ञस्य चक्राप्रवेश इत्यत आह ॥ त द्धीति ॥ तच्चक्रमापाद्यं ह्यत्र विवक्षितम् ॥

पर्जन्य इति ॥ वक्ष्यतीति अत्रैवाध्यायेऽग्रिमग्रंथ इति शेषः ननु यज्ञस्य कथं पर्जन्यान्नत्वं तद्भक्ष्यत्वाभावादित्यत आह॥पर्जन्योपभोग्यत्वादिति ॥ननु पर्जन्यस्य यज्ञादुत्पत्त्यभावात्कथं तयोर्जन्यजनकतेत्यत आह ॥ उपभुक्तेन चेति॥

॥ श्री० ॥ आपाद्यस्यैवेति ॥ यज्ञाद्भवतीत्यापाद्यचक्रस्यैवेत्यर्थः ॥ मूलं योजयति ॥ आपाद्ये चाति ॥ संपाद्ये चक्र इति शेषः ॥ अत इति कोर्थ इति ॥ अतस्त्वयाऽपि कर्म कर्त्तव्यमित्यत्र हेतुत्वेनोक्तस्यातः शब्दस्य कोऽर्थ इत्यर्थः ॥ चक्रप्रवृत्तीति ॥ त्वयाऽपि कर्म कृतं चेत्तेनापि यज्ञादिद्वारा चक्रप्रवृत्तिर्भविष्यतीति भावः ॥ कर्मत्वादिति ॥ चक्रप्रवृत्तिरूपफलं भविष्यतीति बुद्ध्या कर्म न कर्त्तव्यं किं नाम पर्जन्य कृतकर्मणा त्वया क्रियमाणकर्मणः कर्मत्वेन साम्यात् त्वयाऽपि कर्म कर्तव्यमित्यर्थः ॥ पर्जन्योत्पत्त्यसंभवेनेति ॥ अत्र हि पर्जन्यशब्देन देवताऽभिप्रेता तथैव पूर्वं शक्तित्वात् तथा चेदानीतनेनास्मदादिकर्मणा देवतोत्पत्त्यसंभवेन यज्ञाद्भवति पर्जन्य इत्यस्यायोगाच्चक्राप्रवृत्तिरित्यर्थः ॥ ननु तत्र क्राप्रवृत्तिः ॥ यथा पर्जन्यकृतयज्ञेन पर्जन्यस्य पर्जन्यत्वं जात एवमस्मत्कृतयज्ञेनाप्यस्माकं पर्जन्यत्वं भविष्यति तथा च यज्ञाद्भवति पर्जन्य इत्यस्यसंभवेन युक्ता चक्रप्रवृत्तिरितिचेत्तत्राह ॥ न हीति कारिणः कर्मकर्तारः ॥ तस्य नियताधिकारिसाध्यत्वादिति भावः ॥ कर्मत्वसामान्येन ॥ कर्मत्वसाम्येन ॥ मात्रशब्दार्थमाह ॥ फलरहितेनेति ॥ चक्रप्रवृत्याख्यफलरहितेनेत्यर्थः ॥

न तु प्रागापादितं

कुतः कर्मविधये ह्येतदुच्यते यदि विहितं कर्म करिष्यसि तर्हि जगच्चक्रप्रवृत्तिर्भविष्यति अन्यथा तद्विघातोऽतस्त्वया कर्म कर्तव्यमिति कर्मविध्युपयोगिता चापाद्यस्यैव न त्वापादितस्य ॥ आपाद्ये च यज्ञव्यक्तिविशेषस्य पर्जन्यपदप्राप्तिहेतोर्न प्रवेश इत्यर्थः ॥ प्राक् पर्जन्येन कर्म कृतं तेन च यज्ञादिद्वारा चक्रं प्रवृत्तम्॥अतस्त्वयाऽपि कर्मकर्तव्यमित्येवं॥प्रागापादितचक्रोक्तिरपि॥कर्मविध्युपयोगिनी भवतीति चेत्॥मै

॥ ना तु साम्यमात्रेणेदानीं कार्यम् ॥ मेघचक्राभिमानी पर्जन्यः ॥

वम्॥अत इति कोऽर्थः॥त्वत्कर्मणाऽपि चक्रप्रवृत्तिसंभवादिति वा कर्मत्वादिति॥वा॥नाद्यः ॥इदानींतनपुरुषकर्मजेन यज्ञेन पर्जन्योत्पत्त्यसंभवे न चक्राप्रवृत्तेः ॥ नहिमर्त्योऽपिकर्म कारिणः पर्जन्यत्वं प्राप्नुवंति ॥ द्वितीयंदूषयति ॥ न त्विति फलरहितेन कर्मत्वसामान्येनेदानीं कर्म कार्यं न भवति ॥ स्वयं क्लेशरूपत्वादिति ॥ प्रकारांतरेणापि यज्ञाद्भवतिपर्जन्य इत्येतद्दर्श(द्रट)यितुमाह ॥ मेघेति ॥

१आपाद्यस्य संपाद्यस्य २ आपादितस्य संपादितस्येत्यर्थः ॥

॥ श्री० ॥ चक्रंसमूहइति ॥ चक्रं च गणसंघश्चेत्यभिधानादिति भावः ॥ स्वकीयमिति ॥ स्वकीयमुदकं नद्यः समुद्रे नैव जानते वायुस्तु तत्पृथक् ज्ञात्वा मेघे कृत्वा प्रवर्षतीति स्मृतौ वायुः समुद्रगतं तत्तन्नद्युदकं पृथक् कृत्वा समुद्रात्संगृह्य मेघे कृत्वा पश्चात्तत्तन्नदीसमीपस्थदेशेष प्रवर्षतीति समुद्रान्नद्युदकग्रहणेन वृष्ट्युक्तौ परं परया समुद्रादेवोक्ता भवतीत्याशयः ॥ शेष इति ॥ अयं च शेषः ॥ आदित्यात्समुद्राच्चेत्यनंतरं द्रष्टव्यः ॥ नन्वग्नाविति स्मृतौ परंपरया यज्ञाद्वृष्टिचक्रप्रवृत्तिरुच्यते न मेघचक्रस्येत्यत आह ॥ वार्षिका इति ॥ वर्षणशीला इत्यर्थः ॥ वृषपतनपदृष्ट्यासक्तपहननकमगमशम्य उकञिति सूत्रेण वृषादिधातुभ्यस्ताच्छील्ये उकञ्प्रत्ययविधानादत्रापि वृषु सेचनेऽस्मात्ताच्छील्ये उकञ्प्रत्यये गुणे तस्य चाण परत्वे वृद्ध्यादावादिवृद्धौ वारुण उकवार्षुकेति रूपं द्रष्टव्यम ॥ वार्षिका ॥ इत्यपि क्वचित्पाठः ॥ तत्र वर्षासु भवा वार्षिकाः वर्षाकालीना इत्यर्थः ॥ कालवाचिनो वर्षाशब्दात्कालाट्ठञिति ठञ्प्रत्ययेठस्येकादेशे वृद्ध्यादावादिवृद्धौ सस्य षकारस्यस्य आकारस्य लोपे वार्षिकेति रूपं द्रष्टव्यम ॥ अत्र यद्यपि मेघचक्रं पूर्वमपि वृत्तमेव तथाऽपि वार्षिकत्वाख्यविशेषणोपपत्त्या विशिष्टोपादानं द्रष्टव्य ॥ ननु यज्ञः पर्जन्यात्मत्वादित्यादिना मेघचक्राभिमानी च पर्जन्य इत्यादिना च मुख्य मेव पर्जन्यस्य यज्ञाद्भवनं प्रतिपाद्यते तत् कथं प्रकारांतरेणोक्तमित्यतो मुख्यवृत्तिप्रसक्तरूपाभेवगौणा लक्षणां चाभिप्रेत्य प्रकारांतरेणोक्तमित्याशयेनाह॥ प्राक्पर्जन्यस्येति॥गौणामिति

चक्रं समूहः ॥ ततः किमित्यत आह ॥ तच्चेति ॥ मेघचक्रम् कुत इत्यतआह ॥ अग्नाविति ॥ ननु स्वकीयमुदकं नद्य॥ इति समुद्राद्वृष्टि

तच्च यज्ञाद्भवति ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नं ततःप्रजा

॥इति स्मृतेश्च॥ उभयवचनाच्चादित्यात्समुद्राच्चाविरोधः ॥अतश्च यज्ञात्पर्जन्योद्भवः संभवति ॥

रुच्यते॥ अत आदित्याद्वृष्ट्यंगीकारे नहि रोधः स्यादित्यत आह ॥ उभयेति ॥ वृष्ट्यंगीकारादिविशेषः वार्षि(षु)कामेघा इह वृष्टिशब्देनोच्यते ॥ ततोऽपि किमित्यत आह ॥ अतश्चेति ॥ प्राक्पर्जन्यस्य भवनं गौणमंगीकृत्य व्याख्यातम्

॥कु०॥एवं प्रवर्तितं चक्रमिति चक्रशब्दस्य परंपराविशेषवाचित्वे तस्यमेघचक्रत्वानुपपत्तिरित्यत आह ॥ चक्रंसमूह इति स्वकीयमुदकमिति ॥ स्वकीयमुदकं नद्यः समुद्रे नैव जानते ॥ वायुस्तु तत्पृथक् ज्ञात्वा मेघे कृत्वा प्रवर्षतीति वाक्यशेषः ॥ नन्वग्नेर्वृष्टिरादित्यद्वारा यज्ञजन्यत्वमुक्तम तत्कथमिदं मेघचक्रस्य यज्ञजन्यत्वं मानमित्यत आह ॥वर्षुका मेघाइति ॥ द्वयसंबंधदर्शनाय वर्षुका इत्युक्तम ॥ वर्षणशीला इत्यर्थः ॥ वृषपतनपदृष्ट्याभ्रश्टेति वर्षेरुकञ् ॥ वार्षिका इति पाठे तु वर्षकशब्दात्स्वार्थिकोऽणिति बोध्यम ॥ ननु यज्ञः पर्जन्यात्मत्वादित्यादिना मेघचक्राभिमानी चेत्यादिना च ॥ मुख्यमेव पर्जन्यस्य भवनं प्रतिपाद्यते अतः कथं प्रकारान्तरेणोक्तमित्यत आह ॥ प्रागिति गौणमिति ॥ ॥ ॥ ॥

१ आदित्याज्जायते वृष्टिरित्यत्र ॥ २ अग्नौ प्रास्ताहुतिरिति स्मृतौ ॥

॥ श्री० ॥ उत्पन्नाभिवृद्धयोरूपचयाख्यगुणयोगादभिवृद्धबलादिर्भवतीति भवनं गौणमंगीकृत्य व्याख्यातमित्यर्थः अभिमन्यमानं मेघचक्रं ॥ तद्गतस्य तत्र मुख्यतया विद्य मानस्य भवनस्य भवनप्रतिपादकस्य भवतीतिशब्दस्य ॥ अभिमानिनि ॥ पर्जन्यशब्दवाच्यादित्ये ॥ नन्वाभिमानिव्यपदेशस्त्वित्यत्राभिमन्यमाननिष्ठशब्दानामभिमानिन्येव मुख्यतया अ भिमानिनिष्ठशब्दानां चाभिमन्यमाने लक्षणायाएवोक्तत्वेन कथमिदं व्याख्यानमित्यस्वरमादाह ॥ यद्वेति ॥ अभिमन्यमानगतशब्दानां अभिमानिनि मुख्यत्वं च अभिमानिव्यप देशस्तुविशेषानुगतिभ्यामितिसूत्रे चाल्लक्षणादि विनैवात्र विहद्रादिममाश्रयात तत्तन्नामानएवैते तत्तद्वस्त्वभिमानिनः संतोत्याद्यनुव्याख्याने च स्पष्टमुक्तमित्यवगंतव्यम् ॥ नन्वेवं पर्ज न्यशब्दस्याभिमन्यमाने मेघचक्रे लक्षणांगीकारे जननात्परमस्यादेः पर्जन्यो मेघसंततिरिति तात्पर्ये परं जनयतीति पर्जन्यइति कथं योगरूपमुख्यवृत्त्या पर्जन्यशब्दो मेघसंततौ व्याख्यात इत्यतस्तदपिव्याख्यानांतरमतो न तद्विरोध इत्याशयेनाह ॥ तात्पर्यनिर्णये त्विति ॥ तत्कथमिति ॥ आत्माश्रयादिति भावः ॥

इदानीं त्वभिमन्यमानगतस्य भवनस्याभिमानिनि लक्षणामाश्रित्येति भेदः॥ यद्वा अभिमानिगतस्य पर्जन्यशब्दस्य अभिमन्यमाने लक्षणा

॥ यज्ञो देवतामुद्दिश्य द्रव्यपरित्यागः ॥ कर्मेतरक्रिया ॥ १४ ॥

माश्रित्य द्वितीयं व्याख्यानं तात्पर्यनिर्णये तु मेघसंततौ पर्जन्यशब्दो यौगिकोंगीकृतः ॥ ननु यज्ञः कर्मात्मकस्तत्कथमुच्यते यज्ञः कर्मसमु द्भव इति तत्राह ॥ यज्ञ इति ॥

॥ कृ० ॥ अर्थनिष्ठालक्षणे(गौणी)ति मतेनैव मुक्त म् ॥ वस्तुतो भवनवाचकं भवतीति पदं गौणमित्यर्थः ॥ यज्ञजन्यपुरुष आदित्ये च बलाद्युपचयलक्षणगुणसाम्यादिति भावः ॥ अर्थनिष्ठा लक्षणेति मतेन भवनस्येत्युक्तम् ॥ वस्तुतस्तु भव तीति पदस्येत्यर्थः ॥ शक्यसंबंधप्रदर्शनायोक्तम् ॥ अभिमन्यमानगतस्येति॥ अभिमानिनीति च॥ अत्र गौणीपक्षे पर्जन्यो यज्ञजन्यसदृश इत्यर्थबोधः लक्षणायां तु यज्ञजन्याभिमानीत्यर्थ बोधइति विवेकः ॥ ननु भवतिपदस्य लक्षणा चेत्तर्हि भवदभिमानी च पर्जन्य इति वाच्यम् ॥ शक्यतावच्छेदकपुरस्कारेण शक्यसंबंधप्रदर्शनस्य तांत्रिकसंमतेः ॥ मेघचक्राभिमानी च पर्जन्य इति मेघचक्रपर्जन्ययोः संबंधप्रदर्शनं त्वयुक्तमित्यरुचेराह ॥ यद्वेति ॥ अनेनात्र पर्जन्यो मेघ इत्युक्तं विवृतम् ॥ ननु पर्जन्यशब्दस्य लाक्षणिकत्वे तात्पर्यनिर्णयविरोधः ॥ तत्र तस्य योगेन मुख्यत्वस्वीकारादित्यत आह ॥ तात्पर्यनिर्णय त्विति ॥ रूढ्यभाव एवोभयत्राभिप्रेतः ॥ योगलक्षणान्यतरनिराकरणं तु न क्वाप्यभिप्रेतमिति न विरोध इति भावः ॥

---

१ अ. २ पा. १ अ. ३ सू. १ मृदब्रवीत ता आप ऐक्षंतत्यादिश्रुतौ अभिमानिनश्चेतनस्यैव व्यपदेशेन जडस्य ॥ सभिमानिनस्तथा सामर्थ्यादभिमन्यमाने सर्वत्रांशतोव्याप्तत्वाच्चेति सूत्रार्थः ॥ अत्रकथंयुक्तिविरोधमात्रेण श्रुतेः प्रतीतार्थप्रत्याख्यानमिति शंकानिरासार्थमभिमानिन्येव मृदादिशब्दा मुख्याइत्यंगीकारोऽवश्यकः ॥ स च सूत्रे तु नासूचितः अभिमानिपदेनोपपा दितश्चेतिज्ञेयम् ॥ २ भाष्ये तात्पर्ये चेत्यर्थः ॥

॥ श्री० ॥ **यज्ञांगभूतेति** ॥ पुरोडाशादिकृतिरूपेत्यर्थः ॥ ननु यज्ञशब्देन लक्षणयाऽपूर्वमेव गृह्यते कर्मशब्देन च देवतामुद्दिश्यद्रव्यपरित्यागरूपो यज्ञस्तथा च कर्मेतरक्रियेतिव्याख्यानंयुक्तमित्यत आह ॥ **अपूर्वांगीकारइति** ॥ यज्ञशब्देनेति शेषः ॥**रूढित्यागेनेति** ॥ देवतामुद्दिश्यद्रव्यपरित्यागे यज्ञशब्दस्य रूढत्वात तत्परित्यागापत्तिरितिभावः ॥ **लक्षणाश्रयणं स्यादिति** ॥ मुख्यवृत्तिपरित्यागेनामुख्यवृत्त्याश्रयणं च लज्जाकरमिति भावः ॥ १४ ॥ भाष्ये ॥ **बुद्धिर्ज्ञानमित्यादिभ्य इति** ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोऽभावो भयंचाभयमेवच ॥ अहिंसा समता तुष्टिस्तपोदानं यशोऽयशः ॥ भवंति भावा भूतानां मत्त एव पृथग्विधा इति गीतायां भगवता दानशब्दोपलक्षितकर्ममात्रस्य स्वाख्यपरब्रह्मजन्यत्वोक्तेरिति द्रष्टव्यम ॥ **अंतर्यामिद्वारेति** ॥ वेदः कर्मप्रकाशको यथा स्यात्तथेश्वरो नियामयतीति नियामकेश्वरद्वारेत्यर्थः ॥ **अंतत इति** ॥ ब्रह्मशब्देन वेदं गृहीत्वा तस्य कर्मप्रकाशकत्वांगीकारेऽपि नियामकतयांऽतत इश्वरोऽगीकार्य इत्यर्थः ॥ **शब्दतः** ॥ ब्रह्मशब्दतः ॥ **स्वयमेवेति** ॥ अर्थप्रकाशकत्वस्य शब्दस्वभावत्वादिति भावः॥

इतरक्रिया यज्ञांगभूता ॥ अपूर्वांगीकारे रूढित्यागेन लक्षणाश्रयणं स्यात्॥१४॥कर्म ब्रह्मोद्भवं ब्रह्मणा वेदेन प्रकाश्यमिति परेषां व्याख्यानमसदिति भावेनाह ॥ कर्मेति ॥ ब्रह्मणः परब्रह्मणः ॥ कुत इत्यत आह ॥ एष हीति॥ अपव्याख्यानं प्रत्याख्याति॥ न चेति ॥ उद्भवशब्दस्य मुख्येऽभिधेये जन्मनि संभाव्यमाने सत्यौपचारिकं प्रकाशनमर्थतया न कल्प्यम्॥तथा ब्रह्मशब्दस्य मुख्येऽभिधेये परब्रह्मणि संभाव्य

कर्म ब्रह्मणो जायते ॥ एष ह्येव साधु कर्म कारयति ॥ बुद्धिर्ज्ञानमित्यादिभ्यः॥ न च मुख्ये संभा
॥ व्यमाने पारंपर्येणोपचारिकं कल्प्यम्॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ॥ तस्मात्सर्वगतंब्रह्म नित्यंयज्ञे प्रतिष्ठितम् ॥१५॥

माने सत्यौपचारिकममुख्यं वेदाख्यं ब्रह्मशब्दार्थतया न कल्प्यम् ॥ किं चैवं व्याचक्षणेनापि वेदस्य कर्मप्रकाशकत्वमंतर्यामिद्वारा परंपरयांऽगीकार्यम् ॥ तथा चांततोऽपि परब्रह्मण्यंगीकार्ये शब्दत एव प्राप्तस्य तस्य परित्यागोऽनुपपन्नः ननु वेदः स्वयमेव कर्मप्रकाशक इति

॥ कृ० ॥ अपूर्वांगीकार इति ॥ यज्ञशब्देनेतिशेषः ॥ १४ ॥ अंतर्यामिद्वारेति ॥ नियामकेश्वरद्वारेत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ किं परब्रह्मणेति ॥ नियामकेनाक्षरेणेत्यर्थः ॥ भाष्ये ॥ सर्वनियमनश्रुतेश्चेति ॥ [illegible] भाव ॥ स्वभाव इति ॥ औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इति जैमिनिवचनादिति भाव ॥ [illegible] ॥ [illegible] भावः ॥ भाष्येऽचिन्त्यशक्तिश्चोक्तेति ॥ [illegible] इत्युक्तम ॥ आधिक्येनेति ॥ अभिमानिदेवतानामपि [illegible] ॥ नियामकत्वात्पृथक्त्वेन [illegible] इति [illegible] भाव. ॥ भाष्ये ॥ बिंबपूर्वैवेति ॥ बिंबचेष्टापूर्वेत्यर्थः ॥ नतीति ॥ न [illegible] जीवानां [illegible] ॥

किंपरब्रह्मणा ॥ अतो न परंपरेत्यत आह ॥ न चेति ॥ न केवलं जडत्वाद्वेदस्यान्याधीनत्वं किं त्वागमाद्विष्णवधीनत्वं च प्रसिद्धमित्याह॥ ॥ एतस्येति ॥ विष्णोरितिशेषः ॥ ननु शब्दस्यार्थप्रकाशनं स्वभावो न त्वागंतुको व्यापारः यथाग्नेरौष्ण्यम ॥ ततो जडत्वेऽपि न परापेक्षेत्यतः स्वभावस्यापि भगवदधीनत्वे प्रमाणमाह ॥ द्रव्यमिति ॥ प्रमाणसिद्धमपि स्वभावनियमनं विष्णोरसंभावितमित्यत आह ॥ अचिंत्येति ॥

न च जडानां स्वतःप्रवृत्तिःसंभवति ॥ एतस्य वा अक्षरस्येति सर्वनियमनश्रुतेश्च॥ द्रव्यं कर्म च कालश्चेत्यादेश्च ॥ अचिंत्यशक्तिश्चोक्ता ॥ जीवस्य च प्रतिबिंबस्य बिंबपूर्वैव चेष्टा ॥ नकर्तृत्वमित्यादिनि॥ ॥ धाम्न ॥ अक्षराणि प्रसिद्धानि तेभ्यो ह्यभिव्यज्यते परं ब्रह्म ॥

यदि जडस्य न स्वतः प्रवृत्तिस्तर्हि अभिमानिदेवताद्वाराऽस्तु ॥ तथा च नातोऽपि परब्रह्मांगीकार इत्यत आह ॥ जीवस्य चेति ॥ ततश्चाविक्येन परंपरेति भावः ॥ न केवलं प्रतिबिंबत्वाज्जीवस्य स्वतः प्रवृत्त्यभावः किं त्वागमाच्चेत्याह ॥ नेति ॥ ब्रह्माक्षरसमुद्भवमित्यत्रब्रह्मवेदोऽक्षरात्परब्रह्मणो जायत इति परेषां व्याख्यानमसदिति भावेनाह ॥ अक्षराणीति ॥ प्रसिद्धान्यकारादीनि

॥ कृ० ॥ ननु ब्रह्माक्षरसमुद्भवमित्यत्र परब्रह्माक्षर[illegible]मिति नम ॥ न च तदुक्तम ॥ [illegible] प्रसिद्धत्वात्तेषां न ब्रह्माभिव्यंजकत्वाभावादित्यत आह ॥ अकारादीनीति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१ भाष्ये श्रुतेश्चेति चकारात् २ भाष्ये श्रुतेश्चेत्यनंतरम् ॥

॥ श्री० ॥ नन्वक्षरशब्देन अकारादिप्रसिद्धाक्षरग्रहणे तेषां ब्रह्मव्यंजकत्वायोगात् योगेनाक्षरत्वं वेदस्येति चेत् प्रमाणाद्याहरणासंगतेः केवलवर्णानां वेदत्वाभावादित्याशंक्य व्याचष्टे ॥ नियतानुपूर्वीति ॥ वेद इतीति ॥ नियतानुपूर्वीविशिष्टवर्णानामेव वेदत्वादिति भावः ॥ [illegible] ॥ समुद्रवशब्दस्येति शेषः ॥ [illegible] ॥ अनादिनिधनत्वादिविशिष्टं ब्रह्म को जानातीति द्वितीयप्रश्नस्यैव परित्यागे [illegible] ॥ जायतेति शेष इति ॥ को जानातीति ॥ ज्ञापकप्रमाणाभावात् ॥ आगमेतरप्रमाणानां बाह्यार्थत्वादिति भावः ॥ [illegible] इति ॥ ब्रह्म [illegible] ॥ कस्य इति ॥ ब्रह्मेति ॥ परमात्मनि भगवतीति [illegible] भावः ॥ बृहत्त्वयोगेनेति [illegible] ब्रह्मेति योगेनेत्यर्थः ॥ [illegible] ॥ बृहत्त्वेन प्रत्ययेऽसामर्थ्ये यथादृष्टं च मति ब्रह्मणि [illegible] इति ॥ [illegible] भावः ॥

नियतानुपूर्वीविशिष्टानि वेद इति यावत् ॥ ननु समुद्रवशब्दस्य मुख्यार्थागोचरत्वे किं बाधकं येनाभिव्यक्त्यन्त उद्भवरूपोऽर्थः स्वीक्रियते ॥ किं च प्रमाणांतरेणापि ब्रह्माभिव्यक्तिसंभवात्तस्य इति किमर्थमुक्तमित्यत आह ॥ अन्यथेति ॥ व्यक्तत्वयोगाभावेऽनादिनिधनं ब्रह्म कथं

अन्यथाऽनादिनिधनमचिंत्यं परिपूर्णमपि ब्रह्म को जानाति ॥ न च रूढिं विना योगांगीकारो युक्तः ॥

जायते इति शेषः ॥ तथा वेदस्य तदभिव्यंजकत्वानंगीकारे परिपूर्णत्वादचिंत्यं ब्रह्म को जानाति ॥ वाक्यार्थद्वयसमुच्चयेऽपिशब्दः ॥ समुद्भवशब्दस्य मुख्यार्थताभावात्परोक्तोऽर्थः किं न स्यादित्यत आह ॥ न चेति ॥ ब्रह्मशब्दो हि परब्रह्मणि रूढः वेदे तु बृहत्त्वयोगेन प्रवृत्तः ॥ तथाऽक्षरशब्दो वर्णेषु रूढः

॥ कु० ॥ नन्विदमप्ययुक्तम् ॥ अकारादिमात्रस्य ब्रह्माभिव्यंजकत्वाभावादित्यत आह ॥ नियतानुपूर्वीति ॥ ननु [illegible] नियतानुपूर्वीविशिष्टानि न च तेषां ब्रह्मप्रकाशकत्वमित्यत आह ॥ वेद इति ॥ यावदिति को जानातीति ॥ प्रमाणाभावादिति भावः ॥ वाक्यार्थद्वयेति ॥ [illegible] ब्रह्म को जानातीति न वाक्यार्थद्वयसमुच्चय इत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१ भाष्ये परिपूर्णमिति अचिन्त्यत्वे हेतुत्वेनोपात्तमिति भावः अन्यथाऽचिन्त्यत्वेनेतरप्रमाणाविषयत्वासिद्धेरस्तत्वैयर्थ्यात्॥

॥ श्री० ॥ अक्षरणेति ॥ न क्षरतीत्यक्षरमिति योगेनेत्यर्थः ॥ तच्चन्यायबाह्यमिति ॥ रूढित्यागेन योगांगीकरणं रूढिर्योगमपहरतीति न्यायविरुद्धमित्यर्थः ॥ परामर्शाच्चेति परामर्शश्च पूर्वोक्तस्यैव नानुक्तस्येति भावः ॥ तथा चेति ॥ ब्रह्माक्षरसमुद्भवमिति पूर्ववाक्यस्थब्रह्मशब्दस्य परब्रह्मार्थत्वे सतीत्यर्थः ॥ अर्थादिति ॥ अन्यथाऽनुपपन्येत्यर्थः ॥ यदा ब्रह्मशब्दः परब्रह्मपरस्तदाऽक्षरशब्दस्य न परब्रह्मपरत्वं तथात्वे तस्मादेव स्वस्योत्पत्तिप्रसंगात् तथा चाक्षरशब्दस्य वेदपरत्वानंगीकारे वाक्यार्थानुपपत्त्याऽक्षरशब्दो वेदवचन इति सिद्ध्यतीति भावः ॥ प्रागिति ॥ ब्रह्माक्षरसमुद्भवमित्यत्रेत्यर्थः ॥ ब्रह्मशब्देनेति ॥ तस्मात्सर्वगतं ब्रह्मेत्यत्र ब्रह्मशब्देनेत्यर्थः ॥ अत इति ॥ परामर्शस्यान्यथासिद्धत्वादिति भावः ॥ नन्वात्मा वा इदमेक एवाग्र आसीदिति प्रकरणे तथा ह्यात्मा सर्वतः शरीरैः परिवृत इति प्रकरणे चैकेनैवात्मशब्देन प्रकरणद्वये उक्तत्वात् द्विरुक्तेनेश्वरजीवाख्यं वस्तुद्वयं गृह्यत एवात आह ॥ एकस्मिन्नेवेति ॥ अन्नात्पुरुष इति ॥ एकस्मिन्नेव तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिसृष्टिप्रकरणेऽन्नात्पुरुषः स वा एष पुरुषोऽन्नरसमय इत्यत्रैकेनैव पुरुषशब्देन देहेश्वराख्यवस्तुद्वयग्रहणादेकशब्देन द्विरुक्तेन वस्तुद्वयं नोच्यत इति नियमो न संभवतीत्यर्थः ॥ भेदश्रुतिं विनेत्युक्तमिति ॥

॥ परब्रह्मणि त्वक्षरणयोगेन प्रवृत्तः ॥ तथा चान्यथा व्याकुर्वता रूढिं परित्यज्य योगोऽङ्गीकृतः स्यात् तच्च न्यायबाह्यमित्यर्थः॥ इतश्च ब्रह्मशब्दः परब्रह्मवाचीत्याह॥ परामर्शाच्चेति॥ उत्तरवाक्ये ब्रह्मशब्देन परब्रह्मणः परामर्शाच्च पूर्ववाक्यस्थो ब्रह्मशब्दः परब्रह्मार्थो ज्ञायते ॥ तथा चाक्षर

परामर्शाच्च तस्मात्सर्वगतं ब्रह्मेति ॥ नह्येकशब्देन द्विरुक्तेन भेदश्रुतिं विना वस्तुद्वयं कुत्रचिदुच्यते ॥

शब्दोऽप्यर्थाद्वेदवचनो भविष्यतीति शेषः प्रागक्षरशब्दोक्तं परं ब्रह्मेदानीं ब्रह्मशब्देन परामृश्यते अतः पूर्वोक्तो ब्रह्मशब्दो वेदार्थ एवेत्यत आह ॥ न हीति ॥ एकस्मिन्नेव प्रकरण इति शेषः॥ अन्नात्पुरुषः ॥ स वा एष पुरुषोऽन्नरसमय इत्यादिव्यावृत्त्यर्थं भेदश्रुतिं विनेत्युक्तम् ॥

॥ कृ० ॥ न्यायबाह्यमिति ॥ रूढेः शीघ्रगामित्वान्मंथरगामियोगात्प्राबल्यमिति रथकाराधिकरणोक्तन्यायबाह्यमित्यर्थः ॥ न च प्रोक्षण्यधिकरणविरोधः ॥ तत्र योगसंभवे रूढिन ग्राह्येत्युक्तत्वादिति वाच्यम् ॥ तस्य क्लृप्तयोगसंभवेऽक्लृप्तरूढिर्न ग्राह्येत्येवंपरत्वात् ॥ प्रकृते च रूढेः क्लृप्तत्वात् ॥ अर्थादिति ॥ परब्रह्माभिव्यञ्जकस्याक्षरशब्दवाच्यस्यान्यस्य वक्तुमशक्यत्वादित्यर्थः नन्वन्नात्पुरुषः ॥ अन्नं प्राणं चक्षुरिति ब्रह्मवल्लीभृगुवल्लीरूपप्रकरणद्वये एकेन द्विरुक्तेनान्नशब्देन प्रसिद्धान्नब्रह्मरूपार्थद्वयग्रहणान्न ह्येकशब्देनेत्याद्युक्तमित्यत आह ॥ एकस्मिन्नेव प्रकरण इति शेषइति भेदश्रुतिं विनेत्युक्तमिति ॥ ॥ ॥ ॥ ॥ ॥ ॥

१ परन्यायैस्तु दूषणमित्युक्तेः स्वमते अक्षरशब्दस्य परब्रह्मणि विद्वद्रूढेस्तस्याश्चाज्ञरूढ्यपेक्षया प्रबलत्वम्

॥ श्री० ॥ तथा चान्नात्पुरुष इत्यत्र पुरुषशब्देन देहो ग्राह्यः स वा एष पुरुषोऽन्नरसमय इत्यत्र तु पुरुषशब्देन हरिः कुतः भेदकशब्दस्य सत्वात् स च रसशब्द एव ॥ यथोक्तमेव व्याख्याने ॥ मायान्नमय एवायं तत्रोक्तान्नमय प्रभु इति तंरसशब्देन विशिनष्टि शरीरगामिति भाष्ये नोक्तम् रसशब्देन विशेषणात्तत्सारभूतं चिन्मात्रमेवोच्यत इति एवं च भेदकशब्दस्यैव विवक्षितत्वाद्यत्र भेदकश्रुतिर्नास्ति तत्रोभयपरत्वं न स्यात् यथा हि सत्य ज्ञानमनंतं ब्रह्मेति मंत्रवर्णविवरणात्मकं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यारभ्य को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यादित्यंतं प्रकरणम् यथोक्तम् अतो हि मंत्रवर्णोक्तिर्नुतिस्तु समस्तया ॥ क्रियते परया यस्मादिति ॥ अत्र चाद्य आकाशशब्दो भूताकाशवाची द्वितीयो भगवद्वाची ॥ न ह्येतत्संभवति ॥ अत्र भेदकशब्दाभावात् ॥ अतो भेदश्रुतिं विना एकेन शब्देन द्विरुक्तेन वस्तुद्वयं नोच्यत इति नियमो भग्न इत्यत आह ॥ श्रुतिशब्दश्चेति ॥ तथा च तत्र संभूतत्वव्योमकत्वेष्टकत्वरूपलिंगमेवाकाशशब्देन एकेन द्विरुक्तेन वस्तुद्वयग्रहणे ज्ञापकमस्तीत्याशयः तथा चैकस्मिन्प्रकरणे एकेन शब्देन द्विरुक्तेन भेदकप्रमाणं विना वस्तुद्वयं कुत्रचिदपि न ह्युच्यत इति नियमो द्रष्टव्य नन्वेवं प्रकृतेऽपि ब्रह्माक्षरसमुद्रवमित्यत्र ब्रह्मशब्दो वेदपर एवास्तु तस्मात् सर्वगतं ब्रह्मेत्यत्र तु ब्रह्मशब्दः परब्रह्मपरोऽस्तु ॥ नचोक्तनियमविरोधः ॥ अत्रापि परब्रह्मतज्ज्ञापकस्य सर्वगतमिति भेदकश्रुतिसद्भावादित्याशयेन शंकते ॥ अत्रापीति ॥ विशेषणं भेदकमितिशेषः ॥ अस्य विशेषणस्य भेदकत्वमेव न संभवति परब्रह्मसाधारणत्वाभावादित्याशयेनाह ॥ नेति ॥ कुत इत्यत आह ॥ **वर्णानामपीति** ॥यावद्ब्रह्मविष्ठितं तावती वागिति श्रुतेरिति भावः ॥

श्रुतिशब्दश्च प्रमाणोपलक्षणार्थः ॥ अत्रापि सर्वगतमिति विशेषणमस्तीति चेत् न॥वर्णानामपि सर्वगतत्वात् ॥

कृ० ॥ तथा चान्नात्पुरुष ...यत्र पुरुषशब्देन देहग्रहणेऽपि स वा एष पुरुषोऽन्नरसमय इत्यत्र पुरुषशब्देनेश्वरग्रहणमुक्तम् ॥ रसेति भेदज्ञापकश्रुतेः सत्वादिति भाव ॥ यद्वा द्वितीयान्नशब्दस्य रसश्रुत्या विशेषितत्वात्तत्रार्थांतरग्रहणमित्याशयः न चात्मन आकाशः संभूत इत्यारभ्य को ह्येवान्यात्क प्राण्याद्यदेष आकाश आनंदो न स्यादित्यंतमेकं प्रकरणं स प्रज्ञानमिति मंत्रवर्णविवरणरूपत्वात् ॥ तत्र भेदश्रुतिं विनैव द्विरुक्तेनाकाशशब्देन भूताकाशब्रह्मरूपार्थद्वयग्रहणाद्व्यभिचार इत्यत आह ॥ **श्रुतिशब्दश्चेति** ॥ उक्तस्थले च संभूतत्वेष्टकत्वरूपभेदश्रुतिलिंगसद्भावान्नोक्तदोष इति भावः ॥ भेदप्रमाणं विनेत्यस्य च पदार्थभेदकप्रमाणं विनेत्यर्थोऽत्र विवक्षितः ॥ तेन प्रकरणद्वयस्य भेदप्रमाणं विनेत्यनेनैव व्यावृत्तिसिद्धेरेकस्मिन्प्रकरण इति विशेषणवैयर्थ्यमिति चोद्यानवकाशः ॥ उदाहृतब्रह्मवल्लीभृगुवल्लीरूपप्रकरणद्वयस्य वाक्यार्थभेदकत्वेऽपि पदार्थभेदकत्वाभावादित्यालोचनीयम् ॥ **वर्णानामपीति** ॥ ननु वर्णानां सर्वगतत्वेऽपि वेदस्य सर्वगतत्वं कथमिति चेत् ॥ उच्यते ॥ वेदो नामवर्णानां विशिष्टं रूपं नियतानुपूर्वीविशेषविशिष्टवर्णानां वेदत्वात् ॥ तथा च विशिष्टविशेष्ययोरभेदविवक्षयेयमुक्तिः संभवतीति ॥

॥ श्री० ॥ विकारित्वादिति ॥ न वर्णाः सर्वगताः विकारित्वाद्घटवदित्यनुमानेन वर्णानां सर्वगतत्वाभावसिद्धेन सर्वगतत्वं वेदस्य भाविष्यतीति भावः ॥ अत्रक्षणत्वादिषु व्यभिचारः शिष्यैरत्रोह्य इत्याशयेन तमनुक्त्वा दूषणांतरमाह ॥ अनंतरमेवेति ॥ अंतरमवकाशं विनेत्यनंतरं तानि नित्यानीत्युत्तरग्रंथ एव वर्णानां विकारित्वस्य निराकरणेनानुमाने स्वरूपासिद्धिरितिभावः ॥ ननु परामर्शाद्येति दूषणकथनं मायावादिनं प्रति रक्तंयुक्तं तेन हि ब्रह्माक्षरसमुद्भवमित्यत्र ब्रह्मशब्देन वेदो गृहीतः स्यात् तस्मात्सर्वगतंब्रह्मेत्यत्र तु यदि ब्रह्मशब्देन परब्रह्म गृहीतं स्यात्तर्हि तं प्रत्येतद्दूषणकथनं युक्तं तेन न नैवं किं नाम पूर्वं ब्रह्मशब्देन प्रकृतस्य वेदस्यैव तस्मात्सर्वगतंब्रह्मेत्यत्र ब्रह्मशब्देन परामर्शांगीकारात् तथा च वेदो यज्ञे प्रतिपादकत्वेन प्रतिष्ठित इति व्याख्यानात् आह ॥ इदंचेति ॥ परामर्शाद्येति दूषणकथनमित्यर्थः ॥ तेन हि पूर्वं ब्रह्म वेदोऽक्षरात्परब्रह्मणो जायत इत्यन्यथाव्याख्यातमित्यर्थः ॥ प्रसिद्धान्यस्माभिरिति । व्याख्यानानि ॥ अक्षरशब्देनेति शेषः ॥ यदुक्तं ब्रह्मशब्देन वेदग्रहणमयुक्तं तस्य परब्रह्मणि रूढत्वात् वेदे तु बृहत्वयोगेन प्रवृत्तत्वात् तथा चाक्षरशब्देन परब्रह्मग्रहणमयुक्तं तस्य वर्णेषु रूढत्वात् । परब्रह्मणि तु अक्षरणयोगेन प्रवृत्तत्वात्तथा चान्यथा व्याकृत्वा रूढिं परित्यज्य योगोऽङ्गीकृतः ॥ तच्च रूढिर्योगमपहरतीति न्यायबाह्यमिति तदयुक्तं ब्रह्मशब्दस्य वेदे योगतः प्रवृत्तावपि ब्रह्मशब्दराशिरिति वेदत्वं तथा ब्रह्मेत्यभिधानबलात् रूढेरपि सत्वात् तथाक्षरशब्दस्यापि परब्रह्मणि योगतः अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यत इत्यभिधानबलात् रूढेरपि सत्वात्तो नोक्तदोषस्तथा च समुद्भवशब्दस्य मुख्यार्थलाभ इत्यतआह ॥ अनेनेति ॥ आदिपदेन प्रवृत्तिनिमित्तग्रहणम् ॥ कृ० ॥ विकार

विकारत्वान्नेति चेत् न॥अनंतरमेव निराकरणात् ॥ इदं च भास्करं प्रत्यभिहितम्॥ मायावादिना तु प्राग्ब्रह्मशब्दोक्तस्य वेदस्यैवायं परामर्श

तानि चाक्षराणि नित्यानि वाचा विरूपनित्यया॥वृष्णेचोदस्वसुष्टुतिम्॥ अनादिनिधना नित्यावागुत्सृष्टा

॥ स्वयंभुवा ॥ अत एव च नित्यत्वमित्यादिश्रुतिस्मृतिभगवद्वचनेभ्यः॥

इत्यंगीकृतत्वात् ॥यदप्यन्यथा व्याख्याने समुद्भवशब्दस्य मुख्यार्थतालाभ इत्यभिप्रेतं तदपि दुराशामात्रमित्याह॥ तानि चेति ॥ यान्यस्मा

भिः प्रसिद्धानि व्याख्यातानि ॥ अनेनाभिधानादित्वात्ब्रह्माक्षरशब्दौ ॥

त्वादिति ॥ अनित्यत्वादित्यर्थः ॥ इदं च परोक्त्या स्वमते तु नित्यत्वेऽपि वर्णाः सर्वगतत्वादिति बोध्यम ॥ अभिधानादित्वादिति ॥ प्रयोगप्रवृत्तिनिमित्तसंग्रहायादिपदम् ॥ वेदस्त त्वं तपो ब्रह्मेत्यभिधानात्सत्यं ज्ञानमनंतं ब्रह्मेति प्रयोगाच्च ब्रह्मशब्दः परब्रह्मवेदयो रूढः ॥ अक्षरं ब्रह्मवर्णेष्वित्यभिधानादक्षरशब्दोऽपि तथा ॥ बृंहति वर्धत इति ब्रह्मशब्दनिरुक्ति लभ्यस्य वृद्धिरूपव्याप्तत्वस्य न क्षरतीत्यक्षरशब्दनिरुक्तिलभ्याविनाशित्वस्य च ब्रह्मवेदयोः सत्वाद्ब्रह्माक्षरशब्दौ यौगिकौ ॥ एवं योगरूढावित्यर्थः ॥

॥ श्री० ॥ उभयत्र ॥ वेदे परब्रह्मणि च अभिधानवत्त्वादिः ॥ प्रवृत्तिनिमित्त सद्भावाद्योगरूढिरित्यर्थः ॥ अनेनेत्युक्तं विशदयति ॥ परामर्शस्येति॥ब्रह्मशब्दस्य वेदे योगरूढिमं
गीकुर्वता त्वया परामर्शविरोधोऽपरिहृत एव ॥ तथा च पूर्वं ब्रह्मशब्देन वेदग्रहणमयुक्तम् तथा च ब्रह्मशब्देन वेदं गृहीत्वा समुद्रवच्छब्दस्य मुख्यार्थांगीकारे वर्णनित्यत्वस्य वर्णानित्यत्व
साधकश्रुतिविरोधस्य चापरिहारात न तत्र द्रष्टव्यो मुख्यार्थो गौणं तु युक्तमित्यर्थः ॥ रचितत्वे चेति॥रचितत्वे च धर्मप्रमाणस्य कर्तुरज्ञानादिदोषशंका स्यादिति द्वितीयाध्याये धर्मादि
साधकस्य वेदरूपप्रमाणस्य सकर्तृकत्वांगीकारे तत्कर्तुरज्ञानविपर्ययादिदोषशंकया तन्मूलकत्वशंकने नाप्रामाण्यशंका वेदे स्यादिति दोष उक्त इत्यर्थः ॥ अबुद्धिपूर्वमिति ॥बुद्धिपूर्व
मुत्पन्नत्वे हि विपर्यासादिमूलकत्वशंकेति भावः ॥ गौण्या वृत्त्येति॥ अबुद्धिपूर्वकत्वं श्वासे वेदे च गुण इति भावः ॥ तदभिप्राय इति ॥ निश्वसितशब्दोऽबुद्धिपूर्वमुत्पन्नत्वाभिप्रायकः
इत्यर्थः ॥ प्रमाणेति ॥ अभिधानादिरूपेत्यर्थः ॥ अक्लेशेनेति ॥ यथा निश्वासोऽक्लेशेन निःसरणं तथा वेदेऽप्यस्मीति निश्वसितशब्दोऽन्यथासिद्ध इति न तेन वेदस्याबुद्धिपूर्वकत्व
निश्चय इति भावः ॥तदभिप्रायतेति ॥ अक्लेशेन निःसरणाभिप्रायत्वेत्यर्थः ॥ न च परस्येति ॥ अक्लेशेन निःसरणस्यापीतरार्थस्य संभवेन निश्वसितशब्दस्य तदभिप्रायतोपपत्तौ नबुद्धिपूर्वो
त्पत्त्यभिप्रायत्वनिश्चय इत्युच्यते एव अबुद्धिपूर्वत्वं यत्र तस्यार्थान्तरस्य संभवेन निश्वसितशब्दस्य तदभिप्रायतोपपत्तौ नाक्लेशेन निःसरणाभिप्रायत्वनिश्चय इति नेत्यर्थः ॥

द्वावप्युभयत्र योगरूढाविति प्रत्यवस्थानमपि परास्तम् ॥ परामर्शस्य वर्णनित्यत्वस्य चापरिहार्यत्वात ॥ न केवलं श्रुत्यादिभ्यो वेदस्य नि
त्यत्वं किं तर्हि विपक्षे बाधकाच्चेत्याह ॥ दोषश्चेति ॥ रचितत्वे च धर्मप्रमाणस्येत्यत्र ॥ ननु वेदाक्षराणि ब्रह्मणो बुद्धिपूर्वमुत्पन्नानि॥ अतो न
विपर्ययादिमूलत्वशंकेत्यत आह ॥ न चेति ॥ निश्वसितमेतद्यदृग्वेदो यजुर्वेद इति श्रुतिर्वेदानां ब्रह्मणोऽबुद्धिपूर्वमुत्पन्नत्वे प्रमाणमिति चे

दोषश्चोक्तः सकर्तृत्वे ॥ न चाबुद्धिपूर्वमुत्पन्नानि ॥ तत्प्रमाणाभावात ॥ निश्वसितशब्दस्त्वक्लेशाभिप्रायो
॥ नाबुद्धिपूर्वाभिप्रायः ॥ सोऽकामयतेत्यादेश्च ॥

त्किमयं निश्वसितशब्दोऽबुद्धिपूर्वमुत्पन्नत्वस्य वाचकः ॥ उत निश्वसितमिव निश्वसितमित्यर्थश्चाबुद्धिपूर्वमुत्पन्नत्वमिति गौण्या वृत्त्या
तदभिप्रायः ॥ नाद्यः ॥ प्रमाणाभावात् ॥ द्वितीयं दूषयति ॥ निश्वसितेति ॥ अक्लेशेन निःसरणस्यापीतरार्थस्य संभवेन निश्वसितशब्दस्य तद
भिप्रायतोपपत्तौ नाबुद्धिपूर्वोत्पत्त्यभिप्रायत्वनिश्चय इत्यर्थः ॥ न च परस्येवास्माकमपि निश्चयायोग इति भावेनाह ॥ स इति ॥

॥ कु० ॥ अनेनेत्युक्तं विवृणोति ॥ परामर्शस्येति ॥

१ तत् अबुद्धिपूर्वमुत्पन्नत्वं अभिप्रायो यस्येति बहुव्रीहिः ॥

॥ श्री० ॥ ब्रह्मणः ॥ सकाशात् ॥ नन्वत्र सृष्टेरिच्छापूर्वकत्वोक्तावपि बुद्धिपूर्वकत्वं कथमागतमित्यत आह ॥ इच्छा चेति ॥ इच्छापूर्वकत्वोक्तौ बुद्धिपूर्वकत्वं लब्धमेव तदविनाभूतत्वा दित्यर्थः ॥ यथोक्तम ॥ कुत इच्छाऽचेतनस्येति ॥ नामप्रपञ्चस्येति । ऋग्वेदादीनां शब्दरूपत्वेन नामप्रपञ्चत्वादिति भावः ॥ इच्छापूर्वमुत्पत्तिं वक्तीति वर्तते ॥ न विरोध इति ॥ भिन्नविषयत्वादिति भावः ॥ निश्वसितमित्यादिश्रुतौ वेदादिनामप्रपञ्चस्यैव इष्टमिति वाक्ये रूपप्रपंचेन महाभिधानादेकप्रकरणं महाभिधानादेकप्रकरणे महापाठादित्यर्थः ॥प्रमाणाविति॥ अन्यथा महापाठविरोधापत्तेरितिभावः ॥ निर्विषयैवेति ॥ नामरूपप्रपञ्चयोरिच्छायैवोत्पत्तावुत्पन्नस्य तद्वार्तनविषयस्याभावादित्यर्थः ॥महातात्पर्यमेव कुत इतिशंकिते महातात्पर्यं पुरस्तात् द्वितीयेऽध्याये उक्तमिति वचनमात्रस्य तत्साधकत्वाभावादाह ॥ उक्तं साधितमिति ॥ प्रमाणैरिति शेषः ॥

सोऽकामयत स इदं सर्वमसृजतेति ब्रह्मणः सर्वस्यसृष्टेरिच्छापूर्वकत्वमुच्यते ॥ इच्छा च बुद्ध्याऽविनाभूता ॥ अतो न किं चिद्ब्रह्मणोऽबुद्धिपूर्वमुत्पन्नमिति ॥ ननु निश्वसितमेतदिति श्रुतिर्नाम प्रपंचस्याबुद्धिपूर्वमुत्पत्तिं वक्ति ॥ सोऽकामयतेति च रूपप्रपंचस्येच्छापूर्वमित्यतो न विरोध इत्यत आह॥इष्टमिति॥ एवं सति निश्वसितमिति श्रुताविष्टं हुतमाशितं पायितमयं च लोकः परश्चलोक इति नामप्रपंचस्य रूपप्रपं

इष्टं हुतमित्यादिरूपप्रपंचेन महाभिधानाच्च ॥ महातात्पर्यविरोधाच्च ॥ तच्चोक्तं पुरस्तात् ॥ न ह्य ॥ स्वातंत्र्येण चोत्पत्तिकर्तुः प्राधान्यम् ॥

चेन महाभिधानात् ॥ रूपप्रपंचस्यापि निश्वसितशब्देनाबुद्धिपूर्वोत्पन्नत्वप्राप्तौ सोऽकामयतेति श्रुतिर्निर्विषयैवापद्येतेति भावः ॥ इतोऽपि नाबुद्धिपूर्वा ब्रह्मणः सृष्टिरित्याह ॥ महातात्पर्येति ॥ परब्रह्मणः सर्वोत्तमत्वे यत्सर्ववेदानां महातात्पर्यं तद्विरोधाच्चेत्यर्थः ॥ तदेवकुत इत्यत आह॥तच्चेति॥उक्तं साधितम्॥कथं तद्विरोध इत्यत आह॥न हीति॥प्राधान्यं॥सर्वोत्तमत्वम्॥अस्वातंत्र्येणोत्पत्तिकर्तृत्वस्य प्राधान्यविरोधित्वेऽपि

॥ श्री० ॥ अबुद्धिपूर्वमुत्पादकत्वस्य ॥ तथा च प्राधान्यविरोधित्वाभावादिति भावः ॥ नन्वबुद्धिपूर्वमुत्पादकत्वांगीकारे गुणोत्कर्षे महातात्पर्यं न स्यादिति साक्षात्प्रसंगसंभवेऽस्यानं व्युत्पादनं कुत इत्यत आह ॥ साक्षादिति ॥ व्युत्पादनार्थमिति ॥ अबुद्धिपूर्वमुत्पादकत्वेऽपि गुणोत्कर्षे महातात्पर्यं कुतः नेत्याह ॥ अबुद्धिपूर्वमुत्पादकत्वेऽस्वातंत्र्यं ज्ञात तत्र प्राधान्यमिति तद्व्युत्पादनार्थमुक्तम् ॥ अत्र स्वतंत्रं ब्रह्म मुख्यमित्यर्थः ॥ भाष्ये उत्पत्त्यभिव्यक्ती यादि ॥ वेदानां सृष्टिवाक्यानि अभिव्यक्तेः ॥ तदभिमानिना देवानां वाक्ये क्षयेति वचनादिति भावः ॥ अन्यत्रापि प्रयोगं दर्शयतीत्यर्थः ॥ अनादिनिधनत्वेति ॥ नित्यत्वाभावात् ... तद्व्युत्पादनमात्रेणोपचारिकं न भवतीति ज्ञापनायेत्यर्थः ॥

अबुद्धिपूर्वमुत्पादकत्वस्य किमायातमित्यत आह ॥ अस्वातंत्र्येति ॥ कार्यस्यपुरुषमतिपूर्वकत्वाभावे तत्र तस्य पुरुषस्यास्वातंत्र्यं भवति ॥ तत्र दृष्टांतमाह ॥यथेति॥ रोगादीनां पुरुषजन्येऽपि बुद्धिपूर्वकत्वाभावात् ॥ तत्र पुरुषस्यास्वातंत्र्यं तथेत्यर्थः॥ ननश्चाबुद्धिपूर्वमुत्पादकत्वादस्वातंत्र्यम् ॥ अस्वातंत्र्याच्चाप्राधान्यप्रसक्तेरिति ॥ तथा च महातात्पर्यविरोध इत्युक्तं भवति ॥ साक्षात्प्रसंगसंभवेऽपि व्युत्पादनार्थमे

अस्वातंत्र्यं तदमतिपूर्वकत्वेनभवति ॥ यथारोगादीनां पुरुषस्य तज्जत्वेऽपि ॥ उत्पत्तिवचनान्यभिव्यक्त्यर्थानि ॥ अभिमानिदेवताविषयाणि च ॥ नित्येत्युक्त्वोत्सृष्टेति वचनात् ॥ अभिव्यंजके कर्तृ ॥ वचनं चास्ति ॥ कृत्स्नं शतपथं चक्र इति ॥

वमुक्तम्॥ननु वेदनित्यत्ववत्तदुत्पत्तावप्यृचः॥सामानि जज्ञिरे इत्यादिवचनानि संति॥तत्कथं निर्णय इत्यतो विपक्षे बाधकोपेतानांनित्यत्ववाक्यानां प्राबल्यादुत्पत्तिवचनान्यन्यथाव्याख्येयानीत्याह॥उत्पत्तीति॥उत्पत्तीवाचीशब्दोऽभिव्यक्तौ क्व दृष्ट इत्यत आह॥नित्येति॥अनादिनिधनतया नित्या न तूपचारेणेति मुख्यं नित्यत्वमुक्त्वा पुनरुत्सृष्टेत्युच्यते।तत्र गत्यंतराभावाद्व्यक्तिरेव ग्राह्येत्यर्थः अन्यत्रापि प्रयोगं दर्शयति॥अभिव्यंजक इति

॥कृ० ॥ साक्षात्प्रसंगेति यदि विष्णोरबुद्धिपूर्वकर्तृत्वं स्यात्तर्हि सर्वोत्तमत्वाभावेन तत्र वेदस्य महातात्पर्यविरोध इति साक्षात्प्रसंगसंभवेऽपीत्यर्थः ॥ एवमुक्तमिति ॥ मध्येऽस्वातंत्र्यादि कमापादितमित्यर्थः ॥

॥ श्री० ॥ **शतपथेति** ॥ शतपथेति काण्ववेदानां संज्ञा कृत्स्नं शतपथं समग्र काण्ववेदं चक्र इति प्रमाणवाक्यार्थः ॥ **कर्तृशब्द इति** ॥ कर्तृवाचिकश्चकइति शब्द इत्यर्थः ॥ **कर्तेवात** ॥ तथा च शतपथाभिव्यंजकतया ॥ निश्चि [illegible] सिद्ध निश्चायकाभावादिति भाव ॥ **स्थिताः** ॥ वेदा ॥ तत ॥ वाजिरूपधरादित्यात ॥ **प्रतिनपिति** ॥ यथोक्त भागवते । [illegible] यामयजुष्कामेन याज्ञवल्क्येन सर्वो [illegible] भगवान वाजिरूपधरो हरि [illegible] यातयामानि मुनये [illegible] [illegible] स्युक्तम ॥ यथा तुष्टाव लक्ष्मीश [illegible] याज्ञवल्क्याय सो [illegible] ॥ **वचनमात्रमिति** ॥ अभिव्यक्तयाद्यर्थेक [illegible] **अतएव चेति** ॥ अतएव शब्दस्य निस्यत्व [illegible] सूत्रार्थ ॥ ननु निर्णयात्मकादपि वचनमात्रमेव [illegible] कस्मान्न स्यादित्यत आह ॥ **वचनं चेति** वृत्त्यन्तरेणापीत ॥ जन्याजन्यसाधारणाभिव्यक्तिरूपगुणयोगेनापि [illegible] निर्णय [illegible] ॥ **तस्मात्** ॥ वचनमात्रात ॥ **इदम्** ॥ शारीरकमीमांसासूत्रम ॥

॥ शतपथाभिव्यंजकतया निश्चिते याज्ञवल्क्ये कर्तृशब्दोऽस्तीत्यर्थः ॥ याज्ञवल्क्यः शतपथस्य कर्तैव किं नस्यादित्यत आह ॥ कथ मिति ॥ प्रागादित्ये स्थिताः ॥ ततो याज्ञवल्क्येनार्थाना इत्येनत्प्रमितमित्यर्थः ॥ इतोऽपि नित्यत्वपक्ष एव बलवानित्याह ॥ वचनेति ॥ ऋचः

कथमादित्यस्थावेदास्तेनैव क्रियंते ॥ वचनमात्राच्च निर्णयात्मकशारीरकोक्तं
॥ बलवत् ॥ शास्त्रम् योनित्वस्य तत् शास्त्रयोनित्वम् ॥

समानीत्यादिकं वचनमात्रम् अत एव च नित्यत्वमित्याशारीरकोक्तं वाक्यं निर्णयात्मकम् ॥ वचनं च वृत्त्यंतरेणापि संभवतीति न तूपचा रितो वाक्यार्थविचारणात्मको निर्णयः ॥ अतस्तस्मादिदं बलवदित्यर्थः ॥ ननु शारीरके शास्त्रयोनित्वादिति ब्रह्मणो वेदकारणत्वमुच्यत इत्यत आह ॥ शास्त्रमिति ॥ ॥ कृ० ॥ इत्येतत्प्रमितमिति ॥

एवमुक्तो ददौ तस्मै यजूंषि भगवान रविरित्यादि [illegible] ॥ अत एव च नित्यत्वमिति ॥ शब्दस्य नित्यत्वादेव देवताद्यनित्यत्वं युक्तमिति सूत्रार्थः ॥

१ भा० स्कं० १२ अ० ६ श्लो० ७२ [illegible] ॥ [illegible] अनुग्रहोन्मुखःसन् अगतसाराणि वीर्यवंतीति यावत् यजूं षि याज्ञवल्क्याय आदात इत्यर्थः ॥ [illegible] अ० १ आरंभे ॥ यथा [illegible] विशिष्टोपनिषदा तथा तत्प्रकारानुपूर्वीविशिष्टामुपनिषदं २ अ० ३ पा० ३ अ० ८ सू० ३ ४ ब्रह्मसूत्रोक्तम् ॥

॥ श्री० ॥ तत्पुरुषमिति ॥ शास्त्रस्य योनौनि पांचतत्पुरुषमित्यर्थः ॥ वर्तिपदार्थप्रधानत्वेन तत्पुरुषस्य अन्यपदार्थप्रधानबहुव्रीह्यपेक्षायां प्राबल्यादिति भावः ॥ तथात्वे चेति ॥ शास्त्रं योनिर्यस्येति बहुव्रीह्यंगीकारे योनिशब्दस्य कारणार्थकत्वात् ब्रह्मणो वेदाख्यशास्त्रजन्यत्वं प्रसज्येत इत्यर्थः ॥ वेदाज्ञानत्वं वेदकारणत्वं वेति बहुव्रीहितत्पुरुषांगीकारेणेति ज्ञेयम ॥ ननु प्रमाणाकांक्षायामपि तदनुसारेण कुतो वाक्यार्थोऽवसेय इत्यत आह ॥ आकांक्षादीति ॥ प्रमाणेति ॥ ज्ञप्तिकारणेत्यर्थः ॥ अन्वयाभावादिति ॥ व्यतिरेकव्याप्तेः साध्या नुमानानंगत्वादन्वयव्याप्त्यामेवावश्यंवक्तव्यायां तत्र दृष्टांताभावाद्व्याप्त्यसिद्धिरिति भावः ॥ नन्वन्वयव्याप्त्यभावेऽपि योयदेकदेशकर्ता सतत्समुदायकर्तेति सामान्यव्याप्तिमूलकमिदमनुमा नमित्युच्यत इत्यत आह ॥ एकदेशेति ॥ अतिप्रसंगाच्चेति ॥ कुलालस्यापि जगदेकदेशघटकारणत्वेन सर्वजगत्कारणत्वप्रसंग इत्यर्थः ॥ समुदायस्रष्टुः सकाशादिति ॥ विचि त्रजगत्सृष्टेरित्यस्य तात्पर्यं ॥ तदेकदेशसृष्टिरिति ॥ वेदसृष्टिरित्यस्य ॥ अधिकेति ॥ तेनैकदेशस्रष्ट्रा समुदायसृष्टिः संभाविता स्यादिति भावः ॥

ननु तत्पुरुषं परित्यज्य कुतो बहुव्रीहिरंगीक्रियते ॥तथात्वे च ब्रह्मणो वेदाज्ज्ञानत्वं प्रसज्येत इत्यत आह ॥ जन्मादीति॥लक्षणप्रमाणाभ्यां हि वस्तुनिर्णयः ॥ तत्र जन्माद्यस्येतिसूत्रेण लक्षणेऽभिहिते कुतः प्रमाणादेवं प्रतिपत्तव्यमिति ब्रह्मणो जगज्जन्मादिकारणत्वे प्रमाणाकांक्षा स्यात् तु तस्य वेदाज्ज्ञानत्वं वेदकारणत्वं वाऽकांक्षितम् अकांक्षादिवशाच्च वाक्यार्थोऽवसेयः ॥ततोयोनिशब्दं प्रमाणवाचिनमंगीकृत्य बहु व्रीहिरेवायं प्रतिपत्तव्यो न तु तत्पुरुषःवेदकारणत्वं च जगत्कारणत्वे हेतुत्वेनात्रोच्यते॥अतोनानाकांक्षिताभिधानमेतदित्यत आह ॥ न ही

जन्माद्यस्येत्युक्ते प्रमाणं हि तत्रापेक्षितम न तु तस्य जातत्वं वेदकारणत्वं वा नहि वेदकारणत्वं जगत्का

॥ रणत्वे हेतुः ॥ न हि विचित्रजगत्स्रष्टुर्वेदसृष्टिरशक्या सृज्यत्वे ॥

ति ॥ अन्वयाभावात् ॥ एकदेशकारणत्वेन समुदायकारणत्वानुमानेऽतिप्रसंगाच्चेति हेत्वर्थः ॥ माभूदयं निश्चयहेतुः ॥ तथाप्यशक्यसृष्टेर्वेदस्य कर्तुर्ब्रह्मणो जगत्स्रष्टृकर्तृत्वं संभवतीतिसंभावनाहेतुत्वं स्यादित्यत आह ॥ न हीति ॥ संभावना ह्यधिकेनाल्पस्य भवति॥ यथा सहस्रेण शतस्य नच समुदायस्रष्टुस्तदेकदेशस्रष्टुरधिकेति भावः ॥

॥ कृ० ॥ ननु तत्पुरुषमिति ॥ वर्तिपदार्थप्रधानत्वेन तत्पुरुषस्य प्राबल्यादिति भावः ॥ अन्वयाभावादिति ॥ दृष्टांताभावेनान्वयसहचाराभावादित्यर्थः ॥ १६ ॥

॥ श्री० ॥ तत्र सार्वज्ञ्ये ॥ ननु वेदकारणत्वं सार्वज्ञ्ये कुतो न हेतुरित्यतोऽप्रयोजकत्वादित्याशयेनाह ॥ अबुद्धीति ॥ यदि वेदोऽबुद्धिपूर्वमीश्वरोत्पन्न इत्यंगीक्रियते तर्हि तत्प्रतिपाद्याशेषार्थज्ञानप्राप्त्या सार्वज्ञ्यं भवेन्न चैवमंगीकृतमतोऽप्रयोजकमनुमानमिति भावः ॥ ब्रह्माक्षरशब्दार्थयोर्व्यत्ययोवेदपरब्रह्मरूपः ॥ भाष्ये परंपरया यज्ञाभिव्यंग्यमिति ॥ यज्ञपर्जन्यान्नभूताक्षरब्रह्मरूपपरंपरया यज्ञाभिव्यंग्यमित्यर्थः ॥ भाष्ये प्रतिष्ठितमिति ॥ यज्ञे भोक्तृत्वेन प्रतिष्ठितमित्यर्थः॥ १५ ॥

सृज्यत्वे वेदस्य कार्यत्वपक्ष इत्यर्थः ॥ जगत्कारणत्वोक्त्या ब्रह्मणः सर्वज्ञत्वं प्रतीतं तत्स्फुटीकर्तुं तत्र वेदकारणत्वं हेतुरनेनोच्यते ॥ अतो नासंगतिरित्यत आह ॥ न चेति ॥ वेदकारणत्वं हेतुरित्यनुवर्तते ॥ अबुद्धिपूर्वमुत्पन्नत्वांगीकारादिति भावः ॥ किं च यदि जगदेकदेशस्य वेदस्य स्रष्टा परमेश्वरःसर्वज्ञःसिद्ध्येत तर्ह्यनभिविनस्य वेदस्य जगतः स्रष्टा सुतरां सर्वज्ञः सिद्ध्येदेव॥ तथा चार्थादपि जन्मादिसूत्रेणैव

न च सर्वज्ञत्वे यदि वेदस्रष्टा सर्वज्ञः किमिति न जगत्स्रष्टा सर्वज्ञः ॥ तस्माद्वेदप्रमाणकत्वमेवात्र विवक्षितम्॥अतो नित्यान्यक्षराणि॥यत एवंपरंपरया यज्ञाभिव्यंग्यं ब्रह्म तस्मात्तन्नित्यंयज्ञे प्रतिष्ठितम्१५॥

सार्वज्ञस्यस्फुटं प्रतीतत्वात् ॥ पुनर्हेत्वाकांक्षाभावेनासंगतिस्तदवस्थेति भावेनाह ॥ यदीति ॥ सूत्रार्थमुपसंहरति ॥ तस्मादिति ॥ब्रह्मण इति शेषः ॥तानिचेत्यादिनोक्तमुपसंहरति॥अत इति॥तथा च न समुद्भवशब्दस्य मुख्यार्थत्वलाभाय ब्रह्माक्षरशब्दार्थव्यत्ययः कार्य इति॥ तस्मादितिपरामर्शविषया प्रतीतेस्तं दर्शयन्वाक्यं व्याख्याति॥ यत इति ॥ प्रतिष्ठितमित्युच्यत इति शेषः ॥ १५ ॥

॥ श्री०॥ **न चक्रमिति** ॥ तान्यक्षराणि भूतेभ्यो भवंतीति यदि गीतायामुच्येत तर्ह्येव चक्रोक्तिलाभ इति भावः ॥ **तत्राहेति** ॥ अक्षरभूतयोः कार्यकारणभावोक्तयध्याहारेण गीतायां चक्रोक्तिर्द्रष्टव्येत्याहेत्यर्थः ॥ **कथमघायुरिति** ॥ सामानाधिकरण्यं कथमित्यर्थः ॥ ननु कथमनेन सामानाधिकरण्योपपत्तिरित्यत आह ॥ **तादर्थ्यादिति** ॥ आयुषोऽघसाधनत्वात्ता च्छब्द्यं अघशब्दवाच्यत्वम् ॥ आयुर्घृतमित्यादिप्रयोगदर्शनादित्यर्थः ॥ **अयमत्र चक्रप्रकारः** ॥ आदौ भूतानि प्राणिजातानि अन्नाज्जायंते तेन तेषां बलोपचयात् ॥ तदन्नं पर्जन्याज्जायते ॥ स च पर्जन्यो यज्ञात् ॥ आदित्याभिप्राये वृष्ट्याभिवृद्धमेघमंतत्याभिप्राये च वापीकृत्वादिविशिष्टमेघानां यज्ञेन जननात् ॥ स च यज्ञः कर्मणो जायते तच्च कर्म परब्रह्मणः तच्च परं ब्रह्म वेदरूपाक्षराभिव्यंग्यत्वात्तज्जातमित्युच्यते तानि चाक्षराणि भूतेभ्यो जायंते सम्यगन्नादिनाभिवृद्धबलैर्हि भूतैरुच्चारणे कृते वेदाख्याक्षराणि व्यज्यंते तानि च भूतानि पुनरन्नादित्येवं भूतान्नपर्जन्ययज्ञ कर्मपरंब्रह्मवेदानां कार्यकारणभावेन पुनः पुनः परिवर्तनाच्चक्रं द्रष्टव्यम् ॥ भाष्ये ॥**नित्यंयज्ञे प्रतिष्ठितमिति**॥तथा चैवं स्ववर्णाश्रमोचितयज्ञादिकर्माकरणे चक्रविघातप्रसक्त्या पापप्राप्तेः पूर्वोक्तं यज्ञादिकरणेन चक्रस्यानुवर्तितत्वाच्चावश्यंस्वस्ववर्णाश्रमोचितं कर्मकार्यमित्येवं स्वस्ववर्णाश्रमोचितकर्मणः कर्तव्यत्वेऽनेन निंदारूपोऽर्थवाद उक्तोभवतीत्याशयः ॥ १६ ॥

नन्वत्र कार्यकारणपरंपरैवोक्ता न चक्रं तत्कथं उच्यते एवं प्रवर्तितं चक्रमिति तत्राह ॥ तानि चेति ॥ तानि वेदाख्यानि ॥ चक्राप्रवृत्तौ

तानि चाक्षराणि भूताभिव्यंग्यानीति चक्रम् ॥ तदेतज्जगच्चक्रं यो नानुवर्तयति॥स तद्विनाशकत्वादघायुः

एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः ॥ अघायुरिंद्रियारामोमोघंपार्थसजीवति ॥ १६ ॥

॥ पापनिमित्तमेव यस्यायुःसोऽघायुः ॥ १६ ॥

कथमघायुष्ट्वादिकमित्यतो व्याचष्टे ॥ तदेतदिति ॥ आयुषोऽघत्वाभावात्कथमघायुरित्यत आह ॥पापेति॥तादर्थ्यात्ताच्छब्द्यमित्यर्थः ॥ १६॥

॥ रु० ॥ **तादर्थ्यादिति** ॥ आयुषः पापफलकत्वात्पापवाचकाघशब्दप्रतिपाद्यत्वं लांगलं जीवनमितिवदित्यर्थः ॥ १६ ॥

१ तत्पापं अर्थःप्रयोजनं यस्य तस्य भावस्तस्मात् ॥ सः पापइत्याकारकः शब्दोयस्य वाचकस्तस्य भावस्तत्त्वमित्यर्थः

॥ श्री० ॥ हानिरिति ॥ चक्राविवर्तनेन प्रत्यवायरूपा ॥ ननु कर्मणोऽकरणे हानिर्लाभश्च करणेऽसंप्रज्ञातसमाधिः ॥ न कार्य इत्यत आह ॥ नत्रेति ॥ असंप्रज्ञातसमाधावित्यर्थः ॥ कर्मलोपादिति ॥ तथा च प्रत्यवायप्रसंग इति भावः ॥ व्याचष्ट इति ॥ यौनरुक्त्यपरिहारायेति शेषः ॥ ननु इत्यत आह ॥ तथाचेति ॥ पंचम इति ॥ योऽन्तः सुखोऽन्तरारामः इत्यत्र व्याख्यानसमये दर्शनस्पर्शनादिप्रयत्न इत्यर्थो न्यायः ॥ आरामः ॥ ननु विषयदर्शनं प्रयत्नसाध्यमिति भावः ॥

एवमज्ञानिनः कर्म कर्तव्यमित्युक्तम् ॥ इदानीं ज्ञानिनः कर्तव्याभावमाहेति पदव्याख्यानमग्रादिति भावेन संगतिमाह॥तर्हीति ॥ यद्येवं कर्माकरणे हानिस्तत्करणे च लाभस्तर्हीत्यर्थः ॥ परमेश्वरेऽतीव मनःसमाधानमसंप्रज्ञातसमाधिरित्यर्थः ॥ न कार्यं प्रसज्येतेति शेषः ॥ तत्र कर्तर्यतीवमनःसमाधानमपि न कार्यमित्यत आह॥ यस्त्विति ॥ रमणं परदर्शनादिनिमित्तं सुखम् ॥ तृप्ति

॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥

रन्यत्रालंबुद्धिः ॥ संतोषस्तज्जनकं सुखम् ॥ संतोषस्तृप्तिकारणमित्यभिधानात् ॥

मल्लोपस्यावश्यंभावादिति भावः ॥ अत्र रतितृप्तिसंतोषशब्दांस्तावद्व्याचष्टे ॥ रमणमिति ॥ परतिस्वरूपकथनं न शब्दार्थान्तर्भूतम् ॥ तथा च पंचमेऽभिधानं वक्ष्यते ॥

॥ क्रं० ॥ नन्वकर्मणोऽस्य कर्तव्यत्वे परमेश्वरेऽतीवमनःसमाधानमपि न कार्यं स्यादित्यापादनमयुक्तम् ॥ निर्द्वंद्वो नित्यसत्वस्थ इत्यादिना कर्माकरणहानेरेव परमेश्वरेऽतीवमनःसमाधानस्य विहितत्वेन तदोषाभावादित्यत आह ॥ असंप्रज्ञातेति ॥ साधने प्रमाणमाह इत्यत आह ॥ प्रसज्येतेति शेष इति व्याचष्ट इति ॥ अन्यथा मनःसमाधि प्रीतिः पर्यायवाचका इत्यभिधानात्तृप्तिशब्दस्य रतिकार्यत्वेन रतिः कामप्रियाप्रीत्योरिति कोशाद्रतिशब्दस्य तृप्तिपर्यायप्रीतिवाचकत्वेन च पुनरुक्तिप्रसंगाद्रति ॥ स्वरूपकथनमित्यत आह ॥ तथा च पंचम इति ॥ दर्शनस्पर्शसंभाषाद्यत्सुखं जायते नृणाम् ॥ आराम इत्यभिधानमित्यर्थः ॥ तथा च वक्ष्यमाणाभिधाने दर्शनादिसाध्यतया परतिस्वरूपकथनमित्युक्तं भवति ॥

१ गीतायां तस्य कार्यं न विद्यत इति कर्माकरणस्यकं टत्वेन विधानात्करणापेक्षयाऽकरणस्य श्रेष्ठत्वमुक्तं तस्माद्धितत्वात्पूर्वनिपातः २ परमात्मविषयकत्वव्यावृत्त्यर्थं मात्रपदम् ॥

॥श्री० ॥ परेत्यस्यरति शब्दार्थान्तर्गतत्वे बाधकंचाह ॥ तथात्वइति ॥ दर्शननिमित्तकसुखस्यैव रतिशब्दार्थत्वांगीकारे आत्मरतिरित्यत्र दर्शनविषयतया आत्मशब्देन जीवस्यापि प्राप्तौ परमात्मरतिश्चात्र विवक्षितेत्याकरिष्यमाणं आत्मशब्दार्थत्वेन जीवनिराकरणं व्यर्थं स्यात् ॥ अन्यथा रतिशब्दार्थान्तर्गतेन परमात्मवाचिपरशब्देनैव जीवस्य निराकृतत्वात् पुनरात्मश ब्दार्थतया जीवनिराकरणं व्यर्थं स्यादितिभाव ॥ [illegible] दर्शयति ॥ यद्दर्शनादिति ॥ ननु तृप्तिजनकं सुखं सर्वोपि इत्यत्र नेदं अभिधानं संगतं [illegible] तृ प्तिकारणस्य यस्य कस्य चित् [illegible] आह ॥ सर्वामिति शेष इति ॥ समस्तं पदं पाति ॥ समासप्राप्तं [illegible] ॥ आ सनीति ॥ रतिशब्दार्थान्तर्गतदर्शनापेक्षया विषयसप्तमीयम् ॥ परमात्मन इत्यत्रापि [illegible] ॥ इत्तरायेति ॥ आत्मन आत्मन्येवसंतुष्ट इत्यन्तरार्थवित्यर्थः ॥ एवं सनीति ॥ आत्मरतिशब्दस्यैव व्याख्यान इत्यर्थः ॥ [illegible] ॥ न वक्तव्यात् ॥ [illegible] ॥ टी० ॥ यस्य रति

तथात्वे जीवनिराकरणं च व्यर्थं स्यात् ॥ यद्दर्शनादिनिमित्तं सुखं तत्तोऽन्यत्र ॥ तज्जनकं तृप्तेर्जनकं ॥ तृप्तिकारणं सुखमितिशेषः ॥ इदानीमात्मशब्दस्य जीवविषयत्वप्रतीतिनिरासार्थमात्मरतिरित्यस्मस्तं पदं व्याख्याति ॥ परमात्मेति ॥ प्राप्त आत्मरतिरिति शेषः ॥ अते

॥परमात्मदर्शनादिनिमित्तं सुखं प्राप्तः ॥

॥ आत्मन्येव चसंतुष्टस्तस्यकार्यंनविद्यते॥ १७ ॥

नात्मनि रतिर्यस्येति विग्रहः सूचितः ॥ आत्मनो रतिरित्यन्यथा ॥ एवमुत्तरत्रात्मशब्दो परमात्मार्थो ज्ञातव्यो ॥ न चैवं सति तृप्तशब्द स्य परमात्मनोऽन्यत्रालंबुद्धिरर्थः स्यात् ॥ ततश्चेदं न वक्तव्यम् ॥

शब्दार्थान्तर्गतत्वे बाधकं चाह ॥ तथात्वइति ॥ परदर्शनादिजन्यसुखस्य रतिशब्दार्थत्वेन परमात्मदर्शनादित्यग्रिमभाष्येण करिष्यमाणं जीवनिराकरणं व्यर्थं स्यादित्यर्थः ॥ प रेत्यनेनैव स्वाख्यजीवनिराकरणात् [illegible] ॥ [illegible] तृप्तिकारणमित्येतत् परस्याति ॥ तृप्तिकारणमिति ॥ नन्वात्म नीति विषयसप्तमी ॥ प्रकारान्तरायोगात् ॥ [illegible] न चविशेषणस्यैकदेशे नान्वयो युक्तः श्वशुरपदोपात्तभार्यायां सुशीलत्वादिविशेषणान्वयादर्शनादित्यत आह ॥ आत्मनो रतिर्यस्येति चेति ॥

१ भार्यायाः पितेतिश्वशुरशब्दार्थः ॥ तत्रसुशीलाया भार्यायाः पितेत्यभिप्रायेण सुशीलायाः श्वशुरइति प्रयोगादर्शनादिति भावः ॥

॥श्री०॥ कुत इत्यत आह॥ आत्मरतिरेवेत्यवधारणेनेति ॥ अवधारणेनैवतदपि लब्धमितिचेत्तत्राह॥ अवधारणस्येति ॥सर्वात्मनेति॥रतिसहचरितत्वाभावस्तदर्थः॥इत्यत्राप्रवृत्तेरिति॥ इत्येतदर्थप्रतिपादने सामर्थ्याभावादिति भाव ॥ तत॥ अलंबुद्धिजनकं सुखम॥ विरोधादिति॥विषयजन्यसुखस्य विषयेष्वलंबुद्धिजनकत्वाभावस्यैवानुभवसिद्धत्वात्तज्जनकत्वांगीकारे तद्विरो धादित्यर्थः ॥ तस्येति ॥ आत्मरत्याख्यसुखस्येत्यर्थः ॥ पुनरुक्तीति ॥ आत्मरत्याख्यसुखोक्त्यंश एव पुनरुक्तिर्द्रष्टव्या ॥ कथंचेति ॥ केन प्रकारेणेत्यर्थः ॥ तस्य ॥ आत्मा रत्याख्यसुखस्य ॥ हेताविति ॥ यस्मान्महादिति हेतावित्यर्थः ॥ प्रागुक्तम ॥ ॥ कृ० ॥ तथा च संबंधमात्रस्य षष्ठ्यर्थत्वाद्रतिशद्बार्थेन विशिष्टेनापि आत्मनो दर्शन

आत्मरतिरेवेत्यवधारणेनान्यरतिनिरासेन पौनरुक्त्यप्रसंगादित्यत आह॥अन्यत्रेति॥अलंबुद्धित्वं प्रागस्तृप्तशब्देनोक्त इति शेषः अलंबुद्धिरिति पाठेतृप्तशब्दार्थ इति शेषः॥अवधारणेनैवान्यत्र रत्यभावे लब्धेऽपि सर्वात्मनाऽन्यत्रालंबुद्धिं वक्तुं तृप्त इति पुनर्वचनम्॥अवधारणस्यान्यत्रालंबु द्धिमात्रद्योतनेन चरितार्थस्य सर्वात्मनेत्यत्राप्रवृत्तेरिति भावः ॥ननु संतुष्ट इत्यनेनालंबुद्धिजनकं सुखं प्राप्त इत्युच्यत इत्युक्तम् तत्किं विष

अन्यत्र सर्वात्मनालंबुद्धिः ॥ महच्च तत्सुखंच तेनैवान्यत्रालंबुद्धिरिति दर्शयति ॥ आत्मन्येव च संतुष्ट ॥ इति ॥ तस्थ एव सन्संतुष्ट इत्यर्थः ॥

यजन्यम् उतात्मरत्याख्यम् ॥ नाद्यः विरोधात ॥ न द्वितीयः ॥ तस्यात्मरतिशब्देनोक्ततया पुनरुक्तिप्रसंगात् ॥कथं च तस्यान्यत्रालंबुद्धिजन कत्वमित्यत आह ॥ महच्चेति॥च शब्दो हेतौ ॥ तदात्मरत्याख्यं प्रागुक्तमेव सुखं पुनरन्यत्रालंबुद्धिकारणत्वेनोच्यतेऽतो न दोषः ॥तस्य च महत्वं संशब्देनोक्तमतस्तत्कारणत्वं चोपपन्नमित्यर्थः॥आत्मरतिः संतोषशद्बेन गृह्यते चेत्॥पुनरात्मनीति व्यर्थमित्यत आह ॥तत्स्थएवेति॥ द्वारा संबंधसंभवान्नानुपपत्तिरिति भावः ॥ विरोधादिति ॥ विषयजन्यस्य सुखविषयेष्वनलंबुद्धि प्रत्येव हेतुत्वादितिचशद्बो हेताविति ॥ यस्मात्तस्मादित्यर्थः ॥ अव्ययानामनेकार्थ वादितिभावः ॥

॥ श्री० ॥ आत्मरतिपदेन तत्कारणत्व मन्यत्रालंबुद्धिकारणत्वम् ॥ आत्मनीतीति ॥ सप्तम्यंतात्मेति पदमित्यर्थः ॥ संतोषाख्यात्मरतिरिति ॥ अन्यत्रालंबुद्धिजनकं परमात्मदर्शननिमित्तं सुखमित्यर्थः ॥ अवधारणस्येति ॥ आत्मन्येवेत्यवधारणस्येत्यर्थः ॥ नन्वथापि पुनरुक्तिः आत्मरतिरेवेत्यवधारणेनान्यत्रालंबुद्धेः प्राप्तत्वादात्मन्येव च संतुष्ट इत्यत्राप्यवधारणेन तस्या एवोक्तेरित्यत आह ॥ एतेनेति ॥ आत्मन्येवेत्यवधारणस्यात्मरत्याख्यसंतोषं प्रत्यसंप्रज्ञातसमाधेरेव कारणत्वेनतद्व्यतिरिक्तकारणांतरव्यवच्छेदपरत्वव्याख्यानेनेत्यर्थः ॥ ॥ अस्य ॥ आत्मन्येवेत्यवधारणस्य न चैतदपि आत्मरतिरेवेत्यवधारणेनैव लभ्यमिति वाच्यम् ॥ तस्यावधारणस्यान्यत्रालंबुद्धिमात्रद्योतनेन चरितार्थतायाः पूर्वमेवव्याख्यातत्वादिति भावः॥ सुखेनेत्यस्य तृप्त इति मूलेनान्वयः ॥ पञ्चमीसमास इति ॥ आत्मनः सकाशात् तृप्त आत्मतृप्त इति पंचमीसमासइत्यर्थः ॥ असामर्थ्यमेवोपपादयति ॥ अन्यत्रेत्यनेन हीति ॥ अन्यत्रालंबुद्धिं प्राप्तस्तृप्त इत्युक्तत्वात्कस्मादन्यत्रेत्यवध्यपेक्षाया आत्मन इति पंचम्यंतपदस्यावध्यर्थकत्वेन तदाकांक्षापूरकत्वात्तेनैव ह्यस्य पंचम्यंतात्मशब्दस्य सामर्थ्यं तथा च समर्थः पदविधिरिति वचनात्तेनैव समासो युक्तः नत्वलंबुद्धिमात्रार्थकतृप्तशब्देन तज्जनितायाः कुत्रेत्याकांक्षाया अन्यत्रेत्यनेनैवात्मन इत्यनेनापूरणेनासामर्थ्यादिति भावः ॥ नन्वन्यत्रालंबुद्धिमत एव तृप्तशब्दार्थत्वात्पंचम्यंतात्मशब्दस्यान्यत्रेत्यनेन सामर्थ्ये तृप्तशब्दार्थेनैव सामर्थ्यप्राप्त्या युक्तस्तेन समास इत्याशंकते ॥ तृप्तेति ॥ तृप्तशब्दार्थ एवान्यत्रांतर्भूत इत्यपि पाठस्तत्रान्यत्रेतिपदमंतर्भूतं यस्मिन्नसावन्यत्रांतर्भूत इत्यर्थो द्रष्टव्य ॥

॥ संतोषाख्यात्मरतिः केनास्य जातेत्यपेक्षायामसंप्रज्ञातसमाधिलक्षणया परमात्मनि स्थित्येति ज्ञापयितुं आत्मनीत्युक्तमित्यर्थः ॥ अवधारणस्य प्रयोजनमाह ॥ नान्यदिति ॥ अन्यदसंप्रज्ञातसमाधिरूपात्तत्स्थत्वात् एतेनात्मरतिरेवेत्यवधारणेनास्य पुनरुक्ततापरिहृता नन्वात्मतृप्त

॥ नान्यत्किमपि संतोषकारणमित्यवधारणम् आत्मना तृप्तः ॥

इति कोऽयं समास इत्यत आह ॥ आत्मनेति ॥ न केवलमात्मरत्याख्येन सुखेन किं तु प्रसन्ने न परमात्मनैवेत्यर्थः ॥ पंचमीसमासः कथं न स्यादिति चेत् न ॥ असामर्थ्यात ॥ अन्यत्रेत्यनेन ह्यस्य सामर्थ्यं न तु तृप्तशब्दार्थेन ॥ तृप्तशब्दार्थ एवान्यत्रार्थांतर्भूतोऽस्तीति चेत्

॥ कृ० ॥ एतेनेति ॥ आत्मन्येवेत्यवधारणस्यात्मरत्याख्यसंतोषं प्रति असंप्रज्ञातसमाधिव्यतिरिक्तकारणांतरव्यवच्छेदपरत्वव्याख्यानेनेत्यर्थः ॥ आत्मरतिरेवेत्यवधारणस्यान्यत्रालंबुद्धिमात्रद्योतकत्वेन प्रागेव व्याख्यातत्वादिति भावः ॥ असामर्थ्यमेव दर्शयति ॥ अन्यत्रेति ॥ तृप्तिं प्रत्यात्मनोऽपादानत्वाभावादात्मन इति पंचम्याः कारकविभक्तित्वाभावेनान्यत्रेत्येवंरूपोपपदविभक्तित्वस्यैवाश्रयणीयत्वादिति भाव ॥

॥ श्री० ॥ **प्रकरणेति** ॥ अलंबुद्धिरेव तृप्तिशब्दार्थत्वेन कुत्रेत्याकाङ्क्षायां परमात्मप्रकरणत्वादेवान्यत्रेत्यस्यलभ्यमानत्वेन तृप्तशब्दार्थांतर्भावाभावादित्यर्थः ॥ **अन्यथेति** ॥ अन्यत्रेत्यस्यापि तृप्तिशब्दार्थांतर्गतत्वे इत्यर्थः ॥ **ततोऽन्यत्रेति** ॥ उत्तमश्लोकविक्रमादन्यत्रेत्यर्थः ॥ **इत्यर्थप्रसंगादिति** ॥ न चानिष्टापत्तिः ॥ तथात्वे ॥ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे इत्यनेन विरोधापत्तेरिति द्रष्टव्यम ॥ **सप्तमीसमासइति** ॥ आत्मनि तृप्त इति सप्तमीसमास इत्यर्थः ॥ **पूर्वविशेषणेति** ॥ आत्मरतिरित्युक्तविशेषणेत्यर्थः ॥ न हि तद्दर्शनानिमित्तसुखवान तत्रालंबुद्धिमानिति संभवतीति ॥ **प्रमाणांतरेति** ॥ परमात्मन्यलंबुद्धिर्न कार्येत्यर्थप्रतिपादकेन ॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्येत्यादिप्रमाणांतरेणविरोधाच्चेत्यर्थः ॥ **अर्थानुपपत्तिरिति** ॥ महत्तमानां उत्तमश्लोकविक्रमेष्वेव प्रीतेः सत्वादुत्तमश्लोकविक्रमैः श्रुतैस्तत्रप्रीतिं न प्राप्नुम इत्यर्थानुपपत्तिरित्यर्थः ॥ गमनिका व्याख्या ॥

न तस्य प्रकरणलब्धस्य तदंत[illegible]भावात ॥ अन्यथा वयं तु न वितृप्याम इत्यत्र ततोऽन्यत्रालंबुद्धिं न प्राप्नुम इत्यर्थप्रसंगात् ॥ अस्तु तर्हि सप्तमीसमास इति नेत्याह ॥ न हीति ॥ पूर्वविशेषणविरोधात् ॥ प्रमाणांतरविरोधाच्चेति भावः ॥ स्यादयं दोषो यदि तृ

न ह्यात्मन्यलंबुद्धिर्युक्ता ॥ तद्वाचित्वं च वयं तु न वितृप्याम उत्तमश्लोकविक्रमैरितिप्रयोगात्सिद्धम् ॥

॥ अध्याहारस्त्वगतिका गतिः ॥

प्तशब्दस्यालंबुद्धिवाचित्वं स्यात्तदेव कुत इत्यत आह ॥ तद्वाचित्वं चेति ॥ नन्वत्र तृप्तिशब्दः प्रीत्यर्थः ॥ नचैवं सत्यर्थानुपपत्तिः ॥ उत्तमश्लोकविक्रमैः श्रूयमाणैर्निमित्तैरन्यत्र प्रीतिं न प्राप्नुम इत्यध्याहारेणोपपत्तेरित्यत आह ॥ अध्याहारस्त्विति ॥ गत्यंतररहितागमनिका

॥ कृ० ॥ **पूर्वविशेषणेति** ॥ आत्मरतिरित्युक्तविशेषणेत्यर्थः ॥ तद्दर्शनादिजन्यसुखे सति तत्रालंबुद्ध्यसंभवादिति भावः ॥ **प्रमाणांतरेति** ॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्येत्यादिविरोधादित्यर्थः ॥ **निमित्तैरिति** ॥ हेत्वार्थ इत्यत्र तृतीयेति भावः ॥ ननु प्रमाकरणत्वं कल्पकत्वं प्रमाणधर्मः न च कल्पकराहित्यं प्रमाणं प्रमाणाभावरूपत्वात् ॥

१ भा. स्कं. १ अ. १ श्लो. १८ पूर्वार्धः ॥ २ श्लोक १९ वयंत्विति ॥ तस्योत्तरार्धः ॥ यच्छृण्वतामिति ॥ अत्रयच्छब्देन उत्तमश्लोकविक्रमजातस्यपरामर्शात्पूर्वश्लोकेहरेरवतारकथा आख्याहीत्युक्तेश्च न वितृप्याम इत्यत्रान्यत्रालंबुद्धिं न प्राप्नुम इत्यर्थकरणे पूर्वोत्तरग्रंथविरोध इति भावः ॥ ३ भा. स्कं. १ अ. १८ श्लो. १४

॥श्री०॥अश्रुतेति अश्रुतस्य ततोऽन्यत्रेत्यस्य कल्पनमित्यर्थः ॥नन्वात्मनस्तृप्त इतिषष्ठीसमासोऽप्याशंक्य कस्माद्भाष्यकारैर्न दूषित इत्यत आह ॥ षष्ठीसमासस्त्विति ॥ पूरणगुणसुहितार्थ सदव्ययतव्यसमानाधिकरणेन ॥ एतदर्थैः षष्ठी न समस्यत इति सूत्रार्थः ॥ पूरणे ॥ सतांषष्ठः ॥ सतां संख्यापूरणः षष्ठ इत्यर्थः ॥ गुणे ॥ पटस्य शौक्ल्यम् ॥ सुहितं नाम तृप्तिः ॥ फलानां तृप्तः ॥ सदिति शतृशानचोः संज्ञा ॥ तौसत् ॥ तौ शतृशानचौ सत्संज्ञौ स्त इत्युक्तत्वात् ॥ तत्र शतरि ॥ द्विजस्य कुर्वन् ॥ शानचि ॥ सतां कुर्वाणः ॥ अव्यये ॥ सतां कृत्वा ॥ तव्य ॥ सतां कर्तव्यम् ॥ समानाधिकरणे ॥ राज्ञो नलस्येत्युदाहरणानि ॥ एवं च प्रकृते तृप्तशब्दस्य सुहितार्थकत्वात्तद्योगे षष्ठ्याः समासप्रतिषेधनात्मनस्तृप्त इत्येवंवाच्यन् या आत्मतृप्त इतिसमासो न संभवत्यतो भगवत्पादैराशंक्य न दूषित इत्यर्थः ॥अपव्याख्यानमिति॥ज्ञानिनः कर्तव्याभावः अनेन श्लोकेनोच्यत इत्यपव्याख्यानमित्यर्थः ॥ एवार्थइति॥ ॥ असंप्रज्ञातसमाधिस्थस्यैवेत्यत्रेत्यस्य एवकारस्यार्थ इत्यर्थः ॥ व्यवहितत्वादन्वयमाह ॥ स्वधर्मः कार्य इति ॥ आहेति ॥ ज्ञानिमात्रे अनात्मरतित्वं नास्तीत्याहेत्यर्थः ॥ इत्युपपादितमिति ॥ प्रारब्धकर्मणैवापतिराहितब्रह्मणो वासनयाप्रायोऽल्पाभिमतिः प्रवृत्तिः संभवतीत्याशयवान् परिहरतीति द्वितीयाध्याय उपपादितमित्यर्थः ॥

॥ अध्याहारो ह्यश्रुतशब्दकल्पनम् ॥ तच्च कल्पकसद्भावे न दोषोऽन्यथा तु दोष एव ॥ कल्पकं च गत्यंतराहित्यम् ॥ अन्यथाऽनुपपत्तिरिति यावत् ॥ अलत्वलंबुद्ध्यर्थत्वे गृहीते विनाऽप्यध्याहारेण वाक्यार्थोपपत्तेरयुक्तोऽसाविति भावः ॥ षष्ठीसमासस्तु पूरणगुणसुहितार्थेति प्रतिषिद्धः ॥ अपव्याख्यानम् निराचष्टे ॥ आत्मरतिरेवेति ॥ न ज्ञानिमात्रस्येत्येवार्थः ॥ इतोऽपि न ज्ञानिमात्रस्य कार्याभाव

आत्मरतिरेवेत्यवधारणादसंप्रज्ञातसमाधिस्थस्यैव कार्यं न विद्यते ॥ स्थितप्रज्ञस्यापि कार्यो देहादि ॥ दृश्यते यद्वा ॥ स्वधर्मो मम तुष्ट्यर्थःसा हि सर्वैरपेक्षितेति वचनाच्च पंचरात्रे ॥अन्यदाऽ॥ ॥ न्यरतिरप्यस्त्सर्वस्य भवति ॥

इत्याह ॥ स्थितप्रज्ञस्यापीति ॥ स्वधर्मः कार्य इति संबंधः ॥ आत्मरतिरेवेत्यवधारणेऽपि कुतो न ज्ञानिमात्रविषयमेतादित्यत आह ॥ अन्यदेति ॥ अवधारणेन ह्यनात्मरतिर्व्यावर्त्यते ॥ असंप्रज्ञातसमाधिकालादन्यदा सर्वस्य ज्ञानिनोऽपीषदन्यरतिर्भवतीत्युपपादितम् ॥

॥ कृ० ॥ अतस्तस्य कथं कल्पकत्वमित्यत आह ॥ अन्यथानुपपत्तिरिति यावदिति ॥ षष्ठीसमासइति ॥ फलानां तृप्त इतिवत् ॥ तृप्तिकारणस्यात्मनः शेषत्वविवक्षायां षष्ठी तेन षष्ठीसमासप्रसक्तिरिति बोध्यम् ॥ पूरणगुणेति॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेत्यत्र सुहितार्थेत्यनेन तृप्तिवाचिशब्देन षष्ठ्याःसमासः प्रतिषिद्ध इत्यर्थः ॥उपपादितमिति॥

१ प्रजहातीतिपंचपंचाशत्श्लोके ॥

॥ श्री० ॥ **अवधारणमिति** ॥ आत्मरतिरेवेत्यवधारणेनान्यरतिर्न व्यावर्तिता ॥ किं त्वन्यरतौ सत्यामपि तत्रालंबुद्धिरपि सत्त्वाद्विद्यमानाऽपि रतिरप्रयोजिकाऽतोऽवधारणमुपपन्नमित्यर्थः ॥ **प्रागुक्तमिति** ॥ अन्यत्र सर्वात्मनाऽलंबुद्धिरिति वाक्येनेत्यर्थः ॥ तथाऽवधारणार्थ एवात्मतृप्त इत्यनेन निर्णीयत इति भावः॥**यत्पततीति** ॥ यत् कदाचित्पतति तत् सर्वदा गुर्वित्यर्थः ॥ **यो** ॥ ज्ञानी ॥ **एवंविधः** ॥ नियमेनात्मरतित्वादिमान् ॥ **कदाचि** दसंप्रज्ञातसमाध्यवस्थायाम् ॥ **सर्वदा** ॥ संप्रज्ञातसमाध्यवस्थायामपीत्यर्थः ॥

अतोऽसंप्रज्ञातसमाधिस्थव्यतिरिक्तानां ज्ञानिनामप्यवधारणेन व्यावर्तितत्वान्न तद्विषयमेतदिति भावः॥ननु ज्ञानिनामन्यरतौ विद्यमानायामपि तत्रालंबुद्धिरप्यस्तीत्यात्मरतिरेवेत्यवधारणमुपपद्यत इत्यत आह॥न चेति ॥तत्र श्लोके तत्र कार्याभावे प्रयोजकत्वेनात्मनोऽन्यत्रालंबुद्धिमात्रम ल्पालंबुद्धिः ॥ रतिसहचरितालंबुद्धिरिति यावत् ॥ नोक्ता किं तर्हि सर्वात्मनाऽलंबुद्धिः कुत इत्यत आह ॥ आत्मेति ॥ अवधारणेनान्यत्रा

॥ न च तत्रालंबुद्धिमात्रमुक्तम् ॥ आत्मतृप्त इति पृथगभिधानात् ॥

लंबुद्धौ लब्धायामपि यत्पृथगात्मतृप्त इत्यभिधत्ते तेन सर्वात्मनाऽलंबुद्धिरवधारणेनाभिप्रेतेति ज्ञायत इति प्रागुक्तम् ॥ अतो ज्ञानिमात्रे नेदमुपपद्यत इत्यर्थः ॥ यस्त्वात्मरतिरेवस्यैनदसंप्रज्ञातसमाधिस्थ एव संभवि ॥ तथाऽपि यत्पतति तद्गुर्वितिवध एवंविधः कदाचित्तस्य सर्वदा कार्यं न विद्यत इत्येवं ॥ व्याख्याने ज्ञानिमात्रस्य कार्याभावः सेत्स्यति ॥

॥ कृ० ॥ द्वितीये प्रारब्धकर्मणीप तिरोहितब्रह्मण इत्यादिभाष्येणेति शेषः ॥मात्रंकार्त्स्न्येऽवधारण इति उक्तार्थद्वयायोगादाह॥**अल्पालंबुद्धिरिति**॥यद्यपि मात्राकर्णविभूषणे॥अक्षरावयवे वृत्ते मानेऽल्पे च परिच्छद इतिविश्वकोशात्स्त्रीलिंगोमात्राशब्दोऽल्पार्थः ॥ तथाऽपि लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति महाभाष्यानुरोधात्क्लीबत्वेऽप्यविरोध इति भावेनैवमुक्तम् ॥ नन्वेवमपि पूर्वपक्ष्यभिमतार्थालाभ इत्यत आह ॥ **रतिसहितेति** ॥ विषयरतिसहितेत्यर्थः ॥ **अवधारणेनाभिप्रेतेति** ॥ न चात्रावधारणस्यान्यत्रालंबुद्धिमात्रद्योतनेन चरितार्थस्यसर्वात्मनेत्यत्राप्रवृत्तेरिति पूर्ववाक्यविरोधः ॥ आत्मतृप्तइतिपुनर्वचनरूपसहकारिसामर्थ्येनावधारणस्योक्तार्थाभिप्रायकत्वोपपत्तेः ॥तदिदमुक्तम् ॥ **अभिप्रेतेति** ॥

॥ श्री० ॥ ननु यदात्मरतिरित्यादिमान् तदैव तस्य कार्यं न विद्यत इति व्याख्यानादसंप्रज्ञातसमाध्यवस्थायत एव कार्याभावो लभ्यत इति चेत्तत्राह ॥ **न ह्यत्रेति** ॥ कालावच्छेदकशब्दः कालमर्यादाप्रतिपादकः शब्दः ॥ नन्वात्मन आत्मनि वा रतिर्यस्य यदा स आत्मरतिरिति समासबलात्तस्य कार्यं न विद्यत इत्युक्ते कार्याभावस्यात्मरतित्वादिसमानकालीनत्वं लभ्यत इति चेत्तत्राह ॥ **आत्मरतिरिति समासस्त्विति** ॥ आत्मन आत्मनि वा रतिर्यस्येति षष्ठ्यर्थे सप्तम्यर्थे वा बहुव्रीहिरन्यपदार्थभूतं रतिकर्तारमेवाचष्टे न तु कालावच्छेदमित्यर्थः ॥ यदेत्यस्य समासान्तःअश्रूयमाणत्वादिति भावः ॥ अपि चायमित्येतेषां व्युत्क्रमेणान्वय मभिप्रेत्याह ॥ **अयं चेत्यादि** ॥ यदा तदेति रहितोऽप्ययं रतिकर्तृत्ववाची आत्मरतिशब्दः ॥ इत्यादिरित्यादिपदेन यो दारान् परित्यजति स यतिरित्यादिग्रहणम् ॥ भाष्ये यो भुङ्क्ते इत्यस्यायमर्थः यः यत्कालावच्छिन्नः भुङ्क्ते सः तत्कालावच्छिन्नः न ब्रूयादित्युक्ते यदा भुङ्क्ते तदा न ब्रूयादिति लभ्यते यथा एवं यः आत्मरतिः यत्कालावच्छिन्नः आत्मरत्यादिमान् तस्य तत्कालावच्छिन्नस्य कार्यं न विद्यत इत्येवं कर्तृवाची आत्मरतिशब्दः कालावच्छेदेऽपि प्रसिद्ध इति॥ कथमयमर्थः प्राप्त इत्यत आत्मरतिरित्यस्य विशेषणत्वेन व्यावर्तकत्वाभिप्रायेणाह ॥ **अयं भाव इति** ॥ **अति प्रसिक्तौ सत्यामिति**॥संप्रज्ञातावस्थापन्नज्ञानिन्यतिप्रसक्तावित्यर्थः॥ ननूपलक्षणत्वेन व्यावर्तकं किं न स्यादित्यतः विशेषणत्वेनैव व्यावर्तकमिति भावेनोभयमाह ॥ **व्यावर्तकं चेति** ॥ **भोजनमिति** ॥ यो भुङ्क्ते स तु न ब्रूयादित्यत्रान्यदाऽपि वचना भावप्रसक्तौ सत्यां तद्व्यावर्तनाय यो भुङ्क्ते इति भोजनं विशेषणमुपात्तं तत्रान्यदा व्यवच्छेद्यो यो वचनाभावस्तत्समानकालीनत्वाद्भवति भोजनं विशेषणम् ॥ तथा च यदा भुङ्क्ते तदा न ब्रूयादित्यर्थो लभ्यते ॥ तथा गृहित्वस्य यत्यादावतिप्रसक्तिपरिहाराययोपात्तो दारपरिग्रहोऽन्यत्र व्यवच्छेद्यगृहित्वसमानकालीनत्वात् भवति गृहस्थविशेषणमित्यपि द्रष्टव्यम् ॥ **अन्यथेति** ॥ व्यवच्छेद्यासमानकालीनमुपलक्षणमित्यर्थः ॥

न ह्यत्र यदैवं तदेति कालावच्छेदकशब्दोऽस्ति ॥ आत्मरतिरितिसमासस्तु रतेः कर्तारमेवाचष्ट इत्यत आह ॥ कर्तृशब्द इति ॥ अयं च यदा तदेति रहितोऽपीत्यर्थः ॥ आदिग्रहणेन यो दारान्परिगृह्णाति स गृहीत्यादेः परिग्रहः अयं भावः ॥ तस्य कार्यं न विद्यत इत्युक्ते

कर्तृशब्दः कालावच्छेदेऽपि चायं प्रसिद्धःयो भुङ्क्ते स तु न ब्रूयादित्यादौ॥अतोऽसंप्रज्ञातसमाधावेवेतत्॥

ऽतिप्रसक्तौ सत्यामन्यव्यावर्तकं यस्त्वात्मरतिरेव स्यादित्यनेनोक्तम् ॥ व्यावर्तकं च द्विविधं भवति ॥ विशेषमुपलक्षणं चेति ॥ तत्र व्यवच्छेद्यसमानकालं विशेषणम् यथा सिद्धांत्युदाहृतं भोजनम् अन्यथा तूपलक्षणं

॥ कृ० ॥ **समासस्त्विति** ॥ बहुव्रीहिरन्यपदार्थमात्रे तात्पर्यादिति भावः ॥ **व्यवच्छेद्येति** ॥यावद्व्यावर्त्यभावीत्यर्थः ॥ **अन्यथात्विति**॥ व्यवच्छेद्यासमानकालमित्यर्थः ॥

---

१ अंतरितिरेफांतमव्ययम् ॥ समासमध्येइत्यर्थः ॥

॥ श्री० ॥ तदुदाहरति ॥ यथेति ॥ भूमौफलपातानंतरं प्रयुक्ते यत्पतति तद्गुर्वित्यत्र गुरुत्वस्यान्यत्वागुरुण्यनिप्रमक्तौ सत्या तद्व्यावर्तनाय पतनमुपलक्षणमुपात्तं तत्र [illegible] कैयाकृत। त्वेन चिरविनष्टस्य अन्यत्रागुरुणि व्यवच्छेद्यगुरुत्वसमानकालीनत्वाभावादुपलक्षणत्वमित्यर्थः तथा च विशेषणत्वं व्यवच्छेद्यं यावत्पर्यंतमस्ति ताव पर्यंत सत्वगमम [illegible] तेथिभावः ॥ विशेषणलक्षणयोपलक्षणात [illegible] मुख्यहेतुमाह ॥ विशेषेति ॥ भोजनादिव्यवच्छेद्यसमानकालीनत्वेन भोजनविशिष्टोवचनाभाववान [illegible] जनकत्वादित्यर्थः ॥ तत्रहेतुमाह ॥ वैपरीत्यादिति [illegible] पतनस्य व्यवच्छेद्यासमानकालीनत्वेन पतनवद्गुर्विति स्वविशिष्टज्ञानाजनकत्वादित्यर्थः ॥ ननु प्रकृते [illegible] स्यात्मरतित्वादेरन्यदा व्यवच्छेद्यकार्याभावसमानकालीनत्वमंगीकृत्य विशेषणत्वोक्तौ बाधकमद्भावाद्व्यवच्छेद्यकार्याभावासमानकालीनत्वेनोपलक्षणत्वमेवास्त्विति चेत्तत्राह।नचात्र [illegible] तइत्यस्य आत्मरतित्वादीनां बाधकाभावेन विशेषणत्वस्य [illegible] ॥ समानकालताम ॥ अन्यदाव्यवच्छेद्यकार्याभावसमानकालीनताम ॥ तथा च प्रकृते ॥ आत्मरतित्वस्य विशेषणत्वेन व्यावर्तकत्वे वाच्ये अन्यदा व्यवच्छेद्यकार्याभावसमानकालीनत्वप्राप्त्या यदा आत्मरतिस्तदैव कार्याभाव इति कालावच्छेदः प्राप्त इति भाव ॥ ननु मन इत्यस्यैव धातुत्वं न तु मनु अवबोधन इत्यस्य तत्कथं विशिष्टस्य धातु [illegible] इत्यत आह ॥ धातोर्व्याख्यानादिति भावइति ॥ [illegible] अवबोधनरूपस्याभिमतत्वाभिप्रेत्य सत्यप्रत्यय इत्यर्थः । तथा च मननं मनुरिति भावार्थो द्रष्टव्यः ॥ इत्यर्थे [illegible] इत्यर्थः ॥

यथा पूर्वपक्षयुदाहृतं पतनम् तत्रविशेषणं मुख्यम ॥ विशेषज्ञानहेतुत्वात् ॥ अन्यदमुख्यं वैपरीत्यात मुख्यामुख्ययोश्च मुख्ये कार्य संप्रत्ययः ॥ न चात्र विशेषणत्वग्रहणे बाधकमस्ति ॥ येनोपलक्षणमेतदिति प्रतीम इति ॥ कर्तृशब्द इत्युक्तस्य फलमाह ॥ अत इति॥ एतत्कार्यराहित्यम् ॥ समाधावेवेत्युक्त्या समानकालतां सूचयति ॥ न च संप्रज्ञातसमाधिस्थस्य कार्याभावे व्याख्यायमाने कदाचिदपरोक्ष

॥ मानवइति ज्ञानिन एवासंप्रज्ञातसमाधिर्भवतीति दर्शयति ॥ मनु अवबोधन इति धातोः ॥

ज्ञानरहितस्याप्यसंप्रज्ञातसमाधिसंभवात्कार्याभावप्रसंग इति चेत न ॥ अपरोक्षज्ञानिन एवासंप्रज्ञातसमाधिर्भवति नान्यस्येत्यस्यार्थस्य मानव इति पदेन भगवंतैव दर्शितत्वादित्याह ॥ मानव इति ॥ मानव इति कथं ज्ञानिनो वाचकमित्यत आह ॥ मन्विति ॥ धातोर्व्याख्या नादिति शेषः अस्माद्धातोर्भावे उप्रत्ययः ॥

॥ कृ० ॥ विशेषज्ञानहेतुत्वादिति स्वकालावच्छिन्नतया व्यावर्त्यज्ञानहेतुत्वादित्यर्थः ॥ विशेषमणयद्यस्मादित्यादिर्गीतातात्पर्योदाहृतप्रमाणादितरव्यावृत्त्यतिरिक्तविशेष्यगतस्वाभाविकविशेषबोधकत्वमेव विशेषज्ञानहेतुत्वम् उपलक्षणे तु नैवम् ॥ इतरव्यावृत्तिमात्रबोधकत्वादित्यप्याहुः ॥ मनु अवबोधन इत्यस्यधात्वर्थबोधकत्वेन धातुत्वाभावादाह ॥ धातोर्व्याख्यानादिति शेषइति ॥ उप्रत्ययइति ॥ औणादिक इति शेषः ॥

॥श्री०॥आश्रय इति ॥ तस्येदमितिसूत्रेण संबंधार्थेऽणो विधानात आश्रय इतिसंबंधोव्याख्यातः ॥ तथा च मन् अस्मात्उप्रत्यये मनु इतिजाते पश्चात मनुशब्दान्मत्वर्थे संबंधार्थे वा तद्धितेऽणूप्रत्यये अचोञ्णितीत्यनुवर्तमानेनाद्धिनेष्वचामादेरिति णित्वादादिवृद्धौ ओर्गुण इति उकारस्य ओकाररूपे गुणे एचोयवायाव इति तस्यावादेशे मानवेतिरूपंते न तु धातोरुपरि उप्रत्ययमुत्पाद्य तस्य शब्दतां संपाद्य तद्धिताण्प्रत्यय इत्यर्थः अतः पक्षांतरमाह ॥ यद्वेति ॥ मनुरवबोधोऽस्यास्तीत्याद्यत्रानुवर्तते ॥ तथा च मन् अस्मात अवण् प्रत्यये अत उपधाया इत्यनेनोपधाभूतस्य मकारस्थाकारस्य आकाररूपवृद्धौ मानवेतिरूपं द्रष्टव्यम ॥ ऋष्यादिव्यावृत्तिरिति ॥ तेषामसंप्रज्ञातसमाधिसद्भावेन तद्व्यावृत्तिरनिष्टेति भावः ॥ वैयर्थ्यंचेति ॥मानवपदस्येति शेषः अन्यथा व्याख्यातम जीवपरत्वरूपां ॥ तस्यैवेति॥यदि स्वात्मरतिमतः क्रियाभाव उच्येत तर्हि विष्णावेवरतिर्यस्य क्रियातस्यैवनास्ति हीति प्रमाणवाक्यं तस्यैव विष्णौ रतिमत एव क्रियानिषिध्यते तन्नस्यादित्यर्थं ॥ १७ ॥ असंप्रज्ञातसमाधेरिति ॥ तद्वतः पुरुषस्येत्यर्थः ॥ करणस्यैवाभावेनेति ॥ कर्मकरणप्रसक्तेरेवाभावेनेत्यर्थः ॥ तत्प्रयोजनाभावकथनस्येति ॥ नैव तस्य कृतेनार्थ इति कर्मकरणप्रयोजनाभावकथनस्येत्यर्थः ॥ करणसंभवेन ॥ कर्मकरणसंभवनेत्यर्थः ॥

ततो मनुरवबोधोऽस्यास्तीत्यस्मिन्नर्थे मनोरण्यमाश्रय इत्यर्थेवाऽणूप्रत्ययः ॥ यद्वा धातोरेववाणप्रत्ययः ॥ मनुष्य इति व्याख्यायामृष्यादिव्यावृत्तिर्वैयर्थ्यंचापद्येत ॥ आत्मशब्दस्याप्यन्यथा व्याख्यां निराकरोति ॥ परमात्मेति ॥ चशब्दोऽवधारणे ॥ न स्वात्मरतिरित्यर्थः॥तस्यैवेत्यवधा

परमात्मरतिश्चात्र विवक्षिता ॥ विष्णावेव रतिर्यस्य क्रिया तस्यैव नास्ति हीति वचनात् ॥ १७ ॥

रणादिति ॥ १७ ॥ यदीयं कार्याभावोक्तिर्ज्ञानिमात्रस्य किंत्वसंप्रज्ञातसमाधिस्थस्यैव॥तर्हि नैव तस्य कृतेनार्थ इत्युत्तरं वाक्यं न संबध्यते असंप्रज्ञातसमाधेः करणस्यैवाभावेन तत्प्रयोजनाभावकथनस्यैवायोगात ज्ञानिनस्तु करणसंभवेन तत्प्रयोजनप्रतिषेधोपपत्तिरिति चेन्न॥

॥ कु० ॥ अणप्रत्ययइति ॥ आश्रयार्थे शेष इति शैषिकोऽणप्रत्ययः ॥ द्वितीये तस्येदमित्यनेनेत्यर्थः ॥ आश्रय इति तु फलितार्थप्रदर्शनायोक्तम् ॥ तथा च मन् शब्दादणूप्रत्यये ओर्गुण इति गुणेऽवादेशे णित्वादादिवृद्धौ च मानव इति रूपमिति भाव ॥ कृत्तद्धितप्रत्ययद्वयकल्पनागौरवात्पक्षांतरमाह ॥ यद्वेति ॥ मनुतेऽसौमानवः ॥ कर्तरि औणादिकोऽवण् प्रत्ययः णित्वादतउपधाया इति उपधावृद्धिश्चेतिभावः ॥ ऋष्यादीनि ॥ तेषामप्यसंप्रज्ञातसमाधिमत्वेन संग्राह्यत्वात्तद्व्यावृत्तिरनुचितेति भावः ॥ वैयर्थ्यं चेति ॥ मानवपदस्येति शेषः ॥ तस्यैवेतीति विष्णावेवेति ॥ प्रमाणवाक्य इतिशेष. ॥ १७ ॥ प्रतिषेधोपपत्तिरिति चेन्नेति ॥ इतः परं य। इत्यध्याहृत्यैव मुच्यत इत्यनेनान्वयोऽनुसंधेयः ॥ तेन पंचम्यभावादनन्वय इति परास्तम् ॥ भेरीताडनादावपि परमानंदमग्नत्वादित्यंतेन समाधिस्थस्योद्बोधाभावोक्तेः स कथमुद्बोध्य इत्यत उक्तम ॥

॥श्री०॥ **तर्हीति** ॥ यदि कर्मकरणाकरणयोर्लाभहानी तर्ह्यसंप्रज्ञातसमाधिर्न कर्तव्या तत्र कर्मलोपावश्यंभावादित्याक्षेपस्येत्यर्थः ॥समाहितोऽसंप्रज्ञातसमाधिंप्राप्तः ननु भेरिताडनादावुद्बोधना योगात्कथमुद्बोधनमित्यत आह ॥ **योगशास्त्रेति** ॥ ननूक्तार्थो नास्तीत्यत्रोक्तिरूपक्रीयायां पुरुषस्य कर्तृत्वान्नास्तीत्यत्र तु अर्थस्य कर्तृत्वेन समानकर्तृकत्वाभावात् ॥ कथमुक्त्वेति क्त्वाप्रत्ययः समानकर्तृकयोः पूर्वकाले क्त्वेति स्मरणादित्यत आह ॥ **उद्बुद्धस्येति** ॥ **तथा** चोद्बोधनरूपक्रिययोक्तिरूपक्रियायाः समानकर्तृकतासद्भावात् युक्तः ॥ क्त्वाप्रत्यय इत्यर्थः ॥ ननु कर्मादिकृतार्थो नास्तीति कथं तस्यैव महत्सुखत्वात् तेषाम् ॥ तेषामप्युपासनादिफलस्य साधितत्वादित्यादिना द्वितीयाध्याये ज्ञानीकृतश्रवणादेरर्चनादिकर्मणश्च फलस्योक्तत्वादित्याशंक्य परिहरति ॥ **एवं तर्हीति** ॥ नन्वसंप्रज्ञातसमाध्यपरित्यागहेतुत्वमाधिकफलनिषेधस्यैव ॥ कर्मकरणेनाधिकफलसद्भावे समाधिपरित्यागस्यावश्यकत्वात् ॥ न तु समफलनिषेधस्य समाधिकर्मणोः समफलकत्वे पूर्वप्राप्तसमाधिपरित्यागायोगात् ततश्च कथं समोऽवेति तन्निषेध इत्यत आह ॥ **समप्रतिषेध इति** ॥ यदा समोऽर्थो नास्ति तदाऽधिको नास्तीति किं वक्तव्यमिति कैमुत्य [illegible] ॥ ॥ कृ० ॥ **योगशास्त्रेति** ॥

तर्ह्यन्तर्विव मन[illegible]धानमपि न [illegible]मित्य[illegible]पस्य तस्य कार्यं न विद्यत इत्युत्तरं कस्मादुक्तं कर्मकृतिकाले त्वयाऽहमुद्बोधनीय इति कंचित्प्रत्यु[illegible] [illegible]स्तेन योगशास्त्रादितोपायैरुद्बोधितः कर्म करोतीति कुतो नोक्तमित्याशंकानिरासायेदमेवमुच्यत इत्यभिप्रेत्य व्याचष्टे॥तस्येति॥

तस्य कर्म काले वक्तव्योऽहमिति कंचित्प्रत्युक्त्वा तत्कृतावात्मरत्यधिकः समो वा र्थो नास्ति॥

तस्यासंप्रज्ञातसमाधिस्थस्यार्थो नास्तीति संबंधः ॥ उक्त्वोद्बुद्धस्येति शेषः ॥एवं तर्हि तस्यैवमहत्सुखत्वादित्यायुक्तिविरोध इत्यत उक्तम्॥ ॥आत्मेति ॥ समो वाऽऽत्मरत्या ॥ समप्रतिषेधः कैमुत्यार्थः ॥

एतादृशात्ययविशेषस्पर्शी समाधिस्थस्योद्बोधाभवतीत्येवं योगशास्त्रादितोपायैरित्यर्थः ॥ **व्याचष्ट इति** ॥ नैव तस्य कृतेनार्थ इतिवाक्यमिति शेषः ॥ समानकर्तृकयोः पूर्वकाल इति ॥ समानकर्तृकक्रिययोर्मध्ये पूर्वकालीनक्रियावाचकात्क्त्वाप्रत्ययविधानात्समानकर्तृकतानिर्वाहार्थमाह ॥ उक्त्वोद्बुद्धस्येति शेष इति **एव तर्हीति** ॥ ननु तस्यैवेत्यादिना श्रवणादेःफलं साधितम् ॥ अत्रत्वसंप्रज्ञातसमाधिस्थकर्तृकर्मेण ॥ फलं नास्तीत्युच्यते ॥ तत्कथं विरोधः ॥ इत्यत ॥ निवृत्तकर्म द्विविधम् ॥ उपासना यज्ञादिश्चेति ॥ यथोक्तंचतुर्थटीकायाम् ॥ निवृत्त एव कर्मणि उपासना यज्ञादिरूपो भेद इति ॥ एवं चोपासनाया अपि निवृत्तकर्मत्वात्कर्मकृतार्थो नास्तीत्युक्ते तस्यैवेत्यनेन विरोध इति॥ नन्वाधिकस्यैवपूर्वपरित्यागोपयोगित्वादिति वक्ष्यमाणरीत्याऽधिकफलनिषेधः ॥ समाध्यपरित्यागे हेतुरस्तुसमफलनिषेधस्तु व्यर्थ इत्यत आह ॥ **समप्रतिषेध इति** ॥

॥ श्री० ॥ अत एव वक्ष्यति अधिकस्यैव पूर्वपरित्यागोपयोगित्वादिति ॥ नुन समो नाऽर्थो नास्तीति कैमुत्यार्थमपि समप्रतिषेधः कस्मात्कर्तव्यः समफलेलाभेन पूर्वपरित्यागः कस्मान्नस्या दित्यत आह ॥ न त्विति ॥ समफलत्वे समाप्तित्यागेन कर्मकरणं तत्समानसमाधिकफलहानेन समव्ययफलत्वप्राप्तिः अस्त्विति चेन्न ॥ समव्ययफलं तु कर्म न हि लोकैरनुष्ठीयते॥असत्यानि दुरंतानि समव्ययफलानि च ॥ अशक्यानि च वस्तूनि नारंभेत विचक्षण इति वचनादिति भावः ॥ संनिधानादिति ॥ एकस्मिन्नेवार्थे सहैव शब्दसंनिधानादिति भावः ॥ इदमयुक्तमिति ॥ नाकृतेनेहकश्चनेत्यकरणेनार्थनिराकरणमयुक्तमित्यर्थः ॥ तदुपपादयति ॥ नहीति प्रतिषेधः ॥ नाकृतेनेहकश्चनेति प्रत्यवायप्रतिषेधः ॥ अप्राप्तेरिति ॥ अप्रसक्तेरित्यर्थः ॥ ॥ प्रत्यवायेति ॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहीर्षयेति वचनादिति भावः ॥ ॥ कृ० ॥ हेतुरेव किं नस्यादित्यत आ

न तु समव्ययफलं कर्मानुष्ठीयते॥नन्वत्र कश्चनेत्यस्य विशेष्याकांक्षाया संनिधानादर्थ इति संबध्यते ॥तथा चेदमयुक्तम्॥न हि कर्माकरणेऽर्थप्राप्तिरस्ति येनप्रतिषेधः संगच्छते ॥ अर्थसंनिधानादपि योग्यताया बलवत्त्वात्कश्चन दोष इत्यध्याह्रियते ॥ तथाऽप्यश्वमेधाद्यकृतौ प्रत्यवाया

॥ न च संध्याद्यकृतौ कश्चिद्दोषोऽस्ति ॥

प्राप्तेः प्रतिषेधोऽसंगत एवेत्यतो नाकृतेनेत्येतन्न व्याचष्टे ॥ न चेति ॥ माभूद्यज्ञादिकरणार्थमुत्थानं नित्यनैमित्तिकाकरणे प्रत्ययप्राप्तेस्तदर्थं तु स्यादित्याशंकानिरासार्थमेतत् ॥

ह ॥ न त्विति ॥ पूर्वं परित्यज्य तत्समफलं कर्मानुष्ठेयमेव न भवति ॥ पूर्विकफलहानेन समव्ययफलहानेन समव्ययफलत्वात् ॥ तस्य चाधिकफलानि दुरंतानि समव्ययफलानि च अशक्यानि च वस्तूनि नारंभेत विचक्षण इत्यनारंभोक्तेः ॥ ततश्च समफलस्यपरित्यागेऽप्रयोजकत्वात्तन्निषेधोऽत्र पूर्वापरित्यागे हेतुरिति भावः ॥ बलवत्त्वादिति ॥ योग्यतायाः प्रमाणमात्रप्रयोजनत्वात् ॥ संनिधेश्च भ्रमप्रमासाधारणज्ञानमात्रप्रयोजकत्वादिति भावः ॥ कल्पतरौ तु स्थानाल्लिंगस्य बलवत्त्वात्संनिधियोग्यतयोश्च स्थानलिंगात्मकत्वाद्बलाबलमित्युक्तम् ॥ स्थानलिंगात्मकत्वं चेत्थम् ॥ सामर्थ्यं लिंगंवाक्यार्थाबाधरूपयोग्यताऽपि अर्थे सामर्थ्यमेव एवं समानदेशत्वं स्थानं अविलंब नोच्चरितत्वरूपसन्निधिरपिशब्दतः ॥ समानदेशत्वमेवेति ॥ न चेति भाष्यं संगमयति ॥ माभूद्यज्ञादीनि ॥

१ निष्फलानि अशक्यसमाप्तिकानि प्रारब्धस्यांतगामित्वं प्रथमं बुद्धिलक्षणमित्युक्तेः स्वरूपतएवकर्तुमशक्यानि वस्तूनि बहुवचनमाद्यर्थेतेनकर्मादीनीतिलभ्यत इति भावः ॥

॥ श्री० ॥ ननु संध्याद्यकृताविति कथम् ॥ संध्याशब्दस्य कालवाचित्वादित्यत आह ॥ संध्येनीति ॥ उच्यते ॥ लक्षणया प्रतिपाद्यते ॥ लक्षणाबीजसंबंधोपपादनाय तत्कालेऽनुष्ठेय मित्युक्तम् ॥ उक्तविरोधादेवेति ॥ गुरुदेवतापूजाकरणाकरणयोरर्थप्रत्यवायौ स्यातामित्युक्तविरोधादित्यर्थः ॥ यथाश्रुतगीतावाक्यस्य शंकापरिहाराक्षमत्वादिति भावः ॥ नन्वेतदपहाय प्रयोजनाश्रयो नास्तीत्यत्र कथं समानकर्तृकत्वम् ॥ अपहानेऽसंप्रज्ञातसमाधिस्थपुरुषस्य कर्तृत्वात् ॥ नास्तीत्यत्र त्वर्थव्यपाश्रयस्य कर्तृत्वात् ॥ तथा च कथमपहायेति समानकर्तृकः क्त्वाप्रत्ययः ॥ नन्वपहायेति ल्यप् ॥ न क्त्वेति चेन्न ॥ क्त्वो ल्यबिति ल्यपः क्त्वादेशत्वात् अत आह ॥ उत्थितस्येति शेषइति ॥ अपहानोत्थानक्रिययोः समानकर्तृकत्वं क्त्वः क्त्वादेशभूतो ल्यबिति भावः ॥ तदुपपादयति ॥ आधिक्यस्यैवेति ॥ एतदपहाय गुर्वादिवंदनेन प्रयोजनं नास्तीति पूर्वप्राप्तसमाध्यपरित्याग उच्यते तेन तस्यैवाधिक्यं न गुर्वादिवंदनस्येति ज्ञायते ॥ कुतः ॥ पूर्वपरित्यागेऽधिकस्यैवोपयोगित्वादित्यर्थः ॥ तथा चेति ॥ प्रयोजनप्राप्तिः कस्मादित्याकांक्षापूरणसामर्थ्यं पंचम्यंतपदस्यैव न सप्तम्यंतपदस्येति भावः ॥

संध्येति तत्कालेऽनुष्ठेयं कर्मोच्यते ॥ माभूदल्पस्य[1] यज्ञादेरनुष्ठाने प्रयोजनाभावः ॥ संध्याद्यकृतौ प्रत्यवायश्च[2] ॥तथाऽपि गुरुदेवतादिपूजाकरणाकरणयोरर्थप्रत्यवायौ स्यातामेव अतस्तत्संनिधिप्राप्तावुत्थानमावश्यकमेवेत्याशंकानिरासार्थं न चास्येत्युक्तम् ॥ तदयुक्तम् ॥ उक्तविरोधादेवेत्यतो व्याचष्टे ॥ न चैतदिति ॥ एतदसंप्रज्ञातसमाधानम् अपहायोत्थितस्येति शेषः अपहायेत्यनेन गुर्वादिपूजाया अपि आधिक्यं

न चैतदपहाय सर्वभूतेषु कश्चित्प्रयोजनाश्रयः ॥ अर्थो येनदर्शनादिना भवति ॥ सोऽर्थव्यपाश्रयः॥

नैवतस्य कृतेनार्थोनाकृतेनेहकश्चन ॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

निषेधति आधिक्यस्यैव पूर्वत्यागोपयोगित्वात् ॥ सर्वभूतेषु गुर्वादिषु नन्वर्थव्यपाश्रयो नामार्थप्राप्तिः तथा च सर्वभूतेभ्यइति स्यादित्यत आह ॥ अर्थ इति ॥ अनेनार्थस्य व्यपाश्रयः प्राप्तिर्येन दर्शनादिना व्यापारेण भवतीति व्यधिकरणो बहुव्रीहिरयमित्युक्तंभवति ॥

॥ कृ० ॥ ननु संध्याकृताविति अयुक्तं संध्यायाः कालविशेषत्वेनकरणाप्रसक्तेरित्यत आह ॥ संध्येतीति उक्तविरोधादेवेति ॥ अर्थप्रत्यवायौ स्यातामित्युक्तेरित्यर्थः ॥ यथाश्रुतगीतावाक्येन शंकानिरासाभावादिति भावः ॥ समानकर्तृकतानिर्वाहार्थमाह ॥ उत्थितस्येति शेष इति ॥ सर्वभूतेभ्य इति स्यादिति ॥ जनिकर्तुः प्रकृतिरिति सूत्रेण जायमानं प्रतिहेतुत्वादपादानत्वे पुत्रात्प्रमोदो जायत इतिवत् पंचमीप्राप्तेरिति भावः ॥

१ अल्पस्यकाम्यस्य महतोयज्ञादेश्च काम्यस्येत्यर्थः ॥ २ यदकरणे प्रत्यवायस्तादृशनित्यनैमित्ताकरणे ॥

॥श्री०॥दर्शनादिनेत्यत्रादिपदेन वंदनादिग्रहणम्॥तथा चेति॥अर्थव्यपाश्रयोऽर्थप्राप्तिसाधनीभूतं दर्शनादिकं नास्तीत्युक्ते केषु विषयेष्वित्याकांक्षायां सर्वभूतेष्विति विषयसप्तम्यंतपदमुक्तम् ॥ एवं च सर्वभूतविषये प्रयोजनसाधनीभूतदर्शनादिकं नास्तीत्युक्तेऽर्थाद्गुर्वादिदर्शनवंदनादेः प्रयोजनहेतुत्वाभाव उक्तो भवतीति द्रष्टव्यम् ॥ पुंल्लिंगं पित्र्यर्थं व्यापारेणेत्युक्तम् ॥ नन्वकरणे प्रत्यवायविरोधस्योक्तत्वात्तन्न परिहृत इत्यत आह ॥ ॥ अनेनेति ॥ नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय इत्यपि द्रष्टव्यम् ॥ तथा च तदाग्रुर्वादिवंदनाद्यकृतावनर्थप्राप्तिर्नास्तीति भावः ॥ एतत् ॥ यस्त्वात्मरतिरेवेत्यादिवाक्यम् ॥ ननु तस्य कार्यं न विद्यत इतिकार्याभावोक्तेर्ज्ञानिनश्च कर्माकरणे प्रत्यवायसद्भावेन कार्याभावरूपतदुक्तार्थस्य ज्ञानिन्यसंभवात् कथं तद्विषयमेतद्वाक्यं स्यादित्यत आह ॥ ज्ञानमात्रेणेति ॥ नन्वात्मरतिरेवेत्यवधारणेनासंप्रज्ञातसमाधिस्थस्यैव कार्याभावावगमेन तादितरस्य ज्ञानिनस्तत्सद्भावावगमात् कथं तद्विषयं [illegible] वाक्यं स्यादित्यत आह ॥ अवधारणादेश्चेति ॥ अयोगव्यवच्छेदमंगीकृत्येति भावः॥ विरोधीति ॥ तथा च ज्ञानिनः॥ कार्याभावस्य त्वयोक्तत्वेन ममापि ज्ञानित्वाद्युद्धादिकर्माहं न करिष्य इत्येवार्जुनो ब्रूयादित्याशयः ॥ भाष्ये तद्भवतीत्यत्र तच्छब्दस्य प्रतिषिद्धकरणमर्थः ॥ तथा च तन्महच्चेदीषत्प्रारब्धफलभूतानर्थसूचकमित्यन्वयः ॥

तथा च दर्शनादेर्विषया गुर्वादय इति सप्तम्युपपत्तिः ॥ अनेनानर्थव्यपाश्रयोऽप्युपलक्ष्यते ॥ स्यादेतत् ॥ किमनेनायासेन ज्ञानिमात्रविषयमेतत्किं न स्यात् ज्ञानमात्रेण प्रत्यवायाभावात्तत्राप्यस्यार्थस्य संभवात् ॥ अवधारणादेश्चोपचरितार्थत्वसंभवादित्यत आह ॥ ज्ञानेति ॥

ज्ञानमात्रेण यद्यपि प्रत्यवायो न भवति ॥ तदर्जुनस्यापि सममिति न तस्य कर्मोपदेशोपयोग्येतद्भवति ॥ ईषत्प्रारब्धानर्थसूचकंचतद्भवति ॥ महच्चेद्वृत्रहत्यादिवत् ॥१८॥

तज्ज्ञानमात्रम् ॥ इतिशब्दो हेतौ ॥ एतत्कार्याभाववचनं प्रत्युतविरोधीति हृदयम् प्रत्यवायो न भवतीत्यंगीकृत्योक्तम्॥ वस्तुतस्तु ज्ञानिनोऽप्यस्ति ॥ प्रतिषिद्धकर्मकरणादिनाऽनिष्टप्राप्तिरित्याह ॥ ईषदिति ॥

॥ कं० ॥ एतत्किं न स्यादिति ॥ यस्त्वात्मरतिरित्यादिवाक्यमित्यर्थः ॥ तत्रापि॥ ज्ञानिन्यपि ॥अस्यनाकृतेनेत्याद्युक्तस्य ॥ अवधारणादेश्चेति ॥ आत्मरतिरेवेत्यवधारणादेरित्यर्थः ॥ आदिपदात्स्थितप्रज्ञस्यापि इतिप्रमाणग्रहणम् ॥ प्रतिषिद्धकरणादिनेति ॥ प्रतिषिद्धमष्टाविधम् ॥ क्षुद्रपापं पापं उपपातकं पातकं महापातकं सुमहापातकं अतिसुमहापातकं अतिसुमहामहापातकं चेति ॥ तत्र महापातकादिकमत्रात्र प्रतिषिद्धशब्देन विवक्षितम् ॥ क्षुद्रपापादिचतुष्टयस्य प्रमादात्तु कृतं पापं स्वयं भस्मीभविष्यतीत्यलंशोक्तेः ॥ आदिपदेन विहिताकरणसंग्रहः ॥ भाष्ये ॥ प्रारब्धानर्थसूचकमिति ॥ प्रारब्धानर्थसूचकत्वं नाम प्रारब्धपापोद्बोधकत्वम् ॥ ब्रह्मापरोक्षेऽपि कर्म सूचकं प्रारब्धपापस्यविपाशनं यथेत्यत्र प्रारब्धकर्म न त्वेषां स्थूलदुःखस्य सूचकम् ॥ इदानींतनकर्म स्याद्व्रणहेतुर्यथारण इति तत्र न विपाशनरणदृष्टांतान्वययोगात् ॥ विपाशनादेः पूर्वपापोद्बोधकत्वेऽपि तज्ज्ञापकत्वाभावादिति बोध्यम् ॥

१ अर्थव्यपाश्रय इति

॥ श्री० ॥ **मुक्तावानंदह्रास इत्यादि** ॥ तथा हि ॥ अस्त्यत्र सिद्धांते रहस्यविशेषः ॥उत्तमाधिकारिव्यतिरिक्तानामानंदस्य ह्रासो नाम यावत्स्वरूपसुखानभिव्यक्तिः॥अपरोक्षज्ञानो त्तरकृतसत्कर्मणा यावत्स्वरूपसुखाभिव्यक्तिर्वृद्धिः॥ ननु कथं मोक्षे सुखानभिव्यक्तिः ॥ आवरणाभावादिति चेन्न ॥ द्विविधं ह्यावरणम ॥ एकं ईश्वरेच्छारूपमपरं प्रकृत्यादि ॥तत्र द्वितीयं मुक्तौ नास्त्येव ॥ प्रथमं सा... ॥ आद्य ... ॥ नच ज्ञानोत्तरं स्वोतमद्रोहादिरूपं पापं निमित्तीकृत्य यावत्स्वरूपानंदानुभवं प्रतिबध्नातीति युक्तःसुखानभिव्यक्तिरूपो ह्रासः ॥ तथा पापवत् भगवत्पूजात्मककर्माकरणमपि ह्रासे निमित्तम॥यथोक्तम ॥ कृष्णोपास्तिमकुर्वतः ॥ ज्ञानिनोऽपि यतो ह्रास आनंदस्य भवेद्ध्रुवमिति तथाऽविद्यायां निवृत्तायामपि स्वस्वरूपभूतमप्यानंदादिकमीश्वरेच्छाशक्त्याऽकृत सत्कर्मा... नानुभवेत् शक्यं कृते च कर्माणि तेन तुष्टो भगवानिच्छाशक्तिमपसारयति ॥ ततः पूर्वमनुभूयमानानंदापेक्षयाऽप्यधिकानं दानुभवलाभात आनंदवृद्धिरित्युच्यते एतदेवाभिप्रेत्योक्तमणुभाष्ये॥गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तगौ ॥ नृणामिति नन्वीपदित्यादिग्रंथस्य सर्वज्ञानिसाधारण्यात् सुराणांमुक्तौ तु सुखंकृतं यथाक्रममित्यणुभाष्योक्तदेवानामानंदवृद्धिह्रासयोरुक्त... कथमेतदिति चेदुच्यते॥... ...ज्ञानेन प्रकृत्याद्यावरणनिवृत्त्यनंतरं ईश्वरेच्छा रूपावरणस्यापि अपसरणं भवति ततो यावत्स्वरूपसुखं तावत सर्वस्याप्यभिव्यक्तिः जातेन कृतस्य च तस्यामत्प्रवृत्त्या हानिः कदाऽपि नास्ति तथाप्यसत्प्रवृत्त्याविशेषोऽस्ति सकीदृशः इति चेत॥उच्यते॥

सूचितेच तदेव चित्तखेदः ॥ उपलक्षणं चैतत् मुक्तावानंदह्रास इत्यपि द्रष्टव्यम् ॥

॥ कृ० ॥ नन्वस्तु सूचकत्वं तथाऽपि कथमनिष्टप्राप्तिः न हि सूचकत्वमेवानिष्टमित्यत आह ॥**सूचिते चेति** ॥ ननु खेदस्य प्रारब्धजन्यत्वात्कथं वृत्रहत्यादिफलत्वमित्यतउक्तम ॥**तदे वेति**॥यदा कदाचित भावी खेदो वृत्रहत्यादिना स्वोत्पत्त्यनंतरमेवोत्पादित इति प्रारब्धजखेदस्यापि वृत्रहत्यादिफलत्वमुक्तमिति भावः ॥ अत्र च विषाशनादिदृष्टांतो लिंगम् ॥ पूर्वपाप जन्यदुःखस्य विषाशनाद्यनंतरमेवाप्तेः ॥ सूचकपदप्रयोगश्च मानम ॥ सूचकत्वमुक्तम ॥ यथा चौर्यादिदोषसूचकेन राजादिन्याति सति तदैव ताडनादिदुःखं भवतितद्वद्वृत्रहत्याद्यपि सूच कमिति ज्ञापनादिति बोध्यम ॥ वृत्रहत्यादिनाऽपाङ्क्तेयत्वादैहिको नरकाद्यामुष्मिकश्चानर्थो नभवतीति सूचयितुं चित्तेत्युक्तम अन्यथा खेदस्य चित्ताऽव्यभिचारात्तद्वैयर्थ्यं स्यात ॥ यद्वान रकादिखेदव्यावृत्त्यै तदेवेत्युक्तं अपाङ्क्तेयत्वादि जन्यखेदव्यावृत्त्यै चित्तेत्युक्तमिति मंतव्यम॥ ननु भाष्ये ब्रह्महत्यादिमहापातकस्यैव फलमुक्तं महच्छब्दप्रयोगात्पठे आदिशब्दैस्तथोदेवै र्ऋषिभिः क्रियते कियत ॥ बाहुल्यात्कर्मणस्तेषां दुःखसूचकमेतदित्यत्र महदिति शेषपूरणेन महापातकस्यैव दुःखसूचकत्वनिर्णयाच्चन तु सर्वमहापातकादिप्रतिषिद्धस्य विहिताकरणस्य च तत्कथं प्रतिषिद्धकरणादिनाऽनिष्टप्राप्तिरित्युक्तमित्यत आह ॥**उपलक्षणमिति**॥आनंदो मुक्तिगो ह्रासं विकर्मकरणाद्व्रजेदिति॥कृष्णोपास्तिमकुर्वत. ॥ ज्ञानिनोऽपि यतो ह्रास आनंदस्य भवेद्ध्रुवमिति च प्रमाणाभ्यां प्रतिषिद्धस्य विहिताकरणस्य चानंदह्रासहेतुत्वावगमादिति भावः ॥ द्वितीयप्रमाणेविहितकर्मण्यध्याहारादिष्टसिद्धिरिति बोध्यम यद्यप्यानंदह्रासेऽ

॥ श्री० ॥ येन देवेन स्वयोग्यसुखपरिपूर्तये यावत्साधनमनुष्ठेयं ततोऽतिरिक्तेनानुष्ठितेन साधनेन तस्य यदानंदादिकं प्रसक्तं तद्धानिर्व्यासत्वप्रवृत्तिजन्यो विशेषः अयमेव मात्रह्रासशब्दार्थो नान्यः पूर्वोक्तः यथोक्तमनुव्याख्याने॥चंद्रसुग्रीवयोश्चैव स्त्रोच्चदारपरिग्रहात् ॥ प्राप्तहानिर्भुवैव कृतहानिः कथंचनेति॥प्राप्तहानिः ॥ प्रसक्तहानिः ॥ इदं च हिरण्यगर्भेतरदेवविषयम् ॥ तस्यासत्प्रवृत्तेरेवाभावात्॥यथोक्तं ब्रह्मणस्त्वविक्रमेतइति ॥ नभारतीमेंऽग मृषोपलक्ष्यते न कर्हिचिन्मेमनसो मृषा गतिः ॥ नमे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृता हरिरिति भागवते॥नारदं प्रति ब्रह्मवचनाच्चेति ध्येयम् ॥ यद्वा सम्यगभिव्यक्ते कृते देवतासुखे निरुक्तवृद्धिह्रासयोरभावेऽपि विद्यमानस्यैव सुखस्य भोगादिविशेषादिना निमित्तेन विशेष बलात् चंद्रोदयेन समुद्रतरंगाभिवृद्धिवद्वृद्धिर्भवति ॥ तथा ज्ञानोत्तरकृतविकर्मणा स्वरूपदुःखलक्षणादिना च निमित्तेन विद्यमानस्यैव सुखस्य विशेषबलाच्चंद्रोदयाभावे समुद्रतरंगह्रासवत् ह्रासश्च भवति ॥ इममेव वैकल्पिकं ह्रासमभिप्रेत्येवोक्तं श्रीमन्महाभारततात्पर्यनिर्णये ॥ उदरस्य किंचिदाधिक्यं दूषणाधिक्यमेव च ॥ सत्यत्राहोस्तथाधिक्यं दुःखक्षणमथार्जुने ॥ नैवोक्तं वासुदेवेन दृश्यमानमपि स्फुटम् ॥ ज्ञानानंदह्रासकरा होते दोषाः सनातनाइति ॥ उक्तं च भाष्ये ॥ अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत ॥ कदाचित्कविशेषस्तु नैव तेषां निषिध्यत इति ॥ भोगानां तु विशेषेतु वैचित्र्यं लभ्यतेक्वचिदिति ॥ उक्तं चानुव्याख्याने ॥ मुक्तानां तु तदन्येषां समुद्रतरंगोपमेति ॥ एतदेवतारो व्याख्यातं सुधायाम् ॥

(पुनश्च) मुक्तावानंदह्रास इति ॥ श्री० ॥ उपलक्षणमिति ॥ कृ० ॥

॥कृ०॥पि देवेषु न ज्ञानोत्तरप्रतिषिद्धमात्रफलम् इंद्रकृतवृत्रहत्याद्या भारततात्पर्यनिर्णये द्वात्रिंशाध्याये पुण्यवृद्धिहेतुत्वोक्तेः किंतु ब्रह्महत्यादिना चित्तत्वेऽरुद्रोत्तमापराधत्वेन क्रोडीकृतसुमहापातकादिना तु आनंदह्रासः श्रेष्ठापराधाज्ज्ञानान्यदोषस्य स्पर्शनीयमाभिप्रेत्य तथा [illegible] भवतीत्यत्राभिमतम्॥ अत एव प्रागनिष्टप्राप्तिरित्येवोक्तं मानुषादिषु तुआनंदह्रासो ज्ञानोत्तरप्रतिषिद्धमात्रफलं भवत्येव ॥ ह्रासोऽपि मानुषाणां तु आनंदस्य विकर्मणा भवेन्मुक्तौ विशेषणस्योच्चानामपराधत इत्युक्तेः ॥ अतस्तद्विलक्षणाऽनंदह्रासस्य साधारणत्वं बोध्यमिति दिक् ॥ अत्र मनुष्योत्तमेषु ह्रासो नाम यावत्सकृच्छनाभिव्यक्तिः ॥ वृद्धिह्रासौ विमुक्तिगौ नृणामित्युक्तेः ॥ देवेषु तु स्वयोग्यपूर्तये यावत्साधनमनुष्ठेयम् ॥ तदधिकसाधनानुष्ठानेन मुक्तौ यदधिकं सुखं प्रसक्तं तद्ध्रास एव ह्रासशब्दार्थः ॥ अशुभाभावजोऽह्रासो महाधिकारिणामपि ॥ अशुभे कृते नभवतीत्युक्तेरिति विवेकः ॥ न च मुक्तस्यैवानुत्पादात्कथं ह्रास इति वाच्यम् ॥ तज्जनकपुण्यह्रासस्यैव तद्ह्रासत्वेन विवक्षितत्वात् अन्ये तु देवानां मुक्तौ सम्यगभिव्यक्ते यत्सुखं तस्यैव भोगविशेषभावे विशेषबलात् ह्रासो भवति ॥ चंद्रापचये समुद्रतरंगापचयवत् ॥ स एव देवानामानंदह्रासो नाम अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत ॥ कादाचित्कविशेषस्तु नैव तेषां निषिध्यत इति ॥ भोगानां तु विशेषेतु वैचित्र्यं लभ्यते क्वचिदिति चोक्तेरित्याहुः ॥

१ भा. स्कंध २ अ. ६ श्लो.३३ औत्कंठ्यं प्रियवस्तुनिमित्तवृत्तिविशेषः स्नेहलक्षणाभक्तिस्तद्वता ॥ २ श्लोक ३०४ ॥ ५५ ॥ ५६ ॥नाहि लोकाननंतापमित्यारभ्यएवंस्ताद्वहि वचनं नपापंतच्छ्रूयते रित्यंतेनग्रंथेन ॥

॥श्री०॥ब्रह्मण इति विशिष्याभिधाने को हेतुरित्यत आह॥मुक्तानां त्विति॥विशेषवचनेन वृद्धिह्रासवतीत्यर्थः॥यथोक्तं अवृद्धिह्रासरूपत्वमित्यादिना॥ अयमपि प्रकारो ब्रह्मव्यतिरिक्त देवानामेव न ब्रह्मणः॥ यथाक्रमनुव्याख्याने ॥ ब्रह्मणस्तु भाग एवं श्रियो यशांसि ॥ तदेतत्सर्वमभिप्रेत्योक्तं टीकाकारैः ॥ मुक्तानामानंदह्रास इत्यपि द्रष्टव्यम् ॥ तथा विहितकरणेनानंदवृद्धिरपीति ॥ १८ ॥ नन्वधुनाऽपि कर्मणः कर्तव्यत्वे वक्तव्यस्यावशिष्टत्वात्तदनंतरमेव तस्मादित्युपसंहारोऽसंगत इत्यत आह ॥ **कर्मण इति** ॥ **विलोपप्रसंगादिति**॥ तत्र कर्मलोपावश्यंभावादिति भावः ॥ **इदम** ॥ कर्म॥ इत्यत ॥ असंप्रज्ञातसमाधिस्थदृष्टांतात ॥ **न कुर्याम** ॥ युद्धादिकर्म ॥ **प्रतिबंदीम्** ॥ असंप्रज्ञातसमाध्यवस्थापन्नवदहमपि कर्म न कुर्यामिति प्रतिबंदीम ॥ **तस्य** ॥ असंप्रज्ञातसमाधिमत ॥ **वैलक्षण्यमुक्त्वा** ॥ यस्त्वात्मरतिरेवस्यादित्यादिना कार्याभावरूप वैलक्षण्यमुक्त्वा ॥ **तत्फलं** ॥ वैलक्षण्योक्तेः फलम् ॥ इदं मित्यव्यम ॥ **अनेन** ॥ तस्मादसक्त इति श्लोकेनोच्यत इत्यर्थः ॥ तथा चानानंतरोपसंहारोऽयमिति नासंगतिरिति भावः ॥ १९ ॥

तथा विहितकरणेनानंदवृद्धिरपीति ॥ १८ ॥ तस्मादसक्त इति परामर्शविषयो न प्रतीयतेऽतस्तं दर्शयन् व्याख्याति ॥ यत इति ॥ त्वं चेदानीं असंप्रज्ञातसमाधिने भवतीति शेषः ॥ कर्मणोऽवश्यकर्तव्यत्वेऽसंप्रज्ञातसमाधिविलोपप्रसंगात्तदिदमवश्यं कर्तव्यमित्यतोऽहमपि न कुर्यामिति

॥ यतोऽसंप्रज्ञातसमाधेरेव कार्याभावः ॥ तस्मात्कर्म समाचर ॥ १९ ॥

तस्मादसक्तः सततंकार्यं कर्मसमाचर॥असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः॥ १९ ॥

परिचोदनायामसंप्रज्ञातसमाधिस्थविलोपप्रतिबंदीं मोचयितुं तस्य वैलक्षण्यमुक्त्वा तत्फलमिदमुच्यत इति नासंगतिः ॥ १९ ॥

॥ कृ० ॥ एवमस्य श्लोकस्य ज्ञानिमात्रविषयत्वे नाकृतेनेह कश्चनेत्यंशोऽनुपपन्न इत्युक्त्वा नैव तस्य कृतेनार्थ इत्यंशोऽप्ययुक्त इति भावेनाह ॥ तथा विहितेति ॥ आनंदवृद्धिरपीति ॥ देवानामानंदवृद्धिः समुद्रतरंगोपमा मानुषादीनां यावत्स्वरूपाभिव्यक्तिरिति विवेक्तव्यम् ॥ १८ ॥ १९ ॥

॥ श्री० ॥ **पूर्वोक्तेति** ॥ अर्थवादस्य तथा असंप्रज्ञातसमाधिस्थस्यैवकार्याभावात्तत्र च संप्रज्ञातसमाधिस्थत्वात् त्वया विहितं कर्म कर्तव्यमित्येव न ।किंतु विहितस्य कर्मणः कर्त्तव्यत्वे जनकाद्याचारोऽपि प्रमाणमस्तीति तस्मादस्तु इतिपूर्वोक्तहेतुसमुच्चय इत्यर्थः ॥ **तृतीययेति** ॥ कर्मणेति करणत्वार्थकतृतीययेत्यर्थः करणविशेषत्वात्कारणत्वस्येति द्रष्टव्यम् ॥ ॥ **सहयोगे तृतीयायामिति** ॥ सहयुक्तेऽप्रधाने ॥ सहार्थेन साहित्येन युक्तेऽप्रधाने तृतीया स्यात् ॥ पुत्रेण सहागतः पितेत्युदाहरणम् एवं चानेनसूत्रेण तृतीयायांव्याख्यायमानायामितिभावः ॥ **श्रूयमाणक्रियायां**॥अस्थिता इत्युक्तास्थानरूपक्रियायां नोपपद्यते कर्मण इति शेषः ॥**उपपद्यतएवेति**॥कर्मणः सहयोग इति वर्तते तथा च तत्र तृतीया युक्तेतिभावः॥

कर्मण एव मुक्तिसाधनत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय कर्मणैवहीत्यस्य तात्पर्यं तावदाह॥ आचारोऽपीति ॥ विहितस्य कर्मणःकर्तव्यतायां प्रमाणमिति शेषः ॥ अपिःपूर्वोक्तहेतुसमुच्चये॥ कर्मण एव मोक्षकारणत्वं तृतीययोच्यत इतिप्रतीतिनिरासाय व्याचष्टे ॥ कर्मणेति॥ नन्वेवं सहयोगे तृतीयायां व्याख्यायमानायांजनकादयः कर्मणा सहैव मुक्तिमास्थिता इतिवाक्यार्थः स्यात् ॥ न चायं युक्तः पुत्रेणसहैवागतः पि

॥ आचारोऽप्यस्तीत्याह ॥ कर्मणेति ॥ कर्मणा सह ॥ कर्म कुर्वंत एवेत्यर्थः ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २०॥

तेत्यत्र यथापुत्रस्याप्यागमनान्वयः प्रतीयते तथा कर्मणोऽपि मुक्तिमास्थितत्वस्य प्रसंगादित्यतआह ॥ कर्मेति ॥ यद्यपि श्रूयमाणक्रियायां सहयोगो नोपपद्यते ॥ तथाऽप्यध्याहृतावांतरक्रियायामुपपद्यत एव ॥

॥ कृ० ॥ **पूर्वोक्तहेतुसमुच्चय इति** ॥ असंप्रज्ञातसमाधिस्थस्यैव कार्याभावोक्त्याऽन्यस्य प्रयोजनसत्त्वसूचनं कर्माकरणे पूर्वोक्तजगच्चक्रव्याघातप्रसंग इत्यादिहेतुसमुच्चय इत्यर्थः ॥**सहयोग इति** ॥ सहशब्दयोग इत्यर्थः॥**श्रूयमाणक्रियायां सहयोगइति** ॥ श्रूयमाणक्रियया तुल्ययोगे सहशब्दप्रयोगोऽनुपपन्न इत्यर्थः ॥ **अध्याहृतेति** ॥ प्रथमप्रतीतार्थं परित्यज्य गृहीतत्वमध्याहृतत्वं प्रधानक्रियापेक्षया वांतरवर्तनक्रिया तस्यां तद्धटितं वर्तमानत्व इति यावत् ॥

॥ श्री० ॥ नन्वध्याहृतावांतरक्रियायां सहयोगेन तृतीया कुत्रदृष्टेत्यतस्तां दर्शयन् प्रकृतेऽप्यध्याहृतावांतरक्रियायां कर्मणः सहयोगेन तृतीयामुपपादयति ॥ ननश्चेत्यादिना ॥ वर्तमानापीति ॥ वर्तमानक्रियायां पुत्रैः सहयोगो गर्दभ्या अस्तीत्यप्रधाने पुत्रपदे पूर्ववदितितृतीया युक्तेत्यर्थः ॥ सहैव वर्तमाना इत्यनंतरं अपि स्वयमेव मुक्तिमास्थिता इति शेषः ॥ सहैव वर्तमाना इत्यस्य तात्पर्यकथनं ॥ कर्म कुर्वंत एवेति । एवं चात्राप्यध्याहृतवर्तनरूपावांतरक्रियायां कर्मणः सहयोगोऽस्तीति युक्ता तृतीयेति भावः ॥ ननु सहयोगः प्रधानक्रिययैव विवक्षितो न त्वध्याहृतावांतरक्रिययाऽपि ज्ञापकाभावात् ॥ अतः कर्मणोऽपि मुक्तिमास्थितत्वप्रसंगस्तदवस्थ एवेत्यत आह ॥ द्विधाऽपीति ॥ प्रधानक्रियया ऽध्याहृतावांतरक्रियया चेति द्विधाऽपीत्यर्थः ॥ समासविधौ ॥ बहुव्रीहिसमासविधौ ॥ तेनसहेति तुल्ययोग इतीति ॥ सहेत्येतत्तृतीयांतेन समस्यते ॥ तुल्ययोगे प्रधानक्रिययाऽध्याहृतावांतरक्रियया च योगस्तुल्ययोगस्तस्मिन् विवक्षिते सतिबहुव्रीहिसमासो भवतीत्यर्थः ॥ पुत्रेण सहागतः सपुत्र आगत इत्युदाहरणम् ॥ अत्र सहस्य सो द्रष्टव्यः ॥ यद्यत्र सूत्रे प्रधानक्रिययैव योगस्तुल्ययोगशब्दार्थोविवक्षितो न त्वध्याहृतावांतरक्रियया । यथा तदा सपुत्र आगत इत्यत्र तथा आगमनरूपप्रधानक्रियया पुत्रस्य योगात् सहेत्यस्य तृतीयांतपुत्रपदेन बहुव्रीहिसमासोऽनेन सूत्रेण जातस्तथा सपुत्रा गर्दभी वहतीति समासो न स्यात् ॥ वहनरूपप्रधानक्रियया पुत्राणां योगाभावेन सहेत्यस्य तृतीयांतपुत्रपदेन समासो न संभवति तेनसहेति सूत्रेणात्र समासायोगात् सूत्रांतरस्य चाभावात् ॥ दृश्यते च समासः सपुत्रा गर्दभी वहतीति तेनज्ञायतेऽध्याहृतावांतरक्रिययाऽपि योगस्तुल्ययोगशब्दार्थ इति ॥ तथा च सति सपुत्रा गर्दभीत्यत्र पुत्रैःसहवर्तमानाऽपीत्यध्याहृतवर्तमानरूपावांतरक्रियया तुल्ययोगाद्युक्तः समास एवमेव प्रकृतेऽपीति भावः ॥ एतत्सूचयितुमेव समासविधावित्युक्तम् ॥ सपुत्र आगतः सपुत्रा गर्दभीत्यादिः सहपूर्वपदबहुव्रीहिः बहुव्रीहिर्द्विपदबहुपदसहपूर्वपदादिभेदेन सप्तविधस्तेष्वेकोऽयमित्यवधेयम् ॥

ततश्च यथा सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यत्र दशभिः पुत्रैः सहैव वर्तमानाऽप्येकैव भारं वहतीत्यर्थस्तथाऽत्रापि कर्मणा सहैव वर्तमानाः कर्म कुर्वंत एवेत्यर्थ उपपद्यत इति भावः ॥ द्विधाऽपि सहयोगमभिप्रेत्य समासविधौ पाणिनिरविशेषमभाणीत्॥तेन सहेति तुल्ययोग इति॥

॥ कृ० ॥ पुत्रैः सहैववर्तमानापीति ॥ पुत्रेषु वर्तमानेष्वेवेत्यर्थः ॥ कर्मणासहैवेति ॥ कर्मणि वर्तमाने सत्येवेत्यर्थः ॥ ततश्च यद्यपीत्यादिरयमर्थः ॥ सहशब्दस्य द्वावर्थौ तुल्ययोगो वर्तमानता च ॥ तत्र प्रकृते यद्यपि सहशब्दस्तुल्ययोगार्थो न भवति ॥ उक्तदोषात् तथापि वर्तमानार्थः संभवत्येव ॥ ततश्च यथा सहैवेत्यत्र दशपुत्रेषु वर्तमानेष्वपि स्वयमेकैव भारं वहतीत्यर्थः ॥ तथा कर्मणि वर्तमाना एवेत्यर्थः संपद्यते तत्तात्पर्यार्थः ॥ कर्म कुर्वंत एवेतीति ॥ इत्यादिबहुशाङ्करग्रंथानुसारेणैवं व्याख्यातमिति मंतव्यम् ॥ सहशब्दस्यार्थद्वयवाचित्वे पाणिनिज्ञापकमाह ॥ द्विधाऽपीति ॥ द्वयोरपि सहशब्दवाच्यत्वमभिप्रेत्येत्यर्थः ॥ विशेषणमिति ॥ वर्तमानताख्यवर्तनायेति शेषः ॥ तुल्ययोगवाचिसहशब्दस्तृतीयांतेन समस्यत इति सूत्रार्थः ॥ सहैव दशभिरित्यत्रवर्तमानतार्थसहशब्दस्य समासव्यावृत्त्यै तुल्ययोग इति विशेषणमित्यर्थः ॥

॥ श्री० ॥ ननु कर्मणो मोक्षजनकत्वाभावे कर्मणा सहेति साहित्यकथनं व्यर्थमित्यत आह ॥ **कर्मसाहित्यंचेति** ॥ आनंदाभिवृद्धिरूपमुक्तौ ज्ञानकर्मसमुच्चयसाध्यत्वांगीकारादिति भावः॥ ॥**उपपदविभक्तेरिति** ॥ सहयोगे तृतीयेत्यत्र सहयोग इत्युपपदसद्भावादित्सूत्रोक्ता तृतीया विभक्तिरुपपदविभक्तिः ॥ कर्तृकरणयोस्तृतीयेति सूत्रोक्तकरणत्वार्थकतृतीया ।विभक्तिः कारक विभक्तिः ॥ साच तदपेक्षया बलवतीति सैव ग्राह्या ततश्च कर्मणेति तृतीयाविभक्तिः कारकविभक्तिः ॥ साच तदपेक्षया बलवतीति सैव ग्राह्या ततश्च कर्मणेति तृतीयायाः करणार्थकत्वा त सिद्धिकरणत्वं कर्मणः प्राप्तमेवेति भाव. ॥ **वक्ष्यमाणेति** ॥ तमेवं विद्वानिति वक्ष्यमाणेत्यर्थः। कारक विभक्त्यंगीकारे कर्मणोमोक्षसाधनत्वप्राप्त्या तमेवंविद्वानितिश्रुतिविरोधापत्तेरतो दुर्बलाऽप्युपपदविभक्तिरंगीकार्येति भाव ।। **लांगलेति** ॥ लांगलस्य दारुमयस्य साक्षाज्जीवनसाधनत्वासंभवात ॥ कृष्यादिजन्यधान्यद्वारा यथा जीवनकारणत्वमभिप्रेतं तथा कर्मणोऽपि ज्ञानद्वारकारणत्वमभिप्रेतमित्यर्थः ॥ प्राप्येत्यनन्तर चेत्यतः पूर्वं सिद्धिमास्थिता ॥ इतीति शेषमभिप्रेत्याह ॥ **सिद्धिमिति** ॥ तथा च कर्म कृत्वा ज्ञानं प्राप्य सिद्धिमास्थिता इति योजनायां गीतागतसिद्धिशब्दो मुक्तिपरो द्रष्टव्य ॥ व्याख्यानांतरस्यापीदं भाष्यमुपलक्षणमित्याशयेनाह ॥ **सिद्धिशब्द इति** ॥ गीतागतः सिद्धिशब्दोऽपरोक्षज्ञानार्थस्तथाच कर्मणा संसिद्धिमपरोक्षज्ञानमास्थिता इति व्याख्यानान्तरमपिद्रष्टव्यमित्यर्थ. ॥

कर्मसाहित्यं च मुक्तावानंदवृद्ध्यर्थमिति ज्ञातव्यम् उपपदविभक्तेः कारकविभक्तिर्बलीयसी चेत् ॥ सत्यम ॥ वक्ष्यमाणबाधाततपरिग्रहोपपत्तेः अस्तु वा करणे तृतीया ॥ तथाऽपि लांगलेन वयं जीवाम इतिवत्पारंपर्येण कर्मणो मुक्तौ कारणत्वमित्याह ॥ कर्मेति॥ सिद्धिमा

॥ कर्म कृत्वैव ततो ज्ञानं प्राप्य वा ॥ न तु ज्ञानं विना॥

स्थिता इति वेत्यर्थः ॥ सिद्धिशब्दो ज्ञानार्थो वेत्यस्याप्युपलक्षणमेतत ॥ यथा प्रतीतार्थः किं न स्यादित्यत आह ॥ न त्विति ॥

॥ कृ०॥ननु कर्म कुर्वंत एव मुक्तिमास्थिता इति व्याख्यानेऽपिकर्मणां मुक्तिहेतुत्वं प्राप्तमित्याशंक्यानंदाभिवृद्धिरूपमुक्तिहेतुत्वान्नानुपपत्तिरित्याह ॥ **कर्मसाहित्यंचेति** ॥ **आनंदवृद्ध्यर्थमिति** ॥ अयमत्र संप्रदायः ज्ञानं मुक्तौ तत्रानंदवृद्धौ च हेतुः तत्र केवलं मुक्तिहेतुः ॥ आनंदवृद्धौ तु कर्मसहितमिति ॥ ननु कर्मणेति करणतृतीयेन युक्ता कारकविभक्तित्वात् न तु सहयोगे ॥ उपपदविभक्तित्वेन दौर्बल्यादिति शंकते ॥ **उपपदेति** ॥ उपोच्चारितं ॥ पदं उपपदं तन्निमित्ताया विभक्तेरित्यर्थः ॥ **कारकविभक्तिरिति** ॥ कारकवाचकविभक्तिरित्यर्थः ॥ **बलीयसीति** ॥ प्रधानभूतक्रियासंबंधस्यांतरंगत्वादंतरंगस्य च बहिरंगात्प्राबल्यादितिभाव ॥ अंतर्भूतप्रातिपदिकार्थनिष्ठकारकशक्त्यपेक्षया कारकविभक्तेरंतरंगत्वाद्बहिर्भूतपदांतरसापेक्षतया बहिरंगोपपदविभक्तितः प्राबल्यमित्यन्ये ॥ **वक्ष्यमाणबाधादिति** ॥ न तु ज्ञानं विनेत्यादिग्रंथेनेति शेषः ॥ अत्रापि कर्मणां ज्ञानसाधनत्वोक्तेश्चेत्यभिमभाष्यसूचितांगतिमाह ॥ **सिद्धिशब्द इति** ॥

॥ श्री० ॥ **कर्मजंबुद्धियुक्ता हीति** ॥ अकामनयेश्वरार्पं समर्प्य बुद्ध्या युक्ताः सम्यग्ज्ञानिनो भूत्वा पदं गच्छंतीति व्याख्यातत्वादिति भावः ॥ ननु कर्मणो मुक्तिकारणत्वपक्षः कस्मान्निषिध्यते भवद्भिरपि समुच्चयवादांगीकारात् तथा च कर्मणो ज्ञानसाधनत्वमंगीकृत्य तेन मोक्षो भवतीत्यंगीकारे भवतां समुच्चयवादित्वभंगापत्तेरित्यत आह ॥ प्राग् **ज्ञानादिति** ॥ ज्ञानात् प्राक्तनं कर्म ज्ञानसाधनमित्यर्थः ॥ **पश्चादिति** ॥ ज्ञानात्पश्चात् ज्ञानोत्तरं कृतं कर्मानंदाभिव्यक्तिरूपमुक्तिसाधनमित्यर्थः ॥ तथा च समुच्चयवादिभिरस्माभिर्ज्ञानोत्तरकर्मण एव मुक्तिहेतुत्वांगीकारात् ज्ञानात् पूर्वकर्मणो ज्ञानहेतुत्वोक्तौ न कोऽपि दोष इत्याशय ॥ नह्येवं कर्मवादिनांऽगीक्रियत इत्याह ॥ **न त्विति** ॥ ज्ञानानपेक्षस्य केवलकर्मण एव मुक्तिसाधनत्वांगीकारादिति भावः ॥ उत्तरग्रंथोपक्षेपाय दूषणांतरं चाह ॥ **न चात्रेति** ॥ केवलकर्मणो मुक्तिहेतुत्वे प्रमाणं चास्तीत्यर्थः निर्णयो ज्ञानसाध्यत्वनिश्चय ॥ ज्ञानद्वारेत्यनंतरमिति व्याख्यान इति शेष इत्यभिप्रेत्याह ॥ **ज्ञानद्वारेति व्याख्यानेऽपीति** ॥ तथा चापामसोममसमृता अभूमागन्म ज्योतिरविदाम देवानित्यस्य सोम मपाम ततो ज्योतिरपरोक्षज्ञानमगन्म ततो देवानर्चिरादीन् देवान विदाम प्राप्नुमस्ततोऽमृता अभूमेति व्याख्यानसंभवेन सावकाशत्वादिति भाव ॥ भाष्ये श्रुतेरपामित्यस्यापामसोमममित्यादीनां कर्मसाध्यत्वप्रतिपादकानामित्यर्थ ॥ ॥कृ०॥

ज्ञानं विना केवलेन कर्मणा जनकादयः सिद्धिं गता इत्यर्थस्तु नेत्यर्थः ॥ प्रसिद्धं हीति ॥ हिशब्दो हेतौ ॥ अस्तु तेषां ज्ञानित्वं मुक्तौ तु कर्मैव कारणमित्यत आह ॥ तमेवमिति ॥ अत्रापि गीतायामपि कर्मजं बुद्धियुक्ता हीत्यादावित्यर्थः ॥ प्राग्ज्ञानात् ज्ञानसाधनं पश्चान्मुक्तिसाधनमिति समुच्चयवादिनां मतं न तु केवलकर्मवादिनाम् ॥ न चात्र प्रमाणमप्यस्ति ॥ ननु यथा मोक्षस्य ज्ञानसाध्यत्वे तमेवमित्याद्यागमाः

प्रसिद्धं हि तेषाम् ज्ञानित्वं भारतादिषु ॥ तमेवं विद्वानमृत इह भवतीत्यादिश्रुतिभ्यश्च ॥ अत्रापिकर्मणां ज्ञानसाधनत्वोक्तिश्च बुद्धियुक्ता इति ॥ गत्यंतरं च नान्यःपंथा इत्यस्य नास्ति ॥ इतरेषां ज्ञानद्वाराऽप्यविरोधः ॥

संति ॥ तथा कर्मसाध्यत्वेऽप्यपामसोममित्यादयो विद्यंते तत्कथं निर्णय इत्यतः सावकाशत्वनिरवकाशत्वबलादित्याह ॥ गत्यंतरंचेति ॥ ज्ञानद्वारेति व्याख्यानेऽपीत्यर्थः ॥

ननु ज्ञानात्पूर्वं कर्म ज्ञानसाधनम ॥ ततो न कर्मजं बुद्धियुक्ता इत्यादिविरोध. ज्ञानोत्तरं च कर्म मोक्षसाधनं तत्र तमेवं विद्वानित्यादिविरोधः ॥ यस्य प्रसादादित्यादिश्रुतिबलेन प्रसादस्यैव मोक्षजनकत्व मिति मते विद्वानमृतो भवतीति श्रुतिव्याख्यानवादितापि तद्व्याख्यानोपपत्ते ॥ तस्मात्केवलेन कर्मणा जनकादयः सिद्धिं गता इत्यर्थांगीकारे न कश्चिद्दोष इत्याशंक्य किं ज्ञानोतरं कर्म ज्ञानसमुच्चितं सन्मोक्षसाधनं किं वा केवलंमेवेति विकल्प्याद्येऽपसिद्धांत इति भावेनाह ॥ **प्राग्ज्ञानादिति** ॥ द्वितीयं निराकरोति ॥ **न चात्रेति** ॥ एतेन प्रसादस्य मोक्षसाधनत्वप्रतिबंदी निरस्ता ॥ तत्र यस्यप्रसादादिति श्रुतिवदत्रापि प्रमाणाभावादिति ॥

१. अपरोक्षज्ञानी भगवत्प्रसादानंतरं मुक्तो भवतीति व्याख्यानवत् कर्मविषयेऽपि अपरोक्षज्ञानी कर्मकरणानंतरं मुक्तो भवतीति न तत्श्रुतिविरोधइत्यर्थः ॥

॥ श्री० ॥ अन्यनिषेधाभावात् कथमेषांनिरवकाशत्वमित्यत आह ॥ तत्रेति ॥ ज्ञानसमकक्षतयेति ॥ तीर्थस्नानादेर्ज्ञानद्वारा मुक्तिसाधनत्वव्याख्याने ज्ञानसमकक्ष्यतया ग्रहणं न स्यात् तथा च प्रायपाठविरोध इति भावः ॥ उक्तव्याख्यानानि ॥ ज्ञानद्वारेति व्याख्यानेत्यर्थः ॥ सर्वत्रेति ॥ तीर्थस्नानादिरूपकर्मणांमोक्षसाधनत्वप्रतिपादकवाक्येषु ॥ येन पापादिमुक्तिपरत्वेन मुक्तिशब्दस्य सावकाशता स्यादितिभाव. ॥ इत्यादरपिपदस्येत्यर्थः ॥ प्रशस्तत्वेति ॥ प्रयागमरणस्नानयोरिति शेषः ॥

ननु कर्मवाक्यान्यपि ब्रह्मज्ञानेन वेत्यादीनि निरवकाशानि संति ॥ तत्र ब्रह्मज्ञानसमानकक्ष्यतया तीर्थस्नानादेरुक्तत्वेनोक्तव्याख्यानायोगात् अतः पुनरनिर्णय एवेत्याशंक्य तेषामपि सावकाशत्वमाह ॥ यत्रेति ॥ तीर्थादीनि ॥ तत्स्नानादीत्यर्थः॥पापादिमुक्तिर्मुक्तिशब्दार्थ इत्यर्थः

यत्र च तीर्थाद्येवमुक्तिसाधनमुच्यत ॥ब्रह्मज्ञानेन वा मुक्तिःप्रयागमरणेन वा॥अथ वा स्नानमात्रेण गो ॥ मत्यां कृष्णसान्निधावित्यादौ ॥ तत्र पापादिमुक्तिःस्तुतिपरता च ॥

न च सर्वत्र मुक्तिशब्द एवास्ति ॥ संसारमुक्तिरित्यादेरपि संभवात ॥ अतोगत्यंतरमप्याह ॥ स्तुतीति ॥ प्रशस्तत्वोपलक्षणेत्यर्थः॥

॥कृ०॥स्वरूपसतस्तीर्थादेः पापादिमुक्तिहेतुत्वाभावादाह ॥ तत्स्नानादीत्यर्थ इति ॥आदिपदेन श्रवणादेर्ग्रह॰॥ नन्वभिधागौणीलक्षणावृत्तीनामभावात्कथं स्तुतौ तात्पर्यमित्यत आह ॥ प्रशस्तत्वोल्लक्षणेति ॥ प्राशस्त्यद्योतकत्वमित्यर्थः ॥ यथा प्राजापत्य तूपरमालभेत पशुकाम इति वाक्यविहितश्वेतालंभस्य प्राशस्त्यद्योतनार्थं प्रजापतिरात्मनो वपामुदक्खिददित्यर्थवादे न मिथ्याभूतमेवात्मवपोत्खननमुच्यते ॥ आत्मवपोत्खननस्याशक्यत्वात ॥ तदुक्तं शबरेण ॥ असदन्वाख्यानं स्तुत्यर्थेन ॥ तेन प्रशंसायागम्यमानत्वादिति ॥ तथाऽर्थवादस्य विध्येकवाक्यतया प्रामाण्यादुक्तार्थवादकल्प्यो यो गोमत्यां स्नायादित्यादिविधिस्तद्विषयगोमतीस्नानादेः प्राशस्त्यं द्योतयितुमथवास्नानेत्याद्यर्थवादेरविद्यमानमेव मुक्तिसाधनत्वमुच्यते ॥ द्योतकत्वं च वृत्तिं विनाऽपि परमते प्रादेरिव युक्तम ॥ प्राशस्त्यं च गुणातिशयशालित्वमिति भावः ॥ वस्तुतस्तु लक्षणापक्ष एवाचार्याणामभिप्रेतः ॥ पूर्वव्याख्याने लक्षणयेति शेष इति ॥ दृष्टान्ते च त्यागस्य प्रशस्तत्वमेवानेन लक्ष्यत इत्याद्यमरुदाद्युदितत्वात ॥ ततश्च प्रशस्तत्वोपलक्षणेत्यस्य स्तुत्युपादनाय तीर्थस्नानादेः प्राशस्त्यमर्थवादेन लक्षणया प्रतिपाद्यत इत्ययमर्थो मंतव्यः ॥ ननु न तावत्पदे लक्षणा ॥ कस्यपदस्य लक्षणेति नियामकाभावात ॥ नापि वाक्ये ॥ तस्य शक्त्याभावेन लक्षणाबीजशक्यसंबंधाभावादिति चेन्न ॥ यावदर्थसंबंधो लक्ष्येऽस्ति ॥ तावदर्थप्रतिपादकशब्दसमुदायस्य लक्षणास्वीकारात ॥ न चैवं वाक्यस्यैव लक्षणेत्युक्तप्रायं स्यादितिवाच्यं इष्टापत्तेः वाक्यलक्षणानुमानेत्याचार्या इति सुधोक्तेः॥ अत्रापिकर्मजफलं त्यक्त्वेत्यनेन समग्रो योगो लक्षित इत्यादिना तत्र तत्र वाक्यलक्षणोक्तेश्च॥न च वाक्ये शक्त्याभावदोषः ॥यतो निराकांक्षपदान्येव खलु वाक्यं ननु पदादिरिवार्थवत्त्वम॥तथैवाहिकुंडलाधिकरणसुधोक्तेः ॥पदानांचान्योन्यसमभिव्याहारादस्त्येवविशेषान्वये शक्ति॥एवं चप्रयागमरणेनेत्यादिवाक्येमुक्तिसाधनत्वरूपवाक्यार्थस्य शक्यत्वात्तत्समानाधिकरणे प्राशस्त्ये लक्षणोपपत्तिः॥

॥श्री०॥ गौणीवेति॥ प्रयागस्नानमरणयोर्ब्रह्मज्ञानस्य च प्रशस्तत्वसादृश्यान्मुक्तिसाधनत्वोक्तिर्गौणीत्यर्थः॥ अज्ञानां मोहकानि चेत्यत्रप्रमाणानुसारेणाह॥दुष्टजनेति॥ एतदिति॥पापादिमुक्तिः स्तुतिपरता चेति व्याख्यानद्वयमित्यर्थः ॥ ब्रह्मज्ञानंविनेत्युत्तरवाक्यानुसारेणान्यथेत्यस्यार्थमाह ॥ ज्ञानं विनेति ॥ यदिति ॥ प्रयागादेर्यन्मुक्तिसाधनत्वमुच्यते तज्ज्ञानोपायत्वमेव तथाच ज्ञानद्वारामुक्तिरित्येवाभिप्रेतं न साक्षादित्यर्थः ॥ असाधारणेति ॥ तथा च तीर्थस्तुतिवाक्यानि तत्स्तुतिप्रस्तावे तीर्थस्तुतिप्रस्तावेऽप्युक्तानि असाधारणप्रसंगेनोक्तानीति यावत् ॥ उक्तनियमं ॥ ब्रह्मज्ञानं विनेति साधारणप्रसंगोक्तं ब्रह्मज्ञानस्य मोक्षसाधनत्वनियमं न घ्नंतीति भाष्यार्थः ॥

प्रशस्तत्वसादृश्येन गौणी वा ॥ दुष्टजनव्यामोहनार्थत्वस्याप्युपलक्षणमेतत् ॥ कुत एतत्कल्प्यत इत्यतआह ॥ तत्रापीति॥यत्र तीर्थस्नानादिकं मुक्तिसाधनमुच्यते तत्रैव प्रस्तावे साधनत्वं तीर्थस्नानादीनाम्॥अन्यथा ज्ञानं विना॥गा मुक्तिर्यन्मुक्तिसाधनत्वं वाक्यताविशेषाद्ब्रह्मज्ञा

तत्रापि हि कुत्रचिद्ब्रह्मज्ञानसाधनत्वमेवोच्यते अन्यथा मुक्तिं निषिध्य॥ब्रह्मज्ञानंविना मुक्तिर्नकथंचिदपीष्यते॥प्रयागादेस्तु या मुक्तिर्ज्ञानोपायत्वमेव हीत्यादौ ॥ न च तीर्थस्तुतिवाक्यानि तत्प्रस्तावेऽप्युक्तं ॥ ज्ञाननियमंघ्नंति॥ यथा कं चिद्दक्षं भृत्यं प्रत्युक्तान्ययमेव हि राजा किंराज्ञेत्यादीनि ॥

नेनवेत्यादिभिरेव ब्रह्मज्ञानंविनेत्यादीनां बाधः किं न स्यादित्यत आह॥न चेति॥असाधारणसाधारणप्रसंगोक्तत्वादिनेति भावः॥अत्र दृष्टांतमाह॥यथेति॥

॥कृ०॥न चैवं वचनलिंगानुमाहिमेति [illegible] नर्णयविरोधः॥तस्य ता पर्यवृत्तिरन्यानास्ती[illegible] वाक्यलक्षणानिषधकत्वाभावात अत एव तद्धिकार्थां न तात्पर्यवृत्तिरन्या सिद्ध्यतीत्युपसंहृतम किं च न वयमनुमानप्रकारं निषेधामः ॥ किं तु [illegible] वाक्यलक्षणामर्गाकृत्य तदुपपादनं कुर्मइति को विशेषः ॥ न चैव सत्यनेवादजन्यप्राशस्त्यबोधे शक्यसंबंधरूपस्य मुक्तिसाधनत्वसामानाधिकरण्यस्य भावप्रसंगः ॥ लक्षणाजन्यशाब्दबोधे शक्यसंबंधस्य भाननियमादिति वाच्यम [illegible] मात्रलक्षणावादिभिस्तन्नियमांगीकारेऽपि वाक्यस्यापिलक्षणेति पक्षे तदनभ्युपगमादित्यास्तां विस्तरः ॥ तुष्यतु दुर्जन इतिन्यायेन मास्तु वाक्ये लक्षणा तथाऽपि नानयपीत्यागनभावेनाह ॥ प्रशस्तत्वेति ॥ गौणी वेत्यनंतरम् ॥ मुक्तिपदस्येति शेषः ॥ यथाऽपाम सोममसृता अमृतत्यत्रामृतपदेन मुक्तिदृशः स्वर्गो गृह्यते तथा प्रकृतेऽपि मुक्तिपदेन तत्सदृशः स्वर्गो गौण्या गृह्यत ॥ मुक्तिस्वर्गयोः सादृश्यं च प्रशस्तत्वरूपेण विवक्षितमित्यर्थः ॥ अत्र प्रथमं व्याख्यानं भाष्यकारीयमिति प्रागेवसूचितम ॥ द्वितीयं तु भाक्तं वेतिमेव कागकर्गत्यति विवेकः ॥ यानितीर्थादिवाक्यानीत्यग्रिमवाक्यानुसारेणाह ॥ दुष्टजनेति ॥

१. अ. ३पा.१ अ. ७ सू. १ अपामेतिश्रुत्युक्तममृतत्व काम्यकर्मिणो भाक्तं किंचित् कालीनं॥ आत्माज्ञानित्वात यस्मात्तमेवमितिश्रुतिस्तथा अमृतोवानसोमपोपोभवतियावदिद्वइति श्रुतिस्तथा आत्मविदोमुख्यंअन्यस्यगौणंदर्शयति ॥ वाशब्दादकाम्यकर्मिणोजिज्ञासोश्चामृतत्वंभाक्तंज्ञानद्वाराज्ञानिनश्चमोक्षैकदशातिशयरूपमुगौणंयस्मात्कर्मणाज्ञानमितिश्रुतिर्नहास्यकर्मक्षीयतइति श्रुतिश्चतथादर्शयतीत्यर्थः

॥ श्री० ॥ इत्यादीनि तत्प्रस्तावेऽप्युक्तानि नायं राजा किंतु भृत्य एवेत्यादिद्वितीयावद्वचनं न निघ्नंतीत्यन्वयः ॥ राजभृत्यस्तुतिमुपक्रम्यासाधारणप्रसंगोक्तं अयमेव राजेत्यादिवाक्यं साधारणप्रसंगेक्तेन नायं राजेत्यादिवाक्येनैव बोध्यं दृष्टं तद्वत् प्रकृतेऽपीति भाव ॥ इयं व्यवस्थेति ॥ ज्ञानादेव मोक्षस्तीर्थस्नानादिवाक्यानां स्तुतिपरत्वेत्युक्तव्यवस्थेत्यर्थः ॥ मद्दृष्टेरितीनि ॥ यथाऽह भगवानित्यनुक्तो मद्दृष्टेरित्यत्रास्मच्छब्दार्थाप्रतीतेस्तत्प्रतीत्यर्थं भगवानीत्युक्तम्॥ तथा चास्य भगवद्वाक्यत्वान्मद्दृष्टेरित्येतद्भगवद्दृष्टेरिति व्याख्येयमिति सूचितं भवतीति भावः ॥ तीर्थादिस्वरूपप्रतिपादकवाक्यानां स्तावकत्वाभावादाह ॥ तीर्थस्नानेत्यादि ॥ ॥ पूर्ववदर्थ इति॥ स्तावकानीत्यस्य प्रशस्तत्वोपलक्षणा प्रशस्तत्वसादृश्यात् गौणी वेति पूर्ववदर्थ इत्यर्थः ॥ मज्ज्ञानानामप्यज्ञानिनांमत्वात्तन्निरासायाह ॥ सम्यग्ज्ञानायोग्यानामिति ॥ २० ॥

इत्यादीनि नायं राजा किं तु भृत्य एवेत्यादीनि तत्प्रस्तावेऽप्युक्तानि न निघ्नंतीति शेषः ॥ आगमसिद्धा चेयं व्यवस्थेत्याह ॥ यथेति ॥ मद्दृष्टेरित्येतदर्थप्रतिपत्त्यर्थं भगवानित्युक्तम् ॥ तीर्थादिवाक्यानीति ॥ तीर्थस्नानक्षेत्रवासादीनां मोक्षसाधनत्ववाक्यानीत्यर्थः ॥ कर्मेति यथाह भगवान् ॥ यानि तीर्थादिवाक्यानि कर्मादिविषयाणि च ॥ स्तावकान्येवतानि स्युरज्ञानां मोहकानि वा ॥ भवेन्मोक्षस्तु मद्दृष्टेर्नान्यथा तु कथंचनेति नारदीये ॥ अतोऽपरोक्षज्ञानादेव मोक्षः ॥ कर्म तु ॥ तत्साधनमेव ॥ २० ॥

ज्ञादेर्ग्रहणम् ॥ आदिपदेन ध्यानादेः संग्रहः ॥ पूर्ववदर्थः ॥ अज्ञानां सम्यग्ज्ञानायोग्यानाम् ॥ उपसंहरति ॥ अत इति ॥ २० ॥

॥ कृ० ॥ क्षेत्रवासादिनामिति ॥ आदिपदेन प्रयागमरणादिसंग्रहः ॥ ननु निरुक्त एव कर्मण्युपासनायज्ञादिरूपो भेद इत्युक्तेर्यज्ञादिवद्ध्यानादेरपि कर्मत्वात्कर्मपदेनैव ध्यानादेस्तीर्थस्नानादेश्चलाभसंभवात्कर्मादिविषयाणीत्यादिपदं तीर्थादिवाक्यानीति पदं च व्यर्थमित्यत आह कर्मेति ॥ यज्ञादीनीति ॥ तथा च यज्ञदानतपः कर्मेति गीतायां त्रयाणां कर्मत्वव्यवहारानुरोधात् ॥ इह कर्मपदेन यज्ञदानतपसामेव ग्रहणं तेन न पदांतरवैयर्थ्यमिति भावः ॥ पूर्ववदर्थ इति ॥ कर्मादीनां मोक्षसाधनत्ववाक्यानीत्यर्थ इत्यर्थः ॥ २० ॥

॥ श्री० ॥ यच्छब्देनेति ॥ यच्छब्दोक्तं षात्यमित्यर्थः ॥ कुत इत्यत आह ॥ स्थितस्येति ॥ स्वतः प्रमाणतया स्थितस्य पुनः प्रमाणकरणं [illegible] कुरुत इत्ययुक्तमेव ॥ कुत इत्यत आह ॥ अशक्यत्वादिति ॥ स्वत एवाप्रमाणस्यप्रमाणीकर्तुमशक्यत्वादित्यर्थः ॥ इदंपदम ॥ यत्प्रमाणमिति पदम [illegible] ॥

स यत्प्रमाणं कुरुते इत्यत्र यच्छब्देन प्रमाणमप्रमाणं वा विवक्षितम्॥आद्ये प्रमाणं कुरुत इत्ययुक्तम्॥स्थितस्य करणाभावात्[illegible]
अशक्यत्वादित्यत आह ॥ स इति ॥ प्रमाणमेव सत यद्वाक्यादिकंलोकेन प्रमाणतयाऽनवगतम् ॥ तत्प्रमाणतया ज्ञापयतीत्यर्थ । यद्वाक्यादिकं
स यद्वाक्यादिकं प्रमाणिकुरुते॥ यदुक्तप्रकारेण तिष्ठतीत्यर्थः ॥२१ ॥ २२ ॥ २३॥ २४ ॥२५ ॥२६ ॥

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ॥ २१ ॥ न मे पार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन ॥ नानवाप्तमवाप्तव्यंवर्तएवचकर्मणि ॥ २२ ॥ यदिह्यहंनवर्तेयंजातुकर्मण्यतंद्रितः ॥ ममवर्त्मानुवर्ततेमनुष्याःपार्थसर्वशः ॥ २३ ॥ उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहम्॥संकरस्यचकर्तास्यामुपहन्यामिमाःप्रजाः॥२४॥ सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत॥कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्॥२५॥ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनाम्॥जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन्॥२६॥

वेदं पदं यत्प्रमाणकं लौकिकं वैदिकं वा कर्म कुरुत इत्यनेनाभिप्रायेण तात्पर्यमाह ॥ यदुक्तेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥
॥ क० ॥ एवमेवेति ॥ प्रमाणं कुरुतइत्याद्युक्तमित्यर्थः ॥ तत्र हेतुमाह ॥ अशक्यत्वादिति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

१ हेपार्थमेकिंचन कर्तव्यं नास्ति यतस्त्रिषु लोकेषु प्रागप्राप्तं पश्चात्प्राप्तव्यंमेनास्ति तथाऽपिकर्मणि वर्तएव कर्म करोम्येवेत्यर्थः॥ २ यदि कदाचिदहं अनलसः सन् कर्मनकुर्यां तर्हिपार्थसर्वेऽपिमनुष्याः ममभार्गे कर्माकरणरूपंअनुसरेयुः॥मद्दृष्टांतेन कुर्युरित्यर्थः॥३ ॥अहंचेत्कर्म न कुर्यांतर्हि इमेलोकानश्येयुः कर्मलोपेन वर्णविवेकाभावोऽतो वर्णसंकरस्यापिकर्ताहंभवेयं एवहमेव इमाःप्रजाउपहन्याम ४हेभारत अज्ञाः कर्माणि फलेच्छावंतः संतो यथाकर्म कुर्वंति तथाज्ञानी फलेच्छाहीनः सन्लोकसंग्रहं चिकीर्षुः कर्मकुर्यादित्यर्थः ५कर्माभिनिवेशिनां भगवत्स्वरूपमजानतां बुद्धेर्विपर्यासंनजनयेत् ॥ विद्वान् भगवति मनोयोगवान् सन तत्पूजात्वेन कर्म सम्यक्कुर्वन् अज्ञान् सर्वकर्माणिसेवयेदित्यर्थः ॥

॥ श्री० ॥ ननु गीतोक्तक्रमेणाविद्वद्विदुषोः कर्मभेदमाहेति वक्तव्यमित्यत आह ॥ यथायोगमिति ॥ अर्थाबाधरूपयोग्यतानुसारेणेत्यर्थः ॥ कुत एवं व्याख्येयमित्यत आह ॥ सत्का इति अनेकार्थत्वादिति ॥ धर्मसत्वादिगुणप्रधानाद्यनेकार्थत्वादित्यर्थः ॥ कार्यार्थे इति ॥ अस्मिन्व्याख्यान इत्यर्थः ॥ तथा च प्रकृतेर्गुणैस्तदपेक्षयोपसर्जनभूतैस्तत्कार्यैर्देहेंद्रियमनोभिः क्रियमाणानि सर्वाण्यपि कर्माण्यहं कर्ता तानि स्वातंत्र्येण कर्तुं समर्थोऽस्मीत्यहंकारविमूढात्मा सन्न ज्ञानीमन्यत इतिश्लोकार्थो द्रष्टव्यः ॥ प्रतिबिंबस्य क्रियाभावे शास्त्रवैयर्थ्यप्रसंगादाह ॥ स्वातंत्र्येणेति ॥ २७ ॥

प्रकृतेः क्रियमाणानीतिश्लोकद्वयस्यास्फुटत्वात्तात्पर्यमाह ॥ विद्वदिति ॥ यथायोगं संबंधो न यथाक्रमं ॥कर्मभेदं ॥कर्मवैलक्षण्य माह प्रपंचयतीत्यर्थः ॥ सक्ताः कर्मणीत्यादिनोक्तत्वात् व्यवहितत्वादन्वयं दर्शयन् गुणशब्दस्यानेकार्थत्वात् विवक्षितमर्थमाह ॥ प्रकृतेरिति ॥ आदिपदेन शरीरमनसोर्ग्रहणम् ॥ कथमिंद्रियादीनां द्रव्याणांप्रकृतिगुणत्वमित्यतआह ॥ प्रकृतिमिति ॥ गुणभूतान्यप्रधानानि ॥ प्रकारांतरेण व्याचष्टे ॥

विद्वदविदुषोः कर्मभेदमाह ॥ प्रकृतेरिति ॥ प्रकृतेर्गुणैरिंद्रियादिभिः ॥ प्रकृतिमपेक्ष्य गुणभूतानि हि

प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः ॥ अहंकारविमूढात्माकर्त्ताहमितिमन्यते ॥ २७॥

॥ तानि ॥ तत्संबंधीनि च ॥ न हिप्रतिबिंबस्यक्रिया ॥ २७ ॥

॥ तादिति ॥ प्रकृतिकार्याणि चेत्यर्थः ॥ गुणशब्दःकार्यार्थ इत्युक्तं भवति ॥ ननु जीवस्यापि कर्तृत्वादहंकारविमूढात्मा कर्ताऽहमितिमन्यत इति कथमुच्यत इत्यत आह ॥ न हीति ॥ स्वातंत्र्येणेतिशेषः ॥ २७ ॥

॥ कृ० ॥ अनेकार्थत्वादिति ॥ शब्दाद्या इंद्रियार्थाश्चेति वक्ष्यमाणाभिधानादिति भावः ॥ शरीरमनसोरिति ॥ इंद्रियपदेन मनसोग्रहणसंभवेऽपि कुरुपांडवन्यायेन पृथग्ग्रहणंबहुवचनोपपत्त्यर्थमिति बोध्यम् दृष्टं च पृथग्ग्रहणं मनःसर्वेंद्रियाणि च ॥ इंद्रियाणि मनोबुद्धिरित्यादौ ॥ द्रव्याणामिति ॥ इदं च हेत्वर्थगर्भविशेषणम् ॥ १७ ॥

॥ श्री० ॥ एकवचनेनेति ॥ गुणकर्मविभागस्येत्यकवचनेनान्वये ॥ द्विवचनम ॥ गुणकर्मविभागयोरिति द्विवचनम ॥ ननु कथं कर्मभेदः कथं च गुणशब्दोक्तेंद्रियाणां च भेद इत्यत आह ॥ जीवेश्वरेति ॥ ग्रंथांतरादिति ॥ गीतातात्पर्ये ॥ तत्त्वज्ञानमप्यमाहेति ॥ तथा च गुणा इंद्रियाद्या ईश्वरप्रेरिताः संतो गुणेषु विषयेषु वर्तते प्रवर्तंते तत्र न मम किंचित्स्वातंत्र्यमस्तीति मत्वा न सज्जत इति गीतार्थो द्रष्टव्यः ॥ २८ ॥

गुणानां कर्मणां चान्योन्यं योविभागस्तस्मिन्वक्तव्ये एकवचनेनालं कथं द्विवचनं केन वाऽस्यान्वय इति शंकाविभागशब्दस्यार्थं वदन्परिहरति ॥ कर्मेति ॥ जीवेश्वरप्रकृतिलक्षणसंबंधिभेदात्कर्मणामिंद्रियादीनां च भेदोऽत्र विवक्षितो ग्रंथांतरादवगंतव्यः ॥गुणागुणेष्वितिपदद्वय

कर्मभेदस्यगुणभेदस्य च तत्त्ववित् ॥ गुणा इंद्रियादीनि गुणेषु विषयेषु ॥ २८ ॥

तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः ॥ गुणागुणेषुवर्ततइतिमत्वानसज्जते ॥ २८ ॥

स्य विवक्षितमर्थमाह ॥ गुणाइति ॥ २८ ॥

॥ श्री० ॥ ननु तत्त्वविदितिश्लोकेऽभिमानाभावं प्रतींद्रियाद्यभेदज्ञानस्य हेतुत्वमुक्तम ॥ इंद्रियादिगुणभेदस्य कर्माभेदस्य च तत्त्वज्ञानवानिंद्रियादीनि विषयेषु प्रवर्तंत इति मत्वा तत्राभिमानवान्न भवतीति न च तदुक्तम ॥ प्राक् ॥ शुद्धतत्त्वज्ञानं तु द्विविधं मतमित्यादुक्तेंद्रियाद्यपरतत्त्वज्ञानेनाभिमानाभावादित्यत आह ॥ जीवेश्वरेति ॥ स्वातंत्र्येणेश्वरकर्तृकत्वं तदधीनतया जीवकर्तृकत्वं प्रकृतिकार्यत्वं चेति कर्मणि धर्मभेदः ॥ स्वातंत्र्येणेश्वरस्वामिकत्वं तदधीनतया जीवस्वामिकत्वं प्रकृत्युपादानकत्वं चेंद्रियादिषु धर्मभेदश्च भेदशब्दार्थः ॥ अयं च जीवादिसंबंधिभेदनिमित्तकः ॥ तथा च प्राक् ॥ इत्याद्युक्ताभिमानभेदज्ञानादभिमानाभावाभावे प्रकृतधर्मभेदज्ञानात्स्यादेव ॥ तथा हि ॥ यदींद्रियेषु स्वातंत्र्येणेश्वरस्वामिकत्वमित्यादिधर्मभेदज्ञानं तदा ममैतानि स्वातंत्र्येण करणानीति भ्रमरूपेंद्रियाभिमानो न भवति ॥ एवं शरीरमनसोरपि ज्ञेयम ॥ तथा कर्मणि स्वातंत्र्येणेश्वरकर्तृकत्वादिज्ञाने स्वातंत्र्यभ्रमरूपोऽभिमानो न भवति ॥ विरोधात ॥ इंद्रियाभिमानाभावः कर्माभिमानाभावश्च ॥ वक्ष्यति ॥ इंद्रियाद्यभिमानाद्धि विपर्ययः इति ॥ ततश्चोक्तरीत्येंद्रियादिभेदतत्त्वज्ञानवानिंद्रियादीनि विषयेष्वीश्वरप्रेरणया प्रवर्तंत इति मत्वेंद्रियाद्यभिमानवान भवति ॥ तन्निमित्तकर्मतत्फलविषयाभिमानवान कर्माभिमानवांश्च न भवतीति गीतार्थ इति भावः ॥ अयं सर्वोऽप्यर्थो यस्मात्स्वतंत्रकर्तृत्वं विष्णोरेव नचान्यगम ॥ तदधीनस्वतंत्रत्वं स्याज्जीवस्य ॥ जीवस्य विहितनिषिद्धकर्तृत्वं तदधीनम ॥ नाहं कर्ता हरिः कर्तेत्यादिगीतातात्पर्यनिर्णयादवसेय इत्याह ॥ ग्रंथांतरादिति ॥ २८ ॥

॥ श्री० ॥ ननूत्तरत्र गुणशब्दएदव्याख्यायते न प्रकृतिशब्दोऽतः प्रकृतेरित्यनुवादोऽव्यर्थ इत्यत आह ॥ नित्यसापेक्षत्वादीति॥गुणशब्दस्यप्रकृतिपदेनैवापेक्षा न संमूढपदेनातः सामर्थ्या भावात् न संमूढपदेन समासो युक्तः सापेक्षमसमर्थवद्भवतीति वचनादित्याशंकायां गुणपदस्य संमूढपदेन समासेऽपि न प्रकृतिपदेनापेक्षाविहन्यत इत्येवं नित्यसापेक्षत्वान्नासामर्थ्यं वचनं त्वनित्यसापेक्षविषयमतो न दोष इति सूचयितुं प्रकृतेरित्यनुवाद इत्यर्थः ॥ नित्यसापेक्षत्वान्नासामर्थ्यमित्यत्रोदाहरणमाह ॥ देवदत्तस्येति ॥ तमिति ॥ विवक्षितं हेतुहेतुमद्भावम् ॥ अधीकार्थः॥ उभयत्रासक्तिरूपः ॥ अनेनेति ॥ अधीकार्थलाभाय द्वंद्वस्यात्र विवक्षितत्वं तथा विषयादीत्यत्रादिपदेन कर्मग्रहणं तदपि समर्थितं भवति ॥ द्वंद्वपरिग्रहाभावे तत्र आदिपदेन कर्मग्रहणानुपपत्तेरिति भावः ॥ उक्तानेकार्थत्वम ॥ इंद्रियविषयोभयार्थकत्वम् ॥ निरुक्तिम ॥ शब्दार्थम ॥ ॥ क ॥ नित्यसापेक्षत्वान्नासामर्थ्यमित्य

प्रकृतेर्गुणसंमूढा इत्यत्र गुणशब्दस्य विवक्षितमर्थं वदन् विग्रहं दर्शयति ॥ प्रकृतेरिति॥ नित्यसापेक्षत्वाद्गुणशब्दस्य नासामर्थ्यमिति प्रदर्शनाय प्रकृतेरित्यनुवादः ॥ देवदत्तस्य गुरुकुलमिति यथा ॥ प्रकृतेर्गुणसंमूढत्वात् सज्जंते गुणकर्मास्विति हेतुहेतुमद्भावोऽत्र विवक्षितः अन्यथा वैय्यर्थ्यापत्तेस्तमुपपादयति ॥ इंद्रियादीति ॥ अभिमानो ममैवतानिस्वातंत्र्येण करणानीति भ्रमः विषयादीत्युक्त्या गुणशब्दोऽत्रविषयार्थ

प्रकृतेर्गुणेषु इंद्रियादिषु संमूढाः ॥ इंद्रियाद्यभिमानाद्धिविषयादिषु संगः ॥ गुणकर्मसु विषयेषु कर्मसु

प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु ॥ तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् ॥ २९ ॥

॥ च ॥ शब्दाद्या इंद्रियाद्याश्च ॥

इति दर्शयति ॥ आदिशब्देन कर्मग्रहणम ॥ विषयेषु संगः स्नेहादिःकर्मसु स्वातंत्र्यभ्रमः ॥ गुणानां कर्मास्विति केनचिद्व्याख्यातं तदसादिति भावेन द्वंद्वोऽयमिति दर्शयति ॥ गुणेति ॥ द्वंद्वपरिग्रहेऽधिकार्थलाभात ॥ अनेन विषयादीत्येतदपि समर्थितं भवति ॥ गुणशब्दस्योक्तानेकार्थत्वं कुत इत्यत आह ॥ शब्दाद्या इति ॥ निरुच्यत इतिनिरुक्तिः शब्दार्थः ॥ निरुक्तिं गच्छंत्यवगच्छंतीति निरुक्तिगाः ॥

त्रोदाहरणमाह ॥ देवदत्तस्येति ॥ तथाच यथागुरुपदस्यदेवदत्तपदसापेक्षत्वेऽपि न विशिष्टैकार्थत्वानित्वरूपसामर्थ्यभंगः ॥ गुरोर्नित्यसापेक्षत्वेन शब्दैकदेशत्वेऽपि चैत्रस्य नप्तेत्यादिवद्विशेषणान्वयोपपत्तेस्तथा प्रकृतेऽपीत्यर्थः॥स्नेहादिरिति ॥आदिपदेनाग्रहादिभ्रमनिमित्तको द्वेषो ग्राह्यः ॥ निरुक्तिगा इति ॥ निरुक्तिशब्दोपपदाद्गमेरन्येष्वपि दृश्यत इति भावः ॥

१ संग इत्यनुषज्जते २ गुणशब्देन सत्वादिग्रहणे जन्यजनकभावःसंबंधःशठत्वयथेत्सिमन्नित्र,क्लिंजानि कर्तुरिति पंचम्या भाव्यम् ॥ विषयग्रहणे न तादर्थ्याच्चतुर्थ्या भाव्यम् नषष्ठ्येतिनायं समासो युक्तइति कंठरवेणानुक्तभविनेतिगुक्तम् ॥ संबंधसामान्यविवक्षात्वगतिकागतिः ॥

॥ श्री० ॥ अन्यथेति ॥ अनेकार्थविवक्षायां न ह्येकेन शब्देन निरुक्तेन भेदश्रुतिं विनाऽर्थद्वयंकुत्रचिदुच्यतइत्युक्तविरोधापत्तेरित्यर्थ ॥ प्रकृतेःक्रियमाणानि गुणैरित्यत्र गुणशब्देन सत्वादिगुणानामेव वाच्यत्वं सिद्धवत्कृत्य पूर्वपक्ष्याह ॥ शब्दो हीति ॥ सर्वत्रेति ॥ उत्तरत्र वाक्यगतगुण शब्देनेत्यर्थः ॥ ननु तर्हि गुणागुणेषुवर्तंते सज्जंते गुणकर्मस्वित्यत्र शब्दा दिविषयग्रहणं न स्यादितिचेत्तत्राह ॥ तद्ग्रहण इति ॥ सत्वादिगुणग्रहण इत्यर्थः ॥तदात्मकानाम् ॥ सत्वादिगुणात्मकानां तत्कार्याणामित्यर्थ ॥ ग्रहणसंभवात॥उपलक्षणयेति शेषः॥ ॥ कर्तृत्वाधारत्वेति ॥गुणा वर्तंत इत्युक्तकर्तृत्वस्य गुणेष्वित्युक्ताधारत्वस्य चैकत्र विरोधादित्यर्थः ॥ ननु गुणागुणेषु वर्तंत इत्यत्र प्रथमगुणशब्देन सत्वादिगुणात्मकेंद्रियादिकमुपलक्षणतया गृह्यते द्वितीये च सत्वाद्यात्मकशब्दादिविषया गृह्यंते तथाच सत्वाद्यात्मकेंद्रियाणि सत्वाद्यात्मकविषयेषुवर्तंत इत्यर्थांगीकारेण कर्तृत्वाधारत्वयोर्विरोधाभावादिति चेत्तत्राह ॥ तदात्म कानामिति ॥ गुणशब्देन सत्वादिकंगृहीत्वातदनुपपत्तौ लक्षणयेंद्रियादिग्रहणे वृथाप्रयासः ॥ अस्मदुक्तरीत्याव्याख्याने तु न प्रयास इति भावः ॥ नन्वनेकार्थेषु शक्तिसत्वेऽपिप्रकृते एक एवार्थोऽगीकार्यः ॥ अन्यथा न ह्येकेन शब्देनेत्युक्तन्यायविरोध इत्युक्तमिति चेत्तत्राह ॥ अनयैवेति ॥ कर्तृत्वाधारत्वयोरेकत्र विरोधान्यथानुपपत्त्यैवेत्यर्थ ॥ तथा च भेदप्रमा णसत्वेनानेकार्थग्रहणं न दोषायेतिभावः॥ ३०॥ एवंविधम्॥अविद्वत्कर्मविलक्षणम॥विद्वत्कर्मण एवंविधत्वे मम किमित्यतआह॥त्वंचेति॥उक्तमिति॥न हि प्रतिबिंबस्य क्रियेत्यनेनेत्यर्थः॥

अस्तु गुणशब्दस्यानेकेष्वर्थेषु ॥ शक्तिस्तथापि विवक्षात्रकस्यैवार्थस्य युक्ता ॥ अन्यथा नह्येकशब्देनेत्युक्तविरोधात् ॥शब्दो हि यमर्थमादौ स्मारितवान्स एवार्थोबुद्धौ संनिहितः पुनरुच्चारितेन स्मारयितुं युक्तःतथा चात्र सर्वत्र सत्वादय एव ग्राह्याः ॥ तद्ग्रहणे शब्दादीनामपि तदात्मकानां ग्रहणसंभवादित्यत आह ॥सत्वादीति ॥ कर्तृत्वाधारत्वयोरेकत्र विरोधादिति भावः ॥ तदात्मकानामिंद्रियादीनामुपलक्षणे सति

सत्वाद्याश्च शुभानि च ॥ अप्रधानानि चगुणा निगद्यंते निरुक्तिभिरित्यभिधानात्॥सत्वाद्यंगीकारे गुणा
मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा ॥निराशीर्निर्ममो भूत्वायुद्ध्यस्वविगतज्वरः३०
गुणेष्वित्ययुक्तं स्यात्॥२९अतः सर्वाणि कर्माणिमय्येव संन्यस्य ॥ भ्रांत्या जीवेऽध्यारोपितानि मय्येव विसृज्य

वृथाप्रयासः ॥ अनयैवानुपपत्त्याऽनेकार्थग्रहणोपपत्तेः ॥ २९ ॥ मयिसर्वाणीत्यस्य संगतिं दर्शयति ॥ अत इति ॥ यतो विद्वत्कर्मैवंविधं त्वं च विद्वानस्यतः ॥ ननु संन्यासो विसर्गः स च स्वकीयस्य भवति न च जीवस्य कर्माणि संतीत्युक्तं तत्कथं तेषां विसर्गो विधीयत इत्य त आह ॥ भ्रांत्येति ॥ कर्मणां परमेश्वरे संन्यासो नाम तदात्मकत्वविज्ञानमिति कश्चित ॥ तदसत् अशाब्दत्वात् ॥

॥ कृ० ॥ नह्येकशब्देनेत्युक्तेति ॥ तस्मात्सर्वगतं ब्रह्मेति गीतोक्तसमर्थनावसर इति शेषः विवक्षाऽनेकैकस्यैवार्थस्य युक्तेत्यत्र बाधकमुक्त्वा साधकमप्याह ॥ शब्दो हीति ॥ २९ ॥
॥ विसर्गइति ॥ त्यागे विसर्जनीये च विसर्गः स्यान्मलेऽपि चेति कोशात्त्याग इत्यर्थः॥इत्युक्तमिति ॥ न हि प्रतिबिंबस्य क्रियेत्यनेनेति शेषः ॥

॥ श्री० ॥ कथं चिच्छब्दत्वे त्वाह ॥ **प्रमाणेति** ॥ जडेश्वरभेदप्रतिपादकप्रमाणेत्यर्थः ॥ **तदभिप्रायम्** ॥ संन्यस्येति शब्दाभिप्रायम् ॥ इति ज्ञात्वेत्यस्य युद्ध्यस्वेति गीतापदेनान्वयः ॥ ॥ **अव्ययीभावगर्भ** इति ॥आत्मानमधिकृत्य विद्यमानं यत्तदध्यात्ममित्यव्ययीभावः॥पश्चादध्यात्मं च तत् चेतश्चाध्यात्मचेतस्तेनेति कर्मधारयो द्रष्टव्यः॥ननु भगवानेव सर्वाणि कर्माणि करोति ॥ तत्पूजनमित्यनुसंधानस्य संन्यासशब्देनैव लाभादध्यात्मचेतसेत्यस्य संन्यस्येत्यनेनान्वयो न युक्त इत्याशयेनाह ॥ **अस्येति** ॥ अन्वयलभ्यमर्थं दर्शयति ॥ **परमात्मलाभेनेति** ॥ अध्यात्मचेतसेत्यस्य तात्पर्यकथनमेतदिति ज्ञातव्यम् ॥ ३० ॥

प्रमाणविरुद्धत्वाच्चेति भावेन स्वपक्षे तदभिप्रायमाह ॥ भगवानिति ॥ इति ज्ञात्वेति शेषः ॥ प्रकारांतरं चाह ॥ मदिति ॥ इति समर्पणं च कर्मणां ॥ मयि संन्यास इति शेषः॥ कर्माणि परमेश्वरात्मकत्वं प्रतिपद्यंते तत्प्राप्तये कल्प्यंत इत्यध्यात्मचेतसेति व्याख्यानमशाब्दमिति भावेन व्याचष्टे ॥ आत्मानमिति ॥ अनेनाव्ययीभावगर्भः कर्मधारय इत्युक्तं भवति ॥ अस्य निराशीरित्यनेनान्वयः ॥ परमात्मलाभेन

भगवानेव सर्वाणि कर्माणि करोतीति ॥ मत्पूजेतिच ॥ आत्मानं मामधिकृत्य यच्चेतस्तदध्यात्मचेतः ॥
॥ संन्यासस्तु भगवान्करोतीति ॥ निर्ममत्वं नाहं करोमीति ॥ ३० ॥

निराशीराशारहित इति उक्तं भवति ॥ ननु निर्ममत्वं न मम कर्माणि संतीति ज्ञानम् ॥ तच्च मयि सर्वाणिकर्माणि सन्यस्येत्यनेन गतार्थमतोद्वयोर्भेदमाह ॥ सन्यासस्त्विति ॥ उभयत्रेतिशब्दात्परंज्ञानमिति शेषः ॥ ३० ॥

॥ कृ० ॥ **अव्ययीभावगर्भः कर्मधारय** इति ॥ आत्मन्यधिकृत्याध्यात्मं विभक्त्यर्थेऽव्ययीभावः ॥ अनश्चेति समासांतष्टच् ॥ ततोऽध्यात्मं च तच्चेतश्चेत्यध्यात्मचेत इति कर्मधारय इत्यर्थः ॥ नन्वधिकरणशक्तिप्रधानस्याध्यात्मशब्दस्य चेतःशब्दसामानाधिकरण्याभावात्कथं कर्मधारय इति वाच्यम् ॥ प्रातःशब्दस्याधिकरणशक्तिप्रधानत्वेऽपि शोभनंप्रातरस्यसुप्रातरित्यत्र बहुव्रीहौ प्रातस्तनकर्मलक्षकत्वेन सामानाधिकरण्यवदध्यात्मशब्दस्यात्मविषयकत्वलक्षकत्वेन सामानाधिकरण्योपपत्तेः ॥ लक्ष्यार्थप्रदर्शनायैव च भाष्ये आत्मानमधिकृत्येति विग्रहः प्रदर्शितः ॥ समानकर्तृकत्वलाभार्थं वर्तमानमित्यध्याहारे लक्ष्यार्थलाभ इति ॥ **अस्येति** ॥ अध्यात्मचेतस्कस्येत्यर्थः ॥ अन्वयमेवाह ॥ **परमात्मेति** ॥ ३० ॥

१ सन्यासेत्यस्यैव इति ज्ञात्वेत्यर्थ इति ॥उत्तरत्र सन्यासस्तुभगवान् करोतीति भाष्योक्तेर्नानामिति शेष इतितट्टिकोक्तेश्चेतिभावः॥

॥श्री०॥अन्यथाप्रतीतिमिति ॥ मुच्यंतेऽपि कर्मभिरित्यत्र कर्मभिरपीत्यपिशब्देन ज्ञानवत्कर्मणोऽपि मोक्षसाधनत्वमुच्यत इत्यन्यथाप्रतीतिमित्यर्थः॥ मया कार्यमित्यनंतरं किंफलापेक्षया वेतिवाक्यशेषो द्रष्टव्यः॥अपिशब्देनेति॥समुच्चयार्थकेनेत्यर्थः॥वक्तव्यं सर्वमुक्त्वापश्चात्स्वोक्तकरणाकरणयोः फलं वक्तव्यं न ह्यत्र वक्तव्यं सर्वमुक्तं अतो न फलकथनमत्रसंगतमित्यत आह ॥ प्रासंगिकंचैतदादिति ॥ विद्वदविदुषोः कर्मभेदोक्तौ विद्वांस एवं कुर्वंतीत्येतावता त्वया न कार्यं किं तु मदुक्तकरणाकरणयोः फलमप्यस्तीतिप्रमेयस्य स्मृत्वात्स्मृतस्य चोपेक्षानर्हत्वरूपप्रसंगसंगत्येदं फलमत्रोक्तं भगवतेत्यर्थः ॥ केचित्तु एवं न त्वित्यादिनोच्यमानं प्रमेयं प्रासंगिकमित्यर्थ इत्याहुः ॥ अपिशब्द इति ॥ गीतागतोऽपिशब्दः न केवलज्ञानेन किं तु कर्मभिरपीति ॥ सचेति ॥ समुच्चय इत्यर्थः ॥ पृथक् ॥ स्वातंत्र्येण ॥ समुच्चय एवेति ॥ परस्परसापेक्षज्ञानकर्मणोरिति यावत् ॥ न त्विति ॥ भाष्यस्थ ज्ञानमिव कर्मापि मोक्षे स्वातंत्र्येण साधनांतरमित्युच्यते गीतायामपिशब्देनेति नेत्यर्थः ॥ कर्मणः स्वातंत्र्येणमोक्षसाधनत्वाभावे प्रमाणमुच्यते भाष्ये ॥ निवृत्तादीनीति ॥

अन्यथा प्रतीतिं निराकर्तुं तावदुत्तरश्लोकद्वयप्रतिपाद्यमाह॥फलमिति॥केचिद्विद्वांस कुर्वंतीत्येतावता मया कार्यं न वेत्याशंक्य स्वोक्तकरणाकरणयोः फलमाहेत्यर्थः ॥ मुच्यंते तेऽपि कर्मभिरित्यपिशब्देन ज्ञानमिव निवृत्तं कर्मापि मोक्षसाधनमुच्यत इत्यन्यथा प्रतीतिनिरासाय व्याच

फलमाह ॥ ये म इति ॥ ये त्वेवं निवृत्तकर्मिणः ॥तेऽपि मुच्यंते ज्ञानद्वारा ॥ किम्वपरोक्षज्ञानिनः ॥ न तु

येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः ॥ श्रद्धावंतोऽनुसूयंतोमुच्यंतेतेऽपिकर्मभिः ॥ ३१ ॥
येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतम् ॥ सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ॥ ३२ ॥

साधनांतरमुच्यते ॥ निवृत्तादीनि कर्माणि ह्यपरोक्षेशदृष्टये ॥ अपरोक्षेशदृष्टिस्तु मुक्तौ किंचिन्न मार्गते॥

ष्टे ॥ ये त्विति ॥ कैमुत्यद्योतनार्थोऽपिशब्दो न समुच्चयार्थ इत्यर्थः ॥ प्रासंगिकं चैतत् ॥ समुच्चये ह्यपिशब्दः स च द्वेधा ज्ञानमिव कर्मापि पृथक्साधनं ज्ञानकर्मसमुच्चयएवेति ॥ तत्राद्यपक्षं निराकरोति ॥ न त्विति ॥

॥ १ वक्ष्यमाणपरामर्शकम् पूर्वव्याख्यायामुक्तपरामर्शकम्

॥श्री० ॥तत्रनिवृत्तानीत्यस्य ध्वस्तानीत्यन्यथाप्रतीतिनिरासायाह ॥ **निष्कामत्वादिनेति** ॥ **नित्यनैमित्तिकानामिति** ॥ तेषां काम्यत्वाभावेनाबंधकतया ज्ञानसाधनत्वादितिभावः ॥ अपरोक्षपदसमभिव्याहाराद्दृष्टिपदेन ज्ञानमात्रमवग्राह्यमित्याशयेन विग्रहं दर्शयति ॥ **अपरोक्षा च सेति** ॥संप्रदाने चतुर्थीति भ्रमं वारयति ॥ **तादर्थ्ये इति** ॥ तथा चापरोक्षशब्ददृष्ट्यर्थमित्यर्थो द्रष्टव्यः ॥ मुक्तौ मुक्त्यवस्थायामिति प्रतीतिनिरासायाह ॥ **मुक्तिसाधन इति** ॥ साधनशब्दोऽत्र भावसाधनो विवक्षित इति द्रष्टव्यः ॥ **कर्मापीति** ॥ साक्षादिति शेषः ॥ तथा चापरोक्षशब्दटैरेव न मोक्षसाधनत्वमित्याशयः ॥ ननु कर्मणा यमभिप्रैति स संप्रदानमित्युक्तसंप्रदानसंज्ञायाः प्रकृतेऽसंभवात्कथंमुक्तयइति चतुर्थीत्यतआह॥**मुक्तयेमुक्तेरिति** तथान षष्ठ्यर्थे चतुर्थीति भावः ॥ षष्ठ्यर्थेचतुर्थी कुत्र दृष्टेत्यत श्रौतप्रयोगं दर्शयति ॥ **अहल्यायै जारेति यथेति** ॥ अहल्याया जार इत्यर्थस्तत्र सर्वेषां संमतस्तद्वदिहापीत्यर्थः ॥ **नकिंचिदितीति** ॥ अपरोक्षदृक् किंचिदंतराधाय मुक्तये साधनत्वेन किं तु साक्षान्निर्वाणाय लिंगभंगरूपमोक्षाय साधनं न भवतीत्यर्थो द्रष्टव्यः॥ **इत्युक्तत्वादेवेति** ॥तत्र ज्ञानस्य सहकार्यंतरनैरपेक्ष्योक्तेरिति भावः ॥ ३१ ॥ ३२ ॥

निष्कामत्वादिनाऽनुष्ठितानि यज्ञादीनि निवृत्तानि ॥ आदिपदेन नित्यनैमित्तिकानां ग्रहणम् ॥ अपरोक्षा च सा दृशद्दृष्टिश्च तादर्थ्ये चतुर्थी मुक्तौ मुक्तिसाधने किंचित्सहकारि ॥ कर्मापि मुक्तिसाधनमुच्यत इत्यत उक्तम् ॥सर्वमिति ॥ तत्सर्वं निवृत्तादिकम् ॥ अंतरा मध्ये॥

सर्वं तदंतराधाय मुक्तये साधनं भवेत् ॥ न किंचिदंतराधायनिर्वाणायापरोक्षदृगिति ह्युक्तं नारायणाष्टाक्षरकल्पे ॥ अत एव समुच्चयनियमो निराकृतः ॥३१॥ ३२॥

ज्ञानमाधाय मुक्तये मुक्तेः॥ अहल्यायै जारेति यथा ॥ साक्षात्साधनत्वेनश्रुतमपि कर्म यथा व्यवहितं जात किमपि ज्ञानं तथा नेत्युक्तम् ॥ ॥ न किंचिदिति ॥ द्वितीयमपि प्रकारमतिदेशेन निराचष्टे॥ अत एवेति॥अपरोक्षदृष्टिस्तु मुक्तौ किंचिन्नमार्गत इत्युक्तत्वादेवेत्यर्थः॥३१॥३२

॥ कृ० ॥ **अहल्यायैजारेति यथेति** ॥ तादर्थ्ये चतुर्थी वाच्येत्यत्र तादर्थ्यशब्द उपकार्योपकारकभावपर इति कृष्णपंडितादुक्तेरहल्यायाश्च भोग्यतया जारोपकारकत्वाद्यथोक्तवार्तिकाच्चतुर्थी तथा मुक्तेरपि जन्यत्वेन साधनोपकार्यतया तत्र चतुर्थीत्यर्थः ॥ न च संबंधस्य द्विष्ठत्वाज्जारेत्यादौ चतुर्थी किं न स्यादिति वाच्यम् ॥ षष्ठीवद्विशेषणात्तदुपपत्तेः ॥ यद्वा चतुर्थ्यर्थे बहुलंछंदसीत्यत्र षष्ठ्यर्थे चतुर्थी वाच्येति यद्वार्तिकं तेनात्र चतुर्थीति दिक् ॥ ३१ ॥ ३२ ॥

१ एवंचमुक्ताविति विषयसप्तमीति भावः॥२ वत्रयोरभेदाद्वाणंशरीरं निर्गतं वाणं यस्मिन्निति निर्वाणशब्दार्थइति भावः ॥३ एतेन अपरोक्षशब्ददृष्टिस्त्वित्यनेन न किंचिदंतराधायेत्यस्यगतार्थत्वमपि निरस्तम् ॥ ४ अत्र यज्ञशब्देनफलमुद्दिश्याविहितःअकरणे प्रत्यवायशून्यःआदिपदेन तादृशानि व्रतादीनि ॥ ५ अकरणे श्रुतप्रत्यवायानाम्

॥ श्री० ॥ नाश इति ॥ विद्धि नष्टानित्युक्तेरिति ध्येयम् ॥ पूर्वसंस्कारस्यापि साक्षाद्ब्रह्मत्वासंभवात् रागद्वेषौ द्वयमित्यर्थो तयोर्न वशमागच्छेदित्युत्तरग्रंथानुरोधाच्चाह ॥ तत्कार्येति॥
गीतायां॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपीत्युक्तेरित्यन्वयः ॥ सम्यगमनोनिग्रहे प्रकृत्यनुगमनेऽशक्तिरिति [illegible] स्यादित्यत उक्तम् ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यतीति अत्र
सर्वत्र मनो निग्रहशब्दार्थ इत्यनेनोक्तम् ॥ यथोक्त [illegible] मनोनिग्रहे [illegible] स्यादित्यत आह ॥ स्वभावमिति ॥ स्वभावं यान्ति भूतानि निग्रहः किं
करिष्यतीति तात्पर्यम् ॥ अनेनसदृशमित्यस्य [illegible] ॥ ३३ ॥ एवं तर्हीति ॥ संस्कारस्य [illegible] तथा च विधाने फलकथनं च व्यर्थमेव संस्कारस्य बलवत्त्वात्॥
पूर्वदुःसंस्कारवशेन [illegible] भावः ॥ निग्रहोऽकिंचित्कर इति ॥ यद्यपि [illegible] मनोनिग्रहस्य [illegible] संस्कारवशेन [illegible] मनोनिग्रहो व्यर्थ
इत्यर्थः ॥ अतिप्रयत्न ॥ श्रवणादिरूप ॥ व्याहतमिति [illegible] निग्रहः कार्य इति व्याहतमित्यर्थः ॥ निग्रहादित्यादीति ॥ निग्रहात्सद्यः प्रयोजनाभावे
ऽपि भवत्येवातिप्रयत्नत इत्याशयवान् तथापि शक्तितो निग्रहः कार्य इत्यादिना योजना [illegible] रागद्वेषादिजयेन सद्यो मोक्षादिप्रयोजनाभावेऽपि श्रवणादिरूपमहाप्रयत्नेनभवत्येवे
त्याशयेन प्रकृतेर्बलवत्त्वान्निग्रहो यद्यप्यकिंचित्करस्तथापि शक्तितो निग्रहः कर्तव्यः तदनंतरं महाप्रयत्नेनपूर्वसंस्कारस्याप्यन्यथाभावोपपत्तेरिति भाष्यार्थः ॥

सदृशमिति श्लोकस्य संगतिर्नप्रतीयतेऽतस्तामाह ॥ एवं चेदिति॥ यदित्वन्मतानुष्ठाने मोक्षोऽन्यथानाश इत्यर्थः॥मूलप्रकृतेरेकत्वात्कथं स्वस्या
इति प्रातिस्विकत्वमुच्यत इत्यत आह ॥ प्रकृतिरिति ॥ तत्कार्यै रागद्वेषौ उपलक्ष्येते॥ ३३ ॥इंद्रियस्येत्यस्य संगतिमाह॥तथापीति ॥ एवं तर्हि

एवं चेत्किमिति तेमतं नानुतिष्ठंति लोका इत्यत आह ॥ सदृशमिति ॥ प्रकृतिः पूर्वसंस्कारः॥३३ ॥

सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि ॥ प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति ॥ ३३ ॥

॥ तथाऽपि शक्तितो निग्रहः कार्यः ॥ निग्रहात्सद्यः प्रयोजनाभावेऽपि ॥

मयि सर्वाणि कर्माणीतिविधानं फलकथनं च व्यर्थमित्याशंक्योक्तिभावः यद्यपि प्रकृतिं यांति भूतानीति निग्रहोऽकिंचित्करस्तथापि॥व्याहत
तमेतदुच्यत इत्यत उक्तम् ॥ निग्रहादिति॥निग्रहादि त्याद्याशयवांस्तथापीत्याद्याहेति योजना ॥

॥कृ०॥ मूलप्रकृतेरिति॥ननु प्रकृतिं स्वात्मसंश्लिष्टामिति प्रथमस्कन्धता [illegible] प्रातिस्विकत्वावगमात्कथमेतन्मित्या [illegible] मुक्तेत्युक्तम्॥एतेन न केवलमनस्यूता किं तु प्रातिस्विकी
चास्तीत्युभाष्यटीकाविरोधोऽप्यपास्तः ॥ तस्या मूलप्रकृतेरुपष्टब्ध [illegible] रागद्वेषाविति॥पूर्वसंस्कारस्यापि साक्षाद्दुष्टत्वासंभवाद्रागद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमागच्छेदि
त्युत्तरग्रंथानुरोधाच्चाह ॥ न कार्यावितिं॥३३ ॥व्याहतमिति ॥ निग्रहः किं करिष्यतीत्यनेन तयोर्न वशमागच्छेदित्यस्य व्याहतमित्यर्थः ॥ अतएव शक्तितो निग्रहः कार्य इत्यस्य
व्याहतिप्रदर्शनार्थमेव निग्रहोऽकिंचित्कर इति प्रागुक्तम् ॥ ३४ ॥

॥ श्री० ॥ अत्रेति ॥ संस्कारस्य बलवत्त्वे बलवतोऽपि तस्यातिप्रयत्नेनान्यथा कर्तुं शक्यत्वे चेत्यर्थः प्रमाणे तथापीत्यादिकं ब्रह्मेतरदेवादिसर्वसज्जनविषयाम् दैवादेवादिसज्जनानां दुःसंस्कारवशेन ज्ञानादितिरोभावे सति महाप्रयत्नेन तस्यान्यथाकरणदर्शनात् ॥ तथा हि ॥ स्वर्गलोके युधिष्ठिरो रुद्रपत्न्याद्युद्रिक्तां द्रौपदीं दृष्ट्वा पूर्वसंस्कारवशात् स्प्रष्टुमियेष तदनंतरं शक्रेण सम्यक् स्वरूपोद्बोधनेन तथा यमधर्मोल्लिंगनेन च सा वासना नाशिता यथोक्तम् ॥ महाभारततात्पर्यनिर्णये स्प्रष्टुंचसंस्कारवशादियेषानिषिध्य तं प्राह सुराधिराज इत्याद्युक्तम् ॥ तथा ईतीरितिं तं प्रति संनिवृत्तं विनाशयन्मानुषवासनां स्वयम् ॥ समाश्लिषच्छुद्धतनु स्तनोत्थो धर्मो हरेः सोऽभवदाशुतत्सम इति ॥ अयोग्यानां तु पूर्वसंस्कारो महता प्रयत्नेन नान्यथयितुं शक्यत इत्यवधेयम् ॥ ३४ ॥ विगतज्वरैः ॥ विगतरागद्वेषः ॥ स्मारितमिति ॥ यदि रागद्वेषयोर्वशं नागच्छेत्तर्हि युद्धे रागद्वेषयोरवर्जनीयत्वादवर्जनीयरागद्वेषाद्युपेततया घोरे युद्धाख्ये कर्मणि किमिति मां नियोजयसीति स्मारितमित्यर्थः ॥३५ ॥

अत्रागमसंमतिमाह ॥ तथाहीति ॥ ३४ ॥ श्रेयानित्यस्य संगतिमाह ॥ तथाऽपीति ॥ ज्यायसी चेत्यत्र द्वावाक्षेपावर्जुनेन कृतौ ॥ तत्राद्यो लोकेऽस्मिन्नित्यादिना परिहृतः ॥ इदानीं युद्ध्यस्व विगतज्वरः ॥ तयोर्न वशमागच्छेदित्युक्त्या स्मारितं द्वितीयमाक्षेपमाशंक्य परिहरतीत्यर्थः

भवत्येवातिप्रयत्नत इत्याशयवानाह ॥ इंद्रियस्येति ॥ तथाह्युक्तम् ॥ संस्कारो बलवानेष ब्रह्माद्या अपि

इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थितौ ॥ तयोर्नवशमागच्छेत्तौह्यस्यपरिपंथिनौ ॥ ३४ ॥

श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् ॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ ३५ ॥

तद्वशाः॥तथाऽपिसोऽन्यथाकर्तुं शक्यतेऽतिप्रयत्नत इति॥३४ ॥तथाप्युग्रं युद्धकर्मेत्यत आह ॥ श्रेयानिति॥३५॥

॥ यद्यपि कर्म कर्तव्यं तथाऽपि उग्रमवर्जनीयरागद्वेषं नकुर्यामिति शेषः ॥ ३५ ॥

॥ कृ० ॥ स्मारितमिति ॥ यदि रागद्वेषयोर्वशं नागच्छेत्तर्हि युद्धे रागद्वेषयोरवर्जनीयत्वाद्युक्तत्वेन घोरेयुद्धाख्ये कर्मणि किमिति मां नियोजयसीति स्मारितमित्यर्थः ॥ ३५ ॥

१ ॥ अ. ३२ श्लो. ११८ ददर्श कृष्णामपि तन्समीपे श्रिया ज्वलंतीमतीत्यचान्याइतिपूर्वार्धेः ॥ २ अ.३२ श्लो.१२४ हरेःस्तनादुत्पन्ने मूलरूपि धर्मः ॥ सःअवतीर्णो धर्मः ॥
३ त्यक्तशोक इति रा. श्रीपादाः ॥

॥ श्री० ॥ ननु तत्र रागद्वेषयोः पुरुषपरिपंथित्वमात्रमेवोक्तं अथ केन प्रयुक्तोऽयं पापं चरतीति पापप्रयोजकमर्जुनेन पृच्छ्यते न हि पापप्रयोजकत्वमेव परिपंथित्वं येन प्रश्नानुपपत्तिरित्यत आह ॥ न हीति ॥ ननु कारणा इति कथम् ॥ कृञ्करणेऽस्माण्णिचि णेरनिटीत्यनेन णेर्लोपे ऋकारस्य अकाररूपे गुणे तस्य रपरत्वे णित्वादादिवृद्धौ कार इति जाते ल्युड्भाव इति भावे ल्युट्प्रत्यये लकारटकारयोर्लोपे युवोरनाकाविति युकारस्यानादेशे कारनेति जाते रषाभ्यामिति णकारस्य नस्य णत्वे हि कारणेति रूपम् ॥ एवं भावे ल्युडंतस्य नित्यनपुंसकत्वनियमात् कारणानीत्येव स्यादिति चेत्तत्राह ॥ कारणशब्द इति ॥ प्रयतादिति ॥ गीतायां केन प्रयुक्त इति पापप्रयोजकस्य पृष्टत्वादिति भावः ॥ करण इति ॥ तथा च न भावे ल्युडंतोऽयं कारणशब्दः येनोक्तदोषः स्यात् किं नाम करणे ल्युट् करणाधिकरणयोश्चेति स्मरणादित्यर्थः ॥ तत किमित्यत आह ॥ स चेति ॥ करणे ल्युडंतः ॥ शब्द इत्यर्थः तत्र ज्ञापकमाह ॥ अयमनुमान इति भाष्य इति ॥ महाभाष्य इत्यर्थे ॥ अयमाशयः ॥ ल्युट्प्रत्ययकरणसामर्थ्यात् ल्युटस्य करणेऽधिकरणे च न नियमेन नपुंसकत्वमिति ज्ञायते ॥ तथा पुंल्लिंगत्वं कुत इति चेत् ॥ उक्तरीत्या त्रिकरणेन नपुंसक त्वनियमस्याभावे प्रयोगानुसारेण पुंल्लिंगत्वस्यापि संभवात् ॥ अत एव महाभाष्येऽयमनुमान इत्युदाहृतम् ॥ लिंगानुशासने चेध्मवृश्चनः कुठार इत्युक्तम् करणे ल्युडंतास्त्रिलिंग इति ॥ एवं करणे ल्युडंतः कारणशब्दः पुंल्लिंगोऽपि भवतीति कारणा इत्युपपन्नमिति ॥

अथ केनेत्यर्जुनप्रश्नोऽनुपपन्नः ॥ तौ ह्यस्य परिपंथिनाविति रागद्वेषयोः परिपंथित्वस्योक्तत्वात् न हि पापप्रयोजकत्वात् ॥ अन्यद्रागादेः

॥ बहवः कर्मकारणाः संति ॥

पुरुषपरिपंथित्वमित्यतः प्रश्नाभिप्रायमाह॥बहव इति॥कारणशब्दः करोतेर्ण्यंतात्करणे ल्युडंतः सच त्रिलिंगः॥अयमनुमान इति भाष्ये प्रयोगात्

॥ कु० ॥ ननु हेतुर्नौ कारणं बीजमित्यमरेण नपुंसकनिर्देशात्कारणशब्दः क्लीब तत्कथं पुंल्लिंगत्वमित्याशंक्य पक्षं समर्थयितुमाह ॥ कारणशब्द इति ॥ ननु करोतेर्ल्युटि सार्वधातुकार्धधातुकयोरिति गुणे युवोरनाकाविति युशब्दस्यानादेशे णत्वे च सति ॥ करणशब्दनिष्पत्तावपि न कारणशब्दनिष्पत्तिरित्यत उक्तम् ॥ ण्यंतादिति ॥ कारयेति णिजीति व्युत्पत्तिरत्र बोध्या ॥ ततः किमित्यत आह ॥ स त्रिलिंग इति ॥ करणाधिकरणयोर्ल्युडिति लिंगानुशासनसूत्रेण त्रिलिंगत्वोक्तेरिति भावः ॥ नन्वप्रयोगात्त्रिलिंगत्वमयुक्तं प्रयोगशरणा वैयाकरणा इत्युक्तेरित्याशंक्य दिङ्मात्रप्रदर्शनाय पुंल्लिंगप्रयोगं दर्शयति ॥ अयमनुमान इतीति ॥

१ ऋकारस्य णित्परकत्वाद्वृद्धौ कार इत्येव पाठो युक्तः॥२ इत्यनुवृत्तात्कृत्वाडिति इतिभावः ॥ ३ ज्ञातत्वात् तदेवोपपादयति तौह्यस्येत्यादिना ॥

॥ श्री० ॥ सांव्यावहारिकबहुत्वप्रयोगाभावादाह ॥ अथ वेति ॥ ण्यासश्रंथोयुच् ॥ ण्यंतेभ्यो धातुभ्यः आसश्रंथशब्दाभ्यां च युच् प्रत्ययो भवतीति सूत्रार्थः ॥ कारणा ॥ हारणा ॥ आसना ॥ श्रंथनेत्याद्युदाहरणं तथा च कृञ्धातोरुक्तरीत्या णिजन्तात्तस्मात्स्त्रीत्वात्तदन्तात् करणे युच्प्रत्यये चकारलोपे योरनादेशे नस्य णत्वे च कारणेति रूपम् ॥ ततः किं प्रकृत इत्यत आह ॥ अयं चेति । करणे युच्प्रत्ययांतोऽयं कारणशब्द इत्यर्थः ॥ ननु तर्हि बहव इति पुंल्लिंगं तस्य कथं विशेषणत्वं बह्व्यः कर्मकारणा इति वक्तव्यत्वादित्यत आह ॥ बहव इत्यपीति ॥ स्त्रीलिंगत्वे नियामकमाह ॥ वोतो गुणवचनादिति ॥ वा ॥ उत इति पदच्छेदः ॥गुणं वक्तीति गुणवचनः ॥गुणवचनात् उतः ॥ उकारांतात् प्रातिपदिकात् स्त्रियां ङीष् वा विकल्पेन भवतीति सूत्रार्थः ॥पट्वी पटुः॥ मृद्वी मृदुरित्याद्युदाहरणम् ॥ एवं च गुणवचनोकारांतशब्दात्॥ ङीषो विकल्पेन विधानात् बहुत्वसंख्यारूपगुणवचनादुकारांतात् बहुशब्दात् यदा स्त्रियां ङीष् भवति तदा ङकारषकारयोर्लोपे बहु ई इति स्थिते इको यणचीत्युकारस्य वकारे बह्वी॥ ई बह्वीति भवति तद्बहुवचनं बह्व्य इति भवति ॥ यदा तु स्त्रीत्वे ङीष् न भवति तदा स्त्रीलिंगमपि पटुर्मृदुरिति बहुरित्येव भवति ॥ तथा चोकारांतस्त्रीलिंगस्य बहुशब्दस्य प्रथमाबहुवचने बहव इत्येव भवत्यतः ॥ कारणा इति स्त्रीलिंगकारणशब्दविशेषणत्वं युक्तमिति भावः ॥ कर्मकारणा इत्यत्र कर्मेति सामान्येनोक्तत्वात् कामक्रोधादीनां पुण्यरूपकर्मकारणत्वस्यापि प्रसक्तौ सत्यामाह॥ कर्मेतीति॥द्वयोरेवेति ॥ रागद्वेषयोरेवेत्यर्थः ॥ द्वेषशब्देनेति ॥ रागद्वेषौ व्यवस्थिताविस्यत्र द्वेषशब्देनेत्यर्थः ॥ अरिषड्वर्गेति ॥

अथ वा ण्यासश्रंथोयुजिति करणे युच् ॥ अयं च स्त्रीलिंगः ॥ बहव इत्यपि स्त्रीलिंग एव ॥ वोतो गुणवचनादिति विकल्पविधानात् ॥

॥ क्रोधादयः कामश्च ॥ कर्मेति पापं विवक्षितम् द्वयोरेवोक्तत्वात् कथं बहव इत्यनुवाद इत्यत आह ॥क्रोधादय इति ॥पूर्वं भगवता द्वेषशब्देन मदमत्सरादयोऽप्युपलक्षिताः ॥ अरिषड्वर्गप्रसिद्धेः ॥

॥ कृ० ॥ नन्वस्तु यत्र प्रयोगस्तत्र त्रिलिंगत्वं तथापि हेतुवाचिकारणशब्दस्य क्वचिदेव कारणं हेतुरुभयोश्च नपुंसकमिति निशेषोक्तेः न च लिंगानुशासनविरोधः सामान्यविषयस्य तस्योदाहृतविशेषोक्त्या बाधे सति तदन्यविषयत्वादित्यरुचेराह ॥ अथ वेति ॥करणे॥ इत्यनुषंगः ॥ण्यासेतीति॥ण्यंताद्धातोरासिश्रंथिभ्यां च धातुभ्यां भावकर्मादौ स्त्रियां युजिति सूत्रार्थः नन्वेवं सति कारणा तु यातना तीव्रवेदनेत्यमरोक्तेः कारणशब्दस्य तीव्रवेदनावाचित्वं स्यान्न हेतुवाचित्वं तु कथमित्यत उक्तम् ॥ करण इति ॥ अस्तु भावे युजंतस्तीव्रदुःखार्थः करणे युजंतस्तु हेतुवाची संभवतीति भावः ॥ ततः किमित्यत आह ॥ अयं तु स्त्रीलिंग इति ॥ स्त्रियामित्यधिकृत्य युचो विधानादिति भावः ॥ नन्वेवं कर्मकारणा इत्यस्य स्त्रीलिंगत्वाद्बहव इति पुंल्लिंगविशेषणानुपपत्तिरित्यत आह ॥ बहव इत्यपीति॥नन्वेवं वोतो गुणवचनादित्यत्रापि मानवचनत्वादित्यत आह ॥वोत इति॥उदंताद्गुणवाचिनः स्त्रियां वा ङीष् स्यादिति सूत्रार्थः ॥ यद्यपि बह्वादिभ्यश्चेति विकल्पविधानादिति वक्तव्यम् ॥ बहुशब्दस्य बह्वादिषु पठितत्वात् ॥तथापि गुणवचनत्वादेव ङीषुसिद्धेर्बह्वादिभ्यश्चेति सूत्रे बहुशब्दग्रहणं न कर्तव्यमिति शाब्दिकैः प्रत्याख्यानाद्धेत इत्येवोक्तम्॥ननु बहव इत्यादिभाष्यम्॥अथ केनेत्यादिप्रश्नवाक्यस्याभिप्रायप्रदर्शकम्॥प्रश्नवाक्ये च केन प्रयुक्तः पापं चरतीति पापप्रयोजकं पृष्टं अतस्तदानुगुण्याय पापकारणा इति वक्तव्ये कथं कर्म कारणा इति सामान्यमुक्तमित्यत आह ॥ कर्मेतीति ॥ ननु मुख्यार्थग्रहणे बाधकाभावादुपलक्षणमयुक्तमित्यत आह ॥अरिषड्वर्गप्रसिद्धेरिति ॥

॥ श्री० ॥ तौ ह्यस्य परिपंथिनाविति रागद्वेषयोररित्वरूपं परिपंथित्वमुक्तं तत्र विशिष्यद्वयोरेवारित्वेनाव विवक्षितत्वे विशेषज्ञापकाभावात् भयं प्रमत्तस्य वनेष्वपिस्याद्यतो वसंते मह षट्सपत्ना इत्यादौ॥कामक्रोधमदमत्सरलोभमोहाख्यारिषड्वर्गप्रसिद्ध्या मदादयोऽप्युपलक्षणतया पूर्वग्राह्या इत्यर्थः॥एवमनुवदतीति॥बहव इत्यनुवदतीत्यर्थः॥अथेत्यर्थांतरामीति॥भाष्यार्थ माह ॥ अथेति शब्देनेति ॥ संगत्यंतरेति॥ हेतुहेतुमद्भावादिरूपेत्यर्थः ॥ प्रसंगम् ॥प्रसंजकम्॥प्रश्नप्रापकमित्यर्थः॥तत्रापीति अरिषड्वर्गेष्वित्यर्थः ॥यत्नमिति॥वधायेति शेषः॥ ३६॥

तदेतद्धृदि त्वैवमनुवदतीति भावः ॥ रागशब्देन कामः द्वेषशब्देन क्रोधादयश्च त्वयोक्ता इत्यर्थः॥अस्य प्रश्नस्य प्रकृते क उपयोग इत्यत आह ॥ अथेति ॥ नास्य प्रकृतेन हेतुहेतुमद्भावादिलक्षणासंगतिरिति स्वयमेव सूचितमित्यर्थः॥अथेति शब्देनार्थांतरमेतदिति सूच्यते॥तर्ह्य

तत्र को बलवानितिपृच्छति॥अथेत्यति॥अथेत्यर्थांतरम्॥तयोर्नवश

अर्जुन उवाच॥अथकेनप्रयुक्तोऽयंपापंचरतिपूरुषः॥अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ३६

॥ मागच्छेदिति प्रश्नप्रापकम् ॥ ३६ ॥

संगतं न प्रष्टव्यमित्यतः संगत्यंतराभावेऽपि प्रासंगिकी संगतिरस्तीत्याशयवान् प्रसंगं दर्शयति॥ तयोरिति ॥ अत्रापि यो बलवांस्तं प्रति महांतं प्रयत्नं करिष्यामीति भावेन प्रश्नो युक्त एवेति भावः ॥ ३६ ॥

॥ कृ० ॥ भयं प्रमत्त स्य वनेष्वपि स्याद्यतो वसंते मह षट् सपत्ना इत्यादौ कामक्रोधमदमत्सरलोभमोहाख्यारिषड्वर्गप्रसिद्धेरित्यर्थः अयं भावः ॥ मुख्यार्थबाधो नाम मुख्यार्थ इतरान्वयस्य प्रबलप्रमाणविरुद्धत्वम ॥ प्रकृते च तौ ह्यस्य परिपंथिनाविति॥ अत्र विशेषविशिष्टयोर्द्वयोरेव परिपंथित्वान्वयो लभ्यते ॥ स च षट् सपत्ना इत्यादिनिरवकाशप्रमाणविरुद्ध इत्यस्त्येव मुख्यार्थबाधः ॥ अतो युक्तमुपलक्षणमिति ॥ अनुवददीति ॥ अर्जुन इति शेषः ॥ ननु यदुक्तं द्वेषशब्देन मदमत्सरादयोऽप्युपलक्षिता इति ॥ तदयुक्तम भाष्ये क्रोधादयः कामश्चेति पाठक्रमाद्रागद्वेषौव्यवस्थिताविति त्यत्ररागशब्देन क्रोधादयउपलक्षिता इति प्रतीतिरनुवदतीतिचायुक्तम ॥ अनुवादलिंगाभावादित्यत आह ॥ रागशब्देनेति ॥ अयंभावः ॥ यदिपाठक्रमाद्रागशब्दस्य क्रोधाद्युपलक्षकत्वं स्यात्तदा द्वेषशब्दवैयर्थ्यं स्यात् अतस्तत्सार्थक्याय रागशब्देन मुख्यत एव कामोऽभिधीयते द्वेषपदेन च कामान्यवैरित्वरूपेण क्रोधादय उपलक्ष्यंत इत्येवांगीकार्यम ॥ ततश्च बाधकबलात्पाठक्रममनादृत्य द्वेषशब्दस्योपलक्षकत्वोक्तिर्युक्ता ॥ एवं बहवः कर्म कारणा इत्यादिभाष्ये त्वयोक्ता इत्युपस्कर्तव्यम ॥ अन्यथा विशेषप्रश्नस्य सामान्यसिद्धिपूर्वकत्वात्प्रकृते च सामान्यतः कामादीनां पापकारणत्वासिद्धत्वात्प्रबलपापकरणप्रश्नस्यासंगतिप्रसंगात॥तत्रश्चोक्ता इत्यस्यैवानुवादलिंगस्य सत्वादनुवदतीति चयुक्तमिति॥ कथं सूचितमित्यत आह॥अथेति शब्देनेति॥अनेनाथशब्दस्यार्थांतररूपत्वाभावात्कथं सामानाधिकरण्यमित्यपि निरस्तम ॥ ३६ ॥

॥ श्री० ॥ एवं योजनायामिति ॥ यस्तु बलवान् पापप्रवर्तकः पृष्टः स एष काम इति योजनायां यस्तु बलवान् प्रवर्तकः पृष्टः स एष क्रोध इत्यपि योजनाप्रसंगेन क्रोधस्यापि कामसाम्यं स्यादित्यर्थः ॥ अस्त्विति चेत्तत्राह ॥ तथा चेति ॥ उत्तरत्रेति ॥ कामरूपेण कौंतेय कामरूपं दुरासदमित्युत्तरत्रेत्यर्थः ॥ एष एवेत्यस्यार्थानुवादः ॥ काम एवेति ॥ ॥ एवमुच्यत इति ॥ क्रोधाभेदेनोच्यत इत्यर्थः ॥ तदितीति ॥ कामजन्यत्वात्तदभेदोक्तिर्युज्यते कार्यकारणयोरभेदव्यपदेशस्य पातालमेतस्य हि पादमूलं ब्राह्मणोऽस्य मुखमासीदित्यादौ दर्शनादित्यर्थः॥ नियमः ॥क्रोधस्य कामजन्यत्वनियमः॥ निंदकाय क्रुद्ध्यतीति ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इतिसूत्रेण क्रुधाद्यर्थानां धातूनां योगे यं प्रति कोपो विवक्षितस्तत्र संप्रदानसंज्ञाया विहितत्वात् प्रकृते च क्रुधधातुयोगान्निंदके कोपस्य विवक्षितत्वाच्चसंप्रदानसंज्ञायां संप्रदाने चतुर्थीति सूत्रेण निंदकायेति चतुर्थी युक्तेति द्रष्टव्यम ॥ भक्तीति॥ तया च तत्रापि गुरूणामनिंदाकामनयैव निंदके क्रोधो जायते इति न नियमभंग इति भावः ॥कृ०॥निंदकायक्रुद्ध्यतीति ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोप इति संप्रदानत्वाच्चतुर्थी॥

बलवद्विषयश्चेत् प्रश्नः तर्हि परिहारो न संगच्छत इत्यतः परिहारं व्याचष्टे ॥ यस्त्विति ॥प्रवर्तकः पापेपुपुरुषस्त्वया पृष्ट इति शेषः ॥ एवं योजनायां क्रोधस्यापि कामसाम्यं स्यात् तथा चोत्तरत्र कामस्यैवानुवृत्तिर्विरुद्ध्येतेत्यतः क्रोध एष इत्येतदन्यथा व्याचष्टे।क्रोधोऽपीति॥किं

यस्तुबलवान्प्रवर्तकः स एषकामः ॥ क्रोधोऽप्येष एव ॥ तज्जन्यत्वात् ॥ कामात्क्रोधोऽभिजायत इति

॥ श्री भगवानुवाच ॥ कामएषक्रोधएषरजोगुणसमुद्भवः ॥
॥ महाशनोमहापाप्माविद्ध्येनमिहवैरिणम् ॥ ३७ ॥

॥ त्युक्तम् ॥ यत्रापि गुरुनिंदादिनिमित्तः क्रोधः तत्रापि भक्तिनिमित्ताऽनिंदा कामनिमित्त एव॥

काम एव मुख्यया वृत्त्यैवमुच्यते नेति ब्रूमः किं तूपचारेणेतिभावेनाह॥तदिति ॥तदेव कुत इत्यत आह॥कामादिति॥नायमस्ति नियमः॥यदा गुरुनिंदादिश्रवणे निंदकाय क्रुद्ध्यति तदा कामाभावेऽपि क्रोधोदयदर्शनादित्यत आह॥यत्रापीति॥भक्तिनिमित्तश्चासावनिंदाकामश्चेति विग्रहः॥

१भा. स्कं. २अ.१ श्लो.२६ ॥अत्रापिमुख्याभेदः किन्नस्यादित्यतआह ब्राह्मणोऽस्येति तत्र हि आसीदिति भूतकालोक्त्या इदानीं मुखमेवनास्तीतिप्रतीतिस्तत् वारणाय अभेदोऽमुख्यएव॥

॥ श्री० ॥ ननु पूर्वं कामस्य संगजन्यत्वोक्त्या न भक्तिनिमित्तकत्वकथनाविरोध इत्यत आह ॥ संगादिति ॥ विषयस्नेहापरपर्यायसंगात् कामजनकस्य पूर्वोक्तत्वे
गुर्वनिंदाकामस्यापि गुर्वादिविषयसंगजन्यत्वं दर्शयितुं भक्तिनिमित्तत्वमुक्तम् ॥ भक्तेरपि गुर्वादिविषये माहात्म्यज्ञानपूर्वकस्नेहापरपर्यायसंगरूपत्वादितिभावः ॥ प्रतिहत
॥ कामः संकल्प इत्यादावुक्ता एतन्मतेमत एवेत्युक्तत्वादिति ध्येयम् ॥ आनंतर्यलक्षणादिति ॥ क्रोधस्य कामाव्यवहितोत्तरकालोत्पन्नत्वरूपानंतर्यलक्षणादित्यर्थः ॥
स्पष्टतयाऽविद्यमानमित्यर्थः ॥ कामक्रोधयोरत्यंतभेद मिति सक्ष्ममित्यनंतरं शेषपूरणम्॥ननु पूर्वोक्तं कामस्य क्रोधं प्रत्युपादानत्वं किं नांगीक्रियत इत्यत आह॥ नहीति॥ कामक्रोधयो
रपि गुणत्वादिति भावः ॥ अस्मन्मते त्वंतःकरणस्य द्रव्यत्वात्तस्यैवोपादानत्वमिति द्रष्टव्यम्॥अन्वय इत्यादि ॥ कारणत्वस्यान्वयव्यतिरेकगम्यत्वात्कामे सति क्रोधो जायत इत्यन्वय
कामात्क्रोधोऽभिजायत इति प्रमाणमुक्तम् ॥ इदानीं कामाभावे क्रोधाभाव इति व्यतिरेकेऽपि प्रमाणमाहेत्यर्थः ॥ इत्युच्यते ॥ इत्यभेद उच्यते॥बहुव्रीहिरिति ॥ यद्यपि
बलवान् प्रवर्तकः पृष्टः स एष काम इति पापकारणत्वस्योक्तत्वादिदं व्यर्थमेव तथाऽपि तत्र क्षुद्रपापप्रवर्तकत्वमभिप्रेतमत्र तु महापापप्रवर्तकत्वमित्यर्थः इति ज्ञातव्यम्॥पापशब्दगत

संगात्संजायते काम इत्येतद्दर्शयितुंभक्तिनिमित्तत्युक्तम् ॥ काम एव केनचित्प्रतिहतः क्रोधत्वेन परिणमत इति परेषां व्याख्यानं दूषयति ॥
॥ ये त्विति ॥एकांतःकरणोपादानत्वलक्षणादानंतर्यलक्षणाच्चसंकरात्सूक्ष्मं कामक्रोधयोरत्यंतभेदम् ॥न हिगुणोगुणस्योपादानं किं तु निमित्त
मेव ॥ प्रागन्वयेप्रमाणमुक्तमिदानीं व्यतिरेकेऽप्याह ॥ उक्तं चेति ॥ महाशन इति कामे दुर्घटत्वाद्गौणमित्याह ॥ महाशन इति ॥ भोग्यं वि

ये त्वन्यथा वदंति तेसंकरान्न सूक्ष्मं जानंति ॥ उक्तं च ॥ ऋते कामं न कोपाद्या जायंते च कथं च नेति ॥ म
॥ हाशनः ॥ महद्विकामभोग्यम् ॥ महाब्रह्महत्यादिकारणत्वात् ॥ महापाप्मा॥

षयः ॥ यस्मात्कामभोग्यं महत्तस्मादसौ महाशन इत्यर्थः ॥काम एष इति पापकारणत्वेनोक्तो कथं महापाप्मेत्युच्यत इत्यतो न कर्मधारयो
ऽयम् किं तु महान्पाप्मा यस्मादिति बहुव्रीहिरिति भावेनाह॥ महाब्रह्मेति ॥ महच्छब्दात्परतः पापशब्दोऽध्याहार्यः ॥

॥ कृ० ॥ आनंतर्यलक्षणादिति ॥ कामानंतर्यलक्षणादित्यर्थः ॥ ननु कामस्य क्रोधहेतुत्वं पुनः किमर्थमुच्यत इत्यत आह॥ प्रागिति॥कामात्क्रोधोऽभिजायत इति ह्युक्तमित्यन्वयः॥
॥ ननु भोग्यशब्दो न भक्ष्यार्थः ॥ कामस्य भक्ष्याभावात् ॥ भोग्यं भक्ष्य इति प्रसिद्धिविरोधाच्चेत्यत आह ॥ विषय इति ॥ अस्त्री पंकं पुमान्पाप्मेत्यमरोक्तेर्महापाप्मेति पुल्लिंगप्रयोगः॥
ननु महाब्रह्महत्यादीत्यत्र विशेषणवैयर्थ्यम् ॥ कामस्याल्पब्रह्महत्यादिकं प्रत्यपि हेतुत्वात्॥ किं चास्य बहुव्रीहिसमासाश्रयणे विग्रहप्रदर्शकत्वे पाप्मशब्दघटितत्वं स्यात्॥ अन्यथा महाब्रह्म
हत्यादिरिति समासप्रसंगादित्यत आह ॥ महच्छब्दादिति॥महाब्रह्महत्येतिमहच्छब्दादित्यर्थः॥तथा च महान्पाप्मेव ॥ इत्याकांक्षानिवृत्त्यै महाहत्यादीत्युक्तम् अतो न दोष इतिभावः॥ ॥१६८॥

॥ श्री० ॥ तथा च महापापं ब्रह्महत्यादित्यर्थः ॥ ब्रह्महत्यादिमहापापकारणत्वादिति यावत् ॥ ननु कामस्यैहिकपुरुषार्थहेतुत्वेन सर्वपुरुषार्थविरोधित्वाभावात् ॥ सर्वशब्दमन्यथा व्याचष्टे ॥ **सर्वः संपूर्ण इति** ॥ विश्वः पूर्णस्तथा सर्वं समस्तश्चाभिधीयते इति वचनादिति भावः ॥ ३७ ॥ **विवक्षितार्थस्य** ॥ मोक्षविरोधित्वस्य ॥ भाष्ये अनेनेत्यस्य कामेनेत्यर्थः ॥ भाष्ये ॥ **प्रकाशरूपोऽपीति** ॥ प्रकाशरूपोऽप्यग्निर्धूमेनावृतः सन् अन्येषां सम्यग्दर्शनाय भवति ॥ अन्यैः सम्यक् न ज्ञायत इति यावत् ॥ अन्याभिव्यक्तीत्यत्र षष्ठ्यंतान्यपदार्थमाह ॥ अन्यस्येति ॥ ननु भवनस्य गर्भकर्तृकत्वादावरणस्य तूल्वकर्तृकत्वात्कथं समानकर्तृकत्वं तथा चावृत्येति क्त्वादेशभूतस्य ल्यपोऽनुपपत्तिरित्यत आह ॥ बंधेति ॥ तथात्र बंधावरणयोरुभयोरप्युल्बक र्तृकत्वाद्युक्तं समानकर्तृकत्वं तथा च आवृतत्वात् भेदाय बद्धत्वं व्याख्याति ॥ बद्ध इति ॥ क० ॥ ननु कामस्य स्वर्गादिपुरुषार्थहेतुत्वेन कथं सर्वपुरुषार्थविरोधित्वमित्यत आह ॥ **सर्व संपूर्ण**

वधादिकर्तृत्वाभावात्कथं वैरित्वमित्यत आह ॥ सर्वेति ॥ सर्वः संपूर्णः पुरुषार्थो मोक्षः ॥ ३७ ॥ ननु प्रश्नस्योत्तरं जातं किमुत्तरेणेत्यतः श्लोकद्वयस्य संगतिमाह ॥ कथमिति ॥ स कामः कथं मोक्षस्यविरोधीति जिज्ञासायामाह ॥ धूमेनेत्यादिनेति शेषः ॥ विवक्षितार्थस्यास्फुट त्वात् व्याख्याति ॥ इदमिति ॥ ईश्वरगतःकरणजीवलक्षणं वस्तुत्रयं ॥ केन किमित्येत्याकांक्षायामाद्यं पादत्रयं व्याचष्टे ॥ यथेति ॥ परमात्मा

सर्वपुरुषार्थविरोधित्वाद्वैरी ॥ ३७ ॥ कथं विरोधी सः ॥ इदमनेनावृतम् ॥ यथा धूमेनाग्निरावृतः प्रका शरूपोऽप्यन्येषां सम्यग्दर्शनाय ॥ तथा परमात्मा ॥ यथाऽदर्शो मलेनावृतोऽन्याभिव्यक्तिहेतुर्न भवति

धूमेनाव्रियतेवन्हिर्यथाऽदर्शोमलेनच ॥ यथोल्बेनावृतोगर्भस्तथातेनेदमावृतम् ॥ ३८ ॥

आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा ॥ कामरूपेणकौंतेयदुष्पूरेणानलेनच ॥ ३९ ॥

तथांतःकरणं परमात्मादिव्यक्तिहेतुर्न भवति कामेनावृतम् ॥ यथोल्बेनावृत्य बद्धो भवतिगर्भस्तथा कामेनावृतोजीवः ॥

कामेनावृतः स्वयं सर्वज्ञोऽप्यन्यैर्न ज्ञायत इति शेषः ॥ अन्यस्य मुखादेः ॥ परमात्मादेरित्यादिपदेन जीवो गृह्यते ॥ बंधापेक्षयाऽवरणस्य समानकर्तृकत्वम् ॥ बद्धः संकुचितो व्यापाराक्षम इति यावत् ॥ उल्बो गर्भवेष्टनम् ॥

इति ॥ ३७ ॥ ननूल्बकर्तृकावरणस्य गर्भकर्तृकभवनेन समानकर्तृकत्वाभावात्कथमावृत्येति प्रयोग इत्यत आह ॥ **बंधापेक्षयेति** ॥ उल्बो गर्भवेष्टनमिति ॥ गर्भाशयो जरायुः स्यादुल्बं चेति कोशप्रसिद्धोल्बशब्दस्य नपुंसकत्वेऽपि गर्भस्योल्बोहि कामक इतिपुराणप्रसिद्धः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति महाभाष्योक्तिं चाश्रित्य पुल्लिंगप्रयोगः कृत इतिमंतव्यम् ॥

॥ श्री० ॥ ज्ञेय ॥ परमात्मा ॥ ज्ञानकरणम् ॥ज्ञाता ॥ जीवः ॥ ज्ञानेनेति ॥ उत्पत्स्यमानेत्यर्थः ॥ उत्क्रामीति ॥ अर्थादित्यर्थः ॥ ज्ञेयादि सापेक्षत्वात् ॥ ज्ञानस्य स्वप्रतिबंधे तत्प्रतिबं धस्यापि व्याप्यादिति भावः ॥ कामकारेण चैकडति॥कामचारः ॥ कामभक्षाः कामवादाः कामेनैवेमंदेहमतिसृज्याथ परात्परमीशुरनारंभणमिति सूत्रार्थः तथा च ज्ञानमपि विज्ञान कामेनावृतं सत् स्वकार्याय न प्रकाशते न प्रभवतीत्येनावर्ण्येनोक्तेऽपरोक्षज्ञानस्यापि मोक्षरूपस्य कार्यजनने प्रतिबद्धत्वप्राप्त्या सूत्रविरोधः स्यादिति भावः ॥ शाश्वत इति ॥ यथा न ज्ञानपदेन परोक्षज्ञानं स्वकार्यपदेन चापरोक्षज्ञानं विवक्षितमिति न तद्विरोध इति भावः ॥ न प्रभवतीति ॥ न समर्थं भवतीत्यर्थः ॥ अपरेत्विति ॥ स्वमते ज्ञानिनः इत्याचार्याभिप्रायेति नवं धः एतन्मते तु ज्ञानिनो नित्यवैरिणेति संबंध इत्यवधेयम ॥ तदुभयमप्युपपादयति ॥ ज्ञानी हीति ॥ तमन्विति॥ काममन्वित्यर्थः अनुवर्तत इति ॥ यद्विषये कामो भवति तद्विषयसंपादनार्थम् यतत इत्यर्थः ॥ कृ० ॥ कामकारेणेति ॥नामतःप्रवृत्त्याकुंठितत्वेन ज्ञानस्य मोक्षसाधनत्वाभावः प्रसज्यते ॥ यतो यथेष्टाचारेणापि ज्ञानिनो मोक्षमेकशास्त्रिणः पठंतीति

कामेना वृतो जीवो नेश्वरादिज्ञाने क्षम इत्यर्थः ॥ एवं ज्ञेयज्ञानकरणज्ञातृप्रतिबंधकत्वोक्त्या ज्ञानप्रतिबंधकत्वमुक्तम् ॥ आवृतं ज्ञानमित्यनेन पुनः किमुच्यत इत्यत आह ॥ शाश्वत इति ॥ पूर्वं ज्ञानोत्पत्तिप्रतिबंधकत्वमुक्तं ॥ इदानीं तु कथंचिज्जातमपि ज्ञानं न स्वकार्याय प्रभवती त्युच्यते ॥ अतो न पुनरुक्तिदोष इति भावः ॥ कामेकारेणचैक इतिवचनात्॥ अपरोक्षज्ञानस्य मोक्षसाधनेन केनापिप्रतिबंध इत्यतउक्तम्

शाश्वतो जातमपि ज्ञानं परमात्मा परोक्ष्याय न प्रकाशते॥कामेनावृतं ज्ञानिनोऽपि किं स्वल्पज्ञानिनः॥

शाश्वत इति ॥ परमात्मा पारोक्ष्यायेति च ॥ न प्रकाशते न प्रभवति ॥ ज्ञानिन इतिव्यर्थम् ॥ ज्ञानस्य ज्ञानिसंबंधाव्यभिचारादित्यत आह ॥ ज्ञानिनोऽपीति ॥ शास्त्रजनितज्ञानवतोऽपि॥अल्पज्ञानिनो गुरूपदेशमात्रजनितज्ञानवतः॥अपरे तु ज्ञानिनो नित्यवैरिणा न मूर्खस्य॥ ज्ञानि हि विनाशयिष्यामि काममिति यतते ॥ मूर्खस्तु तमनुवर्तत इति वर्णयंति ॥

सूत्रार्थः॥गुरूपदेशमात्रजनितेति ॥ आचार्यात्पादमादत्ते पादं शिष्यः स्वबुद्धितः ॥ पादं सब्रह्मचारिभ्यः पादंव्याख्यानकौशलादित्युक्तेश्चतुर्भिः प्रकारैः शास्त्राज्ज्ञानं जायते ॥ तत्र द्वितीयादिप्रकारव्यावृत्त्यै मात्रेत्युक्तम॥अनेन प्रकारचतुष्टयेनापिशास्त्रजन्यं ज्ञानं प्रागभिप्रेतमिति सूचयति॥यद्वा शास्त्राभ्यासजनितं ॥ज्ञानं प्रागभिप्रेतं शास्त्राभ्यासश्च श्रवणमननरूपः ॥ अत्रचश्रवणमात्रजनितं ज्ञानं विवक्षितामिति मंतव्यम् ॥

१ अंतःकरणम् २ अ. ३ पा. ४ अ. ४ सू. २॥

॥ श्री० ॥ ननु वैरित्वानुसंधानाभावात् कथं मूर्खस्यवारित्वं ज्ञान्यपेक्षयाऽधिकमित्यत आह ॥ न हीति ॥ तं उत्पन्नं कामम् ॥ नानुसंधत्ते ॥ वैरित्वेन ॥ तत् ॥ वैरित्वम् ॥ नास्तीति नह्यस्त्येवेत्यर्थः ॥ इच्छानुरूपम् ॥ इच्छानुरूपम् ॥ रूप ॥ माकार ॥ अतःकरणधर्म इति ॥ रूप्यते ॥ निरूप्यते व्यवह्रियत इत्यर्थः ॥ शक्य इत्यनंतरम् ॥ नञर्थ इति ॥ पूरयितुं न शक्य इत्येवं रूपे ॥ किंतु कृच्छ्रार्थे इति दुर्दैवमिति संप्रोक्तमिति गीतातात्पर्योदाहृतप्रमाणबलेन दुःशब्दो दुःखापरपर्यायकृच्छ्रवाचीत्यर्थः ॥ वस्तुतस्तु ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्वितिसूत्रे दुरःकृच्छ्रार्थत्वख्प्रत्ययविधानात् दुष्करं वनं कृच्छ्रेण कर्तुं शक्यमित्यर्थ इत्युदाहृतत्वाच्चात्रापि कृच्छ्रार्थे दुःशब्द इत्यर्थः ॥ एतत्सूत्रमनुसंधायैव कृच्छ्रार्थ इत्याह॥ अन्यथा भाष्यानुसारेणदुःखार्थ इत्यवक्ष्यदिति॥ननु कामविषयः पूरयितुं शक्यत इति शंकायां कामविषयस्यैव सुखासाध्यत्वं वक्तव्यं किमिंद्रादिपदग्रहणेनेत्यत आह ॥कामविषयेति ॥

तदनेनैव निरस्तम्॥अपकारित्वं खल्वत्र वैरित्वं विवक्षितं तच्च ज्ञान्यपेक्षयामूर्खेऽधिकं न हि मूर्खस्तं नानुसंधत्त इत्येतावता तन्नास्ति॥इच्छानुरूपं रूपं यस्यासौ कामरूप इत्युच्यते॥न चैतत्कामेंऽतःकरणधर्मे संभवतीत्यत आह॥कामेति॥रूप्यतेऽनयेति रूपमाख्यात्र विवक्षितेत्यर्थः॥ तर्हि विशेषणपदमिदं जातं किमस्य विशेष्यमित्यत आह ॥ नित्येति ॥ यो न पूरयितुं शक्यः ॥ स दुःपूरः ॥ कामस्तु विषयसंपादनेन पूरयितुं शक्यः ॥ कथं दुःपूर इत्यतोऽन्यथा व्याचष्टे ॥ दुष्पूरेणेति ॥ न नञर्थे दुः शब्दः किं तु कृच्छ्रार्थ इत्यर्थः ॥ तदुपपादयति ॥ न हीति ॥

कामरूपेण कामाख्येन नित्यवैरिणा दुःपूरेण॥ दुःखेन हि कामः पूर्यते॥न हींद्रादिपदं सुखेन लभ्यते॥

॥ यद्यपींद्रादिपदं प्राप्तं पुनर्ब्रह्मादिपदमिच्छतीत्यलं बुद्धिर्नास्तीत्यनलः॥

कामविषयोपलक्षणमेतत् ॥ ननु प्रज्वलनात्मकत्वात्क्रोधोऽनलोयुक्तः ॥ कामस्तु कथमनल इत्यतः सोपपत्तिकमन्यथा व्याचष्टे॥यद्यपीति ॥

॥ कृ० ॥ रूप्यतेऽनयेतिरूपमिति ॥ करणे घञ् ॥ भाष्ये दुःखेन हि कामः पूर्यत इति ॥ प्रपालनपूरणयोरित्यस्मात्कर्मणि घञर्थे कविधानमिति कः ॥ ततोदुःखार्थेन दुरीतिशब्देन तृतीयासमास इति भावः॥न च स्थास्नापाव्यधिहनियुध्यर्थमिति परिगणनात्कथं कप्रत्ययइतिवाच्यम् ॥ घणनंपणः घञर्थे कविधानमितिशब्दकौस्तुभे उक्तत्वेन स्थास्नादेरुदाहरणमात्रत्वात् ॥ अत्र भाष्यटीकयोर्दुष्पूरेणैव पाठः ॥ इदुदुपधस्यचाप्रत्ययस्येति विसर्गस्य षत्वविधानादिति ज्ञातव्यम् ॥ नन्वास्त्विंद्रादिपदकामस्य दुष्पूरत्वं तथापिकामसामान्यस्य दुष्पूरत्वाभावात्कथं तस्य तद्विशेषणमित्यत आह ॥ कामविषयोपलक्षणमिति॥भाष्येऽलंबुद्धिर्नास्तीत्यनल इति ॥

॥ श्री० ॥ नन्विन्द्रादिदेवानां स्वपदादीतिरिक्तपदस्यायोग्यत्वेन तत्राकांक्षाया अभावात् कथं यद्यपीत्याद्युच्यत इत्यत आह ॥ इदमपीति ॥ यत्प्राप्तं तदपेक्षयाऽप्यधिकं पुनरिच्छती त्यत्रैव तात्पर्यं न यथास्थित इत्यर्थः ॥ ज्ञानस्य ब्रह्मणश्चेति ॥ ज्ञानस्येत्युक्त्या आवृतं ज्ञानमेतेनेत्यत्रापि धूमेनाव्रियतेवन्हिरिति दृष्टांतः संबध्यत इत्युक्तं भवति ॥ तथा धूमेन प्रकाशरूपोऽपि वन्हिराव्रीयते तथैतेन कामेन ज्ञानमावृतमिति ज्ञानस्येत्युक्त्योत्तरश्लोकार्थेऽपीदं प्रमाणमिति द्रष्टव्यम् ॥ सर्वत्र गूढोपमेति ॥ कामकः कुत्सितकामोऽग्नेर्धूम इव ज्ञानस्य ब्रह्मणश्चावरकः ॥ कामकः आदर्शस्य मलमिव बुद्धेरंतःकरणस्यावरकः ॥ कामकः ॥ गर्भस्योल्बइव जीवस्यावरक इति ॥ एतेनाति ॥ तेनेदमावृतमित्यत्रेदमित्यस्य परमात्मांतःकरणजीवाख्यं वस्तुत्रयं धूमादिनाग्न्यादिरिवावृतमिति व्याख्याय तत्र प्रमाणस्योदाहृत तया तद्विरुद्धत्वेन यत्परेणोक्तं तेनेदमावृतमित्यत्रोक्तेदंशब्दार्थ एवावृतंज्ञानमिति द्वितीयश्लोकेन विव्रीयत इति तदप्यपाकृतं भवतीत्यर्थः ॥ ३८ ॥ ३९ ॥ ॥ कृ० ॥ अलमितिपर्याप्तिवाचकमांताव्ययम् ॥ तस्मादलमस्या अस्तीत्यर्थं अर्शआद्यच्॥अव्ययानां भमात्रेटिलोप इति टिलोपःषष्ठ्यर्थश्च विषयत्वे ॥ तेनालापर्याप्तिविषयिणी बुद्धिरितिपर्यवस्यति ॥ नत्रो नञा सह बहुव्रीहावनल इति भवतीति भावः॥ तेन मांताव्ययस्य नञाबहुव्रीहावकारांतत्वं कथमित्यपास्तम् ॥ अचेतने चेतनवदुपचाराद्बुद्धिरित्याद्युक्तम् ॥ अल्पःकाम इति व्याख्याने तस्यब्रह्माद्यावरणत्वमसंभावितं स्यादत आह ॥ कुत्सितः काम इति ॥ अनेन कुत्सित इतिसूत्रेण कप्रत्ययइत्युक्तं भवति ॥ ज्ञानस्य ब्रह्मणश्चेति ॥ अनेनावृतं ज्ञानमेतेनेत्यत्रापि धूमेनाव्रियते वन्हिर्यथेति दृष्टांतत्वेन संबध्यत इत्युक्तं भवति ॥ नन्वेवं सति कुत्सितकामादीनां धूमादिभिर्ज्ञानादीनां चाग्न्यादिभिस्तादात्म्यंच प्राप्तं तत्कथमित्यत आह ॥ सर्वत्र गूढोपमेति ॥ उपमानोपमेयसाधारणधर्मस्य सादृश्यवाचकेवादिशब्दस्य चाप्रयोगाल्लुप्तोपमेत्यर्थः ॥ यथोक्तमालंकारिकैः उपमाद्विविधा पूर्णा लुप्ता चेति ॥ उपमानोपमेययोस्तत्साधारणधर्मस्य सादृश्यस्यच प्रतिपादकानां प्रयोगे पूर्णा एकस्य द्वयोस्त्रयाणां वा प्रयोगे लुप्तेति ॥ तथा चोपमावाचीवशब्दाप्रयोगेऽपि तदर्थावगमाज्ज्ञानुपपत्तिरितिभावः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इदमपि प्राप्तादधिकस्योपलक्षणम् ॥ श्लोकद्वयार्थे प्रमाणसंमतिमाह ॥ उक्तं चेति ॥ कामकः कुत्सितकामो ज्ञानस्य ब्रह्मणश्चाग्नेर्धूमः ॥ तथा बुद्धेरंतःकरणस्यादर्शस्यमलम् ॥ अथ जीवस्य गर्भस्योल्बइति सर्वत्रगूढोपमा एतेनेदमित्युक्तस्य विवरणं ॥ द्वितीयश्लोक इति व्याख्या

उक्तं च॥ज्ञानस्य ब्रह्मणश्चाग्नेर्धूमो बुद्धेर्मलं तथा॥आदर्शस्याथ जीवस्य गर्भस्योल्बो हि कामक इति॥३८॥३९॥

नमपाकृतंभवति ॥ ३८ ॥ ३९ ॥

१ सुखामिति शेषः ॥ २ ईशांतःकरणजीवावरणत्वम् ॥

॥ श्री० ॥ एतदर्थमेवेति ॥ वधार्थमेवेत्यर्थः ॥ क्रियाद्वयेति ॥ विमोहयति आवृत्येति विमोहनावरणरूपक्रियाद्वयेत्यर्थः ॥ कां ॥ क्रियां प्रति ॥ संनिधानादिति ॥ एतैर्विमोहयतीतिशब्दसंनिधानादित्यर्थः॥ इंद्रियादित्वेनेति॥ गीतायामिति शेषः ॥ बुद्ध्यादित्वेनेति ॥ भाष्य इति शेषः ॥ प्राधान्येति ॥इंद्रियमनोबुद्धीनां मध्ये बुद्धिरूपेंद्रियस्य प्राधान्यज्ञापनार्थमिति शेषः ॥ दुर्गाद्यधिष्ठानग्रहणमात्रेण शत्रोर्नाशादर्शनादाह ॥नाशयितुं शक्य इति ॥ अनायासेन तन्नाशः कर्तुं शक्यत इत्यर्थः॥४०॥४१॥अत्रेति ॥ कामादिरूपशत्रुवध इत्यर्थः॥

इंद्रियाणीत्यादिकमपृष्टं किमर्थमुच्यत इत्यत आह ॥ वधार्थमिति ॥ एतदर्थमेव ह्यर्जुनेन बलवान्पृष्टः क्रियाद्वयश्रवणात् कां प्रतींद्रियादीनां करणत्वमिति न प्रतीयते ॥ संनिधानाद्विमोहनं प्रतीत्यन्यथा च प्रतीयतेऽत आह ॥ एतैरिति ॥ तदुपपादयति ॥ बुद्ध्यादिभिरिति॥ इंद्रियादित्वेनोक्तानामपिबुद्ध्यादित्वेन ग्रहणं प्राधान्यज्ञापनार्थम् ॥ तस्मात्त्वमितींद्रियाणां निग्रहः कामहननायोपदिश्यते ॥ तदुपपादयति

वधार्थं शत्रोरधिष्ठानमाह॥इंद्रियाणीति॥एतैर्ज्ञानमावृत्य ॥बुद्ध्यादिभिर्हि विषयगैर्ज्ञानमावृतं भवति ॥ हताधिष्ठानो हि शत्रुर्नश्यति ॥४०॥४१॥ शत्रुहनने आयुधरूपं ज्ञानं वक्तुं ज्ञेयमाह॥ इंद्रियाणीति॥

इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनम् ॥ ४० ॥
तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ ॥ पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनम् ॥४१॥
इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः ॥ मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥ ४२ ॥
एवंबुद्धेःपरंबुद्ध्वासंस्तभ्यात्मानमात्मना ॥ जहिशत्रुंमहाबाहोकामरूपंदुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीता०सू०ब्र० कर्मयोगोनामतृतीयोऽध्यायः ॥ ३ ॥

॥ असंगज्ञानासिमादाय तरातिपारमिति ह्युक्तम् ॥

॥ हतेति ॥ नश्यति नाशयितुं शक्यो भवति ॥ ४० ॥ ४१ ॥ इंद्रियाणि पराणीत्यस्य पूर्वेणसंगतिर्न दृश्यते अत आह ॥शत्रुहनन इति॥ ॥ एवं बुद्धेः परमित्यनेन वक्तुम् ॥ ज्ञानस्यात्रायुधत्वे प्रमाणमाह ॥ असंगेति ॥

॥ श्री० ॥ ननु ते प्राग्धातोरित्युपसर्गाणां धातोः प्राक् प्रयोज्यत्वोक्तेरिति तरति वक्तव्यं कथं तरतीत्युक्तमत आह ॥ छंदसीति ॥ छंदसि परे व्यवहिताश्चेति छंदसि उपसर्गाः धातोः परतोऽपि भवंतीत्युक्तत्वाददोष इति भावः ॥ संनिधानादिति ॥ इंद्रियाणां शरीरसंयुक्तत्वेन संनिहितत्वादिति भावः ॥ ॥ महताऽऽत्मनेति ॥ महत्तत्त्वाभिमानिना चतुर्मुखेनेत्यर्थः ॥ बुद्धेरात्मा महान् पर इतिश्रुतौ महत आत्मनो बुद्धेः परत्वोक्तेरिति भावः ॥ अध्याहार इति ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषस्तु स इति गीतायामध्याहार इत्यर्थः ॥

असंगं वैराग्यसहितम् ॥ तरति पारं पारमस्तितरतीति वचनात् ॥ परत्वस्यावधिसापेक्षत्वात्कस्मादिंद्रियाणि पराणीत्यत आह ॥ शरीरादिति ॥ संनिधानादिति भावः ॥ किं परत्वमन्यत्वं नेत्याह ॥ उत्कृष्टानीति ॥ यो बुद्धेः परतस्तु स इति परमात्मोच्यते ॥ तस्य बुद्धेः परत्वे महतात्मना साम्यं स्यादत आह ॥ न केवलमिति ॥ कोऽसौ श्रुतिर्यद्बलादध्याहार इत्यत आह ॥ अव्यक्तादिति ॥ अस्तु भगवा

शरीरादिंद्रियाणिपराणि उत्कृष्टानि ॥ न केवलं बुद्धेःपरःश्रुत्युक्तप्रकारेणाव्यक्तादपि ॥ अव्यक्तात्पुरुषः परः इति हि श्रुतिः ॥ न च तत्र तत्रैकैकदेशज्ञानमात्रेण भवति मुक्तिः ॥ सार्वत्रिकगुणोपसंहारो हि ॥ भगवता गुणोपसंहारपादेऽभिहितः ॥ आनंदादयः प्रधानस्येत्यादिना ॥

नव्यक्तादपि कामादिजयार्थं बुद्धेः परत्वेनैव ज्ञातेनालं किं प्रमाणांतरसिद्धाध्याहारेणेत्यत आह ॥ न चेति ॥ कामादिजयो हि मुक्तिद्वारं न च मुक्तिरेकदेशज्ञानमात्रेण भवति ॥ कुत इत्यत आह ॥ सार्वत्रिकेति ॥

॥ रा० ॥ ननु ते प्राग्धातोरित्यनेनोपसर्गाणां धातोः पूर्वं प्रयोगनियमोक्तेः तरतीति प्रयोक्तव्यं कथं तरतीति धातोः पश्चादुपसर्गप्रयोग इत्यत आह ॥ अतिपारामितीति ॥ छंदसीति ॥ अनेन सूत्रेण छंदसि उपसर्गाणां धातोः पश्चात्प्रयोगोऽपि साधुरित्युक्तत्वादित्यर्थः ॥ संनिधानादिति ॥ इंद्रियाणां शरीरसंयुक्तत्वादित्यर्थ इत्युक्तं भावबोधे ॥ अन्ये तु देहिनामित्यत्र प्रकृतिभागेन शरीरस्य प्रकृतत्वादित्याहुः ॥ परात्मनेति ॥ महत्तत्त्वाभिमानिना ब्रह्मणेत्यर्थः ॥ बुद्धेरात्मा महानिति श्रुत्यनुसाराय महताऽऽत्मनेत्युक्तम् ॥

१ अ०३ पा०३ अ०४ सू०१ एतदधिकरणमादौ प्रारंभस्य तेन पुरुषविद्यायामपि चेतरेषामनाम्नानादित्यधिकरणेनेति भाष्यार्थः ॥ २ इतिप्रत्ययप्रकृतिभागेनेत्यर्थः ॥

॥ श्री०॥ **उपलक्षणमिति**॥जीवभेदस्येत्यर्थः॥ **एवं पृच्छतीति** ॥ अपरं भवतो जन्मेत्यादि पृच्छतीत्यर्थः ॥ ४ ॥ **ज्ञानाशय इति** ॥ प्रमाणेन भेदं ज्ञातुमयं जीवकोटौ निक्षिप्य जन्म पृच्छतीति ज्ञातार्जुनाभिप्राय इत्यर्थः॥तव च न त्वंवेत्थेतिमितवचेति भेदस्य तवगतानि जन्मानि अहं वेद्मि न त्वंवेत्थेति सर्वज्ञत्वासर्वज्ञत्वरूपभेदकधर्मकथनेन च परिहरतीत्यर्थः॥ **अन्यथेति** ॥ प्रश्नपरिहारयोरित्थमभिप्रायाकल्पने विवस्वदाद्यपेक्षया स्वस्य प्राथमिकत्वमेव वक्तव्यं तवेत्यर्जुनं प्रति भेदस्य न त्वंवेत्थेति भेदकधर्मस्य चवचनं प्रकृतानुपयुक्तमित्यर्थः ॥ ५ ॥

तन्माहात्म्यमित्युपलक्षणं ॥ आदितः प्रमितिकारणतः ॥ मयि सर्वाणीत्यत्र परमेश्वरस्य माहात्म्यं पूज्यत्वादिलक्षणमुक्तम् ॥ अर्जुनस्य पूजकत्वादिकम् ॥ तमिममीश्वरजीवयोः पूज्यपूजकत्वादिना भगवतांगीकृतं भेदं प्रमाणेन ज्ञातुमेवं पृच्छतीत्यर्थः ॥ ४ ॥ अत एव

॥ तन्माहात्म्यमादितो ज्ञातुं पृच्छति ॥ अपरमिति ॥ ४ ॥ ५ ॥

अर्जुन उवाच ॥ अपरंभवतोजन्मपरंजन्मविवस्वतः॥ कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥ बहूनिमेव्यतीतानिजन्मानितवचार्जुन ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ॥ ५ ॥

ज्ञाताशयो भगवांस्तवच न त्वं वेत्सीति परिहरति ॥ अन्यथाऽनुपयुक्तम् नच वक्तव्यमेव ॥ ५ ॥

॥कृ०॥ ननु प्रत्युत्तरे भेदकधर्मोक्त्या भेदस्य प्रतिपादयिषितत्वात्तदनुसारेण भेदमितिवक्तव्ये माहात्म्यमितिकथमुक्तमित्यत आह॥**उपलक्षणमिति** ॥जीवेश्वरभेदस्येति शेषः॥भगवन्माहात्म्यस्यानादित्वात्कथमादित इत्युक्तमित्यत आह ॥ **प्रमितीति** ॥ धातूनामनेकार्थत्वादादीयते प्रमीयतेऽनेनेत्यादिः ॥ ददातेः करणेकिप्रत्ययः ॥ उपसर्गेघोः किरिति सूत्रादिति भावः ॥ **पूज्यत्वादीति** ॥ आदिशब्दात्कर्तृत्वग्रहः ॥ मयि सर्वाणीत्यत्र भगवानेव करोति भगवत्प्रीतिं च ज्ञानं संन्यास इतिव्याख्यानादिति भावः ॥ ४ ॥ **अत एवेति** ॥ यत एवंभेदविषये प्रमाण प्रश्नोऽयमत एवेत्यर्थः ॥ **तव चेति** ॥ अत्र चशब्देन न केवलं मम किं तु तव चेति भेदं प्रतिज्ञाय तद्धेतुत्वेन न त्वं वेत्थेति भेदकधर्म उक्त इति भावः ॥ **अनुपयुक्तमिति** ॥ विवस्वदाद्यपेक्षया प्राथमिकत्वं तव कथमिति पृष्टत्वेन तस्यैव वक्तव्यत्वादिति भावः ॥ ५ ॥

१ आङ्पूर्वकदाधातोर्ग्रहणार्थकत्वप्रसिद्धेर्महात्म्यभेदयोर्ग्रहणं च ज्ञानमेवेति ॥ तस्मात्करणे प्रत्ययेन प्रमाणात् इत्यर्थ इति भावः २ रा.श्रीपादानां कृष्णाचार्याणां च वेत्थेति पाठः ॥

॥ श्री० ॥ यदीति ॥ बहूनि मे व्यतीतानि जन्मानीत्युक्त्वेन यदि ते जन्मानि व्यतीतानि तर्हीत्यर्थः ॥ मरणेति ॥ अव्ययात्मा भूतानामीश्वरोऽपि सन्निति परिहारे उक्तत्वादिति भावः ॥ उक्तविरोध इति ॥ नत्वेवाहमित्युक्त विरोध इत्यर्थः ॥ कथमन्यत इति ॥ तस्य स्वरूपपरत्वेनापि मानकाशत्वादिति भावः ॥ तथैव व्याख्येयमिति ॥ देहतोप्युत्पत्तिरहित इति व्याख्येयम् ॥ एवं व्याख्याने देहतोऽप्यनादित्वं लभ्यत इत्याशयः ॥ गीताचार्यस्येति ॥ गीतोपदेष्टुर्भगवतो वासुदेवस्येत्यर्थः ॥ रूपशब्दो देहपरः ॥ ननु ग्रहणमव्ययत्वाविरोधी तिचेत्तत्राह ॥ गृहीतस्येति ॥

प्रश्नस्य परिहृतत्वात् ॥ अजोऽपीति किमर्थमित्यत आह ॥ न तर्हीति ॥ यदि जन्मानि व्यतीतानि तर्हीत्यर्थः ॥ अनादिर्देहतोऽपि उपलक्षणं चैतत् ॥ मरणरहितः सर्वभूतानां ईश्वरश्चेत्यपि द्रष्टव्यम् तथा चोक्तविरोध इति भावः ॥ ननु देहतोऽप्यनादित्वादेराक्षेपेऽजत्वा दिमात्रं कथमुच्यत इत्यतोऽव्ययात्मेत्येतेनाव देहतोऽप्यविनाशमाचष्टे ॥ तत्साहचर्यादजोऽपीत्येतदपि तथैव व्याख्येयमिति भावेनाह ॥

न तर्ह्यनादिर्भवानित्यत आह अजोऽपीति ॥ अव्ययः ॥ आत्मादेहोऽपीत्यव्ययात्मा ॥ अनंतंविश्वतो

॥ अजोऽपिसन्नव्ययात्माभूतानामीश्वरोऽपिसन्॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया॥ ६ ॥

मुखमितिरूपविशेषणमुत्तरत्र ॥ एतन्नानाऽवताराणांनिधानंबीजमव्ययमितिच ॥ जगृहइतितुव्यक्तिः ॥

अव्यय इति ॥ अपिपदात्परं अस्येत्यध्याहार्यम् ॥ स्यादेवं व्याख्यानं यदिभगवद्विग्रहस्याप्यव्ययत्वंगीताचार्याभिमतं स्यात् तदेव कुत इत्यत आह ॥ अनंतमिति ॥ इति च रूपविशेषणमिति वर्तते ॥ एवं तर्हि कथंतत्रैव जगृहे पौरुषं रूपमितिग्रहणमुच्यते॥ गृहीतस्य च त्यागो नियत एवेत्यत आह ॥ जगृह इति ॥

॥रु०॥अजोपीत्यत्र देहस्याप्यनादित्वोक्तिस्वरूप शून्याशंकां दर्शयितुमाह॥देहतोऽपीति॥अव्ययात्मेत्यादिविशेषणद्वयनिरर्थकत्वशंकां दर्शयितुमाह॥ उपलक्षणमिति ॥ उक्तविरोध इति ॥ नासतो विद्यते भाव इत्यादिनेश्वरानादिनित्यत्वस्योक्तत्वंन इमे देहा इत्यत्र शरीरिण इति ईश्वरस्याविकारविशेषणत्वेन तद्देहनित्यत्वस्य न मेयार्थोऽस्ति कर्तव्यं नानवाप्तमवाप्तव्यमित्यादि नेश्वरत्वस्य चोक्तत्वादिति भावः ॥ बहुव्रीहित्वप्रदर्शनार्थमाह ॥ अस्येत्यध्याहार्यमिति ॥

१ रूपमाकारसौंदर्यमानकेष्वपि दृश्यत इति नानार्थशेषे देहश्चाकारविशेष इति॥रूपं देह इत्युक्ति विहाय देहपर इत्युक्तम्॥२भागवत ए०१ तृतीयाध्यायारंभ एव ॥

॥ श्री० ॥ ननु द्वितीयाध्यायांतेऽर्थे आगमानामेवोक्तत्वात्कथं युक्तय इत्युक्तमित्यत आह ॥ युज्यत इति ॥ अर्थ इति शेषः ॥ युज्यते उपपन्नो भवतीत्यर्थः ॥ प्रतिपाद्यत इत्यर्थ इत्यप्याहुः ॥ असंभावनेति ॥ अव्ययात्मत्वादिविषयकेति शेषः ॥ अत्रान्वेति ॥ अव्ययात्मेत्यत्रेत्यर्थः ॥ नन्वात्माव्ययत्वमिति वक्तव्येऽनादित्वमित्युक्तिः कथमित्यत आह ॥ विग्रहस्यापीति ॥ तद्विषयः ॥ स्वरूपविषय ॥ न तर्हीत्याक्षेपः ॥ अजोऽपीत्यादिपरिहारः ॥ आत्मशब्दोऽपीति ॥ स्वरूपाव्ययत्वप्रतिपादनस्याव्यय इत्यनेनैव संभवादात्मशब्दो व्यर्थ इत्यर्थः ॥

व्यक्तिरित्युच्यत इति शेषः ॥ कुत एवं कल्प्यत इत्यत आह ॥ युक्तयइति ॥ युज्यत एभिरिति युक्तयः ॥ प्रमाणानि ॥ असंभावनापरिहारार्थाअचिंत्यशक्तित्वाद्या युक्तयो वा ॥ उक्ता द्वितीये ॥ अस्तु भगवद्विग्रहस्याप्यव्ययत्वम् ॥ अत्र तु स्वरूपस्यैवोच्यत इति किं न स्यादित्यत आह ॥ आत्मेति ॥ आत्मनः स्वरूपस्य देहस्याप्यव्ययत्वोपपादनेनाजत्वमपि साहचर्यात्तस्यैवेति योऽभिप्रायस्तं प्रकटयितुमव्ययत्वमुपक्र

युक्तयस्तूक्ताः ॥ आत्माऽनादित्वंतुसर्वसमम् ॥ कथमनादिनित्यस्यजनिः ॥ प्रकृतिं स्वामधिष्ठाय ॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानमधर्मस्य तदात्मानंसृजाम्यहम् ॥७॥

म्यानादित्वमित्युक्तम् ॥ सर्वसमं जीवानामप्यस्ति अतस्तद्विषयो नाक्षेपः परिहारो वा संभवतीति भावः ॥ आत्मशब्दोऽप्यन्यथा व्यर्थः ॥ अस्मत्पक्षे स्वरूपदेहयोरुपादानार्थः ॥ अत एव देहोऽपीत्युक्तम् ॥ एवं तर्हि प्रकृतिं स्वामधिष्ठायेति कथमुक्तमित्यतस्तदन्यथा व्याख्यातुमाह ॥ कथमिति ॥

॥ कृ० ॥ ननु भगवतो जन्माभावे न चापि राघवाज्जात इत्याद्यागमान.मुक्तत्वात्कथं युक्तय इत्युच्यत इत्यत आह ॥ युज्यत एभिरितीति ॥ यद्यपि स्त्रियां क्तिनो विधानाभिरिति वक्तव्यम् तथाऽपि सामान्येनपुंमकमितिगतदनुसृत्यैवमुक्तम ॥ असंभावनादीति ॥ आदिपदेनोपचारकल्पनानिरासः संग्रहः ॥ अचिंत्यशक्तित्वाद्या इति ॥ उभयविधवाक्यान्यथानुपपत्तिः ॥ पदार्थवैचित्र्यं चादिशब्दार्थः ॥ अयमर्थः ॥ उभयविधवाक्यान्यथानुपपत्त्यानंतामत्याद्यव्ययत्वं जगृह इत्यत न व्यक्तिरुच्यत इति कल्प्यते न चेश्वरस्य व्यक्तिरसंभाविता अचिंत्यशक्तेः ॥ न चान्यत्रादृष्टचाऽनालापः ॥ तथा सति मूर्खपांडित्यादृष्टेः पंडितेऽपि तदभावप्रसंगात ॥ न चानंतामित्यादिरमपचरितार्थस्तुतिर्वास्तामिति वाच्यम ॥ ईश्वरेऽचिंत्यशक्त्या मुख्यार्थस्यैवोपपत्तौ उपचारादिकल्पनाऽनवकाशादिति अव्ययात्मेत्यव्ययत्वस्यैव प्रकृतत्वादात्माव्ययत्वमिति वक्तव्ये आत्मानादि वामिति यदुक्तंतत्कृत्यमाह ॥ देहस्यापीति ॥ अनादिनित्यस्येति ॥ यद्यप्यनादित्वस्य जन्मना सह परस्पर विरुद्धरूपत्वाद्व्याघातः ॥ न तु नित्यत्वस्यतथापि परस्परविरुद्धव्याप्यत्वात्मकविरोधोऽस्तीति सूचनाय नित्यत्व ग्रहणम् ॥

१ नान्याविनामत्सृष्टिः अहमेवस्वतंत्र इति भावः ॥

॥ श्री० ॥ निमित्तमिति ॥ वसुदेवादिशरीरद्वारा प्रकृतिरेव भ्रमेनिमित्तमिति भावः ॥ यथोक्तमिति ॥ महाभारततात्पर्यनिर्णय इत्यर्थः ॥ इत्यादीत्यादिपदात् स्त्रीपुंप्रसंगात्परतो यतो हरिः प्रादुर्भवत्यप जनं विमोहयन् ॥ अतो मत्तोऽत्थोऽयमिति स्म मन्यते जनोऽशुभ. पूर्णगुणैकविग्रहमिति श्लोको ग्राह्यः ॥ प्रमादमोहौतमस इति वचनात्तमोरूपयेत्युक्तम् ॥ तन्निमित्तम् ॥ मातृगर्भवासादिप्रयुक्तम् ॥ प्रकृतिवाचित्वं कुत इति ॥ भूतानि द्रव्यनामानीति प्रमाणवत्त्वात् पृथिव्यादिपंचमहाभूतान्येवात्र द्रव्यपदेनोच्यंत इति किं नांगीक्रियत इति वाक्यशेषः ॥ अन्यथाप्रतीतिरात्माविद्ययेति प्रतीतिः ॥ कथमित्यत आह ॥ सर्वज्ञस्येति ॥ यथोक्तम् ॥ अज्ञानाऽखिलसंवेनुर्घटते न कुतश्चनेति ॥ ॥ कृ० ॥ स्त्रीपुंप्रसंगादित्यादी

स्वरूपतो देहतश्चानादिनित्यस्य संभवामीति जनिः कथमुच्यते व्याहतत्वादित्यत आहेति शेषः ॥ अधिप्रायेत्यतः परमितिशब्दश्चाकथमने नपरिहार इत्यतो व्याचष्टे ॥ प्रकृत्येति ॥ वसुदेवादिषु प्रादुर्भूतत्वादिति शेषः ॥ अनेन जन्मभ्रांतेर्निमित्तमुक्तम् ॥ यथोक्तं स्त्रीपुंप्रसंगा दित्यादि ॥ भ्रांतिरुपादानमाह ॥ तथैवेति ॥ तमोरूपया यदि मातापितृसंबंधोऽङ्गीकृतस्तर्हि तन्निमित्तं दुःखादिकमपि प्रसज्यत इत्याशंकानि रासाय स्वामितिपदं व्याख्याति ॥ न त्विति ॥ प्रकृतेर्भगवदधीनत्वं कुत इत्यत आह ॥ द्रव्यमिति ॥ अत्रवाक्ये प्रकृतिर्न श्रूयत इत्य

प्रकृत्या जातेषु वसुदेवादिषु ॥ तथैव तेषां जात इव प्रतीये इत्यर्थः ॥ न तु स्वतंत्रामधिष्ठायेत्याह ॥ स्वा मिति ॥ द्रव्यं कर्मचेतिस्युक्तम् ॥ साहितत्रोक्ता ॥ ततःसर्वसृष्टेः ॥ आत्ममायया ॥ आत्मज्ञानेन ॥

त आह ॥ साहीति ॥ द्रव्यपदेनेति शेषः तस्याप्रकृतिवाचित्वं कुत इत्यतआह ॥ तत इति ॥ सर्वसृष्टिकारणानि ह्यत्रानिर्दिष्यंते ॥ तच्च प्रकृ तेरेव संभवति ॥ न पृथिव्यादेरित्यर्थः ॥ आत्ममाययाऽत्माविधयेति प्रतीतिनिरासायाह ॥ आत्मेति ॥ कुतो हेतोरेवं जीवविलक्षणं ते ज न्मेत्याशंकानिरासार्थमेतत् ॥ अन्यथाप्रतीतिरप्यनेन परिहृता ॥ सर्वज्ञस्याविद्याऽयोगात्

ति ॥ स्त्रीपुंप्रसंगात्परतो यतो हरिः प्रादुर्भवत्यप विमोहयञ्जनम् ॥ अतोमत्तोत्थोऽयमिति स्ममन्यते जनोऽशुभः पूर्णगुणैकविग्रहमिति भारततात्पर्यनिर्णये उक्तमित्यर्थः ॥ भ्रांतिरु पादानमिति ॥ तमोगुणात्मकप्रकृतिविशिष्टं मन एवभ्रांतरुपादानं न तु केवलस्तमोगुणः तेनैतत्सर्वं मन एवेति श्रुतिविरोधो नेति ध्येयम् ॥ प्रमादमोहौ तमसो भवतो ज्ञानमेव चे ति वाक्यं मनसि निधायाह ॥ तमोरूपयेति ॥ एतेन तथेत्यत्र सत्त्वरजोन्यतरग्रहणे सत्त्वात्संजायतेज्ञानं रजसो लोभएवचेति गीताविरोध इत्यपास्तम् ॥ दुःखादिकमिति ॥ आदि पदेनजन्मादिसंग्रहः ॥ तच्च प्रकृतेरेवेति ॥ कर्मकालादिना सर्वसृष्टिकारणानां साहचर्याद्द्रव्यपदेनापि सर्वसृष्टिकारणमेवग्राह्यं तच्च सर्वकारणत्वे प्रकृतेरेव न पृथिव्यादेः अतोद्रव्य पदेन प्रकृतिरेव प्राप्नोति भावः ॥

॥ श्री० ॥ भाष्ये ॥पृथगिति ॥ प्रकृतिं स्वामित्यनेनेत्यर्थः ॥प्रकृतिं स्वामधिष्ठायेत्यस्य भ्रमनिमित्तमात्रकथनपरत्वांगीकार इत्यर्थः ॥ न दोष इति ॥ पुनरुक्तयाख्यः ॥ उपादानार्थत्वादिति॥भ्रमोपादानप्रतिपादनार्थत्वादित्यर्थः ॥अजात एवेति शेषं पूरणीयम् ॥ ईशनशीलानामिति ॥ प्रेरणशीलानामित्यर्थः ॥ स्थेशभासपिसकसोवरच् ॥ ष्ठागतिनिवृत्तौ ॥ ईश ऐश्वर्यप्रेरणे भासृदीप्तौ ॥ पिसृगतौ ॥ कसृहिंसायां ॥ एभ्यो धातुभ्यो वरच् प्रत्ययः स्यात् ताच्छील्ये गतिनिवृत्तिशीलः स्थावरः ईशनशीलः ईश्वरः ॥ भासनशीलो भास्वरः ॥ गतिशीलः पिस्वरः हिंसनशीलः कस्वर इत्युदाहरणानि ॥ तथा चानेन सूत्रेणेशधातोस्ताच्छील्यवरच्प्रत्यये ईशनशीलत्वमीश्वरशब्दार्थमितिद्रष्टव्यम् ॥ अन्यथा व्याचष्ट इति ॥

प्रकृतिरत्र माया किं नस्यादित्यत आह ॥ प्रकृतेरिति ॥ मायाशब्दस्य ज्ञानवाचित्वं कुत इत्यतआह ॥ केतुरिति ॥ इतिप्रज्ञायाः नामधेयानीति वाक्यशेषात् ॥ प्राक् प्रकृतिंस्वामधिष्ठायेत्यनेनैवभ्रमनिमित्तत्वमुपादानत्वं च प्रकृतेरुक्तमिति मायाशब्दो न प्रकृतिवाची पुनरुक्तिप्रसंगादित्युक्तं इदानीं तस्यनिमित्तमात्रपरत्वे मायाशब्दस्य प्रकृत्यर्थतायामपि न दोषः ॥ उपादानप्रतिपादनार्थत्वादिति भावेनाह ॥ सृष्टीति ॥

प्रकृतेःपृथगभिधानात्॥केतुः केतश्चित्तिश्चित्तं मतिः क्रतुर्मनीषा मायेति त्यभिधानम् ॥सृष्टिकारणया तेषां शरीरादिसृष्ट्वा विमोहिकया ॥ अजातएवजातइवप्रतीयेत्ता ॥ उक्तंच ॥ महदादेश्चमाताया श्रीर्भूमिरिति कल्पिता ॥ विमोहिकाच दुर्गाख्या ताभिर्विष्णुरजोऽपि हि ॥ जातवत्प्रथते ह्यात्मचिद्बलान्मूढचे ॥ तसामिति ॥ ईश्वरः ॥ ईशेभ्योऽपिवरः ॥ प्रकृत्येति शेषः ॥ तेषां वसुदेवादीनां सृष्ट्वा तत्र प्रादुर्भूतः

॥ विमोहिकया ॥ मायाख्यया ॥ अत्रागमसंमतिमाह ॥ उक्तं चेति ॥ आत्मचिद्बलादजात एवानन्वीशनशीलानामपि ब्रह्मादीनामुत्पत्तिमरणदर्शनेन विरोधाभावादीश्वरोऽपि संभवामीति कथमुच्यतेऽतःस्थेशभासपिसकसोवरजित्येतद्विहायान्यथा व्याचष्टे ॥ ईश्वर इति ॥

॥ कृ० ॥ मूले सृष्टिकारणयेति ॥ करोतेण्यंतात्करणे ॥ ण्यासश्रंथो युजिति युच्प्रत्यये स्त्रीलिंगत्वमिति बोध्यम् आत्मचिद्बलादित्यस्याजइत्यनेनान्वयदर्शयन्नजोऽपीत्यस्यार्थमाह ॥ आत्मचिद्बलादजात एवेति॥अपिरवधारणार्थ इतिभावः॥ईश्वरशब्दस्य ताच्छीलिकवरच्प्रत्ययांतत्वमाश्रित्याह॥ ईशनशीलानामिति॥स्थेशेति॥ स्थावरः ईश्वरः इत्युदाहरणानि॥

---

१ अयंपाठः कृष्णाचार्यमते ॥ इतरमंमतस्तुकथमुच्यतेऽतस्तद्विहायेति ॥

॥श्री०॥नार्य वरत्वप्रत्ययांत:किं नृत्तमत्वार्थकेश्वरशब्द इति व्याचष्ट इत्यर्थ ॥ननु ईशेभ्यो वर ईश्वर इति पंचमीसमासो न युक्तः॥पंचमीभयेनेति भयशब्दयोगे पंचम्याः समासविधानात् तथेशेभ्यो वर ईश्वर इति स्यात ॥ न त्वीश्वर इति ईशपदगताकारलोपविधायकाभावादित्यत आह ॥ एतदागमबलादेवेति ॥ पंचमी भयेनेत्यत्र योगविभागोऽस्मिन् एतदागम बलादेव तथा च समासोपपत्तिः ईशपदगताकारलोपश्चैतदागमबलादेव द्रष्टव्य इति न दोष इत्यर्थः ॥ नन्वजोपीति ॥ पादक्रमव्याख्यानक्रमेण भूतानामीश्वरोऽपीत्येतद्व्याख्येयं क्रम मुल्लंघ्यादौ प्रकृतिंस्वामिति द्वितीयार्धं व्याख्याय पश्चादिदव्याख्याने किंनिमित्तमित्यत आह ॥ अजत्वादेरिति ॥ आदिपदेनाव्ययात्मत्वग्रहणम ॥ संभवेनेत्युपलक्षणम ॥ मरणे नेत्यपि ग्राह्यम बहूनि मेव्यतीतानि जन्मानि ममाभ्यामि [illegible] । अत एव पूर्वं न [illegible] व्याख्यानावसरे उपलक्षणं चैतत मरणरहित इत्यपि द्रष्टव्यमित्यु क्तम ॥ अन्यथासंभवेनेति पदेन मरणानुपलक्षणे [illegible] व्ययात्मत्वस्य संभवेन शाब्दव्याघातो [illegible] ॥ न हि नाशाभावसंभवयोः परस्परविरहरूपत्वम स्ति ॥ आदिपदेनाव्ययात्माग्रहणेन [illegible] संभवादिनेति [illegible] शंकालेश इति ज्ञेयम ॥ अस्य तु व्याघेति ॥ श्रीब्रह्मा दीश्वरत्वं यत्र तत्र संभवाभावः ॥ यत्र संभवस्तत्र श्रीब्रह्मादीश्वरत्वाभाव इति परस्परविरहव्याप्यत्वेनेश्वरत्वस्य संभवेन विरोध इत्यर्थः ॥ ६ ॥ ७॥

कुतएतदित्यत आह ॥ ईशेभ्य इति ॥एतदागमबलादेव समासाकाङ्क्षोपात्तनुमन्तव्यो॥ अजत्वादेः संभवेन शाब्दोऽस्य घातोऽस्य तु व्याख्येति

तच्चोक्तम् ॥ ईशेभ्यो ब्रह्मरुद्रश्रीशेषादिभ्यो यतो भवान् ॥वरोऽतईश्वराख्याते मुख्या नान्यस्य

॥ कस्य चिदिति ब्रह्मवैवर्ते ॥ समर्थ ईशइत्युक्तः तद्वरत्वात्त्वमीश्वर इतिच ॥ ६ ॥ ७ ॥

ज्ञापनाय क्रममुल्लंघ्य व्याख्यातम् ॥ ६ ॥ ७ ॥

॥ क्रु० ॥ समासाकाङ्क्षोपात्तेति ॥ पंचमीति योगविभागात्समास. ॥ ईशशब्दादिकारलोपश्चेत्यर्थः ॥ ननु पादक्रमादस्यात्मेत्यव्याख्यानानंतरमेव भूतानामीश्वरोऽपीत्येतद्व्याख्येयम ॥ मध्येद्वितीयार्धव्याख्याने किं निमित्तमित्यत आह॥अजत्वादेरिति ॥ आदिपदे उपादीयते व्याख्यायत इत्यादि ॥ अजत्वं चासावादिश्चे ति कर्मधारयः ॥ ततश्चाजत्वादेरित्यस्यात्मरूपव्याख्येयस्येत्यर्थः पर्यवस्यति । तेनादिपदेनाव्ययत्वस्य संभवेन शाब्दो व्याघात कथमित्यपास्तम ॥ व्याघेत: ॥ सत्यमव्ययात्मेत्येत द्व्याख्यानभूतानामीश्वर इत्येतद्व्याख्येयमिति । तथाऽप्यव्ययात्मेत्येतद्व्याख्यानत्यागेन व्याख्येयं [illegible] तस्य संभवेन सहशब्दतो व्याघात. प्रसंग ॥ अज. संभवामीत्यनयोः पर स्परविरहरूपार्थप्रतिपादकत्वात ॥ ईश्वरत्वस्य तु संभवेन परस्परविरहव्याप्यत्वरूप एव विरोध. ॥ यत्रेश्वरत्वं तत्र संभवाभाव ॥ यत्र संभवस्तत्रेश्वरत्वाभाव इति व्याप्तिः ॥ तथा चो क्तं वैलक्षण्यज्ञापनाय क्रमोल्लंघनेन व्याख्यानं युक्तमेवेति ॥ ६ ॥ ७ ॥

॥ श्री० ॥ तथाऽचरतीति ॥ जन्मना परित्राणाद्याचरतीत्यर्थः ॥ तथेच्छैवेति ॥ जन्मना परित्राणाद्याचरिष्य इतीच्छैवेत्यर्थः ॥ नन्वयामित्युक्तायोरेष इत्यस्य वैयर्थ्यपरिहारायानुवाद इत्याह ॥ अयमेष इयमिच्छेति ॥ इष इच्छायामित्यस्मादेषणमेष इति भावे घञि गुणे न एषशब्द इच्छावाचीति द्रष्टव्यम् ॥प्रवृत्तिरिवेति ॥ प्रवृत्तिषु कृताश्च सर्वेषु न किंचिदाप्यमित्यर्थः ॥ इष इच्छायामिति ॥ धातोरिषुशब्दवाच्येच्छाया. प्रमाणविरुद्धत्वाभावादाह॥लोकाविपरीतेति ॥यथोक्तम ॥ तदन्यत्र स्वयमेव॥ अविरोधेन गोविंद मतिः॥८॥

परित्राणाय साधूनामिति साधुपरित्राणादिकं भगवदवतारस्य प्रयोजनमुक्तम् ॥ तत्र किं जन्मनैव परित्राणादिकं कार्यमिति नियम इत्यपेक्षायामाह ॥ नेति ॥ जन्मना विनाऽपि कर्तुं समर्थत्वादिति भावः ॥ तर्हि किमर्थं जन्मेत्यत आह ॥ तथाऽपीति ॥ यथेष्टचारी इच्छयैव

न जन्मनैव परित्राणादिकार्यमिति नियमः ॥ तथापि लीलया स्वभावेन च यथेष्टचारी ॥ तथाह्युक्तम् ॥ देवस्यैष स्वभावोऽयम् ॥ लोकवत्तु लीलाकैवल्यम् ॥क्रीडतो बालकस्येव चेष्टां तस्य निशामय॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे॥८॥

अरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः॥पूर्णोऽयमस्यात्रन किंचिदाप्यंतथाऽपि सर्वः कुरुते प्रवृत्तिः ॥ अतोविरुद्धेषु मिमं वदंति परावरज्ञा मुनयः प्रशांता इत्यादि ऋग्वेदखिलेषु ॥ ८ ॥

तथाऽचरति ॥ तथेच्छैव किमर्थेत्यत उक्तम ॥ लीलयेति ॥ लीलाप्यलस्यपरिहारायर्था न भवतीत्यत उक्तम् ॥ स्वभावेन चेति ॥ अत्रैव प्रमाणान्याह ॥ तथा हीति ॥ अयमेष इयमिच्छा ॥ अत्र प्रवृत्तिषु विरुद्धेषु लोकविपरीतेच्छुम् ॥

॥ कु० ॥ अयमेष इत्यनयोरन्यतरवैयर्थ्यनिरासायाह ॥ इयमिच्छेति ॥ इष इच्छायामित्यतो भावे घञिति भावः ॥ ८ ॥

१ अ०२ पा०१ अ०९ सू० २ लोके यथा मत्तादेर्नृत्यगानादिक्रियातथेशस्यसृष्ट्यादिक्रियाकेवललीलैवेत्यर्थः ॥ २ स्वप्रयोजनाभावेऽपिलीलयैवपरार्थं मवतार इति भावः॥
३ लोके हि फलमुद्दिश्यैव प्रवृत्तीच्छादर्शनात् ॥

॥ श्री० ॥ पृथगित्यस्यार्थमाह ॥ **एकदेशज्ञानेनेति** ॥ भगवज्जन्मकर्मण्यैकदेशज्ञानमात्रेणत्यर्थः ॥ सर्वज्ञाननियमस्य श्लोकेऽप्रदर्शनाद्दर्शनार्थमिति कथमयुक्तमित्यत आह ॥ **उपलक्षणार्थमिति** ॥ **तृतीयेति** ॥ तृतीयाध्यायात ॥ **अयोगेति** ॥ सर्वं वाक्यं सावधारणमिति न्यायात ॥ यो जन्मकर्म च वेत्त्येव स जन्म नैतीति जन्मकर्मज्ञात्वैव मुक्तिर्ना ज्ञात्वेत्ययोगव्यवच्छेद एवाभिमतो न तु जन्मकर्मज्ञानेनैव मुक्तिर्नान्यज्ञानेनेत्यन्ययोगव्यवच्छेदो येनैतदेव गीतावाक्यं महाकौर्मवाक्यबाधकं स्यादिति भावः ॥ साध्ये सावकाशत्वं गति शब्दार्थः॥ननु पृथङ्मुक्त्युक्तिरित्यनेनैव गीतावाक्यस्य सावकाशत्वं लब्धमेव पुनः सावकाशत्वं किमर्थमुच्यत इत्यत आह ॥ **एतच्चेति** ॥ पृथङ्मुक्त्युक्तिः सर्वज्ञाननियम दर्शनार्थमिति पूर्वोक्तादर्थात् जन्मादिकं सर्वथा ज्ञातव्यमेवेत्यर्थान्तरं अत्रोक्तस्येत्यनेनोच्यत इत्यर्थः ॥ तथा च प्रकारान्तरेण उपलक्षणं विना सावकाशत्वस्योच्यमानत्वाददोष इति भावः॥

जन्मकर्मचेति भगवज्जन्मादिज्ञानमात्रेण मुक्तिरुच्यत इति प्रतीतिनिरासायाह ॥ पृथगिति ॥ एकदेशज्ञानेनेत्यर्थः ॥ दर्शनार्थमुपलक्षणार्थम् ॥ यथा प्रतीत एवार्थः किं न स्यादित्यत आह ॥ न त्विति ॥ उक्तं तृतीये ॥ प्रमाणांतरं चाह ॥ वेदादीति ॥ वाक्यत्वाविशेषादेतस्य

पृथङ्मुक्त्युक्तिर्हि सर्वज्ञानिनियमदर्शनार्थम् ॥ नतु तावन्मात्रेणमुक्तिरित्युक्तम् ॥ वेदाद्युक्तं तुसर्वं यो जन्मकर्मच मेदिव्यमेवं यो वेत्तितत्त्वतः॥त्यक्त्वा देहं पुनर्जन्मनैति मामेति सोऽर्जुन ॥ ९ ॥ ज्ञात्वोपास्ते सदा हिमां ॥ तस्यैव दर्शनपथं यामि नान्यस्य कस्यचिदित्युक्तेश्च महाकौर्मे॥अत्रोक्तस्यै ॥ तज्ज्ञात्वैव जन्मनैतीतिगतिः ॥ इतरवाक्यानांनान्या गतिः ॥

गीताबाधकत्वं कुत इत्यतः सावकाशत्वनिरवकाशत्वाभ्यामित्याह॥अत्रेति॥अयोगव्यवच्छेदमात्रपरत्वमित्यर्थः॥एत च्च पूर्वोक्तादर्थांतरमिति ज्ञेयम्॥

॥ कृ० ॥ननु पृथक्शब्दो न वलक्षण्यार्थः ॥ मुक्तेः तदुक्तेर्वा वैलक्षण्यानुपलम्भात ॥नापि पुनरर्थ.॥जन्मादिज्ञानेन मुक्तेःपुनर्वाच्यमानत्वेन पुनर्मुक्त्युक्तेरभावादित्यत आह॥**एकदेशज्ञानेनेत्यर्थ इति** ॥ तथाऽप्येकदेशज्ञानेन मुक्त्युक्तं सर्वज्ञाननियमदर्शनार्थत्वाभावादाह ॥ **उपलक्षणार्थमिति तृतीय इति** ॥ तृतीयाध्यायांत इत्यर्थः ॥ तत्रापौरुषेयवेदेषु विष्णुवेदेषु चैव ही त्यादिप्रमाणानामुक्तत्वादिति भावः ॥ नन्वेतज्ज्ञात्वैव जन्म नैतीत्यस्य जन्मादिज्ञानेनैव मोक्ष इति फलितार्थ ॥ न चायं युक्तः ॥ जन्मादिज्ञानान्येन गुणपूर्णत्वज्ञानेन वा भगवत्प्रसादे न वा मोक्षोक्तिरित्यत आह ॥ **अयोगव्यवच्छेदमात्रेति** ॥ मोक्षे जनयितव्ये जन्मादिज्ञानायोगो नास्तीत्ययोगव्यवच्छेद एवैवकारार्थो न त्वन्ययोगव्यवच्छेद इत्यर्थः ॥ ननु मोक्षं प्रति जन्मादिज्ञानायोगव्यवच्छेदे कृते तन्नियम एवोक्तः स्यात ॥ तथा च नियमदर्शनार्थमितिग्रंथेन पुनरुक्तिरित्यत आह ॥ **एतच्चेति** ॥ पूर्वमुपलक्षणतया सर्वज्ञाननियमउक्तः ॥ अत्रतुज न्मादिज्ञानमात्रनियम इति भेद इत्यर्थः ॥

॥ श्री० ॥ इतरवाक्यानि वेदाद्युक्तं ॥ त्रिवेदादीनि कुतो नान्येति ॥ अधिकारिविशेषो ब्रह्मा तस्यैव वेदाद्युक्तसर्वज्ञानपूर्विकोपास्या ज्ञानं इतरेषां तु यत्किंचिज्ज्ञानमेवापेक्षिता इति सावकाशानीत्यन्या गतिरस्तीत्यर्थः ॥ पक्षांतरेति ॥ अधिकारिविशेषस्यैव सर्वज्ञानमितरेषां तु यत्किंचिज्ज्ञानमेवापेक्षितमिति पक्षांतरव्यवच्छेदादित्यर्थः ॥ तथा च वेदाद्युक्त ज्ञानमेवापेक्षितमिति सावकाशत्वाभावान्नान्या गतिरिति भावः ॥ अर्थापत्तेरिति ॥ आपततीत्यस्याक्षिपतीत्यर्थकत्वात्तत्वत इति विशेषणेन सर्वज्ञानमाक्षिप्यत इत्यर्थः ॥ ननु ज्ञाश्रुस्मृदृशां सन इति सूत्रेण सन्नंतेभ्यो ज्ञाश्रवणादिभ्य इत्येतेभ्यो धातुभ्यः आत्मनेपदविधानात्कथं जिज्ञासेदिति विधिलिङ् परस्मैपदप्रयोग इत्यत आह ॥ जिज्ञासेतेति ॥ चंद्रादयस्तु मन्यते सर्वस्मादुभयं पदमिति वचनादिति भावः ॥ अन्यत्रापीति ॥ एकं च तत्वतो ज्ञातमित्यत्रोक्तमेव प्रमेयमुक्तमित्यर्थः ॥ तदुदाहरति ॥ एको भाव इति ॥ एको भावः ॥ पदार्थो येन पुंसा ॥ तत्वतः ॥ पल्परिमाणयत्ताविशेषवत्वेन कालदिगदृष्टरूपनिमित्तत्वेनादृष्टाश्रयतादृशपुरुषविशेषप्रयोजनाय निमित्तत्वादिना रूपेण दृष्टस्तेनसर्वे भावास्तत्वतो दृष्टा इत्यर्थः ॥

इतरवाक्यान्यधिकारिविशेषापेक्षया सावकाशानीति कुतो नान्यगतिरित्यत आह ॥ नेति ॥ विशेषणात् ॥ पक्षांतरव्यवच्छेदात् ॥ इतोऽप्येव सर्वज्ञानमंगीकार्यमित्याह ॥ तत्वत इति ॥ आपततीत्यनेनार्थापत्तिमभिप्रैति ॥ एतमेवन्यायमन्यत्राप्यतिदिशति ॥ यत्रेति ॥ एवं भव

नान्यस्य कस्य चिदिति विशेषणात् ॥ तत्वत इति विशेषणाच्च सर्वं ज्ञानमापतति ॥ यत्रैवं भवति

॥तत्र तत्वत इति विशेषणेन विरोधः॥उक्तं च॥एकं च तत्वतो ज्ञातुं विना सर्वज्ञतां नरः॥

तिसर्वज्ञाने प्रमितेऽप्येकदेशज्ञानोक्तिर्भवति ॥ तत्वतो ज्ञानं कथं सार्वज्ञ्यमाक्षिपतीत्यत आह ॥ उक्तं चेति ॥ जिज्ञसेत् जिज्ञासेत ॥ अन्यत्रापि एको भावस्तत्वतो येन दृष्टः सर्वे भावास्तत्वतस्तेन दृष्टा इति ॥

॥ कृ० ॥ ॥ इतरवाक्यानीति ॥ वेदाद्युक्त तु सर्वेऽपीत्यादीनीत्यर्थः ॥ अधिकारिविशेषेति ॥ चतुर्मुखादीत्यर्थः ॥ नीलोत्पलमित्यादौ नैल्यादेरिव नान्यस्य कस्य चिदित्यस्य व्यावर्तकत्वाभावादाह ॥ पक्षांतरव्यवच्छेदादिति॥ननु ज्ञाश्रुस्मृदृशांसन इति सन्नंताज्ज्ञाधातोरात्मनेपदविधानाज्जिज्ञसेदिति कथमित्यत आह ॥जिज्ञासेतेति ॥ भाष्ये सार्वज्ञ्याभावे तत्वतो ज्ञानाभाव इति व्यतिरेकं प्रमाणमुक्तम् ॥ तत्वज्ञाने सति सार्वज्ञ्यमित्यन्वयेऽपि स्वयं प्रमाणमाह ॥ अन्यत्रापीति ॥

१ इत्यादिभ्य इत्यर्थः

॥श्री०॥ननु सर्ववेदाद्युक्तज्ञानपूर्वकोपास्तौ सर्वेषामधिकाराभावादपरोक्षज्ञानाभाव एव प्रसज्यत इत्यतो यथाशक्त्यखिलान् वेदान् विज्ञायोपासनं भवेत्॥तत्राखिलस्य विज्ञप्तिः सम्यक् ब्रह्मण एव हि॥तदन्येषां यथायोगमखिलज्ञप्तिरिष्यत इत्यनुव्याख्यानं मनसि निधायाह॥सर्वत्रेति॥९ ॥अधिकानुवादादिति॥जन्मकर्मज्ञानापेक्षयाऽप्यधिकस्य मन्मया मामुपाश्रिता इति विशेषणस्याभिकस्योक्तत्वाज्जन्मकर्म चेति श्लोके जन्मकर्मपरिज्ञानमात्रमेव मोक्षसाधनत्वेन न विवक्षितमित्यर्थः ॥उक्तज्ञानेनेति॥महाकौर्मादिप्रमाणाभिप्रेतयथाशक्तिसर्वपरिज्ञानेनेत्यर्थः ॥ सर्वेषां भगवान्प्रचुर इति ॥ भगवतः सर्वोत्तमत्वरूपं प्राचुर्यं सर्वान् प्रत्यप्यविशिष्टमित्यर्थः ॥ सर्वत्रेत्यस्यार्थमाह ॥ सर्वेष्विति ॥ वाक्यस्य फलितमाह ॥ मदायत्तमिति ॥ १० अभेदेन भजनप्रतीतिनिरासाय अन्यदेवतादिरूपेण भगवद्भजनं विवृणोति ॥विष्णुमिति ॥ सामान्यतः ॥ रागादिसाधारण्येन ॥ अन्यदेवतादिरूपेण मद्भजनमात्रेण मुक्तिर्न भवतीत्युक्तं कुतो न भवतीत्याशंकायामाह ॥ उपपत्तिमिति ॥ ॥ कु० ॥ ननु सार्वज्ञ्यस्यावश्यकत्वे मनुष्याणा

सर्वत्र सार्वज्ञं यथाशक्ति विवक्षितमित्यवधेयम् ॥ ९ ॥ किं चोत्तरश्लोकेऽधिकानुवादान्नात्र तावन्मात्रं विवक्षितमिति भावेन तात्पर्यमाह ॥ संति चेति ॥ तथोक्तज्ञानेन आह ॥ श्रद्धोत्पादनार्थमितिशेषः ॥ मन्मया मदात्मका इति प्रतीतिनिरासार्थमाह ॥ मन्मया इति ॥ सर्वेषां भगवान्प्रचुरः को विशेषो ज्ञानिनामित्यत आह ॥ सर्वत्रेति ॥ सर्वेषु पदार्थेषु किंचित्सत्तादिकम् ॥

न समर्थो महेंद्रोऽपि तस्मात्सर्वत्र जिज्ञसेदिति स्कांदे ॥ ९ ॥ संतिच तथा मुक्ता इत्याह ॥ वीतरागेति

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ॥बहवो ज्ञानतपसा पूता मद्भावमागताः॥१०॥

॥मन्मयाःमत्प्रचुराः ॥सर्वत्र मां विना न किंचित्पश्यंतीत्यर्थः ॥ १०॥ न च मद्भजनमात्रेण मुक्तिर्भवत्यन्यदेवतारूपेण॥

मदायत्तमेव सर्वं पश्यंतीत्यर्थः ॥ १०॥ ये यथेतिवाक्यं न प्रकृते न साक्षात् ॥ संगतम्॥ अतस्तत्संगमयितुं मध्ये शंकांतरं निराकरोति ॥ ॥न चेति ॥ मामुपासिता मद्भावमागता इत्युक्त्याऽन्यदेवतादिरूपेण मद्भजनमात्रेण त्रैवियानामपि मुक्तिर्भवतीति नाशंकनीयमित्यर्थः॥विष्णुंसामान्यतः सर्वोत्तमं ज्ञात्वाऽन्यदेवताःपितॄंश्चेष्ट्वाऽते विष्णौ समर्पणमन्यदेवतादिरूपेण भगवद्भजनम् ॥ उपपत्तिं ॥

मुपासनाभावप्रसंगः ॥ तेषां सार्वत्रिकगुणोपसंहाराभावादित्यत आह ॥ सर्वत्र सार्वज्ञ्यमिति ॥ ९ ॥ अधिकानुवादादिति ॥ मन्मया इत्यादिनेति शेषः ॥ १० ॥ त्रैविद्यानामिति ॥ त्रिविधा विद्यात्रिविद्या तामधीयते विदंति वा त्रैविद्याः तदधीते तद्वेदेत्यण् ॥ उक्थादित्वेऽप्यंगक्षत्रधर्मत्रिपूर्वाद्विद्यांतान्नेति ठको निषेधात् ॥ तेषां वेदत्रयपाठार्थविदामित्यर्थः ॥ ननु भजनं नाम माहात्म्यज्ञानपूर्वःस्नेहः ॥ तथान्यदेवतादिरूपेणेत्यस्य तदैक्यानुसंधानेनेत्यर्थोक्तौ परस्परव्याघात इत्यत आह ॥ विष्णुमिति ॥

॥ श्री० ॥ चातुर्वर्ण्यं मया सृष्टमित्यत्र तस्मात्त्वपितरं मां परित्यज्यान्यदेवताः यजंतः कथं महाफलभाजो भवेयुरित्युपपत्तिं वक्ष्यामीति भगवतः कृष्णस्याभिप्राय इत्यर्थः ॥ केचित्तु येऽप्यन्यदेवताभक्ता इति हि वक्ष्यतीत्यनेनोपपत्तिं तूत्तरत्र वक्ष्यामीति भगवतो भाष्यकारस्याभिप्राय इत्यर्थ इत्यप्याहुः ॥ सामान्यतो विष्णुमर्वोत्तमं ज्ञात्वाऽन्यदेवादीनिष्ट्वांते विष्णौ समर्पयंतस्त्रैविद्याः ॥ ददद्भगवान्विषम.स्यादित्यन्वयः ॥

तूत्तरत्र वक्ष्यामीति भगवतोऽभिप्रायः ॥ तत्किं त्रैविद्यानां त्वद्भजनंनिरर्थकमेवेत्यत आह ॥ तथापीति॥ यद्यपि न मुक्तिं ददामि तथापि तदभिप्रेतं स्वर्गादिकं ददामीति शेषः ॥ एवं तर्हि ज्ञानिभ्योमुक्तिं त्रैविद्येभ्योऽल्पं फलं ददद्विषमो भगवान्स्यादित्याशंकानिरासार्थत्वेनो

तथापि सर्वेषामानुरूप्येण फलं ददामीत्याह ॥ ये यथेति

॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ॥

त्तरवाक्यं संगमयन्नाह ॥ सर्वेषामिति ॥ ॥ कृ० ॥ देवापित्रादिषु भोक्ता सर्वकर्मकर्ता च विष्णुरेवेत्यनुसंधानव्यावृत्त्यै सामान्यत इत्युक्तम् ॥उत्तरत्रेति॥ चातुर्वर्ण्यं मयासृष्टमित्यत्र ॥ तस्मात्त्वपितरंमां परित्यज्यान्यदेवता यजंतः कथं महाफलभाजो भवेयुरित्युपपत्तिं वक्ष्यामीति कृष्णस्याभिप्राय इत्यर्थः ॥ यद्वा सेवावैलक्षण्य रूपामुपपत्तिं ये यथेत्युत्तर वक्ष्यामीति भगवतोऽभिप्राय इत्यर्थः ॥ नमुक्तिं ददामीति ॥ न चात्र विज्ञानेनात्मयोग्येन निजरूपे व्यवस्थितिरिति नित्योपलब्धिसूत्रभाष्यविरोधः ॥ तत्र नित्यसंसारिणां मिश्रज्ञानेन स्वरूपाविर्भावस्य स्फुटप्रतीतेः स्वरूपाविर्भावस्यैवमुक्तित्वादिति वाच्यम् ॥ रूपमनुरूपं योग्यमित्येवंनिजरूपपदेन स्वयोग्यफलस्य विवक्षितत्वात् ॥ सामान्यैर्यं त्वविज्ञेयाविशेषा मम गोचराः ॥ देवादीनां तु तज्ज्ञानं विज्ञानामितिकीर्तितमिति प्रमाणबलेन विज्ञानपदस्य विशेषज्ञानार्थत्वात् नित्यसंसारिणां च सुखदुःखात्मकसंसारफलस्य मिश्रज्ञानजन्यत्वात् ॥ यथोक्तम् ॥ मानुषामिश्रमतयो विमिश्रगतयोऽपि चेति ॥ सुधायां च सुखदुःखात्मक संसारफला इति व्याख्यातम् ॥ यदि च तेषां स्वरूपाविर्भाव एवतदा वक्तव्यम् ॥ समुक्तिपदवाच्यो न वा ॥ नाद्यः ॥ चेतनस्य द्वयंमार्ग्यं संसारो मुक्तिरेव च ॥ संसारस्त्रिविधस्तत्र स्वर्गो मध्यमधस्तथा ॥ मुक्तिश्च द्विविधा तत्र सुखं नित्यं तथापरम्॥ नित्यदुःखमिति शेषमित्याद्यनुव्याख्याने मुक्तिद्वित्वोक्तिविरोधात ॥न च द्वित्वोक्तिरुपलक्षणम् ॥ मुक्तेः पृथक्केन संसारेऽत्रयोगात्॥नांत्यः॥मुक्तिर्हित्वा ऽन्यथारूपं स्वरूपेण व्यवस्थितिरित्युक्तमुक्तिलक्षणस्यातिव्याप्तिप्रसंगात् ॥किं च तेषां स्वरूपाविर्भावपक्षे मध्यमा मानुषा ये तु सृतियोग्याः सदैव हि ॥ विद्विन्निरयभगोचरान्नित्यबद्धानित्यादिविरोधः॥न च सु—

१ मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिरित्युक्तेः ॥

॥ श्री० ॥ ननु कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रेण दानकर्मणा सर्वेषामभिप्रेतत्वात्तत्रसंप्रदानसंज्ञायां संप्रदाने चतुर्थीति चतुर्थी भाव्यं तथा च सर्वेभ्य इति स्यादित्यत आह ॥ चतुर्थ्यर्थे इति ॥ ननु वृषसेचने इत्यस्य धातोः सत्यापपाशादिषु चुरादिषु चाभावात ॥ कथं सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिजित्यनेन स्वार्थे णिजित्यत आह॥ बहुलमेतादिति ॥ सत्यापपाशादिभ्यश्च यत्स्वार्थे णिच्प्रत्ययप्रदर्शनं तद्बहुलप्रयोगमनुसृत्योक्तम ॥ प्रयोगानुसारेणैतदन्यत्रापि द्रष्टव्यमित्यर्थः ॥

अनुरूपेण सेवानुसारेण सर्वेषां ज्ञानिनां त्रैविद्यानां चेति चतुर्थ्यर्थे षष्ठी॥तथैव भजामीत्येतदन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ सेवयामीति॥ बहुलमेतन्निदर्शनमिति वचनात्स्वार्थे णिच् ॥ मम वर्त्मेत्यस्य संगत्यप्रतीतेस्तामाह ॥ कथमिति ॥ यः फलतारतम्यहेतुत्वं ॥ ज्ञानिभ्यस्त्रैवि

॥ सेवयामि ॥ फलदानेन ॥ न तु गुणभावेन ॥ कथमयं विशेष इत्यत आह ॥ मम वर्त्मेति ॥

॥ मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

॥ अन्यदेवता यजंतोऽपि ममवर्त्मैवानुवर्तंते ॥

द्यानांसेवायांविशेषःकथं किंप्रकार इत्यर्थः ॥ कथमनेनतच्छंकापरिहार इत्यतो व्याचष्टे॥ अन्येति॥नकेवलंऽज्ञानिनः किंत्वन्यदेवता यजंतोऽपि त्रैविद्याइति यावत् ॥

॥कृ०॥तद्गुणत्वनुभोगो वेधादिशब्दार्थः॥स च लिंगभंगात्प्राग्वैषम्येणपश्चात् साम्येनेति नविशेष इति वाच्यम॥भुक्तेर्बंधो हि बंधः॥भवबंधस्तु संसारो मुक्तिस्तस्मा विमोचनमिति भाष्यतद्टीकस्मृतिविरोधात ॥ शास्त्र शास्त्रीयार्थस्यवैयर्थ्यप्रसंगात ॥ एतेन मध्यममानुषाणां नित्यमानुषादीनाम् तल्लब्धिर्द्वै स्वाद्यालब्धिश्च सर्वेत स्यादिति तत्वप्रकाशिकाविरोधोऽप्यपहासितः ॥ तस्या आवरणसद्भाव एव तात्पर्यात ॥ अतोऽस्त्येवावरणमिति गुरुसंहारात ॥ मध्यमानामप्यावरणनिवृत्तौ तात्पर्यं तु भगवत्प्रसादेन तन्निवृत्तिश्चेत्युत्तरवाक्यविरोधात ॥ मध्यमानां भगवत्प्रसादाभावादिति दिक् ॥ ननु ददामीति दानक्रियायोगात्सर्वेभ्य इति चतुर्थी भाव्यम ॥ कर्मणा यमभिप्रैति स संप्रदानमिति सदाने सति चतुर्थीसंप्रदान इति चतुर्थीस्मरणादित्यत आह ॥ ॥ चतुर्थ्यर्थे इति ॥चतुर्थ्यर्थे बहुलंछंदसीति सूत्रादिति भावः ॥ बहुलमेतादिति ॥ चुरादिभ्यः स्वार्थेणिच्प्रदर्शनं बहुलं स्यात ॥ नवगणीपठितेभ्योऽपिधातुभ्यः क्वचित्स्यादित्यर्थः ॥ ज्ञानिनामपीश्वरपरिवारत्वादिनाऽन्यदेवतायाजित्वाच्चत्रगमायाह ॥ त्रैविद्या इति यावदिति ॥

॥ श्री० ॥ **एतद्द्वयमिति** ॥ मत्प्रेरणयैव कर्मकरणं सर्वथा मदुक्तव्ययज्ञादिकर्तृत्वं चेति द्वयमित्यर्थः ॥ ननु किंतद्भगवद्धर्मानुवर्तनं यत्श्लोकार्थत्वेन विवक्षितमित्याकांक्षायाः सर्वकर्म कर्तृत्वं भोक्तृत्वं चेति प्रथमयैव निवृत्तेः प्रथमाविभक्तिरेव प्रयोक्तव्या पंचमीप्रयोगस्तु व्यर्थ इत्यत आह ॥ **तथा व्यवहार इति** ॥ अन्येऽस्मिन् यज्ञानां त्रैविद्यानां मम वर्त्मानुवर्ति नव्यवहारे मम सर्वकर्मकर्तृत्वभोक्तृत्वयोर्निमित्तत्वात्पंचम्युपपद्यत इत्यर्थः ॥ तथा च मम सर्वकर्मकर्तृत्वाद्भोक्तृत्वाच्च मम वर्त्मानुवर्तंत इत्युच्यत इति शेषपूरणेनापि भाष्यं व्याख्यातं भवतीति द्रष्टव्यम् ॥ ॥ कृ० ॥ ॥ ननत्तरमूले न हेतुवचनं क्षिप्रं हीति तस्य वक्ष्यमाणत्वात् ॥ मम वर्त्मानुवर्तंत इत्युक्ते मदुक्तव्ययज्ञादिकमनुतिष्ठंतीत्यर्थे मम सर्वयज्ञादिभोक्तृत्वादिति हेतुकरणं साध्याविशिष्टत्वाच्चेत्यतोऽन्यथामूलमवतारयति ॥ किं तदिति ॥ **एतद्द्वयमिति** ॥ मम सर्वकर्मकर्तृत्वं भोक्तृत्वं चेत्यर्थः ॥ न च भगवन्निष्ठधर्मद्वयस्य त्रैविद्यनिष्ठानुवर्तनत्वं कथमिति वाच्यम् ॥ कर्मण्यत्र वर्त्मत्वमित्यनुवर्तनशब्दस्य कर्माणि मदुक्तत्वेनानुतिष्ठन्तीत्यभावादशेषात् ॥ एवमनुवर्तितत्प्रकारागतानुवर्तनशब्दोऽपि व्याख्येयः ॥ नचोभयत्रानुवर्तनशब्दवैरूप्यम् ॥ प्रश्ने किं तत् त्वद्धर्मे यत्सर्वेषामनुवर्तनीयमिति अपगतिर्व्यवहारगोचरत्वात् ॥ प्रत्युत्तरे सर्व एवेति

किं तत्सर्वेषांत्वद्धर्मानुवर्तनमित्यत आह॥सर्वेति॥भोक्तृत्वाद्धर्मादीनाम्॥एतत् द्वयमेव भगवद्धर्मानुवर्तनम् ॥ तथा व्यवहारे निमित्तत्वात्पंचमी॥

॥ सर्वकर्मकर्तृत्वात् ॥ भोक्तृत्वाच्च मम ॥

त्प्रश्नांशानुवादार्थत्वादिति ॥ ननु सर्वानुवर्तनीयं भगवद्धर्मं किमित्याकांक्षायाः सर्वकर्मकर्तृत्वं भोक्तृत्वं चेति प्रथमयैव निवृत्तेः पंचमीप्रयोगोऽयुक्त इत्यत आह ॥ **तथा व्यवहार इति** ॥ धर्मद्वयविशेष्यकभगवद्धर्मत्वप्रकारकव्यवहार इत्यर्थः ॥ अयमभिसंधिः सर्वकर्तृत्वभोक्तृत्वाभ्यां तयोर्वा केऽपि कस्मान्निमित्तात् धर्मद्वयं भगवद्धर्मं युक्त तथैव लोकवेदव्यवहारादिति गम्यते ॥ कस्मात्त्वं नद्याइति प्रश्नात्तस्योरागत इत्यादिवत्॥गम्यमानाऽपि क्रिया कारकविभक्तौ निमित्तम्॥तथैवापादाने पंचमीतिसूत्रे वृत्त्यादावुक्तत्वात् तथा च पुत्रात्प्रमोदो जायत इत्यत्र यथा प्रमोदजनिं प्रति पुत्रस्य निमित्तत्वाज्जनिकर्तुः प्रकृतिरिति सूत्रेणापादानसंज्ञायां पंचमी तथाभगवद्धर्मत्वव्यवहारस्य गम्यमानेति॥न च व्यवहारं प्रति न व्याहर्तव्य निमित्तं किंतु तज्ज्ञानमेवेति वाच्यम् पुत्रज्ञानस्य प्रमोदनिमित्तत्वेऽपि पुत्रस्य तदभावादिति साम्यात् ॥ ज्ञानद्वारा वा ज्ञानगतस्य ज्ञेये आरोपाद्वा पुत्रस्यापि निमित्तत्वव्यवहार इति चेत् मम प्रकृतेऽपीति दिक् ॥

१ भोक्ता च प्रभुरेवेत्युक्तावपि अत्र पूर्वं प्रेरकत्वोक्तिस्तु आदौ प्रेरणं पश्चादनुज्ञानं तदनंतरंहिभोक्तृत्वमितिस्थितिक्रमं सूचयितुमिति ज्ञेयम् ॥

॥ श्री० ॥ ननु त्रैविद्याश्चेत्तत्वमार्गानुवर्तते तर्हि फलतारतम्यं न स्यादित्यत आह ॥ इदमुक्तं भवतीति ॥ सर्वकर्मैककर्तृत्वादित्यस्याभिप्रायकथनम् ॥ प्रेरकश्चेति ॥ सिद्धिम् ॥ फलम् ॥ ॥श्लोकद्वयमिति॥ येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकं ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्वेनातश्च्यवंति त इतिश्लोकद्वयमुपात्तमित्यर्थः ॥ तत्रश्लोकद्वयेऽप्येषोऽर्थ. ॥ अन्यदेवता यजंतोऽपीत्यादिनोक्तः ॥ उत्तरमाह ॥ भगवत इति ॥ एवम् सर्वनामत्वेन ॥ विश्वकर्मसूक्तत्वादस्येति भावः ॥ भाष्ये लिंगादिति॥पद्मनाभत्वलिंगादित्यर्थः॥अनेन॥भगवत इंद्रादिसर्वदेवनामत्वकथनेन॥बाधकम्॥इंद्रादिनामवद्भिर्मंत्रैर्दत्तं हविरादिकं भगवान् कथं भुङ्क्ते इत्येवं रूपम्॥११॥

इदमुक्तं भवति ॥ अहमेव सर्वयज्ञानां भोक्ता च प्रेरकश्च ॥ तदेतज्ज्ञात्वा भागवता निष्कामा मामेव यजंते ॥ त्रैविद्यास्त्वेतत्तत्वतोऽजानानाः कर्मणां सिद्धिं कांक्षंतोऽन्यदेवता यजंते ॥ एवं सेवाविशेषायुक्तं फलतारतम्यमिति॥कुत इदं भगवतोऽभिप्रेतमित्यत आह॥येऽपीति॥ ॥ अनेन श्लोकद्वयमुपात्तम् ॥ तत्र च स्पष्टमेषोऽर्थः प्रतीयते ॥ नन्विंद्रादिनामवद्भिर्मंत्रैः दत्तंहविरादिकं कथं भगवान् भुङ्क्ते ॥भगवतः

येऽप्यन्यदेवता भक्ता इति वक्ष्यति ॥ यो देवानां नामधा एक एवेति हि श्रुतिः ॥भगवानेव च तत्राभिधीयते॥ अजस्यनाभावध्येकमर्पितमिति तल्लिंगात्॥ ११ ॥

सर्वनामत्वेन मंत्राणां तत्परत्वादिति भावेनाह ॥ य इति ॥ ननु विश्वकर्मैवमुच्यत इत्यत आह ॥ भगवानेवेति ॥ तत्र चेति संबंधः॥ अनेनभगवतः सर्वयज्ञादिभोक्तृत्वे बाधकं परिहृतम् ॥ ११ ॥

॥ कृ० ॥ ननु फलतारतम्यहेतुः सेवाविशेषः किंप्रकार इति शंकापरिहारः कथमनेनापीत्यत आह॥ इदमुक्तं भवतीति ॥ येऽपीति श्लोके त्रैविद्यास्त्वेतत्तत्वतोऽजानाना इत्यादि प्रमेयानुपलंभादाह ॥ श्लोकद्वयमिति ॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयाऽन्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥ अहंहि सर्वयज्ञानां भोक्ताच प्रभुरेव च ॥ न तु मामभिजानंति तत्वेनातश्च्यवंति त इतिश्लोकद्वयमित्यर्थः ॥ एषोऽर्थःसेवाविशेषः ॥ उत्तरमाह ॥ भगवतइति ॥ बाधकमिति॥नन्विंद्रादिनामवद्भिरित्यादिना शंकितमित्यर्थः ॥ ११ ॥

१ अत्र भाष्ये सर्वकर्मैककर्तृत्वस्य पूर्वं मुक्तावपी अत्र प्रेरकत्वस्य पश्चादुक्तिर्गीतायां भोक्ता चप्रभुरेव चेति प्रभुशब्देनप्रेरकत्वस्यानंतरमुक्तेर्ज्ञेया ॥

॥ श्री० ॥ ननु भगवतः सर्वकर्मकर्तृत्वसर्वयज्ञभोक्तृत्वयोरुभयोः प्रकृतत्वात्तत्र सर्वकर्तृत्वं भगवतः कुतः प्रमाणाज्ज्ञायत इत्यपृष्ट्वा सर्वभोक्तृत्व एव प्रमाणप्रश्नः कुत इत्यतो भगवतः सर्वकर्तृत्वं सिद्धमस्तीति तत्र न प्रमाणं पृच्छ्यत इत्याशयेन कथं तत्सिद्धमस्तीत्यतस्तदुपपादयति ॥ **सर्वकर्तृत्वमिति** ॥ सिद्धंभगवत इति शेषः॥ **नान्यथेत्यर्थ इति** ॥ तथा च भगवतः सर्वयज्ञादिभोक्तृत्वे फलप्राप्त्यन्यथानुपपत्तिरेव प्रमाणं क्षिप्रं हीत्यनेनोक्तमित्याशयः॥ अर्थापत्तेरन्यथाप्युपपत्तिमाशंकते ॥ **इंद्रादिभ्योऽपीति** ॥ **उपक्षीणेति**॥अर्थापत्तिफलं सर्वयज्ञभोक्तृत्वमिंद्रादावनुपक्षीणमिति भावः॥ प्रमाणम ॥ छंदोगोपनिषदम ॥**तस्मादितीति** ॥ तद्य इमे वीणायां गायंति एतं ते गायंति तस्मात्ते धनसनय इति श्रुतेरयमर्थः ॥ य इमे गायका वीणायां तद्राजादिकमुद्दिश्य गायंति ते एतंनदंतर्गतं भगवंतमुद्दिश्यैव गायंति कुतः यस्मात्ते धनसनयो धनलाभवंतस्तावद्भवंति षण् लाभ ति धातोः फलप्रदो वासुदेवोऽखिलस्येति वचनात् ॥तथा च भगवतोयज्ञभोक्तृत्वाभावे भगवतः फलप्राप्त्यनुपपत्तेरिति ॥ १२॥

साधकं तु प्रमाणंपृच्छति ॥ कुत इति ॥ मम वर्त्मानुवर्तंत इति यत्सर्वयज्ञादिभोक्तृत्वमुक्तम् ॥ तत्कुतःप्रमाणाज्ज्ञायत इत्यर्थः ॥ सर्वकर्तृत्वं तु जीवानामस्वातंत्र्यदर्शनात्सिद्धम्॥इत्यत आहेति शेषः हीत्यतःपरमितिशब्दश्च॥किमनेन प्रमाणमुक्तमित्यत आह॥अतएव हीति॥ कर्मजा सिद्धिः फलप्राप्तिस्तावत् क्षिप्रं प्रत्यक्षोपलभ्याऽस्ति ॥सा चात एव कर्मणां भगवताभुक्तत्वादेवहि युज्यते ॥ नान्यथेत्यर्थः ॥ इंद्रा

कुतो मम वर्त्मानुवर्तंते क्षिप्रं हि अतएवहि फलप्राप्तिः ॥ तस्मात्ते धनसनय इति श्रुतिः ॥ १२॥

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः ॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥१२॥

दिभ्योऽपिफलप्राप्त्युपपत्तेरुपक्षीणार्थापत्तिरित्यतश्चाह ॥ अत एव हीति ॥ भगवतएव ॥ अत्र हीति सूचितं प्रमाणमाह ॥ तस्मादिति॥ धनसनयोधनलाभवंतः ॥ १२ ॥

॥ कृ० ॥ सर्वयज्ञादिभोक्तृत्ववत्सर्वकर्तृत्वे कुतो न प्रमाणप्रश्न इत्यत आह ॥ सर्वकर्तृत्वं त्विति ॥ उपक्षीणेति ॥ अन्यथोपपन्नेत्यर्थः ॥ १२ ॥

॥ श्री० ॥ ननु गुणवचनब्राह्मणादिभ्यः कर्मणिचेति सूत्रे चतुर्वर्णादिभ्यः स्वार्थे उपसंख्यानमिति वार्तिकेन चतुर्वर्णादिभ्यः स्वार्थे ष्यञ्प्रत्ययविधानाच्चतुर्वर्णा एव चातुर्वर्ण्यमितिवक्तव्यं चतुर्वर्ण समुदाय इति कथं ष्यञ्प्रत्ययः समुदायार्थ आनीयत इत्यत आह ॥ **विचित्राहीति** ॥ ष्यञ्प्रत्ययस्तु तद्धितप्रत्यय एवेति द्रष्टव्यम् ॥ **अतिरिक्तार्थेति** ॥ स्वार्थव्यतिरिक्तसमुदायरूपार्थेत्यर्थः ॥ तथा च चतुर्वर्णशब्दात्समुदायार्थे ष्य०प्रत्यये ञित्वादादिवृद्धौ चातुर्वर्ण्यमिति भवतीति द्रष्टव्यम् ॥ तेषु चतुर्षु वर्णेषु राजसास्तु नरास्तत्र विप्रा राजससात्त्विका इत्यादितात्पर्योदाहृतप्रमाणानुरोधात्तथा च राजसस्थसात्त्विकेष्वेव शुद्धसात्त्विकाः किंचिद्रजोयुक्तसात्त्विकाःसमरजोयुक्तसात्त्विकाः सत्वात् किंचिदूनतमोयुक्तसात्त्विका इति वर्णभेद इति गीतातात्पर्ये अष्टादशाध्यायगताचार्यवाक्यं मनसि कृत्वाऽह ॥ **राजसस्थेति** ॥ भाष्ये सात्त्विको ब्राह्मण इत्यत्र रजआद्यमिश्रशुद्धसात्त्विको ब्राह्मण इत्यवगंतव्यम् ॥ **निर्देशेति** ॥ ॥ सात्त्विकराजस इतिभाष्ये सत्वस्य प्रथमं निर्देशादित्यर्थः ॥ **सत्वमधिकमिति** ॥सात्त्विकाः स्वल्परजसइति प्रमाणादिति भावः ॥

चातुर्वर्ण्यमित्यस्य संगतिं सूचयन् तात्पर्यमाह॥ अहमेव हीति ॥ यस्मादहमेव चातुर्वर्ण्यस्य कर्ता त्रिविधाश्च तदंतर्भूताः तस्मात्स्वपितरं मां परित्यज्यान्यदेवता यजंतः कथं महाफलभाजो भवेयुरित्याहेत्यर्थः ॥ विचित्रा तद्धितगतिरिति वचनादतिरिक्तार्थसंभवे चतुर्वर्णादिभ्यः

अहमेव हि कर्तेत्याह ॥ चातुर्वर्ण्यमिति ॥ चतुर्वर्णसमुदायः ॥ सात्त्विको ब्राह्मणः ॥ सात्त्विकराजसः

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः॥ तस्यकर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३

॥ क्षत्रियः॥ राजसतामसो वैश्यः ॥ तामसः शूद्र इति गुणविभागः ॥

स्वार्थ उपसंख्यानमिति नादरणीयमिति भावेनाह ॥ चतुर्वर्णेति॥ वर्णाश्चत्वारो गुणास्त्रयः तत्कथं तेषु गुणविभाग इत्यत आह॥ सात्त्विक इति ॥ राजसस्थसात्त्विकेष्वेवायं विभाग इति ज्ञातव्यम् ॥ निर्देशप्राथम्यात्क्षत्रिये रजसः सत्वमधिकम् ॥

॥ कृ० ॥ राजसास्तु नरास्तत्र विप्रा राजससात्त्विका इत्यादिप्रमाणानुसारेणाह ॥ **राजससात्त्विकेष्विति** ॥ जीवाःत्रिविधाः ॥ सात्त्विकाः॥ राजसा ह ॥ तामसाश्च ॥ राजसा अपि त्रिविधाः ॥ सात्त्विकादिभेदात् ॥ तत्र ये राजससात्त्विकाः तेष्वित्यर्थः ॥ एवकारेण राजससात्त्विकेभ्योऽन्यत्रोक्तविभागाभावं सूचयति ॥

॥श्री०॥ **तत एवेति** ॥ राजसतामस इति भाष्ये रजसः प्रथमं निर्देशादित्यर्थः ॥ **तच्चेति** ॥ तमसोऽधिकं रजश्चेत्यर्थः ॥ **सममत्वेति** ॥ समसत्त्वरजसो वैश्या इति वचनादिति भावः ॥
अतिस्वल्पसत्त्वाधिक्येन तामस इति प्रमाणानुसारेण तामसः शूद्र इति भाष्यं व्याचष्टे ॥ **रजोऽपेक्षयेति** ॥ **अधिकमिति** ॥ किंचिदधिकमित्यर्थः ॥ मुक्तियोग्यमनुष्यवर्णविभागोऽयमि
त्यवगंतव्यम ॥ यथोक्तं ये तु भागवता वर्णास्तेषां भेदोऽयमीरित इति ॥ उपलक्षणं चैतत त्रैविद्यमाना विष्णोर्ये सर्वाधिक्यं समंशयाः ॥ अन्याधिक्यं न मन्यंते श्रीशाद्राजसराजसा इत्या
दि प्रमाणानुसारेण राजसराजसादयोऽपि ग्राह्याः ॥ अन्यथा यस्माच्चातुर्वर्ण्यस्याहमेव कर्त्ता त्रैविद्याश्च तदंतर्भूता इत्याद्यसंगतं स्यादिति मंतव्यम् ॥ **विश्वकर्माऽपीति** ॥ विश्वकर्त्ताऽपी
त्यर्थः ॥ **अभिनिवेशरहित इति** ॥ अतोऽकर्त्तेत्युच्यत इति भावः ॥ क्रु० ॥ तथा च तात्पर्यनिर्णये स्पष्टम् ॥ **समसत्त्वयुतामिति** ॥ सत्त्वरजसा वैश्या इत्युक्तेरिति भावः ॥

तत एव वैश्ये तमसो रजस्तच्चसमसत्त्वयुतं रजोऽपेक्षयातमोऽधिकं शूद्र इत्यसौ तामसः ॥ सत्त्वं तु तमसोऽप्यधिकम् ॥ कर्मविभागः की
दृश इत्यत आह ॥ कर्मेति ॥ यदि चातुर्वर्ण्यं त्वया सृष्टं तर्हिकर्तृत्वात जीववत्तवापि कर्मलेपः प्रसज्यत इत्यतः कर्मलेपाभावं वक्तुं

॥ कर्मविभागस्तु शमो दम इत्यादिना वक्ष्यते ॥ क्रियायां वैलक्षण्यात्कर्ताऽप्यकर्ता तथा हि
॥ श्रुतिः ॥विश्वकर्मा विमना इत्यादि ॥

हेतुस्तावदुच्यते तस्येति तदेतव्याहतमित्यत आह ॥ क्रियायामिति ॥ कथं वैलक्षण्यमित्यतः श्रुत्यैव दर्शयति ॥ तथा हीति ॥ विश्वकर्मा
ऽपि विमनास्तत्राभिनिवेशरहित इत्यर्थः ॥

मुक्तियोग्यमनुष्यवर्णविभागोऽयम ॥ तदुक्तम ॥ ये तु भागवता वर्णास्तेषां भेदोऽयमीरित इति ॥ उपलक्षणंचैतत् ॥ ये नित्यत्रैविद्या राजसराजसाः तेऽपि ग्राह्याः ॥ तेनचातुर्व
र्ण्यस्याहमेवकर्ता त्रैविद्याश्चतदंतर्भूता इति ॥ पूर्ववाक्याविरोध इति भावबोधकृतः ॥ अन्ये तु राजसमात्विकेष्विवराजसराजसेषु त्रैविद्येष्वपि वर्णविभागोऽस्ति ॥ इयांस्तु विशेषः ॥
भाष्योक्तः स्वाभाविकवर्णविभागः अयं त्वौपाधिकवर्णविभागः ॥ योनिभेदकृतत्वात् ॥ यथोक्तम् ॥ योनिभेदकृतोभेदो ज्ञेय औपाधिकस्त्वयमिति ॥ तथा च चातुर्वर्ण्यस्याहमेव
कर्तेत्यत्र स्वाभाविकौपाधिकभेदेन द्विविधमपिचातुर्वर्ण्यग्राह्यम ॥ तत्र चत्रैविद्यानामंतर्भावात् ॥ त्रैविद्याश्चेत्यनेनाविरोधः ॥ योनिभेदकृतत्वं च ब्राह्मणयोनिजो ब्राह्मण इत्यादिरूपे
ण द्रष्टव्यमित्याहुः ॥ अभिनिवेशरहित इति ॥ येन तत्प्राप्तिपर्यंतं मनसो विक्षेपः सोऽभिनिवेश इत्यग्रे वक्ष्यते ॥

॥ श्री० ॥ ननुरिनीति ॥ अत्र [illegible] ॥ एवं च [illegible] नित्वाभावादिति वैलक्षण्यमुच्यत इति द्रष्टव्यम् ॥ क्रियाया [illegible] ॥ क्रियाभिनिवेश एव हि [illegible] ॥ १३ ॥ अस्मत्व्याख्यान इति [illegible] तृत्वव्याख्यान एवेत्यर्थः ॥ हेतुहेतुमद्भाव ॥ अकर्तृत्वकर्मलेपाभावयोर्हेतुसाध्यभाव इत्यर्थः ॥ तदेव प्रदर्शयति ॥ जीवानामिति ॥ [illegible] वनाहंकारिकं कर्तृकत्वं ग्राह्यम ॥ नास्तीति ॥ तत्राश्रयमकर्त्ता तथा न कर्मलेपभाग् इति भाव ॥ननु भगवतो [illegible] तथा च मिथ्याभूतकर्तृत्वेनैव कर्मालेप साध्यतामित्यत आह ॥मिथ्यात्वं त्विति समानामिति॥तथा च मिथ्याभूतकर्तृत्वं [illegible] निमित्तत्राह ॥ तेषामपीति किमाश्रय इति ॥ यदि चातुर्वर्ण्यं त्वया सृष्टं तर्हि कर्तृत्वात् जीववत्तवापि कर्मलेप प्रसज्येतेत्येवं जीवदृष्टांतमाश्रयीकृत्याक्षेप [illegible] स कर्तुं न शक्यते ॥ जीवानामपि कर्मलेपाभावप्रसक्तौ दृष्टांताभावादिति भाव ॥

प्रकारांतरेण वैलक्षण्यं पुराणेन दर्शयति ॥ ननुस्त्विति ॥ क्रियाया मिथ्यात्वात्कर्ताप्यकर्तेति परव्याख्यां प्रत्याख्याति ॥ साधितं चेति ॥ एतत्क्रियायाः सत्यत्वं पुरस्तात् द्वितीये ॥ १३ ॥ अपव्याख्यानस्य दूषणांतरं सूचयन् क्रियावैलक्षण्यकथनस्य का संगतिरित्यत उत्तरे

॥ तनुर्विद्याक्रियाकृतिरिति च ॥ साधितं चैतत्पुरस्तात् ॥१३ ॥ अत एव न मां कर्माणिलिंपंति

ण संगतिमाह ॥ अत एवेति ॥ एवशब्देनास्मव्याख्यान एवायंहेतुहेतुमद्भावो युज्यते न परव्याख्यान इति सूचयति॥ जीवानां कर्मलेपेऽभिनिवेशादिकं कारणं तस्यनास्तीति मिथ्यात्वं तु जीवक्रियायामपि समानामिति तेषामपिलेपाभावेकिमाश्रय आक्षेपः स्यात् ॥

॥कृ०॥द्वितीय इति॥अचलोयंसनातनइति गीताव्याख्यावसरेऽस्त्रान मायामयं सर्वमित्यनेनेति शेषः॥१३॥स्वव्याख्यानेहेतुहेतुमद्भावमुपपादयति॥जीवानामिति॥अभिनिवेशादिकमिति॥ ॥ आदिपदेन क्रियायाः प्राकृतत्वंग्राह्यम ॥ तनुर्विधेत्यनेनतद्विरोधिनः क्रियायाः स्वरूपत्वस्योक्तत्वादितिमंतव्यम ॥ अपव्याख्यानेहेतुहेतुमद्भावायोगमुपपादयति ॥ मिथ्यात्वंत्विति ॥ तथा च जीवेव्यभिचार इतिभावः ॥ इतिशब्दस्यसूचयतीत्यनेनान्वयः ॥एवं साधरणत्वशब्दस्वारसं दूषणमुक्त्वादोषांतरमप्याह ॥ तेषामपीति ॥ मिथ्यात्वंत्विति पूर्वोक्तमत्रापि हेतुत्वेन संबध्यते ॥ अयमर्थः ॥ चातुर्वर्ण्यसर्गादिकर्मकर्तृत्वात्तवापि लेपःस्यादिति परोक्तस्तस्य कर्तारमिति ॥गीतानिरूपयाऽक्षेपो न युक्तः ॥ क्रियामिथ्यात्वेन जीवानामपि लेपाभावादृष्टांतालाभे निराश्रयत्वादिति ॥ व्यावहारिकं लेपमाश्रित्य पूर्वंहेतुहेतुमद्भावायोग उक्तः ॥ परमार्थतोलेपाभावेन परमते आक्षेपानुपपत्तिरियमुद्भावितेति न कश्चिद्दोषः ॥

१विद्यारूपा या क्रिया तदुपो योऽकारः सा तनुरित्यर्थः ॥

॥ श्री० ॥ ननु परमार्थतो लेपाभावस्य जीवेश्वरयोः साम्येऽपि ईश्वरस्य मिथ्यात्वज्ञानेन लेपप्रतीतिर्नास्ति जीवस्य तु मिथ्यात्वज्ञानाभावेन लेपप्रतीतिर्भवति अतो जीववत्कर्मलेपप्रतीतिः स्यादित्येवं जीवदृष्टांताश्रयेणाक्षेपो युज्यत इत्याशंकते ॥ ज्ञानेनेति ॥ मिथ्यात्वज्ञानाभावभावाभ्यां लेपप्रतीत्यभावतत्प्रतीतिभावरूपो विशेषो युज्यत इत्यर्थः ॥ तस्येति ॥ एतादृशविशेषस्य प्रमाणेष्वश्रवणादित्यर्थः ॥ लेपेति ॥ मिथ्याभूतकर्तृत्वेन न मां कर्माणि लिंपंतीति भगवता स्वस्य लेपनिवारणं क्रियमाणं व्यर्थमित्यर्थः ॥ कुत इत्यत आह ॥ तस्यापीति ॥ लेपाभावस्यापीत्यर्थः ॥ त्वन्मते लेपवत् लेपाभावस्यापि मिथ्यात्वेनावश्यं ज्ञातव्यत्वान्मिथ्याभूतलेपाभावज्ञानेन ॥ कर्मभिर्न स बध्यत इति श्रूयमाणं फलकथनं न युज्यत इत्यर्थः ॥ तथाहि साकर्षणं सूत्रम् ॥ अर्हदनायोग्यामत्यान्यः नुपास्यान्यफलत्वविपर्ययाभ्यामिति॥ हेतुहेतुमतो ॥अकर्तृत्वलेपाभावयोः ॥ ननु आङ्पूर्वकस्य कांक्ष इच्छायामिति कांक्षधातोर्नित्यात्मनेपदित्वादात्मनेपदिनि लटःशानच्शानचाविति लटःशानचादेशे शकारचकारयोर्लोपे कांक्षआनेति जाते आनेमुक् आने परे अदंतांगस्य मुमागमः स्यादिति नित्वादंते मुमागमे जाते उगित्वस्य लोपे आकांक्षम आनेति जाते अट्कुप्वाङ्नुम्व्यवायेऽपि अट्कवर्गपवर्गआङ्नुमन्व्यवधाने. समस्तैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णत्वं स्यादिति सूत्रेण प्रकृते मकाराख्यपवर्गेण व्यवधा-

ज्ञानेन विशेष इति चेत् ॥ न तस्याश्रवणात् ॥लेपनिवारणं च व्यर्थम् तस्यापि मिथ्यात्वेन ज्ञातव्यत्वात् ॥ हेतुहेतुमतोरुक्तत्वात् न मे क

॥इतश्च न लिंपंतीत्याह ॥ न मे कर्मफले स्पृहेति ॥ इच्छामात्रं त्वस्ति ॥ न तु तत्राभिनिवेशः ॥

न मां कर्माणि लिंपंति न मे कर्मफलेस्पृहा॥इति मांयोऽभिजानाति कर्मभिर्न सबध्यते॥ १४ ॥

र्मेतिकिमर्थमित्यत आह ॥ ॥ इतश्चेति॥ नन्वात्मार्थे भगवतः फलस्पृहाऽभावेऽपि परार्थमस्त्येव तत्कथमेवमुच्यत इत्यत आह ॥ इच्छेति ॥

॥ कृ० ॥ ननु क्रियामिथ्यात्वे समानेऽपि तज्ज्ञानाभावाज्जीवानां लेपःतद्भावाच्चेश्वरस्यालेपः ॥ तथा च जीवदृष्टांताश्रयेणाक्षेपो भविष्यतीति शंकते ॥ ज्ञानेनेति ॥ तर्हिकर्तृत्वमिथ्यात्वज्ञानवतामिति वक्तव्यम् ॥ न च कर्तारमिति ॥ नचैव श्रूयत इत्याह ॥ तस्येति ॥ एवं परपक्षे तस्य कर्तारमितिगीताया असंगतिमुक्त्वा न मां कर्माणीति गीताप्यसंगतेत्याह ॥ लेपनिवारणं चेति तस्यापीति ॥ न केवलं क्रियायाः किं तु लेपस्यापीत्यर्थः ॥ अयमाशयः ॥ यथाविद्धचकर्तारमिति क्रियामिथ्यात्वं ज्ञातव्यतया विहितं मुमुक्षोरवश्यमपेक्षितत्वात् ॥ अन्यथेति ॥ मां योभिजानातीति ज्ञानानुवादेन फलकथनयोगाच्च ॥ तथा विद्धचलेपमितिलेपमिथ्यात्वमपिज्ञातव्यतया वक्तव्यम् ॥ अविशेषात्॥ न मां कर्माणि लिंपंतीति लेपमिथ्यात्वमात्रकथनं त्वसंगतं संनियोगशिष्टन्यायविरोधादिति ॥ ननु इच्छत इत्यात्मनेपदमयुक्तम् ॥

॥ श्री० ॥ नाप्रकपयोगेक्ष इति जातत्वेन पकारस्य क्षकारप्रकृतित्वेन पकारान्तस्य तस्य णत्वे आकांक्षमाण इत्येतस्यात्रनु आकांक्षन्निति तथात्वे परस्मैपदिताप्राप्तेः ॥ तथा हि ॥ आङ्पूर्वकात् कांक्षधातोः परस्मैपदिनि लडादेशभूते शतृप्रत्यये शकारऋवर्णयोर्लोपे आकांक्षदिति जाते उगिदचांसर्वनामस्थानेऽधातोरिति नुमि संयोगान्तस्य लोप इति नकारलोपे हिआकांक्षन्निति भवतीत्यत आह ॥ व्यत्यय इति ॥ व्यत्ययइतिमनेनात्मनेपदित्वव्यत्ययेन परस्मैपदित्वं युक्तमित्यर्थ ॥ ननु ज्ञानस्य कथं कामात्मकत्वमित्यत आह ॥ ज्ञानमिवेति ॥ विष्णोर्ज्ञानं यथामिथ्याप्रत्ययरूपं न भवति तथा कामोऽप्यभिनिवेशरूपो नेत्यर्थ ॥सा चेति॥मुक्तिरित्यर्थः॥अस्मिन श्लोके न स बध्यत इति वर्तमानार्थकलट्प्रत्ययेन मुक्तिः फलमित्युच्यते॥

॥ तत्र कर्मफले येनतत्प्राप्तिपर्यन्तं मनसोविक्षेपःसोऽभिनिवेशः॥ अत्र प्रमाणमाह ॥ तच्चेति ॥ व्यत्ययो बहुलमिति व्यत्ययः ॥ ज्ञानं ज्ञानमिव॥ इति मामित्येवं ज्ञानिनोमुक्तिः फलमुच्यते ॥ सा च वर्तमानप्रत्ययेन प्राक् च भूतप्रत्ययेनमद्भावमागता इति तत्रैकजीववादिनामाक्षे

तच्चोक्तम् ॥ आकांक्षन्नपिदेवोऽसौनेच्छतेलोकवत्परः ॥ न ह्यग्रहस्तस्य विष्णोर्ज्ञानं कामो हि तस्य ॥ स्विति ॥ न च काचिन्मुक्ता भवंतीति क्रमेण सर्वमुक्तिः ॥

पमुद्भाव्य प्रतिषेधति ॥ न चेति ॥ के चिदिदानीं मुक्ता भवंति ॥ काचिद्भूता इतिपक्षेऽतीत एव काले क्रमेण सर्वमुक्तिः स्यात् ॥ तथा चेदानीं संसारानुपलंभः स्यादिति न शंकनीयम् ॥

॥क्ष०॥इषुइच्छायामित्यस्य नित्यपरस्मैपदित्वादित्यत आह॥ व्यत्ययो बहुलमिति॥यद्यपि विकरणाना प्रक्रान्तत्वात्तेषामेवास्य यत्नोऽनेनासिद्ध्येत॥ न तु पदव्यत्ययः॥तथाऽपि भाष्ये सुप्तिङुपग्रहलिङ्गनराणांकालहलच्स्वरकर्तृयङां च ॥ व्यत्ययमिच्छति शास्त्रकृदेषामोऽपि न सिद्ध्यति बाहुलकेनत्युक्तत्वेन बहुग्रहणात्पदव्यत्ययः सिद्धाति ॥ उपग्रहशब्दस्य परस्मैपदात्मनेपदवाचित्वात्यद्यपि वा कांक्षन्नित्यादिपुराणवाक्यम ॥ तत्र च व्यत्ययो बहुलमिति कथं व्यत्ययः ॥ छन्दसीत्यनुवृत्त्या तत्सूत्रस्य छंदोमात्रविषयत्वात ॥ तथाऽपि तत्र छंदः शब्देन गौणछंदसोऽपि ग्रहणात्पुराणस्यच छंदस्तुल्यत्वात्तत्र व्यत्ययः संभवति ॥ अत एव छन्दः प्रदेशेषु स्मार्तानामप्रतिज्ञानाद्गौणमुख्यन्यायो नास्तीति शाब्दिका इति दिक् ॥ ननु ज्ञानं काम इत्युक्तम ॥ ज्ञानकामयोस्तादात्म्यमयुक्तमित्यत आह ॥ ज्ञानमिवेति ॥ यथा विष्णोर्ज्ञानं नामिथ्याप्रत्ययरूपं तथा कामोप्यभिनिवेशरूपो नेत्यर्थः॥ इदानीं मुक्ता इति ॥ यद्यपिक्तप्रत्ययस्य भूतार्थत्वादिदानीं.मुक्ता इति व्याहतं तथाऽपि भवंतीति वर्तमानार्थप्रत्ययानुरोधेन निष्ठाप्रत्ययोऽपि वर्तमानार्थ ॥ धातुसंबंधे प्रत्यया इत्युक्तेरिति भावेनैवमुक्तम् ॥ केचिद्भूता इति ॥ अनेनकेचिन्मुक्ता भवंतीत्येकं वाक्यं केचिन्मुक्ता इत्यपरम वाक्यम ॥ तत्राद्यस्यार्थः ॥ केचिदिदानीमित्युक्ते ॥ द्वितीयस्यार्थः ॥ केचिद्भूता इतीति वाक्यद्वयमेतदित्युक्तं भवति ॥

॥ श्री० ॥ प्राक्चवीतरागेतिश्लोके मद्भावमागता इति भूतार्थकक्तप्रत्ययेन मुक्तिः फलमित्युच्यते इति योऽयम् ॥ मनसेत्यनेन पौनरुक्त्यं वारयति ॥ बुद्ध्या चेति ॥ उक्ताक्षेपादिति ॥ अतीतएवकाले सर्वमुक्तिः स्यादित्येकजीववादाक्षेपादित्यर्थः ॥ कालोऽत्यनंतोऽत इति ॥ अतो जीवानंत्यादपि कालोऽत्यनंतोऽतिशयेनानंतः तथा च जीवानंत्यापेक्षया ऽपि कालानंत्यस्याधिक्यादतीतकाल एव सर्वेषां मुक्तिः स्यादेवेति भावः ॥ ननु कालोऽप्यनंतोऽत इत्यपि पाठः ॥ इत्यस्याक्षेपस्य अनंतवदित्यत्रत्यानंतशब्दार्थो भगवान् स चानंतशब्दात्तदानंत्योपलक्षकः ॥तथा चानंतवदित्यस्य भगवदानंत्यवदित्यर्थं इत्यभिप्रेत्य विवृणोति ॥ यथेति ॥ तथाऽनंता॥जीवाः इति शेषः॥ स्वोक्तार्थे संमतित्वेन श्रुतिःश्रुत्यंतरमुदाहरति ॥ इति होवाचेति ॥ कालक्षणानंत्यादपि जीवानंत्यमतिशयितमितीममर्थं अनागता अतीताश्च यावंतः सहिताः क्षणाः ॥ अतीता नागताश्चैव यावंतः परमाणवः ततोऽप्यनंतगुणिता जीवानां राशयः पृथगिति श्रुत्यंतरं वत्सश्रुतिरुवाचेत्यर्थः ॥ तथा च क्षणानंत्यादपि जीवानंत्यस्याधिकत्वादेकैकस्मिन् क्षणे एकैकस्यापवर्गेऽपि न जीवानां समाप्तिःकिमुतकल्पांतरे केषां चिदेव मुक्ताविति भावः॥आनंत्ये तारतम्यं च कल्पवर्षमासदिनघटिकाक्षणानामानंत्येप्यनुभवसिद्धमिति नासंभावनाशंकाति द्रष्टव्यम्॥१४॥प्रागेवोति॥कर्मणैव हि संसिद्धिमिमं॥विवस्वते योगमित्यत्रेत्यर्थः॥

कस्मात् यतः श्रुतिरेवमाशंक्य पर्यहार्षीदित्याह ॥ तथा हीति ॥ हृदा बुद्ध्या च इत्येतत्कथं वा युज्यते उक्ताक्षेपादित्याशंकायामनंता जीवा इत्युत्तरम् ॥ ननु कालोऽप्यनंतोऽत इत्यस्योत्तरमाह॥ अनंतवदिति ॥यथा भगवान्कालक्षणेभ्योऽप्यतिशयेनानंतस्तथाऽनंताः कुतः॥इति होवाच

॥ तथा हि श्रुतिः ॥ ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाति विद्वानिति ॥ कथं वा इत्यनं

एवं ज्ञात्वा कृतंकर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैःपूर्वतरं कृतम् ॥ १५ ॥

॥ ता वेत्यनंतवदिति होवाचेति ॥ १४ ॥एवं ज्ञात्वा कर्मकरणे आचारोऽप्यस्तीत्याह ॥ एवमिति ॥

श्रुत्यंतरमिति ॥ १४ ॥ नन्वेवं ज्ञात्वेति पुनरुक्तम् ॥ कर्मकरण आचारस्य प्रागेवोक्तत्वादित्यत आह ॥ एवमिति ॥ यदि ज्ञानी कर्मभिर्न बद्ध्यते तर्हि ममापि ज्ञानित्वेन कर्मबंधाभावात् ॥

॥ कृ० ॥ ननु हृदेत्येतन्मनसेत्यनेन पुनरुक्तम् ॥ स्वांतं हृन्मानसं मन इत्यमरोक्तेरित्यतो हृदेत्येतदनूद्यव्याचष्टे ॥ बुद्ध्या चेति ॥ यद्वा ननु चंद्रमा मनोभूत्वा हृदयम् प्राविशदिति श्रुतेर्हृदयस्य मनोधिष्ठानत्वमेव न तु ज्ञानकारणत्वं तत्कथं हृदा ज्ञात्वेत्युच्यते इत्यतो हृदेत्यनूद्यव्याचष्टे ॥ हृदा बुद्ध्येति ॥कालोऽप्यनंतोऽत इति ॥

॥ श्री० ॥ ननु जनकादीनामपि ज्ञानितया तदाचारस्यापि ज्ञान्याचारत्वेन तस्यानोक्तत्वात्पौनरुक्त्यमेवेत्यत आह ॥ प्राक्तिति ॥ पूर्वाचारत्वेनैव तदाचार प्रमाणत्वेनोक्तइति भा
वः ॥ अत एवेति ॥ जनकादिषु विद्यमानस्यापि ज्ञानित्वस्याविवक्षितत्वादेवेत्यर्थः ॥ कर्म कृत्वा ज्ञानं प्राप्येति प्राग्व्याख्यातत्वेन जनकादिकर्मणो ज्ञानद्वारा मुक्तिहेतुत्वमुक्तं तच्च तेषां
ज्ञानित्वविवक्षायां न संभवतीति भाव.॥ कुतो न संभवतीत्यत आह॥न हीति ॥ नन्वेवं ज्ञान्याचारस्यात्र प्रमाणत्वेनात्रोक्त्यभिप्राये तर्हि गीतायां आनंदाभिवृद्धीच्छुभिरिति वक्तव्यं मुमु
क्षुभिरितिकथमुक्तम ॥ प्रत्युत तथोक्त्या मोक्षेच्छुभिः पूर्वैः कर्म कृतमित्यज्ञान्याचारस्यैव गीतायां प्रमाणत्वेनोक्तिप्रतीतेरित्यत आह॥ मुमुक्षुभिरिति ॥ मोक्षं साधुकर्तुमिच्छंति मुमुक्षंतीति
मुमुक्षकस्तैः मुमुक्षुभिः ॥ तत्साधुकारिणीति॥आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु॥ क्विपमभिव्याप्य ये प्रत्यया विहिताः ॥सन्नाशंसभिक्षउरिति सूत्रेणोप्रत्ययाद्यास्ते तच्छीलाद्यर्थे स्युरित्युक्तत्वा
दत्र सन्नाशंसभिक्षउरिति सूत्रेण उप्रत्ययः ॥सनप्रत्ययांताद्राशंसभिक्षेश्च उप्रत्ययो भवति तच्छीलादाविति तदर्थ. जिज्ञासु॥ आशंसु भिक्षुरित्युदाहरणम ॥कथमयं सन्नंत इति चेदुच्यते ॥
मुच्लृमोक्षणेऽस्मादिच्छायां सनि हलंतच्चेति नवोपमन्यर्द्धोरिति द्वित्वेऽमुमुच सेति जाते पूर्वोऽभ्यास इति पूर्वस्याभ्याससंज्ञायां चो.कुरिति चकारस्य कुत्वे आदेशप्रत्यययोरिति सस्य षत्वे
कषयोगे क्षेति जाते मुमुक्षेति सन्नंतशब्दोयम ॥ पश्चात्सन्नंतात मुमुक्षुशब्दात सन्नाशंसभिक्षउरित्यनेन तत्साधुकारिण्यर्थे उप्रत्यये अतोलोपः अकारस्य लोपः स्यादार्धधातुके पर इति आ
र्धधातुके उप्रत्यये परे क्षकारस्थस्य अकारस्य लोपे मुमुक्षुरिति प्रातिपदिके सि सि सस्य रुत्वे विसर्गे च मुमुक्षुभिरिति भवति ॥ तथा चापरोक्षज्ञानोत्तरं निवृत्तकर्मानुष्ठानेन भगवदिच्छा
रूपावरणापगमे हि यावत्स्वरूपानंदभोगो भवतीत्येवं मोक्षं साधुकर्तुमिच्छुभिर्मुमुक्षुभिः पूर्वैः कर्म कृतं अतस्तत्राप्यपरोक्षज्ञानित्वात मोक्षस्य साधुकरणेच्छया कर्म कुर्वित्याशयात ॥

॥ कथं कर्मविधानमित्याशंक्य ज्ञानिनामप्यधिकमोक्षाकांक्षया कर्मकरणम् ॥आचारोऽत्रोच्यते॥प्राक्तु जनकादीना विवस्वदादीनांच विद्यमा नमपि ज्ञानित्वं भगवता न विवक्षितमितिभावः ॥अत एव भाष्यकारेण तत्र कर्मकृत्वेवेत्याद्युक्तम् न हि ज्ञानिनां कर्म ज्ञानद्वारा मुक्तिहे तुः ॥ मुमुक्षुभिरिति तत्साधुकारिण्युप्रत्ययः ॥

॥ कृ०॥अतोजीवेभ्यः कालोऽप्यनंत इत्यर्थः ॥
कालोऽप्यनंतोऽत इति पाठे कालोऽप्यनंतो जीवेभ्योऽनेन इति योजना ॥ १४ ॥ इत्याद्युक्तमिति ॥ पूर्वानुष्ठितश्चायं धर्म इति वाक्यसंग्रहायादिशब्दः ॥ ननु ज्ञानिनामप्यधिकमोक्षाकांक्ष
या कर्मकरण इत्यनेन ज्ञानिकर्मणोऽधिकमोक्षहेतुत्वं सूचितं ॥ तत्कृत ज्ञानद्वारा मोक्षार्थत्वमेव किं न स्यादित्यत आह ॥ न हीति ॥ ज्ञानस्य सिद्धत्वेन तदुत्पादनद्वारा मोक्षहेतुत्वा
नुपपत्तेरिति भावः ॥ ननु गीतायामधिकमोक्षाकांक्षाप्रतिपादकपदाश्रवणात्कथमधिकमोक्षाकांक्षयेत्युक्तमित्यत आह ॥ तत्साधुकारिणीति ॥ सन्नाशंसभिक्ष उरितिसन्नंतात्सूत्ररुप्रत्ययः ॥
स च तत्साधुकारिणि कर्तरि भवति ॥ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिष्वित्यनेन क्विपमभिव्याप्य विहिताः प्रत्ययास्तच्छीलादिषु कर्तृषु भवंतीत्युक्तत्वात ॥ उप्रत्ययस्य च तन्मध्य
पतितत्वादिति भावः ॥ नन्वेवमपि सन्नंतवाच्यार्थमोक्षेच्छयोः साधुत्वलाभेऽपि मोक्षस्याधिक्यालाभइति वाच्यम ॥ मोक्षमात्रस्य ज्ञानादेवसिद्धतया ज्ञानोत्तरमुमुक्षाया विषयिभूतमोक्षाधिक्ये
नैव साधुत्वस्य वाच्यत्वात॥ आनंदातिशयविषयकत्वातिरिक्तस्येच्छासाधुत्वस्य दुर्निरूपत्वादिति ॥

॥श्री०॥पूर्वतरमित्यस्येति॥अतीतत्वस्येत्यर्थः॥कर्तृणामतीतत्वोक्त्या तदीयकर्मणोऽप्यतीतत्वं उपलब्धमेवेति भावः॥तैरपीति॥पूर्वैरपि ॥पूर्वभावि ॥पूर्वपरंपराप्राप्तमित्यर्थः ॥ तदेवकृतमित्यनंतरं इत्युच्यत इति शेषः ॥ कथमनेन शंकापरिहार इत्यतो मध्यमपदलोपसमासोऽयमित्यभिप्रेत्य व्याख्याति॥ पूर्वमिवेति अत एवेति ॥कर्मणः क्षणिकत्वाऽन्यथाऽनुपपत्त्या तदेव कर्तव्यमिति विधानायोगादेव भगवता एवं ज्ञात्वा कृतं कर्मेत्यनुवादः कृतो न पूर्वतरकर्मेति तेन ज्ञायते पूर्वकृतकर्मसदृशकर्मकरणमेवात्राभिप्रेतमिति॥१५॥ ननु सम्यग्वक्तुमित्येतद्गीतायां नाभिप्रेतमिति चेत्तत्राह ॥ अत एवेति ॥ उत्कटत्वेन सम्यग्वचनाभिप्रायत एवेत्यर्थः ॥ वक्तव्यमिति ॥ अवतारिकाभाष्ये इत्यर्थः ॥ कर्मण इति कथमिति॥ कर्मण इत्येकवचनं कथमित्यर्थः उत्तरमाह ॥ अनुष्ठेयत्वादिति ॥ ततश्च प्राधान्यात्तदेवगृहीतमिति भावः ॥ ज्ञेयमिति ॥ नानुष्ठेयमिति भावः ॥ अत एवेति ॥ त्रयाणां प्रकृतत्वेऽपि तन्मध्ये कर्मणोऽनुष्ठेयत्वेन प्राधान्यादेवेत्यर्थः ॥ इत्याहेति ॥ कण्ठरवेण कर्मैव गृहीतमित्यर्थः ॥ ननूत्तरत्राकर्मविकर्मणोरपि प्रतिपादनात् कर्मग्रहणमयुक्तमित्यत आह ॥ तत्रापीति ॥ गीतायामपीत्यर्थः ॥ अतएवेत्युपष्टंभकं तु कर्मणः स्वपदेनोपादानमभिप्रेत्येति द्रष्टव्यम् ॥ १६ ॥

पूर्वैः कृतमित्यनेनैव पूर्वतरत्वस्योक्तत्वात्पुनरुक्तिरित्यत आह ॥ पूर्वतरमिति ॥ तेरपि ततोऽपि पूर्वभाविकृतमित्यर्थः ॥ कर्मणः क्षणिकत्वात्कथं तदेव कर्तव्यमित्यतो वेदमुक्तं पूर्वमिव भवतीति पूर्वभावि ॥ अत एव कर्मेत्यनुवादः ॥ १५ ॥ किं कर्मेत्यस्य संगतिर्न प्रतीयतेऽत आह ॥ कर्मेति ॥ तस्य कर्तव्यतयोक्तस्य किमर्थम् ॥ सम्यग्वक्तुम् ॥ एतदेव सम्यग्वचनम् ॥ याज्जिज्ञासितकथनं जिज्ञासा च दुर्विज्ञेय

पूर्वतरं कर्मपूर्वभावीत्यर्थः ॥ १५ ॥ कर्मकुर्वित्युक्तम् ॥ तस्य कर्मणो दुर्विज्ञेयत्वमाह ॥ सम्यग्वक्तुम्

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१६

॥ किं कर्म किमकर्मेति ॥ १६ ॥

त्वोक्तो भवतीति भावः ॥ अत एवप्रकर्षेण वक्ष्यामीत्याह ॥ ननूत्तरश्लोके विकर्मणोऽपि गृहीतत्वादिहाप्यकर्मशब्दस्तदुपलक्षणार्थ इति स्थिते कर्मादीनामिति वक्तव्यं कर्मण इति कथम् ॥ अनुष्ठेयत्वात् ॥ अकर्मादिकं हेयतया ज्ञेयम् ॥ अत एव तत्ते कर्म प्रवक्ष्यामीत्याह ॥ तत्राप्यकर्मादेरुपलक्षणात् ॥१६ ॥

॥कृ०॥ अतएवेति ॥ पूर्वमादृश्यज्ञापनाख्यप्रयोजनादेव कर्मेत्यनुवादः ॥ अन्यथा तद्वैयर्थ्यादिति भावः॥ क्षणिकत्वात्कथं तदेवकर्तव्यमित्याक्षेपपरिहारार्थमेवेत्यप्याहुः ॥ १५ ॥ अतएव प्रकर्षेणेति ॥ सम्यग्वचनस्याभिप्रेतत्वादेवेत्यर्थः ॥ अत एव तत्ते कर्मेति ॥ अनुष्ठेयत्वेन प्राधान्यादेव स्वपदेन कर्मग्रहणमित्यर्थः ॥ ननु तत्ते कर्मेत्यत्र कर्मपदस्याविनयपरत्वे स्वशब्देन कर्मग्रहणमनुष्ठेयत्वाभिप्रायकमुपष्टंभकं स्यात् ॥ तदेव कुतः कर्मशब्दस्य कर्ममात्रपरत्वसंभवादित्यत आह ॥ तत्रापीति ॥ तत्तेकर्मेत्यत्रापिकर्मपदेनेति शेषः ॥ अन्यथाऽग्रे कर्मविकर्मोक्त्ययोगात् ॥ अप्रतिज्ञातत्वादिति भावः ॥ १६ ॥

॥ श्री० ॥ सिद्धे सतीति ॥ यज्ज्ञात्वेत्यनेनैव कर्मादिस्वरूपस्य मुमुक्षुणा ज्ञातव्यत्वे सिद्धे सतीत्यर्थः ॥ आरंभः॥ कर्मणो हीति पुनरारंभः ॥ नियम एव प्रदर्शितो भाष्ये ज्ञात्वैवेति ॥ ननु यातीत्युक्तक्रियायां भगवतः कर्तृत्वात् अज्ञात्वेत्यत्र जीवस्य कर्तृत्वेन समानकर्तृकत्वाभावात्कथमज्ञात्वेति क्त्वाप्रत्यय इत्यत आह॥ दर्शनेति ॥ दर्शनं यातीत्यस्य जीवकर्तृकदर्शनविषयो भवतीत्यर्थः ॥ तथाचाज्ञानदर्शनयोरुभयोरपि जीवकर्तृकत्वेन समानकर्तृकत्वाद्युक्तः क्त्वाप्रत्यय इत्यर्थः ॥ ननु भाष्येऽकर्मविकर्मशब्दार्थ एवोच्यते न कर्मशब्दार्थस्तत्रानिमित्तमाह ॥ कर्मशब्दार्थ इति ॥ वक्ष्यत इति ॥ कर्मण्यकर्मेत्यादिनेति शेषः ॥ कामाद्युपेतस्येति॥काम्यकर्मणइत्यर्थः॥लाघवार्थमिति ॥ निषिद्धं कर्मेति भाष्ये तस्य प्रकृतत्वात्तत इति परामर्शमौकर्येण लाघवार्थमित्यर्थः ॥

॥ रु० ॥ ननु यातीत्युक्तक्रियय,

ननु यज्ज्ञात्वा मोक्ष्यसेऽशुभादित्यनेनैवकर्मस्वरूपं मुमुक्षुणा ज्ञातव्यमिति लब्धम् ॥ तत्किमर्थं कर्मणो हीत्याद्युच्यत इत्यत आह॥ न केवलमिति ॥ तत्कर्मादिकं सिद्धमत्यारंभो नियमार्थ इति भावः ॥ अत्रैव प्रमाणमाह॥ तच्चेति ॥ दर्शनापेक्षया समानकर्तृकत्वात् क्त्वानिर्देशः ॥ कर्मशब्दार्थोभगवतैव वक्ष्यते ॥ अकर्मविकर्मशब्दार्थावाह ॥ अकर्मेति ॥ किं तर्हि कर्मेत्यत आह ॥ निषिद्धमिति ॥ एवं चेत्कामा

न केवलं तज्ज्ञात्वा मोक्ष्यसे ॥ ज्ञात्वैवेत्याशयवानाह ॥ कर्मण इति ॥ तच्चोक्तम्॥ अज्ञात्वा भगवान्कस्य कर्माकर्मविकर्मकम् ॥ दर्शनं याति हि मुने कुतो मुक्तिश्च तद्विनेति॥ अकर्म ॥ कर्माकरणम् ॥ क

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं चविकर्मणः ॥अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥

॥ मोकर्मान्यद्विकर्म निषिद्धं कर्म बंधकत्वात्॥ततो विविच्य कर्मादि बोद्धव्यमित्यादि ॥

द्युपेतस्यकुत्रांतर्भावइति चेत् ॥ विकर्मणीति भ्रमः ॥ कथं तस्य निषिद्धत्वमित्यत आह ॥ बंधकत्वादिति ॥ अस्त्वेवं शब्दार्थो योजना तु कथमित्यतोलाघवार्थं द्वितीयपादयोजनां तावदाह ॥ नन इति ॥

ज्ञानस्य समानकर्तृकत्वाभावात्कथम् क्त्वानिर्देश इत्यतआह ॥ दर्शनापेक्षयेति ॥ उभयोर्जीवकर्तृकत्वादिति भावः ॥ ननु प्रथमप्राप्तकर्मशब्दार्थानुक्तिः ॥ कुत इत्यत आह ॥ कर्मशब्दार्थ इति॥ कर्मण्यकर्मेत्यनेनेतिशेषः ॥ लाघवार्थमिति॥ निषिद्धकर्मणः प्रकृतत्वात्तत इति परामर्शसौकर्येलाघवार्थमित्यर्थः ॥

॥ श्री० ॥ सूचनाप्रकारमेव दर्शयति ॥ कर्मण इति ॥ ननु ॥ दुर्ज्ञेयत्वम ॥स्वभावेनेति ॥ पूर्वकवीनांमोहितत्वमात्रमुक्तं तच्च कर्मणः स्वभावतः ॥ सुज्ञेयत्वेऽपि शापादिनाऽन्यथासिद्धमिति शंकापरिहाराय गहना कर्मणो गतिरिति ॥ स्वभावेनैव कर्मणा दुर्ज्ञेयत्वोक्तेर्न पुनरुक्तिशंकेति भावः॥ एतत् ॥ स्वभावतो ज्ञातुमशक्यत्वकथनम ॥ १७ ॥ यत्किंचिद्दर्शनेति ॥ यः पश्येत्स बुद्धिमानिति यत्किंचिद्धि कर्मादिदर्शनवतः स्तुतिकरणेन यत्किंचिद्दर्शनस्तुतिरूपत्वमेवप्राप्नामिति न कर्मादिस्वरूपविधायकोऽयं श्लोक इत्यर्थः ॥वाक्यभेदेनेति॥ यच्छब्दद्वयापरित्यागेन कर्मण्यकर्म पश्येत अकर्मणि च कर्म पश्येदिति विधायकमेकं वाक्यम ॥ पश्चात्तच्छब्दयोगेनेदमेवानुवादरूपमपरं वाक्यमिति वाक्यभेदेनेत्यर्थः ॥

ततो विकर्मणः कर्मादि कर्माकर्म च इत्यादीत्यनेनाद्यतृतीयपादयोजनां सूचयति ॥ कर्मणो विविच्यविकर्मादि बोद्धव्यम् ॥ अकर्मणश्च विविच्य कर्मादि बोद्धव्यमिति ॥ ननु कवयोऽप्यत्र मोहिता इत्यनेन कर्मादेर्दुर्ज्ञेयत्वमुक्तम् ॥ तत्पुनः किमर्थमुच्यत इत्यत आह ॥ न चेति ॥ ज्ञातुं स्वभावेनेति शेषः ॥ एतच्च श्रोतुरधिकादरजनार्थमिति ज्ञेयम् ॥ १७॥ कर्म प्रवक्ष्यामीति प्रतिज्ञातं कर्मादिप्रवचनं क्वापि

न च शापादिना कवयोऽप्यत्र मोहिताः ॥अशक्यं चैतज्ज्ञातुमित्याह ॥ गहनेति॥ १७॥

कर्मण्यकर्म यः पश्येदकर्मणि च कर्मणः॥ सबुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥१८॥

॥ कर्मादिस्वरूपमाह ॥ कर्मणीति ॥

नोपलक्ष्यते कर्माणीतिश्लोकस्य यत्किंचिद्दर्शनस्तुतिरूपत्वादित्यत आह ॥ कर्मादीति॥ यद्यप्ययं श्लोकोऽन्यथाप्रतीयते तथाप्यविहितस्य स्तुत्ययोगाद्वाक्यभेदेन कर्मादिकं प्रतिपाद्य तत्स्तुतिः क्रियत इति भावः ॥ ॥कृ० ॥एवमपि कथं पुनरुक्तिपरिहार इत्यत आह॥स्वभावेनेति ॥ शेष इति ॥ प्राग्दुर्विज्ञेयत्वमात्रोक्तेस्तस्य शापादिनाऽन्यथासिद्धिशंकायामिह स्वभावेनैव दुर्विज्ञेयत्वमुच्यत इति न पुनरुक्तिरितिभावः ॥१७॥ वाक्यभेदेनेति ॥ यच्छब्दद्वयपरित्यागेन कर्मण्यकर्म पश्येत ॥ अकर्मणि च कर्म पश्येदिति विधिः ॥ ततो य एवं पश्येदित्यनुवादेन स बुद्धिमानित्यादिस्तुतिरित्येवं वाक्यभेदेनेत्यर्थः ॥

१ आदिपदेन द्यूतादिषु भीष्मद्रोणादीनां कल्यावेशादयो ग्राह्याः॥

॥श्री०॥ चित्प्रतिबिंब॥चितो ज्ञानरूपस्य विष्णोः प्रतिबिंबः ॥ सूचयतीति ॥ तदधीनत्वस्य प्रतिबिंबशब्दार्थत्वादिति भावः ॥ ननु सृष्ट्यादेः कथमकरणावस्थात्वं परमेश्वरकर्मसद्भावेन करणावस्थात्वादिति चेत्तत्राह ॥ जीवेति ॥ जीवकर्माभावादेवाकरणावस्थात्वमिति भावः ॥ जीवव्यापारभावकाले सर्वस्य महदादेः ॥ तदभावकाले स्वप्नसुषुप्त्योः स्वाप्नगजादेरिति द्रष्टव्यम् ॥ य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाण इति श्रुतेः ॥ प्रोक्तप्राय इति ॥ ईश्वरस्वातंत्र्यादिकमज्ञात्वा स्वविहितानुष्ठानमकर्मविपरीतं ज्ञात्वा विहितकर्मानुष्ठानं विकर्मेत्युक्तप्राय इत्यर्थः ॥ उक्तप्रायत्वज्ञापनार्थमेवोक्तलक्षणे इत्युक्तम् ॥ अनेनाकर्मकर्माकरणकर्माकर्मान्यद्विकर्मेति भाष्योक्तलक्षणमर्थाद्गीतासूचितमित्युक्तं भवति॥कथमनेनार्थभेदो लब्ध इत्यत आह ॥ ज्ञानिशब्दो हीति॥तथा चेति यः पश्येत्स बुद्धिमान् ज्ञानी पामरजनविलक्षण इत्यर्थभेदो द्रष्टव्यः॥स्तुतिः कथं लब्धेत्यत आह॥मनुवादिनामिति ॥ बुद्धिमानित्यत्र मतुप् आदिपदाज्ज्ञानीत्यत्र इनग्राह्यः॥भूमनिंदाप्रशंसासु भवंति मतुबादय इति वचनात् मतुबादिप्रयोगेन प्रशंसा लभ्यत इत्यवगंतव्यम्॥प्रशंसा च तस्य पामरविलक्षणत्वरूपेणेति द्रष्टव्यम्॥सर्वाकरणादित्यनेन मुख्यबाधकप्रदर्शनम्॥१८॥

कथमनेन तत्स्वरूपमुच्यत इत्यतो व्याचष्टे ॥ कर्मणीति ॥ वर्णाश्रमोचिते ॥ अकर्म कर्माभावं स्वस्यतद्विष्णोरिति॥विष्णोरेवेति॥चित्प्रतिबिंब इत्यनेन तदधीनः करोमीत्यपि सूचयति ॥ सुप्त्यादिकं कथमकर्मेत्यत उक्तम् ॥ अकरणेति ॥ जीवापेक्षयेदम् ॥ एतदपि विवृणोति ॥ अयमेवेति ॥ सर्वदा जीवव्यापारभावेऽभावे च सर्वस्य महदादेः स्वाप्नगजादेश्च अनेन भगवतः परानपेक्षया कर्तृत्वं स्वस्य तदधीनकर्तृत्वं च ज्ञात्वा वर्णाश्रमविहितानुष्ठानं कर्मेत्युक्तं भवति ॥ अनेनैवोक्तलक्षणे विकर्माकर्मणी प्रोक्तप्रायो यः पश्येत्स बुद्धिमानिति कोऽर्थभेदः

॥ कर्मणि क्रियमाणे सत्यकर्म यः पश्येत् ॥विष्णोरेव कर्म नाहं चित्प्रतिबिंबः किंचित्करोमीति॥अकर्मणि सुप्त्यादावकरणावस्थायाम्॥परमेश्वरस्य यः कर्म पश्यति॥अयमेव परमेश्वरः॥सर्वदा सर्वसृष्ट्यादिकं करोतीति स बुद्धिमान् ज्ञानी स एव च युक्तो योगयुक्तः॥सर्वाकरणात्स एव च॥कृत्स्नकर्मकृत्॥कृत्स्नफलवत्त्वात्॥१८॥

कथं च स्तुतिरित्यत आह ॥स इति ॥ ज्ञानिशब्दो हि पामरविलक्षणे प्रसिद्धः ॥ मनुवादीनां प्रशंसार्थत्वात् स युक्त इत्यतस्तुतिर्यथा स्यात्तथा व्याचष्टे ॥ स एव चेति ॥ कृत्स्नकर्मकृदित्येतन्मुख्ये बाधकं प्रदर्शयन् गौणं व्याख्याति ॥ सर्वेति ॥ सर्वस्याश्वमेधादेः कृत्स्नकर्मणां फलस्य ज्ञानस्य मोक्षस्य प्राप्तप्रायत्वादित्यर्थः ॥ १८ ॥ ॥ कृ०॥सुप्त्यादिकर्मेति ॥ सृष्टिसंहारादित्युक्तम्॥ननु सुप्त्यादावीश्वरेण कर्मकरणात्कथमकरणावस्थेत्यत आह ॥ जीवापेक्षयेति ॥ जीवकर्तृकरणाभावापेक्षयेत्यर्थः ॥उक्तलक्षणे इति॥अकर्म कर्माकरणमित्यादिनोक्तलक्षणे इत्यर्थः॥अनेन तल्लक्षणं गीतासूचितमित्युक्तं भवति ॥ मनुवादीनामिति ॥ भाष्ये ज्ञानीतीनेः प्रयोगादादिशब्दः ॥ १८ ॥

॥ श्री० ॥ प्रतिज्ञानमिति ॥ तत्तेकर्मप्रवक्ष्यामीतिप्रतिज्ञानंकर्मेत्यर्थः ॥कामादिवर्जनं विधायेति॥यच्छब्दपरित्यागेनभवेगुगितिपदाध्याहारेणविधिवाक्यमेकंपश्चाद्यच्छब्दादियोगेन चसम प्रस्तुतिवाक्यमपरं द्रष्टव्यमित्यर्थः ॥ उपमर्दः ॥परित्यागः॥ १९॥समारंभाइति ॥ आरभ्यंतइत्यारंभाः कर्माणिकामसंकल्पवर्जिता इत्युक्तमेवत्यक्त्वाकर्मफलासंगमित्यनेनकथमुच्यतइत्यतस्त दुपपादयति॥संकल्पोहीति॥इदंकरिष्यइत्येवंकर्मणिआसम्यकुसंगःसक्तिः संकल्पस्तत्यागः संकल्पवर्जनंचैकमेव॥तथा फलं मे भूयादितिफलेआसम्यकसंगाःकामस्तत्यागःकामवर्जनंत्वेकमेवेत्यर्थः

ननु प्रतिज्ञातमुक्तं किमुत्तरैः श्लोकैरित्यत आह ॥ एतदेवेति ॥ कर्मस्वरूपमेव ॥ अनेनात्रापि वाक्यभेदेन कामादिवर्जनं विधाय स्तुतिः क्रियत इति सूचितम् ॥ मिथ्यात्वज्ञानेन कर्मणामुपमर्दो ज्ञानाग्निदग्धकर्मत्वमिति व्याख्यानमसदितिभावेनाह ॥ उक्तेति ॥ परमेश्वरस्यैव

एतदेव प्रपंचयति ॥ यस्येत्यादिना श्लोकपंचकेन ॥ उक्तप्रकारेण ज्ञानाग्निदग्धकर्माणम् ॥ १९ ॥ न च

यस्यसर्वे समारंभाः कामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥१९॥

॥ कामसंकल्पाभावेनालम् ॥ आसंगं स्नेहं च त्यक्त्वा ॥

कर्तृत्वं ज्ञात्वा स्वस्य स्वातंत्र्येण कर्माभावज्ञानमेव ज्ञानाग्निदग्धकर्मत्वमित्यर्थः ॥ १९ ॥ यस्य सर्वे समारंभाः कामसंकल्पवर्जिता इत्यनेन यदुक्तं तदेव त्यक्त्वा कर्मफलासंगमित्यनेनोच्यते ॥ संकल्पो हि कर्मासंगः कामश्च फलासंग इत्यतः संगतिपूर्वमन्यथा व्याचष्टे ॥ न चेति॥

॥ क० ॥ कामादिवर्जनं विधायेति ॥ अनेन यच्छब्दं परित्यज्य भवेयुरिति चाध्याहृत्य विधिवाक्यं ज्ञातव्यमित्युक्तं भवति ॥ स्वातंत्र्येण कर्माभावज्ञानमेवेति ॥ न चास्यैव संकल्पत्यागरूपत्वात्संकल्पवर्जिता इत्यनेन पुनरुक्तिरिति वाच्यम ॥ संकल्पत्यागस्य स्वातंत्र्येण कर्तृत्वभ्रमाभावरूपत्वात् ॥ स्वातंत्र्येण कर्माभावज्ञानस्य तु ॥ इदमन्यगृहं मम तु स्वातंत्र्येण गृहं नास्तीति वत् तत्तद्वस्तुस्वामित्वाभावज्ञानरूपत्वात्तयोश्च महावैलक्षण्यादिति ॥ १९ ॥ २० ॥

---

१ ज्ञानकर्मणोर्भिन्नत्वात् ज्ञानमेव कर्मेत्युक्तिः कर्मविशेषणदाहस्य ज्ञानमन्यत्वात्कार्यकारणयोरभेदविवक्षयाज्ञेया ॥ सविशेषणे विधीति न्यायात् ॥ कर्मदाहश्च कर्मणो या बंधकशक्ति स्तन्नाश इति द्रष्टव्यम् अन्यथा कृत्स्नकर्मकृदित्युक्तविरोधात् ॥

॥ श्री०॥ एतावतेति ॥ काममंकल्पत्यागरूपेति कर्तव्यकथनेनेत्यर्थे ॥ तथाच संकल्पत्यागमात्रेणालं किं कामत्यागेनेत्यपेक्षायां न तावन्मात्रेणालं किं तु कामत्यागोऽप्यपेक्षित इतिनियम्यते सिद्धे सत्यारंभो नियमार्थः इतिन्यायादित्याशयः ॥ माध्योऽर्थइति ॥ मुक्त्यपरपर्याय सिद्ध्यनंतरभाव्यर्थ इत्यर्थः ॥ साधन इति ॥ साधकविशेषणतयोच्यत इति यावत् ॥ ॥ मिथ्याज्ञानमिति ॥ स्वस्मिन्नित्यतृप्तत्वादेरभावात्तज्ज्ञानं न सम्यक्ज्ञानं किंतु मिथ्याज्ञानमित्यर्थः ॥ तथाविधो नित्यतृप्तो निराश्रयश्च ॥ तर्हि स्वस्मिन्नित्यतृप्तत्वादिकं कुतो न प्रतीयत इत्याशयेन पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ अविद्ययेति ॥ २० ॥ संकल्पादीत्यत्रादिपदेन कर्मफलासंगपरिग्रहः ॥ कथमिति ॥ कामादि त्यागोपायः कथमनेनोक्त इत्यर्थः ॥ फलं कदा भविष्यतीति कालप्रतीक्षी आशीत्युच्यतइत्याहुः ॥ निराशीरित्यनंतरं शेषं पूरयती ॥ त्यक्तेति ॥ अंतःकरणवृत्तीति ॥ मनोवृत्तीत्यर्थः ॥ तन्नियमनेति ॥ सेंद्रियशरीरनियमनेत्यर्थः ॥ यथा ह्येवं मनः पंचधा व्यपदिश्यते मनोबुद्धिरहंकारश्चित्तं चेतनेति श्रुतौश्चित्त मनः ॥ प्रभेद इति ज्ञातव्यम् ॥

नैतावता कर्मस्वरूपं संपूर्णमित्यर्थः ॥ किं तर्हीत्यध्याहारः॥ ननु नित्यतृप्तो निराश्रय इति साध्योऽर्थः कथं साधने निवेश्यत इत्यत आह॥ ॥ज्ञानेति ॥कर्मण्यकर्मेत्यपेक्षया ॥पुनरिति ॥ मिथ्याज्ञानमेतदित्यतोऽभिप्रायमाह ॥नित्येति॥इति हेतोरहमपि तथाविधः किं त्वविद्यया तथा नप्रतीयत इति जानन्नित्यर्थः ॥ २०॥कामादिवर्जितत्वमेव निराशीरित्यनेनोच्यत इत्यत आह ॥ कामेति ॥ आदिपदेन संकल्पादिपरिग्रहः ॥

ज्ञानस्वरूपमाह ॥ पुनर्नित्यतृप्त इति ॥ नित्यतृप्तनिराश्रयेश्वरसरूपोऽस्मीति तथाविधः ॥ २० ॥

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः॥कर्मण्यभिप्रवृत्तोऽपि नैवकिंचित्करोतिसः॥२०

निराशीर्यत चित्तात्मात्यक्तसर्वपरिग्रहः ॥

कामादित्यागोपायमाह ॥ निराशीरिति यतचित्तात्मा भूत्वा निराशीरित्यर्थः ॥ आत्मा मनः ॥ कथमित्यतो योजयति ॥ यतेति ॥ निराशीः त्यक्तसर्वपरिग्रहश्च भवतीति शेषः ॥ सेंद्रियं शरीरमात्मेत्यसत् अंतःकरणवृत्तेः नियमेनैवेतन्नियमसिद्धेरिति भावेनाह ॥ आत्मेति ॥

॥ कृ० ॥ कामवर्जितत्वमेवेति ॥ इदमुपलक्षणम् ॥ त्यक्तसर्वपरिग्रह इत्यनेन संकल्पवर्जितत्वं कर्मफलासंगत्यागश्चोच्यत इत्यपि ग्राह्यम् ॥ त्यक्तसर्वपरिग्रह इत्यस्यानभिमानमिति व्याख्यानात् ॥ अनभिमानश्चानेकविधो मात्रास्पर्शा इत्येतट्टीकायामुक्तः तत्र यदा कर्मस्वातंत्र्यभ्रमरूपकर्तृत्वाभिमानत्यागोऽनभिमानपदेन विवक्षितस्तदा संकल्पवर्जितत्वस्य शोभनाध्यासनिमित्तकस्नेहरूपाभिमानविवक्षायां च कर्मफलासंगत्यागस्य च लाभादिति भावः ॥ ममतातिशयहेतुकाविवेकरूपदेहाद्यभिमानत्यागोऽपि तत्पदेन लक्ष्यत इत्यन्यदेतत्॥ संकल्पादिति ॥

॥ श्री० ॥ अनभिमानमिति नपुंसकोपपत्त्यर्थमाह ॥ इति स्थितिरिति॥शरीरइति शेषः ॥ तथा चानभिमानं यथा स्यात्तथा शरीरे स्थितिरेव परिग्रहत्याग इति स्थितिरूपक्रियाविशेषणं तथा इत्यादिपदात् अनभिमानं यथा स्यात्तथा चक्षुषादर्शनं श्रोत्रेणश्रवणमित्यादिमसमस्तेंद्रियव्यापारग्रहणेन दर्शनादिक्रियाविशेषणत्वेन नपुंसकत्वोपपत्तिरिति भावः ॥नपुंसकत्वोपपत्त्ये समाधानांतरमाह ॥ अर्थाभावेति ॥ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावेत्यादिसूत्रेणानभिमानमित्यर्थाभावेऽव्ययीभावसमासोऽयमित्यर्थः ॥ तर्हि कथमर्थः संपन्न इत्याह ॥ ॥ अभिमानाभाव इति ॥ मक्षिकाणामभावो निर्मक्षिकमितिवत् अभिमानाभावोऽनभिमानमित्यर्थः॥ अभावेऽव्ययीभावसमासत्वेऽव्ययीभावश्च अव्ययीभावो नपुंसकं स्यादिति सूत्रेणाव्ययीभावस्य नपुंसकत्वविधानात् अनभिमानमिति नपुंसकोपपत्तिरिति भावः ॥

ननु परिग्रहो देहादिः तत्त्यागः कथं साधकस्येत्यत आह ॥ परिग्रहेति ॥ अनभिमानमिति स्थितिरित्यादिक्रियाविशेषणम् ॥ अर्थाभावेऽव्ययीभावोवाऽयम्॥अभिमानाभाव इत्यर्थः ॥ पूर्वश्लोके कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोतीति कर्मणां मिथ्यात्वज्ञानादिति व्याख्या

परिग्रहत्यागोऽनभिमानम् ॥ नैव किंचित्करोतीत्यस्याभिप्रायमाह ॥ नाप्नोति किल्बिषमिति ॥ २१ ॥

॥ शारीरंकेवलंकर्मकुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

नमसत् ॥ अत्र श्लोके अन्यथा तदभिप्रायस्य वर्णितत्वादिति भावेनाह ॥ नैवेति ॥

॥ कृ० ॥ आदिपदेन कर्मफलस्नेहो विवक्षितः ॥ फलेच्छाकामः कर्मसु स्वातंत्र्यभ्रमः संकल्पः नैव किंचित्करोमीत्येतट्टीकायां कर्तृत्वाभिमानत्यागस्य संकल्पत्यागत्वोक्त्योक्तविभक्तृत्वाभिमानः संकल्प इति सूचनात् ॥ दुःफलस्नेहश्चांतःकरणवृत्तिविशेषो विजातीय एवेति ज्ञेयम् ॥ नन्वनभिमानमिति क्लीबत्वं कथम् ॥ अभिमानशब्दस्य पुंस्त्वेन तद्घटितनञ्तत्पुरुषस्यापि तत्वावश्यंभावात् ॥ परवल्लिंगं द्वंद्वतत्पुरुषयोरित्युक्तेरित्यत आह ॥ अनभिमानमितीति ॥ तथा च क्रियाविशेषणत्वात्क्लीबत्वम् ॥ क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनांतत्वं च वाच्यमित्युक्तेरिति भावः ॥ क्रियाया अश्रवणात्कथं तद्विशेषणत्वमित्यत उक्तम् ॥ स्थितिरित्यादीति आदिपदेन चक्षुषा दर्शनमित्यादिरूपेण समस्तेंद्रियव्यापारग्रहणम् ॥ तथा च स्थित्यादिक्रियाध्याहारादुक्तं युक्तमिति भावः ॥ नन्वेवं सत्यनभिमानमितिबहुव्रीहिरित्यापन्नम् ॥ अन्यथा क्रियाविशेषणत्वायोगात् ॥ तथा च वर्तिपदार्थप्रधानसमासत्यागेनान्यपदार्थप्रधानसमासांगीकारदोषः ॥ स्थितिरित्याश्रुतकल्पनं परिग्रहत्यागोऽनभिमानमिति श्रुतसामानाधिकरण्यभंगश्चेत्यस्वरसादाह ॥ अर्थाभाव इति ॥ अव्ययं विभक्तीत्यादिसूत्रेणार्थाभावे वर्तमानस्य नञाख्यान्ययस्याभिमानपदेनाव्ययीभाव इत्यर्थः ॥

---

१ एतेन फलासंगमित्यत्र फलं दुःफलमिति सूचितम् ॥ तेन च ज्ञानभक्तिवैराग्यभगवत्प्रसादादिफलेषु नासक्तित्याग इति ज्ञेयम् ॥

॥ श्री० ॥ गौण्यावृत्त्येति॥ कर्माकर्त्तरि किल्बिषप्राप्तिरूपो यो गुणस्तादृशस्याभिमानत्यागेन कर्मकर्तर्यपि साम्यात् कर्मणि प्रवृत्तोऽपि नैव किंचित्करोतीति गौण्यावृत्त्योच्यत इत्यर्थः ॥ ॥ २१ ॥ २२ ॥ अतस्तत्प्रदर्शनेनेति॥ कस्मिन् विषये गतसंग इति विषयापेक्षायां तत्प्रदर्शनेनेत्यर्थः ॥ मुक्तसदृशस्येति ॥ शरीराद्यभिमानस्योभयत्रापि साम्यादिति भावः ॥

गौण्या वृत्त्यैतदभिप्रायकथनमवधेयम् ॥ २१ ॥ कामादि वर्जने यदृच्छालाभसंतुष्टत्वादिकमर्थात्सिद्धम् तत्किमर्थमुच्यत इत्यत आह ॥ ॥ यतेति ॥ द्वंद्वातीत इत्युक्तमेव समः सिद्धावसिद्धौ चेत्यनेनोच्यत इत्यत आह ॥कथमिति ॥ किं प्रकारकमित्यर्थः ॥ इति जिज्ञासायामिति शेषः ॥ व्याख्यानव्याख्येयत्वेन न पुनरुक्तिदोष इत्यर्थः ॥ २२ ॥ यदुक्तं कामादिवर्जनं तदेव गतसंगस्येत्यनेनोच्यते ॥ त्यक्तसर्वप

यतचित्तात्मनो लक्षणमाह ॥यदृच्छालाभेति ॥ कथं द्वंद्वातीतत्वमिति आह ॥ समः सिद्धाविति ॥२२॥

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः॥ समःसिद्धावसिद्धौचकृत्वाऽपिननिबध्यते॥२२॥

गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः कर्मसमग्रंप्रविलीयते ॥ २३ ॥

उपसंहरति ॥ गतसंगस्येति॥गतसंगस्य फलस्नेहरहितस्य ॥ मुक्तस्यशरीराद्यनभिमानिनः ॥

रिग्रह इत्येतन्मुक्तस्येत्यनेन कर्मणीति नित्यतृप्त इति च ज्ञानावस्थितचेतस इत्यनेन॥अतः पुनरुक्तिरित्यत आह॥ उपसंहरतीति ॥ विक्षिप्तं पिंडीकरोतीत्यर्थः ॥गतसंगस्येति विषयसापेक्षम्॥अतस्तत्प्रदर्शनेन व्याख्याति ॥ गतेति॥ मुक्तस्येतत्साधके घटयति ॥ मुक्तस्येति ॥ अनेनाभिमानान्मुक्तस्येति वा मुक्तसदृशस्येति वा व्याख्यानं भवति ॥

॥कृ०॥ततश्चानभिमानशब्दस्य कृत्तद्धितसमासाश्चेति प्रातिपदिकत्वात्सुबुत्पत्तौ तस्य नाव्ययीभावादतोऽत्वपंचम्या इति लुक्प्रतिषेधेनामादेशेऽनभिमानमित्युपपन्नमिति भावः ॥ ननु नैव किंचित्करोतीत्यनेन कर्माकरणमुक्तम् ॥ नाप्नोतीत्यनेन किल्बिषाप्राप्तिस्तत्कथं तदभिप्रायकथनमेतदित्यत आह ॥ गौण्येति ॥ अभिमानत्यागेन कर्मकर्तरि कर्माकर्तृनिष्ठकिल्बिषप्राप्तिरूप गुणयोगादिति भावः ॥ २१ ॥ २२ ॥ कामादिवर्जनमिति ॥ फलस्नेहवर्जनमादिपदार्थः ॥ अत एव फलस्नेहरहितस्येति भाष्ये कामवर्जितस्येत्यपि गतसंगपदेन ग्राह्यम् ॥ अन्यथैतद्वाक्यास्वारस्यात् ॥ ननु ज्ञानावस्थितचेतस्त्वस्य ब्रह्मार्पणमित्यनेन प्रपंचनात्कथमुपसंहरतीत्युक्तमित्यत आह ॥ विक्षिप्तमिति ॥ विषयसापेक्षमिति ॥ संगपदोक्तकामस्नेहयोर्विषयनिरूप्यत्वादिति भावः ॥ साधके घटयतीति ॥ कामादित्यागोपायसाधकवर्गे मुक्तपदं घटयतीत्यर्थः ॥ यद्वा संसारान्मुक्ते मुक्तपदप्रसिद्धेस्तद्विरोधपरिहाराय मुमुक्षौ मुक्तपदं घटयतीत्यर्थः ॥ अभिमानादित्यध्याहारे धर्मिकल्पनप्रसंगादाह ॥ मुक्तसदृशस्येति ॥ अनेन गौणीरूपधर्ममात्रकल्पनमित्युक्तं भवति ॥

॥ श्री० ॥ **आत्मज्ञानस्यापीति** ॥ नित्यतृप्तादिरूपेश्वरप्रतिबिंबत्वादिना जीवज्ञानस्येत्यर्थः ॥ २३ ॥ **संक्षेपविस्तराभ्यामिति** ॥ कर्मण्यकर्मेति संक्षेपतः॥यस्येत्यादिश्लोकैर्विस्तरतः ॥ उपसंहृतम् ॥ गतसंगस्येत्यनेनेत्यर्थः ॥ **एतेनेति** ॥ ज्ञानावस्थितचेतस्त्वस्पष्टनरूपत्वकथनेनेत्यर्थः ॥ **यो जानातीति**॥तथाचार्पणादिकं ब्रह्माधीनमिति यो जानाति तेनैव ब्रह्मगंतव्यमिति योजना सूचिता भवति ॥ अन्यथा तेनेति तच्छब्दोऽसंगतः स्यादिति भावः॥ नेन नियामकम् ॥ नीचप्रापणेऽस्मात् शम्नीशमयुगुजनृतृदमिसिचमित्यतद् शनेहः करणइतिसूत्रेण करणेष्ट्रन् प्रत्यये प्रत्ययादेः षस्य लोपे गुणे च मतिनेत्रमिति रूपं द्रष्टव्यम् ॥ प्रक्रमविरुद्धमिति ॥

ज्ञानस्य विषयसापेक्षत्वात् तं प्रदर्शयन् व्याचष्टे ॥ज्ञानेति॥आत्मज्ञानस्याप्युपलक्षणमेतत्॥२३॥ननु कर्मस्वरूपं प्रतिज्ञाय संक्षेपविस्तराभ्यां प्रतिपाद्योपसंहृतं किमिदं ब्रह्मार्पणमित्यनेनोच्यत इत्यत आह ॥ ज्ञानावस्थितेति ॥ एतेन इति यो जानातीत्यध्याहारोऽत्र सूचितो भवति ॥ अत्रार्पणादेः ब्रह्मस्वरूपत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ सर्वमिति ॥ कुत एतदित्यत आह ॥ उक्तं हीति ॥ सर्वस्य भगवदधी

ज्ञानावस्थितचेतसः ॥ परमेश्वरज्ञानिनः ॥ २३ ॥ ज्ञानावस्थितचेतस्त्वं स्पष्टयति ॥ ब्रह्मार्पणमिति ॥
सर्वमेतद्ब्रह्मेत्युच्यते ॥ तदधीनसत्ताप्रवृत्तिमत्वात् न तु तत्स्वरूपत्वात् ॥ उक्तं हि ॥ त्वदधीनं यतःस
ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ॥ ब्रह्मैवतेनगंतव्यं ब्रह्मकर्म समाधिना ॥ २४ ॥
र्वमतः सर्वोभवानिति ॥ वदंति मुनयः सर्वं न तु सर्वस्वरूपत इति पाद्मे ॥ सर्वं तत्प्रज्ञानेत्रमिति च
॥ एतं ह्येव बह्वृचा इत्यादि च ॥ समाधिना सह ब्रह्मैव कर्म ॥ २४ ॥

नत्वे प्रमाणमाह ॥ सर्वमिति ॥ प्रज्ञा ब्रह्म नेत्रं नेतृ यस्य तत्तथोक्तम् ॥ एतं हीत्यनेन सर्वांतर्यामित्वमुच्यते ब्रह्मकर्म ब्रह्मविषयः समाधिर्यस्य सा तथोक्त इति व्याख्यानं प्रक्रमविरुद्धमिति भावेनान्यथा व्याख्याति ॥ समाधिनेति ॥

॥ कृ० ॥ ननु नित्यतृप्त इत्यादिना जीवज्ञानस्याप्युक्तत्वात्कथं परमेश्वरज्ञानमात्रग्रहणमित्यत आह ॥ **आत्मज्ञानस्यापीति** ॥ जीवज्ञानस्यापीत्यर्थः ॥ २३ ॥ **उपसंहृतमिति** ॥ पिंडिकृत्योक्तमित्यर्थः ॥ **योजानातीति** ॥ अर्पणादिकं ब्रह्माधीनमिति यो जानाति तेनैव ब्रह्म गंतव्यमिति संबंधः ॥ अन्यथा तेनेति तच्छब्दासंगतिरिति भावः ॥ नन्वेतं हीत्येतत्कथं भगवदधीनत्वे मानम् ॥ अत्र सर्वगतत्वप्रतीतिरित्यत आह ॥ **सर्वांतर्यामित्वमिति** ॥ **प्रक्रमविरुद्धमिति** ॥

॥ श्री० ॥ ब्रह्मार्पणमिति प्रक्रमस्य ब्रह्माभेदप्रतिपादनपरत्वेन त्वया व्याख्यातत्वात्समाधेर्ब्रह्मविषयकत्वव्याख्याने ब्रह्मसमाध्योर्भेदप्राप्त्या प्रक्रमविरोधः स्यादित्यर्थः॥ समाधिना सह कर्मापि ब्रह्मैवेत्युक्त्या कर्मवत्समाधेरपि ब्रह्मत्वं लब्धमित्याह ॥ समाधिरपीति ॥ २४ ॥ वक्ष्यतीति ॥ नायं लोकोऽस्त्ययज्ञस्येति यज्ञशून्यस्य निंदया यज्ञस्यावश्यकत्वं वक्ष्यतीत्यर्थः ॥ विलोपप्रसंगादिति ॥ तत्र यज्ञाभावादिति भावः ॥ द्रव्ययज्ञाइत्यस्येति ॥ दैवं देवविषयं हविस्त्यागादिरूपं यज्ञं उपासते कुर्वंतीति व्याख्याने द्रव्ययज्ञा इत्युक्तद्रव्ययज्ञस्यापि देवविषयकत्वेन पुनरुक्तताप्रसंगादित्यर्थः ॥ प्रतिज्ञातोक्तेः ॥ यज्ञभेदोक्तिः ॥ यज्ञोक्तिरित्यपि पाठः ॥क्रियाविशेषणत्वदर्शनार्थमिति ॥ यज्ञमित्यस्य भगवदुपासनाख्याक्रियां प्रति विशेषणत्वप्रदर्शनार्थमित्यर्थः ॥ एकवाक्यत्वाभावे यज्ञमित्येतत्कस्याः क्रियाया विशेषणमिति न ज्ञायत इति भावः ॥

समाधिरपि ब्रह्मेत्यर्थः ॥ २४ ॥ उत्तरप्रकरणप्रतिपाद्यं बुद्ध्यारोहार्थमाह ॥ यज्ञेति ॥ सामान्यतः कर्मस्वरूपमुक्तम् ॥ तत्र यज्ञादिभेदभिन्नम् ॥ तत्र नायं लोकोऽस्तीति वक्ष्यति॥तदनुपपन्नम् ॥ यन्यायाश्रमविलोपप्रसंगादित्याद्याशंकानिरासार्थमिति शेषः तत्र दैवं देवविषयमिति व्याख्यानमसत्॥द्रव्ययज्ञा इत्यस्य पुनरुक्तत्वादिति भावेनाह ॥ दैवमिति ॥ एवं तर्हि केचित् भगवंतमुपासत इत्युक्तं स्यात् ॥ तथाचने यज्ञभेदानाह ॥ दैवमित्यादिना॥ दैवं भगवंतम्॥स एव तेषां यज्ञः॥भगवदुपासनं यज्ञमिति क्रियाविशेषणम्॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावपरेयज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥
श्रोत्रादीनींद्रियाण्यन्येसंयमाग्निषुजुह्वति ॥ शब्दादीन्विषयानन्ये इंद्रियाग्निषुजुह्वति२६॥

यं यज्ञोक्तिरित्यत आह ॥ स एवेति ॥ स इति परामृष्टं दर्शयति ॥ भगवदिति ॥ भगवदुपासनस्य यज्ञत्वमिह कथंलभ्यतइत्यत आह॥

यज्ञमिति ॥भगवदित्यादिकंक्रियाविशेषणत्वप्रदर्शनार्थमेकमेव वाक्यम्। कृ० ॥ त्वया ब्रह्मार्पणमिति प्रक्रमस्य ब्रह्माभेदप्रतिपादकतयाव्याख्यातत्वेन समाधेर्ब्रह्मविषयत्वोक्तौ समाधिब्रह्मणोर्भेदप्राप्त्या प्रक्रमविरोध इत्यर्थः॥ २४॥द्रव्ययज्ञा इत्यस्येति॥दैवं देवविषयं यज्ञं उपासते कुर्वंतीति व्याख्यानेऽस्यापि द्रव्ययज्ञोक्तित्वपर्यवसानादिति भावः॥ क्रियाविशेषणत्वेति ॥ यज्ञमित्यस्य भगवदुपासनाख्यक्रियाविशेषणत्वप्रदर्शनार्थमित्यर्थः ॥ एकवाक्यत्वाभावे यज्ञमित्येतत्कस्याः क्रियाया विशेषणमित्यनवगमादिति भावः ॥

१ अन्ये योगिनः ज्ञानेंद्रियाणि संयमाग्निषु जुह्वति ॥ भगवत्पूजात्वेनेंद्रियनियमनं कुर्वंति ॥ अन्ये योगिनः शब्दस्पर्शादीनादिविषयान् श्रोत्रादींद्रियाख्याग्निषु जुह्वति ॥भगवत्स्वातंत्र्यं ज्ञात्वा अभिमानंत्यक्त्वा भगवत्पूजात्वेन भुंजत इत्यर्थइति रा.श्रीपादाः॥

॥ श्री० ॥ ननु तिङादिप्रत्ययार्थभूतकर्त्रादिसाधनविशिष्टप्रातिपदिकस्यैव क्रियात्वं दृष्टम् ॥ प्रकृते चोपासत इत्यस्यैव क्रियात्वेन यज्ञमित्यस्य तद्विशेषणत्वे उपासनाकर्तृयज्ञत्वं स्यादित्यत आह ॥ साधनं परित्यज्येति॥ तिङाद्याख्यातार्थभूतकर्त्रादिकारकं परित्यज्येत्यर्थः ॥धात्वर्थेति ॥ प्रकृते च धात्वर्थ उपासनम् ॥ एवं च यज्ञमिति भगवदुपासनमिति क्रियाविशेषणमितीति शब्दावर्तनेन भाष्ययोजना सूचिता भवति ॥ ततश्च दैवं भगवंतमुपासते तदुपासनं यज्ञो यथास्यात्तथा कुर्वंतीति गीता याज्यो ॥ क्रियाविशेषणत्वाद्यज्ञमिति नपुंसकनिर्देशइति द्रष्टव्यम् ॥ भिन्नक्रम इति ॥ दैवमुपासते यतस एव तेषां यज्ञ इति भिन्नक्रम इत्यर्थः ॥ अतएव भाष्ये सएव तेषां यज्ञइत्युक्तं ॥ दैवमेवेति ॥ यथा स्थान एव यद्येवशब्दस्तर्हि दैवमेवोपासत इत्येव प्राप्त्याप्रकृतयज्ञभेदकथनोपयुक्तत्वाभावेनासंगतत्वप्रसंगादिति भावः ॥ ननु यतीनां मध्येऽवांतरवैचित्र्यसत्वे हि यतीनां मध्ये केषां चिदिति वक्तव्यं तदेवकथमित्याशंकायामस्त्यवांतरवैचित्र्यमित्याशयेनकेषांचिदित्यस्यार्थमाह ॥ केषां चित्परमहंसानामिति ॥ यतीनां कुटीचकबहूदकहंसपरमहंसभेदेन चतुर्विधत्वात्तन्मध्ये परमहंसानां भगवदुपासनव्यतिरिक्तं बाह्यं यज्ञादिकं नास्त्येव ॥ यथोक्तं गीतातात्पर्ये ॥ तत्रापिशुद्धसत्वास्तु परमहंसाः प्रकीर्तिताः ॥ धर्माः परमहंसानां बाह्या एवशमादिका इति ॥ ननु केषां चिदित्येतत्परमहंसानामिति कुतो व्याख्येयं कुटिचकादीनामित्यपि व्याख्याने बाधकाभावादित्यत आह ॥ अन्येषामिति ॥ कुटिचकबहूदकहंसानामित्यर्थः ॥ यथोक्तम् ॥ तत्रैव हंसोबहूदःकुटिस्थो वनस्थो नैष्ठिको गृही ॥ क्रमाद्बाह्याधिका बाह्यं कर्मैषामधिकं यत इति ॥ त्रिदंडी शिखायज्ञोपवीतवान् ॥ याव—

॥ साधनं परित्यज्य धात्वर्थमात्रस्य विशेषणं क्रियाविशेषणम् ॥ अवधारणार्थं दर्शयति ॥ नान्यदिति ॥ अन्यद्भगवदुपासनात् ॥ अनेन एव

॥नान्यत्तेषामस्ति यतीनां केषां चित् ॥

शब्दो भिन्नक्रम इत्युक्तं भवति ॥दैवमेवोपासते नान्यदिति तु प्रकृतासंगतम्॥केषां चित्परमहंसानाम्॥अन्येषां बाह्यकर्मणोऽपि भावात् ॥

॥ कृ० ॥ नन्वेवं तर्हि भाष्ये यज्ञमिति पर्युपासत इत्युक्तक्रियाविशेषणमिति वाच्यम् ॥ तत्कथं भगवदुपासनमित्युक्तमित्यत आह ॥ साधनं परित्यज्येति ॥ आख्यातार्थकर्त्रादिकारकं परित्यज्येत्यर्थः ॥ अनेन यज्ञमिति भगवदुपासनमिति क्रियाविशेषणमित्येवमितिशब्दावृत्त्याभाष्ययोजना सूचिता ॥ भिन्नक्रमइति ॥ पर्युपासत एवेत्यत्र वृद्धव्यवधिविवेकेन धात्वर्थेन संबंध इत्यर्थः ॥ पर्युपासत एवेति भिन्न क्रम इति वा ननु यतिशब्देनान्यप्रतीतेरभावात्केषां चिदिति व्यर्थमित्यत आह॥परमहंसानामिति ॥ हंसादिव्यावर्तकं तदितिभावः ॥ अन्येषामिति ॥ हंसादीनामित्यर्थः ॥

---

१ आख्यातार्थं परित्यज्य केवलेन उपासनेनेत्यर्थः॥

॥ श्री० ॥जीवं पुत्रदत्तान्नादः कुटीच. त्रिदंडी शिखायज्ञोपवीतवान ग्रामैकरात्रिर्बहूदः यज्ञोपवीतवान् एकदंडी शिखारहितो हंस. शिखायज्ञोपवीतहीन एकदंडी परमहंस इति तात्पर्य टीकानुसारेण ध्येयम ॥ यतिशब्दस्य सामान्यवाचित्वमगीकृत्य केषां चिदित्येतत परमहंसपरत्वेन पूर्वं व्याख्यानं इदानीं सामान्यशब्दस्य विशेषपरत्वमंगीकृत्य यतिशब्दः परमहंसपर इत्याशयेनाह ॥ यद्वेति ॥ आत्मानमात्मनैवेत्यादि ॥ तथा च यज्ञमात्मान यज्ञेनैवात्मनैव मनसा वा ब्रह्माग्नावुपजुह्वति ब्रह्मणैकीभावयंतीत्यर्थो द्रष्टव्यः ॥ अपव्याख्यानमिति ॥ यज्ञेनेत्यस्यात्मना मनसा चेत्यपव्याख्यानमित्यर्थः ॥ तथा च यज्ञं भगवतमिति व्याख्यानेन यज्ञमात्मानमित्यपव्याख्यानमपि निरस्तं वेदितव्यम ॥ एतव्द्याख्यानमिति ॥

यद्वा केषां चिदित्यस्यैव व्याख्यानं यतीनामिति ॥ ब्रह्माग्नावित्यस्यात्मानमात्मनैव मनसा वा ब्रह्मणैकीभावयंतीति व्याख्यानमसदि ति भावेन यज्ञमित्येतव्द्याचष्टे ॥ यज्ञमिति ॥ भगवतो यज्ञशब्दार्थत्वं कुत इत्यतआह ॥ यज्ञेनेति ॥ यज्ञेनेत्यस्यार्थमाह ॥ यज्ञेनेति ॥ एतश

यज्ञं भगवंतम् ॥यज्ञेन यज्ञम्॥यज्ञोविष्णुर्देवतेत्यादिश्रुतिः॥यज्ञेन प्रसिद्धेनैव॥यज्ञं प्रति जुव्हतीति सर्वत्र समम्॥

ब्देनापव्याख्यानं निराकरोति ॥ एवं चेयज्ञमित्यस्यकथमन्वयइत्यत आह ॥ यज्ञमिति एतव्द्याख्यानमन्यत्रातिदिशति ॥ इति सर्वत्रेति ॥

॥ कृ० ॥ ब्राह्मकर्मणः उदकांजलिप्रदानादिरूपस्य ननु पार्थएव भनुरेव इत्यस्मात्पार्थिन्योयनुरेव नतिरत्यं एव तेषां यज्ञ इत्यनेनापि भगवद्रूपामनान्यो यज्ञो नास्तीति प्रतीयते ततश्च हंसादीनामप्यन्ययज्ञाभावात्केषां चिदिति व्यर्थमित्यत आह ॥ यद्वेति ॥ न चेदमवास्तु व्याख्यान ॥ नान्यदिति नपुंसकान्यशब्दस्वारस्याय तद्व्याख्यानप्रवृत्तेः ॥ अस्मिंश्च व्याख्याने सामान्ये नपुंसकत्वोपपत्तेरिति ॥ ब्रह्माग्नावित्यस्योत ॥ अत्र परभाष्यं ॥ ब्रह्मशब्देन निर्विशेषं ब्रह्मोच्यते ॥ ब्रह्म नामाग्निश्चेति होमाधिकरणत्वविवक्ष या ब्रह्माग्निः तस्मिन्ब्रह्माग्नौ अपरे ब्रह्मविदः यज्ञमात्मानंसोपाधिकमात्मानं यज्ञेनैवात्मनैव सोपाधिकेन मनसा वा उपजुव्हति प्रक्षिपंतीति ॥ तस्येदं तात्पर्यं॥ब्रह्मणैकीभावयंतीति ॥ ॥ एतशब्देनेति ॥ अनेनैवशब्दो न पूर्वान्वयी ॥ किं तु एव मेव व्याख्येयमिति पृथगन्वतीत्युक्तं भवति॥ तेन यथाश्रुतान्वये तृतीयांतयज्ञशब्दापव्याख्याननिरासकत्वेऽपि कथमपव्याख्या नमात्र निरासकत्वमित्यपास्तम् ॥ निराकरोतीति ॥ विष्णुयज्ञयोर्यज्ञशब्दार्थत्वे प्रमाणवत्सोपाधिकात्ममनसोस्तदर्थत्वे प्रमाणाभावाज्जीवब्रह्मैक्यस्य सर्वप्रमाणविरुद्धत्वाच्चेति भावः ॥

१ तच्छब्देनोपासनपरामर्शेऽपि यज्ञ इति विधेय लिंगता यत कर्म सकर्तीतिवत ॥ २ विशेष्यलिंगत्वादन्यशब्दस्य कर्मेत्यस्यैवोपस्थित्याहं सादिव्यावृत्तिपरत्वेन व्याख्यानमित्यर्थः ॥

॥ श्री० ॥ यज्ञशब्दव्याख्यानमित्यर्थः ॥ अतिप्रसंगः ॥ यज्ञशब्दाभाववत्यपि स्थले एवं व्याख्यानरूपः ॥ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रत इति श्रुत्यर्थं वदन्नेवोत्तरवाक्यमव तारयति ॥ एवं तर्हीति ॥ बर्हिषि ॥ यज्ञे ॥ प्रौक्षन ॥ हिंसनार्थं प्रोक्षणादिकं कुर्वंतः ॥ २५ ॥ २६ ॥ ॥ २७ ॥ बहुव्रीहिरिति॥ द्रव्यं यज्ञो येषां ते द्रव्ययज्ञा इति बहुव्रीहि रित्यर्थः ॥ तत्पुरुषत्व इति ॥ द्रव्यस्येत्यादिषष्ठ्यादितत्पुरुषत्व इत्यर्थः ॥ पुरुषेति ॥ अपरं इत्युक्तेत्यर्थः ॥ ॥ भावार्थ इति ॥ यजनरूपधात्वर्थप्रतिपादक इत्यर्थः ॥

अतिप्रसंगनिवारणाय सर्वत्रेत्युक्तं विवृणोति ॥तमिति ॥एवं तदग्रतो जातं तं पुरुषं यज्ञं भगवंतं प्रति बर्हिषि प्रौक्षन्नित्यर्थः स्यात्॥ स च निर्मूल इत्यतआह ॥ उक्तं चेति ॥ २५ ॥ २६ ॥ आत्मसंयमेत्येतद्दुर्गमार्थत्वाव्द्याख्याति ॥ आत्मेति ॥ आत्मनो मनसः ॥ आत्मसंयमा

तं यज्ञमित्यादौ उक्तंच॥ विष्णुरुद्रेण पशुना ब्रह्मा ज्येष्ठेन सूनुना ॥ अयजन्मानसे यज्ञे पितरं प्रपि

सर्वाणींद्रियकर्माणि प्राणकर्माणिचापरे ॥ आत्मसंयमयोगाग्नौ जुव्हति ज्ञानदीपिते२७॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे॥स्वाध्यायज्ञानयज्ञाश्च यतयः शंसितव्रताः॥२८॥

तामह इति ॥ २५॥२६॥आत्मसंयमाख्योपायाग्नौ ॥ २७ ॥ द्रव्यं जुव्हतीति द्रव्ययज्ञाः ॥

ख्योऽयमुपायः ॥ स एवाग्निः ॥ २७ ॥ ननु द्रव्यं यज्ञो न भवति ॥ तत्कथं बहुव्रीहिः ॥ तत्पुरुषत्वे च कथंपुरुषसामानाधिकरण्यमित्यत आह ॥ द्रव्यमिति ॥ अनेन नायं यज्ञशब्दो भावार्थः ॥

॥कृ०॥ननु यज्ञेनेत्यस्य प्रसिद्धयज्ञार्थत्वे द्रव्ययज्ञा इत्यस्य पुनरुक्तत्वप्रसंग इति चेन्न॥तपआदेः परमेश्वरार्पणबुद्ध्या तत्र होमवत्प्रसिद्धयज्ञानुष्ठानानंतरं अयं यज्ञो हविः तद्ब्रह्माग्नौ जुहोमि तत्पूजार्थमिति मानसहोमस्यात्र विवक्षितत्वात् ॥ अत एव यज्ञेनेति तृतीयोपपत्तिरिति बोध्यम ॥ अतिप्रसंगेति ॥ यज्ञेन यज्ञमित्यादावेवं व्याख्याननिरासायेत्यर्थः ॥ अग्रतो जातमिति ॥ ज्येष्ठपुत्रं रुद्रमित्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ पुरुषसामानाधिकरण्यार्थेति ॥ यतय इत्युक्तयतिरूपपुरुषसामानाधिकरण्यमित्यर्थः ॥

१ तृतीया ॥ २ विशेषणेन यतय इति विशेष्यमाक्षिप्यते ॥ तदर्थो यत्नशीला इति ॥ तद्युक्तिं विहायापर इत्युक्तिः सन्निहितत्वादिति द्रष्टव्यम् ॥

॥ श्री० ॥ कर्त्रर्थ इति ॥ यजतीति यज्ञ इत्यर्थः ॥ कर्त्रर्थमेव दर्शयति ॥ याजका इति ॥ होमकर्तार इत्यर्थः ॥ एतदाशंकेति ॥ ननु तपो यज्ञो न भवति [illegible] तत्पुरुषत्वे च कथं पुरुष सामानाधिकरण्यमिति शंकापरिहारायैवेत्यर्थः ॥ एवमेवेति ॥ यज्ञशब्दस्य कर्त्रर्थत्वमभिप्रेत्येत्यर्थः ॥ तपसो यज्ञा याजका इत्यत्र [illegible] वप्रकारेणेति ॥ इदं तपो हविरित्युक्तत्वप्रकारेण तदर्पणे कृते सत्येव यज्ञत्वं संपद्यत इति भावः ॥ २८ ॥ केचिद्व्याचक्षत इति ॥ यथोक्तं तदीयभाष्ये ॥ अपाने [illegible] वृत्तिं पूरकेण जुह्वति पूरकस्थले प्राणमपानेनैकीकुर्वंति ॥ तथा प्राणे ऊर्ध्ववृत्तौ अपानमधोवृत्तिं रेचकेन जुह्वति रेचकस्थलेऽपानं प्राणेनैकी कुर्वंति ॥ तथा कुंभकेन [illegible] गती रुंध्यात् ॥ एवंप्राणापानगती रुध्वा कुंभकं संपाद्य कुंभकरेचकपूरकैस्त्रिभिः प्राणायामैः प्राणायामपरायणा भवंतीत्यर्थ इति ॥ अध्याहारादीति॥ पूरकेन रेचकेन [illegible] भवंतीत्यध्याहारः स्पष्टः आदिपदेन जुह्वतीत्यस्यैकीकरणार्थकत्वमशाब्दत्वम् ॥ अपानप्राणशब्दयोर्वृत्तौ लक्षणा च स्यादिति ग्राह्यम् ॥

किंतुकर्त्रर्थःतथा च द्रव्यस्य यज्ञा याजका इत्यर्थइत्युक्तं भवति ॥ एतदाशंकापरिहारायैव तपोयज्ञाइत्येतदप्येवं व्याचष्टे॥ तप इति॥तत्र [illegible] ॥योगयज्ञा इत्यादिकमप्येवमत्र व्याख्येयमिति दर्शयति ॥ इत्यादीति ॥ तपसो होमः कथमित्यतआह ॥ इदमिति॥ तपश्चरणमेव तपो[illegible]

तपः ॥ परमेश्वरार्पणबुद्ध्या तत्र जुहुतीति तपोयज्ञा इत्यादि ॥ इदं तपो हविस्तद्ब्रह्माग्नौ जुहोमि ॥
॥ तत्पूजार्थमिति होमः ॥ तदर्पणमेव होमबुद्धिः ॥ २८ ॥

किं न स्यादित्यत आह ॥ तदर्पण एवेति ॥ अनेनैव प्रकारेण यज्ञत्वसंपादनं नान्यथेत्यर्थः ॥२८ ॥अपानेजुव्हतीत्येतत् पूरकरेचककुंभकप रतया केचिद्व्याचक्षते ॥ तदसत ॥ अध्याहारादिप्रसंगात ॥

॥ कृ० ॥ कर्त्रर्थ इति ॥ यद्यपि यजयाच यतविच्छप्रच्छरक्षोनङिति यजेर्नङ्विहितः स चभावे ॥ अकर्तरि च कारक इत्यधिकाराद्भावादावेव न कर्तरि ॥ तथाऽपि कृत्यल्युटोबहुलमित्यत्र बहुल मिति योगविभागेन कृन्मात्रस्यार्थे व्यभिचारोक्तेः कर्तर्यपिनङ्प्रत्ययो युक्त इत्यभिप्रेत्यैवमुक्तम ॥ एतदाशंकेति ॥ तपो यज्ञो नभवति तत्कथं बहुव्रीहिः ॥ तत्पुरुषत्वे च कथं पुरुषसामानाधिकरण्यमित्याशंकेत्यर्थः ॥ २८ ॥ केचिद्व्याचक्षत इति ॥ अपाने अपानवृत्तौ प्राणंप्राणवृत्तिं जुह्वति प्रतिक्षिपंति ॥ पूरकप्राणायामंकुर्वंतीत्यर्थः ॥ तथाऽपरे प्राणेऽपानं जुव्हति रेचकप्राणायामं कुर्वंति ॥ मुखनासिकाभ्यां वायोर्निर्गमनं प्राणगतिः तद्विपर्ययेणाधोगमनमपानगतिः ॥ एवं विधे प्राणापानगती रुध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराःभवंति ॥ कुंभकाख्यप्राणायामं कुर्वंतीत्येवं केचिद्व्याचक्षत इत्यर्थः ॥ अध्याहारादिति

॥ श्री० ॥ कुंभकार्थत्वेनेति ॥ त्रयाणामपि प्राणायामत्वं हि पराभिप्रेतं तदयुक्तं रेचकपूरकयोः ॥ कुंभकार्थत्वेन पृथक्प्राणायामार्थत्वाभावात्॥ प्राणापानयोरुभयोरपि निरोधनं हि प्राणायामः ॥ स च कुंभक एव ॥ यथोक्तं तंत्रसारे ॥ प्राणापानौ रेचयित्वा पूरयित्वा च कुंभके स्थितिः प्राणायामउक्त इति ॥ परायणा इत्यतः ॥ परमिति ॥ तथा च अपरे प्राणायामपरायणाः प्राणापानगती रुध्वा प्राणमपाने जुह्वति अपानं च प्राणे इति योज्यम् ॥ अभिप्रायमिति॥प्राणमपाने जुह्वति अपानं च प्राणे इत्यनयोः रेचकपूरकस्वरूपनिरूपण परत्वप्रतीतिनिरासायाभिप्रायमाहेत्यर्थः ॥ तथा चैवं समग्रश्लोकेन कुंभकमात्रविवरणेन कुंभकस्थितिरूपप्राणायामो विवृत इति ध्येयम् ॥ एवशब्देनेति॥तथा च कुंभकस्था भवंतीत्येवार्थ इत्येवशब्दान्वयो द्रष्टव्यः ॥ २९ ॥ वृत्तिर्मास्त्विंद्रियेषु संकोचादिति ॥सर्वेंद्रियवृत्तीनां संकोचे शरीरधारणासंभवाद्वृत्तिमस्त्वित्युक्तम् ॥ स्वल्पवृत्तिमस्त्वित्यर्थः ॥ इंद्रियैर्बहुतरा विषयवृत्तीः परित्यज्य देहधारणोपयुक्ता एवेंद्रियवृत्तीः कुर्वंतीत्यनेनेंद्रियवृत्तीनामिंद्रियेषु संकोच इति भाव इत्याहुः नन्वपरे नियताहाराः प्राणानित्यनेनोक्तपक्षस्य श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वतीत्यनेनैवोक्तत्वात्पुनरुक्तिरित्यत आह॥ एवशब्देनेति ॥ तं प्रकारमेव विवृणोति ॥

पूरकरेचकयोः कुंभकार्थत्वेनपृथक्प्राणायामत्वाभावाच्चेति भावेन कुंभकमात्रपरतया योजयति॥अपर इति॥परायणा इत्यतः परं प्राणापानगती रुध्वेति द्रष्टव्यम् ॥ अभिप्रायमाह ॥ कुंभकस्था एवेति ॥ एवशब्देनापव्याख्यानंव्यावर्तयति॥२९॥अपरे नियतेत्यत्र प्राणानां प्राणेषु कीदृशो

अपरे प्राणायामपरायणाः ॥ प्राणमपाने जुह्वति ॥ अपानंच प्राणे ॥ कुंभकस्था एवं भवतीत्यर्थः

अपानेजुह्वति प्राणं प्राणेऽपानं तथाऽपरे ॥प्राणापानगती रुध्वा प्राणायामपरायणाः॥२९॥
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०॥
यज्ञशिष्टामृतभुजो यांति ब्रह्मसनातनम्॥ नायंलोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥३१॥

॥ २९ ॥नियताहारत्वेनैव प्राणशोषात्प्राणान् प्राणेषु जुह्वति ॥

होमः नियताहारत्वस्य कथं तत्रोपयोग इत्यत आह ॥ नियतेति ॥ प्राणशोषादिंद्रियवृत्तीनां वृत्तिमस्त्विंद्रियेषु संकोचाज्जुह्वतीत्युच्यत इति शेषः॥ एवशब्देन श्रोत्रादीनीत्यतोभेदं दर्शयति ॥ कृ० ॥भवतीत्यध्याहारः॥आदिपदेन वाक्यभेदो ग्राह्यः ॥ २९ ॥ नियताहारत्वस्येति ॥द्वौ भागौपूरयेदन्नैस्तोयेनैकं प्रपूरयेत् ॥ मारुतस्यप्रचारार्थं चतुर्थमवशेषयेदित्युक्तनियताहारत्वस्येत्यर्थः ॥ ननु मारुतवान्निराहारत्वस्य शोषकत्वानुपलंभात् ॥ कथं प्राणशोष इत्यत आह ॥ इंद्रियवृत्तीनामिति ॥

॥ श्री० ॥ तत्र प्रत्याहारेणेति ॥ पूर्वं श्रोत्रादीन्द्रियाणां नियमने विषयेभ्यः प्रत्याहारः कारणमुक्तं अत्र नियताहारत्वं कारणमुच्यत इत्यर्थः ॥ वेत्यनूद्य तद्नंतरशेषं पूरयति ॥ वा प्राणानामिति ॥ नन्ववराणामुत्तमार्थानत्वचिंतनमेवप्राणानां प्राणेषु होमः ॥ अयमेको यज्ञ इत्यस्मिन्पक्षे नियताहारत्वस्योपयोगाभावाद्वैयर्थ्यमित्यत आह ॥ अस्मिन्पक्ष इति ॥आहारनियमनमेवैको यज्ञ इतिभावः ॥ पूर्वेणेति ॥ नियताहारत्वेनैव प्राणशोषादिति पूर्वेणेत्यर्थः ॥३०॥ ३१ ॥ अहं हीनीति॥तथा चाहंहीतिसर्वयज्ञभोक्तृत्वस्योच्यमानत्वेन भोक्तृत्वस्य च मुखाभावेऽसंभवान्मुखइत्युक्तमिति भावः ॥ उपासनादीनामिति॥दैवमेवापरे यज्ञमित्युक्तोपासनादिरूपयज्ञानामित्यर्थः ॥अत्र विमोक्ष्यस इति सन्नंतान्मुचः कर्मकर्तरि लडिति॥

तत्र प्रत्याहारेणात्र नियताहारत्वेनेति ॥ प्राणानित्यादिकं प्रकारांतरेण व्याचष्टे ॥ यच्छेदिति ॥ वाग्वाचंमनसि यच्छेत् ।तन्नियतां ध्यायेत् अवराणामिंद्रियदेवतानां उत्तमेंद्रियदेवतानियतत्वचिंतनं प्रकारार्थः॥वा प्राणानां प्राणेषु होम इति शेषः॥अस्मिन्पक्षे नियताहार इति पृथक् यज्ञो ज्ञातव्यः ॥ इदमेवास्तु व्याख्यानं श्रौतत्वात्किं पूर्वेणेत्यत आह॥अन्यदपीति॥३०॥३१॥ब्रह्मणो मुखे वितता इत्यस्य वेदप्रतिपादिता इति व्या

यच्छेद्वाङ्मनसी प्राज्ञ इत्यादिश्रुत्युक्तप्रकारेण वा ॥ अन्यदपि ग्रंथांतरे सिद्धम् ॥ यदस्याल्पाशनं तेन प्राणः प्राणेषु वै हुता इति ॥ ३० ॥ ३१ ॥ ब्रह्मणः परमात्मनो मुखे ॥ अहं हि सर्वयज्ञानां

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥ कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥३२॥

॥ भोक्ता च प्रभुरेव चेति ॥ वक्ष्यति ॥ मानसिकवाचिककायिककर्मजा एव हि ते सर्वे॥

ख्यानमसत्॥मुखशब्दवैयर्थ्यादित्यभिप्रायेणाह ॥ब्रह्मण इति॥परमात्मनः सर्वयज्ञभोक्तृत्वं कुतो भगवत्संमतमित्यत आह॥अहं हीति॥उपासनादीनां कर्मजत्वाभावात् कर्मजान्विद्धि तान् सर्वान् इत्ययुक्तमित्यत आह॥ मानसेति॥अत्र विमोक्ष्यस इति सन्नंतान्मुचःकर्मकर्तरि लट्॥

॥ कृ० ॥ प्रकारार्थः॥ प्रकारशब्दार्थः वाशब्दात परमध्याहार्यं दर्शयति ॥ वा प्राणानामित्यादिना॥३०॥३१ ॥ सन्नंतान्मुचेरिति॥मुचेः सनि द्वित्वे मुचोऽकर्मकस्यगुणोवेति गुणेऽत्रलोपोभ्यामस्येत्यभ्यामलोपे च मोक्षति भवति॥ ततः सन्नंतधात्वर्थकर्मणः कर्तृत्वविवक्षायां कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवद्भावेन कर्मार्थलट्प्रत्ययवत् यगात्मनेपदयोः सतोर्मोक्ष्यत इति भवतीति भावः ॥

॥ श्री० ॥ अत्र विमोक्ष्यस इत्यस्य आत्मानं मोक्तुमिच्छसीत्यर्थस्याभिप्रेतत्वेन मोक्षकर्तृभूतस्यैवात्मनः कर्तृत्वं विवक्षितं कर्मवत्कर्मणा तुल्य इति कर्तुः कर्मवद्भावमुच्यते वत्सः स्वयमेवेति प्रयोगात् इत्यवधेयम् ॥ तत्रश्चायं साधनप्रकारः ॥ विपूर्वकात् मुच्लृमोक्षणइत्यस्मादिच्छायां सनीति सन्प्रत्यये नकारलोपधातोरभ्यासे मुमुत्र इति जाते अत्र लोपोऽभ्यासस्येत्यभ्यासलोपे मुत्र इति जाते मुचोऽकर्मकस्य गुणो वा अकर्मकस्य मुचो गुणो वा स्यात्सकारादौ प्रत्यये पर इति सूत्रेण उकारस्य ओकारो गुणः अत्र कर्मणः कर्तृत्वस्याभिप्रेतत्वेन स्वतंत्रस्य कर्तृभिन्नस्य कर्मणोऽभावादकर्मकत्वं एवं च मोच्समिति जाते चोः कुरिति चकारस्य कुत्वे मोकस्येति जाते प्रत्ययादेः सइति सन्प्रत्यये सकारस्य षत्वे कषयोर्योगे क्षेतिजाते विमोक्षेति ॥ संन्नतः शब्दः पश्चात् सार्वधातुके यगिति यक्प्रत्यये ककारलोपे अतोलोप इत्यनेन क्षकारस्थस्य अकारस्य लोपे विमोक्ष यविमोक्ष्येति जाते पश्चाल्लट् तस्य चात्मनेपदिनि मध्यमपुरुषे थास् इत्यादेशे थासःसे इति थासः सेभावे विमोक्ष्यसे इति लडात्मनेपदिनि मध्यमपुरुषैकवचने रूपं भवमे इतिवद्भवतीति द्रष्टव्यम्॥तत्कथमिति॥सर्वेषां यज्ञानां कर्मजत्वज्ञानेन मोक्षार्थं युद्धादिकं कर्तव्यमितीच्छा कथं भविष्यति व्यधिकरणत्वादित्यर्थः ॥ कृत्वा॥अल्पबुद्धिमान्॥इदमुक्तं॥कर्मजान विद्धीत्येतदुक्तम्॥कर्मेति॥मानसिककर्मत्वादित्याशयः ॥

तस्य प्रकृतोपयुक्ततयाऽर्थमाह ॥ एवमिति ॥ एवं ज्ञात्वाऽपि यदिसर्वेपि यज्ञाः कर्मजा इति जानासि तर्हि तानि युद्धादीनि स्वविहितानि कर्माणि कृत्वैव विमोक्ष्यसे संसारात्मानं मोक्तुमिच्छसि ॥सर्वेषां कर्मजत्वज्ञाने तवैव मोक्षार्थं युद्धादिकं कर्तव्यमितीच्छा भविष्यतीत्यर्थः॥ न

एवं ज्ञात्वा तानिकर्माणि कृत्वा विमोक्ष्यसेयुद्धं परित्यज्य यन्मोक्षार्थं करिष्यसि तदपि कर्म ॥ अतो ॥ विहितं न त्याज्यमिति भावः ॥ ३२ ॥

तत्कथमित्यत आह ॥ युद्धमिति ॥ यद्येवमनेके यज्ञास्तर्हि किंकर्मात्मकेन युद्धेन उपासनादिनैवाहं कृतीस्यामित्यर्जुनस्य हार्दं ज्ञात्वा भगवतेदमुक्तम् ॥ तस्यायं भावः ॥ मोक्षार्थं यदुपासनादिकं युद्धंपरित्यज्य करिष्यसितदपि कर्म॥

॥ कृ० ॥ तस्यायं भाव इति ॥ कर्मजानिति गीतावाक्यस्य भाष्यकारैरुच्यमानो भाव इत्यर्थः ॥

॥ श्री० ॥ **तथाचेति** ॥ युद्धपरित्याग इत्यर्थः ॥ **न त्विति** ॥ युद्धस्यापि विहितकर्मत्वादिति भावः ॥ **एवं जानन इति** ॥ युद्धादीनामपि कर्मत्वेन तत्त्यागे विहितातिक्रम एव कृतो भवति न कर्मत्याग इत्येवं जानन् इत्यर्थः ॥ **लृडंतत्वपक्ष इति** ॥तथा च विमोक्ष्यस इत्यस्य मुक्तो भविष्यसीत्यर्थः ॥ साधनप्रकारस्त्वित्थम ॥ विपूर्वकात मुच्‌ अस्मात्‌ लृडंतत्वेन स्यता सील्लृलुटोरित्यनेन स्यप्रत्यये मुचोऽकर्मकस्य गुणो वेति गुणे चकारस्य कुत्वे सस्य षत्वे कषसंयोगे क्षनि जाते विमोक्ष्य विमोक्ष्येति निष्पन्ने अनंतरं लृट्प्रत्यये आत्मनेपदिनि मध्यमपुरुषे लृटस्थासादेशे थास. सेभावे विमोक्ष्यसे इति लृडात्मनेपदिनि मध्यमपुरुषैकवचने रूपं भविष्यस इतिवद्भवतीति द्रष्टव्यम ॥ ओमितिचेत्त्राह ॥ **तथा चेति** ॥ कर्मजत्वज्ञानमात्रसंपादनेनैवाहं कृती स्यां किं कर्मकरणेनातः कर्मविधानं व्यर्थमित्यर्थः ॥ **एवमिनीति** ॥ तथा च न ज्ञानमात्रेण मोक्षः किं त्वेवं ज्ञात्वा तानि कर्माणि कृत्वैव विमोक्ष्यसे मुक्तो भविष्यसीति भाष्यार्थः ॥ **अर्जुन शंकाया इति** ॥ यद्येवमनेकयज्ञास्तर्हि किं कर्मात्मकेन युद्धेन उपासनेनैवाहं कृती स्यामित्यर्जुनस्य हार्दशंकाया इत्यर्थः ॥ युद्धमितिभाष्यस्याभिप्रायस्तु पूर्वोक्त एव द्रष्टव्यः ॥ विमोक्ष्यस इत्यस्यात्मानं स्वयमेव मोक्तुमिच्छसि ॥ मुक्तो भविष्यसीत्यर्थद्वयमभिप्रेत्य पक्षद्वयमिति ध्येयम ॥ ३२ ॥ ननूपासनायाः कर्मसाध्यत्वात्कथं कर्मागत्वमित्यत आह ॥ **कर्मसमृद्ध्यर्थानीति** ॥ उपासनानि ॥ उद्गीथाद्युपासनानि ॥ **वेद एवेति** ॥ समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इति छांदोग्योपनिषदि कथितत्वादिति भावः ॥ ॥ कृ० ॥ **इत्यर्थ इति** ॥ इतिभाष्यवाक्यार्थ इत्यर्थः ॥ **लृडंतत्वपक्षइति** ॥ मुचेर्लृटि स्वरितत्वादा

तथा च त्वया विहितातिक्रम एव कृतः स्यात ॥ न तु कर्मत्यागः ॥ अत एवं जानतस्तव विहितयुद्धादिकं न त्याज्यमितिबुद्धिर्भविष्यतीत्यर्थः ॥ विमोक्ष्यस इतिलृडंतत्वपक्षेऽयमर्थः ॥ किं सर्वयज्ञानां कर्मजत्वज्ञानमात्रेण मोक्षः॥ तथा च कुरु कर्मैवेति विधानं व्यर्थमित्यत

॥ अखिलमुपासनाद्यंगयुक्तम् ॥

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

आह ॥ एवमिति ॥ कर्मजान्विद्धीत्यनेन कथमर्जुनस्य शंकापरिहार इत्यत आह ॥ युद्धमिति ॥ ३२ ॥ सर्वं कर्मेत्युक्तत्वात् अखिलमिति पुनरुक्तिरित्यत आह ॥ अखिलमिति ॥ कर्मसमृद्ध्यर्थान्युपासनानि वेद एवोच्यंते ॥

त्मनेपदे थासि थासः सेभावे स्यप्रत्ययेऽनुदात्तत्वादिडभावे पुगंतेति गुण चोः कुरिति कुत्वे षत्वे च मोक्ष्यस इति रूपसिद्धिः ॥ **अर्जुनशंकाया इति** ॥ यद्येवमनेके यज्ञाइत्यादिशंकाया इत्यर्थः ३२ ॥ ननूपासनायाः कर्मसाध्यत्वात्कथं कर्मागत्वमित्यत आह ॥ **कर्मसमृद्ध्यर्थानीति** ॥ उद्गीथाद्युपासनानीत्यर्थः ॥ ओमित्येतदक्षरमुद्गीथमुपासीतेति उपासना विधिप्रकरणएषो एव समृद्धिर्यदनुज्ञासमर्धयिता ह वै कामानां भवति य एवं विद्वानक्षरमुद्गीथमुपास्त इति श्रवणादिति भावः ॥

॥ श्री० ॥ सशेषमिति ॥ अंगानुक्तौ सशेषत्वैवेति भावः ॥ ३३ ॥ तस्य मोह इति ॥ यज्ज्ञात्वा पुनर्मोहं एवं इदानीमिव उत्तरत्र न यास्यसीत्युक्त्या मोह उच्यत इत्यर्थः ॥ मा त्विवनीति ॥ स हि ज्ञानीनरांश इंद्रश्चपार्थोऽस्मीत्येवमादिज्ञानि गणनाच्चेत्यादिना द्वितीयाध्याये प्रमाणमुक्तमस्तीत्यर्थः ॥ ३४ ॥ ननु गीतायां द्रक्ष्यसीति भविष्यदर्थकलृट्प्रत्ययांतस्यपश्यसीति वर्तमानार्थकलट्प्रत्ययांतपदेनव्याख्यानं कुतः कृतमित्यत आह ॥ द्रक्ष्यसीत्यनादिति ॥ ३५ ॥

खिलं सशेषं न भवतीति अखिलमित्यर्थः ॥ ज्ञाने परिसमाप्यत इत्यस्य ज्ञाने जाते नकर्म कार्यमित्यन्यथाप्रतीतिनिवारणाय तात्पर्यमाह॥ ज्ञानेति ॥ परिसमाप्तिः संपूर्णता सफलता ॥ सा चज्ञाने सर्वातिसन्निधानाज्ज्ञानलक्षणेनैव फलेनेति भावः ॥३३॥ तद्विद्धीत्युक्तत्वात् इदानीमर्जुनो न ज्ञानीति प्रतीतिं निवारयति ॥ इदानीमपीति ॥ तद्विद्धीत्यधिकज्ञानार्थमुक्तमिति भावः ॥ज्ञानी चेत्तर्हियज्ज्ञात्वेति तस्य मो

ज्ञानफलमेवेत्यर्थः ॥ ३३ ॥ इदानीमभिज्ञान्येव ॥ तथाऽप्यभिभवान्मोहः॥ मातूक्ता ॥ ३४ ॥ येन ज्ञा

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥३५॥

॥ नेनमप्यात्मभूते सर्वभूतान्यथो तस्मादेव मोहनाशात्पश्यसि ॥ ३५॥

हः कथमुच्यत इत्यत आह॥ तथाऽपीति ॥ अभिभवात ज्ञानस्य ॥ अर्जुनस्यज्ञानित्वे सिद्धे भवेदेतत् ॥ तत्रैव किंप्रमाणमित्यत आह ॥ मा त्विति ॥ ३४ ॥ येन भूतानित्यस्य येन मोहेन सर्वाणि भूतान्यत्मानिस्वस्मिन्नथो मयि च द्रक्ष्यसीत्यन्यथाप्रतीतिनिरासार्थमाह ॥ येनेति ॥ आत्मभूते सर्वांतर्यामिणि ॥ द्रक्ष्यसीत्येतत्पश्यसीति व्याख्यातं इदानीमपि ज्ञान्येवेति ज्ञापयितुम् ॥ ३५ ॥

॥ कृ० ॥ कथमनेनांगयुक्तत्वलाभ इत्यत आह ॥ खिलमिति ॥खिलं भवेदप्रभूत इति विश्वोक्तेः खिलत्वमप्राचुर्यंकर्मणोऽप्राचुर्यंच कर्मानुष्ठायांगाननुष्ठानमेवति भावेन सशेषमित्युक्तम् ॥ ॥ ३३ ॥ ३४ ॥ननु व्यत्ययमाश्रित्य द्रक्ष्यसीति भविष्यदर्थलृटःपश्यसीति वर्तमानार्थलटा व्याख्यानंकिमर्थमित्यत आह ॥ इदानीमपीति॥ ३५ ॥

॥ श्री० ॥ ज्ञानस्यैवेति ॥ न तु त्वदुक्तरीत्या मोहस्येत्यर्थः ॥ श्रेयानिति ॥ श्रेयान्द्रव्यमयाद्यज्ञात ज्ञानयज्ञः परंतपेति ज्ञानयज्ञस्य पूर्वं स्तुतत्वादिति भावः ॥ ३६ ॥ ३७ ॥ ३८ ॥ उत्तरस्येति ॥ श्रद्धावानित्यादिश्लोकत्रयस्येत्यर्थः ॥ संकीर्णार्थत्वादिति ॥ साधनफलयोर्मिश्रतया गीतायामुक्तत्वादेकोक्त्यैव तात्पर्यं स्वयमपि संकीर्णतया वक्तीत्याशयः ॥ श्रद्धादिकम् श्रद्धावानित्यादिनोच्यत इति ध्येयं ॥

येनेति ज्ञानस्यैव निर्देशाइति स्थापयन्नपिचेदित्यादेः प्रतिपाद्यमाह ॥ करणेति ॥ येनेतिकरणतया निर्दिष्टामित्यर्थः ॥ श्रेयानित्याद्यपेक्षया

॥ करणभूतं ज्ञानं स्तौति पुनः श्लोकत्रयेण ॥ ३६ ॥ ३७ ॥ ३८ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥
नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥

पुनरिति ॥ ३६ ॥ ३७ ॥ ३८ उत्तरस्य श्लोकत्रयस्य संकीर्णार्थत्वादेकोक्त्यैव ॥

॥ कृ० ॥ श्रेयानित्यादिनि ॥ श्रेयान्द्रव्यमयाद्यज्ञादित्यादीत्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ ज्ञानसाधनकर्मणोऽभिहितत्वात्पुनरुक्तिरित्यत आह ॥ अंतरंगमिति ॥ ज्ञानोत्पत्तावत्यावश्यकमित्यर्थः ॥

१ सर्वेभ्यः पापकृद्भ्योऽपि पापकृत्तमश्चेदसि तथाऽपि सर्वं वृजिनं ज्ञानाख्यनावा संतरिष्यसि ॥ २ यथा दारूणि प्रदीप्तोऽग्निः भस्मसात्कुरुते तथा ज्ञानाख्याग्निः अप्रारब्धानि सर्वाणि कर्माणि भस्मसात् कुरुते ॥ ३ इह लोके ज्ञानेन सदृशं पवित्रं नहि विद्यते ॥ तज्ज्ञानं स्वयं योगविषये सम्यक् सिद्धिमान्सन् बहुनाकालेन आत्मनि प्राप्नोतीत्यर्थ इति रा.श्रीपादा

॥ श्री० ॥ विरोधिफलम् चेतिभिन्नपदमित्यभिप्रेत्य व्याचष्टे ॥ विरोधीनि॥अज्ञानादिकमिति अत्रादिपदेनाश्रद्धासंशयसंग्रहः ॥ अज्ञश्चेत्यादिनोच्यत इति ज्ञातव्यम॥परशांत्यादिक मिति ॥ आदिपदेन योगसंन्यस्तकर्माणमित्यादिनोक्त कर्मबंधसंग्रहः ॥ ज्ञानं लब्ध्वेत्यनेनोच्यत इति द्रष्टव्यं विरोधिफलमिति समस्तं पदमित्यभिप्रेत्यापि व्याचष्टे ॥ विरोधिन इति ॥ अज्ञानस्य संशयस्य चेत्यर्थः ॥ विनाशादिकम ॥ अज्ञश्चेत्यर्थेनविनाशः ॥ आदिपदेन नायं लोकोऽस्तीति लोकाभावश्चोच्यत इति द्रष्टव्यम ॥ ३९ ॥ ४० ॥ ४१ ॥४२ ॥ इति यदुवरगीताभाष्यटीकामुमुक्षाशयमतिललिताभिर्गीर्भिरावेदयित्री ॥ सुललितविवृतिर्या कृष्णगान्धात्र चीर्णा ममगमदयमद्याचार्योऽत्रमस्यां चतुर्थे ॥ ॥ इति श्रीयदुपत्याचार्य पूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायां चतुर्थोऽध्यायः ॥ समाप्तः ॥

तात्पर्यमुक्त्वा तस्मादिति चतुर्थस्य प्रतिपाद्यमाह॥तदिति॥तस्य ज्ञानस्य साधनमंतरंगं श्रद्धादिकम्॥विरोध्यज्ञानादिकम् ज्ञानस्य फलं परशांत्यादिकम्। विरोधिनः फलं विनाशादिकामिति ३९॥४०॥४१॥४२ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यश्रीभगवद्गीताभाष्यस्य टीकायांचतुर्थोऽध्यायः॥

तत्साधनंविरोधिफलं च तदुक्तैरुक्त्वोपसंहरति॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ इति श्रीमदानंदतीर्थभगव

श्रद्धावान्लभते ज्ञानं मत्परः संयतेंद्रियः ॥ज्ञानं लब्ध्वापरांशांतिमाचिरेणाधिगच्छति॥३९॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥ नायं लोकोऽस्तिन परो न सुखं संशयात्मनः॥४० ॥
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ॥ आत्मवंतं नकर्माणि निबध्नंति धनंजय ॥ ४१ ॥
तस्मादज्ञानसंभूतं हृत्स्थंज्ञानासिनाऽत्मनः ॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥
हरिःॐ तत्सदितिश्रीमद्भगवद्गी०त्सुब्रह्म०योग०श्रीकृ०ज्ञानयोगोनाम चतुर्थोऽध्यायः समाप्तः॥

॥ त्पादाचार्यविरचिते श्रीमद्गीताभाष्ये चतुर्थोऽध्यायःसमाप्तः

॥ श्री०॥ परशांत्यादिकमिति ॥ आदिपदेन कर्मबंधाभावसंग्रहः॥३९॥४०॥४१॥४२॥इतिश्रीमत्तिमल्लाचार्य सुतकृष्णविरचितायां प्रमेयदीपिकाभावप्रकाशिकायां चतुर्थोऽध्यायः ॥

१ आस्तिक्यबुद्धिमान मद्कनिष्ठः जितेंद्रियश्चज्ञानंलभते ज्ञानंलब्ध्वा मोक्ष मविलंबेनप्राप्नोति अमति प्रारब्धे सति तदंगानंतरमिति २ अज्ञानी विपरीतज्ञानी नास्तिकः तत्वविषये संशयात्माच नरकं प्रतिपद्यते॥किंच संशयात्मनो मानुषः स्वर्गादिर्वालोको नास्ति किंबहुना सुखं नास्तीत्यर्थः ३ भगवति मनोयोगेन तस्मिन्समर्पितं कर्मयेनतं ज्ञानेन छिन्नःसंशयो यस्यतं भगवद्भक्तं हे धनंजयकर्माणि ननिबध्नंति मुक्तोभवतीत्यर्थः ४ ज्ञानोपायानुष्ठानाननुष्ठानयोरर्थानर्थवत्वात् अज्ञानसंभूत हृद्गतंआत्मनः संशयज्ञानाख्यखड्गेनछित्वाज्ञानोपायंकर्मकुरु॥ हे भारत उद्युक्तोभवेति रा०श्रीपादा.

॥ इति श्रीमद्भगवद्गीतायां चतुर्थोऽध्यायः ॥

॥ समाप्तः ॥

॥श्री०॥प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ पंचमाध्यायटीकायाः क्रियते भावदीपिका॥१ ॥तस्याप्रकृतत्वादिति ॥ कृतानां कर्मणां ब्रह्मात्मकत्वज्ञानरूपस्य कर्मयोगस्याप्रकृतत्वादित्यर्थः ॥ नन्वेवमेतदध्यायस्य तृतीयाध्यायोक्तकर्मयोगप्रपंचनात्मकत्वे योगसंन्यासयोर्लक्षणं स्पष्टयत्यनेनाध्यायेनेत्येतदध्यायप्रतिपादनपरेण गीतातात्पर्येण विरोधः स्यादित्यतस्तंपरिहर्तुमाह ॥ अंशश्चेति ॥ उपचारेणेति ॥ विशिष्टशक्तस्य कर्मयोगशब्दस्यैकदेशे उपचारः॥कर्मयोगशब्दमुख्यार्थभूतविशिष्टगतस्य ज्ञानसाधनत्वादिगुणस्यैकदेशेऽपिसत्वादिति भावः ॥ तदभिप्रायेणेति ॥ अंशाभिप्रायेण तत्र प्रतिपाद्यमुक्तं अत्र तु विशिष्टाभिप्रायेणेत्यदोष इत्याशयः ॥

पूर्वसंगतत्वेनैतदध्यायप्रतिपाद्यमर्थमाह ॥ तृतीयेति ॥ कर्मयोगो नाम कर्माणि कृत्वा तेषां ब्रह्मात्मकत्वज्ञानमिति कश्चित् ॥ तद्व्यावर्तयितुमेवशब्दः ॥ फलकामनादित्यागेनेश्वरार्पणबुद्ध्या वर्णाश्रमविहितकर्मानुष्ठानमेव कर्मयोगोऽत्रप्रपंच्यते ॥ तस्यैव पूर्वमुक्तत्वान्नान्यस्तस्याप्रकृतत्वात् ॥ द्व्यंशश्चायं कर्मयोगः॥ कामादिवर्जनमीश्वरार्पणबुद्ध्या कर्मानुष्ठानं चेति ॥ तत्राद्यंसंन्यासशब्दोक्तम् ॥ द्वितीयमुपचारेणकर्मयो

श्री ॥ ॐ ॥ तृतीयाध्यायोक्तमेव कर्मयोगं प्रपंचयत्यनेनाध्यायेन ॥ यदृच्छालाभसंतुष्ट इत्यादिसंन्या ॥ सं कुरुकर्मैवेत्यादि कर्मयोगं च ॥

गशब्दोक्तम्॥तदभिप्रायेण योगसंन्यासयोर्लक्षणं स्पष्टयतीत्यन्यत्रोक्तमिति॥संन्यासमित्यादिना कुत्रोक्तमर्जुनोऽनुवदतीत्यत आह यदृच्छेति॥ कर्मयोगमितिवदता कर्मणामित्येतद्योगशब्देन संबध्यत इत्युक्तं भवति ॥ तथा च कर्मणां संन्यासं त्यागमिति व्याख्यानमसंगतमिति सूचितम् ॥

॥ कृ० ॥ हरिः ओम् ॥ नन्वेवं सति योगसंन्यासयोर्लक्षणम् स्पष्टयतीति तात्पर्यनिर्णयविरोध इत्याशंकां परिहर्तुमाह ॥ अंशश्चेति ॥ एतेन संन्यासस्यापि प्रपंचनात्कर्मयोगंप्रपंचयतीत्ययुक्तमित्यप्यपास्तम् ॥ उपचारेणेति ॥ एकदेशेऽपि कर्मयोगशब्दवाच्यविशिष्टनिष्ठज्ञानसाधनत्वादिति गुणयोगाद्गौण्या वृत्त्येत्यर्थः ॥

---

१ कामादिवर्जनपूर्वकब्रह्मार्पणबुद्ध्या कर्मानुष्ठानं २भागवते द्वितीये अकामः सर्वकामो वेत्यादिभिः सकामस्यापि भगवत्पूजाकर्मणः भागवतसंगतिः तया भक्तिः तया ज्ञानमिति ज्ञानसाधनत्वोक्तेरिति ज्ञेयम् ॥ ३ व्यवहितमपि उत्तरे भगवता कर्मयोगश्चेत्युक्तत्वादिति बोध्यम् ॥

॥ श्री० ॥ भाष्ये संन्यासं कर्मयोगमिति द्वितीयाया अनन्वयमाशंक्य गीतागतेन शंससीति पदेनान्वय इत्याह ॥ शंससीति ॥ नन्वेतदध्यायस्य तृतीयाध्यायोक्तार्थप्रपंचनात्मकत्वे तदानंतर्यमेव स्याच्चतुर्थाध्यायानंतर्यं कुत इत्यत आह ॥चतुर्थाध्यायोक्तस्येति॥ तृतीयाध्यायेकर्मयोगे निरूपिते यदृच्छालाभसंतुष्टइत्यादिना चतुर्थे संन्यासे च निरूपिते सति यच्छ्रेय एतयोरेकमित्यर्जुनशंकोत्थानसंभवेन चतुर्थाध्यायोक्तस्यैतदध्यायोत्थानबीजत्वादित्यर्थः॥ अनेनेति यदृच्छालाभसंतुष्टइत्यादिना संन्यासमितिवचनेनेत्यर्थः वर्णविशेषः॥ श्यामवर्णः ॥ द्वेषादिवर्जनमेवेति ॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सर इत्युक्तत्वेन द्वेषादिवर्जनस्यापि संन्यासशब्दार्थतयोक्तत्वादिति भावः ॥ योगेनेति ॥ ईश्वरार्पणबुद्ध्या कर्मानुष्ठानरूपयोगेनेत्यर्थः ॥ विरोधाभिप्रायेणेति ॥ ॥कृ०॥ शंससीत्यन्वय इति ॥ भाष्यस्थसंन्यासकर्मयोगपदयोर्गीतास्थशंससिपदेनान्वय इत्यर्थः ॥ ननु तृतीयप्रपंचनात्मकस्यास्य

॥ शंससीत्यनेनान्वयः ॥ चतुर्थाध्यायोक्तस्यार्थस्यैतदध्यायोत्थानबीजत्वात्तृतीयाध्यायार्थप्रपंचनात्मकस्याप्यस्य चतुर्थानंतर्यं युक्तमित्यप्यनेन ज्ञापितम् कृष्णशब्दो वर्णविशेषमात्रवचन इतिप्रतीतिनिरासायाह ॥ नियमनादिनेति ॥ नित्यनैमित्तिककाम्यनिषिद्धरूपसर्वकर्मत्यागः संन्यासशब्दार्थ इति व्याख्यानं दूषयति॥ संन्यासेति ॥ ज्ञेयः स नित्यसंन्यासीति संन्यासशब्दस्य भगवतैवान्यथा व्याख्यात

नियमनादिना सकललोककर्षणात्कृष्णः ॥ तच्चोक्तम् ॥ यतः कर्षसि देवेश नियम्य सकलं जगत् ॥ अतो वदंति मुनयः कृष्णं त्वां ब्रह्मवादिन इति महाकौर्मे ॥ संन्यासशब्दार्थं भगवानेव वक्ष्यति ॥ अ

॥ ॐ ॥ अर्जुन उवाच ॥ ॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय ॥ एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥

यं प्रश्नाशयः ॥ यदि संन्यासः श्रेयोऽधिकः स्यात् ॥ तर्हि संन्यासस्यैवाद्विरोधि युद्धमिति ॥ १ ॥

त्वात् तद्विरुद्धं परव्याख्यानमित्यर्थः ॥यदि सर्वकर्मपरित्यागो न संन्यासशब्दार्थः किंतु द्वेषादिवर्जनमेव तर्हि तस्य योगेन विरोधाभावात्संन्यासयोगयोर्विरोधाभिप्रायेण श्रेयः प्रश्नोऽनुपपन्नः स्यादित्यत आह ॥ अयमिति ॥

तदानंतर्यं युक्तं तत्कथं चतुर्थानंतर्यमित्यत आह ॥ चतुर्थाध्यायेति उत्थानबीजत्वादिति ॥ यदृच्छालाभसंतुष्टः कुरु कर्मैवत्यादिचतुर्थाध्यायवाक्यानां पुरोवादत्वेन संन्यासमित्याद्यनुवादकारणत्वादिति भावः ॥ भाष्ये कर्षणात्कृष्ण इति ॥ कर्षतीति कृष्णः ॥ कृषिर्वर्णे इत्युक्तत्वेपि बाहुलकाद्वर्णं विनाऽपि नक्प्रत्यय इति भावः ॥ ॥१९६॥

१ पूर्वकामस्य कंठरवेणोपादानं भाष्ये यदृच्छेति वाक्योक्तया तस्यैव प्रथमत उपस्थितेः अत्र द्वेषस्योपादानं स्वयमनुपदमेव पूर्वज्ञेयः सइति वाक्योक्तया तत्र योन द्वेष्टीति द्वेषस्यादावुपादानाज्ज्ञेयम्॥

॥ श्री० ॥ एतयोर्मध्ये एकं ब्रूहीत्युक्त्या उभयकरणं विरुद्धमितिविरोधाभिप्रायेणार्जुनशंकेति तावन्निश्चितम् ॥ तत्र संन्यासस्य सर्वकर्मपरित्यागरूपत्वेन कारणरूपयोगेन विरोधःसंभवेत् ॥ नचैवं भवद्भिरंगीक्रियते द्वेषादिवर्जनमात्रस्य सन्यासशब्दार्थत्वांगीकारेण तस्यकर्मकरणरूपयोगेन विरोधाभावात् ॥ विरोधाभिप्रायको यः संन्यासयोगयोर्मध्ये श्रेयः प्रश्नः सोऽनुपपन्न एव स्यादित्यर्थः ॥ ननु श्रेयः शब्दस्य नपुंसकत्वेनतद्व्याख्यानेऽधिकमित्येव वक्तव्यं पुंलिंगप्रयोगस्तु कथमित्यत आह॥ संन्यासपदमिति ॥ एतदिति ॥ कामादिवर्जनरूपसंन्यासस्यावर्जनीयरागद्वेषप्रयुक्तं युद्धं विरोधित्वेनेत्यर्थः ॥ तथा चसंन्यासयुद्धयोर्विरोधाभिप्रायकोऽर्जुनप्रश्नः पुनरत्र क्रियमाणोऽनुपपन्न एवेति भावः ॥ ईषदित्युक्तमिति ॥ पूर्वं महाविरोधाभिप्रायेण घोर इति चोदितं मति श्रेयानिति परिहृतम् ॥ अत्रत्वीषद्विरोधाभिप्रायेण तदुपर्येव पुनःशंक्यत इतिभावः ॥ नत्यक्तेति ॥ ईषद्विरोद्धव्यपि युद्धंत्यक्तेत्यर्थः ॥ वैगुण्यमिति ॥ कामादिवर्जनस्य कर्मयोगांगत्वाद्युद्धे च तदसंभवाद्वैगुण्यमंगीकृत्यापि श्रेयान् स्वधर्मो विगुण इति युद्धं कस्माद्विधीयत इत्यर्थः ॥ १ ॥ तयोः यतिगृहस्थाश्रमयोः ॥ रूपत्वादिति ॥ तथा च तत्प्रतिपादकत्वमेव संन्यासयोगशब्दयोर्युक्तमिति भावः ॥ ननु कथं संन्यासशब्दो यत्याश्रमपरः ज्ञेयः सनित्यसंन्यासीति संन्यासशब्दार्थस्य पृथगेवाभिधानादित्यत आह ॥ ज्ञेय इतीति ॥ परिहारवाक्यस्थ ॥ संन्यासः कर्मयोगश्चेति परिहारवाक्यस्थः ॥ अयमिति विशिष्योक्त्या निमित्तमाह ॥ प्रश्नवाक्यस्थस्येति ॥ संन्यासशब्दस्येत्यर्थः ॥

अत्र श्रेय इति यथास्थितं गीतापदमनूद्य संन्यासपदानुगुण्येनाधिक इति व्याख्यातम् ॥ नन्वेतत् घोर इति चोदितं श्रेयानितिच परिहृतं च ॥ सत्यम् ॥ अतएवात्रेषदित्युक्तमिति ॥ अतस्तत्यक्त्वा संन्यास एव कर्तव्ये किं वैगुण्यमंगीकृत्यापि विधीयते युद्धमित्याशयशेषः ॥ १ ॥ संन्यासमिति प्रश्नवाक्ये संन्यास इति परिहारवाक्ये च संन्यासयोगशब्दौ यतिगृहस्थाश्रमविषयावेव ॥ तयोः सर्वकर्मत्यागत

॥ नायं संन्यासो यत्याश्रमः ॥

दनुष्ठानरूपत्वात् ॥ ज्ञेय इति वचनं तु न संन्यासशब्दव्याख्यानपरम् ॥ किं तु यो द्वेषादिवर्जितो गृही सोऽपि संन्यासी ज्ञातव्य इति स्तुतिपरमेवेत्यत आह ॥ नायमिति ॥ अयं परिहारवाक्यस्थः ॥ प्रश्नवाक्यस्थस्य तात्पर्यनिर्णये तथाभ्युपगमात्॥

॥ कु० ॥ननु गीतायां क्लीबस्यैव श्रेयःपदस्य प्रयोगात्तदनुरोधेनाधिकमिति व्याख्येयम् ॥ तत्कथं पुंल्लिंगप्रयोग इत्यत आह ॥ अत्र श्रेय इतीति ॥ वैगुण्यमिति ॥ कामादिवर्जनस्य कर्मयोगांगत्वाद्युद्धे च तदसंभवाद्वैगुण्यमित्यर्थः ॥ १ ॥ अभ्युपगतत्वादिति ॥ योगसंन्यासयोर्भिन्नपुंनिष्ठत्वाभिप्रायेण पृच्छतीति प्रश्नवाक्यस्यावतारितत्वादिति भावः ॥

॥श्री० ॥तथा यत्याश्रमपरत्वेन॥आधानादीनीति॥गृहस्थाश्रमविहिताग्न्याधानादीनि कर्माणीत्यर्थः ॥ रिचवियोजनसंपर्कयोरिति धातोरात्मनेपदित्वादाह॥ अत्यरिच्यतेति ॥ ब्रह्मैव न्यास इति ॥ न्यास एवात्यरेचयदित्युक्तन्यासशब्दवाच्य ब्रह्मैवेत्यर्थः ॥ तथा चानेन वचनेन यत्याश्रमस्याधिक्यं न सिद्ध्यतीति भावः ॥ तपोऽपेक्षयेति ॥तानि वा एतानीत्यत्र तपसोऽपि प्रकृतत्वेन तदपेक्षया ब्रह्मण उत्तमत्वाभिधानमसंगतमित्यर्थः ॥ उपायोपेयेति ॥ साधनसाध्येत्यर्थः ॥ तथा च तपआदीनामुपायत्वेन तदपेक्षयोपेयस्य ब्रह्मण आधिक्यं वक्तुमिदं वाक्यमिति नासंगतिरिति भावः॥तत्सिद्धौ॥तपोब्रह्मणोरूपायोपेयभावसिद्धौ॥उत्तमत्वसिद्धेः॥उपायापेक्षयोपेयस्येति शेषः॥अप्राप्ते शास्त्रमर्थवदिति न्यायात् तथा चापूर्वताभंग इति भावः॥

योगश्च न गृहस्थाश्रम इत्यपि द्रष्टव्यम् ॥ कुतो नेति चेन् ॥ अत्र तयोस्त्विति संन्यासात्कर्मयोगस्य विशिष्टत्ववचनात् ॥ तस्य चास्मत्पक्ष एव संभवादन्यत्रासंभवादिति भावः॥ कुतो भवत्पक्षे संभव इत्यत आह॥ इहेति ॥ मत्पूजा मदर्पणबुद्ध्या कर्मानुष्ठानम् आश्रमार्थत्वे कुतोसंभव इत्यत आह ॥ तानीति ॥ तान्याधानादीनि ॥ अत्यरेचयत् ॥ अत्यरिच्यत इतिवचनादिति वर्तते ॥ न्यस्यतेऽस्मिन्सर्वं इदंत्यागात्तु संन्यासान्मत्पूजैव गरीयसीतिवचनात्॥तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदिति च॥

श्रीभगवानु० ॥ ॥संन्यासः कर्मयोगश्च निश्रेयसकरावुभौ ॥तयोस्तु कर्म संन्यासात्कर्म ॥योगोविशिष्यते ॥ २ ॥

मिति ब्रह्मैव न्यास इति कश्चित् ॥ तदसत् ॥ तपोऽपेक्षयोत्तमत्वाभिधानस्यासंगतत्वात् ॥ उपायोपेयभावेन संगतिरिति चेत् ॥ तर्हि तत्सिद्धौ लोकत एवोत्तमत्वसिद्धेरभिधानवैयर्थ्यात् ॥ गृहस्थाश्रमाद्यत्याश्रमस्योत्तमत्वमयुक्तम् ॥

॥ कृ० ॥आधानादीनीति॥गृहस्थाश्रमविहिताग्न्याधानादीनीत्यर्थः॥नन्वत्यरेचयदित्यत्र णिचो लङश्चानर्थक्यमित्याशंक्य सार्वे णिच् छंदसि लुङ् लङ् लिट इत्युक्तेर्लङ् वर्तमानत्वार्थ इति भावेन व्याचष्टे॥अतिरिच्यत इति ॥ ब्रह्मैव न्यास इतीति ॥ न्यास एवात्यरेचयदितिश्रुत्युक्त इतिशेषः ॥ उपायोपेयभावेनेति ॥ तपसो ब्रह्मप्राप्त्युपायत्वादितिभावः ॥ अभिधानावैयर्थ्यादिति ॥ अप्राप्तेऽर्थे शास्त्रमर्थवदित्युक्तेरिति भावः॥

२ श्री निवासतीर्थसंमतोऽयंपाठः ॥ कृष्णाचार्यसंमतस्तु अतिरिच्यत इति ज्ञेयम् ॥

॥ श्री० ॥ तत्समर्थे ॥ सर्वधर्मानुष्ठानसमर्थे ॥ सर्वधर्मोपपन्न इत्यादाविरोधविस्तेनोक्तं॥ निष्क्रिय इत्यादि ॥ निष्क्रियाख्यः सधर्मक इत्यनयोर्विरोधपरिहारायाह ॥ काम्यकर्मेति ॥ भाष्ये हेमाद्र्यपेक्षया यस्तुरीयो निष्क्रियाख्य [illegible] ॥ तदधिकार ॥ [illegible] इत्यर्थः ॥ अनेनात्संन्यासाद्विरक्तिस्तन्निगम इति ज्ञेयम ॥ ब्रह्मचार्यपि प्रव्रजेदिति प्रमाणशेषं [illegible] ब्रह्मचर्यादेव [illegible] ब्रह्मचर्यं [illegible] ॥ ब्रह्मचर्यं विसृज्येति ॥ गृहस्थाश्रमसमर्थो [illegible] पि द्रष्टव्यम ॥ इति श्रुतिशेष इति ॥ यदहरेव विरजेदिति श्रुतिशेषभाग इत्यर्थः ॥ परिहारवाक्य इति ॥ तेषामु कर्मसंन्यासाभावात् परिहारवाक्यमित्यर्थः ॥ २ ॥

गृहस्थाश्रमो हि सर्वधर्मोपपन्नस्तत्समर्थे मध्यमे वयसि अनुष्ठेयो महाफलश्चयत्याश्रमस्तु निष्क्रियश्चरमे वयसि गृहस्थधर्मानधिकृतैरंधपंग्वादिभिरनुष्ठेयोऽल्पफलश्चेति केचित्॥तन्निरासार्थमाह ॥ संन्यासस्त्विति॥काम्यकर्मरहितत्वात् निष्क्रियाख्योऽपिसधर्मकः न केवलं सधर्मकः

संन्यासस्तु तुरीयो यो निष्क्रियाख्यः सधर्मकः॥न तस्मादुत्तमो धर्मो लोकेकश्चन विद्यते॥तदुक्तोऽपिहि यद्वच्छेत्तद्दहरेयो न धार्मिकः ॥सद्भक्तिश्च विरक्तिस्तदधिकारो निगद्यते ॥यदाधिकारो भवति ब्रह्मचार्यपिप्रव्रजेदिति नारदीये ॥ ब्रह्मचर्यादेव प्रव्रजेत् यदहरेवविरजेदिति च संन्यासेतु तुरीये वप्रीतिर्ममम हीयसी॥ येषामत्राधिकारो न तेषां कर्मेति निश्चय इत्यादेश्च ब्राह्मे॥अतो नात्राश्रमः संन्यासउक्तः॥२॥

किं तु न तस्माद्यत्याश्रमानुष्ठेयाद्यतिभक्त्यापि यत्फलं प्राप्नुयात्तत्सर्वंगृहस्थधर्मैरित्यर्थः ॥ ब्रह्मचर्यादेव ब्रह्मचर्यं विसृज्यैव विरजेत् ॥ विरक्तोभवेत् ॥ तदहरेव प्रव्रजेदिति श्रुतिशेषः ॥ कर्मत्याश्रमान्तरम् ॥ यदुक्तं नायमित्यादितदुपसंहरति॥ अत इति॥अत्रपरिहारवाक्ये ॥२॥

॥ कु० ॥ मध्यमवयसीति ॥ आषोडशाद्भवेद्बालो यावत्क्षीरान्नवर्तक ॥ मध्यम. [illegible] इति [illegible] ज्ञेयो ॥ वयोनाम कालकृतशरीराव स्थेति विवेकः ॥ निष्क्रियाख्यः सधर्मक इत्यनयोर्विरोधपरिहारायाह ॥ काम्यकर्मरहितत्वादिति ॥ [illegible] भावेनाह ॥ ब्रह्मचर्यं विसृज्येति ॥ ननु येषांसंन्यासान धिकारस्तेषां ॥ कर्मत्युक्तौ संन्यासिनां कर्म नास्तीति प्राप्तं न च तदुक्तं तेषामपि स्नानादिसत्त्वादित्यत आह ॥ कर्मत्याश्रमांतरमिति ॥ यत्याश्रमभिन्नाश्रम इत्यर्थः ॥ २ ॥

॥श्री०॥अपव्याख्यानमिति॥ज्ञेय इति वचनं न संन्यासशब्दव्याख्यानपरं किं तु यो द्वेषादिवर्जितो गृही सोऽपि संन्यासी ज्ञातव्य इति स्तुतिपरमेवेत्यपव्याख्यानमित्यर्थः॥ अपव्याख्यानत्वे हेतुमाह ॥ प्रकरणस्येति॥संन्यासशब्दार्थकथनव्यतिरिक्तस्य परोक्तार्थस्यात्र गृहस्थादिवाचकपदाभावेनाप्रतीयमानत्वादित्यर्थः ॥संन्यासशब्दार्थमिति॥काम्यानां कर्मणां न्यासं संन्यासमित्यर्थः । ननु यदृच्छालाभसंतुष्ट इत्यादौ तत्र संन्यासशब्दाभावात् तस्य संन्यासशब्दार्थत्वं न जानातीति चेन्न॥तथापीति संन्यासं कर्मणामित्यनुवादासंभवेन संन्यासशब्दार्थत्वेनापि ज्ञानसद्भावादिति भाव ॥पूर्वपक्ष्युत्प्रेक्षित इत्याह ॥ यो द्वेषादिवर्जितो गृही सोऽपि संन्यासी ज्ञातव्य इति पूर्वपक्ष्युत्प्रेक्षित इत्यर्थः ॥ ज्ञापयितुमित्यस्यार्थं उपपादयितुमिति ॥ कथं तदुपपादनमित्यतस्तं प्रकारं दर्शयति ॥ द्वेषादीति । अस्यार्थस्य संन्यासेत्याद्युक्तार्थस्य ॥ ज्ञेय इत्यनूद्य तस्यार्थमाह ॥ स्मर्तव्य इति ॥ ननु संन्यासः कर्मयोगश्च निःश्रेयसकरावुभाविति प्रतिज्ञाय तत्र संन्यासस्य निःश्रेयसकरत्वं ज्ञेय इत्यनेनोपपादितं योगस्य तु तन्नोपपादितमतोन्यूनतेत्यत आह ॥ योगस्य त्विति ॥ उत्तरवाक्य एवेति ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यत इत्युत्तरवाक्य एवेत्यर्थः ॥ ३ ॥

ज्ञेय इत्यस्यापव्याख्यानं दूषयन् तात्पर्यमाह॥ संन्यासेति॥अर्थांतरस्याप्रतीतेरिति भावः॥ननु यदृच्छालाभसंतुष्ट इत्यादिनोक्तं कामादिपरि त्यागं संन्यासकर्मणामित्यनूद्यार्जुनस्य प्रश्न इत्युक्तम् ॥ ततश्च जानात्येवासौ संन्यासशब्दार्थमिति न तं प्रति स वक्तव्यः॥तथा च पूर्व पक्ष्युत्प्रेक्षित एवास्यार्थ इत्यत आह॥संन्यासस्येति॥संन्यासः कर्मयोगश्च निःश्रेयसकरावुभाविति यत्संन्यासस्य निःश्रेयसकरत्वमुक्तं तदुपपाद

संन्यासशब्दार्थमाह॥ ज्ञेयइति संन्यासस्य निःश्रेयसकरत्वं ज्ञापयितुं तच्छब्दार्थं स्मारयति॥ ज्ञेयइति॥ ३॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते॥ ३ ॥

यितुं ज्ञातमपि संन्यासशब्दार्थं स्मारयत्यनेन ॥ द्वेषादिवर्जनं हि संन्यासः ॥ तस्य च निःश्रेयसकरत्वं श्रुत्यादिप्रसिद्धमेवेति।अतः संन्यास शब्दार्थकथन एव तात्पर्याभावान्नानुपपत्तिरित्यर्थः ॥ ज्ञापकं चास्यार्थस्यास्तीत्याह ॥ ज्ञेय इतीति ॥ ज्ञेयः स्मर्तव्य इत्यनेनोक्तमित्यर्थः ॥ योगस्य तु निःश्रेयसकरत्वमुत्तरवाक्य एव सेत्स्यति ॥ ३ ॥

॥ कृ० ॥ अर्थांतरस्येति॥ गृहस्थबोधकपदाभावेन यो द्वेषादिवर्जितो गृही सोऽपि संन्यासीति परोक्तस्तुतिरूपार्थस्याप्रतीतेरित्यर्थः ॥ किमनेन ज्ञापकमुक्तमित्यत आह ॥ ज्ञेयः स्मर्तव्य इति ॥ अनेन भाष्ये यत् द्वितीयं ज्ञेयइतीति वाक्यं तज्ज्ञापकदर्शकं न तु गीताप्रतीकग्रहणमित्युक्तं भवति ॥ उत्तरवाक्य एवेति ॥ सांख्ययोगौ पृथगित्यत्रेत्यर्थः ॥ ३ ॥

॥ श्री० ॥ द्वयोर्मध्ये ॥ ननु न तस्येत्यादौ कथं संन्यासस्य ज्ञानोत्पत्तावावश्यकत्वमुक्तमित्यतस्तदुपपादयति ॥ **न तस्येत्यत्रेति** ॥ **विषयवैराग्याभाव इति** ॥ विषयेषु विगतरागत्वं हि वैराग्यम् इदमेव च कामादित्यागरूपः ॥ संन्यास इत्याशय ॥ **तत एवेति** ॥ वैराग्यापरपर्यायकामादित्यागरूपसंन्यासादेवेत्यर्थः ॥ **तदुत्पत्तिर्ज्ञानोत्पत्तिः** ॥ **लभ्यत इति** ॥ ततश्च ज्ञानोत्पत्तावत्यावश्यकत्वात्मुख्यांतरंगत्वं लब्धमिति भावः ॥ ननु गीतायां योगज्ञानयोः साध्यसाधनभाव एवोच्यते न तु फलसाम्याभिप्राय इत्यत आह ॥ **एवमिति** ॥ **ज्ञानविरोधित्वं नेति** ॥ ज्ञानानुकूलत्वेऽग्निमुग्ध इत्यादिनिंदा न स्यात् तथा च ज्ञानविरोधिना योगेन ज्ञानांतरंगस्य संन्यासस्य बाधनं कथमित्यभिप्रायः ॥ **अनेन योगस्येति** ॥ अग्निमुग्ध इत्यादौ ज्ञानविरोधित्ववचनेन संन्यासः कर्मयोगश्च निश्रेयसकरावुभाविति द्वयोः योगस्य निश्रेयसकरत्वमुक्तं तदप्याक्षिप्तं भवति ज्ञानविरोधित्वे मोक्षविरोधित्वावश्यंभावादिति भावः ॥ **पृथक्त्वाभाव इति** ॥ ऐक्यमित्यर्थः ॥ **उच्यत इति** ॥ सांख्ययोगौ पृथक् बालाः प्रवदंति न पंडिता इत्यनेनोच्यते ॥ **नोक्तो विरोध इति** ॥ अग्निमुग्ध इति श्रुत्यनुसारेणोक्तो योगस्य ज्ञानविरोधो नास्तीत्यर्थः ॥ तथा चोभयोर्ज्ञानांतरंगत्वेऽपि योगस्य मुख्यांतरंगत्वात् योगागतया संन्यासस्यांतरंगत्वेनांतरंगतायां तारतम्यसद्भावाद्योगात्संन्यासस्यातिशयत्वमिष्टमेवेति भावः ॥ **अनेनेति**॥

संन्यासं गृहीत्वा योगं त्यक्ष्यामीत्याशयेन द्वयोःश्रेयसि पृष्टे द्वावपि निश्रेयसकरौ तत्रापि संन्यासाद्योगो विशिष्टोऽतो न युद्धं त्वया त्याज्यमिति परिहारो जातः किमर्थमिदानीं सांख्ययोगाविन्युच्यत इत्यत आह ॥ संन्यासो हीति॥ हिशब्दो हेतौ॥ ज्ञानांतरंगत्वेन ज्ञानोत्पत्तावत्यावश्यकत्वेन न तस्येत्यत्र विषयवैराग्याभावे ज्ञानानुत्पत्तिवचनेन तत एव तदुत्पत्तिरिति लभ्यते।एवं कर्म योगस्तु ज्ञानविरोधित्वेनोक्त अग्निमुग्ध

संन्यासो हि ज्ञानांतरंगत्वेनोक्तः न तस्य तत्वग्रहणायेत्यादौ ॥ अतःकथंसाऽवमइत्यत आह ॥ सांख्य

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलम् ॥ ४ ॥

॥ योगाविति ॥ उभयोरप्यंतरंगत्वेनाविरोधः ॥

इत्यादावित्यपि ग्राह्यम् ॥ अवमो योगात् ॥ अनेन योगस्य निश्रेयसकरत्वमप्याक्षिप्तम् ॥ननु सांख्यं ज्ञानं योगः कर्म तयोः कथमत्र पृथक्त्वाभाव उच्यते कथं चानेनोक्ताक्षेपपरिहार इत्यत आह ॥ उभयोरपीति ॥न केवलं संन्यासस्य किं तु योगस्यापीत्युभयोरपि ज्ञानांतरंगत्वान्नोक्तो विरोध इत्यर्थः ॥अनेन ॥

॥कृ०॥नैतावतासंन्यासस्ययोगावरत्वंसिद्धं इत्यत आह॥एवंकर्मयोगस्त्विति॥सांख्ययोगाविति गीतायां योगस्यानिःश्रेयसकरत्वोक्तेस्तदनुसारेणाह ॥**अनेनेति** ॥ उभयोरपीत्यपिशब्दो नान्यसमुच्चयार्थः॥ अन्यस्य समुच्चेयस्याभावात्॥ किं तूभशब्दोक्तयोर्मिथ्यपरस्परसमुच्चयार्थइतिभावेनाह॥**न केवलमिति**॥तांतइत्यस्यार्थो ग्लान इति॥तमुग्लानावित्ति धातुव्याख्यानादिति भावः॥

॥श्री०॥ कर्मयोगस्य ज्ञानांतरंगत्ववचनेनेत्यर्थः॥**सांख्ययोगौ**॥ज्ञानकर्मणी॥**साध्यसाधनभावहीनाविति**॥अग्निमुग्ध इति श्रुत्यनुसारेण योगस्य ज्ञानविरोधित्वादितिभावः॥तथा च कर्मापि सांख्यशब्दोक्तज्ञानांतरगमेवेतिद्रष्टव्यम ॥ **नपंडिता मन्यंतइति** ॥ प्रत्युतसांख्यास्ययोगोऽ विरोध्येवेतिमन्यंतइति द्रष्टव्यम् ॥ तांतइत्यस्यार्थोग्लानइति ॥ **धूमादित्वमेवेति** ॥ तथा चश्रुतौधूमशब्दोधूमोरात्रिस्तथाकृष्णइत्याद्युक्तरात्र्यादिमार्गोपलक्षकइत्युक्तंभवतीतिद्रष्टव्यम् ॥ **पर्यवसानमिति** ॥ धूमादिलोकप्राप्तिरेवयस्यकर्मणःफलमितियावत् ॥ **वःपदव्यइति** ॥ दक्षंप्रतिसतीदेव्यावचनमिदम ॥ **प्रत्यवायेत्यादि** ॥ नित्यंनैमित्तिंककुर्यात्प्रत्यवायजिहीर्षयेतिवचनादिति भावः ॥ **विद्वांसएवेति** ॥ तथा च सांख्ययोगौपृथग्बालाः प्रवदंति नपंडिताइत्युक्तमयुक्तमिति भावः ॥ योगशब्दोक्तनित्यनैमित्तिककर्मणोर्ज्ञानसाधनत्वाभावादिति ज्ञातव्यम् ॥ **अविवेकिन इति** ॥ तथा च विद्वांसो नैवं मन्यंतइति भावः ॥ भाष्ये येअकाम्यंनित्यनैमित्तिकं कर्म प्रत्यवायपरिहारार्थमेव न ज्ञानांतरंगमित्येवमन्यथावदंति ते बाला अविवेकिन इत्यर्थो द्रष्टव्यः ॥ ४ ॥

सांख्ययोगौ प्रथक्साध्यसाधनभावहीनाविति न पंडिता मन्यंतइत्येवं व्याख्यातं भवति॥ ननु श्रुतिपुराणाभ्यां कर्मणो ज्ञानविरोधित्वमुच्यत इत्युक्तम् ॥ अतः कथमेवमभिधीयत इत्यत आह ॥ अग्नीति ॥ अग्न्युपलक्षिते कर्मणि मुग्धः श्रेयस्करमिति भ्रांतः ॥धूमतांतो होमधूमेन तांतो ग्लानः ॥ धूमता धूमादित्वमेवांतःपर्यवसानमस्येति वा॥स्वं लोकं स्वीयमाश्रयं परमात्मानम्॥यज्ञशालांसनेन धूमोपलक्षितमार्गवतां

अग्निमुग्धो ह वै धूमतांतः स्वं लोकं न प्रत्यभिजानाति॥मा वः पदव्यः पितरस्मदास्थिता या यज्ञशाला

॥ सनधूमवर्त्मनामित्यादिकाम्यकर्मविषयमिति भावः ॥ ये त्वन्यथा वदंति ते बालाः ॥ ४ ॥

वः पदव्योऽस्मदाश्रितामेत्यर्थः ॥ नन्वकाम्यमपि नित्यं नैमित्तिकं च कर्म प्रत्यवायपरिहारार्थमेव न ज्ञानांतरंगमिति विद्वांस एव मन्यंत इत्यत आह ॥ ये त्विति ॥ बाला अविवेकिनः ॥ ४ ॥

॥ कृ० ॥ धूमवर्त्मनामिति पुराणानुसारात्प्रकारांतरेण व्याचष्टे ॥ धूमादित्वमेवेति ॥ श्रुतौ धूमादिशब्दो रात्र्यादिस्वर्गमार्गोपलक्षक इति भावः ॥ धूमादिभावश्च धूमादिभावप्राप्तिश्च तद्व्रतौ गतिरेव तु ॥ स्थितौस्थितिः प्रवेशश्चेति प्रमाणाद्धूमादिदेवतानुसारिगत्यादिमत्वमितिज्ञातव्यम ॥ ४ ॥

१ भा० स्कं० ४ अ० ४ श्लो० २१ ॥ २ यज्ञदीक्षयेत्यर्थः ॥

॥ श्री० ॥ भवेदिति ॥ मुग्ध इत्यादेः काम्यकर्मविषयत्वकल्पनमित्यर्थः ॥ साफल्यमात्रमिति ॥ न तु योगस्य ज्ञानसाधनत्वे प्रमाणमिति भावः ॥ स्वतंत्रसाधनमिति ॥ उभयोः फलं विंदते इत्युक्तेरुभयोरपि यदि किंचित्फलं स्यात्तर्ह्येवाक्लिष्टास्यान्नान्यथेति भाव.॥ तथा चोभयोः किंचित्फलं प्रति स्वतंत्रसाधनत्वोक्त्या न योगस्य सांख्यशब्दोदितज्ञानसाधनत्वं प्राप्तमिति नानेनापि प्रमाणमुक्तमिति भावः ॥ प्रकृतम् योगस्य साधनत्वम् एवं योजनेन ॥ यत्सांख्यैरित्यनेन भगवता योगस्य ज्ञानसाधनत्वेऽपि परिशेषप्रमाणमभिहितमित्याशयेनोपपादयति ॥ तरति शोकमित्यादिना ॥ नान्य इति ॥ तत्र ज्ञानातिरिक्तसाधननिषेधादिति भावः ॥

योगस्य ज्ञानसाधनत्वे प्रमितंभवेदेतत्तदेव कथमित्यत उक्तमेकमपीति ॥तदनुपपन्नम् ॥ उभयोर्मध्ये सम्यगेकमप्यास्थितः फलं विंदत इति योजनायां द्वयोःसाफल्यमात्रमुच्यते ॥एकमपि सम्यगास्थितः उभयोः फलंविंदत इति पक्षेतु द्वयं किंचित्फलं प्रति स्वतंत्रं साधनमुच्यते॥ पक्षद्वयेऽपि न प्रकृतोपयोग इत्यत आह ॥एकमपीति ॥ एवमनुपयोगेऽपि भगवानेव स्ववाक्याभिप्रायमाह ॥स ग्राह्य इत्यर्थः ॥ अने

एकमपीत्यस्याभिप्रायमाह ॥ यत्सांख्यैरिति॥ योगिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इत्यर्थः॥५॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥ एकं सांख्यंच योगं च यः पश्यति स पश्यति ॥ ५ ॥

नापि योगस्य ज्ञानसाधनत्वे किंप्रमाणमुक्तमित्यतो व्याचष्टे॥योगिभिरपीति ॥ तरति शोकमात्मविदित्यादिना यज्ज्ञानफलमोक्षाख्यं प्रमितं तत्तावद्योगिभिरपि प्राप्यत इत्युच्यते अपाम सोमामित्यादिना ॥ तत्र विचार्यम् ॥ किं द्वयमपि स्वतंत्रं मुक्तिसाधनम् ॥ उत समुच्चितम् ॥ अथवैकं साक्षान्मोक्षसाधनम् ॥ अपरं तत्साधनत्वेनेति न प्रथमद्वितीयौ ॥नान्यः पंथा इत्यादिविरोधात् ॥

॥ कृ० ॥ उभयोरित्यस्य किमेकशब्देनान्वयः ॥ उत फलशब्देनेतिविकल्प्याद्य आह ॥ उभयोर्मध्यइति ॥ अंत्य आह ॥ एकमपीति ॥ न प्रकृतोपयोग इति ॥ योगस्य ज्ञानसाधनत्वासिद्धेरिति भावः ॥ नन्वेवमपि प्रमाणालाभ एवेत्यत आह ॥ तरतीति ॥ ५ ॥

॥ श्री० ॥ इत्यादीत्यनेननिर्वाणायापरोक्षद्दागीतिपादो ग्राह्य. ॥ ननु गीतायां योगैरित्युक्त्वाद्योगिभिरिति कथं भाष्ये इत्यत आह ॥ अत्रेति ॥ निवृत्तधर्मपर्यायो योगशब्दो गीतागतः ॥ अर्श आदीति ॥ स च मत्वर्थीय इति भावः ॥ तथा च योगोऽस्ति येषां ते योगास्तैर्योगिरित्यर्थो द्रष्टव्यः ॥ ५ ॥ एवमुच्यत इति ॥ इतश्चेति समुच्चयार्थकशब्दोपेत वाक्यप्रयोगः कथमित्यर्थः ॥ बाधकामिति ॥ ज्ञानविरोधित्वरूपमित्यर्थः ॥ युक्तमिति ॥ तथा च बाधकाभावसमुच्चयार्थश्चशब्द इति भावः ॥ साधकमिति ॥ सन्यासाद्योगस्य व रत्व इति शेषः ॥ अपमानादीति ॥ केन चिदपमाने कृते सति तत्र कामक्रोधपरित्यागरूपसंन्यासानुष्ठाने तत्प्रयुक्त दुःखं न भवतीत्यर्थः ॥ मोक्षादीत्यादिपदेन ज्ञानं ग्राह्यम ॥ भाष्ये ऽन्यतत्फलमपीति ॥ तात्कालिकापमानादिप्रयुक्तदुःखाभावादिरूपमित्यर्थः ॥

॥कृ० ॥समुच्चेयाभावात्समुच्चयार्थकचशब्दानुपपत्तिरित्याक्षिपति ॥ तृतीयेऽपि चिंत्यं किं कस्य साधनमिति ॥तत्र न तावज्ज्ञानं कर्मसाधनत्वेन मोक्षहेतुः॥ न किंचिदंतरायेत्यादिविरोधात् ॥अतः परिशेषाद्योगिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इति सिद्ध्यति॥ तथा च योगस्य ज्ञानसाधनत्वं सिद्धमित्यर्थः॥ अत्रयोगिभिरिति वदता योगशब्दो धार्मिणामुपलक्षकोऽर्शआद्यजंतो वेति सूचितम ॥ ५ ॥ संन्यासस्त्वित्यस्य संगतिमाह ॥ इतश्चेति ॥ ननु प्राक् संन्यासाद्योगस्य वरत्वे न कोऽपि हेतुरुक्तः ॥ तत्कथमेवमुच्यते ॥ मैवम ॥ संन्यासस्य योगावरत्वे बाधकं परिहृतम् ॥ साधकमिदानीमुच्यते ॥ बाधकाभावसहितमेव

इतश्च संन्यासाद्योगो वर इत्याह ॥ सन्यासस्त्विति ॥ योगाभावे मोक्षादिफलं न भवति अतः काम

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति॥ ६ ॥

॥ जयादिदुःखमेव तस्य मोक्षाद्येव हि फलम्॥ अन्यतत्फलमल्पत्वादफलमेवेत्याशयः ॥

साधकं वस्तुनोव्यवस्थापकम् ॥ तस्मादितश्चेति युक्तम ॥ पूर्वं संन्यासस्य निश्रेयसकरत्वमुक्तम्॥इदानीं कथं दुःखहेतुत्वमुच्यते॥ किं वाऽनेन साधकमुक्तमित्यतोव्याचष्टे ॥ योगेति ॥ विष्ण्वर्पणबुद्ध्या करणाभावसंन्यासमात्रेणेति शेषः ॥आदिपदेन ज्ञानं गृह्यते ॥ तस्य केवलसंन्यासिनः ॥योगाभावे संन्यासो निष्फल एवेत्येतन्न युज्यतेमोक्षाद्यभावेऽपि तात्कालिकापमानादिदुःखाभावादेर्भावादित्यत आह ॥ मोक्षादीति ॥

ननु प्रागिति ॥ बाधकाभावेति ॥ तथा च बाधकाभावसहितस्यैव साधकस्य योगोत्तमत्वसिद्धिरूपक्रियायाऽन्वयान्नित्यानामेकान्वयरूपेतरेतरयोगार्थश्चशब्द इति भावः॥अपमानादिदुःखाभावादेरिति ॥ आदिपदात्सरूपसुखसंग्रहः॥ बाह्यस्पर्शेष्विति गीताव्याख्यानावसरे टीकायां संन्यासमात्रेण स्वल्पस्य सुखस्याविर्भावस्य वेदितत्वादिति मंतव्यम् ॥

॥ श्री० ॥ ननु तर्हि यत्तु महत्फलयोग्यमित्याद्येवक्तव्ये मोक्षाद्येवेति विना मोक्षफलमिति मोक्षादिग्रहणं किमर्थमित्यत आह ॥ मोक्षादीति ॥ योगस्य महाफलं मोक्षाद्येवेति प्रकृतापेक्षयेत्यर्थः ॥ भाष्येऽनर्घ्यधनप्राप्तिसाधनभूतपद्मरागमणि कस्मै चिद्दत्वा तस्मान्मुष्टिपरिमिततंडुलमात्रग्रहणे तद्यथाफलं न भवति तथेत्यर्थः ॥ साधितमिति ॥ सत्यपि संन्यासे योगाभावे महाफलाभाव इति व्यतिरेकदर्शनेन योगस्यांगित्वं ततश्च प्राधान्यं संन्यासस्यांगत्वं ततश्चाप्राधान्यमिति साधितमिति भावः ॥ अन्वयमिति ॥ योगे सति संन्यासेन महाफलमित्यन्वयमाचष्ट इत्यर्थः ॥ ननु योगोऽप्येवमेवेति ॥ सत्यपि योगे संन्यासाभावे महाफलाभावात्तस्मिन् सति च भावादित्यन्वयव्यतिरेकाभ्यां संन्यासस्यैवांगित्वेन प्राधान्य योगस्य तदंगत्वेनाप्राधान्यमेवेति साम्यमित्यर्थः ॥ चरमेति ॥

अत्र पुराणसंमतिमाह ॥ तच्चेति ॥ ननु मोक्षफलाभावेऽपि धान्यादिनेव कृष्यादिकं सफलमित्युच्यते ॥तत्कथमेवमभिहितमित्यत उक्तं विवृणोति ॥ यत्त्विति ॥ महाफलं साधयितुं योग्यमित्यर्थः ॥ मोक्षादिग्रहणं प्रकृतापेक्षयैव कृतमितिभावः ॥ननु संन्यासात् योगस्य वरत्वम

तच्चोक्तम् ॥ विना मोक्षफलं यत्तु न तत्फलमुदीर्यते ॥ इति पाद्मे॥यत् महाफलयोग्यं तस्याल्पं फलमेव न भवति यथा पद्मरागस्य तंडुलमुष्टिः॥ महाफलश्च योगयुक्तश्चेत्संन्यास इत्याह ॥ योगयुक्त इति ॥

नेन साधितं तत्किमुत्तरार्धेनेत्यत आह ॥ महाफलश्चेति ॥ महत्फलं यस्मात्स तथोक्तः ॥ योगांगत्वेन ततोऽवरत्वं संन्यासस्य सिसाधयिषितम् ॥ तच्चान्वयव्यतिरेकाभ्यां सिद्ध्यति ॥ तत्रपूर्वार्धेन व्यतिरेकमुक्त्वाऽनेनान्वयमाचष्ट इत्यर्थः ॥ ननु योगोऽप्येवमेवेति चेत्सत्यम् ॥ तथाऽपि चरमभावित्वेन विशेषः ॥

॥ कृ० ॥ महाफलभोगयोग्यमित्यन्यथाप्रतीतिनिरासायाह ॥ महाफलं साधयितुमिति ॥ योगोऽप्येवमेवेति ॥ यथायोगं विना संन्यासोनिष्फलः योगे सति च सफलःतथा योगोऽपि संन्यासं विना निष्फलः सति च तस्मिन्सफल इत्यर्थः ॥ तथा च विनिगमकाभावात्संन्यासस्य योगाधिक्यमयुक्तमिति भावः ॥ चरमभावित्वेनेति ॥

१ साधयितुमिच्छाविषयम् २ मोक्षरूपमहाफलाभावादेवमुत्तरत्रापि ॥

॥श्री० ॥ कामादिवर्जनरूपसंन्यासानंतरं हि विष्ण्वर्पणबुद्ध्या कर्मानुष्ठानरूपो योगः संपद्यत इति योगस्य संन्यासानंतरभावित्वेन संन्यासस्यांगत्वं योगस्यैव त्वंगित्वमित्येवंरूप एव विशेषः ॥ स्वीकार्यो नापर इत्याशयः ॥ वाचकम ॥ पदादि ॥ ६ ॥ प्रकृतप्रमेयस्येति ॥ योगस्य ज्ञानसाधनत्वप्रतिपादनरूपप्रकृतप्रमेयस्येत्यर्थः ॥ यो न द्वेष्टीत्यत्रोक्तेत्यादि ॥ ॥ यो न द्वेष्टि न कांक्षतीत्यत्रोक्तं यद्द्वेषादिवर्जनं तत्र यत्कारणं विजितात्मत्वादिरूपं तस्यात्रोपन्यासेनेत्यर्थः॥ ब्रह्माधिगच्छतीत्यत्रेति ॥ योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छतीत्यन्वयप्रदर्शनेनैवं व्यवहृतामिति द्रष्टव्यम ॥ अवांतरफलेति॥ कुर्वन्नपि न लिप्यत इति पापाद्यलेपरूपावांतरफलोपन्यासेनेत्यर्थः ॥ इत्यादेरित्यस्येत्यादेर्निर्वचनादिति ह्यर्थः॥ स आत्मभूत इत्यादि ॥

नन्वत्र संन्यासवाचकं न श्रूयते तत्कथमेवमुच्यत इत्यत आह ॥ मुनिरिति ॥ मुनिशब्दस्य कामवर्जनलक्षणसंन्यासवचनत्वं कुत इत्यत आह ॥ तच्चेति ॥ ६ ॥ प्रकृतप्रमेयस्य समाप्तत्वादुत्तरस्य वैयर्थ्यमाशंक्याह ॥ एतदेवेति ॥ योगयुक्तस्य संन्यासस्य महाफलत्वमेव ॥ प्रपंचनं च यो न द्वेष्टीत्यत्रोक्तद्वेषादिवर्जनकारणोपन्यासेन ब्रह्माधिगच्छतीत्यत्रोक्तब्रह्मज्ञानावांतरफलोपन्यासेन चेति ज्ञातव्यम्॥ सर्वभूतात्मभूतात्मे

मुनिः सन्यासी ॥ तच्चोक्तम् ॥ स हि लोके मुनिर्नाम यः कामक्रोधवर्जित इति ॥ ६ ॥ एतदेव प्रपंचयति ॥ योगयुक्त इति ॥ सर्वभूतात्मभूतः ॥ परमेश्वरः ॥ यच्चाप्नोतीत्यादेः॥ स आत्मभूतः स्वसमीपं प्रत्यादाना

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

॥ दिकर्ता यस्य स सर्वभूतात्मभूतात्मा ॥ ७ ॥

त्यनेन जीवस्य परमात्मस्वरूपत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ सर्वेति ॥ सर्वभूतानामात्मभूतः कथमित्यत उक्तम् ॥ यच्चेति ॥ एतन्निर्वचनमाश्रित्य न स्वरूपत्वमित्यर्थः स आत्मभूत इति सर्वभूतात्मभूत इत्युक्तस्यानुवादः ॥

॥कृ० ॥कामादिवर्जनपूर्वकमीश्वरार्पणबुद्ध्या कर्मानुष्ठानं हि विशिष्टः कर्मयोगः तत्र कामादिवर्जनस्य पूर्वभावित्वात्तदनंतरभाविकर्मानुष्ठानात्मकयोगस्य ज्ञानं प्रति चरमसाधनत्वेन संन्यासापेक्षया प्राधान्यमिति भाव इत्यार्याः ॥ ६ ॥ कारणोपन्यासेनेति ॥ विशुद्धात्मत्वादिकारणोपन्यासेनेत्यर्थः ॥ अवांतरफलेति ॥ न लिप्यत इति पापलेपाभावरूपावांतरफलोपन्यासेनेत्यर्थः ॥ एतन्निर्वचनमिति ॥ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ॥ यच्चास्य संततो भावस्तेनात्मेति सतां मत इति निर्वचनमित्यर्थः ॥

१ यद्यपि भागवते अकामः सर्वकामो वेत्यादिग्रंथेन भगवदर्पणबुद्ध्या कर्मानुष्ठाने सकामेऽपि तस्मात्ससंगतिः॥ तथा च विरक्तिरिति कामादिवर्जनस्यापि योगानंतरभावित्वं प्रतीयत तथापि विरक्तिपूर्वकं भगवदर्पणबुद्ध्या कर्मकरणं पुनरपेक्षितं न तु विरक्त्यैव महाफलमिति ज्ञेयम् ॥

॥ श्री०॥ गीतागतं सर्वभूतात्मभूतपदार्थं स आत्मभूत इत्यनेनानूद्य स्वसमीपमित्यादिना द्वितीयात्मशब्दार्थवदन्नेव विग्रहं दर्शयतीत्यर्थः॥तथा च स आत्मभूत इतिभाष्यांशस्य सर्वभूतात्म भूतइत्यर्थोद्रष्टव्यः ॥ स्वरूपतः सर्वभूतात्मभूतात्मत्वादेः पापाद्यलेपं प्रतिकारणत्वाभावादाह ॥ एवं जानन्नेति ॥ ७ ॥संकल्पत्यागस्येति ॥ नैव किंचित्करोतीत्यनेन स्वातंत्र्येण कर्तृ त्वाभिमानत्यागरूपसंकल्पत्यागस्याभिधानादिति भावः ॥८॥९॥ ननु नियमज्ञापकावधारणादेरभावादाह ॥ सिद्ध मनीति योगविवरणं च किंचिदिति ॥ ब्रह्मण्याधायेत्यनेनेत्यर्थः ॥ यद्वा योगविवरणं योगफलविवरणमित्यर्थः ॥ तथा च कुर्वन्नपि न लिप्यत इत्युक्तमेव योगफलं पद्मपत्रमिति दृष्टांतकथनेन किंचिद्विव्रीयत इति भाव. ॥

स्वसमीपमित्यादिद्वितीयात्मशब्दस्यार्थः ॥ एवं जानन्नत्र विवक्षितः ॥ ७ ॥ नैव किंचिदित्यादेः प्रतिपाद्यमाह ॥ संन्यासमिति ॥ ज्ञेय इत्या दिना विशुद्धात्मेत्यादिना च स्पष्टीकृतत्वात ॥ पुनरिति ॥ स्पष्टनं च प्रागनुक्तसंकल्पत्यागस्याभिधानात् ॥ ८ ॥ ९ ॥ ननु योगयुक्त इ त्यनेन यत्संन्यासयोगयुक्तस्य कर्मालेपलक्षणं फलमुक्तं तदेव तस्य ब्रह्मण्याधायेति किमर्थं पुनरुच्यत इत्यत आह ॥ संन्यासेति ॥ प्रागुक्त

संन्यासं स्पष्टयति पुनः श्लोकद्वयेन ॥ ८ ॥ ९ ॥ संन्यासयोगयुक्त एव च कर्मणा न लिप्यत

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ॥ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥८॥प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥ ९ ॥ ब्रह्मण्याधाय कर्माणि संगंत्यक्त्वा करोति यः ॥ लिप्यते न सपापेन पद्मपत्रमिवांभसा ॥ १० ॥

॥ इत्याह ॥ ब्रह्मणीति ॥साधननियमस्योपचारत्वव्यावृत्त्यर्थं पुनः पुनः फलकथनम् ॥ १० ॥

स्यैव नियमोऽत्र क्रियते ॥ सिद्धसत्यारंभस्य नियमार्थत्वादिति भावः॥योगविवरणं च किंचिदधिकमिति चार्थः ॥ननु संन्यासस्त्वित्यनेनैव सं न्यासयोगौ मिलितावेव फलं साधयत इति नियमोऽपि लब्ध एव ॥ तत्किमर्थमिदं संन्यासयोगयुक्तस्य कुर्वन्नपि न लिप्यते॥ लि प्यते न स पापेनेति पुनः पुनः फलकथनमित्यत आह ॥ साधनेति ॥१०॥ नन्वेवंविधसर्वभूतात्मभूतात्मत्वस्य सर्वसाधारण्यात्कथं साधकस्यैवैतद्विशिष्योच्यत

इत्यत आह ॥ एवं जानन्निति ॥ ७ ॥ प्रागनुक्तेति ॥ संन्यासत्वेन रूपेण प्रागनुक्तस्य कर्तृत्वाभिमानत्यागरूपसंकल्पत्यागस्य नैवकिंचित्करोमीत्यादिनाऽभिधानादित्यर्थः ॥ तेन कामसंकल्पवर्जिता इति पूर्वाध्याये कर्मागत्वेन संकल्पत्यागाभिधानेऽपि न दोषः ॥ ८ ॥ ९ ॥ योगविवरणंचेति ॥ ब्रह्मण्याधायेत्युक्तेरिति भावः ॥ इति नियमोऽपीति ॥

॥ श्री० ॥ वृत्तेः शब्दधर्मत्वादाह ॥ तदुक्तेरिति॥ लोकवदिति ॥ यथा लोके उभौ मिलितावेव ग्रामं गच्छत इत्यादिप्रयोगे उपचारोऽपि दृष्टः किंचित्पूर्वापरीभावादेरनुभवसिद्धत्वा दित्यर्थः ॥१०॥ ननु नालपापालेप उच्यते किं तु आत्मशुद्धिरेवेत्यत आह॥ आत्मशुद्धिलक्षण इति ॥ आत्माशुद्धिरेव हि पापमिति भावः ॥ उच्यतइति ॥ तथा च पुनरुक्तिरिति भावः ॥ उभयसमुच्चयरूप एवेति ॥ संन्यासयोगयोरुभयोः समुच्चयेनानुष्ठानरूप आचार इत्यर्थः ॥ अन्यत्रेति ॥ आचारकथन इत्यर्थः ॥नन्वाचारकथनमपि किमर्थमित्यत आह ॥ ॥आचारेति ॥ नियमेति संन्यासयोगयोरन्वयव्यतिरेकाभ्यां य. साहित्यनियम ॥ संन्यासस्त्वित्यादिश्लोकेनोक्तस्तत्समर्थनार्थमित्यर्थः ॥ ११ ॥

॥ साधननियमस्येति तदुक्तेरित्यर्थः॥ संन्यासयोगौ मिलितावेव फलसाधनमिति नियमोक्तेरुपचारत्वमपि संभवति ॥लोकवत् ॥ तन्निवृत्त्य र्थमित्यर्थः ॥ १० ॥ कायेनेत्यनेनापि संन्यासयोगयुक्तस्यात्मशुद्धिलक्षणः पापालेपउच्यत इत्यत आह ॥ एवं चेति उभयसमुच्चयरूप एवे

॥ एवं चाचार इत्याह ॥ कायेनेति ॥ ११ ॥

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वाऽऽत्मशुद्धये ॥११ ॥

त्यर्थः ॥ अन्यत्र तात्पर्यान्न पुनरुक्तिरिति भावः ॥ आचारकथनमपि नियमसमर्थनार्थमिति ज्ञातव्यम् ॥ ११ ॥

॥ कृ० ॥ सामान्यनियमोऽपीत्यर्थः ॥ संन्यासयोगौ मिलितावेव मोक्षज्ञानाख्यफलं साधयत इति संन्यासस्त्वित्यत्रत्यभाष्योक्तविशेषनियमसमुच्चयार्थोऽपिशब्दः ॥ संन्यासस्त्वित्यस्य सा मान्यवाक्यत्वादिति भावः ॥ तथा च संन्यासयोगौ मिलितावेव कर्मालेपं साधयत इति नियमस्यापि सामान्यनियमांतर्गतत्वेन लाभाद्व्यर्थं पुनर्वचनमिति भावः ॥उपचारस्य शब्दवृत्तित्वा दाह ॥ तदुक्तेरित्यर्थ इति ॥ उपचारत्वमिति ॥ अर्शआद्यजंतोपचारशब्दात्स्वप्रत्ययोऽयं तेनोपचारत्वमित्यर्थः ॥ १० ॥ नन्वाचारकथनं व्यर्थमित्यत आह ॥ आचारकथनमपी ति॥प्राङ्नियममात्रमुक्तम॥ इदानीं तु तत्राचाररूपं प्रमाणमुच्यतेऽतो न वैयर्थ्यमिति भावः ॥ अतएव समर्थनार्थमित्युक्तम ॥ ११ ॥

१ मोक्षजनकज्ञानाख्यफलमित्यर्थः ॥ ज्ञाने जाते मोक्षस्य नियतत्वात् तदप्यस्यैव फलमिति वा ॥ प्रथमपक्षे शाकपार्थिवादित्वात्समासः ॥ द्वितीयपक्षे इतरेतरयोगद्वंद्वः ॥

॥ श्री० ॥ नन्वादिपदेन संन्यासस्य गृहीतत्वात् तदनुसारेण संन्यास्यसंन्यासीति च वक्तव्यम् ॥ अतो न्यूनतेत्यत आह ॥ **युक्तायुक्तेत्युपलक्षणमिति** ॥ गीतायां कर्मफलं त्य
क्त्वेत्यनेन संन्यासिनः कामकारेण फले सक्त इत्यसंन्यासिनश्चोक्तत्वादित्यवधेयम् ॥ ननु योगयुक्तो मुनिर्ब्रह्म न चिरेणाभिगच्छतीति फलमप्युक्तमेवेति चेत्तत्राह ॥ **प्रागिति** ॥ **नान्यतरे**
ति ॥ तथा चायोगव्यवच्छेदेन नियमः पूर्वं समर्थित इति भावः ॥ **तावेव यादि** ॥ तथा चात्रान्ययोगव्यवच्छेदेन नियमः समर्थ्यत इति भावः ॥ १२ ॥ **प्रागिति** ॥ नैव किंचिदि
त्यत्रेत्यर्थः ॥ **अन्यथेति** ॥ क्रियमाणे कर्मणि कारयितृत्वाद्यभिमानत्यागमनङ्गीकृत्य स्वरूपेण कर्मत्यागांगीकारे ॥ १३ ॥

तथाऽपि युक्त इत्येतत् पुनरुक्तमित्यत आह ॥ पुनरिति ॥ युक्तिर्योगः ॥ आदिपदेन संन्यासः ॥ युक्तायुक्तेत्युपलक्षणम्॥ संन्यास्यसंन्यासी
त्यपि ग्राह्यम् ॥ प्राक्संन्यासयोगौ मिलितावेव फलं साधयतो नान्यतरपरित्यागेनान्यतर इति नियमज्ञापनार्थं तयोः फलमुक्तम्॥ इदानीं
तु तावेव मोक्षसाधनम् ॥ न तु तदुभयत्यागेनान्यदिति नियमज्ञापनाय योगसंन्यासवतस्तदुभयाभाववतश्च मुक्तिसंसारविस्तारलक्षणं फल

पुनर्युक्त्यादिनियमनार्थं युक्तायुक्तफलमाह ॥ युक्त इति ॥ युक्तो योगयुक्तः ॥ १२ ॥ पुनः संन्यास

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम्॥अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

॥ शब्दार्थं स्पष्टयति ॥ सर्वकर्माणीति ॥ मनसेतिविशेषणादभिमानत्यागः ॥ १३ ॥

माहेत्यर्थः ॥ युक्तशब्दस्य सहितार्थनिवारणायार्थमाह ॥ युक्त इति ॥ १२ ॥ सर्वकर्माणीत्यस्य स्वरूपेण कर्मत्यागोऽर्थ इति प्रतीतिनि
वारणाय प्रतिपाद्यमाह ॥पुनरिति ॥ प्राक्कर्तृत्वाभिमानत्याग उक्तः इदानीं तु कारयितृत्वाभिमानत्यागोऽपीतिस्पष्टनम् ॥ स्वरूपेण कर्मत्याग
एवोच्यत इत्येतन्निराचष्टे ॥ मनसेति ॥ अन्यथा तद्व्यर्थं स्यादिति भावः ॥ १३ ॥

॥ कृ० ॥ **पुनरुक्तमिति** ॥ संन्यासस्त्वित्यादिनेति शेषः ॥ कथमनेन पुनरुक्तिनिरास इत्यत आह ॥ **प्रागिति** ॥ संन्यासस्त्वित्यादावित्यर्थः ॥ संन्यासस्त्वित्यादिवाक्यानां संन्यासयोग
योर्मध्येऽन्यतरत्यागेनान्यतरस्य फलसाधकत्वव्यवच्छेदे तात्पर्यं युक्तइत्यस्य तु तदुभयातिरिक्तसाधनव्यवच्छेदे तात्पर्यमिति न पुनरुक्तिरिति भावः ॥ **सहितार्थेति** ॥ आदिपदाद्धात्वर्थ
संग्रहः ॥ युक्तमौपयिकं लभ्यं भजमानाभिनीतवत्॥ न्याय्यं चेत्यमरोक्तेरिति भावः॥१२॥**प्रागिति**॥नैव किंचित्करोमीत्यत्रापीत्यर्थः॥ **कारयन्निति**॥नकारयन्नित्युक्तेरिति भावः॥१३॥

॥ श्री० ॥ न करोतीति ॥ तथा च न मिथ्याज्ञानित्वमिति भावः ॥ विभुरितीति ॥ उत्तरश्लोकगतं विभुपदमपीत्यर्थः ॥ १४॥ १५ ॥ अर्थप्रकाशकत्वं चेति ॥ अर्थप्रकाशकत्वस्य ज्ञानलक्षणत्वादिति भावः ॥ तत्किमर्थमुच्यत इति॥ अप्राप्ते शास्त्रमर्थवदिति न्यायादिति भावः ॥ तस्य ॥ आवरकाज्ञानस्य ॥ विनाशकत्वेनाभिमतस्य ज्ञानस्यावृतत्वादिति भावः॥ ॥ विनाशकांतरेति ॥ ज्ञानव्यतिरिक्तेत्यर्थः ॥ ज्ञानार्थयोः ॥ ज्ञानप्रयोजकयोः ॥ यन्निवर्तकांतरं तत्साधनस्यैवानुष्ठेयत्वादिति भावः ॥ ज्ञानस्याज्ञाननाशकत्वप्रसिद्धावपि सिद्धसत्या रंभो नियमार्थ इत्याशयेनाह ॥ ज्ञानमेवेति ॥ नोक्तदोष इति ॥

ननु कर्तृत्वमित्येतत्प्रागुक्तान्नाविशिष्यत इत्यत आह ॥ न चेति ॥ दर्शनादिकं कुर्वन्नेव नैव किंचित्करोमीति मन्यतेत्युक्तम्॥तर्हि मिथ्या ज्ञानी प्रसज्येतेत्याशंकानिरासाय परमेश्वरप्रेरितः कुर्वन् कारयन् वस्तुतः स्वातंत्र्येण न करोति न कारयति चेत्यनेनाहेत्यर्थः ॥ अस्य जीव विषयत्वे प्रभुरित्येतदसंभवीत्यत आह ॥प्रभुर्हीति ॥ अनेन विभुरित्युपपादितप्रायम् ॥ १४ ॥ १५ ॥ ननु ज्ञानस्याज्ञाननाशकत्वमर्थप्रकाश

न च करोति वस्तुत इत्याह ॥ न कर्तृत्वमिति ॥ प्रभुर्हि जीवो जडमपेक्ष्य ॥ १४ ॥ १५ ॥ ज्ञान

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

॥ मेवाज्ञाननाशकमित्याह ॥ ज्ञानेनेति ॥

कत्वं च प्रसिद्धमेव तत्किमर्थमुच्यतइत्यत आह॥ज्ञानमेवेति॥अज्ञानेनावृतं ज्ञानमित्युक्तम् ॥ एवं तर्हि तस्याविनाश एव स्यात् ॥ तथा च न कदाचिद्ब्रह्मप्रकाशः॥विनाशकांतरांगीकारे च ज्ञानार्थयोः संन्यासयोगयोर्वैयर्थ्यमित्याशंक्य ज्ञानमेवाज्ञाननाशकम् ॥ अतो नोक्तदोषः ॥

॥रु०॥ प्रागुक्तादिति ॥ नैव कुर्वन्नकारयन्निति प्रागुक्तादित्यर्थः॥ जीवो लोकस्य कर्तृत्वं न सृजतीत्यनेन कारयितृत्वस्य स्वयं च कर्माणि न सृजतीत्युक्त्या कर्तृत्वस्य च निषेधादिति भावः ॥ विभुरित्येतदिति ॥ उत्तरश्लोकस्थमिति शेषः ॥ १४ ॥ १५ ॥ अविनाश एवस्यादिति ॥

१स्वयमेव भावयति जगदुत्पादयतीति स्वभावो भगवान् ॥ स्वेत्युपपदंभवतेर्ण्यंतादण् ॥ २ अज्ञानावृतस्वरूपज्ञानत्वाज्जीवा भगवंतं न जानंतीत्यर्थः ॥ ३ अन्याद्विनाशकं विनाश कांतरं तस्यांगीकारे इत्यर्थः ॥

॥ श्री० ॥ तस्या विनाश एवस्यादित्यादिनोक्त इत्यर्थः ॥ ननु ज्ञानस्यैवाज्ञाननाशकत्वांगीकारे विरोधः स्यात ॥ अज्ञानेनावृतं ज्ञानमिति ज्ञानस्याज्ञानेनावृतत्वोक्तेर्ज्ञानेन त्वित्यत्र तु तस्यैव ज्ञानस्य तन्निवर्तकत्वाभिधानादित्याशयेन शंकते ॥ किं त्विति ॥अज्ञानावृतं अज्ञाननिवर्तकं च ज्ञानं भिन्नमेवातो न विरोध इत्याशयेनोत्तरमाह ॥ स्वरूपज्ञानमिति ॥ ईश्वरस्य स्वरूपविषयकं जीवनिष्ठं भगवदपरोक्षज्ञानमित्यर्थः ॥ अविद्ययाऽवृतमिति ॥ परमाच्छादिकमायया आवृतमित्यर्थः ॥ यथोक्तम ॥ श्रुतिगीतिकातात्पर्ये ॥ अथान्ये प्रकृती दृष्टे नृषु प्रातिस्विकं स्थिते ॥ स्वगुणाच्छादिका त्वेका परमाच्छादिका परेत्याद्युक्त्वा कथं प्रकृतेः परमाच्छादकत्वं तस्य व्याप्तत्वादित्याशंक्योक्तम ॥ न विष्णुं च्छादयत्येषा तज्ज्ञानं छादयेत्परम जीवस्यैवेत्यादि ॥ ॥वृत्तिज्ञानं त्विति ॥ श्रवणादिजन्यं मनोवृत्तिरूपं परोक्षज्ञानम ॥ अविद्यां परमाच्छादिकां मायां शिथिलयति जीवादपसारयतीत्यर्थः ॥ यथोक्तं तत्रैव ॥ परमाच्छादिकां पुनः ॥ व्याधूत्य मोक्षपदत्वा ददाति पुरुषोत्तम इति ॥ तथा प्रकृति द्रावय द्रावयेति च ॥ अत एवाविद्यां नाशयतीत्यनुक्त्वा शिथिलयतीत्येवोक्तम ॥ तथा च तदनंतरमीश्वररूपविषयकमपरोक्षज्ञानं मानममुत्पद्यते पश्चात्तदपरोक्षज्ञानं जीवाय परं ब्रह्म प्रकाशयतीति योज्यम ॥ तथा चात्र स्वरूपज्ञानपदेन जीवस्वरूपज्ञानग्रहणेऽविद्याशब्देन लिंगशरीररूपस्वगुणाच्छादिकमायाग्रहणे च तृतीयांतज्ञानपदोक्तपरोक्षरूपवृत्तिज्ञानस्य तन्नाशकत्वोक्तेरयोगात अपरोक्षज्ञानस्यैव तन्नाशकत्वादित्याद्यनुपपत्तिरिति कुचोद्यानवकाश इतीमं ग्रंथं व्याचक्षते ॥ तच्चित्यम ॥ परमाच्छादकमायाया अपसार्यत्वेन श्रवणजन्यपरोक्षज्ञाननिवर्त्यत्वोक्तययोगादिति ॥ वस्तुतस्तु श्रवणेनाज्ञाननिवृत्तेः प्रसिद्धत्वात्तदेव ज्ञानमिहाविद्यापदे–

किं तु स्वरूपज्ञानमविद्ययाऽऽवृतम्॥वृत्तिज्ञानं त्वविद्यां शिथिलयति ॥ ब्रह्म प्रकाशयतीत्येतदनेनाहेत्यर्थः ॥ अत्र केचिद्यथैक एवादित्योऽधकारं

॥ प्रथमज्ञानं परोक्षम् ॥ १६ ॥

नाशयति भूमंडलं च प्रकाशयति ॥ तथैकमेव ज्ञानमज्ञानं निवर्तयति॥परं च प्रकाशयतीति व्याचक्षते तदसदिति भावेनाह ॥ प्रथमेति ॥

॥ कृ० ॥ ज्ञानस्याज्ञानावृतत्वेनाज्ञाननाशकत्वायोगादितिभावः ॥ नन्वेवं सत्यन्योन्याश्रयः ज्ञानेनसत्यज्ञाननिवृत्तिः आवरकाज्ञाननिवृत्तौ च ज्ञानमितीत्याशयेन पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ स्वरूपज्ञानमिति ॥ ईश्वरविषयं साक्षिज्ञानमित्यर्थः ॥ साक्षिज्ञानस्य नित्यत्वेनेश्वरस्यच संनिहितत्वेन प्रकाशप्रसक्तौ प्राप्तप्रकाशप्रतिबंधरूपावरणस्य स्वरूपज्ञाने संभवात् प्रमाणाभावादेव वृत्तिज्ञानाभावात्तत्रोक्तरूपावरणायोगादिति भावः ॥ तदसदिति भावेनेति ॥ शृणुयाद्यावदज्ञानं मतिर्यावदयुक्तता ॥ ध्यानं च यावदीक्षा स्यात् ॥ श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ ॥ संशयं च पराणुद्य लभते ब्रह्मदर्शनमित्यादिषु ॥अज्ञाननाशकब्रह्मप्रकाशकयोः पृथक्कोक्तेरिति भावः॥ १६॥

॥ श्री० ॥ नाभिप्रेतम् ॥ तथाचेश्वरस्वरूपज्ञानमविद्यया आवृतमस्ति श्रवणजन्यमनोवृत्तिरूपं ज्ञानं त्वविद्यां ईश्वरस्वरूपापरोक्षज्ञानप्रतिबंधकाज्ञानं नाशयति ॥एवंश्रवणनाज्ञाने नष्टे मननेन च संशयविपर्ययनाशानंतरं ध्यानेनेश्वरस्वरूपापरोक्षज्ञानमुत्पद्यते तच्चापरोक्षज्ञानं सम्यक् परं ब्रह्म प्रकाशयतीत्यर्थः ॥ यथाक्रम ॥ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथक्प्रतिबंधः फलमिति श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ॥संशयं च पराणुद्य लभते ब्रह्म दर्शनमिति चेति ॥ अन्यथेति ॥ प्रथमज्ञानपदस्य परोक्षज्ञानार्थतामनंगीकृत्यापरोक्षज्ञानार्थतांगीकारे येषामज्ञानंज्ञानेनापरोक्षेण नाशितंतेषामादित्यवत्तरं ब्रह्मप्रकाशत इत्येव वक्तव्यत्वेन उत्तरार्धे पुनर्ज्ञानग्रहणं व्यर्थंस्यादिति भावः ॥ १६ ॥ ज्ञानसाधनत्वेनेत्यनंतरं तद्बुद्धित्वादिकं यदुच्यते इत्यनुवर्तते ॥ तथा च तद्बुद्धय इत्युक्तपरोक्षज्ञानवतोऽपरोक्ष ज्ञानवंतोभूत्वा तेन निर्धूतकल्मषा संतः पुनरावृत्तिं गच्छंतीति योजनाद्रष्टव्या॥ उक्तत्वादिति॥ तथा च पुनरुक्तिरिति भावः ॥व्यवहित साधनत्वमपपादयति ॥ न हीति ॥ श्रवणेति ॥ गुरूपदेशेनागमार्थविचारणात्मकपरोक्षज्ञानरूपश्रवणेत्यर्थः ॥ किं तु ध्यानेनैवेति शेषः॥ इदं त्विति ॥ तद्बुद्धय इतिवाक्यम अपरोक्षज्ञानाव्यवहितसवेक्षणवृत्तिध्यानरूपं साधनमाहेत्यर्थः ॥ १७ ॥

तृतीयांतपदोक्तम् ॥ द्वितीयमपरोक्षमिति शेषः॥अन्यथा द्विज्ञानग्रहणं व्यर्थं स्यादिति भावः ॥१६ ॥तद्बुद्धित्वादिकं यद्यपुनरावृत्तिसाधनत्वे नोच्यते तदाऽपरोक्षज्ञानादेव मोक्ष इति गैनः पक्षः ॥ अथ तद्बुद्धयो ज्ञाननिर्धूतकल्मषा इति ज्ञानसाधनत्वेन ॥ तदसत् ॥ ज्ञानेनेति प

॥ अपरोक्षज्ञानाव्यवहितसाधनमाह ॥ तद्बुद्धय इति ॥ १७ ॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

रोक्षज्ञानस्यापरोक्षज्ञानसाधनत्वेनोक्तत्वादित्यत आह ॥ अपरोक्षेति ॥ सत्यम ॥ परोक्षज्ञानमपरोक्षज्ञानसाधनम् ॥ किं तु व्यवहितम् ॥ न हि श्रवणमननानंतरमेवापरोक्षज्ञानमुत्पद्यते ॥ इदं त्वव्यवहितसाधनमाहेत्यर्थः ॥ १७ ॥

॥ कृ० ॥ अव्यवहितसाधनमिति ॥ ध्यानाख्यमिति शेषः ॥ १७ ॥

अ. ३ पा. ३ अ. २५ सू. १ अयमस्यार्थ इति तत्वनिश्चयेन साहतोऽयमेवार्थोनान्यइति तन्निर्धारणार्थेनियमः ॥श्रवणमननफलद्वयमपि तत् ॥ध्यानफलाद्ब्रह्मापरोक्षदृष्टेः ॥ पृथक् ॥ अतोदृष्टचर्थं ध्यानं कार्यं ॥श्रवणमननयोः संशयविपर्ययत्वदोषप्रतिबंधाभावः फलमतस्तेपिकर्तव्ये ॥ श्रोतव्य इत्यादिश्रुतौ विहितत्वात्त्रितयमप्यवश्यंकार्यमितिसूत्रार्थः २ इदंशब्दार्थः ॥ ३ शेषपूरणमितिभावः ४ नष्टइत्यर्थः ॥

॥ श्री० ॥ **प्रकृतानुपयुक्तमिति** ॥ प्रकृतापरोक्षज्ञानसाधनत्वाभावादिति भावः ॥ **अयुक्तं चेति** ॥ सर्वत्र ब्राह्मणादिषु साम्यदर्शनस्यायुक्तत्वादिति भावः ॥ **तद्बुद्धित्वादिनेति** ॥ अस्य साम्यदर्शनस्य तद्बुद्धित्वादिना पूर्वोक्तेन सह समुच्चयार्थ इत्यर्थः ॥ नन्वेतत्श्लोकोक्तसाम्यदर्शनस्य परमेश्वररूपाविषयत्वं कुतो गम्यत इत्यतः। निर्दोषं हि समं ब्रह्मेत्युत्तरवाक्यबलादित्याह ॥ **परमेश्वरेति** ॥ नन्वेतत्साम्यदर्शनस्यापरोक्षज्ञानसाधनत्वं केन ज्ञातव्यमित्यत उक्तम्॥ **अपरोक्षेति** ॥ **प्रकरणेति** ॥ अपरोक्षज्ञानसाधनकथनप्रकरण एवोक्तत्वादित्यर्थः॥ ॥**इत्यत इति** ॥वाक्यप्रकरणाभ्यामेव ज्ञायमानत्वेन स्पष्टमनुक्तत्वादित्यभिप्रायेणेत्यर्थः ॥ नन्वपरोक्षज्ञानवत एवेदं साम्यदर्शनं कथ्यते पंडिताः समदर्शिन इति वचनात् न त्वपरोक्षज्ञानसाधनत्वेनेत्यत आह ॥ **पंडितशब्दस्त्विति** ॥ **आगमज्ञानम्** ॥ आगमजन्यं ज्ञानमित्यर्थः ॥ १८ ॥

विद्याविनयेत्यादिप्रकृतानुपयुक्तमयुक्तं च कथमुच्यत इत्यत आह ॥ परमेश्वरेति ॥ सर्वत्र ब्राह्मणादिषु स्थितानां सर्वत्र गुणेषु दोषाभावेषु वा साम्यं तारतम्याभावः ॥ तद्बुद्धित्वादिना सहास्य समुच्चयार्थश्चशब्दः॥परमेश्वरविषयता निर्दोषं हीत्युत्तरवाक्यगम्याऽपरोक्षज्ञानसाधनता

॥ परमेश्वरस्वरूपाणांसर्वत्रसाम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवानाह ॥ विद्येति ॥ १८ ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥

च प्रकरणगम्येत्यत आशयवानित्युक्तम् ॥ पंडितशब्दस्तु परोक्षज्ञानवचनः पांडित्यमागमज्ञानमिति वचनात् ॥ १८ ॥

॥ क्र० ॥ **प्रकृतानुपयुक्तमिति** ॥ संन्यासयोगज्ञानानामन्यतमस्यानुक्तेरिति भावः ॥ **अयुक्तं चेति** ॥ ब्राह्मणादीनां साम्याभावादिति भाव ॥ ननु तद्भिन्नत्वे सति तद्गतधर्मवत्वं साम्यम् ॥ तच्चपरमेश्वररूपाणां भेदाभावादयुक्तम् ॥ न चैश्वर्यगुणानां तदीयदोषाभावानां च सांम्यं विवक्षितं तेषामपि भेदाभावात्॥ सांम्यमनन्वितया षष्ठ्यान्याय्यत्वेन सप्तम्ययोगाच्चेत्यत आह ॥ **तारतम्याभाव इति** ॥ ननु पंडिता भूत्वा समदर्शिन इति योजनायां साम्यदर्शनस्यापरोक्षज्ञानसाध्यत्वप्राप्तेः कथमपरोक्षज्ञानसाधनत्वमुक्तम् ॥ समदर्शिनो भूत्वा पंडिता इति योजनायां तु कंठरवेणैवापरोक्षज्ञानसाधनत्वप्राप्तेः कथं प्रकरणगम्यत्वमित्यत आह ॥ **पंडितशब्दस्त्विति** ॥ १८॥

१ उत्तरोत्तरभावित्वात्तत्क्रमेण निर्देशः ॥ २ सर्वत्रेत्यस्य द्वितीयार्थोऽधिकार इति ज्ञेयम् ॥

॥ श्री० ॥ ज्ञानिनोऽपि ॥ अपरोक्षज्ञानिनोऽपि ॥ उक्तः ॥ ज्ञानिनामपि सति प्रारब्धकर्मणि जन्मांतरं युक्तमिति द्वितीयाध्याय इत्यर्थः ॥ नेहैव एवेति ॥ अपरोक्षज्ञानसाधनभूतं साम्यज्ञानं यस्मिञ्जन्मन्युत्पन्नं तदिह एवेत्यर्थः॥ अधिकोक्तिरिति॥तथा चार्थवादत्वान्नस्वार्थे तात्पर्यं किं तु साम्यदर्शनस्य प्राशस्त्य एवेति भावः॥१९॥कश्चित सकर॥आ अध्यायपरिसमाप्तेरध्यायपरिसमाप्तिपर्यंतम॥अपरो भास्करः॥स्वयं मिलित्वेत्यन्यथाप्रतीतिराह॥मेलयित्वेति॥संन्यासयोगज्ञानानां प्रतिपादकस्य भिन्नभिन्नप्रकरणस्यादर्शनादाह॥शंकानुसारेणैवेति॥ ॥आदौ ग्रहणेनेति ॥ आलपाचनरन्यायमनतिक्रम्येति शेषः ॥सूचितमिति ॥योगज्ञानयोरन्यतरस्यादौ ग्रहणेन प्रहृष्येदित्यत्रान्यतरस्याप्यप्रतिपादनादसंगतिः स्यादिति भावः ॥ २० ॥

ननूत्तरवाक्ये साम्यदर्शनं मुक्तिसाधनमेवोच्यते तत्कथमुच्यते अपरोक्षज्ञानसाधनमिति ॥ प्राग्ज्ञानिनोऽपि जन्मांतरसद्भाव उक्तः ॥ तत्कथमिहैवेति तद्देहएव मुक्तिरुक्तेत्यत आह ॥ तदेवेति ॥ स्तुतावधिकोक्तिः संभवतीति भावः ॥ १९ ॥ अत्र कश्चिदाध्यायपरिसमाप्तेर्ज्ञानिनः कर्माभावः प्रतिपाद्यत इत्याह ॥ अपरस्तु ज्ञानस्वरूपं तत्सहकारिसाधनं च प्रतिपाद्यत इति ॥ तदुभयमसत् ॥ अप्रतीतेरिति भावेना

तदेव स्तौति ॥ इहैवेति ॥ १९ ॥ संन्यासयोगज्ञानानि मिलित्वा प्रपंचयत्यध्यायशेषेण ॥ २० ॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

ध्यायशेषप्रतिपाद्यमाह॥संन्यासेति ॥मिलित्वा मेलयित्वा शंकानुसारेणैव न तु प्रकरणभेदेनेत्यर्थः॥पुनरुक्तिपरिहारार्थं प्रपंचयतीत्युक्तम्॥संन्यासस्यादौ ग्रहणेन न प्रहृष्येदिति संन्यासप्रपंचनमिति सूचितम्॥२०॥ कृ० ॥ मागिति ॥ स्थित्वास्यामंतकालेपीत्यत्रेत्यर्थः॥ १९ ॥ ननु समानकर्तृकतानिर्वाहार्थं भगवान्मिलित्वा संन्यासयोगज्ञानानि प्रपंचयतीति वक्तव्यम ॥ तत्र केनमिलित्वेत्याकांक्षायां यदि संनिहितैः संन्यासादिभिरिति वा पुरुषांतरेणेति वोच्येत तदा तेषां प्रपंचनकर्तृत्वाभावाद्बाध इत्यत आह ॥ मेलयित्वेति ॥ संनिधानात्संन्यासाद्यन्वय इति भावः ॥ संन्यासयोगज्ञानानां संवलनलक्षणमेलनस्याप्यभावादाह ॥ शंकानुसारेणैवेति ॥ तत्र तत्र प्राप्तशंकानुसारेणैवेत्यर्थः ॥ न तु प्रकरणभेदेनेति॥ संन्यासस्ततो योगः ततो ज्ञानमिति प्रकरणशुद्ध्या मेलनं तु नेत्यर्थः ॥ संन्यासानंतरं यत्किंचिद्योगः पुनः संन्यास इत्यादिरूपेण प्रतिपादनादिति भावः ॥ संन्यासप्रपंचनावसरेऽपि ज्ञानस्य ज्ञानप्रपंचनावसरेऽपि संन्यासस्येत्यादिरूपेण प्रतिपादनादिति भाव इत्यन्ये ॥ २० ॥

१ इति प्रश्लेष इति भावः २ संन्यासादीनां जडत्वात्पुरुषांतरस्याश्रुतत्वादिति ज्ञेयम् ॥

॥ श्री० ॥ शंकानुसारेणैवेत्युक्तं दर्शयति ॥ प्राग्योगाभाव इति ॥ स्वरूपसुखेति ॥ तथा च न विगतप्रयोजनत्वरूपं वैयर्थ्यमिति भावः ॥ एवं च योगेन तदभावात् संन्यासस्यैवाधिक्यमिति द्रष्टव्यम् ॥ न निर्विशेषत्वमिति ॥ सुखस्यात्मस्वरूपत्वेऽपि अभेदे भेदकार्यकारिणो विशेषस्यांगीकारेणाधाराधेयभावोपपत्तिरित्याशयेनात्मनि सुखमित्युक्तमिति भावः ॥ ज्ञानद्वारेति ॥ अपरोक्षज्ञानद्वारेत्यर्थः ॥ पुनस्तिरोभावेति ॥ कामादिराहित्यरूपसंन्यासेन लभ्यमानस्य सुखस्याक्षयत्वेऽपि पुनस्तिरोभावोऽस्ति ब्रह्मयोगेन ज्ञानद्वारा लभ्यमानस्य सुखस्य मौक्तिकत्वेन पुनस्तिरोभावो नास्तीत्याशयः ॥

प्रकृतस्य संन्यासिन एवाक्षयसुखप्राप्तिरुच्यत इति परव्याख्यानमसदिति भावेनाह ॥ पुनरिति ॥संन्यासस्त्वित्यादिना प्रागुक्तत्वात्पुनरिति॥ आधिक्यं संन्यासात् ॥ प्राग्योगाभावे संन्यासस्य वैयर्थ्यमुक्तम् ॥ तदसत् ॥ कामाद्युपद्रवक्षये स्वरूपसुखस्याविर्भावादित्याशंकानिराकरणात्स्पष्टनम् ॥ नैतदत्र प्रतीयत इत्यतो व्याचष्टे॥कामेति ॥बाह्यस्पर्शेष्वसक्तात्मेत्यस्यार्थः॥कामरहित इति॥आत्मस्वरूपस्यापि सुखस्य न

पुनर्योगस्याधिक्यं स्पष्टयति ॥ बाह्यस्पर्शेष्विति ॥ कामरहितआत्मनि यत्सुखं विंदति स एव ब्रह्मयोगयुक्तात्मा चेत्तदेवाक्षयं सुखं विंदति॥ब्रह्मविषयो योगो ब्रह्मयोगः ध्यानादियुक्तस्यैवात्मसुखमक्षयम्॥

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् ॥ स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥

॥ अन्यथा नेत्यर्थः ॥ २१ ॥

निर्विशेषत्वमिति ज्ञापनायात्मनीत्युक्तम्॥स एव कामरहित एव तदेव आत्मसुखमेव॥ब्रह्मणा योग इति प्रतीतिनिरासायाह॥ब्रह्मेति॥कथमनेन संन्यासाद्योगस्याधिक्यं स्पष्टीकृतमित्यतोब्रह्मयोगशब्दार्थं विवृण्वन् तात्पर्यमाह॥ध्यानादीति॥ज्ञानद्वारेति शेषः॥अक्षयं पुनस्तिरोभावरहितम्॥

॥कृ०॥आत्मनीत्युक्तमिति ॥ आत्मनि सुखमिति संबंधितया निर्देशनात्माभिन्नस्यापि सुखस्य भेदप्रतिनिधिविशेषसूचनादिति भावः ॥

१ स्वरूपसुखाविर्भावात् २ आविर्भूतस्य ३ स्वरूपत्वादिति भावः॥

॥ श्री० ॥ कथमनेन योगस्य संन्यासादाधिक्यमुक्तमिति चेन्न योगस्य तिरोभावरहितमहाफलसाधनत्वात् संन्यासस्यातथात्वात् ॥ तथाऽपि कथमाधिक्यमित्यतः पूर्वोक्तन्यायं स्मारयति ॥ तिरोभावोपेतं त्विति ॥ उक्तमेवेति ॥ यत्तु महाफलयोग्यं तस्याल्पं फलमेव न भवति यथा पद्मरागस्य तंडुलमुष्टिरित्युक्तमित्यर्थः ॥ व्याख्यानांतरे त्विति ॥ प्रकृतसंन्यासिन एवाक्षयसुखप्राप्तिरुच्यत इत्यपव्याख्याने बाह्यस्पर्शेष्वसक्तात्मा सुखमक्षयमश्नुत इत्येतावता पूर्णत्वात् विंदत्यात्मनीत्यादीनां बहूनां वैयर्थ्यमित्यर्थः ॥ २१ ॥ ...हेति ॥ तदुपयोगिकथनेन संन्यासकथनपरत्वमेवेत्याशयेनाहेत्यर्थः ॥ २२ ॥ अंतर्भावयितुम् ॥ संन्यासादित्रितय इति शेषः ॥ संन्यासार्थमिति ॥ तथा च तदुपयोगिकथनेन संन्यासकथनपरत्वमेवेति भावः ॥ प्रशंसायामनुपयुक्तम् ॥ प्रशंसानुपयोगीत्यर्थः ॥ उत्तरत्र नान्यत्रेति व्याख्यानकथनादाह ॥ इहैवेति ॥ अनुवादे ॥ कु० ॥ उक्तमेवेति ॥ संन्यासस्तित्येतद्व्याख्यावसर इति शेषः ॥ तथैव

अन्यथा संन्यासमात्रेण तिरोभावोपेतं त्वल्पत्वादफलमेवेत्युक्तमेव ॥ व्याख्यानांतरे तु बहूनां पदानां वैयर्थ्यमिति भावः ॥ २१ ॥ ननूत्तरश्लोके संन्यासादित्रितयांतर्गतं न किंचिदुच्यत इत्यत आह ॥ संन्यासार्थमिति ॥ निंदयतीति स्वार्थे णिच् ॥ संन्यासार्थिनेति वा ॥ २२ ॥ उत्तरश्लोकमप्यंतर्भावयितुमाह ॥ तदिति ॥ कामभोगपरित्यागं संन्यासार्थमिति वर्तते ॥ इहैव शरीरविमोक्षणात्प्रागिति प्रशंसायामनुपयुक्त

संन्यासार्थं कामभोगं निंदयति ॥ येहीति ॥ २२ ॥ तत्परित्यागं प्रशंसयति ॥ शक्नोतीति ॥ कामक्रोधो

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥ आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥ २२ ॥
शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

॥ द्भवं वेगं सोढुं शक्नोति ॥ शरीरविमोक्षणात्प्राक् ॥

मिति भावेन तद्विहायान्यद्योजयति ॥ कामेति ॥ वेगं मनसोऽनवस्थानम् ॥ एवं तर्हीहैव शरीरविमोक्षणात् प्रागितिकिमर्थमुक्तमित्यतस्तदनूद्य तात्पर्यमाह ॥ शरीरेति ॥ इहैवेत्यनुवादे ग्राह्यम् ॥ तत्र विवृतमस्माभिः ॥ व्याख्यानांतरेत्विति ॥ प्रकृतस्य संन्यासिन एवाक्षयसुखप्राप्तिरुच्यत इति व्याख्यानांतरे बाह्यस्पर्शेष्वसक्तात्मा सुखमक्षयमश्नुत इत्येतावतैव पूर्तेर्बहूनां वैयर्थ्यमित्यर्थः ॥ २१ ॥ स्वार्थे णिजिति ॥ बहुत्वमेतन्निदर्शनमित्युक्तेरिति भावः ॥ प्रयोजकव्यापारे णिच्यपेक्षेऽपि नानुपपत्तिरिति भावेनाह ॥ संन्यासार्थिनेति वेति ॥ यथा भागवतादौ सुतासुक्तं शुकादिरनुवदति ॥ तथा संन्यासार्थिकृतां निंदां गीताचार्योऽनुवदति ॥ ततश्च भगवान्संन्यासार्थिना कामभोगं निंदयतीत्युपपन्नमिति भावः ॥ २२ ॥ वेगाख्यगुणस्य कामक्रोधजन्यत्वाभावादाह ॥ मनसोऽनवस्थानमिति ॥ नन्विहैवेत्येतदनुवादे कुतो ग्राह्यम् ॥ तथात्वेऽपि वाऽस्मिंल्लोक इत्यर्थः

॥ श्री० ॥ शरीरविमोक्षणात्प्रागित्यनुवादपरे भाष्ये ॥ तस्यार्थमाह ॥ अस्मिन्नेवेति ॥ भूलोक एवेत्यर्थः ॥ अत एवेति ॥ इहैवेत्यस्यैतल्लोकपरत्वादेवेत्यर्थः ॥ मनुष्यशरीर इति॥ ॥ तस्यैतल्लोकगतत्वादित्यर्थः ॥तत्सहनेति ॥ कामक्रोधवेगसहनेत्यर्थः ॥ एवमुच्यत इति ॥ इहैव नान्यत्रेति कस्मादुच्यत इत्यर्थः ॥ नन्वनेन कोदोष उक्तइत्यत आह ॥ तथा चेति ॥ कामादिजयानंतरं ब्रह्मलोकप्राप्तिस्तत्प्राप्तौ कामादिजय इत्यन्योन्याश्रयः स्यादित्यर्थः ॥ तथा च ब्रह्मलोकस्थितानां कामादिसहनं न साधनरूपमिति भावः ॥ ननु तर्हि कामादिसहनस्य ब्रह्मलोकेऽपि सत्वात्कथं नान्यत्रेत्युक्तं भाष्य इत्यतस्तदभिप्रायमाह ॥ अन्यत्रेतीति ॥ वाक्यभेद इति ॥ यः कामक्रोधोद्भवं वेगं सोढुं शक्नोति स युक्तः स सुखी नर इत्येकं वाक्यम् ॥

अस्मिन्नेव लोक इति ॥ अत एवोक्तं मनुष्यशरीर इति ॥ अतोऽत्रैव तत्सहनाय प्रयतितव्यमित्यभिप्रायशेषः ॥ ननु ब्रह्मलोकादौ तत्सहनमत्यंतसुशकम् ॥ तत्कथमेवमुच्यत इत्यत आह॥ब्रह्मेति ॥ तथाचान्योन्याश्रय इति भावः॥ अन्यत्रेति पश्वादिशरीरेष्वुदेस्तमिति हृदयम्॥

यथा मनुष्यशरीरे सोढुं सुशकः तथा नान्यत्रेति भावः ॥ ब्रह्मलोकादिस्तु जितकामानामेव भवति ॥ २३ ॥

एतेनात्र वाक्यभेदः कार्य इति सूचितम्॥

॥ कृ० ॥ कुतो वाच्य इत्यत आह ॥ अत एवेति ॥ इहेत्यस्यानुवादे प्राग्वर्तमानं तस्य कार्यं वा इहेति चार्थः ॥ यद्यनुवादे इहैवेति न स्यात् यदि च तस्योक्तार्थो न स्यात्तदा मनुष्यशरीर इति तात्पर्योक्तिः कथं स्यात् ॥ शरीरविमोक्षणात्प्रागित्येतेन शरीर इत्यस्य लाभेऽपि मनुष्यशरीर इत्यस्यालाभात् इहैवेत्युक्ते तस्योक्तार्थत्वे न मनुष्यशरीरलाभः ॥ तस्यैतल्लोकमात्रवृत्तित्वादिति भावः ॥ न च पश्वादिदेहस्याप्येतल्लोकस्थत्वान्मनुष्यादिशरीर इति वक्तव्यम् ॥ पश्वादिदेहे सहनाभावेनायोग्यत्वेनैव तन्निरासात् ॥ एवशब्दवैयर्थ्यमाशंकते ॥नन्विति ॥ कथमेवमुच्यत इति ॥ नान्यत्रेति कथमुच्यत इत्यर्थः ॥ ततश्च तदर्थकैवशब्दवैयर्थ्यमिति भावः ॥ अन्योन्याश्रयत्वमिति ॥ ततश्च ब्रह्मलोकादिस्थितानां कामादिसहनं न साधनरूपम् ॥ तदेव चात्र विवक्षितमिति भावः ॥ ननु यदि साधनरूपं कामादिसहनं न ब्रह्मलोकादौ तर्हि साधनरूपस्य ब्रह्मलोकादौ प्रसक्त्यभावात्तद्व्यावृत्त्यर्थं नान्यत्रेति न वक्तव्यमित्यत आह ॥ अन्यत्रेतीति ॥ पश्वादिशरीरस्य कर्मभूमिस्थत्वात्तत्र साधनरूपकामादिसहनप्रसक्तौ तद्व्यावृत्त्यर्थं नान्यत्रेत्युक्तमिति भाव इत्याहुः ॥ भाष्ये तु ननु तर्हि कामादिसहनस्य ब्रह्मलोकादावपि सत्वात्कथं नान्यत्रेत्युक्तमित्यत आह ॥ अन्यत्रेत्युक्तम् ॥ वाक्यभेद इति॥

१ कृष्णाचार्यमते अन्योन्याश्रयत्वमिति पाठः २ व्यावृत्तम् ॥

॥श्री०॥ तच्च सहनं इहैव प्राक् शरीरविमोक्षणादित्यपरं वाक्यमित्यर्थः॥२३॥कथितत्वादिति ॥ प्रजहातीत्यादिनेति शेषः ॥ संन्यासादित्रयकथनांतर्भावं ज्ञानिलक्षणकथनस्योपपादयितुमाह॥ यथेत्यादिना॥ कथमिति ॥ अंतरित्यनन्वयार्थम् ॥ सुखस्यांतःस्थत्वाव्यभिचारादिति भावः॥ आराममुखशब्दार्थांतर्गतयोरिति ॥अत्र भाष्ये दर्शनजन्यसुखमेवारामशब्दार्थः परेत्येतद्दर्शनविषयप्रदर्शनार्थं स्वरूपकथनम् ॥ एतदभिप्रायेणैव परस्यारामशब्दार्थांतर्गतत्वमुक्तं टीकायां न तु तच्छब्दार्थांतर्गतत्वं परस्य तथात्वे परेत्येतत् स्वरूपकथनमिति प्रागुक्तविरोधापत्तेः दर्शनस्पर्शसंभाषादित्यभिधानविरोधाच्चेति ज्ञातव्यम् ॥

शरीरविमोक्षणपर्यंतं न सकृदिति कश्चित्॥तदसत् तथासत्याशरीरविमोक्षणादिति स्यात् ॥ इहैवेति च व्यर्थम् ॥ २३॥ ननु योगिनो ब्रह्माधिगतिः प्राक् उक्ता तत्किं पुनरुच्यत इत्यत आह॥ ज्ञानीति ॥ द्वितीये कथितत्वात् प्रपंचयतीत्युक्तम् ॥यथा योगस्याधिक्यकथनं योगनिरूपणमेव॥ संन्यासार्थे निंदास्तुती च संन्यासनिरूपणमेव तथा॥ज्ञानिलक्षणकथनं च ज्ञाननिरूपणमिति।आरामशब्दार्थं तावदाह॥आराम

ज्ञानिलक्षणं प्रपंचयत्युत्तरैः श्लोकैः ॥ आरामः परदर्शनादिनिमित्तंसुखम् ॥ अत्र तु परमात्मदर्श

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः॥ स योगी ब्रह्म निर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

॥ नादिनिमित्तं तत् ॥ सुखं तूपद्रवक्षये व्यक्तम् ॥ अत्र तु कामादिक्षये व्यक्तमात्मनः सुखम् ॥

इति॥ इदानीमंतरारामशब्दलब्धमर्थमाह॥अत्र त्विति॥तत्सुखं एवंतर्हि अंतः सुख इत्यनेनैवगतार्थमेतदित्याशंक्य सुखशब्दस्य तावदर्थभेदमाह ॥
॥सुखं त्विति॥व्यक्तमात्मसुखमिति संबंधः ॥तर्ह्यंतःसुख इति कथमित्यतस्तल्लब्धार्थमाह॥अत्र त्विति॥ अनेनारामसुखशब्दार्थांतर्गतयोः

॥कृ०॥यः कामक्रोधोद्भवं वेगं सोढुं शक्नोति स युक्तः स सुखी नर इत्येकं वाक्यं तच्च सहनमिहैवप्राक् शरीरविमोक्षणादित्यपरं वाक्यमिति वाक्यभेद इत्यर्थः॥नन्वाद्येऽध्यायेऽपि तदर्थो ज्ञायते प्राग्दीव्यत इत्यादौ तर्हि किं न स्यादित्यत आह ॥ इहैवेति चेति॥२३॥ प्रागुक्तेति ॥योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छतीत्यत्रोक्तेरित्यर्थः॥द्वितीय इति॥ प्रजहाति यदेत्यादिनेति शेषः ॥ नन्वेवं सति संन्यासयोगज्ञानानि प्रपंचयतीति प्रागुक्तविरोध इत्यत आह ॥ यथेति ॥अंतःसुख इति कथमिति ॥ सुखस्यांतःस्थत्वाव्यभिचारादंतरितिव्यर्थमित्यर्थः॥ आरामसुखशब्दार्थांतर्गतयोरिति ॥

॥ श्री० ॥ **अंतरित्येतदिति** ॥ तथा चांतस्थितं सत्परं ब्रह्म तद्दर्शनादिनिमित्तं सुखमागमः तथाऽतः स्थिता ये कामाद्युपद्रवास्तत्क्षये व्यक्तं यत्सुखं तदेव सुखशब्देनोच्यत इत्यर्थो द्रष्टव्यः ॥ परोपद्रवयोरंतरित्येतद्विशेषणमिति कुत इत्यत उक्तम्॥ **सामर्थ्यादिति** ॥ आकांक्षापूर्तिरूपाद्योग्यतारूपाच्च सामर्थ्यादित्यर्थः ॥ **मुख्य संप्रत्ययादिति** ॥ मुख्यामुख्ययोर्मुख्ये संप्रत्यय इतिन्यायेनेति शेषः ॥ **शब्दतः प्राप्तमिति** ॥ अंतर्ज्योतिर्यस्यासावंतर्ज्योतिरिति शब्दनिर्वचनात्प्राप्तमित्यर्थः ॥ **उच्यत इति**॥ अंतर्ज्योतिष्ट्वमिति वर्तते ॥ **विशेषणत्वेनेति** ॥ इतरव्यावर्तकत्वेनेत्यर्थः ॥ **तत्सामर्थ्यात्** ॥ विशेषणत्वेनोक्तिसामर्थ्यात् ॥ **इदम्** ॥ व्यक्तेरिति पदम् ॥ अन्यथाऽति व्याप्तिःस्यादिति भावः ॥ **अध्याहारेणेति** ॥ अंतरित्यनंतरं व्यक्तेरित्यध्याहारस्तथाचांतर्व्यक्तं ज्योतिर्यस्यासावंतर्ज्योतिरित्यर्थः ॥

परोपद्रवक्षययोरंतरित्येतत् ॥ सामर्थ्याद्विशेषणमित्युक्तं भवति ॥ ज्योतिःशब्दार्थं तावदाह ॥ स्वयमिति ॥ ज्योतिष्ट्वमिति शेषः ॥ यद्यपि ज्योतिःशब्दः प्रकाशमात्रे प्रवर्तते ॥ तथाऽपि भगवत एव परानपेक्ष्यप्रकाशत्वात् मुख्ये च संप्रत्ययात् स एव ज्योतिरित्यर्थः ॥ इदानीमंतर्ज्योतिःशब्दार्थमाह ॥ तद्व्यक्तेरिति ॥ तस्य भगवतोऽन्तर्हृदये व्यक्तेरित्यर्थः ॥ नन्वंतर्ज्योतिर्यस्यासावंतर्ज्योतिः ॥व्यक्तेरिति तु कथं लभ्यत

॥ स्वयं ज्योतिष्ट्वाद्भगवतः ॥ तद्व्यक्तेरंतर्ज्योतिः ॥ सर्वेषामंतर्ज्योतिष्ट्वेऽपि व्यक्तेर्विशेषः ॥

इत्यत आह ॥ सर्वेषामिति ॥ शब्दतः प्राप्तमंतर्ज्योतिष्ट्वं सर्वसाधारणम् ॥ अत्र तु ज्ञानिनोविशेषणत्वेनोच्यते॥ तत्सामर्थ्यादिदं लब्धमिति भावः ॥ यद्वा तद्व्यक्तेरित्यध्याहारेण तात्पर्यमुक्तम् ॥ ॥ कु० ॥ न च परेत्यस्यागम शब्दार्थत्वमयुक्तम् ॥ परेत्येतत्स्वरूपकथनमिति प्रागुक्तविरोधात् ॥ अभिधानविरोधाच्चेति वाच्यम् ॥ आगमशब्दार्थांतर्गतदर्शनविषयप्रदर्शनार्थं स्वरूपकथनम् यत्परेति तस्यांतरिति विशेषणमित्यभिप्रायात् ॥ **विशेषणमिति** ॥ अंतर्यः पर इति अंतर्ये उपद्रव इति विशेषणमित्यर्थः ॥ ननु नामार्थस्य नामार्थेनैवान्वयो नत्वेकदेशेनेति नियमात्कथमंतरित्यस्यैकदेशान्वय इत्यत उक्तम् ॥ **सामर्थ्यादिति** ॥ योग्यत्वादित्यर्थः ॥ चैत्रस्य नप्त्रादौ व्यभिचारादुक्तनियम एवासिद्ध इति भावः ॥ ननु तर्हि शाब्दबोध आर्थिकबोधश्चेति बोधद्वयमापन्नमित्यत आह॥ **यद्वेति** ॥

१ परश्चोपद्रवक्षयश्च तयोः ॥

॥ श्रीः ॥ तथा अध्याहारेण किं कृतमित्यत आह प्रयोजनकथनाय सर्वेषामिति भाष्यं प्रवृत्तमित्याह॥अध्याहारस्येति असंभवित्वमिति ॥ ज्ञानिनामपि शुकादीनां भगवदन्यवस्तु तद्दर्शनसद्भावादसंभवित्वं नाम लक्षणदोष इति भावः ॥आहेति ॥द्वितीयपक्षसंगिकृत्याहेत्यर्थः॥ अन्यदिति॥असंप्रज्ञातसमाधेरन्यदित्यर्थः ॥ किंचिद्विशेषाः ॥ क्रियतेऽनेनेति किंचित्कारः न किंचित्कारः अकिंचित्कार इति विग्रहमभिप्रेत्यार्थमाह ॥विक्षेपकरणेति ॥ अन्यदर्शनस्य मनोविक्षेपकारित्वाभावादित्यर्थः ॥ एवशब्द इत्यनन्तरमध्याहार्यमाह ॥ संभवदर्थ इति ॥ वस्त्वन्तरनिवृत्तिरूपार्थोंगीकारे असंभवाभावेन लक्षणं त्वदुक्तं संभवतीति संभवदर्थ इत्यर्थः ॥ एतेनेति ॥ इतरदर्शनव्यवच्छेदकत्वकारणेनेत्यर्थः ॥लक्ष्यमेवेति॥लक्ष्यतावच्छेदकमेवेत्यर्थः ॥ अपरोक्षज्ञानिनो हि लक्षणमुच्यते तत्र न ज्ञानित्वं लक्ष्यतावच्छेदकं तदेवानर्थेन तज्ज्योतिरिति लक्ष्यतावच्छेदकलक्षणयोरैक्यादितरभेदानुमितेर्नैरर्थक्यं स्यात् ॥ व्याप्तिग्रहणकाल एव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेर्गतत्वादिति भावः ॥ एतेनेत्युक्तमुपपादयति ॥ व्यवच्छेदेति ॥ इतरव्यावृत्तिमेव ज्योतिरित्यं लक्षणमभिप्रेतं न केवलमनेनोक्तदोष इति भावः॥ नन्वेवकारस्यांतरित्यनेन संबंधेऽतमीरज्योतिष्ट्वमिति बाह्यानां वस्तुदर्शननास्तीत्येव लभ्यते न तु भगवदितरवस्तुदर्शननिषेध इत्यत आह, एवशब्दस्येति॥ अर्थाबाधरूपात् सामर्थ्यात्॥

अध्याहारस्येदानीं प्रयोजनमुच्यते ॥ नन्वेवशब्दो यदि धर्मान्तरनिवृत्त्यर्थः तदाऽन्तःसुखमित्यादिव्याहतम् ॥ अथ वस्त्वन्तरदर्शननिवृत्त्यर्थः॥ तदाऽसंभवित्वमित्यत आह ॥ असंप्रज्ञातेति ॥ बाह्यभगवतोऽन्यत् ॥ दर्शनेऽप्यन्यदेतिशेषः॥ अकिंचित्करात्विक्षेपकरणाभावादित्यर्थः॥एवशब्दः

॥ असंप्रज्ञातसमाधौ नो बाह्यादर्शनात् ॥ दर्शनेऽप्यकिंचित्करत्वादेवशब्दः ॥

संभवदर्थइतिशेषः॥ एतेन लक्ष्यमेवेदं कथं लक्षणत्वेनोच्यत इति परिहृतम् ॥ व्यवच्छेदप्रधानत्वात्॥ एवशब्दस्य सामर्थ्याज्ज्योतिषा संबंधइति॥ आगमसुखशब्दयोरुक्तार्थत्वं कुत इत्यत आह ॥ उक्तंचेति ॥ न केवलं पुनरुक्तिबलादितिचार्थः ॥

तथा चांतर्ज्योतिरेव यस्यासावंतर्ज्योतिरिति व्याख्याने अंतर्ज्योतिष्ट्वमात्रस्य व्यतिरिक्तवस्तुदर्शनव्यावृत्तिरिति वेदनीयं लक्ष्यतावच्छेदकं भगवन्मात्रज्ञानित्वरूपमंतर्ज्योतिष्ट्वमात्रं लक्षणमिति तयोर्भेद इति भावः ॥ कृ० ॥ एवशब्दः समासार्थान्वयी ॥अन्तर्ज्योतिर्यस्येति विकल्पितनित्यसमासाश्रयत्वेन दोषमाह ॥ एवशब्द इति ॥ अंतेऽपि तमर्थमनूद्य दोषमाह ॥ अथेति ॥ असंभवित्वमिति ॥ सर्वादिप्रकाशस्यापि सत्त्वादिति भावः ॥ लक्ष्यमेवेति ॥ लक्ष्यतावच्छेदकमेवेत्यर्थः ॥ एतेनेत्युक्तं विवृणोति ॥ व्यवच्छेदेति ॥ अन्तर्ज्योतिरेवेत्यस्य भगवदन्यदर्शनव्यवच्छेदतात्पर्यकत्वादित्यर्थः ॥ तथा च भगवदन्यदर्शनशून्यत्वमेव लक्षणम् ॥ न त्वंतर्ज्योतिष्ट्वमितिभावः ॥ नन्वेवं तर्हि एवशब्दोऽवयवार्थान्वयीत्यापन्नं तच्चायुक्तं समासार्थान्वयित्वश्रवणादित्यत आह ॥ एवशब्दस्येति ॥ समासार्थान्वयित्वे प्रागुक्तदोषादिति भावः ॥

१ अंतर्ज्योतिर्यस्येतिविशिष्टोऽन्यपदार्थः समासार्थः २ समासावयवार्थ पदार्थो तदर्थमित्युक्तं तथा ज्योतिःशब्दार्थो भगवान् तदन्वयीत्यर्थः ३ अन्तःसुखत्वादि व्याहतिरूपात् ॥

॥ श्री० ॥ शुकादीनां वस्त्वंतरदर्शनसत्वादशायां ज्ञानस्य तिरोहितत्वेनालक्ष्यत्वामिति तात्पर्यकमनुसंधेयं यद्यप्यत्र याथार्थ्यमेव मानत्वमित्यादाविव लक्ष्यतावच्छेदकलक्षणयोरैक्येऽपि न दोषः ॥ व्यवहारस्य माध्यत्वोपपत्तेः ॥ तथाऽपि गीतागतावधारणतद्व्याख्यानरूपामप्रज्ञातेत्यादिभाष्यानुसारादेवं समाहितमन्यथा तद्व्यर्थ्यापत्तेरित्यवधेयम् ॥ ननु दर्शनस्पर्शसंभाषाभ्य इति स्यादित्यत आह ॥ द्वंद्वेति ॥ सर्वो द्वंद्वो विभाषयैकवद्भवतीति वचनादिति भाव ॥ भाष्यप्रमाणयोर्विसंवादपरिहारायाह ॥ कामेनेत्यादिना ॥ स इति ॥ विष्णुरित्यर्थः ॥ इति व्याख्यानेऽपीति ॥ ज्योतिःशब्देन भगवतमगृहीत्वा ज्ञानमात्रग्रहणमंगीकृत्य व्याख्यानमित्यर्थ ॥ उक्तार्थ इति ॥ स्वयंज्योतिरित्याद्यागमवाक्य [illegible] इत्यर्थ ॥ आर्थिकादिति ॥

द्वंद्वैकत्वादेकवचनम् ॥ कामेत्युपद्रवोपलक्षणं उदितं व्यक्तम् ॥ अंतर्ज्योतिरित्यस्योक्तार्थत्वे प्रमाणमाह ॥ स्वेति ॥ स स्थितोऽयस्मिन्नितितत्स्थितः ॥ अंतरेव ज्योतिर्दर्शनंयस्येत्येवंव्याख्यानेऽपियद्यप्युक्तार्थो लभ्यते ॥ तथाप्यार्थिकाच्छाब्दं वरमित्येवंव्याख्यातम् ॥ ब्रह्मैव भूत इत्यन्यथाप्रती

उक्तंचैतत् ॥ दर्शनस्पर्शसंभाषाद्यत्सुखं जायते नृणाम् ॥ आरामःस तु विज्ञेयःसुखं कामक्षयोदितमिति ॥ नारदीये ॥ स्वज्योतिष्ट्वान्महाविष्णोरंतर्ज्योतिस्तु तत्स्थित इति च ॥ अंतःसुखत्वादेः ॥

॥ कारणमाह ॥ ब्रह्मणि भूत इति ॥ २४ ॥

तिनिरासाय ब्रह्मभूतशब्दस्य विग्रहं दर्शयन् प्रकृतसंगतिमाह ॥ अंतरिति ॥ ब्रह्मणि भूत इत्येवं विग्रहो न तु ब्रह्मैव भूत इति ॥

॥ कृ० ॥ ननु दर्शनस्पर्शसंभाषादित्ययुक्तम ॥ इतरेतरद्वंद्वाश्रयणे बहुवचनापत्तेः समासार्थबाहुल्यात्संभाषाशब्दस्य स्त्रीलिंगत्वेन द्वंद्वेऽपि तदापत्तेश्च ॥ परवल्लिंगं द्वंद्वतत्पुरुषयो रित्युक्तेरित्यत आह ॥ द्वंद्वेति ॥ सर्वोद्वंद्वो विभाषया एकवद्भवतीत्येकवद्भाव ॥ तदेकवचनमुक्तम ॥ स नपुंसकमिति नपुंसकत्वं चेति भावः ॥ नन्वंतर्ज्योतिरिति बहुव्रीहिस्तत्स्थितइति तत्पुरुषेण व्याख्यानमयुक्तम ॥ विरुद्धार्थत्वादित्यत आह ॥ स स्थितो यस्मिन्निति ॥ आर्थिकाच्छाब्दं वरमिति ॥ शाब्दस्यशब्दबोध्यत्वेन शीघ्रगामित्वाद्वरत्वम् ॥ आर्थिकस्य तु शब्दबोद्ध्यार्थानुपपत्तिबोद्ध्यत्वेन मंदगामित्वादवरत्वमित्यर्थ ॥ अंतरेवज्योतिर्दर्शनयस्येत्युक्ते विष्णुभिन्नबाह्यार्थदर्शनस्यांतरभावेनार्थाद्भगवन्मात्रदर्शनं सिद्ध्यतीति तस्या र्थिकत्वं अंतर्व्यक्तत्वेन ज्योतिरिव परमात्मेन यस्येति व्याख्याने शब्दादेव भगवन्मात्रदर्शनं सिद्ध्यतीति तस्य शाब्दत्वं बोध्यम् ॥

॥श्री० ॥ज्योतिःशब्देन ज्ञानं गृहीत्वा अंतरेव दर्शनं यस्येति व्याख्याने विष्णुव्यतिरिक्तबाह्यार्थदर्शनस्यांतरभावेनार्थादंतस्थभगवन्मात्रदर्शनं सिद्ध्यति॥अंतर्व्यक्तत्वेन ज्योतिरेव परमात्मैव यस्येति व्याख्याने तु शब्दबलादेव भगवन्मात्रदर्शनं सिद्ध्यतीत्यर्थिकाच्छाब्दं वरमित्यर्थः॥प्रमाणविरोधादिति॥ब्रह्मसुखेत्यादिभेदप्रमाणविरोधादित्यर्थः॥साधकधर्म इति॥तथा च ज्ञानिलक्षणस्यज्ञानसाधके जिज्ञासावतिव्याप्तिरित्यर्थः॥अर्थादिति॥ब्रह्मणिभूतत्वरूपसाधनेन ज्ञाने जात एवांतःसुखत्वादिकं भवति न साक्षादित्यर्थादित्यर्थः॥उक्तमिति॥ तथा चाव पुनरनुवादो व्यर्थ इति भावः॥तद्बुद्धित्वादिकं ब्रह्मणि भूतत्वम् ॥ तद्बुद्धित्वादिरूपं ब्रह्मणि भूतत्वम ॥ यस्य॥ ज्ञानस्य ॥ अंतःसुखत्वादेः ॥ ननु ब्रह्माधिगच्छतीति ब्रह्मभूतत्वादेर्ब्रह्मप्राप्तिसाधनत्वमेवोच्यते न ज्ञानसाधनत्वमत आह ॥ एव चेति ॥ ब्रह्मभूतत्वादेः पूर्वोक्तज्ञानसाधनानुवादरूपत्वादित्यर्थः ॥ २४ ॥ उक्तेति॥ उक्ताद्ब्रह्मभूतत्वलक्षणाज्जायत इत्युक्तलक्षणकमित्य

प्रमाणविरोधात् ॥ ननु ब्रह्माणि भूतत्वंसाधकधर्मः ॥ तत्कथं ज्ञानिलक्षणत्वेनोच्यते ॥ मैवं यतोऽतःसुखत्वादेःकारणत्वेनोच्यते ॥ नन्वेवं सत्यर्थादिदं ज्ञानसाधनत्वेनोच्यते॥ तच्च तद्बुद्धयइत्यनेनैवोक्तम् ॥ सत्यम् ॥ तद्बुद्धित्वादिकं ब्रह्मणि भूतत्वं यस्य कारणं तज्ज्ञानेवं लक्षणक इत्येवं संगतिसूचनार्थोऽयमनुवाद इति भावः ॥ एवं चाधिगच्छतीत्यस्य जानातीत्यर्थो ज्ञातव्यः ॥ २४॥ उक्तश्लोके ज्ञानिनो ब्रह्मप्राप्तिः

॥ पापक्षयाच्चैतद्भवतीत्याह ॥ लभंत इति ॥

लभंते ब्रह्म निर्वाणमृषयः क्षीणकल्मषाः॥ छिन्नद्वैधायतात्मानः सर्वभूतहिते रताः॥२५॥

पुनः किमर्थमुच्यत इत्यत आह ॥ पापेति ॥ ब्रह्मभूतत्वेन सहास्य समुच्चयार्थश्चशब्दः एतदुक्तलक्षणं ज्ञानम् ॥ अतो लभंत इत्यस्योपलभंत इत्यर्थः ॥ कथं तर्हि ज्ञानिलक्षणप्रपंचार्थत्वं श्लोकत्रयस्योक्तमिति ॥

र्थः ॥ कथं तर्हीति ॥ ज्ञानकारणकथनपरत्व इत्यर्थः ॥ लक्षणम ॥ ज्ञापकम् ॥ असाधारणधर्मस्यापि लक्ष्यज्ञापकत्वादेव लक्षणत्वं एवमिहापि ॥ यथाविशिष्टमेघोन्नतिर्वृष्टेर्लक्षणामिति भावः ॥ यद्वाऽसाधारणकारणकत्वं कार्यस्यैवासाधारणमिति युक्तं लक्षणत्वमित्याशयः ॥ ज्ञानिलक्षणप्रपंचनार्थत्वेन प्रकृतसंगतिस्तु पापक्षयो यस्य ज्ञानस्य कारणं तज्ज्ञानेवंलक्षणक इत्युक्तरीत्या द्रष्टव्या ॥ भवंतीति भाष्येऽध्याहारः ॥ ॥ कृ० ॥ अर्थादिति ॥ ब्रह्मणि भूतत्वरूपसाधनेन ज्ञाने जात एवांतःसुखत्वादिकं भवति न साक्षादित्यन्यथानुपपत्त्येत्यर्थः ॥ २४ ॥ पुनः किमर्थमिति ॥ गच्छंत्यपुनरावृत्तिमित्यनेन ज्ञानिनो ब्रह्मप्राप्तेरुक्तत्वात्पुनरित्युक्तम् ॥

॥ श्री० ॥ ननु गीतायां लभंत इत्यनेन पापक्षयादेर्ब्रह्मप्राप्तिसाधनत्वमेवोच्यते न ज्ञानहेतुत्वमित्यतो लभंतइत्यस्यार्थमाह॥उपलभंत इति ॥ द्विशब्दात् प्रकारे धाचूप्रत्यये द्विप्रकारो द्वेधाशब्दार्थः ॥ तत्र विपर्ययस्य द्विकोटिकत्वाभावात्कथमित्यतो विषयापेक्षयेत्युक्तम् ॥ धर्म्यपेक्षयेत्यर्थः ॥तद्वदिति ॥ लक्षणाबीजसंबंधोपपादनाय विषयापेक्षयाऽन्यप्रकाररूपा यथार्थ ज्ञानं द्वेधा तस्य भावो यथार्थज्ञानत्वं द्वैधंतद्वज्ज्ञानमित्यर्थः ॥ चार्थइति॥ तथा च समुच्चयार्थक एव चशब्दो न विकल्पार्थ इत्यर्थ.॥प्रमाणेऽपि द्वैधशब्देन तद्वदेव ग्राह्यमितिद्रष्टव्यम्॥

उच्यते॥ज्ञानप्रतिबंधकपापक्षयाख्यमसाधारणं कारणं कार्यस्य लक्षणं भवत्येवेति॥अत्र कार्यकारणभावो न प्रतीयत इत्यत आह॥क्षीणेति ॥ भवंति ततो ब्रह्मोपलभंत इत्यर्थः ॥ छिन्नद्वैधशब्दार्थं ज्ञापयन् द्वैधशब्दं व्याचष्टे ॥ द्वैधेति ॥ विषयापेक्षयाऽन्यप्रकारत्वमयथार्थत्वमिति या

क्षीणकल्मषा भूत्वा छिन्नद्वैधायतात्मानः ॥ द्वेधा भावो द्वैधम् ॥ संशयो विपर्ययो वा ॥ तच्चोक्तम् ॥
॥ विपर्ययः संशयो वा यद्वैधं त्वकृतात्मनाम् ॥ ज्ञानासिना तु तच्छित्वा मुक्तसंगः परिव्रजेदिति च ॥

वत् ॥ तेन च तद्वज्ज्ञानमुपलक्ष्यत इति भावेनाह ॥ संशय इति ॥ वाशब्दश्चार्थे ॥ अत्रैव प्रमाणमाह ॥ तच्चेति ॥ रु० ॥ असाधारणकारण

मिति ॥ ननु प्रतिबंधकाभावस्य कारणत्वोक्तौ सिद्धांतविरोधः॥ सुप्तायां तर्हि दोषाभावःकारणमित्यायातमिति चेन्न ॥ तथा सति उत्सर्गापवादयोः कार्यभावप्रसंगादित्यनेन प्रतिबंधकाभावस्य कारणत्वनिरासादिति चेत् उच्यते ॥ प्रतिबंधकाभावः ॥ कारणं नेत्युत्सर्गः ॥ यत्र तु ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्याद्यपवादस्तत्र कारणत्वमेव ॥ तथा चोत्सर्गाभिप्रायेण सुप्तप्रवृत्तेर्न विरोधः ॥ अन्ये तु प्रतिबंधकाभावस्य कारणत्वोक्तेः ॥ प्रयोजकत्वाभिप्रायकत्वान्न विरोध इत्याहुः ॥ ननु द्वेधाभावो नाम प्रकारद्वयवत्त्वं तच्च विपर्ययेऽव्याप्तमित्यत आह ॥ विषयापेक्षयेति ॥ ननु विषयापेक्षयाऽन्यप्रकारवत्त्वं नाम यदि तदपेक्षयाऽन्यधर्मवत्त्वं तदा प्रमायामतिव्याप्तिः ॥ यदि त्वन्यप्रकारावगाहित्वं तदा विशेष्यान्यत्वविवक्षाया मतिव्याप्तिः ॥ प्रकारान्यत्वविवक्षायां चासंभवः प्रकारस्य प्रकारान्यत्वाभावादित्यत आह ॥ अयथार्थत्वमिति ॥ तर्हि संशयो विपर्ययो वेति कथमुक्तमित्यत आह ॥ तेनेति ॥ अयथार्थच्छादिव्यावृत्त्यैज्ञानमित्युक्तमिति बोध्यम् ॥

॥ श्री० ॥ अशुद्धेति ॥ केशान करोतीत्यादौ शोधनेऽपि करोतेः प्रयोगादिति ऊर्ध्वमलाध्याये यततोऽप्यकृतात्मान इत्यत्र वक्ष्यमाणत्वादिति भावः ॥ २५ ॥ २६ ॥

अकृतात्मनामशुद्धबुद्धीनां छिन्नेत्यादेः समासत्वमभिप्रेत्य विग्रहमाह ॥ छिन्नेति ॥ आयतशब्दस्यआत्मशब्दस्य चानेकार्थत्वात् आयतात्मनइत्येतद्व्याचष्टे ॥ दीर्घेति ॥ अणुनो मनसः कथं दीर्घत्वामित्यत आह॥ सर्वज्ञा इति॥ बहुविषयत्वमुपलक्ष्यत इति भावः ॥ श्रवणादिना विदितवेद्या इत्यर्थः ॥समासेनोक्तयोरप्यर्थयोर्बुद्ध्या विविक्तयोर्हेतुहेतुमद्भावोऽस्तीति भावेनाह ॥ तत एवेति ॥ अयतात्मत्वादेव क्षीणक

छिन्नद्वैधास्त एवायतात्मानः ॥ दीर्घमनसः ॥ सर्वज्ञा इत्यर्थः॥ तत एव छिन्नद्वैधाः ॥तथोक्तम् ॥क्षीणपापा महाज्ञाना जायंते गतसंशया इति॥ छिन्नद्वैधा यतात्मान इति वा॥२५॥सुलभं च तेषां ब्रह्मेत्याह ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्॥ अभितो ब्रह्म निर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

॥ कामक्रोधेति॥ अभितःसर्वतः ॥ २६ ॥

ल्मषत्वायतात्मत्वछिन्नद्वैधत्वानां हेतुहेतुमद्भावे प्रमाणमाह ॥ तथेति ॥ व्यस्ते वेते पदे इत्याह ॥ छिन्नेति ॥ नियतमनस इत्यर्थः ॥२५॥ यतीनां सर्वं ब्रह्मतयैव प्रतीयत इत्यन्यथाप्रतीतिनिरासायाह ॥ सुलभं चेति ॥न केवलं उक्तलक्षणा इति चार्थः ॥ इदं चासाधारणधर्मत्वात् ज्ञानिलक्षणं भवत्येव ॥ सौलभ्यवाचि किमप्यत्र न प्रतीयत इत्यतस्तदुपादाय व्याचष्टे ॥ अभित इति ॥ सर्वदेशकालेष्वित्यर्थः ॥ २६ ॥

॥कृ०॥ नन्वात्मनोऽनादित्वात्सर्वेऽप्यकृतात्मानस्तत्किमकृतात्मनामिति विशिष्टोच्यत इत्यत आह ॥अशुद्धबुद्धीनामिति ॥अनेकार्थत्वादिति॥ आयतिः संयमे दैर्घ्ये प्रभवागामिकालयोरिति विश्वोक्तेर्भावे क्तिन्नंतस्याङ्पूर्वस्य यमस्तेनार्थे ऽ न नैर्थप्रत्ययान्तस्यायतशब्दस्याप्यनेकार्थत्वम॥आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिष्विति विश्वोक्तेरात्मशब्दस्याप्यनेकार्थत्वामिति भावः॥ ॥ नन्वायतात्मान इत्यनेन कथं सर्वज्ञत्वलाभ इत्यत आह ॥ बहुविषयत्वामिति ॥ दैर्घ्यवाचकायतशब्देनेति शेषः ॥ ननु श्रवणादिकर्तॄणां साधकानां सर्वज्ञत्वं विरुद्धामित्यत आह ॥ ॥श्रवणादिनेति ॥ २५ ॥ अस्य ज्ञानिलक्षणप्रपंचार्थत्वाभावादुक्तविरोध इत्यत आह ॥ इदं चेति ॥ २६ ॥

॥ श्री० ॥ **प्रमाणेति** ॥ तमेवंविद्वानित्यादिप्रमाणविरोध इत्यर्थः ॥ **पुनरुक्तिरिति** ॥ स ब्रह्मयोगयुक्तात्मेत्यनेनेत्यर्थः ॥ **स्तुतिरिति** ॥ स्तुतौ चाधिकोक्तिर्दुष्टेति भावः ॥ **व्यवहितत्वादिति** ॥ कृत्वा बहिःपदाभ्यामित्यर्थः ॥ **प्रत्याहारेण** ॥विषयेभ्य इतिशेषः ॥पटिवानि ॥ इंद्रियाणां विषयेषु पटुतराभ्यामर्जनितो यः आदरः स्नेहः पुनःपुनःसन्निकर्षरूपस्तज्ज्ञातानुभवजन्यसंस्कारवशादित्यर्थः ॥ बाह्या इत्यस्यार्थो ॥**बहिष्कृता इति** ॥ संस्काररूपेण हृदि न पवर्तित इत्याशयः ॥ **दुर्घटमिति** ॥ चक्षुरिंद्रियस्य स्वगोलकस्थितस्य भ्रूमध्येस्थापनं दुर्घटमित्यर्थः ॥ अयमर्थो गीतागतचक्षुःशब्देन कथं लब्धइत्यत आह ॥ **चक्षुर्वृत्तावीति** ॥ चक्षुर्जन्यज्ञाने इत्यर्थः ॥ तथा च चक्षुर्जन्यज्ञानं भ्रुवोरंतरे कृत्वेति गीतार्थो द्रष्टव्यः ॥**वक्ष्यमाणविरोध इति**॥भ्रूमध्यावलोकनांगीकारे नासाग्रावलोकनप्रतिपादकवक्ष्यमाणगीतावचनविरोधः स्यादित्यर्थः॥इत्यत **आहेति** ॥तथा च नासाग्रावलोकननिषेधो न दोष इतिभावः ॥

ध्यायिनां मुक्तत्वं साक्षाच्चेत्प्रमाणविरोधः ॥ ज्ञानद्वारा चेत्पुनरुक्तिरित्यतः श्लोकद्वयतात्पर्यमाह ॥ध्यानेति ॥ मुक्त एव स इति स्तुतिरिति भावः ॥ पदानां व्यवहितत्वादन्वयमाह॥बाह्यानिति ॥ स्पृश्यंत इति स्पर्शाः शब्दाद्याः ॥स्पर्शाः बाह्या एव तेषां किं बहिष्करणमित्यत आह ॥ श्रोत्रादीनीति ॥ योगेन प्रत्याहारेण श्रोत्रादीनामनियमेपटुभ्यासादरप्रत्ययवशाच्छब्दाद्या अंतरा इव भवंति ॥ तन्नियमे तु बाह्या

ध्यानप्रकारमाह॥स्पर्शानित्यादिना॥बाह्यान्स्पर्शान्बहिः कृत्वा श्रोत्रादीनि योगेन नियम्येत्यर्थः॥ चक्षुर्भ्रु

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः॥ प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

वोरंतरं कृत्वा भ्रुवोर्मध्यमवलोकयन्नित्यर्थः॥उक्तं च ॥नासाग्रे वा भ्रुवोर्मध्ये ध्यानि चक्षुर्निधापयेदिति ॥

बहिष्कृताः स्युरिति भावः ॥कृत्वेत्यस्यानुवृत्त्या योजयति ॥ चक्षुरिति ॥ दुर्घटमेतदित्यत आह॥ भ्रुवोरिति ॥ चक्षुर्वृत्तौ चक्षुःशब्द इत्यर्थः ॥ संप्रेक्ष्य नासिकाग्रं स्वमिति वक्ष्यमाणविरोध इत्यत आह ॥ उक्तं चेति ॥

॥कृ०॥**ध्यायिनामिति** ॥यद्यपि व्याख्येयगीतायां मुनिरित्याद्येकवचनाद्ध्यायिनइति वक्तव्यम तथाऽपि तद्बुद्धय इत्यत्र बहुवचनश्रवणात्तदुक्तानामेव चात्र स्तूयमानत्वाध्यायिनामिति बहुवचनं प्रयुक्तम ॥ अत एवाह ॥ **ज्ञानद्वारा चेत्पुनरुक्तिरिति** ॥ अन्यथा ध्यानस्य ज्ञानद्वारा मोक्षहेतुत्वप्रतिपादकवाक्यांतराभावात्पुनरुक्त्ययोग इति बोध्यम मुक्तइत्याद्येकवचनं समुदायाभिप्रायमिति भावः ॥ननु योगशब्देन यदिकर्मयोगो विवक्षितःतदाबाधः श्रोत्रादिनियमस्य प्रत्याहारादिसाधनांतरसाध्यत्वेन कर्मयोगसाध्यत्वाभावात ॥ यदि च समाधिः तदापि तस्य श्रोत्रादिनियमसाध्यत्वेन तत्साधनत्वाभावाद्व्याघातइत्यत आह ॥ **प्रत्याहारेणेति** ॥ पटुभ्यासादरप्रत्ययवशादिति ॥

॥ श्री० ॥ भ्रूमध्यनासाग्रावलोकनप्रतिपादनस्य दिशामनवलोकन एव तात्पर्यं मंतव्यं तथा च वक्ष्यति दिशश्चानवलोकयन्निति ॥ **प्राणायाम इति** ॥ प्राणायामो रेचयित्वा पूरयित्वा च कुंभके ॥ स्थितिः प्राणायाम उक्त इति तंत्रसारोक्तेरितिभावः ॥ २७ ॥ २८ ॥ **ततश्चेति** ॥ प्राणापाननिरोधेन कुंभकेऽवस्थानादित्यर्थः ॥ ननु न्यूनाधिकभावराहित्यमेव समीकरणं किं न स्यादित्यत आह ॥ **इतरदिति** ॥ रेचकपूरकयो कुंभकार्थत्वेनामुख्यत्वात्कुंभकस्यैव मुख्यत्वान्मुख्यस्यैव ग्राह्यत्वादितिभावः ॥ननु ज्ञात्वा मामित्यनेन ज्ञेयमेवोच्यते न ध्येयमित्यत आह॥**ततश्चेति**॥ ध्येयप्रतिपादकत्वादेनेत्यर्थः ॥ नन्वनेन श्लोकेन ध्येयं कथं प्रतिपाद्यते ज्ञात्वा मां शांतिमृच्छतीत्यस्यांशस्य भोक्तृत्वादिवत् ध्येयविशेषणत्वासंभवेन ध्येयस्वरूपाप्रतिपादकत्वादित्यत आह ॥**शांतिसाधनज्ञानत्वमपीति** ॥ मोक्षसाधनध्यानविषयत्वमपीत्यर्थः ॥ २९ ॥ इति यदुवरगीताभाष्यटीकासुमुक्ताशयमतिललिताभिर्गीर्भिरानंददायित्री ॥ मुललितविवृतिर्यादृष्णिराट्छात्र चीर्णा ममगमदयमस्यां पंचमोऽध्यायअंतम ॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायां पंचमोऽध्यायः समाप्तः ॥ श्रीवेंकटेशाय नमः ॥ ॥कु०॥ पटुः योऽभ्यासः तस्यादरोऽतिशयःतत्प्रत्ययवशादित्यर्थः ॥ यद्वा स

न्यूनाधिकभावराहित्यं समीकरणमित्यन्यथाप्रतीतिनिरासयानूद्य व्याचष्टे ॥ प्राणेति ॥ कुंभके प्राणायामं ततश्चसमौ निर्विकारौ निश्चलावित्यर्थः ॥ इतरत्समीकरणं कुंभकार्थमेवेति भावः ॥ २७ ॥ २८ ॥ भगवज्ज्ञानस्य शांतिसाधनत्वं पुनः किमर्थमुच्यत इत्यत आह ॥

प्राणापानौ समौ कृत्वा कुंभकं स्थित्वेत्यर्थः ॥२७॥२८॥ध्येयमाह॥भोक्तारमिति॥ २९ ॥ इति श्रीमदानंद

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९॥

॥ॐतत्सदिति श्रीमद्भगवद्गीतासु०कर्मसंन्यासयोगोनामपंचमोऽध्यायः॥ ५ ॥ ॥

तीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीताभाष्ये पंचमोऽध्यायः ॥ ५ ॥ श्रीअष्टभुजाय नमः ॥ ६ ॥

॥ ध्येयमिति ॥ ततश्चज्ञात्वेत्यस्य ध्यात्वेत्यर्थः ॥ शांतिसाधनज्ञानत्वमपि भोक्तृत्वादिवत् ध्येयविशेषणमेवेति भावः ॥ २९ ॥ इति श्रीमदानंदतीर्थभगवत्पादविरचितश्रीमद्गीताभाष्यटीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां पंचमोऽध्यायः समाप्तः ॥

कुदेवोत्पन्नो विद्युदादिप्रत्ययः ॥ पटुप्रत्ययः कहिकादिप्रत्ययोऽभ्यासप्रत्ययः अद्भुतप्रत्यय आदरप्रत्ययः तद्वशादित्यर्थः ॥ अल्पः कुंभः कुंभक इत्याद्यन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ कुंभके प्राणायाम इति ॥ २७॥ २८ ॥ २९ ॥ इति प्रमेयदीपिकाव्याख्यायां भावप्रकाशिकायां पंचमोऽध्यायः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥

॥ श्री० ॥ओं ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ षष्ठाध्यायस्य टीकायाः क्रियते भावदीपिका ॥ १ ॥ नन्वासनादीनामंगानामपि वक्ष्यमाणत्वात्समाधियोगग्रहणमेव कुत इत्यत आह॥ आसनादीनामिति ॥ समाद्ध्यर्थत्वादिति ॥ तदंग धारणादिकमित्युक्तत्वादिति भाव ॥

॥ कृ० ॥ हरि ओम् ॥समाधियोगमिति ॥ यद्यपि ध्यानमत्रोच्यत इति ना पर्यानिर्णये उक्तम ॥ ध्यानसमाधी च भिन्नलक्षणौ ॥ यथोक्तम ॥ खंडस्मृतिर्धारणा स्याद्खंडा ध्यानमुच्यते ॥ अप्रयत्नात्समाधिश्चेति ॥ तथाऽप्यर्थाभिन्नत्वादविरोध. ननु योगी युंजीत सततमित्यादिभिर्योगो भवति दु.खहेत्यंतैः श्लोकैरासनादीनां वक्ष्यमाणत्वात्कथं समाधियोगमाहेत्युक्तमित्यत आह ॥ आसनादीनामंगानामिति ॥ नन्वत्रासनपदेन चैलादिकमादिपदेन च विविक्तदेशसेवित्वादिकं विवक्षितमिति मंतव्यम ॥ योगी युंजीत आत्मानं रहसि स्थित इत्यादिना मुक्तस्वभावबोधस्य योगो भवति दु.खहेत्यंतेन तस्यैव वक्ष्यमाणत्वात तथा च तत्रमारविरोध ॥तत्र योगद्यासनस्य यमनियमप्राणायामानां चांगत्वेनोक्तत्वात॥यथोक्तम॥वीरपद्मे च स्वस्तिकाद्यानि चासनमिति॥एकं ध्यानं हरेरन्यच्चत्वार्यंगानि तत्र चा॥यमश्चनियमश्चासौ प्राणायाम इतीरिते इति चेति चेदुच्यते अस्मिन्नेवदेशकाले चेत्यादिरूपदेशकालावस्थाव्यवस्थया

श्रीवेंकटेशाय नमः॥ संगतिं सूचयन्नेतदध्यायप्रतिपाद्यमर्थमाह ॥ ज्ञानांतरंगमिति ॥ योगे त्विमां शृण्विति प्रतिज्ञाय द्वितीयषट्के वक्ष्यमाणं भगवज्ज्ञानं प्रति कर्मयोगस्य बहिरंगत्वात्स प्राधान्येनातीते ग्रंथे प्रतिपादितः ॥ तत्साध्यत्वाज्ज्ञानांतरंगत्वाच्चावसरप्राप्तं समाधियोगमाहा

॥ ओम् ज्ञानांतरंगं समाधियोगमाहानेनाध्यायेन॥

नेन षष्ठाध्यायेनेत्यर्थः॥आसनादीनामंगानां वक्ष्यमाणत्वेऽपि तेषां समाद्ध्यर्थत्वात ॥ प्राधान्येन समाधियोगस्य ग्रहणम्॥ विनाऽनुष्ठेयं यमशब्दाभिधेयं रहसि स्थित इत्याद्युक्तम ॥ विविक्तदेशसेवित्वादिकं च तथात्वाद्यम एव ॥ नर्मनर्महिंसा सत्यमस्तेय ब्रह्मचर्यापरिग्रहौ ॥ यमा इति तंत्रसारीयपरिगणनविरोधः परिगणनं प्रदर्शनार्थमिति सुव्यक्त्यामेवोक्तत्वात ॥ एवंशुचौदेशे इत्यादिना चैलाद्यासनस्यवक्ष्यमाणत्वेऽपि न तत्रसारविरोधः ॥वीरपद्मे च स्वस्तिकाद्यानि चासनमित्याद्यपदेनात्रोक्तचैलादिसंग्रहात ॥ अत्र चैलादिग्रहणस्योपलक्षणत्वात ॥ एवं प्राणापानौ समौ कृत्वेति पूर्वाध्यायोक्त एव प्राणायाम समं कायशिरोग्रीवमित्यादिनेत्थंभावांतरविधानेन विक्रियत इति प्राणायामोऽप्युक्त एव ॥ एवं युक्ताहारविहारस्येत्यादिना वक्ष्यमाणं नियताहारत्वादिकमपि तपोरूपनियम एवेति नियमोऽप्यत्रोक्तः ॥ तस्मात्तंत्रसारोक्तयमादीनामेवात्र वक्ष्यमाणत्वान्नविरोधगंधोऽपीति प्रतिभाति ॥ यद्यप्येवं सति यमादीनामिति वक्तव्यं प्रथमातिक्रमे कारणाभावात ॥ तथाऽप्यासनस्य स्फुटप्रतिभासत्वादासनादीनामित्युक्तम ॥

---

१ प्रयत्नाप्रयत्नरूप विशेषणकृतो हि भेदः स्मृतिरूपाविशेष्यमेकमेवेति भाव.॥२ध्यानं च शब्दोऽनुक्तयोर्धारणाप्रत्याहारयोः समुच्चये॥३आसनम्॥४लिंगवचनव्यत्ययः॥ईरितानीत्यर्थः॥

॥ श्री० ॥ ननु पंचमाध्यायांतेस्पर्शान् कृत्वेत्यादिना समाधियोगस्योक्तत्वात् पुनरुक्तिदोष इत्यत आह ॥ पंचमांतोक्तस्येति ॥ विधातुमिति ॥ उद्धरेदित्यादिनेति शेषः ॥ अंत एव वक्ष्यतिउद्धरेदित्यादिनेव योगो विहित इति सांख्याद्यभिमतेति ॥ अचेतनप्रकृतेरेव स्वातंत्र्येण कर्तृत्वज्ञानप्रकृतिपुरुषविवेकज्ञानादिमानेव ध्यानाधिकारीति सांख्यैरुक्तत्वादित्यर्थः ॥ ॥तद्विशेषणम् । अधिकारिविशेषणमित्यर्थः ॥ प्राग्विवक्षितमिति ॥ अधिकारिनिरूपणात्प्रागुक्तमिष्टमित्यर्थः ॥ इयम् ॥ स्यादिति वर्तते ॥ चस्त्वर्थ इति ॥ न्यासाश्रमेऽग्निस्तु ब्रह्मेत्यर्थः ॥ ननु तर्हि अनग्नित्वादिप्रसिद्धिविरोध इत्यत आह ॥ अनग्नित्वादिति ॥ १ ॥ श्री० ॥ ननु स्पर्शान्कृत्वेत्यादिनासमाधिरुक्तत्वात्पुनरुक्तिरित्यत आह ॥ पंचमांतेति ॥

पंचमांतोक्तस्य प्रपंचोऽयमित्यदोषः॥गृहस्थस्यापि स्तुत्यर्थमुपचारितं संन्यासित्वं योगित्वं चानेन श्लोकेनोच्यत इति परकीयतात्पर्यकथनमसदितिभावेनाह॥विवक्षितमिति ॥ समाधियोगं विधातुं तत्राधिकारिणं ज्ञापयिष्यन् सांख्याद्यभिमततदधिकारिनिरासाय तद्विशेषणं प्राग्विवक्षितं कामादिवर्जनलक्षणसंन्यासमीश्वराराधनस्वकर्मानुष्ठानलक्षणेन योगेन सहेत्यर्थः॥यदि हि संन्यासो यत्याश्रमोऽत्र विवक्षितः स्यात्॥योगश्च कश्चिन् गृहस्थासंभवीस्यात् ॥ तदोपचारेण तत्स्तुतिरियम् ॥ नचैवमिति भावः ॥ न केवलं निरग्निरक्रियश्चतुर्थाश्रमिसंन्यासी योगी

विवक्षितं संन्यासमाह ॥ योगेन सह॥अनाश्रित इति॥ चतुर्थाश्रमिणोऽप्यग्निः क्रिया चोक्ता देवमेवेत्या

हरिः ओम् ॥ श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च यो
॥ गी च न निरग्निर्नचाक्रियः ॥ १ ॥

दौ ॥ अग्निर्ब्रह्म च तत्पूजा क्रिया न्यासाश्रमे स्मृतेतिच॥तस्मान्निरग्निरक्रियःसंन्यासी योगी च न भवत्येव१ ॥

च किं त्वनाश्रित इत्याद्युक्ता गृहस्थोऽपीति परकीयां योजनां निराकरोति ॥ चतुर्थेति ॥ अत्रैव स्पष्टं वाक्यांतरं पठति ॥ अग्निरिति ॥ चस्त्वर्थः ॥ अतो न परकीया योजना युक्तेति शेषः ॥ तर्हि कथमित्यत आह॥तस्मादिति ॥ परकृतयोजनायाः निरस्तत्वात् ॥ ननु निरग्नेरक्रियस्य चतुर्थाश्रमिणोऽपि संन्यासित्वाद्योगित्वाच्च कथं न निरग्निरित्याद्युक्तमित्यतो वाह ॥ चतुर्थाश्रमिणोऽपीत्यादि ॥ न भवत्येवेति युक्तमिति शेषः ॥ अनाग्नित्वादिप्रवादश्च बाह्याग्न्याद्यभावनिबंधन इति भावः ॥ १ ॥

॥विधातुमिति॥ उद्धरेदात्मनेत्यनेनेति शेषः ॥ परेषां तात्पर्यं दूषयति ॥ यदि हीति ॥ बाह्याग्न्याद्यभावेति ॥ आदिपदेन बाह्यकर्माभावग्रहणम् ॥ १॥

॥ श्री० ॥ **भिन्नलक्षणाविति** ॥ कामादिवर्जनं संन्यासः ॥ ईश्वरार्पणबुद्ध्या कर्मानुष्ठानं योग इति भिन्नलक्षणवंतावित्यर्थः ॥ **अमुख्येति**॥ईश्वरार्पणबुद्ध्याकर्मकरणमात्ररूपामुख्ययोगापेक्षया संन्यासी च योगी चेति पृथगुक्तोऽपि संन्यास इत्यर्थः ॥ ननु तर्ह्येतादृशामुख्ययोगे कथमंतर्भावः संन्यासस्येत्यत आह ॥ **योगशब्दोमुख्य इति**॥ योगं तं विद्धीत्यत्र योगशब्दः कामादिवर्जनपूर्वकेश्वरार्पणबुद्ध्या कर्मानुष्ठानरूपविशिष्टरूपमुख्यार्थ एव विवक्षितस्तत्र चांतर्भावोविशेषणस्य संन्यासस्य युक्त इत्यर्थः॥**अतएवेति**॥ यतः संन्यासांतर्भावाविकरणं योगोमुख्य एव विवक्षितोऽत एवांतर्भावोपपादकं न हीति वाक्यगत गीतावाक्यगतं योगीति पदं कामादिवर्जनसंग्रहायोपायवानिति सामान्यत एव व्याख्यास्यतीत्यर्थः विशेष्यरूपयोगैकदेशमात्रस्य ज्ञानोपायत्वात्संभवादिति भावः ॥

ननु संन्यासयोगौ भिन्नलक्षणौ तत्कथं तयोरैक्यमुच्यत इत्यत आह॥ संन्यासोऽपीति ॥ संन्यासी चयोगी चेत्युक्त्या प्राप्तात्यंतभेदशंकानि

॥ संन्यासोऽपि योगांतर्भूत इत्याह ॥यं संन्यासमिति ॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २॥

वृत्त्यर्थमिति शेषः ॥ अमुख्ययोगापेक्षया पृथगुक्तोऽपीत्यपरेर्थः ॥योगशब्देन मुख्योऽत्राभिहितः ॥ अतएव वक्ष्यत्युपायवानिति

॥ क ॥ **अमुख्ययोगेति** ईश्वरार्पणबुद्ध्या कर्मानुष्ठानरूपयोगापेक्षयेत्यर्थः ॥ विशिष्टस्यैव योगशब्दमुख्यार्थत्वेनैकदेशस्यामुख्यत्वमिति भावः॥मुख्य इति ॥ कामादित्यागेनेश्वरार्पणबुद्ध्या कर्मानुष्ठानरूप इत्यर्थः ॥ तथा च पूर्वोक्तयोगैकदेशे संन्यासस्यांतर्भावासंभवेऽपि विशिष्टभूते योगविशेषणीभूतसंन्यासस्यांतर्भावः संभवतीति भावः॥ **अत एवेति** ॥ मुख्ययोगस्याभिप्रेतत्वादेवेत्यर्थः ॥ अंतर्भावोपपादकम ॥ **नहीति** ॥ गीतास्ययोगिपदस्योपायवत्त्वार्थकत्वव्याख्यानान्मुख्ययोगोऽभिप्रेत इतिगम्यते ॥ एकदेशग्रहणे तु तस्य ज्ञानोपायत्वाभावादग्रिमव्याख्यानासंगतिरितिभावः ॥

---

१ ननु पंचमाध्याये प्रथमश्लोकटीकागतोपचारेणेति पदव्याख्याने टिप्पणद्वयेऽपि कर्मयोगशब्दमुख्यार्थभूतविशिष्टगतस्य ज्ञानसाधनत्वस्यैकदेशेऽपि सत्वादित्युक्तिविरोधोऽत्र टिप्पणद्वयस्येति चेदुच्यते ॥ संन्यासाभावेऽपि अकामःसर्वकामोवेत्यादि भागवतानुसारेण न मे भक्तः प्रणश्यतीति गीतानुसारेण च सत्संगत्यादि द्वारा संन्याससंपादनानंतरं ज्ञानसाधनत्वमेकदेशस्यास्ति ॥ न तथा केवलसंन्यासस्येति तत्रत्याटिप्पणी ॥ अत्रत्यातुसर्वथा संन्यासाभावे ज्ञानोपायाभावप्रातिपादिकेत्यविरोधः ॥

॥ श्री० ॥ भिन्नलक्षणवतोः कथमैक्योक्तिरिति शंकायां किमुक्तमित्यत आह ॥ अंतर्भूतत्वादिति ॥ संन्यासस्य मुख्ययोगांतर्भूतत्वादित्यर्थः ॥ २ ॥ स ॥ समाधियोगः ॥ सकृदनुष्ठेयमिति ॥ प्रोक्षणादिवदित्यर्थः ॥ आफलप्राप्तेरिति ॥ अवहननादिवदित्यर्थः ॥ प्रश्नार्थ इति ॥ एवं द्वैविध्यदर्शनादस्यापि कर्मत्वात् किं सकृदनुष्ठेयमुताफलप्राप्तेरिति संदेहमूलकः ॥ कियत्कालं कर्म कर्तव्यमिति प्रश्नो युक्त इत्यर्थः ॥

॥ अंतर्भूतत्वादैक्योक्तिरित्यर्थः ॥ संन्यासस्य योगांतर्भूतत्वमुपपाद्यते न हीति ॥ तदसत् ॥ संकल्पत्यागमात्रस्यासंन्यासत्वात् ईश्वराराधनाय स्वकर्मकरणमात्रं योगः ॥ तस्य संन्यासाभावेऽप्युपपत्तेरिति अत आह ॥ कामेति॥संकल्पशब्दस्य कामाद्युपलक्षणत्वाद्योगशब्दस्य ज्ञा

कामसंकल्पाद्यपरित्यागे कथमुपायवान्स्यादित्याशयः ॥ २ ॥ कियत्कालं कर्म

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगारूढस्य तस्यैव शमःकारणमुच्यते ॥ ३ ॥

कर्तव्यमित्यत आह॥ आरुरुक्षोर्मुनेरिति ॥

नोपायरूपमुख्ययोगार्थत्वान्नानुपपत्तिरिति भावः ॥ २ ॥ नन्वेवं समाधियोगस्याधिकारिणि निरूपिते तं प्रति समाधिरभिधेयः आरुरुक्षोरित्यादिकिमर्थमुच्यत इत्यत आह॥क्रियादिति ॥ समाधियोगाधिकारत्वेनोक्तं कर्म किं सकृदनुष्ठेयं उताफलप्राप्तेरितिप्रश्नार्थः॥

॥ रा० ॥ ऐक्योक्तिरिति ॥ यं संन्यासमिति गीतायामिति शेषः ॥ ३ ॥ नन्वग्निहोत्रादिकर्म यावतिकाले समाप्येत तावत्कालं कार्यमिति सिद्धमेव ॥ तत्कथमयं प्रश्नः ॥ किं च समाध्यधिकारिनिरूपणानंतरमयं प्रश्नोऽनवसरदुःस्थ इत्यत आह ॥ समाधियोगाधिकारत्वेनेति ॥

१ सोऽभिधेय इति पाठः श्रीनिवासतीर्थानाम्॥

॥ श्री० ॥ उपरिभवनेति ॥ अश्वमारूढस्य यथाऽश्वोपरिभवनमस्ति तथा समाधियोगफलस्यापरोक्षज्ञानस्य समाध्युत्तरभावित्वेन योगोपरिभवनमस्तीत्यर्थः॥केचित्तु अश्वोपरिभवनवतो यथा संतोषस्तथा योगपूर्तिमतोऽपीत्येवं संतोषविशेषणोपरिभवनवतः साम्याद्गौण इत्याहुः ॥ सन्निधानात् ॥ शब्दसन्निधानात् ॥ ज्ञानं प्रतीतिचेत्तत्राह ॥ ज्ञानस्येति॥तत एवेति ॥ समाधियोगादेवेत्यर्थः ॥ यदा त इति ॥ कियत्पर्यन्तमवश्यं कर्तव्यानि मुमुक्षुणैव कर्माणि त्याहेत्यवतारोस्यश्लोकस्य व्याख्यानत्वादित्यवधेयम ॥ तत्रेति ॥ तत्र ज्ञानार्थिना कियत्पर्यंतं कर्म कर्तव्यमितिप्रश्नस्य परिहार उक्तः ॥ अत एव कियत्पर्यंतं कार्याणि मुमुक्षुणैवं कर्माणीत्युक्तम ॥ मुमुक्षुणेत्येनन्मोक्षसाधनज्ञानार्थिनेति टीकायां व्याख्यातम ॥ अत्र समाधियोगारोहार्थिना कियत्कालपर्यंतं कर्म कर्तव्यमितिप्रश्नस्य परिहार उच्यत इति भेद इत्यर्थः ॥ ॥ कृ० ॥ उपरिभवनेति ॥ मुनेर्योगोत्तरभावित्वसाम्यादित्यर्थः ॥ पलप

ननु योगो नाम नाश्वादिरिवारोढव्यः ॥ तत्कथमुच्यते योगमारुरुक्षोर्योगारूढस्येति तत्राह ॥ योगमिति ॥ उपरिभवनसादृश्यादुपचार इत्यर्थः ॥ उपायः समाधिस्तस्य समाधेः फलपरिमाणाद्यवच्छेदाभावात् कीदृशी संपूर्णतेत्यत आह ॥ अपरोक्षेति॥ साधनस्यहि पूर्णता साध्यापर्याप्तत्वम् ॥ अतोयावताऽपरोक्षज्ञानं संपद्यते तावत्त्वं संपूर्णत्वमिति भावः ॥ ननु योगमारुरुक्षोः कर्म कारणं सन्निधानाद्योगारोहस्ये

॥ योगमारुरुक्षोरुपायसंपूर्तिमिच्छोः ॥ योगमारूढस्य संपूर्णोपायस्य ॥ अपरोक्षज्ञानिन इत्यर्थः ॥

॥ कारणं परमसुखकारणम् ॥

ति लभ्यते ॥ कारणत्वाच्च तत्पर्यंतं कर्तव्यमिति ॥ कार्यापेक्षया नियतपूर्वक्षणभावित्वात्कारणस्ययोगारूढस्य तु शमः किं प्रति कारणं ज्ञानस्य तत एव सिद्धेरित्यत आह ॥ कारणमिति ॥ परमसुखं मुक्तिगतम् ॥ नन्वयं प्रश्नो यदा ते मोहकलिलमिति परिहृतः ॥ मैवम्॥ तत्र ज्ञानार्थिनोऽत्र तु योगारोहार्थिनेति भेदात ॥ रिमाणादीति॥आदिपदेन संख्यादेः संग्रहः तत्र कुंड्यादौपलेन संपूर्णता वस्त्रादौ परिमाणेन मैत्रीतनयेपुसं

ख्यया ॥ उक्षणादौ देशतः जीवादौ कालतः पूर्णतेति विवेकः ॥ नन्वेवमपि कियत्कालमिति प्रश्नस्योत्तरालाभ इत्याशंकां परिहरन्नेवोत्तरभाष्यमवतारयति ॥ नान्वेति॥ननु योगारूढस्य शमो ज्ञानहेतुरस्तित्वत्यत आह ॥ ज्ञानस्य तत एवेति ॥ समाधेरेवेत्यर्थः ॥

१ अयोलाभः २ । ३ पश्चुत्रेतः पाठोग.श्रीपादानामितिमाति ॥ परोक्षज्ञानिनस्तत्र ॥ अपरोक्षज्ञानिनस्तत्रेतिभेद इति भावस्तेषाम्

॥श्री०॥तमेवभेदमुपपादयति॥**तयोश्चेति**॥तवोक्तयोरवोक्तयोश्चेत्यर्थ ॥तत्रापरोक्षज्ञानसाध्यो मोक्षोज्ञानसाधनं च समाधिरिति ज्ञानमोक्षयोर्ज्ञानसमाध्योश्च साध्यसाधनभावोऽभिप्रेतोऽत्र तु समाधिसाध्यं ज्ञानं समाधिसाधनं च कर्मेतिसमाधिज्ञानयो समाधिकर्मणोश्च साध्यसाधनभावोऽभिप्रेत इत्यर्थः इत्याह॥वस्तुतस्तु ज्ञानयोगारोहयोरेकत्वेन तत्र ज्ञानार्थिनाऽत्र तु योगारोहार्थिनेत्युक्त्या कथं प्रमेयभेद इत्यत आह॥ तयोश्चेति ॥ तयोर्ज्ञानयोगारोहयोः पृथक्त्वादित्यन्वयः ॥ कुतः पृथक्त्वमित्यत ॥ साध्यसाधनयोरित्युक्तम् ॥ अपरोक्षज्ञानयोगारोहयोः साध्यसाधनभावसद्भावेन पृथक्त्वात्प्रश्नभेदो युक्त इत्यभिप्रायः ॥ नन्वपरोक्षज्ञानयोगारोहयोः पृथक्त्वे योगारूढस्येत्येतदपरोक्षज्ञानिन इति कथं व्याख्यातं तेन ज्ञायते तयोरैक्यमिति तथा च न प्रश्नभेद इत्यत आह॥**अपरोक्षज्ञानिन इति** ॥ध्यानपरिपाकरूपसमाध्यव्यवहितोत्तरकाल एवापरोक्षज्ञानमुत्पद्यत इत्याशयेनैव तथोक्तं न तु योगारूढशब्दार्थत्वेनेति भावः॥ समाधिपरिपाकापरोक्षज्ञानयोरनतिविप्रकर्षोऽपि कुत इत्यत सूत्रं प्रमाणयति ॥ **यथोक्तामिति** ॥ अप्रस्तुतप्रतिबंधे प्रारब्धकर्मप्रतिबंधाभावेऽपरोक्षज्ञानमैहिकंसमाधिपरिपाकजन्मन्येवोत्पद्यतइत्यर्थः ॥ अस्तु वाऽपरोक्षज्ञानिन इति भाष्यं योगारूढस्येति शब्दार्थकथनपरं तथाऽपि न पुनरुक्तिरित्याशयेन पक्षांतरमाह ॥ **अथवेति** ॥ **योगारूढस्यापीति** ॥ अपरोक्षज्ञानिनोऽपीत्यर्थः ॥ तेनापरोक्षज्ञानिना प्रयोजनाभावात् कर्म न कर्तव्यमित्यर्थादित्याशय ॥ **कर्तव्यं वक्तुमिति** ॥ योगारूढस्य तस्यैव शम कारणमुच्यत इत्यनेनानंदाभिवृद्धचर्थं शमादिकं कर्तव्यमिति वक्तुमित्यर्थः ॥ **प्रश्नोत्तरेति** ॥ कियत्पर्यंतमवश्यं कर्माणि कार्याणीति प्रश्नस्य यदा त इत्यादिना यदुत्तरमुक्तं तस्यानुवाद एव आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते इत्यनेन क्रियते नतु कर्मानुष्ठानविधिर्विधीयत इत्यर्थः ॥

तयोश्च साध्यसाधनयोः पृथक्त्वात् ॥ अपरोक्षज्ञानिन इति चानतिविप्रकर्षेणोक्तत्वात् ॥तथोक्तमैहिकमप्रस्तुतप्रतिबंध इति॥अथवा योगारूढ

॥ अपरोक्षज्ञानिनोऽपि समाध्यादिफलमुक्तम् ॥

स्यापि कर्तव्यं वक्तुं प्रश्नोत्तरानुवादोऽयमिति॥नन्वपरोक्षज्ञानिनोऽनाधेयातिशयस्य कथं शमः परमसुखकारणमुच्यत इत्यत आह॥ अपरोक्षेति॥

॥ त० ॥ **तयोश्चेति** ॥ अपरोक्षज्ञानसमाध्योरित्यर्थः ॥ ननु तस्य योगारोहार्थिप्रश्नोत्तरत्वेऽपरोक्षज्ञानिन इत्यर्थ इति कथमुक्तमित्यत आह ॥ **अपरोक्षज्ञानिन इति चेति** ॥ **अनतिविप्रकर्षेणेति** ॥ समाधिपूर्त्यव्यवहितोत्तरकाल एव प्रतिबंधाभावेऽपरोक्षज्ञानोत्पत्तेरिति भावः ॥ अनतिविप्रकर्षे सूत्रसंमतिमाह॥ **यथोक्तमिति** ॥ प्रारब्धप्रतिबंधाभावे श्रवणादिपूर्तिजन्मन्येवापरोक्षज्ञानं भवति तथाश्रुतेरिति सूत्रार्थः ॥ अस्तु वापरोक्षज्ञानिन इति भाष्यं योगारूढस्येति शब्दार्थकथनपरम ॥ तथाऽपि न पुनरुक्तिरित्यभिप्रेत्य पक्षांतरमाह ॥ **अथवेति** ॥ **योगारूढस्यापि कर्तव्यवक्तुमिति** ॥ योगारूढस्येत्यस्यार्थेनेति शेषः ॥ तथा च योगारूढस्येत्यनेनापरोक्षज्ञानिनोऽप्यानंदोद्रेककारणं शमादिकं कर्तव्यं वक्तुमित्यर्थः ॥ **प्रश्नोत्तरानुवादोऽयमिति** ॥ यदा ते मोहकलिलमित्यादिना यत्प्रश्नोत्तरमुक्तं तस्यैवारुरुक्षोरित्यर्थोऽनुवाद इत्यर्थः ॥

१क्रियते ॥ कर्मानुष्ठानंविधीयतइत्येवपाठोवा २ आदिपदं वक्ष्यमाणप्रमाणोक्तजपादिसंग्रहार्थम् तस्यफलम् ३ अ. ३ पा. ४ अ.५० ओं ऐहिकमप्रस्तुतप्रतिबंधेतद्दर्शनात् ॥ इति हि सूत्रम् ॥ तत्रतद्दर्शनादित्यस्यार्थोऽयम ॥ श्रुतिश्चश्रुत्वाऽत्मानंमतिपूर्वंह्युपास्यहैवद्रष्टिः परमस्य विंदेदित्यादि ॥

॥श्री०॥तथा च योगमारुरुक्षोरपरोक्षज्ञानार्थिनो मुनेः कर्मकारणमपरोक्षज्ञानसाधनमिति॥तात्पर्यात्तत्कर्तव्यमित्युच्यते पूर्वमित्युक्तमिति यावत्॥तस्यैव योगारूढस्योत्पन्नापरोक्षज्ञानिनः शमः आनंदाभिवृद्धेः कारणमिति शमादिकमपरोक्षज्ञानिनामप्यनुष्ठेयमिति गीतार्थो द्रष्टव्यः ॥ परमसुखमेव नास्तीत्यत्रानाधेयातिशयस्येति हेतुः ॥ द्वितीय इति ॥ सुकृतमप्याप्रियं मानुष्यादि फलं जहाति न बृहत्फलमप्युपासनादिनिमित्तमित्यादिनेति शेषः ॥ ननु गीतानुसारेण शमादीति वक्तव्यमत आह ॥ समाध्यादीति ॥ सूचितमिति ॥ सर्वविषयोपरमेण भगवन्निष्ठबुद्धिर्हि शमः ईश्वरे मनसः स्थापनम् आधानं समाधिरिति शमसमाधिशब्दयोरेकार्थत्वमिति द्रष्टव्यम् ॥ तस्येति ॥ अपरोक्षज्ञानिन इत्यर्थः ॥ अन्यत् ॥ शमातिरिक्तम् ॥ तदविरोधेन ॥ समाधिरूपशमाविरोधेन॥अन्यत् व्याख्यानजपादिरूपं कर्म॥तुशब्द एवार्थः॥सम्यगितिशब्देन संबध्यते चशब्दस्तु समाधिशब्देनेत्याशयेन योजयति॥तेषामेवेति ॥समाधिश्च तेषामेव सम्यगेवजायत इत्यन्वयो द्रष्टव्यः ॥ ३ ॥

उक्तं समर्थितं द्वितीये ॥ समाध्यादीत्यनेन शमशब्दार्थः समाधिरिति सूचितम् ॥ तर्हि तस्यान्यत्कर्तव्यमेव नास्तीत्यत आह ॥ तस्येति ॥ सर्वोपशमेन सर्वविषयोपरतिलक्षणेनेति समाधौ शमशब्दं समर्थयितुमुक्तम् ॥ कारणं सुखाभिवृद्धेः ॥ तदविरोधेनान्यत्कार्यमिति भावः ॥ यदि ज्ञानिनः समाधिरानंदवृद्धेः कारणं तर्हि तमेव कुतो न कुर्युः ॥ कुतश्च व्याख्यानादौ प्रवर्ततइत्यत आह॥ तथापीति ॥ भोक्तव्योपरमः॥

तस्य सर्वोपशमेन समाधिरेव कारणं प्राधान्येनेत्यर्थः ॥ तथाऽपि ॥ यदा भोक्तव्योपरमस्तदैव सम्यगसंप्रज्ञातसमाधिर्जायतेअन्यदा तु भगवच्चरितादौ स्थितिः ॥ तच्चोक्तम् ॥ ये त्वां पश्यंति भगवंस्त एव सुखिनः परम् ॥ तेषामेव तु संक्रम्यसमाधिर्जायते नृणाम् ॥ भोक्तव्यकर्मण्यक्षीणे जपेन कथयाऽपि वा ॥ वर्तयंति महात्मानस्तद्भक्तास्तत्परायणा इति ॥ ३ ॥

प्रतिबंधकप्रारब्धकर्मोपरमः ॥ अन्यदा सम्यक्समाधिप्रतिबंधककर्मानुपरमकाले ॥ अत्रागमसंमतिमाह ॥ तच्चेति ॥ परं केवलम् ॥ तेषामेव ॥ सम्यगेव समाधिश्च जायत इति योजना ॥ वर्तयंति ॥ वर्तंते कालं नयंतीति वा ॥३ ॥ रु० ॥ अनुवादवैयर्थ्यनिरासाय वक्तुमित्यंतमुक्तम् ॥३ ॥

॥ श्री० ॥ यदाहीतिश्लोके योगारूढस्तदोच्यत इतिलक्षणोक्तेः स्पष्टत्वादाह ॥ स्फुटमपीति ॥ भाष्ये योगारूढत्वमित्यस्यसंपूर्णोपायवत इत्यर्थः नन्वपरोक्षज्ञानरूपकार्यवत्त्वमेव तस्य लक्षणं किं न स्यात्कि लक्षणांतरवचनेनेत्यत आह अपूर्णसमाधियोगानुष्ठानवति प्रारब्धप्रतिबंधवशादनुत्पन्नापरोक्षज्ञाने तस्याभावात् नेदं लक्षणमित्याशयेनाह ॥ अपरोक्षज्ञानं त्विति योगारोहस्य व्याख्यानम् अत एवोक्तमैहिकमप्रस्तुतप्रतिबंध इति ॥ इदमिति॥ इंद्रियविषयेष्वनुषंगाभावादिरूपंसंपूर्णोपायवदपरपर्यायं योगारूढलक्षणमित्यर्थः ॥ साधकेपीति॥ उपायम् साधयितरीत्यर्थः ॥ परमात्मानं दृष्ट्वा दोषक्षयो भवतीत्यध्याहारे दर्शनभवनयोः पुरुषदोषकर्तृकत्वेन समानकर्तृकत्वाभावात् दृष्ट्वेति क्त्वाप्रत्ययायोग इत्यत उक्तम्॥ आप्यत इति॥ शेष इति ॥ दोषक्षय इति शेषः ॥तथा च परमात्मानं दृष्ट्वा स्थितेन पुंसा दोषक्षय आप्यत इत्युक्तदर्शनाप्त्योः पुरुषकर्तृकत्वेन युक्तं समानकर्तृकत्वमिति द्रष्टव्यम् ॥परमात्मानं दृष्ट्वेत्यस्य संपूर्णोपायवत्ता योगारूढत्वमनपेक्षितमित्यर्थ ॥अतिविप्रकर्षोक्तिरित्यनन्वयम ॥ ननु प्रयत्नं विना स्वभावसिद्ध कामादि दोषक्षयस्य योगारूढलक्षणत्वेऽपि तदत्र यदाहीति श्लोके विवक्षितमिति कुतः येनातिव्याप्तिपरिहार इत्यत आह॥मुख्य एवेति ॥प्रयत्नसाध्यत्वेन साध्यविषयानन्तुषंगयोर्मध्ये प्रयत्नासाध्यानुषंगस्य मुख्यत्वान्मुख्यस्यैव ग्राह्यत्वादित्येतावान् वाक्यशेषः॥४॥

स्फुटमपि तात्पर्यं मंदानुजिघृक्षयाऽऽह ॥ योगेति ॥ अपरोक्षज्ञानं तु योगारोहस्य कार्यं सति प्रतिबंधे विलंबत इति न लक्षणम्॥ नन्विदं साधकेऽपि विद्यते वशे हि यस्येंद्रियाणीत्यादेः ॥ अतोऽतिव्यापकमित्यत आह ॥ सम्यगिति ॥ प्रयत्नं विनेत्यर्थः॥ तस्यैव योगारूढस्यैव॥

योगारूढस्य लक्षणमाह ॥ यदेति ॥ सम्यगननुषंगस्तस्यैव भवति ॥ उक्तंच ॥ स्वतोदोषलयो दृ

यदा हिनेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

॥ ष्ट्वान्वितरेषां प्रयत्नत इति ॥ ४॥

अत्र प्रमाणमाह ॥ उक्तं चेति ॥ परमात्मानं दृष्ट्वा त्वाप्यत इति शेषः ॥ मुख्य एव चाननुषंगोऽत्र विवक्षित इति भावः ॥ ४ ॥

॥ कृ० ॥ नन्वाक्षेपस्य सोपपत्तिकत्वात्कथमुक्तिमात्रेण निरास इत्यत आह ॥ उक्तंसमर्थितमिति ॥ ननु योगारूढस्यापरोक्षज्ञानमेव कस्माल्लक्षणं नोक्त मित्यत आह ॥ अपरोक्षज्ञानं त्विति॥सति प्रतिबंध इति ॥तथा च तस्य लक्षणत्वे व्याप्तिः स्यादिति भाव. ॥समानकर्तृकतासिद्ध्यर्थमाह ॥ आप्यत इति॥शेषइति ॥ नन्वत्र किमपरोक्षज्ञानी लक्ष्यः उत समाधिपरिपाकवान ॥ नाद्यः ॥ लक्ष्यतावच्छेदकलक्षणयोरैक्यप्रसंगेनापरोक्षज्ञानस्यलक्षणत्वशंकाया एवाभावे तन्निरासायोगात् ॥ न द्वितीयः ॥ स्वतो दोषलयो दृष्ट्वेति प्रमाणोपन्यासाविरोधात् ॥ तत्रायत्नसाध्यदोषक्षयस्यापरोक्षज्ञानजन्यत्वोक्तेरिति चेन्न ॥दृष्ट्वेत्यस्य दर्शनसाधनसमाधिपरिपाकं प्राप्येति वा ॥ धातूनामनेकार्थत्वेन सम्यक् समाधायेति वाऽर्थोपपत्तेरिति ॥ अंत्रेति ॥ यदा हि नेंद्रियार्थेष इति गीतावाक्य इत्यर्थः ॥ ४ ॥

१ । २ स्वतः सिद्ध इत्यर्थः ॥ ३ एवंच संकल्पादेर्भगवदधीनताज्ञानेन कर्मस्वनासक्तत्वंमति अप्रयत्नेन शब्दादिविषयेष्वनासक्तत्वं योगारूढत्वमिति रा. श्रीपादाः ॥

॥ श्री॰॥ इति पृच्छायामिति ॥ अन्यथा इत्यत आहेति स्यान्न स्वित्याहेतीति भावः ॥ आद्यश्लोकइति ॥ उद्धरेदात्मनात्मानमिति श्लोक इत्यर्थः ॥ स्वपर्याय इति ॥ स्वशब्दपर्याय इत्यर्थः ॥ तथा च पूर्वश्लोके जीवपर्याय एवात्मशब्दः प्रकृतोऽत्रऽऽत्मा मन इति व्याख्यानमयुक्तमिति भावः ॥ आहेति ॥ तत्रापि तृतीयान्तात्मशब्देन मन एव प्रकृतमस्तीत्याहेत्यर्थः ॥ उत्तरार्धगतेति ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मन इत्यत्रापि आत्मनो जीवस्यात्मैव मन एव बंधूरिपुश्चेत्यर्थो द्रष्टव्यः ॥ व्याख्येयविवेकार्थमिति ॥ बंधुरात्मेति निरवधारणात्मशब्दस्य मनः परत्वेन पूर्वं व्याख्यातत्वादत्रावधारणाग्रहणे व्याख्यातस्यैव पुनर्व्याख्यानं व्यर्थमिति शंका स्यादतो येनात्मैवेत्यत्रत्यात्मशब्दो व्याख्यायत इति व्याख्येयात्मशब्दविवेकार्थं एवकारग्रहणमित्यर्थः ॥ प्राधान्येति ॥ बुद्ध्यपेक्षयेत्यर्थः ॥ बुद्ध्येत्युक्तत्वादन्ययोगव्यवच्छेदकत्वं न संभवतीत्याशयः॥ कर्तरीति॥तथा चात्मना जीवेन कर्त्रात्मा जित इत्यर्थो द्रष्टव्यः ॥ करण इति ॥ जीवेनात्मना बुद्ध्याकरणभूतयाऽऽत्मा जित इत्यर्थो द्रष्टव्यः ॥कर्तृकरणयोस्तृतीयेति स्मरणादिति भावः

इति पृच्छायामिति शेषः ॥ आत्मा आत्मन इतिपदद्वयम् ॥ आत्मशब्दस्यानेकार्थत्वाद्व्याचष्टे॥ आत्मेति॥नन्वाद्यश्लोके स्वपर्याय एवात्मशब्दः प्रकृतः ॥ तदुपपादकद्वितीये कथमन्योऽर्थ इत्यत आह ॥ आत्मनेति॥अनयैव रीत्याऽद्य श्लोकोत्तरार्धगतात्मशब्दव्याख्यानं द्रष्टव्यम्॥

आत्मा मनःआत्मनो जीवस्य ॥ आत्मना मनसाआत्मानं जीवम् आत्मैव मनः आत्मना बुद्ध्या ॥

॥ जीवेनैव वा॥सहिबुद्ध्याविजयति ॥

येनात्मैवात्मनाजितइत्यत्रात्मशब्दो व्याचष्टे ॥आत्मैवेति ॥ एवशब्दोपादानं व्याख्येयविवेकार्थम् ॥जीवेनैवेत्यवधारणं प्राधान्यज्ञापनार्थम् ॥ यदाऽऽत्मशब्दो जीवे तदा कर्तरि तृतीया ॥यदाबुद्धौ तदा करण इति ज्ञापयन्नुपपादयति॥स हीति ॥

व्याख्येयविवेकार्थमिति ॥ आत्मैवात्मना जित इत्यत्रत्यमात्मपदं व्याख्येयमिति ज्ञापनार्थमित्यर्थः ॥ एवशब्दाभावे बंधुरात्मेत्यात्मशब्दस्य व्याख्यातत्वात् पुनर्व्याख्यानं व्यर्थमिति शंकाप्रसंगादिति भावः ॥ बुद्ध्येत्युक्तत्वादेवशब्दस्य नान्यव्यवच्छेदकत्वमित्यत आह ॥ प्राधान्येति ॥ बुद्ध्यपेक्षयेति शेषः ॥

१ आत्मशब्दार्थकथनप्रसंगात् श्लोकगतोऽपि व्याख्यातः २येनेत्यनेन सामानाधिकरण्यम् ॥ ३येनेति व्यधिकरणं जीवेनेत्यर्थः ॥ सामानाधिकरण्यापेक्षयाऽनध्याहारो वर इतिसूचयितु भाष्योक्तक्रमोल्लंघनम् ॥

॥ श्री० ॥ **विध्युपयुक्तमिति** ॥ समाधियोगविधानोपयुक्तमित्यर्थः ॥ **योग एवेति** ॥ समाधियोग एवेत्यर्थः ॥ **तावत्पर्यंतमिति** ॥ योगारोहलक्षणापरोक्षज्ञानपर्यंतं ध्यान लक्षणसमाधियोगः कार्य इत्यर्थः ॥ तथा चानेनावहननादिवदुपकृत्य फलप्राप्तिपर्यंतमनुष्ठेयमिति प्रश्नोत्तरं जातमिति द्रष्टव्यम् ॥ **अभियोगेनेति** ॥ आग्रहेणेत्यर्थः । आत्मा केंविशेषणो ने यावत् ॥ ५ ॥ **उत्तरश्लोके** ॥ बंधुरात्मेतिश्लोके ॥ आत्मैव हीत्यत्रात्मन आत्मानं प्रति बंधुत्वमुक्तं कीदृशस्यात्मन आत्मैव रिपुश्चेत्याकांक्षाया बंधुरात्मेत्युत्तरश्लोके स्पष्टमेव तत्र येनात्मैवात्मना जित इत्याद्युक्तेरतो मंदाशंकामित्युक्तं॥कस्येतीति॥किं विशेषणस्य इत्यर्थः॥किंविशेषणश्चेति॥येनात्मैवात्मनाजित इति मनसोऽपि विशेषणत्वादिति भावः॥

नन्वेवं विध्युपयुक्तमुक्त्वा समाधियोगे विधेये किमर्थमात्मोद्धारकर्तव्यतोच्यते इत्यतोऽनयावाचोभंग्या योग एव विधीयत इत्याह॥ न चेति। तस्याधिकार्यादिकमुक्तं स एव च योग इति वक्तव्ये यदाऽरोहग्रहणं कृतं तेन तावत्पर्यंतं योगः कर्तव्यः ॥ न मध्य एव त्याज्य इति ज्ञापनार्थम् ॥ प्रयत्नेनाभियोगेन ॥ ५ ॥ आत्मैव हीत्युक्तमेवोत्तरश्लोके किमिति कथ्यत इति मंदाशंकानिरासार्थमाह ॥ कस्येति॥ किं

स च योगारोहः प्रयत्नेन कर्तव्यइत्याह ॥ उद्धरेदित्यादिना ॥ ५॥ कस्यबंधुरात्मेत्याह॥बंधुरात्मेति ॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैवरिपुरात्मनः ॥ ५ ॥
बंधुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः॥अनात्मनस्तुशत्रुत्वे वर्तेतात्मैव शत्रुवत्॥६ ॥

विशेषणश्चेत्यपि ग्राह्यम् ॥ तस्यैव तमेव प्रति बंधुत्वं रिपुत्वं च विरुद्धम् ॥ तद्विशेषणभेदेनव्यवस्थाप्यम् ॥ तथा च किंविशेषणस्यात्मनः किं विशेषणो वाऽऽत्मा बंधू रिपुश्चेत्यर्थः ॥

॥ कृ० ॥ **विध्युपयुक्तमिति** ॥ अधिकार्यादिकमित्यर्थः ॥ **वाचो भंग्येति** ॥ वाचोरीत्ये त्यर्थः ॥ **अधिकार्यादिकमिति** ॥ आदिपदेन कारणलक्षणयोः संग्रहः ॥ योगारूढलक्षणोक्तौ योगलक्षणस्याप्युक्तप्रायत्वादिति बोध्यम् ॥ **तावत्पर्यंतमिति** ॥ योगारोहलक्षणापरोक्षज्ञानपर्यंतं समाधिरूपयोगः कार्य इत्यर्थः ॥ ननु कर्तव्य इत्यनेनैव प्रयत्नसाध्यत्वलाभात्प्रयत्नेनेति व्यर्थमित्यत आह ॥ **अभियोगेनेति** ॥ अभियोगस्तु शपथ इति विश्वोक्तेः शपथेनेत्यर्थः ॥ आदरातिशयेनेति यावत् ॥ यद्वाऽभितः सर्वतः सर्वस्मिन्देशे शरीरेंद्रियमनोभिर्वा भगवति नियोगेनेत्यर्थः ॥ ५ ॥ उत्तरश्लोके विशिष्टस्यैव मनसो बंधुत्वाद्युक्तेर्नोक्तमेवोच्यत इत्यत उक्तम् मंदाशंकेति ॥ येनात्मैवात्मनाजित इति मनोविशेषणव्यावर्त्यां शंकामाह॥ **किंविशेषणश्चेत्यपीति** ॥ आत्मनो बंधुरिति संबंधिन उक्तेः कथं तदाकांक्षेत्यत आह **तस्यैवेति** ॥ **किंविशेषणस्येति** ॥ नैव बुद्ध्या हीत्युदाहरिष्यमाणप्रमाणे बुद्ध्यादिवत्स्निर्दिष्टस्यैव जितमनोबंधुरित्यवगमादेवमुक्तमित्यवधेयम् ॥

१कालेचेत्यपिग्राह्यम् ॥ अभीत्यव्ययं सप्तम्यंतं तृतीयांतंवेति भाव. ॥

॥ श्री० ॥ विपराभ्यांजेरितिसूत्रेण विपरेत्युपसर्गाभ्यां परस्य जिजय इति धातोरात्मनेपदविधानादाह ॥ **विजयत इति** ॥ चंद्रादयस्तु मन्यंते सर्वस्मादुभयं पदमिति वचनादिति भावः ॥ **जयत इति** ॥ अभिभावयतीत्यर्थः ॥ तिरस्करोतीति यावत् ॥ जयतेर्जयाभिभवयोराद्येऽर्थेऽ भावकर्मकः ॥ उत्कर्षप्राप्तिगत्यर्थौ द्वितीयेऽथमकर्मक इति वचनेनाभिभवार्थकजिधातोः सकर्मकत्वादाह ॥ **मन इति** शेष इति **स्वैनैवसादीति** ॥ उद्धरेदात्मनेत्याद्यात्मशब्दानामित्यर्थः ॥ तेनात्मशब्दस्य स्वपर्यायत्वांगीकारादिति भावः॥ न आत्मा अनात्मा तस्यानात्मन इति नञ्समासः ॥ न विद्यते आत्मा यस्य सोऽनात्मा तस्यानात्मन इति बहुव्रीहिः ॥ **आत्मान्यत्वानुपपत्तेरिति** ॥ प्राक् जीवस्यैव मनःशत्रुत्वोक्तेरिदानींमनःशत्रुत्वेनोच्यमानस्यानात्मनो जीवत्वावश्यंभावात्तस्य च स्वान्यत्वमनुपपन्नमिति भावः ॥ नन्वात्मांतरादन्यत्वेनानात्मत्वमुपपन्नमिति चेन्न ॥ प्रयोजनाभावे तत्कथनस्य प्रकृतासंगत्वादित्याह ॥ **आत्मांतरादन्यत्वस्य चेति आत्मशब्दस्येति** ॥ अनात्मन इति पदांतर्गतस्येत्यर्थः ॥ **संसारिणीति** ॥ न विद्यते आत्मा यस्येत्यत्रान्यपदार्थभूतस्य संसारिणि जीवचैतन्यवत्वस्य मनोयुक्तत्वस्य च सत्वेन जीवमनसोरभावस्यासंभवादित्यर्थः ॥ एतदुपपादनायैव संसारिणीत्युक्तम् ॥ **अन्यपदार्थ इति** ॥ अन्यपदार्थप्रधानो बहुव्रीहिरिति भावः ॥

विजयति विजयते मन इति शेषः ॥ स्वैनैवेत्यादिव्याख्याननिरासार्थमुक्तेऽर्थे प्रमाणान्याह॥उक्तं चेति॥ अनात्मन इति नञ्समासो बहुव्रीहिर्वा स्यात्॥नाद्यःआत्मनआत्मान्यत्वानुपपत्तेः॥आत्मांतरादन्यत्वस्य च प्रकृतेऽनुपयोगात्। न द्वितीयः॥आत्मशब्दस्य जीववाचित्वे वा मनोवा

उक्तं च॥मनः परं कारणमामनंति ॥मन एव मनुष्याणांकारणं बंधमोक्षयोः॥उद्धरेन्मनसा जीवं न जीवमवसादयेत् ॥ जीवस्य बंधुः शत्रुश्च मन एव न संशयः ॥ जीवेन बुद्ध्या हि यदा मनो जितं तदा बंधुः शत्रुरन्यत्र चास्य॥ततो जयेद्बुद्धिबलो नरस्तद्धवे च भक्त्या मधुकैटभारावित्यादि ब्रह्मवैवर्ते॥अनात्मनः

चित्वे वा संसारिणितदभावस्यासंभवादित्यत आह ॥ अनात्मन इति ॥ बहुव्रीहिपरिग्रहसूचनाय पुरुषस्येत्यन्यपदार्थो दर्शितः ॥

॥ कृ०॥ननु विजयत इति वक्तव्यम॥विपराभ्यांजेरित्यात्मनेपदोक्तेः तत्कथंपरस्मैपदमित्यत आह॥**विजयत इति**॥ **स्वैनैवेत्यादीति**॥ उद्धरेदात्मनेत्याद्यात्मशब्दानामिति शेषः ॥**आत्मत्वानुपपत्तेरिति** ॥ प्राग्जीवस्यैव मनः शत्रुत्वोक्तेरिदानीं मनः शत्रुत्वेनोच्यमानस्यानात्मनो जीवत्वावश्यंभावाज्जीवान्यत्वानुपपत्तेरित्यर्थः ॥ **आत्मशब्दस्येति** ॥ अनात्मपदांतर्गतस्येति शेषः ॥ **असंभवादिति** ॥ चिदचित्संवलितवस्तुन एव संसारित्वादिति भावः ॥

॥ श्री० ॥ आहेति ॥ आत्मशब्देन मनोऽभिमेतमित्याहेत्यर्थः ॥ तत्कथमिति ॥ अजितत्वं नञर्थो न भवतीति भावः ॥ अजितमित्यनंतरं चेदिति शेषः ॥ अविद्यमानसादृश्यादि
ति ॥ अनुपकारित्वरूपगुणेन सादृश्यादित्यर्थः ॥ अजितात्माऽनात्मेति ॥ योऽजितात्मा स अनात्मेत्युक्त इत्यर्थः ॥ एवशब्दस्यार्थांतरासंभवादाह ॥ बंधुरेवेत्येवार्थ इति ॥ बंधुत्वे
नोक्त एवेत्यर्थः ॥ व्याख्येयात्मानुसारेण बंधुरितिपुंल्लिगप्रयोग इति ज्ञेयम् ॥ दृष्टांतदार्ष्टांतिकयोः समानविभक्तिकतायास्तंत्रत्वादात्मा मनः शत्रोरिव शत्राविव शत्रुत्वे वर्तत इति
षष्ठ्यर्थे सप्तम्यर्थे वा वत्यंगीकारेऽप्यसंगतेस्तत्र सप्तम्यंतेति सूत्रस्य प्रायिकत्वमंगीकृत्य प्रथमांतादयं वतिरित्याशयेनाह ॥ शत्रुरिवेति ॥ ६ ॥ योग इति ॥ समाधियोग इत्यर्थः ॥ स
एव क इति ॥ आत्मोद्धार एव कीदृश इत्यर्थः ॥ वाक्यभेदेनेति ॥ जितात्मन प्रशांतिर्भवतीत्येकं वाक्यं जितात्मनः प्रशांतस्येत्याद्यपरं वाक्यमिति वाक्यभेदेनेत्यर्थः ॥ तत्फलमि
ति ॥ मनोजयफलमित्यर्थः ॥ एतादृशप्रशांतत्वस्य साधकेऽपि सत्त्वादाह ॥ स्वत एवेति शेषइति ॥ अनायासेनेत्यर्थः ॥ कृ० ॥ ननु तथाऽपि कया वृत्त्या नञोऽजितत्वमर्थ इत्यत आह ॥

अनात्मशब्दार्थं दर्शयितुमाह ॥ अजितेति ॥ नन्वविद्यमान आत्मा यस्यासावनात्मा तत्कथमुच्यतेऽजितात्मन इति तत्राह ॥ सदपीति ॥ विद्यमानमपि मनोऽजितमनुपकारीति ॥ अविद्यमानसादृश्यादविद्यमानतामुपचर्यअजितात्मा अनात्मोक्त इत्यर्थः॥ गौणप्रयोगे किं प्रयोजन मिति चेत्॥न रूढोपचारे प्रयोजनानपेक्षणात् इति भावेनाह॥सन्नपीति॥भृत्यपदे सेवादौ॥पदानां व्यवहितत्वादनात्मनइत्यर्धंव्याचष्टे॥तस्येति॥ तस्याजितमनस्कस्य बंधुरेवेत्येवार्थः ॥ शत्रुवत्प्रसिद्धशत्रुरिव शत्रुत्वेऽपकारित्वे ॥ ६ ॥ योगोविहितः तर्हिकिंजितात्मन इत्यनेनेत्यत आह ॥

अजितात्मनः पुरुषस्य॥अजितमनस्कस्य॥ सदपि मनोऽनुपकारीत्यनात्मा॥सन्नपि भृत्यो नयस्य भृत्यपदे वर्तते सह्यभृत्यः॥तस्यात्मन एव शत्रुवच्छत्रुत्वे वर्तते॥६॥जितात्मनः फलमाह॥जितात्मन इति॥जितात्मा हि प्रशांतो

॥जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ भवति॥ न तस्य मनः प्रायो विषयेषु गच्छति॥

जितात्मन इति ॥ उपकारी हि बंधुरुच्यते ॥ तत्रजितं मनः कमुपकारं करोति ॥ येन बंधुः स्यात् ॥ आत्मोद्धारं करोतीति चेत् ॥ स एव च क इत्याशंक्येति शेषः ॥ जितात्मनः फलं वक्तव्ये प्रशांतस्येत्यनुवादः किमर्थ इत्यत आह ॥ जितात्माहीति ॥ वाक्यभेदेनेदमेव फलकथनमिति भावः॥ननु जितात्मत्वमेव प्रशांतत्वं तत्कथं तत्फलं स्यादित्यत आह ॥ नेति ॥ तस्यजितात्मनः स्वत एवेति शेषः ॥

॥ विद्यमानमपीति ॥ एवार्थ इति ॥ यो बंधुत्वेनोक्तः स एवेत्येवार्थ इत्यर्थः ॥ अर्थांतरासंभवादितिभावः ॥ शत्रुरिवेति ॥ फलितार्थकथनमेतत् ॥ विग्रहस्तु शत्रुणा
तुल्यइतिबोद्धव्यः ॥ तेनतुल्यंक्रियाचेद्वतिरितिवतिप्रत्ययविधानादिति मंतव्यम् ॥ ननु शत्रुवदितिशब्दान्यत्वस्य सूचितत्वात्कथं शत्रुत्व इत्युक्तमित्यत आह ॥ अपकारित्वइति ॥ ६ ॥
वाक्यभेदेनेति ॥ जितात्माहि प्रशांतो भवतीति वाक्यभेदेनत्यर्थः ॥

॥श्री० ॥अनेन प्रमादो नाम स्वतोऽपि प्रायोविषयागतिरिति प्राचीनव्याख्यानविसंवादोऽपि परिहृत इति ध्येयम्॥**निराकांक्षत्वादिति**॥जितात्मा प्रशांतो भवतीतिवाक्येनैवाकांक्षायाः पूर्णत्वात्जितात्मनः प्रशांतस्येत्याद्युत्तरं वाक्यं द्वितीयं वाक्यं व्यर्थमित्यर्थः ॥ **परमफलमिति** ॥ जितात्मनः प्रशांतिव्यतिरिक्तं ध्यानपाकापरपर्याययोगारोहरूपं परमफलमित्यर्थः ॥ **न्यूनमिति** ॥ कुत्राहित इत्याकांक्षापूरकस्याधिकरणवाचिनः पदस्याभावेन न्यूनत्वादित्यर्थः ॥ **पूरयन्निति** ॥ अधिकरणवाचिनं हृदीति पदं पूरयन्नित्यर्थः ॥ **योगारूढ इति** ॥ अनेनैवन्यायेन अपरोक्षज्ञानिनो लक्षणं स्पष्टयतीत्यत्रापि योगारूढस्य लक्षणं स्पष्टयतीत्येवार्थो वर्णनीयः ॥ अत्रापरोक्षसमाध्योरनतिविप्रकर्षात्तथोक्तिरिति पूर्वोक्तमनुसंधेयम् ॥ **अन्वयमिति**॥ शीतोष्णेतिश्लोके शीतोष्णसुखदुःखेषु मानापमानयोरिति सप्तम्या अन्वयमित्यर्थः ॥ **पूर्वपाठ इति** ॥ परमात्मा समाहित इति पाठांगीकारे शीतोष्णेति श्लोके सप्तम्याऽन्वयाभावः समाहित इत्यस्यानुवृत्त्यंगीकारेऽपि शीतोष्णादिषु समाहित इत्यर्थासंभवादितिभाव ॥**अनेनेति**॥शीतोष्णादिषुकूटस्थइतिकूटस्थपदेन सप्तम्या अन्वयप्रदर्शनेनापहरिततामित्यर्थः॥**पुनरुक्तमिति**॥सुहृन्मित्रेति श्लोकेनात्मौपम्येनेति च श्लोकेनोच्यमानस्यसर्वत्र समबुद्धित्वस्य परात्मसु समामतिरित्यनेनैवलब्धत्वादिति भावः॥भाष्येकूटस्थत्वइत्यस्य शीतोष्णादिषु कूटस्थत्वइत्यर्थो द्रष्टव्यः॥

तर्हि निराकांक्षत्वादुत्तरं वाक्यं व्यर्थमित्यतः परमफलं दर्शयितुं तदिति भावेन न्यूनमध्याहारेण पूरयन्व्याचष्टे ॥ तदा चेति ॥ प्रशांतत्वे सति परमात्मा सर्वेषां हृदि सन्निहित एव ॥ तत्कुतः प्रशांतस्य विशेष इत्यतः सम्यक्पदसूचितार्थं विवृणोति ॥ अपरोक्षेति ॥ योगारूढ इत्यर्थः ॥ यदा हीति योगारूढस्य लक्षणमुक्तं तत्किमर्थं पुनरुच्यत इत्यतआह ॥ अपरोक्षेति ॥सार्धश्लोकद्वयग्रहणायादिपदं अत्र सप्तम्या

॥तदा च परमात्मासम्यगाहितः॥ हृदि सन्निहितो भवति ॥ अपरोक्षज्ञानी भवतीत्यर्थः॥

अन्वयो न दृश्यतेऽत आह ॥ शीतेति ॥ अत्र भास्करोऽन्वयमपश्यन् परमात्मा समाहित इति॥ संप्रदायागतं पाठं विसृज्य परात्मसुसमामतिरिति पाठांतरं प्रकल्प्य समामतिरिति तु आवर्त्य सप्तम्या अन्वयमुक्त्वा ॥ पूर्वपाठेऽन्वयाभाव इत्यवादीत् ॥ तदनेनापहस्तितं भवति॥ कृत्रिमेऽपि पाठे सुहृदित्यादिकमात्मौपम्येनेत्यादिकं च पुनरुक्तं स्यात् ॥ ॥२०॥अध्याहारेणेति॥हृदीत्यध्याहारेणेत्यर्थः ॥प्रसिद्धार्थग्रहणे योगारूढप्रकरणविरोध इत्यत आह ॥ योगारूढ इत्यर्थ इति पुनरुक्तमिति ॥ परेण सुहृदित्यादिरात्मौपम्येनेत्यादेश्च परात्मसुसमामतिरित्येतदर्थत्वेन व्याख्यानादिति भावः

॥ श्री० ॥ ननु हेतुरित्येकवचनमयुक्तं हेतव इति वक्तव्यत्वादित्यत आह॥ **प्रत्येकमिति** ॥ शिल्पादीत्यत्रादिपदेन व्याकरणाद्यंगसंग्रहः ॥ कुत इत्यत आह ॥ **मोक्षे धीरिति** ॥ मोक्षे हेतुभूता या श्रवणमननजन्या धीः सा ज्ञानमित्युच्यते॥अन्यत्र मोक्षहेतुश्रवणादेरन्यत्र व्याकरणाद्यंगविषये या धीः सा विज्ञानं शिल्पशास्त्रयोः शिल्पशब्देन तज्ज्ञानंग्राह्यं शास्त्रशब्देन वैष्णवदर्शनम् ॥ तथा च शिल्पशास्त्रयोर्विज्ञानशब्दः प्रवर्तत इत्येवं श्रवणादिति वक्ष्यमाणप्रमाणानुसारेण योज्यम् ॥ यद्वा शिल्पशास्त्रमेव ग्राह्यम् ॥ तथा च शिल्पवैष्णवशास्त्रयोर्विषये या धीः सा विज्ञानमित्युच्यत इत्यर्थः ॥ **तत्कथमिति** ॥ शिल्पशास्त्रादिवृद्ध्या तृप्तात्मा कथं स्यादित्यर्थः ॥ **अनेनेति** ॥ विज्ञानशब्दस्य विशेषज्ञानाद्यर्थकत्वकथनेनेत्यर्थः ॥ **प्रसिद्धेति** ॥ शिल्पादिविषयकबुद्धौ विज्ञानशब्दवाच्यत्वरूपोऽप्यर्थोऽङ्गीक्रियते ॥ विश्वकर्मा मयश्चैव विज्ञानकुशलावुभावित्यादिप्रयोगेषु ॥ परं तु ज्ञानविज्ञान तृप्तात्मेत्यत्र प्रकृते सोऽर्थो नांगीक्रियत इति भावः ॥ **साधारणैरिति** ॥ तथा चायं प्रमाणार्थः ॥

ननु यः शीतोष्णादिषु कूटस्थः तस्य ज्ञानविज्ञानतृप्तमनस्त्वं विजितेंद्रियत्वं चार्थात्सिद्धमेव तत्किमर्थं पुनरुच्यत इत्यत आह ॥ ज्ञानेति॥ प्रत्येकमन्वयादेकवचनम् ॥ननु शिल्पादिविषया बुद्धिर्विज्ञानम्॥मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोरित्यभिधानात् ॥तत्कथं विज्ञानेन

अपरोक्षज्ञानिनो लक्षणं स्पष्टयति ॥ शीतोष्णेत्यादिना ॥ शीतोष्णादिषुकूटस्थः ॥ ज्ञानविज्ञानतृप्तात्मा विजितेंद्रिय इति कूटस्थत्वेहेतुः ॥ विज्ञानं विशेषज्ञानम् ॥ अपरोक्षज्ञानं वा ॥तच्चोक्तं॥ सामान्यै

शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥ ७ ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ॥ युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

॥ र्ये त्वविज्ञेया विशेषा मम गोचराः ॥ देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितमिति

तृप्तात्माऽयंस्यादित्यत आह॥विज्ञानमिति॥अनेन सामान्यज्ञानं परोक्षज्ञानं वा ज्ञानमिति सूचितम्॥ कुत एतदित्यत आह ॥ तच्चेति॥ प्रसिद्धाभिधानार्थोऽप्यंगीक्रियत इति च शब्दः॥ सामान्यैः साधारणैपुरुषैः सामान्यविषयं तु ज्ञानमित्यपि द्रष्टव्यम्॥ तदेवज्ञानमिति संबंधः॥

॥कृ०॥मोक्ष धीरिति॥ मोक्षफलिका धीः ज्ञानम् ॥ अन्यफलिका शिल्पे शास्त्रे च याधीः सा विज्ञानमित्यर्थः ॥ भाष्ये॥ देवादीनां त्विति ॥ तज्ज्ञानं विशेषाणां ज्ञानं विज्ञानमिति कीर्तितम् ॥ तच्च देवादीनामेवेत्यर्थ इत्यर्थः ॥ अन्ये तु ये मम विशेषाः सामान्यैरविज्ञेया देवादीनामेव गोचराः तज्ज्ञानं विज्ञानमिति कीर्तितमिति एकवाक्यतया योजयंति ॥

॥ श्री ०॥सामान्यैः साधारणैः पुरुषैर्य त्वविज्ञेयाः विशेषाः तार्हि तेनाप्रामाणिका इति भावेनोक्तं मम गोचरा इति यज्ज्ञानविषयीभूतास्तद्विषयकं ज्ञानं तद्विज्ञानमिति कीर्तितं एतादृशं विज्ञानं केषामपि नास्तीत्यप्रामाणिकमिति शंकापरिहाराय देवादीनामित्युक्तम ॥ एतादृशं च विज्ञानं देवादीनामस्तीत्यर्थः ॥ पुनर्ज्ञानविज्ञानयोर्विवेकं दर्शयति ॥ **श्रवणादित्यादिना** ॥ श्रवणान्मननाच्च यज्ज्ञानमुपजायते तदेवज्ञानमित्युच्यते विष्णोर्दर्शनमपरोक्षज्ञानं यत्तद्विज्ञानमिति शंभुरब्रवीत् ॥ प्रसिद्धाभिधानार्थोऽप्यंगीक्रियत इत्युक्तं चशब्देन तद्दर्शयति ॥ **विज्ञानमिति** ॥ तथा अंगादेरंगस्य व्याकरणादेः आदिपदेन शिल्पस्य च यज्ज्ञानं तद्विज्ञान तथा विशिष्टं इतरशास्त्रविलक्षणं यद्दर्शनं वैष्णवशास्त्रं तदपि विज्ञानामित्युच्यत इति ॥ **कूटवदिति** ॥ तत्र तस्येवेत्यस्य प्रायिकत्वात् प्रथमांतात कूटशब्दात अत्र वतिरिति द्रष्टव्यम ॥ **नित्यादिपर्याय इति** ॥ ननु कूटशब्दोपपदात ष्ठागतिनिवृत्ताविति धातोः कप्रत्यये लशक्वतद्धित इति ककारलोपे आतो लोप इटि चेति धात्वाकारलोपे धात्वादेःषः स इति धातोरादिभूतस्य षस्य सत्वे च सति कूटस्थइतिभवति तत्र कप्रत्ययःकथं आतोनुपसर्गेकइति सूत्रणादंताद्धातोः कर्मण्युपपदे सति कप्रत्ययविधानात गोदः कबल इत्युदाहृतत्वाच्च प्रकृते च कूटशब्दस्य प्रथमांतस्योपपदस्यसत्त्वादिति चेत्तत्राह ॥ **सुपिस्थ इतिवचनात** इति ॥ पाणिनिवचनादित्यर्थः ॥ अत्र आतोनुपसर्गेकइति पूर्वसूत्रात्कइत्यनुवर्तते॥तथा च सुबंते उपपदे ष्ठाधातोः कप्रत्ययः स्यादिति सूत्रार्थः॥प्रकृतेच षष्ठ्यंतस्य कूटशब्दस्योपपदस्य सत्त्वाद्युक्तः कप्रत्यय इति भावः नन्वत्र ष्टुनाष्टुरितिसूत्रेण ष्टुत्वेन भाव्यं तथा ह्यत्र सूत्रे स्तोश्चुनाश्चुरिति पूर्वसूत्रात स्तोरित्यनुवर्तते।तथा च स्तोः सकारतवर्गयोः ष्टुना षकारटवर्गाभ्यां योगे ष्टुः षकारटवर्गौ स्तः ॥ अत्र च षकारटवर्गाभ्यां योगः पूर्वत्र परत्र वाविवक्षितः यथोक्तं ष्टौपरइति सप्तमीमकृत्वा ष्टुनेति तृतीययाकरणस्य गतिं कथयतावृत्तिकारेण अकृत्वा सप्तमीमेतां तृतीयामकरोन्मुनिः॥

अंगादेर्व्याकरणादेः ॥ शिल्पस्य च विशिष्टं दर्शनं वैष्णवशास्त्रम्॥ कूटस्थशब्दो नित्यादिपर्यायः तेन कथमन्वयः सप्तम्या इत्यत आह ॥

श्रवणान्मननाच्चैव यज्ज्ञानमुपजायते ॥ तज्ज्ञानं दर्शनं विष्णोर्विज्ञानं शंभुरब्रवीत् ॥ विज्ञानं ज्ञान ॥ मंगादेर्विशिष्टं दर्शनं तथेत्यादि ॥ कूटस्थोनिर्विकारः ॥ कूटवत्स्थित इति व्युत्पत्तेः ॥

कूटस्थ इति ॥ तत्कथमित्यत आह ॥ कूटवदिति ॥ सुपिस्थ इतिवचनात् ॥ ॥ कृ० ॥ अंगशब्दार्थो ॥ व्याकरणादेरिति ॥ आदिपदार्थः ॥ शिल्पस्येति ॥ नित्यादिपर्याय इति ॥ आदिपदेन महालक्ष्मीग्रहणम् ॥ एकरूपतया तु यः ॥ कालव्यापी स कूटस्थ इत्यमरोक्तेः ॥ कूटस्थोऽक्षर उच्यत इति प्रयोगाच्चेति भावः॥ कथं रूपनिष्पत्तिरित्यत आह॥ **सुपिस्थ वचनादिति**। सुपिस्थ इतिसूत्र विभक्तेन सुपीत्यनेन सुप्युपपदे आदंतात्कः स्यादित्येतदर्थकेन कूटशब्दे उपपदे स्थाधातोः कप्रत्यय इत्यर्थः॥ न च स्थ इतिसूत्रखंडेन प्रत्ययः किं न स्यादिति वाच्यम॥तथात्वे भावार्थत्वप्राप्त्या कर्त्रर्थत्वायोगात्॥यथोक्तम् आरंभसामर्थ्याद्भाव इति ॥

॥श्री॰॥ तस्मात्पूर्वेण संबंध. सन्निकर्षः परेण वेति ॥ यथा षण्णां पूरणः षष्ठ इत्यत्र षष्थेति स्थिते तवर्गस्यस्थस्य पूर्वषकारेण योगोऽस्तीति तस्य टवर्गान्तर्गते ठकारे जाते षष्ठषष्ठेति भवति ॥ एवमिहापि स्थितेत्यत्र षकारस्य हि सकारो जातोऽस्ति तथा च थकाररूपतवर्गस्य पूर्वं षकारेण योगोऽस्तीति ष्टुत्वे टवर्गान्तर्गते ठकारे जाते कूटष्ठ इति स्यादितिचेदुच्यते ॥ अत्र हि षकारटवर्गाभ्यां योग इति तवर्गस्य टवर्गभवने पूर्वं षकारस्य निमित्तत्वेनोक्तत्वादत्र निमित्तभूतस्य षस्य सकारस्य जातत्वेन निमित्ताभावात् निमित्ताभावे च नैमित्तिकस्याप्यभाव इति न्यायेन षनिमित्तकं ष्टुत्वमपि न जातमिति टवर्गप्रकृतिस्तवर्ग एवावतिष्ठत इति कूटस्थेति युक्तमिति द्रष्टव्यम् ॥ कूटशब्द इति ॥ कूटाख्यानृतयंत्रायोघनमायोत्तरेषु चेत्यनेकार्थसंज्ञयाभिधानादिति भावः ॥ क्तप्रत्ययेनित्यप्रत्ययाभ्यामेव स्पष्टं भिन्नार्थताप्रतिभासनात् मंदा शंकेत्युक्तम्॥इनेरिति ॥ तदस्यास्त्यस्मिन्निति मतुबिति मत्वर्थस्येनेरित्यर्थः ॥ कुर्वन्नित्युक्तमिति ॥ वर्तमानार्थकलडादेशशतृप्रत्ययप्रयोग इत्यर्थः ॥ निष्ठाया इति ॥ क्तक्तवतूनिष्ठेति वचनाद्युक्त इत्यत्रत्यस्य क्तप्रत्ययस्येत्यर्थः ॥ ननु गीतानुसारेणादौ युक्तपदं व्याख्याय पश्चाद्योगीति पदं व्याख्येयं तत्कुतः क्रमोल्लंघनमित्यत आह ॥ वक्ष्यमाणेति ॥ एवंभूतो योगानुष्ठाता योगसंपूर्ण उच्यत इत्यनेनोत्तरत्र वक्ष्यमाणयोगीतागतयोर्योगियुक्तपदयोरन्वयस्तमपेक्ष्यादौ व्याख्यानकाले क्रमोल्लंघनं कृतमित्यर्थः॥विरुद्धार्थयोरिति॥इनेः क्तस्य च वर्तमानत्वातीतत्वार्थकत्वेन विरुद्धार्थत्वात्तद्वतोर्योगीयुक्तइत्येतयोः कथमेकार्थवाचित्वमित्यर्थः

कूटशब्दोऽनृतवाद्यादिवाची ॥ तत्परिग्रहे निर्विकारत्वं न लभ्यत इत्यत आह ॥कूटमिति ॥ एतैः शब्दैः आकाश उच्यत इत्यर्थः॥ युक्तो योगीतिपुनरुक्तिरिति मंदाशंकानिरासार्थमाह॥ योगीति ॥ इनेरस्त्यर्थत्वात् कुर्वन्नित्युक्तम् ॥ निष्ठाया भूतार्थत्वात्॥ संपूर्ण इति वक्ष्यमाणा

कूटमाकाशः कूटं खं विदलं व्योमसंधिराकाश उच्यते इत्यभिधानात्॥योगी योगं कुर्वन्॥युक्तो योगसंपूर्णः॥॥ एवंभूतो योगानुष्ठाता योगसंपूर्ण उच्यत इत्यर्थः ७ ॥८॥

न्वयापेक्षया क्रमोल्लंघनम् ॥ तर्हि विरुद्धार्थयोः कथं सामानाधिकरण्यमित्यत आह ॥ एवंभूत इति ॥

॥ रु॰ ॥ अनृतवाद्यादिवाचीति ॥ कूटं यंत्रेऽनृते राशौ निश्चले लोहमुद्गरे ॥ मायाद्रिशृंगयोः स्तुच्छे सीरावयवदंडयोः ॥ पुरद्वारे च शंसंतीति कोशात्कूटशब्दोऽनृतादिवाची ॥ ॥ ततोऽर्शआद्याचि अनृतवादी यंत्रवर इत्याद्यर्थवाचीत्यर्थः ॥ प्रत्ययार्थभेदान्न पुनरुक्तिरित्यत उक्तम् ॥ मंदेति ॥ ननु वर्तमानार्थलडादेशशत्रंतेन कुर्वन्नित्यनेनातथाभूतस्य योगीत्यस्य कथं व्याख्यानमित्यत आह॥ इनेरस्त्यर्थत्वादिति ॥ तदस्यास्त्यस्मिन्नित्यधिकृत्यातइनिठनाविति निरुक्तः॥ अस्तीत्यत्र च पुरुषवचने अविवक्षिते कालस्तु विवक्षित एव ॥ तथैव काशिकोक्तेः ॥ तथा चेनेरपि वर्तमानार्थत्वाद्युक्तं कुर्वन्नित्यनेन व्याख्यानमित्यर्थः ॥

॥श्री०॥ननु एवंभूत इति भाष्येण विरोधपरिहारः कथं जात इत्यत आह॥ धातुसंबंधे प्रत्यया इति सूत्रमिति॥ पाणिनिनेति शेषः॥एकस्यैव धात्वर्थसंबंधमात्र एव विरुद्धार्थकप्रत्यया यातो भवंति ॥ न तु तत्प्रत्ययार्थसमानकालत्वापि विवक्षिता ॥ अत एव महाभाष्ये सोमयाज्यस्य पुत्रो भवितेत्युदाहृतम ॥ तत्र यथा वर्तमानत्वभविष्यत्वार्थकयोरिति लुट्प्रत्यययोरेककालीनत्वाभावेऽपि धात्वर्थसंबंधमात्रेण तयोरुत्पत्तिमर्गोऽस्य सोमयाजी भवितेति सामानाधिकरण्येन विशेषणविशेष्यभाव एवमिहापि योगी युक्त इतीनिप्रत्ययक्तप्रत्ययार्थयोर्वर्तमानत्वातीतत्वयोरेककालीनत्वाभावेऽपि धात्वर्थसंबंधमात्रेण तयोरुत्पत्तिमर्गोऽस्य योगी युक्त इत्यनयोः सामानाधिकरण्येन विशेषणविशेष्यभाव उपपद्यत इति भावः ॥ तथा च प्रत्ययार्थो न विवक्षित इति हृदयम ॥ ७ ॥ ८ ॥ मध्ये लक्ष्यस्योक्त ॥ शीतोष्णत्यादिलक्षणमुक्त्वा सुहृदित्यादिना कांते युक्त इत्युच्यते योगीतिलक्ष्यं वाच्यं तद्विहाय शीतोष्णेतिलक्षणमुक्त्वाऽनंतरं मध्ये लक्ष्यमभिधाय पुनः सुहृदित्यादिनाऽस्य लक्षणपरत्वाभावः प्रतीयत एवेत्यर्थ ॥ स एव चेत्यत्र चकारस्य भिन्नक्रमेणान्वय इत्याशयेनाह ॥ साधुपापादिष्विति ॥

धातुसंबंधेप्रत्यया इति सूक्तं ॥ ७ ॥ ८ ॥ मध्येलक्ष्यस्योक्तत्वात् सुहृदित्यादिकं न योगारूढलक्षणमिति प्रतीतिनिरासायाह॥स एवेति॥

॥ स एव च सर्वस्माद्विशिष्यते ॥ साधुपापादिषु समबुद्धिः॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

साधुपापादिषुसमबुद्धिश्च स योगारूढ एवेति ॥ क०॥ ननु पाठक्रमायुक्त इति ॥ व्याख्याय योगीतिव्याख्येयम ॥ त कुतो व्यत्यास इत्यत आह ॥ वक्ष्यमाणान्वयेति ॥ एवंभूतोयोगानुष्ठातेत्यादिना वक्ष्यमाणेत्यर्थ ।विरुद्धार्थयोरिति ॥ इनिक्तप्रत्यययोर्वर्तमानत्वातीतत्वार्थकत्वेन विरुद्धार्थकत्वात्तदंतयो योगीयुक्तइत्येतयोरपि विरुद्धार्थत्वामिति बोध्यम ॥ नन्वेवमपि कथं विरोधपरिहार इत्यतआह ।धातुसंबंधेति ॥ धात्वर्थयोः संबंधे यत्र काले प्रत्यया उक्ताः ॥ ततोऽन्यत्रापि स्युरिति सूत्रार्थः ॥ यथा वसन्ददर्शेति ॥ अत्र वासदर्शनयोर्धात्वर्थयो संबंध ॥ ततोवसन्निति वर्तमाने लट ॥ ददर्शेति पुनःधात्वर्थेनोक्तदर्शनस्यातीतत्वेन तत्संबंधिवासस्याप्यतीतत्वात्किं तु भूतेलिट् ॥ एवंभूतार्थक्तप्रत्ययांतयुक्तपदोक्तयोगसंबंधे वर्तमानार्थेनिप्रत्ययस्य भूतार्थत्वम ॥ तेन न विरोध इति भाव ॥न च योगीतीनिस्तद्धितत्वात्तस्यच सूत्रप्रकृतिकत्वाभावं प्रकृतधात्वर्थयोः संबंध इति वाच्यंतयोपविश्यासने युंज्यादित्यत्र युजधातोरनुष्ठानार्थत्वम ॥ तथा योगीति योगशब्दादिनेर्युजधातोरप्यनुष्ठानार्थत्वेन प्रकृतेऽपि धात्वर्थसंबंधोपपत्ते ॥ न च क्तप्रत्ययानुरोधेनेर्भूतार्थत्वं कुतो वैपरीत्यं किं न स्यादिति वाच्यम ॥ लक्ष्यपदस्य विशेष्यतया प्राधान्येन तदृशेन लक्षणस्य नेतव्यत्वात ॥ न चोक्तसूत्रेण कृतमेवं विधानमिति वाच्यम ॥ तद्धितानामपि तथा विधानमिति काशिकादावुक्तत्वादिति ॥ ७ ॥ ८ ॥ मध्य इति ॥ युक्त इत्युच्यत इत्यत्रेत्यर्थ ॥ ननु लक्षणफलव्युत्पत्तिमुक्त्वा लक्षणाभिधानमयुक्तम ॥ कारणोक्त्यनंतरं फलोक्तेर्न्याय्यत्वादित्याशंकां परिहरन्मध्ये लक्ष्योक्तेः फलमाह ॥ साधुपापादिष्विति ॥

॥श्री०॥तथा च यः युक्त इत्युच्यते स योगारूढः साधुपापादिषु समबुद्धिश्चेत्येव न ।किं त्वित्येवमन्वयो द्रष्टव्यः॥विशिष्यते ॥इतरव्यावृत्तिरूपवैलक्षण्यवानित्यर्थः ॥पृथगन्वय इति ॥ अंत्ये लक्ष्याभिधानेनैकान्वये लक्षणफलव्यावृत्तिकथनपरस्य विशिष्यत इत्यस्यापि लक्षणवचनत्वं विज्ञायेत तन्मा विज्ञायीति मध्ये लक्ष्योक्त्या पृथगन्वयो द्रष्टव्य इति भावः ॥ सुहृदादिष्विस्यनुक्त्वा साधुपापादिष्वित्युक्तौ बीजमाह ॥ साधुत्वमिति ॥ धार्मित्व ॥ सद्धर्मवत्वं सज्जनत्वं मोक्षयोग्यत्वमिति यावत् ॥ एवं पापवत्वं दुर्जनत्वं तमोयोग्यत्वमिति यावत ॥ नियत मिति ॥ स्वरूपानुबंधीत्यर्थः ॥ अव्यवस्थितमिति ॥ सज्जनएवकेन चिन्निमित्तविशेषेणारिर्भवति तथा दुर्जन एव केनचिन्निमित्तविशेषेण सुहृद्भवतीति सुहृत्त्वादिकं सज्जनत्वादिवन्न स्वरूपानुबंधीत्यर्थः ॥ एष इति ॥ देह इत्यर्थः ॥ चतुर्थ्यर्कवचन मिदम ॥ चेतनाचेतनापिंडे ॥ चिदचित्संवलिते वस्तुनीत्यर्थः ॥ चित इत्युक्तामिति ॥ तच्च स्वरूपांतर्गतमित्याशयः ॥ जीवचित इत्यस्यार्थः ॥ सुहृदादिचैतन्यस्येति ॥ एकरूप्येणेत्यन्वयः ॥ परमात्मन इत्यस्याप्यैकरूप्येणेत्यन्वय ॥ तद्दर्शी ॥ उक्तप्रकारेणैकरूप्यदर्शी ॥ आद्यं प्रकारम् ॥ सुहृदादिचैतन्यस्यैकरूप्यप्रकारम ॥ विवृणोतीति ॥

न किं तु सर्वस्मादयोगिवर्गाद्विशिष्यत इत्येतदुक्तं पृथगन्वय इति भावः॥साधुत्वं धार्मित्वम्॥पापत्वं पापवत्त्वं च नियतं न तु सुहृत्त्वादिवदव्यवस्थितमित्यतः सुहृदादिष्वित्यनुक्त्वा साधुपापादिष्वित्युक्तम्॥समबुद्धित्वं नाम पूजादिसाम्यमित्यन्यथाप्रतीतिनिरासायाह॥जीवचित इति॥एष चेतनया युक्तो जीव इत्यभिधीयत इति चेतनाचेतनापिंडेजीवशब्दप्रयोगात् चितइत्युक्तम्॥सुहृदादिचैतन्यस्य तथा सर्वत्र सुहृदा

जीवचितः ॥ परमात्मनःसर्वस्य तन्निमित्तकत्वस्य च सर्वत्रैकरूप्येण ॥ चिद्रूपा एव हि जीवाः ॥

दिषु स्थितस्य परमात्मनः॥एवं सर्वत्र सुहृदादिषु स्थितस्य सुहृत्त्वादेः परमात्मनिमित्तकत्वस्य चैकरूप्येण कारणेन तद्दर्शीसमबुद्धिरित्यर्थः॥ तत्राद्यं प्रकारं विवृणोति॥चिद्रूपा एवेति॥मनुष्येषु यदेक एकं प्रति सुहृदित्यादि तत् न जीवस्वभावांतर्गतं किं तु चिद्रूपत्वादिकमेवेत्यर्थः॥

॥ कृ० ॥ पृथगन्वय इति ॥ मध्येलक्ष्योक्त्या पृथगन्वय इत्यर्थः अन्यथांत्यलक्ष्योक्तौ व्यावृत्तिपरस्य विशिष्यत ॥इत्यस्यालक्षणवचनत्वं विज्ञायेतेति भावः ॥ नियतमिति ॥ यो धर्मी स सर्वान्प्रत्यपि धर्म्येवेत्यादिरूपेण व्यवस्थितमित्यर्थः ॥ अव्यवस्थितमिति ॥ एकं प्रति सुहृद एवान्यं प्रत्यरित्वमित्यादिरूपेणाव्यवस्थितमित्यर्थः ॥ नन्वेवशब्देन सुहृत्त्वादिकं व्यावर्तितम् ॥ तन्न युक्तम ॥ चिद्विशिष्टदेहस्य सुहृदादित्वेन निरूपितत्वादित्यत आह ॥ मनुष्येष्विति ॥ जीवस्वभावांतर्गतमिति ॥ जीवात्यंताभिन्नमित्यर्थः ॥ चिद्रूपत्वादिकमिति ॥ आदिपदेन वक्ष्यमाणप्रमाणोक्तसर्वदोषवर्जितत्वसंग्रहः

१ अ० २९ श्लोक ७४

॥ श्री० ॥ सुहृदादिसर्वचैतन्यस्यानंदरूपत्वादिनैकरूप्यायोगादिति भाव ॥ नतु ॥ सुहृत्त्वादि ॥ बाह्यधर्मः ॥ स्वरूपाननुबंधीत्यर्थः अत्र केचित्स्वयूथ्याः ॥ मुक्तावशिष्यमाण मित्येतदनुसारात् ॥ मिश्राणामपि लिंगभंगमंगीकृत्य सुखदुःखाविर्भावरूपामुक्तिरस्तीत्यादि वर्णयंति ॥ तन्नतेषां मुक्त्यंगीकारे नित्यसंसारित्वप्रसिद्धिविरोधात् सृतियोग्याःसदैव हि ॥ चोष्कूयते विश इंद्रो मनुष्यान ॥ नित्यावर्तास्तु मध्यमाः ॥ त्रिदिवनिरयभूगोचरास्त्रित्यत्रश्रुतेः ॥ मुक्तिश्च द्विविधा सतेत्यादिनिरवकाशत्वहुमतगविरोधाच्च ॥ सज्जनानां विरजास्नाने नेतरेषां च वायुगदाप्रहारेण लिंगभंगस्य प्रमाणोक्तत्वेन मिश्राणां लिंगभंगस्याप्यप्रामाणिकस्य कल्प्यत्वाच्च ॥ इदं तु वाक्यं द्विविधमुक्तियोग्यसदसज्जीवसाहचर्यान्मिश्रेषु छत्रिन्या येनोपचारिततया व्याख्येयम् ॥ एवमेवंजातीयके सर्वत्रद्रष्टव्यमिति संप्रदायविदः॥ त्रिविधा इति ॥ त्रिविधा जीवसंघास्तु देवमानुषदानवाः ॥ तत्र देवा मुक्तियोग्या मानुषेषूत्तमास्तथा ॥ मध्यमा मानुषा ये तु सृतियोग्याः सदैव हि ॥ अधमानिरयायैवदानवास्तु तमोलया इति महाभारततात्पर्यनिर्णयोदाहृतभविष्यत्पर्ववचनादित्यर्थः ॥ आदिपदात् स्वभावतस्त्रिधा जीवा इत्यादिगीतातात्पर्योदाहृतवचनं ग्राह्यम् ॥ विषममनेकरूपम् ॥तर्हि विशेषः कीदृश इति पृच्छति ॥ किंत्विति ॥ उत्तरमाह ॥ देहेति ॥ वैषम्यम् ॥ सुहृदादिरूपम् ॥ स्वरूप एवारोप्येति ॥ स्वरूपानुबंधित्वेनेत्यर्थः ॥ विषमबुद्धित्वमिति॥स्वरूपत एवायं मुक्तियोग्य इत्यादिरूपम् ॥ लोकानामस्तितदस्य योगारूढस्य नास्तीत्यर्थः॥द्वितीय इति ॥ सुहृदादिषु स्थितस्य परमात्मन एकरूपत्वप्रकारः॥स्फुटइति ॥ विद्याविनयेत्यत्रछंदोकलापनिकासमये भगवत्पादैः पूर्वमेव विवृतोऽस्तीत्यत्र न विवृत इत्यर्थः ॥ तृतीयं॥ सुहृदादिपुरस्थितस्य सुहृत्त्वादेः परमात्मानिमित्तकत्वस्यैकरूप्यप्रकारमित्यर्थः ॥

तर्हि सुहृत्त्वादिधर्मः किमात्मकइत्यत आह ॥ विशेषस्त्विति ॥ अंतःकरणोपादानको बाह्यधर्मः ॥ एतदुक्तं भवति॥ मुक्तावशिष्यमाणं[1] यज्जीवरूपं तत्त्रिविधा जीवसंघा इत्यादिप्रमाणाद्विषममेव ॥ किं तु देहेंद्रियांतःकरणधर्मैः यद्वैषम्यं तत्तत्स्वरूप एवारोप्य विषमबुद्धित्वं यो

॥ विशेषस्त्वंतःकरणकृतः ॥ सर्वेषां साधुत्वादिकं सर्वमीश्वरकृतमेव ॥ स्वतो न किंचिदपि ॥

गारूढस्य नास्तीति ॥ द्वितीयः प्रकारः स्फुटः ॥ तृतीयं विवृणोति ॥ सर्वेषामिति ॥

ननु सदसन्मिश्रभेदेन जीवचितोऽनेकरूपत्वात्तदैकरूप्यदर्शित्वे योगारूढस्य भ्रांतत्वं स्यादित्यत आह ॥ एतदुक्तं भवतीति ॥ तथा च वैषम्यभ्रांत्यभावः समबुद्धित्वमिति भावः ॥ द्वितीयः प्रकार इति ॥ सर्वत्रस्थितः परमात्मा एकरूप इति द्वितीयः प्रकार इत्यर्थः ॥

---

१ मुक्तावशिष्यमाणमिति ॥

॥श्री०॥भाष्ये उक्तम् चैतत्सर्वमित्यत्राद्वितीयमेव सर्वशब्देन ग्राह्यम् ॥ दुर्जनाभिप्रायेणाह ॥एवमिति ॥ सुहृत्त्वादिगुणैर्विवर्जिता इत्यर्थः॥आगंतुकाइति ॥ अनित्यसुहृत्त्वादय इति शेषः किंतर्हीति ॥ यदि न स्वरूपांतर्गतास्तर्हि कथंभूता इत्यर्थः ॥ आगंतुका इत्युक्तमिति [illegible] तदागंतुकत्वं कथमिति प्रश्नाशयो द्रष्टव्यः ॥ एवंसुहृत्त्वादिगुणैरित्यादिविग्रहमित्युक्तत्वात्तदनुसारेणाह ॥ गुणाश्चेति ॥ स्वत एव [illegible] एव ह्यत इत्यत्रान्वयात् शब्देन [illegible] इत्याशयेनाह॥ अतएवेति ॥ प्रकारद्वयेनेति ॥ सर्वेषां चिद्रूपत्वेनैव साम्य सुहृत्त्वादिकंचौपाधिकमित्येक प्रकारः ॥ तस्य च सुहृत्त्वादेरीश्वराधीनत्वमपरः प्रकार इति प्रकारद्वयेनेत्यर्थः ॥ अथ प्रकारे वैषम्यभ्रांतिसंभवमित्येतद्व्याचष्टे ॥ यदात्मेति ॥ देहांतःकरणोपाधिकानसुहृत्त्वादीन् ॥ [illegible] सुहृत्त्वादीनामस्वरूपत्वाद्वितीयप्रकारेवैषम्यमित्येतद्व्याचष्टे ॥ यच्चेति ॥ कचित् ॥ सुहृत्त्वादौ ॥ उक्तस्यापवादमाहेति ॥ सर्वेति [illegible] युक्तस्यापवादमाहेत्यर्थः ॥ अपवादप्रकारं विवरणं योगे प्रवर्तमानं प्रतीत्यादि ॥ यत्सुहृत्त्वादिकं॥ मनुष्येष्विति शेषः ॥ स्वरूपवैषम्यकारणं स्वरूपतारतम्यज्ञापकम् ॥ न भवतीति ॥ निमित्तविशेषण[illegible]सुहृत्त्वादिप्राप्तेरित्यर्थः ॥ समीचीनक्षेत्रादावधिकारियोगाभ्यामेव प्रवर्तते तत्र स्वभावतो दृष्टा श्चेत्प्रतिबंधकं [illegible] ॥ [illegible] सुहृत्त्वंयोगिनाक्रियमाणेष्वपि सुहृत्त्वामितियावत्तत्तेषु स्वरूपोत्तमताज्ञापकं न भवतीति भावः ॥ नत्विति ॥योगिनप्रतिदेवादिषुयत्सुहृत्त्वादिकंयोगिनाप्रतिक्रियमाणसुहृत्त्वादिकमितियावत्तत्तेषुस्वरूपवैषम्यकारणंनभवतीतिनतु किंतु भवत्येवेत्यर्थः ॥ इत्यपवादमाहेत्यन्वयः

स्वतः स्वातंत्र्येणअत्र प्रमाणमाह ॥ उक्तं चेति॥स्वतः स्वरूपेण ॥ दोषैररित्वादिभिः ॥ एवंसुहृत्त्वादिगुणैरित्यपिग्राह्यम् ॥ आगंतुकधर्मा न स्वरूपांतर्गता इत्यर्थः ॥ किं तर्हि इत्यत आह ॥ तेषां त्विति ॥ दोषा गुणाश्च उपाधिरंतःकरणादिः सर्वसुहृत्त्वादिकम् ॥अतएव

उक्तं चैतत्सर्वम् ॥ स्वतः ॥ सर्वेऽपिचिद्रूपाः सर्वदोषविवर्जिताः॥ जीवास्तेषां तु ये दोषास्त उपाधिकृता ॥मताः ॥ सर्वे चेश्वरतस्तेषां न किंचित्स्वत एव तु॥समा एवं ह्यतः सर्वे वैषम्यंभ्रांतिसंभवम्॥

प्रकारद्वयेन यदनात्मधर्मानात्मस्वंतभोव्य वैषम्यम्॥ यच्च क्वचित् परमेश्वराधीनरूपत्वं तद्भ्रांतिप्रतीतम्॥ योगे प्रवर्तमानं प्रति यत्सुहृत्त्वादिकं तन्मनुष्येष्वेव स्वरूपवैषम्यकारणं न भवति ॥ न तु देवादिष्वित्युक्तस्यापवादमाह ॥

॥कृ०॥स्वभावत इति प्रतीति निरस्यति ॥ स्वातंत्र्येणेति ॥ प्रकारद्वयेनेति ॥ चिद्रूपा इति सर्वे चेश्वर इति च प्रकारद्वयेनेत्यर्थः ॥ न तु देवादिष्वित्युक्तस्येति ॥ उक्तस्य न तु देवादिष्वित्यपवादमाहेति योजना ॥

१ द्वितीयप्रकारोवेनेत्यर्थः॥२ प्रथमतृतीयप्रकारयोः॥

॥श्री०॥**अवधारण इति** ॥ तृतीया एव समा इत्यवधारण इत्यर्थः ॥ अवधारणार्थं व्यावृत्तिरूपम ॥ **योगिनं प्रतीति** ॥योगिना क्रियमाणदेवतादिषु सुहृत्त्वादिकमिति यावदित्यर्थः ॥सु हृत्त्वादिरित्यत्रादिपदेन मित्रत्वबंधुत्वग्रहणम ॥ **वक्ष्यमाणानि** ॥ गुणदोषौ मानवानामिति वक्ष्यमाणेत्यर्थः ॥ तथा च न केवल असुरादेर्दोषा नित्याः किं तु मानवानां गुणदोषौ च नित्याविति परस्परसमुच्चयार्थ इत्याशय ॥ **योगिना प्रतीति**॥ योगिना क्रियमाणमसुरेषु अग्नित्वादिकमिति यावत ॥ अग्नित्वाद्या इत्यत्रादिपदेनापकारित्वद्रोह्यत्वादिग्रहणम् ॥ ननु योगिनं प्रत्यरित्वमसुराणामप्रामाणिकमित्यत आह॥तथा चेति ॥ तत्र कामः कालनेमिरितिनात्पर्ये कामाभिमानिन. कालनेमिनो योगिनं प्रतिवैरित्वमुक्तमस्तीत्यवधेयम ॥ एकमात्रशब्दः केवलार्थः ॥ दैत्यारित्वमपि तेषां गुण एवेति द्रष्टव्यम ॥ असुरनिष्ठारित्वादिदोषाणां स्वाभाविकत्वे प्रमाणमाह ॥ **तथा चेति** ॥ तत्र कामः कालनेमिरिति वचनात् ॥ अत्र कामाभिमानि कालनेमिनामकासुरस्य वैरित्वेन तया योगिनं प्रत्यरित्वं तस्य स्वाभाविकमिति ज्ञायते ॥

एवमिति ॥ तुशब्दोऽवधारणे ॥ अवधारणार्थं विवृणोति ॥ विशेष इति ॥ विशेषो योगिनं प्रति सुहृत्त्वादिः॥ तदेव प्रपंचयति॥ असुरादेरिति ॥ तथा शब्दोवक्ष्यमाणसमुच्चये ॥ दोषा योगिनं प्रति अग्नित्वाद्याः ॥ तथा चोक्तम् ॥ विद्धयेनमिह वैरिणमिति॥गुणदोषौ सुहृत्त्वा

एवं समानजावास्तु विशेषो देवतादिषु ॥ स्वाभाविकस्तु नियमादत एव सनातनाः ॥ असुरादेस्तथा दोषाः नित्याः स्वाभाविका अपि गुणदोषौ मानवानां नित्यौ ॥ स्वाभाविकौ मतौ ॥ गुणैकमात्ररूपास्तु देवा एव सदा मता इति ब्राह्मे ॥

रित्वादी॥ अनागंतुकौ गुणैः सुहृत्त्वादिभिरेकमात्रंगुणैकमात्रं तथा च श्रुतिः ॥

॥ क०॥**तुशब्दोऽवधारण इति**॥तुशब्दस्तु विशेष स्यात्स्वामिन्हाविति अवधारण इत्यभिधानादिति भाव॥**वक्ष्यमाणेति**॥गुणदोषावित्यादिवक्ष्यमाणेत्यर्थः ॥ **तथाचोक्तमितिइदं** च तात्पर्य निर्णयमनुसृत्योक्तम ॥ तत्र कामशब्देन तदभिमानिकालनेमिग्रहणात् ॥ तेन गुणस्यारित्व कथमियं गमितिरुक्तेत्यपास्तम ॥ ननु स्वाभाविकत्वं स्वभावनिष्ठत्वं न च नित्यसंसारिषु गुणदोषयोस्तत्त्वंभवति ॥ तयोस्तत्स्वरूपत्वादित्यतः स्वाभाविकावित्येतद्व्याचष्टे ॥ **अनागतुकाविति** ॥देवत्वादेर्ब्रह्मसाक्षात्कारायनंतरमेवप्राप्तेर्देवादौ सुहृत्त्वादेर्विशिष्टस्वभावनिष्ठत्वं संभवतीतिन तत्र स्वाभाविकत्वं व्याख्यातम् ॥

॥ श्री० ॥ वैषम्यं भ्रांतिसंभवमित्येतत्सुहृदादौ विद्यमानस्य सुहृत्त्वादेरीश्वराधीनत्वज्ञानं भ्रांतिसंभवमिति व्याख्यानं तत्कुतः भ्रमैव किं न स्यादित्यत अव्याकृतब्राह्मणस्थं बृहदारण्यकवाक्यं प्रमाणयति ॥ यथा ह वै बहवः पशव इत्यादिकेति ॥ यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान् भुनक्ति एकस्मिन्नेव पशौ आदीयमाने प्रियं भवति किमु बहुषु तस्मादेषां तन्नप्रियं यदेतन्मनुष्या विद्युरित्येतं न कथं इत्यादिकेत्यादिपदेन ग्राह्यम् ॥ अत्र तत्त्वज्ञानी देवानां प्रियः भगवदितरदेवादिसमस्तप्रपंचस्य भगवदधीनत्ववेत्ता मनुष्यो देवानामप्रिय इत्युक्तत्वात् सुहृत्त्वादेर्भगवदधीनत्वज्ञानं भ्रान्तिरित्यवगम्यत इति द्रष्टव्यम् ॥ अक्षरार्थस्तु भाष्यभावबोधाभ्यामवगंतव्यः ॥ ननु समानामिति कथम् ॥ सर्वविश्वसमसीमित्यादीनां सर्वादीनि सर्वनामानीति सर्वनामसंज्ञायां आमि सर्वनाम्नः सुडिति सुडागमे अवर्णात्सर्वनाम्नः समशब्दात् परस्याम सुडागमे त्रित्वादादौ जाते समस आमिति जाते ॥ बहुवचनेझल्येत्॥ झलादौ बहुवचने परे अतोऽस्य एकारः स्यादिति सकारस्याकारस्य एत्वे सस्य षत्वे च समेषामिति स्यादित्यत आह ॥सर्वशब्देति ॥सामस्यार्थ इत्यर्थः॥साधारणार्थस्येति॥साधारणार्थकसमशब्दस्येत्यर्थः॥अत्रोदाहरणमाह॥समं इति॥औन्नत्यनिम्नत्वशून्ये समाने स्थल इत्यर्थः ॥तथा च सर्वनामसंज्ञाया अविवक्षितत्वात् समास्मिन्निति न जातमितिभावः ॥

यथा ह वै बहवःपशव इत्यादिका ॥ सुहृदित्यादिश्लोकस्य प्रतीत एवार्थः किंन स्यादित्यत आह ॥ न त्विति ॥ सर्वशब्दपर्यायस्य स

न तु साधुपापादीनां पूजादिसाम्यम्॥ तत्र दोषस्मृतेः॥ समानां विषमा पूजा विषमानां समा तथा ॥ क्रियते येन देवोऽपि स्वपदाद्भ्रश्यते पुमानिति ब्राह्मे ॥

मशब्दस्यैव सर्वनामसंज्ञा न साधारणार्थस्य समे देशे यजतीति तथा॥ नकेवलं समपूजायां दोषः किं तु विषमपूजाविधानं चास्तीत्याह ॥

॥ कृ० ॥ नचैवं नित्यसमास्त्वं ॥ तस्यानादित्वादिति ॥ गंगकेत्यस्य कर्मधारयत्वे पूर्वनिपातप्रसंगात्तृतीयातत्पुरुषमाह ॥ एकमात्रमभिन्नम् ॥ इत्यादिकेति ॥ यथा हवैबहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्ति त्यादिकं यथ. ॥ भुञ्ज्युरित्यंतर्णीतण्यर्थम ॥ एवं भुनक्तीत्यापि ॥ तथा चयथा गोः पुरुषभोजकत्वात्तत्प्रियत्वं तथा ज्ञानिनो देवभोजकत्वात्तत्प्रियत्वमिति श्रुतावकुत्त्वादेवानां सुहृत्त्वादिकं युक्तमिति भावः ॥ साधारणार्थस्येति ॥ तुल्यपर्यायस्येत्यर्थः ॥ समे यजतीति॥ अन्यथा सर्वनामत्वात्समस्मिन्निति स्यादितिभावः ॥ उपलक्षणं चैतत ॥ यथासंख्यमनुदेशः समानामित्युदाहार्यं ॥

१ अध्याय २ ब्राह्मण ॥ ४ खंड १० ब्रह्म वा इदमग्र आसीत्तदात्मानमेववेदाहं ब्रह्मास्मीत्युपक्रम्य २ स न यथा बहवः गोरूपाः पशवो मनुष्यंपयआदिना भोजयेयुः एवमेकैको ज्ञानी पुरुषो देवान्भोजयति ॥ यस्माल्लोके एकस्मिन्भोजके पशावादीयमाने प्रियंभवति किमुतबहुषु तस्माद्बहुगोरूपज्ञानिनि देवानां पराप्रीतिर्भवति ॥ इति किमुतवक्तव्यमिति भावः ॥ तस्मान्मनुष्याविष्णोरन्यांदेवतां उपासीरन्निति यदेतद्विष्णवान्यदेवतोपासनं तद्देवानांन प्रियमिति द्रष्टव्यं ॥

॥ श्री० ॥ बंधुत्वमिति ॥ धर्मिग्रहणे वित्तवयःकर्मविद्यारूपधर्मप्रायपाठविरोधःस्यादिति भावः ॥ मान्यानां स्थानानीत्यन्यथाप्रतीतेराह ॥ मान्यानि चेति ॥ वित्तबंधुत्वादेर्धर्मस्यमान्यस्थानत्वाभावादाह ॥ वित्तादीनि ॥ उक्तप्रकारत्रयेण ॥ जीवाचित इत्युक्तप्रकारेण वैषम्यं ददातीति भाष्येणान्वयः॥तस्यैव ॥ वैषम्यस्यैव ॥ तथा चायं प्रमाणार्थः ॥ गुणानुसारिणीं पूजाम ॥ उक्तप्रकारत्रयेण समां दृष्टिं सर्वभूतेषु यो नरः कुरुते तस्य विष्णुः प्रसीदति न केवलं विष्णुप्रसादः फलं किं तु तदतिरिक्तं चास्तीत्युच्यते ॥ वैषम्यमिति ॥ यच्छब्दश्रवणात्तच्छब्दाध्याहारः ॥ तथा च या विषमा पूजा सा नरसंचयान्नरसमूहात् पूजकस्य वैषम्यम् ॥ इतरापेक्षया वैलक्षण्यं ददाति ॥ तं यथा यथोपासते इत्यादिश्रुतेः ॥

वित्तमिति ॥ बंधुरिति बंधुत्वं मान्यानि च तानि स्थानानि चवित्तादिशब्दैः तद्वंत उपलक्ष्यंते ॥ दृष्टिरेवोक्तप्रकारत्रयेण समा कार्या पूजा तु

वित्तं बंधुर्वयः कर्म विद्या चैव तु पंचमी ॥ एतानि मान्यस्थानानि गरीयोह्युत्तरोत्तरमिति मानवे ॥ गुणानुसारिणीं पूजां समां दृष्टिं च यो नरः ॥ सर्वभूतेषु कुरुते तस्य विष्णुः प्रसीदति ॥ वैषम्यमुत्तमत्वं तु ददाति नरसंचयात् ॥ पूजाया विषमा दृष्टिः समा साम्यं विदुःखजमितिब्रह्मवैवर्ते ॥

विषमैवेत्यत्र प्रमाणांतरमाह ॥ गुणेति ॥ या विषमा पूजासा वैषम्यम् ॥

॥ कृ० ॥ ननु पूर्वं पश्चाच्च धर्माणामेवोक्तत्वाद्बंधुरित्यस्य प्रायः पाठविरोधइत्यत आह ॥ बंधुत्वमिति ॥ यद्वा गरीयोयद्यदुत्तरमित्युत्तरवाक्ये परामर्शार्थं बंधुपदेनविशिष्टवैशिष्ट्यावगाहिबोध एवोत्पाद्यः ॥ तदर्थं बंधुपदेन बंधुत्वं लक्ष्यत इत्यतआह ॥ बंधुरिति ॥ बंधुत्वमिति ॥ ननु मान्यस्थानानीत्यत्र षष्ठीतत्पुरुषो वा ॥ बहुव्रीहिर्वा ॥ द्वंद्वो वा ॥ आद्येपि मान्यशब्दो भावे कर्मणि वा ण्यप्रत्ययांतः ॥ तत्र यदि स्थानशब्दो निग्रहस्थानमिति वन्निमित्तवाची तदा पूजानिमित्तानीति वा ॥ पूज्यनिमित्तानीतिवाऽर्थः स्यात् ॥ एवंस्थानशब्दस्याधिकरणार्थत्वेऽपिपूजाधिकरणानीति वा पूज्याधिकरणानीति वार्थः स्यात् ॥ सर्वत्र विषमपूजाविधायकत्वाभावादसंगतोऽयंश्लोकः स्यात् ॥ एतेन बहुव्रीहिद्वंद्वपक्षावपि निरस्तौ प्रकृतासंगतत्वादित्यत आह॥ मान्यानि च तानीति ॥ तथा च स्थानशब्दोऽधिकरणार्थः॥मान्यशब्दस्तु कर्मणि ण्यप्रत्ययांतो ण्यप्रत्ययश्च कृत्यप्रत्ययत्वाद्विधायकश्च भवतीति श्लोकोदाहरणं संगतमिति भावः ॥ केचित्तु मान्यस्थानानीति मान्यशब्दो भावप्रधानः॥ तत्पुरुषश्च समासः॥ एवं च बंधोः पूजानिमित्तत्वाभावाद्भावप्रधानो बंधुशब्द इत्याह ॥ बंधुत्वमिति ॥ एवंवित्तादिग्रहणस्वारस्यार्थं मान्यस्थानानीति ॥ तत्पुरुषमभिप्रेत्य बंधुशब्दो व्याख्यातोऽधुना बंधुशब्दस्वारस्याय कर्मधारयमाह॥ मान्यानि चतानीति ॥ अस्मिंश्चपक्षेवित्तादिशब्दैरित्यग्रिमवाक्यम् ॥ बंधुशब्दव्यतिरिक्तैरिति ॥ व्याख्येयमित्याहुः ॥

॥ श्री० ॥ ननु गोमहिषयोर्वैषम्यमस्तीत्युक्ते गवि महिष्यपेक्षयोत्तमत्वरूपं महिष्यां चाधमत्वरूपं वैषम्यं यथा प्रतीयते तथेह वैषम्यं ददातीत्युक्ते किमितरापेक्षयोत्तमत्वमधमत्वरूपं वेति शंकायां तस्य वैषम्यस्य व्याख्यानं क्रियते नगसंनयादुत्तमत्वं ददातीति ॥ तथा या समा दृष्टिः सा विदुःखं दुःखाभावो जायते यस्मात्तद्विदुःखजं विदुःखत्वनिमित्तं यत्साम्यं तदस्य द्रष्टुर्ददाति साम्यप्राप्तौ दुःखाभावप्रसिद्धेरिति॥ननु सुहृदादिष्विति समबुद्धित्वव्याख्यानं समबुद्धित्वव्याख्यानप्रकरण एव न तु साधुरापादीनामित्यतः पूर्वमेवेत्यत आह ॥एतादिति॥एतत्समबुद्धित्वव्याख्यानं सुहृदादिष्वित्यादिना क्रियमाणमित्यर्थः ॥ पूर्वतनं तु योगारूढविषय इदं तु सर्वसाधारणं अतस्तत्रैव नोक्तमित्याशयः ॥ तथा चास्मिन्पक्षे युक्त इत्युच्यते योगीतिलक्ष्योक्त्या योगारूढलक्षणनिरूपणं समाप्तं सुहृदित्यादिना तु साम्यबुद्धिः सर्वेषामपेक्षितेति प्रसंगादुच्यत इत्यवधेयम ॥ नन्वेतत्कुतो न योगारूढविषयं सोऽपि सुहृत्सु शास्त्रोक्तपूजां करोत्येवेति चेत्तत्राह ॥ न हीति ॥ अत एव भाष्ये सुहृदादिष्विति पूजादीति चादिपदं प्रयुक्तमिति भावः ॥ ननु सोऽप्यांतरेषु कामादिरूपारिषु वधादिरूपापकारं करोत्येवेत्यत उक्तम् ॥ लौकिकेष्विति ॥

तस्यैव व्याख्यानमुत्तमत्वम् ॥ साम्यं ददाति ॥ विदुःखत्वनिमित्तम् ॥ समबुद्धित्वं प्रकारांतरेण व्याचष्टे ॥ सुहृदादिष्विति ॥ एतन्नयो

सुहृदादिषु शास्त्रोक्तपूजादिकृतिः ॥ अन्यूनानधिकाया साऽपि संमता ॥ तदप्याहुः॥यथासुहृत्सु कर्तव्यं पितृशत्रुसुतेषु च॥तथा करोति पूजादिसमबुद्धिः स उच्यत इति गारुडे ॥

गारूढविषयमिति तत्रैव नोक्तम् ॥न हि योगारूढो लौकिकेष्वरिष्वपकारंकरोति करोति यः ॥

॥ कृ० ॥ ननु मान्यत्वं पूज्यत्वम् ॥ न च वित्तादीनामदस्ति विद्याकर्मवयोबंधुर्वित्तैर्मान्या यथाक्रममित्युक्तेर्न तेषां पूजाप्रयोजकत्वादित्यत आह ॥ वित्तादिशब्दैरिति ॥ एवं साति बंधुपदस्य लक्षितलक्षणेति प्राप्तम् ॥ न च तद्युक्तम् ॥ वचनतृचस्यैवार्थप्रतीतौ लक्षणा दोष इति चेत् ॥ उच्यते गरीयो यदुत्तरमित्यत्र बंधुत्वेन रूपेण बंधुत्वमनूद्य तस्य गरीयस्त्वं विधीयत इति वक्तव्यम् ॥ उद्देश्यतावच्छेदकरूपेणोपस्थित एव धर्मिणि विधेयान्वयप्रतीतिनियमात् ॥ बंधुत्वेन बंधुत्वानुवादश्च तथाविधपूर्वावादपूर्वकः ॥ तदर्थं लक्षितलक्षणा युक्तैव ॥ एवं च विशिष्टवैशिष्ट्यावगाहिबोधोदयान्न कश्चिद्दोषः ॥ तस्यैव व्याख्यानमिति ॥ अनेन वैषम्यमितिद्वितीयांतमिति भणितम् साम्यमित्येतद्ददातीत्यनेनानुवृत्तेन संबध्यत इत्याह ॥२२३॥
॥ साम्यं ददातीति ॥ समबुद्धिः स उच्यत इत्यत्र तच्छब्दश्रवणात्करोतीत्यतः परं यच्छब्दमध्याहरति ॥ करोति य इति ॥

॥श्री०॥वाहेोरित्यर्थः ॥सुहृदादिष्विति भाष्यस्य सुहृदादिषु न न्यूनाधिका योग्यतानुसारिणी या शास्त्रोक्तपूजादिकृतिः साऽपि साम्यशब्दार्थत्वेन संमता न केवलं जीवन्नित इत्याद्युक्तरू पेत्यर्थः ॥ यथेतिप्रमाणस्य सुहृत्सुपूजादि यथा कर्तव्यं पितृशत्रुसुतेषु यथा कर्तव्यमिति वर्तने तथा तदनुसारेण यः करोति स समबुद्धिरुच्यत इत्यर्थः॥ नितरामपेक्षयेत्यन्यथाप्रतीतेराह ॥ अनपेक्षयेति ॥ यद्वा नन्वपेक्षाया अभावो निरपेक्षमिति स्यान्निर्मक्षिकमितिवदत आह ॥ अनपेक्षयेति ॥ तथा च नार्थाभावेऽव्ययमिदं किं तु नञ्समास इत्याशयः ॥ भाष्ये कर्तव्यमित्यस्य तत्तत्काले कर्तव्यत्वेन प्रसक्तमुपकारमपकारं चेत्युभयमपि यः करोति स मध्यस्थ इत्यर्थः ॥ यद्वोभयमपि कर्तव्यमिति ज्ञात्वा तदुभयं यः करोतीत्यर्थः ॥ तत्र उपक्रिय माणादिति ॥ तथा च उपक्रियमाणात् पुरुषात् उपकारमनपेक्ष्योपकारकृद्यः स सुहृदित्यन्वयो द्रष्टव्यः ॥ भाष्ये ॥ कार्यमात्रेति ॥ उपकारापकाररूपसमस्तकार्यकारीत्यर्थः न त्वात्र तत्कृतानुरूप मध्यस्थ इति तात्पर्यविरोधस्तस्य व्याख्यानांतरत्वादिति ध्येयम् ॥ ९ ॥

सुहृन्मित्रशब्दयोररिद्वेष्यशब्दयोरुदासीनमध्यस्थशब्दयोश्चार्थभेदो न प्रतीयते अत आह ॥ प्रत्युपकारेति ॥ निरपेक्षयाऽनपेक्षया ॥ अवा

प्रत्युपकारनिरपेक्षयोपकारकृत्सुहृत्क्लेशस्थानं निरूप्य यो रक्षांकरोति समित्रम् ॥ अरिर्वधादिकर्ता ॥कर्तव्ये उपकारे अपकारे च यदास्तेसउदासीनः॥कर्तव्यमुभयमपि यः करोति स मध्यमः॥अवासितकृ द्द्वेष्यः॥आह चैतत् ॥ द्वेष्योऽवासितकृत्कार्यमात्रकारीतुमध्यमः ॥ प्रियकृत्प्रियोनिरूप्यापि क्लेशंयः प रिरक्षति॥स मित्रमुपकारं तु अनपेक्ष्योपकारकृत् ॥ यस्ततः स सुहृत्प्रोक्तः शत्रुश्चापिवधादिति ॥ ९ ॥

सितमप्रियंततः उपक्रियमाणात् ॥ ९ ॥

॥ कृ० ॥ नन्वर्थाभावेऽव्ययीभावत्वेऽमादेशप्रसंगाननिरपेक्षयेत्यनुपपन्नमित्याशंक्य निर्गतापेक्षा निरपेक्षेति प्रादिसमासोयम् ॥ अभावप्रधानकबोधश्च लक्षणयेति भावेन व्याख्याति ॥ अनपेक्षयेति ॥ अवासितमप्रियमिति ॥ यद्यवासित सुरभीकृतमिति विश्वकोशः तथापि सुरभीकृतं प्रियं भवतीत्युपचारेणैवं व्याख्यातम् ॥ ९ ॥

॥ श्री० ॥ ननु प्रकारे वक्तव्ये विध्यनुवादो व्यर्थ इत्यत आह ॥ प्रकारेति ॥ युंजीतेति यत् तदेकाकीत्यादिप्रकारेणेति प्रकारकथनाय विध्यनुवाद इत्यर्थः ॥ सामान्यशब्दोऽपीति ॥ युंजीतेतिसामान्यतो योगोक्तिपरोपीत्यर्थः ॥ प्रकरणेति ॥ समाधियोगप्रकरणेत्यर्थः ॥ १० ॥ ११ ॥ स्थानेति ॥ योगं समाधियोगमित्येवोक्तौ युंजतो योगमात्मन इत्युत्तरत्रापि योगशब्दश्रवणाद्व्याख्यानमिदामिति प्रतीतिः स्यात्तथा चोत्तरत्र पुनस्तव्द्याख्यानं व्यर्थं स्यादतस्तांनिवारयितुं उपविश्यासने युंज्यादित्यत्रत्ययोगशब्दव्याख्यानमिदामिति सूचनाय युंज्यादित्युक्तमित्यर्थः ॥ ननु तर्हि युंज्यादित्यनेनैव योगं कुर्यादित्यर्थस्य लब्धत्वाद्योगमिति व्यर्थमित्यतो युंज्यादित्यस्यार्थ माह ॥ कुर्यादिनीति ॥१२ ॥ १३ ॥ १४ ॥

ननूद्धरेदित्यनेनैव योगो विहितः ॥ तर्किं पुनर्विधीयत इत्यत आह ॥ समाधीति ॥ प्रकारकथनाय विध्यनुवाद इत्यर्थः ॥ युंजीतेति योग मात्रमुच्यते तत्कथं समाधीत्युक्तमित्यत आह ॥ युंजीनेति॥ सामान्यशब्दोऽपि प्रकरणाद्विशेषेवनिष्ठतइत्यर्थः॥ आतमशब्दस्यात्र विवक्षित

समाधियोगप्रकारमाह ॥ योगी युंजीत ॥ समाधियोगयुक्तं कुर्यात् ॥ आत्मानं मनः ॥ १० ॥ ११ ॥

योगी युंजीतसततमात्मानं रहसि स्थितः॥ एकाकी यतचितात्मा निराशीरपरिग्रहः ॥ १० ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ नात्युच्छ्रितंनातिनीचं चैलाजिनकुशोत्तरम् ॥ ११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ॥ उपविश्यासने युंज्याद्योगमात्मविशुद्धये ॥ १२ ॥
समंकायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥
प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४॥

॥ योगं समाधियोगं युंज्यात् ॥ १२ ॥ १३ ॥ १४ ॥

मर्थमाह ॥ आत्मानमिति ॥ १० ॥ ११ ॥ उपविश्यासन इत्यत्रापि योगशब्द एवमेव व्याख्येय इत्याह ॥ योगमिति ॥ स्थानविवेकार्थं युंज्यादित्युक्तं कुर्यादिति यावत् ॥ १२ ॥ १३ ॥ १४ ॥

॥ प्रकारकथनायेति ॥ आसनाद्यंगकथनायेत्यर्थः ॥ प्रकरणादिति ॥ समाधिप्रकरणादित्यर्थः ॥ १० ॥ ११ ॥ स्थानविवेकार्थमिति ॥ योगमात्मविशुद्धय इति योगपदमे वात्र व्याख्येयम्॥न तु युंजतो योगमात्मन इति योगपदमिति ज्ञापनार्थमित्यर्थः ॥ न च योगपदव्याख्यानानंतरंशांत्यादिपदव्याख्यानादेव तद्व्याख्यातिर्ज्ञास्यत इति वाच्यम् ॥ अंतरंग ज्ञापकाभावे सत्येव बहिरंगस्यानुसर्तव्यत्वादिति भावः ॥ ननु युंज्यादित्यनेनैव योगं कुर्यादित्यर्थलाभाद्योगमिति व्यर्थमित्यतआह ॥ कुर्यादिति ॥ यावदिति ॥ १२ ॥ १३ ॥१४॥

॥ श्री० ॥ भाष्ये निर्वाणशब्दतात्पर्य ॥ शरीरत्यागेति ॥ परे उत्तरकाले मीयेत इति निर्वचनमभिप्रेत्य परमशब्दतात्पर्यमुत्तरकालीनमितीति द्रष्टव्यम् ॥ नजीवन्मुक्तीति ॥ शांतिमधिगच्छतीत्युक्ते जीवन्मुक्तेरपि मोक्षपर्यायशांतिशब्देन प्राप्त्या तामधिगच्छतीत्युक्तं स्यात्तदर्थमिदं विशेषणमिति भावः ॥ जीवन्मुक्तौ तु शरीरस्य सत्त्वेन तस्याः निर्वाणपरमत्वाभावादिति द्रष्टव्यम् ॥ ननु शांतिशब्देनेंद्रियोपशांतिर्गृह्यते न मोक्षः येन जीवन्मुक्तिनिरासाय निर्वाणपरमामितिविशेषणं युक्तं स्यादित्यत आह ॥ उपशांतेरिति ॥ विषयेभ्य इंद्रियाणामुपशांतेरित्यर्थः ॥ अतो न शांतिशब्देन तद्ग्रहणं युक्तमिति भावः ॥ १५ ॥ सर्वविषय इति ॥ शक्ताशक्तविषय इत्यर्थः ॥ तद्विधानात ॥ अनशनादिविधानादित्यर्थः ॥ १६ ॥

ननुशांतिर्निर्वाणामिति मोक्षपर्यायौ ॥ तत्कथं शांतेर्निर्वाणपरमत्वमित्यत आह ॥निर्वाणेति ॥ न जीवन्मुक्तिमात्रमित्यर्थः ॥ उपशांतेर्योगकारणत्वात् योगफलत्वमनुपपन्नम् ॥ १५ ॥ नचैकांतमनश्नतः जाग्रतो नैव चेति युंजानस्यानशनजागरणनिषेधः क्रियते स सर्वविषय इ

निर्वाणपरमां शरीरत्यागोत्तरकालीनाम् ॥ १५ ॥ अनशनादिनिषेधोऽशक्तस्य ॥ उक्तं हि निद्राशनभय

युंजन्नेवंसदाऽत्मानं योगी नियतमानसः ॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ॥ नचातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

॥श्वासचेष्टातंद्रादिवर्जनम् ॥ कृत्वाऽनिमीलिताक्षस्तु शक्तो ध्यायन्प्रसीदतीति ॥ नारदीये ॥ १६ ॥

तिप्रतीतिनिरासायार्थमाह ॥ अनशनादीति ॥ कुत इत्यतः शक्तस्य तद्विधानादित्याह ॥ उक्तं हीति ॥ आनिमीलिताक्ष इषन्निमीलिताक्षः शक्तस्त्विति संबंधः ॥ १६ ॥

॥कृ० ॥मोक्षपर्यायाविति ॥ शांतिर्मोक्षोऽथनिर्वाणमित्युक्तेरिति भावः ॥ ननु निर्वाणपरमामिति विशेषणं व्यर्थमित्याशंक्याह ॥ न जीवन्मुक्तीति ॥ न जीवन्मुक्तिमात्रंप्राप्नोतीति ज्ञापयितुमेतद्विशेषणमित्यर्थः ॥ एतच्च विशेषणोपादानसामर्थ्यादेव लभ्यत इति ज्ञातव्यम् ॥ ननु शांतिपदेनोपशांतिरेवोच्यतामित्यत आह ॥ उपशांतेरिति ॥ स्वत एव प्रायो मनसो विषयागतोरित्यर्थः ॥ योगकारणत्वादिति ॥ प्रशांतस्य परमात्मा समाहित इति तयोः कार्यकारणभावोक्तारिति भावः ॥१५॥ निमीलिताक्ष इतियोजनायां संप्रेक्ष्य नासिकाग्रमिति गीताविरोधइत्यत आह ॥ आनिमीलिताक्ष इति ॥ १६ ॥

---

१ वबयोरभेदात् वाणशब्दस्यशरीरवाचित्वादितिभावः २ माङ् माने इति धातो ज्ञायेत इत्यर्थः ॥ लिंगशरीरभंगोत्तरकालीनज्ञेया शांतिर्मुख्यएव मोक्ष इति भावः

॥ श्री० ॥ समाधिसाहित्यरूपं सोपायत्वं युक्तशब्दार्थ इत्येतदुपपादयति ॥ समाधिर्हीति ॥ धात्वर्थः ॥ युजधात्वर्थः ॥ युज समाधाविति धातोरित्यर्थः ॥ तद्धता ॥ समाधिमत्त्व प्रत्ययार्थः ॥ कर्तरि प्राप्तक्तप्रत्ययार्थः ॥ युज अस्मात् कर्तरि क्तप्रत्यये ककारलोपे चो कुरिति जकारस्य गकारे खरिचेति गकारस्य ककाररूपे चरि युक्त इति रूपं द्रष्टव्यम् अत इति ॥ समाधिमत्त्वस्य युक्तशब्दार्थत्वादित्यर्थः ॥ इंद्रियाणां विषयेषु स्वोत्कृष्टताइंद्रियोत्सेकशब्दार्थ ॥ उपायेन ॥ समाधिना ॥ तदविरोधित्वम् ॥ समाध्यविरोधित्वम् ॥ एवं भूतामिति ॥ श्रमाद्यभावसंपादकमाहारादिकमेव समाध्यविरोधीत्यर्थ ॥ १७ ॥ अन्यथेति ॥ तथात्वे स्वस्यैव ध्येयत्वप्राप्त्या मोक्षारं यज्ञतपसामित्यत्र ज्ञात्वा मामिति स्वस्यैव यद्ध्ये यत्वमुक्तं तद्विरोधः स्यादित्यर्थः ॥ १८ ॥ अन्ययेति ॥ योगिन आत्मन इत्यन्वयांगीकार इत्यर्थः ॥ १९ ॥

आहारादीनां केन युक्तत्वमित्यत आह ॥ युक्तेति ॥ उपायः समाधिः ॥ समाधिर्हि धात्वर्थः ॥ तद्वत्ता च प्रत्ययार्थः ॥ अतः सोपायेत्युक्तम् ॥ आहारादेः सोपायत्वं नाम कीदृशमित्यत आह ॥ यावतेति ॥ आदिपदेनेंद्रियोत्सेकाऽलस्यादेः सग्रहः ॥ उपायेन साहित्यं नाम तदविरोधित्वम् ॥ तच्चैवंभूतमित्यर्थः ॥ १७॥ आत्मन्येवावतिष्ठत इत्यत्र स्वस्मिन्नेवेतिप्रतीतिनिरासायाह ॥ आत्मनीति॥ अन्यथा ज्ञात्वा

युक्ताहारविहारस्य सोपायाहारादेः ॥ यावता श्रमाद्यभावो भवति ॥ तावदाहारादेरित्यर्थः ॥ १७ ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥ निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥
यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः॥ १९ ॥

आत्मनि भवति ॥ १८ ॥ आत्मनो भगवद्विषयंयोगम् ॥१९

मामित्यादिविरोधः ॥ १८ ॥ युंजतो योगमात्मन इत्यत्रात्मशब्दस्य पष्ठ्याश्च विवक्षितमर्थमाह ॥ आत्मन इति ॥ योगिन आत्मन इति अन्वयनिरासाय योगमित्युक्तम् ॥ अन्यथावैयर्थ्यात् ॥ १९ ॥

॥ रु० ॥ धात्वर्थ इति ॥ युज समाधावित्युक्तेर्युजिधात्वर्थ इत्यर्थः ॥ तद्वत्ता च प्रत्ययार्थ इति ॥ यद्यपि गत्यर्थाकर्मकेति कर्तरि क्तप्रत्ययविधानात्कर्ता प्रत्ययार्थ इति वक्तव्यम् ॥ तथाऽपि फलितमभिप्रेत्य तद्वत्तेत्युक्तम् ॥ १७ ॥ १८ ॥ अन्यथेति ॥ योगिन आत्मन इत्यन्वये आत्मशब्दवैयर्थ्यं स्यात् ॥ योगिन आत्मत्वाव्यभिचारादित्यर्थः ॥१९

॥श्री०॥पदत्रयमिति ॥ तृतीयांतं सप्तम्यंतं द्वितीयांतं चात्मपदमित्यर्थः ॥ ननु गीतानुसारेण तृतीयांतात्मशब्दव्याख्यानानंतरं द्वितीयांतात्मशब्दं व्याख्यायानंतरं सप्तम्यंतात्मशब्दो व्याख्ये यस्तत्कुतो व्युत्क्रमेण व्याख्यानमित्यत आह ॥ अन्वयेति ॥ आत्मना आत्मनि आत्मानं पश्यन्नित्यन्वयस्य विवक्षितत्वेन तदपेक्षयैवं व्युत्क्रमेण व्याख्यानमिति भावः ॥ स्थानेति ॥ आत्मन्येव वशं नयेदित्यत्रत्यसप्तम्यंतात्मशब्दव्याख्यानमिदं नेति सूचयितुं व्याख्येयात्मशब्दस्थानविवेकाय पश्यन्नित्युक्तमित्यर्थः ॥ २० ॥ तत्त्वत इति ॥ तस्य भावस्तत्त्वं तस्मात्तत्त्व त इत्यर्थमभिप्रेत्य तद्भावादित्युक्तं तस्याप्यर्थमाह ॥ ब्रह्मत्वादिति ॥ न चलतीत्यर्थः ॥ २१ ॥ २२ ॥ ननु कथमयमर्थो लभ्यत इत्यत आह ॥ करणेपीति ॥ वियुज्यतेऽनेनेति वियोग इत्यर्थः ॥ तथा च निर्विकार ॥ यजयोगेऽस्मादल्पश्चोति सूत्रेण हलंतेभ्यो भावस्य करणेऽधिकरणे च संज्ञायां घञ्प्रत्ययविधानात् प्रकृते च वियोगशब्दस्य निवारणार्थकत्वेन संज्ञात्वात् करणे घञ्प्रत्ययेऽकारमात्र विहाय सर्वस्यापि लोपे उकारस्यौकाररूपे गुणे सौ कुरिति जकारस्य गकाररूपे कुत्वे प्रत्ययाकारमिलिते सति वियोगेतिकरणव्युत्पन्नः शब्दो द्रष्टव्यः॥

यत्र चैवात्मनेत्यत्र पदत्रयं व्याख्याति ॥ आत्मनेति ॥ अन्वयापेक्षया व्युत्क्रमः ॥ पश्यन्निति स्थानविवेकार्थमुक्तम् ॥ २० ॥ तत्त्वतस्तद्भावात् ब्रह्मत्वादिति प्रमाणविरुद्धं व्याख्यानं व्यावर्तयितुमाह ॥ तत्त्वतइति ॥ २१ ॥ २२ ॥ ननुदुःखसंबंधस्य वियोगो ध्वंसः स कथं योगः

आत्मना मनसा ॥ आत्मनि देहे ॥ आत्मानं भगवंतं पश्यन् ॥ २०॥ तत्त्वतो भगवद्रूपात् ॥ २१॥२२॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥
सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

दुःखसंयोगो येन वियुज्यते स दुःखसंयोगवियोगः ॥

स्यादित्यत आह ॥ दुःखेति ॥ करणेऽपि घञः स्मरणात् ॥ ॥ २० ॥ स्थानविवेकार्थमिति ॥ यत्र चैवात्मनेति तृतीयांतपदव्याख्यानानंतरं द्वितीयांतसप्तम्यंत योर्व्युत्क्रमेण व्याख्यानकरणादात्मन्येव वशं नयेदित्यत्रैवं सदाऽऽत्मानमित्युत्तरवाक्यगतात्मशब्दयोर्व्याख्यानमितिप्रतीतिः स्यात्तद्व्यावृत्त्यर्थमित्यर्थः ॥२०॥२१ ॥२२॥ करणेऽपीति ॥

॥ श्री०॥ ननु वियोगशब्दस्य निवारणार्थकत्वाभावेन निवारयतीति कथं वियोगशब्दार्थकथनमित्यत आह ॥ वियोगशब्दइति ॥ ननु दुःखोत्पत्तिप्रतिबंधकत्वरूपोऽर्थो [illegible] नकथं लभ्यत इत्यत आह ॥ एतच्चेति ॥ पदेति ॥ संयोगपदेनेत्यर्थः ॥ व्यर्थंसत् किंचिज्ज्ञापयतीतिन्यायादिति भावः ॥ अयोगेति ॥ योक्तव्यत्वायोग इत्यर्थः ॥ बुभूषुणेति ॥ तथा च बुभूषौ योक्तव्यत्वायोगो व्यवच्छिद्यत इत्युक्तं भवतीति द्रष्टव्यम ॥ अत्र सर्वत्राप्यनतिविप्रकर्षाभिप्रायेणापरोक्षज्ञानिन एव विवक्षितत्वात् तस्य च ज्ञानित्वं तद्रूपत्वभूषत्वाभा वादाह ॥ मुमुक्षुणेति ॥ तथा च योगशब्देनतत्साध्यो मोक्षो लक्ष्यत इति भावः ॥ २३ ॥ तात्पर्य माहेति ॥ सर्वशब्दस्य संकोचोऽपि युक्तो नाशेषशब्दस्यावशेषनिवारकत्वात [illegible] वविषयोऽपीत्यनेनाशेषपदतात्पर्यकथनं युक्तमित्यवसेयम ॥ कामः संकल्प इति पाठः प्रामादिक इत्याह॥ काम इति ॥ नेत्येति॥ मनसैवेति मनोरूपं करणं नियम्यतेइत्यर्थः ॥२४॥

एवं तर्हि दुःखवियोगमित्येव वक्तव्यम॥किं संयोगशब्देनेत्यतआह॥नकेवलमिति॥वियोगशब्दो निवारणे वर्तत इति भावः॥ एतच्च पदाधि क्यादेव लभ्यतेनान्यथा॥ननु स निश्चयेनयोक्तव्य इति पुनर्विधानं किमर्थं निश्चयेनेत्यादिविशेषविधानार्थमिति चेत् न ॥ महाफले संदेहात् प्रवृत्त्यभावेन निश्चयेनेत्यस्य वैयर्थ्यादित्यत आह॥निश्चयेनेति॥अयोगव्यवच्छेदेनिश्चयशब्द इत्यर्थः॥कुत्रायोगो व्यवच्छिद्यत इत्यत उक्तम् ॥

न केवलमुत्पन्नं दुःखं नाशयति ॥ उत्पत्तिमेवनिवारयतीति दर्शयति संयोगशब्देन निश्चयेन योक्तव्यः ॥ योक्तव्य एव बुभूषुणेत्यर्थः ॥ २३ ॥ सर्वान्सर्वविषयान् ॥ अशेषतः ॥ एकैकविषयोऽपि कामः

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनियम्यसमंततः॥२४ ॥

स्वल्पः कादाचित्कोऽपि न कर्तव्य इत्यर्थः ॥ मनसैव नियंतुं शक्यते नान्येनेत्येवशब्दः ॥ २४ ॥

बुभूषुणेति॥ मुमुक्षुणेत्यर्थः॥२३॥सर्वानशेषतइत्येनयोस्तात्पर्यमाह॥सर्वानिति॥कामः॥स्वल्पः कादाचित्कोपीति मूलपाठः॥नन्विंद्रियग्रामनियम नमेवावश्यकं न तु करणनियमः॥कथमुच्यते मनसैवेंद्रियग्राममिति तत्राह॥मनसैवेति॥स्वरूपकथनमेतदिति भावः॥इति ज्ञापयितुमितिशेषः॥२४॥

॥ कृ० ॥ अकर्तरि च कारके संज्ञायामिति कर्तृभिन्नकारकमात्रे घञो विधानादिति भावः ॥ ननु विपूर्वो युजिर्नाशे प्रसिद्धस्तत्कथं निवारयतीत्युक्तमित्यत आह॥ वियोगशब्द इति ॥ विपूर्वो युजिरित्यर्थः ॥ ननु तर्हि निराकरणार्थंवियोगशब्देनैव विवक्षितार्थलाभात्संयोगपदं व्यर्थमित्यत आह ॥ एतच्चेति ॥ निराकरणार्थत्वमित्यर्थः ॥ व्यर्थं सत्किंचिज्ज्ञापयतीति न्यायादिति भावः ॥पदाधिक्यादिति ॥ संयोगपदाधिक्यादित्यर्थः ॥ ननु यो योगी भवितुमिच्छुः तत्र योगस्यायोग एवास्ति कथं तद्व्यवच्छेदक इत्यत आह मुमुक्षुणेत्यर्थ इति॥ ॥ २३ ॥ क्वचित्पुस्तके कामः संकल्प इति मूलपाठो दृश्यते सोऽपपाठ इत्याह ॥ कामः स्वल्प इति ॥ २४ ॥

॥ श्री० ॥ एतदिति ॥ मनसैवेति कथमुक्तमित्यर्थः ॥ अशेषतइति ॥ मनसैवेंद्रियग्रामं विनियम्येत्युक्ते सत्र मनोनिग्रह एव कथं स्यादिति शंकायामुच्यते ॥ शनैरिति ॥ धृतिगृहीतया बुद्ध्या शनैः शनैरुपरमेत ॥ विषयेभ्यो मनस उपरमं कुर्यात्तत्तदनंतरमुपात्मसमर्थोपि संस्कारवशात् विषयेद्वयमुक्तं भवतीत्यर्थः ॥ २५॥ श्रोत्रादेः ॥ सकाशात ॥ यत इतीति ॥ यतोयतो धावति तत्र तत्र सुदर्शनं तु: प्रसहं ददर्शाति नवमस्कंधप्रयोगादित्यर्थः ॥ यथाहि यत्र यत्र धावति तत्र तत्रांबरीषसंरक्षणाय भगवदादिष्टं सुदर्शनं पृष्ठतः प्राद्रवनदर्शीति तदर्थः ॥ अतो यत इत्यस्य पंचम्यर्थत्वे तत्र तत्रेत्यस्यायुक्तत्वापत्तेरिति भावः ॥ भाष्ये इत्यादौत्यादिप्रयोग यतो यतोऽहन प्रहरन परश्वधं मनोऽनिलौजाः परचक्रसूदनः ॥ ततस्ततःशरछिन्नभुजोरुकंधरा निपेतुरुर्व्यां हतसन्यवाहना इति नवमस्कंधगतं वाक्यं द्रष्टव्यम ॥आद्यादिभ्य इति ॥ आद्यादिभ्यः शब्देभ्यः सप्तम्यादिविभक्त्यंतेभ्यस्तसिर्भवतीति वार्तिकार्थः ॥ आदावित्यादितः मध्यत इत्याद्युदाहरणम ॥ आकृतिगणश्चायमिति काशिकायामुक्तत्वात्प्रकृतेऽपि यस्मिन्निति यत इत्यर्थो द्रष्टव्यः ॥ केचित् आद्यादिभ्यः प्रथमादिसर्वविभक्तिभ्यस्तसेरुपसंख्यानं कार्यं तसेः सार्वविभक्तिकत्वादित्यर्थ इत्याहुः ॥ अन्यथेति ॥ यतो यतो इत्यस्य श्रोत्रादेरिति पंचम्यर्थत्वांगीकारेशब्दादिविषयकानुभवोत्पत्तिनिवारणार्थं मनोनिःसरणद्वारभूतश्रोत्रादिमात्रनिरोधलाभेऽपि अंतर्मनःकरणकशब्दादिविषयस्मरणं को वारयिता ॥

शनैःशनैरुपरमेद्बुद्ध्येति बुद्धेरपींद्रियग्रामनियमने कारणत्वस्य वक्ष्यमाणत्वात् कथमेतदित्यत आह॥बुद्धेरिति॥ अनेनोपरमेदित्यस्यार्थद्वयमुक्तं भवति ॥ २५ ॥ यतो यतः ॥ श्रोत्रादेरिति प्रतीतिनिरासायाह ॥ यत इति ॥ शब्दादावित्यर्थः ॥ कुतः सप्तम्यर्थे तसिलित्यत इत्यत

बुद्धेः कारणत्वं मनोनिग्रहे॥ आत्मरमणे च ॥२५॥यतो यतो यत्र यत्र॥यतो यतो धावतीत्यादिप्रयोगात् ॥

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ २५॥

यतो यतो निश्चरति मनश्चंचलमस्थिरम् ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

आह ॥ यत इति ॥ तथा चोक्तम् ॥ आद्यादिभ्य उपसंख्यानमिति ॥ अन्यथा द्वारमात्रनियमेस्मरणस्य को निवारयिता॥

॥ कृ० ॥२५ ॥ ननु यतो यतः श्रोत्रादेरिति प्रतीत एवार्थः किं न स्यादित्यत आह ॥ अन्यथाद्वारमात्रेति ॥ मनोनिःसरणद्वारभूतश्रोत्रादिमात्रेत्यर्थः ॥ को निवारयितेति ॥

१ अ. ६ श्लोक ३९ २अ. १३ श्लो. २१ पूर्वश्लोकाद्रामइति वर्तते । यतो सावितिपाठे तु परामर्शः॥ ३ मनोवदनिलवदोजो वेगोऽवष्टंभो वा यस्य स तथा ॥ ओजोऽवष्टंभबलयोरितियादवः ॥ ४ हतसूतेतिपाठः ॥

॥श्री० ॥ तथा च ध्यानासंभवः यत्र यत्र विषय इत्यर्थकत्वांगीकारे तु शब्दादिविषयकज्ञानमात्रनिवारणलाभेन तत्स्मरणस्यापि निवारणलाभात् ध्यानोपपत्तिरिति भावः ॥ आहेति ॥ विषयसप्तमीत्याहेत्यर्थः ॥ २६ ॥ २७ ॥ २८ ॥तथाऽप्युत्तमेति ॥ तत्र त्ववतारोपासकानामधिकारिणां मनुष्योत्तमानामेव ध्येयमुक्तं मच्चित्त इत्यवतारोपास्तिकथनादिति भावः ॥

षष्ठ्या ह्यत्र भाव्यंसप्तमी नुकथमित्यत आह ॥ आत्मनीति ॥ २६ ॥ २७ ॥ प्रशांतमनसमित्युक्तमेवपुनः कस्मादुच्यत इत्यत आह ॥ पूर्वेति ॥ २८ ॥एवं युंजन्निति योगप्रकरणस्य फलकथनेनोपसंहृतत्वात्किमुत्तरणेत्यतआह ॥ ध्येयमिति ॥ ननु मच्चित्तो युक्त इत्यादिना

आत्मन्येव वशं नयेत् ॥ आत्मविषय एववशीकुर्यादित्यर्थः ॥ २६ ॥ २७ ॥पूर्वश्लोकोक्तं प्रपंचयति ॥

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् ॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥
एवंयुंजन्सदात्मानं योगी विगतकल्मषः ॥ सुखेन ब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ २८ ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ २९ ॥

॥ एवं युंजन्निति ॥२८॥ ध्येयमाह ॥ सर्वभूतस्थमिति ॥

ध्येयमुक्तमेव सत्यम् ॥ तथाऽप्युत्तमाधिकारिणां ध्येयमनेनोच्यत इत्यदोषः ॥

॥ कृ० ॥ मनोनियमनाभावात्तत्करणकविषयस्मरणं स्यादेवेत्यर्थः ॥ यत्र यत्रेत्यर्थोक्तौ च विप्रियज्ञानमात्रमेव निरस्तं भवतीति भावः ॥ षष्ठ्याह्यत्र भाव्यमिति ॥ आत्ममनसोर्नाधाराधेयभावः किं तु संबंध एव मन आत्मनो वशमिति प्रतीतेः ॥ तत्र च षष्ठीशेष इतिषष्ठ्येव युक्तेत्यर्थः॥ २६ ॥ २७ ॥ २८ ॥

१एवं सांख्ययोगमभिधायतदनुष्ठातुः फलंप्रपंचयति ॥ प्रशांतेति ॥ स्वतोविषयेष्वप्रवृत्तमनस्कम् ॥ विगतरजसम् ॥ अतएवकामक्रोधादिकल्मषरहितम् ॥ तद्बुद्धयइत्युक्तादिशा ब्रह्मणि स्थितिमंतम् ॥ एवंसमाधियोगवंतम् ॥ उत्तमं सुखं कर्तृप्राप्नोति ॥ हिश्रुत्यादिप्रसिद्धम् ॥ २ भगवत्संसर्गादभिव्यक्तम् ॥

॥श्री०॥उक्तार्थताम् ॥ ब्रह्मतृणादावित्यादिनोक्तार्थताम् ॥२९॥ध्यानविशेषस्येति॥उत्तमाधिकारिभिः क्रियमाणस्योक्तध्यानविशेषस्येत्यर्थः ॥सर्वान्प्रतीति॥तथा च तस्य मे इत्यनुपपन्न मित्यर्थः॥विद्यमानस्यापीति॥स्वामिनो भृत्यस्यैवेत्यर्थ.॥स्वयोग्येत्यादि ॥स्वयोग्यव्यापाराकरणरूपादविद्यमानसादृश्यादित्यर्थः ॥ अविद्यमानता ॥ अविद्यमानताव्यवहार इत्यर्थः ॥

आत्मानं स्वात्मानमित्यादिप्रतीतिपराकरणार्थमाह ॥ सर्वेति ॥ कुतोऽयमर्थइत्यतः पुराणसमाख्यानादित्याह ॥ तच्चेति ॥ सर्वत॥समदर्शन इत्यस्योक्तार्थतां गीतासंमत्योपपादयति ॥ सममिति ॥ २९ ॥ किं चैतदर्थानुवादेन फलप्रतिपादकमुत्तरवाक्यमप्यस्य भगवद्विषयत्वं ज्ञापय तीति भावेनाह ॥ फलमिति ॥ अस्य ध्यानविशेषस्येति शेषः ॥ ननु भगवांस्तद्ध्यायी च सर्वान्प्रति नित्यो तत्कथमेतादित्यत आह ॥ त

सर्वभूतस्थमात्मानम्परमेश्वरम्॥ सर्वभूतानि चात्मनि परमेश्वरे॥तं च परमेश्वरं ब्रह्मतृणादावैश्वर्यादिना साम्येनपश्यति॥तच्चोक्तम्॥आत्मानं सर्वभूतेषु भगवंतमवस्थितम् ॥अपश्यत्सर्वभूतानि भगवत्यपि चा त्मनीति ॥ समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमिति च ॥२९॥ फलमाह ॥यो मामिति॥ तस्याहंन प्रण

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति॥तस्याहं न प्रणश्यामि सचमे न प्रणश्यति॥३०॥

श्यामीति सर्वदा योगक्षेमवहः स्यामित्यर्थः॥ स च मे न प्रणश्यति ॥ सर्वदा मद्भक्तो भवति॥सत्य पि स्वामिन्यरक्षत्यनाथः ॥ एवं भृत्येऽप्यभजत्यभृत्य इति हि प्रसिद्धिः ॥

स्येति ॥ कथमयमर्थो लभ्यत इत्यत आह ॥सत्यपीति॥अविद्यमाननाथोऽयमितिभृत्ये प्रसिद्धिः॥ एवं सत्यपि भृत्येऽ भजत्यविद्यमानभृत्यो ऽयमिति स्वामिनि प्रसिद्धिः ॥ एतदुक्तं भवति॥विद्यमानस्यापिस्वयोग्यव्यापाराकरणसादृश्यादुपचारेणाविद्यमानता ॥

॥कृ० ॥ नन्वेतावता शब्दस्य काद्वत्तिरुक्तेत्यत आह ॥एतदुक्तं भवतीति ॥

॥श्री॰ ॥तथात्वाभावादिति ॥ स्वयोग्यव्यापाराकरणाभावादित्यर्थः ॥ भगवान् स्वयोग्यव्यापारं योगक्षेमाख्यं करोति अयं च योगारूढः स्वयोग्यव्यापारं भगवद्भक्त्यादिरूपं करो तीत्यविद्यमानमादृश्याभावान्न प्रणश्यामीत्याद्युपपन्नमिति भावः ॥ उपचारप्रयोगे किं प्रयोजनमित्यत आह ॥ रूढेति ॥ अत एव मत्यपीत्यादिलौकिकोदाहरणं प्रदर्शितमिति ध्येयम् ॥ ३० ॥ सर्वथेत्यस्यार्थो मयि वा मद्विकारे वेति ॥मद्विकारे प्रपञ्चे देहादावित्यर्थः ॥ परव्याख्यान इति ॥ अस्मन्मते थाल्प्रत्ययः सार्थकः ॥ प्रकारार्थकत्वात् ॥ प्रकारवचने थालिति स्मरणात् ॥ अत एव सर्वप्रकारेणेत्युक्तम् ॥परव्याख्याने तु थाल् प्रत्ययो निरर्थक इत्यर्थः ॥ मोक्ष इति ॥ लिंगदेहभग इत्यर्थः ॥ एवमुत्तरत्रापि ज्ञेयम् ॥आनंदह्रासादि कामिति ॥ यथा चैतत् तथोक्तं प्राक् तृतीयाध्यायेऽस्माभिः ॥

प्रकृते तु तथात्वाभावान्न प्रणश्यामीत्यादिरूढोपचारश्चायम् ॥ अतो न प्रयोजनान्वेषणमिति ॥ अत्र पुराणसंमतिमाह ॥ उक्तं चेति ॥ ३० ॥ यो मामिति उक्तमेव पुनः किमर्थमुच्यत इत्यत आह ॥ एतदेवेति ॥एकत्वमास्थित इत्यस्यान्यथाप्रतीतिनिरासार्थमर्थमाह॥एकत्व मिति ॥ मयि वा मद्विकारे वा वर्तमानोऽपीत्यपव्याख्याननिरासार्थमाह ॥ सर्वेतिन्यायेनवाऽन्यायेनवेत्यर्थः ॥ अपव्याख्याने थाल्प्रत्ययो

उक्तं च ॥ सर्वदा सर्वभूतेषु समं मां यः प्रपश्यति ॥ अचलातस्य भक्तिः स्याद्योगक्षेमं वहाम्यहमिति गारुडे॥३०॥ एतदेवस्पष्टयति ॥ सर्वभूतास्थितमिति॥ एकत्वमास्थितः सर्वत्रएक एवेश्वर इति स्थितः

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः॥सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥३१॥

सर्वप्रकारेण वर्तमानोऽपि मय्येव वर्तते ॥एवमपरोक्षं पश्यतो ज्ञानफलं नियतमित्यर्थः॥

नयुक्त इति भावः ॥ भगवंतं भजतो धर्माचरणं सर्वथाऽप्यकिंचित्करमिति प्रतीतिनिरासायाह ॥ एवमिति ॥ अधर्माचरणेऽपीति शेषः॥ ज्ञानफलं मोक्षः ॥ आनंदह्रासादिकं तु विद्यत एवेति भावः ॥ ॥क॰॥ न प्रणश्यामीत्यादीति॥ अनेन प्रणश्यामीत्यादिर्गौणीवृत्तिरिति सूचितम् ॥ ३० ॥ मद्विकार इति ॥ भास्करमतेनेदम् ॥ अन्यमते तु मद्विषये इत्यर्थः ॥ थाल्प्रत्यय इति ॥ प्रकारवचने थालिति थालः प्रकारवाचित्वोक्तिरिति भावः ॥

॥ श्री०॥ **तत्किमिति** ॥ तर्हि नियमेनाधर्मं किं करोत्येवेति प्रश्नः ॥ **अकरणे** ॥ अधर्मस्येति शेषः ॥ **इत्युक्तमिति** ॥ सर्वप्रकारेण न्यायेन वाऽन्यायेन वेति व्याख्यातत्वादन्यायेने ति व्याख्यानं न युक्तमिति भावः॥ **अस्मद्व्याख्यानेति** ॥ सर्वथेत्यस्य सर्वप्रकारेणेति व्याख्यानं न युक्तम ॥ ईदृशस्य भगवज्ज्ञानिनो यथेष्टचेष्टावत्ताया असंभवादतो मयि वा मद्विकारे वेत्येव व्याख्यानं युक्तमिति परकृतमस्मद्व्याख्यानदूषणमित्यर्थः ॥ प्राय इत्यनेन कथं तन्निरस्तं भवतीत्यत आह ॥ **प्रारब्धेति** ॥ **तथाभावेति** ॥ **यथेष्टचेष्टेत्यर्थः** ॥ भाष्ये ॥ **पुरस्तादिति** ॥ तृतीयाध्याय इत्यर्थः ॥ भाष्ये स्वल्पं चेदिति शेषः ॥ महदिति शेष इति ॥ तथा न कियन्महद्यावन्महत्क्रियते तावत्सर्वं दुःखसूचकमेव भवति सचिते च तदैव चित्तखेद इत्यर्थः ॥ **लोकप्रवृत्तीति** ॥ लोके या प्रवृत्तिस्तदापादकस्य कर्मण इत्यर्थः ॥ **चित्तेति** ॥ लोकैः क्रियमाणानि मैथुनादिकर्माणि दृष्ट्वा जातेन चित्तक्षोभेन स्वयमपि ज्ञानी तथा करोति यथा सौभर्यादिरित्याशयः ॥ ३१ ॥

ननु ज्ञानिनो मोक्षएवापेक्षितः सोऽधर्माचरणेऽपि न प्रतिबध्यते चेत ॥तत्किमधर्मं करोतीत्यत आह ॥ तथापीति॥ सर्वथाऽप्यकरणे सर्वथावर्तमानोऽपीत्युक्तमयुक्तमित्यतउक्तम् ॥ प्राय इति ॥ एतेन न हीदृशस्य यथेष्टचेष्टता संभवतीति परकीयमस्मद्व्याख्यानदूषणमपि

तथा पि प्रायो नाधर्मं करोति ॥ कुर्वतस्तु महच्चेद्दुःखसूचकं भवतीत्युक्तं पुरस्तात् आह च ॥ कदा चिदपि नाधर्मे बुद्धिर्विष्णुदृशां भवेत् ॥ प्रमादात्तु कृतं पापंस्वल्पंभस्मीभविष्यति ॥ आदिराजैस्तथा देवैर्ऋषिभिः क्रियते कियत् ॥बाहुल्यात्कर्मणस्तेषां दुःखसूचकमेव तदिति॥३१॥

निरस्तंभवति ॥ प्रारब्धवशेन कदाचित्तथाभावदर्शनात् ॥ कुतो न करोतीत्यत आह ॥ कुर्वतस्त्विति ॥ अत्र प्रमाणमाह ॥ आह चेति ॥ कियन्महदिति शेषः कर्मणः प्रारब्धस्य बाहुल्यात्प्राबल्यात् ॥ लोके प्रवृत्तिकर्मणो बाहुल्येन चित्तविक्षेपादितिवा ॥ ३१ ॥

॥ कृ० ॥ स्वल्पपापस्य भस्मीभावोक्तेराह ॥ महदिति शेषइति ॥ ३१ ॥

१ भाष्यस्थेप्रमाणे इत्यर्थः ॥

॥श्री०॥ उत्तरत्रसमं पश्यतीति साम्यदर्शनस्यैव व्याख्यायमानत्वात्साम्यमिति कथमुक्तमित्यत आह॥साम्यदर्शनमिति॥गोगवयादिवत्साम्यदर्शनम्॥गोगवयादिवज्जगतां सादृश्यदर्शनमि त्यर्थः॥भगवदनुवर्तीति॥तथा च यः सर्वत्र भगवद्भक्तेषु सुखं वा यदि वा दुःखमात्मौपम्येन पश्यति तदीयदुःखादिकं स्वकीयदुःखादिवज्जानाति सयोगी परमोमत इत्यर्थो द्रष्टव्यः॥३२ प्राधान्येनेति ॥ योऽयं योग इति प्रथमया प्राधान्येनेत्यर्थः ॥ प्रकृतत्वादिति ॥ पूर्वार्धे इति शेषः ॥ साध्याविशिष्टेनेति ॥योगो न स्थिरस्थितिविषयः चंचलत्वादिति साध्याविशिष्ट तेत्यर्थः ॥ चंचलत्वादित्यस्यास्थिरत्वादित्यर्थकत्वादिति भावः ॥ मनस इतीति ॥ तथा च योगस्य स्थिरस्थित्यभावे मनसश्चंचलत्वं हेतुत्वेनाभिप्रेतमिति नोक्तदोष इत्यर्थः ॥ व्यधि करणत्वस्यास्मन्मतेऽदूषणत्वादिति भावः ॥ मनसश्चंचलत्वं च हेतुत्वेनाभिप्रेतमित्यत्र किं ज्ञापकं येनैवं व्याख्यायत इत्यत आह ॥ एतच्चेति ॥ उत्तरवाक्यादेवेति ॥ चंचलं हि मनः कृष्णेत्युत्तरगीतावाक्यादेवेत्यर्थः॥ ३३ ॥ कृ०॥ ननु पूर्वमेकेन प्रकारेण गीताकृताऽव्याख्यातत्वात्कथं प्रकारांतरेणेत्युक्तमित्यत आह ॥ समदर्शन इत्युक्तइति॥भगवदनुवर्तीति॥अनेन

सर्वत्रसमदर्शन इत्यस्यान्यथाव्याख्यानमितोऽप्यसादिति भावेनाह ॥ साम्यमिति ॥ साम्यदर्शनम् ॥ समदर्शनइत्युक्ते किं गोगवयादिवद्भव ति साम्यदर्शनमित्याकांक्षायामेकत्वमास्थित इति स्वयमेव व्याख्यातम् ॥ इदानीं तु भगवदनुवर्तिविषयतयाऽपि व्याचष्ट इत्यर्थः ॥ ॥ ३२ ॥ साम्यस्ययोगस्य च प्रकृतत्वात् ॥एतस्येति कस्य परामर्श इति न ज्ञायतेतस्तत्प्रदर्शनाय व्यवहितानां पदानामन्वयमाह ॥ एत

साम्यं प्रकारांतरेण व्याचष्टे॥आत्मौपम्येनेति॥३२ एतस्य योगस्य स्थिरां स्थितिं न पश्यामि॥मनसश्चंचलत्वात्३३॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन॥ सुखं वा यदि वा दुःखं स योगी परमो मतः॥ ३२ ॥

अर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचल त्वात्स्थितिंस्थिराम् ॥ ३३ ॥

स्येति ॥ योगस्य प्राधान्येन साम्यस्य तु तृतीययाऽ प्राधान्येन प्रकृतत्वादितिभावः ॥ चंचलत्वादित्यस्यान्यो धर्मी न प्रतीयतेऽतो यो ग एवसंबध्यते ॥ तथा च साध्याविशिष्टेनेत्यत आह ॥मनस इति ॥ एतच्चोत्तरवाक्यादवगम्यत इति भावः ॥ ३३ ॥

सर्वत्रेति गीतापदं भगवदनुवर्तिपरमिति सूचितम्॥३२॥साध्याविशिष्टतेति॥योगचंचलत्वतदस्थिरत्वयोरभेदादितिभावः॥उत्तरवाक्यादिति॥चंचलं हि मन इतिगीतावाक्यादित्यर्थः॥३३॥

॥ श्री० ॥ ३४ ॥ ३५ ॥ पूर्वेणेति ॥सदाशुभेच्छारहितानां सदा रमापतौ द्वेषिणां सदानास्तिकानामिति पूर्वेण संबंध इत्यर्थः ॥ नन्वभ्यासादिना विनामनो न नियम्यत इत्यत्र शुभेच्छारहितानां मुक्तिर्न ज्ञायत इति वाक्यं कथं प्रमाणमित्यत आह ॥ अनेनेति ॥ अत्र ॥ अभ्यासेन तु कौंतेयेतिगीतावाक्ये ॥ तथा चाभ्यासेन वैराग्येणशुभेच्छया रमापतौ स्नेहे नास्तिक्यबुद्ध्या च मनो नियम्यत इति गीतायां ग्राह्यमिति भावः ॥तर्हि मनोनिग्रहो न जायत इति वक्तव्ये मुक्तिर्नजायत इति कथमुक्तं प्रमाण मित्यत आह ॥ मुक्तिबीजत्वादिति॥ शुभेच्छादीनां साक्षान्मुक्तिहेतुत्वासंभवात् मुक्तिशब्देन तद्बीजमनोनियमनं लक्ष्यत इति भावः ॥लक्षणाबीजसंबंधोपपादनाय मुक्तिबीजत्वादित्युक्तमिति ध्येयम॥३६ ॥

अत्रागमं चाह॥उक्तं चेति॥एतेनासंशयमिति परिहारवाक्यमपि व्याख्यातम्॥३४॥३५॥असंयतेतिश्लोको व्यर्थ इव प्रतीयते तन्निवर्त्यामाशंकां सूचयन् तात्पर्यमाह ॥ न चेति ॥ यथा मत्तमातंगःस्वयमेव श्रांतः शांतो भवति तथा विषयैःतुल्यं मनः कदाचित्स्वयमेव नियतं भवति

॥ उक्तं च ॥ मनसश्चंचलत्वाद्धि स्थितिर्योगस्य वैस्थिरा ॥ विनाऽभ्यासान्नशक्या स्याद्वैराग्याद्वा नसंश य इति व्यासयोगे ॥ ३४ ॥ ३५ ॥ न च कदाचित्स्वयमेव मनोनियम्यते ॥ शुभेच्छारहितानां च

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्॥तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥३४॥ श्रीभग०उ०॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम्॥अभ्यासेन तु कौंतेय वैराग्येण च गृह्य ते ३५॥असंयतात्मना योगो दुष्प्राप इति मे मतिः॥वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥३६॥

द्वेषिणां च रमापतौ ॥ नास्तिकानां च वै पुंसां सदामुक्तिर्न युज्यत इतिनिषधाद्ब्राह्मे ॥ ३६ ॥

॥ किमभ्यासादिनेत्यतत्न्वेत्यर्थः ॥ कुत इत्यत आह॥शुभेति ॥ सदेति पूर्वेण संबंधः ॥ अनेनात्र शुभेच्छादिकमप्युपलक्षितमिति सूचितम् ॥ मुक्तिबीजत्वान्मनोनियमनस्य मुक्तिरित्युक्तम् ॥ ३६ ॥

॥ कृ० ॥ एतेनेति ॥ विनाभ्यासादित्युत्तरार्धेनेत्यर्थः ॥ ३४ ॥ ३५ ॥ अभ्यासादिनेति॥आदिपदाद्वैराग्यसंग्रहः ॥ पूर्वेणेति ॥ शुभेच्छारहितानामित्यादिनेत्यर्थः ॥ अत्रेति ॥ अभ्यासेनेति गीतावाक्य इत्यर्थः ॥ नन्वभ्यासादिकं विना मनो न नियम्यत इत्यत्र मुक्तिर्न जायत इत्युक्तिः कथं प्रमाणमित्यत आह॥मुक्तिबीजत्वादिति ॥ ३६ ॥

॥ श्री० ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥
अचतुर्थाश्रमीति प्रतीतिनिरासायाह ॥ अयतिरिति ॥ ३७ ॥ ३८ ॥ ३९ ॥४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

॥ कृ० ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

॥अयतिरप्रयत्नः ॥३७॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२॥ ४३॥

अर्जुन उवाच ॥ अयतिःश्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥३८एतन्मे संशयंकृष्ण छेत्तुमर्हस्यशेषतः॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥ श्रीभगवानुवाच॥पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीःसमाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥ अथवा योगिनामेव कुलेभवति धीमताम् ॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥ तत्र तंबुद्धिसंयोगं लभते पौर्वदेहिकम् ॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ ४३ ॥

---

१ अप्रयत्नः आस्तिक्यबुद्ध्यायुक्तः ध्यानरूपोपायात् चलितमानसः ध्यानयोगफलं ज्ञानमप्राप्य हे कृष्णकांगतिंगच्छति इत्यर्थः ॥ २ स्वर्गापवर्गरूपादैहिकामुष्मिकपुमर्थाद्वास्वर्गाद्युपायात्काम्यकर्मानुष्ठानादपवर्गोपायाद्ध्यानाद्वाविभ्रष्टः निराश्रयः अतएव ब्रह्मप्राप्त्युपाये विमूढः वायुना छिन्नमभ्रइवनश्यति ॥ उतनेत्यर्थः॥ ३ एतंसंशयम्॥ हिहेतौ नैवेहेतिपाठोरा० श्रीपादानाम् ॥ इहपरत्रक्रमेणगतिर्यगादि दुर्गतिरूपः नरकप्राप्तिरूपश्च नाशोयोगभ्रष्टस्यनास्ति ॥ हिर्हेतौ ॥ किंचित्कालं ॥ ४ ध्यानादिकृदित्यर्थः ॥ ५ पुण्यसंपादकान् लोकान् प्राप्यतेषुचिरमुषित्वा शुचीनां धनिनांगेहेऽभिजायतइत्यर्थः ॥ ६ ज्ञानिनां योगिनामेव वावंशेभवति ॥ उक्तद्विविधजन्मएतत्कष्टलभ्यं नसुलभंहि प्रसिद्धमित्यर्थः ॥ ७ हे कुरुनंदनहिः प्रकारेऽपिजन्मनि पूर्वदेहभवं तं भगवतिमनोयोगंध्यानमितियावत् ॥ लभते ततोभूयः पौर्वदैहिकादधिकंध्यानसंपूर्तौ यतते इत्यर्थः ॥

॥ श्री० ॥ **नलोकेति** ॥ नलोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीनिषेधाज्जिज्ञासाशब्दस्यापिसन्नंतत्वेन सनाशंसभिक्षउरित्यनेनोप्रत्ययांतत्वात् तद्योगे योगस्येति षष्ठी न युक्तेति भावः॥ ॥ **इत्यस्येति** ॥ नञा निर्दिष्टमनित्यमिति वचनेनास्यनलोकेतिसूत्रोक्तषष्ठीनिषेधस्यानित्यत्वादित्यर्थः ॥ नञानिर्दिष्टस्यानित्यत्वे ज्ञापकमाह॥ अत एवेति ॥ नञा निर्दिष्टस्यानित्यत्वादेवेत्यर्थः कात्यायनः व्याकरणांतरकारः द्विषः शतुर्वा ॥ **वचनमिति** ॥ द्विष् अप्रीतावित्यस्माल्लादेशभूतशतृप्रत्यययोगे तत्कर्मणि षष्ठी विकल्पेन वाच्येत्यर्थः ॥ आदिपदात् चोरस्य द्विषन् चोरं द्विषन्नित्युदाहरणंग्राह्यम् ॥ तथा च द्विष् अस्माल्लटि तस्य शत्रादेशे शकारऋवर्णयोर्लोपेऽत इति जातेशतृप्रत्ययस्योगित्वान्नुमागमे संयोगांततकारलोपे द्विषन्निति भवति ॥ तथाच लस्ययोगेनलोकेति षष्ठ्या निषेधेऽपि तद्योगे कात्यायनः षष्ठीं विहितवान् तेन ज्ञायते नञानिर्दिष्टस्यानित्यत्वमितीतिभावः॥यद्वानलोकेति तृन्नंतशब्दयोगे षष्ठीनिषेधेऽपि द्विषः शतुरित्यत्रतृन्नंतशतृशब्दयोगे कात्यायनः षष्ठीं स्ववाक्येन प्रयुक्तवान् तेन ज्ञायते नञानिर्दिष्टस्यानित्यत्वमितीति भावः ॥ अत्रसर्वत्रापि गीतायां भाष्ये च योगशब्दो ध्यानयोगपरो मंतव्यः॥ **विचारार्थतेति**॥ज्ञानेच्छांतर्नीतविचारलक्षणया रूढ्या वा जिज्ञासाशब्दस्य विचारार्थकत्वेन योगस्य जिज्ञासुर्विचारयितेत्यर्थप्राप्तिशंका स्यादिति भावः ॥सन्नंतजिज्ञासाशब्दस्य लक्षणया रूढ्या वाविचारार्थकत्वं कुत्रदृष्टमित्यत आह॥ **ब्रह्मजिज्ञासेति**॥ **सनाशंसभिक्षउरिति** ॥ सन्नंताच्छब्दात् आशंसेर्भिक्षेश्च उप्रत्ययः स्यात्तच्छीलादाविति सूत्रार्थः ॥ तथाच तच्छीलादावित्यादिपदात् अतिशयरूपोऽप्यर्थोग्राह्य इत्याशयः ॥ **इच्छार्थ इति** ॥

उप्रत्यययोगे नलोकाव्ययेतिषष्ठीनिषेधात् योगस्य स्वरूपमित्यध्याहृत्य कश्चिद्व्याख्यातवान् भ्रमो ह्येव ॥नञा निर्दिष्टमनित्यमित्यस्यानित्यत्वात् ॥ अतः कात्यायनो द्विषः शतुर्वा वचनमित्याद्यवोचदित्यभिप्रेत्याह॥योगस्येति॥ ब्रह्मजिज्ञासेत्यादाविव विचारार्थताशंकांनिरासाय

॥ योगस्य जिज्ञासुरपि ॥ ज्ञातव्यो मया योग इति यस्यातीवेच्छा ॥

व्याचष्टे॥ज्ञातव्य इति॥अतीवेत्युप्रत्ययस्यार्थः॥ सनाशंसभिक्षउरिति तच्छीलादौ तस्य विहितत्वात्॥ इच्छार्थे बाधकाभावादिति भावः ॥

उप्रत्ययेति ॥ जिज्ञासुशब्दस्यसना शंसभिक्षउरित्युप्रत्ययांतत्वादिति भावः ॥ न लोकेति॥द्वितीये व्याख्यातमेतत् ॥ द्विषः शतुरिति द्विष् अप्रीतावित्यस्मात् ॥ द्विषोऽमित्र इत्यनेन यः शतृप्रत्ययः तद्योगे वा षष्ठीनिषेध इत्यर्थः ॥ तृन्नितिप्रत्याहारग्रहणात्तत्र च द्विषोऽमित्र इत्युक्तशतुः पठितत्वात्तद्योगे नित्यं निषेधे प्राप्ते एतद्विकल्पारंभाज्ज्ञापकान्नलोकेति निषेधोऽनित्यः ज्ञापकस्य सामान्यापेक्षत्वादिति भावः ॥ **शीलादाविति** ॥

॥ श्री० ॥ ब्रह्मजिज्ञामेत्यादौ तु यत्रानवसर इत्यादिप्रमाणबलेन कतव्यपदाध्याहारस्य सिद्धतया इच्छायाअविधेयत्वाद्वा [illegible]
चात्रेच्छार्थत्वे तथाबाधकमस्तीत्याशयः ॥ परामर्शादिति ॥ शब्दब्रह्मातिवर्तते इत्यनेनेत्यर्थः ॥ परामर्शस्तु पूर्वोक्तस्येव वक्ष्यमाणस्यापि युक्तः ॥ [illegible]
ज्योतिरिति वाक्यविचारदशायाम् ॥ पूर्वोक्तस्य परामर्शो वक्ष्यमाणस्य च क्वचिदिति ॥ यद्वा ततो यातीतिवाक्येन शब्दब्रह्मेति वाक्योक्तार्थस्य [illegible]
ति॥ इत्याशयेन परं ब्रह्म प्राप्नोतीत्युक्तमित्यर्थः ॥४४॥ नैकजन्मनीति ॥ भाष्यस्य शब्दब्रह्मातिवर्ततइत्यन्वयः ॥ ननु योगजिज्ञासामात्रेण परब्रह्मप्राप्तिश्चेद्योगानुष्ठानवैयर्थ्यं [illegible]
वाशंक्य भगवता यदुत्तरं दीयते तर्हि न योगजिज्ञासामात्रेणेत्याहेति भाष्यकारैर्वक्तव्यत्वेन नैकजन्मनीत्याहेत्यसंगतं कथमुक्तमित्यतस्तदभिप्राय माह ॥ नयोगेति । [illegible]
वाक्ये॥ अपरामर्शादिति॥ पूर्वश्लोके कर्तृत्वेनोक्तो योगजिज्ञासुरत्र श्लोके कर्तृत्वेन न परामृश्यते तत्परामर्शकशब्दाभावादिति भावः॥ अध्याहारेणेति॥ प्रयत्नाद्यतमान [illegible]

शब्दब्रह्मातिवर्ततेइत्येतद्वेदोक्तकर्मकारिभ्योऽतिरिच्यत इति कश्चिद्व्याचष्टे ॥ तदसत् ॥ ततोयाति परांगतिमित्यस्यार्थस्य [illegible]
भावेनाह ॥ शब्देति ॥ शब्दब्रह्मशब्देन वैदिकविधिनिषेधावत्रोच्येते ॥ तदतिवर्तनं परब्रह्मप्राप्तस्यैवेत्यत एवमुक्तम् ॥ ४४॥ योगजिज्ञासामा

सो पि शब्दब्रह्मातिवर्तते ॥ परं ब्रह्म प्राप्नोतीत्यर्थः ॥ ४४ ॥ नैकजन्मनीत्याह ॥ प्रयत्नादिति ॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥
प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

॥ जिज्ञासुर्ज्ञात्वा प्रयत्नं करोति ॥

त्रेण परब्रह्मप्राप्तिश्चेत् योगानुष्ठानवैयर्थ्यं स्यादित्यत एतदेवाशंक्य भगवतैवोत्तरं दत्तमित्याह॥ नैकेति ॥ न योगजिज्ञासामात्रेणेत्यभिप्रायः
॥ अत्र योगजिज्ञासोरपरामर्शात् कथं तद्विपर्ययमेतदित्यतोऽध्याहारेण व्याचष्टे॥ जिज्ञासुरिति॥ ज्ञात्वा योगमिति शेषः

॥ कृ० ॥ आकेस्तच्छीलतद्धर्मतत्साधुकारिष्विति सूत्रेण क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययाः तच्छीलादिषु कर्तृषु बोद्धव्या इत्युक्तत्वात् ॥ उक्तस्यमस्य च जन्मान्तरीयत्वादिति भाव. ॥२३१॥
॥ अस्यार्थस्येति ॥ शब्दब्रह्मातिवृत्तिरूपस्यार्थस्यततोयाति परांगतिमित्यनेनब्रह्मप्राप्तिरूपत्वेनाभिधास्यमानत्वादिति भावः ॥ ४४ ॥ ४५ ॥

॥ श्री० ॥ अत्र प्रयत्नशब्देन श्रवणं मननं ध्यानं चोच्यते ॥ एवमिनीति ॥ एवमनेकजन्मभिः यज्जन्मनि योगजिज्ञासाप्रयत्नादिकं जातं तज्जन्मारभ्यानेकजन्मभिः संसिद्ध इत्यर्थः यतनानंतरमनेकजन्मभिरित्यर्थः किं न स्यादित्यत आह ॥ योगइति ॥ श्रवणमननरूपप्रयत्नेन ध्याने परिपूर्णे सतीत्यर्थः ॥ संसिद्धपरोक्षज्ञानस्य ॥ भाष्योदाहृते प्रमाणे जिज्ञासुरित्यनंतरं बहुभिर्जन्मभिर्ज्ञात्वेति योऽयं जिज्ञासाजन्मारभ्य बहुभिर्जन्मभिर्ज्ञात्वेत्यर्थः ॥ ४६ ॥ नन्कथमिति ॥ न हि फलवतः सकाशात् साधनत्वेनाधिक इति भावः ॥ पूता इत्यनंतरं उक्तत्वेनेति शेषः॥ननु ज्ञानरूपमेव तपः कुतो न गृह्यत इतिचेत्तत्र प्रष्टव्यं किं ज्ञानशब्देन ब्रह्मापरोक्षज्ञानं गृहीत्वा तपस्विभ्यो ब्रह्मापरोक्षज्ञानिभ्यो ध्यानयोगी अधिक इत्यर्थो गृह्यते

यतनानंतरमनेकजन्मसंसिद्ध इत्यन्यथाप्रतीतिनिरासायाह ॥ एवमिति ॥ योगे संपूर्णे संसिद्धेर्विलंबे कारणाभावादितिभावः ॥ व्याख्यातार्थे पुराणसंमतिमाह ॥ आह चेति ॥ ४५ ॥ ननु ज्ञानं योगस्य फलं तत्कथं ज्ञानिभ्योऽप्यधिकोमत इत्यतआह ॥ ज्ञानिभ्य इति ॥ यद्यपि

एवमनेकजन्मभिःसंसिद्धोऽपरोक्षज्ञानी भूत्वा परांगतिं याति ॥ आह च ॥अतीव श्रद्धया युक्तो जिज्ञासुर्विष्णु तत्परः ॥ ज्ञात्वा ध्यात्वा तथा दृष्ट्वा जन्मभिर्बहुभिः पुमान् ॥ विशेन्नारायणं देवं नान्यथा तु कथंच

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः॥कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥४६

योगिनामपि सर्वेषांमद्गतेनांतरात्मना ॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥ ४७ ॥

हरिः ॐ तत्सदितिश्रीमद्भगवद्गीतासूपनिषत्० अभ्यासयोगो नामषष्ठोऽध्यायः॥ ॥ ६ ॥

नेतिनारदीये ॥ ४५ ॥ ज्ञानिभ्यो योगज्ञानिभ्यः ॥ तपस्विभ्यः कृच्छ्रादिचारिभ्यः ॥

ज्ञानतपसापूता इति ज्ञानमपितपस्तथाऽपि तदतिरिक्तमेवात्र विवक्षितमित्याह ॥ तपस्विभ्यइति ॥

॥ रु० ॥ ॥ यदि ज्ञानतपसापूता इत्येतदनुसारेण तपस्विभ्य इत्यत्र तपोज्ञानं तदाज्ञानाभिरयमनेनोक्तं स्यात् ॥

---

१ वैराग्यत्वेमति इतरदेवताध्यानयोगिनां सर्वेषां सकामानांनिष्कामानांचेत्यर्थः ॥ मध्ये यो भक्तिमान् तत्तद्देवतास्वरूपानुसारेण सुदृढप्रेमवानित्यर्थः ॥ सयुक्तः ॥ तत्र योमांनकामे भजते सयुक्ततरः ॥ अकामः सर्वकामोवेत्युक्तः ॥ तत्रापि मद्गतेनांतरात्मना फलकामनारहितेत्यर्थः भजते सयुक्ततमइति भावः ॥

॥श्री०॥उत ज्ञानशब्देन योगज्ञानमात्रं गृहीत्वा तपस्विभ्यो योगज्ञानवद्भ्यो ध्यानयोगी अधिक इत्यर्थो गृह्यते नाद्य इत्याह ॥ **ब्रह्मज्ञानादिति॥ असंभवादिति** ॥ ध्यानस्य ब्रह्मज्ञानादाधिक्यस्यासंभवेन तद्वतः सकाशात् ध्यानयोगिन आधिक्यं न संभवतीति अर्थः ॥ न द्वितीय इत्याह ॥ **योगेति** ॥ योगज्ञानवतः सकाशात् ध्यानयोगिन आधिक्यस्य ज्ञानिभ्योऽपि मतोऽधिक इत्यनेनोक्तत्वेन तपस्विभ्योऽधिको योगीत्यस्य पौनरुक्त्यप्रसंगादिति भावः ॥ अत्रोपष्टंभकमाह ॥ **अत एवेति** ॥ पौनरुक्त्यप्रसंगेन तपः शब्दस्य योगज्ञानपरत्वासंभवप्रदर्शनार्थमेव पश्चादुक्तमपि ज्ञानिभ्य इतिपदं तपस्विभ्य इत्यपेक्षया पूर्वं व्याख्यातमित्यर्थः ॥ अन्यथा क्रमोल्लंघने निमित्ताभावादिति भावः ॥ **मुमुक्षुणामिति** ॥ नामिदीर्घाभावश्छांदस इति भावः ॥ कृच्छ्रादेरिति प्रमाणस्यायमर्थः ॥कृच्छ्राद्यपेक्षया ध्यानयोगी विशिष्यते ॥ तत्रापि ध्यानयोगेऽपि ॥ भगवद्भक्त एव कार्यार्थं शेषादिध्यानं करोति तद्ध्यानतः हरेर्ध्यानं मोक्षेतरफलकामनया क्रियमाणं कोटिगुणं प्रोक्तम ॥ मुमुक्षुणाम ॥ मोक्षेतरफलकामनां विहाय केवलं मोक्षेच्छुनां यद्धरेर्ध्यानं तत्पूर्वोक्तकोटिगुणध्यानापेक्षयाऽधिकं वाऽधिकमेवेति ॥यथोक्तं तात्पर्ये ॥ मद्भक्तोऽपि कार्यार्थी यो ध्यायेदन्यदेवता इत्यादि ॥ **एतेनेति** ॥ मद्भक्त एव यः कार्यार्थं अन्यदेवताध्यानं करोति स युक्तो ध्यानी मे मत इत्यादौ ग्राह्यम ॥ सर्वेषामपि योगिनां मध्ये इतरफलकामनया यो मां भजते स मे युक्ततरो मतः एतद्ध्यानस्यान्यदेवताध्यानात् कोटिगुणत्वात् ॥ तत्रापि मद्भजकेष्वपि इतरकामनां त्यक्त्वा मोक्षेच्छया मद्गतेनांतरात्मना यो मां भजते स मे युक्ततमो मत इतरकामनया क्रियमाणहरिध्यानापेक्षयैतद्ध्यानस्याधिकत्वादित्यर्थः ॥ ॥ रु० ॥ तत्र किं ब्रह्मज्ञानाधिक्यम् विवक्षितम ॥ योग

ब्रह्मज्ञानादाधिक्यस्यासंभवाद्योगज्ञानाधिक्यस्य पृथगुक्तत्वादिति भावः अतएव पूर्वं तद्व्याख्यातम् ॥ उक्तार्थमुपपादयन् श्लोकद्वयार्थं

उक्तं च ॥ कृच्छ्रादेरपि यज्ञादेर्ध्यानयोगो विशिष्यते ॥ तत्रापि शेषश्रीब्रह्मशिवादिध्यानतो हरेः ॥

ध्यानं कोटिगुणं प्रोक्तमधिकं वा मुमुक्षुणामिति गारुडे ॥

पुराणवाक्येनाह ॥ उक्तं चेति ॥ मुमुक्षूणां एतेन सर्वेषामपि योगिनां मध्ये यो मांभजते स युक्ततरोमतः ॥

ज्ञानाद्वेति विकल्प्याद्यं दूषयति ॥ **ब्रह्मज्ञानादिति** ॥ द्वितीयं प्रत्याह ॥ **योगेति** ॥ **पृथगिति** ॥ ज्ञानिभ्योऽपि मतोऽधिक इत्यनेनेत्यर्थः ॥ अत एवेति ॥ तपःशब्दस्य योगज्ञानपरत्वासंभवप्रदर्शनार्थमेवेत्यर्थः ॥ ननु नामीति दीर्घे मुमुक्षुणामिति स्यादित्यत आह ॥ **मुमुक्षुणामिति** ॥ **एतेनेति** ॥ तत्रापि शेषश्रीब्रह्मेत्याद्युक्तेनेत्यर्थः ॥ **सर्वेषामपीति** शेषादिसाधारण्ये ध्यानमात्रवंतो योगिनः ॥ तत्रैव विष्णुध्यायिनः ते युक्ततराः ॥ तत्रापि मद्गतेनांतरात्मना विशिष्टध्यानवंतः ते युक्ततमा इत्यर्थः ॥

॥ श्री० ॥ योगमितीति ॥ तथा च योगापरपर्यायध्यानस्वरूपमज्ञात्वा ध्यायिनो ध्यानं कुर्वतोध्यानात ॥ ज्ञानं योगापरपर्यायध्यानस्वरूपज्ञानमेवविशिष्यते ॥ज्ञानमात्राद्योगापरपर्याय ध्यानस्वरूपज्ञानमात्रात् ॥ ज्ञात्वा ध्यानम् ॥ योगापरपर्यायध्यानस्वरूपं ज्ञात्वा तत्पूर्वकं क्रियमाणं ध्यानं विशिष्यत इत्यर्थो द्रष्टव्यः ॥ साधनेभ्योऽधिकमित्यर्थस्य प्रकृतानुपयोगात् तदनुद्य व्याचष्टे ॥ साधनाधिकमिति ॥ ४६ ॥ ४७ ॥ इति यदुत्तमगीताभाष्यटीका सुयुक्ता शयमतिः क्लेशाभिगीर्भिगवेद्यस्त्री ॥ सुकलितविवृतियां श्रृणिगराद्धाऽत्र चोर्णा समग मदयमध्यायोऽतमस्यां तु षष्ठः॥इति श्रीमद्यदुपत्याचार्यपूज्यपादारगभकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायांषष्ठोऽध्यायः॥

तत्रापि मद्गतेनांतरात्मना यो भजते स युक्ततमो मत इति व्याख्यातं भवति ॥ ज्ञानिभ्योऽपि मतोऽधिक इत्येतद्योगज्ञानविषयमेव न तद्ब्रह्मज्ञानविषयमित्येतत्पुराणवाक्येन स्थापयति ॥ अज्ञात्वेति ॥ योगमिति शेषः ॥ साधनाधिकं साधनेष्वाधिकम् ॥ ४६ ॥ ४७ ॥

अज्ञात्वाध्यायिनो ध्यानाज्ज्ञानमेव विशिष्यते ॥ ज्ञात्वा ध्यानं ज्ञानमात्राद्ध्यानादपि तु दर्शनम् ॥ दर्शनादपि भक्तिश्च न किंचित्साधनाधिकमिति च नारदीये ॥ ४६ ४७ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये षष्ठोऽध्यायः ॥

इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितगीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां षष्ठोऽध्यायः ॥

॥ कृ० ॥ यस्मादधिकमिति ज्ञापकादधिकशब्दयोगे पंचमीत्यभिप्रेत्य साधनेभ्योऽधिकमिति कृते दर्शनाच्चैवभक्तिश्चेति पंचम्यनन्वय इत्यत आह ॥ साधनेष्वाधिकमिति॥ तदस्मिन्नधिकमिति ज्ञापकादधिकशब्दयोगे सप्तमीति भावः ॥ ४६ ॥ ४७॥ इतिश्रीमत्सिर्मलाचार्यसूनुकृष्णविरचिते प्रमेयदीपिकाप्रकाशे षष्ठोऽध्यायः ॥

॥ इति श्रीमद्भगवद्गीतायांषष्ठोऽध्यायः ॥
॥ समाप्तः ॥

॥ श्री० ॥ अनेन युंजन्नित्यत्र योगशब्दः कर्मसमाधिरूढोभययोगपर इत्युक्तं भवति ॥ संबंधमाव ॥ स्वेनार्हतसंबंधस्येत्यर्थः ॥ननु शरणं गृहरक्षित्रोरित्यभिधानाच्छरणशब्दस्य
गृहरूपाश्रयार्थत्वे तस्मिन्नित्युत्तरवाक्यं पुनरुक्तं स्यादित्यतोव्याचष्ट ॥ रक्षक इति॥ननु भगवानिति ॥ ज्ञानस्यादिज्ञान एव प्रकारत्वं न स्थितावत इति स्थित इति कथमुच्यत इत्यत आह॥
इति जानन्निति॥इत्येवेति ॥ भगवद्विशेषणत्वेन व्याख्यातवानित्यर्थः ॥ ननु समग्रमित्यस्य ज्ञानत्यादिज्ञान एव प्रकारत्वं न स्थितावत इति ... केन चिच्छक्यते ज्ञातुमिति
वक्ष्यमाणदूषणपरिहारः कथमित्यत उक्तम॥एवेति ॥ ननूभयोर्भगवद्विशेषणत्वमेव किं न स्यादित्यतः ... इति क्रियाविशेषणत्वे न च भगवान समग्रोऽन्येन केन चिच्छक्यते ज्ञातुमिति
स्वयमेवेति ॥ अर्जुनेनोत्तरत्र स्वयमेवात्मनात्मानं वेत्थेत्युच्यते तत्रावधारणप्रयोगादिदं ... आह ॥ न हि ... ॥ कुतो भगवान स्वान्येन ज्ञातुं न शक्यत इत्यत आह ॥
स्वयमेवेति ॥ ... क्रियायोग मर्यादाभिविधीन यः ॥ एतमातं इति

भगवदाश्रयत्वं सर्वसाधारणं कथं योगिनो विशेषणमित्यतआह ॥ इति भावः ॥ १ ॥ कु० ॥ ननुपद्ये ... इति स्थित इति जानन्निति यावत् ॥
असंशयं समग्रं इत्युभयं भगवद्विशेषणत्वेन भास्करो व्याख्यानवान् । आश्रय इति ॥ शरणं रक्षक इति स्थित इति जानन्निति यावत् ॥
समस्तविभूतिबलशक्त्यैश्वर्यादिगुणसंपन्नं मां संशयमंतरेणेति ॥ ...गामिंशयरहितं समग्रं कृत्स्नंमामिति ॥ अपरस्तु समग्रमित्येव समग्रं
मदाश्रयः ॥ भगवानेव सर्वं मया कारयति ॥ ...मान्नरगमार्थमाह ॥ असंशयमिति ॥ तत्रसमग्रं यथा भवति तथेत्यर्थः ॥

श्रीभग०उ०॥मय्यासक्तमनाः पार्थ योगं युंजन्मा[1]न एव मे शरणम् ॥तस्मिन्नेवाहं स्थित इति स्थितः॥[2]
॥ असंशयं समग्रं मदाश्रयः॥असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु १॥
॥ असंशयं समग्रं[3]मदाश्रयः॥ ...नग्रामिति क्रियाविशेषणम् ॥ १॥

न हि भगवतः संशयराहित्यमिदानीं वक्तव्यम् ॥ न च भगवान्समग्रमिति क्रियाविशेषणम् ॥ स्वयमेवात्मनात्मानं वेत्थत्वमिति
वक्ष्यमाणत्वादिति भावः ॥ १ ॥ विद्यादिति महाभाष्ये आङ ईषदर्थेऽसमग्रोऽन्येन केनाचिच्छक्यो ज्ञातुम् ॥ क्रियायामवृत्तित्वाभ्युपगमात् ॥ क्रियागतविशेषाधायकत्व
स्यैव क्रियायोगशब्दार्थत्वादतोन विरोध इति ॥ शरणं गृहरक्षित्रोरित्यभिधानाच्छरणशब्दार्थस्वीकारेः तद्विरोधोऽवतिवाच्यम॥आङः क्रियायामवृत्तित्वाभ्युपगमात् ॥ रक्षक इति ॥ ननु
भगवानेवेत्यादिनोक्तस्य ज्ञान एव प्रकारत्वं न स्थितावित्यत आह ॥ इति जानन्नि॥शब्दस्य गृहरूपाश्रयार्थत्वे तस्मिन्नित्युत्तरवाक्यं पुनरुक्तं स्यादित्यत आह ॥ भगवतः समग्रस्यान्येन केनापि ज्ञा
तुमशक्यत्वादित्यत आह ॥ तव समग्रमिति ॥ त्वद्योग्यतानुसारेणसंपूर्णमित्यर्थः ॥ १ ति यावदिति ॥ ननु समग्रमित्यस्य क्रियाविशेषणत्वमयुक्तम ॥

॥ १ कुर्वन् २ अन्वितः ॥ ३असंशयंसमग्रमित्यनयाः॥ ॥

देह

श्रीव्यंकटेशनृसिंहाभ्यांनमः ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ [illegible] क्रियते भावदीपिका ॥ १ ॥ ननु भगवन्महिमाज्ञानार्थमेवयोगस्य वर्णितत्वात् कथं प्राधान्ये
नेत्युक्तमित्यत आह ॥ प्राचुर्येणेति ॥ बहुलप्रयोगेनेत्यर्थः ॥ [illegible] ॥ ननु गीतायां ज्ञानं तेऽहं [illegible] प्रतिज्ञातत्वात् कथमेतदित्यत
आह ॥ अनेनेति ॥ भगवन्माहात्म्यमाहेत्यनेनेत्यर्थः ॥ [illegible] ॥ ज्ञेयत्यादि ॥ [illegible] ॥ अत्रापि काचिदिति ॥ [illegible]
पः ॥ कथं पूर्वेण [illegible] प्रथमश्लोक एवोक्तत्वात् आह । अनेनेति ॥ [illegible] ॥ ॐ ॥ ओं तत्र तत्रेति ॥ न त्वेवाहमिति द्वितीये ॥

ज्ञानसाधनादन्यदुत्तराध्यायप्रतिपाद्यं वक्तुं योगे [illegible] प्रतिज्ञातमसमाप्य कथमर्थान्तरमुच्यत इत्याशंकां तावत्परिहरति ॥ साध
नमिति ॥ ज्ञानस्येति शेषः ॥ तत्र तत्र भगवन्महिम्नोऽपि वर्णित[illegible] त्वेन प्राधान्येनेत्युक्तम् ॥ प्राचुर्येणेति ॥ उक्तमित्यनेन प्रतिज्ञातसमाप्तिं
सूचयति ॥ तच्च प्रतिज्ञानुकरणादवगम्यते ॥ इदानीमुत्तरग्रंथस्य प्रतिपाद्यमाह ॥ उत्तरैस्त्विति ॥ अध्यायैरिति वर्तते ॥ अनेन ज्ञानविज्ञानश
ब्दौ ज्ञेयभगवन्माहात्म्यपराविति सूचितम् ॥ अत्रापि काचित्स[illegible] धनोक्तत्वात् प्राधान्येनेत्युक्तम् ॥ संगतिस्तु प्रथमश्लोक एवोक्ता ॥ अ

श्रीमद्वरदराजायनमः ॥ ओं ॥ साधनं प्राधान्[illegible] ॥ नोक्तमतीतैरध्यायैः ॥ उत्तरैस्तु षड्भिर्भगवन्माहा
॥ त्म्यंप्राधान्येनाह ॥ आसक्त ॥ [illegible] मनाः ॥ अतीव स्नेहयुक्तमनाः ॥

नेनद्विविधेन योगेन यज्ज्ञातव्यं तच्छृण्वित्युक्तत्वात् ॥ आसक्तमनाह ॥ [illegible] मनाः इति प्रतीतिनिरासायाह ॥ आसक्तेति ॥ अतीवेत्याद्यर्थः

संबंधमात्रस्य योगानंगत्वादितिभावः ॥ योगेऽह परमात्मन इति तृतीये [illegible] पि [illegible] ॥ [illegible] मिति पंचमे ॥ सर्वभूतस्थमात्मानमितिषष्ठे चे
त्यर्थः ॥ अतएव वीप्सायां द्विरुक्तिप्रयोगः ॥ ननु भगवन्महिमज्ञानार्थमेव योगस्य प्रवर्तित [illegible] प्राधान्येन मुक्तमित्यत आह ॥ प्राचुर्येणेति ॥ बहुप्रयोगेनेत्यर्थः ॥ यद्वा ननु न
त्वेवाहम् बहूनि मेव्यतीतानीत्यादौ भगवन्महिमाऽपि प्राधान्येनोक्त ॥ [illegible] आह ॥ प्राचुर्येणत्यर्थ इति ॥ प्रतिज्ञातेरेति ॥
ज्ञानं तेऽहं सविज्ञानमिति प्रतिज्ञातेरित्यर्थः ॥ अनेनेति ॥ भगवन्माहात्म्यमित्यनेनेत्यर्थः ॥ संगा [illegible] ॥ अतीवेत्याद्यर्थ इति ॥

१ यद्वाज्ञेयेत्याद्यंतमेकं वाक्यम् ॥ कर्मसमाधिरूपेणसाधनेनज्ञेयेत्यर्थः ॥ २ ज्ञानविज्ञानशब्दौ [illegible] माणि इत्युक्तावितियावत् ॥

तद गी नु ता भा

॥ श्री० ॥ प्राधान्येनेत्यपिक्वचित्पाठः ॥ तत्र सविज्ञानमिति विज्ञानस्य साहित्योक्त्याऽप्राधान्यप्राप्तं ज्ञानस्य प्राधान्यं सिध्यतीति भावः ॥ ननु कारणस्य कार्ये कथमंतर्भाव इत्यत आह ॥ अहंकारशब्दार्थ इति ॥ ननु तथाऽप्यनुपपत्तिः अहंकारशब्दस्योभयवाचकत्वाभावादित्यत आह ॥ कार्यवाचिनेति ॥४॥ अनेकार्थत्वादिति ॥ परशब्दस्य वैरिपर्यायत्वादपरशब्दः अवैरित्वाद्यर्थक इत्यर्थः ॥ भाष्ये वक्ष्यमाणामित्यनंतरं परामिति शेष ॥सन्निधानादिति ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परामिति शब्दसन्निधानादित्यर्थः ॥ ज्ञानात्मकाते ॥ तथा च देहातिरिक्तप्राणास्तस्या न संति यतोऽतः स्वप्राणधारिणीत्यर्थो नांगीकार्य इति भावः ॥ गौणीं वृत्तिमिति ॥ जीवगतचिद्रूपत्वगुणयोगेनेत्यर्थः

रसोऽहमित्यतः प्राक्तनग्रंथसंग्रहायादिपदम्॥महत्तत्वमत्रनोपात्तं तत्किं न ।स्त्येवेत्यत आह ॥ महत इति ॥अहंकारेऽहंकारशब्दार्थेऽतर्भावः ॥ कार्य वाचिनाहंकारशब्देन कारणस्य महतोऽप्युपलक्षणमेव नत्वभाव इत्यर्थः ॥ ४ ॥ अपरशब्दस्यानेकार्थत्वात् विवक्षितमर्थमाह अपरेति ॥ अनुत्तमत्वस्य सापेक्षत्वात् किमपेक्षयेत्यत आह ॥ वक्ष्यमाणामिति ॥सन्निधानादिति भावः ॥ जीवलक्षणां जीवत्वं प्राप्तामितिव्या

महताऽहंकार एवांतर्भावः ॥ ४ ॥ अपराऽनुत्तमा ॥ वक्ष्यमाणामपेक्ष्य ॥ जीवभूता श्रीः ॥ जीवानां

भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

॥ प्राणधारिणी ॥ चिद्रूपभूता सर्वदासती ॥

ख्यानानिरासार्थमाह ॥ जीवभूतेति ॥ कथं सा जीवभूतेति यत आह ॥ जीवानामिति ॥ प्राणधारिणीत्येवोक्ते स्वप्राणधारिणीतिप्रतीतिः स्यात तन्निरासार्थमुक्तम् ॥ जीवानामिति ॥ सर्वजीवदेहेषु स्थित्वा तदीयान्प्राणांस्तत्र धारयतीत्यर्थः ॥ स्वप्राणधारिणी कुतो न स्यादित्यत आह॥चिद्रूपेति ॥ज्ञानात्मकविग्रहवती॥ यद्वा जीवप्राणधारकत्वं कारणादित्यतो जीवशब्दस्य यौगिकार्थमुक्त्वा गौणीं वृत्तिमाश्रित्यार्थांतरमनेनोक्तम् ॥

॥ कृ० ॥ ननु कार्ये कारणस्य कथमंतर्भाव इत्यत आह ॥ अहंकारशब्दार्थ इति ॥ ननु तथाऽप्यनुपपत्तिरहंकारशब्दस्योभयवाचकत्वादित्यत आह ॥ कार्यवाचिनेति ॥ ४ ॥ अनेकार्थत्वादिति ॥ अपरस्त्वनुनार्थे स्यात्पश्चाद्दात्रे च वैरिणः ॥ अर्वाचीने परं प्राहुरिति विश्वोक्तेरिति भावः ॥ ननु जीवसंबंधिप्राणधारकत्वे जीवानामेव न तु प्रकृतेरित्यत आह ॥ सर्वजीवेति ॥ गौणींवृत्तिमिति ॥ जीवगतचिद्रूपत्वगुणयोगेनेत्यर्थः ॥

१ परोऽरिपरमात्मनोरितिकोशात् ॥ २ कोशांतरात् ॥ ३ स्वकीयेत्यर्थः ॥ ४ देहस्याभिन्नत्वात्प्राणानामपि तथात्वाद्धारकसंबंधस्यतुभेदसापेक्षत्वादितिभावः ॥

॥ श्री० ॥ स्वानुभवेति ॥ विज्ञानसहितं ज्ञानमित्यत्र विज्ञानशब्देन ज्ञानज्ञानरूपानुव्यवसायाख्यं स्वानुभवं गृहीत्वा स्वानुभवसंयुक्तं स्वानुव्यवसायसहितं इदं ज्ञानमिति व्याख्यानमित्यर्थः ॥ अन्ये तु स्वानुभवसंयुक्तं कृष्णानुभवसिद्धमित्यर्थ इत्याहुः अपरस्येति ॥ उत्तरत्र स्वानुभवस्याकथनादित्यर्थः ॥ २ ॥ ननु ज्ञानवद्विज्ञानस्यापि दौर्लभ्यं वक्तव्यं ततश्च ज्ञानविज्ञानयोरिति वक्तव्ये ज्ञानस्येति कथमुक्तमित्यत आह ॥ ज्ञानस्येति ॥ ३ ॥ अन्यार्थम ॥ दौर्लभ्यार्थम ॥ अनन्यार्थता ॥ प्राधान्यम् प्राथम्ये प्रथमतो निरूपणे ॥ असंगतिपरिहारः कथमित्यत आह ॥ प्रतिज्ञातत्वेनेति ॥ कथमनन्यार्थताज्ञापनमित्यत आह॥ प्रतिज्ञातमेवेति ॥ न तु तदर्थमिति ॥ अन्यत् किंचिदत्रोच्यत इति शेषः ॥ प्राथम्ये कथं हेतुसूचनमित्यतः प्राथम्येनेति पदाध्याहारेण तत्सिद्धिरिति भावेनाह ॥ प्राथम्येनेति ॥ ज्ञानं तेऽहमिति प्राथम्येन प्रतिज्ञातत्वात् प्रथमतो निरूपणमिति भावः ॥

ननु ज्ञानं वक्ष्यते न तूक्तं तत्कथमिदमिति परामर्श इत्यत आह ॥ इदमिति मामिति स्वस्य प्रकृतत्वात् तत्संबंधित्वेन ज्ञानमपि प्रकृतमिति भावः ॥ सविज्ञानं स्वानुभवसंयुक्तमित्येतदपाकर्तुं विज्ञानपदार्थमाह ॥ विज्ञानमिति ॥ अस्यैव वक्ष्यमाणत्वादपरस्य तदभावादिति भावः ॥ २ ॥ ननु ज्ञानादिवचनं प्रतिज्ञाय यत्किंचित्कथमुच्यतइत्यत आह ॥ दौर्लभ्यमिति ॥ श्रोतुरादरजननार्थमिति शेषः ॥ ज्ञानस्य

इदं मद्विषयं ज्ञानम्॥विज्ञानं विशेषज्ञानम्॥२॥दौर्लभ्यं ज्ञानस्याह॥मनुष्याणामिति॥३॥प्रतिज्ञातं ज्ञानमाह ॥

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः॥यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ ३

दौर्लभ्ये विज्ञानस्य तत्सुतराम् ॥ ३ ॥ मनुष्याणामितिवदुत्तरमप्यनन्यार्थमितिप्रतीतिनिरासार्थं प्रतिज्ञातयोरुभयोः किमादावुच्यत इत्यपेक्षायांचाह ॥ प्रतिज्ञातमिति ॥ असंगतिपरिहारायानन्यार्थताज्ञापनायच ज्ञानस्य प्राथम्ये हेतुसूचनायच प्रतिज्ञातमित्युक्तम् ॥ प्रतिज्ञातत्वेनसंगतं प्रतिज्ञातमेव ॥ न तु तदर्थं प्राथम्येन प्रतिज्ञातम्॥

॥ रू० ॥ २ ॥ ननुश्रोतुरादरजननार्थं ज्ञानस्येव विज्ञानस्यापि दौर्लभ्यं वाच्यं तत्कुतो नोक्तमित्यत आह ॥ ज्ञानस्य दौर्लभ्य इति ॥ ३ ॥ प्राधान्येनेति ॥ सविज्ञानमित्युक्त्या विज्ञानस्याप्राधान्यलाभः ॥ समासान्तर्गततृतीयायाः सहयुक्तेऽप्रधान इतिसूत्रविहितत्वादिति भावः ॥

॥ श्री० ॥ **इयम्** ॥ जडा प्रकृतिः ॥ **तया** ॥ श्रिया ॥ अनादिनिधनेति कालानंत्य
त्वात्गुणतः आनंत्यं तु कथम ॥ देशतः कालतश्चैव गुणतश्च त्रिधा ततिः ॥ सा समर
कोटिगुणाधिकत्वेन गुणतः सांतत्वमेवेति चेन्मत्यम ॥ गुणतोऽनंतशब्दस्य बहुगुणत्वे
प्रकृतीइत्यर्थः ॥ विषयः शब्दादिः ॥ **तयोरेवेति** ॥ परापरप्रकृत्योरित्यर्थ.
इत्याशयः ॥ इति दर्शयितुमिति ॥

त्वादाह ॥ **देशतो गुणतश्चेति** ॥ ननु श्रियो देशत आनंत्यं संभवति समेनाचेत्युक्त
त्वान्य पूर्णसद्गुणा इति तस्य भगवदसाधारणधर्मत्वावगमेनास्यामसंभवात् ॥ ब्रह्मापेक्षया
।प इति ध्येयम ॥ भाष्ये अनादिनिधनत्वेन परेत्यर्थो द्रष्टव्यः ॥५ ॥ **परापरेति** ॥
इंद्रियादिरूपजडस्य कारणे भूम्यादौ जीवानां च जीवप्राणधारकचित्प्रकृतावंतर्भाव

जडेत्यवरत्वोपपादनम् ॥ श्रीःपरेत्यस्योपपादनमियं धार्यतेनया
क्रियावती॥५॥नन्ववरापरप्रनिरूपणपूर्वकं भगवतः यत्परत्व

अवरासाजडाश्रीश्च परेयंधार्यते तथा॥चिद्रू
पत्वविष्णोर्महात्मनः॥ नारायणस्य म
सृजा

अनंता देशतः गुणतश्चपरा मुख्या॥अनादिनिधना ॥ नत्वव्यक्तवद्धि
माभिप्रेतं तत्रशरीरेंद्रियविषयलक्षणास्यकार्यस्य जीवानां च तयोरेवांतर्भा

श्चनंता च अनादिनिधना परा॥यत्समं तु प्रियं किंचिन्ना
माता सा ब्रह्मणोऽपिहि ॥ ताभ्यामिदं जगत्सर्वं हरिः
तराडिति नारदीये ॥ ५ ॥

वइति दर्शयितुमेतयोनीनीत्युक्तम्॥ रु० ॥ नन्वनंतेति
हगुणत्वरूपं परत्वोपपादकं न तु देशानंत्यं जडानंत्यमाधारण्यादिति
त्वयि अन्यथा वैयर्थ्यादिति भावेनतद्व्याख्यमाह ॥ न त्वव्यक्तव.
वाचकशब्देन तु चिद्रूपत्वाख्यगुणयोगेन गौण्या जीवानां ग्रहणमित्यर्थ
१ अ.४ पा. २ अ. ६ सू. १ ओं समनाचामत्युक्रमादमृतत्वं चानु
पणाभावात् ॥ सचतस्याः समानत्वात् ॥ देशकालाभ्यां व्याप्तःसमान.परम

॥ अत्र गुणानंत्यमेवब
क्तौ अनादिनिधनेति पुनरुक्तं स्यादित्यतआह ॥ **अनंता देशतो गुणतश्चेति** ॥ अत्र गुणानंत्यमेवब
म ॥ परशब्दस्यानेकार्थत्वादाह ॥ **परामुख्येति** ॥ मुख्यत्वं सविशेषणे हीति न्यायेनानादिनिधनत्वा
५ ॥ **तयोरेवांतर्भाव इति** ॥ अपरप्रकृतिवाचकशब्देन तत्कार्यशरीरादिरूपलक्षणम् ॥ परप्रकृति
कदापिसंसारोपक्र
॥नश्री.रीशंकीयते॥ अनुगत्यैव स्वतएव तस्यानित्यमुक्तत्वात् ॥ तस्यानित्यमुक्तत्वं ॥ कदापिसंसारोपक्र
स्थाः सेति विग्रह इतिसूत्रार्थः ॥

॥ श्री० ॥ ननु जीवभूतामिति विशेषणस्य किं प्रयोजनमित्यत आह ॥ प्रकृति[मिति] ॥ जडप्रकृतिमित्यर्थः अनेन सर्वदा सतीत्यत्रैकप्रकारेणेति ग्राह्यम् ॥ जडप्रकृतेश्च विकारित्वेन तदभावादिति भावः ॥ एतदिति ॥ जीवभूतामिति विशेषणमित्यर्थः ॥ देवस्यैवेति ॥ अधीन इति शेषः ॥ सृज्यत्वस्यार्थमाह ॥ सृज्यत इति पंचतन्मात्राणि ॥ पृथिव्यादिभूतकारणभूतानि गंधरसरूपस्पर्शशब्दाख्यानीत्यर्थः ॥ कुत एवं व्याख्येयमित्यत आह । भिन्नाप्रकृतिरिति ॥ भास्करस्येदं व्याख्यानं तन्मते च प्रकृतिशब्द उपादानार्थकः ॥ अतएवान् व्याख्याने तन्मतानुवादसमये न च प्रकृतिशब्देन ब्रह्मोपादानमुच्यत इत्युक्त ॥ एवंचात्र गीतायामुक्तत्वोपादानकारणस्यैवाष्टधा भिन्नत्वोक्तिर्भूम्यादिशब्दैस्तदुपादानमेव ग्राह्यमिति भावः ॥ प्रसिद्धार्थेति ॥ गुणत्रयलक्षणप्रसिद्धप्रकृतिपदार्थेत्यर्थः ॥ ननु गीतायामहंकारतत्त्वग्रहणात् प्रमाणे च तदभावाद्विसंवाद इत्यत आह ॥ महतीति ॥ कार्यस्य कारणांतर्गतत्वात्तद्ग्रहणेन कार्यमपि गृहीतमेवेति भावः ॥ इत्येवेति ॥ तथा चेत्यष्टधा भिन्नत्यन्वयोद्रष्टव्यः ॥

भूतशब्दस्य सर्वदासत्त्ववाचित्वे प्रयोगं दर्शयति ॥ एतदिति ॥ प्रकृतिमपेक्ष्य श्रियः परत्वोपपादनार्थमेतत् ॥ भूमिरित्यादेरभिमतमर्थं पुराणवाक्येन स्थापयति ॥ जगाद चेति ॥ देवस्यैव ॥ सृज्यत इति सृष्टिः कार्यं कार्यरूपेणेत्यर्थः ॥ अनेन भूम्यादिशब्दैः पंचत

एतन्महद्भूतमिति श्रुतेः जगाद च ॥ प्रकृती द्वे तु देवस्य जडा चैवाजडा तथा ॥ अव्यक्ताख्या

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ५॥

जडा सा च सृष्ट्या भिन्नाऽष्टधा पुनः ॥ महान्बुद्धिर्मनश्चैव पंचभूतानि चेति ह ॥

न्मात्राण्येवोच्यंते ॥ न स्थूलानि भूतानि ॥ मन इति तत्कारणमहंकारः ॥ बुद्धिरिति महत्तत्त्वमहंकार इति अविद्यासहितमव्यक्तं भिन्ना प्रकृतिरष्टधेति वचनादिति व्याख्यानं निरस्तम् ॥ कार्यरूपेणाष्टधाभिन्नेति व्याख्यानसंभवेन प्रसिद्धार्थपरित्यागायोगान्महत्यहंकारस्यांतर्भावः इत्येवेति संबंधः ॥

॥ कृ० ॥ ननु जीवभूतेति विशेषण किमर्थमित्यत आह ॥ प्रकृतिमपेक्ष्येति ॥

॥ श्री॰ ॥ केवलमुपचरितं नेत्यस्य फलितमर्थमाह ॥ प्रकृतेरिति ॥ प्रकृतिनिष्ठं जगत्कारणत्वादिकमित्यर्थः ॥ तथा च प्रकृती मद्वशे इत्येतावत् इत्येतावता जगत्प्रति ममैश्वर्यं केवलं प्रकृतिद्वारकमुपचरितं न भवति किं नाम यत्प्रकृतेर्जगत्कारणत्वादि तत्सर्वं मदधीनमतोऽहमिव मुख्यतो जगत्कर्तेति जगत्प्रतिममैश्वर्यं न प्रकृतिद्वारकमुपचरितमित्याहेति भाष्यार्थो द्रष्टव्यः विष्णोर्जगत्प्रभवादिभोक्तृत्वप्रकारं सदृष्टांतमाह ॥ यथेत्यादिना ॥ पित्रादेरित्यत्रादिपदाद्वैरिग्रहणम् ॥ तथा च यथापुत्रप्रभव उपलब्धः सुखहेतुरिति तदुपलब्धुः पितुः पुत्रादिप्रभव भोक्तृत्वं तथा रिपुप्रलयश्चोपलब्धः सुखहेतुरिति तदुपलब्धुस्तद्वैरिणो रिपुप्रलयभोक्तृत्वं तथा जगत्प्रभवप्रलययोरप्युपलब्धयोर्भगवत्सुखव्यक्तिकारणत्वेन तदुपलब्धुर्भगवतस्तद्भोक्तृत्वं युक्तमित्यर्थः ॥ ननु सर्वगंधः सर्वरस इत्यादिना सर्वगंधादिरूपत्वमेवोच्यते न तु तद्भोक्तृत्वमतः कथमियं श्रुतिर्भोक्तृत्वे प्रमाणमित्यत आह ॥ सर्वकाम इत्यादेरिति॥ छांदोग्यश्रुतावितिशेषः सर्वकामः सर्वकर्मा सर्वगंधः सर्वरस इत्युक्त्वा पुनरुत्तरत्रापि सर्वकामःसर्वकर्मा सर्वगंधः सर्वरस इत्युक्तत्वादेकं सर्वगंधादिभोगविषयं अपरं सर्वगंधादिस्वरूपविषयमित्यवश्यमंगीकार्यम् ॥ अन्यथा पौनरुक्त्यापत्तेः ॥ उक्तं च छांदोग्यभाष्ये ॥ एकत्र सर्वगंधादिना चिदानंदात्मकसर्वगंधादिरूपत्वमुच्यतेऽन्यत्र तु तद्भोक्तृत्वमिति ॥

प्रकृत्योः कारणत्वादिकं मदायत्तमिति भावः ॥ जगद्धर्मयोः प्रभवप्रलययोःसाक्षाद्भगवदैक्यमुच्यत इति प्रतीतिनिरासार्थमाह॥प्रभवादेरिति॥ यथा पुत्रादिप्रभवो रिपुप्रलयश्चोपलब्धःसुखहेतुरित्युपलब्धः पित्रादेस्तद्भोक्तृत्वं तथा तद्भोक्तृत्वात्॥भगवतः सर्वभोक्तृत्वं कुत इत्यत आह॥

प्रभवादेःसत्ताप्रतीत्यादेःकारणत्वात्तद्भोक्तृत्वाच्च प्रभव इत्यादि ॥ तथाच श्रुतिः ॥ सर्वकामःसर्वकर्मा ॥ सर्वगंधःसर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर इति ॥

तथा चेति॥सर्वकामइत्यादेर्द्विरुक्तत्वात् एकं भोगविषयमिति ज्ञायते॥ कृ॰ ॥प्रकृतिद्वारकमिति ॥ प्रकृतिनिष्ठं जगदाधारत्वादिरूपं जगदैश्वर्यं प्रकृतिस्वामिन्युपचर्यत इत्यर्थः ॥ ननु जगत्कारणत्वाद्यैश्वर्यं प्रकृतिद्वारकमुपचरितं नभवतीत्याहेत्यनेन भगवतः साक्षाज्जगत्कारणत्वादिकं गीताप्रतिपाद्यमितिप्राप्तम् ॥ नचैतद्युज्यते ॥ प्रभवादेःसत्ताप्रतीत्यादीतिभाष्येणजगत्कारणत्वादि स्वाम्यस्यैव गीताप्रतिपाद्यत्वोक्तेः ॥ अन्यथा सत्ताप्रतीत्यादिशब्दवैयर्थ्यादित्याशंक्यान केवलमित्यस्य फलितमाह ॥ प्रकृत्योरिति ॥ ननु प्रभवादेरूपादिवद्भोग्यत्वाभावात्कथं तद्भोक्तृत्वं भगवत इत्यत आह ॥ यथा पुत्रादीति ॥ ननु सर्वकाम इत्यादिना कामाद्यैक्यमुच्यते न तु तद्भोक्तृत्वमित्यत आह ॥ सर्वकाम इत्यादेरिति ॥ सर्वकाम इतिवाक्यं छांदोग्ये द्विः श्रूयते ॥ तत्रैकं गंधादिभोगपरं द्वितीयं गंधाद्यैक्यपरत्वमेव अन्यथापुनरुक्तेः अत एवोक्तं छांदोग्यभाष्ये ॥ आह ॥

१ पंचम प्रपाठके खं. १४ । २ अ. ३

गेनेत्यध्याहर

॥ श्री० ॥ तथा चैतद्योनीनीत्यस्य प्रकृतोपयोगः स्पष्टं प्रतीयते इति भाष्ये तदनुक्तिरित्युक्तंणोर्गीताकृत्स्नं इदं विद्धि ॥ अहं कृत्स्नस्येतीदंवाक्यमित्यर्थः ॥ वाक्यभेदेनेति ॥ [1]श्वर्यबुद्धिरि
अष्टधाभिन्नेयं प्रकृतिर्मे मदधीना जीवभूतप्रकृतिमपेक्ष्यापरा चेति विद्धीत्येकं वाक्यं इतो जडप्रकृतितः ॥ अतः परां चित्प्रकृतिं मे मदधीनां विद्धीत्यपरं वाक्यमिति वाक्यभेदेनेत्यर्थः ॥
ननु जगत्प्रकृती इत्यत्र द्वंद्वसमासाश्रयणे जगतो भगवद्वशत्वस्य साक्षादनुक्तानुवादापत्तिः परापरप्रकृत्योर्भगवद्वशत्वस्योक्तत्वेनैकप्रकृतिपरित्यागश्चापद्येत षष्ठीतत्पुरुषाश्रयणे तु जगत
इति व्यर्थमित्यतो भिन्नपदत्वमाश्रित्यान्वयं दर्शयन् व्याचष्टे ॥ जगत्प्रतीति ॥ केवलं प्रकृती मद्वशे इत्येतावदित्यस्य तात्पर्यार्थः ॥ प्रकृतिद्वारकमुपचरितमितीति ॥ केवलशब्दा
र्थः॥उपचरितमिति॥मदधीनप्रकृतेर्जगत्कारणत्वात् तद्वारा परंपरया जगदपि मदधीनमित्युपचरितमित्यर्थः ॥ कृ० ॥ कथमनेनोक्तशंकानिवृत्तिरित्यत आह॥पूर्वमिति॥वाक्यभेदेनेति॥

इदानीमहं परतर इति वक्तव्यं इदं तु किमर्थमुच्यत इत्यत आह ॥ न केवलमिति।पूर्वं वाक्यभेदेन प्रकृत्योरवरत्वं परत्वं च इति स्ववशत्वं चोक्तं यथेदं धार्यते जगदेतद्योनीनीति जगदाधारत्वकारणत्वे कथिते तत्र प्रकृती एव भगवद्वशे जगज्जन्मस्थितिलयास्तु प्रकृत्यधीना एव न

न केवलं ते जगत्प्रकृती मद्वशे इत्येतावन्मदैश्वर्यमित्याह ॥अहमिति ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

भगवदधीना इति प्रतीतं तन्निरासार्थमेतदित्यर्थः ॥ जगत्प्रतिनियममैश्वर्यमित्येतावत् प्रकृतिद्वारकमुपचरितमिति यावत् ॥अष्टधा भिन्नेयं प्रकृति र्मे म
दधीनेत्येकं ॥ इयं चापरेति द्वितीयम् ॥ एवमितोऽन्यां प्रकृतिं परां विद्धीत्येकं वाक्यं तां चमे मदधीनां विद्धीति द्वितीयमित्येवं वाक्यभेदेनेत्यर्थः ॥ ननुकेवलं ते जगत्प्रकृती मद्वशे
इत्येतावन्मदैश्वर्यं नेत्युक्त्याऽधिकमपि मद्वशमिति प्रतीयते न च तदुक्तम् ॥ अधिकस्यैवाभावादिति चेन्न ॥ ममैश्वर्यं जगत्प्रकृती मद्वशे इत्येतावत्केवलं नेत्यन्वयात् ॥ ननु तथा
पि जगत्प्रकृती इति न द्वंद्वः ॥ परापरप्रकृत्योर्भगवद्वशत्वस्योक्तत्वेनैकप्रकृतिपरित्यागापत्तेः ॥ प्रकृतिपदस्य जगदुपलक्षकत्वेन जगत्पदवैयर्थ्यापत्तेश्च ॥ षष्ठीतत्पुरुषत्वेच जगत
इति व्यर्थमित्यतो भिन्नपदत्वमाश्रित्य व्यवहितान्वयमाह ॥ जगत प्रतीति ॥ नन्वित्येतावदित्यनेन जगदैश्वर्यस्य प्रकृतिद्वारमित्वतादात्म्यमनूद्यत इति वक्तव्यम् ॥नचनद्युक्तं तादात्म्यस्या
प्रसक्तेरित्यत आह ॥ उपचरितमिति ॥ यावदिति ॥ उपचारजीवसंबंधं वक्तुमुक्तम् ॥

१ अपरांचेत्यर्थः ॥

॥ श्री० ॥ द्रव्याणीति ॥ तथा च तद्भोक्तृत्वं युक्तमित्याशयः ॥ स्थित इति तात्पर्यार्थः ॥ आश्चर्यबुद्धिरिति ॥ स्वस्यैव सर्वाश्चर्यरूपत्वात्तस्यान्यत्राश्चर्यबुद्धिर्नास्तीत्यर्थः ॥ कारण त्वादिनेति ॥ प्रभवादेः सत्तादिकारणत्वादिना तेनैक्यव्यपदेश इत्येतत्कृत इत्यर्थः ॥ ननु विष्णोर्गीताकसुखव्यक्तिकारणप्रभवादिभोक्तृत्वे सुखरूपस्येत्येतत्कथं प्रमाणमित्यत आह ॥ सुखकारणस्येति ॥ शुभविषयस्येत्यर्थः ॥ रूप्यते जायतेऽनेनेति रूपशब्दः कारणपर इति ध्येयम् ॥ अनयैव रीत्या सर्वत्रापि शुभं पिबतीत्यादौ शुभशब्दः शुभविषयपर एव तथा कर्मफलभोक्तृत्वस्यापि सुखरूपकर्मफलसाधनशुभविषयभोक्तृत्वेतार्थो द्रष्टव्यः ॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते इति वक्ष्यमाणत्वादि ति ध्येयम् ॥ कादाचित्कत्वादि ॥ स्रष्टृत्वादेः क्रियां विनाऽसंभवात् क्रियायाश्च सदा सृष्ट्यभावेन कादाचित्कत्वात्कादाचित्कक्रियावेशेन भगवतो विकारित्वं प्रसज्यत इत्यर्थः ॥

काम्यंत इति कामा द्रव्याणि ॥ गंधरसशब्दा गुणांतरस्याप्युपलक्षकाः ॥ सर्वमिदमाभि अभितः ॥ आप्तो धृतः स्थित इत्यर्थः ॥ न वि द्यते वाक्यमनुग्रहमंतरेण यस्यासाववाक्यः ॥ न विद्यते आदरः आश्चर्यबुद्धिर्यस्यासावनादरः ॥ अवाक्यश्चासौनादरश्चेत्यवाक्यनादरः ॥ कार णत्वादिनैवैक्यव्यपदेश इत्येतत्कृत इत्यत आह ॥ आह चेति ॥ सुखरूपस्य सुखकारणस्य ननु स्रष्टापातेत्यादिकमयुक्तंकादाचित्कक्रियावे

आह च ॥ स्रष्टा पाता चसंहर्ता नियंताच प्रकाशिता॥यतः सर्वस्यतेनाहं सर्वोस्मीत्यृषिभिस्तुतः॥ सु खरूपस्य भोक्तृत्वान्न तु सर्वस्वरूपतः ॥ आगामिष्यत्सुखंचापितच्चास्त्येव सदा पितु ॥

शे विकारित्वप्रसंगात ॥ भोगेन यद्भाव्यं सुखं तस्य पूर्वमभावेनापूर्णत्वप्रसंगाच्चेत्यत आह ॥ आगामिष्यादीति ॥ यद्भोगेनागामिष्यत्सुखं तच्च सदाऽप्यस्त्येवाक्रियाश्च शक्तिरूपेण चेति चार्थः॥तर्हि कथं भोगेन जातमित्युच्यत इति भावेन पृच्छाति॥अपि त्विति ॥कृ०॥एकत्रानंदात्मकसर्वगंधादि रूपत्वमुच्यतेऽन्यत्र तद्भोक्तृत्वमितीति भावः ॥ इच्छाया अभोग्यत्वादाह ॥ काम्यंत इतीति ॥ ननु विषयान्प्रति भगवत आभिमुख्येन स्थितत्वे तद्भोक्तृत्वं स्यात् ॥ तदेव कथमि त्याशंकानिवृत्त्यै श्रुतौ सर्वमिदमभ्याप्त इत्युक्तम् ॥ तद्व्याचष्टे ॥ सर्वमिदमिति ॥ नन्ववाक्यत्वं नामवाक्यशून्यत्वं तच्चवाक्यावक्तृत्वं वा वाक्याविषयत्वं वा ॥ नाद्यः ॥ मूकत्व प्रसंगात ॥ नांत्यः ॥ वाक्यैकगम्यस्येश्वरस्य वाक्याविषयत्वोक्तावसिद्धिप्रसंगादित्यत आह ॥ 'न विद्यते वाक्यमिति ॥ ननु नादरत्वमादरभिन्नत्वं वा ॥ आदरशून्यत्वं वा ॥ ना द्यः ॥ जीवसाधारण्येनविशिष्योक्त्ययोगात ॥ नांत्यः ॥ ईश्वरस्यापि भक्तेष्वादरवत्त्वादित्यत आह ॥ न विद्यते आदर इति ॥ नसमासत्वान्नलोपो नेति भावः ॥ ननुसुखकारण स्यप्रभवादेर्भोक्तृत्वत्र सुखरूपस्येति कथं प्रमाणमित्यत आह ॥ सुखकारणस्येति ॥ भोगेनेत्यध्याहरन्व्यवहितानामन्वयं द्वितीयचशब्दार्थं चाह॥यद्भोगेनेति ॥

शक्तिरूपेण संतीत्यर्थः ॥ यथोक्तम ॥ सविशेषेऽपि क्रियावेशः शक्त्यात्मना स्थिर इति ॥ महिमातिशयो भोक्तृत्वाख्यः ॥ एतेनेति ॥ अस्मदीये प्रामाणिकव्याख्याने महिमातिशयला
भेनेत्यर्थः ॥ मम प्रकृती ॥ ममाधीने प्रकृती इत्यर्थः ॥ अत इति ॥ प्रकृतिद्वारा परंपरयेत्यर्थः ॥ ६॥ अपर परं चेति ॥ जडाजडप्रकृत्याख्यम ॥ ननु श्रीरूपतरत्वस्यैकत्वात कथ प
रतरत्वमनेकविधमित्युच्यते इत्यत आह ॥ मुक्तस्येति ॥ इति वचनादिति ॥ मुक्तस्तु स्यात्पराभास सुनित्यसुखभोजनादिति गीतातात्पर्यवचनादित्यर्थः ॥ सुनित्यसुखभोजनादवर
त्वाभावेऽपि प्राग्दुःखसंबंधात पराभास एव न मुख्यतः पर इति वचनादित्यर्थः ॥ भगवत्प्रतियोगिकेति ॥ तथा परतरत्वमनेकविधमित्युक्ते अपरतरत्वेन ब्रह्मादिजीवसमाना जीवाः
संतीति लभ्यते यथा हि परतत्त्वं अनेकविधमित्युक्ते परतत्त्वेन श्रीसमानाः मुक्ताः संतीति लभ्यते एवं परतरमनेकविधं उतैकविधमिति शंकायां अनेकविधत्वे भगवानेकः परतरः तत्सदृ
शोऽन्यः परतरो नास्तीति प्राप्तेस्तः परतरोऽहमेक एव मत्सदृशोऽन्यः परतरो नास्तीति समनिषेधप्रतिपादनेसंशंकानिरासक न तु भगवत्सकाशादधिकनिषेधः स एव चात्र प्रतीयतेऽ
तः कथं समनिषेधोऽनेन लभ्यत इत्यर्थः ॥ भाष्ये मत्तोऽन्यत परतरमित्युक्त्या मत्सदृशमिति सूचितं भवति ॥ अन्यथेति ॥ समनिषेधमनंगीकृत्य भगवत्प्रतियोगिकाधिक्यवन्निषेधार्थ
कतांऽगीकारे मत्तः परो नास्तीत्येतावतैवाधिकनिषेधसिद्धेस्तरबन्यशब्दयोर्वैयर्थ्यं स्यादिति भावः ॥ ७ ॥ ॥ कृ० ॥ महिमातिशये

उत्तरमाह ॥ तथाऽपीति ॥ सदा सद्भावेऽपि यद्यपि प्रभवत्यस्मादिति प्रभवः ॥ प्रलीयतेऽस्मिन्निति प्रलय इति शक्यते व्याख्यातुम् ॥
तथाऽपि महिमातिशयलाभायैवं व्याख्यानम् ॥ एतेन यस्मान्ममप्रकृती योनी सर्वभूतानां ततोऽहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेति
व्याख्यानमपहस्तितं भवति ॥ ६ ॥ नन्वपरं परं च तत्त्वमुक्त्वा परतरोऽहमिति वक्तव्यं मत्त इति किमुच्यत इत्यतस्तात्पर्यमाह॥अहमेवेति॥

तथाप्यचिंत्यशक्तित्वाज्ज्ञानं सुखमतीव चेति नारदीये॥६॥अहमेव परतरो मत्तोऽन्यत्परतरं न किंचिदपि॥७॥

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥ ७॥

परापरप्रकृत्योः स्वाधीनत्वोक्त्यैव स्वस्यपरतरत्वमुक्तप्रायम्॥किं त्वपरतत्त्वं यथाऽनेकं भूम्यादिभेदेन यथा च परतत्त्वं मुक्तस्तु स्यात्पराभास
इति वचनात्॥तथापरतरमपि किमनेकमुत त्वमेकएवेति जिज्ञासायामहमेव परतर इत्यनेनोच्यत इत्यर्थः कथमनेनेदं लभ्यते ॥ भगवत्प्र
तियोगिकाधिक्यवन्निषेधस्यात्र प्रतीतेरित्यतो योजयति ॥ मत्त इति ॥ अन्यथा तरपोऽन्यशब्दस्य च वैयर्थ्यादिति भावः ॥ ७ ॥

ति ॥ भोक्तृत्वाख्यमहिमातिशयेत्यर्थः ॥ ६ ॥ ननु परतरत्वस्य प्रागनुक्तत्वात्तदेवविधातव्यं अवधारणं तुव्यर्थं ॥ किं चास्त्विदं तात्पर्यम॥ तथाऽप्यहमेव परतर इत्युक्तेः का पूर्वसं
गतिरित्यत आह॥परापरप्रकृत्योरिति॥आधिक्यवन्निषेधस्येति॥मत्तःपरतरमित्यव्यवहितान्वयाभिप्रायेणेदम् ॥तस्येति ॥मत्तः परतरं नास्तीत्येतावतैवाधिकनिषेधसिद्धेरिति भावः ॥७॥

॥ श्री० ॥ अत्रैवेत्यन्तेनेति ॥ आदिपदग्राह्यान्याह रसोऽहमित्यादीनीत्यर्थः ॥ कुत इति ॥ प्रकरणसमाप्तिर्गम्यत इति शब्दादेरभावादिति भावः ॥ अनुपपत्तिरिति ॥ धर्मिणस्तदधीनत्वे धर्माणामपि तदधीनत्वस्य प्राप्तेः पर्यालोचनया सिद्धत्वादिति भावः ॥ कारणत्वे इति ॥ रसादीनां सत्तादिकारणत्वाद्भगवान् रसादिरिति व्याख्यानं इत्यर्थः ॥ तावदिति ॥

भूमिरित्यादिनात्रैवेत्यन्तेन रसोऽहमित्याद्यपि ज्ञानप्रकरणमिति प्रतीतिः स्यात्तन्निरासाय तत्समाप्तिमाह ॥ इदमिति ॥ एतावता ग्रंथेन ज्ञानं निरूपितमित्यर्थः ॥ कुतोऽत्र ज्ञानप्रकरणस्य समाप्तिरित्यत आह ॥ रसोऽहमिति ॥ इतिशब्दाद्यभावेऽपि प्रकरणान्तरारंभ एव समाप्तिं गमयिष्यति। अलौकिकमाहात्म्यप्रतिपादनादस्याविज्ञानप्रकरणत्वं ज्ञायत इति भावः ॥ प्रभवादिरित्युक्तन्यायेनैव रसोऽहमित्यादेरपि व्याख्यानं सिद्धम् ॥ रसादीनां सत्तादिकारणत्वाद्भेदकत्वाच्च भगवान् रसादिरिति ॥ नन्वत्रादयो धर्मिणो भगवदधीनास्तद्धो

इदं ज्ञानं रसोऽहमित्यादिविज्ञानम् ॥ अत्रायोऽपि तत एव ॥ तथाऽपि रसादिस्वभावानां साराणां च

॥ स्वभावत्वे सारत्वे च विशेषतोऽपि नियामकः ॥

रसोऽहमप्सु कौंतेय प्रभाऽस्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥ ८ ॥

र्माश्चेत्यंगीक्रियते न वा ॥ नेति पक्षेऽहं कृत्स्नस्येत्युक्तविरोधः ॥ आद्ये त्वप्सु रस इत्यादेर्धर्मिभ्यो निष्कृष्य धर्माणां ग्रहणस्यानुपपत्तिरित्यतः प्रथमं पक्षं तावदंगीकरोति।अत्रादयोऽपीति ॥धर्मिणोऽपि तदधीना एव तद्धर्माश्चेव।ननु तत्रोक्तो दोष इत्यतः कारणत्वे तावद्विशेषशब्दोपादानं प्रयोजनमाह॥तथाऽपीति॥यद्यपि धर्मिणोऽपि भगवदधीना एवं तथाऽपि धर्मिभ्यो निष्कृष्य धर्माणामुपादानं युज्यत इति शेषः ॥

॥ कृ० ॥ किमनेन समाप्तिज्ञापकमुक्तमित्यत आह ॥ इति शब्दाद्यभावेऽपीति ॥ एतावताऽपीति ॥ साम्येऽपि इतरत्र प्रकरणसमाप्तिज्ञापकं भावसमादिशब्देनग्राह्यम् ॥ ननु रसोऽहमित्यादे विज्ञानप्रकरणत्वे सिद्धे पूर्वस्य ज्ञानप्रकरणत्वं स्यात्तदेव कुत इत्यत आह ॥ अलौकिकत्वेनेति ॥ प्रथमपक्षं तावदिति ॥ तत्रोक्तदोषपरिहारश्च करिष्यत इति सूचयितुं तावदित्युक्तम् ॥ षष्ठीतत्पुरुषे कृते रसादीनां ये स्वभावास्तेषां स्वभावधर्माश्च गर्वीनामिति मित्यर्थ ॥

॥ श्री० ॥ भोगपक्षेऽप्सु रस इत्यादिविशेषणशब्दोपादाने प्रयोजनं चोत्तरत्र वक्ष्यत इत्याशयः ॥ तेषामेवेति ॥ रसादीनामेवेत्यर्थः ॥ रसादीनामिति ॥यावदिति ॥ अनेन रसादि स्वभावानामित्यत्र बुद्ध्या विवेकेन ॥ रसादीत्येतः विशेषणपरमित्युक्तं भवति ॥ सारत्वे ॥ श्रवणेव रसादीना रसादित्व इति वक्ष्यमाणप्रमाणानुसारेणाह ॥ रसादित्वे चेति ॥ भगवान् रसं गंधत्वेन गंधादिश्च रसादित्वेन न नियामकइत्यर्थः ॥ रसादिनेष्ठ रसत्वादिरूपो धर्म इत्यर्थः ॥ स्वभाव ॥दिरित्यत्रादिपदेन रसत्वादिग्रहणम्॥ति॥रसादयः ॥ प्रयोजनमाहेति ॥

कथमित्यत आह ॥ रसादीति ॥ रसादयश्चेते स्वभावा अवादीनामनागंतुकधर्माश्चेति रसादिस्वभावास्तेषां सारगणामबादिधर्मेषु संख्यादिषु श्रेष्ठानां च तेषामेवाबादिस्वभावभूतानां तद्धर्मेषु श्रेष्ठानां च रसादीनामिति यावत् ॥ स्वभावत्वेऽबादीनामिति शेषः सारत्वे बादिधर्मेष्विति शेषः ॥ रसादित्वे चेति चार्थः ॥ स भगवानेव ॥ विशेषतोऽपीत्यस्य व्याख्यं ॥ न त्विति ॥ अनुवृत्तोऽतुषंगासिद्धः ॥ तत्सा रत्वादिश्चेति ॥ तस्य रसादेस्त्वादिधर्मेषु सारत्वमबादिस्वभावत्वं रसत्वादिकं चेत्यर्थः ॥ यथा लोके कुविंदादिः पटादिद्रव्येष्वेव व्यापारवान्

न त्वबादिनियमानुबद्धा रसादिस्तत्सारत्वादिश्चेति दर्शयति॥अप्सु रसादित्यादिविशेषणशब्दैः॥भोगश्च ॥ विशेषतो रसादेरिति च उपासनार्थेच ॥

नुभूयते न तु तदीयेषु गंधरसादिषु गुणेषु तद्धर्मेषु च गंधत्वादिषु पृथग्व्यापारवान् किं तु तेषु पटादिजन्मानुषंगिजन्मान एव ॥ न तथा भगवान् ॥ अपि त्वबादेर्धर्मेषु रसादिषु तद्धर्मेषु च स्वभावत्वादिषु पृथक् प्रयत्नवान् तत्त्वबादिनियमानुषंगिसत्तादिकास्त इति दर्शयितुं विशेषणशब्दा उपात्ता इत्यर्थः ॥ भोगपक्षेऽपि प्रयोजनमाह ॥ भोगश्चेति ॥ अत्रादिभोगादप्यतिशयेन रसादेर्भोगःपरमेश्वरस्येति दर्शयति विशेषणशब्दैरिति संबंधः ॥ रसोऽहमित्याद्यभेदोक्तेरर्थांतरं सूचयन् तत्रापिविशेषणशब्दोपादाने प्रयोजनमाह ॥ उपासनार्थेचेति ॥

॥ क० ॥ तथाच सारत्व इत्यादि पुनरुक्तं सारत्वादि रसादिस्वभावत्वादित्यत आह ॥ रसादयश्च त इति॥रसादयो नानादिस्वभावाः ॥ सविशेषाभिन्नत्वादित्यत आह॥ अनागंतुका इति ॥ ननु सारगणामित्यत्र रसादयो विशेष्या न तु रसादिस्वभावा ॥ तेषश्चेति ॥ तथाच कश्चिद्रसादीना विशेषणत्व कश्चिद्विशेष्यत्वमिति वैरूप्यापातः ॥ रसादीनामितिवक्ष्यमाणप्रमाणानत्वानुगुण्यं चेत्यत आह ॥ अबादिस्वभावभूतानामिति ॥ रसादीनां रसादित्व इति प्रमाणानुसारेणाह ॥ रसादित्वे चेतीति ॥ नन्वनुषंगासिद्धत्वस्याप्रसक्तेस्तन्निषेधोऽयुक्त इत्यत आह ॥ यथेति ॥ तथा चानुमानाभासप्रसक्तिरिति भावः ॥

॥श्री०॥ अप्सु रस इत विशेषशब्दोपादाने प्रयोजनमाहेत्यर्थः ॥ तत्रापीति ॥ उपासनारूपार्थांतरपक्षेऽपीत्यर्थः ॥ननु भगवदुपासनस्याप्राप्तत्वादसंगतिरित्यत आह ॥ अर्थवशादि ति ॥ अर्थवशाद्विभक्तिपरिणाम इति वचनादिति भावः ॥ ननु विशेषशब्दोपादानं उपासनार्थं चेत्तर्हि रसोऽहमिति सप्तमीप्रयोगः स्यान्न तु रसोऽहमित्यभेदोक्तिरित्यत आह ॥ रसा दय इत्यादि ॥ प्रसिद्धेति ॥ नाम ब्रह्मेत्युपासनादावित्यर्थः ॥ शंकेति ॥ प्रतिमात्वाभिप्रेति ॥ तदुपपत्तिरिति ॥ अप्सु रस इत्यादिविशेषोपपत्तिरित्यर्थः ॥ अर्थत्रय इति ॥ सत्तादि कारणात्वात् भोक्तृत्वादुपासनार्थत्वाच्चाप्सु रसोऽहमित्याद्युक्तिरित्युक्तार्थत्रय इत्यर्थः ॥ प्रमाणे रसादिमानिनाम ॥ तदभिमानिनामित्यर्थः ॥नन्ववादयः पार्षदा इति पादस्य रसादिसंपत्त्या अन्येषामिति पादस्य च सप्तनवाक्षरत्वादष्टाक्षरपादत्व वक्तव्यानुष्टुप्छंदोवद्धत्वानुपपत्तिरित्यत आह ॥ अवादय इति रसादीनि च सप्तनवाक्षरत्वेऽपीति ॥ एकेनाक्षरेणेति ॥ न्यूने नाधिकेन वेत्यर्थः ॥ वियंति ॥ नश्यंति ॥ अन्यान्यपीति ॥ गीताकल्पभीन्नानीत्यर्थः ॥

॥ कृ० ॥ प्रसिद्धेति ॥ विष्णोः॥ स्वारास्तिकंमुक्तम्

विशेषतो रसादेरिति वर्तते॥अर्थवशाद्रसादेरिति सप्तमीत्वेन विपरिणम्यते॥रसादयः परमेश्वरोपासने प्रतिमात्वेनात्र विवक्षिताः॥प्रतिमायांचाभे दोक्तिःप्रसिद्धा ॥ प्रतिमात्वमत्रादीनां समानम् ॥ योऽप्सु तिष्ठन्नित्यादेः ॥ अतः किं विशेषशब्दग्रहणेनेति चेत् ॥ अत्रादिभ्यो विशेषतो र सादिषु भगवदुपासनार्थं तदुपपत्तिरिति ॥ उक्तेऽर्थत्रये प्रमाणमाह ॥ उक्तं चेति ॥ तथा चशब्दो अन्योन्यसमुच्चये ॥ एवशब्दस्त्वीश्वर इत्य

उक्तं च गीताकल्पे ॥ रसादीनां रसादित्वे स्वभावत्वे तथैव च ॥सारत्वे सर्वधर्मेषु विशेषेणापि का रणम् ॥ सारभोक्ताच सर्वत्र यतोऽतो जगदीश्वरः॥ रसादिमानिनांदेहे स सर्वत्र व्यवस्थितः ॥ अबा दयः पार्षदाश्चध्येयः स ज्ञानिनां हरिः ॥रसादिसंपत्त्या न्येषां वासुदेवो जगत्पतिरिति।स्वभावो जीव एव च॥

नेन संबंधः ॥ सर्वत्रावादिषु ॥ ईश्वरो रसादिकं जगदित्युच्यत इत्यर्थः ॥ अवादयोऽवाद्यभिमानिनः ॥ ज्ञानिनां ज्ञानार्थिनां संपत्त्यै प्राप्त्यै अन्येषांरसार्थिनाम् ॥ अवादय इति रसादीनि च पादयोः सप्तनवाक्षरत्वेऽपिन वा एकेनाक्षरेण छंदांसि वियंतीति वचनाददोषः ॥ स्वभाव स्यभगवदधीनत्वमलौकिकमित्यतस्तत्रान्यान्यपि वाक्यानि पठति ॥ स्वभाव इति ॥

सृपूजितं हरिं दृष्ट्वेत्यादाविति शेषः ॥ जगदुच्यत इति॥अनेन जगदीश्वर इति पदद्वयमिति सूचितम् ॥ धर्मविरुद्धत्वादिना भगवदुपासनार्थमिति प्रतीतिं निरस्यति॥कामादिष्विति ॥

॥ श्रीः ॥ विशिष्टेषु ॥ विलक्षणेषु ॥ अशुचित्वेति ॥ पुण्यो गंध इत्युक्तत्वान्नोक्तो पिशुचिगंधादिरिति ज्ञेयम ॥ कामशब्देन कामनं कामइतीच्छाग्रहणे इच्छामिच्छतेइत्यर्थासंभवादाह ॥ काममिति ॥ काम्यत इति व्युत्पत्त्या कामरूपं पुरुषार्थमित्यर्थः हीन इति सूत्रेण हीनशब्दयोगे तृतीयाया विहितत्वादाह ॥ कामरागादिरिति ॥ नित्यपूर्णत्वं कामविवर्जितमित्युच्यते अस्थाने अप्रयुज्यमानत्वाद्रागविवर्जितमित्युच्यत इति तात्पर्यानुसारेण कामरागविवर्जितमित्यस्यार्थो द्रष्टव्यः ॥ कथमिति ॥ साक्षात्काररूपानुभवस्यैव भोगशब्दार्थत्वादिति भावः॥ फलहेतव इति ॥ दुःखरूपस्वफलहेतव इत्यर्थः ॥ स्वफलहेतुत्वमेव भोगशब्दार्थ इत्याशयः ॥ सुखहेतुः ॥ सुखव्यक्तिहेतु ॥उपपादितमिति॥पुण्यो गंध इति भोगापेक्षयेत्यत्रेत्यर्थः॥

अस्त्वेवं धर्मिभ्यो निष्कृष्य धर्माणामुपादानम् ॥ धर्माणांविशेषणोपादानं तु किमर्थमित्यत आह ॥ धर्मेति॥आदिपदेन पुण्यो गंधइत्यस्य ग्रहणम् ॥ कामादिषु विशिष्टेष्वेव भगवानुपास्यो न धर्मविरुद्धेष्वशुचिष्विति ज्ञापनाय कामादीनां धर्माणां धर्माविरुद्धत्वादिविशेषणोपादानमित्यर्थः ॥ अत्र प्रमाणमाह ॥ उक्तं चेति ॥ कामं पुरुषार्थम् ॥ कामरागादेः कामरागादिना ॥ अनिच्छाद्भिः कामादिकम् ॥ गंधस्य वि

सर्वस्वभावो नियतस्तेनैव किमुतापरम् ॥नतदस्ति विनायत्स्यान्मया भूतं चराचरमिति च ॥धर्माविरुद्धः कामरागवर्जितमित्याद्युपासनार्थम्॥उक्तं च गीताकल्पे॥धर्माविरुद्धकामेऽसावुपास्यः काममिच्छता॥ विहीने कामरागादेर्बलं च बलमिच्छता ॥ध्यातस्तत्र त्वनिच्छद्भिर्ज्ञानमेव ददाति चेत्यादि॥पुण्यो गंध इ

॥ तिभोगापेक्षया ॥ तथाहिश्रुतिः ॥

शेषणोपादाने प्रयोजनांतरमाह ॥ पुण्य इति ॥ पुण्यगंधस्यैव भगवता भोगो न दुर्गंधस्येति ज्ञापयितुमत्र विशेषणोपादानमित्यर्थः॥ननु दुर्गंधं भगवाननुभवति न वा ॥ नेतिपक्षे सार्वज्ञाभावः ॥ आद्ये कथं भोगाभावः ॥ उच्यते ॥ अनुभूयमाना अपि दुर्गंधादयोन फलहेतव इत्यभिप्रायः ॥ सुगंधस्तु सुखहेतुरित्युपपादितम् ॥ शुचिवस्त्वेवभगवतो भोग्यमित्यत्र प्रमाणमाह ॥ तथा हीति ॥

॥ कं० ॥ इच्छाविषयेच्छासंभवादाह ॥ कामं पुरुषार्थमिति ॥ ननूनार्थकशब्देन तृतीयांतस्य समासविधानाज्ज्ञापकादूनार्थकशब्दयोगे तृतीयेत्युक्ता पुण्येन हीन इत्युदाहरणम् ॥ प्रक्रियादिषु ॥ ततश्च हीनशब्दयोगे तृतीयैवोचिता कथं कामरागादेरिति पंचमीत्यत आह ॥ कामरागादिनेति ॥ प्रभुरात्मनं पश्यतीति श्रुतेरनुभवपक्षमंगीकृत्याह ॥ अनुभूयमाना इति ॥ उपपादितमिति ॥ सुखरूपस्य भोक्तृत्वादिति प्रमाणेन सुखकारणवस्तुमात्रस्यभगवत्सुखाभिव्यक्तिहेतुत्वप्रतिपादनादितिभावः ॥ शुचिवस्त्वेवेति ॥

॥ श्री० ॥ ननु स्वप्नशब्दस्य जीवात्मविशेषणवाचकत्वात् कथं स्वप्नादिश्च शारीर एवेत्यभेदाभिधानमित्यत आह ॥ स्वपांनाम्निति ॥ कर्तरि व्युत्पन्न इति शेषः ॥ निष्वप्शये इत्यस्माद्धातोः कर्तरि नन् प्रत्ययः स्याद् इति सत्यर्थे ॥ तथा च निष्वप्शय इत्यस्माद्धातोः कर्तरि नन्प्रत्यये हलंत्यमित्यंत्यनकारलोपे धात्वादेः षः स इति षकारस्य सकारे स्वप्नेति कर्तरि रूपसिद्धिः ॥ उक्तार्थद्वयेति ॥ अवस्थाभेदोपाधिकं जीवस्य भेदमंगीकृत्यैतस्य कथितत्वे सत्यर्थः ॥ कृ० ॥ ननु स्वप्नशब्दस्य निद्रार्थत्वात् स्वप्नस्येत्यसंगतिः ॥ स्वप्नशब्दस्य निद्रार्थत्वात्

ननु शारीराज्जागरावस्थाज्जीवात्स्वप्नसुषुप्त्यवस्थः स एव प्राविविक्ताहार इत्यवस्थाभेदोपाधिकं जीवस्य भेदमंगीकृत्य व्याख्यास्यामीत्यत आह॥स्वप्नादिश्चेति॥स्वपोनान्निति॥स्वप्नशब्दः कर्तरि॥स्वप्नसुप्तश्च शारीर एव न केवलं जाग्रत ॥ तथाचत्र्यवस्थस्यापि शारीरशब्देन गृहीतत्वात् न ततो भेदः स्वप्नसुप्तयोरित्यर्थः ॥ अवस्थात्रयवतोऽपि शारीरत्वं कुत इत्यत आह ॥ शारीरस्त्विति ॥ जाग्रदादिष्ववस्थासु ॥ अस्तु त्र्यवस्थोऽपि शारीरः ॥ तथाऽप्यस्मादिति विशेषणेनात्र शारीरादिति जाग्रदावस्थो गृह्यते॥ तस्माच्च स्वप्नाद्यवस्थस्य भेदोक्तिरुक्त

शारीरादात्मन इति भेदाभिधानात् स्वप्नादिश्च शारीर एव शारीरस्तु त्रिधा भिन्नो जागृदादिष्ववास्थितैरिति वचनाद्गारुडे ॥ अस्मादिति त्वीश्वरव्यावृत्त्यर्थम् ॥ शारीरो तावुभौ ज्ञेयौ जीवश्चेश्वरसंज्ञितः ॥ अनादिबंधनस्त्वेको नित्यमुक्तस्तथापर इति वचनान्नारदीये

विधया संभवति ॥ भवत्पक्षेऽपि शारीरादिति जीवे सिद्धेस्मादिति विशेषणं व्यर्थं स्यादिति तत्राह ॥ अस्मादिति ॥ नैतद्विशेषणसार्थक्यायेश्वरं परित्यज्य जीवोऽत्र ग्राह्यः ॥ शारीरादित्येवोक्तावीश्वरस्यापि प्राप्तावीश्वरादेवेश्वरस्य भेदानुपपत्तेः तद्व्यावृत्त्यर्थं जीवमात्रपरिग्रहायविशेषणमिति सार्थक्योपपत्तेरित्यर्थः ॥ भवेदेवं यदि शारीरत्वमीश्वरस्यापि स्यात् ॥ तदेव कुत इत्यत आह ॥ शारीराविति ॥

कथंशारीरैप्रयोगइत्यत आह॥ स्वपांनाम्निति॥ यद्यपि भावकर्तृभिन्नकारके चस्वपांनाम्निति नवविधानात्कर्तरि त्ययुक्तम ॥ तथापि कृत्यल्युटोबहुलमित्यत्रबहुलमितियोगविभागेनकृन्मात्रस्यार्थव्यभिचारोक्तेः कर्तरीत्युपपन्नम ॥ तथा च भावार्थेननंतस्वप्नशब्दस्य निद्रावाचित्वेऽपि कर्तर्थेनंतस्य शारीरप्रयोगोपपत्तिरिति भावः ॥ सुषुप्तश्चेति ॥ सुपुरुत्स्वपेरकर्मकत्वात्कर्तरि गत्यर्थाकर्मकेतिक्तप्रत्ययेवचिस्वपीति संप्रसारणे संप्रसारणाच्चेतिपूर्वरूपेसुविनिर्दुर्भ्यः सुपिसूतिसमाइति षत्वेन सुषुप्तशब्दनिष्पत्तिरिति भावः ॥जाग्रदादिशब्देनजागरादिकर्तृग्रहणं जीवस्यतत्तदवस्थितिसंभवतीत्यतोभावप्रधानोऽयं निर्देश इतिभावेन व्याचष्टे॥अन्यथा स्थितिनि॥

॥श्री०॥एकस्य छत्रित्वे तत्साहचर्यादच्छत्रिष्वपि छत्रिणो गच्छंतीति छत्रिशब्दव्यवहार एवं भोक्तृजीवसाहचर्यादीश्वरे भोक्तृत्वे श्रुतिरुपचरितेत्यर्थः॥ एवं [illegible] विवतावितिश्रुतेर्नेश्वरपरत्वादिति भावः ॥ तत्रेहतुरत एवेति ॥ ईश्वरस्य भोक्तृत्वांगीकारे अनश्नन्नित्यादिश्रुतिविरोधादेवेत्यर्थः ॥ जीवेंद्रियागोचरः [illegible] भोगमित्यशनशब्दार्थः ॥ अतिशयेनेति तदर्थः ॥ नन्विवशब्देन तदभावोक्तेः कथमियं श्रुतिरुक्तार्थे मानमित्यत आह ॥ अवतारेष्विति ॥ इवशब्दस्य [illegible] तार्थविरोधिभूर्ताद्वितीयार्थशक्तत्वादिति भावः ॥ यथोक्तमनुव्याख्याने ॥ इवोभये न सादृश्ये इति वाक् शब्दनिर्णय इति ॥ व्याख्यानं चोभय [illegible] तत्प्रतियोगिनि द्वितीयेवर्तत इत्यर्थ इति ॥ ॥ कु० ॥जीवभोग्यस्य विषयस्याभोगोक्तिरिति ॥ न चात्र जीवभोगस्य भोक्तृ [illegible]

कुतो नेत्यत आह ॥स्थूलेति ॥ श्रुत्यादिषु स्थूलस्य जीवभोग्यस्य विषयस्याभोगोक्तेः॥ सूक्ष्मभोगस्य चांगीकारादिति भावः ॥सूक्ष्माशन प्रमिते भवेदियं व्यवस्था ॥ तदेव कुत इत्यत आह ॥आह चेति ॥ गंधादिषुयो जीवेंद्रियागोचरः सारभागस्तस्य भोक्ता [illegible]

अन्यो निरन्नोपि बलेन भूया॥नित्यादि विरोधि॥ स्थूलानशनोक्तेः॥आह च सूक्ष्माशनम् ॥प्रविविक्ताहारतर इव वै भवत्यस्माच्छारीरादात्मनः ॥ नचात्र जीव उच्यते ॥

च्छारीरादात्मनोजीवादतिशयेन विलक्षणभोग एव भवति ॥ अवतारेषु स्थूलमपिभुङ्क्त इतीवशब्दः ॥ ननु प्रविविक्ताहारतरोऽयं जीव एवे त्यत आह ॥ न चे ति ॥ न हि जीवोजीवादेव विलक्षणाहार इति युज्यत इत्यर्थः॥

क्भुगितोऽसौ भगवान्पुरुषोत्तम इति बृहद्भाष्ये जीवभोगस्य भोक्तृत्युक्तत्वात्तद्विरोध इति वाच्यम ॥ तत्र जीवभोग्यरसादिभोक्तृत्वस्याभिप्रेतत्वेनाव जीवभोग्यद्रव्यभोगाभावस्याभिमतत्वेन भिन्नविषयत्वेनाविरोधादित्याशयः ॥ यद्वा यतो जीवस्सर्वांगभुङ्न भवति अतो भगवान्विविक्तभुगुच्यते ॥ यतश्चावतारेषु जीवभोग्यस्येशो भोक्ताऽतइवेत्युक्तमितिबृहद्भाष्ययोजनायांन विरोधः ॥ अतएव बृहद्भाष्येइवशब्दानुवादइति॥नचैवमपिस्थूलभोगानिर्द्दिष्टः सशुभान्भुङ्क्तेनचाशुभानितिमांडूक्यभाष्यविरोधः ॥ तस्यदक्षिणाक्षिस्थविश्वविषयत्वात् ॥ अस्यचांतर्यामिविषयत्वात् ॥ अनश्नन्नित्येतत्पूर्ववाक्यद्वासुपर्णेत्यस्मिंस्तस्यैवप्रकृतत्वादित्याह ॥ न न्विवशब्देनतदभावप्रतिपादनात्कथमिदमुक्तार्थेप्रमाणमित्यत आह ॥ अवतारेष्विति॥ इवशब्दस्यस्वसमभिव्याहृतशब्देनयदुच्यतेतत्प्रतियोगिद्वितीयार्थत्वादितिभावः ॥

१ भा. स्कं. ११ अ. ११ श्लो. ६

॥श्री०॥शब्दजन्य इति॥वाग्व्यवहारजन्यो धर्मः सत्यमित्यर्थः॥ननु ऋतशब्दस्य धर्मवाचकत्वेऽपि न ऋतं पिबंताविति श्रुतौ तद्ग्रहणं युक्तम् धर्मस्य पानकर्मत्वासंभवादित्यत आह ॥ तथाचेति ॥पुण्यफलस्येति ॥ पुण्यफलरूपं यत्सुखं तत्साधनभूतो यः शुभविषयस्तस्येत्यर्थः॥ अत एव टीकाकारैः ऋतं पिबंताविति वाक्यविचारपरं गुहांप्रविष्टावात्मानौ हि तद्दर्शना दित्यधिकरणं व्याख्यायांते श्रोत्रं चक्षुः स्पर्शनं चेति श्लोक उदाहृतः ॥ तत्र विषयानुपमेवत इत्युक्तत्वात् तथाऽत्रापि पूर्वसुखरूपस्य भोक्तृत्वादित्येतत्सुखकारण व्याख्यातं शुचि वस्त्वेव भोग्यं विषयभोगः इत्येव व्यवहार इति द्रष्टव्यामिति संप्रदायविदः ॥ श्रुत्यादीति ॥ अनश्नन्नन्यो अभिचाकशीतीति श्रुतिः ॥ आदिपदेन अन्यो ...ऽपि बलेन भूयानि ति स्मृतिसंग्रहः ॥ ननु ऋतं पिबंताविति श्रुतौ विषयभोग उक्तोऽस्तीतिचेत्तत्राह ॥ ऋतंपिबंताविति चेति ॥ अत एवेति ॥ श्रुत्यादिविरोधादेवेत्यर्थः ॥ छत्रिन्यायेनेति ॥

न ह वै देवमात्रस्य पुण्यभोगानियमे देवोत्तमस्य सुतरां तत्सिद्धिः ॥ ऋतमितिश्रुतिः कथं प्रकृतोपयोगिनीत्यत आह ॥ ऋतंचेति ॥कुत इत्यतः ॥ सामान्यविशेषाभिधानादित्याह ॥ ऋतमिति ॥ प्रयोगगः शब्दजन्यः ॥ तथा च श्रुतावृतशब्दः पुण्यफलस्योपलक्षक इति

ऋतं पिबंतौ सुकृतस्य लोक इत्यादिका ॥ ऋतं चपुण्यम् ॥ ऋतं सत्यं तथा धर्मः सुकृतं चाभिधीयत इत्यभिधानात् ॥ ऋतं तुमानसो धर्मः सत्यं स्यात्संप्रयोगग इति च ॥न चानश्नन्नन्यो अभिचाकशीति॥

भावः ॥ स्यादिदं व्याख्यानं यदिभगवतो विषयभोगो युक्तः स्यात् न चैवम् ॥ तदंगीकारे श्रुत्यादिविरोधात् ॥ऋतं पिबंताविति चात एव छत्रिन्यायेनोपचारिनामित्यत आह ॥ न चेति ॥ ॥ ऋ ॥ सम्प्रतिपासनं यस्माद्देवानां योग्यमुत्तममित्युक्तेरिति भावः ॥ ननु भगवतः पुण्यसाध्यभोग इत्यत्र कथं पुण्यमेवेति श्रुतिर्मानम ॥ तत्रदेवानां पुण्यभोगोक्तेरित्यत आह ॥ देवमात्रस्येति ॥ ननु ऋतं पिबंताविश्यवतिस्य पान कर्मत्वमुच्यते न च धर्मस्य तदस्ति ॥ अतो न ऋतशब्दो धर्मपर इत्यत आह ॥ तथा चेति ॥ उपचरितमिति ॥ श्रुतौ ईश्वरविषयत्वाभावात् जीवसाहित्येनेश्वरपातृत्वमुपचरितमित्यर्थ ॥

१ अ. १ पा. २ अ. ३ सू. १ ऋतं पिबंताविति श्रुत्युक्तौ ऋतं पिबन्तावात्मानौ आत्मातरात्मेति ब्रह्मरूद्रविशेषावेव न जीवेश्वरौ यो वेदनिहितं गुहायामिति श्रुतिप्रसिद्धगुहाप्रविष्टत्वात् तयोरात्मनोर्धर्मीममंताश्रितं व्याप्ततुरिति श्रुतौ गुहास्थत्वदर्शनानि सूत्रार्थ ॥ २ अभिमन्त्रब्राह्मणभाष्ये द्वितीयस्तंडगमदेवानपि गच्छति सद्गुरुर्जीवतीति प्रशंसेति श्रुत्यंशव्याख्यावसरे इति ज्ञेयम्

॥ श्री० ॥ उपासकमिति ॥ सप्तान्नविद्योपासकं त्वमुत्तमित्यर्थः॥ तथाऽपि कुत इति ॥ देवत्वेऽपि पुण्यमेवामुं गच्छतीति कुत इत्यर्थः ॥ देवोत्तमस्य भगवत इत्यर्थः ॥

अमुमुपासकम्॥कुतस्तस्य देवत्वात्॥तथाऽपि कुतः॥ कृ०॥यद्यपि पुण्यमाध्यमेवेति वक्तव्यम्॥वक्ष्यमाणश्रुतौ भगवत पुण्यमाध्यत्वे कृत्वाभिधानात्॥तथाऽपि यत्पुण्यमाध्य

॥ पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति॥

॥तत्पावित्र्यमेवेति नियमाद्भगवत. पुण्यफलभोक्तृत्वे शुचित्वस्तुभोक्तृत्वमपि सिध्यतीति ज्ञापनार्थमुक्तम्॥न च निषिद्धस्य मांसभक्षणादेरपि सुखहेतुत्वेन॥पुण्यमाध्यत्वावश्यभावादुक्तनियमानुपपत्तिरिति वाच्यम्॥परिशेषेण तस्य पुण्यमाध्यत्वाभावावगमात् ॥तथा हि निषिद्धजन्यं पापं तावत्पूर्वकर्मजन्यम् ॥ पुण्यपापादिकं विष्णुः कारयेत्पूर्वकर्मणेत्युक्तेः ॥ पापजनकं पूर्वकर्म च न पुण्यं विरोधेन पुण्यस्य पापहेतुत्वायोगात् ॥ किं तु पापमेव ॥ तदेवं पापस्य दुःखकपापहेतुत्वे सिद्धे अनुनिकपापजनकनिषिद्धस्यापि पापजन्यत्वं सिध्यति ॥ पूर्वपापस्यानिषिद्धस्य जनयित्वाऽ दुःखकपापजनकत्वायोगात् ॥ अदृष्टस्य दृष्टहेतुत्वेन हेतुत्वात्मांसभक्षणादेस्तस्मात् सुखं तु तस्मादपि पुण्यजन्यमिति विरोधः ॥ तस्मात्पुण्यसाध्यत्वमेवेति व्याप्तिसिद्धावुक्तं युक्तम् ॥ एवं भगवतः शुचिभोक्तृत्वसिद्धे सर्वत्र सारभुक्त्व इति प्रथमस्कन्धतात्पर्यादिप्रमाणे सतीदं विहितमात्रपरमिति न तद्विरोधः ॥ सुखरूपस्य भोक्तृत्वादिति सुखकारणमात्रभोक्तृत्वोक्तिरप्यनुकूलैव ॥ सुखस्य पवित्रपुण्यजन्यत्वेन निषिद्धजन्यत्वाभावात् ॥ एतेन शुचं त्रिवर्गी यज्ञपि पुण्यता यदुक्तं तत्र व्याख्यातम् ॥ तदेवं भगवतः पवित्रसकलमात्रसारभोक्तृत्वमेव न सकलमात्रसारभोक्तृत्वमिति संप्रदायविदः ॥अमुमुपासकमिति॥मनुष्याणां प्रसिद्धमेकमन्नम् ॥ पशूनां ... मनोवाक्प्राणरूपाणि त्रीणिभगवत्तुष्टिहेतुत्वेन तदन्नानि ॥ एवं सप्तान्नानि ॥ परमात्माऽ जनयदित्यत्र सकलमित्यर्थः ॥ तस्य देवत्वादिति ॥

१ बृहदुपनिषत् ॥ अ. ३ ब्राह्मणम् ५ सप्तान्नाख्यम् ॥ ... ॥ तस्य यज्ञजन्यं यद्धि ... नहेतुकमित्युक्त्यानिषेधः ॥ एतादृशमतस्य पुण्यान्यत्वं एतत्स्वजनकनिषिद्धभक्षणपरस्त्रीगमनादेरपि पुण्यहेतुकत्वापत्तेरिति वाच्यम् ॥ कर्मसु नैमित्तिक एकादश्यामुपोषणादिवत् आदिजन्यदुःखकारणपापस्य पुण्यगर्भत्वमिवैतादृशसुखजनकपुण्यस्य पापगर्भत्वात् ॥ तत्र पापांशो निषिद्धजनकः पुण्यांशः सुखजनक इति विभागः ॥ अत एव प्रमाणे पुण्यपापादिकमित्यादिपदम् ॥ ३ जलं यथा तृषानिवृत्तिं प्रति कारणं न तदनंतरभावि सुखं प्रति तच्च जन्मांतरीयपुण्यजन्यमेव ॥ अन्यथा कदाचिज्जलपानोत्तरं तृषानिवृत्तिसमकालीनोद्रेकादर्शनस्याप्यनुपपत्तेः ॥ तदानीं सुखमनुत्पाद्य दुःखोत्पादकत्वात् ॥ तथा अविहितमांसभक्षणस्य क्षुन्निवर्तकत्वमेव न सुखजनकत्वमिति भावः ॥ ४ भक्षणीयम् ॥ ५ उदाहरणमात्रमेतत् पुनः वन्यस्याप्युक्तेः ॥ ६ पशुशब्दः सर्वत्र बालकग्राहकः ॥ अज्ञानित्वधर्मेण ॥ ७ मनसा कामादीनाम् ॥ वाचा सर्वशब्दानाम् ॥ प्राणेनापानादीनां संग्रहः ॥

॥ श्री० ॥ पक्षद्वयेऽप्युपपत्तावेति ॥ मत्थामिति शेषः ॥ प्रविविक्तेति ॥ स्वस्मिन्नभ्यस्तत्वेऽप्यभिभवप्रकारत्वा यदना ॥ अवस्थाभेदोपाधिभेदमादाय जीवपरत्वपक्षेऽप्यनि घटने त्यर्थः ॥ व्युत्क्रमेणेति ॥ यतः प्रविविक्तभुक् अतो भोक्ता स्वस्याभोगादभोक्तेति व्युत्क्रमेणेत्यर्थः ॥ यथाश्रुतान्वये हेतोर्विरुद्धत्वप्रसंगादिति भावः ॥ ननु तत्रस्थत्वे तदाधारत्वं प्राप्नमे त्यतो व्याचष्टे ॥ तदुपजीवनेनेति ॥ उक्तं सर्वगतोऽपीति ॥ सर्वभूतस्थमात्मानमित्यत्र स्थिति मात्रमित्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

नन्वेवं पक्षद्वयेऽप्युपपत्तावीश्वर एवायं न जीव इति कुतो विनिगमनामित्यत आह ॥ भेदेति ॥ चो हेतौ ॥ भेदश्रुतेः स्वाभाविकभेद रूपे गत्यंतरे संभवति पुरुषभेद एवार्थतयाग्राह्यो न त्ववस्थोपाधिको भेदः ॥ मुख्यामुख्ययोर्मुख्यसंप्रत्ययात ॥ अतो युक्तं विनिगमनम् ॥ न केवलमुक्तव्यवस्था न्यायप्राप्ता किं त्वागमसिद्धा चेत्याह ॥ आह चेति ॥ अभोक्ता च भोक्ता चेत्येतयोर्व्युत्क्रमेणान्वयः ॥ सर्वभूतस्थमात्मा

॥भेदश्रुतेश्च॥सति गत्यंतरे पुरुषभेद एव कल्प्यो न त्ववस्थाभेदः॥आह च॥प्रविविक्तभुग्यतो ह्यस्माच्छारीरा त्पुरुषोत्तमः॥ अतोऽभोक्ता च भोक्ता च स्थित्याभोगात्स एव तु इति गीताकल्पे ॥ न त्वहं तेष्विति तदना

पुण्यो गंधःपृथिव्यां च तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्॥बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०

धारत्वमुच्यते ॥ उक्तं च ॥ तदाश्रितं जगत्सर्वं नासौ कुत्रचिदाश्रित इति गीताकल्पे ॥ ८ ॥ ९ ॥ १० ॥

नामित्युक्तत्वात ॥न त्वहं तेष्विति कथमुच्यतइत्यत आह॥न त्वहमिति ॥ तदनाधारत्वं तदुपजीवनेन स्थित्यभावः ॥ कुत एतदित्यत आह ॥ उक्तं चेति ॥ न केवलं मुक्तविरोधादिति चार्थः ॥ ८ ॥ ९ ॥ १०

॥कृ०॥यथाश्रुतान्वये हेतोर्विरुद्धत्वादाह ॥ व्युत्क्रमेणेति ॥ यतः प्रविविक्तभुगतो भोक्तास्वस्याभोगाच्चाभोक्तेति व्युत्क्रमेणेत्यर्थः ॥ कथमनेनोक्तपरिहारइत्यत आह ॥तदुपजीवनेनेति ॥ तथा च सर्वभूतस्थमित्यनेन स्थितिमात्रमुक्तम ॥ अत्र तु विशिष्टस्थित्यभाव इत्यविरोध इति भावः ॥ ८ ॥ ९ ॥ १० ॥

१ व्यंजकत्वाद्बीजमिव ॥ न परिणामि ना। अतएव सनातनम्

॥ श्री० ॥ ११ ॥ १२ ॥ निर्वृतानाम् ॥ उत्पन्नानाम ॥ तेनैवेति ॥ गुणमयसर्वपदार्थानां कारणत्ववचनेनेत्यर्थः ॥ उक्तं गुणातीतत्वम ॥ कार्यभूतेति ॥ [illegible] विकारार्थे मयडिति भावः ॥ गुणप्राचुर्य मपि तस्यां न संभवतीति ॥ इत्यपि द्रष्टव्यमिति शेषः ॥ वाक्यार्थ माह ॥ गुणेति ॥ तत्र मायाशब्देन दुर्गाया गृहीतत्वे [illegible] गुणविकारस्य तत्प्राचुर्यस्य चाऽसंभवादित्यर्थः ॥ मायाया ॥ दुर्गाया ॥ तादात्म्यार्थेनेति ॥ गुणतादात्म्यं ताभिमानित्वादुक्तम् ॥ अभिमान्यभिमन्यमानयो [illegible] [illegible] प्रोक्तौ महतश्च चतुर्मुखादित्यर्थः दर्शनादिति द्रष्टव्यम ॥ [illegible] ॥ ११ ॥ १२ ॥ ननु तर्हीत्यादि ॥ [illegible] न ज्ञायते [illegible]

॥ ११ ॥ १२ ॥ ननु विज्ञाननिरूपणं प्रारभ्य बिभिरित्यादिकं किमर्थमुच्यत इत्यत आह॥तर्हीति ॥ ये चैवेति॥विज्ञाननिरूपणोपसंहारवाक्ये सत्त्वादिगुणनिर्वृतानां भगवान्कारणमाश्रयश्चतदनाश्रयश्चेत्युक्तम ॥ तेनैव गुणातीत इति चोक्तप्रायम् ॥ तस्यायमाक्षेपः ॥ एवं गुणातीतया सगुणश्च ज्ञायस इति शेषः॥ एवमनुपलंभविपरीतोपलभाभ्यामुक्तमसदिति भावः॥ विकारार्थतानिरासार्थमाह ॥ तादात्म्येति ॥ मयटस्ता

११ ॥ १२ ॥ तर्हि कथमेवं न ज्ञायत इत्यत आह ॥ त्रिभिरिति ॥ तादात्म्यार्थमयट् ॥ तच्चोक्तम् ॥ ता

बलं बलवतां चाहं कामरागविवर्जितम् ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ॥मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥१२

दात्म्यार्थेविकारार्थे प्राचुर्यार्थे मयट् त्रिधेति ॥ न हि गुणकार्यभूता माया ॥ गुणमयीतिच वक्ष्यति ॥

दात्म्यार्थत्वं कुत इत्यत आह ॥ तच्चेति ॥ तादात्म्ये प्रयोगं दर्शयितुमुपोद्घातमाह ॥ न हीति ॥ कार्यभूतेत्युपलक्षणम् ॥ गुणप्राचुर्यादिकमपि तस्यां न संभवति ॥ ततः किमित्यत आह ॥ गुणेति ॥ दैवी ह्येषा गुणमयी ममायेति मायाया गुणमयीत्वमुच्यते ॥ न च तत्र विकाराद्यर्थतासंभवतीततः परिशेषतः तादात्म्यार्थता ग्राह्येत्यर्थः ॥

सगुणत्वमोहादौ कारणस्योक्तत्वेनोक्तोक्षेपपरिहाराला भादित्यत आह ॥ ये चैवेति ॥ [illegible] सगुणश्चेति ॥ ननु प्रमाणाच्छाब्दिकप्रसिद्धेश्च मयटश्चत्वारोऽर्थाः विकारोऽवयवः प्राचुर्यं तादात्म्यं चेति ॥ तत्र न हि कार्यभूतेति विकारार्थत्वं निषिद्धं न तेनावयवत्वं [illegible] ॥ प्रसक्तयोः प्राचुर्यावयवार्थयोः [illegible] ॥ इत्यत आह ॥ उपलक्षण मिति प्राचुर्यादिकमिति ॥ आदिपदाद्ग्रहणात् [illegible] ॥ गुणमयीत्वमिति ॥ [illegible] पुरुषावः शुक्लादयो ये गुणाः प्रसिद्धा [illegible] एवं पुरुषात इति भट्टोजिना सिद्धांतितत्वात् ॥ प्रकृते च सत्त्वादिद्रव्यत्वेन तदात्मकत्वस्य सगुणमयशब्दस्य प्रसिद्धशुक्लादिगुणमात्रत्वाभावादिति बोध्यम् ॥

॥ श्री० ॥ भाष्ये तादात्म्यं कारणेन तादात्म्यमित्यर्थः ॥ **उभयपरत्वमिति** ॥ कारणपरत्वोक्तौ तदात्मककार्यपरत्वमप्युक्तप्रायमिति भावः ॥ ननु कार्यकारणयोरभेदादेव कार्येभ्य उत्तमत्वोक्तौ कारणेभ्यो गुणेभ्योऽप्युत्तमत्वं प्राप्यत एवेति चेत्सत्यम् ॥ गुणेभ्यश्च परमित्युक्तत्र गुणेभ्य एवोत्तमत्ववचनेन तादात्म्यार्थत्वमेव ग्राह्यमिति हृदयम् ॥ गुण्यादिभिरित्यत्रादिपदेन क्रियावतो जातिमद्व्यक्त्यादेश्च ग्रहणम् ॥ एवं सतीति ॥ भावशब्दस्य पदार्थमात्रपरत्वमिति एभ्य इत्यस्य भावशब्दोक्तसर्वपदार्थपरामर्शकत्वसिद्धौ विष्णोः सर्वपरत्वलाभादिति भावः ॥

अस्तु मयटस्तादात्म्ये शक्तिः " अत्र विकारार्थतां परित्यज्य तद्ग्रहणे को हेतुरिति चेत् ॥ उच्यते ॥ विकारार्थताग्रहणे मामेभ्यःपरमित्यत्र गुणकार्येभ्य एव भगवतः परत्वमुक्तं स्यान्न तु गुणेभ्यः ॥ अतस्तत्संग्रहाय तादात्म्यार्थताग्रहणम् ॥ एवं तर्हि गुणेभ्य एव परत्वमुक्तं स्यान्न तु गुणकार्येभ्योऽपीति समानमित्यत आह ॥ सिद्धं चेति ॥ सिद्धं प्रमितम् ॥ ततश्च गुणात्मकैरित्युक्ते गुणानां तत्कार्याणां चोपादाने

सिद्धं च कार्यस्यापि तादात्म्यम् ॥ तादात्म्यं कार्यधर्मादेः संयोगो भिन्नवस्तुनोरित्यादि व्यासयोगे

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३

॥ भावैः पदार्थैः ॥ सर्वे भावा दृश्यमाना गुणमया एतएवेति दर्शयति ॥

सति उभयपरत्वमुक्तं भवति ॥ कार्यधर्मादेरिति ॥ कार्यद्रव्यस्योपादानेन गुणक्रियाजातिपूर्वाणां धर्माणां गुण्यादिभिरित्यर्थः ॥ भावशब्दस्यानेकार्थत्वात्तस्य विवक्षितमर्थमाह ॥ भावैरिति ॥ एवं सतिसर्वपरत्वलाभादिति भावः ॥ नन्वेवमप्येभिरिति पुरोवर्तिनामेव ग्रहणात् न सर्वपरत्वसिद्धिरित्यत आह ॥ सर्वइति ॥ परामर्शोऽयं न पुरोवर्तिमात्रस्येति भावः ॥

॥ कृ० ॥ **तादात्म्ये शक्तिरिति** ॥ ननु पाणिनीयानां मते कथं मयटस्तादात्म्ये शक्तिर्विधानादिति चेन्न ॥ नित्यं वृद्धशरादिभ्य इत्यत्र नित्यग्रहणस्याधिकविधानार्थत्वात् ॥ तादात्म्येमयडिति प्रक्रियाटीकायां चिन्मयमित्यत्र कृष्णपण्डितोक्तेरिति गृहाण ॥ उपसंहारोऽयमिति प्रतीतिनिगमार्थमाह ॥ **सिद्धं प्रमितमिति** ॥ प्रमाणसान्निध्यादिति भावः ॥ **जातिपूर्वाणामिति** ॥ विशिष्टांशिनोः संग्रहाय पूर्वशब्दः ॥ तथाच कार्यधर्मादेरित्यत्र कार्यधर्मपदाभ्यां कार्यद्रव्यादिरूपाश्रितमात्रग्रहणम् ॥ आदिपदेनोपादानादीनामाश्रयाणां संग्रह इत्युक्तं भवति ॥ **अनेकार्थत्वादिति** ॥ भावः स्वभावेऽभिप्राये चेष्टासत्तात्मयोनिषु ॥ क्रियालीलापदार्थेषु बुधजन्तुविभूतिष्विति विश्वोक्तेरिति भावः ॥ **सर्वपरत्वेति** ॥ एभ्य:परमित्यनेन विष्णोःसर्वपरत्वलाभादित्यर्थः ॥ भावैरित्युक्तस्यैवैभ्य इत्यनेनपरामर्शादिति भावः ॥

॥ श्री० ॥ **प्रमितेति** ॥ तथा च भाष्ये दृश्यमाना इत्यस्य प्रमाणप्रमिताइत्यर्थो द्रष्टव्य इत्युक्तं भवति॥ **व्यवहारपतितामिति** ॥ तथा चेदमित्यस्य लोकव्यवहारांतर्गतमज्ञानिजातमित्यर्थः ॥ ज्ञानिनस्तु लोकातीतत्वेन न लोकव्यवहारपतितत्वमिति भाव. ॥ **देहत्वादिहेतुनेति** ॥ ईश्वरदेहो गुणमयो देहादित्वा द्गुणमयदेहादिवदित्यनुमानं भाष्य एव स्पष्टम् ॥ **मायेतीति** ॥ तथा च गुणमयदेहादिदृष्टांतेन मोहित इत्यर्थ ॥ मोहितोऽज्ञो जनो भृशमिति वक्ष्यमाणप्रमाणानुसारादाह ॥ **जन इति** ॥ अज्ञानिजन इत्यर्थः ॥ **इंद्रियादीति** ॥तथा चेश्वरेंद्रियं पक्षीकृत्येंद्रियत्वेन हेतुना गुणमयब्रह्मादींद्रियदृष्टांतेन गुणमयत्वं साधनीयमित्युक्तं भवति ॥ **अयश्रमइति** ॥ तादात्म्यार्थं मयेत्यादिना कृत श्रम इत्यर्थ ॥ १३ ॥ ननु भगवतो गुणातीतत्वमसत तथात्वेनानुपलंभात सगुणत्वादिना विपरीतोपलंभाच्चेत्याशयेनाशंकितस्य तर्हिकथमेवं न ज्ञायम इत्यस्यैतावता प्रबंधेन किमुत्तरंजातमित्यतस्तद्वदन्नेवोत्तरवाक्यमवतारयति ॥ **उपायाभावेत्यादिना** ॥ मोहानितरणलक्षणोपायाभावाद्गुणातीतत्वस्याऽनुपलंभो युक्त. देहत्वाद्यनुमानाभासेन विपरीतोपलंभश्चेत्यर्थः ॥

जगन्मोहितमित्यलं किमिदमित्यनेनेत्यत आह॥ज्ञानीति॥व्यवहारपतितमित्यर्थः ॥ननु भगवद्विषयस्य सगुणत्वमोहस्यकथं गुणात्मकाः पदार्थाः कारणमित्यत आह ॥ गुणमयेति ॥ देहत्वादिहेतुनेति शेषः ॥ मायेति गुणमयानां ग्रहणंमोहितो जनः ॥ अत्र प्रमाणमाह ॥जगाद चेति ॥

एभिरिति ॥ ज्ञानिव्यावृत्त्यर्थमिदमिति ॥ गुणमयदेहादिकं दृष्ट्वेश्वरदेहेऽपि तादृश इति मायामोहित इत्यर्थः ॥ जगाद चव्यासयोगे ॥ गौणान्ब्रह्मादिदेहादीन्दृष्ट्वा विष्णोरपीदृशः ॥ देहादिरितिमन्वानो मोहितोऽज्ञो जनो भृशमिति ॥ एभ्यो गुणमयेभ्यः ॥ गुणेभ्य श्च परमिति वक्ष्यमाणत्वात् ॥ केवलो निर्गुणश्चेत्यादिश्रुतिभ्यश्च ॥ त्रैगुण्यवर्जितमितिचोक्तम ॥ १३ ॥

आदिपदेनेंद्रियादिग्रहणम् ॥यदर्थं तादात्म्यार्थग्रहणं कृतं तदाह॥एभ्यइति॥ननु भगवतो गुणातीतत्वे प्रमिते तदर्थोऽयं श्रमः सफलःस्यात्॥ तदेव कुत इत्यत आह ॥ गुणेभ्यश्चेति॥ १३ ॥ उपायाभावानुमानाभासाभ्यामनुपलंभो विपरीतोपलंभश्चेत्युक्तम्

॥ कृ० ॥ **नन्विदमिति** ॥ सन्निकृष्टमुच्यते ज्ञान्यपि तथा तत्कथं तेन तद्व्यावृत्तिरित्यत आह ॥ व्यवहारपतितमित्यर्थ इति ॥ हानोपादानादिव्यवहारपतितमित्यर्थः ॥ **देहत्वादिति** ॥ आदिपदादिंद्रियत्वादिग्रहः ॥ इंद्रियादिग्रहणमिति॥आदिपदेन मनः मनःसर्वेंद्रियाणिचेत्यादौ इंद्रियेभ्यः पृथक्त्वेन मनोग्रहणादिति ध्येयम ॥१३॥ननु सगुणत्वमोहे गीतायां कारणमुक्तं न तु गुणातीत त्वानुपलंभ इत्याशंकांपरिहरन्नाह ॥ **उपायाभावेति**॥ अग्रे उपायस्य वक्ष्यमाणत्वादत्रेदं लभ्यत इति भावः ननु कथमित्यादिर्न प्रश्नः॥ अनादिकाले बहूनामिति विशेषणवैयर्थ्यादित्याशंक्याक्षेपपरतया व्याचष्ट ॥ **भगवानिति** ॥ **इत्युक्तमिति** ॥ ज्ञानिव्यावर्तकेनेदंपदेनोक्तप्रायमित्यर्थ. ॥

॥ श्री० ॥ बहूनामित्यस्याभिप्रायमाह ॥ **बहुतरज्ञानेति** ॥ गुणमयविग्रहत्वावगाहीत्यर्थः ॥ **कतिपयज्ञानानाम्** ॥ गुणातीतविग्रहत्वावगाहिनाम् ॥ अनादि पदाभिप्रायमाह ॥ **उत्तरेति** ॥ नन्वेषेत्यस्य मोहिकेति कथं व्याख्यानं मोहकर्त्र्याः पूर्वमनुक्तत्वेनैषेत्यनेन तत्परामर्शायोगादित्यत आह॥ **मोहितमिति** ॥ एषेत्यनेन मोहकर्त्र्या न परामर्शः येनोक्तदोषः स्यात्किं नाम मोहितमित्यत्रत्यं मुहधात्वर्थमात्रमेवैषेत्यनेन परामृश्य तस्य योग्यो यः कर्त्रर्थण्वुल्प्रत्ययस्तत्संबंधेन मोहिकेति व्याख्यानमात्रं क्रियत इत्यर्थः ॥ तथा हि ॥ मुह वैचित्त्ये ऽस्माद्धातोः कर्तरि ण्वुल्प्रत्यये युवोरनाकावित्यकादेशे लघूपधत्वात् पुगंतलघूपधस्य चेति गुणे मोह अकेति जाते प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुप इति सूत्रेणाकेत्यत्रत्यस्य पूर्वस्याकारस्य इकारादेशे मोहिकेतिरूपं द्रष्टव्यम् नन्वत्र मायाया विपरीतोपलंभरूपमोहकारणत्वमुच्यते पूर्वं देहत्वाद्यनुमानस्य मोहकारणत्वमुक्तमतो विरोध इत्यत आह ॥ **अनुमानंत्विति** ॥ मुख्यतो मोहजनिका मायैवेत्याशयः ॥ रू० ॥ ननु समीपतरवर्ति चैतदोरूपमित्युक्तेरेतदः समीपस्थपरामर्शकत्वान्मोहिकायाश्चासामीप्यान्मोहिकेति कथं व्याख्यातमित्यत

अतः किमुत्तरणवाक्येनेत्यत आह॥कथमिति ॥भगवान्गुणमयाविग्रह इत्ययं न मोहःबाधकप्रत्ययाभावात् ॥ ज्ञानिनां सम्यक्प्रत्ययो बाधक इत्युक्तमितिचेत् न ॥ बहुतरज्ञानविरोधेन कतिपयज्ञानानामेव यथार्थत्वापत्तेः ॥ ननूत्तरकाले बाधकप्रत्ययो भविष्यति चेत् न ॥ अनादौ कालेजातस्योत्तरत्राप्यसंभवादिति भावः॥ ननु बाधकप्रत्ययाभावाद्यथार्थ एवायं प्रत्यय इति शंकायां किमेतदसंगतमुच्यतइत्यत आह ॥

॥ कथमनादिकाले मोहानत्ययो बहूनामित्यत आह ॥ दैवीति ॥ अयमाशयः ॥

दैवी ह्येषा गुणमयी मम मायादुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥

अयमिति ॥ एषेत्यनुवादेन मोहिकेतिव्याख्यातं मोहितमितिधात्वर्थमात्रं परामृश्य योग्यप्रत्ययसंबंधेन व्याख्यानात्॥गुणमयी तदभिमानिनी दुर्गा या हि तमोगुणेनैवंविधं मोहं जनयति ॥ अनुमानं तु निमित्तमात्रम्॥ आह॥**मोहित मिति** ॥ **योग्यप्रत्ययेतिकर्त्रर्थकण्वुल्प्रत्ययसंबंधेनेत्यर्थः** ॥ तथा च विपूर्वान्मुहवैचित्त्य इत्यस्माद्धातोः कर्तरि ण्वुलि युवोरनाकावित्यकादेशे लघूपधगुणे टापि प्रत्ययस्थादिनीत्वे च विमोहिकेति रूपनिष्पत्तिरिति भावः॥नन्वत्र मायाशब्देन दुर्गाऽभिप्रेता॥ तस्या गुणमयीत्युक्तं गुणतादात्म्यं कथमित्यतः स्वयमनूद्य व्याचष्टे ॥ गुणमयी तदभिमानिनीति ॥ किमर्थमेतद्विशेषणमित्यत आह ॥ **या हीति** ॥ कथं मोहिकेति जिज्ञासानिवृत्त्यर्थमेतदिति भावः ॥ तर्ह्यनुमानं मोहहेतुरिति प्रागुक्तविरोध इत्यत आह ॥ **अनुमानं त्विति** ॥

॥श्री०॥सृष्ट्याद्यर्थं क्रीडेति प्रतीयते क्रीडांप्रयोजनं कृत्वा सृष्टेः क्रीडार्थमिति चापर इत्यादिश्रुतिविरुद्धत्वादत आह ॥सृष्ट्यादिश्च सेति॥ननुक्रीडादिमदित्येव वक्तव्ये सृष्ट्यादीति क्रीडा कस्माद्व्याख्यातेत्यत आह ॥ क्रीडादिमत्त्वेनेति ॥ आलस्यपरिहारार्थकप्रसिद्धक्रीडादिमत्त्वेनेत्यर्थः ॥ ननुक्रीडादेर्दिवुधात्वर्थमात्रत्वमेव न कर्त्रर्थकप्रत्ययसहितदेवशब्दार्थत्वमतः कथं देवशब्दार्थमित्युक्तमित्यत आह ॥ देवशब्द इति॥ प्रकृतिर्दिवुधातुरूपा नन्वयं धातुश्चेत्कः प्रत्ययोऽत्र संप्रतो यद्युपयं देवशब्दो निष्पन्न इत्यत आह ॥प्रत्ययस्त्विति॥ अत्र दिवधातोरिगुपधत्वात् इगुपधज्ञाप्रीकिर इत्यनेन यदि कप्रत्ययस्तर्हि पुगंतलघूपधस्येति प्राप्तगुणस्य क्ङिति चेति सूत्रेण प्रतिषिद्धत्वात्प्रकृते च कप्रत्ययस्य कित्वाद्गुणो न स्यात् तथाच दिवत्येव स्यान्नदेव इति रूपं न सिध्येत तदर्थं इगुपधलक्षणस्य कस्य इगुपधज्ञेत्यादिसूत्रविहितस्य कप्रत्ययस्य बाधको नंदिग्रहिपचादिभ्यो ल्युणिन्यच इति सूत्रविहितात्प्रत्यय एवानेयः धातोरपि पचादिधातुगणस्थत्वात ॥ तथा च दिवधातोर्दीव्यतीति कर्त्रर्थे पचाद्यच्प्रत्यये तस्य कित्वाभावेन निषेधकाभावात लघूपधगुणे सति देवेति रूपसिद्धिरित्यर्थः ॥ निराकांक्षत्वादिति ॥

ततः किमित्यत आह॥सा चेति॥सा च दुरत्यया॥ तत्कृतमोहं कोऽपि नात्येतुं शक्नोति न कस्यापि बाधकप्रत्ययो भवति ॥ कुतो दुरत्यये त्यतोऽतिशक्तेरिति हेतुरध्याहृत्योक्तः ॥ कुतोऽतिशक्तित्वमित्यतो देवीत्येतद्धेतुगर्भमिति व्याख्यातम्॥ देवसंबंधित्वादिति ॥ संबंधित्वं परमप्रियत्वम् ॥स च देवस्यातिशक्तित्वे तत्संबंधिन्यास्तत्स्यात्तदेव कुत इत्यतो देवशब्दार्थो निरुक्तः॥ सृष्ट्यादीति ॥ सृष्ट्यादिश्च सा क्रीडा

माया ह्येषा मोहिका सा च सृष्ट्यादिक्रीडादिमद्देवसंबंधित्वादतिशक्तेर्दुरत्यया ॥तथा हि देवताशब्दार्थं पठंति॥दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमदमोदस्वप्नकांतिगतिष्विति॥कथं देवी ॥मदीयत्वात् ॥

च प्रथमादिपदेन स्थित्यादेः संग्रहः ॥द्वितीयेन विजिगीषादेः ॥ क्रीडादिमत्त्वेनातिशक्तिर्न सिध्यतीति क्रीडाव्याख्याता॥ देवशब्दस्यक्रीडादिमत्त्वमर्थः कुत इत्यत आह ॥ तथा हीति ॥ देवशब्दे याप्रकृतिस्तदर्थमित्यर्थः ॥ प्रत्ययस्तु इगुपधलक्षणस्य कस्यबाधकः पचाद्यच् ॥

दैवीत्यनेन निराकांक्षत्वान्ममेति व्यर्थमित्यत आह ॥ कथमिति ॥ कृ०॥ननु बाधकप्रत्ययाभावशंकायां किमेतदसंगतमुच्यत इत्यत आह॥ न कस्यापीति ॥ ननु यथाकथंचिद्देवसंबंधित्वं सर्वसाधारणं कथमतिशक्तित्वे हेतुरित्यत आह ॥ सर्वाभित्वं परमप्रियत्वमिति ॥ ननु दीव्यतेरिगुपधत्वादिगुपधज्ञाप्रीकिर इति कर्तरि कप्रत्यये कित्वाद्गुणाभावेन दिव इति रूपं स्याद्देव इति तु कथमित्यत आह ॥ प्रत्ययस्त्विति ॥ दीव्यतः पचादिपाठोऽत्र बाधकबाधनार्थ इति शाब्दिकोक्तिरिति भावः ॥ इगुपधलक्षणस्येति ॥ इगुपधत्वं लक्षणं निमित्तं यस्य तस्येत्यर्थः ॥

॥श्री० ॥स्वसंबंधस्य दैवीत्यनेनैव लब्धत्वेनाकांक्षायाः पूर्णत्वान्ममेति व्यर्थमित्यर्थः॥मदीयत्वे स्वदेवत्वस्य हेतुत्वमिद्धेर्यतोऽहंदेव इति हेत्वर्थकहिशब्देनैव लब्धत्वादितिशब्दोव्यर्थ इत्यत आह ॥आशयवर्णनेति॥तथा चेत्ययमाशय इत्यन्वयो द्रष्टव्यः ॥ अनुमानम् ॥ देहत्वादि ॥ मोहहेतुः ॥ गुणमयविग्रहत्वादि मोहहेतुः ॥ तदसदिति ॥ एतादृशप्रबलमायानिरणस्य कस्याप्यसंभवेन ज्ञानिनामेवाभावादिति भावः ॥ तदुपाय एवेति ॥ तथा च मां प्रपद्यंते इत्येव वाच्यमिति भावः ॥ न त्विति ॥ एवकारेणेति शेषः ॥ इत्थंभावेति ॥ स्वप्रतिपत्तिः कथं कर्तव्येत्याशंकायां सर्वं परित्यज्येति सर्वपरित्यागरूपेत्थंभावसूचकइत्यर्थः ॥ चरित्रम् ॥ कर्म ॥ कर्तव्यमिति यावत् ॥

तस्यैव व्याख्यार्थमेतदिति भा : ॥ त्वदीयत्वेऽपि कथंदैवीत्यत शेषं पूरयति ।अहं हीति॥आशयवर्णनसमाप्ताविति शब्दः अत्र प्रमाणमाह ॥ अब्रवीच्चेति ॥ उत्तरस्य प्रकृतोपयोगितया संगतिमाह ॥ तर्हीति ॥ यदि न केवलमनुमानं किं तु भगवतोपोद्बलिता माया मोहहेतुस्तर्हि

अहं हि देव इति ॥ अब्रवीच्चश्रीभूदुर्गेति या भिन्नामहामाया तु वैष्णवी ॥ तच्छक्त्यनंतांशहीनाऽथापि तस्याश्रयात्प्रभोः॥ अनंतब्रह्मरुद्रादेर्नास्याः शक्तिकलाऽपि हि॥ तेषां दुरत्ययाऽप्येषा विना विष्णुप्रसादत इति च व्यासयोगे ॥ तर्हि न कथंचिद्दुत्येतुं शक्यत इत्यत आह ॥ मामेवेति ॥ अन्यत्सर्वं

॥ परित्यज्य मामेव ये प्रपद्यंते ॥

त्यर्थः ॥ ततश्च ज्ञानिव्यावृत्त्यर्थं यदिदमित्युक्तं तदसदिति भावः॥ ननु मायात्ययोपायस्यासंभावनाशंकायां तदुपाय एव वक्तव्यो न तूपायांतरप्रतिषेधः ॥ अतोऽनुपपन्नमवधारणमित्यत आह ॥ अन्यदिति ॥स्वप्रतिपत्तावित्थंभावसूचक एवशब्दो नोपायांतरप्रतिषेधपर इत्यर्थः ॥

॥ कृ० ॥ ननु हेतुत्वस्य हिशब्देनोक्तत्वादितिशब्दो व्यर्थ इत्यत आह ॥ आशयेति ॥ मत्संपत्त्येत्यादिवक्ष्यमाणप्रमाणानुसारेणाह ॥ भागवता इति ॥

॥ श्री॰ ॥ भजतां मध्यमत्वोत्तमत्वव्युत्पादनाय मत्संपत्त्या मदुपाधितयेत्यनयोरर्थभेदमाह ॥ अहं च मेत्यादिना ॥ तथा च मत्संपत्त्येत्यस्यमदाख्यसंपत्तियुक्ततयेत्यर्थः ॥ अनेन मध्यमभक्तानां गुर्वादिपूजाकरणे वित्तं बंधुर्वयः कर्म विद्या चैत्यकर्त्रियादिरिव मत्संपत्त्येति विष्णुरूपसंपत्तिनिमित्तत्वोक्त्या संदेहमानीहरये प्रणमेदित्युक्तरीत्या गुर्वादयोऽपि भजनीयाः ॥ उत्तमानां भीमसेनादीनां तु द्रोणादिगुर्वादिपूजायां मदुपाधितयेति तेषां साल्ग्रामवत्प्रतिमात्वोक्त्या प्रणमेत केवलाय चैत्यकरीत्या गुर्वादिनिष्ठो विष्णुरेव पूज्यः न तु तेऽपि ॥स्वाधमानां पूज्यत्वासंभवात् ॥ अत एव तांश्च सर्वभूतानि चेति गुर्वादिसमतया सर्वभूतानां ग्रहणमिति द्रष्टव्यम ॥ व्यनंक्षीत्येतदंतभागनिष्पत्त्यर्थकमित्याशयेनाह ॥ व्यंजयसीति ॥ तथाचाचार्य चित्तस्थरूपेण स्वगतिं स्वज्ञानं त्वमेव व्यंजयसीति कृष्ण प्रत्युद्धववचनम ॥ स एव चैत्यकार्थे इदं मानमिति द्रष्टव्यम ॥ १४ ॥ तथा चेति ॥ त्वत्प्रपत्तिर्मायातरणोपायत्वे सर्वेऽपि त्वां प्रपद्य मायां तरेयुरेव ॥ न हितीर्णा स्तेन नायते त्व प्रतिपत्तेर्मायातरणोपायत्व यस्मात्मामेवेत्यनेनोक्तं तदसदितीति भाव

एवं तर्हि गुर्वादिवंदनाभावः प्राप्त इत्यतोऽभिप्रायमाह ॥गुर्वादीति॥भागवता एत इत्यादिबुद्ध्या वंदनादि कुर्वंतीति यावत्॥ एतन्मध्यमभक्तानां चरित्रमुक्तम् उत्तमानांत्वाह ॥ स एवेति ॥ भगवानेव तत्र गुर्वादिषु ॥ इयंप्रमाणेनोपपादयति ॥ आह चेति ॥ अहं च सा सं

गुर्वादिवंदनं च मय्येवसमर्पयंति॥स एव च॥तत्रस्थित्वा गुर्वादिर्भवतीत्यादि पश्यंति॥आह च नारदीये ॥ मत्संपत्त्या तुगुर्वादीन्भजंते मध्यमा नराः॥मदुपाधितयातांश्च सर्वभूतानि चोत्तमा इति॥ आचार्यचै

न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः॥माययाऽपहृतज्ञाना आसुरंभावमाश्रिताः॥ १५॥

॥ त्यवपुषा स्वगतिंव्यनंक्षीतिच ॥ १४ ॥तर्हिसर्वेऽपि किमिति नात्माययन्नित्यतआह॥नमामिति ॥

पतिश्च मदुपाधितया मत्प्रतिमात्वेन॥ चैत्यं चित्स्थम् ॥ स्वगतिं स्वज्ञानम् ॥ व्यनंक्षि व्यंजयसि ॥१४ ॥उत्तरवाक्यं प्रकृतानुपयुक्तमित्यत आह ॥ तर्हीति ॥ यदि त्वत्प्रपत्तिर्मायातरणोपायस्तर्हीत्यर्थः ॥ त्वां प्रपद्येति शेषः ॥ तथा च मामेवेत्युक्तमसदिति भावः ॥

॥कृ॰॥भजतां मध्यमत्वोत्तमत्वोपपादनाय मत्संपत्त्या मदुपाधितयेत्यनयोरर्थभेदमाह॥अहंच सेत्यादिना॥अनेन मध्यमभक्ता गुर्वादिगतं विष्णुं तांश्च भजंते संदेहमानीहरये प्रणमेदित्युक्तेः॥ उत्तमास्तु भीमादयोद्रोणादिगतं विष्णुमेव भजंते न तु द्रोणादीन साधनत्वेन पूज्यत्वायोगात् ॥ ते तुसाल्ग्रामादिवत्प्रतिमाः ॥ यथोक्तम् प्रणमेत् केवलाय चैतीत्युक्तं भवति अत एवतथा सर्वभूतानि चेति गुर्वादिसमकक्षतयाभूतानां ग्रहणमिति बोध्यम ॥ व्यनंक्षीत्येतदंतर्णिनण्यर्थमित्याशयेनाह ॥ व्यंजयसीति ॥

॥ श्री० ॥ दुष्कृतित्वमूढत्वयोर्हेतुहेतुमद्भावमुपपादयति ॥ **विपर्ययस्येति** ॥ **प्रसिद्धेरिति** ॥ दुष्कर्मणा भवेन्मोह इतिवचनादिति भावः ॥ ननु मिथ्याज्ञानित्वेन हेतुना तमोयोग्यानि ष्ठनराधमत्वसाधनमयुक्तम् ॥ ऋजुव्यतिरिक्तेषु मुक्तियोग्येषु देवेषु तथा मनुष्योत्तमेषु नित्यसंसारिभूतमध्यममनुष्येषु च व्यभिचारादित्यत आह ॥ **देवानामिति** ॥ ऋजुव्यतिरिक्तानामि त्यर्थः ॥ ॥ **केवलमिथ्याज्ञानित्वेति** ॥ प्रकारांश इवाधिष्ठानांशेप्ययथार्थज्ञानस्वरूपत्वं केवलमिथ्याज्ञानित्वं तदभावादित्यर्थः ॥ तथा च न मिथ्याज्ञानित्वमात्रं हेतुत्वेन विवक्षितं येन व्यभिचारः स्यात् ॥ किं नाम सर्वात्मनामिथ्याज्ञानित्वमेव तस्य च देवादिष्वभावान्न व्यभिचारइति भावः ॥ मूढत्वे दुष्कृतित्वातिरिक्तं अपहृतज्ञानत्वं च हेतुरित्याशयेनापहृतज्ञानत्वा च मूढा इत्युक्तं भाष्ये तत्र तयोर्हेतुहेतुमद्भावमुपपादयति ॥ **अधिष्ठानेति**॥**प्रसिद्धेरिति**॥ लोके शुक्तिरजतादिभ्रमे दर्शनादिति भावः ॥ ननु तमोयोग्या असुरभावमाश्रिता नराधमत्वादि त्यत्र नराधमानामपि तमोयोग्यत्वेन पक्षकोटिनिक्षिप्ततया तत्रासुरभावाश्रयणरूपसाध्याभावाद्बाध इत्यत आह ॥**जीवत्रैविध्येति**॥त्रिविधा जीवसंघास्तु देवमानुषदानवाः ॥

दुष्कृतित्वादीनां प्रयोजनांतराभावात्तद्धेतुत्वेनान्वये स्थिते॥ किं ते पंचापि साक्षाद्भगवदप्रपत्तिहेतवःकिं वा हेतुहेतुमद्भावेनेत्यपेक्षायामाह॥ दुष्कृतित्वादिति॥ मूढामिथ्याज्ञानिनः विपर्ययस्याधर्मकार्यत्वप्रसिद्धेः ॥ अत एव ॥ मूढत्वादेव ॥ देवानामुत्तममध्यममनुष्याणां च केवल

दुष्कृतित्वान्मूढाः ॥ अत एव नराधमाः ॥ अपहृतज्ञानत्वाच्च मूढाः ॥ अत एवासुरं भावमाश्रिताः ॥

मिथ्याज्ञानित्वाभावात् ॥ अधिष्ठानयाथात्म्याज्ञानस्य विपर्ययहेतुत्वप्रसिद्धेरपहृतज्ञानत्वाच्च मूढाः ॥ अत एवनराधमत्वादेव ॥ जीवत्रै विध्यविवक्षायां नराधमानामसुरत्वं तभावस्य प्रसिद्धत्वात ॥

॥ कृ० ॥ ननु कथं मिथ्याज्ञानित्वेन नराधमत्वसाधनं मुक्तियोग्येषु नित्यसंसारिषु च व्यभिचारादित्यत आह ॥ **देवानामिति** ॥ तथा च केवलमिथ्याज्ञानित्वरूपाविवक्षितहेतोरभावान्न व्यभिचार इति भावः ॥ तथा च न कल्यादौ केवलमिथ्याज्ञानित्वस्य व्यभिचारस्तथाऽग्रे वक्ष्यामः ॥ ननु भगवंतमप्रतिपद्यमानाः सर्वे पक्षास्ते च मुक्तियोग्यास्तदयोग्याश्च ॥ तथा च पक्षे व्यभिचारशंकादिकमयुक्तमिति चेत् ॥ उच्यते ॥ एतद्वाक्योक्तानां दुष्कृतित्वादीनां मध्ये नराधमत्वं केवलमिथ्याज्ञानित्वं [illegible] ग्यानामसाधारणं मिथ्याज्ञानित्वमात्रं दुष्कृति त्वादिकं च योग्यायोग्यसाधारणम् ॥ यथा प्रयाणकाले मनसेत्यग्रिमाध्यायश्लोके भ्रुवोर्मध्ये प्राणमावेश्येत्येतद्वायुजयादिप्रधानानामसाधारणम् ॥ अन्यत्साधकमात्रनिष्ठं तद्वत् ॥ तथा चा साधारणस्य हेतुत्वे तद्वतामेव पक्षत्वान्नान्यत्र व्यभिचारशंकादिकं युक्तमेवेति ॥ अपहृतज्ञानत्वाच्च मूढा इति हेतुमद्भावमुपपादयन्नाह ॥ **अधिष्ठानेति** ॥ ननु सन्निहितमूढत्वपरामर्शो न युक्तः पूर्वं साध्यस्योक्तत्वेन तत्समुच्चयार्थमाश्रिताश्चेति च शब्दप्रसंगादित्यत आह ॥ **नराधमत्वादेवेति** ॥ ननु नराधमत्वेनासुरभावसाधनमयुक्तं साध्याभावव्याप्तत्वेन विरुद्धत्वप्रसं गादित्यत आह ॥ **जीवत्रैविध्येति** ॥ त्रिविधा देवसंघास्तु देवमानुषदानवाइत्यादिप्रमाणानुसारेण जीवत्रैविध्यविवक्षायामित्यर्थः ॥

॥ श्री० ॥ नित्यानंदो नित्यज्ञानो नित्यबलः परमात्मा एवं सुरा नैवमसुरा एवमनेवं च मनुष्या इत्यादिवाक्येषु देवशब्देन मोक्षयोग्यानां मनुष्यशब्देन नित्यसंसारिणां दानवासुरशब्देन तमोयोग्यानां गृहीतत्वेनैतद्विवक्षया नराधमानामपि तमोयोग्यत्वेनासुरेष्वंतर्भावस्य प्रसिद्धत्वेनासुरभावाश्रयणरूपसाध्यस्यापि सत्वान्न बाध इत्याशयः ॥ ननु तर्हि किमिति सर्वे नात्यायान्निति प्रश्नस्य किमुत्तरमनेनजातमिति चेत्तत्राह ॥ आसुरभावेति ॥ तथा च तमोयोग्याः न मां प्रपद्यंते आसुरस्वभाववत्वात् ॥ तदपि कुतः ॥ नराधमत्वात् तदपि कुतः मूढत्वात् ॥ तदपि कुतः ॥ दुष्कृतित्वात् ॥ अपहृतज्ञानत्वाच्चेति हेतुहेतुमद्भावो द्रष्टव्यः ॥ हेतुत्वमिति ॥ प्रयोजकत्वमित्यर्थः ॥ भगवदप्रतिपत्तावासुरभावस्य न प्रयोजकत्वं तद्रहितानामपि क्षपणकादीनां भगवत्प्रतिपत्तिमद्भावात् तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोज्यत्वादिति भाव.॥एतेषामिति॥प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः॥न शौचं नापि चाचारो न सत्यं तेषु विद्यत इत्युक्तानां प्रवृत्त्याद्यज्ञानादीनां धर्माणां मध्येऽन्यतमो धर्मः क्षपणकादिष्वस्त्येवेत्यासुरस्वभावत्वमप्यस्तीति नोक्तदोष इति भावः ॥ अत्र भगवदप्रपत्तिकर्तारो द्विविधाः मुक्तियोग्यास्तमोयोग्याश्चेति तत्र तमोयोग्यानां भगवदप्रपत्तौ साक्षात् परंपराहेतुप्रतिपादकत्वेन न मां दुष्कृतिनो मूढा इति समग्रं श्लोकं व्याख्याय मुक्तियोग्यानां भगवदप्रपत्तिपक्षे प्रवृत्त्याद्यज्ञानमात्रादिरूपासुरभावाश्रयणं साक्षाद्धेतुरभिभूतज्ञानत्वरूपापहृतज्ञानत्वमेवासुरभावाश्रयणे हेतुरित्येवं हेतुहेतुमद्भावोऽभिप्रेत इति न दोष इति प्रतिपादनपरतयाऽपि माययाऽपहृतज्ञाना आसुरं भावमाश्रिता इतिपदद्वयमुत्तरभाष्येण व्याख्यायत इत्यभिप्रेत्योत्तरभाष्यमवतार्य व्याचष्टे॥ननु मुक्तौ योग्यानामित्यादिना एतेधर्मा इति॥आसुरभावाश्रयणादयोधर्माइत्यर्थः ॥

आसुरभावाश्रयणात्तमां प्रपद्यंत इत्यर्थः ॥ नन्वासुरो भावो हि हिंसानृतादिलक्षणोऽन्यैर्व्याख्यातः॥तद्रहिताश्च क्षपणकादयो न भगवंतं प्रपद्यंते॥तत्कथमस्य हेतुत्वमित्यत आह॥स चेति॥एतेषामन्यतमः सर्वेष्वप्यस्तीति भावः ॥ ननु मुक्तौयोग्यानामयोग्यानां च भगवंतमप्रति

॥ स च वक्ष्यते प्रवृत्तिंचनिवृत्तिं चेत्यादिना ॥

पद्यमानानां एते धर्मा वक्तव्याः

॥ कृ० ॥ तथा च नराधमत्वस्यासुरत्वव्याप्यत्वादुक्तं युक्तमिति भावः ॥ इदं च नराधमत्वं मनुष्यत्वव्याप्यमित्यभिप्रेत्योक्तम्॥ वस्तुतस्तु नराधमत्वं नामाधमजीवत्वं प्रकृतेऽभिप्रेतम् ॥ अन्यथा केवलमिथ्याज्ञानित्वेन मनुष्यत्वव्याप्यनराधमत्वसाधने कल्यादौ व्यभिचारादिति बोध्यम् ॥ एतेषामिति ॥ प्रवृत्तिं चेत्याद्युक्तधर्माणां प्रत्येकमासुरभावत्वात्क्षपणकादौ च हिंसाद्यभावेऽप्यसत्यमप्रतिष्ठंत इत्याद्युक्तधर्मसत्त्वान्नासिद्धिरित्यर्थः ॥ननु मुक्तौ योग्यानामिति ॥ अत्र मुक्तियोग्यानां पक्षत्वे दुष्कृतित्वापहृतज्ञानत्वाभ्यां मूढत्वं साध्यं तच्च मिथ्याज्ञानित्वमात्रम् ॥ तेन चासुरभाव इति विवेक्तव्यम् ॥

॥ श्री० ॥ ननु प्रमाणवाक्ये जीवमात्रज्ञानस्याभिभवप्रतिपादनं प्रतीयते न मुक्तियोग्यजीवज्ञानस्येति चेत्तत्राह ॥ आगमेति ॥मध्यमाधमजीवानां सम्यग्ज्ञानमात्रस्य भावत्वाभावेन तदभिभवस्याकल्प्यत्वादिति भावः ॥ जाताविति ॥ समुदायापेक्षमेकवचनमित्यर्थः ॥ सिद्धांत अनुगतजातेरभावादित्यवधेयम ॥तथाचामुष्वसाविति भाष्यप्रमाणयोर्न विसंवाद इतिभावः ननु देवास्त्वसुरा इति संधिः स्यादिति चेत्तत्राह ॥ पदसंधेरिति ॥ पदयोः संधेरित्यर्थः विवक्षितस्तु संधिर्भवतीति वचनादितिभावः ॥ असंधिरिति ॥ देवास्तु असुरा इति संध्यभाव एव जात इत्यर्थः ॥ ननु तर्हि किमिति सर्वे नात्यायन्निति प्रश्नस्य त्रिगुणमयैर्भावैरित्यनेनैव मायामोहितत्वकथनेन परिहृतत्वान्न मां दुष्कृतिन इति पुनरुक्तमिति मंदाशंकां पूर्वोत्तरग्रंथयोर्भेदप्रदर्शनेन परिहरति ॥ त्रिभिरित्यत्रेतिकारणं ॥ मायामोहितत्वरूपम् ॥ स्वदोषात् ॥ योग्यताभावरूपात्॥ १५ ॥ १६ ॥

तत्रमुक्तियोग्यानां सम्यग्ज्ञानस्वभावात् तत्कथमपहृतज्ञानत्वमित्यत आह॥अपहार इति ॥ आगमवाक्यमपि सज्जीवविषयं मुक्तियोग्याना मसुरभावाश्रयणप्रवृत्त्याद्यज्ञानेनोक्तम् ॥ प्रकारांतरेण घटयितुमाह ॥ असुष्विति ॥ इंद्रियेषु तत्प्रीणन एव रताः असाविति जातावेकवचनं

अपहारोऽभिभवः ॥ उक्तं चैतत्व्यासयोगे ॥ ज्ञानं स्वभावो जीवानांमाययाह्यभिभूयत इति ॥ असुषु

चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन ॥ आर्तोजिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६॥

॥ रताअसुरास्तच्चोक्तं नारदीये ॥ ज्ञानप्रधानादेवास्तु असुरास्तुरता असाविति ॥१५॥१६ ॥

पदसंधेर्विवक्षाधीनत्वादसंधिर्न दोषः ॥ त्रिभिरित्यत्र भगवतो गौणविग्रहत्वज्ञानस्य कारणमुक्तम् ॥ अत्र तु स्वदोषादेव न मां प्रपद्यंते ॥ न तु मत्प्रपत्तेर्मायातरणोपायत्वाभावादित्यतो महान्भेदः ॥ १५ ॥ १६ ॥

॥क०॥आगमवाक्यमिति॥ज्ञानं स्वभावइति वाक्यमित्यर्थः॥असुष्वित्यनेनैकार्थत्वसिद्ध्यर्थमाह ॥ जाताविति ॥ ननु इकोयणचीति यणादेशे देवास्त्वसुराइति वक्तव्यम ॥ कथं देवास्तु असुरा इत [illegible] आह ॥ पदसंधेरिति ॥ संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्यासमासे वाक्येतु साविवक्षामपेक्षत इति शाब्दिकोक्तेरिति भावः ॥ १५ ॥ १६ ॥

१ संधिनिमित्तसंहितायाइत्यर्थः ॥ अग्रेऽप्येवम् ॥ २ अकामा वा सकामा वाये मां भजंते तज्जन्मांतरीयसुकृतफलिन इत्याह ॥

॥श्री०॥भक्तिशब्दस्यप्रियादित्वादित्यादि ॥स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु उक्तभाषितपुंस्कात्परस्य ऊङ्प्रत्ययभिन्नस्य स्त्रीप्रत्ययस्य पुंवद्भावः स्यात् समानाधिकरणार्थे एकार्थे स्त्रीलिंगे पदे परे न तु पूरण्यां पूरणार्थकाः मट्प्रत्ययाद्याः पूरणीप्रत्ययास्तदन्तानां पदानां परतः स्थिते प्रियादिषु गणस्थेषु च परतः सत्सु पूर्वपदस्यनपुंवद्भावइति सूत्रार्थः॥पुंवद्भावात् स्त्रीप्रत्ययलोपः॥चित्रागावोयस्यासौचित्रागुरिति भाव्येपुंवद्भावेन स्त्रीप्रत्ययस्य टापो लोपे चित्रगुरिति भवति॥अनूङः किम॥वामोरूभार्या यस्यासौ वामोरूभार्य इत्येव भवति न तु वामोरुभार्य इति॥अपूरण्यां किम कल्याणी पञ्चमी यासांस्त्रीणां ताः कल्याणीपंचमाः॥अप्रियादिषु किम ।कल्याणीप्रिय इत्यादिअत्रप्रियादिगणस्थयोगात् न पूर्वपदस्य पुंवद्भावेन स्त्रीप्रत्ययलोपः प्रिया । मनोज्ञा । कल्याणी ।सुभगा । दुर्भगा । भक्तिः सचिवा । कांता । क्षान्ता । समा । चपला । दुहिता । वामना । वामा । बाला । तनया ॥ इति प्रियादिगणः ॥ एवं च प्रकृते एकभक्तिरित्यत्र एका भक्तिर्यस्येति विग्रहे भक्तिशब्दस्य प्रियादिगणस्थत्वात्तस्मिन् परतः पूर्वपदभूतैकपदस्य स्त्रियाः पुंवदितिसूत्रेण पुंवद्भावासंभवेन स्त्रीप्रत्ययलोपाभावात् एकाभक्तिर्यस्यासावेकाभक्तिरित्येव स्यान्न तु पुंवद्भावेन स्त्रीप्रत्ययस्य टापो लोपेनैकभक्तिरितीत्यर्थः ॥ न सिध्यतीति ॥ स्त्रियाः पुंवदितिसूत्रेणेति शेषः॥ ननु भक्तिशब्दस्य प्रियादित्वात्तस्मिन्परत इत्यादि कस्मादुक्तम ॥ किं नाम एका भक्तिरिति विग्रहे न कोपधाया इति पुंवद्भावो न सिध्यतीति कस्मान्नोक्तम् ॥ न कोपधायाः ककारगु

एका भक्तिर्यस्येति विग्रहे भक्तिशब्दस्य प्रियादित्वात्तस्मिन्परतःपूर्वपदस्य पुंवद्भावो न सिध्यतीत्यालोच्याह॥एकास्मिन्नेवेति॥अस्येत्यध्याहार्यम्॥

॥ एकस्मिन्नेव भक्तिरित्येकभक्तिः ॥

कोपधायाः स्त्रियाः पुंवद्भावो न स्यात ॥पाचिका भार्या यस्यासौ पाचिकाभार्यः रसिकाभार्य इति दर्शनात ॥ एवं च प्रकृतेऽप्येकशब्दस्य ककारोपधत्वेन पुंवद्भावायोगात् ॥ न च कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारये प्रतिप्रसूयत इति वार्तिकेन न कोपधाया इति प्रतिषिद्धस्यापि पुंवद्भावस्य प्रतिप्रसवात एका चासौ शाटीचएकशाटीति दर्शनाच्चैकभक्तिरितियुक्तमिति वाच्यम तत्र कर्मधारय इत्युक्तत्वात प्रकृते च बहुव्रीहिसमास यादिति चेदुच्यते ॥ न कोपधायाइत्यस्य स्त्रियाःपुंवदितिसूत्रप्राप्तपुंवद्भावप्रतिषेधकत्वात् यथोक्तं काशिकायाम् ॥ न कोपधाया इति स्त्रियाःपुंवदितिसूत्रप्राप्तपुंवद्भावो निषिध्यत इति ॥ न ह्यत्र प्रकृते स्त्रिया इत्यनेन पुंवद्भावप्राप्तिरस्ति येन न कोपधाया इत्यादिवक्तव्यं स्यात् तत्राप्रियादिष्वित्युक्तत्वादिति ॥ यद्यप्येका भक्तिर्यस्येति विग्रहेऽपि एकतद्धिते चेति सूत्रेण उत्तरपदमात्रे परे एकशब्दस्य ह्रस्वत्वविधानात्पुंवद्भावः सिध्यति तथाऽप्यस्मिन्पक्षे भगवतो भक्तिविषयत्वरूपार्थविशेषासिद्धिरित्याद्यालोचनीयमिति संप्रदायविदः ॥ ॥ रु० ॥ नसिध्यतीति ॥ स्त्रियाःपुंवद्भाषितपुंस्कादिति सूत्रे अपूरणीप्रियादिष्वित्यनेन प्रियादिशब्दे परे पुंवद्भावनिषेधादिति भावः ॥ यद्यपिसर्वनाम्नो वृत्तिमात्रे पुंवद्भावः संभवति ॥ तथाऽपि वक्ष्यमाणागमानुसारात ॥ व्यधिकरणबहुव्रीहिरंगीकृत इति ज्ञातव्यम्

१ अत्रप्रकरणेऽशब्दअभावादेशेऽयंकर्तुमिष्टेनः ॥ नंशब्दंगीत्यर्थेनच्छव्दप्रयोगसूत्रीऽनगच्छतीतिसूचयितुम् ॥

॥ श्री० न सिध्यतीति ॥ समानाधिकरणबहुव्रीहेरेवार्थगमकत्वादिति भावः ॥ आगम॰ ॰ादिति ॥ एकभक्तिरित्यत्र व्यधिकरणबहुव्रीहेरिति शेषः ॥ १७ ॥ १८ ॥ ततो ज्ञानानंतरं ॰हुभिर्जन्मभिर्मां प्रतिपद्यत इति प्रतीयते तदयुक्तम् ॥ एवं मुक्ति फलानियम इति सूत्रविरोधादित्यत आह ॥ ततस्तदैवेति ॥ ज्ञानानंतरमेवेत्यर्थः ॥ प्रारब्धप्रतिबंधाभावे इति द्रष्टव्यम् ॥ १९ ॥

तथाऽपि वैयधिकरण्यात् बहुव्रीहिर्न सिध्यतीति चेत् न ॥ आगमसिधत्वाच्चेत्याह ॥ तच्चेति ॥ यस्येत्युपस्कर्तव्यम् ॥ १७ ॥ १८ ॥ ब

तच्चोक्तं गारुडे॥मय्येव भक्तिर्नान्यत्रभक्तिः सएकभक्तिः उच्यत इति॥१७॥१८॥बहूनांजन्मनामंते ज्ञान

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥१७

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्॥आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥१८

बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९

वान्भवति ॥ तच्चोक्तं ब्राह्मे ॥ बहुभिर्जन्मभिर्ज्ञात्वाततो मां प्रतिपद्यतइति ॥ १९ ॥

हूनां जन्मनामित्यत्र ज्ञानोत्पत्त्यनंतरं भगवत्प्रपत्तौ बहुजन्मव्यवधानमुच्यत इति निरासार्थमाह ॥ बहूनामिति ॥ प्रतीतमेव किं न स्यादित्यत आह ॥ तच्चेति ॥ ततस्तदैव ॥ १९ ॥

॥क०॥ वैयधिकरण्यादिति ॥ समानाधिकरणानां बहुव्रीहिरिष्यत इत्युक्तेरितिभावः॥ आगमसिद्धत्वादिति ॥उपलक्षणं चैतत्॥ सप्तमीविशेषणे बहुव्रीहाविति सप्तम्यंतस्य पूर्वनिपातोक्तिरूपलिंगाच्चेति ग्राह्यम् ॥ यस्यासाविनीति ॥ अत्र यस्येत्युपस्कर्तव्यमित्येव पाठः सदुच्यतइति ॥ तच्छब्दस्य सत्वात् ॥ अन्यादृशस्तु लेखकप्रमादादित्याहु. ॥१७ ॥१८ ॥ १९

१ अ. ३ पा. ४ अ. ११ सू. १ ओं एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ओं ॥ ज्ञानइवमुक्तिफलेऽप्यनियमः अप्रतिबंधेनदेहानंतरमेवनचेद्देहांतरावसानेइत्येव ॥ ब्रह्मसंस्थोऽमृतत्वमेत्येवेतिश्रुत्याब्रह्मसंस्थस्यमुक्तिफलावधारणात् ॥ इति सूत्रार्थः ॥ २ एकप्रशंसयाप्राप्तितरनिंदानिराह ॥ ३ अतिप्रियत्वात् ॥ अभेदोपचारः ॥ तदेवाह ॥ हि यतः ॥ स अनुत्तमांगतिमुद्दिश्यसमाधियुक्तमनामांप्राप्तः ॥

॥श्री०॥एवशब्देनेति ॥तथा च प्रकृतिसंस्कारवासनाशब्दैः स्वभाव एवोच्यत इत्यर्थः ॥ भाष्ये भगवद्भक्तानामंतवत्फलं न संभवतीत्यत्र मुक्तश्च कां गतिमिति प्रमाणांतरमिति मंतव्यम् ॥ ॥२०॥ ननुपरिहारवाक्योदाहरणं कस्मान्नकृतमित्यत आह ॥ बहुत्वादिति ॥ अत एव संदर्भादित्युक्तमिति भावः ॥ आहेति ॥ अवतारभक्तानामप्यनंतफलवत्त्वमेवेत्याहेत्यर्थः ॥ कुत्र चेति ॥ यस्मिन् कस्मिन्नप्यवतार इत्यर्थः ॥ २१ ॥ २२ ॥

ननु मूलप्रकृतेः सर्वत्रैकत्वात्कथं स्वयेति प्रातिस्विकत्वमुच्यत इत्यत आह ॥ प्रकृत्येति॥ स्वभाव एवेत्येवशब्दसंबंधः ॥ २० ॥ रामकृष्णादिरूपां भगवत्तनुमिति प्रतीतिनिरासायाह ॥ यां यामिति ॥ कुत एतत् ॥ अंतवत्तुफलं तेषामिति तद्भक्तानामंतवत्फलवचनात् ॥ तस्य च ब्रह्मादिग्रहणे संभवाद्भगवद्ग्रहणे चासंभवादिति भावेनाह ॥ उक्तं चेति ॥ फलस्येतिशेषः ॥ गम्यत इतिगतिः ॥ इत्यादेः प्रश्नस्य परि

प्रकृत्यास्वभावेन॥ स्वभावः प्रकृतिश्चैव संस्कारो वासनेति चेत्याभिधानात् ॥ २०॥ यांयां ब्रह्मादिरूपां तनुम् ॥ उक्तं च नारदीये ॥ अंतो ब्रह्मादिभक्तानां मद्भक्तानामनंततेति॥मुक्तश्च कां गतिं गच्छेन्मोक्षश्चै

कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेऽन्यदेवताः॥ तं तं नियममास्थाय प्रकृत्या नियताःस्वया॥ २० ॥

योयो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥२१॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते चततः कामान्मयैव विहितान्हितान् ॥ २२ ॥

व किमात्मक इत्यादेः ॥ परिहारसंदर्भाच्च मोक्षधर्मेषु ॥ अवतारेमहाविष्णोर्भक्तः कुत्र च मुच्यत इत्यादेश्च ब्रह्मवैवर्ते ॥ २१ ॥ २२ ॥

हाररूपवाक्यसंदर्भाच्च ॥ बहुत्वादनुदाहरणमिति भावः॥ अनंतफलत्वं मूलरूपभक्तानामस्तु अवतारतनुभक्तानामंतवत्फलांगीकारे को विरोध इत्यत आह ॥ अवतारइति ॥ कुत्र चावतारे ॥ २१ ॥ २२ ॥ ॥ कु० ॥ ॥ २० ॥ २१ ॥ २२ ॥

१ ब्रह्मरुद्रादेः ॥ २ तत्पूजकाभीप्सितान्तत्तद्देवतांतर्यामिणामयैवदत्तान्तत्तद्देवेभ्योलभततेषांस्वातंत्र्येणफलदानेऽसामर्थ्यात्

॥ श्री० ॥२३॥ यथाश्रुतम् ॥ द्वितीयांतमव्यक्तपदं पठित्वा ॥ अव्यक्तमिति प्रतीकग्रहणेन ॥ व्याख्यानमिति ॥ कार्यदेहादिवर्जितमित्यनेनेत्यर्थः ॥ यत ॥ विधिरूपं वाक्यम्॥ तस्यं दमिति ॥ ततश्च कार्यदेहादिवर्जित इतिवाक्यावित्यासो द्रष्टव्यः ॥ एवं विधि ध्याहारे को विशेषस्तवान्येभ्य इति शंकापरिहारहेतुः कार्यदेहराहित्यरूपो विशेषोऽभिहितो वति ॥ अन्यथाऽव्यक्तमित्याद्यसंगतप्रमेयोक्त्या शंकापरिहारान्याभादित्याशयः र्तीति ॥ तथा न कार्यदेहादिमानेव प्रतीयसे यतोऽतः कार्यदेहादिवर्जितत्वं यदव्यक्तोऽहमित्यनेनोक्तं तदसदित्यर्थः ॥ कार्येनीति ॥ तथा चाव्यक्तं मां व्यक्तिमापन्नं अबुद्धयो म . कार्यदेहादिमत्तया प्रतिपन्नानम् इति गीतार्थो द्रष्टव्यः ॥ वाक्यद्वयमिति ॥ अव्यक्तोऽहमिति विधिवाक्यं अव्यक्तमित्याद्यनुवादवाक्यं चेत्यर्थः ॥ भाष्ये ॥ आनंददेह पुरुष मन्यसे गौणदेहकमित्यनेन तद्दत्तप्रतीतिरज्ञानमूलकं भवतीति द्रष्टव्यम् ॥

॥ २३॥अव्यक्तमितिश्लोकस्य प्रकृते न साक्षात्संगत्यभावात् तं संगमयितुमाह ॥क इति॥ अन्येभ्यो ब्रह्मादिभ्यः ॥ येन तान् प्राप्तानामं तवत्फलत्वेऽपि त्वां प्राप्तानामनंतफलत्वेति शंकाशेषः ॥ कथमनेनोक्तशंकापरिहार इत्यत आह ॥ कार्येति ॥ अनेन यथाश्रुतं पदं पठित्वा व्याख्यातम् ॥ वस्तुतस्त्वव्यक्तं मामित्यनुवादादव्यक्तोऽहमिति यत्सिद्धं तस्येदं व्याख्यानमिति ज्ञातव्यम् इदानीमुत्तरस्य संगतिमाह ॥ त

॥ २३॥ को विशेषस्तवान्येभ्य इत्यतआह॥ अव्यक्तमिति॥कार्यदेहादिवर्जितम्॥ तद्वानिव प्रतीयस इत्यत

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥

अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ॥ परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥

आह ॥ व्यक्तिमापन्नमिति ॥ कार्यदेहाद्यापन्नम् ॥ तच्चोक्तम् ॥ सदसतःपरम् ॥ नतस्यकार्यम् ॥

द्वानिति ॥ कार्यदेहादिमान इवेति मूढाक्तिः वस्तुतस्त्वेवेति ॥ अतो न तद्वर्जितइति शेषः ॥ प्रकृतोपयोगितया व्याचष्टे ॥ कार्येति ॥ भगवतः कार्यदेहादिवर्जितत्वं तद्वत्ताप्रतीतिश्चाज्ञानमूलेत्येतत्कुतो येन वाक्यद्वयमुक्तार्थं स्यादित्यतोऽर्थद्वयं क्रमेण प्रमाणान्याह ॥ तच्चेति

॥२३॥ कृ० ॥ ननु अव्यक्तं मामित्यनुवादादव्यक्तोऽहमिति यत्सिद्धम् ॥ तस्यैव व्याख्यानं कार्यं तद्वानिव प्रतीयस इति प्रथमांततया वक्ष्यमाणाक्षेपानुगुण्यादित्यत आह ॥ अनेनेति॥ ननु कार्यदेहादिमत्सादृश्यप्रकारकप्रतीत्या कथं तद्वर्जितत्वाक्षेपो निरोधि वादित्यत आह ॥ इवेनीति ॥ अज्ञानमूलेति ॥ अनेनानुबुद्धयो मन्यंत इत्येतद्व्याख्यातम् ॥

१ एतादृशज्ञाना भावे आह ॥ २ अल्पपुण्यब्रह्मादिष्वेवआस्तिक्यबुद्धिमताम् ॥ ३ येन्वतदंतर्यामिनिष्ठास्तेतान्प्राप्य मामपिप्राप्नुवंति ॥ अतोनंतफलभाज इति भावः ॥

॥ श्री० ॥ परं तु रूपमिति परं भावमिति शब्दार्थकथनम ॥ ननु प्रमाणधर्मस्य यथास्थितार्थज्ञेयाविषयिकात्स्वरूपयाथार्थ्यस्य कथमधिगतत्वमित्यतो व्याचष्टे ॥ प्रमाणेति ॥ अयमर्थः ॥ अव्यक्तमिति श्लोकोक्तार्थः ॥ प्रसंगादिति ॥ ब्रह्मादिभक्तानामंतवत्फलस्य भगवद्भक्तानामनंतफलस्य चाभिधाने तत्प्रसंगात्कोविशेष इति शंकायां तत्परिज्ञानस्य पुनरनेनोच्यमानत्वादित्यर्थः ॥ २४ ॥ येननेयति ॥ तथा च मदधीनाज्ञानमूलकतान्निंदया न मम खेद इति भावः ॥ सामर्थ्यं सेवोपाय इति ॥ इत्यभिप्राये. सामर्थ्योपायाभ्यामिति स्यादिति भावः ॥ सामर्थ्यमेवोपाय इतिव्याख्यानमवाशिष्य समाधत्ते ॥ युज्यत इत्यादिना ॥ इतिवचनादिति ॥ गीतातात्पर्योदाहृतवचनादित्यर्थः ॥ युज्यते उपेयं संभवतीत्युपायो योगः ॥ शक्तिश्च युज्यते शक्यमनयेति योग इत्यर्थः ॥ उभयार्थत्वेनेति ॥ उपायसामर्थ्योभयार्थत्वेनेत्यर्थः ॥ तर्हि कथमनुपपत्तिरित्यत आह ॥ द्वंद्वैकवद्भाव इति ॥

॥कार्यात्कारणाच्च ॥ इदमपरं रूपं परं तद्रूपमजानंत इति प्रतीतिनिरासार्थमाह॥भावमिति ॥ याथार्थ्यं प्रमाणाव्यभिचारित्वस्वरूपम् ॥ अत एव परम् ॥ कुतोऽयमर्थः समाख्यानादित्याह ॥ तथेति ॥ यद्यप्ययमर्थस्त्रिभिरित्यत्रोक्तस्तथापि प्रसंगात्पुनरुक्त इत्यदोषः ॥ २४ ॥ तथाऽपि नाहं प्रकाश इति पुनरुक्तिरित्यतस्तात्पर्यमाह ॥अज्ञानं चेति ॥ येनाज्ञानेन मामन्यथा मन्यंते तदज्ञानं च मदिच्छाधीनमेव न स्वतंत्र

अपाणिपादः ॥ आनंददेहं पुरुषं मन्यंते गौणदैहिकमित्यादौ॥ भावं याथार्थ्यम् ॥ तथाऽब्रवीत् ॥ याथातथ्यमजानंतः परंतस्य विमोहिताइत्यादि ॥ २४ ॥ अज्ञानं च मदिच्छयेत्याह ॥ नाहमिति

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

॥ योगेन सामर्थ्योपायेन ॥

म् ॥ येन तया निंदया मम खेदः स्यादिति भावः ॥ योग एवमायेति व्याख्यानमसदिति भावेनाह ॥ योगेनेति ॥ सामर्थ्यमेवोपायः ॥ युज्यते येन योगोऽसावुपायः शक्तिश्च चेति वचनाद्योगशब्दस्योभयार्थत्वेन द्वंद्वैकवद्भावः ।किं न स्यादिति चेत्॥नमायया चेत्यस्य वैयर्थ्यापत्तेः॥

॥ कृ० ॥ ननु याथार्थ्यस्य प्रमाणधर्मत्वात्कथं अधिगतत्वमित्यत आह ॥ प्रमाणेति ॥ यथाभूतोऽर्थो यथार्थः सुप्सुपेतिसमासः ॥ ततः स्वार्थेष्यञि सत्युक्तार्थलाभ इति भावः २४ ॥ पूर्वेणसंगतिमाह ॥ येनाज्ञानेनेति ॥सामर्थ्यमेवोपाय इति स्वव्याख्यां समर्थयितुमाह ॥ युज्यत इति ॥ एकवचनेनोपपत्त्यर्थमेकवद्भाव इ युक्तम् ॥

॥ श्री० ॥ कुत इत्यत आह ॥ तस्या अपीति ॥ मायाया अपीत्यर्थः ॥ तथा चोपायशब्देनैव तस्याःप्राप्तत्वात् पुनर्मायया चेति भाष्यमयुक्तं स्यादिति भावः ॥ अत एवेति॥ उपायेनेत्येवोक्तौ मायाया अप्युपायत्वेन योगशब्देनैव गृहीतत्वात्पुनर्माययेति व्यर्थं स्यादिति यतोऽत एवयोगशब्दस्य सामान्येनोपायमात्रवाचित्वमुक्त्वा स एवोपायो भगवत्सामर्थ्य रूपविशेषपरतया व्याख्यानमित्यर्थः ॥ इदं तात्पर्यमिति ॥ [illegible] मदिच्छयेति तात्पर्यमित्यर्थः ॥ प्रमाणेच्छया चेत्युक्त्या माययेति भाष्यस्य दुर्गादेव्येत्यर्थो द्रष्टव्यः ॥ गीतायां ये मायामम तृनत्वं मूढलोकविशेषणमिति ज्ञातव्यम् ॥ २५ ॥ यवनिकेति ॥ जीवं प्रति परमाच्छादकमायया जीवेश्वरोभयमध्यवर्तित्वेन यवनिकासाम्यमिति भावः ॥ नहीति॥ यदि कश्चनेति विशेषणसामर्थ्यादतिसमर्थोऽपि ब्रह्मादिर्न मां वेदेत्युक्तौ ज्ञानी चेत्याद्युक्तविरोधः स्यादित्यर्थः॥२६॥ कृ० ॥ अत एवेति॥ यत उपायेनेत्येवोक्तौ माययेत्यस्य वैयर्थ्यम् ॥अत

तस्या अप्युपायविशेषत्वात् ॥ अत एवोपायार्थत्वं गृहीत्वा सामर्थ्येनितव्याख्यानं कृतम् ॥ इदं तात्पर्यश्लोके न प्रतीयत इत्यत आह ॥ मयैवेति ॥ उक्तार्थस्थापनाय पुराणसंमतिमाह ॥ तथेति ॥ २५ ॥ अकस्मात्स्वस्य सार्वज्ञं किमित्युच्यत इत्यत आह ॥ नेति ॥ यवनिकाद्युभयभागवर्तिनोः परस्पराज्ञानवत्त्वापि भूतविषये ज्ञानं न स्यादिति शंकानिरासार्थमिति शेषः॥ तथाऽपि मां तु वेद न कश्चनेति

माययाच ॥ मयैव मूढा नाभिजानाति ॥ तथाहि पाद्मे ॥ आत्मनः प्रावृतिंचैव लोकचित्तस्य बंधनम् ॥ स्वसामर्थ्येन देव्या च कुरुते स महेश्वर इति च ॥ २५ ॥ न मां मायाबध्नातीत्याह ॥ वेदेति ॥ न

वेदाहं समतीतानि वर्तमानानि चार्जुन॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

॥कश्चनातिसमर्थोऽपि स्वसामर्थ्यात् ॥ २६ ॥

पुनरुक्तमित्यत आह ॥ न कश्चनेति ॥ असमर्थो लोको नजानातु ॥ अतिसमर्थस्तु ब्रह्मादिर्ज्ञास्यतीति शंकानिरासार्थमेतदुक्तम् ॥ कश्चनेति विशेषणादिति भावः ॥ तर्हि ज्ञानी च भरतर्षभेत्यादिविरोधइत्यत उक्तम् ॥ स्वेति ॥ २६ ॥

एवेत्यर्थः ॥ इदं तात्पर्यमिति ॥ अज्ञानं च यदिच्छयेति तात्पर्यमित्यर्थः ॥ २५ ॥ कथमनेन भगतिज्ञान इत्यत आह ॥ यवनिकेति ॥ जीवं प्रतीश्वरावरकमायायास्तदुभयमध्यवर्तित्वेन यवनिकासाम्यं बोध्यम् ॥ २६ ॥

॥ श्री० ॥ इत्येव स्यादिति ॥ द्वंद्वशब्दस्तु व्यर्थ इति भावः ॥ नन्विच्छाद्वेषसमुत्थेनेत्येतदेव द्वंद्वमोहेनेत्यनेन व्याख्यायत इति न दोष इति चेत्तत्राह ॥ व्याख्यानेति ॥ द्वंद्वशब्द एवेच्छाद्वेषपदेन व्याख्यायत इत्यत आह॥ अगतिका गतिरिति ॥ गतिर्गमनिका व्याख्या गतिशून्या गमनिकेत्यर्थः ॥ गतिस्त्वसमद्रीत्याऽस्तीति भावः ॥ क्रियेति ॥ सृष्टिरूपक्रियेत्यर्थः ॥ लक्षणामिति ॥ क्रियावाचिसर्गपदेन तदधिकरणः कालो लक्ष्यत इत्यर्थः॥तदुत्तरकालमिति॥स्थितिकाल इत्यर्थः॥पुनरिति॥सर्गकालशब्देन तदारंभो लक्ष्यत इत्यर्थः॥कारणमिति॥ भगवद्विषयसंमोहस्येच्छाद्वेषसमुत्थो द्वंद्वमोहः कारणमित्यर्थः॥ सर्गात्पूर्वम् ॥ प्रलये ॥ इच्छादिना विनेति॥ शरीराद्यभावेनेच्छाद्वेषसमुत्थद्वंद्वमोहाभावादित्यर्थः॥अज्ञानमस्त्येवेति॥

इच्छाद्वेषौ द्वंद्वम् ॥ तज्जन्यो मोहो द्वंद्वमोहः तेनेति कश्चित ॥ तदसदिति भावेनाह ॥ द्वंद्वेति ॥अन्यथा इच्छाद्वेषसमुत्थेन मोहेनेत्येव स्यादिति भावः ॥ व्याख्यानव्याख्येयभावश्चागतिकागतिः द्वंद्वमोहस्येच्छाद्वेषसमुत्थत्वं कथमित्यत आह ॥ इच्छेति॥किंचित्सुखादिकं हेयत्वादिनेति शेषः॥ननु नाहं प्रकाशइति भगवतो देवीश्चेति तदधीनायाः गुणमय्या मायायाश्च मोहकत्वमुक्तं तत्कथं भगवद्विषयसंमोहस्येच्छाद्वेषसमुत्थो द्वंद्वमोहः कारणमुच्यत इत्यतआह ॥ कारणांतरमिति ॥इच्छाद्वेषसमुत्थद्वंद्वमोहलक्षणमेतद्भगवद्विषयस्य संमोहस्यावांतरकारणमु

द्वंद्वमोहेन ॥ सुखदुःखादिविषयमोहेन ॥ इच्छाद्वेषयोः प्रवृद्धयोर्न हि किंचिज्ज्ञातुंशक्यम् ॥ कारणा

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥

तरमेतत् सर्गे सर्गकाले आरभ्यैव ॥ शरीरे हि सतीच्छादयः ॥ पूर्वं त्वज्ञानमात्रम् ॥ २७ ॥

च्यत इत्यर्थः ॥ कुत एतदित्यतः तत्सूचकंपदं पठति ॥ सर्गइति॥ सर्गः क्रिया कथं तस्याअधिकारणत्वमित्यतो लक्षणामाश्रित्य व्याचष्टे ॥ सर्गेति ॥ तदुत्तरकालं किं तत्र कारणमित्यतः पुनर्लक्षणाश्रयणेनाह ॥ आरभ्येति ॥ सर्गकालमिति संबंधः ॥ कथमनेनावांतरकारणत्वं ज्ञायतइत्यतः सावधारणमेतदित्युक्तमेवेति ॥ उक्तमुपपादयन्नाह ॥ शरीर इति ॥

॥छ० ॥ नन्विच्छाद्वेषेत्यनेन द्वंद्वमोहशब्दव्याख्यानान्नोक्तदोष इत्यत आह॥व्याख्यानेति ॥ २७ ॥

॥ श्री० ॥ भगवदि[illegible] भगवद्विषयमज्ञानमेवास्ति न मोह इति [illegible] सर्गकालमारभ्य [illegible] मर्वे [illegible] भगवद्विषयमोहो
भवतीति तस्यावांतरकारणत्वं [illegible] ॥ [illegible] ॥ इत्यत्र ॥ [illegible] ॥ [illegible] ॥ [illegible] न मां प्रपद्यंते न भजंतेमाय [illegible] कारणत्वादिति नि
र्णायकं न मां दुष्कृतिन इत्यादिनो [illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥ जरा
मरणमोक्षायेतिश्लोकेनेति [illegible] तत्र पूर्वार्धेनानु[illegible] ॥ [illegible] ॥ मोक्ष
कामनायाः स्वर्गादिकामनानिवृत्त्या [illegible] इतिभाव ॥ अन्यसक्तेः ॥ [illegible] ॥ [illegible] ॥ [illegible] ननु कथमनंतविरुद्ध
संभव उक्त इत्यत आह ॥ न हीति ॥ जरामरणमोक्षानुद्देशेनभजने [illegible] ॥ लुप्तो मुक्तिमार्ग इति ॥
आदिपदेन द्वेषस्य द्वंद्वानां च ग्रहणम् ॥ अत.सर्गकालमारभ्यैवेतत्कारणमिति सिद्धम् ॥ एतावता कथमवांतरकारणत्वसिद्धिरित्यत आह ॥
पूर्वं त्विति ॥सर्गात्पूर्वं त्विच्छादिना विना ज्ञानमस्त्येव भगवदिच्छाधीनमत एतदवांतरं कारणमिति सिद्धमित्यर्थः ॥ २७ ॥ चतुर्विधाइ
त्यनेन गतार्थमुत्तरं वाक्यं इत्यत आह ॥ विपरीताश्चेति ॥ त्वत्प्रपत्तेर्मायातरणाकारणत्वात्स्वदोषाद्वा त्वां न प्रपद्यंत इत्यत्र कथं निर्णय
इत्यतस्तदुक्तम् ॥ सर्वभूतानि संमोहं यांति चेत ॥ लुप्तो मुक्तिमार्ग इत्याशंक्याह द्वंद्वमोहरहिताश्च केचित्संतीत्याहेत्यर्थः ॥ २८ ॥ मांभ

विपरीताश्च केचित्संतीत्याह ॥ येषामिति॥२८ ॥ जरामरणमोक्षायेत्यन्यकामव्यवृत्त्यर्थं मोक्षे सक्ति

येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥
जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥ ते ब्रह्म त द्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥ २९ ॥

स्तुत्यर्थं वा न विधिः मुमुक्षोरमुमुक्षुस्तु वरो ह्येकांतभक्तिभागिति इतरस्तुतेर्नादरीये ॥ नात्यंतिकमितिच॥

जंत इत्युत्कानुवादेन फलमुच्यते॥ तत्र जरामरणमोक्षायेत्यनुक्तस्यानुवादासंभवादप्राप्तत्वेन विध्यर्थं मद्भजनं च जरामरणमोक्षोद्देशेन कार्य
मित्येवं प्रतीतिनिरासार्थमाह ॥ जरेति ॥ लक्षणया स्वर्गादिकामानिवृत्तिर्योऽस्येति तथोक्तम् ॥ मोक्षविषयासक्तिरन्यसक्तेः प्रशस्तेति तत्स्तु
त्यर्थं वा सर्वथा न विधिः ॥ कुत इत्यत आह॥ मुमुक्षोरिति ॥ इतरस्यामुमुक्षोर्भक्तस्य ॥ न हिप्रशस्तेसत्यप्रशस्तं नियंतु युक्तमिति भावः॥
उपदेष्टृणामभावादिति भावः ॥ २८ ॥ लक्षणयेति ॥ न च शक्यसंबंधाभावः ॥ मोक्षकामनायाः स्वर्गादिकामनानिवृत्त्याव्यातिरेव शक्यसंबंधित्वादित्याशयात् ॥

॥ श्री० ॥ ननु मुमुक्षोर्नात्यंतिकमित्युभयोरपि वाक्ययोरेकार्थत्वादेकेनैव वाक्येनोदाहरणेनालं किं पृथक् नात्यंतिकमितिवाक्योदाहरणेनेत्यत आह ॥ प्रकारभेदादिति॥वरत्वोपपादकयोरेकांतभक्तिमात्कात्यंतिकप्रसादानिच्छुस्वरूपयोःप्रकारयोर्भेदात्तयोश्चात्र कथितत्वात् पृथग्वाक्यद्वयोक्तिरित्यर्थः ॥ यद्वा मद्भजनं च जरामरणोद्देशेन कार्यमितिविधित्वप्रतीतिनिरासस्य अन्यकामनिवृत्त्यर्थमितिपक्षोक्त्या मोक्षे भक्तिस्त्वर्थमितिपक्षोक्त्या वा संभवेन पृथक्पक्षद्वयोक्तिः किमर्थमित्यत आह ॥ प्रकारभेदादिति ॥ विधित्वनिरासः प्रकारद्वयेनापि भवतीति पृथक्पक्षद्वयोक्तिरित्यर्थः सदासर्वगुणादवत्वात्सत्त्वो विष्णुरुदीर्यत इति तृतीयस्कंधतात्पर्यमनसि निधाय सत्त्व एवैकमनस इत्यनूद्य तत्फलितमेवाह ॥ शुद्धसात्त्विकस्येति ॥ चेतुर्मुखस्येत्यर्थः ॥ अत एव शुद्धत्युक्तम् ॥ सत्त्वसत्त्वमहासत्त्वशुद्धसत्त्वश्चतुर्मुख इतिवचनात् तस्यैव सदासर्वगुणादवत्वेन सत्त्वशब्दवाच्ये विष्णावेकमनस्त्व मुख्यमतो युक्तत्वं नान्यस्येति भावः ॥ अभिमानिवाचकशब्दस्याभिमन्यमानेषु लक्षणां गत्यर्थकदिवुधातुनिष्पन्नस्य देवशब्दस्येंद्रियेषु दीव्यत्यवगच्छत्यर्थानिति योगं वाऽभिप्रेत्य देवानामित्येतदनूद्य व्याचष्टे ॥ इंद्रियाणामिति ॥ गंधाद्युपलब्धीत्यादि ॥ गंधाद्युपलब्धिः सकरणिका क्रियात्वात् छिदिक्रियावदित्यनुमानं द्रष्टव्यम् ॥ आनुश्राविककर्मणामित्येतदनुरोधेन कर्मेंद्रियसंग्रहाय गुणालिंगानामित्येतत् उपलक्षणमित्याशयेनाह ॥ तथा वचनादिति ॥ आनुश्राविककर्मासौ श्रुत्युक्तं यो न लंघयेदिति तृतीयस्कंधतात्पर्यं मनसि निधायाह वैदिकेति ॥ वैदिककर्मेत्यर्थः ॥

इति चेतरस्तुनेतिति संबंधः ॥ प्रकारभेदात्पृथगुक्तिः ॥ इतश्च न मोक्षकामविधिरित्याह ॥ देवानामिति ॥ सत्त्व एवैकमनसः ॥ शुद्धसात्त्विकस्य पुंसो देवानामिंद्रियाणाम्[1] ॥ गुणलिंगानाम् ॥ गंधाद्युपलब्धिलक्षणगुणानुमेयानाम् ॥ तथावचनादिक्रियानुमेयानां च ॥ आनुश्राविककर्मणाम् ॥ वैदिकानुष्ठाने कारणानाम् ॥

देवानां गुणलिंगानामानुश्राविककर्मणाम् सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी॥ जरयत्याशु या कोशं निगीर्णमनलो यथेति लक्षणाच्च भागवते

॥ कृ० ॥ प्रकारभेदादिति ॥ पूर्ववाक्ये वर इति कंठतः इतरस्तुतिरुत्तरत्र न विगणयंतीत्यर्थ इति प्रकारभेदादित्यर्थः ॥ सदा सर्वगुणादयत्वात्सत्त्वो विष्णुरुदीर्यत इति तृतीयस्कंधतात्पर्यं मनसि निधाय सत्त्व एवैकमनस इत्यनूद्य तत्फलितमाह ॥ सत्त्व एवेत्यादिना ॥ चतुर्मुखस्येत्यर्थः ॥ तस्यैव विष्णवेकमनस्त्वात् ॥ सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वश्चतुर्मुख इतिशुद्धसात्त्विकत्वोक्तेश्चेति बोध्यम् ॥ प्रसिद्धार्थतानिरासार्थमाह ॥ इंद्रियाणामिति ॥ दीव्यंति द्योतंत इति योगेन देवशब्दस्येंद्रियेष्वपि संभवादिति भावः ॥ इंद्रियाणामित्यनेन ज्ञानकर्मेंद्रियाणामभिप्रेतत्वाज्ज्ञानेंद्रियेषु गुणलिंगानामित्येतद्व्याख्याय कर्मेंद्रियेष्वपि तथा व्याख्याति ॥ तथा वचनादीति ॥ अत्र गुणशब्दोऽप्रधानवाचीति भावः ॥ आनुश्राविककर्माऽसौ श्रुत्युक्तं यो न लंघयेदिति तात्पर्यानुसारेण व्याचष्टे ॥ वैदिकानुष्ठान इति ॥ वैदिकानां श्रवणादीनां होमादीनांचानुष्ठान इत्यर्थः ॥

१ विजयध्वजतीर्थः २इंद्रियाभिमानिनामित्युक्तम् ३ स्कं ३ अ २६श्लो. ३२ । ३३

॥ श्री० ॥ इदं कर्मेंद्रियाणां विशेषणम् ॥ एवं च न मे हृषीकाणि पतंत्यसत्पथे इत्युक्तरीत्या चतुर्मुखकर्मेंद्रियाणामेव नियमेन वैदिकानुष्ठानकारणत्वात्तस्यैवश्रुत्युक्तोल्लंघनाभाव इति भावः ॥ अपूर्णभक्तेर्मुक्तौ तु न सुखं पूर्तिमेष्यति ॥ अतस्तादृशमुक्तेश्च भक्तिः पूर्णा गरीयसीति तृतीयस्कंधतात्पर्यं मनसि निधाय वृत्तिः स्वाभाविकी तु या ॥ अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसीत्येतद्व्याचष्टे ॥ या भगवतीत्यादिना ॥ फलोद्देशरहितत्वं केवलस्वभावनिर्वृत्तत्वमेव भक्तेः पूर्णत्वं तद्राहित्यमेवापूर्णत्वमिति भावः ॥ सकामभक्त्या मोक्षकामनया कृतभक्त्याः ॥ मुक्तेः ॥ अल्पाधिकारिमुक्तेः सकाशात् ॥ कामनाभावेऽपीति ॥ लिंगभंगरूपमोक्षो मे स्यादिति कामनाभावेऽपीत्यर्थः ॥ उक्तत्वादिति ॥ तृतीयस्कंधे देवहूतिं प्रति भगवता कपिलेनोक्तत्वादित्यर्थः ॥ इदं लक्षणं चतुर्मुखे मुख्यं तदितरदेवेष्वप्युत्तमाधिकारिषु यथायोग्यमस्तीति द्रष्टव्यम् ॥ नन्वस्त्वनिमित्तभक्तित्वमुत्तमाधिकारिलक्षणं तथाऽपि जरामरणमोक्षोद्देशेन भजनं तान् प्रतिकुतो न विधेयमित्यत आह ॥ न हीति ॥ तेषां जरामरणमोक्षोद्देशेन भजनविधानेऽनिमित्तभक्तिमत्त्वरूपलक्षणवैकल्यमेव स्यात् न हि लक्षणवैकल्यं लक्षणवैकल्यापादकं लक्षणवैराध्यीति यावत् ॥ विधातुं योग्यमित्यर्थः ॥

या भगवत्यनिमित्ता फलोद्देशराहिता केवलं स्वाभाविकी निरवधिकस्नेहरूपस्वभावनिर्वृत्तावृत्तिः सा भक्तिः ॥ सा च सकामभक्त्या जातायाः सिद्धेर्मुक्तेरपि गरीयसी ॥या साकामनाऽभावेऽपि कोशं लिंगशरीरं स्वभावादेव जरयत्यनलवदित्यनिमित्तत्वस्य भक्तिलक्षणत्वेनोक्त

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः॥ प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः॥ ३० ॥

हरिःॐ ॥ तत्सदितिश्रीमद्भगवद्गीतासूपनिषत्सु० ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः॥ ७॥

त्वाच्चेत्यर्थः ॥ न हिलक्षणवैकल्पं विधेयमिति भावः ॥

॥ कृ० ॥ अनुश्रवाः श्रुतिरत्र भवमानुश्रविकं श्रुतिविहितमिति [illegible] ॥ कर्मशब्दः क्रियामात्रपरः आनुश्रविकं कर्म येः ते तथा तेषामिति कृतेउक्तार्थलाभ इति भावः ॥ करणेऽपींद्रियगणे कर्तृत्वविवक्षया तात्पर्यंकर्तरि प्रयाग इति हृदयम् ॥ निर्[illegible]आदिभ्य इति ठगितिभावेनाह ॥ स्वभावनिर्वृत्तेति ॥ अपूर्णभक्तेर्मुक्तौ तु न सुखं पूर्तिमेष्यति ॥ अतस्तादृशमुक्तेश्च भक्तिः पूर्णा गरीयसीति प्रत्यागनुसारेण भक्तेः सिद्धगरीय[illegible]स्त्वाचष्टे ॥ सा चेति ॥ प्रमाणे पूर्णत्वं नामफलोद्देशराहित्यस्वभावनिर्वृत्तत्वरूपांगसाकल्यं तद्राहित्यमपूर्णत्वमिति भावः॥नन्वियं भक्तिरकामित्वान्मुक्तिं न जनयेदित्यतोऽकामितामपि मुक्तिं स्वभावादेव जनयतीति सदृष्टांतमाह॥यासेति॥अनलवदिति॥यथा जाठरानलोनिगीर्णं भुक्तमन्नं जरयति तथेत्यर्थः॥

१ तद्ब्रह्मेत्युक्त्या भगवतोऽन्यदितिशंकानिरासायाह ॥ २ एतेन टीकायांकारणानामित्यत्रकरणानामितिपाठ इति सूचितम् ॥ ३ तात्पर्यं पुंल्लिंगादेकवचनात्मणइत्युक्तम् ॥

४ क्षुनिवृ.त्याधेन

॥श्री०॥ आह चेत्यनूद्य त्तछेषं पूरयति॥स्पष्टमेतदन्यत्रेति॥नारायणज्ञानार्था इति ॥ अध्यात्ममिंद्रियादिप्रेरकत्वादित्यर्थः ॥ नानार्थ इत्येतत्कुत इत्यतआह॥ परः पुरुषार्थ इति॥ यः परः पुरुषार्थोऽतोनान्यार्थ इत्यर्थः ॥ यद्वा न विद्योऽन्योऽर्थो यस्मादिति विग्रहमभिप्रेत्यतदभिप्रायमाह ॥ परः पुरुषार्थ इति ॥ न कस्य चिदर्थे नारायणो देवो ज्ञातव्य इतिशेषः कुत इत्यत आह ॥ स एवेति ॥ प्रमाणे सर्वमन्यमोक्षादिकं तदर्थं परमात्ममेवाद्यर्थकमेव न स्वतः पुरुषार्थस्तेषामित्यर्थः ॥ पुनरुक्तमिति ॥ मामेवेत्यत्र ये मामेव प्रपद्यंते ज्ञानंप्राप्य तद्द्वारा मायां तरंतीत्यर्थस्याभिप्रेततया तेन ये मामाश्रित्ययतंतीति तद्ब्रह्मविदुरित्येतत्पुनरुक्तमित्यर्थः॥ अन्योपायेति ॥ सिद्धे सत्यारंभो नियमार्थ इतिन्यायेन भगवद्भजनं विना ज्ञानस्यान्यः कोऽप्युपायो नास्तीत्यन्योपायनिवृत्त्यर्थमेव ब्रह्मतद्विदुरिति पुनरुच्यत इत्यर्थः ॥ यमितीति ॥ ॥ एष भगवान यं वृणुते तेन लभ्यो ज्ञेय इत्यर्थः ॥ नन्वत्र भगवत्कर्तृकवरणस्यैव ज्ञानहेतुत्वमुच्यते न भजनस्येत्यत आह॥ भक्तमेवेति ॥ तथा च यमेवैष प्रसन्नः सन् भक्तत्वेन वृणुते तेनैव लभ्यो ज्ञेय इत्यर्थो द्रष्टव्यः ॥ इति यदुपतिगीताभाष्यटीकामुमुक्षाशयमतिलक्षितामिर्गीर्भिरावेदयित्री ॥ मुरलितविवृतिर्या वृष्णिरावृत्र चीर्णा समगमदयमस्यां सप्तमोऽध्याय अंतम ॥ इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते श्रीमद्गीताभाष्यटीकाविवरणे सप्तमोध्यायः

टी०आह च स्पष्टमेतदन्यत्र॥ देवार्थाः देवप्रतिपत्त्यर्थाः ॥ प्रतिपन्नादेवा नारायणज्ञानार्थाः ॥ मोक्षार्थे ज्ञातव्यः ॥ नान्यार्थः ॥ परः पुरुषार्थः ॥ मध्यमभक्तानां चित्तवृत्तिः ॥ एकांतानां नियतानामुत्तमभक्तानां न कस्य चिदर्थे स एव परमपुरुषार्थः ॥ ननु मामेव ये प्रपद्यंत इत्युक्तत्वात् ते ब्रह्म तद्विदुरिति पुनरुक्तमित्यत आह ॥ तएवेति ॥ अन्योपायनिवृत्त्यर्थमेतदित्यर्थः ॥ स्यादेवं व्याख्यानम् ॥ यदि भगवद्भजनेन विना ज्ञानस्यान्योपायाभावः प्रमितः स्यात् स एव कुत इत्यत आह ॥ य

आह च सर्वेवदास्तु देवार्थाः देवा नारायणार्थकाः ॥ नारायणस्तु मोक्षार्थो मोक्षो नान्यार्थ इष्यते एवं मध्यमभक्तानामेकातानां न कस्य चित् ॥ अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमिति गीताकल्पे । त एव च विदुः ॥ यमेवैष वृणुत इति श्रुतेः ॥ २९ ॥ ३० ॥ इतिश्रीमदानंदतीर्थभगवत्पा०वि०गी०भा०

मिति॥भक्तमेव चवृणुत इति च प्रसिद्धम् ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य गीताभाष्यस्यटीकायां जयतीर्थमुनिविरचितायां॥ प्रमेयदीपिकायां सप्तमोऽध्यायः॥७ ॥७॥

॥कृ०॥ लक्षण वैकल्यमिति ॥ जरामरणमोक्षोद्देशेनभक्तिविधानेऽनिमित्तत्वरूपलक्षणवैकल्यं स्यादितिभावः ॥ ननु कामराहित्यस्य भक्तिलक्षणत्वेन पूर्ववाक्यनैवोक्तत्वादुत्तरवाक्यवैयर्थ्यम् ॥ किं चशब्देन प्राग्वाक्यान्यत्प्रमाणमुक्तम ॥ इदानीं तु वाक्यमिति भातितच्च पूर्वमन्यप्रमाणानुक्तेरयुक्तमित्यत आह ॥ आह च स्पष्टमिति ॥ तथा च स्पष्टमभिधानान्न वैयर्थ्यम ॥ चशब्दस्यान्यग्रंथसंबंधाच्च नानुपपत्तिरिति भावः ॥ नन्वत्र भगवत्कर्तृकवरणस्य ज्ञानहेतुत्वमुच्यते न भजनस्येत्यतआह ॥ भक्तमेवचेति ॥ इतिश्रीपत्तिर्भट्टाचार्यपुत्रकृष्णविरचिते [illegible]दीपिकाप्रकाशे सप्तमोऽध्यायः ॥ ७ ॥ श्रीकृष्णार्पणमस्तु

॥श्री०॥ ॐ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ अष्टमाध्यायटीकायाः क्रियते भावदीपिका ॥१॥ अवांतरेति ॥ भगवन्माहात्म्यप्रतिपादकद्वितीयषट्कांशे तत्त्वेन मुख्यतस्तत्प्रतिपादकत्वस्य सिद्धत्वादिति भावः ॥ यस्येति ॥ मार्गादेरित्यर्थः ॥ ननु तर्हि भगवन्माहात्म्याप्रतिपादनात्कथं षट्कांतर्भावसिद्धिरित्यत आह ॥ कर्तव्याते ॥ नन्वत्र किं तद्ब्रह्मेत्यादिप्रश्नपरिहाररूपप्रथमभागस्य मरणकालकर्तव्यगत्याद्यप्रतिपादकत्वात्कथमध्यायार्थ इत्यत उक्तव्याख्यानपूर्वकं ब्रह्मप्राप्तिरुच्यत इति तात्पर्यं मनसि कृत्वाऽध्यायप्रतिपाद्यांशमाह ॥ उक्तव्याख्यानेति॥ किं तद्ब्रह्मेत्यादिवाक्यसंदर्भस्य प्रश्नपरिहाररूपतया ते ब्रह्मेत्याद्युक्त विवरणरूपत्वेनोक्त व्याख्यानमित्यर्थः ॥ तथा चैतद्भागस्य विष्णुमाहात्म्यप्रतिपादकत्वं स्पष्टमिति षट्कांतर्भावसिद्धिरिति भावः ॥ ॥ कृ० ॥ ननु सप्तमोपक्रमे

अध्यायस्यावांतरप्रतिपाद्यमर्थमाह ॥ मरणेति [illegible] त्यत इतिगतिः ॥ आदिपदेन मार्गादिकम् ॥ मरणकालकर्तव्यं च गतिश्च ते आदी यस्य तत्[illegible]क्तम् ॥ कर्तव्यस्मरणविषयत्वगम्यत्वादिरूपो भगवन्महिमैव वर्ण्यत इति षट्कांतर्भावसिद्धिः ॥उक्तव्याख्यानपूर्वकमिति चोपस्कर्तव्यम् ॥ तेनानंतर्यलक्षणाऽपि संगतिः सिद्धा ॥

ॐम् ॥ मरणकालकर्तव्यगत्याद्यस्मिन्नध्याय उपदिशति ॥

अर्जुन उवाच॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम॥ अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते १

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन॥ प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥

श्रीभगवानुवाच॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥३

प्रतिपाद्यस्योक्तत्वात्पुनः प्रतिपाद्यकथनमयुक्तमित्यत उक्तम ॥ अवांतरेति ॥ प्रकरणभेदसिद्ध्यर्थमिति शेषः ॥ मार्गादिकमिति ॥ आदिपदेन पुनरावृत्त्यपुनरावृत्तिसंग्रहः ॥

१ आद्यश्लोके किमितिस्वरूपप्रश्नः ॥ २ द्वितीयेकथमितिप्रकारप्रश्नः ॥कइतिस्वरूपप्रश्नश्च ॥ अंतकालेकिमर्थंकेनप्रकारेणस्मर्तव्यः॥इतिप्रश्नाष्टकम्॥ तस्यक्रमेणोत्तरमाहभगवान् ॥

॥ श्री० ॥ ननुमरणकालकर्तव्यप्रतिपादनस्य कथमुक्तानंतर्यं येनानंतर्यलक्षणा संगतिः सिध्येदित्यत आह ॥ तत्प्रसंगेनैवेति ॥ प्रयाणकालेऽपि च मामित्युक्तव्याख्यानप्रसंगेनैवेत्यर्थः ॥ तथैवेति ॥ निर्विशेषणतयैवेत्यर्थः ॥ उत्तरेत्विति ॥ तथा च परमं ब्रह्म अक्षरमिति योजना तस्याभिप्रेतेति द्रष्टव्यम् ॥ तयोरपीति ॥ ब्रह्मशब्देनवेदप्रकृतिस्वरूपमप्याह यास्यति ॥ वेदप्रकृत्योरपिबृहत्त्वाद्यभिनिर्देशतः कालनीत्र्यर्थत्वब्रह्मशब्दवाच्यत्वात् ॥ अक्षरमितितदुक्तस्त्दानेऽपि अक्षराणिस्मृतावर्णाः कूटस्थोक्षरउच्यतइतिवेदप्रकृतिस्वरूपमेवोच्यतइति प्रतीतिः स्यादतोऽक्षरस्यपरमत्वविशेषणदानेनाक्षरब्रह्मशब्दद्वयस्यपरब्रह्मरूपैकविषयकत्वमित्याशयप्रसक्तिर्निवारितेतिभावः ॥ आत्मानमिति ॥ केवलमित्यर्थः ॥

तत्प्रसंगेनैव मरणकालकर्तव्याद्युपदेशात् ॥ ननु पूर्वाध्याये ते ब्रह्मेति निर्विशेषणमेवोपाक्षिप्तम् ॥ अत एवात्र किं तद्ब्रह्मेति तथैव पृष्टम् ॥ उत्तरे तु कस्मादक्षरं परमं ब्रह्मेतिसविशेषणमुपादीयत इत्यत आह ॥ परमामिति ॥ अक्षरस्यैव परमत्वविशेषणम् ॥न ब्रह्मण इत्यर्थः॥तथ्यक्षर परममक्षरं ब्रह्म ॥ वेदादिशंकाव्यावृत्त्यर्थमेतत् ॥ आत्मन्यधियत्तदध्यात्मम् ॥ आत्माधिकारे यत्तदिति वा॥ मित्येवालं किं विशेषणेनेत्यतआह॥वेदेति॥आदिपदेन प्रकृतिर्गृह्यते॥तयोरपि ब्रह्माक्षरशब्दवाच्यत्वात् प्रसक्तिः स्वभावोऽध्यात्ममिति शब्दद्वयस्यैकविषयत्वसिद्धयेऽध्यात्मशब्दंद्वेधा व्याचष्टे॥ आत्मनीति॥ आत्मानं जीवमधिकृत्य तदुपकारित्वेन वर्तमानं वस्त्वित्यर्थः ॥

॥ कृ० ॥ नन्वस्त्वक्षरं ब्रह्म परममित्यादेरुक्तव्याख्यानरूपत्वात्पूर्वाध्यायानंतर्यं ॥ मरणकालकर्तव्यादिप्रतिपादकस्य कथं तदानंतर्यमित्यत आह ॥ तत्प्रसंगेनैवेति ॥ उक्तव्याख्यानप्रसंगेनैवेत्यर्थः ॥ उत्तरे त्विति ॥ इहास्मादुत्तरइत्यवध्यन्वयसंभवेऽपि तन्नियमो नास्तीति व्यवस्थाभावान्न सर्वनामत्वम् ॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायामिति गणसूत्रेण व्यवस्थायामेव तद्विधानात् ॥ तेनोत्तरस्मिन्निति नोक्तम् ॥ यद्वा ॥ सर्वनामत्वेऽपि पूर्वादिभ्यो नवभ्यो वेति स्मिन्नो विकल्पादुत्तरे इति युक्तम् ॥ यद्वा प्रतिवाक्योत्तरे सम इति कोशादुत्तरशब्दस्य संज्ञात्वान्न सर्वनामतेति बोध्यम् ॥ आत्मानमिति ॥ केवलमिति शेषः ॥ ततो नाधिभूतशब्देनैकार्थ्यम् ॥ तस्य मेदुर्ज[illegible]पकारकार्थत्वादिति ज्ञेयम् ॥ अत्रात्मानमधिकृत्याध्यात्ममव्ययमितियोगविभागेनाधिदिशमितिवदव्ययीभावः ॥ तेन विभक्त्यर्थेऽव्ययीभावश्चेत्तदात्मन्यर्थीति भाष्ये विग्रहोक्तिरयुक्ता ॥ अव्ययीभावस्य नित्यसमासत्वात् ॥ अविग्रहोऽस्वपदविग्रहो वानित्यसमासइत्युक्तेरितिनिरस्तम् ॥ भाष्यस्यकथंचिदर्थकथनमात्रपरत्वात् ॥ अस्मत्पक्षे तु नायं दोषः ॥ अव्ययानामनेकार्थतयाऽधिशब्दसमानार्थेनाधिकृत्येत्यनेन विग्रहप्रदर्शनात् ॥ अधिकृत्येत्यस्यार्थमाह ॥ तदुपकारित्वेनेति ॥ आत्मानमुपकृत्येत्यर्थः ॥ ननु कथं ल्यप् ॥ समानकर्तृकाक्रियांतराश्रवणादित्यतोऽध्याहृत्य व्याख्याति ॥ वर्तमानमिति ॥ अनेनात्मोपकारमात्रवाचिनाऽध्यात्मशब्देन तदुपकारकं लक्ष्यतइत्युक्तं भवति ॥

॥श्री०॥तयाचसदेहजीवोपकारकत्वार्थकाधिभूतशब्देननैकार्थतेतिभावः ॥ अनेनात्मनीतिविषयसप्तमीत्युक्तंभवति ॥ **सप्तम्यंतमिति** ॥आत्मानंजीवमधिकृत्यप्रतिपादकत्वेनवर्तमानोग्रंथ अध्यात्मंअध्यात्मेयत्प्रतिपाद्यंतदप्यध्यात्ममितिशेषपूरणेनद्वितीयंव्याख्यानमित्युक्तंभवति ॥ परमेश्वरप्रसक्तेरिति ॥ आत्मानं देहमधिकृत्य वर्तमानत्वं जीवस्येवेश्वरस्याप्यस्तीत्यध्यात्मशब्देन तत्प्रसक्तिः स्यात् ॥ मा चायुक्ता ॥ तत्प्रश्नोत्तरयोः पृथक्त्वमस्त्वात ॥ अध्यात्मं जीव उच्यते ॥ आत्माभिमानाधिकारस्थितमध्यात्ममुच्यते अन्तरात्मदेहपर्यंतं केवलात्मोपकार मित्यादिप्रमाणाननुगुणत्वाच्चेति भावः ॥ उभयस्येति ॥ किमध्यात्ममिति वाक्यस्याध्यात्मपदस्यात्मन्यर्थतया गुरुरीत्योभयार्थत्वादिति भावः ॥ **प्रकृतत्वादिति** ॥ वेदनकर्तृत्वेनेति शेषः ।

आत्माधिकार इति ग्रंथविशेषस्य संज्ञा ॥ यत्प्रतिपाद्यं तदध्यात्ममिति वेत्यर्थः ॥ अत्राध्यात्मशब्दंप्रथमांतं गृहीत्वा प्रथमंव्याख्यानम् ॥ सप्तम्यंतमुपादाय द्वितीयं आत्मशब्दं देहविषयमादायव्याख्याने परमेश्वरप्रसक्तेर्न तथा व्याख्यातम् ॥ एवं तर्हि स्वभाव इत्युभयस्य कस्मुत्तरमित्यतस्तावत्तद्व्याख्यानं प्रतिजानीते ॥ तथा हीति ॥ तत्राद्योत्तरत्वेनादौ व्याचष्टे ॥ जैव इति ॥ जीवस्थायंजैवोंतःकर

॥ तथाहि ॥ जैवस्वभावः ॥

णादिर्देहपर्यंतःपदार्थः स्वभावः ॥ स्वस्यभाव इति व्युत्पत्त्या न ब्रह्म तद्धि तुगिति जीवानांप्रकृतत्वात् ॥ स्वशब्दो जीववाची तथा चात्मन्यपि यत ॥ तदित्येवं व्याख्याताध्यात्मशब्दार्थप्रश्नस्येदमुत्तरं भवतीति भावः ॥

॥कु०॥न चाध्यात्मशब्दस्यात्मोपकारमात्रवाचित्वेन कृत इति वाच्यम्॥ अध्ययत्कृतोभव इत्युक्तेः क्रियामात्रवाचिनानिकृत्येयनेन विग्रहप्रदर्शनात्॥नचमामानानिकरण्यभावविरोधः॥कृत्स्थले संसर्गविषयातज्ज्ञानमिति मनोरमायामुक्त्वादिति॥ एवमधिभूतादिश [illegible] ध्येयम ॥ सप्तम्यंतमिति ॥ अन्यथोक्तरीत्यान्नाऽधिकारणप्रयत्नभेदे तात्विकाधिकरण्यालाभादिति भावः ॥ ग्रंथस्योपकारकत्वं तु प्रतिपादकत्वेनयत्नमेयम ॥ भाष्ये [illegible] वगाद्य नादि चध्याहारः। यद्यप्यात्मोपकारकत्वमध्यात्मशब्देन [illegible] ध्यग्रहणायामध्याभेमनामि द्वितथाऽपि प्रतिपत्तिगौरवभयादध्याहारः ॥ यद्वा भाष्यं लक्षितलक्षणप्रदर्शनपरं [illegible] त्वार्थकमिति ॥ परमेश्वरादिति ॥ देहोपकारकत्वस्येश्वरेऽपि सत्त्वादिति भावः ॥ तथा चाध्यात्मं देहपर्यंत केवलात्मोपकारकमित्यग्रिमप्रमाणविरोध इति हृदयम् ॥ अंतःकरणादिर्देहपर्यंत इति ॥ अध्यात्मं देहपर्यंतमित्यग्रिमप्रमाणानुगुण्यायैवमुक्तम् ॥ देहेंद्रियप्राणबुद्धिनेतृत्वं मन्यतेऽस्मिन इत्यादिप्रमाणोक्तानां बुद्ध्यादीनां व्युत्क्रमेण ग्रहणमिदमिति मंतव्यम् ॥

॥ श्री० ॥ जैववाचित्व इति ॥ स्वस्य भाव इति व्युत्पत्त्या स्वभावशब्दस्य जीवसंबंध्यंतःकरणादिवाचित्व इत्यर्थः ॥ कुत इत्यत आह ॥ षष्ठ्या इति ॥ स्वस्येति षष्ठ्या इत्यर्थः ॥ यद्यपीति ॥ भवनं भूः सत्ता॥ तथा च भवतीति भाव इति कर्तृव्युत्पत्त्या भवनकर्तेवायाति न तु सर्वदैकप्रकारेणेतीति भावः ॥विशेषेति ॥ सत्ताधिकरणत्वेन काल विशेषत्वर्थः ॥ मुख्यस्येति ॥ सर्वदैकप्रकारेण भवनस्यैव मुख्यत्वादिति भावः ॥ तस्येति ॥ भावशब्दोपादानस्येत्यर्थः कुत इत्यत आह ॥ आत्मैव हीति ॥ इत्यादे रिति ॥ विकारित्वावगमादित्यर्थः॥पूर्ववदिति॥आत्मैव ह्यात्माधिकारे प्रतिपाद्यो वक्तव्यो नेश्वर इत्यर्थः ॥ न न्वात्माधिकारे आत्मन प्रतिपाद्यत्वे ईश्वरस्यापि तत्प्रसंगेन तयोरैक्यादतो द्वितीयप्रश्नोत्तरत्वसंभवाद्भाव इत्येवास्तु किं स्वशब्देनेत्यत आह॥न हीति॥स्व इति॥स्वरूपभूत इत्यर्थः॥भेदप्रमाणेति॥द्वा सुपर्णेत्यादिभेदप्रमाणेत्यर्थः॥अत एवेति ॥ भेदप्रमाणविरोधादेवेत्यर्थः ॥

इदानीं द्वितीयोत्तरत्वेन व्याख्याति ॥ स्वाख्य इति ॥पूर्ववदत्रापि स्वशब्दो जीववाचीतथा चात्माधिकार इति व्याख्याताध्यात्मशब्दार्थ प्रश्नस्येदमुत्तरं भवतीत्याशयः ॥ ननु जैववाचित्वे भावशब्दः सार्थकः ॥ षष्ठ्याः साकांक्षत्वात् ॥ जीववाचित्वे तु तस्य पदार्थत्वाव्यभिचारात् स्वशब्देनैवालं किंभावशब्देनेत्यतोभावशब्दं तावदन्यथा व्याचष्टे ॥सर्वदेति ॥ यद्यपि भवनकर्ता भावः तथाऽपि विशेषानुपादानेमुख्यस्य ग्राह्यत्वात्सर्वदेत्यादिमिध्यनि ॥ तथाऽपि तस्यकिं प्रयोजनमित्यत आह ॥ अंतःकरणादीति ॥ स्वशब्दमात्रोपादाने तस्यात्मीयेऽपिप्रयोगादतःकरणादिकमपि प्रसज्येततथा च द्वितीयस्येदमुत्तरंस्यात् ॥ आत्मैव ह्यात्माधिकारे प्रतिपाद्यो वक्तव्यो नांतःकरणादिकम्॥ अतस्त

स्वाख्योभावः स्वभाव इति व्युत्पत्त्या जीवोवास्वभावः सर्वदा अस्त्येव एकप्रकारेणेति भावः॥ अंतःकरणादिव्यावृत्त्यर्थो भावशब्दः॥न ह्येकप्रकारेणस्थितिरंतःकरणादेर्विकारित्वात्॥स्वशब्दः ईश्वरव्यावृत्त्यर्थः॥

व्यावृत्त्यर्थो भावशब्दः प्रयुक्तः कथं तेनतद्व्यावृत्तिरित्यत आह॥ न हीति ॥ अन्नमयं हि सोम्य मन इत्यादेरिति भावः॥तथा चांतः करणादौ व्यावृत्ते स्वशब्द आत्मार्थतयाव्याख्यातो भवतीति हृदयम् ॥ एवं तर्हि भाव इत्येवास्तु किं स्वशब्देनेत्यत आह ॥ स्वशब्दइति ॥ ईश्वरोऽपि हि सर्वदैकप्रकारेणास्त्येव ॥ अतो भाव इत्येवोक्ते तत्प्रसक्तौ पूर्ववत् द्वितीयोत्तरत्वासंभवे तद्व्यावृत्त्यर्थः स्वशब्दः ॥ न हि ईश्वरो जीवानां स्वः ॥ भेदप्रमाणविरोधात् ॥ अत एवेश्वरस्वभावो जीव इति व्याख्यानमपास्तम् ॥

॥ कृ० ॥ आत्मीयेऽपि प्रयोगादिति ॥ उपलक्षणमेतत् ॥ स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इति कोशाच्चेऽयपि ग्राह्यम् ॥

॥श्री॥ प्रमां [illegible]
[illegible] स्त्रीयोनभवति ॥ तथा च स्वशब्देन स्त्रीग्रहणे ईश्वर [illegible]
[illegible]

नन्वेवमपि [illegible] ॥ मैवम् ॥ [illegible]
[illegible] ॥ [illegible]

॥ [illegible]
क्षायां व्यभिचारानवकाशात ॥ स्त्रियः पतिरित्यादिवाक्यादिः संबंधिकत्वादिक नि [illegible]
[illegible] ॥ [illegible]
[illegible] शब्दार्थमाह ॥ [illegible]

॥ श्री० ॥ तस्येति ॥ अपूर्वस्येत्यर्थः ॥ अध्यात्मपदेनैवेति ॥ अपरस्यापि देहादिवत् केवलात्मोपकारकत्वादिति भावः ॥ एवं लक्षण इति ॥ भूतभावोद्भवकरीश्वर क्रियारूपः ॥ त्यागार्थेति ॥ अत एव तथा व्याख्यात इति द्रष्टव्यम् ॥ विशेषणेतीति ॥ विशेषेण सर्जन मेश्वरंगमृष्ट्यादिरूपाक्रियैवेयाग ॥ ३ ॥ परिहारमिति ॥ अधियज्ञ च किं प्रोक्तमिति प्रश्नस्याधिभूतं क्षरो भाव इति परिहारं सगमयितुमित्यर्थः ॥ प्रत्येकमिति ॥ क्षरो विनाशीभावः पदार्थोऽधिभूतं भाव उत्पत्तिमान भावः पदार्थोऽधिभूतमिति प्रत्येकमुत्तरमित्यर्थः ॥ तथा च क्षरो भावः भावो भाव इति भावशब्दस्यावृत्तिरित्युक्तं भवति ॥

तस्याध्यात्मपदेनैव गृहीत्वादिति भावेन भूतभावेत्यादिकं व्याख्याति ॥ भूतानामिति॥उद्भवकरी च सेश्वरक्रिया चेति विग्रहः॥ ईश्वरक्रियाग्रहणं कर्मशब्देनैकार्थ्यप्रतिपत्त्यर्थम् ॥ एवंलक्षणो यो विसर्गः सकर्मसंज्ञितो न तुकुलालादिसंबंधीत्यर्थः॥ ननु विसर्गशब्दस्त्यागार्थस्तत्कथमेवं व्याख्यानमित्यत आह ॥ विशेषेणेति॥३॥ परिहारं संगमयितुमधिभूतशब्दार्थतावदाह ॥ भूतानीति ॥ अधिकृत्य तदुपकारित्वेन यद्भूतानांजीवानां भावानां जडपदार्थानां चोद्भवकरीश्वराक्रिया विसर्गः॥ विशेषेणसर्जनं विसर्ग इत्यर्थः

अधिभूतं क्षरो भावःपुरुषश्चाधिदैवतम् ॥ अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

॥ ३ ॥ भूतानि सशरीरान्जीवानाधिकृत्य यत्तदधिभूतम्॥ क्षरो भावो विनाशिकार्यपदार्थः ॥

तते ॥क्षरः सर्वाणि भूतानीति वक्ष्यमाणं क्षरं व्यावर्तयितुं व्याचष्टे ॥ क्षर इति॥ क्षरशब्दव्याख्या विनाशीति ॥भावशब्दस्यार्थद्वयंकार्य इति पदार्थ इति भवत्युत्पद्यत इति भावः॥ उत्पत्तिमान्पदार्थोनाशवान् पदार्थइति प्रत्येकमुत्तरम् ॥

॥ कृ० ॥ अध्यात्मपदेनैवेति ॥ परेणात्मानं देहमधिकृत्य वर्तमानमध्यात्ममिति व्याख्यानात्तदनुसारेणैतदुक्तम् ॥ तेन स्वमतेऽध्यात्मशब्देनांतःकरणादिदेहपर्यंतपदार्थस्य ग्रहणात्कथमेतदिति निरस्तम् ॥ उद्भवकरेश्चासावीश्वरश्चेतिविग्रहे गीतायां विसर्गस्योद्भवकरत्वोक्तिविरोध इत्यतआह ॥ उद्भवकरी च सेति ॥ २ ॥ भवत्युत्पद्यतइति ॥ धातूनामनेकार्थत्वादुत्पत्त्यर्थाद्भवतेर्विभाषाग्रह इति सूत्रे भवतेश्चेत्युक्तणप्रत्ययः ॥ पचाद्यचि सति स्वार्थिकोऽण्वेति भावः ॥ ननु शरीरप्रागभावो दुरितध्वंसश्च सशरीरजीवोपकारक इत्यधिभूतांतर्भूतः ॥ न च तयोर्विनाशिकार्यत्वमिति ॥ अव्यापकमुत्तरमित्यतआह ॥ उत्पत्तिमान्पदार्थ इति ॥ अनेन क्षरोभावः भावो भाव इति भावशब्दस्यावृत्तिरित्युक्तं भवति ॥

१ पुरोडाशादिद्रव्यपरित्यागार्थत्वेन २ एतेनभाष्येउद्भवकरेश्वर क्रियेतिपाठः॥पुंवद्भावश्चेति सूचितम्॥करीश्वरेतिपाठशंकायाण्वाभावाट्टीकायांविग्रहप्रदर्शनवैयर्थ्यम्॥अत्राविग्रहांतरप्रदर्शनमयुक्तंचेतिद्रष्टव्यम्॥३॥यद्यपितच्छब्देनप्रागभावप्रध्वंसयोःपरामर्शात्कार्यत्वंविनाशित्वमितिवक्तव्यंतथाऽपिगीतायांक्षरोभावइतिभाष्येचविनाशिकार्येतिनिर्देशादत्रापितथानिर्देशः

॥ श्री० ॥ ननु क्षरः सर्वाणि भूतानीति वक्ष्यमाणसर्वभूतजीवलक्षणक्षरव्यावृत्तिः कुतः कर्तव्या॥क्षरशब्दवाच्यसर्वभूतानामेवाधिभूतत्वमस्त्वित्यत आह॥सर्वभूतानामिति॥ब्रह्मादिजीवाः सर्वेऽपि शरीरक्षरणात्क्षरा इति सर्वभूतशब्दवाच्यानां जीवत्वोक्त्या जीवानां चात्माधिकारेयत्तदित्युक्तरीत्याऽध्यात्मतयाऽधिभूतत्वाभावेन तत्प्रश्नोत्तरभूतक्षरशब्देन न ग्रहणमित्यर्थः ॥ अव्यापकमुत्तरमिति ॥ क्षरो भाव इत्युत्तरं लक्ष्यभूतसर्वाधिभूताव्यापीत्यर्थः ॥ अधिभूतांतर्भावेऽपीति ॥ अधिभूतशब्दार्थांतर्भावेऽपीत्यर्थः ॥ वैषम्यपरित्यागेन साम्यावस्थापत्तिरिति ॥ सृष्टिकाले हि सत्त्वादीनां मध्ये यदुद्भूतं बलीयस्तदंगीभूतं तदनुगुणतया स्थितमन्य एवं हि तेषां गुणप्रधानभावे सति महदादौ कार्ये प्रवृत्तिर्भवति इदमेव च गुणवैषम्यं सृष्टिरिति यावत् ॥ प्रलये तूक्तरीत्या गुणप्रधानभावेनावस्थानं किं तु तत्परित्यागेन त्रयाणामपि प्रधानभावेनैवावस्थितिः साम्यावस्था प्रलयइति यावदित्यर्थः ॥ केचित्तु सृष्टिकाले त्रयाणामपि सत्त्वात् गुणवैषम्यमित्युच्यते प्रलये तु रजोगुणनाशेन द्वयोरेव परिशिष्यमाणत्वात् गुणसाम्यमित्युच्यत इत्याहुः ॥ एतद्विस्तरस्तु तृतीयस्कंधतात्पर्ये स्पष्टः ॥ व्योमेति व्याप्तशब्दः स्यादिति वचनमनुसंधायव्योम्नीत्यस्यार्थमाह ॥ व्योम्नि व्याप्त इति ॥ ननु निष्क्रियत्वं कथं आनीदवातमिति चेष्टाभिधानादित्यत आह ॥ प्रलय इति॥ व्यापारो जगद्व्यापारः ॥ भाष्ये निष्क्रिये व्योम्नि परमे ब्रह्मणीत्यर्थः ॥ अधिकरणे शेतेरिति ॥ ॥ कृ ॥० ननु क्षरः सर्वाणि भूतानीत्युक्तक्षरः कुतो व्यावर्त्य इत्यत आह ॥ स

सर्वभूतानामध्यात्मत्वान्न ग्रहणम्॥नन्वव्यक्तमपि सशरीरान् जीवानधिकृत्य वर्तत इति तस्याप्यधिभूतेऽतर्भावोऽस्त्येव न चेत्तद्विनाशि कार्यं वा नासत इत्युक्तत्वात्॥ततोऽव्यापकमुत्तरमित्यत आह॥अव्यक्तेति॥अव्यक्तस्याधिभूतांतर्भावेपि नाव्यापकमुत्तरमिति शेषः॥कुत इत्यत आह॥तस्या

अव्यक्तांतर्भावेऽपि॥ तस्याप्यन्यथाभावाख्यो विनाशोऽस्त्येव तच्चोक्तम्॥अव्यक्तं परमे व्योम्नि निष्क्रिये संप्रलीयत इति॥तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति च ॥ विकारोऽव्यक्तजन्म हीति चस्कांदे

॥ पुरिशयनात्पुरुषो जीवः ॥

पीति॥अन्यथाभावो वैषम्यपरित्यागेन साम्यावस्थापत्तिः॥यत इतिशेषः॥तथा विक्रियालक्षणं जन्मचेत्यपि ग्राह्यम्॥उभयत्र क्रमेण प्रमाणान्याह॥तच्चेति॥व्योम्नि व्याप्ते॥प्रलयेप्रचुरव्यापाराभावात् निष्क्रिये ननु पुरुषः परमात्मा स ब्रह्माधियज्ञशब्दाभ्यामुक्त इत्यत आह॥पुरीति॥शरीरेऽधिकरणे शेतेरितिडः

र्वभूतानामिति ॥ अध्यात्मत्वादिति ॥ द्वितीययोजनायामध्यात्मशब्दवाच्यत्वादित्यर्थः ॥ विकारोऽव्यक्तजन्म हीत्यग्रिमवाक्यानुसारेणाह ॥ तथाविक्रियेति ॥ प्रसिद्धाकाशेऽव्यक्तस्यासंभवाद्व्योमेत्याह ॥ व्याप्तइति ॥ प्रलयेऽपि क्षणरूपादिसृष्ट्यादिव्यापारसत्त्वात्तत्प्रवृत्त्यर्थमुक्तम् ॥ प्रचुरेति अधिकरण इति॥ इतिशब्दःकाचित्कःप्रामादिकः॥

१ यद्गुणजन्म ॥ २ विष्णुरहस्येतथोक्तेः ॥ ३ एतेनभाष्ये अव्यक्तांतर्भावेइत्यत्रषष्ठीतत्पुरुषः कस्मिन्नंतर्भाव इत्याशंकायां अधिभूतइति उपस्थितत्वाद्ग्राह्यमिति सूचितम् ॥

गी.भा.
॥२५७॥

॥ श्री०॥यद्यप्यस्य सत्रस्याधिकरणे पृष्ठदपदे शैलेर्ष [illegible] चाहाश तथा च पर्गनिमित्त [illegible]
चूनत्यये इकारस्यैकारे तस्यायादेशे न पृगिशय [illegible] न [illegible]
अत एवैतत्सूत्रव्याख्यानावसरे काशिकाया गिरौ [illegible] गिरिशा [illegible] ॥ नच [illegible]
स्मदाचार्यचरणैः [illegible] धिकरणे [illegible]
परी वर्णविकारनाशौ ॥ [illegible]
[illegible]
रे यत्तद्विविधं व्याख्यातं [illegible] ॥ [illegible] इति
यणो वा [illegible] उक्तम् ॥ मृत्यव इति ॥ [illegible]

॥ वर्णागमो वर्णविपर्ययश्चेत्यादिना [illegible] ऐन मनार्थमित्यत्र अ [illegible]
तस्याधिदैवत्वं कथमित्यतो हेयाऽह [illegible] प्रत्ययनः प्रतिपाद्य
[illegible] तल्पात [illegible] ज्ञातव्या ॥

सर्वदेवतासंग्रहार्थं या द्वितीयव्याख्यानम् [illegible] तु अधिकरणे पृष्ठप-
दे शैलेई इत्यर्थान्तरमभिप्रेत्योक्तमुदाहरणम् ॥ [illegible] अवयवस्थिता [illegible]
[illegible] तत्कथं तद्धिति [illegible] ॥ [illegible] ज्ञेयम ॥ यद्वा अधिकरणे [illegible]
प्रापि बाहुलकाद् [illegible] पुरुशादिति [illegible] आह ॥ वर्णागम इति ॥ तथा चैवर्णागमः शवर्णस्य पकारा-
त्मना विकारश्चेति भावः ॥ [illegible]

॥ श्री० ॥ अक्षरार्थस्त्वां ॥ [illegible] बर्तमानेऽप्यथ [illegible] अक्षरार्थं [illegible]
[illegible]
[illegible]
[illegible] ॥ प्रश्न [illegible]
[illegible] ॥ प्रश्न [illegible]
[illegible] ॥ तद्यथा [illegible]

॥ अक्षमर्थस्तु [illegible]
शब्दैरमर्थमात्र ॥ किं [illegible] ॥ [illegible] प्रश्ने [illegible]
देह इत्यस्य प्रयोजनमाह ॥ [illegible]
सर्वसाक्षिणं कृत्वा [illegible] ॥
दातॄणां देहप्रेक्षकत्वेन वर्तमान [illegible] ॥ [illegible] भोक्तृत्वं कुतो येनेत्तुत
रमध्याह्रियत इत्यत आह॥भोक्तारमिति॥

[illegible] ॥ [illegible]
स्यान्यतदेवोत्तरम्॥अक्षरार्थं लिखति॥ [illegible]
[illegible] ॥ [illegible] देह इत्युक्तेऽपि सिद्धार्थतैव ॥ अन्यादर
पिस्वदेहे स्थितत्वादित्यत ॥ कान्ति ॥

॥श्री० ॥अधियज्ञः कथमितिप्रश्नस्योत्तरं सर्वज्ञभोक्तृत्वादेरधियज्ञ इत्यनेनाध्याहीयत इत्यर्थः॥सर्वेत्यनुपपन्नमिति ।सर्वयज्ञभोक्तृत्वादेरित्यत्र सर्वेत्येतदनुपपन्नमित्यर्थः ॥एतस्येतीति ॥ मनुष्याः द्रव्यादिकं ददतो जनान् प्रशंसंति देवाश्च यजमानं प्रशंसंतीति यत्तदेतस्याक्षरस्य प्रशासने प्रेरणे सत्येव नान्यथेति श्रुत्यर्थो द्रष्टव्यः ॥ स्वर्गस्य ध्रुवशब्दोक्तनित्यत्वासंभवादाह ॥ध्रुवश्चिरंतन इति ॥अचतुरेत्यादिना निश्रेयसशब्दस्याच्प्रत्ययांतस्य निपातितत्वान्निश्रेयसे इति ध्युक्तम् ॥ नैश्रेयसमित्यत्र तद्धिताण्प्रत्ययार्थकथनम् ॥ भवमिति ॥ पद्यते प्राप्यत इति पदमिति व्युत्पत्तिमभिप्रेत्याह ॥ पदंसुखमिति ॥ कथं सिद्धमित्यत आह ॥ भोक्तारमिति ॥ भोक्तारं यज्ञतपसांसर्वभूतमहेश्वरम् ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छतीति भगवतोक्तं यत्त्वस्य सर्वयज्ञभोक्तृत्वं तस्यार्जुनेन श्रुतत्वादित्यर्थः ॥ननु तर्ह्यधियज्ञः कथमिति प्रश्न एवानुपपन्नः सिद्धार्थत्वादित्यत आह ॥ अन्यत्व पक्ष एवेति ॥ यज्ञभोक्तुर्भगवदन्यत्वपक्ष एव तस्याधियज्ञत्वं कथमितिपृष्टत्वादित्यर्थः ॥ इयत पृथगिति॥ अनेनैव परिहारोऽपि लब्धप्राय इति भावः ॥ रूपविशेषेति॥ अंतर्यामिरूपविशेषेत्यर्थः

त्रैविद्यानुष्ठितयज्ञभोक्तृत्वाभावात्सर्वेत्यनुपपन्नमित्यत आह॥ त्रैविद्या इति॥प्रवर्तकत्वे श्रुतिमाह॥एतस्येति ॥यज्ञफलदातृत्वादौ प्रमाणमाह ॥ कुतो हीति ॥ ध्रुवश्चिरंतनः ॥ निश्रेयसे मुक्तौ भवं पदं सुखमित्यादेःप्रश्नस्य ॥ नन्वेष परिहारो भगवतैव कुतो नोक्त इत्यत आह ॥ भगवांश्चेदिति ॥ चेत् शब्दो यदाशब्दार्थे अधियज्ञोऽहमिति यदाधियज्ञत्वेन भगवानुक्तः तदातस्यसर्वयज्ञभोक्तृत्वादेरधियज्ञत्वमर्जुनस्य सिद्धमेव॥भो

त्रैविद्या माम्॥ ये त्वन्यदेवता भक्ताः॥एतस्य वा अक्षरस्य प्रशासने गार्गिददतो मनुष्याः प्रशंसंतियजमानंदेवा इत्यादेः ॥ कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैश्रेयसं पदमित्यादिपरिहारश्चमोक्षधर्मे ॥ भगवांश्चेत्तद्भोक्तृत्वादेरधियज्ञत्वं सिद्धमिति कथमित्यस्य परिहारः पृथङ्नोक्तः ॥ सर्वप्राणिदेहस्थरूपेण साधियज्ञः॥

क्तारमित्यादेरर्थस्यतेन श्रुतत्वात्॥अन्यत्वपक्ष एव कथमिति पृष्टत्वात्॥एवमालोच्यभगवता कथमित्यस्यप्रश्नस्य परिहारोऽधियज्ञोऽहमित्यतः पृथक् नोक्तः ॥ अस्माभिस्तु मंदान्बोधयितुमुक्त इति भावः ॥ ननु यद्यधियज्ञः स्वयमेव तर्हि कथं साधियज्ञं मामिति प्रागवोचादित्यत आह॥ सर्वेति ॥ रूपविशेषापेक्षया साहित्यमुक्तमिति भावः ॥ ॥ क० ॥ यज्ञफलदातृत्वादाविति ॥ आदिपदव्यत्यासेन यज्ञादिफलदातृत्व इत्यर्थः ॥ आदिपदेन ज्ञानफलदातृत्वसंग्रह इत्याहुः॥यद्वा॥यज्ञफलभोक्तृनम्यत्वसंग्रहार्थादिपदम्।मोक्षधर्मे स्वर्गतश्चैव किं कुर्यादिति प्रश्नस्य स्वर्गस्था अपि ये केचित्तं नमस्यंति देहिन इति परिहारात् उक्तप्रश्नसंग्रहार्थैव च भाष्ये इत्यादीत्यादिपदम् ॥ननु स्वर्गस्यानित्यत्वात् कथं ध्रुव इति विशेषणमित्यत आह ॥ध्रुवश्चिरंतन इति॥भगवतोऽधियज्ञत्वस्य निश्चितत्वेन पाक्षिकत्वायोगादाह ॥ चेच्छब्द इति॥इत्यादेरिति॥आदिपदेन प्रवर्तकत्वोपपादकस्याहं कृत्स्नस्य जगतःप्रभव इत्यर्थस्य फलदातृत्वोपपादकस्य लभते च ततः कामान्मयैवविहितान्हितानित्यर्थस्य च संग्रहः॥

॥ श्री० ॥ **प्रयोजनांतरमिति** ॥ ॥ न केवलं देहे प्रवर्तकप्रश्ने तदनुसारेण देहे प्रवर्तको वक्तव्य इत्येवपरिहारवाक्ये देहशब्दोपादानेप्रयोजनं वाच्यम् ॥ किं तु प्राणिनां देहगो वि ष्णुरधियज्ञइतीरित इति प्रमाणानुसारेणाधियज्ञोहमित्युक्ते ॥ बहिष्ठस्त्वं कथं देहे प्रवर्तक इतिशंकायां अधियज्ञाख्यदेहस्थरूपांतरेणाहं प्रवर्तक इति प्रवर्तकरूपविशेषस्वरूपप्रदर्शनल क्षणं प्रयोजनांतरं चोक्तं भवतीत्यर्थः ॥ अहमेवेत्युक्तिस्तु स्वस्य प्रवर्तकरूपेणात्यंताभेदाभिप्रायेणेति भावः ॥ **अत्रेतीति** ॥ अत्रेत्यनुक्तौ देहप्रवर्तकोऽहमधियज्ञ इत्युक्ते ईश्वरदेहस्य नि प्राप्तेस्तद्व्यावृत्त्यर्थं अत्रेत्युक्तमित्यर्थः ॥ तस्यार्थमाह ॥ देहेति ॥ तस्याप्यर्थमाह ॥ लौकिक इति ॥ ईश्वरदेहातिरिक्तदेहपरो लौकिक देहशब्दस्तेन सर्वदेहसंग्रह इति ध्येयम् ॥ **पृथ ग्भावेनेति** ॥ देहे भिन्नतयाऽवस्थानेनेत्यर्थः ॥ **भगवतोऽन्यदेवेति** ॥ वेदादिकमेवेत्यर्थः ॥ ननु वेदादिशंकानिवृत्त्यर्थमेव परममित्युक्त्वात् कथमियं शंकेत्यत आह॥**परममिति त्विति**॥ परमशब्देन वेदादेः स्मृतिमहदादीतरापेक्षयोत्तमत्वाख्यं स्वरूपमेव कथ्यते न तु वेदप्रकृतिव्यावर्तकमक्षरगतं परमत्वविशेषणमुच्यत इत्यर्थः॥**परामर्शादिति**॥ततश्च भगवानेव ब्रह्मेत्याशयः॥

अनेनपरिहारवाक्यस्थस्य देह इतिविशेषणस्य प्रयोजनांतरं चोक्तं भवति ॥अत्रेति देहविशेषणं किमर्थमित्यत आह॥अत्रेति ॥इह लौकिके देहइत्यर्थः ॥ कुत ईश्वरदेहो व्यावर्तनीय इत्यत आह ॥ न हीति ॥ तत्र स्वदेहे पृथक् पृथग्भावेन ॥ यथाऽधियज्ञोऽहमेवेत्युक्तं न तथा ब्रह्माहमिति ॥अतो भगवतोऽन्यदेवेदं ब्रह्मपरममिति तु स्वरूपकथनम्॥ न तु विशेषणमिति शंकां निवारयति ॥ नात्रेति ॥ पूर्वाध्याये ते

अत्रेतिस्वदेहनिवृत्त्यर्थम् ॥ नहि तत्रेश्वरस्य नियंतृत्वं पृथगस्ति ॥ नात्रोक्तं ब्रह्म भगवतोन्यत् ॥
॥ ते ब्रह्मेत्युक्त्वा साधिभूताधिदैवं मां साधियज्ञं च ये विदुरिति परामर्शात् ॥

ब्रह्म तद्विदुरित्युक्त्वा कथंभूतं ब्रह्मेत्याकांक्षायां साधिभूताधिदैवं साधियज्ञं च ब्रह्मेतिवक्तव्ये मामितिब्रह्मणः परामर्शात्

॥ रु० ॥ **प्रयोजनांतरमिति** ॥ प्रागग्न्यादिव्यावृत्तिरूपं प्रयोजनमुक्तम् इदानीं बहिष्ठरूपव्यावृत्त्याख्यप्रयोजनांतरमुक्तमित्यर्थः ॥ नन्वीश्वरस्य स्वदेहे पृथङ्नियंतृत्वं नास्तीत्ययुक्तम अचिंत्यशक्त्या पृथक् पृथगेव पदार्थनियंतृत्वेन स्वदेहेऽपि तथात्वान्नहीश्वरस्य सर्वपदार्थविषयो नियमनव्यापार एक एवेत्यत आह ॥ **पृथग्भावेनेति** ॥ नियम्यापेक्षया पार्थक्येने त्यर्थः ॥ **भगवतोऽन्यदेवेति** ॥ वेदादिकमित्यर्थः ॥ ननु परममित्यक्षरविशेषणात्तद्व्यावृत्तिरित्यत आह ॥ **परममिति त्विति** ॥ ॥ उक्तहेतोः परब्रह्मणोऽप्रतिपाद्यत्वेन वेदादेरेव प्रतिपाद्यत्वादितिभावः

॥श्री०॥अपरत्वेति॥अक्षरं ब्रह्म परममित्यत्राहमित्यनुक्तिरित्यर्थः ॥शेषं तात्पर्यनिर्णय इति॥ननु भगवानेवाधियज्ञश्चेत्कथं तत्साहित्यं प्रागुक्तमित्याशंका तस्यैव सर्वप्राणिदेहस्थितरूपांतरापेक्षया सहितत्वं युज्यत इति तात्पर्यनिर्णये परिहृतमित्यर्थः॥ एतेनेति॥ सगुणस्य भगवत एव ब्रह्मत्वाधियज्ञत्वोपपादनेनेत्यर्थः॥अपव्याख्यानमिति॥ अधियज्ञोऽहमित्यत्र स्वाख्यं सगुणं ब्रह्म अक्षरं ब्रह्म परममित्यत्र तु निर्गुणं ब्रह्म प्रतिपाद्यत इत्यपव्याख्यानमित्यर्थः ॥ विस्तरेणेति ॥ परं तु ब्रह्म न हि भगवतोऽन्यादित्यादिना विस्तरेण द्वादशाध्यायादौ च निरस्त मित्यर्थः ॥यत्तच्छब्दाध्याहारेण योजयति ॥यानित्यादिना ॥समुदायापेक्षया स इत्येकवचनम् ॥ ईरित इतिपुंल्लिंगं विधेयलिंगापेक्षया॥ उद्देश्यलिंगापेक्षायांत्वीरितानीति स्यादितिभावः ॥

॥ तत्रास्तु भगवानेव ब्रह्म अत्रतु कुत इत्यत आह ॥ तस्यैवेति ॥ पृष्टस्यैव वक्तव्यत्वात् ॥ तर्हि अधियज्ञस्य ब्रह्मणश्च भगवत्वादेकत्राह मेवेत्युक्तिरपरत्र तदनुक्तिः किं निबंधनेत्यत आह ॥ साधियज्ञमिति ॥ शेषं तात्पर्यनिर्णये॥एतेनापव्याख्यानमपि निरस्तं द्वादशादौ च विस्त

तस्यैव च प्रश्नात् ॥ साधियज्ञमितिभेदप्रतितेस्तन्निवृत्त्यर्थमधियज्ञोहमित्युक्तम् ॥ मामित्यभेदप्रसि द्धेरक्षरमित्येवोक्तम् ॥आह चगीताकल्पे देहस्थविष्णुरूपाणि अधियज्ञ इतीरितः ॥ कर्मेश्वरस्य सृष्टय र्थंतच्चापीच्छाद्यमुच्यते॥अधिभूतं जडं प्रोक्तमध्यात्मं जीवउच्यते ॥ हिरण्यगर्भोधिदेवं देवः संकर्ष णोपिवा ॥ ब्रह्मनारायणो देवः सर्वदेवेश्वरेश्वर इति ॥ यथाप्रतीतं वासर्वमत्रनैवविरुध्यत इति

रेण आगमसंमत्योक्तं स्थापयति ॥ आह चेति ॥ यानि देहस्थाविष्णुरूपाणि सोऽधियज्ञ इतीरितः

॥कृ०॥ननु भगवत एव ब्रह्मत्वेऽधियज्ञत्वे च ते ब्रह्मतद्विदुरित्यत्र तादिति परोक्षनिर्देशः साधियज्ञमित्यधियज्ञसाहित्योक्तिश्चायुक्तेत्यत आह॥शेषमिति ॥ सर्वगरूपांतरस्यैव ब्रह्मत्वात्तदित्युक्तिः देहस्थरूपविशेषस्याधियज्ञत्वात्तदपेक्षया साहित्यं चयुक्तमिति प्रमेयमित्यर्थः॥ अधियज्ञोऽहमित्यत्र स्वाख्यं सगुणं ब्रह्मोच्यते अक्षरं ब्रह्मपरममित्यत्र तु निर्गुणं ब्रह्मेतिव्याख्यानं निराह ॥ एतेनेति ॥ भगवत एव ब्रह्मत्वाधियज्ञत्वोपपादनेनेत्यर्थः ॥ ननु न तथापि भगवतो ब्रह्मत्वं युक्तम् भगवतः करचरणादिमद्रूपवत्वात् ॥ ब्रह्मणश्चाशब्दमस्पर्शमरूपमित्यादिश्रुत्या रूपत्वावगमादित्यत आह ॥ द्वादशादौ चेति ॥ द्वादशाध्यायोपक्रम इत्यर्थः ॥ रूपं चेदृशं साधितं पुरस्तादित्यनेनेति शेषः ॥ ननु देहस्थाविष्णुरूपाणि अधियज्ञइतीरितानीति वक्त मनियतलिंगानां विधेयशब्दानामुद्देश्यसमानलिंगत्वात् ॥ तत्कथं पुंल्लिंगत्वमित्यत आह ॥ यानीति ॥ उद्देश्यपरामर्शकस्य तच्छब्दस्य नोद्देश्यसमानलिंगत्वनियमः ॥ णेरणौ यत्कर्मणौ चेत्सकर्ता ॥ शैत्यं हि यत्स्यात्प्रकृतिर्जलस्येत्यादौ विधेयलिंगत्वस्यापि दर्शनात् ॥ ततश्च पुंल्लिंगंयुक्तमितिभावः ॥

॥श्री०॥ **तदपीति** ॥ सृष्ट्याख्यं कर्मापीत्यर्थः ॥ प्रयत्नेत्यादिशब्दार्थः ॥ एवेत्युक्त्या चशब्द एवार्थ इत्युक्तं भवति॥ तत्प्रयोजनं दर्शयति ॥ नत्विति ॥ भूतानि सशरीरान् जीवान विकृत्य यत्तदधि भूतमिति भाष्येणैकार्थत्वायाह ॥ **देहाद्बाह्यमिति** ॥ वक्तुर्गीताकारस्य ॥ **किंचिद्व्यवहितत्वादिति** ॥ देहस्थविष्णुरूपाणीत्यादिवाक्यस्य यथाप्रतीतमिति वाक्यस्य च गीताकल्पस्थत्वेनैकप्रकरणगतत्वेऽपि यथाप्रतीतमितिवाक्यस्य देहस्थेत्यादिवाक्यापेक्षया तद्ग्रंथे ॥ किंचिद्व्यवहितत्वादेकानुपूर्वीगतत्वाभावादित्यर्थः ॥ अभिमानश्चाधिकारश्चाभिमानाधिकारौ आत्मनोऽभिमानाधिकारौ आत्माभिमानाधिकारौ आत्माभिमानाधिकारयोः स्थितमात्माभिमानाधिकारस्थितमिति विग्रहमभिप्रेत्य आत्माभिमान इतिसप्तम्याः पञ्चम्यर्थत्वमंगीकृत्य तत्र स्थितत्वं नाम तद्विषयत्वं.आत्माधि कारे स्थितत्वं नाम तत्प्रतिपाद्यत्वमिति भावेन व्याचष्टे ॥ **आत्मनइत्यादि** ॥

॥ तदपीच्छाप्रयत्नाद्यमेव ॥न तु परिणामरूपम् ॥ जडं देहाद्बाह्यम् ॥ नकेवलमेषां पदानामेतावन्मात्रार्थत्वं किं तु यथाप्रतीतं प्रतीतिमनतिक्रम्य शब्दशक्त्या यावत्प्रतीतिं प्रमाणाविरुद्धं च तदत्र व्याख्यायमानंवक्तुरभिप्रायं न व्यभिचरतीत्यर्थः ॥ किंचिद्व्यवहितत्वात् मध्येऽ

॥ स्कांदे च ॥ आत्माभिमानाधिकारस्थितमध्यात्ममुच्यते देहाद्बाह्यं विनाऽतीव बाह्यत्वादधिदैवतम् देवाधिकारगं सर्वं महाभूताधिकारगम् ॥ तत्कारणं तथा कार्यमधिभूतं तदंतिकात् इति ॥ महाकौर्मे च॥अध्यात्मं देहपर्यंतंकेवलात्मोपकारकम् सदेहजीवभूतानि यत्तेषामुपकारकृत्॥अधिभूतं तुमायांतंदेवानामधिदैवतमिति ॥ ४ ॥

पीति शब्दः ॥ एतदेव वाक्यांतरेण स्पष्टयति ॥ स्कांदेचेति ॥ आत्मनोऽभिमानस्य विषयः

॥ कृ०॥अवधारणार्थचशब्दस्येच्छाद्यमित्यनेनान्वय इति दर्शयन्नाद्यपदार्थमाह॥इच्छाप्रयत्नाद्यमेवेति॥एवशब्दव्यावर्त्यमाह॥नत्विति अनेन सृष्ट्याख्यमित्यस्येच्छाद्यमित्यनेन व्याख्याने प्रयोजनमुक्तं भवति ॥ ननु जडमधिभूतामिति कथम ॥ देहादेर्जडस्याध्यात्मत्वादित्यत आह ॥ **देहाद्बाह्यमिति** ॥ ननु यथाप्रतीतमित्यस्य गीताकल्पवाक्यत्वान्मध्ये इति शब्दो व्यर्थ इत्यत आह ॥ **किंचिद्व्यवहितत्वादिति** ॥ आत्मनोऽभिमानाधिकाराविति षष्ठीतत्पुरुषः ॥ ततस्तयोःस्थितमिति सप्तमीसमासः ॥ तत्रात्माधिकारस्य प्रतिपादकतया विषयित्वेऽप्याधिकरणत्ववदभिमानस्यापि वैवक्षिकाधिकरणत्वं युक्तमिति भावेनाभिमानस्थितत्वादिकं व्याचष्टे ॥ **आत्मन इत्यादिना** ॥

॥श्री० ॥ तत्रेति ॥ आत्माधिकाराख्यग्रंथ इत्यर्थः ॥ नन्वात्माधिकाररूपग्रंथप्रतिपाद्यो जीव अध्यात्ममित्युक्ते देहाद्वाह्यस्य सदेहजीवोपकारकस्य भूतादेरात्माधिकारप्रतिपाद्यत्वाभावेनाध्यात्मत्वाप्रसक्तेस्तद्व्यावृत्त्यर्थं देहाद्बाह्यं विनेत्येतन्न वक्तव्यमिति चेत्तत्राह ॥ देहाद्वाह्यं विनेतीति ॥ आत्माभिमानविषयं अध्यात्ममित्येवोक्ते देहव्यतिरिक्तभूतादेरप्यात्माभिमानविषयत्वादध्यात्मत्वं स्यादिति शंकानिरासो देहाद्बाह्यं विनेत्युक्त एव भवति नान्यथेत्यनमोतप्रसंगनिवारणलक्षणसामर्थ्यात् देहाद्बाह्यं सदेहजीवोपकारकं भूतादिकं विना यदाऽऽत्माभिमानविषयभूतं अंतःकरणादिदेहपर्यंतं तदध्यात्ममित्यनेन प्रकारेण देहाद्बाह्यं विनेत्येतदात्माभिमानविषयभूतं अंतःकरणादिदेहपर्यंतं तदध्यात्ममित्यनेन प्रकारेण देहाद्बाह्यं विनेत्येतदात्माभिमानस्थेन संबध्यत इत्यर्थः नन्वात्माभिमानविषयत्वे भूतादितो देहादेः को विशेषः येन देहादेरेवाध्यात्मत्वं न भूतादेरित्याशंकापरिहारायातीवबाह्यत्वादिति वक्तव्ये स्यादित्यत आह ॥ तत्र युक्ति रिति ॥ भूतादेरध्यात्मत्वाभावइत्यर्थः ॥ देहादेः स्फुटतराविवेकप्रयोजकात्माभिमानविषय तथा भूतादेस्तादृशाभिमान विषयत्वाभावेनातीव बाह्यत्वादित्यर्थः॥महाभूताधिकारगं तत्कारणमित्यादिभाष्यकारानुक्तं व्याख्यानान्तरम् ॥ महाभूताधिकारगमित्यस्य विशेष्यापेक्षितमत्रध्याहरति ॥ महाभूतमिति । तथा च महाभूताधिकारगं तद्ग्रंथप्रतिपाद्यं महाभूतमधिभूतमित्यन्वयोद्रष्टव्यः॥ननु तत्कारणं तथाकार्यमधिभूतमिति कथम् महाभूतकार्यस्य भौतिकस्य तत्कारणस्याहंकारादेश्चमहाभूताधिकारग्रंथप्रतिपाद्यत्वाभावेनाधिभूतत्वायोगादित्यत आह ॥ कार्यकारणग्रहणऽइति ॥ अधिभूतशब्दार्थत्वेन ग्रहण इत्यर्थः ॥ तत्तादात्म्यादिति ॥ तथा च महाभूताधिकारग तेन कार्यकारणयोरधिभूतशब्दवाच्यत्वम् अनेनोच्यते किं नामभूतान्यधिकृत्य तदंतिकात् तदात्मकत्वाद्यैति यावत् ॥ विद्यमानं यत्तत्कारणं कार्यं च तदधिभूतमिति व्युत्पत्त्येत्युक्तं भवतीति द्रष्टव्यम् ॥ देहपर्यंतमिति भाष्ये अंतःकरणादिदेहपर्यंतमित्यर्थः ॥ देवानामधिदैवतमित्यनन्वितमित्यत उपकारकृदित्येतदनुवर्ततेऽतोनानन्वयइत्याशयेनाह ॥ देवानामुपकारकृदिति॥इंद्रादिदेवानामुपकारकृत संकर्षणो ब्रह्मा वा अधिदैवतमिति संबंधोद्रष्टव्यः ॥ ४ ॥

॥ आत्माधिकारस्थं तत्र प्रतिपाद्यं देहाद्बाह्यं विनेति ॥ सामर्थ्यादात्माभिमानस्थेन संबध्यते ॥ तत्र युक्तिः अतीवबाह्यत्वात् ॥ अत्याभिमानविषयत्वाभावात् ॥महाभूताधिकारगं महाभूतम्॥कार्यकारणग्रहणहेतुः॥तदंतिकात्तत्तादात्म्यात् ॥देवानामुपकारकृत् ॥ ४ ॥

॥ कृ० ॥ नन्वात्माधिकारप्रतिपाद्यो जीव एव ॥ अतः तत्र व्यावर्त्याभावाद्देहाद्बाह्यं विनेति विशेषणं व्यर्थमित्यत आह ॥ देहाद्बाह्यम् विनेतीति ॥ सामर्थ्यादिति ॥ अतिव्याप्तिनिरासकसामर्थ्यादित्यर्थः ॥ तथा चात्माभिमानस्थमध्यात्ममित्युक्ते गृहादावतिव्यापकमुक्तं स्यात्तद्व्यावृत्त्यै देहाद्बाह्य विनेति सार्थकमिति भावः ॥ नन्वेवं सति देहाद्बाह्यस्याध्यात्मत्वं नास्तीत्यापन्नं तत्कुत इत्यतः प्रतिजानीते ॥ तत्र युक्तिरिति ॥ देहाद्बाह्यस्याध्यात्मत्वाभावे युक्तिरित्यर्थः ॥ ननु गृहादेर्नाध्यात्मं आत्माभिमानविषयत्वेऽपि बाह्यत्वादित्युक्ते देहे व्यभिचारः॥प्रकृतिबंध॥ततः सत्त्वादिगुणबंधः ततः कर्मादिकं ततो लिंगदेह॥ततः स्थूलदेहइत्येवं स्थूलदेहस्यापि सावधिकतो बाह्यत्वसद्भावादित्यत आह॥अत्याभिमानेति॥ स्फुटतराविवेकप्रयोजकाभिमानाविषयत्वादित्यर्थः ॥ ननु महाभूतस्य योगेनाधिभूतशब्दवाच्यत्वेऽपि तत्कार्यकारणयोरधिभूतशब्दवाच्यत्वं अतः तद्ग्रहणमयुक्तमित्यत आह ॥ कार्येति ॥ तथा च महाभूतस्याधिभूतत्वे तत्तादात्म्यात्तयोरप्यधिभूतत्वमेवेति युक्तं तद्ग्रहणमिति भावः ॥ ननु तदंतिकादित्युक्तं भूतसामीप्यमसिद्धं भूतकार्यकारणयोर्भूताभिन्नत्वेन भेदगर्भसामीप्ययोगादित्यत आह ॥ तत्तादात्म्यादिति ॥ देवानामधिदैवतमित्यनन्वितमित्याशंक्य पूर्वानुवृत्तिं दर्शयति ॥ देवानामिति ॥ ४ ॥

॥ श्री० ॥ मद्भावो मद्भावमितिपाठपक्षे निर्दुःखनिरतिशयानंदात्मिकामितिपाठासंभवादाह ॥ अत्रात्मकामिति।गतिरिति ॥ आश्रय इत्यर्थः ॥५॥तत्रापीति॥ अंत इत्यस्य स्मरणविशेषणत्वपक्षे ऽपीत्यर्थः ॥ स्मरन् पुरुषइत्यादिकमादौ योज्यम् ॥ यदा कदाचित् स्मरणवान् पुरुष इत्यर्थः ॥ ननु स्मरन् त्यजतीत्युक्तस्मरणकलेवरत्यागयोर्भिन्नकालीनत्वेऽपि स्मरन् त्यजतीत्यनयोः शब्दयोर्विरोध एव लटः शतृशानचाविति वर्तमानार्थकलडादेशत्वेन शतृविधानात् ॥ स्मरन्नित्यस्य च स्मृचिंतायामस्माल्लटि तस्य परस्मैपदिनि शत्रादेशे शपाकृत योर्लोपे गुणे तस्य रपरत्वे स्मरन् अत् इति जाते ऋकारस्योत्केन शतृप्रत्ययस्योगित्वादुगिदचामितिसूत्रेण नुमागमे संयोगांतलोपे च सति निष्पन्नतया शतृत्वे वर्तमानार्थकत्वात् त्यजतीत्युक्तत्यागसमानकालीनत्वप्राप्तेर्भिन्नकालीनत्वप्रयुक्तशब्दविरोधाभावशंका कथं स्यादित्यत उक्तम् ॥लक्षणहेत्वोः क्रियाया इति लक्षणेऽपि शतृविधानादिति ॥

मद्भावमित्यस्य मदात्मकत्वामित्यन्यथाप्रतीतिनिरासायाह ॥ मद्भावमिति ॥ न तु भगवति स्थितिः सर्वदाऽस्ति सा कथं फलमित्यतो विशिनष्टि ॥ निर्दुःखेति ॥ क्वचित्पाठः मद्भावं मद्भावमिति ॥ तत्र भगवत्प्रतिबिंबानां जीवानां तत्सादृश्यं सदाऽस्ति ॥ तत्कथं प्राप्स्यत इत्यत उक्तम् ॥ निर्दुःखेति ॥ अत्रात्मकामिति पाठःअभिव्यक्तामिति शेषः ॥ प्रतीत एवार्थः किं न स्यादिति चेत् न ॥ मुक्तानां

मद्भावं मयि सत्ताम् ॥ निर्दुःखनिरतिशयानंदात्मिकाम् ॥ तत्रोक्तम् ॥ मुक्तानां च गतिर्ब्रह्मन्क्षेत्रज्ञ इति कल्पित इतिमोक्षधर्मे ॥ ५ ॥ स्मरन्पुरुषस्त्यजतीति भिन्नकालीनत्वेप्यविरोध इति मंदमतेः

अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ॥ यःप्रयाति समद्भावं याति नास्त्यत्र संशयः ॥ ५॥

यं यं वाऽपि स्मरन्भावं त्यजत्यंते कलेवरम् ॥ तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥

शंका माभूदित्यंत इति विशेषणम्

भगवदाश्रितत्वेन तद्भावायोगात् ॥ तदपिकुत इत्यत आह ॥ तत्रेति ॥ क्षेत्रज्ञः ॥ परमात्मागतिरिति समर्थितः ॥ ५ ॥ ननु कलेवरत्यागस्यांताव्यभिचारादंत इति व्यर्थमित्यत आह ॥ स्मरन्निति ॥ नांत इत्येतत्कलेवरं त्यजतीत्यस्य विशेषणं येन व्यर्थं स्यात् ॥ किं तु अंते स्मरन्नितिस्मरणस्यैव तत्रापि किं प्रयोजनमिति चेत् उच्यतलक्षणहेत्वोःक्रियाया इति लक्षणेपिशतृविधानात् ॥ क० ॥ ५ ॥ लक्षणहेत्वोरिति ॥

॥ श्री०॥अत्र लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रात् शतृशानचावित्यनुवर्तते ॥ क्रियायाः लक्षणहेत्वोः क्रियाविषययोर्लक्षणहेत्वोरर्थत्वेन विवक्षितयोः सतोर्धातोः शतृशानचौ प्रत्ययौ स्तः ॥ शयानाः भुंजते यवनाः ॥अत्र भोजनक्रियालक्षणत्वेन शयनस्य विवक्षितत्वात्तस्मिन् लक्षणे विवक्षिते सति शीङ्स्वप्ने इति धातोः शानच्प्रत्यये शयाना इति भवति ॥तथा अर्जयन् वसति॥ अत्र वासक्रियायाः द्रव्यार्जनस्य हेतुतयाविवक्षितत्वात्तस्मिन् हेतौ विवक्षिते सति अर्जधातोः शतृप्रत्ययेऽर्जयन्निति भवति ॥ ततश्चैवं लक्षणेऽपि शतृप्रत्ययस्य विहितत्वात् तत्र च कालविशेषानुक्तेर्भिन्नकालीनत्वेऽपि शतुः संभवेन प्रकृते च त्यजतीत्युक्तदेहत्यागरूपक्रियायाः कर्तुः पुंसः स्मरणरूपलक्षणवत्त्वस्य भिन्नकालीनस्मरणयोगेनापि संभवात् न कश्चिच्छब्दविरोध इति भावः ॥ किमनेन प्रयोजनमुक्तं भवतीत्यत आह ॥ तेनेति ॥ अत इति स्मरणविशेषणदानेनेत्यर्थः ॥ एककालतेति ॥ अंते स्मरन्नित्यस्य देहत्यागकाले स्मरन्नित्यर्थकत्वादिति भावः कथमेककालीनत्वप्रतीतिरित्यतस्तामुपपादयति ॥ लट इति ॥ लटः शतृशानचावप्रथमासमानाधिकरणे ॥ वर्तमानार्थकस्य लटः परस्मैपदिन्यात्मनेपदिनि च क्रमाच्छतृशानचावादेशौ स्तः प्रथमाविभक्त्यंतसामानाधिकरण्याभावे इति सूत्रार्थः ॥ पचंत चैत्र पश्य पचमानं चैत्र पश्येत्याद्युदाहरणं अत्र द्वितीयाविभक्तिसामानाधिकरण्यसद्भावेनाप्रथमासमानाधिकरणत्वात् ॥ लडादेशत्वेनापीति ॥ वर्तमानार्थकलडादेशत्वेनापीत्यर्थः ॥

स्मरन्पुरुषः कलेवरं त्यजतीति स्मरणकलेवरत्यागयोर्भिन्नकालत्वेऽपि न कश्चिच्छब्दविरोध इतिमंदमतेः शंकास्यात् सा माभूदित्येतमर्थमंत इतिस्मरणस्य विशेषणमुपात्तम् ॥ तेनात्र स्मरणकलेवरत्यागयोरेककालत्वसिद्धिरिति ॥मंदमतेरित्यस्यकृत्यमाह ॥ सुमतेरिति॥ कुत इत्यत

सुमतेर्नैवशंकावकाशः ॥ स्मरंस्त्यजतीत्येककालीनत्वप्रतीतिः

आह ॥ स्मरन्निति ॥लटः शतृशानचाविति लडादेशत्वेनापि शतुर्विधानमस्ति

५ कृ० ॥ यद्यपि क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्त इति सूत्रार्थः शाब्दिकैरुक्तः ॥ तथापि क्रियायामितिपाठं लक्षणे हेतौ चार्थे ॥ धातोः शतृशानचौ स्तः क्रियापदे सतीत्यर्थं चाभिप्रेत्यैवमुक्तम् ॥ उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति न्यायात् ॥एवं च लक्षणेऽपि शतुर्विधानात्क्रियायामित्युपपदसापेक्षत्वादित्यादिकमुपपन्नमिति बोध्यम् ॥ लक्षणेऽपीति ॥ लडादेशत्वं विना स्वातंत्र्येणैव द्विषोऽमित्र इतिवच्छतुर्विधानादित्यर्थः ॥

॥ श्री० ॥ नन्विदं विरुद्धम् ॥ लटः शतृशानचावितिं सूत्रेण स्मरन्नित्यत्र लडादेशभूतशतृप्राप्त्यनुपपत्तेः ॥ तत्राप्रथमासमानाधिकरण इत्युक्तत्वादत्र पुनः स्मरन् पुरुषस्त्यजतीति प्रथमासामानाधिकरण्यस्यैव सद्भावादिति चेत्तत्राह ॥ सचेति ॥ वर्तमानार्थकलडादेशत्वेन विहितः शतृप्रत्यय इत्यर्थः ॥ वर्तमान इति ॥ अनुवर्तमान इत्यर्थः ॥ अयं भावः ॥ लटः शत्रिति सूत्रेलट इति न वक्तव्यं वर्तमानेलडिति पूर्वसूत्राद्विभक्तिविपरिणामेन लट इत्यनुवृत्तिसंभवेन पुनर्लड्ग्रहणस्य व्यर्थत्वात् तथाचव्यर्थं सत् किंचिदिष्टं ज्ञापयतीति न्यायसामर्थ्यात् क्वचित् प्रथमासमानाधिकरणेऽपि लडादेशः शतृप्रत्ययः शानच्प्रत्ययश्च भवतीति ज्ञायते ॥ सन् ब्राह्मणोऽधीयमानो ब्राह्मण इत्यादिप्रयोगदर्शनात् ॥ यथोक्तं काशिकायां लडिति वर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थं तेन क्वचित्प्रथमासमानाधिकरणेऽपि शतृशानचौ भवतः सन्ब्राह्मणोऽधीयमानो ब्राह्मण इति दर्शनादिति॥ तथा च स्मरन्पुरुषस्त्यजतीति प्रथमासामानाधिकरण्येऽपि वर्तमानार्थलडादेशभूतशतृप्रत्ययसंभवादेत इत्यनुक्तावपि स्मरंस्त्यजतीत्यस्य तदानीं स्मरणवान् देहं त्यजतीत्यर्थसंभवेन स्मरणत्यागयोरेककालीनत्वप्रतीतेर्न सुमेलःशंकोत्पत्तिरिति ॥ ननु लक्षणेविहितलडादेशमादायोक्तरीत्या स्मरणत्यागयोर्भिन्नकालीनत्वेऽपि न कश्चिच्छब्दविरोध इति मंदमतेः शंकानिरासायेत्युक्तं लडादेशत्वेनोक्तशतृप्रत्ययमादायैककालीनत्वं स्मरणत्यागयोरंगीकृत्य भिन्नकालीनत्वशंकाया एवाभावेनेत इत्येतदोषितं वेतिमुमतेरपि संदेह एव स्यान्नतुनिश्चय इत्यत आह ॥ लक्षणे विहिताच्चेति ॥

स च लडिति वर्तमाने पुनर्लड्ग्रहणसामर्थ्यात्क्वचित् प्रथमासामानाधिकरण्येपि भवतिलक्षणे विहिताच्च लडादेशो बलीयान्॥ तत्र क्रियाया इत्युपपदसापेक्षत्वात् ॥ अस्यानपेक्षत्वात् ॥

लक्षणेर्थे विहितात्शतृप्रत्ययादित्यर्थः लक्षणे विहितः शतृप्रत्ययः शानच्प्रत्ययश्च स्वतंत्र एव न तु लडादेशभूतः अत एव पूर्वं लक्षणेऽपि शतृविधानादित्युक्त्वा लडादेशत्वेनापीत्युक्तम्॥ लडादेशः लटः इतिसूत्रोक्तः शतृप्रत्ययः ॥कथं बलवत्त्वमित्यतो लक्षणे विहितस्यशतुर्दौर्बल्यमुपपादयति ॥ तत्रेति ॥ लक्षणहेत्वोरिति सूत्रलक्षणे विहितस्य शतृप्रत्ययस्येति शेषः ॥ यत्सापेक्षं तत् दुर्बलमिति भावः ॥ ननु क्रियाया इति षष्ठ्यंतस्य कथमुपपदत्वम् ॥ तत्रोपपदं सप्तमीस्थमिति सप्तम्यंतस्यैवोपपदत्वोक्तेः कर्मण्यण् सुपि स्थ इत्यादौ तादृशस्यैवोपपदत्वदर्शनाच्चेति चेदुच्यते ॥ तत्रोपपदमित्युक्तपारिभाषिकोपपदत्वस्यात्रासंभवेऽपि उप समीपे विद्यमानं पदमुपपदमिति योगेनोपपदत्वसंभवात् ॥शयाना भुंजतेऽभेषस्वसतीत्यादौ भोजनादिक्रियायाः समीपे सत्त्वात् ॥ यद्वाऽस्तु सप्तम्यंतस्यैवोपपदत्वानियमः॥प्रकृते च तौ चेत लक्षणहेत् क्रियाविषयौ भवत इति व्याख्यानत्वेनविषयत्वस्य सप्तम्यर्थत्वादुपपदत्वं षष्ठ्यंतस्यापि विभक्तिविपरिणामेनास्तीति सूत्रेऽभिप्रेतत्वेन न दोष इति द्रष्टव्यम्॥ अस्येति॥लटः शत्रितिसूत्रोक्तलडादेशभूतशतृप्रत्ययस्येत्यर्थः॥ अनपेक्षत्वादिति॥उपपदसापेक्षत्वाभावादित्यर्थः।

॥ कृ० ॥ ननु स्मरन्पुरुष इति प्रथमासामानाधिकरण्यात्कथं प्रकृते लटःशत्रादेशः लटः शतृशानचावप्रथमासमानाधिकरण इति प्रथमासामानाधिकरण्ये तन्निषेधादित्यत आह ॥ सचेति ॥ लडितिवर्तमान इति ॥ वर्तमाने लडिति पूर्वसूत्रादिति शेषः ॥ क्वचिदिति ॥ सन्ब्राह्मण इत्यत्रेत्यर्थः ॥

॥ श्री० ॥ नन्वेतदयुक्तं अप्रथमासमानाधिकरणस्य ॥ प्रथमासमानाधिकरणाभिन्ने उपपद इत्यर्थकत्वेन लडादेशशतुरप्युपपदसापेक्षतया दौर्बल्यमेवेत्याशंक्याह॥अप्रथमेति ॥ स्यादप्येषा शंका यद्यत्राप्रथमासमानाधिकरणइत्यस्य पर्युदासत्वमभ्युपगच्छामः नचैवं किं नाम प्रथमासमानाधिकरणेऽपि भवनरूपातिप्रसक्तिपरिहाराय प्रथमासमानाधिकरणे लडादेशः शतृप्रत्ययः शानच्प्रत्ययश्च न भवतीति प्रसज्यप्रतिषेधार्थकत्वात् ॥ नह्येवं व्याख्यानेऽस्योपपदत्वसंभावनाऽप्यस्तीति परिहारस्त्युक्त्या प्रसज्यप्रतिषेधोऽयमिति सूचितम्॥मात्रेत्यनेन नोपपदत्वाभावः सूचित इति ध्येयम् ॥ अत्र प्रथमासमानाधिकरणे न भवतीत्येनदप्युत्सर्गरूपमेव ॥ सन ब्राह्मण इत्यादिप्रयोगदर्शनरूपापवादबलेन पुनर्लडुक्त्या प्रथमासमानाधिकरणेऽपि लडादेशे शतृप्रत्ययभवनांगीकारात ॥ अतिप्रसक्तिमात्रपरिहारार्थत्वादिति वचनं तु प्रथमासमानाधिकरणेऽपि भवनरूपातिप्रसक्तिः सर्वथा कुत्रापि नास्तीत्याशयेन नोक्तं किं तु बाहुलिकाभिप्रायेणै वेत्यांद्यालोचनीयं सूरिभिरित्युपरम्यते ॥ बलवतो ॥ लडादेशशतृप्रत्ययस्य ननु यदि शाब्दन्यायं जानाति तर्हि स कथं दुर्मतिरित्यत आह ॥ केवलमिति प्रवीणः ॥ कुशलः ॥ एत न्निमित्तादेव स दुर्मतिरित्युच्यत इति भावः ॥ भिन्नकालत्वेति ॥ स्मरणकलेवरत्यागयोरिति शेषः॥अत इति ॥ भगवदनुभवजन्यतत्संस्काराख्या स्मृतिकारणस्य विलुप्तत्वादित्यर्थः ॥

अप्रथमासमानाधिकरण इत्यस्यातिप्रसक्तिपरिहारमात्रार्थत्वात् ॥ तथा च बलवतो ग्राह्यत्वे स्मरंस्त्यजतीत्यस्य स्मरति च त्यजति चेत्यर्थः स्यात् ॥ एवं चांत इत्यनुक्तेऽपिस्मरणत्यागयोरेककालीनत्वप्रतीतेः सुमतेर्नैव शंकाऽवकाश इति भावः॥ननु दुर्मतिरपि शाब्दं न्यायं जाना त्येव अन्यथा शास्त्रे नाधिक्रियेत ॥ केवलमध्यात्मविषये न प्रवीणः ॥ तत्कथं तस्याप्येषा शंका स्यात् ॥ ततश्च तं प्रत्यपि अंत इत्येतत्

दुर्मतेर्दुःखान्न स्मरंस्त्यजतीति शंका ॥

व्यर्थमित्यत आह॥दुर्मतेरिति॥दुर्मतेर्भविष्यति शंका भिन्नकालत्वविषया ॥कुतः मरणकाले महद्दुःखं जायते ॥दुःखस्य च संस्कारविलोपहेतु त्वं प्रसिद्धम् ॥ अतो दुःखात्कारणात् मूर्छितो न स्मरंस्त्यजति ॥ कलेवरत्यागसमये स्मरणमसंभवीति यावत् ॥

॥ क० ॥ ननु लडादेशोऽपि सापेक्ष एव ॥ अप्रथमासमानाधिकरण इत्युक्तत्वादित्यत आह ॥ अप्रथमेति अतिप्रसक्तीति ॥ प्रथमासामानाधिकरण्यं यत्र तत्र शतृशानचौ न स्त इत्येवमर्थत्वादित्यर्थः ॥ ननु शाब्दन्यायज्ञश्चेत्कथं दुर्मतिरित्यत आह ॥ केवलमध्यात्मेति मूर्छित इति॥ लुप्तसंस्कार इत्यर्थः ॥ननु नञो विशेष्यान्वये बाधः कलेवरत्यागस्य प्रमाणसि द्धत्वात् ॥ विशेषणान्वये च विशेष्यवैयर्थ्यमित्यतो व्याचष्टे ॥ कलेवरत्यागसमय इति ॥

॥ श्री० ॥ **लडादेशम** ॥ शतृप्रत्ययम् ॥ **लक्षणार्थम्** ॥ शतृप्रत्ययम् ॥ जघन्यमपीति शेषः ॥ **नन्वेवेति**॥मरणकाले दुःखस्य तत्प्रयुक्तसंस्कारविलोपस्य च सत्त्वेन तत्त्वप्रतीतिस्वात्र संशयरूपेत्यर्थः ॥ **आत्मत्यागम्** ॥स्वस्वरूपत्यागम् ॥**पूर्वमेवेति**॥न तु देहवियोगरूपमरणक्षणे तथात्वे उत्तरत्र प्राप्यस्मरणाभावप्रसंग इतिभावः ॥ **मनागपि** ॥कदाऽपि ॥ ईषदपीति वा॥ **विशिष्टमेवेति**॥अज्ञमरणविलक्षणमेवेत्यर्थः॥ननु मरणकाले महद्दुःखं जायत इत्यादिना मरणसमयेऽज्ञानिनो मूर्छोक्तेः कथं त्यजन्देहं न कश्चिदित्युक्तमित्यत आह॥**अविद्वानपित त्काल इति**॥देहत्यागलक्षणे मोहं नाप्नोतीत्यर्थः ॥अविदुषोऽपि तत्काले उत्तरजन्मनि प्राप्यशरीरस्मृतेरावश्यकतया यदि तत्कालेऽपि मोहस्तदा तत्क्षणे प्राप्यस्मरणाभावेन तत्प्राप्तिरेव न स्यादित्याशयः॥**मरणवैशिष्ट्यमात्रेति**॥ज्ञानिमरणस्याज्ञानिमरणापेक्षया वैलक्षण्यप्रतिपादनपरमेवेदं न तु ज्ञानिनस्तत्कालेस्मरणप्रतिपादकमित्यर्थः॥**तदुपायत्वेन**॥अंतकालस्मरणोपायत्वेन

एतामनुपपत्तिं पश्यन् बलवंतमपि लडादेशं विहायलक्षणार्थ मेव हि मन्यत इति भावः॥ननु सुमतेरप्येवं शंका स्यादेव॥कथं चेयं शंका तत्त्वप्रतीतिरेवेति चेत् ॥ न ॥ अज्ञानिन एव देहाभिमानिनो देहत्यागमात्मत्यागमिव मन्यमानस्य मरणकाले दुःखं भवति॥ तदपि मरणल क्षणात्पूर्वमेव ॥ ज्ञानी तु सर्वदा देहं हेयमेवमन्यमानो न मनागपि दुःखायते किं तु विशिष्टमेव तस्योत्क्रमणमित्यध्यात्मशास्त्रमनुसंदधानस्य सुमतेः शंकाऽनवकाशात्॥ किं तदध्यात्मशास्त्रमित्यत आह॥त्यजन्निति॥कश्चिद्विद्वान्॥अविद्वानपि तत्काले तस्येति मरणवैशिष्ट्यमात्रपरम्॥

त्यजन्देहं नकश्चित्तुमोहमाप्नोत्यसंशयमिति स्कांदे ॥ तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामतीति हि श्रुतिः ॥ सदातद्भावभावित इत्यंतकालस्मरणोपायमाह ॥ भावांतर्गतं मनः

नत्वंत इत्येतत् स्मरणविशेषणंचेत् तदा सदातद्भावभावित इत्यनेनैवगतार्थं स्यात् ॥ अन्यथा तद्व्यर्थं भवेदित्यत आह ॥ सदेति ॥ अंतका लस्मरणमेव तत्प्राप्तिसाधनम् ॥ न च तदकस्माद्भवति अतः तदुपायत्वेन सदातद्भावभावित्वमुच्यत इत्यर्थः॥कथमित्यतो यथाऽयं तदुपायः स्यात् तथा व्याचष्टे ॥ भाव इति ॥

॥ कृ० ॥ **तत्त्वप्रतीतिरिति** ॥ मरणकाले दुःखस्य तज्जन्यसंस्कारलोपस्य च सत्त्वादिति भावः ॥ **मनागपीति** ॥ ईषदपीत्यर्थः ॥ **दुःखायत इति** ॥ दुःखमनुभवतीत्यर्थः ॥सुखादिभ्यः कर्तृवेदनायामिति क्यङ्विधानादिति भावः ॥ अज्ञानिनो मरणकाले दुःखं भवतीति साधितत्वात्क श्चिदपि मोहं नाप्नोतीत्ययुक्तमित्यत आह ॥ **तत्काल इति** ॥ मरणक्षण इत्यर्थः अन्यथा प्राप्यस्मरणाभावेन तत्प्राप्त्ययोगादिति भावः ॥ ६ ॥ ७ ॥

॥ श्री० ॥ ननु सदा तद्भावभावितत्वस्य मनोधर्मत्वात्कथं स्मरणकर्त्रात्मविशेषणत्वमित्यत आह ॥ मनोधर्मेणेति ॥ ६ ॥ ७ ॥ द्वंद्वादीत्यत्रादिपदेन षष्ठीविग्रहादिग्रहणम् ॥ आहेति ॥ कर्मधारय इत्याहेत्यर्थः ॥ अभ्यासातिरिक्तस्य ध्यानापरपर्यायसमाधिभिन्नस्य ॥ योगस्य ॥ कर्मयोगस्य ॥ प्रकृतेति ॥ कर्मकरणादंतकालस्मरणं प्रति साक्षाद्धेतुत्वादित्यर्थः ॥ विदिपूरोश्चेति ॥ कुषन्निति ॥ तथा च पृ इत्यस्मात् कुषन्प्रत्यये सत्यपि कित्वाद्गुणाभावे ऋवर्णस्य उदोष्ठ्यपूर्वस्येति उत्वे उरण्रपर इति तस्य रपरत्वे पुरुष इति रूपं द्रष्टव्यम् ॥ अंतर्यामीत्यादि ॥ तथा च एतेन किं च नानावृतं अंतर्व्याप्तं न भवति । किं तु सर्वमप्यंतरनेन व्याप्तमेव सर्वांतर्यामीति यावत् ॥ तथैतेन किं च नासंवृतं बहिरनाच्छादितं न भवति ॥ किं तु सर्वमपि बहिरनेनाच्छादितमेव सर्वाच्छादकत्वाद्व्याप्त इत्यर्थः ॥ दिवि भव इति ॥ तथा च दिव्यत्वेन विशेषणादीश्वर एव न हिरण्यगर्भ इत्युक्तमर्थादिति भावः ॥

तथाऽभिधानादिति स्याद्भावोंऽतर्गतं मन इत्येवंरूपादभिधानादित्यर्थः ॥ वासितत्वं संस्कृतत्वम् ॥ तस्मिन् भावस्तद्भावस्तेन भावित इति मनोधर्मेणात्मोपचर्यते ॥ ६ ॥ ७ ॥ कुतोऽयमर्थ इत्यत उत्तरत्रैवमेव व्याख्यानादिति भावेनाह ॥ सदेति ॥ द्वंद्वादिशंकाव्युदासार्थमाह ॥ अभ्यास एवेति ॥ अभ्यासातिरिक्तस्य योगस्य प्रकृतोपयोगिनोऽभावादिति भावः ॥ पुरुषश्चाधिदैवतमिति प्रकृतो हिरण्यगर्भोऽत्रोच्यत इति प्रतीति

तथाभिधानात् ॥ भावितत्वम् ॥ अतिवासितत्वम् ॥ भावना त्वतिवासनेत्यभिधानात् ॥ ६ ॥ ७ ॥

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥

निरासार्थमाह ॥ दिव्यमिति ॥ दिव्यत्वेन विशेषणात् ईश्वर एवायमित्यर्थः ॥ पॄपालनपूरणयोरित्यतो विदिपूरोश्चेति कुषन्प्रत्ययविधानात् पूर्णं चेति सिध्यति ॥ सर्वासु पूर्षु वर्तमान इति स्वरूपानुवादेन पुरुष इति विधेयम् ॥ तस्य व्याख्यानं पुरिशय इत्यादि ॥ आवरणमंतर्व्याप्तिः ॥ संवरणं बहिराच्छादनम् ॥ ननु दिवि भवो दिव्यः ॥

॥ कृ० ॥ द्वंद्वादीति ॥ आदिपदेनाभ्याससहितो योग इति समासो ग्राह्यः ॥ द्वंद्वादिपक्षे दोषमाह ॥ अभ्यासेति ॥ प्रकृतोपयोगिन इति ॥ कर्मयोगादेः साक्षादंतकालस्मृत्यहेतुत्वादिति भावः ॥ पुरुषशब्दे व्याख्येये यद्दिव्यमनूद्यते तत्फलमाह ॥ दिव्यत्वेनेति ॥ कुषन्प्रत्ययेति ॥ कित्वाद्गुणाभावे उदोष्ठ्यपूर्वस्येत्युत्वे रपरत्वे च पुरुषशब्दसिद्धिरिति भावः ॥ ८ ॥

१ अंतकालस्मरणफलोक्तेः प्रकृतोपयोगमाह ॥ तस्मादिति ॥

॥ श्री० ॥ यगिति ॥ दिव अस्माद्यक् प्रत्यये दिव्यमितिरूपं कित्वाद्गुणाभावः ॥ अन्यथा दैव्यमिति स्यात् ॥ कुत एवं व्याख्येयं परोक्त एवार्थःकस्मान्नस्यादित्यत आह ॥ परमभि
तिं ॥ सूर्यमंडलस्थे हिरण्यगर्भेपरमत्वासंभवादित्थं व्याख्येयमिति भावः ॥ ८ ॥ अयमिति॥दिव्यइत्यर्थः ॥ इत्यादिनेति ॥

स च सूर्यमंडलस्थत्वाद्धिरण्यगर्भोऽपि भवतीति कश्चित् ॥ अत आह ॥ दिव्यमिति ॥ औणादिको यक्प्रत्ययः ॥परममितिविशेषणादिति भावः ॥ ८ ॥ उत्तरश्लोकगतविशेषणबलाच्च परमात्मैवायामिति भावेन तत्तात्पर्यमाह ॥ ध्येयमिति ॥ आह विशिनष्टीत्यर्थः ॥ ननु कवि

सदातद्भावभावितत्वं स्पष्टयति ॥ अभ्यासेति ॥ अभ्यासएव योगोभ्यासयोगः दिव्यं पुरुषं पुरिशयं पूर्णं च ॥ स वा अयं पुरुषः सर्वासुपूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृतमिति श्रुतेः

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥
कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णंतमसः परस्तात् ॥ ९॥

॥ दिव्यं सृष्ट्यादिक्रीडायुक्तम् ॥ दिवुक्रीडेति धातोः ॥ ८ ॥ ध्येयमाह ॥ कविमिति ॥ कविं सर्वज्ञम् ॥ यः सर्वज्ञ इतिश्रुतेः ॥ त्वं कविः सर्ववेदनादितिच ब्राह्मे ॥

त्वमन्येपामप्यस्ति ॥ तत्कथं भगवतो विशेषणमित्यत आह ॥ कविमिति ॥ परमेश्वरस्य सार्वज्ञे प्रमिते भवेदिदंव्याख्यानम्॥ तदेव कुत इत्यत आह य इति॥सर्वज्ञः कविशब्दार्थ इत्येतत्कुत इत्यत आह॥त्वमिति॥अन्येषांतु सर्वे विमोहितधिय इत्यादिना सार्वज्ञाभावः प्रमितः॥
॥ कृ० ॥ परमपुरुषं चिंतयन्निति ध्येयस्योक्तत्वादाह ॥ विशिनष्टीत्यर्थ इति ॥ कवित्वमन्येपामप्यस्तीत्युक्तदोषं परिहरति ॥ अन्येषां त्विति ॥

॥ श्री० ॥ सर्वे विमोहितधियस्तवमायये मे ब्रह्मादयस्तनभृतो बहिरर्थभावा इत्येकादशस्कंधे भगवंतं प्रत्युद्धववचनम् ॥धाधातोस्तृच्प्रत्यये चकारलोपे धात्रिति प्रातिपदिके सिद्धे पश्चात्स्वा द्युत्पत्तौ धारणकर्ता धातेति सिध्यति तत्र तृचःकर्माद्यर्थत्वे कथमयमर्थः सिध्ये दित्यत आह ॥ तृच इति ॥ विपूर्वो दधातिः करोत्यर्थ इति भावेन व्याचष्टे ॥विधाता कर्तेति शेषो क्तिरिति ॥ गीतायामिति शेषः ॥ ९ ॥ ॥ कु० ॥ ननु

ननु धाता विरिंचोऽपि प्रसिद्धः तत्कथमेतद्भगवतो विशेषणमित्यत आह ॥ धातारमिति ॥ कुतोऽयमर्थ इत्यत आह ॥ डुधाञिति ॥ तृचः

धातारं धारणपोषणकर्तारम् डुधाञ्धारणपोषणयोरिति धातोः धाताविधाता परमोतसंदृगिति च श्रुतिः ॥ ब्रह्मा स्थाणुरित्यारभ्य तस्य प्रसादादिच्छंति तदादिष्टफलां गतिमिति चमोक्षधर्मे ॥ तमसो ऽव्यक्तात्परतास्थितम् ॥ तमसः परस्तादित्यव्यक्तं वै तमःपरस्ताद्धिसततइति पिप्पलादशाखायां ॥ मृत्युर्वा व तमो मृत्युर्वै तमो ज्योतिरमृतमिति श्रुतेः॥ ९ ॥

कर्तृवाचित्वं प्रसिद्धमेव ॥ परमेश्वरस्य धातृत्वसद्भावे किं प्रमाणमित्यत आह ॥ धातेति ॥ विधाता कर्ता ॥ परमा संदृक् परमज्ञानरूपः ॥ सर्वस्य धातारमित्येतत् ॥ भगवत एव नान्येषामित्यत्र प्रमाणमाह ॥ ब्रह्मेति ॥ तेन भगवता दिष्टं दत्तं फलं सुखं यस्यां सातथोक्ता ॥ मो क्षधर्मे कथितमिति शेषः ॥तमसः परस्तादित्येतत्॥आदित्यादिसाधारणं इत्यतो द्वेधा सप्रमाणकं व्याचष्टे॥ तमस इति॥स्थितमितिशेषोक्तिः॥ अप्राकृतविग्रहमित्यर्थः॥ ९ ॥

मूलप्रकृतिरूपाव्यक्तपरत्वं बाधितम् ॥ ईश्वरवन्मूलप्रकृतेरपि व्याप्तत्वात ॥ गुणत्रयरूपाव्यक्तपरत्वं तु अव्याकृताकाशादिसाधारणमित्यत आह ॥अप्राकृतविग्रहमित्यर्थ इति॥ ९ ॥

१ अ. ७ श्लोकः ॥ १७ ननुविज. टीकायां ब्रह्मादिः कारणंपरारुद्रादीनांतइत्युक्तत्वाननतस्यमाविज्ञाभावइतिचेत्सत्यम् ॥ तत्रत्यतात्पर्यं तथापितनुधारणात् ॥ अमूढोमूढ इति वदु च्यतेचसरस्वतीत्युक्तेरत्रतव्द्यावृत्ति रपिसंभाविताइत्येव ॥ अतएवाग्रे टीकायां नन्विति ब्रह्मविषयिण्येवशंकोत्थितिरिति ज्ञेयम् ॥

॥ श्री० ॥ **सर्वोच्चिक्रमिषुसाधारणमिति**॥ उत्क्रांतिमिच्छंति उच्चिक्रमिषंति उच्चिक्रमिषंतीति उच्चिक्रमिषवः सर्वे च ते उच्चिक्रमिषवश्च सर्वोच्चिक्रमिषवः तेषां साधारणमिति विग्रहः आहेति॥उत्तरश्लोकोक्तं किंचित्साधारणं किंचिदसाधारणमित्याहेत्यर्थः॥**विशेषणमिति**॥वायुजयादियुक्तानामिति विशेषणमित्यर्थः॥भक्त्यादीनामित्यत्रादिपदेनज्ञानवैराग्यादीनां ग्रहणम्॥ एकस्यैव वाक्यस्य भिन्नविषयत्वं कुत्र दृष्टमित्यत आह ॥ **यथेति** ॥ प्रातरुत्थायाथ संध्यामुपासीतेत्यत्संध्यामुपासीत ब्रह्मैनदुपासीत देवान्नमेज्जुहुयाद्वेदानावर्तयीत नान्यत्किंचिदाचरेन्न भृशं वदेत नविस्मरेतात्मानमिति श्रुतौ देवान्नमेन्नभृशंवदेन्नविस्मरेतात्मानमित्येतत्सर्ववर्णाश्रमसाधारणमथ संध्यामुपासीत वेदानावर्तयीतेति त्रैवर्णिकानामेवासाधारणं तथा जुहुयादित्येतद्गृहस्थानामेवासाधारणमित्येकस्यवाक्यस्यानेकविषयत्वं दृष्टंतथा प्रकृतेऽपीत्यर्थः ॥ कुतोऽस्येति ॥ योगबलेनैव भ्रुवोर्मध्ये प्राणमावेश्येत्यस्येत्यर्थः ॥ विशेषोभक्त्यादिप्रधानसाधकेभ्यः अन्येषाम् ॥ वायुजयादिप्रधानसाधकानाम् ॥ ईषत्पूर्वमपीति वक्ष्यमाणत्वादाह ॥ किंचिदिति ॥

उत्तरश्लोकोक्तं सर्वं सर्वोच्चिक्रमिषुसाधारणमिति प्रतीतिनिरासार्थमाह ॥ वायुजयादीति ॥ साधका द्विविधाः ॥ भक्त्यादिप्रधाना वायुजयादिप्रधानाश्चेत्यतो विशेषणंविशेषत इत्यनेनभक्त्यादीनां साधारण्यमाह ॥ननु चानुस्मरेद्यः स तं परं पुरुषमुपैतीत्यन्वयादेकस्य वाक्यस्य कथं

वायुजयादियोगयुक्तानांमृतिकाले कर्तव्यमाह विशेषतः॥प्रयाणकाल इति ॥

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

भिन्नविषयत्वम् ॥उच्यते॥ एकस्मिन्नपि वाक्ये योगबलेनैव भ्रुवोर्मध्ये प्राणमावेश्येत्येतन्न सर्वविषयमित्येतावन्मात्रमेव प्रतिपाद्यते ॥ यथा प्रातरुत्थायेति श्रुतौ न भृशं वदेदित्यादिकं किंचित्साधारणं किंचिदसाधारणम्

॥ क्र० ॥ वायुजयादियुक्तानामिति विशेषणम् किमर्थमित्यत आह ॥ साधकाइति ॥ न सर्वविषयमिति ॥ द्विविधसाधकविषयं नेत्यर्थः ॥ वायुजयादिप्रधानसाधनमात्रविषयत्वादिति भावः ॥ **किंचित्साधारणमिति** ॥ सर्ववर्णाश्रमसाधारणमित्यर्थः ॥ **किंचिदसाधारणमिति** ॥ अथसंध्यामुपासीत वेदानावर्तयीतेत्यादिकं त्रैवर्णिकानामेवाग्निहोत्रमित्यादिकं गृहस्थानामेवासाधारणमित्यर्थः ॥

॥ श्री० ॥ भाष्ये ज्ञानादिति ॥ श्रवणादीत्यर्थः ॥ एतकारव्यावर्त्यं दर्शयति ॥ न विति ॥ पानेनेति तृतीयस्कंधे भगवंतं प्रति ब्रह्मांडाद्बहिस्तत्त्वानांतत्त्वाभिमानिदेवतानां वचनंहे देव ते कथासुधायाः पानेन श्रवणेन प्रवृद्धभक्त्या ये विशदाशयास्ते वैराग्यस्य सारं परंपरयाफलभूतं यथाबोधम अपरोक्षज्ञानं प्रतिलभ्याकुंठं धिष्ण्यं वैकुंठादिमंदिरमस्त्यकुंठधिष्ण्यं त्वा त्वामंजसा अंगः प्रविष्टाः वायुजयादिरूपां मुक्तिं प्राप्ता इति यावत ॥ तथाऽपरेऽपि धीराः आत्मसमाधियोगबलेन स्वस्वसमाधिबहुतरवायुजयादियोगबलेन बलिष्ठां प्रकृतिं जित्वा लिंगभंगं संपाद्येति यावत् ॥ त्वां विशन्त्येव न तु न इत्यत्र तदेवाह ॥ तेषां श्रमः स्यात् सेवया श्रवणादिरूपया तु श्रमो न स्यादिति श्लोकद्वयार्थः ॥

॥ कुतोऽस्यासाधारण्यं कल्प्यत इत्यत आह ॥ वायुजयादीति ॥ अतो न तत्सर्वसाधारणमिति शेषः ॥ तर्हि को विशेषोऽन्येषाम् ॥ येन वायुजयादिक्लेशमधिकमनुभवंतीत्यत आह ॥ तद्वता त्विति ॥ निपुणानां वायुजयादौ कथंचिदल्पेत्यर्थः ॥ किंचिच्छीघ्रं चेत्यपि ग्राह्यम् ॥

वायुजयादिरहितानामपिज्ञानभक्तिवैराग्यादिसंपूर्णानां भवत्येव मुक्तिः ॥तद्वतां त्वीषज्ज्ञानाद्यसंपूर्णानामपि निपुणानां तद्बलात्कथंचिद्भवतीति विशेषः ॥ उक्तं च भागवते ॥ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथाऽञ्जसा त्वापुरकुंठधिष्ण्यम् ॥ तथापरे त्वात्मसमाधियोगबलेनाजित्वा प्रकृतिंबलिष्ठाम् ॥त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवयातइति॥

अत्र प्रमाणान्याह ॥ उक्तमिति ॥ यथा यथार्थं बोधं धिष्ण्यं मंदिरं इद्रियंत्वां विशंत्येव न तन इवांजसा ॥ कु० ॥ वश्यत्वान्मनस स्त्वीषत्पूर्वमप्याप्येत ध्रुवमिति प्रमाणे दर्शितं पर्यमिति चोक्त वाद्याह ॥ अल्पं यथे इति ॥ किंचि शीघ्रमिति च ॥ उपमार्थत्वे द्वयोरपि साधकयोः फलसाम्यं प्रतीयते तथा चांजसेति तेषां श्रमः स्यादिति च विरुध्येतेत्यत आह ॥ यथा यथार्थमिति ॥ अन्ययानामनेकार्थ इति भावः ॥ स्वरादित्वाच्चनाव्ययत्वेप्यसत्त्ववाचित्वमिति बोध्यम ॥ ननु विशंतिः परमेपदित्वात्कथमात्मनेपदमिति शंकां परिहर्तुं शब्दस्य संबंधमुक्त्वा तत्फलं चाह ॥ विशंत्येवत्यादिना ॥ १८ ॥

---

१ इदमुपलक्षणं मननादेः ॥ अनन्यात्रे श्रवणादिरूपयं युक्ति ॥ २ निमित्तत करणा. ॥ ३ विजयध्वजटीकायां तथाशब्दाद्यर्थत्युपमार्थांप्रतीयते ॥ अत्र बोधशब्देन अपरोक्षज्ञानलाभाययथार्थिकोयथाशब्दस्तथेति समुच्चय इति टीकाशय इतिनायायथाबोधमित्येकंपदं दर्शितम ॥ ४ नि. टीकायामीषुरितिपाठः ॥ ५ वायुजयप्रधाना अपरोक्षज्ञानिनः ॥ ६ अन्यसाधनाजयाम् ॥ ७ ॥ स्कं. ३ अ. ६ श्लो. ॥ ४४ ॥ ४५ ॥

॥ श्री० ॥ एतदभ्यधिकमित्यस्यैवविवरणार्थं तत्तेज इति वाक्यं प्रवृत्तं तत्र तेजःशब्दार्थमाह ॥ तेजइति ॥ प्रमाणे दर्शयति पूर्वं भक्त्यादिप्राधानयोगिभ्यः किंचित्पूर्वमित्यर्थः ॥ तेरितिं॥
प्राणजयादियुतयोगिभिरित्यर्थः ॥ १० ॥ क्रममुक्त्यर्थमिति ॥ जीवन्मुक्तिरूपाद्गुणमुक्तिद्वारा निर्गुणमुक्तिप्राप्त्यर्थमित्यर्थः ॥ अन्यथाव्याख्यानं बाधकमाह॥ मामनुस्मरन्नित्यादीनि॥
तन्मते ओंकारस्य शुद्धब्रह्मत्वेन कृष्णाकारत्वं [illegible] बाधात ॥ [illegible] ब्रह्म व्याहरन्मामनुस्मरन्नित्यनेन विरोधः स्यादित्यर्थः ॥ आदिपदेन मद्भावं यातीत्यस्य ग्रहणम ॥
विशिष्टप्राप्तिरोंकारोपासनाफलं [illegible] न विष्णोरिति॥ [illegible] भावः॥अकार इति॥तथा च पदं अस्माद्धातोः कर्मण्यकारप्रत्यये पदमिति रूपम॥

तद्भाविनास्तेन भगवता वासिनाः पुनर्मुक्तिलक्षणं फलं तेजोनारायणाख्यं हरेः समीरः ॥ ध्रुवं ब्रह्माप्यते तैः ॥ १० ॥क्रममुक्त्यर्थमोंकारो
पासनमुच्यत इत्यन्यथाव्याख्यानमपाकर्तुमाह ॥ तदेवेति ॥ वायुजययुतानां मरणकाले कर्तव्यमेव ॥ मामनुस्मरन्नित्यादिविरोधादिति भावः

ये तु तद्भाविता लोका एकांतित्वं समाश्रिताः ॥ एतदभ्यधिकं तेषां तत्तेजः प्रविशत्युतेति च मोक्षधर्मे ॥
संपूर्णानां भवेन्मोक्षो विरक्तिज्ञानभक्तिभिः ॥ नियमेन तथापीरजयादियुतयोगिनाम् ॥ वश्यत्वान्मनस

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः ॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

स्त्वीयत्वेमप्याप्यते ध्रुवमिति च व्यासयोगे ॥ १० ॥ तदेव ध्येयं प्रपंचयति ॥ यदक्षरमित्यादिना ॥
॥प्राप्यते मुमुक्षुभिरिति॥

॥ ननु पदत्वं शब्दस्यैवोंकारस्य संभवति न विष्णोरित्यत आह ॥ प्राप्यत इति ॥ कर्मण्यकारप्रत्ययः ॥
१ क० ॥ क्रममुक्त्यर्थमिति ॥ जीवन्मुक्तिरूपसगुणमुक्तिद्वारा निर्गुणमुक्त्यर्थमोंकारोपासनमुच्यत इत्ययुक्तम ॥ विशिष्टापत्तिर्नतत्त्वोपासनाफलविरोधादिति भावः ॥ अकारप्रत्यय
इति ॥ घञर्थे कविधानमिति कप्रत्यय इत्यर्थः ॥ [illegible] इति भावेनाकारप्रत्यय इत्ययुक्तम ॥

---

१ मामनुस्मरन्नित्यस्य भावः ॥ २ आदिपदेनसंगृहीतमद्भावयातीत्यस्य भावः ॥

॥ श्री० ॥ पदंस्वरूपमिति ॥ तद्विष्णोः परममनन्तं पद्यत इति पदं स्वरूपं सदा पश्यति यस्य इत्यर्थः ॥ प्रयोगप्रदर्शनमिति ॥ पदशब्दस्य पद्यत इति व्युत्पत्त्या प्राप्यार्थत्व इत्यर्थः ॥ ११ ॥ लब्धमिति ॥ सर्वेंद्रियनियमनस्य मनो नियमनाधीनत्वादित्यर्थ. ॥ पुनरुच्यत इति ॥ सर्वद्वाराणि संयम्येति ॥ पुनः किमुच्यत इत्यर्थः ॥ तन्नियमनं ॥ नाडीनि यमनम ॥ हृनाविति ॥ इति हृनो. सर्वद्वाराणि संयम्ये युक्त इत्यर्थः ॥ हृर्नागति॥ तथा न हृस हस्य द वस्मात् क्विप तस्य लोप क्रित्वाद्गुणाभावं क्रित्वात्ययस्य पिता द्वस्वस्य पिति कृति तुक् ॥ हस्वातस्य धातो. तुगागम स्यात् पिति कृतीति तुगागमे हृदितिरूपमिति भाव. ॥ मूर्ध्नि प्राणा तनादौ मनो हृदि निरुध्य पश्चान्मूर्ध्नि प्राणमाधायेति व्याख्यानात् विरोध इत्यत आह॥ आदाविति ॥ अध्याहार इति: आदाविव्यस्येत्यर्थ. ॥

॥ कि० ॥ न न स्यात्प्राप्यधिहर्तिनिगृह्यसंयमिति परिगणनविरो ॥

पदं स्वरूपमिति ॥ प्रयोगप्रदर्शनम् ॥ ११ ॥ ननु मनो निरुध्येत्यनेनैव सर्वेंद्रियसंयमनं लब्धम ॥ तत्किंपुनरुच्यते ॥ सेवम् ॥ वायुसंचरणद्वाराणां नाडीनामत्र ग्रहणात ॥ तन्नियमनं किमर्थमित्यत आह ॥ ब्रह्मेति ॥ इति हृनो ॥ इत्युक्तामिति शेषः अत्र प्रमाणमाह॥निर्ग

पदम् ॥ पद्गताविति धातोः ॥ तद्विष्णोः परमं पदमिति च श्रुतेश्च ॥ गीयसे पदमित्येवमुनिभिः पद्यसेयतइति वचनान्नारदीये॥११॥ब्रह्मनाडींविना यद्यन्यत्र गच्छतिनहिविना मोक्षंस्थानातरंप्राप्नोतीतिसर्वद्वाराणिसंयम्यनिर्गच्छंश्चक्षुषा सूर्यं दिशः श्रोत्रेण चैव हि इत्यादिवचनात्व्यासयोगे ॥ मोक्षधर्मे च हृदि नारायणे ॥ ध्रीयते स्वयाजगद्यस्माद्धृदित्येवं प्रभाषस इति पाद्मे॥ नहि मूर्धनि प्राणे स्थिते हृदि मनसः स्थितिः संभवति ॥ यत्रप्राणो मनस्तत्र तत्र जीवः परस्तथेति व्यासयोगे ॥

च्छन्निति ॥ सूर्यं गच्छति ॥मोक्षधर्मे चायमेवार्थ उक्त इति शेषः ॥ हृदीत्यस्य प्रासिद्धार्थेनानिरासार्थमाह ॥ हृदीति ॥ हृञः क्विप् चेति क्विप् ॥ प्रसिद्धार्थ एव किं न स्यादित्यत आह ॥ न हीति ॥ कुतो न संभवतीत्यत आह ॥ यत्रेति ॥ आदौहृदि निरुध्येत्यध्याहारो दोषः॥

॥ शब्दकौस्तुभे येनविधिरितिसूत्रे पणनं पणः स्वार्थे कविधानमिति क इत्युक्तेन स्यान्नेत्यादिस्वदाहरणनात ॥ ११ ॥ क्विपचेति क्विविति ॥ यद्यप्युगसिद्धित्याद्युदाहरण. इयं क्विप्सोपपदाद्धातोर्भवति ॥ तथापि दृशिग्रहणानुवृत्तेर्निरुपपदादपि भवति ॥ ततश्च क्विपि सति हृस्वस्य पिति कृति तुगिति तुगागमो निरुक्तत्वात्तकारस्य दकारश्चेति भाव. ॥ नन्वादौ मनो हृदि निरुध्य ततः प्राणं मूर्ध्न्याधायेति व्याख्यानान्नोक्तदोष इत्यत आह ॥ आदौ हृदीति ॥ अध्याहारः ॥ आदिशब्दाध्याहार ॥

॥ श्री० ॥ धारणेति ॥ खंडस्मृतिरित्यर्थः ॥ खंडस्मृतिर्धारणा स्यादितिवचनादिति ज्ञेयम् भाष्ये योगभरण एव वायुजयादियोगसंपन्नो विग्रहवानित्यर्थः ॥ १२ ॥ योगित्वे नित्ययुक्तत्वं हेतुरिति भावेनाह ॥ नित्योपायत्वेनेति ॥ नित्यमहरहर्वायुजयादियोगरूपोपायानुष्ठातृत्वेनेत्यर्थः ॥ १३ ॥ १४ ॥ भगवल्लाभो भगवत्प्राप्तिः ॥ उभयेति ॥ परमगतिभगवल्लाभयो रित्यर्थः ॥ ननु मोक्षलक्षणसिद्धिं गतानामपि जन्म किं न स्यादित्यत आह ॥ न चाति ॥ १५॥

मरणवेलायामखंडस्मृतिर्वक्तव्या ॥ तत्कथं धारणोच्यत इत्यत आह ॥ योगेति ॥ १२ ॥ १३ ॥ नित्ययुक्तस्ययोगिन इत्येतयोरेकार्थतानि रासार्थमाह ॥ नित्येति ॥ नित्योपायवत्त्वेन संपूर्णयोगस्येत्यर्थः ॥ १४ ॥ स यातिपरमां गतिम् ॥ तस्याहं सुलभ इतिद्वयावचनात परमगतिर्भ गवल्लाभश्च पृथगिति न मंतव्यम् ॥ भगवत्प्राप्तेरेवोत्तरत्र स्तुतेः ॥ अन्यथोभयस्तुतिप्रसंगादित्यभिप्रायेणाह ॥ तत्प्राप्तिमिति ॥ तर्हि कथं

योगधारणामास्थितः योगभरण एवाभियुक्त इत्यर्थः ॥ १२ ॥ १३ ॥ नित्ययुक्तस्य नित्योपायवतः ॥ यो

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च॥मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्॥१२॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यःप्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥
अनन्यचेताःसततं यो मां स्मरति नित्यशः॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥ १४ ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

गिनः परिपूर्णयोगस्य ॥ १४ ॥ तत्प्राप्तिं स्तौति ॥ मामिति॥ परमांसिद्धिंगता इति हि तत्र हेतुः१५॥

मामुपेत्येत्युक्त्वासंसिद्धिं परमां गता इति पृथगुक्तिरित्यत आह ॥ परमामिति ॥ ये मामुपेतास्ते परमां सिद्धिं मोक्षलक्षणां हि गताः ॥ न च मुक्तानां निर्बीजं जन्मसंभवतीत्येवं तत्र स्वयंप्राप्तानां जन्माभावे हेतुरयमुच्यते॥न तु भगवत्प्राप्तेरन्या परमसंसिद्धिप्राप्तिरित्यर्थः ॥ १५ ॥

॥ कृ० ॥ धारणेति ॥ खंडस्मृतिरित्यर्थः ॥ १२ ॥ नित्ययुक्तपदवैयर्थ्यमाशंक्य योगित्वे कारणप्रतिपादकत्वान्न वैयर्थ्यमित्याह ॥ नित्योपायवत्त्वेनेति ॥ १३ ॥ १४ ॥ १५ ॥

१ ॐ इत्युच्चार्य तद्वाच्यंब्रह्मरूपं मामनुस्मरन्योदेहंत्यजन्प्रैतिसपरमांगतिं यातीत्यर्थः ॥

॥ श्री० ॥ महामेरुस्थब्रह्मसदनमारभ्याध:स्थितानां [illegible] कानां न पुनरावृत्तिरित्यन्यथाप्रतीतिनिरासायाह ॥ परत इति ॥ पृथिव्या ब्रह्मणो मेरौ जयंतं [illegible]तरिक्षगम् ॥तृतीयं सत्यलोके च सदनं त्रिविधं स्मृतमिति वचनत्रयात् महामेरुस्थ [illegible] सदनं शतकोटिनामकं तदारभ्य परत: स्थितानामनन्तद्वीपयोरपुनरावृत्तित्वमुच्यत इति द्रष्टव्यम् ॥ अत्र यद्यपि मेरुस्थब्रह्मसदनात्परत: [illegible] परत: स्थितानामित्ति [illegible] तथापि [illegible]मेरुस्थब्रह्मसदनस्यापि परत: स्थितशब्दविषयत्वमभिप्रेत्येति भावबोधे व्याख्यानम् ॥ [illegible] ॥ [illegible] इति वचनात् [illegible]लोकस्तावत्[illegible] म च श्वेतद्वीप इति वचनात् मेरुस्थब्रह्मसदन परत: [illegible] द्रष्टव्यम् [illegible] ॥ आब्रह्मभवनादिति गीतावचनेन मेरुब्रह्मसदना दित्येवोक्तौ [illegible]लोकानामप्यपुनरावृत्ति [illegible] ॥ पृथिवीसंबंधिनामिति ॥ [illegible] द्वीपानां पृथिवीसंबंधिनां अपुनरावृत्तिलोकानां तदसं बंधिनां जनलोकादिवैकुण्ठान्तानां अपुनरावृत्तिलोकानां [illegible]ब्रह्मसदनात् जनलोकादीनां [illegible] ॥ [illegible] ॥ [illegible]स्थितानां पुनरावृत्तिरस्त्येवेत्याशंकयारभ्येत्यत:

आब्रह्मभवनाल्लोका: पुनरावर्तिन इति सत्यलोकसहितानां पुनरावृत्तिरुच्यत इत्येतदप्याख्यातमिति भावेनाह ॥ महामेरुस्थेति ॥ परत: स्थितानाम् ॥एवं जनलोकमारभ्येत्यपि ग्राह्यम् ॥ कुत: एतदित्यत: श्लोकमागमेन [illegible] ॥ तथेति॥पृथिवीसंबंधिनां तदसंबंधिनां लोकानां

महामेरुस्थब्रह्मसदनमारभ्य न पुनरावृत्ति: ॥तदुक्तम् नारायणगोपालकल्पे आमेरुब्रह्मसदनादाज

आब्रह्मभुवनाल्लोका:पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

नान्नजनिर्भुव ॥ तथाप्यभाव: सर्वत्र प्राप्यैव यगु[illegible]जामिति ॥ १६ ॥

ग्रहणायोभयोपादानम् ॥ परत: स्थितानाम् ॥

परमध्याहरति ॥ परत: स्थितानामिति ॥ [illegible] स्थितानामित्यर्थ: ॥ यद्वा [illegible] स्थितानां लोकानामित्यर्थ [illegible] विशेषणं तेन [illegible] ॥ पंचमस्कंधे पृथिव्या उपरि कतिपययोजनव्यवधानेऽन्तरिक्षलोकेऽकरणार्थस्यापि व्याप्तत्वात् एवं च मेरुस्थब्रह्मसदनश्वेतद्वीपानंतासनमारभ्य [illegible] इति [illegible]॥ अग्रिमग्रंथानुसारेणाह॥एवं जनलोकमिति॥ ॥२६७॥

॥ श्री० ॥ **यद्यपीत्यादि** ॥ तथा चामेरुब्रह्मसदनादाजनात्परतः स्थितं लोकं प्राप्तानां यद्यपि पुनरावृत्तिर्नास्त्यपि नागं तल्लोकमहिमा किं तु सर्वत्रैव लोकेषु स्थितं सर्वज्ञं मां प्राप्यैव जनेरभावो लभ्यते नान्यथेति श्लोकार्थो द्रष्टव्यः ॥ **अनेन** ॥ प्रमाणोदाहरणेन आरभ्य परतः स्थितलोकं गतानामिति शेषः ॥ सत्यमित्यनन्तरं यद्यपीति शेषः तत्रात्रेऽनादि नाऽशंकितस्यानुवादे कर्तव्ये तत्र पुनरावर्तिन इत्येतद्मगत तेन मेरुस्थब्रह्मसदनादिलोकगतानां पुनरावर्तिताया अनुक्तत्वादित्यत आह ॥ **परे न पुनरावर्तिन इतियावदिति** ॥ परे परत स्थिताः उक्तम् ॥ मामुपेत्येत्युक्तम ॥ सत्यलोकादिमहितानामित्यपव्याख्याने बाधकमाह ॥ **अन्यथेति** ॥ भगवंतं प्राप्तानां पुनर्जन्माभावस्य मामुपेत्य पुनर्जन्मेत्यादिश्लोकेनोक्तत्वात् सत्यलोकंप्राप्तानां पुनर्जन्मसद्भावस्याब्रह्मभवनादित्युक्तत्वात् मामुपेत्य तु कौन्तेयेति भगवंतं प्राप्तानां पुनर्जन्माभावकथनमयुक्तं मामुपेत्य पुनर्जन्मेति श्लोकेन पुनरुक्तत्वादित्यर्थः ॥ अपि विति प्रमाणसमुच्चयार्थश्च शब्द इति ज्ञातव्यम ॥ किंनिनु ब्रह्मसदनसत्यलोकादिप्राप्तिमात्रेण पुनरावृत्तिरस्तु न तु तत्रत्यं भगवंतं प्राप्यतीत्यशीकारवाधकमाह ॥ **अन्यथेति** ॥ वैयर्थ्यं चेति ॥ तथा च व्यर्थं सत किं चिज्ज्ञापयतीति न्यायेन तत्रत्यं भगवंतं प्राप्येत्येतल्लभ्यत इति भावः ॥ १६ ॥ स्थापयितुमित्यस्य विशेषणस्य कृत्यमाह ॥ **प्रतिज्ञेति** ॥ मामुपेत्य पुनर्जन्मनविद्यत इत्येतत्प्रतिज्ञामात्रेणोक्तं न तु युक्त्यादिभिः स्थापितमित्यर्थः ॥ समानकर्तृकत्वाय आह ॥ अवस्थितानामिति ॥

यद्यपीति शेषःअभावो जनेः लभ्यत इति शेषः ॥ अनेनैव व्याख्यातं भवति ॥ महामेरुस्थब्रह्मसदनं जनलोकं चारभ्य न पुनरावृत्तिः॥अतो मामुपेत्य पुनर्जन्मेति किमुच्यत इति चेत ॥ सत्यम ॥ आब्रह्मभवनादेवमाजनाच्चार्वाक्भवा एवलोकाः पुनरावर्तिनः॥परेन पुनरावर्तिन इति यावत् तथाऽपि नोक्तमयुक्तम ॥ यतस्तेषु लोकेषु स्थितं मामुपेत्यावस्थितस्य पुनर्जन्मन विद्यत इति ॥ अन्यथामामुपेत्य पुनर्जन्मेत्यु

मां प्राप्य नपुनरावृत्तिरिति स्थापयितुं अव्यक्ताख्यात्मसामर्थ्यंदर्शयितुं प्रलयादि दर्शयति ॥

क्तत्वात् उत्तरार्धवैयर्थ्यं च ॥ १६ ॥ उत्तरप्रकरणस्यासंगतिमाशंक्याह ॥ मां प्राप्येति ॥अवस्थितानामिति शेषः ॥ प्रतिज्ञामात्रेण हि नदुक्तं अव्यक्तसामर्थ्यस्यात्र कथनात् कथमात्मित्युच्यत इत्यत उक्तम॥अव्यक्ताख्येति॥प्रलयादीति ॥

॥ कृ० ॥ नन्वाब्रह्मभवनाल्लोका इत्ययं परोक्तस्यानुवादः ॥ न च परागाभिकलोका पुनरावर्तिनः स्याक्षिप्तम ॥ अतोऽसदनुवादोऽयमित्यत आह ॥ **परे न पुनरावर्तिन इतियावदिति** ॥ सत्यलोकमहितानामित्याद्यपव्याख्यानं दोषमाह ॥ अन्यथेति ॥ आमेरुब्रह्मसदनादित्यागमविरोधसमुच्चयार्थश्च शब्दः॥१६ ॥ समानकर्तृकत्वनिर्वाहार्थं प्राप्येत्यत परमव्याहरति ॥ **अवस्थितानामितिशेष इति** ॥ ननु मामुपेत्य पुनर्जन्मेत्यादिनोक्तत्वात्पुनरुक्तिरित्यत आह ॥ **प्रतिज्ञामात्रेणेति** ॥

॥ श्री० ॥ इदंपूर्वत्वाभावेति ॥ चक्रवत्परिवृत्तेः प्रमितत्वादिति भावः ॥ आत्मन इति ॥ स्वस्य भगवत इत्यर्थः ॥ गीतामुल्लंघ्येति ॥ अन्यथा गीतानुसारेण वक्तव्ये प्रभवन्त्यहरागम इतिगीतायां सृष्टेः प्रागुक्तत्वात् सृष्ट्यादि दर्शयतीति वक्तव्यंस्यादित्यर्थः ॥ प्रसिद्धार्थः ॥ दशशतरूपः ॥ विरिंचेति ॥ सहस्रवृत्तं तदहः स्वयंभुवो निशा च तन्मानमितं शरच्छतम् चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते रात्रिश्च तावतीत्यादिवचनादिति भावः ॥ उक्तम् ॥ सहस्रशब्दस्यानेकवाचित्वम् ॥ विश्वं समस्तं पूर्णं चेत्यभिधानात्परिपूर्णेत्युक्तम् ॥ कालतः परिपूर्णरूपवतो नित्यदेहादिमतोऽपीति यावत् ॥ अनेन ॥ रजनीसज्ञावचनेन ॥ अहरपीति ॥ सव्यापारावस्थैवाहरिति भावः ॥

तत्कारणत्वमात्मनः ॥ सृष्टिप्रलययोरिदंपूर्वत्वाभावज्ञापनाय[1] गीतामुल्लंघ्योक्तम् ॥ अत्र सहस्रशब्दो दशशतवाचीतिप्रतीतिनिरासायाह ॥ सहस्रेति ॥ बहुशब्दपर्यायोऽयं नतु प्रसिद्धार्थः ॥ विरिंचाहोरात्रयोः प्रसिद्धस्य सहस्रचतुर्युगपर्यंतत्वात् कथमेतदित्यत आह ॥ ब्रह्मेति ॥ तथा च द्विपरार्धप्रलयस्यादिसृष्टेश्चात्र विवक्षितत्वात् उक्तं युक्तम् ॥ ननुपरस्य ब्रह्मणो नित्यत्वादहोरात्रे न स्तः ॥ तत्कथं तत्परमेतदित्यत

सहस्रयुगेत्यादिना सहस्रशब्दोऽत्रानेकवाची॥ब्रह्मपरम ॥साविश्वरूपस्य रजनीति श्रुतिः॥द्विपरार्धप्र

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रां तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

लय एवात्र विवक्षितः ॥

त आह ॥सेति ॥ सा निर्व्यापारावस्था परिपूर्णरूपस्यापिहरेः रजनीत्यर्थः ॥ अनेनाहरपि सिद्धम् ॥ भवेदेतद्यद्यत्र द्विपरार्धप्रलयस्यादिसृष्टेश्च विवक्षेत्यत्र प्रमाणं स्यादित्यत आह ॥ द्विपरार्धेति ॥ एवमादिसृष्टिश्चेत्यपि ग्राह्यम् ॥ ॥ कृ० ॥ ननु प्रलयादिमात्रं नात्मसामर्थ्यं प्रपंचधर्मत्वादित्यत आह ॥ तत्कारणत्वमिति ॥ आत्मन इति शेषोक्तिः ॥ नित्यत्वादिति ॥ कालकृतविकाराभावादित्यर्थः ॥ उपलक्षणमेतत् ॥ परनामनिमेषकांत इत्यादौ द्विपरार्धकालस्य निमेषत्वेनोक्तत्वाच्चेत्यपि ग्राह्यम

१ इयंसृष्टिः अयंप्रलयोवाइदंपूर्वः तस्यभावइदंपूर्वत्वंतस्यभावइतिविग्रहः

॥ श्री० ॥ अवांतरसृष्टिप्रलययोरिति ॥ दैनंदिनसृष्टिप्रलययोरित्यर्थः ॥ आकाशादीनामिति ॥ ब्रह्मांडावरणभूतानामित्यर्थः ॥ नापीति ॥ ब्रह्मांडावरणभूतपंचमहाभूतनाशानंतरं अहंतत्वनाशस्तदनंतरं विरिंचिदेहस्य महतत्वस्यापि नाशो भवत्येवेत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

नह्यवांतरसृष्टिप्रलययोः सर्वकार्योत्पत्तिविनाशाविति भावः ॥आगमांतरसंमतेश्चैवमित्याह ॥ उक्तं चेति ॥ इतोप्येवमित्याह ॥ य इति॥नह्यवात

अव्यक्ताद्व्यक्तयः सर्वा इत्युक्तेः ॥ उक्तं च महाकौर्मे॥अनेकयुगपर्यंतंमहाविष्णोस्तथा निशा॥राज्यादौ

अव्यक्ताद्व्यक्तयः सर्वाःप्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥
परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥

लीयते सर्वं अहरादौ तु जायत इति च॥ यः स सर्वेषु भूतेष्विति वाक्यशेषाच्च॥१७॥१८॥१९ ॥ २०॥

रप्रलये सर्वेषामाकाशादीनां भूतानां नाशःनापिविरिंचिस्य पंचभूतनाशेऽपि अविनाशित्वमिति भावः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

॥ क० ॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

१ ब्रह्मणोऽहरागमे प्रलयांत इतियावत् भगवतोऽव्यक्तात् इति गुणवैषम्यादयःपदार्थाउत्पद्यंते ॥ रात्र्यागमेतत्रैव भगवति प्रलीयंत इत्यर्थः ॥ २ प्राक्जन्मलयवत्वेनोक्तोयः सएवायंभूतग्रामश्चराचर समुदायः भगवद्वशः सन्भूत्वाभूत्वारात्र्यागमे प्रलीयते पुनरहरागमे प्रभवतीति योजना ॥ ३ अव्यक्तस्तुभगवान् प्रभवप्रलयोपेताद्भूतग्रामाद्विलक्षणः स्वतंत्रउत्तमोऽनादिश्चयःसभगवान् सर्वभूतेषुनश्यत्सु नविनश्यति इत्यर्थः ॥

॥ श्री० ॥ स्वस्थानत्वमिति ॥ तद्धामपरमंममेत्यनेनेत्यर्थः ॥ महोक्तत्वेनेति ॥ भक्त्या युक्तो योगबलेन चैत्यनेनेति शेषः ॥ पुनर्वचनेनैवेति ॥ सिद्धेमत्यारंभो नियमार्थ इति न्यायेनेत्यर्थः ॥ २२ ॥ याश्वेति ॥ गम्यकालादिरि यथर्थे नाआहेत्यनुपपन्नं स्यादिति भावः ॥ भाष्ये काल इत्युपलक्षण मार्गाभिमानिदेवतोपलक्षणमित्यर्थः ॥ आदिशब्देन ज्यो तिर्धूमौ ग्राह्यावित्याशयेनाह ॥ अग्निर्ज्योतिर्धूमानामिति ॥ मार्गाभिमानिदेवतानामित्यर्थः ॥ २३ ॥ ॥ कृ० ॥ २१ ॥ २२ ॥ यत्रामी कालादिश्रीति कृते ता आहेत्यनुपपन्नमत आह

इदानीमव्यक्ताख्यात्मेति यदुक्तं तत्साधयितुमाह॥ अव्यक्त इति॥ मामुपेत्येत्युक्तार्थस्य यं प्राप्य न निवर्तन्त इत्यव्यक्तविषयतया परामर्शात् ॥ न केवलमव्यक्तशब्दो युक्तिबलात् भगवान्निर्णीयते॥किं तु वाचकश्च तस्येत्याह॥अव्यक्तमिति॥कथं तर्हि भगवता व्यक्तस्य स्वस्थानत्वमुच्यत इत्यत आह॥धामेति॥२१॥भक्त्या युक्त इति भक्तेर्भगवत्प्राप्तिसाधनत्वस्योक्तत्वात् पुनरुक्तमुत्तरं वाक्यमित्यत आह॥परमेति ॥अन्यैः साधनैः सहोक्तत्वे

अव्यक्तो भगवान॥यं प्राप्य न निवर्तन्त इति मामुपेत्येत्यस्य परामर्शात्॥अव्यक्तं परमं विष्णुमिति च योगाच्च गारुडे ॥ धामस्वरूपं ॥ तेजः स्वरूपं ॥ तेजःस्वरूपं च गृहं प्राज्ञैर्धामेति गीयत इत्यभिधाना

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ॥ यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥ २१ ॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ यस्यांतस्थानि भूतानि येन सर्वमिदं ततम् ॥२२॥
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः॥प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ॥ २३॥

त् २१ ॥ परमसाधनमाह ॥ पुरुषइति ॥ २२ ॥ यत्कालाद्यभिमानिदेवतागता आवृत्त्यनावृत्ती गच्छं ति ता आह ॥ यत्रेत्यादिना ॥ काल इत्युपलक्षणम् ॥ अग्न्यादेरपि वक्ष्यमाणत्वात् ॥ २३ ॥

न तु तत्साम्यशंकायां साधनेषु भक्तेः परमत्वमनेनाह॥नच पुनर्वचनेनैवयोत्यमिति भावः॥ २२ ॥यस्मिन्काले मृताः आवृत्त्यनावृत्ती यान्तितत्प्रति पादनार्थमुत्तरो ग्रंथ इत्यन्यथाप्रतीतिनिरासार्थमाह॥यदीति॥ याश्वताः कालाभि मानिन्यश्चेति विग्रहः॥देवतागता इति तदधिष्ठितमार्गाभ्यांगता इत्यर्थः॥काल इत्युक्तत्वात् कथमादिपदप्रक्षेपेण व्याख्यानमित्यत आह ॥काल इति ॥कुत इत्यत आह॥अग्न्यादेरिति॥अग्निर्ज्योतिर्धूमानाम्॥२३॥

॥ याश्चताइति ॥ अग्न्यादेरित्यादिपदेनाग्न्यादेरपि ग्रहणं कालशब्दस्य तदुपलक्षकत्वमयुक्तं अहरादेः कालशब्दशक्यत्वादित्यत आह ॥ अग्निर्ज्योतिर्धूमानामिति ॥ २३ ॥

॥ श्री०॥श्रुतीति ॥ तेऽर्चिषमभिसंभवंत्यार्चिषोऽहरिति श्रुतिशेषेऽभिहितत्वादिति भावः ॥ प्रातीतिक एवेति ॥ कालप्रतिपादनरूप इत्यर्थः ॥ नन्वग्न्यादिशब्दानामर्थांतरस्यानुक्त त्वात्कथं चशब्दइत्यत आह ॥ आदिशब्देति ॥ यत्कालाद्यभिमानिदेवता इत्यत्रत्यादिशब्दसमर्थनं कालइत्युपलक्षणमित्यादिना कृतमिदानीं त्वग्न्यादिशब्दानामभिमानिदेवतापरत्व समर्थनं क्रियत इत्यादिशब्दसमर्थनेन सहास्यसमुच्चयार्थश्चशब्द इत्यर्थः ॥ मासातिरिक्तेति ॥ षण्मासातिरिक्तेत्यर्थः ॥ अभिमानिग्रहणेऽपि पृथगुक्तिर्न संभवतीति चेत्तत्राह ॥ आभ मानिनां त्विति ॥ पुराणानि ॥ मासैः परिच्छिन्नेनायनेनत्युक्तत्वादिति भावः ॥ ॥ कृ० ॥ अनेकार्थत्वादिति ॥ ज्योतिस्ताराग्निभाःस्वालदृक्पुत्राद्यास्वरममाभानि

ज्योतिः शब्दस्यानेकार्थत्वाद्विवक्षितमर्थमाह ॥ ज्योतिरिति ॥ अभिसंभवंति प्राप्नुवंति ॥ श्रुतिपुराणयोरग्नेःप्रागर्चिषः प्रागुक्तेस्तत्समा ख्यानादित्यर्थः ॥ प्रातीतिक एवार्थः किं न स्यात्कुतोऽभिमानिदेवताग्रहणमित्यत आह॥अभिमानीति॥ आदिशब्दसमर्थनेन सहसमुच्चयार्थ श्चशब्दः ॥ अन्यथा मरणकालपरिग्रहे हानि श्रुतिः ॥ उपलक्षणमेतत् अहः शुक्ल इति गीताऽपि ॥ अहोरात्रव्यतिरिक्तपक्षाभावादिति भा

ज्योतिरर्चिः ॥ तेऽर्चिषमभिसंभवंतीतिहि श्रुतिः ॥ तथा च नारदीये ॥ अग्निं प्राप्यततश्चार्चिस्ततश्चा प्यहरादिकमिति ॥ अभिमानिदेवताश्चाग्न्यादयः ॥ कथमन्यथान्ह आपूर्यमाणपक्षमिति युज्यते ॥ दि

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ॥ तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः॥ २४

वादिदेवताभिस्तु पूजितो ब्रह्म याति हीति ब्राह्मे ॥ मासाभिमानिभ्यो अयनाभिमानी च पृथक् ॥

वः ॥ समाख्यानाच्चैवमित्याह ॥ दिवादीति ॥ किं च षण्मासा उत्तरायणं षण्मासादक्षिणायनमित्येतदपि अभिमानिदेवतां गमयति ॥मासातिरिक्तायनाभावादभिमानिनां तु पृथक्त्वेन पृथगुक्तिसंभवादिति भावेनाह॥मासेति॥अनेन षण्मासा एवायनमिति व्याख्यानं च निरस्तं भवति पुराणविरोधात् ॥

कोशादिति भावः ॥नन्वग्न्यादिशब्दानामर्थांतरस्यानुक्तेः कथं देवताश्चेति चशब्द इत्यत आह ॥ आदिशब्देति ॥ यत्कालाद्यभिमानिदेवेति भाष्ये आदित्याभिमानिदेवेति चोक्तम् । तत्रादिशब्दसमर्थनं काल इत्युपलक्षणमित्यादि भाष्येण कृतम् ॥ अधुनाऽभिमानिदेवतेत्येतत्समर्थ्यते अतस्तत्समुच्चयार्थं चशब्द इत्यर्थः ॥ गीताऽपीति ॥कथं युज्यते इति योज्यत ॥

॥ श्री० ॥ **सहस्थितमिति** ॥ अभिजिता सहस्थितमहः पौर्णमास्यासहस्थितं शुक्लं विषुवा सहस्थितमयनं यातीत्यर्थो द्रष्टव्यः ॥ अत्राभिजिच्छब्देन मध्यान्हाभिमानिदेवताग्राह्या अनुक्ताध्याहारे किं प्रयोजनमित्यत आह॥**एतदर्थमिति**॥अभिजित्पौर्णमासी विषुव्यतिरिक्तानामहःशुक्लपक्षायनानामभावादभिजिदादिना सहभावोऽहरादीनां कालरूपत्वेन न संभवत्यतोभिमानिदेवता एव ग्राह्या इति समर्थनार्थमित्यर्थः ॥ ननु मध्यान्हाभिमानिदेवताऽपेक्षयाऽहरभिमानिनउत्तमत्वादत एव भाष्येऽहरभिजितेत्युक्तत्वात्कथं सान्हेत्युक्तमित्यत आह॥ **प्राधान्यादेरिति**॥ननु संपूर्णिमेत्यत्र शुक्लेनेत्यस्य कथं विशेषणं पूर्णिमया सहितः सपूर्णिमस्तेन सपूर्णिमेनेति वक्तव्यत्वादित्यत आह॥**सपूर्णिमेनेति**॥**सुपां सुलुगिति**॥तथा च सपूर्णिमशब्दात्परतः स्थितायाष्टा इति तृतीयाविभक्तेः सुपां सुलुगित्यादिसूत्रेण आकारादेशे पूर्णिमेति तृतीयाविभक्तिर्युक्तेति भावः ननु भाष्यप्रमाणयोर्विषुवा सविष्वेति कथं विचित्रप्रयोग इत्यत आह ॥ उवङ्यणादेशविकल्प इति॥ क०॥सहेत्यस्य कर्त्रन्वयभ्रांति निराह ॥**सहास्थितमिति**॥**अभिमानिदेवतेति** ॥अन्यथाऽहरादिनामानुक्तायां अभिजिदादिप्रान्तेरप्युक्तप्रायत्वात्पृथक्तदुक्तिः

अत्रानुक्तमपि किंचिदध्याहरति॥ अहरिति ॥सहास्थितं यातीत्यप्यत्रद्रष्टव्यमिति भावः॥एतदप्यभिमानिदेवतापरिग्रहसमर्थनार्थम् ॥प्राधान्यादेर

तच्चोक्तं गारुडे॥पूजितस्त्वयनेनासौ मासैः परिवृतेन हीति॥अहरभिजिता शुक्लं पौर्णमास्यायनं विषुवासह

तच्चोक्तं ब्रह्मवैवर्ते॥सान्हा मध्यंदिने नाथ शुक्लेन च सपूर्णिमा॥सविष्वाचायनेनासौ पूजितः केशवंव्रजेदिति

विवक्षितत्वात् सान्हेत्युक्तम् ॥ सपूर्णिमासपूर्णिमेनसुपां सुलुगित्यादेः ॥ विषुशब्दस्योवङ्यणादेशविकल्पश्छांदसः ॥

स्यादिति भावः ॥ नन्वभिजितासहेत्यनेनाभिजितोऽप्राधान्यमन्हः प्राधान्यं च लभ्यम ॥ सहयुक्तेऽप्रधान इत्युक्तेः ॥ अभिजित्सहितस्यैवान्हो गम्यत्वं च लभ्यम॥ सहशब्दसामर्थ्यात् ॥ तत्कथं तद्विरुद्धं सान्हेत्युक्तमित्यत आह ॥ **प्राधान्यादेरिति** ॥ आदिपदेन साहित्यं ग्राह्यम ॥ गुणप्रधानभावस्य गम्यत्वे च साहित्यस्य चाविवक्षितत्वादित्यर्थः ॥ **सुपामिति** ॥ सु लुक् ॥ पूर्वसवर्णः ॥ आ ॥ आत् ॥ शे ॥ या ॥ डा ॥ ड्या ॥ याच् ॥ आल् ॥ एते आदेशाः सुपां स्युरित्यर्थेन सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल इति सूत्रेण पूर्वसवर्णदीर्घ इत्यर्थः ॥ ननु साम्यवाचिविषुशब्दस्याद्रव्यार्थत्वे चादिषु पाठादद्रव्यत्वेन सुब्लोप एव साम्यविशिष्टकाले तु द्रव्यार्थत्वादनव्ययत्वेऽपि विषुणेतितृतीयैकवचने रूपं स्यात् ॥ विषुवेति सविष्वेति च कथमित्यत आह ॥ **विषुशब्दस्येति** ॥उवङादेशविकल्पे विषुवा विषुणेति स्यान्न तु विष्वेति ॥ यणादेशविकल्पे चविष्वा विषुणेति स्यान्न तु विषुवेति ॥ अतउभयानुगुण्यायोवङ्यणादेशविकल्प इत्युक्तम् ॥ २४ ॥

१ पूर्वपरयोः स्थाने पूर्वसवर्णेनेत्यर्थः ॥

॥ श्री० ॥ उवङ्यणादेशयोर्विकल्पः एकदोवङ् एकदा यणादेश इत्येवंरूपो विकल्पइत्यर्थः ॥ तथाच विपुवा महेत्यत्र विपु ट्टा इति स्थिते चुट्टइति टकारलोपे विपु आ इति जाते इकः स्थाने प्राप्तयणादेशबाधकत्वेन अचि श्नुधातुभ्रुवांय्वोरियङ्वङौ ॥ श्नुप्रत्ययांतस्य भ्रुइत्येतस्य धातोश्च इवर्णोवर्णयोरियङुवङौ स्तोऽचि पर इति सूत्रेण विपुशब्दस्य श्नुप्रत्ययांतत्वादुवर्णस्योवङादेशे टकारलोपे विपुव् आ विपुवेति तृतीया भाष्ये युक्ता ॥प्रमाणेन विपुवा इति स्थिते टकारलोपे इकोयणचीति उकारस्य वकाररूपयणादेशे सति विप्व् आ सविप्वेति तृतीया युक्तेत्यर्थः ॥अत्रयास्मिन संक्रमणेऽहोरात्रयोः साम्यं तद्विपुशब्दोक्त तत्रोत्तरायणेमेषसंक्रमणं दक्षिणायने तुलासंक्रमणमिति ज्ञेयम॥तथाच यत्र विपुवा न [illegible] यदा तु यणकालाभिमानिदेवता विवक्षा तदा विपुवामहेत्यस्य मेषसंक्रमणाभिमानिदेवतया सह स्थितमित्यर्थः ॥ यदा तु दक्षिणायनाभिमानिदेवताविवक्षा तदा विपुवामहेत्यस्य तुलासंक्रमणाभिमानिदेवतया महेत्यर्थो द्रष्टव्यः ॥ एवमेव सविप्वाचार्येणेति प्रमाणार्थो व्यवसेयः ॥ यद्यपि समरात्रं दिवे काले विपुवद्विपुवं च तदित्यमरकोशकारेण समरात्रं दिनांते मेषतुलासंक्रमणरूपे काले विपुवच्छब्दो विपुवशब्दश्च प्रवर्तेत इति विपुवच्छब्दस्य च तद्वाचित्वमुक्तं नविपुशब्दस्य तथापि सविप्वेति प्रमाणानुसारेण विपुशब्दोपि तद्वाचीवर्तते इति द्रष्टव्यम् ॥ २४ ॥ २५ ॥ २६ ॥ कुत एतदिति ॥ अनुष्ठानेति कृत पूर्णायमित्यर्थः ॥ योगान्नीति ॥ योगानुष्ठाता हि योगीत्युच्यते यतोऽतोऽनुष्ठानमत्यवश्यं वाच्यमेवेति भावः ॥ यथोक्तम् ॥ सूत्रकृता योगिनः प्रति स्मर्यत इति ॥ श्री० ॥ ॥ २५ ॥ २६ ॥ ननु नैते सृती इत्यनेन मार्गज्ञानस्य प्रयोजनमुच्यते ॥ तत्र मोहाभावमात्रग्रहणे उपक्रमविरोधः ॥मरणकालक

॥ २५ ॥२६ नैते सृती पार्थेति मार्गज्ञानमात्रेण मोहाभावोऽभिधीयत इति प्रतीतिनिरासार्थमाह ॥ एते इति ॥ अनुष्ठायोपायमिति शेषः

॥ २५ ॥ २६ ॥ एते सृती सोपाये ज्ञात्वानुष्ठाय न मुह्यति ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ॥ तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥२५॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥एकया यात्यनावृत्तिमन्यया वर्तते पुनः ॥ २६ ॥
नैते सृती पार्थ जानन्योगी मुह्यति कश्चन॥तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥

॥ कुत एतत् योगीत्युक्तत्वात् ॥

र्तव्यत्वेन भगवत्स्मृतेरेवोपक्रमप्रतिपाद्यत्वात् ॥ तत्रैव च प्रमाणस्य प्रवृत्त वादित्यत आह ॥ मोहो भगवद्विस्मृतिरूप इति ॥ यद्वा नन सृती ज्ञात्वा साधनमनुष्ठाय च मोहमाप्नोति मार्गज्ञानोपायानुष्ठानाभ्यांमोहाभाव उक्तः ॥ स न युक्तः ॥ मार्गविषयत्वे मोहस्य भगवद्विषयमोहस्य या निवृत्तौ साधनानुष्ठानस्य साक्षाद्हेतुत्वात् ॥ मोहस्य ज्ञानेनैवनिवृत्तिरित्यत आह

॥ श्री० ॥ अन्येति ॥ तथा न तत्र मोहतरणे भगवत्प्राप्तिरन्या गतिः साधनं नास्तीत्यर्थः स्यात् ॥ [illegible] ॥ तत्र ॥ [illegible] भगवद्विस्मृतिरूप [illegible]
रन्या गतिर्नास्तीति भगवत्प्राप्तिरेव भवतीत्यर्थो द्रष्टव्यः ॥ ऐकार इति॥ [illegible] ॥ २७ ॥ २८ ॥ ॥ इति श्रीमद्भगवद्गीताभाष्यार्थ [illegible]
वेदमित्री ॥ सुललितवित्तियां [illegible] ॥ १ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्य [illegible] श्रीनिवासेन विरचितायां [illegible]
कादिवृतौ भावदीपिकाख्यायां अष्टमोध्यायः ॥ ॥ ॥ ॥ ॥ ॥

पुराणसंवादाच्चेत्याह ॥ तच्चेति ॥ मोहो भगवद्विस्मृतिरूपः ॥ अन्याभगवत्प्राप्तिः ॥ भाष्ये पुराणे चानुप्रायेत्याकारस्थाने क्वचिदैकार
लेखकदोषेण पतितः ॥ मूलपुस्तकेष्वदर्शनात् ॥ २७ ॥ २८ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीताभाष्यस्य

तच्चाह॥ स्कांदे ॥ स्मृत्वा ज्ञात्वा च सोपायअनुष्ठाय च साधनम् ॥ न कश्चिन्मोहमाप्नोति न चान्या तत्र

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ॥ अत्येति तत्सर्वमिदं विदित्वायोगी
परं स्थानमुपैति चाद्यम् ॥ २८ ॥ हरिः ॐ तत्सदिति श्रीमद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योग० अक्षरपरब्रह्मयोगो नाम अष्टमोऽध्यायः॥ ८ ॥

वै गतिरिरिति॥२७॥२८॥इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये अष्टमोऽध्यायः॥८॥

टीकायां जयतीर्थमुनिविरचितायां अष्टमोऽध्यायः ॥ ॥ ॥ ॥ ॥ ॥

कृ०॥मोह इति ॥ प्रमाणे भगवत्स्मृतेः फलमुक्तम् ॥ न चेति ॥तस्यार्थः ॥ तत्र च भगवत्स्मृतौ सत्यां नान्या गतिर्नास्तीति ॥ तत्रान्यत्वस्य सात्विकत्वादाह भगवत्प्राप्तेरिति॥ २७॥
॥ २८ ॥ इतिश्रीमत्तिम्मलाचार्यसुतकृष्णाविरचिते प्रमेयदीपिकाप्रकाशे अष्टमोध्यायः ॥ ॥ ॥ ॥ ॥

॥ श्री० ॥ ॐ ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ नवमाध्यायटीकाया क्रियते भावदीपिका ॥ १ ॥ विशेष्यानुक्तेराह ॥ भगवन्माहात्म्यमिति ॥ नन्वेवं तर्हि सप्तमाध्याया नंतरमेव स्यान्न त्वष्टमानंतर्यमित्यत आह ॥ पदार्थज्ञानेति॥सप्तमोक्तपदार्थान ब्रह्माध्यात्मादिपदार्थान ॥ तद्वाक्यार्थम् ॥ ते ब्रह्म तद्विदुरित्यादिवाक्यार्थभूतं भगवन्माहात्म्यम ॥ राजशब्देन कथं प्रधानत्वं लब्धमित्यत आह॥ राजवेति ।. यथा राजा सर्वप्रधानस्तथेत्यर्थः ॥ राजा चासौ विद्याचेति ॥ ननु कथमय विग्रहः ॥ पुल्लिंगस्त्रीलिंगयोर्विशेषणविशेष्य भावायोगात् अतो राज्ञी चासौ विद्या चेति वक्तव्यमिति चेदुच्यते ॥ पुंयोगादाख्यायामिति सूत्रेण यापुमाख्या पुंयोगात स्त्रियां वर्तते तत्र ङीप् विहितः गोपीत्युदाहृतं च ॥ तद्वदत्र विद्यायां राजयोगाभावेनैतत्सूत्रेण ङीपोऽप्राप्तेरगत्या तथैव विग्रहोऽङ्गीकार्यः ॥ एवमेव राजगुह्यमित्यत्रापि राजा च तद्गुह्यं चेत्येव विग्रहः कार्यः ॥ अत एवेंद्रियजयफलमाहेत्यत्र गीताभाष्यटीकायां इंद्रियजयश्च तत्फलं चेति विग्रहो दर्शित इति ज्ञातव्यम॥एवमेव क्षेत्रेऽस्मिन्भववन्नित्यत्र भाष्यं मुक्तिक्षेत्रविजयार्थेति ॥ तद्व्याख्यानं टीकाकारैः मुक्तिश्च तत्क्षेत्रं चेति॥

पूर्वसंगतत्वेनाध्यायार्थमाह ॥ सप्तमेति ॥ भगवन्माहात्म्यमितिशेषः ॥ पदार्थज्ञानपूर्वकं वाक्यार्थज्ञानमिति सप्तमोक्तपदार्थानष्टमे व्याख्याय नवमे तद्वाक्यार्थं स्पष्टीकरोतीत्यर्थः ॥ गज्ञामश्वपतिजनकादीनां विद्या राजविद्येति कश्चित्॥तदसत्॥ ब्राह्मणादीनामनधिकारप्रसंगादिति

श्रीरंगनाथायनमः ॥ ॐम् ॥ सप्तमाध्यायोक्तं स्पष्टयत्यस्मिन्नध्याये ॥ राजविद्या ॥ प्रधानविद्या ॥

॥ श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १॥

भावेनाह ॥ राजेति ॥ राजेव राजा राजा चासौ विद्या चेति राजविद्येत्यर्थः ॥

कृ०॥ ननु अस्याध्यायस्य सप्तमोक्तस्पष्टनार्थत्वे तदानंतर्यं स्यादित्यत आह ॥ पदार्थेति ॥ ननु राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ॥ यक्षे शक्रे च पुंसि स्यादिति अभिधानाद्रा जशब्दः प्रभ्वादिवाची ॥ ततश्च प्रधानेति तद्व्याख्यानमयुक्तमित्यतो गौणत्वमाश्रित्याह ॥ राजवेति ॥ राजा चासौ विद्या चेति ॥ अत्र राजनशब्दस्य विद्याविशेषणत्वाद्राज्ञी चासाविति वक्तव्यमिति चोद्यमुक्ताभिधाने नित्यपुल्लिंगत्वोक्त्या निरसनीयम ॥ गर्भमाश्वत्तराज्ञीति प्रयोगस्तु पुंयोगादाख्यायामिति ङीपंतत्वादुपपन्नः ॥ न च मुख्यार्थस्य राजनशब्द स्यपुंस्त्वेऽपि अमुख्यार्थत्वेऽमुख्यार्थलिंगं स्यादिति वाच्यम ॥ अमुख्यार्थत्वेऽपि गंगायां घोष इत्यादौ मुख्यार्थ लिंगत्वस्यैव दर्शनादिति

॥ श्री० ॥ नन्वहमिति प्रत्यक्षवेद्यजीवाभिन्नब्रह्मणोऽपि प्रत्यक्षगम्यत्वमस्त्येवेत्यत आह ॥ अद्वैतोद्धारस्येति ॥ [illegible] ॥ [illegible] ॥ ननु प्रत्यक्षं ब्रह्मेति नपुंसकलिंगेन प्रकृतत्वात्प्रत्यक्षमिति वक्तव्ये प्रत्यक्ष इति कथं पुल्लिंगनिर्देश इत्यत आह ॥ प्रादिसमासोऽयमिति ॥ कुगतिप्रादय इत्यत्र प्रादयो गताद्यर्थे प्रथमया [illegible] ॥ समास प्रादिसमासः समासवृत्तिविषये गताद्यर्थे वर्तमानाः प्रादयो गतित्वाभावेऽपि प्रथमान्तेन समस्यन्त इत्यर्थः ॥ एवं च [illegible] स्थितरूपप्रदर्शनेन [illegible] पितामहः प्रपितामह इत्यादाविवाक्षेषु प्रतिस्थितं ब्रह्म प्रत्यक्षमित्ययमपि प्रादिसमास एवेत्यर्थः ॥ ननु [illegible] इतिसूत्रेणात्र [illegible] एवास्त्वित्यत आह ॥ नाव्ययीभाव इति ॥ अव्ययीभावत्वे बाधकमाह ॥ अन्यथेति ॥ अव्ययीभावत्वे प्रत्यक्षस्य [illegible] प्रत्यक्षमेतिपष्ठी न श्रूयेतेत्यर्थः ॥ तथा हि ॥ नाव्ययीभावादतोऽम्त्वपंचम्या इति पंचमीं विना अमादेशविधानात् ॥ तृतीयासप्तम्योर्बहुलमिति तृतीयासप्तम्योर्विकल्पेन [illegible] प्रत्यक्षमित्येव स्यात् ॥ न प्रत्यक्षस्येति षष्ठी उपलक्षणमेतत् ॥ प्रत्यक्षः प्रत्यक्षाणीति प्रथमा द्वितीया द्विवचनबहुवचने ॥ चतुर्थी षष्ठी द्विवचनबहुवचने न [illegible] इत्यपि द्रष्टव्यम् ॥

प्रत्यक्षेणावगमो यस्येति व्याख्यानमसत् । भगवन्माहात्म्यस्य शास्त्रैकसमधिगम्यत्वात् ॥ अद्वैतोद्धारस्य प्रमाणविरुद्धत्वादिति भावेनाह ॥ प्रत्यक्षमिति ॥ शास्त्रैकवेद्यं ब्रह्म कथं प्रत्यक्षमित्यत आह ॥ अक्षेष्विति ॥ प्रत्यक्षः परमात्मा ॥ प्रादिसमासोऽयं नाव्ययीभाव इति ज्ञापना

प्रत्यक्षं ब्रह्म अवगम्यते येन तत्प्रत्यक्षावगमम् ॥ अक्षेष्विन्द्रियेषु प्रति प्रतिस्थित इति प्रत्यक्षः ॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥२॥

य नपुंसके प्रकृतेऽपि पुल्लिंगनिर्देशः ॥ अन्यथा षष्ठी न श्रूयेत ॥

॥ [illegible] ॥ ननु जीवस्य प्रत्यक्षत्वात्तदभिन्नब्रह्मणोऽपि प्रत्यक्षगम्यत्वमित्यत आह ॥ अद्वैतेति ॥ ब्रह्मेति प्रकृत [illegible] परमात्मेति ॥ प्रादिसमासइति ॥ ननु प्रादयो गताद्यर्थे प्रथमया ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ निरादयः क्रान्ताद्यर्थे पंचम्येति [illegible] कुगतिप्रादयः ॥ इत्युक्तप्रादिसमासस्य नियमितत्वात् कथमत्र सप्तम्यन्तेन समास इति चेन्न ॥ [illegible] प्रादीनामर्थनिर्देशे [illegible] ॥ कुगतिप्रादय इति [illegible] सप्तम्यन्तेनापि प्रादिसमासः ॥ अत एव कुगतिसूत्रे प्रादयः क्तार्थे सप्तम्यन्त [illegible] वार्तिकम् ॥ [illegible] ॥ [illegible] भाष्येऽत्र [illegible] समास इतिनियमाभावात् [illegible] ॥ अव्ययीभावत्वे बाधकमाह ॥ अन्यथेति ॥ अव्ययीभावत्वे नाव्ययीभावात् [illegible] इति [illegible] पष्ठ्या [illegible] न स्यादित्यर्थः ॥ उपलक्षणमेतत् ॥ द्विवचनबहुवचनान्तं चतुर्थ्यन्तं च न श्रूयेतेत्यपि ग्राह्यम् ॥ बहुप्रयोगसिद्धत्वात्षष्ठीत्येवोक्तम् ॥ प्रथमाद्वितीयैकवचनान्तं तु न [illegible] ॥ अव्ययीभावत्वे [illegible] विशेषात् ॥ तृतीयापंचमीसप्तम्यन्तमपि न प्रत्युदाहर्तुमुक्तम् ॥ अव्ययीभावत्वेऽपि तृतीयादिश्रवणात् पक्षे पंचम्या अमादेशनिषेधात् ॥ [illegible] इति बोध्यम् ॥ ॥

॥ श्री० ॥ प्रत्यक्षमिति पर्यायोग-[illegible] स्वादेश्चरणा[illegible] [illegible]र्थक [illegible]णनुभ[illegible]वाक्यार्थो द्रष्टव्यः॥भाष्ये अक्षेषु प्रतिप्रति प्रत्येकं प्रत्येकं प्रेरकत्वेन स्थित इति प्रत्यक्ष इत्यर्थ ॥ श्रु० यश्चक्षुषि तिष्ठन्नित्यादिना यो प्राणे तिष्ठन्नित्यनुक्ते ॥ प्राणशब्द एव तत्पर इत्याह ॥ प्राण इतीति ॥ प्राणाभिमानिनी देवतेति ॥ आहंकारिकप्राणाख्ययोर्न [illegible] वायुरिति सम्प्रदायविदः ॥ अन्य [illegible] [illegible] प्रेरक इत्याह ॥ एतन्न्यायाच्चक्षुरादिशब्देनाप्यभिमानिदेवता एव ग्राह्याः ॥ अन्यथा यं चक्षुर्न वेदेत्यादि अयुक्त स्यात् ॥ [illegible] न द्रष्टव्यपदेशादित्यर्थः [illegible]प्रयोगाच्चेति द्रष्टव्यम् ॥ यः प्राणमंतर इत्यनेन पौनरुक्त्यपरिहारायाह ॥ भिन्न इति ॥ अर्थः ॥ अनपेतशब्दार्थे ॥ क्र० ॥ ननु भगवत इंद्रियस्थत्वे प्रमाणं वक्तव्यं तत्कथं प्राणवायुस्थित्वे तदुच्यत इत्यत आह ॥ प्राणाभिमानिनीति ॥ यं प्राणो न वेदेत्येतत्

परमात्मनोऽक्षेषु स्थितत्वे किं मानमित्यत आह ॥ तथा चेति ॥ प्राण इति प्राणाभिमानिनी देवतोच्यते प्राणादंतरो भिन्नः ॥ अंगुष्ठेति ॥ कर्मेंद्रियाधिष्ठातृत्वमुच्यते ॥ मनइत्यादेर्मनआदिस्थ इत्यर्थः ॥ प्रत्यक्षशब्दस्यायमर्थ इत्यत्र श्रुतिमाह ॥ स इति ॥ प्रतिस्थितः॥

तथा च श्रुतिः ॥ यः प्राणे तिष्ठन्प्राणादंतरो यं प्राणो न वेद यस्य प्राणः शरीरम् ॥ यः प्राणमंतरो यमयत्येषत आत्मांतर्याम्यमृतः ॥ यो वाचि तिष्ठन्यश्चक्षुषि तिष्ठन्नित्यादेः ॥ य एषोंऽतरक्षिणि पुरुषो दृश्यतइति च अंगुष्ठमात्रः पुरुषोंऽगुष्ठं च समाश्रित इति च ॥ ॥ त्वं मनस्त्वं चंद्रमास्त्वं चक्षुरादित्य इत्यादेश्च मोक्षधर्मे ॥ स प्रत्यक्षः प्रति प्रति हि सोऽक्षेष्वक्षवान् भवति य एवं विद्वान्प्रत्यक्षं वेदेति सामवेदे बाभ्रव्यशाखायाम् ॥ धर्मो भगवान् तद्विषयं धर्म्यम् ॥

अक्षवान् ॥ प्रशस्तेंद्रियः ॥ यो विद्वानेवं प्रत्यक्षशब्दार्थं वेद ॥ धर्मादनपेतं धर्म्यमिति निर्वचनेऽपि न प्रसिद्धधर्माविरुद्धत्वमर्थः ॥

चटस्थितुमभिमानी देवतेत्युक्तम ॥ प्रशस्तेंद्रियइति ॥ प्रशंसायां मतुब्विधानादिति भावः ॥ ॥ ॥ ॥ ॥

१ऐकानपंचाशत्सुंद्वादशमः २अनिरुद्धादुत्तमोयः स इति॥ ३अ.१पा. ४ अ. ५ स १ एषत आत्मांतर्याम्यमृत इतिश्रुतोंऽतर्यामी ब्रह्मैव अधिदैवाधिभूतादिप्रकरणेषु अंतर्यामिणःसं बंधितया ब्रह्मणो धर्मस्य यं पृथिवी न वेदेत्यादिना पृथिव्याद्यविदितत्वादेर्व्यपदेशादित्यर्थः ॥ पृथिव्यादिशब्दवाच्ये अधि देवेत्युक्तेः पृथिव्यादेश्चेतनत्वज्ञापनार्थत्वादिति भावः ॥

५ बृहदारण्य अ. ५ ब्राह्मणं ७ अंतर्याम्याख्य खंडे १.६ ॥ ६ अनतभास्च्छांदस ॥ नतुपीत्यर्थः ॥ ७ दिव्यदृष्टचेतिश्रेयछांदोग्यप्रपाठक खंडं १९

॥ श्री० ॥प्रसिद्धत्वादिति ॥ अप्राप्ते शास्त्रमर्थवदिति न्यायेनानर्थक्यत्वादित्यर्थः ॥ तद्विरुद्धत्वात् ॥ ब्रह्मज्ञानविरुद्धत्वात् ॥ तथा च ब्रह्मज्ञानस्यधर्म्यमिति प्रवृत्तधर्माविरुद्धत्वक थनं बाधितमिति भावः॥धृञ्इति ॥ तथा च धृञ्धारणे इत्यस्माद्धातोर्गौणादिके मनप्रत्ययेनकारलोपे सार्वधातुकार्धधातुकयोरिति गुणे उरणरपर इति रपरत्वे च धर्मेति रूपं द्रष्टव्यम॥ पर्वतोपरीति॥पर्वताधारत्वेनेत्यर्थः॥अर्यमार्योपरि तिष्ठतीत्यादिप्रयोगात्॥भर्ता सन्नेवेनेति॥धारकः सन्नेवेत्यर्थः॥भ्रियमाणो भ्रियमाणः॥भर्ता सन्नेवेत्येवकारव्यावर्त्यं दर्शयति॥नेति॥२॥३॥

निवृत्तधर्मस्य ब्रह्मज्ञानाविरुद्धतायाः प्रसिद्धत्वात्॥प्रवृत्तिलक्षणस्य तु तद्विरुद्धत्वादितिभावेनाह॥धर्म इति॥तस्मादनपेतमित्यर्थस्तद्विषयमिति॥ कथं भगवान् धर्म इत्यत आह ॥ सर्वमिति ॥ धृञो मन्प्रत्यय औणादिकः ॥ धारके धर्मशब्दप्रवृत्तिः कुत इत्यत आह ॥ पृथिवीति ॥ पर्वतोपरीत्यर्थः ॥ भगवतः सर्वधारकत्वे किं मानमित्यत आह ॥ भारभृदिति ॥ सर्वत्र स्थितो भगवान् सर्वेणध्रियते स कथं सर्वस्य धार

सर्वं जगद्धत्त इति धर्मः ॥ पृथिवी धर्ममूर्धनीति च प्रयोगान्मोक्षधर्मे ॥ भारभृत्कथितो योगी च ॥ भर्तासन्भ्रियमाणो बिभर्तीति च श्रुतिः ॥ धर्मोवा इदमग्रआसीन्नपृथिवी न वायुर्नाकाशोन ब्रह्मा

अश्रद्दधानाःपुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मांनिवर्तंतेमृत्यु संसारवर्त्मनि ॥ ३ ॥

नरुद्रो न देवा न ऋषयः सोध्यायदिति च सामवेदशाखायाम् ॥ २ ॥ ३ ॥

क इत्यत आह ॥ भर्तेति ॥ भर्तासन्नेव भ्रियमाणोन स्वकीयस्थित्यै ॥ धर्मशब्दस्य भगवद्वाचित्वं कुत इत्यत आह ॥ धर्मो वाइति ॥ इ दमग्रे अस्याग्रे ॥ अत्र पुण्यं धर्मः किं न स्यादिति शंकानिरासार्थं सोऽध्यायदिति वाक्यशेषोदाहरणम् ॥ २ ॥ ३ ॥

॥क०॥प्रसिद्धत्वादिति॥तथा च तत्कथनमयुक्तम॥अप्राप्तेऽर्थे शास्त्रमर्थवदिति न्यायादिति भावः ॥धृञो मनप्रत्यय इति ॥ अनेन धरतीति धर्म इत्येव व्युत्पत्तिः धत्त इति भाष्यंत्वर्थ कथनमात्रमिति सूचयति ॥ तथा च धृञ् धारण इत्यस्मादर्तिस्तुसु इत्यादुणादिसूत्रेण मनप्रत्यये सार्वधातुकार्धधातुकयोरिति गुणे रपरत्वे च धर्म इति भवतीति भावः ॥ पर्वतोपरी त्यर्थ इति ॥ पृथिवीधर्मेत्यस्यार्थः पर्वतेति ॥ तस्य पृथिवीधारकत्वात अत एव भूधर इति प्रसिद्धिः ॥ मूर्धनीत्यस्यार्थ उपरीतीति विवेकः ॥ २ ॥ ३ ॥ ॥

१ पितामाहाधारत्वेनेत्यर्थः

श्री० ॥ इत्यस्येति ॥ धर्म्यपदेनोक्तस्येत्यर्थः ॥ इत्यस्य चेति ॥ प्रत्यक्षावगमशब्देनोक्तस्य चेत्यर्थः ॥ साधनत्वमिति ॥ अत एव पूर्वं प्रत्यक्षं ब्रह्मावगम्यते येनेत्युक्तमिति द्रष्टव्यं ॥ तत ॥ अवगतिसाधनत्वम् ॥ ननु कथं न विरुद्धं एकस्मिन्नेव ज्ञाने साधनत्वसाध्यत्वयोर्योगादित्यत आह ॥ परोक्षज्ञानस्येति ॥ तथा च धर्म्यं ब्रह्मविषयं प्रत्यक्षावगमं ब्रह्मापरोक्षज्ञानसाधनं ज्ञानं परोक्षज्ञानं च प्रवक्ष्यामीति गीतार्थो द्रष्टव्यः ॥प्रशंसादिकमित्यत्रादिपदेनाश्रद्दधानानां निंदा ग्राह्या॥तथाभूतमिति॥प्रशंसादिरूपमित्यर्थः ॥ उत प्रतिज्ञातं किंचिदुच्यतइत्यन्वयः ॥ विशेषणेति ॥ अव्यक्तमूर्तिनेति विशेषणेत्यर्थः ॥ ४ ॥ ननु पृथिव्यास्तद्गतभूतानां च परस्परसंबंधवत् विष्णोस्तद्गतभूतानां च परस्परसंबंधोऽस्त्येवातः कथं व्यतिरेकदृष्टांतत्वमित्यत आह ॥ स्पर्शनेंद्रियेणेति ॥ अन्योन्यधर्मसंक्रांतिमिति ॥ पृथ्वीगतगंधादेर्भूतशरीरे भूतशरीरगतगंधादेस्तु पृथिव्यां वर्तनमिति भावः॥ कु० ॥ ब्रह्मावगम्यत इति॥

एवंतर्हि पुनरुक्तिः स्यात् ब्रह्मविषयं ज्ञानमित्यस्य ब्रह्मावगम्यते विषयीक्रियतेऽनेन ज्ञानेनेत्यस्य च भेदाभावादित्यत आह ॥ प्रत्यक्षेति ॥ नावगमशब्देनविषयीकरणमुच्यते ॥किंतु अवगतिसाधनत्वं॥न च ज्ञानस्य तद्विरुद्धम्॥परोक्षज्ञानस्यापरोक्षज्ञानसाधनत्वोपपत्तेरिति भावः॥ज्ञानं विज्ञानसहितं प्रवक्ष्यामीति प्रतिज्ञाय यज्ज्ञात्वेत्यादिना तत्प्रशंसादिकमुक्तम्॥अतो मया ततमित्यादिकमपि किं तथाभूतमेव किंचिदुत प्रतिज्ञातमुच्यत इति शंकायामाह ॥ तदिति ॥ प्रतिज्ञातमित्यर्थः ॥ यस्यापरोक्षज्ञानसाधनत्वमुक्तं तदिति वा ॥ कृत्स्नाध्यायप्रतिपाद्योक्तिरियम्॥

प्रत्यक्षावगमशब्देनापरोक्षज्ञानसाधनत्वमुक्तम् ॥ तज्ज्ञानाद्याह ॥ मयेति ॥ तर्हि किमिति न दृश्यत इत्यत आह ॥ अव्यक्तमूर्तिनेति ॥ ४ ॥ मत्स्थत्वेपि ॥ यथा पृथिव्यां स्पृष्ट्वा स्थितानि न तथा मयीत्या

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४ ॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्॥भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥५॥

ह ॥ न चेति ॥ न दृश्यश्चक्षुषा चासौ न स्पृश्यः स्पर्शनेन चेति हि मोक्षधर्मे ॥

विशेषणवैयर्थ्यमाशंक्याह ॥ तर्हीति ॥ सर्वव्यापी चेदित्यर्थः ॥ न दृश्यते सर्वत्रेति शेषः ॥ ४ ॥ मत्स्थानि सर्वभूतानीत्युक्त्वा पुनः कथं न च मत्स्थानीति व्याहतमुच्यत इत्यत आह ॥ मत्स्थत्वेऽपीति ॥ स्पृष्ट्वेति ॥ स्पर्शनेंद्रियेण तां ज्ञात्वाऽन्योन्यधर्मसंक्रांतिमासाद्य चेत्यर्थः ॥

परमेश्वरस्य स्पर्शनाद्यवेद्यत्वे प्रमाणमाह ॥ नेति ॥ गीता प्रत्यक्षशब्दार्थानुवादो ब्रह्मेति ॥ अवगमशब्दार्थानुवादो गम्यत इत्यादि॥तत्प्रशंसादिकमिति ॥ आदिपदात् श्रद्दधाना इतिश्लोकार्थसंग्रहः॥ ननु मया ततमित्यादेर्ज्ञानप्रतिपादकत्वाज्ज्ञानमाहेति वक्तव्ये व्यर्थमादिपदमित्यत आह ॥ कृत्स्नाध्यायेति ॥ ४ ॥ ननु पृथिवीतद्गतभूतवद्विष्णुतद्गतभूतानामपि संबंधसत्वात्कथं न तथा मयीत्युक्तमित्यत आह॥स्पर्शनेंद्रियेणेति ॥ संक्रांतिमिति ॥ पृथिवीतद्गतभूतयोरन्योन्यं गंधादिधर्मसंक्रमवत् संक्रांतिमित्यर्थः ॥ ५ ॥

श्री० ॥ इदम् ॥ भूतभावनत्वम् ॥ माहात्म्यम् ॥ भूतभावनत्वरूपम् ॥ ५॥ नन्वन्योन्यधर्मासंक्रांतौ कथमिदमुदाहरणम् ॥ वायुनिष्ठस्पर्शाख्यधर्मसंक्रमणस्याकाशे स्पर्शाभावेनाभावेऽपि आकाशनिष्ठधर्मासंक्रमणं वायौ कथम् परान्वयाच्छब्दवांश्चेति न्यायेनाकाशनिष्ठशब्दाख्यधर्मसंक्रमणस्य सत्वात् ॥ न हि स्पर्शाद्याप्नोतीति चायुक्तम्॥ आकाशे स्पर्शाभावेन वायुराकाशनिष्ठस्पर्शादिनाप्नोतीति तन्निषेधायोगादित्यत आह॥ स्पर्शादीति तद्धर्मोपलक्षणमिति ॥ आकाशनिष्ठशब्दातिरिक्तभूतमप्यामितामिति प्रमाणसिद्धनीलरूपत्वाकाशत्वशब्दोपादानकृत्वादिधर्मोपलक्षणं कार्यम् ॥ जहत्स्वार्थलक्षणेयम् ॥ तथा च न ह्याकाशस्थितो वायुः स्पर्शाद्याप्नोति ॥ नीलरूपत्वाद्याकाशनिष्ठधर्मसंक्रांतिं नाप्नोतीति यावत् ॥ तथाकाशः वायुनिष्ठस्पर्शनीरूपत्वादिसंक्रांतिं च नाप्नोतीति च द्रष्टव्यम् ॥ तथा चान्योन्यधर्मासंक्रांतावुदाहरणं मयुक्तमिति भावः ॥ ६ ॥ ॥ कृ० ॥ ननु मत्स्थानि न तु मत्स्थानीत्युभयस्य

संज्ञया शब्देनैव संज्ञासम्यग् ज्ञानं यस्यासौ तथोक्तः ॥ मत्स्थानीत्यादेरुक्तत्वात् भूतभृत्यादिकं पुनरुक्तमित्यत आह ॥ ममेति॥ प्राक् भूताधारत्वादिकं स्वस्योक्तम् ॥अत्र पुनरव्यक्तमूर्तिनेति मूर्तावुक्तायांमास्मदादीनामिव भिन्नेति भ्रांतिनिरासार्थं स्वलक्षणं स्वदेहस्योच्यत इत्यर्थः॥ भूतभावनत्वस्याधिकस्योक्तेश्च न पुनरुक्तिरिति भावेनोक्तम् ॥ भूतेति ॥ स्यादिदं व्याख्यानं यदि भगवद्देहस्येदं भवेत् तदेव कुत इत्यत आ

संज्ञा संज्ञ इति च॥ममात्मा देह एव भूतभावनः॥महाविभूतेर्माहात्म्यशरीरेति हि मोक्षधर्मे॥५॥मत्स्थानि न च मत्स्थानीत्यत्रदृष्टांतमाह॥यथाकाशस्थित इति ॥ न ह्याकाशस्थितो वायुः स्पर्शाद्याप्नोति ॥६ ॥

यथाकाशःस्थितो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

ह ॥ महाविभूतेरिति माहात्म्यमेव शरीरं यस्यासौ तथोक्तः ॥ ५ ॥ एकमेकत्राश्रितमित्यत्रासंभवनाभावात् किं तद्दृष्टांतोक्त्येत्यत आह ॥ मत्स्थानीति ॥ तत्र स्थितत्वेऽप्यन्योन्यधर्मासंक्रात्याद्यावित्यर्थःतदत्र न प्रतीयत इत्यतो व्याचष्टे ॥ न हीति ॥ स्पर्शादीति तद्धर्मोपलक्षणम्॥६॥

दृष्टांतमाहेत्ययुक्तम् ॥ गीतायां मत्स्थानीत्यवैव दृष्टांतप्रतिपादनादित्यत आह ॥ तत्र स्थितत्वेऽपीति ॥ ननु स्पर्शस्याकाशावृत्तित्वात्तद्धर्मासंक्रांत्युपादनाय कथं स्पर्शग्रहणमित्यत आह ॥ तद्धर्मेति ॥ आकाशधर्मेत्यर्थः ॥ भाष्ये त्वन्योन्यधर्मसंक्रांत्यभावस्याभिप्रेतत्वाद्वायुधर्म आकाशे न संक्रामतीति प्रदर्शनाय स्पर्शग्रहणमिति बोध्यम् ॥ ६॥

श्री० ॥ तत्कारणत्वमिति ॥ गीतायांतस्यैवाभिधानादिति भावः ॥ ७ ॥ केवलस्य॥प्रकृत्यवष्टंभरहितस्य ॥ सर्वज्ञतातृप्तिरित्युक्तप्रकारेणेति ॥ सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता
नित्यमनल्पशक्तिः ॥ अनंतशक्तिश्च विभोर्विधिज्ञाः मत.षडंगानि वदंति विष्णोरिति प्रमाणोक्तप्रकारेणेत्यर्थः ॥ ८० ॥ ननु प्रलयादे विष्णुमाहात्म्यत्वाभावात्कथंज्ञानप्रदर्शनार्थमित्युक्त
यथा मयाततमित्याद्युक्तोपपादनार्थान्युत्तरवाक्यानि॥न तथा सर्वभूतानीत्यादि॥किं तु स्वतंत्रमेव ज्ञानप्रतिपादकमिति भावेनाह॥ज्ञानेति॥प्रलयादीति
तत्कारणत्वम्॥प्रकृतिं स्वामवष्टभ्येति वचनात्॥७॥तद्विकलस्य भगवतो न सामर्थ्यमिति प्रतीतिनिरासार्थमाह॥प्रकृतीति॥तथा लीलयैव न तु केवल
स्य सामर्थ्याभावादिति शेषः॥कुत एतत्॥भगवतसर्वसामर्थ्यसंपूर्णस्य प्रमितत्वादित्याह॥सर्वेति सर्ववस्तुसामर्थ्यैः ॥एवं भूतवत् पारतंत्र्याद्युपेतं किं

ज्ञानप्रदर्शनार्थं प्रलयादि प्रपंचयति ॥ सर्वभूतानीत्यादिना ॥ ७ ॥ प्रकृत्यवष्टंभस्तु यथा कश्चित्सम
र्थोपि पादेन गंतुं लीलया दंडमवष्टभ्य गच्छति ॥ सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसीति ॥ सर्वभूतगु
णैर्युक्तं देवं मां ज्ञातुमर्हसीति च मोक्षधर्मे॥विदित्वा सप्त सूक्ष्माणि षडंगं च महेश्वरम्॥प्रधानविनियो

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम्॥कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥७॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

गस्थःपरं ब्रम्हाधिगच्छतीति च॥न कुत्र चिच्छक्तिरनंतरूपा विहन्यते तस्य महेश्वरस्य॥तथापि मायाम
धिरुह्य देवः प्रवर्तते सृष्टिविलापनेष्विति ऋग्वेदखिलेषु ॥ मय्यनंतगुणेऽनंते गुणतोऽनंतविग्रह इति
भागवते॥अथ कस्मादुच्यते परं ब्रह्मेति बृंहति बृंहयति चाथर्वणे परास्य शक्तिर्विविधैव श्रूयत इति च॥

तु देवं देवोत्तमम्॥पंचमहाभूतानि महदहंकारौ च सप्त सूक्ष्माणि सर्वज्ञता तृप्तिरित्युक्तप्रकारेण षडंगं प्रधानस्य मूलप्रकृतेर्विनियोगः कार्येषु यो
व्यापारस्तत्स्थस्तज्ज्ञानी॥मायामधिरुह्य प्रकृतिमवष्टभ्य॥मित्यत आह॥तत्कारणत्वमिति॥७ नन्विदं वाक्यं सर्वभूतगुणयुक्तत्वप्रतिपादकत्वात्कथं सर्वसामर्थ्यसंपूर्णत्वे मानमि
त्यत आह॥सर्ववस्तुसामर्थ्यैरिति॥सर्वज्ञता तृप्तिरित्युक्तेति॥ सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः॥अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानिमहेश्वरस्येत्युक्तेत्यर्थः॥

श्री० ॥ द्वितीयाविभक्त्युत्तमपुरुषयोर्व्यत्ययमंगीकृत्य व्याचष्टे॥ कं क इत्यादि ॥ भाष्येऽवशं पराधीनम् ॥ तत्कुत इत्यतः पराधीनत्वोपपादनाय प्रकृतेर्वशादित्युक्तम् । प्रकृत्यधीनत्वा दित्यर्थः ॥ मदधीनप्रकृत्यधीनत्वादत्यंतपराधीनामिति भावः ॥ मायावशं तस्मादेवचावशमित्यन्वयमभिप्रेत्य तस्मादित्यस्यार्थमाह ॥ तस्मादिति ॥ माया प्रकृतिः ॥ लोकशब्दस्य पुं गत्वादेतदिति लिंगव्यत्यय इत्यभिप्रेत्यैतदेतामित्युक्तम् ॥ अस्मि पामीति प्रायपाठादाह ॥ सृजमीति॥८॥अन्यस्येति॥अनुदासीनत्वातिरिक्तस्य वत्यर्थस्याभावात् ॥तथा च कर्मसु सक्तेत्व प्राप्त्याऽसक्तमित्येतद्विरुद्धं स्यादित्यर्थः॥सादृश्यामिति॥नानुदासीनत्वं वत्यर्थः॥किं तु सादृश्यमित्यर्थः॥ कृ०॥सर्जनशब्देन त्यागरूपविसर्जनग्रहणे स्रक्ष्यसीत्युपसंहारविरोध इति शंका

कं कः प्रवोचं प्रावोचत्॥प्रकृतेर्वशाद्विसृजामीत्याविद्यकर्मवेश्वरस्य कर्तृत्वं वस्तुतस्तु निष्क्रियत्वमित्युच्यत इत्यन्यथाप्रतीतिनिरासायान्यथा न्वयमाह ॥ प्रकृतेरिति ॥ कुत एतदित्यतः पूर्वोक्तार्थसहितेत्यत्र प्रमाणमाह ॥ त्वमेवेति ॥ एतत्सर्जन एतस्य लोकस्य सृष्ट्याम् ॥ अन्य स्मिन्नपि पालनादौ सर्वकर्मणि ॥ तस्मान्मायावशत्वादेवावशम् एतदेतं स्रक्ष्यासि सृजासि ॥ ८ ॥ स्वतः कर्तृत्वे कथमुदासीनत्वमुच्यत इति

विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमं तमाप्तेत्यादेश्च॥प्रकृतेर्वशादवशं॥त्वमेवैतत्सर्जने सर्वकर्मण्यनंत शक्तोऽपि स्वमाययैव॥मायावशं चावशं लो

न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

कमेतत्तस्मात्स्रक्ष्यस्यसि पार्साश विष्णो इति गौतमाखिलेषु८ उदासीनवन्नतूदासीनः॥तदर्थमाह॥असक्तमिति चेत् न ॥ वतिना तस्य निषिद्धत्वादिति भावेनाह ॥ उदासीनवदिति ॥ अनुदासीनत्वेऽपि वतिर्व्यर्थः स्यात् ॥ अन्यस्य तदर्थस्याभावा दित्यत आह ॥ तदर्थमिति ॥ वत्यर्थं सादृश्यं स्वयमेव विवृणोतीत्यर्थः॥परिहरन्कर्मधारयभ्रांतिं निरस्यति॥एतस्येति ॥कर्मधारये सृष्टिसंबंधिनोऽलाभादिति भावः ॥

लोकशब्दस्य पुंस्त्वात्तदनुसारेणाह ॥ एतमिति ॥ अस्मि पामीति ॥ लडंतप्रायपाठविरोधात्कथं स्रक्ष्यसीति लडित्यत आह ॥ सृजसीति ॥ ८ ॥ तदर्हमित्यर्हार्थेऽपि वतिस्मरणात्तस्य चासक्तमित्यनेन प्रतिपादनादाह ॥ सादृश्यमिति ॥ सादृश्यस्य वतिनोक्तत्वात्पुनरुक्तिरित्यत आह ॥ विवृणोतीत्यर्थ इति ॥

श्री० ॥ भाष्ये न विद्यतेऽनुग्रहमंतरेण यस्य वाक्यमित्यवाक्यः ॥ न विद्यते आदरः आग्रहः आसक्तिर्यस्येति नादरः अवाक्यश्चासौ नादरश्चेत्यवाक्यनादर इत्यर्थः ॥ विशेषणं विशेष्येण बहुलमिति बहुलग्रहणाद्विशेषणयोरेवात्र समास इति ज्ञातव्यम्॥ यद्यपि न विद्यते आदर आश्चर्यबुद्धिर्यस्येति नादर इति तत्त्वप्रकाशिकायां व्याख्यातं तथाऽपि तस्यास्य प्रकृतानुपयोगात् परित्याग इति ध्येयम्॥ कथं हेतुःस्यादिति ॥ स्वतः कर्तृत्वाभावे हेतुत्वं स्पष्टमेवेति भावः ॥ केषां चित ॥ मीमांसकानाम् ॥ विष्णुर्येनेत्यादि ॥ ब्रह्मा येन कुलालवन्नियमितो ब्रह्मांडभांडोदरे विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे॥ रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मण इतितद्वचनादित्यर्थः ॥ स्वार्थे णिजिति भावेनाह ॥ नियच्छतीति ॥ ९ ॥

परमेश्वरस्य कर्मसु सक्त्यभावे प्रमाणमाह ॥ अवाक्येति॥सर्वथोदासीनएव किं न स्यादिति चेत् न ॥ तथा सति प्रकृत्यादीनामसत्वप्रसंगादिति भावेनाह ॥ द्रव्यमिति ॥ यदीश्वरस्य स्वतः कर्तृत्वं स्यात्तदोदासीनमित्येतत् न तु मां तानि कर्माणि निबध्नंतीत्यत्र कथं हेतुः स्यादि

अवाक्यनादर इतिश्रुतिः ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षयेति भागवते[1] ॥ यस्यासक्त्यैव सर्वकर्मशक्तिः कुतस्तस्य सर्वकर्मबंध इति भावः ॥ न कर्मणा वर्धते नो कनीयानिति हि श्रुतिः ॥ यःकर्माणि नियामयति कथं च तं कर्म बध्नाति ॥ ॥ ९ ॥

त्यत आह ॥ यस्येति ॥ असक्त्या अनादरेणानायासेनेति यावत् ॥ भगवतोऽपि कर्मबंधोऽस्तीति केषां चित्प्रलापः ॥ यथा विष्णुर्येनेत्यादि ॥ तन्निरासाय श्रुत्युपपत्ती प्राह ॥ न कर्मणेति ॥ नियामयति नियच्छति ॥ ९ ॥

॥ कृ० ॥ कथं हेतुः स्यादिति ॥ उदासीनवदासीनत्वं नाम कर्मासक्तत्वमिति व्याख्यातम् ॥ कर्तृत्वे च जन्य जनक भावसंबंध प्राप्तसक्त्यायोगादसिद्धिरासीनेरिति भावः ॥ यस्येत्यादिभाष्येऽसक्तेर्हेतुविशेषणत्वांगीकारान्नासिद्धिरिति बोध्यम्॥ननु जन्यजनक भावसंबंधसत्वात्कथमसक्त्येत्युक्तमित्यत आह॥ अनादरेणेति॥ननु अनादरः परिभवः इत्यसंकेरनादरस्तिरस्कारो वा आदराभावोवा उभयत्राप्यसिद्धिः ॥ ब्रह्मादिमोक्षार्थं सृष्ट्यादिकरणेन सृष्ट्यादिशक्तितिरस्कारपूर्वकत्वाभावात ॥ आदरपूर्वकत्वाच्चेत्यत आह ॥ अनायासेनेति यावदिति ॥ यद्यप्यसक्त्येत्यस्यैवानायासेनेतिव्याख्यानं कर्तुं शक्यम ॥ तथाप्यसक्तत्वे प्रागुदाहृतश्रुत्यनुसारायानादरेणेति व्याख्याय तत्फलितमिदमुक्तम ॥ विष्णुर्येनेत्यादीति ॥ ब्रह्मा येन कुलालवन्नियमितो ब्रह्मांडभांडोदरे विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे॥रुद्रोयेन कपालपाणिपुटके भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणइतीत्यर्थः ॥

[1] भागवत स्कं० २ अ० १० श्लो० १२.

श्रीः ॥ ननु भगवन् उदासीनवत्त्वं [illegible] शंकायामाह । [illegible] ॥ व्याख्यानम् । [illegible] ॥ ननूदासीनवत्त्वमनी
न्मष्टत्वादि न [illegible] । प्रकृतिरेव [illegible] । [illegible] । तृतीयया [illegible] ॥ प्रकृतिनिष्ठसृतिप्र
योजककर्ता ॥ [illegible] नैरपेक्ष्येण [illegible] ॥ दर्शनात् ॥ तदुक्ति
अध्यक्षेणेति दृष्टृत्वोक्तिः । अन्यथेति । [illegible] ॥

कथं तर्ह्यहं केवलं द्रष्टैव प्रकृतिरेव चराचरं सूयत इत्युक्तवाक्यमित्यत [illegible] प्रश्नस्य व्याख्या ॥ उदासीनवदिति ॥ भगवतोदासीन
सादृश्यं स्वयमेव व्याख्यातम् ॥ तदज्ञात्वा क्रियाभाव एवेति [illegible] ॥ पुरा प्रकृतिं स्वामवष्टभ्य विसृजामीत्युक्तम् ॥ इदानीं

उदासीनवदिति चेत्स्वयमेव प्रकृतिः सूयत इत्यत आह ॥ मयेति ॥ प्रकृतिसृतिद्रष्टा कर्ता अहमेवेत्यर्थः ॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ॥ हेतुनाऽनेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥

तूदासीनवदिति निष्क्रियत्वमुच्यते ॥ एवं तर्हि प्रकृतिरेव सूयते त्वयि तु तत्सन्निधानात्कर्तृत्वोपचारमात्रमित्यापन्नमिति तन्निरुत्यर्थमिदं वा
क्यम् ॥ तत्राध्यक्षेणेत्यनेन प्रकृतिसृतेर्द्रष्टाहमेवेत्युच्यते ॥ तृतीयया च तत्प्रयोजककर्ता चाहमेव ॥ न तु तस्याः स्वातंत्र्यमिति ॥ दर्शनपूर्वकत्वा
त्प्रयोजकत्वस्य तदुक्तिः ॥ अन्यथा तृतीया व्यर्था स्यादिति भावः

॥ कृ० ॥ ननु नियामयतीत्यस्य हेतुमण्ण्यंतत्वे नियमनकारयितृत्वं लब्धं तन्न युक्तम् ॥ अन्यस्य नियमनकर्तुरभावेन तत्प्रयुक्तकारयितृत्वायोगादित्यत आह॥ नियच्छतीति ॥ स्वार्थे
कोणिजिति भावः ॥ ९ ॥ व्याख्यानमिति ॥ अमक्तमित्यनेनेति शेषः ॥ ननूदासीनवदिति चेत्तर्हि जगतःसृष्ट्यादि न स्यादिति शंकनीयम् ॥ प्रकृतिरेव सूयत इति शंकायां किं बीज
मित्यत आह ॥ पुरेति तृतीयया चेति ॥ मयेतितृतीयेत्यर्थः ॥ ननु कर्तृत्वमौपचारिकमित्याक्षेपे तन्मात्रं वक्तव्यं दर्शनं किमर्थमुक्तमित्यत आह ॥ दर्शनपूर्वकत्वादिति ॥ अहं केवलं
द्रष्टैव प्रकृतिरेव चराचरं सूयत इति प्रागुक्तापातप्रतीतार्थांगीकारबाधकमाह ॥ अन्यथेति ॥

॥ श्री० ॥ ननु लुङ्लङ्लृङ्क्ष्वड्‌डुदात इति लुङादावेवाडागमविधानेन लिटि तद्विधानाभावात् विससर्जेति वक्तव्यम् वि अससर्जेति कथमित्यत आह ॥ बहुलेति ॥ बहुलं छंदसीति सूत्रे बहुलग्रहणाल्लिट्यपि अडागम इत्यर्थः ॥ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ॥ इति स्मवैय्याकरणाः प्रयोगे चतुर्विधं बाहुलिकं वदंतीति वचनबलेन बहुलशब्दार्थो द्रष्टव्यः ॥ भ्रांतीति ॥ भ्रांतिसिद्धं यन्मानुषत्वं तदेव भगवताऽनूद्यते ननु वास्तवमित्यर्थः ॥

प्रकृतिप्रयोजकत्वंपरमेश्वरस्य कुत इत्यत आह॥ यत इति ॥ प्रसूता सृष्टावभिमुखीभूता प्रसूती प्रसूतिः॥तोयेन कर्मणा व्यससर्ज विससर्ज ॥बहुलग्रहणात ॥१०॥ उत्तरवाक्यस्य संगत्यप्रतीतेस्तामाह॥तर्हीति ॥ यदित्वमेव जगतः सृष्टिस्थितिसंहाराणां कर्ता॥कश्चिदवज्ञानात् ॥

तथा च श्रुतिः ॥ यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्यामिति ॥ १०॥ तर्हि केचित्कथं त्वामवजानंति का च तेषा गतिरित्यत आह ॥ अवजानंतीत्यादिना ॥मानुषीं तनुं मूढानां मानुषवत्प्र

अवजानंति मां मूढा मानुषीं तनुमाश्रितम् ॥ परं भावमजानंतो मम भूतमहेश्वरम् ॥११॥

तीतां तनुं न तु मनुष्यरूपां ॥ उक्तं च मोक्षधर्मे ॥ यत्किंचदिह लोकेऽस्मिन्देहबद्धं विशांपते ॥ सर्वं पंचभिराविष्टं भूतैरीश्वरबुद्धिजैः ॥

तेषां चानर्थाभावादुक्तमसदिति शंकाभिप्रायः॥मानुषीं तनुमाश्रितमित्येतदन्यथाप्रतीतिनिरासाय व्याचष्टे॥मानुषीमिति ॥भ्रांत्यनुवाद एवायमिति भावः ॥ कुतो नेत्यत आह ॥ उक्तंचेति॥चोहेतौ॥शरीराणि हि भौतिकानि भवंति॥भूतानि चेश्वरस्य बुद्धिजानि तत्कथं तानि बध्नीयुरित्यर्थः॥

॥कृ० ॥नन्वत्र प्रकृतेर्भगवदुत्पन्नत्वमयुक्तमेवोच्यते ॥ प्रकृतं च परमेश्वरस्य प्रेरकत्वं नोच्यत इत्यत आह॥ सृष्टावभिमुखीकृतेति ॥कृदिकारादक्तिन इति क्तिनंतान्ङीपो निषेधात्प्रसूतीति कथमित्यत आह ॥ प्रसूतिरिति ॥ ननु लुङ्लङ्लृङ्क्ष्वड्‌डुदात्त इत्युक्तेःकथंलिट्यडागम इत्यत आह ॥ विससर्जेति ॥ श्रुतावडागमप्रयोगंसमर्थयते ॥ बहुलेति ॥ बहुलं छंदस्यमाङ्योगेपीति सूत्रे बहुलग्रहणाल्लिट्यडागमइत्यर्थः ॥ ननु तनोर्मानुषत्वाभावे सर्वज्ञस्य भगवतस्तवज्ज्ञानाभावेन तदभिलापायोग इत्यत आह ॥ भ्रांत्यनुवाद इति ॥ कृष्णेन लोकस्य यद्भ्रांतिसिद्धं तदनूद्यत इत्यर्थः ॥

॥ श्री० ॥ **अत्रैवेति** ॥ परमात्मनो भूतसंबंधाभाव इत्यर्थः ॥ **हेतव इति** ॥ तथाचेश्वरो हीत्यादिहेतुगर्भविशेषणमितिभावः ॥ **तस्यशुश्रूषुरिति** ॥ ननु शुश्रूषुरित्यस्य सन्नंतत्वेन सनाशंसभिक्ष उरित्यनेनोप्रत्ययांतत्वादुप्रत्ययांतस्य च न लोकेतिषष्ठ्या निषेधात् हरिं दिदृक्षुरितिवत् तं शुश्रूषुरितिवक्तव्ये तस्येति कथमुक्तमिति चेदुच्यते ॥ कर्तृकर्मणोः कृतीति प्राप्ता या कर्तरि कर्मणि च षष्ठी सैव न लोकेति निषिध्यते न तु शेष इत्यनेन प्राप्ता संबंधमात्रे षष्ठी ॥ प्रकृते च कर्तृकर्मणोरित्यनेन कर्तरि षष्ठी नोच्यते येन निषेधावतारः स्यात् किंतु शेष इति संबंधमात्र एव । न ह्यस्याः प्रतिषेधोस्तीति ॥ नन्वत्रापि शुश्रूषायां भगवतः कर्मत्वं विवक्ष्यतां तथा च कर्मणि प्राप्तद्वितीयापवादकत्वेन कर्तृकर्मणोरित्यनेन प्राप्ता षष्ठी न लोके त्यनेनापोद्यते ॥ एवं चापवादस्यापवादेपुनरुत्सर्गस्यैव स्थितिरिति न्यायेन कर्मणि द्वितीयैव प्राप्नोति तथा च तमित्येव वक्तव्यमिति चेत्सत्यम् ॥ तथात्वे साक्षाद्भगवत्कर्मकतत्पादसंवहनादिरूपैव सेवा प्राप्नोति न तु तत्संबंधिसेवा अनया क्रियमाणा जगत्सर्जनादिरूपा सेवैव सा च न भगवत्कार्मिका भगवत्संबंधिनी तु भवत्यतः सामान्यतो भगवत्संबंधिसेवामात्रप्राप्त्यर्थं शेषे षष्ठीमाश्रित्य तस्येत्युक्तमिति गुरुचरणानां संप्रदायः ॥ भावबोधे तु नवा निर्दिष्टमनित्यमिति न लोकेति षष्ठीप्रतिषेधो न प्रवर्तत इत्युक्तम् ॥

अत्रैवेश्वरो हीत्यादिनान्ये हेतवोऽभिधीयंते ॥ विराट् नित्याभिव्यक्तरूपः वरदो मोक्षप्रदः ॥ सगुणः ॥ स्वातंत्र्यादिगुणवान् ॥भूतानि प्रली

ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् भूतांतरात्मा वरदः सगुणो निर्गुणोऽपि च भूतप्रलयमव्यक्तं शुश्रूषुर्नृपसत्तमेति

यंते यस्मिंस्तदव्यक्तं ॥ तदभिमानिनी देवता तस्य शुश्रूषुः ॥

॥ कृ० ॥ **अत्रैवेति** ॥ देहसंबंधाभावइत्यर्थः ॥ ननु बाहुजः क्षत्रियो विराडित्यमरोक्तेः क्षत्रियत्वं विराट्त्वंतत्कथमबद्धत्वे हेतुर्व्यभिचारादित्यत आह ॥ **नित्याभिव्यक्तेति** ॥ राजृदीप्तावित्यस्माद्विशेषेण राजत इत्यर्थे सत्सूद्विषेत्यादिना क्विप् ॥ विशेषेण राजनं च नित्याभिव्यक्तरूपत्वमेवेति भावः ॥ रुद्रादौ व्यभिचाराद्वरप्रदत्वं नाबद्धत्वसाधकमित्यत आह ॥ **मोक्षद इति** ॥ सत्वादिगुणवत्वं न बद्धत्वे लिंगं विरोधादित्यत आह ॥ स्वातंत्र्यादीति ॥ ननु तत्पुरुषत्वे तादात्म्यं क्लीबत्वं चाऽयुक्तंव्यधिकरणबहुव्रीहिस्त्वगतिकागतिरित्यत आह ॥**भूतानीति** ॥ प्र पूर्वाल्लीयतेरधिकरणे एरजित्यच् अधिकरणेऽजंतस्य न विशेष्यलिंगत्वात्क्लीबत्वं युक्तम् ॥ कृत्युट् नपुंसकभावे स्त्रिया क्तिन्नादयो मताः ॥ अतो घञजपः पुंसीति भावे जंतस्य पुंस्त्वनियमोक्त्या परिशेषेणाधिकरणार्थाजंतस्य विशेष्यलिंगत्वावगमात् ॥ एवं च षष्ठीतत्पुरुषे नानुपपत्तिः ॥टीका तु तात्पर्यार्थप्रदर्शिकेति बोध्यम् ॥ अव्यक्तस्य जडत्वात्कथं शुश्रूषुत्वमित्यत आह ॥ **तदभिमानिनीति** ॥ शुश्रूषुरित्यतः प्रागध्याहार्यमाह ॥ **तस्य शुश्रूषुरिति** ॥ यद्यपि कर्तृकर्मणोरितिप्राप्तषष्ठ्या न लोकेत्यनेन शुश्रूषुरित्युप्रत्ययप्रयोगे निषेधात्तमित्यध्याहर्तुमुचितम् ॥ तथाऽपि न लोकेति कारकषष्ठ्यानिषेधे शेषषष्ठ्या अनिषेधाच्छेषषष्ठीयमिति भावेन तस्येत्युक्तम् ॥

॥ श्री० ॥ नन्वनुपक्रम शुश्रूषेति भवेत्तत्कथं शुश्रूषुरिति पुल्लिंगमित्यत आह ॥ लिंगव्यत्यय इति ॥ एवमिति भूतादिवंशाभावेन मानुषदेहाभाव इत्यर्थः ॥ युक्तिसाम्यादिति ॥ भगवद्‌वतारत्वयुक्तेः साम्यादित्यर्थः ॥ विभक्तरूपैरित्युत्तरभाष्यानुसारेणाह ॥ व्यभजदिति ॥पंचात्मकः स भगवान् द्विपडात्मकोऽभवदित्याद्युक्तप्रकारेणाऽऽदिसृष्टावेव व्यभजदित्यर्थः ॥ उत्तरत्रेति ॥ ब्रह्मांडोत्पत्त्यनंतरं ब्रह्मणो दैनंदिनकल्पे तत्तद्दैत्यकृतपीडापरिहारं प्रयोजनीकृत्य प्रादुर्भावभवायेत्यर्थः ॥ प्रागेवेति तथा च कृष्णादिरूपं कथं मानुषं स्यादित्याशयः॥

लिंगव्यत्ययश्छांदसः ॥ अस्त्वेतन्मूलरूपविषयम् ॥ अवतारस्य तु कृष्णस्य मानुषत्वं भवत्वित्यत आह ॥ अवतारेति ॥ यत्तद्दशिवान् ब्रह्मा रूपं हयशिरोधरमिति हयग्रीवावतारप्रसंगे अस्तु हयग्रीवस्यैवं ॥ कृष्णस्तुमानुषशरीर एव किं नस्यादितिचेन्न ॥ युक्तिसाम्यात् ॥

अवतारप्रसंगे चैतदुक्तम्॥ अतो नावताराःपृथक् शंक्याः ॥ रूपाण्यनेकान्यसृजत्प्रादुर्भावभवाय सः॥ वाराहं नारसिंहं च वामनं मानुषं तथेति ॥ तत्रैव प्रथमसर्गकाल एवावताररूपविभक्त्युक्तेः ॥ अतो न तेषां मानुषत्वादिर्विना भ्रांतिम् ॥

विशेषप्रमाणाच्चेत्याह ॥ रूपाणीति ॥ असृजत्व्यभजत् ॥ प्रादुर्भावभवायोत्तरत्र स नारायणः ॥ मानुषं कृष्णादिकं ॥ तत्रैव मोक्षधर्म एव ॥ प्रथमसर्गकाल एव ॥ मानुषादिजात्युत्पत्तेः प्रागेवेत्यर्थः ॥ उपसंहरति ॥ अत इति ॥ तेषामवताराणाम् ॥

॥कृ०॥ननु शुश्रूषुशब्दस्य विशेष्यनिघ्नत्वाद्विशेष्यानुसारेण क्लीबत्वावश्यभावात्कथं पुंस्त्वमित्यत आह ॥ लिंगव्यत्यय इति ॥ वराहादिरूपाणामुत्पत्त्यभावादाह ॥ व्यभजदिति ॥ रूपविभागस्य प्रादुर्भावप्रयोजकत्वोपपादनायाऽध्याहरति ॥ उत्तरत्रेति ॥ ननु वामनस्य देवत्वात्कथमानुषत्वमित्याशंक्य मानुषमित्येतन्नविशेषणमिति भावेनाह ॥मानुषं कृष्णादिकमिति॥ ननु पाद्मब्रह्मकृतदैत्यादिसृष्ट्यनंतरं भूभारोद्धाराय भगवतावताररूपविभागः कृत इति मोक्षधर्मे ॥नारायणोपाख्याने स्पष्टमुक्तं तत्कथं प्रथमसर्गकाल एवेत्युक्तमित्यतो व्याचष्टे ॥ मनुष्यादिजात्युत्पत्तेः प्रागेवेत्यर्थ इति ॥

॥ श्री० ॥ ननु परंभावमिति द्वितीयांतभावशब्दस्य पुंल्लिंगत्वात्तद्विशेषणीभूतानां भूतशब्दमहच्छब्देश्वरशब्दानामपि पुंल्लिंगत्वात् भूतो महानीश्वरश्चेति वक्तव्यं कथं भूतंमहदीश्वरमिति नपुंसकलिंगप्रयोग इत्यत आह ॥ भावमिति ॥ सप्तमाध्याये परं भावमजानंत इत्यत्र भावं याथार्थ्यमिति व्याख्यातत्वात्तस्य च नपुंसकत्वात्तदनुसारेण भूतं महदीश्वरमिति नपुंसकलिंगप्रयोगो युक्त इति भावः ॥ ननु तर्हि वरेशमिति स्यादित्यत आह ॥ षष्ठ्या इति ॥ षष्ठ्यंतवरशब्दस्येत्यर्थः ॥ देववीर्यमिति ॥ प्रजापते रेतो देवा इति श्रुतेरिति भावः ॥

उत्तरपदविरोधश्चान्यथेतिभावेन तद्व्याचष्टे ॥ भूतमिति ॥ भूतं सर्वदा विद्यमानमिति कालानंत्यमाचष्टे ॥ महदिति ॥ देशानंत्यमीश्वरमिति गुणानंत्यम् ॥ भावं याथार्थ्यमिति व्याख्यानापेक्षया नपुंसकम् ॥ अत्र श्रुतिंपठति ॥ तथा हीति ॥ ईशं वराणामितीश्वरम् ॥ षष्ठ्याः ॥

भूतं महदीश्वरं चेति भूतमहेश्वरम्॥तथा हि बाभ्रव्यशाखायाम् अनाद्यनंतं परिपूर्णरूपमीशं वराणामपि देववीर्यमिति ॥

परनिपातः ॥ देवाः वीर्यं पुत्रायस्यासौ तथोक्तः ॥

॥ कृ० ॥ननु भूतं महदीश्वरं चेति कथं क्लीबत्वं भावशब्दस्य पुंस्त्वेन तद्विशेषणानां विशेष्यनिघ्नानां भूतादिशब्दानामपिपुंस्त्वावश्यंभावादित्यत आह ॥ व्याख्यानापेक्षयेति ॥ सप्तमाध्याये भावं याथार्थ्यमिति यद्व्याख्यानं तदपेक्षयेत्यर्थः ॥ अयं भावः ॥ भावशब्दोऽत्र भूयतेऽनुभूतइति कर्मणि घञंतः ॥ श्रिणीभुवोऽनुपसर्ग इत्युक्तेः ॥ कर्माद्यर्थघञंतं चाऽभिधेयलिंगम् ॥ कृत्युट् नपुंसके भावे स्त्रियां क्तिन्नादयो मताः ॥ अतो घञजपः पुंसीति भावे घञंतस्य पुंस्त्वनियमोक्त्या परिशेषेण कर्माद्यर्थघञंतस्याऽभिधेयलिंगत्वलाभात् ॥ संबंधमनुवर्तिष्यत इति महाभाष्यप्रयोगाच्च ॥ प्रकृते च याथार्थ्यमाभिधेयं तच्च नपुंसकं प्रचुरप्रयोगात् ॥ अतो भावशब्दस्य क्लीबत्वात्तद्विशेषणभूतादिशब्देऽपि तद्युक्तमिति ॥ प्रकारांतरविस्तरस्तु अस्मत्परमगुरुश्रीयदुपत्याचार्यकृतसुधाटिप्पण्यामनुसंधेयः ॥ ननु तर्हि षष्ठीति समासशास्त्रे षष्ठ्यंतस्य प्रथमानिर्दिष्टत्वात् प्रथमानिर्दिष्टं समास उपसर्जनमित्युपसर्जनसंज्ञायामुपसर्जनं पूर्वमिति पूर्वप्रयोगे वरेशमिति स्यादित्यत आह॥षष्ठ्याः परनिपात इति ॥ राजदंतादिषु परमितिसूत्रेणेति शेषः ॥ श्रुत्यनुसारेण प्रकृतस्याऽपि राजदंतादिषु बोधव्यत्वादिति भावः ॥ पृषोदरादित्वादीशशब्दांत इति बोध्यम् ॥ यद्वा संज्ञाच्छंदसोर्दृष्टस्यैवाऽनुविधेयत्वात्परनिपात इति भावः ॥ तत्पुरुषत्वे वीर्यस्यैवाऽनादित्वादिसिद्धिः स्यान्नविष्णोरित्यत आह ॥ देवा इति ॥ ननु वीर्यशब्दार्थरेतसः कथं देवाभेद इत्यत आह ॥ पुत्रा इति ॥ उपादानोपादेययोरभेदाद्वीर्यपदं पुत्रपरमिति भावः ॥

॥ श्री० ॥ पुरोहितादिदेवनिकाया इति ॥ अनेन पुरोहित ॥ कायिक ॥ महाराजिकेति देवगणानां मतेत्युक्तं भवति पुरोहितेत्याद्यविभक्तिको निर्देशः ॥ तथा च पुरोहितो ब्रह्मे त्याद्यर्थो द्रष्टव्यः ॥ ब्रह्म पुरोहित कायिकेत्युक्त्याऽजं पुनर्ब्रह्मेति किमर्थमित्यत आह ॥ ब्रह्मेतीति ॥ ११ ॥ साफल्येति ॥ स्वीरस्वर्गरूपफलसद्भावादिति भावः ॥ उपलक्षण मिति ॥ गीतायां ज्ञानपदं भक्त्याद्युपलक्षकमित्यर्थः ॥ ॥ कृ० ॥ ननु ब्रह्मपुरोहितेति वाक्ये हेब्रह्म हेपुरोहितेत्यादि विष्णोः संबोधनमयुक्तम् ॥ विष्णोः पुरोहि

महतो भूतस्येति देशकालानंत्यमुच्यते ॥ वगणां देवानामीशत्वे ब्रह्मेति मोक्षधर्मवाक्यं प्रमाणंपुरोहितादिदेवनिकायास्त्वदधीना इत्यर्थः ॥ ब्रह्मेति द्विरुक्तिरादरार्था ॥ ११ ॥ किंच तेषां फलमित्यस्य परिहारो न दृश्यते ॥ अत आह ॥ तेषामिति ॥ अनर्थत्वप्रदर्शनाय व्याचष्टे ॥ वृथेति ॥ संपदादिप्राप्तिदर्शनात्कथमित्यत आह ॥ भगवदिति ॥ युद्धादिकर्मणांसाफल्यदर्शनात्कथं मोघकर्माण इत्यत आह ॥ यज्ञादीति ॥

अस्य महतोभूतस्य निश्वसितमितिच ॥ ब्रह्मपुरोहितब्रह्मकायिकमहाराजिकेति च मोक्षधर्मे ॥ ११ ॥

तेषांफलमाह ॥ मोघाशा इति ॥ वृथाशाः ॥ भगवद्द्वेषिभिराशासितं न किंचिदाप्यते ॥ यज्ञादिकर्माणि

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२ ॥

च वृथैव तेषाम् ॥ज्ञानं च॥केनापि ब्रह्मरुद्रादिभक्त्याद्युपायेन न कश्चित्पुरुषार्थ आमुष्मिकस्तैराप्यत इत्यर्थः ॥

ज्ञानं तत्त्वविषयं तेषां नास्त्येव ॥ अतः कथं तस्य मोघत्वमुच्यत इत्यत आह ॥ज्ञानं चेति ॥ज्ञानं च तेषां वृथेवेत्यस्य केनापीत्यर्थ इति संबंधः ॥ अनेन ज्ञानपदमुपलक्षणमितिचोक्तं भवति ॥

तादितादात्म्याभावादित्यत आह ॥ पुरोहितादिदेवनिकाया इति ॥ देवगणा इत्यर्थः ॥ अथ सधर्मणां स्यान्निकाय इतिअमरोक्तेरिति बोध्यं ॥ न च महाराजिकसाध्याश्चरुद्राश्चगणदेवता इत्यमरोक्तेर्महाराजिकशब्दस्य देवगणविशेषवाचित्वेऽपि पुरोहितकायिकशब्दयोस्तत्क यंये न देवगणा इति बहुवचनं प्रयुक्तमिति वाच्यम् ॥ मोक्षधर्मे गुह्यब्रह्मपुरोहितब्रह्मकायिकमहाराजिक आभास्वरतुषितेति पूर्वोत्तरदेवगणनान्निशब्दमाहचर्यादिति गृहाण ॥ त्वदधीना इति ॥ यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्युक्तेरितिभावः ॥ आदरार्थेति ॥ तात्पर्यज्ञापिकेत्यर्थः ॥ तेनाऽदरेद्विरुक्तेरननुशासनात्कथमेतादित्यपास्तम् ॥ एकप्रकारासकृदु क्तेस्तात्पर्यलिंगत्वप्रसिद्धेरिति भावः ॥ ११ ॥ ज्ञानं नेत्यतः परमध्याहार्यं दर्शयन्व्यवहितत्वात्संबंधं दर्शयति ॥ ज्ञानंचेति ॥

॥ श्री० ॥ तद्गतिं गता इति संबंध इति ॥ ईश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गता इति सप्तमस्कंधगतपूर्ववाक्येनान्वयः ॥

न केवलंपुरुषार्थानवाप्तिः ॥ अपि तु दुःखावाप्तिश्चेति भावेन तत्र प्रमाणान्याह ॥ वक्ष्यति चेति ॥ आ सम्यक् ॥ लोकांतस्य चंडालादेः ॥ पुष्करविष्टराये पद्मासनस्य पितरि ॥ भ्रूणानंतघ्नोऽनंतभ्रूणघ्नः ॥ यद्येवं कथं तर्हि भागवतादौ भगवत्द्वेषस्य मोक्षसाधनत्ववचनमित्यत

वक्ष्यति च॥तानहं द्विषतःक्रूरानित्यादि मोक्षधर्मे च॥कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम्॥ मज्जंति पितरस्तस्य नरके शाश्वतीः समाः॥यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं हरिम्॥कथं स न भवेद्दे प्यआलोकांतस्य कस्यचिदिति॥ सर्वोत्कृष्टे ज्ञानभक्ती हि यस्य नारायणे पुष्करविष्टराये ॥ सर्वावमे द्वेषयुतश्च तस्मिन्भ्रूणानंतघ्नोस्य समो नचैवेति सामवेदे शांडिल्यशाखायाम् ॥ द्वेषाच्चैद्यादयो नृपाः॥ वैरेणयन्नृपतयःशिशुपालपौंड्रसाल्वादयो गतिविलासविलोकनाद्यैः॥ध्यायंत आकृतधियः शयनासनादौ तत्साम्यमीयुरनुरक्तधियः पुनः किमिति भागवते ॥

आह ॥ द्वेषादिति ॥ तद्गतिं गता इति संबंधः ॥ वैरेण ध्यायंतः यदीयगत्यादिभिराकृतधियः ॥ आकृष्टबुद्धयः ॥

॥कृ० ॥ तद्गतिं गता इति संबंध इति ॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो इति सप्तमस्कंधश्लोकस्थस्य द्वेषादिति वाक्य स्यकामात्स्नेहाद्भयाद्द्वेषाद्यथाभक्त्येश्वरे मनः ॥आवेश्य तदघं हित्वा बहवस्तद्गतिंगता इति पूर्वश्लोकगतेन तद्गतिं गता इत्यनेन संबंध इत्यर्थः ॥

१ भा. स्कं. ७ अ. १ श्लो. ३२ ॥ २ स्कं. ११ अ. ५ श्लो. ४८ ॥

॥ श्री० ॥ न तु पौंड्रकादिविषये अत आह ॥ नित्येतीत्यादि ॥ यद्यपि पौंड्रके नरके चैव साल्वे कंसे च रुग्मिणि ॥ आविष्टास्तु हरेर्भक्तास्तद्भक्त्या हरिमापिर इत्यादिना एतेष्वपि स जीवप्रवेश उक्तस्तथापि शिशुपालादिदेहानां जयादिशुभजीवकर्मनिर्मितत्वेन तेषामेव तद्देहाभिमानित्वात्तद्देहावच्छेदेनाऽसुरसंबंधवशेन तत्कृतद्वेषस्य प्रामादिकत्वेन तेषां द्वेषफलतमःप्राप्तिर्न भवति ॥ तत्कृतस्वाभाविकभक्तिफलं शुभमेव भवति तत्प्रविष्टासुरगणामेव द्वेषफलं तम इति तेषामेव भक्तप्रियत्वज्ञापनार्थमित्युक्तगतिविषयत्वं ॥ पौंड्रकादिदेहानां तेनाद्यसुरकर्मनिर्मितत्वेन तेषामेव तद्देहाभिमानित्वात्तद्देहावच्छेदेन शुभजीवसंबंधवशेन तत्कृतभक्त्यादेरस्वाभाविकत्वेन तेषां भक्त्यादिफलाभावात् तत्प्रविष्टशुभजीवानामेव शुभफलं पौंड्रकाद्यसुराणां न तत्कृतद्वेषस्य स्वाभाविकत्वेन तत्फलं तम एवेति तेषां पूर्वोक्तगतिविषयत्वासंभवान्नित्यध्यानस्तुत्यर्थं चेति साधारणगत्यंतराक्तिरिति ध्येयम् ॥ अत एव सुधायां स्मर्तव्यो भगवान्नित्यमित्येवैतेन हि कश्चित्॥द्वेषो वैरेणगुणानाह पुराणे कृद्धवाक्यवादित्यनुव्याख्यानस्य तात्पर्यं उक्तं॥द्विविधानि वाक्यानि॥वैरेण यन्नृपतय इत्यादीनि स्मरणप्रधानानि तेषां प्रथमा गतिः॥द्वेषाच्चैद्यादय इत्यादीनि द्वेषप्रधानानि तेषां द्वितीयेति द्वयमिति॥ अत्र वैरेण यन्नृपतय इत्यादिवाक्यं नित्यध्यानप्रशस्तत्वप्रतीतिरिदं वाक्यं संनिहितभगवद्ध्यानस्य नित्यकर्तव्यत्वाभिप्रायकमनुपपन्नप्रतीतार्थकत्वे सत्या सवाक्यत्वादित्यनुमानेनत्याद्याव्याख्यानीयमिति संप्रदायविदः॥तदुक्तं कर्मनिर्णये॥वचनलिंगानुमाद्भिरिति॥एतदेवाभिप्रेत्योक्तं सुधायाम॥वाक्यलक्षणानुमान चेत्याचार्याः इति ॥

ये पूर्वं भक्ताः ॥ शिशुपालादयस्तद्विषये भवत्वेषा गतिः ॥ न तु पौंड्रसाल्वादिविषये ॥ अत आह ॥ नित्येति ॥ भक्तप्रियत्वज्ञापनार्थमित्युक्तं विवृणोति ॥ स्वभक्तस्येति ॥ इति भक्तप्रियत्वज्ञापनार्थमितियोजना ॥ स्यादेतत् यदि तेषां स्वतो भक्तत्वं शापबलादेव द्वेषित्व

भक्तप्रियत्वज्ञापनार्थं नित्यध्यानस्तुत्यर्थं च ॥ स्वभक्तस्य कदाचिच्छापबलात्द्वेषिणोऽपि भक्तिफलमेव
भगवान्ददातीति ॥ भक्ता एव हि ते पूर्वं शिशुपालादयः ॥ शापबलात्द्वेषिणः ॥

मित्येतत्प्रमितं स्यात्तदेव कुत इत्यत आह ॥ भक्ता एव हीति ॥ प्रसिद्धमेवैतत् भागवतादावित्यर्थः ॥ कुतो वचनानामर्थांतरकल्पने ॥ तिचेत् ॥ यो द्विष्यादित्याद्युदाहृतवाक्याविरोधात् ॥

॥ कृ० ॥ न तु पौंड्रेति ॥ पौंड्रकादीनां पूर्वभक्तत्वाभावादिति भावः॥न चात्र विनिगमकाऽभावः ॥ पौंड्रके नरके चैव साल्वे कंसे च रुग्मिणि ॥ आविष्टास्तु हरेर्भक्तास्तद्भक्त्याहरिमापिर इत्यत्र पौंड्रकादिषु हरिभक्तांशोक्तेरेव नियामकत्वादिति ॥

---

१ अ. ३ पा. अ.४ अ० ५ ॥ ६ अत्रोपस्थितत्वादिनिराकरणपद्यं ॥२५ ॥ २ अभिप्रायेण ॥ २ पुराणे इति संबंधः ॥ आवर्त्यप्रदेशे चेत्यर्थः॥ ४ मुक्तिमित्यध्याहारः ॥ ५ आहेवेतिसंबंधः ॥ पुराणकृदितिकर्त्रध्याहारः ॥ ६ भगवत इति शेषः कश्चित् द्वेषान्मुक्तिमाहेत्र भगवता गुणानाहेति वाक्यांतरम् ॥ ७ यथा क्रुद्धः पिता स्वाज्ञोल्लंघकं पुत्रं प्रतिस्वाज्ञाकार्येत्येवाभिप्रायेण जाल्म त्वं म्रियस्वेतिवाक्यं प्रयुनक्ति न तु मरणाभिप्रायेण तद्वत्॥ एवं च द्वेषान्मोक्षवचनस्य सदा भगवान् स्मर्तव्यः ॥ भगवतः कृपालुत्वादिगुणकथनं चेति तात्पर्यद्वयम् ॥

॥ श्री० ॥ तदुत्तरत्वेन ॥ युधिष्ठिरप्रश्नोत्तरत्वेन ॥ स्तुतेरिवेति ॥ स्तुतेर्यथा मोक्षसाधनत्वं एवं निंदाया मोक्षसाधनत्वं न स्यादिति व्यतिरेके दृष्टांतः ॥ सत्प्रतिपक्षेति ॥ निंदादौ साम्यकथनान्यथानुपपत्त्या द्वेषस्य मोक्षसाधनत्वमित्यर्थापत्त्या पूर्वपार्षदत्वकथनान्यथानुपपत्त्या भक्तेर्मोक्षसाधनत्वमिति पूर्वोक्तार्थापत्तेः सत्प्रतिपक्ष इत्यर्थः ॥

हेत्वंतरं चाह॥तत्प्रश्न इति ॥अहो अत्यद्भुतं ह्येतत् दुर्लभैकांतिनामपि॥वासुदेवे भगवति गतिश्चैद्यस्य विद्विष इति युधिष्ठिरेण द्वेषिणःकथं मुक्तिर्जातेत्येवं रूपेतद्विषये प्रश्ने कृतेसति नारदेन मातृष्वसेयो वश्चैद्यो दंतवक्त्रश्च पांडव॥पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतावि ति तदुत्तरत्वेन पूर्वपार्षदत्वादिकं कथ्यते॥ततोऽपि द्वेषो न मोक्षसाधनमित्येतज्ज्ञायते कथमित्यत आह ॥अन्यथेति ॥ यदि द्वेषो मोक्षसाधनं स्यात्तदा तत्प्रश्नपूर्वं पार्षदत्वशापादिकथनान्नैतज्ज्ञायते ॥अन्यथा किमितितदप्रस्तुतमुच्यते॥भगवतः साम्यकथनं तु द्वेषिणामपि द्वेषमनिरूप्य पूर्वतनभक्तिफलमेव ददातीति ज्ञापयितुम्॥न मे भक्तः प्रणश्यतीति वक्ष्यति किमत्राद्भुतम्॥यतो द्वेषोप्येको मुक्तिमार्ग इत्युत्तरं वक्तव्यम्॥पूर्वपार्षदत्वादिकंत्वप्रस्तुतमनुपयुक्तंन वक्तव्यं स्यादित्यर्थः ननु नारदेन निंदनस्तवसत्कारेत्यादिनाभगवतो निंदादौ साम्यमपितदुत्तरत्वेनकथ्यते यदि स्तुतेरिवनिंदाया नमोक्षसाधनत्वं स्यात्तदा तदनुपयुक्तं न वक्तव्यमिति सत्प्रतिपक्षार्थापत्तिरित्यतोऽस्यान्यथोपपत्तिमाह॥भगवत इति॥साम्यं निर्विकारत्वम्॥भक्तानामपराधं भगवान्नगणयतीत्येतत्कुत इत्यत आह॥नेति॥

॥ कृ० ॥ निंदनस्तवेति ॥ निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं ॥ प्रधानपरयोराजन्नविवेकेनकल्पितम् ॥ हिंसा तदभिमानेन दंडपारुष्ययोरपि ॥ वैषम्यमिहभूतानां ममाहमिति पार्थिव ॥ यन्निबद्धोऽभिमानोऽयंतद्वधात्प्राणिनां वधः ॥ तथा न यस्य कैवल्यादभिमानोऽखिलात्मकः ॥ परस्येदमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ इत्येतेन वाक्येनेत्यर्थः ॥ अन्ये तु निंदनेतिश्लोकः ॥ सर्वात्मनः समदृशोह्यद्वयस्याऽनहंकृतेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचिदिति श्लोकश्चेत्येव श्लोकद्वयेनेत्यर्थः ॥ न च सप्तमस्कंधपुस्तकेषु निंदनेत्यस्यानंतरं उक्तश्लोकोनोपलभ्यत इतिवाच्यम् ॥ तत्वनिर्णयटीकायां क्रमेणैतत्श्लोकद्वयोदाहरणेन द्वितीयश्लोकस्य सप्तमस्कंधे उत्सन्नत्वावगमादित्याहुः ॥ अर्थापत्तिरिति ॥ तत्प्रश्ने पूर्वपार्षदत्वादीति भाष्योक्तार्थापत्तिरित्यर्थः ॥ ननु निंदनेत्यादिना सादृश्यानुक्तेः कथं साम्यकथनमित्युक्तमित्यत आह॥ निर्विकारत्वमिति॥

१भा०स्कं०७अ०१श्लो०१७॥२परंतत्वप्राप्तिरितिपाठांतरमाधुनिकांकितपुस्तकेषु॥३अस्मिन्नेवाध्यायेश्लो.३ ४पार्षदप्रवरत्वस्यतां भक्तत्वेहेतुःविप्रशापादेतिद्वेषित्वेज्ञेयः ॥४ अत्रैवाध्यायेश्लो.२४ ५ आदिपदेनकियतग्राह्यंतदाह ॥ ६ दोषकीर्त्तन, गुणकथन, कायिकपूजा, कायिकावज्ञानां विषयम् ॥ इदंशरीरं जडंकृतं तत्रहेतुः स्वतश्चिदानंदस्यजीवस्यदेहेंद्रियाद्यात्मकस्यानात्मनः प्रधानस्यमिथोयोभेदस्तदनुभवाभावइतिभावः ॥ ७ ॥ फलमाह ॥ देहाभिमानेनअविवेकज्ञानिना ममताडनंअहताडयामीतिदेहेदंडपारुष्ययोर्निमित्तयोर्विषमावस्थाभवतीति ॥ ८ ॥ ततश्च किंतत्राह ॥ ममाहमित्याभिमानोयस्मिन्देहे निबद्धः तस्यदेहस्यताडनादिलक्षणाद्वधाच्चेतनानांवधइत्युपचारः ॥ इतियथाजीवस्यानर्थपरंपरा ॥ तथादेहस्थत्वाविशेषाद्धरेरप्यस्तिकिंनेत्याह ॥ तथेति ॥ अखंडस्वामिनोहरेर्जीववद्देहाभिमानोनास्तिजडदेहाद्यभावादेवेत्यर्थः ॥ ९ ॥

॥श्री० ॥ यथा कथंचिदिति ॥ भक्त्या द्वेषेणेत्यर्थः ॥ घटनोपेतमिति ॥ भावो द्वेषभावो भवस्य द्वेषभवस्य द्वेषाभिवृद्धेरेव कारणमित्यर्थपरत्वसंभवेन सावकाशमित्यर्थः ॥ प्रतीत एवेति ॥ भावो द्वेषेण भगवच्चिंतनम् ॥ भवनस्य द्वेषविषयभवनस्य कारणं भगवत्स्वरूपत्वरूपमोक्षस्य कारणमितिप्रतीतार्थ इत्यर्थः ॥ उभयोः ॥ द्वेषिभक्तयोः ॥ आकृतधीनामिति ॥ ननु कथमेतत् ॥ षष्ठी बहुवचने आकृतधी आमितिस्थिते ह्रस्वनद्यापो नुट् ॥ ह्रस्वांतान्नद्यंतादाबंताच्च नुडागमः स्यादामि पर इति सूत्रेण नद्यंतत्वान्नुडागमे सत्याकृतधीनामिति भवतीति हि वक्तव्यं तदयुक्तंनद्यंतत्वाभावात् ॥ तथा हि ॥ यू स्त्र्याख्यौ नदी ॥ ईदूदंतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्त इत्यनेन हि नदीसंज्ञाऽत्र वक्तव्या ॥ सा न युक्ता अस्य पुरुषविशेषणत्वेन पुल्लिंगतया नित्यस्त्रीत्वाभावादिति चेन्न ॥ अत्राहुर्गुरुचरणाः ॥ यू स्त्र्याख्यौ नदीत्यत्र सूत्रे वार्तिकम् ॥ अत्र प्रथमलिंगग्रहणं कर्तव्यं नदीसंज्ञायामिति ॥ अस्यार्थः ॥ प्रथमशब्दस्य यल्लिंगं तद्ग्रहणमेव कर्तव्यं नदीसंज्ञाविधौ॥प्रथमशब्दस्य नित्यस्त्रीत्वे तदंतशब्दस्यास्त्रीत्वेऽपि नदीसंज्ञास्त्येवेतितदर्थः ॥ अतिलक्ष्मीनामिति ॥ अत्र प्रथमस्य लक्ष्मीशब्दस्य नित्यस्त्रीलिंगत्वात्तदंतातिलक्ष्मीशब्दस्यास्त्रीलिंगत्वेपि नदीसंज्ञास्त्येवेतिनुडागमेऽतिलक्ष्मीनां पुंसामिति भवति ॥ एवमिहाऽपिधीशब्दस्य प्रथमस्यनित्यस्त्रीलिंगत्वेन तल्लिंगस्यैव नदीसंज्ञाविधौ ग्राह्यतया वार्तिकोक्तत्वात्तदंताकृतधीशब्दस्यास्त्रीलिंगत्वेऽपि नदीसंज्ञायाः सत्वान्नुडागमे आकृतधीनामिति युक्तमिति न कश्चिद्दोषइति ॥

द्वेषस्य मुक्तिसाधनत्वाभावे भावो यथा कथंचिच्चिंतनं भवस्य मोक्षस्य कारणमित्यादिवचनविरोधः स्यादित्यत आह ॥ नचेति ॥ कुतो नेत्यत आह ॥ द्वेषेति ॥ हि यस्मादेतद्वचनमिति युक्तं घटनोपेतं तस्मादित्यर्थः ॥ यथोक्तम् ॥ यादृशी भावना ज्ञेया सिद्धिर्भवति तादृशीति प्र

न च भावो हि भवकारणमित्यादिविरोधः ॥ द्वेषभाविनां द्वेष एव भवतीति हि युक्तम् ॥ अन्यथा गुरुद्वेषिणामपि गुरुत्वं भवतीत्यनिष्टमापद्येत ॥ न चाकृतधीत्वेविशेषः ॥ तेषामेव हिरण्यकशिप्वादीनां पापप्रतीतेः॥

तीत एवार्थः किं न स्यादित्यत आह ॥ अन्यथेति ॥ भगवद्द्वेषिणो मुक्तिभाजस्तदाकृतधीत्वाद्भगवद्भक्तवदित्यनुमानविरोध इत्यत आह। नचेति ॥ उभयोराकृतधीत्वे सति फलेप्यविशेष इति च नेत्यर्थः ॥ कुत इत्यतः कालातीतत्वादित्याह ॥ तेषामेवेति ॥ आकृतधीनामेव ॥

॥ कु० ॥ तदाकृतधीत्वादिति॥भगवदाकृष्टबुद्धित्वादित्यर्थः॥आकृतधीनामेवेति॥धीशब्दस्य वामीत्यनेन षष्ठीबहुवचनपरे विकल्पेन नदीसंज्ञाविधानादाकृतधीशब्दस्यापिनदीत्वं प्रथमलिंगग्रहणंचेति वार्तिके पूर्वं नित्यस्त्रीलिंगस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्युक्तत्वात् ॥तेन नुडागमोपपत्तिः॥एतेनाऽकृतधीशब्दस्य नित्यस्त्रीलिंगत्वाभावेनानदीत्वात्कथं नुडिति निरस्तम्॥

॥ श्री० ॥ हिरण्यकशिपोस्तमोविशनेच्छायां अभावादाह ॥ वेशनसंभावनेति ॥नन्विच्छायामेव मनोविधानात कथं मन्नंतस्य विवक्षुरित्यस्यवेशनसंभवनाविषयत्वमर्थं इत्यत आह ॥ आशंकायामिति ॥ आशंकायामचेतनेषु संख्यानमिति वार्तिक इत्यर्थः ॥इच्छायां सन्प्रत्ययं विधाय श्वा मुमूर्षति कूलं पिपतिषतीति चेतनाचेतनसाधारणसन्नंतशब्दप्रयोगोपपत्त्यर्थं इदं वार्तिक प्रवृत्तं तस्यायमर्थः ॥ अचेतनेषु सन्नंतशब्दप्रकृत्यर्थेच्छारहितेषु आशंकायां संभावनायां विवक्षितायां सत्यां सन्प्रत्ययोपसंख्यानं कर्तव्यमिति ॥ तेन चेतनाचेतनसाधारण्येन सन्नंतशब्दप्रयोगो युक्त इति भावः ॥ द्वेषस्य मुक्तिसाधनत्वांगीकारे महातात्पर्यविरोधस्यानुक्तत्वादाह ॥ उक्तप्राय इति ॥ गुणोत्कर्षज्ञानं विनाऽन्येन न मोक्ष अतो मोक्षप्रयोजनकानां वेदानां गुणोत्कर्षे महातात्पर्यमित्युक्ते अर्थात द्वेषस्य मुक्तिसाधनत्वं तद्विरुद्धमित्युक्तमेवेत्यर्थः उक्तं चानुव्याख्याने ॥ येहेषेण मुक्तिः स्याद्वक्तव्योदोषसंचयइति ॥ कु० ॥ ननु हिरण्यकशिपो

विविक्षुर्वेक्ष्यतीति संभावनाविषयः ॥ आशंकायामचेतनेषूपसंख्यानात् ॥ मह्यं मम ॥ ननु वचनत्वाविशेषाद्यो द्विष्यादित्यादिभिर्द्वेषाच्चेत्या दीनां कथं बाधनमित्यत आह ॥ बह्विति ॥ निषेधो द्वेषस्य मुक्तिसाधनतायाः ॥ न केवलंबहुत्वाबहुत्वरूपोऽनयोर्विशेषः ॥ किं तु स्वव्या

हिरण्यकशिपुश्चापि[2] भगवन्निंदया तमः विविक्षुरत्यगात्सूनोः प्रल्हादस्यानुभावत इति ॥ यद्गनिंदेति तामह्यमित्यारभ्यतस्मात्पितामपूयेत दुरंताद्दुस्तरादघादिति प्रल्हादेन भगवतो वरयाचनाच्च ॥ बहुषु ग्रंथेषु च निषेधः ॥ कुत्रचिदेव तदुक्तिरिति विशेषः ॥ यस्मिंस्तदुच्यते तत्रैव निषेध उक्तः ॥ महातात्पर्य विरोधश्चोक्तः पुरस्तात् ॥

हतत्वास्वव्याहतत्वरूपोपीत्याह ॥ यस्मिन्निति ॥ भागवतादौ ग्रंथे भगवन्निंदयेत्यादिर्निषेधः ॥ भगवद्गुणोत्कर्ष एव सर्ववेदानां यन्महाता त्पर्यं तद्विरोधो द्वेषान्मुक्तिवाचिनाम् ॥ इतरेषां तु तदानुकल्पमिति च विशेष इति भावेनाह ॥ महातात्पर्येति ॥ उक्तः ॥ उक्तप्रायः ॥

स्तत्प्रवेशेच्छाभावात्कथं विविक्षुरित्युक्तमित्यत आह ॥संभावनेति॥ननु इच्छायां सन्विधानात्कथमिदं व्याख्यानमित्यत आह॥आशंकायामिति॥संभावनायामित्यर्थः॥अचेतनेषु इच्छार हितेषु आशंकायामुपसंख्यानमित्यनेन संभावनाविशिष्टक्रियावचनात स्वार्थेसन्विधानादित्यर्थः॥गुणोत्कर्षे वेदानां महातात्पर्यं तथापि द्वेषान्मुक्तिरित्यत्र तद्विरोधानुक्तेराह॥उक्तप्राय इति॥

१ एतेनाधुनिकांकितपुस्तकेषु मे त्वामितिपाठः कल्पित इति द्रष्टव्यम् ॥ २ भा. स्कं. ४ अ. २१ श्लो. ४६ ॥ ३ भा.स्कं.७ अ.१० श्लो. १६ उत्तरार्धमारभ्यश्लोक १८ पूर्वार्धांतग्रंथेनेत्यर्थः ॥

॥ श्री० ॥ युक्तिमंतीत्यत्र युक्तयो न बाह्याः अन्वेषणीयाः किं नामाव्ययत्वविबुधश्रेष्ठत्वपुष्करविष्टरायत्वरूपाः युक्तयः कर्मणा मनसा यो द्विष्यात् सर्वोत्कृष्ट इति वाक्येष्वेवोक्ताः संतीत्याशयेनाह ॥ सप्तम्यर्थ इति ॥ तथा च युक्तय एषु संतीति युक्तिमंतीति सप्तम्यर्थे मतुबित्यर्थः ॥ तदस्यास्त्यस्मिन्निति षष्ठ्यां सप्तम्यर्थयोर्मतुब्विधानादिति भावः ॥ ननु प्रतियोगिनोनुक्तत्वात्किमपेक्षयायो द्विष्यादित्यादिवाक्यानामन्येषामिति भाष्येऽन्यत्वमुच्यत इत्यत आह ॥ महातात्पर्येति ॥ महातात्पर्यविरोधश्चेत्यनेनैव तत्संबंधितया प्रतियोगिभूतानि वाक्यान्युपस्थापितानि तथा चैषां चैद्यादयोनृपा इत्यादिवाक्यानां महातात्पर्यविरोध उक्तस्तेभ्यो वाक्येभ्योऽन्येषां कर्मणा यो द्विष्यात् सर्वोत्कृष्ट इति वाक्यानां प्राबल्येन बाधकत्वे अनुकूलायुक्तयस्तत्रैवोक्ताः संतीत्यर्थः ॥ ता एव युक्तीराह ॥ अव्ययमित्यादिना ॥ अयं भावः ॥ भगवद्द्वेषी पितृनरकपातहेतुः लोकांतादिसर्वजनद्वेष्यः सर्वविमश्च उत्तमपुरुषद्वेषित्वात् सद्गुरुद्वेषिशिष्यवत् ॥ न च विशेषणासिद्धो हेतुः ॥ विष्णुरुत्तमपुरुषः सर्वात्मनाऽव्ययत्वात् विबुधश्रेष्ठत्वात् पद्मासनपितृत्वाच्च व्यतिरेकेण देवदत्तवदिति युक्त्या भगवतः सर्वोत्तमत्वसिद्धेरिति ॥ इतरेषां तुर्क्तेवेति ॥ द्वेषाच्चैद्यादय इत्यादिवाक्यानां भक्तप्रियत्वज्ञापनार्थमित्यादिना सावकाशत्वमुक्तमित्यर्थः ॥

इतोऽपि बाध्यबाधकभावो युक्त इति भावेन व्याप्तिं तावदाह ॥ अयुक्तिमद्भ्य इति ॥सप्तम्यर्थे मतुप् ॥ ततः किमित्यत आह ॥ युक्तयश्चेति महातात्पर्यविरोधश्चेत्यपेक्षया ॥ अन्येषामनुकूलाः अव्ययं विबुधश्रेष्ठम् ॥ पुष्करविष्टराय इति ॥ सावकाशत्वनिरवकाशत्वविशेषाच्चैवमित्या

अयुक्तिमद्भ्यो युक्तिमंत्येव बलवंतिवाक्यानि ॥ युक्तयश्चोक्ताः अन्येषाम्॥न चैषां काचिद्गतिः ॥

ह॥नचेति ॥ इतरेषां तुर्क्तेवेति शेषः ॥

॥क्र०॥ननु षष्ठ्यर्थमनुपालब्धं युक्तिमत्त्वं नाम युक्त्यनुकूलत्वं तथा चानुकूलयुक्तीनां प्रागनभिधानादुक्ता इत्ययुक्तं ॥ लोकानुकूल्येत्यग्रिमवाक्येन पुनरुक्तिश्चेत्यत आह ॥ सप्तम्यर्थे मतुबिति ॥ तदस्यास्त्यस्मिन्निति मतुबितिसूत्रादिति भावः ॥ ननु प्रतियोगिनोऽनुक्तेः किमाक्षेपेणयो द्विष्यादित्यादिवाक्यानामन्यत्वमित्यत आह ॥ महातात्पर्येति ॥ महातात्पर्यविरोधश्चेत्यनेन येषांमहातात्पर्यविरोध उक्तस्तेभ्योऽन्येषामित्यर्थः ॥ ननु युक्तिमंतीति सप्तम्यर्थमतुपापर्यवसितं स्वोक्तानेयुक्तिनिपादकत्वं कर्मणेत्यादि वाक्यानां कथमित्याशंक्य ता एव युक्तीराह ॥ अव्ययमिति॥ अय भावः ॥ भगवद्द्वेषी पितृनरकपातहेतुः लोकांतादिसर्वजनद्वेष्यः सर्वविमश्च उत्तमपुरुषद्वेषित्वात्सद्गुरुद्वेषिशिष्यवत् ॥ न चासिद्धो हेतुः विष्णुः सर्वोत्तमः ॥ अव्ययत्वात् ॥ विबुधश्रेष्ठत्वात् ॥ पद्मासनपितृत्वाच्च व्यतिरेकेण चैत्रवदिति तत्सिद्धेरिति ॥ इतरेषामिति ॥ द्वेषाच्चैद्यादय इत्यादीनामित्यर्थः ॥

॥ श्री० ॥ गुणान्तरेणापीति ॥ उभयोर्वाक्ययोर्निरवकाशत्वबहुत्वादिगुणान्तरेण साम्येऽपि तन्मध्ये यल्लोकानुकूलं तदेव बलवदिति यदा दृष्टं तदा गुणान्तरेण साम्याभावे लोकानुकूल्ये च सति तत् बलवदिति किमुवक्तव्यमिति कैमुत्यार्थमित्यर्थः ॥ प्रकृते च द्वेषात् योद्धिष्यादित्यादिवाक्ययोर्गुणान्तरेणाऽपि साम्याभावाल्लोकानुकूलत्वाच्च युक्तो बाध्यबाधकभाव इति भावः ॥ नन्वस्तु भक्तप्रियत्वद्वेषिप्रियत्वयोर्लोकानुकूलत्वानुकूलत्वे तथाऽपि द्वेषस्य मुक्तिसाधनत्वाभावे किमायातमित्यत आह॥भगवत्प्रीत्यैवेति प्रसिद्धमेवेति॥तत्प्रीणनान्मोक्षमाप्नोति सर्वः यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणेति श्रुत्यादिप्रसिद्धमितिनोक्तमित्यर्थः ॥ संरम्भो द्वेषेण युद्धकरणं॥ मार्गमात्रेणेति ॥ भगवति मनोनिवेशे मार्गमात्रेणेत्यर्थः ॥ द्वेषादिना तच्चितत्वे तत्रैवमभ्यङ्गमनसः स्थितौ सत्यां पश्चात्स्मरणसमये भगवद्वेषनाशेन सत्यमेव भगवति प्रतिष्ठा इति हि संप्रदायविदः॥अत एव भागवतं कृष्णचक्रहतांहसामित्युक्तं॥

इतश्च बाध्यबाधकभावो युक्त इत्यभिप्रेत्य व्याख्याति तावदाह॥साम्येपीति॥गुणान्तरेण साम्येपीति कैमुत्यार्थ॥लोकानुकूलशब्देन लोकदृष्ट्यानिकानुमानानुकूलत्वमुच्यते ततः॥किमित्यत आह॥लोकेति॥इतरत्द्वेषिप्रियत्वं भगवत्प्रीत्यैव मोक्ष इतितु प्रसिद्धमेव ॥ शिशुपालादीनां पूर्वभक्तत्वं प्रसि

साम्येपि वाक्ययोर्लोकानुकूलाननुकूलयोर्लोकानुकूलमेव बलवत्॥लोकानुकूलं भक्तप्रियत्वं च नेतरत्॥
उक्तं च तेषां पूर्वं भक्तत्वम् ॥ मन्ये सुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तानित्यादि ॥

द्धमित्युक्तम् ॥ तत्कथमितिचेत्॥पार्षदत्वात् वचनाच्चेत्याह ॥ उक्तंचेति ॥ त्र्याणां लोकानामधीशे संरंभेण मार्गमात्रेणाभिनिविष्टचित्तान्

॥ कृ० ॥ ननु वक्तव्यस्य लोकानुकूलयादिनैव लाभात्साम्येऽपीति व्यर्थमित्याशंक्य तद्व्याकुर्वन्नेव परिहरति ॥ गुणान्तरेणेति ॥ प्रकृते गुणान्तरेणाऽपि साम्याभावाद्बाध्यबाधकभावो स्तीति किमुवक्तव्यमिति कैमुत्यार्थमित्यर्थः ॥ नन्वेवं तर्हि नीरूपत्वमित्यस्मात्सर्वं नीरूपमित्यस्य प्राबल्यं स्यात् सरूपत्वानुकूलत्वादित्यत आह ॥ लोकानुकूलशब्देनेति ॥ ननु भवतां भक्तप्रियत्वद्वेषिप्रियत्वयोर्लोकानुकूलाननुकूलत्वे तथापि द्वेषस्य मुक्तिसाधनत्वाभावे किमायातमित्यत आह ॥ भगवत्प्रीत्यैवेति ॥ सभाहारद्विगुना ब्रह्मविष्णुमहेश्वरेषु इत्यर्थो लभ्यते ॥ न च त्रिष्वभिनिविष्टचित्तानां भागवतानिति विशेषोक्तियुक्तेत्यत आह ॥ त्र्याणामिति ॥ ननु संरंभो द्वेषः तेनाऽभिनिविष्टचित्ताना कथ भागवतत्वं द्वेषित्वादित्यत आह ॥ मार्गमात्रेणेति ॥ द्वारमात्रेणेत्यर्थः ॥ स्वाभाविकद्वेषव्यावृत्त्यै मात्रपदम् ॥

१ भा० स्कं. ३ अ २ श्लो. २८

॥ श्री० ॥ तमोगतेः सत्वादाह । सद्गतिरिति ॥ न मद्द्वेषणीति ॥ मम शोधकत्वादित्यर्थः ॥ ननु अविद्याख्यायाभाव्याज्ञानं मौढ्यमित्यंगीकृत्य मौढ्यान्मिथ्याज्ञानं भवतीत्युक्तं इदा नीं मिथ्याज्ञानमेव मौढ्यमित्यंगीकृत्याह ॥ अन्यथामिति ॥ रागद्वेषादिकारणभेदोक्तं प्रमाह ॥ मूलकारणमिति ॥ रजस्तमादेः स्वाभाविकत्वेन द्वेष मूलकारणत्वादिति भाव ॥ १२ ॥ अयंविवेकइति ॥ स्वमौढ्यादेव मामवजानन्ति न मद्द्वेषादिति विवेक इत्यर्थः ॥ तद्वति । तत्समाना स्वभावकथनमित्यर्थ ॥ देवानेव ॥ त्रिविधा जीवसंघास्तु देवमानुषदानवा इति जीवत्रैविध्यविवक्षायां देवशब्दस्योत्तमजीवोपलक्षणतया दृष्टत्वादिति भाव ॥ १३ ॥ १४ ॥ ननु अविद्याख्यमज्ञानं मौढ्यमित्यंगीकृत्य मौढ्यान्मिथ्याज्ञानमित्युक्तम॥तत्कथं न मा

उपसंहरति॥ अत इति ॥ गतिः सद्गतिः ॥स्वमौढ्यादेव मामवजानन्ति॥ न मद्द्वेषात्तेषां च महाननर्थ इति सर्वं समाहितम् ॥ राक्षसीमित्या दि तु किमर्थमित्यत आह ॥ द्वेषेति ॥ मौढ्यान्मिथ्याज्ञानं भवतु प्रकृत्यात्मको द्वेषस्तु कुत इत्याशंकानिवृत्त्यर्थमिति शेषः ॥ अन्यथा मविद्यमानं मौढ्यमेव तेषां कुतइत्याशंकानिरासार्थमितिवा ॥ अत्र कारणमिति मूलकारणम् ॥१२॥ ननु कुतो ऽयंविवेक इत्याकांक्षाया

अतो न भगवद्द्वेषिणां काचिद्गतिरिति सिद्धम् ॥द्वेषकारणमाह॥ राक्षसीमिति॥१२॥ नतरे द्विषंतीति द

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥१३॥
सततं कीर्तयंतो मां यतंतश्च दृढव्रताः ॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते॥१४॥

र्शयितुं देवानाह ॥ महात्मान इति ॥ १३॥ १४ ॥

राक्षसादिभ्य इतरे न द्विषंतीत्येतावदेववक्तव्यम्॥भजंतीत्यादि तु व्यर्थं इत्यत आह॥नेतर इति॥सत्यमेतत्॥तथापि देवानां स्वरूपकथनार्थमेतत् ॥तच्च द्वेषाभावोपपादनार्थमितिभावः॥ देवानित्युत्तमजीवोपलक्षणम्॥१३॥१४॥ प्रकृतिमोहिनीं इत्यत्र मौढ्यं मिथ्याज्ञानमिति व्याख्यानमित्यतस्तदनुसारेणाप्याह ॥ अन्यथामिति ॥ ननु द्विविधमौढ्यमाया अवजानन्तीत्यस्य द्वेषाभावे तात्पर्यं न भवति न मिथ्याज्ञानस्य कारणत्वोक्त्या । द्वेषकारणमाहेति कथमुक्तमित्यत आह ॥ मूलकारणमिति॥१२॥ ननु भजतीत्याद्युक्तं कथं देवस्वरूपं गन्धर्वादिष्वपि प्रसंगात् किं च राक्षसादीनेषु द्वेषाभावमात्रस्य न देवगतमाहात्म्यं वक्तव्य देवानाहेति कथमुक्तमित्यत आह॥उत्तमजीवोपलक्षणमिति अनेन दैवीं प्रकृतिमित्यपि व्याख्यानम ॥ १३ ॥ १४ ॥

१ भजनप्रकारमाह ॥ मांनिरंतरंकृष्णादिनामभिःकीर्तयन्तःमनुष्यादिभ्यःनंकुर्वन्तःदृढानिउपवासादिव्रतानियेषांतथानित्यंकरिष्यानोपायतः भक्त्यानमस्यंतश्चोपासते ॥

॥ श्री० ॥ व्यवहितत्वादन्वयमाह ॥ सर्वत्रेति ॥ अपरे भास्कर: ॥ सम्यगिति ॥ सर्वतो वैलक्षण्येनेत्येवं सम्यगित्यर्थः ॥ तस्य भेदाभेदवादित्वादिति भावः ॥ अल्पत्वादेरिवशब्दमु ख्यार्थस्य प्रकृतेऽसंभवादाह ॥ इवशब्दोऽप्यर्थ इति ॥ तथा च परस्परसमुच्चयार्थो द्रष्टव्यः ॥ देवमेवनीति ॥ तथा चैकत्वेन पृथक्त्वेन देवमेवेत्युक्तप्रकारेण बहुधा बहवः यजंतोयज्ञ भेदवंतो मामुपासत इति गीतार्थः ॥ १५ ॥ इत्यादीन्वेति ॥ क्रत्वादिसत्ताप्रतीत्यादिकारणत्वादिना भगवान् क्रत्वादिनित्वभेदेनेत्यर्थः ॥ १६ ॥ १७ ॥

एकत्वेनाद्वैतभावनयेति व्याख्यानमसत॥मिथ्याभावनात्वादितिभावेनाह॥सर्वत्रेति ॥ सर्वत्र स्थितो नारायण एक एवेति योजना॥पृथक्त्वेनादित्य चंद्रादिरूपेणेत्यसदितिभावेनाह ॥पृथक्त्वेनेति॥अपरस्तुपृथक्त्वेनेत्येतत्सम्यग्व्याख्याय बहुधेत्येतदादित्यादिरूपेणेति व्याख्यातवानत आह॥बहु

सर्वत्र ॥ एक एव नारायणः स्थितइत्येकत्वेन पृथक्त्वेन सर्वतोवैलक्षण्येन॥बहुधा हि तस्य रूपमाभाति शुक्लमिवलोहितमिवाथो नीलमथोऽर्जुनमितिसनत्सुजाते ॥ देवमेवापर इत्युक्तप्रकारेण बहवो वा बहु

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ॥ एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥
अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधं ॥ मंत्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

धा ॥ १५ ॥ प्रतिज्ञातं विज्ञानमाह ॥ अहंक्रतुरित्यादिना ॥

धेति ॥ कथमित्यत आगमेनैव दर्शयति ॥ शुक्लमिवेति ॥ इव शब्दोऽप्यर्थः ॥ प्रकारांतरेण व्याख्याति ॥ देवमेवेति ॥१५॥ विश्वतोमुखमित्यु क्तं सर्वात्मकत्वं प्रपंचयत्युत्तरेणेत्यन्यथा व्याख्याननिरासार्थमाह ॥ प्रतिज्ञामितिअन्यथा प्रतिज्ञाततानुक्तिप्रसंग इतिभावः ॥

क० ॥ ननु गीतायामेकत्वेन मामुपासत इत्येकत्वस्योपासनाप्रकारत्वमुक्तं भाष्ये तु सर्वत्र स्थितस्य तत्प्रतीयत इत्यत आह ॥ सर्वत्रस्थितो इति ॥ इव शब्दाद्वस्तुतःशुक्लत्वाद्यभावप्र तीतावाह ॥ इव शब्दोऽप्यर्थ इति ॥ १५ ॥ अन्यथा व्याख्यानं दूषयति ॥ अन्यथेति ॥ ज्ञानं विज्ञानमहितमित्यत्रेति शेषः॥

॥श्री०॥तथाऽपि कथमर्थभेदः आश्रयस्यैव गम्यत्वादित्यत आह॥अत एवेति॥मुक्तैरगम्यत्वस्य मुमुक्षुभिर्ज्ञेयत्वस्यैव भगवतः प्रसिद्धेरितिभावः॥श्रुतौ ब्रह्मैव गतिरित्यस्यापृष्टोत्तरत्वानि रासायाह॥किमुच्यत इति॥गतिरितिशब्देन किमुच्यत इत्यर्थः ॥ विहितस्यैवानुवाद्यत्वात्पूर्वं साक्षादिदमद्राक्षीदिति साक्षाद्द्रष्टृत्वस्यैव विहितत्वाद्यदद्राक्षीदिति कथमनुवाद इत्यत आह ॥ यदद्राक्षीत्साक्षादिति॥उक्तार्थे पाणिनिसंमतिं चाह॥तदुक्तमिति॥साक्षाद्द्रष्टरि अपरोक्षेण द्रष्टरि अभिधेये सति संज्ञायां विवक्षितायां सत्यां साक्षीतिशब्दो निपात्यत इति सूत्रार्थः॥एवं च प्रकृते साक्षाद्द्रष्टुर्भगवतोऽभिधेयत्वात्॥भगवत एव संज्ञा वाच्च साक्षिशब्दवाच्यत्वम् उक्तमिति भाव ॥एवं व्याख्याने यत्साक्षादिदमद्राक्षीदिति श्रुत्या पाणिनिसूत्रस्यैकार्थ्यं भवतीति ध्येयम्॥

व्याख्यानं तु रक्षोहामित्यादेरिव द्रष्टव्यम्॥क्रतवइति॥क्रतुयज्ञशब्दयोरर्थभेदमाह॥सामान्यविशेषभावेन भेद इत्यर्थः॥१६॥१७॥गतिः॥कर्मफल मितिव्याख्यानमपाकर्तुमाह॥ गम्यते इति॥ शरणमित्यतो भेदार्थमुक्तं॥ मुमुक्षुभिरिति॥अत एव गम्यत इत्यस्यावगम्यत इत्यर्थः ॥ कुत एत

क्रतवोऽग्निष्टोमादयः ॥ यज्ञो देवतामुद्दिश्य द्रव्यपरित्यागः ॥ उद्दिश्य देवान्द्रव्याणां त्यागो यज्ञ इती रित इत्यभिधानात् ॥ १६ ॥ १७ ॥ गम्यते मुमुक्षुभिरितिगतिः ॥ तथा हि सामवेदे वासिष्ठशाखायाम्॥

पिताहमस्य जगतो माता धातापितामहः ॥ वेद्यं पवित्रमोंकार ऋक्साम यजुरेवच ॥१७॥

अथ कस्मादुच्यते गतिरितिब्रह्मैवगतिरिति तद्धि गम्यते पापविमुक्तैरिति ॥साक्षादीक्षत इति साक्षी ॥ तथाहिबाष्कलशाखायाम् ॥ स साक्षादिदमद्राक्षीद्यदद्राक्षीत्तत्साक्षिणः साक्षित्वमिति॥

दित्यत आह ॥ तथाहीति ॥ किमुच्यत इत्यपिप्रश्नोऽध्याहार्यः ॥ साक्षीत्यौदासीन्यं प्रतीयते अत आह ॥साक्षादिति ॥ कुत एतदित्यत आ ह ॥ तथाहीति ॥ यदद्राक्षीत्साक्षात्तत्साक्षिणः परमेश्वरस्य साक्षित्वं साक्षिशब्दप्रवृत्तिनिमित्तम् ॥ तदुक्तम् ॥साक्षात्द्रष्टरि संज्ञायामिति ॥

॥कृ०॥व्याख्यानं त्विति॥क्रत्वादिकारणत्वेन तदुक्तत्वेन च तद्भेदव्यपदेशः यद्यपि क्रत्वादयो नानाजनानि नान्यपरमेश्वरजन्यानि तद्भोग्या॥नित्य तथाऽपि क्रत्वादीनां क्रियादिसारत्वे क्रतुत्वादौ च स एव नियामकः॥ न तु स्वसाधननियमनानुपक्तजन्मानः क्रत्वादयः साधनापेक्षया विशेषतो भोग्याश्रीति दर्शयितुं विशेषोपादानमितिव्याख्यानमित्यर्थः ॥ अग्निष्टोमादयइति भाष्ये साम साध्यत्वमादिपदसंग्राह्यतावच्छेदकमिति वदंति॥१६॥१७॥भेदार्थमिति॥शरणमित्यत्र मुक्ताश्रयत्वस्याऽभिप्रेतत्वादिति भावः॥ननु मुमुक्षुभिर्ज्ञेयत्वमेव न तु गम्यत्वमित्यत आह ॥अत एवेति ॥ब्रह्मैव गतिरिति प्रत्युत्तरानुरोधादाह॥किमुच्यत इत्यपीति॥साक्षात्द्रष्टरीति॥साक्षाच्छब्दात्द्रष्टर्यभिधेये इनिः स्यात्संज्ञायामित्यर्थः ॥तथा चेनिप्रत्यये ऽव्ययानां भमात्रे टिलोप इति भावः॥

१ ओंकारादिवाच्य इत्यर्थः प्रत्यकमहीमितिसंबध्यते ॥

॥ श्री० ॥ केचित्तु साक्षाद्द्रष्टरि संज्ञायामिति सूत्रार्थः ॥ तथा चाऽव्ययानां भमात्रे टिलोप इति वार्तिकेन टीभूतस्यात् इत्यस्य लोपे साक्षिन् इति प्राति पदिके सति पश्चात्स्वाद्युत्पत्तौ साक्षीति रूपमित्याहुः ॥ तन्न ॥ प्रकृतानुपयोगात् ॥ तथा हि ॥ साक्षादीक्षत इति निरुच्य तत्रैव प्रमाणमुक्का संमतितयोदाहृतसूत्रेऽपि साक्षाद्द्र ष्टरीत्यादिव्याख्याने उक्तार्थाप्रतिभासने वाऽसंगत्यापत्तेर्न तथा सूत्रार्थ इति ध्येयम् ॥ मुमुक्षोरपि संसारभीतत्वात् परायणमिति वक्ष्यमाणप्रमाणानुसारेणाह ॥ मुक्तोपलक्षणमिति॥ पुनरुक्तिरिति ॥ तिष्ठत्यस्मिन्निति स्थानमिति स्थानशब्देन पुनरुक्तिरित्यर्थः ॥ १८ ॥

निवासशब्दागतार्थतया शरणशब्दार्थमाह ॥ शरणमिति ॥ संसारभीतस्येति मुक्तोपलक्षणं ॥ विष्णोर्मुक्ताश्रयत्वे प्रमाणमाह ॥ परमिति ॥ पग यणं मुक्तानामाश्रयः ॥ तथापि निधानमिति पुनरुक्तिरित्यत आह ॥ संहारेति ॥ सर्वभूतानि प्रकृतिं यांतीत्युक्तत्वात् कथं भगवति निधी

शरणमाश्रयः संसारभीतस्य ॥ परं परायणमित्याद्युक्तम् ॥ नारायणं महाज्ञेयं विश्वात्मानं परायणमि
तिच ॥ संहारकाले प्रकृत्याजगदत्रनिधीयत इति निधानम् ॥ तथा हि ऋग्वेदखिलेषु ॥ अपश्यमप्य
गतिर्भर्ताप्रभुः साक्षी निवासः शरणं सुहृत्॥प्रभवः प्रलयः स्थानं निधानंबीजमव्ययम् १८
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥
ये मायया विश्वकर्मण्यदो जगन्निहितं शुभ्रचक्षुरिति १८ ॥ सत्कार्यमसत्कारणम् ॥

यंत इत्यत उक्तम् ॥ प्रकृत्येति ॥ प्रथमं प्रकृतिं यांति पश्चात्तत्र निधीयंत इत्यर्थः॥तत्कुतइत्यत आह॥तथाहीति॥विश्वकर्मणीश्वरे शुभ्रचक्षुः शुद्धदृष्टिरहम् ॥ १८ ॥ असतो नियम्यत्वानुपपत्तेः ॥ सदसच्चाहमित्ययुक्तमित्यत आह ॥ सदिति ॥ कार्यं सादित्युच्यते ॥

॥ कृ० ॥ अस्य मुक्ताश्रयत्वे प्रमाणोदाहरणात्तदनुरोधेनाऽऽह ॥मुक्तोपलक्षणमिति॥अनेननिवासशब्द आश्रयमात्रार्थ इत्युक्तं भवति॥मुक्तस्तु स्यात्तदाभास इति प्रमाणानुसारेणाऽह॥मुक्ता नामाश्रय इति ॥१८॥नियम्यत्वानुपपत्तेरिति॥सदसच्चाहमिति व्यपदेशश्चाचास्तित्वनिबंधनः किं तु यदधीनेत्यादेस्तदधीनत्वनिबंधनः॥न च तद्युक्तं असतस्तदधीनत्वानुपपत्तेरित्यर्थः ॥

॥ श्री० ॥ **सदेरिति** ॥ तथा च षद्लृ विशरणगत्यवसादनेष्विति धातोः साद्यतेऽवगम्यंत इति कर्मणि क्विपि तस्य लोपे निर्वचनत्वाद्दस्य तकारे च सति सदिति रूपं द्रष्टव्यम् ॥ ॥ १९ ॥ **वक्ष्यामीति** ॥ तर्ह्यहं क्रतुरित्याद्यमत्यमित्यनेनेत्यर्थः ॥ पितृन्यांति पितृव्रता ॥ भूतानि यांति भूतेज्या इति वक्ष्यमाणानुसारेणाह॥ देवतेनेति ॥

अभिव्यक्तिरूपत्वादित्यनेन सदेर्गत्यर्थस्य क्विपि कर्माणि रूपमेतदित्युच्यते ॥ कारणमप्यव्यक्तरूपत्वादेव सच्छब्दितम् ॥ कार्यकारणयोः तदसच्छब्दप्रयोगं च दर्शयति ॥ असच्चेति ॥ तस्मात्सदसतोर्विश्वस्माद्ब्रह्म परं॥१९॥सदसच्चाहमर्जुनेति॥ विज्ञानस्योपसंहृतत्वादुत्तरस्यासंगतिमाशंक्याह॥ तथापीति ॥ अहं क्रतुरित्यादिना सर्वकर्तृत्वादिभोक्तृत्वं यदुक्तम् भगवतस्तदसादिति वक्ष्यामीति गूढाभिसंधिना यदि सर्वत्र

सदभिव्यक्तरूपत्वात्कार्यमित्युच्यते बुधैः॥ असदव्यक्तरूपत्वात्कारणं चापि शब्दितमित्यभिधानम् ॥ असच्च सच्चैव च यद्विश्वं सदसतः परमिति च भारते ॥ १९ ॥ तथापि मद्भजनमेवान्यदेवताभजनाद्वर

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिविदेवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते ॥ २१ ॥

मितिदर्शयति ॥ त्रैविद्या इत्यादिना ॥ २० ॥ २१ ॥

भोक्ता भगवान् तर्हि किं भागवतानां त्रैविद्यानां च फलं साम्यमेवेति पृष्टस्येदमुत्तरमित्याशयः तथापि सर्वत्र भगवतो भोक्तृत्वेऽपि मद्भजनं भागवतैरनुष्ठितम् देवतेति पित्राद्युपलक्षणम् त्रैविद्याद्यनुष्ठिताद्वरमुत्कृष्टफलम् ॥ इत्यादिना श्लोकत्रयेण ॥ २० ॥ २१ ॥

॥ कृ० ॥ कर्मणि क्विपीति ॥ संपदादिभ्यश्चेति वार्तिकादितिशेषः॥वक्ष्यामीति॥ तर्ह्यहं क्रतुरित्याद्यमत्यामित्यनेनेति शेषः॥ननु त्रैविद्यानुष्ठितमंते मद्भजनं विष्णुपरिवारत्वादिना भागवतानुष्ठितान्यदेवताभजनान्मोक्षप्रदात्कथं वरमित्यत आह॥ भागवतैरनुष्ठितमिति ॥ पितृन्यांति पितृव्रताः ॥ भूतानि यांति भूतेज्या इति वाक्यशेषानुसारादाह ॥ पित्राद्युपलक्षणमिति ॥

१पुनरपि एवं वेदोक्तं धर्मं अनुतिष्ठंतः कामेच्छवः स्वर्गप्रतिगमनं ततो मर्त्यलोकं प्रति आगमनं लभंतेनकदापिमोक्षमित्यर्थः॥

॥ श्री० ॥ अतिप्रसक्तिवारणायादिपदग्राह्यतावच्छेदकमाह ॥ श्लोकत्रयेणेति ॥ २० ॥ २१ ॥ सर्वमिति प्रमाणे केवलं शुद्धमाद्यं देवं विना यन्मनोगतं सर्वं विषयजातं तत्परित्यज्य तमेव ये चिंतयंतीत्यर्थः ॥ योगक्षेममिति ॥ अप्राप्तप्राप्तिरूपत्वात् प्राप्तपरिरक्षणरूपत्वाच्च मोक्ष एव मुख्यतो योगक्षेमशब्दार्थ इति द्रष्टव्यम् ॥ अत्रैवेति ॥ अन्यदचिंतयित्वा भगवंतमेव चिंतयतां योगक्षेमवहत्वं इत्यर्थः तथा च महता कालेनैकांतितया कामं समाहितैरित्यनेनानन्या इति गीतापूर्वार्धस्य शक्यो द्रष्टुमित्युत्तरार्धेन तेषामित्युत्तरार्धस्य समानार्थत्वं द्रष्टव्यम् ॥ प्रभयेति ॥ ज्ञानेन देहकांत्यावेत्यर्थः ॥

अद्वैतज्ञानिनोऽनन्या इति प्रतीतिं निराकर्तुमाह ॥ अनन्या इति ॥ अविद्यमानमन्यद्येषां ते अनन्याः ॥ तच्चान्यच्चिंतयंतो मामिति ॥ प्रसङ्गाच्चिंतनीयमिति लब्धे अन्यदचिंतयित्वेति सिध्यति ॥ प्रतीत एवार्थः किं न स्यादित्यत आह ॥ तथाहीति ॥ देवमेवविशंतीत्यनेन योग

अनन्याः अन्यदचिंतयित्वा ॥ तथा हि गौतमखिलेषु ॥ सर्वं परित्यज्य मनोगतं यद्विना देवं केवलं शुद्धमाद्यम् ॥ ये चिंतयंतीह तमेव धीरा अनन्यास्ते देवमेवाविशंतीति ॥ कामं कालेन महता एकांतित्वा

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

त्समाहितैः ॥ शक्यो द्रष्टुं स भगवान्प्रभासंदृश्यमंडल इति मोक्षधर्मे ॥

क्षेमं वहाम्यहमित्युक्तार्थं भवति ॥ अत्र काममित्यागमांतरम् ॥ प्रभयासंदृश्यं मंडलं स्वरूपं यस्यासौ तथोक्तः ॥

॥ कृ० ॥ ननु वैष्णवा इति वृद्धचैव मानयं त्वन्यदेवता इत्याशंक्य ब्रह्मादिकनान्यदेवताभजनं भगवद्भजनमेव कथं तस्माद्रूपत्वमित्यत आह ॥ त्रैविद्याद्यनुष्ठिनादिति ॥ आदिशब्देन केवलज्ञमिथ्याज्ञानिनोः संग्रहः ॥ त्रैविद्यकृतस्य स्वर्गन्युनिहेतुत्वात ॥ अज्ञकृतस्य मोघत्वात ॥ मिथ्याज्ञानिकृतस्य च विपरीतफलत्वादिति भावः ॥ योगक्षेमं वहामीत्यपुनरावृत्तिफलोक्त्यनुसारेणाह ॥ उत्कृष्टफलामिति ॥ २० ॥ २१ ॥ प्रकृतप्रमेयाप्रतिपादनात्काममितिप्रमाणं किमर्थमित्यतो गूढाभिसंधिराह ॥ अत्रैवेति ॥ भगवंतमेव चिंतयतां योगक्षेमप्राप्तावित्यर्थः ॥ घटादिवत्प्रभायां दृश्यस्वरूप इतिव्याख्याने माहात्म्यालाभादाह ॥ प्रभयासंदृश्यमिति ॥ आदरपूर्वकंदर्शनीयमित्यर्थः ॥ कुत इत्यतः तत्रनिमित्तमुक्तं प्रभयेति प्रभानिमित्तेनेत्यर्थः ॥

॥ श्री० ॥ ननु देवमेवाविशंतीत्यनेन मोक्षदातृत्वस्य योगक्षेमवहशब्दार्थत्वेनोक्तत्वात् काममित्यत्र च तदनुक्तेः कथमत्रैवाऽगमांतरमित्युक्तमित्यत आह ॥ दर्शनस्येति ॥ अपवादो निंदा ॥ जनापवादात् भीरुं मां नातोऽन्यद्वक्तुमर्हसीत्यादि प्रयोगात् ॥ २२ ॥ प्रश्नस्येति ॥ यदि सर्वत्र भोक्ता भगवान्स्तर्हि भागवतानां त्रैविद्यानां फलसाम्यमेवेति प्रश्नस्येत्यर्थः ॥ सचेदिति ॥ भगवद्योग इत्यर्थः ॥ तदभावश्चेदिति ॥ त्रैविद्यामामित्यादिना फलसाम्याभावस्योक्तत्वादिति भावः ॥ भाव्यकारणमित्यस्य भगवदज्ञानरूपमित्यर्थः ॥ २३ ॥ २४ ॥

दर्शनस्य योगक्षेमसाधनत्वं प्रसिद्धमेव ॥ नित्याभियुक्तानामित्यस्यापवादविषयाणामित्यन्यथाप्रतीतिनिरासार्थमाह ॥ नित्यमिति ॥ सर्वतः सर्वस्मिन्देशे ॥ शरीरेंद्रियमनोभिर्वा युक्तानां भगवति सेवायुक्तानाम् ॥ २२ ॥ उक्तप्रश्नस्योत्तरं जातं तत्किमुत्तरेणेत्यतः प्रश्नाभिसंध्युद्घाटनस्येदमुत्तरमित्याह ॥ तर्हीति ॥ भगवद्योगनिमित्तं हि फलं स चेत्सर्वत्र समस्तदा सर्वेषां फलसाम्येन भाव्यं तदभावश्चेत्तर्ह्यहं क्रतुरित्युक्तं

नित्यमभितः सर्वतो युक्तानां ॥ २२ ॥ तर्ह्यहं क्रतुरित्यादि असत्यमित्यत आह ॥ येऽपीति ॥ २३ ॥ का

येऽप्यन्यदेवता भक्ता यजंते श्रद्धयान्विताः ॥ तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥
॥ २३ ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥

रणमाह विधिपूर्वकत्वं ॥ अहं हीति ॥ २४ ॥

सर्वत्र भगवतो भोक्तृत्वमप्यसत्यमित्यर्थः ॥ २३ ॥ अहं क्रतुरित्यादिनोक्तत्वादहं हीति पुनरुक्तिरित्यत आह ॥ कारणमिति ॥ त्रैविद्यादिकृतानां यज्ञानां भगवांश्चेद्भोक्ता कथं तर्ह्यविधिपूर्वकत्वमिति शंकायामिति शेषः ॥ २४ ॥

॥ कृ० ॥ ननु मोक्षदातृत्वं योगक्षेमवहत्वमिति देवमेवाऽविशंतीत्यनेन व्याख्यानम् ॥ न च तत्काममिति वाक्ये प्रतीयते तत्कथमत्रैवेत्युक्तमित्यतोऽभिसंधिमुद्घाटयति ॥ दर्शनस्येति ॥ अपवादविषयाणामितीति ॥ अभियोगस्तु शपथे स्यादाक्रोशे परिभव इति विश्वोक्तेरभियोगशब्दस्यापवादाक्रोशार्थः ॥ आक्रोशो निंदापवादश्चेत्यर्थांतरं ॥ तथा च भावेक्तताभियोगशब्दस्यापवादार्थत्वेऽभिपूर्वयुजेर्वतदापन्नम् ॥ क्तप्रत्ययश्च कर्मार्थः ॥ ततोऽपवादविषयाणामित्यर्थलाभ इतिभावः ॥ २२ ॥ २३ ॥ २४ ॥

॥ श्री० ॥ २५ ॥ प्रासंगिकेति ॥ प्रकृताक्षेपसमाधानरूपत्वाभावादिति भावः॥साधनानादरस्येति॥सामान्यतः पत्रं पुष्पमित्यनेकसाधनेोक्त्यातुलसीपत्रादिरूप एव साधनेऽनादर उक्त इत्यर्थः ॥ स्वस्याऽर्थो येन भवत्यसौ स्वार्थ इति विग्रहमभिप्रेत्याह ॥ स्वार्थसाधनेति ॥ साधनशब्दोऽत्र भावार्थस्तथा च स्वार्थसंपादनोपाय इत्यर्थः ॥ २६ ॥

ते पुण्यमासाद्येति योगक्षेमं वहाम्यहमिति च फलभेदस्योक्त्वा॥किं यांतीत्यादिनेत्यत आह॥ फलमिति॥तस्यैवायं प्रपंच इति भावः॥२५॥

पत्रमित्यस्य संगत्यप्रतीतेराह॥दुर्बलैरिति॥अनस्तद्भजनस्य महाफलत्वेपि नहिहाग्ल्पानां देवानांभजनमल्पफलमपि सुशकत्वात्करोमीति प्रा

फलं विविच्याह ॥ यांतीति ॥ २५ ॥ दुर्बलैस्त्वं पूजयितुमशक्यो महत्त्वादित्याशंक्याह ॥ पत्रमिति ॥

न त्वविहितपत्रादि ॥ तस्यापराधत्वोक्तेर्वाराहादौ भक्त्यैवाहं तृप्यइति भावः ॥ भक्तप्रियं सकललोक

यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः ॥ भूतानि यांति भूतेज्या यांति मद्याजिनोऽपिमाम्॥२५॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

नमस्कृतं चेति भारते ॥ एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे
यत्सर्वत्रात्मदर्शनम् ॥ २६ ॥

संगिकशंकाशेषः ॥ साधनानादरस्योक्त्वाद्यत्किंचित्पत्रादिकमिति नमंतव्यमित्याह ॥ नत्विति ॥ तत्किमपि भगवते समर्पणीयमेवेति नि

यमोऽत्राभिप्रेत इत्यत आह ॥ भक्त्यैवेति ॥ कुत इत्यत आह ॥ भक्तेति ॥ स्वार्थः ॥ स्वार्थसाधनोपायः ॥२६॥

॥ कृ० ॥ २५ ॥ ननु कथमियं शंका पूर्वोक्तानाक्षेपादित्यत उक्तम ॥ प्रासंगिकेति ॥ साधनादरस्येति ॥ इदं पत्रमित्यादि विशेषरूपेणाऽनुक्तेरित्यर्थः ॥ भक्त्योदः स्वतः फलत्वाभावादाह ॥ स्वार्थसाधनोपाय इति ॥ स्वःस्वरूपभूत आनंदादिर्यो येनेति व्युत्पत्तेर्लक्षणाहेति भावः ॥ २६॥

॥

श्री० ॥ आत्मनः स्वस्य दर्शनमिच्छन्यथा प्रतीतिनिरासायाऽह ॥ आत्मन इति ॥ संनिधानादिति भावः ॥ साधनानादरस्येति ॥ पत्रादिरूपसाधनानादरस्य भक्तविवादरस्य च पत्रमित्यनेनश्लोकेनोक्तत्वादित्यर्थः ॥ सामान्यामिति ॥ पत्रमित्यादिना सर्वकर्मकरणदशायां भक्तिरेपेक्षितेतिसामान्येनोक्तस्य यत्करोषीत्यादिना यज्ञाशनादिक्रिया विशेषे भक्तिरपेक्षितेति निगमनं क्रियत इत्यर्थः ॥ अत इति ॥ भाष्यस्य यतोऽहमनयैव तृप्य इति भक्तेरावश्यकत्वमतो भक्तिपूर्वं यत्करोषीत्यादि योज्यम ॥ २७ ॥ २८ ॥

आत्मनो गोविंदस्यासाधनानादरस्य पूर्वमेवोक्तत्वाद्व्यर्थमुत्तरमित्यत आह ॥अत इति ॥ सामान्यमुक्त्वा विशेषे निगमनमेतदिति भावः ॥ ॥ २७ ॥ २८ ॥ भक्तप्रियत्वमुक्त्वा तद्विरुद्धं सर्वत्र साम्यं कथमुच्यत इत्यत आह तर्हीति ॥ यदि त्वं भक्तप्रियः॥तदा द्वेष्यप्रियश्च स्याः

अतो यत्करोपि ॥ २७ ॥ २८ ॥ तर्हि स्नेहादिमत्त्वादल्पभक्तस्यापि कस्यचिद्बहुफलं ददासि ॥ विपरी

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं॥२७॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः॥ संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥२८॥
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः॥ ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं॥२९॥

तस्यापि कस्यचिद्विपरीतमित्यत आह॥ समोहमिति ॥ तर्हि न भक्तिप्रयोजनमित्यत आह ॥ ये भजंतीति ॥ ततश्च भक्तेषु द्वेषिषु यथासंख्यं स्नेहद्वेषवत्त्वादल्पभक्तस्यापि कस्यचिद्बहुफलं सुखरूपं ददासि ॥ विपरीतस्याल्पद्वेषिणोऽपि कस्यचिद्बहुफलं दुःखरूपं ददासि इत्यायापद्यते ॥ राजादिषु तथा दर्शनात् ॥तथा च वैषम्यनैर्घृण्ये तवेति शंकार्थः ॥ पूर्वार्धेनैव शंकायाः परिहृतत्वात्किमुत्तरार्धेनेत्यत आह ॥ तर्हीति ॥

॥ कृ० ॥ सामान्यमुक्त्वेति ॥ यो मे भक्त्याऽप्रयच्छतीति पुरुषसामान्यविषयं प्रतिज्ञा पुरुषविशेषेऽनेन उपसंहारोऽयं क्रियत इत्यर्थः ॥२७ ॥२८ ॥

१ बहुव्रीहिः ॥ २ मयिसर्वेस्मिन्समर्पितेर्मात ॥ ३ फलत्यागकर्मानुष्ठानरूपाभ्यां युक्तात्मा ॥

॥ श्री०॥मदीयम॥मद्विषयम॥इतीति॥तदीययोग्यताऽनतिरेकाभिप्रायेण साम्ये भगवतोक्तेऽपीत्यर्थः॥ विपरीतमर्थमिति॥ सर्वथा द्वेष्यः प्रियश्च नास्तीति विपरीतमर्थमित्यर्थः ॥ प्रयुज्य ते प्रवर्त्यते पुमाननेनेति व्युत्पत्त्या प्रयोजनशब्दः प्रयोजनसाधनपर इत्याशयेनाऽह ॥ प्रयोजनं फलस्येति ॥ उक्तविरोध इति ॥ पत्रमित्यादिना भक्त्यैवाऽहं तृप्य इति यदुक्तः प्रयोज कत्वमुक्तं तद्विरोध इति भावः ॥ द्वितीयेति शब्दात्परमर्थशब्दोऽध्याहार्य इत्याशयेनेत्यर्थ इत्युक्तम ॥ तादृगेवेति ॥ फलं नभवतीत्यर्थः ॥ कुत इत्यत आह ॥ भजनाभावेऽपीति ॥ स्वभावसिद्धत्वादिति भावः ॥ अबुद्धीति॥तथा च योऽबुद्धिपूर्वोवशः स तस्य भगवतो ध्यानात ध्यानमहिम्ना पुनर्बुद्धिपूर्ववशो भवतीत्यर्थः॥२९॥क०॥विपरीतमर्थमिति॥सर्वथा द्वेष्यः

अहं हि सर्वभूतेषु समो नचेपस्यादिमान्यतो मे तदीयं द्वेषमपेक्ष्याधिकं द्वेष्यो नास्ति॥ तदीयां भक्तिमपेक्ष्याधिकं प्रियश्च नास्तीति भगव तोक्तेऽपि विपरीतमर्थं गृहीत्वा शंकते॥यदि ते प्रियो नास्ति तर्हि न भक्तिः प्रयोजनं फलस्य॥तथा चोक्तविरोध इति भावः॥ मयि ते ते षु चाप्यहमित्येतन्नफलं स्वभावसिद्धत्वादित्यत आह ॥ मयीति ॥ इत्यस्येत्यर्थ इति योजना ॥ कुत एतदित्यत आह ॥ उक्तंचेति ॥ मम

मयि ते तेषु चाप्यहमिति॥मम ते वशाः तेषा महं वश इति॥उक्तंच पैंगिखिलेषु॥येवै भजंते परमं पुमांसं तेषां वशः स तु ते मद्वशाश्चेति॥तद्वशा एव ते सर्वदा तथापि बुद्धिपूर्वाबुद्धिपूर्वकत्वेनभेदः॥उद्धवादिवच्छिशु पालादिवच्च ॥ तच्चोक्तं तत्रैव ॥ अबुद्धिपूर्वाद्योवशस्तस्यध्यानात्पुनर्वशो भवते बुद्धिपूर्वमिति ॥ २९ ॥

ते वशा इत्येतदपि तादृगेव भजनाभावेऽपि तद्वशत्वस्वाभाव्यादित्यत आह॥तदिति॥यद्यपीति शेषः॥अत्र दृष्टांतं प्रमाणं चाह॥उद्धवादीति॥ अबुद्धिपूर्वं यो वशः सः ॥ २९ ॥ प्रियश्च नास्तीति विपरीतमित्यर्थः ॥ ननु भक्तेः प्रयोजनत्वाभावस्य परं प्रतिसिद्धत्वात्तत्कथनमयुक्तम् ॥ अप्राप्ते शास्त्रमर्थवदिति न्यायादित्यत आह ॥ प्रयोजनं फलस्येति ॥ करणव्युत्पत्त्योऽय प्रयोजनशब्द इति भावः ॥ यच्छब्दश्रवणादबुद्धिपूर्वोयोऽवशमित्यतः परमध्याहार्यमाह ॥ यो वशः सइति ॥ २९ ॥

१ मदीयमिति पाठः ॥

॥ श्री० ॥३०॥**सम्यग्व्यवसायवत्त्वात्** ॥ सम्यक् भगवत्सर्वोत्तमत्वादि निश्चयवत्त्वात् ॥ अंगीकृतमिति ॥ प्रायः शब्देनेति भावः॥तदंशाः देवांशाः यथोक्तमनुष्याख्याने॥चंद्रसुग्रीवयो श्चैव स्वोच्चदारपरिग्रहात् ॥ प्राप्तहानिरभून्नैवकृतहानिः कथं त्वनेति ॥ अत्र प्राप्तशब्देन स्वयोग्यादधिकेनार्जितेन पुण्येन प्रसक्तमुच्यते ॥ तथा चान्यत्र॥स्वाधिकाराधिको यत्नः कथंचि न्नोपपद्यते ॥ कथंचिदधिके यत्ने दोषःकश्चित्समापतेदिति ॥ एधमानाद्धीडिति श्रुतेश्चेति द्रष्टव्यम ॥ विश्वामित्रादीनामिति ॥ विश्वामित्रस्य मेनकोर्वशीरूपाप्सरस्त्रीसंभोगत्रिशंकाद्य याज्ययाजनादिरूपसुदुराचारस्य दर्शनादिति भावः ॥

अपि चेत्यादिना भक्तेः प्रशंसा क्रियते ॥ तत्र विष्णुभक्तेः सुदुराचारेणैकत्र समावेशप्रतीतो यथावद्व्याचष्टे ॥ न भवत्येवेति ॥३०॥ बहुपुण्येन स्वयोग्यादधिकेनार्जितेन सम्यग्व्यवसितो हि स इति हेतोरुक्तत्वात्क्षिप्रमित्यादि व्यर्थमित्यतआह ॥ कुत इति ॥ सम्यग्व्यवसा यवत्त्वेपि सुदुराचारः कुतः साधुर्मंतव्य इति शंकार्थः ॥सम्यग्व्यवसायवत्त्वात्क्षिप्रं भवति धर्मचित्तः यद्येतद्भक्तेः सुदुराचारेण सहैकत्र क्वाचि

न भवत्येव प्रायस्तद्भक्तः सुदुराचारस्तथापि बहुपुण्येन यदि कथंचिद्भवति तर्हि साधुरेव स मंतव्यः ॥

अपि चे त्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यःसम्यग्व्यवसितो हि सः॥३०॥
क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति॥कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥

॥ ३० ॥ कुतः क्षिप्रं भवति धर्मात्मा ॥ देवदेवांशादिष्वेव च तद्भवति ॥

देवस्थानमंगीकृतं तदपि नमनुष्यविषयमित्याह ॥ देवेति ॥देवाश्चंद्रादयस्तदंशाः सुग्रीवादयः ॥ आदिपदेन विश्वामित्रादीनामृषीणां ग्रहणम् एतच्चदेवदेवांशादिष्वेव विषयेषु भवतीति योजना ॥

॥ क्र० ॥ ३० ॥ ननु बहुपुण्यस्याशुभफलत्वात्कथं दुराचारहेतुत्वमित्यत आह ॥ स्वयोग्याधिकेनेति॥स्वाधिकाराधिको यत्नः कथंचिन्नोपपद्यते॥ कथंचिदधिके यत्ने दोषः कश्चित्स मापतेदित्युक्तेरिति भावः ॥ तदंशा इति ॥ देवांशाइत्यर्थः ॥

॥ श्री० ॥ दुश्चरितादविरतः॥ सदादुराचारवान् ॥ अभक्तस्त्यादि॥ तथा चाभक्तो यः कश्चित्सोऽप्यमलाशयो भूत्वा वासुदेवे सम्यग्भक्तो न भवेत् एवमसमाहितोऽयः कश्चित्सोऽप्यमलाशयो भूत्वा वासुदेवे सम्यग्भक्तो न भवेदिति योजना द्रष्टव्या ॥ श्रवणकीर्तनादिभक्तिलिंगरहितः यथा श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् एवं पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणेति भागवते श्रवणादीनां भक्तिज्ञापकत्वेनैव भक्तित्वमप्युक्तमित्येव ध्येयम् ॥एवं भूताः ॥ दुश्चरितादविरता अभक्ता असमाहिताश्चेत्यर्थः ॥ लिंगं भक्तिचिन्हम् ॥ तथाच सुदुराचारः पुमान् भगवद्भक्तो भवितुमर्हति तल्लिंगत्वादित्यनुमानं द्रष्टव्यम् ॥ अतोऽन्य इतीति ॥ तथाच विप्रतिपन्नः सुदुराचारः डांभिकः भगवद्भक्त इतिवाद न ॥ देवादिव्यतिरिक्तत्वे सति सुदुराचारत्वादिति सत्प्रतिपक्षानुमानमुक्तं भवति ॥

कुत इत्यत आह ॥ उक्तंचेति ॥ दुश्चरितादविरतो यः कश्चित्सोऽमलाशयो भूत्वा वासुदेवे सम्यग्भक्तो न भवेत् ॥ तथाऽभक्तः ॥ श्रवणकीर्तनादिभक्तिलिंगरहितः ॥ एवमसमाहितो विषयविक्षिप्तमनाश्च ॥ देवादयश्चक्वचिदेवं भूता अपि सम्यग्भक्ता भवंति ॥ कुतः ज्ञानतः

उक्तं च शांडिल्यशाखायां ॥ नाविरतादुश्चरितान्नाभक्तो नासमाहितः ॥ सम्यग्भक्तो भवेत्कश्चिद्वासुदेवेऽमलाशयः ॥देवर्षयस्तदंशाश्च भवंति क्वच ज्ञानत इति॥अतोऽन्यः कश्चिद्भवतिचेत् डांभिकत्वेन सोऽनुमेयः॥

सम्यग्व्यवसायत्वात्॥ननु देवादिभ्योऽन्योऽपि सुदुराचारस्तद्भक्तो दृश्यते शंखचक्रांकितबाहुमूलत्वादिलिंगवत्त्वात् कथमेतदित्यत आह ॥ अतोऽन्य इति ॥ भवति चेत्सुदुराचारोऽपि भक्तिलिंगवानिति शेषः ॥

॥ कृ० ॥ अभेदे हेतुहेतुमद्भावायोगादाह ॥ श्रवणकीर्तनादीनि ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं॥इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणेति सप्तमस्कंधोक्तभक्तिलिंगेत्यर्थः ॥ शंखचक्रांकितबाहुमूलत्वादिलिंगत्वादिति ॥ ये कंठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिन्हितशंखचक्राः॥ये वा ललाटफलके लसदूर्ध्वपुंड्रास्ते वैष्णवा भुवनमाशु पवित्रयंतीत्यादिप्रमाणेन शंखचक्रांकितबाहुमूलत्वादेरपि विष्णुभक्तलिंगत्वोक्तेरिति भावः ॥

॥ श्री० ॥ **मध्यमदुराचार इति** ॥ सुदुराचारो न भवतीत्यर्थः ॥ तथाविधो भक्तिर्भगवान् ॥ **साधारणभक्तीति** ॥ अल्पभक्तीत्यर्थः ॥ सत्प्रतिपक्षानुमानेऽनुभवबाधमाशंकते ॥ **सुदुराचाराणामपीति** ॥ भगवत्प्रेम्णः भगवत्स्नेहरूपभक्तेरित्यर्थः ॥ **डांभिकत्वेति** ॥ अभक्तत्वेत्यर्थः ॥भाव्य इतरेषां सुदुराचाराणां भगवत्प्रेमानुभवत्वामित्यर्थः ॥ यदि सुदुराचाराणामल्पाभक्तिरस्ति। तर्हि डांभिकत्वेन सोऽनुमेय इति कथमुक्तमित्यत आह ॥ **प्रेमानुभवाभावेति** ॥ प्रेमानुभवाभाववतीति पुंसीत्यर्थः ॥ तथा च प्रेमानुभवाभाववान् पक्ष इत्याशयः॥ तथा च भगवत्प्रेमानुभवाभाववान् डांभिकः अभक्त इति यावत् ॥ देवादिव्यतिरिक्तत्वे सति सुदुराचारत्वादित्यनुमानं द्रष्टव्यम्॥ भगवत्प्रेमानुभववत्सुदुराचारपक्षकानुमानमेवाऽस्तु ॥ न च डांभिकत्वरूपाभक्तत्वानुमानायोग इति वाच्यम् ॥ महाभक्तभावस्यैव साध्यत्वांगीकारात् ॥ तथा च भगवत्प्रेमानुभवभाववान् सुदुराचारो महाभक्तत्वभाववान् ॥देवादिव्यतिरिक्तत्वे सति सुदुराचारत्वादित्यनुमानप्रयोगसंभवादित्याशयेनाऽह ॥ **महाभक्तीति** ॥ महाभक्तत्वभावसाधकानुमानेऽप्रयोजकतामाशंकते ॥ **सुदुराचारोऽपीति** ॥ **डांभिकत्वादीति** ॥ महाभक्तत्वभावेत्यर्थः ॥ **आहेति** ॥ हेतुसाध्ययोर्व्याप्तिग्राहकप्रमाणसद्भावेन तद्व्याप्त्याप्रयोजकता शंकेत्याहेत्यर्थः ॥

मा भूत्सुदुराचारो भक्तः ॥ मध्यमदुराचारस्तु तथाविधः कथमित्यत आह॥साधारणेति ॥महतीति ॥ वक्ष्यमाणसाधारणभक्तिव्यवच्छेदार्थं सुदुराचाराणामपि भगवत्प्रेम्णोनुभवसिद्धत्वात्कथं डांभिकत्वानुमानमित्यत आह॥साधारणेति॥अल्पेत्यर्थः ॥प्रेमानुभवाभावेऽनुमानमुक्तम् ॥ महाभक्त्य

साधारणपापानां सत्संगान्महत्यपि कथंचिद्भक्तिर्भवति॥ साधारणभक्तिर्वेतरेषाम् ॥ स शठमतिरुपधाति योऽर्थतृष्णां तमधमचेष्टमवेहि नास्य भक्तिरिति श्रीविष्णुपुराणे॥

भावविषयं वेति भावः॥सुदुराचारोऽपि भक्तिलिंगवान्महाभक्त एवास्तु किं डांभिकत्वादिकल्पनयेत्यत आह॥स इति॥शठमतिःदंभबुद्धिः॥

॥ कृ० ॥ **माभूत्सुदुराचार इति** ॥ स्त्रीचदारपरिग्रहः हरिगुरुस्वद्भार्यानिंदादिसुदुराचारः ॥ अगम्यागमनाभक्ष्यभक्षणादिर्मध्यमदुराचार इति विवेकः ॥ **तथाविध इति** ॥ शंखचक्रांकितत्वाहंमुद्रत्वादिलिंगवानित्यर्थः ॥ **कथं दांभिकत्वानुमानमिति** ॥ विप्रतिपन्नो दांभिको भगवदभक्त इति यावत् देवादिव्यतिरिक्तत्वे सति सुदुराचारत्वादसुरवदित्यनुमानं कथं बाधप्रसंगादित्यर्थः ॥ **प्रेमानुभवाभाव इति** ॥ भगवद्विषयकस्नेहानुभवाभाव इत्यर्थः ॥ तथा च प्रेमानुभवो यत्र नास्ति तस्यैव पक्षत्वान्न बाध इति भावः ॥ ननु यत्र प्रेमानुभवसिद्धिः तत्र व्यभिचार इत्यत आह ॥ **महाभक्तीति** ॥ तथा च महाभक्त्यभावस्य साध्यत्वान्न बाधः ॥ नव्यभिचार इति भावः ॥ **दांभिकत्वादीति** ॥ आदिपदान्महाभक्त्यभावसंग्रहः ॥

॥ श्री० ॥ **तयोः** ॥ दुराचारत्वमहाभक्त्योरित्यर्थः ॥ एवं दुराचाराणां महाभक्त्यभावः ॥ कस्मान्नपश्येयमित्यस्याऽभिप्रायमाह ॥ **कारणेति** ॥ सामग्रीशब्दः साकल्यपरः ॥ भाष्ये ज्ञानस्य भक्तिभागत्वात् ज्ञानाभावे भक्त्यभावादित्यर्थः ॥

महाभक्तेर्दुराचारोपशमहेतुत्वोक्तेश्च न तयोरेकत्र समावेश इत्याह॥सेति॥हरिभक्तिः॥इतश्चैवमित्याह॥वेदा इति ॥मम मया परस्य गुह्यं न च भिन्नपूर्वं॥ पिशुनत्वं नाचरितं॥ उपस्थमुदरं पाणिर्वागिति चत्वारि॥मे मया॥एकांतभावेन नियतमनसा सत्वमंतःकरणं कारणसामग्र्यां सत्यां

सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंस इति च॥ वेदास्त्वधीता मम लोकनाथ तप्तं तपो नानृतमुक्तपूर्वम् ॥ पूजा गुरूणां सततं करोमि परस्य गुह्यं न च भिन्नपूर्वम् ॥ गुप्तानि चत्वारि यथागमं मे शत्रौ च मित्रे च समोऽस्मि नित्यं ॥ तं चापि देवं शरणं प्रपन्नं एकांतभावेन भजाम्यजस्रं ॥ एतैरुपायैः परिशुद्धसत्वः कस्मान्न पश्येयमनंतमेनामिति मोक्षधर्मे॥ आचारस्य ज्ञानसाधनत्वोक्तेश्च ॥ ज्ञानाभावे सम्यक्भक्त्यभावात् ॥

कार्यानुदयो ह्याश्चर्यहेतुः ॥नन्वाचारस्य ज्ञानसाधनत्वोक्त्या दुराचाराणां ज्ञानाभावः सिध्यतु॥महाभक्त्यभावस्तु कुत इत्यत आह ॥ज्ञानेति॥

॥ कृ० ॥ परस्य गुह्यं न च भिन्नपूर्वमित्यस्य दुराचाराभावपरत्वं स्पष्टयति ॥ **पिशुनत्वमिति** ॥ राजादीन्प्रति परदोषसूचनमित्यर्थः ॥ **उपस्थमिति** ॥ उपस्थमुदरंबाहू वाक्चतुर्थी भवेद्गुप्तिरित्युक्तेरिति भावः ॥ अत्रोपस्थगुप्तिर्नाम परनार्या अधर्षणं स्वभार्याया अपि अनृतावनाह्वान उदरगुप्तिर्नाम युक्ताहारत्वम् ॥ बाहुगुप्तिर्नाम द्यूतस्तेयपरताडनाभावः॥ मितवाक्त्वमाक्रोशोक्तिर्वृथावादजनवादाभावश्च वाग्गुप्तिः ॥ सत्योक्तेरपैशुन्यस्य च पृथगुक्तत्वात्तद्ग्रहः ॥ एतच्चमतं मोक्षधर्मे गोकपिलीयोपाख्याने स्पष्टम् ॥ ननु गच्छामि द्रष्टुं प्रकाशं तवाऽद्यामिति भगवद्दर्शनं प्रतिज्ञाय कस्मादिति तद्विरुद्धं कथं पृच्छतीत्यत आसेधार्थं कस्मान्नपश्येयमित्युक्तमिति भावेन तत्तात्पर्यमाह॥**कारणसामग्र्यामिति** ॥ ॥ इतिश्रीप्रमेयदीपिकाप्रकाशनवमोध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥

॥श्री०॥तदभावे॥ज्ञानाभावे ॥ तदभावसिद्धिः॥ भक्त्यभावसिद्धिः ॥ इति यदुपतिगीताभाष्यटीकामयुक्ताशयमतिललिताभिर्गीर्भिरवेदयिनी ॥ सुललितविवृतिर्या दक्षिणराडाऽत्रचीर्णा नवम अगमदस्यामंतमध्यायवर्यः॥इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावदीपिकाख्यायां नवमोऽध्यायः॥

कुत एतदित्यत आह ॥ तथाहीति ॥ भक्तिज्ञानयोरविनाभूतत्वाच्च तदभावे तदभावसिद्धिरित्याह ॥ भक्तिरिति ॥ ३१॥३२॥ ३३ ॥ ३४॥

तथा हि गौतमखिलेषु ॥ विना ज्ञानं कुतो भक्तिः कुतो भक्तिं विना च तदिति ॥भक्तिः परे स्वेऽनुभवो विरक्तिरन्यत्र चैतत्त्रिकमेककालमिति च भागवते ॥३१ ॥ ३२ ॥ ३३॥ ३४ ॥इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमद्गीताभाष्येनवमोध्यायः॥ ९ ॥श्रीकृष्णार्पणमस्तु ॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिम् ॥३२॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥३३॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ ३४ ॥ ॥ हरिः ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु०राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥ ९ ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यगीताभाष्यस्यटीकायांजयतीर्थमुनि० प्रमेयदीपिकायांनवमोऽध्यायः ॥

---

१ भा. स्कं. ११ अ. २ श्लो ४२ ॥ २ स्वभावतः पुंसः उत्तमवर्णाश्चपापानरूयादियोनिर्येषांतेतथा ॥ ३ स्वतःशूद्रादिहीनवर्णा अपिपुण्यहेतुकाः ब्राह्मणाश्चेत्तेपरांगतियांतीतिकिं पुनर्वक्तव्यम् ॥ ४ पुण्यहेतुकाः ॥ ५ एवंभक्तेःमाचनत्वमेवकुर्वित्याह ॥ देहंभुक्त्वा ॥ ६ मयिमनोयुक्त्वा ॥

॥ इति श्रीमद्भगवद्गीतायां नवमोऽध्यायः ॥
॥ समाप्तः ॥

॥श्री० ॥ ॐ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ दशमाध्यायटीकायाः क्रियते भावदीपिका॥१ ॥ननु कोऽयं विभूतिशब्दार्थइत्यत आह ॥ विभूतिशब्दार्थस्तात्पर्यनिर्णय इति विशिष्टभवनं विभूतिरित्यादिनेत्यर्थः ॥ ननु गीतायां बुद्धिर्ज्ञानमित्यादिना बुद्ध्यादिविशेषकारणत्वस्यैवादावभिधानात्तदनंतरं विभूतेरभिधानात्तदनुसारेण कथां चिद्विशेषकारणत्वं विभूतिश्चे ति वक्तव्यमिति चेत्तत्राह ॥ तदुक्तेरिति ॥ विभूत्युक्तेरित्यर्थः ॥ ननु विभूतिरूपाविशेषकारणत्वरूपार्थद्वयप्रतिपादकत्वेनैकवाक्यत्वायोग इत्यत आह ॥ अत एवेति ॥ प्राचुर्येण विभूतिप्रतिपादकत्वादित्यर्थः ॥ योऽर्थो यत्र प्राचुर्येण प्रतिपाद्यते स ध्यायादिस्तदर्थ इति भावः ॥ मत्यामिति ॥ तथा च तस्यैवायं प्रपंच इति भावः॥ तत्रोपष्टंभकमाह॥अत एवेति

प्रकृतसंगतत्वेनाध्यायप्रतिपाद्यं दर्शयति ॥ उपासनार्थमिति ॥पञ्च ध्यानमुक्तं॥तत्रवमाने मन्मनाभवेति स्मारितं तच्च ध्येयसापेक्षं विशिष्टाधि कारिणा च भगवद्विभूतय उपास्याः अतस्ता आहानेन दशमाध्यायेन तत्रादौ कथांचिद्बुध्यादीनां महर्ष्यादीनां च विशेषकारणत्वमपि भग

॥ ॐ उपासनार्थं विभूतीः विशेषणकारणत्वं च कथांचिदनेनाध्यायेनाह ॥प्रीयमाणाय॥श्रुत्वा संतोषंप्राप्नुवते॥१॥

॥श्रीभगवानुवाच॥भूय एव महाबाहो शृणु मे परमं वचः॥यत्तेऽहं प्रीयमाणायवक्ष्यामिहितकाम्यया॥१॥

वत आहेत्यर्थः ॥ विभूतिशब्दार्थस्तात्पर्यनिर्णयेऽभिहितः ॥ तदुक्तेर्भूयस्त्वात्प्रथममुपादानं ॥ अत एवैकवाक्यता ॥ ननु विभूतयो रसोऽहमि त्यादिनोक्ता एव॥सत्यं ॥ अत एव विस्तरेणात्मन इति वक्ष्यति ॥ ॥ श्री० ॥ ॐ ॥ ननु ध्यानापेक्षितध्येयस्यापि मत्परमादावुक्तत्वाद्विभूतिकथनं किमर्थमित्यत आह ॥ विशिष्टाधिकारिणामिति ॥ उत्तमाधिकारिणामित्यर्थः ॥ बद्धादीनामिति ॥बद्धादीन प्रतीत्यर्थः ॥ एवमग्रेऽपि ॥नन्वत्राध्यायेऽणिमाद्यैश्वर्यस्यानुक्तत्वात्कथं विभूतीराहे ति प्रतिपाद्यमुच्यत इत्यत आह ॥ विभूतिशब्दार्थ इति ॥ यद्यपि विशिष्टभवनं विभूतिरिति विविधभवनं वेत्यनेन तात्पर्यनिर्णये महत्त्वमपि विभूतिरित्युक्तं ततश्च विशेषकारणत्व स्यापि विभूतिशब्देनैव लाभात्पृथगुक्तिरयुक्ता ॥ तथापि ॥ यथा विष्णुस्वरूपाणामितिवद्यस्य ॥ विशिष्टत्व स्वजातेः स्याद्विभूत्याख्यानि तानितिति तात्पर्यनिर्णयोक्तप्रमाणानुसारेण नानारूपाण्येव विभूतिशब्दार्थस्याऽत्र विवक्षितानि विशेषकारणत्वस्य पृथगुपादानात् ॥न त्वैश्वर्यादिमातिमिति विशेषकारणत्वे विभूतिशब्दप्रयोगविरोधः ॥ विशिष्टभवनं विभूतिरि ति योगेन तदुपपत्तेः ॥ ननु गीतापाठक्रमेण विशेषकारणत्वं विभूतिश्चेति वक्तव्यं कुतोऽयं व्यत्यास इत्यत आह ॥ तदुक्तेरिति ॥ विभूत्युक्तेरित्यर्थः ॥ नन्वेवंप्रतिपाद्ययोर्द्वित्वादध्या यैकवाक्यता कथमित्यत आह ॥ अत एवेति ॥ प्राचुर्येणप्रतिपाद्यस्यैक वाक्यत्वं ॥ तस्यैवाध्यायैकवाक्यताप्रयोजकत्वादिति भावः ॥ उक्ताएवेति ॥इदं च सोऽप्सु स्थित्वा रसयति रसनामा ततः स्मृत इत्यादितात्पर्यनिर्णयोक्तयोजनानुसारेणोक्तम॥ तेन पूर्वं रसोऽहमित्यत्रार्थांतरस्योक्तत्वादेकत्वमतदिति द्रष्टव्यम ॥

१ महर्ष्यादीनांचेत्यादावपि ॥ कर्मणिषष्ठीतिभावः ॥

॥ श्री० ॥ ननु भगवतः कार्यमात्रं प्रति विशेषत एव कारणत्वात् केषां निर्दिति किं विशिष्याभिधीयत इत्यत आह ॥ सामर्थ्येति ॥ कार्यांतरापेक्षया बुध्यादीनां सजातीयापेक्षया महर्ष्यादीनामित्यर्थः ॥ संतोषप्राप्तिः किमर्थंवक्तव्येत्यत आह ॥ श्रोतृत्वसंपादिति ॥ १ ॥ विवक्षुरिति ॥जगदुत्पत्तिं वक्ष्यमित्यर्थः ॥ मदीयामिति ॥ तथा च मे प्रभवं मदीयामुत्पत्तिं नविदुस्तथा मे प्रभवंजगदुत्पत्तिं च न विदुरित्यर्थो द्रष्टव्यः ॥ स इतीति ॥जगत्संबंधिन्या उत्पत्तेर्मे इतिस्वसंबंधित्वं कथमुच्यत इत्यर्थः ॥ भाष्ये तस्येत्युच्यते स इत्यनेनेत्यर्थः ॥ दुर्ज्ञानैवेत्यापन्नमिति ॥दुर्ज्ञानैत्येवापन्नं न त्वभाव इत्यर्थः ॥ सर्वथेति ॥ विशेषतः सामान्यतश्चेत्यर्थः ॥ योग्यानुपलब्धेरभावग्राहकत्वादिति भावः ॥

विशेषकारणत्वं नाम सामर्थ्यातिशयोपेततया निर्माणं ॥ प्राक्शोकसंविग्नमानस इत्युक्तं ॥तद्विरुद्धं कथं प्रीयमाणायेत्युच्यत इत्यतो व्याचष्टे ॥ प्रियमाणायेति ॥ पूर्वंबंधुस्नेहाच्छोक उक्तः इदानीं भगवद्वचनश्रवणनिमित्तासंतोषप्राप्तिः श्रोतृत्वसंपत्प्रतिपादनायोच्यत इति न विरोध इति भावः ॥ १ ॥ प्रभवशब्दः केन चित्सामर्थ्यमात्रवाचित्वेन व्याख्यातः अन्येन तु भगवदुत्पत्तिवाचित्वेन तदुभयमंगीकुर्वन्नाधि

प्रभवं प्रभावं ॥ मदीयां जगदुत्पत्तिं वा ॥ तद्वशत्वात्तस्येत्युच्यते ॥ यद्यस्ति तर्हि देवादयोऽपि जानंति

न मे विदुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः॥२॥

सर्वज्ञत्वादतो नास्तीति भावः ॥

कमपि विवक्षुराह ॥ प्रभवमिति ॥ मदीयामुत्पत्तिमिति संबंधः ॥ जगदुत्पत्तिर्मे इतिकथं विशेष्यत इत्यत आह ॥ तदिति ॥ जगदुत्पत्तिरिति वर्तते ॥ एवं तर्हि भगवत्प्रभाववज्जगदुत्पत्तिवच्च भगवदुत्पत्तिरस्त्येव किं तु दुर्ज्ञानैवेत्यापन्नमित्यत आह॥ यदीति ॥भगवदुत्पत्तिरिति शेषः ॥ सर्वज्ञत्वात्सामान्यत इति शेषः ॥ ततः परं न च सामान्यतोऽपि जानंतीत्यध्याहारः ॥ अतः सर्वथाऽनुपलंभात् ॥

॥ कृ० ॥ ननु कार्यमात्रं प्रति विष्णोर्विशेषकारणत्वात्केषां निर्दिशति किं विशिष्योच्यत इत्यत आह ॥ विशेषकारणत्व नामेति ॥ सामर्थ्यातिशयश्च बुद्ध्यादीनां कार्यांतरापेक्षया महर्ष्यादीनां च सजातीयापेक्षयेति बोध्यम ॥ संतोषप्राप्तिरपि किमर्थं वाच्येत्यत आह ॥ श्रोतृत्वसंपादिति॥ श्रोत्रानुकूल्यमित्यर्थः ॥ यः श्रोता गुरूक्तं श्रुत्वा हृष्यति स गुरुप्रीतिविषयो भवतीति प्रसिद्धम ॥ तथा च भगवद्वचनश्रवणेन ॥ प्रीयमाणत्वोक्त्याऽर्जुनस्य भगवत्प्रीतिविषयत्वरूपश्रोत्रानुकूल्यमुक्तमितिभावः ॥१॥ ननु परोक्तार्थस्यैकस्यांगीकारो भाष्ये प्रतीयते ॥ न तु द्वितीयस्येत्यत आह ॥ मदीयामिति ॥ तथा च मदीयामिति संबंधे परोक्तद्वितीयार्थांगीकारलाभः ॥ मदीयां जगदुत्पत्तिमितिसंबंधे त्वधिकोक्तिरपि स्यत इति भावः ॥ म इति कथं विशेष्यत इति ॥ मे प्रभव इति गीतायां मदीयांजगदुत्पत्तिमिति संबंधे त्वधिकार्थोक्तिरयमाक्षेपः॥ विपर्ययपर्यवसानस्य तर्कांगत्वात्तदध्याहरति ॥ ततः परमिति ॥

॥ श्री० ॥ प्रभवादिकमित्यादिपदेन भगवदीयजगदुत्पत्तिग्रहणम् ॥ नन्विति ॥ सामान्यतस्तज्ज्ञानस्य सत्त्वादिति भावः॥ अध्याहृतेनेति ॥ तथा च सर्वस्याप्युत्पत्तिर्यस्य वशेऽतिमंत्रं घो द्रष्टव्यः॥अस्य सर्वस्यापीति ॥ देवादिव्यतिरिक्तप्रपञ्चस्यापीत्यर्थः ॥ तत्कथमिति ॥ तथा च देवादीनां कारणत्वायोगेऽपि तद्व्यतिरिक्तस्य जगतो भगवज्जनकत्वमस्त्विति भावः ॥ उक्तमर्थत्रयमिति ॥ प्रभावं मदीयां जगदुत्पत्तिं इत्युक्तप्रभावस्य विशेषतोऽज्ञानं जगदुत्पत्तेश्च विशेषतोऽज्ञानं भगवतो जन्माभावश्चेत्यर्थत्रयमित्यर्थः॥ननु देवा एवं विदुरिति चेत्तत्राह॥ यत इति ॥ अद्धा विशेषाकारेण ॥ कुतश्चित्प्रमाणात् ॥ विसर्जनेन ॥ सृष्टिक्रियया ॥ निष्प्रभाः ॥ देहलाभवंतः ॥ विशेषोक्तिरियम ॥ अर्वाचीना इत्यर्वागित्यस्यार्थः ॥ तदभाव इति ॥ जगत्सृष्टिरूपार्थाभाव एव स्यादित्यर्थः ॥ वस्तुसिद्धेर्ज्ञानाधीनत्वादिति भावः ॥ इयम ॥ सृष्टिः ॥ अथाको वेदेत्यत्राप्यद्धेत्येतदनुवर्तत इत्याशयेनाद्धावेदेत्युक्तम॥ तथा च को अद्धा वेदेत्यनेन जगदुत्पत्तिं विशेषतो न विदुरित्येतदुपपादितम्॥कु० ॥ प्रभावादावप्येवं तर्कप्रवृत्तौ तदभावोऽपि स्यादित्यतो वैषम्यमाह॥प्रभावादिकमिति ॥ अर्थत्रयमिति॥यद्यपि

प्रभावादिकं तु विशेषत एव न जानंति न तु सामान्यतोऽपीति भावः॥ननु भगवदुत्पत्तेरभावश्चेदत्राभिप्रेतस्तदाहमादिर्हीति हेतुवचनं न संगच्छते॥ अत्राहि देवादयोऽर्वाक्तना मया सृष्टाः कथं पूर्वतनीमुत्पत्तिं जानीयुरिति प्रतीयत इत्यत आह ॥ अहमिति ॥ अपि शब्दोऽध्याहृतेन सर्वस्येत्यनेन संबध्यते ॥ कुतो जनकात् ॥ नन्वत्र सर्वस्याप्युत्पत्तिर्भगवदधीनेति नोच्यते ॥ किंतु देवादीनामेव तत्कथमनेन कारणाभावः

अहमादिर्हीति तूत्पत्तिरपियस्य वशा कुतस्तस्यजनिरिति ज्ञापनार्थम्॥अहं सर्वस्य जगतः प्रभवः प्रलयइति चोक्तम् ॥ उक्तं चैतत्सर्वमन्यत्रापि ॥ को अद्धावेद क इहप्रवोचत्कुतआजाता कुत इयं विसृष्टिः॥
अर्वाग्देवा अस्य विसर्जनेनाथाको वेदयतआबभूवेति ॥

सिध्यतीति चेत् ॥ न ॥ देवादिशब्दस्योपलक्षणार्थत्वात् ॥ तत्कुत इत्यत आह ॥ अहमिति ॥ उक्तमर्थत्रयमुपपादयति ॥ उक्तं चेति ॥ इयं विसृष्टिर्विविधा जगत्सृष्टिः कुतः कारणादाजातेति कः पुरुषः कुतः प्रमाणादद्धा वेदकश्चेह लोके प्रावोचत् ॥ न कोऽपि कुतश्चित् यतो देवा अस्येश्वरस्यविसर्जनेन निष्प्रभा अर्वाचीनाः ॥ सर्वथाऽप्यज्ञाने तदभावः स्यादित्यत उक्तं अथान्यत् यतो यस्मात् ॥ इयमाबभूव स कः प्रजापतिर्भगवानद्धा वेदेत्यर्थः

प्रभवस्य भगवदुत्पत्तेस्तदधीनजगदुत्पत्तेश्चाज्ञेयत्वमुपपाद्यमानमेकं तथाऽपि विपर्यासनिरासायेदमुक्तम्॥

॥ श्री० ॥ न तत्प्रभावमित्यनेन प्रभावं न विदुरित्येतदुपपाद्यते ॥ अद्धर्नीति ॥ तथा च प्रभावं विशेषतो न विदुरित्यर्थः सिध्यतीति भावः ॥ अत एवेति ॥ न तत्प्रभावमित्यत्राद्धे त्यस्यानुवृत्तिं सूचयितुं पूर्वं विशेषतो जगदुत्पत्त्यज्ञानोपपादनाय [illegible] अद्धेति श्रीरुद्राहृता ॥ अन्यथा व्याख्यानानुसरेणादौ न तत्प्रभावमिति प्रभावाज्ञानमुपपाद्याते इयं विसृष्टिरिति जग दुत्पत्त्यज्ञानस्योपपा[illegible]दित्याशय ॥ प्रम [illegible] ॥ प्रमाणं प्रमेति ॥ २ ॥ उभयशेष इति ॥ तथा चानश्रेष्टयितेत्यत्रापि सर्वस्येत्येतत्संबध्य त इति भावः ॥ पचाद्याजिति ॥ तथा [illegible] इति सूत्रेण [illegible] पचादिगणस्थत्वादच्प्रत्यये चकारलोपे भसंज्ञकस्य नकारस्थ स्याकारस्य [illegible] रूपं द्रष्टव्यम् ॥ हेतोर्गत ॥ [illegible] ॥ [illegible] हेतुत्वज्ञापकपंचमीतृतीयाविभक्तिशब्दादेरभावादि त्यर्थः ॥ गत्यंतर[illegible] ॥ [illegible] गमनिका ॥ [illegible] ॥ अनश्रेष्टयि[illegible]युक्तरीत्या गत्यंतरं त्वस्तीत्याशयः ॥ अनूद्यत इति ॥ अनादिमि[illegible]शब्देनेत्यर्थः ॥ प्रभाव इति ॥ [illegible] ([illegible]) प्रागुक्तत्वा [illegible] ॥३॥

न तत्प्रभावमित्यत्राद्धेति द्रष्टव्य ॥ अत एव व्युत्क्रमः ॥ प्रमाणं प्रमा ॥ अन्यस्त्वर्थो भगवतो जन्माभावः ॥२॥ अजशब्दागतार्थतया नादि शब्दं व्याचष्टे ॥ अन इति ॥ सर्वस्येत्युभयशेषः ॥ अंतर्णीतण्यर्थादनतेः पचाद्यच् ॥ न विद्यते आदिकारणमस्येत्यनादिरिति अन्ये। तदसत्॥

न तत्प्रभावमप्ययश्च देवाविदुः कुतोऽन्ये त्वल्पश्रुतिप्रमाणा इतिऋग्वेदखिलेषु ॥ अन्यस्त्वर्थो योमाम

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३ ॥

जमिति वाक्यादेव ज्ञायते ॥ २ ॥ अनश्चेष्टयिता आदिश्च सर्वस्येत्यनादिः॥ अजत्वेनसिद्धेरितरस्य॥३॥

आर्थिकपुनरुक्तिपरिहारादित्याह ॥ अजत्वेनेति॥इतरस्य कारणराहित्यस्य ॥ अजत्वे हेतुरप्यनूद्यत इति चेत्॥ नैवं ॥ तज्ज्ञापकविभक्त्याद्य भावात् ॥ गत्यंतराभावे हि गमनिकेयं ॥ चेष्टकत्व प्रागनुक्तं कथमनूद्यत इति चेत् न ॥ प्रभावे सर्वस्यांतर्भावात् ॥३॥

॥ क० ॥ ननु प्रभावं मदीयं जद्गत्पत्तिं वेति व्याख्यानक्रमादि [illegible] युक्तः [illegible] प्रमाणे किं ॥ततः प्रभावस्याज्ञेयत्वे इतिव्युत्क्रमस्तु कुत इत्यत आ ह ॥ अत एवेति ॥ [illegible] नतत्प्रभाव[illegible] ॥ [illegible] न यथाश्रुतार्थ ॥ [illegible] इति तत्रानिप्रमाणाद्याहरणमिति भावः ॥ प्रमाण[illegible] इत्यत आह ॥ प्रमाणंप्रमात ॥ २ ॥ अनित [illegible] कारयितृत्वाभावाच्चेष्टयितेति व्याख्यानायोग इत्यत उक्तम् ॥ अंतर्णीतेति ॥ विभक्त्याद्यभावादिति ॥ आदिपदेन [illegible] संग्रह ॥ ननु हेत्वर्थगर्भविशेषणमेतादिति नोक्तदोष इत्यत आह ॥ गत्यंतराभावइति ॥ ३ ॥

॥ श्री० ॥ तद्यादिमित्यनेनेति ॥ बुद्धिमित्यनेनापि सर्वकारणत्वस्यैवोच्यमानत्वात्तस्य चादिमित्यनेनैवोक्तत्वादिति भावः ॥ अनर्थांतरमिति ॥ पर्याय इत्यर्थः ॥ आहेति ॥ ज्ञानसामान्यस्य ज्ञानपदेनैवोक्तत्वाद्बुद्धिपदमुक्तार्थकमेवेत्याहेत्यर्थः ॥ आध्यात्मिकेति ॥ बुद्ध्याद्याध्यात्मिकधर्मप्रसंगे ज्ञानशब्देन तथाविधं ज्ञानमेवगृहीतुं युक्तं न शास्त्रमित्यन्यथाप्रायपाठविरोधः स्यादित्यर्थः ॥ एकेनैवेति ॥ बाह्यांतरिंद्रिययोरुभयोरप्युपशमनस्य साम न्तन इंद्रियशांतिना दमशब्देनैव सिद्धत्वात् शमशब्दस्य वैयर्थ्यमित्यर्थः ॥ क्रियास्वेति ॥ गुर्वादिपूजादिरूपास्वित्यर्थः ॥ बाह्यांतः करणानि ॥ बाह्यवस्तुविषयेऽन्तः करणसंयम इत्यर्थः ॥ ४ ॥ ५ ॥

तद्यादिमित्यनेन बुद्धिरित्यादिकं गतार्थमित्यत आह ॥ तदिति ॥ सर्वादित्वं बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थांतरमिति गौतमवचनात् बुद्धिर्ज्ञानमिति पुनरुक्तिरित्यत आह ॥ कार्येति ॥ कुत एतदित्यत आह ॥ ज्ञानमिति ॥ ज्ञायतेऽनेनेति ज्ञानं शास्त्रमित्यसत् ॥ अध्यात्मिकधर्मप्रसंगात्

तत्प्रथयति ॥ बुद्धिरित्यादिना ॥ कार्याकार्यविनिश्चयो बुद्धिः ॥ ज्ञानं प्रतीतिः ॥ ज्ञानंप्रतीतिर्बुद्धिस्तु कार्याकार्यविनिश्चयइति ह्यभिधानम् ॥ दम इंद्रियनिग्रहः ॥ शमः परमात्मनि निष्ठा ॥ शमो मन्निष्ठता बुद्धेर्द

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवो भावो भयं चाभयमेव च ॥४

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥ भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥५

मइंद्रियनिग्रहइति भागवते ॥१॥ तुष्टिरलंबुद्धिः ॥अलंबुद्धिस्तथा तुष्टिरित्यभिधानात् ॥५ ॥

दमो बाह्येंद्रियोपशमः ॥ शमोऽन्तःकरणस्येति कश्चित ॥ तदसत् ॥ एकेनैवशब्देन सिद्धत्वात् ॥ किं तु दमः क्रियासु विनयः ॥ शमो बाह्यांतःकरणसंयम इत्यपरः ॥ तदप्यसदिति भावेनाह ॥दम इति ॥ कुत इत्यत आह ॥ शम इति ॥४॥ सुखशब्दागतार्थतया तुष्टिशब्दं सप्रमाणकं व्याचष्टे ॥ तुष्टिरिति ॥५॥

॥रु०॥आदिमित्यनेनेति॥अनादिशब्दांतर्गतेनेति शेषः॥आदिरित्यनेनेति पाठे त्वादिर्विश्वेनेत्यर्थ इत्याहुः॥एकेनैवेति॥दम इंद्रियनिग्रह इत्युक्तदमशब्देनैव सिद्धत्वादित्यर्थः॥४॥५ ॥

१ स्कं ११ अ १९ श्लो. ३७

॥ श्री० ॥ सर्वपुराणेष्वित्यनेकप्रमाणेष्वित्यनेकप्रमाणोपन्यासप्रयोजनमाह ॥ पूर्व इत्यस्येति ॥ उत्तरत्रेति॥ चत्वारो मनव इत्यत्रेत्यर्थः ॥ एतन्सिद्धमिति ॥ [illegible] समन्वंतरस्थानां मरीच्यादीनामेव ग्रहणं कार्यमित्येतत्सर्वपुराणसंमत्या सिद्धमित्यर्थः ॥ स्वायंभुवस्वारोचिषउत्तमतामसरैवतादिक्रमेण भागवते यद्यपि [illegible] लवचनं हृदि निधायाह ॥ स्वायभुवेत्यादिना ॥ ननु स्वायभुवादिचतुर्णां ग्रहणे को हेतुरित्यत आह ॥ प्रथमेति ॥ संज्ञासाम्यमिति ॥ चतुर्णां [illegible] भावः ॥ विभाग इतीति ॥ पृथक्करणं विभागशब्दार्थः ॥ ॥ कु० ॥ सप्तभृगवादय इति ॥ भृगुर्नभो विवस्वांश्च सुधामा विरजास्तथा ॥ अतिनाम [illegible] महर्षयः

महर्षयः सप्त भृग्वादय इति संकरः ॥ तदसत् ॥ पूर्व इति विशेषणेन प्रथममन्वंतरस्थानामेव ग्रहणस्योचितत्वात् मोक्षधर्मसंवादाच्चेति भाविनाह पूर्व इति ॥ इतोऽपि मरीच्यादय एवेत्याह ॥ ते हीति ॥ निरुपपदेन सप्तर्षिशब्देनेति शेषः ॥ पूर्व इत्यस्योत्तरत्र संबंधेऽपि एतन्सिद्धमिति भावेनानेकप्रमाणोपन्यासः ॥ ब्रह्मसावर्ण्यो रुद्रसावर्ण्यो दक्षसावर्ण्यो धर्मसावर्ण्य इतिभविष्यंतश्चत्वारो मनव इत्यन्ये ॥ तदसदिति भाविनाह॥

पूर्वे सप्तर्षयः ॥ मरीचिरङ्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ वशिष्ठश्चमहातेजाइति मोक्षधर्मे[illegible]॥नहि सर्वपुराणेषु उच्यंते॥चत्वारः प्रथमाः स्वायंभुवाद्याःतेषांहीमाःप्रजाःनहिभविष्यतामिमाः प्रजाइतियुक्तं

महर्षयःसप्तपूर्वे चत्वारो मनवस्तथा ॥मद्भावा मानसा जाता एषां लोक इमाःप्रजाः ॥६ ॥

विभागःप्राधान्यं चप्राथमिकत्वादेव भवति ॥

चत्वारइति ॥ स्वायंभुवस्वारोचिषरैवतोत्तमाः ॥ प्रथमातिक्रमे कारणाभावादिति भावः ॥ किं च येषां लोक इमाः प्रजा इति विशेषणमेष्वेव संभवति ॥ नेतरेष्वतोऽप्येवमित्याह ॥ तेषां हीति ॥ इमा वर्तमानाः प्रजा अपत्यानि ॥ ननु चतुर्दशमनवस्तेषु चतुर्णां यत्पृथक्करणं तत्र कारणेन भाव्यं ॥ अस्ति च तत्परोक्तंतु संज्ञासाम्यं ॥ न तु स्वायंभुवादिषु ॥ अतः कथमेतदित्यत आह ॥ विभाग इति ॥ प्राधान्यादेवेति शेषः ॥

॥ चाक्षुषस्यांतरेतानेऽस्युक्ता इत्यर्थः ॥ उत्तरत्रेति ॥ चत्वारोमनव इत्यत्रेत्यर्थः ॥ रुद्रसावर्ण्य इति ॥ यद्यप्यष्टमस्कंधे रुद्रसावर्ण्योनोक्तः ॥ [illegible]॥तथाऽपि पुराणांतरानुसारादुक्तंयुक्तम॥रैवतोत्तमा इति॥यद्यपि रैवतस्योत्तमानंतरत्वादेवंनिर्देशोयुक्तः ॥ तथाऽपि रैवतं च तथोत्तमामित्यग्रिमप्रमाणानुसारादेवमुक्तम ॥ प्रजा स्यात्संततौ जन इत्युक्तेः प्रजाशब्देन जनग्रहणे येषां लोकइत्यादिकं जनस्वामित्वेन ब्रह्मसावर्ण्यादिष्वपि संभवतीत्यत आह ॥ अपत्यानीति ॥

१ भाष्यस्थपदमनूद्यदतर्थंचोक्त्वातत्फलमुच्यते अनया आवर्तारिकयेति ज्ञेयम् ॥

॥ श्री० ॥ मेरुसावर्णेरपीति ॥ तस्यापि सावर्ण्यतशब्दवाच्यत्वादिति भावः ॥ अस्त्वेवामिति ॥ प्राधान्यात पृथक्करणमित्यर्थः ॥ प्राधान्यम् ॥ उत्तमत्वम् ॥ आहेति ॥ उपपादयती त्यर्थः ॥ पूर्वेभ्य इत्यस्यप्राथमिकेभ्य इत्यर्थः ॥ स्वायंभुवादिभ्यः स्वारोचिषादीनां साक्षादुत्पन्न्यभावादतः पूर्वेभ्य इत्यस्याभिप्रायमाह ॥ तत्संततावीति ॥ प्राधान्यम् ॥ स्वामित्वम् ॥

संज्ञासाम्यस्याप्रयोजकत्वात् ॥ अन्यथा मेरुसावर्णेरपि ग्रहणप्रसंगादिति भावः ॥ अस्त्वेवंप्राधान्यं च परोक्तानामेवेत्यत आह ॥ प्राधान्यं चेति ॥ स्वायंभुवादीनामिति शेषः ॥ किं च श्रुतौ स्वायंभुवादीनामेव पृथक्करणात्त एवात्रेत्याह॥गौतमेति॥ पृथक्करणे न फलमितिशेषः ॥

गौतमखिलेषुचोक्तम् ॥ स्वायंभुवं रोचिषं चरैवतं चतथोत्तमम् ॥ वेद यः सप्रजावानिति ॥ पूर्वेभ्योनुत्तरा जायंतइत्येषांप्राधान्यम् ॥ अजातेषुचज्यैष्ठ्यम्॥

प्राथमिकत्वादेव प्राधान्यंभवतीत्युक्तं तत्कथमित्यत आह ॥ पूर्वेभ्यो हीति ॥ तत्संततावित्यर्थः ॥ तेषां पूर्वेषां उत्तरान्प्रति ॥ तत्संततावजातान् प्रतिप्रथमानां कथं प्राधान्यमित्यत आह ॥ अजातेष्विति ॥ त्रिवर्गसमवायं ॥ ज्यैष्ठ्यं प्रथमानां प्राधान्यमित्यर्थः ॥

॥ कृ० ॥ मेरुसावर्णेरपीति ॥ यद्यपि दक्षसावर्णिवेदसावर्ण्योरपि ग्रहणपुचितम् ॥ तयोरपि त्रयोदशचतुर्दशमनुत्वेनाष्टमस्कंधोक्तेः॥ तथापि त्रयोदशो रौच्यनामा भविष्यति मुने मनुः ॥ भौत्यश्चतुर्दशश्चात्र मैत्रेयो भविता मनुरितिविष्णुपुराणे संज्ञांतरोक्तेः ॥ संज्ञासाम्यस्याप्रयोजकत्वेऽपि मेरुसावर्णेरित्येवोक्तम्॥ ननु योऽष्टमस्कंधे द्वादशो मनुर्मेरुसावर्णिरुक्तः ॥ स एव रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुरिति विष्णुपुराणे रुद्रसावर्णित्वेनोक्तः ॥ तस्य च चतुर्षु परिगणनात्कथमियमतिप्रसंगोक्तिः ॥ सत्यं मेरुरिवसावर्णिः मेरुसावर्णिरिति व्युत्पत्त्या सूर्य पुत्रस्याष्टममनोः सावर्णेर्ग्रहणादतिप्रसंगोपपत्तिरितिव्याचक्षते ॥ ननु स्वायंभुवपुत्रः प्रियव्रतः तत्पुत्राः उत्तमतापसरैवता इति भागवतादौ प्रसिद्धम् ॥ तत्कथं पूर्वेभ्य उत्तरा जायंत इत्युक्तमित्यत आह ॥तत्संततावित्यर्थ इति ॥ तत्संततावजातान्प्रतीति ॥ स्वारोचिषादीन्प्रतीत्यर्थः ॥स्वारोचिषोऽग्निपुत्रः चाक्षुषः चक्षुःपुत्रः वैवस्वतसावर्णी सूर्यपुत्रौ दक्षसावर्णिर्वरुणपुत्रः ब्रह्मसावर्णिरुपश्लोकसुत इत्यादेर्भागवतप्रसिद्धेरिति भावः ॥ ज्यैष्ठ्यमिति ॥ वयोज्यैष्ठ्यमित्यर्थः ॥ प्राधान्यमिति ॥ प्राधान्यप्रयोजकमित्यर्थः ॥ इत्यर्थ इति ॥ इतिशब्दात्परमनुवृत्त्येति शेषः ॥ अर्थशब्दानंतरमनुसंधेयं इति ॥

---

१ भाष्य इति ब्राह्मम्॥२ तथा च ज्यैष्ठ्यंवयसा ॥ प्राथमिकानां प्राधान्यमित्यनुवृत्त्याप्राधान्यप्रयोजकमित्यर्थोऽनुसंधेय इतिटीकार्थः ॥

॥ श्री० ॥ नन्वनेन प्राथमिकत्वेन प्राधान्योपपादनं कथमित्यत आह ॥ इदमुक्तं भवतीति ॥ प्रथमानां प्राथमिकानाम् ॥ उक्तविधया ॥ पूर्वेभ्यो ह्युत्तरे जायंते अजातेषु च ज्यैष्ठ्यादि त्युक्तविधया ॥येन गजेंद्र इति ॥ हरिरित्याहूतेन तापसमनुनेत्यर्थः ॥ तथा चाष्टमस्कंधस्थस्य मनुनाम्ना च तापसः हरिरित्याहुत इत्येवं वाक्यस्योदाहरणेन मध्ये तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधस इत्यर्धस्यकल्पितत्वं ज्ञायते ॥ हरिनामकस्य रूपस्यैव गजेंद्रमोक्षकर्तृत्वप्राप्त्या हरिस्तापसनामासौ जातस्तपसि वै मनुः॥ गजेंद्रं मोचयामासेति द्वितीयस्कंधतात्पर्येण त्वां तापसं मोचितहस्तिनकमिति संग्रहरामायणेन च विरोधापत्तेः॥ननु तामसमन्वंतर इव तापसमन्वंतरेऽपि भगवदवतारस्य वक्तव्यत्वात्तदर्थं तत्रापीत्यर्धं आवश्यक इति चेन्न ॥ इतरमनूनां भगवद्भिन्नत्वेनासमर्थनया तत्र प्राप्तोपद्रवपरिहाराय तत्र भगवदवतारस्यावश्यंवाच्यत्वात्। अत्र पुनर्भगवत एव मनुत्वेन तद्भिन्नस्वतंत्रावतारस्यावक्तव्यादित्याद्यालोचनीयमितिसंप्रदायविदः॥

इदमुक्तं भवति ॥ प्रधानगुणभावो हि सति संबंधे भवति ॥ अयुगपद्भाविषु चैतेषु प्रथमानामेव प्राधान्यं उत्तरेषां गुणत्वमुक्तविधया संभवति ॥ न त्वन्यथा कथमपीति ॥ प्रथमाश्चेदृश्यंते तदा चतुर्थस्तापसो गीताऽभिप्रेततया कुतो न व्याख्यायत इत्यत आह ॥ तापसस्येति ॥ अनुक्तिरव्याख्यानं भगवति च सद्भावो मानसो जातादिविशेषणासंभवादिति भावः ॥ तापसस्य भगवदवतारत्वं कुत इत्यत आह ॥ तच्चेति ॥चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः ॥ हरिरित्याहुतो येन गजेंद्रो मोचितो ग्रहादित्यादिना ॥

तापसस्य भगवदवतारत्वादमुक्तिः ॥ तच्च भागवते प्रसिद्धम् ॥

॥ कृ० ॥ प्राथमिकत्वादेवेत्यवधारणार्थस्यानुक्तत्वात्तं वक्तुमाह ॥ इदमुक्तं भवतीति ॥ प्रथमोत्तरभावः कुत इत्यतो हेतुगर्भं विशेषणमाह ॥ अयुगपद्भाविष्विति ॥ क्रमभाविष्वित्यर्थः ॥ यद्वा संबंधाभावोपपादनायायुगपद्भाविष्वित्युक्तम् ॥ कुतो न व्याख्यायत इति प्रश्नेऽनुक्तिरित्यस्योत्तरत्वायोगादाह ॥ अव्याख्यानमिति ॥ चतुर्थ उत्तमभ्रातेति ॥ ननु भागवते चतुर्थ इत्यर्धवचनानंतरं वृष.ख्यातिरित्यादि श्रूयते ॥ हरिरित्याहुत इत्यर्धश्च ॥ तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधस इत्यर्धानंतरं श्रूयतेतत्कथमत्रान्यथा पठ्यत इति चेन ॥ अत्रवहवः ॥ टीकोक्त एव पाठः ॥ तथा च यस्तापसनामको विष्णुः स एव हरिरित्याहूत तदवतार इति मनुरवतारश्चोक्त एव वृष ख्यातिरित्यादिकं त्वेतच्छ्लोकानंतरं पाठ्यम्॥ भागवते तु हरिरित्ययोऽवतारितः ॥ तत्रापीत्यर्धस्तु प्रक्षिप्तः ॥ गजेन्द्रोपाख्यानं तु बादरायण एतत्त इत्यारभ्यैवेति ॥ अन्ये तु भागवतोक्त एव पाठः ॥ तत्र यश्चतुर्थ उत्तमभ्रातेत्यत्रोक्तः तापसः स एव हरिण्यां हरिमेधसः सकाशाद्धरिनामासन्जज्ञ इति प्रमेयं दर्शयितुं व्यवहितयोरप्यर्धयोरव्यवधानेनोपन्यासः कृत इति वर्णयति ॥

---

१ स्वायंभुवमन्वंतरे भगवदवतारस्य यज्ञस्य देवेंद्रत्वात् यथा मृगावतारोनकथितस्तद्वदिति भावः ॥ २ आहुतः ह्रस्व आर्षः ॥ यः ॥येनचगजेंद्रोमोचितःसनाम्नातापसश्चतुर्थोमनुरितियच्छद्वान्वयादिति भावः ॥

॥ श्री० ॥ विशेषणासंभवादिति ॥ जाता इति विशेषणासंभवात् रैवतात् प्रथमं चतुर्थत्वेन प्राप्तताप्रमानिक्रमेण यद्वाता मानसा जाता इति विशेषणसंभववतां स्वायंभुवादीनां ग्रहणमित्यर्थः ॥ एतान् स्वायंभुवादीन् ॥ नेष्विति ॥ ब्रह्मसावर्ण्यादीनां चतुर्णां दक्षदुहितरि युगपद्भावनरूपमानसत्वस्य संभवादित्यर्थः ॥ अत्रार्थ इति ॥ मनसशब्दात् तस्येदमिति तद्धिताण्प्रत्यये णित्वादादिवृद्धौ सत्यां किल्मानसमिति रूपम् तत्र युगपद्भावनरूपार्थ तद्धितोत्पत्तिश्रवणादुपचारार्थं व्याख्यानमित्यर्थः ॥ ब्रह्मपुत्रा इति ॥ यतो ब्रह्ममनोजातत्वेन तत्पुत्रास्ततो मानसाः सन्त्वित्यर्थः ॥ न त्विति ॥ तथा चत्वारो मनवः मानसा इति सामानाधिकरण्यासंभव इत्यर्थः ॥ समानकर्तृकत्वादाह ॥ स्थितानामिति ॥ ननु तर्हि युगपच्छरीरद्वयोपलंभः स्यादित्यत आह॥द्वितीय शरीर इति ॥ तत् ॥ द्वितीयशरीरम् ॥ संप्रदायविद् इत्यनेन नीलाशरीरे गाढीवधनुषि भगवतिकिरीटे सीताभरणादौ च तथा सात प्रमित इति सूचयति ॥ ननु ब्रह्ममानसपुत्रत्वप्रियव्रतादिपुत्रत्वप्रतिपादकवाक्ययोर्मध्ये एकस्योपचारितार्थत्वनात्युपपत्तेरिति चेत्तत्राह ॥ उपचारस्त्वेति ॥

ननु यदि विशेषणासंभवात्प्रथमप्राप्तातिक्रमेण तत्संभवतां ग्रहणं ॥ तर्हि मानसा जाता इति विशेषणासंभवादेतान्परित्यज्य ब्रह्मसावर्ण्याद्य एव ग्राह्यास्तेषु तत्संभवादिति भास्करःतत्राह ॥ मानसत्वं चेति ॥चतुर्णां दक्षदुहितरि किल भावो युगपदासीदित्येवंविधं मानसत्वं न स र्वेषामिति चेत् न ॥ अत्रार्थे तद्धितोत्पत्तेरस्मरणात् ॥ ननु ब्रह्मपुत्राः सन्तु मानसाः ॥ न तु तदा ते मनवः॥ किं तु मच्छरीरं परित्यज्य प्रि

मानसत्वं च सर्वेषां मनूनामुक्तं भागवते ॥ तेतामनूनसमर्जीत मनसा लोकभावनानिति ॥ अन्यपुत्रत्वं त्वपरित्यज्यापि शरीरं तद्भवति ॥ प्रमाणं चोभयविधवाक्यान्यथाऽनुपपत्तिरेव ॥

यव्रतादिपुत्रा जातास्तदेव॥अतो मनुषु मानसत्वमसंभाव्यमित्यत आह॥ अन्येति ॥ तन्मानसं शरीरं अपरित्यज्य स्थितानामप्यन्यपुत्रत्वं संभवतीति योजना ॥ द्वितीये शरीरे जाते तत्पूर्वशरीरेणैक्यमापद्यत इति संप्रदायविदः ॥ किमत्रप्रमाणमित्यत आह ॥ प्रमाणं चेति ॥मनूनामेव ब्रह्ममानसपुत्रत्ववाक्यं प्रियव्रतादिपुत्रत्ववाक्यं चेत्युभयविधवाक्यम् ॥ उपचारत्वकल्पना क्लिष्टेव ॥

॥ कु० ॥ प्रथमत्रासेति ॥ तासमत्याशेनेत्यर्थः ॥ दक्षदुहितरि भाव इति ॥ दक्षकन्यायामित्यर्थः ॥ नन्वन्यपुत्रत्वमिति भाष्यस्य विरुद्धनिष्ठादिशरीरान्तरग्रहणाभिप्रायकत्वे मनुषु मानसत्वमसंभाव्यमिति शंकानिरासो न स्यादित्यत आह ॥ द्वितीये शरीर इति ॥ संप्रदायविद् इत्यनेन नीलाद्विदेहादौ तथ भाष्य प्रमितत्व सूचयति ॥ ननु प्रियव्रतादिपुत्रत्वदशायां पूर्वदेहयोगेपि ब्रह्ममानसपुत्रत्वं स्वरूपेणास्त्यायुक्त तत्रोपचारिक मानसत्वमित्यत आह ॥ उपचारस्त्वेति ॥ उपचर्यत इत्युपचारः कर्माण वत्र ॥ उपचरित इत्यर्थः ॥

१ स्कं. ३ अ. २१ श्लो. ४९

॥ श्री० ॥ पूर्वेणैव ॥ महर्षय सप्तेत्यनेनैव ॥ परेणैव: मनव इत्यनेनैव ॥ तत्साहचर्यादिति ॥ प्रायपाठादित्यर्थः ॥ वचनादेवेति ॥ पूर्वे ‑तिपदादेवेत्यर्थः मद्भाव इत्यस्य मत्तो भाव इत्यर्थकत्वे पुनरुक्तिरित्यभिप्रेत्य शंकते ॥ नन्विति ॥ तत्कारणत्वं ॥ मत्कारणत्वम ॥ तथा च मद्भावा इत्यनेनापि तस्यैवोच्यमानतया पुनरुक्तिरिति भावः ॥ ब्रह्मणश्चतुर्मुखस्य ॥ तथा च भगवन्मनोजातत्वं नोच्यत इत्याशयः ॥ कथं न व्याहतिरिति ॥ ब्रह्ममनोजातत्वस्य भगवज्जातत्वस्य न विरुद्धत्वेन मद्भावा मानसा जाता इत्युक्तौ व्याहतिरित्यर्थः ॥६॥७॥८

किं च पूर्वे इति विशेषणं पूर्वेणैव संबध्यते परेणैव वोभाभ्यामपीति त्रयः पक्षाः पक्षत्रयेऽपि चत्वारो मनवःप्रथमा एवेति सिध्यति॥आद्ये सप्तर्षीणां प्रथमत्वेन तत्साहचर्यात् द्वितीयतृतीययोर्वचनादेवेति भावेनाह ॥ पूर्वे इति ॥ मयिभावो येषामिति व्याख्यानं प्रकृतासंगतं कारणत्वस्यात्र प्रकृतत्वादिति भावेनाह ॥ मत्त इति ॥ भावो जन्म ॥ ननु मानसा जाताइत्यनेन भगवतस्तत्कारणत्वमुच्यते ॥ मैवम् ॥ ततो

पूर्वइतिविशेषणाच्चैनात्सिद्धिः॥मत्तो भावो येषां ते मद्भावाः॥ये ते ब्रह्मणोमानसाजातास्तेमत्तएवजाताइति

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ॥सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥७।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति मत्वा भजंते मां बुधा भावसमन्विताः॥ ८ ॥

भावः ॥ ६ ॥ ७ ॥ संति च भजंतः केचिदित्याह ॥ अहमित्यादिना॥ ८ ॥

मनूनिति वचनस्य सत्वेन ब्रह्मणो मानसा जाता इति व्याख्येयत्वात् तर्हि कथं न व्याहतिरित्यत आह ॥ येत इति ॥ मत्त एव ब्रह्मांतर्यामिणः ॥ ब्रह्मा तु द्वारमात्रमिति भावः ॥ ६ ॥ ७ ॥ नन्वेतां विभूतिमिति परिज्ञानुःफलमुक्तं तत्किमर्थं पुनरुच्यत इत्यतस्तात्पर्यांतरमाह ॥ संति चेति ॥ उक्तफले विश्वासजननार्थमिति शेषः ॥ ८ ॥ ॥ श्री० ॥ तत्साहचर्यादिति ॥तत्सहपाठादित्यर्थः॥ननु भावः सत्ता चेत्तर्हि मद्भावा इत्यनेन सत्ताप्रदत्वोक्तेर्विशेषकरणत्वमाहेति प्रतिज्ञाविरोध इत्यत आह॥भावो जन्मेति ॥ ननु मानसा इति ॥ ततश्च मत्तो भाव इति व्याख्याने पुनरुक्तिरिति भावः ॥ ६ ॥ ७ ॥ ८ ॥

१ पूर्वोक्तं विविधभवनं वक्ष्यमाणंवासुरगणाद्यवेद्यत्वरूपमहात्म्यम् सामर्थ्यं च योवेत्तिसनिश्चलेन ध्यानयोगेन युज्यतइत्यर्थः ॥

॥ श्री० ॥ ९ ॥ १० ॥ ११ ॥ ऐकार्थ्येति ॥ बृंहत्यर्थकब्रह्मशब्दस्य देवतो बृहदर्थकत्वाद्विभुशब्दस्यापि तदर्थकत्वादैकार्थ्यमित्यर्थः ॥ बृहेरिति ॥ तथा च बृहन्बृद्धावित्यस्माद्धातोर्मनिन्प्रत्ययेऽमागमे मित्वात् हकारात्पूर्वं जाते बृ अह मनिति जाते इको यणादेशे ब्रह मन ब्रह्मनिति प्रातिपदिकसिद्धिः ॥ पश्चात् स्वाद्युत्पत्तौ ब्रह्मेति भवति ॥ एवमुत्तरत्रापि द्रष्टव्यम् ॥ ब्रह्मणः शुद्धत्व ॥ परमामिति ॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरमित्याद्यनेकविशेषणविशिष्टस्यैव विष्णोः परमं यो महद्ब्रह्मेत्यत्र यच्छब्देन परामर्शादिति भावः ॥

॥ ९ ॥ १० ॥ ११ ॥ ब्रह्मविभुशब्दवैकार्थ्यपरिहाराय क्रमेण सप्रमाणकं व्याचष्टे ॥ ब्रह्मेति ॥ परं वस्तु ब्रह्मेति कस्मादुच्यते बृहति पूर्णं भवति ॥ बृंहयति पूरयति चान्यान् ॥ बृहेर्मनिन्प्रत्ययोऽमागमश्च ॥ ईश्वरो ब्रह्मणोऽन्यः स कथं परं ब्रह्मेत्युच्यत इत्यत उक्तम् ॥ परम

॥ ९ ॥ १० ॥ ११ ब्रह्म परिपूर्णम् ॥ अथ कस्मादुच्यते परं ब्रह्म ॥ बृहति बृंहयतीति च श्रुतिः ॥ बृह

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् ॥ कथयंति च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥

तेषामेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् ॥ पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२

बृंहि वृद्धाविति पठंति ॥ परमं यो महद्ब्रह्मेति च ॥ विविधमासीदिति विभुः ॥

मिति ॥ विविधमनेकरूपत्वेनाभवत् ॥ कृ० ॥ ९ ॥ १० ॥ ११ बृहतेनिति बृहेः शब्दीकरणेऽपि संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभाव इति बोध्यम् ॥ मन्नत्यय इति ॥ सर्वधातुभ्यो मनिन्निति गुणादिसूत्रेण मनिन्प्रत्यय इत्यर्थः ॥ नकारेकारयोर्लोपाभिप्रायेणमनित्युक्तम् ॥ अमागमश्च बाहुलकादिति बोध्यम् ॥ इदं च बृहेरूपमाभनार्थमुक्तम् ॥ यदा बृंह रूपं तदा बृंहेरंतर्णीतण्यर्थान्मनिन्प्रत्यये बृंहेर्नोच्चेत्युणादिसूत्रेण नकारस्याकारादेश इति बोध्यम् । भाष्ये बृहबृह्यादाविति ॥ बृंहत्येभानुस्तेऽपि इदितोनुम्धातोरिति नुमि सति फलितमभिप्रेत्य बृंहेरित्युक्तम् ॥

१ विषयेष्वलं बुद्धिमंतो भवंति ॥ नत्वहेतुः सुखमनुभवंति चेति ॥ २ ज्ञानरूप मुक्त्युपायम् ॥ ३ तेषामनुग्रहार्थं न किंचित्फलमुद्दिश्येत्यर्थः ॥ ४ अनाद्यज्ञानकृतबंधः ॥ ५ चित्तवृत्तिस्थः सन् ॥

॥ श्री० ॥ मिह सेचन इति भातो [illegible] ॥ [illegible] ॥ यौगिकार्थ [illegible] भवतीत्यादि
निमूत्रार्थः । विभुः प्रभु [illegible] ॥ तथा [illegible] हित्वा [illegible] मति
विभुरिति प्रातिपदिकनिष्पत्तिर्द्रष्टव्या ॥ १२ ॥ [illegible] ॥

मेहनावतः सेचकस्य भगवतः प्रथमं [illegible] व्याख्यातं ॥ प्राभवत्समर्थोऽभवदिति प्रभुः विविधोऽभवदिति विभुः ॥ सोऽ

तथा हि वारुणशाखायाम् ॥ विभुः प्रभुः प्रथमं मेहनावृत इति स ह्येव प्रभावाद्विविधोऽभवदिति ॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

सोऽकामयत बहुः स्यां प्रजायेयेत्यादेश्च ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

कामयनेति विविधभवने श्रुत्यंतरं ॥ विप्रसंभ्योद्भुसंज्ञायामिति च स्मृतिः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥
॥ कृ० ॥ सेचकस्येति ॥ मिह सेचन इति [illegible] भाव ॥ विप्रसंभ्य [illegible] संज्ञायामिति सूत्रार्थः ॥ तथा च
[illegible] हुतत्वयं [illegible] विभुप्रभुशब्दौ [illegible] भाव. ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

१. पंचमेऽध्याये ॥ २ सत्यम् ॥ ३ [illegible] ॥ ४ [illegible] ॥ ५ [illegible] ॥ ६ [illegible] ॥ ७ [illegible]

॥ श्री० ॥ १६ ॥ १७ ॥ ननु नजायत इति नज इति भाव्यं तथा च नजश्चाभावर्दनश्चेति नज.र्दन इति स्यादित्यत आह ॥ नञ इति ॥ तथा च नजायत इति नज इति भाव्ये नञः परनिपाते जनेति भवति ॥

विभूतय ऐश्वर्याणि पृष्टानि नानारूपाणि वक्ष्यते ॥ किं केन संगतमित्यत आह ॥ विभूतय इति ॥ विविधभूतयो नानाभूतानि रूपाणि ॥१६॥
१७॥ अर्द गतौ याचने चेति वचनात ॥ आसुरजनानां नरकादिगमयितृत्वाज्जनैर्याच्यत्वाद्वा जनार्दन इति संकरः ॥ तदप्रामाणिकं व्या
विभूतयो विविधभूतयः ॥ १६॥१७॥ न जायतेऽर्दयति च संसारमिति जनार्दनः ॥ तथा च वाक्यशा

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः॥याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥१६॥
कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन्॥केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥१७॥
विस्तरेणात्मनो योगं विभूतिं च जनार्दन ॥ भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१८॥

ख्यायां ॥ स भूतःस जनार्दन इति ॥ स ह्यासीत्स नासीत्सोऽर्दयदिति ॥१८॥

ख्यानम्॥इदं तु श्रौतत्वादुपादेयमिति भावेनाह ॥ न जायत इति ॥ नञः परनिपातः ॥ अत एव नलोपाभावः ॥ उत्तरपदे तस्य स्मरणात ॥
अर्दयति गमयति ॥ स ह्यासीदिति ॥ भूतः ॥ अनादिनः सत्तावानित्यर्थः ॥ स नासीत्न जन्मवान्सोऽर्दयतीति जनार्दनः ॥१८॥

॥ क० ॥ भूतिशब्दस्यैश्वर्यार्थत्वाद्विविधैश्वर्याणीति प्रतीतिं निरस्यति ॥ नानाभूतानीति ॥ १६ ॥ १७ ॥ गमयित्वादिति ॥ अनेन अर्दयतीत्यनेन ॥ नयादित्याद्यर्थः ॥ णेरनिटीति णिलोपः ॥ गुवोरनाकाविल्यनादेशः ॥ ततो ननानामर्दनो ननार्दन इत्युक्तं भवति ॥ याच्यत्वादिति ॥ कल्पतरुरे बहुधमिति बाहुलकात्कर्मणि ल्युडिति भावः ॥ ननुजायतइतिनः ॥ अन्यपदार्थीतिडः ॥ ततोन ञसमासेनलोपेन नहतिनलोपेचाजहतिप्रयोगःस्यादित्यत आह ॥ नञः परनिपातइति ॥ श्रौतत्वादिति भावः ॥

१. स्वजात्युत्तमताऽपादकतयास्थितः सन्निविशेषः ॥

॥ श्री० ॥ ननु तथाऽपि नल्लोपोनत्र इतिनञोऽयोपेऽजेत्यैवस्यात्तथाचाआर्दनदत्येवभवेदिति नेत्तत्राह ॥ अतएवेति ॥ नञःपरनिपातादेवेत्यर्थः ॥ तथाऽपिकथं नल्लोपाभावोनिनित्तत्राह ॥ उत्तरपदइति ॥ अलुगुत्तरपद इतिपूर्वसूत्रादुत्तरपद इत्यनुवर्त्यनलोपोनञः ॥ नञानस्यलोपः स्यादुत्तरपदेपरतइत्युक्तत्वात ॥ यत्रनजइत्येव स्यात्तदाजेत्युत्तरपदेपरतः नञोलोपःस्यात्तन चैवंनञः परनिपातांगीकारेणजनेत्यस्मादुत्तरत्रपदाभावादतोननञोलोपस्तथाचजनेत्युपपन्नमिति द्रष्टव्यम॥ जनेत्यस्यअर्दनेत्यस्यच भवत्रभगवन्नामत्वेनार्दनेत्यस्योत्तरपदत्वानंगीकारात् नञ र्थान्वयवत्तएवात्रोत्तरपदत्वविवक्षणादिति ध्येयम ॥१८॥१९॥२०॥व्याप्तिप्रवेशनयोरेव धात्वर्थत्वादाह॥सर्वेति॥धात्वन्तरेति॥वक्ष्यमाणगत्याद्यर्थाभिधायकविगनीत्यादिधात्वन्तरस्येत्यर्थः ॥

द्विविधं विभूतिरूपं प्रत्यक्षं तिरोहितं चात्र विष्ण्वादिकं प्रत्यक्षमिति ज्ञापयितुं तच्छब्दान्व्याकुर्वन् आदित्यानामहं विष्णुरिति विष्णुश

॥ १९॥२०॥विष्णुः सर्वव्यापित्वप्रवेशित्वादेः ॥ विष्लृव्याप्तौ ॥ विश्प्रवेशन इति च पठंति

श्रीभगवानुवाच॥हंत ते कथयिष्यामिदिव्याह्यात्मविभूतयः॥प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोविस्तरस्यमे॥१९॥
अहमात्मागुडाकेशसर्वभूताशयस्थितः ॥ अहमादिश्चमध्यश्चभूतानामंतएवच ॥ २० ॥
आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान्॥मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥२१॥

ब्दं तावत्सप्रमाणकं व्याकरोति ॥ विष्णुरिति ॥ सर्वेति योग्यतया संबध्यते आदिपदेन वक्ष्यमाणार्थसंग्रहः ॥ चशब्दो धात्वंतरसमुच्चयार्थः

॥ कृ० ॥ अतएवेति ॥ परनिपातादेवेत्यर्थः ॥ उत्तरपदइति ॥ नल्लोपोनञ्यत्रालुगुत्तरपदइतिसूत्रादुत्तरपदइत्यधिकारादितिभावः॥ गमयतीति॥ अत्रव्युत्पादनंप्राशिवकृतम ॥ १८॥
॥ १९ ॥ २० ॥ व्याप्त्यादेरेवधात्वर्थत्वादाह ॥ सर्वेतियोग्यतयेति ॥ वक्ष्यमाणेति ॥ गतिश्चसर्वभूतानामित्यत्रव्युत्पत्तिकर्तव्यम ॥ धात्वंतरेति ॥ वेतेर्वेष्टेश्चसंग्राहकइत्यर्थः ॥

१ वस्तूनांविशिष्टताप्रदरूपाणिविविधानि ॥ २ व्याप्तोऽपि ॥ ३ हेजितनिद्र ॥ ४ अहमेवभूतानांसृष्टिस्थितिलयकर्ता ॥

॥ श्री० ॥ इत्यतो धातोः ॥ क्रम्नुरिति ॥गत्यर्थत्वात् वीत्यस्मात् करणे क्स्नुप्रत्यये शकाराद्विकारशनि ककारलोपेधातोरिकारस्य ह्रस्वे इकार आदेशप्रत्यययोरिति सस्य षत्वे षपाभ्यां नो णः समानपदे इति नकारस्य णत्वे च वर्गंत्यनेनेति विष्णुरिति रूपम् ॥ कित्वाद्गुणाभाव ॥ अन्यथा विष्णुरिति स्यादिति भावः ॥ विष्लृ व्याप्तावित्यतः क्स्नुरिति अत्रानुबन्धार्थः ॥ तथा च व्याप्त्यर्थात् विषु अस्मात् क्स्नुप्रत्यये ककारलोपे षपाभ्यामिति नस्य णत्वे कित्वात् गुणाभावे च विष्णुरिति रूपम् ॥नुरिति ॥ कान्त्यर्थात् वशधातोर्नुप्रत्यये निवर्तनत्वात् धातोरकारस्य इकारे शकारस्य षकारे नस्य णत्वे च विष्णुरिति रूपम् ॥ वीगती यतो वा कान्तिकर्मण इति ॥ कान्त्यर्थकाद् इगतिप्रजनकान्तीति धातोः क्स्नुप्रत्यये ककारलोपे धातोर्ह्रस्वे सस्य षत्वे नस्य णत्वे कित्वे गुणाभावे च विष्णुरिति रूपम् ॥ प्रागिति ॥ अष्टमाध्यायेक्षरोभाव इत्यनेनेत्यर्थः ॥ विश प्रवेशन इति ॥ विशधातोः क्स्नुप्रत्यये ककारलोपे धातोर्ह्रस्वे सस्य षत्वे नस्य णत्वे कित्वे गुणाभावे च विष्णुरिति रूपम् ॥

गच्छंत्यनेनेति गतिः ॥ भूतानां पृथिव्यादीनां प्रजानां ब्रह्मादीनां वीगतिप्रजनकान्त्यशनखादनेष्वित्यतो गत्यर्थात् क्स्नुप्रत्ययो धातोर्ह्रस्वश्च ॥ मे ॥ मया॥ रोदसी ॥ द्यावापृथिव्यौ व्याप्तौ व्याप्ते विष्लृव्याप्तावित्यतः क्स्नुः कान्तिः कमनीयता वशकान्तावित्यतो नुः धातोरकारस्येकारः

गतिश्च सर्वभूतानां प्रजानां चापि भारत॥ व्याप्ता मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम॥ अधिभूतनिविष्टश्च तदिच्छुश्चास्मि भारत ॥ क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञित इति मोक्षधर्मे ॥२१ ॥

शकारस्य षकारः ॥ वीगतीत्यतो वा कान्तिकर्मणः क्स्नुः ॥ अधिभूतं प्राग्व्याख्यातम् ॥ विश् प्रवेशन इति अतः क्स्नुः ॥ षत्वं च ॥ तदिच्छुरधिभूतस्य जन्मादीच्छुः ॥

॥ कृ० ॥ गच्छंत्यनेनेति ॥ कर्तुः करणत्वविवक्षया स्त्रियां क्तिन्निति करणे क्तिन् ॥ अनुदात्तोपदेशेति मकारलोपश्चेति भावः॥ भूतः सर्वाणि भूतानीत्युक्तार्थग्रहणे प्रजानामिति पुनरुक्तं स्यादित्यत आह ॥ पृथिव्यादीनामिति ॥ क्स्नुरिति ॥ कित्वान्न विभातृकाधिभातृकयोरिति गुणाभावः ॥ आदेशप्रत्यययोरिति षत्वे रषाभ्यामिति वा पूर्वात्रिति णत्वं नणमिति भावः ॥ धातोर्ह्रस्वश्चेति ॥ पृषोदरादित्वादिति भावः ॥ ननु रोदसीशब्द ईकारान्तः स्त्रीलिंगः यदि वा सकारान्तो नपुंसकलिंग उभयथापि व्याप्तावितिपुंस्त्वमयुक्तमित्यत आह ॥ याप्तेति ॥ नुरिति ॥ कित्वाल्लघूपधगुणाभावः पूर्ववण्णत्वं चेति भावः ॥ कान्तिशब्दस्येच्छार्थत्वे तदिच्छुरिति पुनरुक्तं स्यादित्यत आह ॥ कमनीयतेति॥ ननु विष्णुरिति न वशकान्तावित्यस्य रूपं तथात्व इच्छार्थत्वप्रसंगात् ॥ कान्तिरिच्छेति शाब्दिकव्याख्यानादित्यत आह॥वीगतीत्यतो वेति॥कान्तिकर्मण इति॥कान्तिवाचकस्येत्यर्थः॥प्रागिति॥अधिभूताक्षरं भाव इत्यत्रेत्यर्थः॥षत्वं चेति॥पृषोदरादित्वाच्छकारस्य षत्वमित्यर्थः ॥

॥ श्री० ॥ वयतेर्वेष्टेश्चेति ॥ वी गतिप्रजननकांतीति धातोः वश कांताविति धातोश्चेत्यर्थः ॥ अनयोर्धात्वोः प्रकृतोपयोगाय कांति शब्दार्थउक्तः ॥ कांतिरिच्छेति तथा च वीत्यतः कृस्नुप्रत्यये ककारलोपे सस्य षत्वे नस्य णत्वे धातोर्ह्रस्वे विष्णुरिति पूर्ववद्रूपम् ॥ एवं वशधातोर्नुप्रत्यये धात्वकारस्येकारे शस्य षत्वे नस्य णत्वे च विष्णुरिति पूर्ववद्रूपमित्यर्थः ॥ पूर्ववदित्युक्तत्वादत्रापि गच्छत्यनेनेति करणे कृस्नु प्रत्ययप्राप्तिपरिहाराय कर्तरीत्युक्तम् ॥ तथा च विगतीति गत्यर्थात् वीत्यस्मात् ॥ कर्तरि कृस्नुप्रत्यये ककारस्य लोपे सस्य षत्वे नस्य णत्वे धातो श्च ह्रस्वे विष्णुरिति रूपम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

कांतिरिच्छा॥अतो वयतेर्वेष्टेश्च॥पूर्ववद्रूपम्॥क्रमणात्त्रिविक्रमरूपेण पादविक्षेपात्॥पूर्ववद्वयतेर्गत्यर्थात्कर्तरि प्रत्ययः ॥२१॥२२॥२३॥२४॥२५॥

॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

वेदानांसामवेदोऽस्मि देवानामस्मि वासवः ॥ इंद्रियाणांमनश्चास्मि भूतानामस्मिचेतना ॥ २२ ॥
रुद्राणांशंकरश्चास्मिवित्तेशो यक्षरक्षसाम् ॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥
पुरोधसां चमुख्यंमांविद्धिपार्थबृहस्पतिम् ॥ सेनानीनामहं स्कंदःसरसामस्मि सागरः ॥ २४ ॥
महर्षीणांभृगुरहंगिरामस्म्येकमक्षरम् ॥ यज्ञानांजपयज्ञोऽस्मिस्थावराणांहिमालयः ॥ २५ ॥

॥ कृ० ॥ कांतिरिच्छेति ॥ वश कांतावित्यत्र शाब्दिकैस्तथाव्याख्यानादिति भावः ॥ वयतेरिति ॥ वी धातोरित्यर्थः ॥ यद्यप्यस्य लुग्विकरणत्वाद्वेतेरिति वक्तव्यम् ॥ तथापि गणकार्यस्यानित्यत्वाल्लुगभावे शबिति भावः ॥ ननु वेतेः कांत्यर्थत्वेऽपि नेच्छार्थत्वं तत्र कांतिरिच्छेति शाब्दिकैर्व्याख्यानादित्यत आह ॥ वष्टेरिति ॥ वश कांतावित्यस्मादित्यर्थः ॥ कर्तरि प्रत्यय इति ॥ गतिश्च सर्वभूतानामित्यत्र वेतेः करणे कृस्नुप्रत्ययस्योक्तत्वादत्रापि तदंतीतिः स्यात्तन्निवृत्त्यै कर्तरीत्युक्तम्॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

१ बहुस्मरणशक्तिश्चचेतनेत्यभिधीयतेइत्युक्तेस्तत्प्रदत्वेनस्त्रीरूपेणास्थितोऽस्मीत्यर्थः ॥ २ रःप्ररकोऽस्यान्योनास्तीतितच्छब्दवाच्यः ॥ ३ बृहता पतिरितितच्छब्दवाच्यम्॥४ स्वस्माज्जगतो निष्क्रामनात्तच्छब्दवाच्यम् ॥ ५ सारभोक्तृत्वात्तन्नामा ॥ ६ विरोधिनांभजनाद्दहनात्तन्नामा ॥ ७ मुख्यत्वाच्चतुर्विधनाशरहितत्वाच्च ॥ ८ जातानांपालकत्वाद्याज्यत्वाच्च ॥

॥श्री० ॥ किरिति ॥ तथा च पारक्षणेऽस्मात् क्विप्रत्यये ककारलोपे क्तिवादातोलोप इटि नेति धात्वाकारलोपे प इ पीतिरूपम् ॥ ड इति॥तथा च ली श्लेषणेऽस्माड्डप्रत्यये डित्वाट्टी भूतस्य ईकारस्य लोपे प्रत्ययाकारसंबंधे च भाति लेति रूपम् ॥ क इतिकित्वादातोलोप इटि चेति धात्वाकारलोपे प्रत्ययाकारसंबंधे लेति रूपम् ॥ तत इति ॥ कश्चासौ पिश्चासौ लश्चेति कपिल इति कर्मधारय इत्यर्थः ॥ अग्र इत्यस्यार्थः ॥ पूर्वकल्पेष्विति ॥ नामित्यनेनेति ॥ यो ज्ञानैर्बिभर्ति तमृषिं पश्येत ॥ यं सुखादिनिमित्तात् कपिलमुदाहरंति तं कपिलं पश्येदिति यच्छब्दद्वयस्य तमित्यनेनान्वयो द्रष्टव्यः ॥ २६ ॥

सिद्धानां कपिलो मुनिरिति कपिलशब्दं व्याचष्टे ॥ सुखेति ॥ सुखरूप इति कः ॥ पाल्यते जगदनेनेति पिः ॥ पा रक्षण इत्यतः किः ॥ लीयते जगदनेनेति लः ॥ लीश्लेषण इत्यस्माड्डः ला आदानइत्यतो वा कः ॥ ततः कर्मधारयः कशब्दस्य सुखवाचित्वेऽभिधानं प्रयोगं च पठति ॥ प्रीतिरिति ॥ समग्रार्थे श्रुतिमाह ॥ ऋषिमिति ॥ तं भगवंतमृषिं कपिलं च पश्येत् ॥ कथमृषिः सर्वज्ञत्वादित्युच्यते ॥ यः

सुखरूपः पाल्यते लीयते च जगदनेनेति कपिलः॥प्रीतिः सुखं कमानंद इत्यभिधानात्॥प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति च ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्॥सुखादनंतात्पालनाल्लीयनाच्च यं वै

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥

देवंकपिलमुदाहरंतीति बाभ्रव्यशाखायाम् ॥ २६ ॥

प्रसूतं पूर्वकल्पेषु जातं जायमानं वर्तमानं चैवमागामि च जगज्ज्ञानैर्बिभर्ति जानातीति यावत् ॥ कथं कपिल इत्यत उक्तं॥सुखादिति ॥ यच्छब्दद्वयस्य तमित्यनेनान्वयः ॥ २६ ॥

॥ कृ० ॥ किरिति ॥ क्तिवादातोलोप इटि च इत्याकारलोप इति भावः ॥ पश्येदिति ॥ जानीयादित्यर्थः ॥ २६॥

॥ श्री० ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ रइत्यस्यार्थः आनंदरूपत्वादिति ॥ अंसत्यस्यार्थः ॥ पूर्णत्वादिति ॥ एकोऽपि रामशब्दस्य ॥ [illegible] ॥ रमतइत्यादिना ॥ त्रपंनाद्दडइति ॥ अत्र [illegible] प्रत्याहारग्रहणम [illegible] ॥ [illegible] इत्यस्य लोप प्रत्ययाकारसंबंधे र इतिरूपम ॥ ननु [illegible] ॥ [illegible] न ॥ अन्यथा दंडो रंड्याद्यादि रूपानिष्पत्तिर्न स्यात ॥ [illegible] ॥ सत्यम ॥ [illegible] डस्य कचिड्डित्वमपि प्रयोगवशादंगीकार्यम ॥ [illegible] ॥ अन्यथा [illegible] नुबंधसंज्ञाभावेनादित्वं प्रायिकं कचित्प्रयोजने [illegible]

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ रामः शस्त्रभृतामहमिति रामशब्दं व्याख्याति॥आनंदेति॥आनंदरूपत्वात्पूर्णत्वादित्यर्थः॥ रमत इति

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ आनंदरूपत्वात्पूर्णत्वाल्लोकरमणत्वाच्च रामः॥

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥ २७ ॥
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः॥२८॥
अनंतश्चास्मि नागानां वरुणो यादसामहम् ॥ पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥
प्रल्हादश्चास्मि दैत्यानां कालः कलयतामहम् ॥ मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

रः ॥ रमुक्रीडायामित्यतोऽत्रमंनाद्दडइति डः ॥

। कृ० ॥ २७॥२८॥२९॥३०॥अत्रनाद्दड डति ड इति ॥ यद्यपि [illegible] तथा च [illegible] ॥ [illegible] काश्रयणांविना [illegible] ॥ यद्वा ॥ [illegible] इति ज्ञातव्यम ॥

१ अत्युत्कृष्टकीर्तिमत्वात ॥ २ [illegible] ॥३ अग्निमत्वेन ॥ ४ [illegible] ॥ ५ [illegible] ॥६ [illegible] कशिरसाम् ॥ ७ उत्कृष्टानंददत्वात ॥८ [illegible] ॥९ [illegible] ॥१० [illegible] ॥११ [illegible] ॥ १२ [illegible] ॥

॥ श्री० ॥ परिच्छेद इति ॥ माङ्माने मानं ज्ञानं लयश्चै मर्यादाचापि कथ्यते इति वचनादित्यर्थः ॥पवित्रिति ॥ रम इत्यस्मात् तत्प्रत्यये ऽकारमात्रं विहाय सर्वस्यापि लोपे णित्वाद्वृ
द्धिवृद्धौ प्रत्ययाकारसंबंधे रामेति रूपम् द्वंद्वसमासभ्रांतिवारणाय कर्मधारयोऽयमित्याह ॥ रश्चामाविति ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४॥३५ ॥

न विद्यते मा प्रमा परिच्छेदोस्येत्यमः॥ लोकेत्यपरोर्थः ॥ रमतेघञ् ॥ अत्र श्रुतिमाह ॥ आनंदेति ॥ आद्येऽर्थेविग्रहं दर्शयति ॥ रश्चेति॥ रश्चा

आनंदरूपो निष्परीमाण एष लोकश्चैतस्माद्रमते तेन राम इति शांडिल्यशाखायाम् ॥रश्च अमश्च

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्न
वी ॥३१॥ सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामह
म् ॥ ३२ ॥ अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च ॥ अहमेवाक्षयः कालो धाताऽहं
विश्वतोमुखः ॥ ३३ ॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ॥ कीर्तिःश्रीर्वाक् च नारीणां
स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम तथा साम्नांगायत्री छंदसामहं ॥ मासानां मार्ग
शीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

ति व्युत्पत्तिः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

सावमश्चेत्यर्थः ॥ ३१ ॥ ३२ ३३ ॥ ३४ ॥ ३५ ॥ ॥ क० ॥ रमतेघञिति ॥ रमतेऽनेन इति राम इति करणे घञ् अत उपधाया इति वृद्धि
श्चेति भावः अतो न घञः कर्तृभिन्नकारककार्यत्वविरोध इति बोध्यम् ॥ ३१ ॥ ३२ ॥३३ ॥ ३४ ॥ ३५ ॥

---

१ सृज्यंतइतिभूतानामित्यर्थः॥सृष्टिस्थितिलयहेतुः ॥२ मीवानभिकृत्यप्रवर्तितत्वनर्तदर्शिज्ञाभिरूपश्चेति ॥३ वाच्यत्वात् ॥४ अक्षयाक्रियमाणत्वात् ॥५ बहिरंतरागिहिरूपत्वात् ॥६ सर्व
दिङ्मुखत्वात् ॥ ७ मारकत्वात् ॥ ८ तद्धेतुत्वादुद्भवादिनामा॥ ९ बृहत्सामत्वादस्यत्वाश्च ॥ १० स्वगुणगायकानात्रातीति ॥ ११ मार्गाणाशीर्षस्थानत्वात् ॥१२ असमत्वात्तानत्वात् ॥

॥श्री०॥३६॥उणिति ॥ तथा च णित्वादादिवृद्धौ धर्मज्ञकस्य सकारस्थस्याकारस्य लोपे वासुरिति भवति॥ण्यंतादिति॥णिजंतादित्यर्थः॥अत्र पूर्ववदेवरूपम॥केवलात् ॥ णिजर्थरहितादि त्यर्थः॥अत्रापि रूपं पूर्ववदेव॥अभेदप्रतीतिवारणाय भूतेत्यस्यार्थमाह॥प्राप्येतित भूतानि प्राप्यर्थत्वे धातसूत्रवचनं प्रमाणयति॥भूप्राप्तावितिं॥तत्पुरुषो बहुव्रीहिश्चेति॥सर्वभूतानामधिवासो वासयितेत्यनेन सर्वं वासयतीति प्रमापितं सर्वभूतान्येवाधिवासभूतानि यस्येति बहुव्रीहिणा वस ति सर्वत्रेत्येतत्प्रमापितमिति ध्येयम॥अत्र वासशब्दार्थस्यैव कथनेन देवशब्दार्थाकथनाद्वासुदे वस्ततोस्म्यहमित्यनुपपन्नमित्यत आह ॥ अत्रापीति॥ङ रूपामिति ॥ ङ इति सप्तमी ङप्रत्यये परे रूपामित्यर्थः ॥तथा च वी आ इत्युपपदात् सृगतौ सृ कृ गतावित्यतो वा डप्रत्यये डि त्वात् टीभुतस्य ऋवर्णस्य कृत् इत्यस्य वा लोपे प्रत्ययाकारसंबंधे च सति व्यासेतिरूपम् ॥ननु स इत्येतत् सृ गतावित्यादिधातो रूपम॥कुतः॥तच्छब्दस्यैव रूपं कस्मान्न स्यादित्यत आह ॥ ननु तद इति ॥ कु० ॥३६॥ उणिति ॥ वस्ते आच्छादयतीति वस् ॥ उण् अत उपधाया इति वृद्धिश्चेति भावः ॥ ण्यंतादुणिति ॥ णेरनिटीति णिलोप इति भावः ॥

३६वृष्णीनांवासुदेवोऽस्मीतिवासुदेवशब्दंव्य।चिकीर्षुर्वासुशब्दार्थंतावदाह॥आच्छादयतीति ॥वसआच्छादनइत्यतउण्वासयति सर्वमितिवर्तते ॥वसतिवा सइत्यतोण्यंतादुण्॥वसतिचेतिकेवलादुणत्र॥ततःकिमायातंवासुदेवशब्दस्येत्यतआह॥देवेति॥तथाहिदेवशब्दार्थमित्यत्रततःकर्मधारयः॥विश्वंसमस्तं भू

३६आच्छादयति सर्वं वासयति वसति चेतिसर्वत्र॥वासुदेवः॥देवशब्दार्थ उक्तःपुरस्तात्॥ छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः॥सर्वभूताधिवासश्च वासुदेवस्ततोस्म्यहमिति मोक्षधर्मे॥विशिष्टःसर्वस्मादासमंतात्स एवेति व्यासः॥

द्यूतंछलयतामस्मितेजस्तेजस्विनामहं ॥ जयोऽस्मि व्यवसायोस्मि सत्वं सत्ववतामहम्॥ ३६ ॥
वृष्णीनांवासुदेवोऽस्मिपांडवानांधनंजयः ॥ मुनीनामप्यहंव्यासःकवीनामुशनाकविः ॥ ३७ ॥

त्वाप्र।प्याभूप्राप्तावात्मनेपदीति वचनात्॥सर्वभूताधिवासश्चेति तत्पुरुषोबहुव्रीहिश्च ॥अत्रापिदेवशब्दार्थो ग्राह्यः॥ मुनीनामप्यहंव्यासइति व्यासशब्दं व्याचष्टे ॥विशिष्टइति॥सर्वस्माद्विशिष्टइतिविशब्दार्थः ॥ आइत्यनुवादेनसमंतादितिव्याख्यानम् ॥ सइत्यस्यएवेति ॥ सृगतौसृकृगतावित्यतोवाडे रूपमेतत् ॥ ननुतदः ॥

सर्वं वासयतीति सर्वत्रवसतीत्यर्थद्वयानुगुण्यायाह॥ तत्पुरुषइति ॥ एतदिति ॥ व्यासइति ॥ समुदायांतर्गतमइति पदमित्यर्थः ॥

॥ श्री० तत्रनिमित्तमाह ॥ व्याममित्यादीति ॥ तदोः सः सावनंत्ययोः ॥त्यन तद् इत्यत्रस्थितयोस्तकारयोः मकारादेशःस्यात्सौ परे इति प्रथमाविभक्तौनैव तकारस्य मकारादेश विधानात् व्यासः इति प्रथमैकवचनसंभवेऽपि व्यामौ व्यामाः व्याममित्यादि न स्यात् किंतु सः तौ ते इत्यादिवत् व्यामः व्यातौ व्याते व्यातमित्याद्येव स्यादित्यर्थः ॥ व्याममित्यादी ति द्वितीयैकवचनादिग्रहणं तु व्यामः इति प्रथमैकवचनस्यैव व्याख्येयतया प्रस्तुतत्वेन तदनुसारेणेति द्रष्टव्यम् ॥ पौनरुक्त्यपरिहारायाह ॥ उपरिष्टादिति ॥ ३७॥ ३८॥ ३९ ॥ ४०॥

व्यासमित्याद्यनुपपत्तेः ॥ समंताद्गतः सर्वगत इत्यर्थः ॥ स व्यामः ॥ कुतः ॥ वीति हेतोः ॥ कोऽर्थः ॥ तमपोऽर्थो हि विशब्दः ॥ उत्तरत उपरिष्टात् यच्च किंचिदिति भगवतः सर्वगतत्वे प्रमाणम् ॥ ३७ ॥ ३८ ॥ न तदस्ति विनेत्यत्र पदानां व्यवहितत्वादन्वयमाह ॥ मये

तथाचाग्निवेश्यशाखायाम् ॥ सव्यासो वीति तमप् वै विःसोऽधस्तात्सउत्तरतःसपश्चात्सपूर्वस्मात्सदक्षिणतः सउत्तरतइतीति ॥ यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेऽपिवा ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितइतिच ॥

दंडोदमयतामस्मिनीतिरस्मिजिगीषताम् ॥मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहम्॥३८॥
यच्चापिसर्वभूतानांबीजंतदहमर्जुन ॥ नतदस्ति विनायत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥
नांतोऽस्तिममदिव्यानां विभूतीनांपरंतप ॥ एषतूद्देशतः प्रोक्तो विभूतेर्विस्तरोमया ॥ ४० ॥

॥३७॥३८॥मयाविनायद्भूतंस्यात्तन्नास्ति॥विश्वरूप अनंतगतिरनंतभागअनंतगअनंतत्यादिमोक्षधर्मे॥३९॥४०॥

ति॥ भगवतोऽनंते रूपैः सर्वपदार्थव्यापित्वे प्रमाणमाह ॥ विश्वेति ॥विश्वं रूपं प्रतिमा यस्यासौ विश्वरूपः ॥ अनंतानां गतिराश्रयोऽनं तगतिः ॥ अनंता भागा अवतारा यस्यासावनंतभागः ॥ अनंतान्पदार्थान् गतः अनंतगः ॥ अनंतः कालाद्यपरिच्छिन्नः ॥ ३९ ॥ ४० ॥

॥ कृ०॥ व्यासमित्यादीति॥ त्यदाद्यत्वेपररूपेच व्यातमितिस्यादित्यर्थः॥ आदिपदेव्यामेनेत्यादेर्ग्रहणम्॥उत्तरतइतिद्वःश्रवणादाद्यस्यार्थमेदमाह॥उपरिष्टादिति॥ ३७॥३८॥३९॥४०॥

---

१ इत्यादावितिपाठोयुक्तोभाति॥ २एकवचनेइतिग्राह्यं॥ ३ईडचर्त्वेन मुनिभंचंचित्वात्॥ ४ आवर्तेत पूर्वोक्तःशृंगग्राहिकयाप्रोक्तः हादिस्थं।वक्ष्यमाणस्तुलक्षणात्तया।विस्तरःप्रोच्यतेइत्यथःवर्तमानेक्तः

॥ श्री० ॥ **अनुक्रांतानि** ॥ पूर्वोपक्रांतेत्यर्थः ॥ **वक्ष्यमाणमिति** ॥ तथा च प्रोक्तो यः स उद्देशतः एष तु वक्ष्यमाणो विस्तर इत्यन्वयेनार्थो द्रष्टव्यः ॥ नन्वेषः पूर्वोक्त एव विस्तर इत्येतच्छब्दस्य पूर्वप्रकृतपरामर्शकत्वमेव किं न स्यादित्यत आह ॥ **शृंगिग्राहिकयेति** ॥ आदित्यानामहं विष्णुरिति व्यक्तिविशेषोक्तेरपि यद्यद्विभूतिमदितिलक्षणोक्तेर्बहुसंग्राहकत्वेन पूर्वोक्तस्य विस्तरत्वाभावान्नैतच्छब्दः पूर्वानुक्रांतपरामर्शीत्यर्थः विभूतिमदादिकमित्यत्रादिपदेनश्रीमदादिकं ग्राह्यम् ॥ **एतल्लक्षणेति** ॥ विभूतिमत्त्वादिलक्षणेत्यर्थः ॥ **एतद्वाक्यम्** ॥ यद्यद्विभूतिमदिति वाक्यम्॥**साक्षादवतारत्वविशेषोक्तीनि** । एषा विष्णोर्भगवतः कला भुवनपावनी॥विष्णुकलासि वैन्येत्यादिसाक्षाद्भगवदवतारत्वप्रतिपादकभागवतादिग्रंथविशेषोक्तीत्यर्थः ॥

एष तूद्देशत इत्येतच्छब्दोऽनुक्रांतपरामर्शीतिप्रतीतिनिरासार्थमाह ॥ यद्यदिति ॥ वक्ष्यमाणं बुद्धिस्थमेतच्छब्देन परामृश्यते ॥ शृंगिग्राहिकयोक्तेरपि लक्षणोक्तेर्विस्तरत्वादिति भावः ॥ विभूतिमदादिकं मम तेजोरूपेणांशेन सह भवतीत्युक्त्या विष्णवादीनामपि भगवदंशेषु

यद्यद्विभूतिमदितिविस्तरः ॥ विष्ण्वादीनि तत्स्वरूपाण्येव॥ अन्यानितुतेजोयुक्तानि ॥ तथाचपैंगिखिलेषु॥विशे

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छत्वं ममतेजोंऽशसंभवम्॥ ४१॥

षकारुद्रवैन्येंद्रदेवाराजन्याद्या अंगयुताऽन्यजीवाः ॥कृष्णव्यासौरामकृष्णौचरामकपिलयज्ञप्रमुखाःस्वयंसइति॥

क्तत्वं प्रतीयते ॥ तेषामप्येतल्लक्षणोपेतत्वात्तन्निवृत्त्यर्थमाह॥विष्ण्वादीनीति ॥ तर्हि किंविषयमेतद्वाक्यमित्यत आह॥ अन्यानित्विति ॥कुत एतदित्यत आह ॥ तथा चेति ॥ विशेषकाः गरुडानंतविरिंचा वैन्यः पृथुः ॥ राजन्यग्रहणेन गृहीतस्यापि पुनरुक्तिः साक्षादवतारत्वविशेषोक्तिबाधनार्थम्॥

॥क्र०॥अनुक्रांतपरामर्शित्वेबाधकमाह ॥ शृंगिग्राहिकयेति ॥ भाष्यार्थनिर्देशः व्यक्तवक्तव्यइति व्युत्क्रांतोऽयम् ॥ ततःशृंगग्रहणेनेत्यर्थः ॥ **विस्तरत्वादीति** ॥ आदित्यानामहं विष्णुरिति व्यक्तिविशेषोक्तेरपियद्यद्विभूतिमदिति लक्षणोक्तेर्बहुसंग्राहकत्वादितिभावः ॥ **विभूतिमदादिकमिति** ॥ आदिपदाच्छ्रीमदूर्जितयोर्ग्रहः ॥ **साक्षादवतारत्वेति** ॥ जातोनारायणांऽशेन पृथू राजाक्षितीश्वरः ॥ नवमं पार्थिवं वपुरित्याद्युक्तीत्यर्थः ॥

१ स्कं. ४ अ. १४ श्लो. ५० २ विश्वशेषश्चकश्चेतिभाव. ॥ ३ साक्षात्पदस्वारस्यात ॥ स्क. ३ अ. १९ श्लोक ३ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षयेतिवाक्यंटीकाकर्तुरभिप्रेतमिति तच्छ्रुतिविरोधात्तत्रत्यंसाक्षात्पदंप्रत्यक्षसदृशोः साक्षादित्यभिधानात्साक्षादंशः सदृशोंऽशःभिन्नांशइतियावदितितदर्थोज्ञेयइतिभावः ॥

॥ श्री० ॥ धर्मसूनुरपीति ॥ [illegible] नारायणादिकृष्णानामु[illegible] धर्मसूनुरपि कृष्णो [illegible] कृष्णाख्यामात्रित्यर्थः कृष्णशब्देन ग्राह्यः द्वितीयकृष्णशब्देन तु यादवकृष्ण इति भावः ॥ रामो भार्गवोऽपीति ॥ [illegible] रामक[illegible] शब्देन ग्राह्य द्वितीयरामशब्देन तु दाशरथिरिति भावः ॥ कला इत्यनेन साक्षादंशत्वप्रतीतेः कथम[illegible] आह ॥ कला इवेति ॥ [illegible] इत्यनेन [illegible] ॥ स्वरूपांशरूपा एवेति ॥ पूर्ववत् ॥ ऋष्यादिवत् । उक्तं व्याख्यानं वराहादिवत् कृष्णस्यापि स्वरूपांश[illegible] अन्यथा [illegible] विशेषणानर्थक्यमित्यर्थः ॥ कृष्ण इत्यनूद्य तस्यार्थमाह ॥ कृष्णः ॥ परमपुरुष इति ॥ [illegible] ॥ उदाहृतश्रुतीति ॥ कृष्णाख्यामात्रियुदाहृतश्रुतीत्यर्थः अस्मदर्थेविशेषः ॥

कृष्णो धर्मसूनुरपि ॥ रामो भार्गवोऽपि ॥ अंशयुक्तत्वेनोक्ता कला इत्यनेन कला इव कलाः ॥ तत्स्वरूपत्वेन ॥ एते स्वांशकला इत्यनेन स्वरूपांशरूपा एव कलाः न तु पूर्ववदुपचारेणेति ॥ नन्वनेन वराहाद्याः परमपुरुषस्यांशा एव कृष्णस्त्वंशी भगवान् स्वयमिति प्रतीयते त त्कथमुक्तव्याख्यानमन्यथा तुशब्दानुपपत्तेरित्यत आह ॥ तुशब्द इति ॥ ततश्चायमर्थः ॥ एते वराहाद्याः पुंसः स्वांशकलाः ॥ कोऽर्थः ॥ कृ

सएवैकोभार्गवदाशरथिकृष्णाद्यास्त्वंशयुताऽन्यर्जीवाइति गीतमखिलेषु ॥ ऋषयोमनवोदेवामनुपुत्रामहौजसः कलाःसर्वेहरेरेवसप्रजापतयःस्मृताः ॥ एतेस्वांशकलाःपुंसःकृष्णस्तुभगवान्स्वयमितिभागवते ॥ ऋष्यादीनंश युतत्वेनोक्त्वावराहादीन्स्वरूपत्वेनाह॥ तुशब्दएवार्थे ॥अन्यस्तुविशेषोनकुत्राप्यवगतः ॥

ष्णः परमपुरुषो भगवान् स्वयमेवेति इति ॥ कुत एतदिति चेत् उदाहृतश्रुतिसंवादात् ॥ अर्थान्तरस्य संवादाभावाच्चेत्याह ॥ अन्यस्त्विति॥ वराहादयोंऽशाः कृष्णोंऽशीत्येवरूपः ॥ ॥ कृ० ॥ तत्तत्स्वांशेति विशेषणान्मुख्यत्वेऽपि अत्र तदभावाद्गौणत्वमिति भावेनाह॥कला इव कला इति ॥

१ स्कं. १ अ. ३ श्लो. २७ । २८

॥ श्री० ॥ परामर्शीति ॥ परामर्शकशब्देत्यर्थः ॥ इंद्रादीत्यर्थोवराहाद्या इत्यध्याहारः क्रियत इति चेत्तत्राह॥ मनीति ॥ अस्मदुक्तरीत्येत्यर्थः असंनिहितेनाप्यन्वयबोधोऽस्त्विति चेत्त त्राह ॥ असंनिहितेनेति ॥ प्रकृतेति ॥ भागवते मृडयंतीति क्रियोक्तारित्यर्थः ॥ वस्तुतस्तु तत्कर्तव्यमित्येव द्रष्टव्यमित्याशयः ॥ योग्यतेति ॥ तथा च संनिधानस्यैवार्थावाचकत्वा योग्यताबलात्व्यवहितेनापि मृडयंतीत्यस्यान्वयोपपत्तिरिति भावः ॥ संनिधिमनतिक्रम्येति ॥ अस्मद्रीत्या संनिधियोग्यताभ्यामन्वये संभवति सति संनिधिमतिक्रम्य योग्यतामात्रेणान्वय स्त्वदुक्तो न युक्त इति भावः ॥ ४१ ॥ व्यस्तज्ञानेति ॥ परिच्छिन्नज्ञानेत्यर्थः ॥ ॥ कृ० ॥ ननुवराहादयइत्यध्याहारादहुवचनोपपत्तिरित्यत आह संनिहितत्यनतरऽइति ॥

इतोऽप्ययं विशेषो न युक्त इत्याह ॥ अंशत्वमिति॥तत्रापि कृष्णेऽपि किंचास्मिन् व्याख्याने कृष्णस्यैकस्यैव प्रकृतत्वात् ॥ इंद्राग्निभ्याकुलं लोकं मृडयंति युगे युग इत्युत्तरवाक्ये बहुवचनं नोपपन्नमित्याह ॥ मृडयंतीति ॥ ननु बहुवचनं पूर्वोक्तैर्वराहादिभिः संबध्यते न कृष्णेन ति चेत् न ॥कृष्णस्तु भगवान् स्वयमिति वाक्यार्थेन व्यवहितत्वात् ॥ व्यवहितस्यापि पुनः संनिधानाय परामर्शाभावात् ॥ सति गत्यंतरेऽ ध्याहारायोगात ॥ असंनिहितेनान्वयबोधस्य क्वाप्यदर्शनादिति भावेनाह ॥ न हीति ॥ क्रियेति प्रकृतापेक्षयोक्तम् ॥ ननु संनिधेरपि योग्य

अंशत्वंतत्राप्यवगतम् ॥ उद्धवर्हात्मनःकेशाविति ॥ मृडयंतीतिचबहुवचनंचायुक्तम् ॥नह्यंतराऽन्यदुक्का

अथवाबहुनैतेन किंज्ञातेनतवार्जुन ॥ विष्टभ्याऽहमिदंकृत्स्नमेकांशेनस्थितोजगत् ॥ ४२ ॥

पूर्वमपरामृश्यतत्क्रियोच्यमानादृष्टाकुत्रचित् ॥ ४१ ॥ किमितिवक्ष्यमाणप्राधान्यज्ञापनार्थं

ता बलवतीति चेत् ॥ सत्यम् ॥ संनिधिमनतिक्रम्य योग्यान्वयस्तूक्तः ॥ ४१ ॥ अथवा बहुनैतेन किंज्ञातेनेति पूर्वोक्तव्यस्तज्ञानाक्षेपात ॥ त स्य निष्फलत्वमिति प्रतीतिनिरासार्थमाह ॥ किमिति ॥ किमित्ययमाक्षेपो वक्ष्यमाणसर्वव्याप्तरूपज्ञानस्योक्तरविप्रभृतिपरिच्छिन्नवस्तुस्वरूप ज्ञानापेक्षया ॥ प्राधान्यज्ञापनार्थमेव न तूक्तविशेषज्ञानस्य निष्फलत्वज्ञापनार्थम् ॥ निष्फलत्वे तदुक्तिर्वैयर्थ्यापत्तिरित्यर्थः ॥

ननुसामान्यन्यायोपपादनावसरे क्रियेतिकथमुक्तमित्यतआह ॥ प्रकृतापेक्षयेति ॥ मृडयंतीति क्रियायाः प्रकृतत्वात्तदपेक्षयेत्यर्थः ॥ उक्त इति॥ततश्चायमथे इत्यादिनेति शेषः ॥ ४१॥

१ जनंतत्स्थानंच ॥२ रक्षंति ॥

॥ श्री० ॥ ननु यदि सर्वेषां सर्वविशेषयुक्ततया भगवज्ज्ञानाभावे मुक्त्यभावस्तर्हि प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेद इति सूत्रे मोक्षार्थं सर्वेषां प्रियशिरस्त्वादिगुणविशेषयुक्ततया भगवदुपासनाभावस्योक्तत्वेन तद्विरोधः स्यादित्यत आह ॥ प्रियेति ॥ अज्ञात्वेति श्रुत्या यथाशक्तिसर्वविषयज्ञानं संपाद्यमित्युच्यते सूत्रेण सर्वविशेषविषयध्यानं निषिध्यत इति न विरोध इति भावः ॥ विशिष्टाधिकारीति ॥ ब्रह्मणा त्वखिलैर्गुणैरुपास्यः सर्वैर्देवैश्चेति भगवत्पादीयवचनात् ब्रह्माद्युत्तमाधिकारिविषया श्रुतिः ॥ सूत्रं त्वल्पाधिकारिविषयम् ॥ सच्चिदानंदआत्मेति मानुषस्त्विति वचनादिति भाव. ॥ तर्हि तदुक्तिर्व्यर्थेत्यत आह ॥ अन्यानिति ॥ व्याप्तज्ञानायोग्यान् प्रतीत्यर्थः ॥ तत्र ज्ञापकमाह ॥ नत्वेति ॥ त्वेत्यर्जुनं प्रत्युच्यमानत्वेन तस्य विशिष्टाधिकारित्वेन व्याप्तज्ञानयोग्यत्वेन तस्य विशेषज्ञाने नैष्फल्ये तद्बाधेन सर्वेषामिति व्याप्तज्ञानयोग्यान् मुक्तौ विशेषज्ञानं निष्फलमेवेति प्राप्तमित्यर्थः उक्तार्थमनुवदन्नेवोत्तरवाक्यमवतारयति ॥ नन्विति ॥ बाधकाद्गौण्या वृत्त्यन्वयः ॥ सादृश्यमुपपादयति ॥ निष्फलेति ॥ गुणोत्कर्षप्रतिपादकशब्दरूपस्तुतिग्रहणस्यात्रासंभवादाह ॥ स्तुतिरिति ॥ एवं च रागद्वेषपरिहारस्य प्रशस्तताज्ञापनार्थत्वेन तथा किमित्येकत्र किंशब्दप्रयोगो दृष्ट इत्यर्थः ॥

ननु व्याप्तिज्ञानेनैव मुक्तिसंभवाद्विशेषज्ञानं व्यर्थमेव किं न स्यादित्यत आह ॥ अज्ञात्वेति ॥ प्रियशिरस्त्वाद्यप्राप्तिरित्यादिकं ध्यानापेक्षयोक्तं ज्ञानापेक्षया तु श्रुतिरित्यविरोधः अथ वा विशिष्टाधिकारिविषयेयं श्रुतिः ॥ ननु व्याप्तज्ञानयोग्यानां विशेषज्ञानं निष्फलमेव ॥ अन्यान्प्रति तु तदुक्तिरिति व्यवस्थाऽस्तु तत्रेति विशेषणसामर्थ्यादित्यत आह ॥ त्वं त्विति ॥ अतो न तव विशेषज्ञानमात्रेणालमिति ज्ञापयितुमिति शेषः ॥

नतक्तनिष्फलत्वज्ञानाय ॥ तथासतिनोच्येत ॥ अज्ञात्वेनंसर्वविशेषयुक्तंदेवंवरंकोविमुच्येतबंधादित्यृग्वेदखिलेषु ॥ त्वंतुबहुलफलप्राप्तियोग्यइतितत्रेतिविशेषणम् ॥ अन्यस्तुत्यर्थत्वेनप्रसिद्धश्चैकत्राकिंशब्दः ॥

विशेषणस्यान्यथासिद्धत्वान्नोक्तव्यवस्थाकल्पकत्वमितिभावः ॥ ननु किं ज्ञानेन न किमपीति शब्दादुक्तस्य नैष्फल्ये प्रतीते तदुक्तिर्व्यर्थ्येप्रसंगात् बाधकान्निष्फलाल्पफलयोर्महाफलत्वाभावसादृश्याद्गौण्या वृत्त्योक्तस्याप्राधान्यप्रतीतावर्थाद्वक्ष्यमाणस्य प्राधान्यप्रतीतिरित्युक्तम् ॥ नत्र गौणप्रयोगे प्रयोजनं वाच्यमिति चेतन ॥ रूढोपचारत्वादिति भावेनाह ॥ अन्येति ॥ स्तुतिः प्रशस्तताज्ञापनम्॥अर्थः प्रयोद्धनं ॥

॥ कृ० ॥ ननुसर्वस्यज्ञेयत्वेप्रियशिरस्त्वाद्यप्राप्तिरितिसूत्रविरोधइत्यत आह ॥ प्रियशिरस्त्वादीति ॥ फलभेदार्थमुपचयापचयाभावान्न सर्वेषां प्रियशिरस्त्वादिगुणोपासनाप्राप्तिः ॥ नेत्र सर्वे गुणाः सर्वैरुपास्या मुक्तिभेदतः ॥ विरिंचस्यैव यन्मुक्तावानंदस्य सुपूर्णतेति वाराहोक्तेरिति सूत्रार्थः ॥ विशिष्टाधिकारीति ॥ सूत्रं त्वल्पाधिकारिविषयमिति भावः ॥ ननु गुणोत्कर्षपरत्वा कथं स्तुतिः ॥ तद्वाचित्वं च किमो नास्तीति स्तुत्यर्थत्वेनेत्ययुक्तमित्यत आह ॥ प्रशस्तताज्ञापनमिति ॥ गुणोत्कर्षज्ञापनमित्यर्थः ॥

॥ श्री० ॥ तापमेऽपि यदि रागद्वेषौ स्यातां तदा तपसा किं प्रयोजनं स्वर्थमेव तदीय तप इति यावत् ॥ तावुभौ रागद्वेषौ यदि न स्यातां तदा तपसा किं प्रयोजनं तप. [illegible]
रिहारः संपादनीयः स चेत्स्वतः सिद्धस्तदा तत्परिहारक तपोव्यर्थामेति वचनार्थः ॥ यो मां पश्यतीत्यादौ कथं सर्वत्र भगवद्दर्शनस्य प्राधान्यंसिद्धमस्तीत्याशंकायामाह ॥ यो मामित
॥ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यतीत्यत्र सर्वत्र भगवदुपासकस्य सर्वदा योगक्षेमरूपविलक्षणफलकथनादित्यर्थः [illegible]
दर्शनात् सर्वत्र दर्शनस्य प्राधान्यमितिन्यायेनैव व्याप्तज्ञानस्य रविप्रभृतिपरिच्छिन्नवस्तुस्वपरमात्मज्ञानात् प्राधान्यस्य सिद्धत्वात् यो मामिति गीतावाक्यसमति. कस्मादुक्तस्य [illegible]
न्यायसिद्धोऽर्थाति ॥ एतदुक्तमिति ॥ यो मां पश्यति सर्वत्रेत्यादावित्युक्तमित्यर्थः ॥ ४२ ॥ इतिश्रीमद्भगवद्गीताभाष्यटीकाप्रकाशयमनिर्लक्षिताभिर्गीर्भिरावेदयित्री ॥ सुलालतावेद्यायत्
[illegible] त्रीणि दशम अध्यायमस्यामंतमव्याख्यातं [illegible] श्री मध्वरूपाचार्यपूज्यपादाराधकेन श्रीनिवासेनविरचितायाश्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावदीपिकाख्याया दशमो [illegible]

स्यादिदं व्याख्यानं यदि परिच्छिन्नज्ञानाद्व्याप्तिज्ञानस्य प्राधान्यं प्रमितं स्यात् तदेव कुत इत्यत आह ॥ प्राधान्यं चेति ॥ यो मामिति
विशिष्टफलकथनात् ॥ न्यायसिद्धोऽप्यर्थो वाक्यसंमत्या दृढो भवतीत्येतदुक्तम् ॥ ४२ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित

रागद्वेषौयदिस्यातांतपसाकिंप्रयोजनम् ॥ ताउभौयदिनस्यातांतपसाकिंप्रयोजनमित्यादौ ॥ प्राधान्यंच
सिद्धमेकत्रदर्शनात्सर्वत्र भगवद्दर्शनस्य ॥ योमांपश्यतिसर्वत्रेत्यादौ ॥ ४२ ॥ इतिश्रीमदानंदतीर्थभग

हरिः ॐ तत्सदितिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्जुनसंवादेविभूति
योगोनामदशमोऽध्याय. ॥ १० ॥

वत्पादाचार्यविरचितश्रीमद्गीताभाष्ये दशमोध्यायः ॥ १० ॥

स्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां दशमोऽध्यायः ॥ ॥ ॥ ॥ ॥ ॥

॥ कृ० ॥ ननु यो मामिति वाक्यं सर्वत्र दर्शनमेवोच्यते॥न तु तस्याधिक्यमित्याशंक्य तस्याहं न प्रणश्यामीति वाक्यशेषोक्तमाधिक्ये हेतुमध्याहरति॥विशिष्टफलकथनादि न योगक्षे
मवहत्वरूपविशिष्टफलकथनादित्यर्थः॥ननु विशेषरूपाण्युक्तानि किं ज्ञातेनेति चेत्क्रम॥एतदुभयान्यथानुपपत्त्या परिच्छिन्नव्याप्तज्ञानयोर्गुणप्रधानभावः प्रमितः ॥अतो यो मामितिवाक्योदा
हरणमयुक्तम्॥न च प्रमाणांतरत्वेन तदुक्तिः॥गीतार्थस्यैवविचार्यत्वेन तदभावायोगादित्यत आह॥न्यायसिद्धइति ४२इतिश्रीमत्तिम्मलाचार्यसुतकृष्णाविरचितेप्रमेयदीपिकाप्रकाशेदशमोऽध्यायः॥

॥ श्री० ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ कुर्मे एकादशाध्यायटीकां भावप्रदीपिकाम् ॥ १ ॥ २ ॥ ३ ॥ अनुवादेनेति ॥ अनुवादरूपेणेत्यर्थः ॥ अतींद्रियस्यादि ॥ विश्वरूपस्य ॥ दर्शनम् ॥ मम संभवतीति शेषः ॥

एतदध्यायप्रतिपाद्यमर्थमाह ॥ यथेति ॥ दशमांतेविष्टभ्याहमिदं कृत्स्नमेकांशेनस्थितोजगदिति व्याप्तोपासनंसंक्षेपेणोक्तम् ॥ नचसंक्षेपेणोक्तस्यध्यानंशक्यम् ॥ बुद्धावनारोहात् ॥ अतोयथाभूतेव्याप्तरूपेविस्तरेणश्रुते ध्यानंशक्यंभवति ॥ तथाभूतस्वरूपस्थितिरर्जुनायप्रदर्शितस्यानुवा

श्रीः ॐ ॥ यथा श्रुते ध्यानं शक्यं तथा स्वरूपस्थितिरनेनाध्यायेनोच्यते ॥ १ ॥ २ ॥ ३ ॥ प्रभुः समर्थः॥

अर्जुनउवाच ॥ मदनुग्रहायपरमं गुह्यमध्यात्मसंज्ञितम् ॥ यत्त्वयोक्तंवचस्तेनमोहोऽयंविगतोमम ॥ १ ॥
भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया ॥ त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययम् ॥ २ ॥
एवमेतद्यथात्थत्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामितेरूपमैश्वरं पुरुषोत्तम ॥ ३ ॥
मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो ॥ योगेश्वरततोमेत्वंदर्शयात्मानमव्ययम् ॥ ४ ॥

देनानेनैकादशेनाध्यायेनोच्यते ॥ स्वरूपग्रहणेनविश्वरूपस्यमायादिनानदैवनिर्मायविस्पष्टत्वं निवारयति ॥ १ ॥ २ ॥ ३ ॥ मन्यसेयदीत्यत्रप्रभुशब्दोनस्वामित्वमात्रार्थः ॥ किंतुतवातिसामर्थ्यात् त्वत्सामर्थ्येनैवातींद्रियस्यापि दर्शनमितिभावेनप्रयुक्तइत्याशयेनाह ॥ प्रभुरिति ॥

॥ छ० ॥ ॐ ॥ व्याप्तोपासनं संक्षेपेणोक्तमिति ॥ अथ वा बहुनैतेन किं ज्ञातेनेत्यन्यज्ञानाक्षेपेणविष्टभ्याहमित्यनेनेत्यर्थः ॥ पश्यमेपार्थरूपाणीत्यादिना व्याप्तस्थितेरनुक्तत्वादाह ॥ अर्जुनायप्रदर्शितस्यानुवादेनेति ॥ अनेकबाहूदरवक्त्रनेत्रमित्यादिनेति शेषः ॥ मायादिनेत्यादिपदादविद्याग्रहणम् ॥ १ ॥ २ ॥ ३ ॥

१ आत्मानंभगवंतमधिकृत्य स्थितामितितन्नामकम् ॥ २ बंधुस्नेहादिरूपः ॥ ३ अहसर्वस्यजगतःप्रलयस्तथेत्यादिनासप्तमाध्यायादिषु ॥ ४ सत्यमित्यर्थः ॥ ५ वदसि ॥ ६ अचिंत्यशक्तिकम् ॥

॥ श्री० ॥ प्रकृतोपयोगाय भूतशब्दार्थमाह ॥ भूतमिति॥४॥५॥६॥ ७ ॥ ८ ॥ प्रकृतोपयुक्तमिति॥प्रकृतमहायोगेश्वरत्वोपपादकमित्यर्थः ॥ कृ० ॥तस्मात्परं भूतं नास्तीत्येतत्प्रमाण

ईश्वरस्यानिरतिशयसामर्थ्येप्रमाणमाह ॥नास्तीति ॥ भूतं समर्थम् ॥ प्रभुशब्दस्यसमर्थार्थत्वेऽभिधानमाह ॥ प्रभुरिति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

नास्ति तस्मात्परंभूतं पुरुषाद्वै सनातनादिति मोक्षधर्मे॥प्रभुरीशः समर्थश्चेत्याद्यभिधानम् ॥ ४॥५ ॥
॥ ६ ॥ ७ ॥८ ॥ हरिः सर्वयज्ञभागहारित्वात् ॥ इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम् ॥ वर्णो मे

श्रीभगवानुवाच॥पश्यमेपार्थरूपाणिशतशोऽथसहस्रशः॥नानाविधानिदिव्यानिनानावर्णाकृती
निच॥५॥पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा॥ बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत॥ ६ ॥
इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरम् ॥ ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥
नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा ॥ दिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरम् ॥ ८ ॥ संजय
उवाच ॥ एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः ॥दर्शयामासपार्थायपरमंरूपमैश्वरम् ॥ ९ ॥

हरितः श्रेष्ठस्तस्माद्धरिरिति स्मृत इति हि मोक्षधर्मे॥९॥

॥ ८ ॥ महायोगेश्वरोहरिरित्यत्रहरिशब्दस्यप्रकृतोपयुक्तमर्थमाह ॥ हरिरिति ॥ गेहेषु ॥

विरुद्धमित्यतोभूतशब्दान्तरमध्याहरति ॥ भूतं समर्थमिति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ प्रकृतोपयुक्तमिति ॥ वक्ष्यमाणार्थस्य महायोगेश्वरत्वोपपादकत्वादिति भावः ॥

१ प्रथमतः अनंतरम् ॥ २ उपलक्षणमभिमतानि ३ अप्राकृतानि ॥ ४ नानाविधत्वस्यविवरणम् नानाभूताःशुक्लादयःसंस्थानविशेषाश्च येषांतानीत्यर्थः ॥ ५ एकस्यैवरूपस्यानि त्यशःस्याविशेषवत्त्वेनचानंतरूपमसमुदायात्मकत्वंसूचयति अन्यथाएकरूपदर्शनप्रार्थनानुगुणत्वंस्यादितिभावः ॥ ६ पूर्वमदृष्टानि ॥ ७ अस्मिन्मदर्शनीयेमदीयेरूपे ॥ ८ एकदेशस्थितम् ॥ ९ अलौकिकम् ॥ १० ईश्वरमतमत्संबंधिसामर्थ्यम्॥

॥ श्री० ॥ इष्टीति ॥ इडोपहत इति नीणेपुस्तकपाठः ॥ उपहतमिति पाठे तु गेहेषु इष्टिगृहेषु क्रतुषु इडोपहूतं इडेति मंत्रविशेषाणां मंज्ञा तेषूपहूतं प्रतिपाद्यं भागम ॥ यद्वा इडा
ऽऽतुस्थमंधो भक्तमित्यन्ननामानीति वैदिकनिघंटुत्वादन्नमज्ञकं भागं अथवा इडा यज्ञस्तत्रोपहूतं दत्तमिति यावत ॥ भागं हरेयस्मात्तस्माद्धरिरित्यर्थः ॥ हरतेरिति ॥ हृञ् हरणे अस्मा
दिप्रत्यय लघूपधगुणे हरिरिति रूपम ॥ कथमयमर्थः प्रकृतमहायोगैश्वर्यत्वोपपादक इत्यत आह ॥ अप्राकृतेति ॥ ९ ॥ १० ॥ गतार्थत्वादिति ॥ आश्चर्यप्रचुरत्वं नाम बह्वाश्च
र्यवत्त्वं इदं न सर्वशब्देनैतल्लभ्यमतो मयट् व्यर्थ इत्यर्थः ॥ उक्तमेवेति ॥ त्रिभिर्गुणमयैरित्येतद्व्याख्यानावसर तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधेति सप्तमे प्रमाणमुक्तमेवेत्य
र्थः॥सर्वेति॥भाष्यस्य सर्वलोकेषु सर्वापेक्षया ये आश्चर्यभूता गुणास्तदात्मकमित्यर्थः॥११॥क०॥भाष्ये इडोपहूतमिति॥इडाः पक्वान्ननिर्वर्त्याः देवपितृमनुष्यभूतयज्ञाश्चत्वारः ॥ पाकयज्ञाः

इष्टिगृहेषु ॥ हरतेरिकारप्रत्ययः ॥ श्रेष्ठोऽप्राकृतः ॥ अप्राकृतविग्रहस्यसाकारस्यैवानंतपूजास्थानेषु स्वरूपेणैवयुगपत्सन्निधाने किं वक्तव्यंम
हायोगेश्वरत्वमिति ॥ ९ ॥ १० ॥ सर्वाश्चर्यमयमितिकेनचित्प्राचुर्यार्थो मयड्व्याख्यातः ॥ तदसत् ॥ सर्वशब्देन गतार्थत्वादितिभावेनाह ॥
सर्वेति ॥ मयटस्तादात्म्यार्थत्वेप्रमाणमुक्तमेव ॥ ११ ॥ दिवि सूर्यसहस्रस्येति विश्वरूपस्यसहस्रसूर्योपमप्रभत्वमुच्यते ॥ तत्रसहस्रशब्दोदशश

॥१०॥सर्वाश्चर्यमयम्॥सर्वाश्चर्यात्मकं॥११॥सहस्रशब्दोऽनंतवाची॥तदपि पाकशासनविक्रमइत्यादिवत्प्रत्यायनार्थमेव॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ॥ अनेकदिव्याभरणंदिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्यांबरधरंदिव्यगंधानुलेपनम् ॥ सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखम् ॥ ११ ॥ दिविसूर्यसह
स्रस्यभवेद्युगपदुत्थिता ॥ यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः ॥ १२ ॥

तदपीति ॥ प्रत्या
तवाचीति प्रतीतिनिरासार्थमाह ॥ सहस्रेति ॥ अनंतसूर्योपमप्रभत्वमपिभगवतो नत्वास्तवंनिरुपमत्वात् किंतर्हीत्यतआह ॥
यनार्थंबुद्धिप्रवेशनार्थमेवोच्यते॥यथाभगवतोदाशरथेः पाकशासनोपमपराक्रमत्वमित्यर्थः॥तासुपहूतं दत्तमित्यर्थः॥इडा यज्ञपात्रं तत्स्थमिति वा क्रतुशब्दोऽज्योति
ष्टोमादिवाची हरितशब्दः श्यामार्थ इति बोध्यम ॥ इकारप्रत्यय इति ॥ अचइदित्युणादिसूत्रेणेति शेषः॥ततः सार्वधातुकार्धधातुकयोरिति गुणे रपरत्वं चेति बोध्यम्॥प्रकृतोपयोगं दर्शय
ति ॥ अप्राकृतेति॥ ९ ॥ १० ॥ उक्तमेवेति ॥ त्रिभिर्गुणमयैरित्येतद्व्याख्यावसरे तादात्म्यार्थे विकारार्थे इत्यनेनेति शेषः ॥ ११ ॥ १२ ॥

---

१ अस्मिन्पक्षेगेहेषुगृहमेधिगृहादिष्वित्यर्थः ॥ २ अनेकाद्भुतानांदर्शनंयस्मिन् दर्शयामासेत्यनुवर्तते ॥ ३ हृदानादनयोरितिधातोरितिभावः ॥

॥ श्री० ॥ न सिध्यतीति ॥ विशिष्टाविकारिणमित्यर्थः ॥ कुतो महत्प्रयोजनं सिध्यतीति वर्तते इत्यादौ ॥ द्वित्र्यादिसंख्यायाम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

सहस्रशब्दस्यप्रसिद्धार्थपरित्यागः कुतइत्यतआह ॥ तथाहीति ॥ ततस्ततःसूर्यादेरपि विलक्षणइतिशेषः ॥ कुतःश्रुत्यागीतावाक्यस्यबाधइतिचेत्॥शतंसहस्रमितिअपारिमितनामानीतिगीतावाक्यस्य सावकाशत्वेन दौर्बल्यात्॥श्रुतेर्निरवकाशत्वेन प्राबल्यात्॥इतश्चश्रुतेःप्राबल्यमित्याह ॥महातात्पर्याच्चेति॥समस्तागमानांमहाप्रयोजनाय यद्भगवतिमहातात्पर्यं श्रुतेस्तदानुकूल्याद्गीतावाक्यस्य तत्प्रातिकूल्यादित्यर्थः॥कथंगीतावाक्यस्यतत्प्राति

तथा हि ऋग्वेदखिलेषु ॥ अनंतशक्तिः परमोऽनंतवीर्यः सोऽनंततेजाश्च ततस्ततोऽपीति महातात्पर्या

तत्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा॥अपश्यद्देवदेवस्यशरीरेपांडवस्तदा॥१३॥ततःसविस्मयाविष्टोहृष्टरोमाधनंजयः॥प्रणम्यशिरसादेवंकृतांजलिरभाषत॥१४॥अर्जुन उवाच॥पश्यामिदेवांस्तव देव देहेसर्वांस्तथा भूतविशेषसंघान् ॥ ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान्॥१५॥

च्च प्राबल्यं न च परिमाणोक्त्या किंचित्प्रयोजनम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

कूल्यमिति चेत्॥किंभगवतः परिमितप्रभत्वमेववस्तुनः ॥ उतापरिमितप्रभस्याप्यत्रसहस्रसूर्योपमप्रभत्वमुच्यते ॥ नाद्यःसकलश्रुतिस्मृतीतिहासपुराणविरोधात् ॥ द्वितीयेत्वपरिमितस्यपरिमाणोक्त्या किंचिदपिप्रयोजनंनसिध्यति ॥ कुतोमहदित्यत आह ॥ नचेति ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

१ पौरुषेयापौरुषेययोर्वाक्ययोर्मध्येऽपौरुषेयस्यप्राबल्याच्च कर्तव्यं इतीर्निर्णयम् ॥ भाष्योपक्रमे आचार्यैरष्टाक्षरकल्पस्कांदवचोभ्यां भारतस्यवेदादधिकप्रतिपादनाद्वारेऽपिगीतायाउत्तमत्वस्यभारतेगीतिकावरेतिमहाकौर्मवचसाऽभिधानाच्छंकोत्थितिगिनिज्ञेयम्॥ २ भगवद्विषयेदेहशरीरशब्दौनयौगिकौकेवलरूढ्यारूपवाचिनौ॥ ३ दर्शनानंतरम्॥ ५ चतुर्मुखांकस्थित॥ ४ रुद्रम्॥

॥ श्री० ॥ ननु सर्वतः पाणिपादं तदित्यादौ अनंतबाह्वाद्यप्रतिपादनात् कथमुदाहरणमित्यत आह ॥ सर्वत इत्यस्योति ॥ सर्वतः पाणिपादादिर्यतः पाण्यादिशक्तिमान् ॥ केशादिष्वपि सर्वत्र कृष्णकेशो हि यादवः ॥ अणोरणुतरै रूपैः पाणिपादादिसंयुतैः ॥ सर्वत्र संस्थितत्वाद्वा सर्वतः पाणिपादवानिति तात्पर्यनिर्णयेऽवगंतव्यः ॥ इतरेति ॥ अप्रधानेत्यर्थः धमा शब्दाग्निसंयोग इति धातुव्याख्यानमभिप्रेत्याह ॥ अग्न्यादीति ॥ अनेन द्यावाभूमी जनयन् सन् तदर्थं त्रिवृत्करणं करोतीत्यर्थ उक्तो भवति॥ प्रत्येकमिति ॥ बाहुभ्यां संधमति पतत्रैः संधमतीति प्रत्येकमित्यर्थः ॥ समित्युपसर्गद्वयसद्भावादिति भावः ॥ अयमेवेति ॥ संधमतीत्यस्य योऽर्थ उक्तः अयमेवार्थः धातूनामनेकार्थत्वात् ॥ समित्युपसर्गवल्लाच्चोपसर्गाणां क्वचित् धात्वर्थबाधकत्वात् ॥ धात्वर्थं बाधते कश्चिदिति वचनादिति भावः॥क०॥तात्पर्यनिर्णय इति॥सर्वतः पाणिपादादिर्यतः पाण्यादिशक्तिमान् ॥केशादिष्वपि सर्वत्र कृष्णकेशो हि यादवः॥

अनेकबाहूदरवक्त्रनेत्रमित्यत्रानेकशब्दस्य द्व्यादौ पर्यवसानात् विवक्षितमर्थमाह ॥ अनेकेति ॥ अनेनानेकवक्त्रनयनमित्यपि व्याख्यातम् ॥ कुत एतदित्यत आह ॥ अनंतेति ॥ सर्वत इत्यस्यार्थस्तात्पर्यनिर्णयेऽवगंतव्यः ॥ इत्यादि च वक्ष्यति ॥ बाहुभ्यां प्रधानाभ्यां पतत्रैः पतत्र

अनेकशब्दोऽनंतवाची अनंतबाहुमिति वक्ष्यति ॥ सर्वतः पाणिपादं तदित्यादि च ॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्॥संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एक इति

अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वां सर्वतोऽनंतरूपम् ॥ नांतंनमध्यंन पुनस्तवादिं पश्यामिविश्वेश्वरविश्वरूप ॥ १६ ॥

ऋग्वेदखिलेषु ॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ॥ संबाहुभ्यां नमति संपतत्रैर्द्यावाभूमी जनयन्देव एक इति यजुर्वेदे च ॥

सदृशैरितरबाहुभिः संधमति अग्न्यादिभूतानि संयोजयतीति प्रत्येकमन्वयः॥संनमतीत्यस्याप्ययमेवार्थः॥अणोरणुतरै रूपैः पाणिपादादिसंयुतैः ॥ सर्वत्र संस्थितत्वाद्वा सर्वतः पाणिपादवानित्यत्रेत्यर्थः ॥ धमाशब्दाग्निसंयोगयोरित्युक्तेऽर्थेत्वर्थान्तरमाभिपदमुपलक्षकम्॥अंतर्भावितण्यर्थश्च धातुरितिभावेन व्याचष्टे॥ अग्न्यादीति ॥ अनेन भूम्यादि जननार्थं त्रिवृत्करणं करोतीत्युक्तं भवति ॥ समित्युपसर्गद्वयश्रवणात्तदनुरोधेनाह॥ प्रत्येकमिति॥ बाहुभ्यां संधमति पतत्रैः संधमतीति प्रत्येकमित्यर्थः॥ आवृत्त्यैवोपसर्गस्य क्रियाद्वित्त्वंभविष्यतीत्युक्तेरिति भावः ॥ एवमेवार्थ इति ॥ धातूनामनेकार्थत्वादिति भावः ॥

॥ श्री० ॥ प्रथमार्थ इति ॥ तथा च विश्वमनंतं चक्षुर्यस्यासौ विश्वतश्चक्षुरित्यादिरर्थो द्रष्टव्यः ॥ अन्यथा ॥ परममहत्परिमाणाभावे ॥ तदयोगात् ॥ अनंतबाह्वादित्वायोगात् तत ॥ परममहत्परिमाणम् ॥ अवच्छेदकेति ॥ मेरुहिमवदादिमहत्त्ववत् महत्त्वमिनीयत्तारूपावच्छेदकस्यात्र श्रवणेनावांतरमहत्त्वग्रहणासंभवादित्यर्थः ॥ तत्रेति ॥ अनादिमत्परमित्यादौ सर्वमावृत्य तिष्ठतीति परममहत्त्वस्य सर्वशब्दस्यानंतार्थत्वेन सर्वतः पाणिपाद तदित्यनंतावयवत्वस्य चोक्तेरित्यर्थः ॥ कृ० तत्रेति ॥ बहिरंतश्च भूतानामिति परममहत्त्वस्य सर्वतः पाणिपादं तदित्यादिनाऽ

एतयोर्मंत्रयोः प्रकृतानुपयोगादयुक्तमुदाहरणमित्यत आह ॥ विश्वशब्दश्चेति ॥ तथा च प्रथमार्थे तसिरित्युक्तं भवति ॥ स्पष्टार्थी चात्र श्रुतिमाह ॥ अनंतपादमिति ॥ यदि भगवाननंतबाह्वादिस्तदा परममहत्परिमाणः स्यात् ॥ अन्यथा तदयोगात् ॥ न च तद्युक्तम् ॥ रूपं महत्त इति महत्त्वमात्रोक्तेः ॥ तथा बहुवक्त्रनेत्रमिति बहुत्वमात्रोक्तेरनंतबाह्वादित्वोक्तिश्चानुपपन्नेत्यत आह ॥ महत्वादीति ॥ स्यादयं विरोधो यदि भगवद्रूपस्य महत्त्वमात्रं तदवयवानां च बहुत्वमात्रमुच्येत ॥ नचैवम् ॥ अवच्छेदकाश्रवणात् महत्त्वबहुत्वोक्तिस्तु परममहत्त्वात्मकत्वेनानंतावयत्वेन च सह संभवति ॥ परममहति महत्त्वस्यानंते बहुत्वस्यांतर्भावादित्यर्थः ॥ अवच्छेदकानुक्तावप्यवांतरमहत्त्वादि

॥ विश्वशब्दश्चानंतवाची ॥ सर्वं समस्तं विश्वं च अनंतं पूर्णमेवचेत्यभिधानात् ॥ अनंतबाहुमनंतपादमनंतरूपं पुरुवक्त्रमेकमिति चवाश्वव्यशाखायां ॥ महत्त्वाद्युक्तिस्तु तदात्मकत्वेनापि भवति ॥ अन्यथा अनादिमत्परं ब्रह्मेत्याद्ययुक्तं स्यात् ॥ एकत्र त्वनंतान्यस्य रूपाणीत्यनंतरूपः ॥ अन्यत्र त्वपरिमाण इति ॥ उक्तं ह्युभयमपि ॥ परात्परं यन्महतो महांतं यदेकमव्यक्तमनंतरूपमितियजुर्वेदे

ग्रहणे को दोष इत्यत आह ॥ अन्यथेति ॥ तत्र परममहत्त्वस्यानंतावयत्वस्य चोक्तेरिति भावः ॥ पश्यामि त्वा सर्वतोऽनंतरूपं त्वया ततं विश्वमनंतरूपेत्यनंतशब्दद्वयस्य माहात्म्यातिशयसूचनायार्थभेदमाह ॥ एकत्र त्विति ॥ अपरिमाणोऽपरिच्छिन्न इत्यनंतरूपइति संबंधः ॥ स्यादिदं व्याख्यानं यदीदं द्वयं प्रामाणिकं स्यादित्यत आह ॥ उक्तं हीति ॥ महांतं महत् ॥ महतो महांतमित्यनंतमपरिच्छिन्नपरिमाणं रूपमस्येत्युक्तार्थे प्रमाणम् ॥ एकम् भिन्नमपि अनंतरूपमित्यनंतसंख्यान्यस्य रूपाणीत्यत्र ॥

नंतावयवत्वस्य चोक्तेरित्यर्थः ॥ परिमाणमात्रशून्यत्वे परममहत्त्वोक्तिविरोध इत्यत आह ॥ अपरिच्छिन्न इति परिमाणशब्दोऽभावसाधन इति भावः ॥ यदिति क्लीबत्वोपपत्त्यर्थमाह ॥ महदिति ॥

॥ श्री० ॥ **प्रमाणेति** ॥ प्रत्यक्षेत्यर्थः ॥ **तथात्वेनेति** ॥ घटादेः पृथुबुध्नोदराकारवत्त्वेनेत्यर्थः ॥ **तथेति** ॥ एवं प्रकृतेऽपि न भवति चेश्वरो निर्दुःखो दुःखीत्युभयधर्मवान् दुःखस्य प्रमाणविरुद्धत्वात् तथा च विरुद्धपरिमाणद्वयोपेतोऽपि न भवतीति विपर्ययपर्यवसानं गुणाः श्रुता इत्यादिप्रमाणविरोधेनायुक्तं तथात्वेन धर्मिग्राहकमानासिद्धत्वादित्यर्थः ॥ एतेन ॥ धर्मिग्राहकमानविरोधेन ॥ **अनुमानानां** ॥ द्रव्यत्वाल्पपरिमाणत्वादीनाम् ॥ **अत्रापीति** ॥ अत्राप्यविशेषमाश्रित्य हि अतिप्रसंगो वाच्यः नचासौ संभवति ॥ ईश्वरे विरुद्धपरिमाणद्वयसंभावकाचिंत्यशक्तेर्भावात् ॥ प्राणादौ च तदभावादित्यर्थः ॥ सुविरुद्धाश्चेति चशब्दाभिप्रायमाह ॥ **अविरुद्धाश्चेति** ॥ तमेव क्रमं दर्शयति ॥ उत्तमेष्वित्यादिना ॥ नहीति ॥ अपरिच्छिन्नपरिमाणोक्तेरुपचरितत्वम् ॥क० ॥ ननु विरोधस्य सहानवस्थानरूपत्वादीश्वरनिष्ठत्वेऽनिरुद्धत्वं कथमित्यत आह ॥ **अन्यत्र सहादृष्टा इति** ॥ चशब्दार्थमाह ॥ अविरुद्धाश्चेति ॥

विपर्ययापर्यवसायी चायं प्रसंग इतिभावेनाह ॥ न हीति ॥ यदि घटः पृथुबुध्नोदराकारः स्यात्तर्हि पदार्थो नस्यात् ॥ तथाविधस्य पदार्थस्य कस्याप्यदृष्टत्वादिति प्रसंगो यथा न युक्तः ॥ भवति च पदार्थस्तस्मात्पृथुबुध्नोदराकारो न भवतीति विपर्ययस्य प्रमाणबाधितत्वेनापर्यवसानात् ॥ तथात्वेन तस्य धर्मिग्राहकप्रमाणदृष्टत्वात् ॥ तथा प्रकृतेऽपीति ॥ एतेनानुमानानां कालात्ययापदिष्टत्वं चोक्तं भवति ॥ प्राणादिकमधिकृत्यातिप्रसंग इति द्वितीयं निराकरोति ॥ केषुचिदिति ॥ अत्रापि संभावनाहेतुमात्राभावाभ्यां विशेषादविशेषोऽसिद्ध इति भावः ॥

न हि घटवत्कश्चित्पदार्थो न दृष्ट इत्येतावता प्रमाणदृष्टः सन्निराक्रियते ॥ केषु चित्पदार्थेषु वाक्यव्यवस्था अचिंत्यशक्तित्वाभावादंगीक्रियते ॥ गुणाः श्रुताः सुविरुद्धाश्च देवे संत्यश्रुता अपि नैवात्र शंका॥ चिंत्या अचिंत्याश्च तथैव दोषाः श्रुताश्चनाज्ञैर्हि तथा प्रतीताः ॥ एवं परेऽन्यत्र श्रुताश्रुतानां गुणागुणानां च क्रमाद्व्यवस्थेति च जाबालखिलश्रुतेश्च ॥

चतुर्थं निरस्यति ॥ गुणा इति ॥ श्रुता अश्रुता अपि सुविरुद्धा अन्यत्र सहादृष्टा अविरुद्धाश्च॥तथा गुणा इवदोषाः॥श्रुताअश्रुताश्च नैवसंति ॥किंत्वज्ञैर्मिथ्यादृष्टिभिर्हि तथा संतीति प्रतीताः॥एवं परे ईश्वरे स्थितिस्ततोऽन्यत्र तु श्रुतानां प्रमाणांतरसिद्धानां चगुणदोषाणां व्यवस्थाऽवस्थानम् ॥ तच्च क्रमादुत्तमेषु गुणबाहुल्यं दोषाल्पत्वं मध्यमेषूभयसाम्यम् ॥ अवरेषु दोषबाहुल्यं गुणाल्पत्वमिति ॥ तदेवमसंभावनाद्यभावान्न भगवति अपरिच्छिन्नपरिमाणत्वोक्तेरुपचरितत्वं कल्प्यम् ॥

श्रुताश्रुतानामित्यत्राश्रुतपदं पर्युदासगर्भत्वान्नञ्विग्रुक्तन्यायेनश्रुतभिन्नतत्सदृशार्थकम् ॥ ततश्च प्रमाणांतरसिद्धत्वलाभ इति भावेनाह ॥ **प्रमाणांतरसिद्धानांचेति** ॥ केषु चिद्गुणा एव केषु निर्दोषा एवेति विभागार्थत्वं व्यवस्थाशब्दस्यायुक्तम् ॥ देवादिष्वपि दोषदर्शनादित्यत आह ॥ **अवस्थानमिति** ॥

॥ श्री० ॥ **अपनेयेति** ॥ अत्र आ अ इति विरुद्धोपसर्गद्वयं न विवक्षितं अनेया या न भवतीत्यर्थस्याचिंत्या इति प्रमाणेनैव लब्धत्वादतोपनेयेत्येवोक्तम् ॥ **प्राणादयोऽपि तथा स्यु** रिति ॥ विरुद्धपरिमाणद्वयोपेताः स्युरित्यर्थः ॥ तथा च यदीश्वरो विरुद्धपरिमाणद्वयोपेतः स्यात् तदा प्राणादयोऽपि तथा विरुद्धपरिमाणद्वयोपेताःस्युर्नचेष्टापत्तिस्तथात्वेप्राणएवाधस्तात्प्राणउपरिष्टादित्यादिमहत्त्वप्रतिपादकवाक्यस्य अणुनैतत्सृज्यतेअणुनैतद्धार्यतप्राणो वा अणुरित्यणुत्वप्रतिपादकवाक्यस्य परस्परविरोधपरिहाराय स वा एष प्राणोऽणुर्महान्नामांतर्वाणुर्बहिर्महानिति विरुद्धपरिमाणद्वयप्रतिपादकवाक्ययोर्या व्यवस्थाऽणुश्चेति सूत्र कृता सा नांगीक्रियेतेति भाव.॥**अविशेषामिति**॥समानन्यायादित्यर्थः॥यत्रेश्वरस्य विरुद्धपरिमाणद्वयोपेतत्वं तत्र विरुद्धानिर्दुःखोपेतत्वमिति विशेषतो व्याहृयभावादिति भाव.॥**तद्विरोधात्**॥महातात्पर्यविरोधात्॥**तदविरोधात्**॥महातात्पर्याविरोधादित्यर्थः ॥ तदुभयं क्रमेणोपपादयति॥**दुःखादेरिति** ॥ वक्ष्यमाणवाक्येति॥गुणाः श्रुता इति वाक्येत्यर्थः ॥ रु० ॥ आ अ इत्युपसर्गद्वयमित्याभिप्रेत्याह ॥ **अपनेयेति** ॥ **वाक्यव्यवस्थेति** ॥ प्राण एवाधस्तात्प्राण उपरिष्टादिति ॥

अथातिप्रसंगदुष्टत्वं किं वाऽप्रामाणिकत्वम् ॥ नाद्य इत्याह ॥ नचेति ॥ अघटितघटनाशक्त्युपेते किं नामासंभावितमिति भावः॥ न द्वितीयः ॥ ईश्वरस्य युक्त्यगोचरत्वेन तदनवकाशादिति भावेनाह ॥ अचिंत्या इति ॥ एषा ब्रह्मविषया ॥ अपनेया निराकार्या ॥ अतिप्रसंगोऽपि किंयदीश्वरो विरुद्धपरिमाणद्वयोपेतः स्यात् तदानिर्दुःखो दुःखीस्यादितीश्वरमधिकृत्य स्यात ॥ उत प्राणादयोऽपि तथास्युः॥तथाचाणुश्चेत्या

न चैतदयुक्तम् ॥ अचिंत्यशक्तित्वादीश्वरस्य ॥अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति च श्री विष्णुपुराणे॥नैषा तर्केण मतिरापनेयेति श्रुतिः॥अतिप्रसंगस्तु महातात्पर्यवशात् वाक्यबलाच्चापनेयः॥

दिका तद्विषयवाक्यव्यवस्था नांगीक्रियेतेत्यन्यदधिकृत्य स्यात् ॥ आद्यं दूषयति ॥ अतिप्रसंगस्त्विति ॥ अविशेषमाश्रित्य ह्ययमतिप्रसंगः॥ न चासावस्ति निर्दोषानंतगुणत्वे हरेः श्रुतीनां महातात्पर्येण दुःखादेस्तद्विरोधात्परिमाणद्वयस्य तु तदविरोधात् दुःखादेरप्रामाणिकत्वात्परिमाणद्वयस्य तूक्तवक्ष्यमाणवाक्यसिद्धत्वादिति भावः ॥

अणुनैतत्सृज्यतेऽणुनैतद्धार्यत इति च वाक्यो महाणुत्वप्रतिपादकवाक्ययोः स वा एष प्राणोऽणुर्महानन्तर्वाणुर्बहिर्महानिति वाक्ययोर्या व्यवस्था कृता सा न स्यादित्यर्थः ॥

---

१ अ.२ पा.४ अ.९ सू. १ श्रेष्ठशब्दवाच्ये मुख्यप्राणेऽणुत्वानित्वे अंतरणुर्बहिर्महानिति रूपभेदेनेति नःश्रुतिविरोधइतितदर्थः ॥२ लोकप्रसिद्धदार्थानांहरेश्चेतिशेषः ॥

॥ श्री० ॥ **परमात्मेति** ॥ पुनरुक्तिपरिहारायाह ॥ **अनंतस्येत्यादिना**॥ अवनत इति ॥ तथा च गर्भजगत' कृष्णस्यातिभारेणावसन्नश्चासौ पार्ष्णिप्रहारपरिरुग्णफणातपत्रश्च तमिति
विग्रहः द्वितीयायाः दृष्ट्वाहिराजमुरमेदुरमुच्य इत्युत्तरार्भेणान्वयः॥शंकते॥कृष्णादीनामिति॥क्रियादेरिति ॥ अल्पपरिमाणोपेते मूर्त एव क्रियायाः सत्यत्वेनापरिच्छिन्नप्रमाणेऽमूर्तेक्रिया
या गगनादाविवायोगेन कृष्णादेर्विभुतोऽपरिच्छिन्नपरिमाणत्वे परिदृश्यमानक्रियाया भवन्मते मिथ्यात्वं स्यात्तच्चानिष्टं भवतामिति भावः ॥ कृ० ॥ अपरिमितद्रव्यस्य निरवयवत्वानियमा

अत्र प्रमाणमाह ॥ असंख्याता इति ॥ ज्ञानकाः ज्ञानानंदात्मकाः ॥ अयं वहिर्व्याप्त आकाशः परमात्मा यावान् यावत्परिमाणस्तावानेवैषो
ऽन्तर्हृदयेस्थितः परमात्मेत्यर्थः गर्भे जठरे जगद्यस्यासीत्तथोक्तः ॥ अवसन्नोऽवनतः॥ गर्भजगत्त्वेनापरिच्छिन्नपरिमाणत्वं लभ्यते॥ कृष्णादीना
मप्यपरिच्छिन्नपरिमाणत्वं वदंतो वक्तव्याः ॥तत्राल्पपरिमाणप्रतीतिर्या सा किं भ्रांतिरुतप्रमितिरिति॥ आद्ये क्रियादेर्द्विभुजचतुर्भुजादेश्च मिथ्या

असंख्याता ज्ञानकास्तस्य देहाः सर्वे परिमाणविवर्जिताश्चेत्यृग्वेदखिलेषु ॥ यावान्वा अयमाकाश
स्तावानेषोंतर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अंतरेव समाहिते ॥ उभावग्निश्च वायुश्च सूर्या
चंद्रमसावुभाविति च॥कृष्णस्य गर्भजगतोऽतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफणातपत्रमिति च भागवते

त्वं स्यात् ॥ न द्वितीयः युगपदेकत्राल्पानल्पपरिमाणसमावेशस्यायुक्तत्वात् ॥अतोऽपरिच्छिन्नपरिमाणोक्तिरुपचारमात्रमिति चेत् ॥ किमिदम
नेकपरिमाणत्वस्यायुक्तत्वं किमन्यत्रादर्शनेनासंभावितत्वम् ॥ उत नायमल्पानल्पपरिमाणोपेतो द्रव्यत्वात् ॥ नायं परममहत्परिमाणोऽल्पपरि
माणत्वात्पटवदित्यादियुक्तिविरुद्धत्वम्॥ दिति चेन्न॥अपरिमितद्रव्यस्य विभिन्नावयवाभावेननिरंशत्वेऽप्यभिन्नावयवसत्त्वेनैकदेशेन प्रवृत्तिसंभवात् तस्यैकदेशस्यांशयभिन्नत्वेन
पुनःकार्त्स्न्यपक्षोक्तदोषस्याघटितघटकेश्वरशक्त्यैव परिहार्यत्वात् ॥ यथोक्तम्॥ अपरिमितस्य कृत्स्नैकदेशाविकल्पानुपपत्तेश्च ॥ अस्माकं त्वीश्वरशक्त्यैवोपपद्यत इति॥ इदमपि व्यक्तितः
परममहत्त्वे ज्ञापकम् ॥ राशितो व्याप्तत्वे एकदेशप्रवृत्तिसंभवेनेश्वरशक्त्युपयोगाभावात् ॥ न च प्रकृतेः सूक्ष्मत्वोक्तिविरोधः ॥ महदादिसूक्ष्मविषयत्वात् ॥ मूलप्रकृतिविवक्षायां अप्रति
पद्यत्वेनोपपत्तेश्च ॥ न च लिंगदेहस्य षोडशकलात्मकत्वविरोधः ॥ एकत्वे षोडशत्वाभावादिति वाच्यम् ॥ तासां कलानां मूलप्रकृतिभिन्नेंद्रियादिसूक्ष्मजातीयत्वात् ॥ न च तत्वसूक्ष्माणां
मूलप्रकृतिभिन्नत्वे मानाभावः ॥ सूक्ष्मरूपेण नित्यानां महदादीनां प्राकृताद्यंशरूपत्वमात्रं क्रियत इति तत्त्वसंख्यानटीकोक्तेरेव मानत्वादित्यलम् ॥ शंकते ॥ **कृष्णादीनामपीति** ॥
क्रियादेरिति ॥ आदिपदेन वेगादिगुणग्रहः ॥ **इत्यादियुक्तीनि**॥ नायमल्पपरिमाणः परममहत्त्वादितियुक्तिरादिशब्दग्राह्या

॥ श्री० ॥ अव्यक्तव्यापित्वेति ॥ यदेकमव्यक्तमित्यव्यक्ताभेदव्यपदेशस्य तद्व्यापित्वाभिप्रायकत्वादित्यर्थः ॥ तत्साम्यमव्यक्तसाम्यम् ॥ संख्येति ॥ अव्यक्तकार्याण्येतावंतीति संख्यापरिमितिरित्यर्थः ॥ अंतरिक्षस्य आकाश इत्यत्राकाशशब्दार्थः ॥

ननु महतो महांतमिति महत्त्वान्महत्त्वमेवोच्यते॥ न त्वनंतत्वम् ॥ ततश्चयदेकमव्यक्तमित्यव्यक्तव्यापित्ववचनात्तत्साम्यमेव सिध्यतीत्यत आह ॥ अव्यक्तस्येति ॥ महतो महत्त्वेऽव्यक्तव्यापित्वे चेत्यपि ग्राह्यम् ॥ अव्यक्तस्यानंतत्वं कुत इत्यत आह ॥ महांतं चेति ॥ अनंतस्य विष्णोः

अव्यक्तस्यानंतत्वादेव महत्त्वे अपरिमितत्वं सिध्यति ॥ महांतं च समावृत्य प्रधानं समवस्थितं ॥ अनंतस्य न तस्यांतः संख्यानं चापि विद्यत इत्यादित्यपुराणे॥तानि चैकैकानि रूपाण्यनंतानीति चैकत्र भवति ॥

प्रतिमाभूतस्य तस्यांतःपरिमाणं परिच्छेदः कार्यतः संख्यानं संख्यापरिच्छेदोऽपि न विद्यते॥प्रकारांतरेणानंतरूपशब्दद्वयस्यार्थभेदमाह॥तानि चेति॥एकस्यानंतरूपशब्दस्यानंतसंख्यारूपार्थत्वेऽस्थिते सत्येकत्रानंतरूपशब्दे तानि चानंतसंख्यानि रूपाणि प्रत्येकमपरिच्छिन्नपरिमाणानीत्यर्थो भवतीत्यर्थः॥

॥ कु० ॥ ननु महत्त्वान्महत्त्वोक्त्याऽव्यक्तसाम्यमेव हि सिध्यतीति कथमव्यक्तापेक्षया न्यूनाधिकभावस्यापि संभवादित्यत उक्तम्॥अव्यक्तव्यापित्वस्य वचनादिति॥तथा च श्रुतावव्यक्तपदं तद्व्याप्यर्थकं सर्वं खल्विदं ब्रह्मेति वदतीति भावः महतो महत्त्वमात्रेणापरिमितत्वसिद्ध्यभावादाह ॥अव्यक्तव्यापित्वे चेत्यपीति ॥ अनंतस्यतस्यांतोनेति साध्याविशिष्टमित्यत आह ॥ विष्णोः प्रतिमाभूतस्येति ॥ अतो नाशो नेति व्याख्यानं प्रकृतानुपयुक्तमित्यत आह ॥ परिमाणपरिच्छेद इति ॥ ननु प्रधानस्याजामेकामित्येकत्वोक्तेः कथं संख्यानं न विद्यत इत्युच्यत इत्यतोऽध्याहृत्य व्याचष्टे ॥ कार्यत इति ॥ अनेनाव्याकृताकाशवदेव मूलप्रकृतेः परममहत्त्वमेकत्वं चेति सूचितम् ॥ तेन राशिरूपेण व्याप्तत्वमेकत्वं च व्यक्तिरूपेण तु संख्यानंत्यमणुत्वं चेत्यपास्तम् ॥ व्यक्तितःसंख्याऽनंत्यं कार्यत इति शेषकर्मव्यख्यानं ॥ उक्तं चाव्याकृताकाशादिवद्व्याप्तत्वं समयपादीयसुधायां न केवलं ... काशाकाशस्येव परिमाणोत्कर्षापकर्षयोरानंत्यमस्ति॥ किं तु प्रकृत्यादौ सर्वगते परममहति द्रव्यांतरेऽपीति ॥ प्रकृत्य तत्रैव टीकायां तृतीयाध्यायेमूलप्रकृतेरेकत्वादित्यादिनोक्तम् ॥ किं च राशिव्यक्तिरूपाभ्यां व्याप्तत्वाणुत्वोक्तौ राशौ व्याप्तत्वमेव व्यक्तौत्वणुत्वमेवेत्युपयानं यमुक्तं स्यादित्यनुव्याख्यानविरोधः॥तत्र तस्मिन्नेव परिमाणोत्कर्षापकर्षानंत्यप्रतिपादनात् ॥न च राशिव्यक्त्योरत्यंताभेदेनान्योन्यधर्मसमावेशान्न विरोध इति वाच्यम्॥तथा सत्यव्याकृताकाशवदेव व्याप्तत्वाणुत्वप्राप्त्या नाममात्रे विवादपरिशेषापत्तेः ॥तयोर्भिन्नाभिन्नत्वोपगमेनान्योन्यधर्मसमावेशोक्तौ च तंतुपरिमाणस्यापि पटे सत्वप्रसंगात् ॥ नन्वपरिमितप्रधानस्यादिकार्यजनने कार्त्स्न्येन प्रवृत्तौ आदिकार्यस्याप्यपरिमितत्वापातः एकदेशेन तु न प्रवृत्तिः ॥

॥ श्री० ॥ **आद्यंताभावोक्तेः** ॥ परिच्छिन्नपरिमाणाभावोक्तेः ॥ **न मध्यमिति** ॥ मध्यशब्दस्यापि मध्यमपरिमाणरूपपरिच्छिन्नपरिमाणार्थकत्वेन पुनर्न मध्यमिति पुनःपरिच्छिन्न परिमाणाभाववचनमपचारत्वपरिहारायैव द्विरुक्तेरादरार्थत्वदर्शनादित्याशयः ॥ **मध्योति** ॥ मध्यावस्थेत्यर्थः ॥ **तदभावोक्त्या** ॥ आद्यंताभावोक्त्यैव ॥ तदभावसिद्धेः ॥ तन्निरूपितम ध्यावस्थाभावसिद्धेः ॥ नन्वनंतरूपमिति पूर्णरूपत्वोक्तेर्विश्वरूपमिति पुनरुक्तिरित्यतोऽन्यतात्पर्यभावज्ञापनायाभ्यासरूपमिति तात्पर्यं हृदि निधायाह ॥ **एतच्चेति** ॥ १६ ॥ **सहस्रश** ब्दः ॥ दिवि सूर्यसहस्रस्येत्यत्र स्थितः ॥ **प्रत्यायनार्थं** ॥ बुध्यारोहार्थं ननु भगवतोऽप्रमेयत्वोक्त्या कथं द्युतेर्मितत्वशंकापरिहार इत्यत आह॥**एतच्चेति** ॥ अप्रमेयत्वरूपविशेषणं अन लार्कद्युतिरूपविशेषणविशिष्टस्य भगवतो विशेषणं भवत् विशेष्ये वैयर्थ्याद्व्यवधानाद्विशेषणे भगवत्या संबध्यते एवं चोक्तशंकापरिहार इत्यर्थः ॥ १७ ॥ क्रु० ॥ ननु अनंतरूपमितिपूर्णरूपत्वो

अर्जुनेनापि तन्निराकृतमिति भावेनाह ॥ उपचारत्वेति ॥ नांतं न पुनस्तवादिं पश्यामीत्याद्यंताभावोक्तेरुपचरितत्वपरिहाराय नमध्यमित्युक्तम् मध्यनिराकरणार्थमेव तर्हि न स्यादित्यत आह ॥ अन्यथेति ॥ उपचारत्वपरिहारार्थत्वाभावे ॥ तद्व्यर्थं स्यादिति शेषः॥कुतः॥ आद्यंतसा पेक्षत्वात् मध्यस्य तदभावोक्त्यैव तदभावसिद्धेः ॥ विश्वंमहदादिकं रूपं स्वरूपमस्येति प्रतीतिं सप्रमाणकं निवारयति ॥ विश्वरूप इति॥

उपचारत्वपरिहाराय न मध्यमिति ॥ अन्यथा आद्यंताभावेनैवतत्सिद्धेः ॥ विश्वरूपः पूर्णरूपः

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतोदीप्तिमंतं ॥ पश्यामि त्वां दुर्निरीक्ष्यं समंता द्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

स विश्वरूपो अनूनरूपो अतो यं सोऽनंतरूपो न हि नाशोऽस्ति तस्येति शांडिल्यशाखायाम् ॥१६॥

अनलार्कद्युतिमित्युक्ते मितत्वशंकामपाकरोति ॥ अप्रमेयमिति ॥ १७॥

एतच्चाभ्यासरूपमिति मंतव्यम् ॥ १६ ॥ नन्वनलार्कद्युतिमित्युक्तत्वात् सहस्रशब्दोऽनंतवाचीत्याद्युक्तमयुक्तमितिचेत्न ॥ एतदेवाशंक्य प्र त्ययनार्थमेवैतदुक्तम् ॥ वस्तुतस्त्वपरिच्छिन्नद्युतिरेव भगवानिति स्वयमेवोक्तत्वादित्याह ॥ अनलेति ॥ इत्युक्तेजातां द्युतेर्मितत्वशंकाम् ॥ एतच्च सविशेषणविशेषणत्वात् द्युत्या संबध्यते ॥ १७ ॥ कैः पुनरुक्तिरित्यत आह ॥ **एतच्चाभ्यासरूपमिति** ॥ पूर्णत्वे तात्पर्यद्योतकोऽभ्यासोऽयम् ॥ततो न पुनरु क्तिरिति भावः॥ १६॥नन्वप्रमेयमिति विश्वरूपस्यैवाप्रमेयत्वमुच्यते न तु द्युतेरिति कथंतेन द्युतेर्मितत्वशंकानिरास इत्यत आह ॥ **एतच्चेति**॥सविशेषणेहीति न्यायादिति भावः ॥ १७ ॥

॥श्री०॥१८॥अन्यथा व्याख्यानमिति ॥शशिसूर्ययोरेव नेत्रत्वोक्तेर्विश्वंरूपं यस्येत्येव विश्वरूपशब्दस्य व्याख्येयतया पूर्णरूप इत्यन्यथा व्याख्यानं कथमित्यर्थः ॥ अविभक्तिके ति ॥ यस्मात्सुरादयस्त्वदंगजातास्तस्मात्तदंगेति देवाः स्तुता. तदंगा इति स्तुता इत्यर्थः ॥ संबुद्धिर्वेति ॥ तथा च तदंगजत्वादृषिभिः हे तदंगेति देवाः स्तुता इत्यर्थः ॥ संबुध्येकवचनदे वसमुदायापेक्षयेति ज्ञेयम् ॥ नेत्राश्रयत्वादित्यादिपदेन तज्जन्यत्वं ग्राह्यम ॥ अन्यत्रेति ॥ द्वितीयस्कंधभागवत इत्यर्थः ॥ १९ ॥

॥१८॥शशिसूर्यनेत्रमित्युक्तत्वात कथं विश्वरूपशब्दस्यान्यथाव्याख्यानमित्यतआह शशीति॥इत्यादिवद्व्याख्येयम्॥जन्यजनकभावेनाश्रयाश्रयिभावेन वाऽभेदोक्तिरित्यर्थः ॥ कुतएतदित्यत आह ॥ तदंगजा इति ॥ तदंगेत्यविभक्तिको निर्देशः संबुद्धिर्वा ॥ अभेदे बाधकंचाह ॥

॥ १८ ॥ शशिसूर्यनेत्रमित्यप्यहं क्रतुरित्यादिवत् ॥ तदंगजाः सर्वसुरादयोऽपितस्मात्तदंगत्यृषिभिःस्तुतास्त इ

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ॥ त्वमव्ययः शाश्वतधर्मगो
मा सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रम्॥
पश्यामि त्वांदीप्तहुताशवक्रं स्वतेजसा विश्वमिदंतपंतम् ॥ १९ ॥

त्यृग्वेदखिलेषु॥चंद्रमामनसो जातश्चक्षोः॥सूर्योअजायतेतिच ॥ बहुरूपत्वाद्बह्वाश्रयत्वं तेषांयुक्तं॥१९॥

चंद्रमा इति ॥ चक्षोश्चक्षुषः ॥ नन्वत्र चंद्रमसो मनोजातत्वं तदाश्रयत्वं चोच्यते ॥ गीतायांतुनेत्राश्रयत्वादि ॥ तथाऽन्यत्र दंष्ट्राऽर्यमेंदूइति तत्कुतो न विरोधइत्यतआह ॥ बह्विति ॥ १३ ॥

॥क०॥१८॥ननु यस्मात्सर्वसुरादयोऽपि तदंगजाः तस्मादृषिभिस्त्वदंगानीति स्तुता इतिवक्तव्ये तदंगेति कथमुक्तमित्यतो द्वेधोपपत्तिमाह॥ तदंगेतीत्यादिना ॥ संबुद्धिरिति ॥ चंद्रसूर्याद्विकमुद्दिश्य प्रत्येकंहे तदंगेति संबुद्धिरित्यर्थः ॥ दंष्ट्राऽर्यमेंद इति ॥ सूर्यचंद्रौ दंष्ट्रासन्यौ तदाश्रितौ चेत्यर्थः ॥ १९ ॥

१न्हासहीनः॥ २ अनादिनित्यः ॥ ३ देवानांबहुरूपत्वात बहंगाश्रयत्वम ॥

॥ श्री० ॥ इत्यनेनैव इत्येकवचनेनैव ॥ अनेन ॥ अन्यैःसर्वगतइत्यनेन ॥ रूपांतरैर्व्याप्ता इति शेषः ॥ इत्यादिना ॥ एकवचनेन ॥ द्यावापृथिव्योरिति ॥ द्यावापृथिव्योरिदमंतरं हि व्याप्तमिति गीतोक्तार्थस्य श्रुतावनभिधानादित्यर्थः ॥ तत्र ॥ विश्वरूपस्य भयहेतुत्वम् ॥ सर्वेषां ॥ भक्तानां च ॥ केषांचित् ॥ भक्तानाम् ॥ कारणविशेषात् ॥तदानीं भगवतो भूभारहरणार्थमुद्युक्तत्वरूपकारणविशेषात् ॥ कदाचित्तत्र ॥ भयहेतुत्वमिति वर्तते ॥

द्यावापृथिव्योरिदमंतरं हीत्यत्र त्वयेत्यनेनैवैकत्वस्य सिद्धत्वादेकेनेति व्यर्थमित्यतः प्रमाणपूर्वकं तदभिप्रायमाह ॥ मातापित्रोरिति ॥ बहुत्वेऽपि स एकोऽभिन्नः ॥ अनेन दिशश्च सर्वा रूपांतरैर्व्याप्ता इत्युक्तं भवति ॥ तदुक्तम् ॥विश्वरूपस्य द्रष्टुमिच्छामि ते रूपमित्यादिना एकत्वावगतेरित्यतआह ॥ पश्येति ॥ ऐक्यापेक्षयैकवचनमिति भावः ॥ मातापित्रोरिति श्रुतिः प्रकृतानुपयोगिनी कथमुदाहृता ॥ द्यावापृथिव्योरित्यनभि

मातापित्रोरंतरंगः स एकः रूपेण चान्यैः सर्वगतः स एक इति वारुणश्रुतेरेकेनैव द्यावापृथिव्योरंतरं व्याप्तो भवति ॥ पश्य मे पार्थ रूपाणीति बहूनि रूपाणि प्रतिज्ञातानि मातापितरौ च पृथिवीद्यावौ ॥

द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

मा नो माता पृथिवी दुर्मतौ धात्॥मधु द्यौरस्तु नः पितेत्यादिप्रयोगात् ॥नतु नियमतो भयप्रदं तत्स्वरूपम्॥

धातादित्यत आह ॥ मातापितराविति ॥ माता पृथिवी नोऽस्मान्दुर्मतौ माधात न दध्यात ॥ नोऽस्माकं मधु सुखहेतुरस्तु ॥ दृष्ट्वाऽद्भुतमित्यादिना विश्वरूपदर्शनस्य भयहेतुत्वमुच्यते॥तन्न सर्वेषां सर्वदा किं तु केषांचित्कारणविशेषात्कदाचिदेवेति सप्रमाणकं तदभिप्रायमाह॥तत्रेति॥

॥ रू० ॥ अनेनेति ॥ अन्यैः सर्वगत इत्यनेनेत्यर्थः ॥

॥ श्री० ॥ त्रिलोकेष्वित्यादि ॥ त्रिलोकेषु स्थितैर्भक्तैरर्जुनाय प्रदर्शितम ॥ दृष्टं विष्णोर्विश्वरूपं स्वयोग्यत्वानुसारतः ॥ प्रायः सहैव पार्थेन प्रायो भीताश्चतेऽखिलाः ॥ दर्शनाभ्या सतोदृष्टिरानंदोद्रेकता भवेत् ॥ तस्मिन् काले तु भूमेश्च भारहारार्थमुद्यमात ॥ उग्रत्वामिव सर्वत्र न भीतिर्ब्रह्मदर्शिनाम् ॥ अर्जुनादधिका ये तु तेषां भीतिर्नचाभवत ॥ श्रीब्रह्मरुद्रपूर्वाणां कृष्णाया भीमरामयोरिति प्रमाणोक्तप्रकारेणेत्यर्थः ॥ तदभिप्रायश्चेति ॥ अर्जुनादवरैर्भक्तैर्विश्वरूपदर्शनयोग्यैस्तदानीमर्जुनाय प्रदर्शितं रूपमपरोक्षतो दृष्ट्वा भीतं तादृग्भक्तविशेषाभिप्रायेणेत्यर्थः ॥ पुंसाम ॥ तद्योग्यपुरुषविशेषाणाम ॥ चेतसि निरूप्यास्थितानां ॥ अपरोक्षतो दर्शनार्थध्यानंकुर्वतामित्यर्थः ॥ भये जाते सति ॥ यदा अर्जुनाय विश्वरूपं प्रदर्शितं तदैव तद्ध्यायिनामपि हृदिभयविशेष उत्पन्न इत्यर्थः ॥ तद्द्रष्टुरिति ॥ भयविशेषसंयुक्तान तद्ध्यायिनो द्रष्टृरित्यर्थः ॥ कृष्णदेहे सर्वस्यापि जगतोऽर्जुनेन दृष्टत्वेनतदानीमेव ध्यायिनोऽपि कृष्णदेहे अर्जुनेन दृष्टा इति भावः तथेत्यनूद्य तस्यार्थमाह ॥ तथाऽहमिवेत्यादि ॥ इत्यतः ॥ एतादृशभक्ताभिप्रायेण ॥ पूर्वं विश्वरूपदर्शनवतोऽर्जुनादवरा भक्ता लोकत्रयशब्देन गृहीताः ॥ इदानीं तु विश्वरूपापरोक्षज्ञानिनस्तद्ध्यायिनो भक्ता इति द्रष्टव्यम ॥ ॥कृ० ॥त्रिलोकेषुस्थितैरिति ॥ त्रिलोकेषु स्थितैर्भक्तैरर्जुनाय प्रदर्शितम ॥ दृष्टं विष्णो

अभ्यसेऽभ्यासे सति सर्वेषां तृप्तिरानंद एवेत्यर्थः ॥ एवं तद्दर्शनस्य भयहेतुत्वनियमाभावमभिधाय लोकत्रयस्य दर्शनाभावं चाह॥ नत्विति॥ किंतु त्रिलोकेषु स्थितैर्भक्तैरित्युक्तप्रकारेण केश्चिदेव ॥ तदभिप्रायश्च लोकत्रयशब्द इति भावः ॥ प्रकारांतरेण लोकत्रयमित्यस्याभिप्रायमाह ॥

नारदस्य तदभावात् ॥ केषां चित्तथादर्शयति भगवान् ॥ म्रियंते केचित्तस्यरूपस्य दृष्टौ बिभेति कश्चिदभ्यसेसर्वत्तृप्तिरितिवारुणशाखायाम् ॥ न तु तं सर्वे पश्यंति ॥ अदृष्ट्वाऽपि तान्निरूप्य भये द्रष्टुस्तथा प्रातिभाति ॥

अदृष्ट्वाऽपीति॥विश्वरूपदर्शनार्थं यतमानानां लोकत्रयस्थानां पुंसां तददृष्ट्वाऽपि चेतसि निरूप्य स्थितानांभये जाते सति तद्द्रष्टुरर्जुनस्य तथाऽहमिवेतेऽपि दृष्ट्वा विभ्यतीति प्रतिभातीत्यतो लोकत्रयं दृष्ट्वाप्रव्यथितमित्याहेत्यर्थः ॥

विश्वरूपस्वयोग्यत्वानुसारत इति तात्पर्यनिर्णयोक्तप्रकारेणेत्यर्थः ॥ केश्चिदेवेति ॥ दृष्टमिति शेषः ॥ उक्ततात्पर्यानुसारेण तृतीयाप्रयोगः ॥

१ भावेक्तः ॥ २ वासनामयीसंहर्त्रीभगवन्मूर्तिमां दृष्टवतामितियावत् ॥

॥ श्री० ॥ तद्ध्यायिनः ॥ विश्वरूपध्यानं कुर्वतो भक्तजनान ॥ कथंभूतान् ॥ ध्यायिनः ॥ अदृष्ट्वापि ॥ विश्वरूपमिति शेषः ॥ तन्निरूप्य ॥ तद्विश्वरूपं चेतसि निरूप्य ॥ एतद्ध्यानं ॥ चेतसिनिरूप्य ध्यानकरणाज्जातद्भयात ॥ बिभ्यत इत्यत्र दृष्टवदिति दृष्टांत उक्तस्तत्र कर्मांग कर्तव्ययमंगीकृत्य दृष्टविश्वरूपवदित्यन्यथाप्रतीतिगह ॥ दृष्टवंत इवेति ॥ विश्वरूपं दृष्टवंतो जना यथा बिभ्यति एव बिभ्यतस्तद्ध्यायिनोऽर्जुनादयः पश्यंतीत्यर्थः ॥ क्रियानीत्ये वानिगिति द्रष्टव्यम ॥२०॥२१॥ २२ ॥ २३ ॥

अत्र श्रुतिसंमतिमाह ॥ दृष्ट्वेति ॥ देवं विश्वरूपं दृष्ट्वामोदमानास्त एतेऽर्जुनादयस्तद्ध्यायिनः पश्यंति कथं भूतान्अदृष्ट्वाऽपि तन्निरूप्यैतद्भया

तथा च गौतमखिलेषु ॥ दृष्ट्वा देवं मोदमाना अदृष्ट्वाऽप्येतद्भयाद्बिभ्यतो दृष्टवत्ते ॥ पश्यंति ते न्यस्त

अमी हि त्वा सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ॥ स्वस्तीत्युक्त्वा महर्षि

सिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या

विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥ गंधर्वयक्षाः सुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव स

र्वे ॥ २२॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा

लोकाः प्रव्यथितास्तथाहं ॥ २३ ॥

चक्षुर्मुखांस्तु तस्मिन्नेवैते मनसोगतत्वादिति ॥ २०॥ २१ ॥ २२॥ २३॥

द्बिभ्यतो भयचिन्हवतस्तस्मिन्नेव विश्वरूपे मनसोगतत्वात्तन्न्यस्तचक्षुर्मुखाश्च दृष्टवतदृष्टवंतइवेत्यर्थः ॥ २०॥२१ ॥ २२ ॥२३ ॥

॥ कृ० ॥ नन्वभेदाद्भयाद्बिभ्यत इति कथमित्यत आह ॥ भयचिन्हवत इति ॥ ननु तद्ध्यायिनः पश्यंतीत्यनेन ध्यायिनां दृष्टत्व लब्धं तत्कथं वतिप्रयोग इत्यत आह ॥ दृष्टवत इवेत्यर्थ इति ॥ तथा च दृष्टवदिति क्तवतुप्रत्ययांतं लुप्तविभक्तिक लुप्तोपमा चेयमिति भावः ॥ २० ॥ २१ ॥ २२ ॥२३ ॥

१ मुक्तदेववर्गाः स्वेच्छया विशंति ॥ प्रवेशो निर्गमश्चैवमुक्तानां स्वेच्छया भवेदित्युक्तः ॥ २ पितरः ऊष्मभागा हि पितर इति श्रुतेः ॥३ भयंकरम् ॥ ४ अहमपि प्रव्यथितोऽस्मि

॥ श्री० ॥ २४ ॥ २५ ॥ २६ ॥२७ ॥ २८ ॥

॥२४॥२५ ॥ २६ ॥ २७ ॥ २८

॥२४॥२५॥ २६ ॥२७॥२८॥

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ॥ दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४॥ दंष्ट्राकरालानि च तेमुखानि दृष्ट्वैव कालानलसंन्निभानि ॥ दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो द्रोणःसूतपुत्रस्तथाऽसौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः॥ २७ ॥ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथातवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति॥२८॥

॥ कृ० ॥ २४ ॥२५ ॥ गीतायाममी च त्वां धृतराष्ट्रस्य पुत्रा इति ॥ पुत्राः ते वक्त्राणि विशंतीत्यन्वयः न च त्वेत्यस्यानन्वयः ॥ त्वा त्वरमाणाः त्वां प्रति धावंत इत्युपपत्तेरिति बोध्यम्॥तु आ इति पदच्छेदः ॥ आ इत्यस्य विशंतीत्यनेनसंबंध इत्यप्याहुः ॥ २६ ॥२७ ॥२८॥

१विवृतमुखम् २ मनः बहुव्रीहिः ॥ ३ नप्राप्नोमि ॥ ४ सुखम् ५ प्रलयकालसंबंध्यग्निसमप्रभाणि ॥ ६ नजानामि ॥ ७ सुखम् ८ कर्णः ॥ ९ औपचारिकीयमुक्तिः ॥ वस्तुतस्तु भगवानेवानेकमूर्त्तिः सेन द्वयस्थयोधान्ग्रसित्वानिष्ठतीतिज्ञेयम् एवमग्रेपि ॥ १० तस्मिन्मुहूर्तेएवमरिष्यमाणाः ॥ ११ एवमौपचारिकप्रयोगो भगवतोवैषम्यनैर्घृण्यपरिहाराय तत्तत्कर्मणस्तदा तन्नाशहेतुत्वंसूचयितुम् ॥

॥ श्री० ॥२९॥३०॥स्वरूपमेवेत्यादिना॥भगवत्स्वरूपमज्ञात्वा तत्स्वरूपमेव पृच्छति स्वरूपज्ञानेऽपि तद्धर्माज्ञानात्तद्धर्मान्वा पृच्छतीत्यर्थः॥नामज्ञानोपायकथनम् ॥ अन्येषां व्यवहा
रादिति॥आदिपदार्थमाह॥रूपादिकानीति॥रूपम॥शरीरम ॥ ननु भाष्ये पृच्छतीति यदुक्तं तदनुपपन्नं अर्जुनप्रश्नस्य भाष्यसमानकालीनत्वाभावादपृच्छदिति वक्तव्यत्वादित्यत आह ॥ प्रश्नेति॥

॥ २९ ॥ ३० ॥ स्वरूपमेवाज्ञात्वा तद्धर्मान्वाऽयं पृच्छतीत्यन्यथा प्रतीतिनिरासायार्थमाह ॥ धर्मांतरेति ॥ तर्हि किं धर्मांतरो भवानिति
प्रश्नेन भाव्यं को भवानिति तु न युज्यत इत्यत आह ॥ यथेति ॥ अन्येषां व्यवहारान्नाम प्रत्यक्षेण रूपादिकं च जानन्नपि जातिज्ञानार्थं य

॥ २९ ॥ ३० ॥ धर्मांतरज्ञानार्थमेव को भवानिति पृच्छति ॥ यथा कश्चित्कंचिन्नामादिकम् ॥ जान

यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः॥ तथैव नाशाय विशंति लोकास्त
वापि वक्त्राणि समृद्धवेगाः॥२९॥लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥ आख्याहि मे को भवानु
ग्ररूपो नमोऽस्तु ते देववर प्रसीद॥विज्ञातुमिच्छामि भवंतमाद्यं नहि प्रजानामि तव प्रवृत्तिम्॥३१॥

न्नपि जातिज्ञानार्थं पृच्छति कस्त्वमिति ॥ यदि तमेव न जानाति तर्हि विष्णावित्येव संबोधनं न स्यात्॥
थाकश्चित्कंचित्कस्त्वमित्येव पृच्छति ॥ तथाऽर्जुनो भगवंतं तद्धर्मांश्च जानन्नपि धर्मांतरज्ञानार्थं को भवानित्येव पृच्छतीत्यर्थः ॥ प्रश्नव्या
ख्यानस्य वर्तमानत्वाद्वर्तमाननिर्देशः ॥उग्रं रूपं दृष्ट्वाऽसौ वा यमो वाऽयमिति स्वरूप एव संदिहानस्य प्रश्नः किं न स्यादित्यत आह॥यदीति ॥

॥ कृ० ॥ २९ ॥ ३० ॥ किं धर्मांतर इति ॥कानि धर्मांतराणि यस्येति बहुव्रीहिः ॥नामज्ञानोपायमाह॥व्यवहारादिति रूपादिज्ञाने द्वारं ॥प्रत्यक्षेणेति॥ ननु पृच्छतीति भाष्यकृ
त्प्रयोगकालेऽर्जुनप्रश्नस्याभावात्कथं वर्तमाननिर्देश इत्यत आह ॥प्रश्नेति ॥ तथा च व्याख्यानगतं वर्तमानत्वं व्याख्येये उपचर्य वर्तमाननिर्देश इत्यर्थः ॥ ३१ ॥

---

१ भगवता अतितीव्रं ग्रस्यमानत्वादौपचारिकत्वाय प्रयोगः ॥२ प्रकाशनशक्तिभिः ॥३ देहादिषु ग्रस्यमानमानयति ॥

॥ श्री० ॥ विष्णाविति संबोधनं कुतास्तीत्यत आह दर्शयति ॥ भाम इति॥प्रश्नोऽस्त्वति ॥ मया धर्मानज्ञात्वैव धर्मविषयः प्रश्नोऽस्तित्यर्थः ॥ वर्णनम ॥ अक्षरत्वादिधर्मसंयुक्ताया प्रतिपादनम ॥ इत्येवमुक्तमिति ॥ तथा च धर्मान्तरं पृच्छती-यत्रानरशब्दो यत्र इत्याशय ॥३१॥ केन धर्मान्तरेण विशिष्टस्त्वमिति प्रश्ने कालोऽस्मीति कथनमसंगतम ॥ कालशब्दस्य भगवद्धर्मवाचित्वे जगद्बंधनादिधर्मोऽस्मीत्युत्तरस्यासंगत वा ॥ प्रत्युतोविशिष्टस्यात इत्यत आह ॥ धर्मविशिष्टेति ॥ आणि याद ॥ कलेत्यस्मादगि यति वा अंतर्भावितीति णिजन्तात जिन्वाद्दा आदिर्वृद्धौ ककारस्थाकारस्य लोप प्रत्ययाकारमचौ च भति कालेतिरूपम॥ अन्यत्रेति ॥ अणादावित्यर्थः ॥

तत्स्वरूपमेवेत्यर्थः ॥ भामस्तत्वोग्राः प्रतपंतिविष्णाविति॥तर्हि(ननु)धर्मविषयोऽयं प्रश्नोऽस्तुतत्त्वांतरशब्दो नयुक्तइत्यत आह ॥ त्वमिति ॥ यदि भगवद्धर्मान् जानासितर्हि त्वमक्षरं परममित्यादिवर्णनं नस्यात ॥ अतोभगवतं तद्धर्मांश्चाक्षरत्वादीन ज्ञात्वानदन्यधर्मज्ञानार्थमेव प्रश्नइत्येवमुक्तमित्यर्थः ॥ ३१ ॥ एवं तर्हि कालोऽस्मीत्युत्तरमयुक्तं धर्मानुक्तेरित्यतआह ॥ कालेति ॥ धर्मविशिष्टभगवद्वाचीत्यर्थः ॥ कुत एतदित्यत त्वमक्षरमित्यादि च॥३१ ॥ कालशब्दो जगद्बंधनच्छेदनज्ञानादिसर्वभगवद्धर्मवाची॥कल बंधने ॥ कल

श्रीभगवानुवाच ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिह प्रवृत्तः ॥ ऋतेऽपित्वां न भविष्यंति सर्वेयेऽवस्थिताः प्रत्यनीकेषुयोधाः ॥ ३२ ॥

छेदने॥कल ज्ञाने॥कल कामधेनुरिति पठंति ॥ प्रसिद्धश्च स शब्दोभगवति ॥ नियतं कालपाशेन बद्धंशक्रकिंकरं यसे आह ॥ कलेति ॥ यथाकामधेनुः सर्वार्थान ददातितथाऽयमपि धातुः सर्वार्थवाचीत्यर्थः ॥ तथाचास्मादण् कर्तरिघञ् ॥ वा ॥ जगदिति यो ग्यतयासंबध्यते ॥ भवत्वयं बंधनादिधर्मवद्वाची भगवद्वाची तु कुतोऽन्यत्ररूढत्वादित्यत आह॥ प्रसिद्धश्चेति ॥

॥ कृ० ॥ धर्मवाचित्वे कालोऽस्मीति सामानाधिकरण्यमनुपपत्तिरित्यत आह ॥ धर्मविशिष्टेति ॥ आणीति ॥ [illegible] भावः ॥ अण दित्वेऽण उपधावृद्धिरिति भावः ॥ कर्तरि घञ्चेति ॥ घञः कर्तृभिन्नकारकार्थत्वेऽपि कृत्यल्युटोबहुलमित्यत्र बहुलग्रहणेन योगविभागेन कृत्संज्ञस्य [illegible] कर्तरि युक्तम॥

१ काल शब्दस्य २ अतउपधायाइति पाठोयुक्तः ॥ ३ उपधेतिपाठोयुक्त ॥ ४ अनुवरस्यंतिपाठोयुक्तइति भाति ॥ ५ धर्मान्तरेतिपदघटितांतरशब्द इत्यर्थः

॥ श्री० श्लाघसे ॥ स्वात्मस्तुतिं करोषि ॥ कथम् ॥ केन निमित्तेन कालशब्दवाच्यः ॥ कलहामचेतनुगिनिरानोः श्यामो रौद्रश्चेति कालशब्दार्थकथनं युक्तम् ॥ कालः श्यामलमेचका इत्यभिधानाच्च ॥ श्यामत्वं कालशब्दार्थ इति च द्रष्टव्यम ॥ प्रजा हरति मां बध्वा तिष्ठतीत्यपि कालशब्दार्थकथनं युक्तम ॥ कल च्छेदने कल बंधने इति धातोरिति ज्ञेयम ॥ प्रमाण लोकस्य रौद्रो भयंकर इत्यन्वयो द्रष्टव्यः ॥ कादाचित्कीति ॥ भूतार्थकक्तप्रत्ययात्प्रवृद्धपदेनानित्यकालीना वृद्धिः प्रतीयत इत्यर्थः ॥ धात्वार्थः ॥ वृध धात्वर्थे ॥ वृध् वर्धने इति धातोरिति ज्ञेयम ॥ भाष्ये परितः सर्वतः पूर्ण इति देशतो वृद्धिरुक्तेति ज्ञेयम ॥ अनादित्वेऽप्यंतवत्त्वं किं न स्यात प्रागभाववदित्यत आह ॥ अनादिरिति ॥ यद्वा न मरिष्यतीति प्रमाणेऽधिकमनस्वदनुसारेणाह ॥ अनादिरिति ॥ शंकते ॥ भूतेति ॥ प्रवृद्ध इत्यत्र प्रशब्देन वृद्धेः सार्वकालिकत्वं लभ्यते क्तप्रत्ययेन न तद्बाध्यते अतः कथं तयोः सामानाधिकरण्यम ॥ न च वाच्यं क्तप्रत्ययस्यापि सार्वकालिकार्थत्वात् प्रशब्दस्यार्थानुपपत्तिर्बोधक इति ॥ भो इत्यादिरूपेण क्तप्रत्ययस्योक्तत्वेन सार्वकालिकार्थत्वायोगादिति भावः उत्तरमाह॥ प्रयोगेति॥सार्वकालिकार्थेऽपि क्तस्य प्रयोगदर्शनात प्रशब्दस्यार्थानुपपत्तिर्बोधक इति भावः ॥ श्लाघसे इति कत्थ श्लाघायामित्यस्मादिति भावः ॥कथमिति॥केन प्रवृत्तिनिमित्तेनका

वृद्धं मांप्रति विकत्थसे ॥ आत्मानं तु श्लाघसे॥ कः कालः ॥ अयं कथम् ॥ श्यामः प्रजा हरति॥बध्वातिष्ठति रौद्रश्चेतिअत्र कथंविष्णुवाचित्वनिश्चय इत्यतआह ॥ विष्णुनेति ॥ कालनामाविग्रहो यस्यामेतयोक्तः ॥ प्रवृद्ध इति कादाचित्कीवृद्धिः प्रतीयतेऽतआह ॥ प्रवृद्ध इति॥

अयं स पुरुषः श्यामो लोकस्य हरति प्रजाः ॥ बध्वा तिष्ठति मां रौद्रः पशुं रशनया यथेति मोक्षधर्मे विष्णुना बद्धो बलिर्वक्ति ॥विष्णौ चाधीश्वरे चित्तं धारयन्कालविग्रह इति भागवते ॥ प्रवृद्धः परिपूर्णोऽनादिर्वा ॥ ऋतं च सत्यं चाभीद्धादिति हि श्रुतिः ॥ एतन्महद्भूतमिति च ॥

वृद्धिर्धात्वर्थः ॥ सा च प्रशब्देन देशतः कालतश्च सदातनी विवक्षितेति भावः ॥ अनादिरिति नित्यत्वस्याप्युपलक्षणम् ॥ भूताधिकारे विहितस्यक्तस्य कुतः सार्वकालिकत्वं प्रयोगदर्शनादिति भावेनाह ॥ ऋतंचेति ॥ऋतशब्दवाच्य इत्यर्थः ॥ श्याम इत्येतत् प्रवृत्तिनिमित्तं कृष्णो नीलासितश्यामकालश्यामलमेचका इत्यमरोक्तेः ॥ प्रजाहरतीति ॥ द्वितीयं कल छेदन इत्युक्तेः ॥ बध्वा तिष्ठतीति तृतीयं कलबंधन इति धातोरिति विवेकः ॥ रौद्रश्चेति ॥ रौद्रं तूग्रममीविषु इत्यमरोक्तेरुग्र इत्यर्थः ॥ अस्मिन्पक्षे कालशब्दः प्रकृतपुरुषे गौणः कालो दडधर इत्यमरोक्तेः॥यमवाचिनः कालशब्दस्य तन्निष्ठ वैश्रवणगुणयोगे न प्रकृत प्रयोगादिति॥ भाष्ये रशनाशब्दो रज्जुवाची ॥ सदातनीति ॥ अविकारिणीत्यर्थः ॥ भ्रांतः शंकते ॥ भूताधिकार इति ॥

१ द्विवचनमेतत ॥ २ विजयध्वजे प्रसिद्धकालस्यभगवत्प्रतिमात्वेनव्याख्यातमपि प्रकृतोपयोगितयाभाष्यकृदभिमतमितिभावः ॥ ३ धात्वर्थ इत्युद्देश्यवृद्धिरिति विधीयते ॥ एतत्तच्छब्दस्यप्रधानपरामर्शित्वात्कथंस्त्रीलिंगमितिशंकानिरस्ता ॥ ४ स्कं. ११ अ. १६ श्लो. १ ‌परमाण्वादिरूपः प्रतिमाऽस्येतितट्टीका॥

॥ श्री० ॥ श्रुतिद्वयगतपदमुदाहृत्य प्रयोगं दर्शयति ॥ इद्धाद्भुतमिति ॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायतेत्यत्र इंधी दीप्ताविति धातोः सार्वकालिकदीप्तिविशिष्टात्तपसो भगवत इत्यर्थः ॥ एतदिति श्रुतौ भूतमित्यस्य सार्वकालिकसत्ताविशिष्टमित्यर्थः ॥ तथा चेद्धादिति भूतमिति क्तप्रत्ययांताभ्यामपिशब्दाभ्यां सार्वकालिकी दीप्तिः सत्ता च प्रतिपादिता तद्वत्प्रवृद्धशब्देनापीत्यर्थः ॥ अतिशायने तमबिष्ठनाविति ईयसुन्प्रत्ययस्यातिशयार्थत्वादाह ॥ अतिशायितेति ॥ अत एवातिशयेन तेजोरूपत्वादित्य ॥ अनादिकालीनस्येत्युक्तया सत्तायाः सदातनत्वमुक्तमिति द्रष्टव्यम् ॥ ननु त्वेषशब्दोदितदीप्तेः सर्वसाधारण्यात् कथं भगवत एव त्वेषमिति नाम इत्यत आह ॥ असाधारण्येनेति ॥ सार्वकालिकत्वरूपातिशयाख्यासाधारण्येनेत्यर्थः ॥ विशेषणार्थ इति ॥ वर्धने विशेषणद्योतक इत्यर्थः ॥ तदेव विशेषणं दर्शयति ॥ विक्रियारूपमिति ॥

इद्धाद्भुतमितिवदित्यर्थः ॥ अत्रापि सार्वकालिकत्वानिश्चय इत्यतो भगवतो दीप्तेः सत्तायाश्च सदातनत्वे श्रुतिसद्भावादित्याह॥ प्रविष्णुरिति॥ विष्णुस्तवसो देशकालपरिच्छिन्नात्सूर्यादेस्तेजसः स्तवीयान् अतिशयिततेजोरूपो भवति ॥ अत एव ह्यस्य स्थविरस्यानादिकालीनस्य

प्रविष्णुरस्तुतवसस्तवीयांत्वेषं ह्यस्य स्थविरस्य नामेति च ॥ न तु वर्धनम् ॥ नासौ जजान न मरिष्यति[1]नैधतेऽसाविति हि भागवते ॥

त्वेषमिति नाम असाधारण्येन हि व्यपदेशो भवतीत्यर्थः ॥ अस्त्वेवं तथाऽपि प्रागल्पः सन्निदानीं वृद्धिंगत इत्यत्रार्थः किं न स्यादित्यत आह ॥ न त्विति ॥ तुशब्दो विशेषणार्थः ॥ विक्रियारूपं वर्धनं प्रवृद्धशब्दप्रवृत्तिनिमित्तं न भवति ॥

॥कु०॥ तेनाकर्मकाद्वर्धतेर्गत्यर्थाकर्मकेति कस्य विधानात्कथमेतच्चोद्यमिति निरस्तम् ॥ अत इत्यादिकत्य निष्ठेति सूत्रेण [illegible] क इति भ्रांतिनैवं शंकनात ॥ ननु कस्य सार्वकालिकत्वं कुत इत्याशंक्य प्रयोगदर्शनादित्युक्तम् ॥ तथा च ऋतं चेत्यादेः पर्यवसानमत इत्यत आह ॥ इद्धादिति ॥ दीप्तिमान ॥ इद्धशब्दे या प्रकृतिः तदर्थस्येत्यर्थः ॥ सत्ताया इति ॥ भूतशब्दप्रकृत्यर्थस्येत्यर्थः ॥ तथा चेद्धाद्भुतमित्यत्र यथ दीप्त्यादेः सार्वकालिकत्वात्क्तो न भूतादिकालविशिष्टः किं तु गत्यर्थाकर्मकेति विहितस्तथा प्रकृतेऽपीति भावः ॥ ननु दीप्तेः सूर्यादिसाधारणत्वात्कथमस्यैव त्वेषमिति नामेत्यत आह ॥ असाधारण्येनेति ॥ दीप्तेः सूर्याद्यपेक्षयाऽतिशयितत्वात्सार्वकालिकत्वाच्चासाधारण्यमिति भावः ॥ विशेषणार्थ इति ॥ वैलक्षण्यार्थ इत्यर्थः ॥ तदेवाह ॥ विक्रियेति ॥

[1] स्कं. ११ अ. ३ श्लो. ३९ ॥

[illegible]

भगवति [illegible] । [illegible] ॥ [illegible]

[illegible] वृद्धिम [illegible] ॥ अन्यथा विशेषणवैयर्थ्यात् ॥ [illegible]

त्यत आह ॥ नेति ॥ न कर्मणेति विशेषनिषेधस्तु वृद्धिलक्षणविक्रियाकारणत्वेन संभावितेन कर्मणाऽपि यदा न वर्धते तदा स्वतः कारणं विना न वर्धत इति किमु वक्तव्यमिति वृद्धिलक्षणविक्रियाकारणत्वमात्रनिषेधाय कैमुत्यप्रदर्शनार्थमित्यन्यथोपपन्नमित्यर्थः॥ननु सर्वत्र भगवानेव

यस्य दिव्यं हि तद्रूपं ह्रीयते वर्धते न चेति मोक्षधर्मे ॥ न कर्मणेति तु कर्मणाऽपि न किमु स्वयमिति॥लोकान्स माहर्तुमिह विशेषेण प्रवृत्तः॥भ्रात्रादींश्च ऋते इत्यपिशब्दः॥प्रत्यनीकत्वं तु परस्परतया॥सर्वेऽपि न भविष्यंति॥

लोकानां सहर्ता तस्मादिहेति व्यर्थमित्यत आह॥लोकानिति॥युगपद्बहून्प्रत्यक्षत एवेति विशेषेण ॥ युधिष्ठिरादीनामवशिष्टत्वात्कथं त्वामृते इत्येवोक्तमित्यत आह॥भ्रात्रादींश्चेति॥अपिशब्दो द्योतयतीति शेषः अस्मत्प्रतिकूलेष्वनीकेषु अवस्थिता योधा न भविष्यंतीत्युक्तेका पांडवादीनां प्राप्तिर्येनतेऽपि त्वेत्युच्यत इत्यत आह॥प्रत्यनीकत्वमिति॥सेनाद्वयस्यापीति शेषः॥कुत एवं व्याख्यानमित्यत आह॥सर्वेति॥सेनाद्वयगता अपीत्यर्थः॥

॥कृ०॥भावविकाराणामिति ॥ षड् भावविकारा इति ह स्माह वार्ष्यायणिः॥जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यतीति निरुक्तोक्तानां विक्रियारूपाणां जननादिषाल्वथीनामित्यर्थः ॥ उपादानस्य कारकव्यापारात्कार्यरूपतापत्तिर्जनिः ॥ स्वरूपधारणमस्तित्वम्॥धर्मलक्षणावस्थानामन्यथात्वं विपरिणामः ॥ अवयवोपचयो वृद्धिः ॥परिदृश्यमानविशेषरूपापगमेन कार्यस्योपादानरूपेण पर्यवसानं विनाशः अनेन प्रकारेण जननादीनां भावविकारत्वं ज्ञातव्यम् ॥ भावस्य विकारा भावविकाराः तेषामिति हेत्वर्थगर्भमेतत् ॥ भगवति लोकप्रसिद्धं जननादिकं नास्ति जन्मादीनां भावविकारत्वात् ॥भगवति च निर्विकारोऽक्षर इत्युक्त्या विक्रियाभावावगमात् ॥

॥ श्री० ॥ तथा च भ्रात्रादीन् ऋत इत्यत्र पांडवसेनासु भ्रात्रादीन् ऋते केऽपि न भविष्यन्ति ॥ कौरवसेनासु तु कृपाश्वत्थामकृतवर्माख्यान् त्रीन् ऋते केऽपि न भविष्यंतीति द्रष्टव्यम् ॥ बहुत्वेनेति ॥ कौरवाणामेकादश ॥ पांडवानां समेत्यष्टादशत्वेनेत्यर्थः ॥ ३२॥३३ ॥पक्षद्वयेऽपीति ॥ हतो वेति ॥हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीमित्यनेनेत्यर्थः ॥ आशंकाविषयत्वादिति ॥ एतादृशानां जयो मम कथं स्यादित्यर्जुनशंकाविषयत्वादित्यर्थः ॥ एतद्धार्तराष्ट्रमनेनापीत्याशयेनाह ॥ भेत्स्यत इति॥३४ ॥कृ० ॥ ननु तथाऽपि बहुवच

प्रत्यनीकेष्वितिबहुवचनं कथमित्यत आह ॥ अक्षौहिणीति ॥ भेदेन बहुत्वेन॥३२॥३३॥ यद्वा जयेम यदि वा नो जयेयुरित्यस्य संदेहेऽपि प्रवृत्तिर्युक्ता पक्षद्वयेऽपि फललाभादिति हतो वेत्युत्तरमुक्तम्॥इदानीं तत्र पराजयशंकाऽपि नास्तीत्युच्यते॥द्रोणंचेति॥तत्र द्रोणस्यधनुर्विद्याचार्यत्वेन भीष्मस्य स्वच्छंदमृत्युत्वेन चाशंकाविषयत्वाद्युक्तं योधवीरसमुदायात् पृथक्कृत्य स्वशब्देन ग्रहणम् ॥जयद्रथस्य कर्णस्यच कुत इत्यत आह॥

अक्षौहिण्यादिभेदेन बहुवचनं युक्तम् ॥ ३२॥ ३३ ॥ योऽस्याशिरश्छिन्नं भूमौ पातयति ॥ तच्छिरो

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् ॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योधवीरान् ॥ मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेताऽसि रणे सपत्नान् ॥ ३४ ॥

भेत्स्यतीति तत्पितुर्वराज्जयद्रथोऽपि विशेषणोक्तः ॥ इत्वरा वासवीशक्तिरिति कर्णः ॥ ३४ ॥

योऽस्येति॥अस्य जयद्रथस्य तच्छिरस्तस्यपातयितुःशिरो भेत्स्यति भेत्स्यते ॥तत्पितुर्जयद्रथपितुः ॥ शक्तिरस्ति कर्णस्येति शेषः॥कर्णो विशेषेणोक्त इति वर्तते॥३४॥ नमयुक्तम ॥ तद्वाच्याभावादित्यत आह ॥ बहुत्वेनेति ॥ पत्ति. सेनामुखं गुल्म गण वाहिनी चमूः अनीकिनी अक्षौहिणीत्येवमनीकप्रभेदानां बहुत्वेनेत्यर्थः॥एकहस्त्येकरथा त्र्यश्वा पत्तिः पंचपदातिका॥पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः॥ अनीकिनीदशानीकिन्यक्षौहिणीचामरकोशे द्रष्टव्यम्॥३२॥३३॥इत्यस्य हतो वेत्युत्तरमिति संबंधः॥ननु भिदिर्विदारण इत्युक्त्वा । भिदेर्द्विधाभवनार्थकत्वाभावात्॥किंतु द्विधाभवनमात्रपरत्वम् ।द्विधाभवने च शिरसः कर्तृत्वमेव॥स्वतंत्रः कर्तेति लक्षणात्॥शिरसः कर्तृत्वे च कर्मवद्भाव आवश्यकः ॥कर्मवत्कर्मणा तुल्यक्रिय इति तदुक्तेः॥एवं च कर्मणि कर्मकर्तरि लकारेऽपि भावकर्मणोरित्यात्मनेपदे सति भेत्स्यते तत्सः स्वयमेवेतिवच्छिरो भेत्स्यत इति स्यात् ॥ भेत्स्यतीति परस्मैपदं तु कथमित्यत आह ॥ भेत्स्यत इति ॥ ननु कर्मवत्सूत्रे कर्मस्थया क्रियया तुल्यक्रियस्य कर्तुः कर्मवत्त्वमुक्तं प्रकृते द्विधाभवनस्यैव कर्तृस्थत्वेन कर्तृकर्मोभयगतत्वात्कथं तुल्यत्वम् ॥ उच्यते ॥ कर्मस्थत्वकर्तृस्थत्वरूपोपाधिभेदेन द्विधाभवनस्याप्यौपाधिकभेदसंभवात्तुल्यत्वोपपत्तेरिति ॥ ३४ ॥

॥ श्री०॥३५॥सप्तम्यंतं पदम् ॥ भूम्यादिस्थानवाचीत्यर्थः ॥ विषय एवेति ॥ तथा च तव प्रकीर्त्या सामर्थ्येन जगत् स्थाने स्वविषय एव प्रहृष्यति॥अनुरज्यते न त्वन्यविषये ॥ यद्वा जगत्स्थाने ॥ शब्दादिविषय एव प्रहृष्यति ॥ तत्रैवानुरज्यते इति गीतार्थो द्रष्टव्यः ॥ बहुमानेति ॥ तथा च तव प्रकीर्त्या तव कीर्तनेन जगत्प्रहृष्यति तथा बहुमानस्थाने त्वयि अनुरज्यते चेति गीतार्थो द्रष्टव्यः ॥ साध्याहारत्वमिति ॥ विषय एवेति एवशब्दस्य बहुमानशब्दस्य त्वयीतिशब्दस्य चाध्याहारप्रसंगादित्यर्थः ॥ सूर्याचंद्रमसाविति प्रमाणानुसारेणाह ॥ अत्राद्येनेति ॥ बोधयन् स्थापयन्निति प्रमाणानुसारेणाह ॥ द्वितीयेनेति ॥

॥३५॥स्थान इत्येतदुक्तमित्यर्थेऽव्ययं चास्ति॥अस्ति च सप्तम्यंतं पदं तत्किमत्राभिप्रेतं कथं चास्यान्वय इत्यत आह ॥यदिति॥स्थाने विष

॥ ३५ ॥ यदेतद्वक्ष्यमाणं तत्स्थाने युक्तमेवेत्यर्थः ॥

संजय उवाच ॥ एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः[1] किरीटी ॥नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥३५॥अर्जुन उवाच ॥स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च॥ रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति सिद्धसंघाः॥३६ ॥

ये एवेति वा बहुमानस्थाने त्वयीति वा योजनायां साध्याहारत्वमिति भावः ॥ हृषीकेशशब्दस्य प्रकृतोपयुक्तमपूर्वमर्थमाह ॥ अग्नीति ॥ अत्राद्येनादिशब्देन सूर्यो गृह्यते ॥ द्वितीयेन बोधनस्थापने ॥

॥ कृ०॥३५॥अव्ययं चास्तीति ॥अव्ययवर्गे युक्ते द्वे सांप्रतं स्थान इत्यमरः.कोश इति भावः ॥ विषय एवेनेतीति ॥ स्थानइति विषयविशेषणम् ॥ततश्च तव प्रकीर्त्या तन्माहात्म्य कीर्तनेन जगत्प्रहृष्यति अनुरज्यते चेति यत् तत्स्थाने ।विषय एव युक्तं विषय एव कोऽर्थः युक्तं हर्षादिविषयो भवान्यतः ईश्वरः सर्वभूतसुहृच्चेति योजनायामित्यर्थः ॥ साध्याहारत्वमिति ॥ आद्यपक्षे विषय इति द्वितीये त्वयीत्यध्याहारापात इत्यर्थः ॥ प्रकृतोपयुक्तमिति ॥ जगत्प्रहृष्यतीत्येतदुपपादकमित्यर्थः ॥ सूर्याचंद्रमसाविति वाक्यार्थानुसारेणाह ॥ अत्राद्येनेति॥बोधयंस्थापयंश्चेत्येतदनुरोधेनाह ॥ द्वितीयेनेति ॥

---

१ अत्यंतभीतोऽतएववेपमानः

बोधनात् स्थापनाच्चैव जगतो हर्षसंभवादिति प्रमाणानुसारेणाह ॥बोधनस्थापनाभ्यामिति ॥सूर्याद्यंशुभिः स्वकेशैरिति शेषस्य पूरितत्वेनतदुपरि शंकते॥सूर्याद्यंशूनामिति ॥ गीतायामु क्तमित्यन्यथाप्रतीतेरित्यत्रेत्यस्यार्थमाह॥एतद्व्याख्यानाति..तदंगजाः सर्वसुरादयोऽपीति प्रमाणं तत्रोक्तमस्तीति भावः॥अनेनेति॥तन्नियतत्वादेरित्यनेन वक्ष्यमाणं केशेमे अंशुमंज्ञितैरित्ये तद्वाक्यं मत्केशनियतत्वतज्जन्यत्वाश्रितत्वादिना निमित्तेन अंशुसंज्ञितैः किरणसंज्ञितैर्मे केशैरिति विवृतं भवतीत्यर्थः ॥ अग्नीषोमादीति वाक्यद्वयलक्षणमाह॥तथा चयादिना॥अग्नीषोम कृतैरित्यत्र दीर्घषत्वयोः प्राप्तिः कथमिति चेदुच्यते॥अग्नेःस्तुत्स्तोमसोमाः ॥अग्निशब्दात्परेषां स्तुत्स्तोमसोमानां सस्य षत्वं स्यात्॥अग्निष्टुत् स्तुत् इत्यत्रत्यसस्य षत्वे तकारस्य षत्वनिमित्त कष्टुत्वे अग्निष्टुदिति भवति ॥ अग्निष्टोमः ॥ अत्रापि पूर्ववद्रूपम् ॥ अग्नीषोमौ॥नन्वग्निशब्दात् परसोमशब्दे स्थितस्य सस्य षत्वे अग्निषोमाविति स्यात् दीर्घं कथमिति चेदुच्यते ॥ अस्मिन्नेवसूत्रे वार्तिकम् ॥ अग्नेर्दीर्घात् ॥ सोमस्येष्यत इति ॥ अग्निशब्दात्परस्य सोमस्य तत्रत्यसकारस्य षत्वमिष्यत इति यत्र तत्र दीर्घात्॥ग्निशब्दात्परस्यैव न तु ह्रस्वांताग्निश ब्दादिति वार्तिकार्थः ॥ तथा चाग्नीषोमाविति युक्तमिति ध्येयम्॥कोमन्यय इति ॥ हृष् अस्मात् कीप्रत्यये ककारलोपे हृषीति रूपम्॥कित्त्वाद्गुणाभावो द्रष्टव्यः॥अन्यथा हर्षीतिस्यात् ॥हृषी हृष्यौ हृष्य इति हृषी शब्दस्य बहुवचनं हृष्य इति॥ह०॥केशेमे अंशुसंज्ञितैरित्येतद्नुसृत्याह ॥ अग्न्याद्यंशुभिरिति॥बोधनात्स्थापनाच्चैवजगतो हर्षसंभवात् ॥ इत्येतदाश्रित्याह॥

अग्न्याद्यंशुभिः स्वकेशैरिति शेषः ॥जगद्धर्षणादेरिति बोधनस्थापनाभ्यां जगद्धर्षणादित्यर्थः॥ सूर्याद्यंशूनां कथं भगवत्केशत्वमित्यत आह॥ केशत्वं त्विति॥तन्नियतत्वतज्जन्यत्वादिना तादात्म्यात्किरित्यत्र किं प्रमाणमित्यत आह॥प्रमाणं त्विति ॥इत्यत्रैतद्व्याख्यानावसरे॥अनेन वक्ष्यमाणं

अग्नीषोमाद्यंतर्यामितया जगद्धर्षणाद्धृषीकेशः ॥ केशत्वं त्वंशूनां तन्नियतत्वादेः॥प्रमाणं तु शशिसूर्यने त्रमित्यत्रोक्तम् ॥हृषीकाणामिंद्रियाणामीशत्वाच्च ॥

वाक्यं विवृतं भवति ॥ तथा चाग्न्यादिषु स्थित्वा स्वकेशनियतैस्तदंशुभिर्जगतो बोधनस्थापनाभ्यां हर्षणादित्युक्तं भवति ॥ हृष्यतेः की प्रत्ययः ॥ हृष्यो हर्षहेतवः केशा अस्येति हृषीकेशः ॥ नानेनप्रसिद्धोऽर्थस्त्यज्यत इति भावेन तमप्याह ॥ हृषीकाणामिति ॥

बोधनस्थापनाभ्यामिति यद्वा ॥ ननु हृष्यः केशा अस्येत्यभिप्रेतं नचानेन तल्लाभः केशानामेवानुक्तेरित्यत आह ॥ स्वकेशैरितिशेष इति ॥ ननु स्वकेशानां हर्षकत्वमनुपलंभबा धितमित्यत उक्तम् ॥अग्न्याद्यंशुभिरिति ॥ ननु तथाऽपि प्रकृतनिर्वचनोपयुक्ततया हर्षणमात्रे वक्तव्ये आदिपदं व्यर्थमित्यतोहर्षणनिमित्तबोधकत्वात्सार्थक्यमिति भावेनाह ॥ बोधन स्थापनाभ्यामिति ॥ तज्जन्यत्वादिनेति ॥ आदिपदेन तदाश्रितत्वसंग्रहः ॥ एतद्व्याख्यानावसर इति ॥ तदंगजाः सर्वसुरादयोऽपीत्यादिनेति शेषः॥अनेनेति॥ तन्नियतत्वादेरि त्यनेनेत्यर्थः॥वक्ष्यमाणमिति॥ केशेमे अंशुसंज्ञितैरिति वाक्यमित्यर्थः॥हृष्यतेरिति ॥ अंतर्भावितण्यर्थादिति शेषः ॥ अंतर्णीतण्यर्थाद्धृषतुष्टावित्यस्माद्धृष्यंतीत्यर्थे कीप्रत्यये कित्त्वाल्लघू पधगुणाभावे हृषीशब्दो वातप्रमीशब्दवद्द्रष्टव्य इति भावः ॥

॥ श्री० कथमिति ॥ केननिमित्तेनेत्युच्यत इत्यर्थः ॥ तत्र हेतुर्जगदीशस्येति ॥ ज्ञानक्रियाशक्तीति ॥ ज्ञानेंद्रियाणां ज्ञानशक्तिप्रेरकत्वेन कर्मेंद्रियाणां कर्मशक्तिप्रेरकत्वेनेत्यर्थः ॥ श्रुतौ प्राणशब्दो घ्राणेंद्रियवाचीति द्रष्टव्यम् ॥ हृषीकशब्दस्येंद्रियवाचित्वे पूर्वमभिधानस्यानुक्तत्वात् समुच्चयार्थकश्चशब्दो व्यर्थ इत्यत आह ॥ पूर्वेणेति ॥ जगदीश्वरस्य विशेषत इंद्रियेशत्वोक्तौ निमित्ताभावात् ॥ हृषीकाणामिंद्रियाणामिति व्याख्यानमयुक्तमिति शंकायां तेषामित्यनेन निमित्तोक्त्या तद्व्याख्यानं समर्थितं तथा हृषीकशब्दस्येंद्रियवाचित्वे प्रमाणाभावाच्चेदं व्याख्यानमयुक्तमितिशंकायां प्रमाणोक्त्याऽपि तद्व्याख्यानं समर्थ्यत इत्येतं पूर्वेण समुच्चितस्यास्य प्रमाणस्योक्तव्याख्यानसमर्थकत्वाच्चशब्दो युक्त इत्यर्थः ॥ अग्नीषोमकृतैरिति वक्ष्यमाणप्रमाणानुसारेण सूर्याचंद्रमसावित्यनंतरं अध्याहार्यमाह ॥ अग्निश्चेति ॥ तथा च सूर्यचंद्रादय इत्यर्थो द्रष्टव्यः ॥ तर्हि बोधयन्नित्याद्येकवचनायोगादाह ॥ बोधयंत इत्यादि ॥ सूर्याचंद्रमसावित्येतदनुसारेणाह ॥ सूर्यकृतैश्चेति ॥ कर्मभिरिति समप्रधानभावेन बोधनस्थापनहर्षणानामुक्तत्वात् बुध्या विवेकेन बोधनस्थापनयोर्हर्षणं प्रतिहेतुत्वं द्रष्टव्यमित्याह ॥ अत्रापीति ॥ न केवलं भाष्ये किं नाम प्रमाणेऽपीत्यर्थः ॥ ईशानत्वादावपीति ॥ आदिपदेन वरदत्वलोकभावनत्वयोर्ग्रहणम् ॥ जगद्धर्षणे बोधनस्थापनकर्तृसूर्यादिनियामकत्वरूपः पूर्वोक्त एव हेतुर्द्रष्टव्य इत्यर्थः ॥ ३६ ॥

ननु जगदीशस्य विशेषत इंद्रियेशत्वं कथमित्यत आह ॥ तेषामिति ॥ पुरुषार्थोपयुक्तज्ञानक्रियाशक्तिप्रेरकत्वेनेति भावः ॥ हृषीकशब्दस्येंद्रियवाचित्वं कुत इत्यत आह ॥ नेति ॥ पूर्वेण समुच्चितस्यास्य व्याख्यानसमर्थहेतुत्वाच्चशब्दः ॥ आद्येऽर्थे प्रमाणमाह ॥ इतरोऽर्थ इति ॥

तेषां विशेषतः ईशत्वं च यः प्राणे तिष्ठन्नित्यादौ प्रसिद्धम् ॥ न मे हृषीकाणि पतंत्यसत्पथ इत्यादिप्रयोगाच्च ॥ इतरोऽर्थो मोक्षधर्मे सिद्धः ॥ सूर्याचंद्रमसौ शश्वत्केशैर्मे अंशुसंज्ञितैः ॥ बोधयंस्थापयंश्चैव जगदुत्पद्यते पृथक् ॥ बोधनात्स्थापनाच्चैव जगतो हर्षसंभवात् ॥ अग्नीषोमकृतैरेभिः कर्मभिः पांडुनंदन ॥ हृषीकेशो महेशानो वरदो लोकभावन इतिच ॥ ३६ ॥

अग्निश्च ॥ जगद्बोधयंतः स्थापयंतश्च पृथक् स्वावसरे उत्पद्यंते उदयं गच्छंति ॥ सूर्यकृतैश्च ॥ अत्रापि पूर्ववद्बोधनादेर्हेतुहेतुमद्भावो ज्ञातव्यः ॥ ईशानत्वादावप्युक्तो हेतुः ॥ ३६ ॥

॥ कृ० ॥ अग्नीषोमकृतैरित्युपसंहारादाह ॥ अग्निश्चेति ॥ नन्वेभिः कर्मभिरिति कथं बोधनादीनां समप्राधान्यमुक्तं बोधनादिति पूर्ववाक्यविरोधादित्यत आह ॥ अत्रापीति ॥ बुध्या विवेकेनेति शेषः ॥ उक्तो हेतुरिति ॥ जगद्धर्षकत्वरूप इत्यर्थः ॥ ३६ ॥

॥ श्री० ॥ युक्तमिति ॥ स्थानइत्यादिनेत्यर्थः ॥ आक्षेप इति ॥ कस्मान्न नमेरन् किं तु नमेरन्नेवेत्याक्षेपणमेवेत्यर्थः ॥ यच्चाप्नोतीत्याद्यं व्याख्यानमुपपादयति ॥ आप्नोतेरिति ॥ तथा चाप्नृव्याप्तौ लृकारोऽनुबन्धार्थः॥ अस्मात् मनप्रत्यये निर्वचनत्वात् पकारस्य तकारे आत्मन् इति प्रातिपदिकनिष्पत्तिः पश्चात्स्वाद्युत्पत्तौ आत्मेति भवतीति द्रष्टव्यम् ॥ एवमग्रेऽपि । यदादत्ते सम्यग्ददातीति ॥ द्वितीयं व्याख्यानमुपपादयति॥ आङ्पूर्वादिति ॥ तथा चाङ्पूर्वात् दा दाने इत्यस्मात् मनप्रत्यये [illegible] दकारस्य तकारे चात्मन् इति [illegible] यच्चात्तिविषयानिहेति तृतीयं व्याख्यानमुपपादयति ॥ आङ्पूर्वकादिति॥ तथा चाङ्पूर्वकात् अद् भक्षणेऽस्मात् मनप्रत्यये दकारस्य तत्वे अकः सवर्णे दीर्घे चात्मन्निति रूपम् , यच्चास्य सततो भावइति चतुर्थं व्याख्यानमुपपादयति ॥ आङ्पूर्वकादिति ॥ तथा चाङ्पूर्वकात् तनु विस्तारे अस्मात् डमनप्रत्यये टिस्वार्डीमुनस्यात् इत्यस्य लोपे चात्मन् इति रूपम् उक्त्वा क्येति ॥ त्वं सदसदित्यस्माद्यदुत्तरं तत्परमिति नातिरोधादित्यर्थः ॥ ३७ ॥ ॥ कृ० ॥ आकारलोपइति ॥ पृषोदरादित्वादिति भावः ॥ तत्त्वमिति ॥ पृषोदरादित्वादेव

सर्वे नमस्यंतीत्यनयुक्तमिति ॥ स्वयमेवोक्त्वा कस्माच्च ते न नमेरन्निति विरुद्धं कथं पृच्छतीत्यत आक्षेपएवायमिति ज्ञापयन् तन्निवर्त्यांशं काप्रदर्शनपूर्वकमवतारयति ॥ कथमिति ॥ इति शंकायामिति शेषःतत्तस्या उत्तरम् ॥ महात्मन्नक्षुद्रचित्तेत्यल्पार्थप्रतीतिनिरासार्थमाह ॥ पूर्ण श्चेति ॥ आत्मा जीव इति प्रतीतिंवारयितुमाह ॥ आत्मेति ॥ उक्तो निरुक्तः ॥ यद्यस्मात् ॥ आप्नोतेर्मन् ॥ पकारस्य च तकारः ॥ आङ्पू

कथं स्यान इति तदाह ॥ कस्मादित्यादिना ॥ पूर्णश्चासावात्माचेति महात्मा॥ आत्मशब्दश्चोक्तो भार

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

ते ॥ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ॥ यच्चास्य संततो भावस्तस्मादात्मेति भण्यत इति ॥ त त्परं सदसतः परम् ॥ असच्चसच्चैव च यद्विश्वंसदसतः परमिति भागवते॥ ३७ ॥

र्वाद्दात्रः ॥ स एव प्रत्ययः ॥ आकारलोपस्तत्वम् ॥ आङ्पूर्वाददो मन् ॥ तत्वं च ॥ इह देहे ॥ संततो भावो नित्या सत्ता ॥ आङ् पूर्वात्तनोतेर्ड्मन् ॥ सदसद्भावात्मकं विश्वं त्वमेवेति सत्तादिप्रदत्वादेवोच्यते ॥ नत्वन्यथा तथासतिउत्तरवाक्यविरोधात् ॥ इति भा वेन तत्पठित्वा सप्रमाणकं व्याचष्टे ॥ तत्परमिति ॥ ३७ ॥ ॥३१६॥

दकारस्य तकारइत्यर्थः ॥एवमग्रेऽपि ॥ ३७॥

॥ श्री० ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ परोक्षो बाह्येंद्रियागोचर इत्यर्थः इत्याहुः ॥ तत्र ॥ प्रकृतासंगतत्वात ॥ वस्तुतएकः परोक्ष इत्युक्तया परोक्षावस्थायामिति लभ्यते ॥ तथाच समक्षमसमक्षं चासत्कृतोऽसीत्यर्थो द्रष्टव्यः ॥ आद्याक्षरग्रहणेनेति ॥ एकोऽथवेति गीतायां एइत्याद्याक्षरग्रहणेनेत्यर्थः ॥ करोतेर्डे इति ॥ अंतर्णीतण्यर्थात् कृञ्करणेऽस्मात् डप्रत्यये डित्वाट्टिभूतस्य ऋवर्णस्य लोपे प्रत्ययाकारसंबंधे च सति केतिरूपम् ॥ ४२ ॥ ॥ कृ० ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ एशब्दइति॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ एकः ॥ परोक्ष इति क्लिष्टं व्याख्यानमिति ज्ञापयितुं तदर्थमन्वयंच दर्शयति ॥ एक इति ॥ आद्याक्षरग्र

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ एकस्त्वमेव कारयिता नान्योऽस्त्यथापि॥ ॥ ४२

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशांकःप्रजापतिस्त्वं प्रपितामहश्च ॥ नमो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ॥ अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं यदुक्तं हेकृष्ण हेयादव हेसखेति ॥ अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वाऽपि ॥ ४१ ॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ॥ एकोऽथ वाप्यच्युततत्समक्षं तत्क्षामये त्वामहमप्रमेयं ॥ ४२ ॥

हणेन एशब्दः एकस्य द्योतकः ॥ कशब्दः कारयितृत्वद्योतकः ॥अंतर्णीतण्यर्थात्करोतेर्डः॥ अथापि एवमसत्कारानर्होऽप्यसत्कृतोऽसि॥४२ ॥

---

१ ननुत्वमक्षरंपरमंवेदितव्यमित्यादिभिः श्लोकैरुक्तमनादिनिधन ॥ तत्रमत्तो मे पश्यानीत्यादि पदैःस्वस्यनथाप्रतीतावपिवस्तुतोदेशकालगुणानंत्यादिमाहात्म्यं भगवत इतिइतरेषांनिश्चयोनस्यात्तदर्थंनियमुक्तिरितिनपुनरुक्तिदोषः ॥ २ ॥ बल्लज्ञानरूपः ॥३ ॥ निःशेषदोषापरनिर्माता ॥ ४ ॥ स्वतोगतिहीन जगन्नेता॥ ५ ॥ वृणुते भक्तान् ॥ ६ ॥ अतिमुख्यांकितः ॥ ७ ॥ प्रजापालकः ॥ ८ ॥ विधिपिता ॥ ९ ॥ परिपूर्ण ॥ १० ॥ नत्वमत्रात्मकत्वादित्याह ॥ एतेनसर्वंखल्विदं ब्रह्मपुरुषएवेदंसर्वमित्यादिश्रुतयोऽपिव्याख्याताः ॥११ ॥ अबहुमानंयथा भवति तथा तत्क्षमापयेइत्याग्रिमेणान्वयः ॥ १२॥ संभिन्नशब्दस्तुल्यत्वज्ञापनाय ॥

॥ श्री० ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥४७ ॥ ४८ ॥ ४९ ॥ रू० ॥ यथाऽप्शब्दः मधुशब्दस्मारकस्तद्वदर्थबोधः तथाण्शब्दः एकशब्दस्मारकः तने ऽर्थबोधकःकेचित् ॥ अन्ये

भा० ॥४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८॥४९॥ टी० ॥४३ ॥४४ ॥४५॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥ न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ॥ पितेव पुत्रस्य सखेव सख्युः प्रियःप्रियायार्हसि देव सोढुम् ॥४४॥ अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम्॥४७॥न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः॥एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥४८॥मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

तुएकशब्दस्यद्योतकत्वोक्तिर्नामैकदेशग्रहणे नामग्रहणमिति न्यायेनममप्रशब्दो लक्ष्येत ॥ तेनतदर्थो लक्ष्यत इत्येशब्द एकत्वपर इत्याहुः॥४२॥४३॥४४॥४५॥४६॥४७॥४८॥४९ ॥

१ पूर्वप्रपितामहपदेनविविपितृत्वमुक्तनेकवलतदेवत्याह ॥ २ ॥ समावितिशेषः ॥ ३ ॥मधिरार्थः ॥ ४ ॥ अपराधमितिशेषः ॥ ५ ॥ पूर्वमदृष्टम् ॥ ६ ॥ दृष्टः ७ ॥ अनंतेत्यर्थः ॥ ८ ॥ गुणपूर्णविग्रह ॥ विश्वस्मिन्मूर्तिर्यस्येतिवा ॥ ९ ॥ स्वसामर्थ्यात् ॥ १० ॥ पूर्णम् ॥ ११ ॥ त्वदर्पमेन ॥ १२ ॥ व्यासप्रसादादिदानींसंजयेनदृष्टत्वादितिभावः ॥

॥ श्री० ॥ **नविश्वरूपम्** ॥ स्वकं रूपमिति वर्तते ॥ **भ्रांतिप्रतीतीति** ॥ लोकानां भ्रांतिरूपा या प्रतीतिरित्यर्थः ॥ भ्रांतप्रतीतिपाठे भ्रांतानां प्रतीतिरित्यर्थो द्रष्टव्यः ॥ **प्रमाणप्रतीत्या** ॥ प्रमाणजन्यप्रतीत्या ॥ प्रमाणरूपप्रतीत्येति यावत् ॥ द्वितीयांतइति ॥ परिपूर्णानि सर्वाणि समान्यानिरूपाणि ॥ तथाप्यपेक्ष्य भक्तानां दृष्टि स्वामृषयोऽपितु ॥ परावरं वदंत्येवं ह्यभक्तानां विमोहनमिति गारुडपुराणवचनस्य रामकृष्णादिरूपाणि परिपूर्णानि सर्वशः ॥ नचाणुमात्रं भिन्नानि तथाऽप्यस्मान् विमोहयीत्यादिनारदीयवचनस्य च द्वितीयाध्यायांते उदाहृतत्वादित्यर्थः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ क्रं० ॥ ५०॥५१ ॥ ५२ ॥ ५३ ॥

स्वकंरूपं दर्शयामासेति ॥कृष्णरूपत्वस्य स्वकत्वविशेषणात् ॥ विश्वरूपं न स्वकमितिप्रतीतिः स्यादत आह ॥ स्वकमिति ॥ कृष्णः स्वकं रूपं न विश्वरूपमिति ॥ भ्रांतप्रतीत्यनुवादेनोच्यत इत्यर्थः ॥कुत एतदित्यत आह ॥अन्यथेति ॥प्रमाणप्रतीत्येत्यर्थः ॥ कानि तानि

संजय उवाच॥इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥ अर्जुन उवाच॥दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः सचेताः प्रकृतिंगतः॥५१॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपंदृष्टवानसि यन्मम ॥ देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

स्वकं रूपं तु भ्रांतप्रतीत्या॥अन्यथा॥तदपि स्वकमेव॥प्रमाणानि तूक्तानिपुरस्तात्॥५०॥५१॥५२॥५३॥

प्रमाणानीत्यत आह ॥ प्रमाणानीति ॥ द्वितीयांते ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

---

१ मनुष्यवदृश्यमानत्वात् ॥ २ ॥ जातः ॥ ३ ॥ केषांचित्सुखेनकेषांचिद्दुःखेनकेषांचित्सुखेनदुःखेनतद्दर्शनीयम् ॥ अतृप्त्याज्ञेयम् ॥ ४ ॥यमेवैषवृणुतइत्यादिश्रुतिभ्योऽयमर्थःसिद्धः ॥

॥श्री०॥५४ ॥५५॥ इति यदुपतिवरगीताभाष्यटीकामुयुक्ताशयमतिल्लिना।मेर्गामगवेदाविप्री ॥ मुअलितविरनिर्याष्टपिगाद्धाऽत्र चीर्णा ममगमदयमत्रैकादशाध्याय अंतम् ॥ ॥इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवरणीभावप्रदीपिकाख्यायामेकादशोऽध्यायः ॥ ॥ कृ० ॥ ॥ ५४ ॥५५ ॥

॥ ५४ ॥ ५५ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितगीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां एकादशोऽध्यायः ॥

॥ ५४॥५५॥इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्गीताभाष्येएकादशोऽध्यायः ॥ ११ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु॰ विश्वरूपदर्शनयोगो नाम एकादशोऽध्यायः ॥११ ॥

इतिश्रीप्रमेयदीपिकाप्रकाशे उमर्जीकृष्णकृतएकादशोऽध्यायः ॥

१ तर्हि भगवद्दर्शनं किमकारणकं भवतीत्यत आह ॥ २ ॥ अन्यामानान्यया ॥ ३ ॥ परंतप ॥ ४ ॥ अपरोक्षतोज्ञातुम् ॥ ५ ॥ सायुज्यनामुम ॥ ६ ॥ अनन्ययेत्यस्यान्यत्यागरूपार्थकत्वभ्रांतिनिराह ॥

॥ श्री० ॥ प्रणम्ययादवाचार्यगुरूणां पदपंकजे ॥ क्रियते [illegible]भाष्यार्थटीका भावदीपिका ॥ १ ॥ श्रीरिति ॥ तथा [illegible] न [illegible] इति भावः ॥ ननु भगवदुपासनाधि[illegible]तयतदुपायप्रदर्शनरूपार्थद्वयप्रतिपादकत्वेनैतदध्यायस्य[illegible] न स्यात् भगवन्माहात्म्यप्रतिपादक[illegible] न स्यात् इत्यत आह ॥ तदुपायेति॥तथाच प्रधानप्रमेयस्यैकत्वेनैकवाक्यतेति भावः ॥ षट्केति ॥ भगवदुपासनाविषयप्रदर्शनरूपापि [illegible] ॥पूर्वेण संगतिः कस्मान्नप्रदर्शितेत्यत आह ॥ अर्जुनेति ॥ [illegible]र्थः ॥ न [illegible] संगति[illegible] शब्दःप्रश्नस्य संशयमूलकत्वात ॥ प्रकृते च संशयाभावात् ॥ नार्जुनप्रश्नो [illegible] ॥ नन्विति ॥ न [illegible] इति ॥ मोक्ष[illegible] ॥ नेत्र ॥ मोक्षसाधनत्वेन प्रमितत्वमेव ॥ नन्वव्यक्तोपासनस्य मोक्षसाधनत्वेन प्र[illegible]स्यादित्यत आह ॥ नहीति ॥ निर्धारणार्थः ॥ उत्तमत्वनिर्धारणार्थः ॥ भिन्नानि फलानि येषां तानि भिन्नफलानि एवंभूतानि यानि साधनानि [illegible]मित्यर्थः ।

एतदध्यायप्रतिपाद्यमर्थमाह॥ अव्यक्तेति॥ अव्यक्तं श्रीः तदुपाय भगवदुपासनोपायम् ॥ तदुपायप्रदर्शनंच भगवदुपासनाधिक्यसमर्थनार्थमित्येकार्थता ॥ षट्कान्तर्भावश्च ॥ अर्जुनस्य प्रश्नसंगतिप्रदर्शनेनैवानंतर[illegible]पि संगतिर्ज्ञायते ॥ननु भगवदुपासनस्येवाव्यक्तोपासनमपियदि

श्रीउपासनाप्रियायनमः॥ॐ॥अव्यक्तोपासनाद्भगवदुपासनस्योत्तमत्वं प्रदर्श्य तदुपायंप्रदर्शयत्यस्मिन्नध्याये॥

अर्जुन उवाच ॥एवंसततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

मोक्षसाधनत्वेन प्रमितं स्यात् तदानत्साधकाधिक्यविषयः संशयः स्यात् ॥ तदेवकुतः ॥ तथा च कथमयं संशयमूलोऽर्जुनस्य प्रश्नः ॥ नहि भिन्नफलसाधनसाधकानां निर्धारणार्थःप्रश्नो युज्यते ॥

॥कृ०॥ हरिः ॐ ॥ एकार्थतेति ॥ [illegible] भावः ॥ षट्कान्तर्भाव इति ॥ [illegible] वर्णनादिति भावः । [illegible] नोक्तेत्यत आह॥ अर्जुनप्रश्नेति ॥ एवंशब्देन दृष्टश्रुतरूपं [illegible] इत्यर्थः ॥ तथा न [illegible]संगतिरिति भावः । [illegible]उपासनयोर्भिन्नफलत्वेऽपि [illegible] आह ॥ नहीति ॥ [illegible] ॥ प्रश्न इति निर्धारणार्थः ॥ निर्धारणं नाम गुणक्रियादिभिः सजातीयसमुदायादेकदेशस्य पृथक्करणम ॥ न च [illegible] ॥ [illegible] इति ॥

१ गीतायाम् २ वक्ष्यमाणभाष्येण ३ विषयसप्तमी ॥

॥श्री०॥तर्हि कथं प्रश्न कर्तव्य इतिपृच्छति॥किं त्विति॥उत्तरमाह॥साध्येति॥अव्यक्तोपासनाभगवदुपासनाभ्यामाध्ये ये फले तयोर्मध्ये किं फलमुत्तममिति साध्यस्योत्तमत्वनिर्णयार्थमेव प्रश्नो युज्यत इत्यर्थः॥ननु तर्हि तद्दुपासकानां वा फलं उत्तमं उताव्यक्तोपासकानां फलमुत्तममिति साध्यस्योत्तमत्वनिर्धारणार्थ एव प्रश्नोऽस्त्वित्यत आह॥न च तथा प्रकृतइति॥तथान्वे के वोत्तमफलका इत्येव भवेन्न तु के योगवित्तमा इति अतो गीतायां प्रश्नस्य साध्यस्योत्तमत्वनिर्धारणार्थत्वं न प्रतीयत इति भावः॥किं च साध्यस्योत्तमत्वनिर्धारणार्थः प्रश्न एव न संभवति मोक्षेतरस्य स्वर्गादेः सर्वस्यापि फलस्य मोक्षाद्वरत्वात्. द्वितीयाध्याये प्रतिपादितत्वेन तत्प्रश्नस्य सिद्धार्थत्वादित्याशयेनाह॥यावानर्थ इत्यादिनेति॥आहेति॥अव्यक्तोपासनस्यापि मोक्षसाधनत्वेन श्रुत्यादौ प्रतीतत्वेन भगवदुपासनाव्यक्तोपासनयोरेकफलकत्वेनैकफलसाधनसाधकोत्तमत्वविषये संशयप्राप्त्या तन्मुक्त्यर्थं के योगवित्तमा इति प्रश्नो युक्त इत्याशयेनाहेत्यर्थः ॥ निवासार्थकस्य वसतेःपरस्मैपदित्वनियमेन शानचः प्राप्त्यभावेन वसाना इत्ययुक्तमित्यत आह ॥ वसंत इति ॥ तामाच्छाद्येति ॥ इदं तामाच्छाद्य स्थिताः ॥ आच्छादनार्थस्य वसतेरात्मनेपदित्वेन युक्तः शानजिति भावः ॥ व्याख्यानद्वयेऽपि फलितमाह ॥ उपासीना इति ॥

किं तु साध्यनिर्धारणार्थ एव ॥ न च तथा प्रकृतो यावानर्थ इत्यादिना निरस्तत्वादित्यत आह ॥ तदुपासनमपीति ॥ श्रियं प्रति वसाना

तदुपासनमपि मोक्षसाधनं प्रतीयते ॥ श्रियं वसाना अमृतत्वमायन्भवंति सत्या समिथामितद्राविति॥

वसंतस्तामाच्छाद्य स्थित्वा उपासीना इति यावत ॥

॥ कृ० ॥ ननु तर्हि स्वर्गमोक्षरूपभिन्नफलसाधनसाधकाधिक्यप्रश्नो न स्यादित्याशयेन पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ साध्येति ॥ नन्वेवं प्रकृतेऽपि साध्यनिर्धारणार्थ एव साधकाधिक्यप्रश्नोऽस्त्वित्यत आह ॥ न चेति ॥ यावानर्थ इत्यादिनेति ॥ तत्र सर्वस्यापि मोक्षातिरिक्तफलस्य मोक्षान्तर्भावोक्तेः ॥ साध्यस्यनिर्धारितत्वेन तदर्थप्रश्नो न युक्तः ॥ सिद्धार्थतापातादिति भावः ॥ ननु वासस्याकर्मकत्वाद्वसंत इतिव्याख्यानपक्षे श्रियमिति कर्मणि द्वितीयाऽयुक्तेत्यतः कर्मप्रवचनीययोगे द्वितीयेयमिति भावेनाह ॥ श्रियं प्रतीति ॥ ननु वसाना इति न वसनिवास इत्यस्य रूपं तस्य नित्यपरस्मैपदित्वेन वसाना इतिशानजान्यात्मनेपदविरोधात ॥ प्रतिशब्दाध्याहारापाताच्चेत्यरुचेराह ॥ तामाच्छाद्येति ॥ वस आच्छादन इतिधातोरिति भावः ॥ ननुपक्षद्वयेऽपि अव्यक्तोपासनस्य मोक्षसाधनत्वाज्ञाम इत्यत आह ॥ उपासीना इति यावदिति॥ ॥३१९॥

॥ श्री० ॥ मितं द्रवति वेलामतिक्रम्य न गच्छतीति मितद्रुरितिपदार्थं हृदि निधाय तदर्थमाह ॥ मितद्रौ समुद्र इति ॥ अन्यत्रापीति ॥ भार्यायां शचीश्यामलोषास्वित्यर्थः ॥ शांकरे तु रतेर्वायौ श्रीरित्येवच कीर्त्यते ॥ ताश्चेंद्रधर्मेनामत्यमंश्रयाच्छ्रियईरिता इतिवचनात् ॥ सपूज्य निशाम्यर्थेति ॥ नागृपूजानिशामनयोरिति धातोरिति भावः ॥ तत्संभवात् ॥ महत्परत्वेना व्यक्तत्वसंभवादित्यर्थः ॥ अत्र हीति ॥ अनाद्यनंतमिति श्रुतौ ॥ तमित्ययं शब्द. ॥ इत्येवेति ॥ अव्यक्तपरत्वेनैवोक्त इत्यर्थः ॥ संग्राहिकामिति॥श्रियम् ॥ अव्यक्तसंज्ञामित्यनेन श्रियं वसाना अनाद्यनंतमिति श्रुतिद्वयार्थस्य संगृहीतत्वादित्यर्थः ॥

तेषां सामिथा समीहितानि सत्यानि भवंति ॥ मितद्रौ समुद्रे क्षीराब्धौ ॥ श्रीशब्दस्यान्यत्रापि प्रवृत्तेः अव्यक्तविषयामेव श्रुतिं पठति ॥ अनादीति ॥ निचाय्य संपूज्य निशाम्य वा ॥ अत्रापि नाव्यक्तं श्रूयत इत्यत आह ॥ अव्यक्तं चेति ॥ चोऽवधारणे ॥ कुत एतत् ॥ परमात्मनोऽपि तत्संभवादित्यतआह ॥ महत इति ॥ अत्र हि ॥ तं महतः परमितिपरामर्शो दृश्यते ॥ स चोक्तस्यैव भवति ॥ अव्यक्तमेव च

अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इतिच ॥ अव्यक्तं च महतः परम् ॥ महतःपरमव्यक्तमित्युक्तपरामर्शोपपत्तेः ॥ उपास्य तां श्रियमव्यक्तसंज्ञां भक्त्या मर्त्यो मुच्यते सर्वबंधैरिति सामवेदे आग्निवेश्यशाखायाम् ॥

महतः परमव्यक्तमिति महतः परत्वेनोक्तमतोऽत्राप्यव्यक्तग्रहणे तमित्ययं महतःपरमव्यक्तमित्युक्तस्य परामर्शइत्युपपद्यते ॥ अन्यथाऽनुक्तपरामर्शः प्रसज्यते॥परमात्मा तु न महतः पर इत्युक्तः किं त्वव्यक्तात्पुरुषः पर इत्येवेत्यर्थः॥श्रुतिद्वयार्थसंग्राहिकां स्पष्टां चात्र श्रुतिमुदाहरति॥उपास्येति

॥ कृ० ॥ यद्यपि समीण इत्युणादिसूत्रेण संपूर्वादिणः थक्प्रत्यये निष्पन्नः समिथशब्दो युद्धवार्चीति वेदभाष्यादावुक्तम् ॥ तथाऽपि तद्ग्रहणे माहात्म्यातिशयाभावाद्भक्तिमात्रपरत्वमितिभावेनाह ॥ समीहितानीति ॥ मितशब्दोपपदाद्द्रुगतावित्यस्माद्धोर्मितयोर्द्रुव इत्यनन्ययात् [illegible] मितं द्रवतीति योवार्थस्य वृद्धिह्रासमतिवर्तते समुद्र एव संभवादाह ॥ समुद्र इति ॥ समुद्रमात्रेऽमृतत्वमायाचित्याद्युक्तमोक्षादिप्राप्तिः कथमित्यतआह ॥ क्षीराब्धाविति ॥ अन्यत्रापि वृत्तेरिति॥ताश्चेंद्रधर्मेनासत्यमंश्रयाच्छ्रियईरिता इतिवचनाच्छचीशामलादिष्वपि प्रवृत्तेरित्यर्थः ॥ चायृ पूजानिशामनयोरित्युक्तेर्द्वेधाऽर्थमाह ॥ संपूज्य निशाम्य वेति ॥ अव्यक्तोपासनं न मोक्षसाधनं भगवदितरोपासनत्वादन्यज्ञानवदितियुक्तिसूचनायोक्तन्यायादिति न्यायग्रहणम् ॥

॥ श्री० ॥ अंतवदिति ॥ [illegible] मुक्तत्वादित्यर्थः ॥ [illegible] यथाविधोपासका [illegible]
प्रकृतत्वेन तदुपासकानामेवात्र फलत्वमुक्तं नाव्यक्तोपासकानां [illegible] ॥ [illegible] ॥ अत इति ॥ [illegible]
क्षसाधनत्वप्रतिपादकवाक्ययोः [illegible] ॥ तेषाम ॥ [illegible] ॥ असंभवादिति ॥ तदुपासनस्य मोक्षसाधनत्वानुपपत्तेरित्यर्थः ॥ वास्तवमेवेति ॥ [illegible]
र्थः ॥ अतः संदेहहेतुत्व [illegible] ॥ [illegible]
॥ [illegible] ॥ [illegible]
[illegible]

नन्वेवं प्रतीयमानमपि अव्यक्तोपासनस्य मोक्षसाधनत्वमुपचारिकमेव ॥ अंतवत्तु फलं तेषामित्युक्तत्वात् अतो नास्य संदेहहेतुत्वमित्यत आह ॥ महच्चेति ॥ तस्याः श्रियः ॥ युक्तं ब्रह्मोपासनस्य मोक्षसाधनतायां उपचरितत्वकल्पनं ॥ तेषां जननमरणादिमत्त्वेनासंभवात् ॥

महच्च माहात्म्यं तस्या वेदेषूच्यते ॥ चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ॥ तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयम् ॥ चतुःशिखंडा युवतिःसुपेशा घृतप्रतीका वयुनानि वस्त इति च ॥

श्रियस्तु महामहात्म्यवत्त्वेन वेदोक्तत्वादसंभवाभावात्॥वास्तवमेवतदुपासनस्य मोक्षसाधनत्वमित्यर्थः॥सुपेशा सुरूपा॥घृतप्रतीका दीप्तांगी वयुनानि ज्ञानानि वस्ते आच्छादयति॥ ज्ञानालंकृतेत्यावत् ॥ सुपर्णा ॥ सुप्रूर्णानंदौ ॥वृषणा सेक्तारौ द्विरूपो भगवानेव ॥ यत्र ॥ यस्या विषये ॥

॥ कृ० ॥ युक्तमिति ॥ तथा [illegible] ॥ [illegible] ॥ यद्यपि [illegible] [illegible] न
यापि [illegible] ॥ [illegible] ॥ [illegible]
ष्टयवतीत्यर्थ इत्याहु ॥ दीप्तांगीति ॥ [illegible] ॥ [illegible] ॥ ज्ञानानीति ॥ [illegible]
नं ज्ञानमिति [illegible] ॥ [illegible] ॥ आच्छादयतीति ॥ [illegible] ॥ज्ञानेति॥सुप्रेति॥सुपूर्णेः सुपूर्णानंदावित्यु
क्तावितिभावः॥वृष सेचन इत्यतआह ॥ सेक्तारविति ॥

१ अ.१पा.२अ.३सू.१ [illegible] ॥ [illegible] सुरूपवती ॥ दीप्तांगी या देवी ज्ञानालंकृता विद्यते यस्यास्त विषये देवाः [illegible] इतिश्रुत्यर्थः॥१

॥ श्री० ॥ अत्र किं माहात्म्यमुक्तं तस्या इत्यत आह ॥ अत्रेति ॥ युवतिरित्यनेन नित्ययौवनम् ॥ [illegible] इत्यनेन ज्ञानमयत्वं [illegible] इति [illegible] च प्रतीयत इत्यर्थः ॥ उपलक्षणमेतत् ॥ तस्यामित्यनेन मुख्यतो हरिसंनिधानास्पदत्वं च प्रतीयत इति द्रष्टव्यम् ॥ एवामिति ॥ [illegible] माहात्म्यमुच्यत इत्यर्थः ॥ अहं रुद्रेभिरित्यादिमहालक्ष्मीवाक्यम् ॥ अंभृणी [illegible] ॥ रुद्रेभिरित्यां [illegible] ॥ रुद्रार्थमिति ॥ रुद्रेभिरित्यत्र भिस ऐस्त्वाभावश्छांदसो द्रष्टव्यः ॥ राज्ञीति ॥ राजृ दीप्ताविति धातोर्दीप्तेत्यर्थः ॥ संगमयित्रीति ॥ [illegible] प्रति प्रापयित्रीत्यर्थः ॥ [illegible] ॥ कृतनिवासमिति ॥ पुरुत्रेति ॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति पुरुशब्दात् द्वितीयासप्तम्योस्त्रादेशः [illegible] यथा पुरुत्रा [illegible] ॥ पुरुत्रा [illegible] द्रष्टव्यम् ॥ स्थाधातोस्तृन्प्रत्यये सति स्थात्रेति [illegible] ॥ भूरिस्थानेषु स्थितामिति [illegible] ॥ स्थितामिति [illegible] ॥

अत्र नित्ययौवनं ज्ञानमयत्वं [illegible] च प्रतीयते ॥ [illegible] ॥ रुद्रार्थः [illegible] ॥ राष्ट्री [illegible] यज्ञियानां यज्ञार्हाणां वसूनां पदार्थानां ॥ देवानां वा ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैरित्यारभ्य अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ॥ तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ॥

संगमनी संगमयित्री ॥ प्रथमा चिकितुषी ॥ अनादितः सर्वत्र कृतनिवासा ॥ पुरुत्रा पुरुस्थानेषु ॥ व्यदधुः कृतवंतः ॥ पूजार्थं प्रतिष्ठापितवंतः ॥ भूरिस्थात्रां स्वतो भूरिस्थानेषु स्थिताम् ॥ भूरिस्थानेषु देवानावेशयंतीम्

॥ कृ० ॥ उत्तरत्रेति ॥ [illegible] ॥ अहं रुद्रेभिरित्यस्य [illegible] ॥ रुद्राद्यैः परिवृतेति ॥ [illegible] राष्ट्री [illegible] कर्मणि [illegible] कृत्येऽपि [illegible] अर्थांतरेऽपि बाहुलकात् ष्ट्रन् ॥ औणादिको वा [illegible] ॥ [illegible] ॥ राष्ट्री राज्ञीति ॥ यज्ञार्हाणामिति ॥ यज्ञर्त्विग्भ्यां घखञाविति यज्ञशब्दादर्हार्थे [illegible] ॥ [illegible] शब्दनिर्णयानुसारेणाह ॥ देवानां वेति ॥ प्रथमेत्यस्यार्थोऽनादित इति ॥ [illegible] ॥ कृतनिवासमिति ॥ [illegible] ॥ [illegible] अभ्यासचर्त्वं च उगित्वान्ङीपि वसोः संप्रसारणमिति संप्रसारणं [illegible] ॥ पुरुस्थानेष्विति ॥

१।२ असाधारण्येन [illegible] ३ [illegible] ४ [illegible] ॥

॥ इत्यादीति ॥ यो विपश्यति स मयैव मत्प्रेरणयैवेत्यादि द्रष्टव्यमित्यर्थः ॥वसंतीति ॥ क्षिनिवासगत्योरिति भावः ॥ श्रद्देयम ॥ यत्र वस्तुनि यस्य श्रद्धा तादित्यर्थः ॥ यद्वाब्रह्मद्विषामिति ॥ चतुर्मुखपंचममुखच्छेत्तृत्वात्तद्वैरिणामित्यर्थः ॥ हिंसकमिति ॥ शृ हिंसायाम् ब्रह्मद्विट्त्वादेव हिंसकमित्यर्थः ॥ सर्वाधिक्ये इति ॥ सर्वाधिक्यवत्तया मुव इत्यर्थः ॥ एतावती ॥ परिच्छिन्ना ॥ इत्यादिनोच्यत इति ॥

योऽन्नमत्ति स मयैवात्तीत्यादि॥ ये अमंतवो निरपराधास्ते मामुपक्षियंति मत्समीपे वसंति॥श्रुधि शृणु॥श्रुतं प्रसिद्ध॥श्रद्धिवं श्रद्धेयम्॥यमुग्रं रुद्रं कर्तुं कामये तंतमुग्रं कृणोमि करोमीत्यादि ॥ सुमेधांसुमेधसम् ॥ रुद्रायेत्यादिचतुर्थी द्वितीयार्थे ॥ ब्रह्मद्विषे ॥ संहारकाले ब्राह्मणादि सर्वप्राणिद्विषम् ॥ यद्वा ब्रह्मद्विषां शरवे हिंसकं हंतवा उ हंतुमेव ॥ अस्य जगतः पितरं हिरण्यगर्भं मूर्धनि सर्वाधिक्ये ॥ योनिः कारणम्॥

अमंतवो मां त उपक्षियंति श्रुधि श्रुतश्रद्धिवं ते वदामि॥ यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधम् ॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ ॥ अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वाअंतः समुद्रे॥परो दिवा पर एना पृथिव्यै तावती महिना संबभूवेत्यादि च॥त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत त्वयेतिच ॥ इति शंका कस्य चिद्भवति ॥

दिवेत्यादितृतीया पंचम्यर्थे ॥ एना एतस्याः ॥ महिनामहिम्नाऽहमेतावती संबभूवेत्यादिनोच्यते ॥ भवत्वेवं ततः किं असंदिग्धतया भगवंतमेवोपासीनस्यार्जुनस्य कथमयं संशयो येनैवं पृच्छतीत्यत आह ॥ इतीति ॥

॥ क० ॥ बहुस्थानेष्वित्यर्थः ॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति पुरुशब्दात त्राप्रत्यय इतिभावः ॥ आगोऽपराधोऽमंतुश्चेत्यमरोक्तेराह ॥ निरपराध इति ॥ दोषापराधरहिता इत्यर्थः ॥ क्षियंतीत्यस्यार्थो निवसंतीति ॥ क्षिनिवासगत्योरिति धातोरितिभावः ॥ नित्यमसिच्प्रजामेधयोरिति मेधाशब्दांतबहुव्रीहेरसिच्प्रत्ययोक्तेराह ॥ सुमेधसमिति॥

१ ईमित्यव्ययएवार्थमयेत्यनेनसंबध्यतइतिभावः॥ २ भक्तंप्रतिमयेत्यनम ॥

॥श्री०॥रुद्रादिपरिहृतत्वसर्वदेवताप्रतिष्ठाप्यत्वस्वराद्रिपदत्वात् ब्रह्मा[illegible]पादकत्वादिरूप महामाहात्म्य त्वया उक्त इत्यर्थः ॥त्वया जुष्टमितिवाक्यस्यायमर्थः॥लक्ष्मीराति वेदपुरुषो वक्ति ॥हे देवि त्वयाजुष्टः जुषी प्रीतिसेवनयोरिति धातोस्त्वत्प्रीतिविषयो यः स ऋषिर्ज्ञानी भवति ॥ [illegible] त्वया जुष्टो ब्रह्माभवति ॥[illegible] त्वयागतश्रीश्चभवति ॥ त्रयो वैगतश्रियः शुश्रुवान् ग्रामणीराजन्य इति यजुर्वेदवचनात् ॥ [illegible] ब्राह्मण [illegible] ग्रामणी[illegible] श्रीयुतत्वेन त्रयो गतश्रीशब्दवाच्याः॥ तथाच ब्राह्मणादिवर्णत्रय त्वयैव भवति [illegible] तृतीयस्य [illegible] ॥ साधकबाधकेति ॥ [illegible] तदनङ्गीकारे बाधकं च प्रमाणं नास्तीति साधकबाधकप्रमाणा[illegible] ॥ आश्रयेति ॥ [illegible] ॥ तथा [illegible] ॥ योग्यतावशात् ॥ अर्थाबाधवशात् ॥ निराकर्तुमिति ॥ [illegible] ॥ अयंचेति ॥ ननु दृष्टश्रुतरूपमिति यदि कर्मधारयः

यत एवं भगवदुपासनस्येवाक्षरोपासनस्यापि विनापत्त्यारेण मोक्षसाधनत्वं प्रतीयत इति तस्मान्मार्गद्वयेनैकमेव फलं प्राप्नुवतां मध्ये के श्रेष्ठा इति साधकबाधकप्रमाणाभावेन शंकासंशयः कस्य चिदविदिततत्त्वस्य भवति ॥ अतस्तदनुजिघृक्षया भगवदुपासका एव श्रेष्ठा इति जानन्नप्यर्जुनः पृच्छतीत्यर्थः॥अथवा जानन्नपि तत्र स्वाविदितयुक्तिज्ञानार्थं संशयमाहृत्य पृच्छतीत्याह ॥सूक्ष्मेति ॥ योग्यतावशादेवंभूत

अतो जानन्नपि सूक्ष्मयुक्तिज्ञानार्थं पृच्छति॥ एवमिति ॥एवंशब्देन दृष्टश्रुतरूपं मत्कर्मकृदित्यादिप्रकारस्य परामृश्यते ॥ अव्यक्तं प्रकृतिः ॥ महतः परमव्यक्तमिति प्रयोगात् ॥

त्वामेवं प्रकारेणोपासत इत्युभयत्रैवं शब्दस्यान्वय इत्याशयवानाह ॥ एवमिति ॥ दृष्टं श्रुतं च रूपं यस्य ब्रह्मणस्तत्तथा ॥ अव्यक्ताक्षरशब्दयोरपव्याख्यानं निराकर्तुमर्थं तावदाह॥अव्यक्तमिति॥प्रकृतिश्चेतना॥[illegible] तथा च [illegible] ॥[illegible] देवंभूतमित्युक्तविशेषणालाभाच्चेत्यत आह ॥ दृष्टं श्रुतचेति॥तत्प्रकृतिग्रहणं [illegible] ॥ चेतनेति॥अभिमानिव्यपदेशइति न्यायेन लक्ष्म्या त्रिगुणत्वादिकं घटयति॥

१प्राप्तश्रीरित्यर्थः॥उक्तेतिप्रत्येकमन्वेतीतिभावेन [illegible] दृष्टश्रुतरूपमित्यस्यप्रथमांत[illegible] ब्रह्मभगवतोरभेदश्चभाष्यएवाग्रेस्पष्टइतिभावः २ अ.२पा.१अ.३सू.१ ओंअभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम [illegible] अभिमानिनश्चेतनस्यैवव्यपदेशान्मृत्तयासामर्थ्यात् अभिमन्यमानेम[illegible] ज्यास्त्वाद्वेतिसूत्रार्थः.

॥ श्री० ॥ ननु येचाप्यक्षरमव्यक्तमिति गीतावचनमुल्लंघ्य [illegible] अक्षरमव्यक्तं [illegible] मिति [illegible] ॥ भवंति ॥ [illegible] ॥ प्रधानामिति शेषः ॥ विशेषणे ति ॥ [illegible] विशेष: ॥ प्राधान्यमेवोपपादयति । अव्यक्ता हीति । इत्यादिवचनादिति ॥ [illegible] नुवृत्तेरित्यर्थः ॥ ननु येचाप्यव्यक्तमित्यनुक्त्वा ऽक्षरमित्यव्यक्तविशेषणं कस्मादुक्तमित्यत आह । विशेषणादिति [illegible] प्रश्नमकृत्वा ये चाप्यक्षरमव्यक्तमित्यव्यक्तोपा सकोत्तमत्वविषयक एव प्रश्न: [illegible] सकोत्तमत्वविषयप्रश्नस्य समर्थनार्थं विशेषणोपादान मित्यर्थः ॥ एतदेवेति ॥ [illegible] त्रिगुणमव्यक्तमित्यादि [illegible] शांतिमान दमित्यादि [illegible] ॥ त्रिगुणमित्यादिना ॥

त्रिगुणं त्रिगुणाभिमानित्वात् ॥ [illegible] ॥ [illegible] प्रधानं प्राहुर्विशेषवत् कार्यवत् ॥ ततः प्रकृतिं प्राहुः [illegible] ॥ [illegible] ॥ अक्षरमिति विशेषणवाची अव्यक्ता सक्तचेतसाम् ॥ अव्यक्ता हि गतिरित्यादिवचनात् ॥ [illegible] व्याख्यानम् ॥ विशेषणोपादानं च देवतान्तरवैलक्षण्यप्रदर्शनेन

यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवदिति च भागवते ॥ अक्षरं च तत् ॥ अक्षरात्परतःपर इति श्रुतेः ॥ परं तु ब्रह्म न हि भगवतोऽन्यत् ॥ आनंदमानंदमयो ऽवसाने सर्वात्मके ब्रह्मणि वासुदेव इति भागवते

प्रश्नसंभावनार्थम् ॥ एतदेव भाष्यकृता [illegible] ॥ [illegible] वासुदेवमुपासते ॥ ये चाप्यक्षरमव्यक्तं परं ब्रह्म तेषां के योगवित्तमा इति व्याचक्षते ॥ [illegible] ॥ [illegible] ॥ आनंदमित्यादि [illegible] ॥ तथा च ये त्वां पर्यु पासते ॥ ये चत्वामित्युक्तं स्यात् ॥ [illegible] इति भावः ॥ ननु ये चाप्यक्षरमव्यक्तमितिपाठक्रमादक्षरशब्दं व्याख्यायाव्यक्तशब्दो व्याख्येयः ॥ [illegible] देवतान्तरऽभावादिति भावः ॥ नहि देवतान्तरवैलक्षण्यस्य [illegible] ॥ [illegible] ॥ अक्षरशब्दोपलक्षितमाहात्म्यप्रति पादनात्प्रपंचनम ॥ पूर्वर्णात ॥ [illegible] गतिमित्युत्तरेणान्वय इत्यर्थः ॥

॥ श्री० ॥ रूपम ॥ शरीरम् ॥ एतत् ॥ तथैवेत्यथ ॥ पराभ्युपगतस्येति ॥ निर्गुणत्वेनेति शेषः ॥ भाव्ये पुरस्तादिति ॥ न च तद्ब्रह्मणोऽशरीरत्वादेतत्कल्प्यं तस्यापि शरीरश्र
वणादित्यादिना द्वितीयाध्यायात इत्यर्थ ॥ एवमाकारमिति ॥ [illegible] साकारमित्यर्थ ॥ अन्यस्य ॥ निराकारत्वेनोपासनस्य ॥ इत्यादि ॥ आ
कारप्रतिपादकवाक्यस्येत्यर्थः ॥ ननु यदि [illegible] ब्राह्मणोऽस्य मुखमासीदित्यादि [illegible] तमेवं विद्वानिति वाक्योदाहरणं
त्वनुपपन्नमेकप्रकाराऽसकृदुक्तिरूपाभ्यासश्चात्र नास्तीत्यत आह ॥ अभ्यासशब्देनेति ॥ [illegible] परमात्मानं विद्वानमृतो मुक्तो भवति अन्यो
निराकारोपासनरूपः पंथा अयनाय नविद्यते [illegible] नियम [illegible] लक्ष्यत इत्यर्थः॥एवं च
यद्यप्यस्याः श्रुतेरनेकाकारप्रतिपादक [illegible] यःप्रतिज्ञातार्थस्तत्साधकत्वासि
द्ध्यर्थं तमेवेतिवाक्योदाहरणमितिभावः ॥ [illegible] शेषमाहेतीति ॥ यद्वा एकप्रका
राऽसकृदुक्तिरूपमुख्याभ्यासस्यात्राभावादाह ॥ अभ्यासशब्देनेति ॥ [illegible] ॥ [illegible] ॥ [illegible] भ्यामित्युक्तेरिति भावः ॥

ननु भगवान्करचरणादिमद्रूपवान् परंब्रह्म तु नेदृशरूपवत्॥ अशब्दमस्पर्शमरूपमित्यादिश्रुतेः ॥ अतः कथमेतदित्यत आह ॥ रूपं चेति ॥
पराभ्युपगतस्य ब्रह्मणोऽपीति शेषः ॥ अस्तु भगवानेव परं ब्रह्म किंतु त्वामेवं साकारमुपासते ये चाव्यक्तं निराकारं तेषां के योगवित्तमा
इति प्रश्नार्थ इत्यत आह ॥ उपासनं चेति ॥तथैव रूपवत्तयैव॥ स्यादयं प्रश्नार्थो यदि रूपवत्त्वारूपवत्त्वाभ्यां भगवदुपासनं कार्यं स्यात्

रूपं चेदृशं साधितं पुरस्तात् ॥ उपासनं च तथैव कार्यम् ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
॥ इत्यारभ्य तमेवं विद्वानमृत इहभवति नान्यः पंथा अयनाय विद्यत इति साभ्यासा ॥

न त्वेतदस्ति किं तु रूपवत्तयैवान्यस्य मिथ्योपासनत्वेनानर्थकत्वादिति भावः॥कुत एतदित्यत आह ॥सहस्रेति॥आरभ्येत्यनेन ब्राह्मणोऽस्यमुख
मासीदित्यादेः॥आदित्यवर्णं तमसस्तुपार इत्यादेश्च ग्रहणम्॥अभ्यासशब्देन तत्फलनियमो लक्ष्यते॥श्रुतिःसाकारोपासनंमोक्षसाधनमाहेतिशेषः

ननु सहस्रशीर्षेत्यादिश्रुतौ एकप्रकाराऽसकृदुक्तिर्नास्ति [illegible] आह ॥ अभ्यासशब्देनेति ॥ [illegible] ॥ तत्फलेति ॥ नियम इति ॥ अव
धारणमित्यर्थः ॥ तमेवं विद्वानितिश्रुतौ [illegible] न [illegible] इति भावः ॥

१ अग्रे अगंधवदित्युक्तेः सर्वत्रबहुव्रीहिरितिभावः ॥

॥ श्री० ॥ अतमस्कलादीनि ॥ आदि[illegible] ब्रह्मणस्त्वि[illegible] ध्येयम ॥ [illegible] शब्दवृत्त्यादित्यवर्णत्वादेर्यस्य कथमुपचारत्वोक्तिरित्य तआह ॥ उपचर्यन्तइति ॥ शब्देनोपचारवृत्त्या प्रतिपाद्यन्त इत्यर्थः । [illegible] न [illegible] ॥ नन्व [illegible] पुरुष इत्यादि[illegible] ॥ [illegible] ण सहस्रशीर्षत्वादिरिति वक्तव्ये आदित्यवर्णत्वादि [illegible] आह ॥ के चिदिति ॥ [illegible] ॥ [illegible] ॥ ओंकार इ ति ॥ [illegible] ॥

नन्वत्रोच्यमान आदित्यवर्णत्वादिराकार अतमस्कत्वादिसाहचर्यादुपचरितं एवेत्यत आह ॥ आदित्येति ॥ वृथा बाधकेन विना उपचर्यत इत्युपचार : ॥ के चित्सहस्रशीर्षत्वादिकं हिरण्यगर्भविषयमिति मन्यंते॥अतस्तन्निरास इत्यर्थविवक्षया स्वमतं गृहीतुमादित्येत्याद्युक्तम् ॥

आदित्यवर्णत्वादिश्च न वृथोपचारत्वेनाऽकार्यः॥ तथा च सामवेदे सौकरायणश्रुतिः॥स्थाणुर्ह वै प्राजापत्यः सप्रजाप तिं पितरमेत्योवाच॥मुमुक्षुभिः साधुभिः पुनपादैः किमु ह वै तारकं तारवाच्यम्॥ ध्यानं च तस्यात्मरुचेः कथं स्याद्धवे यश्च कः पुरुषोऽलोमपादइति तं होवाचेष वै विष्णुस्तारको लोमपादोध्यानं च तस्यात्मरुचेर्वेदाभि ॥

उपचारानर्हां चात्र श्रुतिमाह ॥ तथा चेति ॥ स्थाणुः रुद्रः प्राजापत्यः प्रजापतेरपत्यम् ॥ साधुभिः साधकैः तारकं संसारस्य ॥ तारः ओंकारः आत्मरुचेर्व्योमतेजसः ॥लोमेति केशवचनम्॥लोमपादैर्विहीनः॥न विद्यंते लोमानि पादा अवयवा यस्यासावलोमपादः॥तं स्थाणुमुवाच प्रजापतिः॥

॥ कृ० ॥ ननु शब्दवृत्तिविशेषस्यैवोपचारत्व [illegible] आह ॥ उपचर्यन्त इतीति ॥ कर्मणि [illegible] भाव ॥ ननु [illegible] सहस्रशीर्षत्वादिरिति वक्तव्ये कथमा दित्यवर्णत्वादिरित्युक्तमित्यत आह ॥ केचिदिति ॥ प्रजापतेरपत्यमिति ॥ [illegible] इति [illegible] भाव ॥ साधकैरि ति ॥ [illegible] इति भाव ॥ नन् [illegible] मत्यभिप्रेतम् ॥ न च लोमशब्देन [illegible] मरोमेत्यमरोक्तार्थग्रहणे निरवयवत्वलाभः वक्ष्यमाण[illegible] आह ॥ लोमेति केशवचनमिति ॥कचः केशः शिरोरुह इत्यमरोक्त[illegible] ॥ [illegible] ॥ ननु [illegible] लोमादि[illegible] ॥ बहुव्रीहौ त्वनवयवत्वलाभः ॥ त थाऽपि प्रकृतोपयुक्तं निरवयवत्वं न लभ्यत [illegible] बहुव्रीहौ नानुपपत्तिरिति भावः ॥ न विद्यन्त इति ॥ लोमपादशब्दयोर्लोमांतरादि लक्षत्वादिति भावः ॥ न च नियामकाभाव[illegible] लोमादेः पादानस्य च [illegible] किं न स्यादिति वाच्यम्। पादकेशयोरुत्पत्तिक्रमस्यैव नियामकत्वात् यथोक्तम् ॥ द्वाभ्यां चा इत्याद्यंग[illegible] ॥ [illegible] ॥

॥ श्री० ॥ आद्याद्वितीययोरिति ॥ [illegible] ॥ [illegible] ॥ तारकर्म्येवेति ॥ [illegible]
यद्यप्यमाविति ॥ [illegible] ॥ [illegible] तथा [illegible] एवनति । [illegible]
[illegible] । आधप्रायणेन [illegible] एव [illegible]
त्यर्थः ॥ ओमिति [illegible] । अत्रान [illegible]
[illegible]
कथं [illegible] ॥ [illegible] निराकारमिति [illegible]

सुवर्णः सुवर्णवर्णः ॥ अत्र [illegible] प्रश्नः ॥ [illegible] ॥ तस्य ध्यानं कथं स्यात् किं साकारत्वेनानिराकारत्वेन [illegible] ॥ तथा [illegible] न [illegible] स्यत्र मुमुक्षु [illegible] तस्य साकारत्वेनैव ध्यानं [illegible] ॥ [illegible]

सोऽनन्तरूपो [illegible] ॥

[illegible] पुराण इति ॥ [illegible] ॥ [illegible] प्रश्नादौ प्रतीयते ॥

का गतिरित्यत आह ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] न परोक्षः प्रश्नार्थ इत्याह ॥ [illegible] ॥ एव हि [illegible] ॥ [illegible] ॥ अनश्वेनव मित्यर्थः ॥ प्रश्न [illegible] कृतं

[illegible] कथं [illegible] ॥ [illegible]
[illegible] ॥ निराकाराणां

सगुणे मद्योपासके [illegible] दानिरिक्षाः एव
कस्य सर्वोत्कृष्टोत्तम [illegible] धर्मार्थे [illegible]
वं प्रश्नवाक्यात्स्यात् [illegible] मयाभ्यासादात्मा [illegible] ये युक्तत
मर्येव मन आवेश्य [illegible] निराकृतमित्यर्थ
॥ १ ॥ २ ॥ प्रश्नस्य [illegible]

किं च साकारोपास्तेनन विशुद्धाशय निराकारोपास्ति [illegible] परा सिद्धेति अथ [illegible] प्रतीयते
ततोऽपि नान्योऽर्थ इत्याह ॥ मय्येति ॥ [illegible] व्याख्यानमिति स्थितम् ॥ १ ॥ २॥

त्वां पर्युपासते ये चाप्यक्षरमव्यक्तमित्यादि ॥ १ ॥ २ ॥ भवंतु त्वदुपासका एवोत्तमाः ॥ इतरेषां

॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥ श्रद्धया परयोपेतास्ते मे युक्त
तमा मताः॥ २॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

तु किं फलमित्यत आह ॥ ये त्वित्यादिना ॥

एवं तर्हि मय्यावेश्येत्यनेनैव मदुपासका एवोत्तमा इति प्रश्नस्योत्तरं जातं किमुत्तरेण वाक्येनेत्यत आह॥ भवंत्विति॥ आक्षेपगर्भोऽयमभ्यु
पगमः ॥ न युक्तं त्वदुपासकानामेवोत्तमत्वमिति भावः॥ तदुपपादना यपृच्छति॥ इतरेषामिति ॥

॥ कृ० ॥ ते मे युक्ततमा मता इति प्रतिवचने [illegible] नामुत्तमत्वमुक्तं न तु [illegible] ॥ निराकारोपासकेभ्यः साकारोपासकानामुत्तमत्वांगीकारात् ॥ अत
उत्तरं निरवकाशमित्यर्थः ॥ ननु मय्यावेश्येत्युत्तर [illegible] ये त्वक्षरमित्यादिना परब्रह्मोपासकानां ते प्राप्नुवंति मामेवेति भगवत्स्वरूपत्वमुक्तं ज्ञानी त्वा
त्मैव मे मतमिति समाख्यानात्॥तस्य प्रतिवचनानुरूपत्वात्प्रश्नवाक्य [illegible] न [illegible] इत आह॥ इतरापव्याख्यानेति ॥ते मे युक्ततमा इति भगवतास्योपा
सकानामुत्तमत्वमुक्त्वा मय्येव मन आधत्स्वेत्यनेन मदुपासकानामेवोत्तमत्वान्मदुपासक एव भवेति स्फुटमुक्त्वा ब्रह्मोपासकानामाधिक्यंवदतामपव्याख्यानं निरस्तमित्यादिनिराकरणमित्यर्थः॥१॥२॥ ॥३२४॥

॥ श्री० ॥ उदाहृतश्रुतीति ॥ श्रियं वमाना अमृतत्वमायन्नित्युदाहृतश्रुतीत्यर्थः ॥ फलेति ॥ मोक्षरूपफलेत्यर्थः॥एषाम्॥ अक्षरत्वानिर्देश्यत्वादीनाम् ॥ उपपादितत्वादिति॥अव्यक्त प्रकृतिः अक्षरं च तत् इत्यादिनेत्यर्थः ॥ अप्रतर्क्यादिति ॥ प्रथमस्कंधे पादत्रयेणावस्थितगोरूपधर्मस्य वचनम् ॥ अप्रतर्क्यादनुमानागोचरात् ॥ पंचम्या अन्वयं दर्शयति ॥ धर्मस्य ममेति ॥ तथाचाप्रतर्क्यादनिर्देश्यात्धर्मस्य मम पादभंग इति केष्वपि निश्चय इति शेषपरणेनान्वयो द्रष्टव्य इत्यर्थः ॥ ईश्वरस्त्वितीति ॥ केचिद्विकल्पवचसआहुरात्मानमात्मना ॥ दैवमन्ये परे कर्म स्वभावमिति चापर इत्यत्र वाक्ये दैवशब्देनेश्वर उक्त इत्यर्थः ॥ दैवमाहुरित्युक्ते किमाहुरित्याशंकायां अध्याहार्यं दर्शयति ॥ दैवं पादभंगकारणमाहुरिति ॥ तथा चेति ॥ अनिर्देश्यपदेनापीश्वरोक्तावित्यर्थः ॥ एतदिति ॥ अव्यक्ताजरादिशब्दवाच्यमित्यर्थः ॥ ॥ कृ० ॥ उदाहृतेति ॥ श्रियं वमाना इत्याद्युदाहृतेत्यर्थः ॥ धर्मस्य म

अव्यक्तोपासकानां किं फलं मोक्षोऽस्तिनवा ॥ न चेदुदाहृतवाक्यविरोधः ॥ आद्ये कथं त्वदुपासकानामुत्तमत्वं फलसाम्यादिति भावः॥ नन्वेषां विशेषणानां ब्रह्मणोऽन्यत्रासंभवात् कथमितरेषां किं फलमित्यस्योत्तरत्वेन एतदवतार इत्यतोऽक्षराव्यक्तत्वयोर्मायायामुपपादितत्वात् तदन्यानि तत्रोपपादयन्ननिर्देश्यत्वं तावदुपपादयति ॥ अनिर्देश्यत्वंचेति ॥ शब्दागोचरत्वम् ॥ धर्मस्य मम पादभंग इत्यन्वयः ॥

अनिर्देश्यत्वं चोक्तं भागवते मायायाः॥अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयइति ॥ ईश्वरस्तु दैवशब्देनोक्तः॥दैवमन्ये परइत्यत्र॥उक्तं च सामवेदे कापायणश्रुतौ॥नासदासीन्नोसदासीत्तदानीमिति ॥ न महाभूतंनोपभूतं तदासीदित्याद्यारभ्य तम आसीत्तमसागूढमग्रे इति॥तमो ह्यव्यक्तमजरमनिर्देश्यमेषा ह्येव प्रकृतिरिति॥

नन्वत्रापीश्वरोऽस्त्वनिर्देश्य इत्यत आह ॥ ईश्वरस्त्विति ॥ दैवं पादभंगकारणमाहुः ॥ तथा च पुनरुक्तिः स्यादिति भावः ॥ न चदैवशब्दोऽदृष्टवाची ॥ तस्यापरे कर्मेति पृथगुक्तत्वात् ॥ मायाया अनिर्देश्यत्वे स्पष्टं च प्रमाणमाह ॥उक्तं चेति ॥ महाभूतमाकाशवायुरूपम्॥ उपभूतं तेजोबभलक्षणम्॥तदा प्रलयेअजरमित्यादिकं प्रलयेऽवस्थानस्योपपादकम्॥नचैतत् ब्रह्मेति प्रदर्शनायैषा ह्येवप्रकृतिरित्युदाहृतम् ॥

मेति ॥ शूद्ररूपकलिपीडितं च्छिन्नत्रिपादं वृषभरूपं धर्मं दृष्ट्वा परीक्षिता कस्मात्त्वपादभंगो जात इतिपृष्टे वृषभरूपधर्मवाक्यमिदम् ॥ तत्र केचिद्विकल्पवचस आहुरात्मानमात्मन इत्यतोऽनुवृत्तस्यात्मन इत्यस्यार्थो धर्मस्य ममेति॥पादभंगइत्यध्याहार इतिबोध्यम ॥ एवमग्रेऽपि बोध्यम् ॥ अपरे कर्मेति॥तथा चैवं पाठः ॥दैवमन्ये परे कर्म स्वभावमिति चापरे॥

स्वभावमपरे प्रभुमित्याधुनिकांकितभागवतपुस्तकपाठः प्रामादिकइति ज्ञेयम ॥२ स्कं. १ अ १७ श्लो १९ ॥ ३ अनिर्वाच्यादिति विजयध्वजपाठः ॥

॥ श्री० ॥ लक्षणशब्दस्यासाधारणधर्मवचनत्वात्सर्वगादीनां लक्षणत्वाभावादाह ॥ भावप्रधान इति ॥ ब्रह्मगः ॥ परब्रह्मणः तथा च त्र प्रकृतिरेव प्रतिपाद्येत्याशयः ॥ कुतो जडप्रधानमहदादेर्व्यावृत्तिरित्यत आह ॥ तस्य तत्प्राप्तीति ॥ अजरामृतत्ववाच्यविशेषणं जडप्रधानादेर्न संभवति ॥ तस्य जरादिप्राप्त्यभावेन निषेधायोगादित्यर्थः ॥ ध्रुवत्वेति ॥ उत्पत्त्यभावस्य स्वरूपतो देहतश्च नाशाभावस्य विशेषणत्रयेणोक्तत्वात् ध्रुवत्वसिद्धिरित्यर्थः ॥भव स्थितम्॥तथा चात्रत्य तत्रत्यमितिवत् असत्नित्यं (भवम्) स्थितं असत्यमिति तत्र भव इति तद्धितप्रत्ययांतः शब्द इत्यर्थः ॥ प्रधानमिति ॥ तथा च ललामादित्यस्य ब्रह्माद्यपेक्षया प्रधानादित्यर्थः ॥

इदानीं सर्वत्रगमित्यादिकं मायायामुपपादयितुमाह ॥ सर्वगेति ॥भावप्रधानो निर्देशः ॥ स्वरूपवाची वा लक्षणशब्दः ॥ नारायणगुणस्तदिच्छादिलक्षण आश्रयोयस्य तत्तथोक्तम् ॥ अनेन ब्रह्मणोव्यावृत्तिः ॥ अजरादमरादिति जडप्रधानादेः ॥ तस्य तत्प्राप्त्यभावात् ॥ अग्रा

सर्वगाचिंत्यादिलक्षणा हि सा ॥ तथाहिमोक्षधर्मे ॥ नारायणगुणाश्रयादजरादतींद्रियादग्राह्यादसंभवतः ॥ असत्यादहिंस्राल्ललामाद्द्वितीयप्रवृत्तिविशेषाद्वैरादक्षयादमरादक्षरादमूर्तितः ॥

ह्यान्मनसोऽप्यगोचरादित्यनेनाचिंत्यमिति सिद्ध्यति॥ असंभवतोऽक्षयादक्षरादिति ध्रुवत्वसिद्धिः ॥ असति प्रलयेभवमसत्यम् ॥ ललामं प्रधानम् ॥ द्वितीया भगवदेकाधीना प्रवृत्तिर्विशेषो यस्यतत्तथा ॥ अमूर्तितः प्राकृतदेहराहितात् ॥

॥ कृ० ॥ अप्रतर्क्यादिति ॥ स्वरूपवाचीति ॥ लक्षणं लक्ष्यमात्मा च स्वरूपमिति कथ्यत इति तृतीयस्कंधतात्पर्योक्तेरिति भावः ॥ षष्ठीसमासस्य बाधादाह ॥ नारायणगुण इति ॥ पुरुषोऽभूदिति वक्ष्यमाणमूर्त्यानुगुण्याय व्याचष्टे ॥ तदिच्छेति ॥ विशेषणकृत्यमाह ॥ अनेन ब्रह्मण इति ॥ परब्रह्मण इत्यर्थः ॥ नारायणेच्छोपजीवकत्वस्य तत्र बाधादिति भावः ॥ तत्प्राप्त्यभावादिति ॥ जडत्वेन जरादिप्रसक्त्यभावादित्यर्थः ॥ अक्षरादितीति ॥ देहनाशशून्यादित्यर्थः ॥ असति प्रलये भवमिति तृतीयस्कंधतात्पर्योक्तेः प्रलयवाचकादसच्छब्दात्तत्रभव इत्यर्थे दिगादिभ्योयदिति यत् ॥ भत्वाज्जश्त्वाभावश्चेति भावः ॥ लक्ष्मभूषापुंड्रपुच्छश्रेष्ठलिंगाश्वलिंगेषु ॥ ध्वज प्रभावे पुरुषे ललामोऽस्त्री ललाम वेत्युक्तेर्ललामशब्दस्यानेकार्थत्वात्प्रकृतोपयुक्तमर्थमाह ॥ प्रधानमिति ॥ एकापेक्षयाऽन्यत्र द्वितीयत्वसद्भावादिशेषोक्तयोग इत्यत आह ॥ भगवदेकेति ॥

१ अक्षयादक्षरादित्यस्यैकार्थ्यादाह॥ २मयूरव्यंसकादेराकृतिगणत्वाद्विशेष्यस्यपूर्वनिपातः॥३ गीतायाम् ४ गीतागतेतिभावः ॥५ प्रवृत्तिश्चविशेषश्चेतिद्वंद्वः॥ अनंतरंद्वितीयाधीनाप्रवृत्तिविशेषोयस्येति बहुव्रीहिरिति भावः॥द्वितीयाधीनाचसाप्रवृत्तिश्चेतिकर्मधारयः द्वितीयाचसाप्रवृत्तिश्चेतिवा॥एकाभगवत. द्वितीयात्वयैवेत्यर्थः ॥अनंतरं इतिविशेषोयस्येतिवाविग्रह इति भावः

॥ श्री० ॥ ननु शाश्वततमसइति विशेष्यस्य नपुंसकलिंगत्वात् अजरादित्यादिवत् सर्वस्मादिति स्यादित्यत आह ॥ **छांदस इति** ॥ पुरुषोऽभूदिति ॥ अनाद्यविद्यागुणत्रयात्मिकाप्रकृतिस्तदभिमानित्वाच्छाश्वततमःशब्दवाच्याया मायायाः सकाशात् पुरुषः पुन्नामा ब्रह्माऽभूदित्यर्थः ॥ **प्रत्यक्षेत्यादि** ॥ अप्रज्ञातमित्यनेन प्रत्यक्षावेद्यत्वं अलक्षणमप्रतर्क्यमित्यनेनानुमानावेद्यत्वं अविज्ञेयमित्यनेनागमावेद्यत्वमुच्यत इति द्रष्टव्यम् ॥ अनुमानावेद्यत्वप्रतिपादकेऽप्रतर्क्यत्वे अलक्षणत्वं हेतुरुच्यत इत्याशयेनाह ॥ **अवेद्यलक्षणत्वादिति** ॥ लक्षणस्यैव हेतूक्तव्यत्वेन तस्यावेद्यत्वे हेतोरज्ञानासिद्धिप्राप्त्याऽनुमानायोगादिति भावः ॥ **अनेनेति** ॥ प्रसुप्तमिवेत्यनेन सर्वगत्वमप्रज्ञातमित्यादिनाऽचिंत्यत्वं अभूतमित्यनेन ध्रुवत्वं सिध्यतीतिद्रष्टव्यम् ॥ गीतावाक्येन ॥ कूटस्थमित्यनेन ॥ **असंभवतीति** ॥ महालक्ष्म्यामनृताख्यदोषाभावादित्याशयः ॥ प्राक् **पठितमिति** ॥ कूटं खं त्रिदलं व्योम सन्निराकाश उच्यत इति षष्ठाध्याय इत्यर्थः ॥ आकाशे स्थितत्वं लक्ष्म्या अव्याकृताकाशाभिमानित्वादिति ज्ञेयम् ॥

सर्वस्याःसर्वगायाइति छांदसो लिंगव्यत्ययः ॥ अनाद्यविद्याभिमानित्वात् ॥ शाश्वततमसः पुरुषोऽभूदित्यन्वयः ॥ इदं प्रसिद्धं तमो मायाख्यं प्रलये सर्वतः प्रसुप्तमिव निर्व्यापारमासीत् ॥ अभूतमजातम् ॥ अप्रज्ञातमित्यादिना प्रत्यक्षानुमानागमवेद्यत्वाभाव उच्यते ॥ अवेद्य

सर्वस्याः सर्वकर्त्तुःशाश्वततमस इति ॥ आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत इति मानवे ॥ कूटस्थोऽक्षर उच्यत इति वक्ष्यति ॥ कूटे आकाशे स्थिता कूटस्था ॥

लक्षणत्वादप्रतर्क्यम् ॥ अनेन सर्वत्रगमचिंत्यं ध्रुवमिति सिध्यति ॥ गीतावाक्येन कूटस्थत्वं नित्यत्वं चेत् ध्रुवमिति पुनरुक्तिः ॥ कूटमनृतं तिष्ठत्यस्मिन्नित्यसंभवीत्यतआह ॥ कूटइति ॥ कूटशब्दस्याकाशवाचित्वेऽभिधानं प्राक्पठितम् ॥

॥ कु० ॥ **अप्रज्ञातमित्यादिनेति** ॥ आदिपदेनाप्रतर्क्यमविज्ञेयमित्यनयोर्ग्रहः अलक्षणमित्येतद्व्यर्थमनर्थकं चेत्यत आह ॥ **अवेद्येति** ॥ हेत्वर्थगर्भत्वान्न वैयर्थ्यं नञो वेद्यतापरत्वान्नानर्थक्यमिति भावः ॥ **नित्यत्वं चेदिति** ॥ एकरूपतया तु यः कालव्यापी सकूटस्थ इत्यमरोक्तेरिति भावः ॥ **कूटमनृतमिति** ॥ कूटं यंत्रेऽनृते राशाविति विश्वोक्तेरिति भावः ॥ **तिष्ठत्यस्मिन्निति** ॥ कूटशब्दे उपपदे सप्तम्यर्थे कविधानमिति ॥ तिष्ठतेरधिकरणे कः आतो लोप इटि चेत्यालोपः ॥ उपपदसमासश्चेति भावः ॥ **असंभवीति** ॥ लक्ष्म्या अनृताश्रयत्वायोगादिति भावः ॥ यद्वा ॥ अनृतस्यात्यंतासत्वेन तदाश्रयत्वासंभवादिति भावः ॥ **भाष्ये कूट आकाशे स्थितेति** ॥ कूटशब्दोपपदात्तिष्ठतेः सुपीति योगविभागात्कप्रत्यय इति भावः ॥

॥ श्री॰ ॥ ननु गीतानुसारेण कूट आकाशे स्थितं कूटस्थमितिवक्तव्ये कूटस्थेति कथं भाषितमित्यत आह ॥ **श्रुत्यनुसारेणेति** ॥ आकाशे संस्थितेत्यादिश्रुत्यनुसारेणेत्यर्थः ॥ **स्वपदेति**॥ भगवद्वक्षोरूपात् स्वस्थानात् कदाप्यभ्रष्टेत्यर्थः ॥ सर्वगेत्यनेन पौनरुक्त्यपरिहाराय व्याचष्टे ॥ **विश्वंगतामिति** ॥ **समर्थनार्थानीति** ॥ लक्ष्म्या एतादृशमहामहिमोपेतत्वेन तदुपासनस्य मोक्षसाधनत्वं युक्तमित्यर्थः ॥ ३ ॥ ४ ॥ **पक्षग्रहणमिति** ॥ इतरेषामव्यक्तोपासकानां किं फलमिति प्रश्ने अव्यक्तोपासकानां मत्प्राप्तिरूपमोक्षलक्षणं फलं भवतीति पक्षग्रहणमात्रं कृतमित्यर्थः ॥ मात्रपदव्यावर्त्यं दर्शयति ॥ **न त्विति** ॥ तर्हि फलसाम्यात् त्वदुपासकानामुत्तमत्वं नस्यादिति यस्तत्र दोषोऽभिहितस्तत्परिहारो न कृत इत्यर्थः ॥ **अभिप्रायेति** ॥ कथं तर्हीत्यनेनेत्यर्थः ॥ **उभयेषामिति** ॥ त्वदुपासकानामव्यक्तोपासकानां च भगवत्प्राप्तिलक्षणफलसाम्य इत्यर्थः ॥ एषा शंका ॥ कथं तर्हीति शंका कथं परिहृतेत्यत आह ॥ **पर्यादीति** अव्यक्तं पर्युपासते ॥ संनियम्येंद्रियग्राममिति पर्यादिशब्दप्रयोगेण ॥ अव्यक्तोपासनस्य कठिनत्वावगमात् मय्यावेश्य मनो ये मां नित्ययुक्ता उपासत इत्यत्रोपासत इत्येतावता भगवदुपासनस्य सुलभत्वावगमात् ॥ असुलभाव्यक्तोपासनकर्तृपेक्षया सुलभभगवदुपासनकर्तृणामुत्तमत्वं प्राप्तमेवेत्यर्थः ॥

तथाऽपिदाढर्याय श्रुत्युदाहरणम्॥श्रुत्यनुसारेण स्त्रीलिंगम्॥सा सर्वगेत्युक्तार्थे स्पष्टं प्रमाणम्॥निश्चला स्वपदादभ्रष्टा विश्वं गतमाश्रितमस्यामिति विश्वगा॥एतानि चोक्तविशेषणानि तदुपासनस्य मोक्षसाधनत्वांगीकारसमर्थनार्थानीति ज्ञेयम्॥३॥४॥नन्वितरेषांकिंफलमित्यस्य प्रश्नस्यते

आकाशे संस्थिता त्वेषा ततः कूटस्थिता मतेतिह्यृग्वेदखिलेषु॥सा सर्वगा निश्चला लोकयोनिः साचाक्षरावि

सन्नियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥ ५ ॥

श्वगा विरजस्केति सामवेदे गोपवनशाखायां॥३॥४॥कथं तर्हि त्वदुपासकानामुत्तमत्वमित्यत आह॥क्लेश इति॥ प्राप्नुवंति मामेवेत्युत्तरंदत्तम्॥तत्किमुत्तरेणेत्यत आह॥कथमिति॥पूर्ववाक्ये पक्षग्रहणमात्रं कृतम्॥न तु तत्राभिप्रेतस्य दोषस्य परिहारः॥अतः पूर्वपक्षिणाऽभिप्रायोद्घाटने कृते तत्समाधानमाहेति भावः॥तर्ह्युभयेषां फलसाम्ये॥यद्यप्येषा शंका पूर्ववाक्ये परिहृता॥पर्यादिपदप्रयोगात् ॥

॥ कृ॰ ॥ सर्वगेत्यनेन निश्चलत्वस्यार्थतो लाभादार्थिकपुनरुक्तिरित्यत आह ॥ स्वपदादिति ॥ सर्वगेत्यनेन पुनरुक्तिनिरासायाह॥विश्वंगतामिति ॥ गच्छतीतिगम् ॥ निरुपपदादपि गमेरन्येष्वपि दृश्यत इति डः ॥ सर्वोपाधिव्यभिचारार्थोपिशब्दात् ॥ ततो विश्वं गं यस्यामिति सप्तम्यर्थे बहुव्रीहिरिति भावः ॥ ३ ॥ ४ ॥

॥ श्री० ॥ **वक्ष्यतीति** ॥ तदेतत्सर्वमित्यत्रेत्यर्थः ॥ **साधनस्येति** ॥ अव्यक्तोपासका अधमाः अधिकक्लेशवत्त्वात् ॥ न चासिद्धो हेतुः ॥ अव्यक्तोपासका अधिकक्लेशवंतः असुलभाव्यक्तोपासनकर्तृत्वादितित्यनुमानमभिप्रेतं तेन चाधमत्वं सिध्यतीति तत्रपर्यादिशब्दप्रयोगेनोक्तःअसुलभाव्यक्तोपासनकर्तृत्वरूपो हेतुरव्यक्तोपासकानांस्वरूपकथनार्थमेव प्रयुक्तो न तु तेषां क्लेशवत्त्वरूपसाध्यसाधनायेति प्रतीतिः स्यात् ॥ साध्यस्य पूर्वमनुक्तत्वात् ॥ ततश्चाधमत्वं न सिध्येत ॥ अत एवं प्रतीतिमतः कथं तर्हीत्युक्तशंकाभवत्येवातोऽत्र परिहाराय साध्यमुच्यत इति भावः ॥ **अनेनेति** ॥ दुःखं हीति हिशब्देनेत्यर्थः ॥ **क्रियेति** ॥ अव्यक्ता हि गतिर्दुःखं यथा स्यात्तथा तदुपासकैराप्यत इत्यर्थ उक्तोभवति ॥ **अकर्तरि कारक इति** ॥ अकर्तरि च कारके संज्ञायामिति कर्तृभिन्ने कारके क्तिनप्रत्ययविधानात् क्तिनप्रत्ययांतो गतिशब्दः कर्तृव्यतिरिक्तकर्मकरणार्थकः ॥यथा सा परागतिरित्यत्र गम्यत इति कर्मव्युत्पत्त्या गम्यवाची गतिशब्दः शास्त्रं गतिरित्यादौ गम्यतेऽनेनेति व्युत्पत्त्या ज्ञानकारणार्थवाची दृष्ट इत्यर्थः ॥ **भावेचेति**॥ समीचीना गतिर्हस्येत्यादौ गमनं गतिरितिभावेपि प्रयोगो दृष्ट इत्यर्थः॥**उपायो मार्गः** ॥ तथा च करणव्युत्पत्त्यागतिशब्देनोपायो गृह्यत इत्यर्थः ॥ **गम्यार्थता** ॥ कर्मव्युत्पत्त्येति शेषः ॥ **एवमुच्यत इति**॥ गम्यतेऽनेनेति व्युत्पत्त्या अव्यक्ता हि गतिरित्युच्यत इत्यर्थः ॥ **भगवत्प्राप्तेरिति** ॥ अव्यक्तोपासकानामपीतिशेषः ॥ ॥ क० ॥ **वक्ष्यतीति** ॥ तदेतत्सर्वमित्यादिनेति शेषः ॥ **साध्यस्येति** ॥ अव्यक्तोपासकानामधमत्वरूपसा-

तथा च वक्ष्यति ॥ तथाऽपि साध्यस्यानुक्तत्वाद्धेतुवचनं स्वरूपकथनं मन्यमानस्य भवत्येव पुनः शंका ॥ उत्तरार्धे पदानां व्यवहितत्वादन्वयाप्रतीतौ तमाह ॥ अव्यक्तेति ॥ अनेन दुःखमित्यस्यक्रियाविशेषणत्वमुक्तम् ॥गतिशब्दस्याकर्तरि कारके भावे च प्रयोगादत्र विवक्षितमर्थमाह ॥ गतिरिति ॥ गम्यतेऽनेनेति व्युत्पादनादुपायोगतिरित्यर्थः ॥ ननु मार्गस्याव्यक्तत्वं कथमुच्यते ॥ कुतश्च गम्यार्थतागतिशब्दस्य त्य

अव्यक्ता गतिर्दुःखं ह्यवाप्यते ॥ गतिर्मार्गः ॥ अव्यक्तोपासनद्वारकोमत्प्राप्तिमार्गो दुःखमवाप्यत इत्यर्थः ॥

ज्यत इत्यत आह ॥ अव्यक्तेति ॥ अव्यक्तोपासनं द्वारं उपायो यस्यासौ तथोक्तः ॥ अव्यक्तोपासनानंतरभावि यद्भगवदुपासनं तदेवमुच्यते अनेनाव्यक्तशब्दस्तदुपासनं लक्षयति ॥ तेन च तद्वारकत्वंलक्ष्यतेगम्यार्थतायां च गतिशब्दस्याव्यक्ताख्यं गम्यमित्युक्तं स्यात् ॥ न च तद्युक्तम् ॥ ते प्राप्नुवंति मामेवेति भगवत्प्राप्तेरुक्तत्वादित्युक्तंभवति

ध्यस्येत्यर्थः ॥ **अकर्तरीति** ॥ स्त्रियां क्तिन्नित्यनेनकर्तृभिन्नकारके भावे च क्तिनोऽ विधानात् ॥ गतिशब्दस्य च क्तिन्नंतत्वादिति भावः॥ अव्यक्तापरोक्ष्यमप्यव्यक्तोपासनजन्यो भगवत्प्राप्त्युपायः॥ तत्र च वक्ष्यमाणं महादुःखमित्याह ॥ **अव्यक्तोपासनांतरभावीति** ॥ **एवमुच्यत इति** ॥ गतिरित्यनेनोच्यत इत्यर्थः॥**अनेनेति** ॥ अव्यक्तोपासनेत्यादिभाष्येणेत्यर्थः॥

॥ श्री० ॥ ततश्च नाव्यक्तस्य गम्यत्वमिति भावः ॥ उत्तरार्धेन ॥ अव्यक्ता हीत्यनेन ॥ षष्ठोक्तेति ॥ जीवचितः परमात्मनः सर्वस्य तन्निमित्तत्वस्य च सर्वत्रैकरूप्येणेत्याद्युक्तप्रकारेणेत्यर्थः॥नन्वव्यक्तापरोक्ष्यं ऋते न विष्णुप्रसाद इति त्वव्यक्तापरोक्ष्येणैवेत्यव्यक्तापरोक्ष्यमात्रस्यैव विष्णुप्रसादसाधनत्वमुक्तं उत्तरत्र तु सत्यपीत्यनेन भगवदुपासनस्य तत्साधनत्वमुच्यतेऽतोव्याहतीरित्यत आह ॥ अयोगेति ॥ अव्यक्तापरोक्ष्यं विष्णुप्रसादसाधनं नभवतीति नेत्येवमव्यक्तापरोक्ष्ये विष्णुप्रसादसाधनत्वायोग एव व्यवच्छिद्यत इत्यर्थः॥ नन्विति॥ अन्ययोगव्यवच्छेदो न भवतीत्यर्थः ॥ तेन न व्याघात इति भावः ॥ ननु भगवदुपासकानामपि भगवद्विशेषणत्वेनाव्यक्तोपासनसद्भावाद्विनेत्याद्ययुक्तमित्यत आह॥आद्यमिति ॥ भगवद्विशेषणत्वेन केवलाव्यक्तोपासनमित्यर्थः ॥ प्रवृत्तोऽयं मार्ग इति शेषः ॥भाष्येसुकरमपीति॥ दृष्टा च सा भक्तिमतीव विष्णोरुपासनी सर्वविघ्नान् छिनत्तीति वक्ष्यमाणप्रकारेण सुकरमित्यर्थः॥

अत्र पूर्वार्धेऽस्यमार्गस्याधिकतरक्लेशवत्त्वं प्रतिज्ञाय कथमित्यतस्तत्प्रसिद्धमित्युत्तरार्धेनोक्तम् ॥ तत्प्रसिद्धिं विवृणोति ॥अतिशयेति॥षष्ठोक्तप्रकारेण सर्वसमबुद्धिः॥ततः किमित्यत आह॥ऋतेचेति ।अयोगव्यवच्छेद एवायमुक्तो न तु तावन्मात्रेणेत्याह॥सत्यपीति ।तस्मिन्नव्यक्तापरोक्ष्ये

अतिशयेनोपासनं सर्वेन्द्रियातिनियमनंसर्वसमबुद्धिसर्वभूतहितेरतत्वातिसुष्ठाचारसम्यग्विष्णुभक्त्यादिसाधनसंदर्भमृते नाव्यक्तापरोक्षम् ॥ ऋते च न विष्णुप्रसादः॥ सत्यपि तस्मिन्नसम्यग्भगवदुपासनमृते ॥ ऋते च तं मोक्षः॥ विनाऽव्यक्तोपासनं भवत्येव भगवदुपासकानां मोक्ष इति क्लेशिष्टोऽयं मार्ग इति भावः ॥ तथाप्यपरोक्षीकृताव्यक्तानां सुकरं भगवदुपासनमित्येव प्रयोजनम्

सति विष्णुप्रसाद इति वर्तते ॥ ततोऽपि किमित्यत आह ॥ ऋतेचेति ॥ तं विष्णुप्रसादम् ॥ अस्त्वेवमव्यक्तोपासनद्वारकभगवत्प्राप्तिमार्गप्रकारः ॥ तथाऽपि कथमत्राधिकतरः क्लेश इत्यत आह ॥ विनेति॥ अव्यक्तोपासनमार्गम् ॥ अयमव्यक्तोपासनद्वारकः ॥ एवं तर्हि किमिति प्रवृत्तो येनार्जुनेनाशंकित इत्यत आह ॥ तथाऽपीति ॥

॥ कृ० ॥ षष्ठोक्तेति ॥ जीवानां चिद्रूपत्वेन तदन्तर्यामिपरमात्मनो गुणपूर्णत्वादिना सुहृदादिनिष्ठसुहृत्त्वादिभगवन्निमित्तकत्वेन च साम्यमिति षष्ठोक्तप्रकारेणेत्यर्थः ॥ ननु तत्पर्ति पुरुषोत्तमम् ॥ विज्ञायोपासते नित्यं नहि युक्ततमा मता इत्युक्तेर्भगवद्विशेषणत्वेनाव्यक्तोपासनमावश्यकं तत्कथमव्यक्तोपासनं विना भगवदुपासकानां मोक्ष इत्युच्यत इत्यत आह॥आद्यमिति ॥

॥ श्री० ॥ **साम्यमेवेति** ॥ नाव्यक्तोपासनद्वारकमार्गे क्लेश इत्यर्थः ॥ कुत इत्यत आह ॥ **अनेनेति** ॥ भगवदुपास्तौ सर्वविघ्नपरिहारेण सौकर्यरूपप्रयोजनेनेत्यर्थः ॥ **दुःखम** ॥ महता प्रयासेनाव्यक्तोपासनं कार्यमित्येकं दुःखं अनंतरं पुनरप्यायासेन भगवदुपासनं कार्यमिति द्वितीयमधिकमित्यर्थः ॥ अव्यक्तापरोक्षे यावान्प्रयासस्तावता प्रयासेनैव भगवदुपासनं कार्यमित्य यं न नियम इत्याह ॥ **पाक्षिकमिति** ॥ अयमप्येकः पक्ष इत्यर्थ ॥ कुत इत्यतः पक्षांतरस्यापि नैवोक्तत्वादित्याह॥ **ऊनेन वेति** ॥ यावानव्यक्तापरोक्षे प्रयासस्तदपेक्षयोनेन वेत्य र्थः ॥ तत्र न्यूनताप्रयुक्तापराधं भगवान् क्षमते अपि चेत्सुदुराचार इत्युक्त्यादिति ध्येयम्॥ एक इति शब्द इति॥ ददातीति चा॥सौकर्यमिति इति शब्दद्वयस्य सन्नादिकस्यनातिप्रसादेमे तीत्यतः परं संबंध इत्यर्थः ॥ **द्वावपीत्यादि** ॥ इतिनातिप्रसादमेतीतिहेतोरितिप्रकारेण वा स्वयमेव प्रयत्नेन ददातीतिहेतोरितिप्रकारेण वा भक्तानां भगवदुपासने सौकर्यमित्यर्थः ॥ भगवतः ॥ कृष्णस्य ॥ भाष्ये तदेतत्सर्वमित्यस्य ॥ अतिशयेनोपासनमित्यादुक्तं सर्वमित्यर्थः ॥ ननु सर्वत्र समबुद्धित्वादिः परिसंतरप्रशब्दैरन्यैः कथमेतत्सर्वमित्युक्तं इत्यत आह ॥ **उपलक्षणमेतदिति** ॥ इत्यादिनेत्यादिपदेन सर्वभूतहितरता इत्यस्य ग्रहणम् ॥

एवं तर्हि मार्गयोः साम्यमेव ॥ अनेन प्रयोजनेन क्लेशस्य समाधानादित्यत आह ॥ तत्रापीति ॥ अव्यक्तोपासनद्वारके मार्गेऽपिद्वितीयं भगवदुपासने दुःखं पाक्षिकमेतत ॥ ऊनेन वेत्युक्तत्वात ॥ इतश्चाव्यक्तोपासनद्वारके मार्गे भगवदुपासनात्क्लेशोऽधिकतर इत्याह ॥ इंद्रियेति ॥

॥ तत्रापि योऽव्यक्तापरोक्षे प्रयासस्तावता प्रयासेन यदि भगवंतं उपास्ते ऊनेन वा तदा भगवदपरो क्षमेव भवतीति द्वितीयमधिकम् ॥ इंद्रियसंयमाद्यूनभावे अत्युपासकस्यापि देवो नातिप्रसादमेति ॥ ॥ देवस्तु तानि साधनानि भक्तिमतः स्वयमेव प्रयत्नेन ददातीति सौकर्यमिति भक्तानां भगवदुपा ने ॥ इतरत्र च क्लेशोऽधिकतरः ॥ तदेतत्सर्वं पर्युपासते॥

नातिप्रसादमेतीत्यतः परमेक इति शब्दः॥द्वावपि हेतौ प्रकारार्थौ वा कुतोऽयं भगवतो भाव इत्यत आह ॥ तदेतदिति ॥ उपलक्षणमेतत

॥कृ०॥ऊनेनवेत्युक्तत्वादिति॥नचोनेनवेतिपक्षेऽव्यक्तोपासनद्वारकमार्गे कथमधिकतरक्लेश इतिवाच्यम॥भगवदुपासने तदनुकूल एक एव प्रयत्नः॥अव्यक्तोपासने तु पूर्वं तदनुकूलप्रयत्नः॥ ततो भगवदुपासनार्थं यत्न इति द्वौयत्नौ॥अतः क्लेशाधिक्यमित्याशयात॥सर्वसमबुद्धित्वसर्वभूतहितरतत्वयोरर्थमाह॥उपलक्षणमिति॥इत्यादिनेत्यादिपदात्सर्वभूतहितेरता इत्यस्य संग्रहः॥

॥ श्री० ॥ उपलक्षितमर्थमुपपादयति ॥ **सर्वत्रेत्यादिनेति** ॥ **सर्वत्यादिकमिति** ॥ सर्वसमबुद्धिसर्वभूतहितरतत्वेत्युक्तं प्रतीयत इत्यर्थः ॥ **तरपेति** ॥ अधिक [illegible] इत्युक्ततरपेत्यर्थः ॥ **अव्यक्ता गतिरित्यनेनेति** ॥ गतिशब्दोक्तभगवदुपासनस्य व्यक्तशब्देन [illegible] ऽव्यक्तोपासनद्वारकत्वरूपव्यवधानस्योक्तत्वादिति भावः ॥ **अवधारणेनेति** ॥ अव्यक्तोपासका मामेव प्राप्नुवंति न तु मध्ये प्रयासांतरमनुभवंतीत्युक्त्याऽव्यक्तापरोक्ष्यभगवत्प्राप्तिमध्ये भगवदुपासने सौकर्यसूचनादितिभावः ॥ **इंद्रियेति** ॥ इंद्रियसंयमसाधनभाव इत्यादिभाष्योक्तदेवतासाहाय्याभाव इत्यर्थः ॥ उपासकस्य इंद्रियसंयमः [illegible] देवी न [illegible] उपासकस्य सर्वेंद्रियसंयमादौ सति प्रमादसंभावना प्राप्ते ॥ अव्यक्तोपासकैः स्वसर्वेंद्रियनियमनं स्वैरेव कर्तव्यं तत्र च न देवतासहायोऽस्ति ईश्वरोपासकानां [illegible] तदभिमानिदेवत प्रेरणद्वारा ईश्वर एव सहकारीति भावः ॥ नन्वेवमव्यक्तोपासकानां क्लेशातिशयो गीतायां भगवदुपासकानां तदभावो न प्रतीयत [illegible] कथमुक्तमित्यत आह ॥ **भगवदुपासनेत्वाते** ॥ **उत्तरत्रेति** ॥ मदुपासकानां भक्तानामित्यादिनेत्यर्थः ॥ तेषामित्यादीत्यत्रादिपदेनेतरेषामित्यस्य ग्रहणम् ॥ **तृतीयार्थइति** ॥ तथा [illegible] भवति ॥ प्रीतिशब्दस्य [illegible] शब्दोऽपिशब्दार्थः सर्वस्येत्यनेन संबध्यत इत्यभिप्रेत्याह ॥ **सर्वस्यापीति** ॥ भगवदुपासनाधिक्यं गुणत्वस्य सौलभ्यादौ [illegible] ॥ न्यूनत्वमपीति ॥

सर्वत्र समबुद्धय इत्यादिनेत्यपि द्रष्टव्यम् तत्र परीत्यनेनोपासकस्यातिशयः ॥ समित्यनेनेंद्रियनियमस्यातिशयः ॥ सर्वत्रेत्यादिना सर्वत्यादिकम् ॥ तरपाऽतिसुष्ठाचारादिकम् ॥ अव्यक्तागतिरित्यनेन तदन्तेवत्यादिव्यवधानम् ॥ मामेवेत्यवधारणेन तथापीत्यादिकं प्राप्नुवंतीति स्वातंत्र्योक्त्येंद्रियसंयमादिति देवतासहायाभावः ॥ भगवदुपासने त्वेतदभावो यथा गीतोक्तस्तदुत्तरत्र प्रदर्शयिष्यते ॥ आगमांतरसिद्धत्वा

सन्नियम्याधिकतर इति परिसंतरपशब्दैः प्रतीयते ॥ सामवेदे माधुच्छंदशाखायां चोक्तम् ॥

द्यार्थंभवति ॥ भगवदभिप्राय इत्याह ॥ सामवेदइति ॥ तेषामित्यादिषष्ठी तृतीयार्थे ॥ विदित्वा साक्षात्कृत्य ततो वेदनात्प्रसन्नात्ततोवा सुदेवात् ॥ यावता प्रयासेन तत्प्रसादोऽव्यक्तप्रसादः सर्वस्यापीति द्वितीयस्तुशब्दोऽपिशब्दार्थे आधिक्यशब्देन न्यूनत्वमप्युपलक्ष्यते ॥

॥ कु० ॥ तदेतत्सर्वं परीत्यादिभिः प्रतीयत इत्युक्तम् ॥ तत्र किं प्रतीयत इत्यत आह ॥ **सर्वत्रेति** ॥ सर्वत्र प्रतीयत इति पूर्वेणान्वयः ॥ **तरपेति** ॥ परीत्यादिनोपासनातिशयादेः प्रतिपादनलाभेऽपि पुनस्तरपप्रयोगेणातिसुष्ठाचारविष्णुभक्त्यादिकं प्रतीयते ॥ अन्यथा तदैयर्थ्यादिति भावः ॥ **अव्यक्ता गतिरित्यनेनेति** ॥ अव्यक्तगतिशब्दयोः प्रतीतार्थानुपपत्त्या लक्षणाकरणव्युत्पत्तिस्वीकारे तत्पर्यालोचनया व्यवधानं प्रतीयत इत्यर्थः ॥ **अवधारणेति** ॥ अव्यक्तोपासका मामेव प्राप्नुवंति न तु प्रयासांतरमनुभवंतीत्युक्त्याऽव्यक्तापरोक्ष्यभगवत्प्राप्तिमध्यस्थभगवदुपासने सौकर्यसूचनादिति भावः ॥ [illegible] ॥ [illegible] कर्तृत्वमुक्तं तच्च स्वातंत्र्यमेवास्वतंत्रकर्तृत्वे ॥ [illegible] च परानपेक्षत्वं तथा च प्राभाविकसहायाभावोगम्यते ॥ अत्रचोपास्यदेवता लक्ष्मीरेवेतर ॥ [illegible] सहायाभाव प्रतीयत इत्यर्थः ॥ उपासनाधिक्यं भगवतोगुणत्वे नतेनकथं भगवदुपासने सौलभ्यमित्यत आह ॥ न्यूनत्वमपीति ॥

॥ श्री० ॥ उपासनान्यूनत्वमपि लक्षणया ग्राह्यमित्यर्थः ॥ एतेनार्थेनैव पर्याप्ते उक्तेन नेत्युक्तमिति भावः ॥ ननु न्यूनोपासनायाः प्रत्यवायप्रापकतया कथं तस्याः भगवत्प्रसादाख्यगुणद त्वमित्यत आह ॥ न्यूनाधिकयोरिति ॥ न्यूनाधिकोपासनयोरन्यत्रान्यकविषय एव प्रत्यवायहेतुत्वं न भगवद्विषय इत्यर्थः ॥ अत एवेंद्रियसंयमनाद्यनुभावेऽप्युपासकस्य देवो नाति प्रसादमेतीत्याशुक्तमिति द्रष्टव्यम् ॥ ममेति ॥ ब्रह्मणि ॥ ब्राह्मणे॥ शंकाहेतुत्वेनेति ॥ संशयहेतुत्वेनेत्यर्थः ॥

न्यूनाधिकयोरन्यत्र प्रत्यवायहेतुत्वात् ॥नाव्यक्तादेरिति पाठे मध्ये इत्युपस्कारः॥ ममोपासनेनात्मभावं कैवल्यं परमात्मने तमुद्दिश्य॥अस्यवाक्यस्य कथं प्रकृतोपयोग इत्यत उक्तम् ॥ श्रीवचनमिति ॥ नित्यं नियते ब्रह्मण्ये ब्रह्मणि साध्वी निवसामि प्रसन्ना भवामीति च श्रीवचनमि

भक्ताश्च येऽतीव विष्णावतीव जितेंद्रियाः सम्यगाचारयुक्ताः॥उपासते तां समबुद्धयश्च तेषां देवी दृश्यते नेतरेषाम्॥दृष्टा च सा भक्तिमतीव विष्णौ दत्वोपास्ते सर्वविघ्नान्छिनत्ति॥उपास्य तं वासुदेवं विदित्वा ततस्ततः शांतिमत्यंतमेति॥उक्तं च सामवेदे अथास्यशाखायाम्॥प्रसन्नो भविता देवः सोऽव्यक्तेन सहैव तु॥यावता तत्प्रसादो हि तावतैव न संशयः॥न तत्प्रसादमात्रेण प्रीयते स महेश्वरः॥तस्मिन्प्रीते तु सर्वस्य प्रीतिस्तु भवति ध्रुवम्॥यद्यप्युपासनाधिक्यं तथापि गुणदो हि सः ॥ मुक्तिदश्चसएवैको नाव्यक्तादिस्तु कश्चनेति ॥ममात्मभावमिच्छंतो यतंते परमात्मन इति मोक्षधर्मे श्रीवचनम् ॥ धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि॥प्रश्रिते दानशीले च सदैव निवसाम्यहमिति च ॥महतः परं तु ब्रह्मैव ॥ तथा हि भगवता सयुक्तिकमभिहितम्॥ॐवदंतीति चेन्न प्राज्ञो हि ॐ॥त्रयाणामेव चैवमुपन्यासः प्रश्नश्चेत्यादि॥

ति संबंधः ॥ पूर्वं शंकाहेतुत्वेन श्रियं वसाना इत्यादीनि वाक्यान्युदाहृतानि तेष्विदमेकं नाव्यक्तविषयमिति वस्तुस्थितिमाह ॥ महत इति

॥ कृ० ॥ अन्यत्रेति ॥ अव्यक्तविषय इत्यर्थः ॥ प्रत्यवायेति ॥ प्रत्यवायोत्पादकत्वप्रसक्तिः ॥ अनुपासकस्यापि देवो नातिप्रसादमेतीत्युक्तत्वादिति भावः ॥ फलेभ्यो यातीतिवत् क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थीति भावेनाह ॥ तमुद्दिश्येति ॥ कस्मिन्नर्थे भवति ॥ तत्प्रसादयितुमित्यर्थः ॥ नियत इति॥ ध्रुवनेधुर इति वार्तिकोक्तेर्नित्यशब्दस्य ध्रुवत्वावगमादिति भावः ॥ ब्रह्मणि साध्वीति ॥ तत्र साध्विति यत्प्रत्यय इति भावः ॥ प्रकृतानुपयोगादाह ॥ वस्तुस्थितिमिति ॥

॥ श्री० ॥ ननु महतः परमव्यक्तमित्यव्यक्तस्यापि महतः परत्वोक्तेः कथं ब्रह्मत्वेत्यवधारणमित्यत आह ॥ अनाद्यनन्तमिति ॥ कूटस्थोऽक्षर उच्यत इत्यत्र [illegible] पुल्लिङ्गनिर्देशस्य सत्वेन तमिति पुल्लिङ्गनिर्देशरूपयुक्तेः स्वातन्त्र्येणाभिप्रेतार्थसाधकत्वाभावादाह ॥ अभ्युच्चयेति ॥ एवं [illegible] ॥ भाष्ये तदुत्तमिच्चाद्याह [illegible] महतःपरं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति श्रुत्यैव वदन्तीति चेन्न ॥ प्राज्ञः परमात्मा हि [illegible] ॥ अणोरणीयान्महतो महीयानिति [illegible] ऽपि परत्वमुच्यत इति वदन्तीति चेदिति सूत्रार्थः ॥ त्रयाणामेव [illegible] प्रश्न उपन्यासश्चेति ॥ त्रयाणामिति सूत्रार्थश्च [illegible] ॥ उक्तपरामर्शेति ॥ अव्यक्तं च महतः परं महतः परमव्यक्तमित्युक्तपरामर्शोपपत्तेरिति ग्रंथेनेत्यर्थः ॥ पूर्वपक्ष ॥ अव्यक्तपरत्वांगीकारपक्षे ॥ अथ परामर्श ॥ [illegible] दैहतो यज्ञाद्यावाहन इत्यर्थः ॥ तत्वमेव नास्तीति ॥ आनुमानिकमप्येकेषामिति चेन्न [illegible] सूत्रेण [illegible] पादके तत्र प्रमाणाभावेनार्थान्नास्तीत्युक्तमिति भावः ॥ तद्विषयतयेति ॥ [illegible] कथं व्याख्यानमित्यर्थः ॥ [illegible] ॥ ननु [illegible]

अनाद्यनन्तं महतः परमिति वाक्यप्रतिपाद्यमिति यावत् ॥ अत्राभ्युच्चययुक्तिंचाह ॥ तमिति ॥ ननूक्तपरामर्शोपपत्तेरिति पूर्वपक्षेऽपियुक्तिरुक्तेत्यतः साऽन्यथासिद्धेत्याह ॥ महतइति ॥ तथा चोक्तवक्ष्यमाणबलादव्यक्तात्पुरुषः परइत्युक्तस्यायं परामर्शइतिभावः ॥ श्रुत्यंतरेणवं व्याख्या

तमिति पुल्लिंगाच्चैतत्सिद्धिः ॥ महतः परत्वं तु अव्यक्तपरस्य भवत्येव ॥ तथा चाग्निवेश्यशाखायाम्॥ अनाद्यनंतं महतः परंध्रुवमिति ॥ परो हि देवः पुरुहूतो महत इति ॥ नचाव्यक्तरूपं भगवता निषिद्धं भारतादौ साधितत्वात् ॥

तत्वाच्चैतद्वाक्यं तत्परमित्याह ॥ तथाचेति ॥ पुरुभिर्हूतः पुरुहूतः ॥ नन्वव्यक्तंनाम तत्वमेवनास्तीति सूत्रकृतोक्तं ततस्तदभिमानिन्यव्यक्ताख्यादेवताऽपि नास्ति तत्कथंतद्विषयतया व्याख्यानमित्यतआह ॥ नचेति ॥ ब्रह्मेत्यवधारण ॥ महतः परमव्यक्तमिति श्रुतावव्यक्तस्यापि महतः परत्वोक्तेरित्यत आह ॥ अनाद्यनंतमिति॥ पूर्वपक्ष इति ॥ [illegible] ॥ ननु पुरुहूतः परेश [illegible] भगवतः कथमित्यत आह ॥ पुरुभिर्हूत इति [illegible] ॥ तत्वमेव नास्तीति ॥ नानुमानिकमित्यनेन [illegible] ॥ अनुमानस्य न प्रामाण्यमिति [illegible] ॥

---

१ उपास्य ॥ २ श्रुति ॥ ३ अव्यक्तस्यप्रधानाख्यस्य [illegible] ॥ ४ हेतो ॥ ५ तस्याश्रुतौ ॥ ६ [illegible] प्रकारेण ॥ ७ [illegible] ॥ ८अनुमानगम्यंप्रधानादिरेवकेषांचिच्छाखामूच्यतेइतिचेन्न ॥ [illegible] ॥ शरीररूपकेति [illegible] प्रधानादिष्वितरस्यब्रह्मणोऽव्यक्तादिशब्दैर्ग्रहणादन्यत्र (प्रधानादौ) अव्यक्तादिशब्दव्यवहारइतिसूत्रार्थः ॥

॥ श्री० ॥ **तत्सूत्रम्** ॥ तत्स्वरूपनिषेधकमानुमानिकामिति सूत्रमित्यर्थः॥**एकं प्रयोजनमिति** ॥ अव्यक्तोपासनद्वारकभगवत्प्राप्तिमार्गस्य निषिद्धतया भगवदुपास्तिमात्रैकगम्यरूपप्रयोजनमित्यर्थः॥**उपासीनाये इति**॥तेनसमानकर्तृकत्वलाभ इत्याशयः॥नन्विदंप्रयोजन तथापि तिवाक्यानतर तत्रा निश्चितप्रतिपत्तव्यं उपवर्णनमात्रं का क्षतिरित्यत आह एतत्प्रयोजनमिति। ५ ॥

तर्हि कथं तत्सूत्रमित्यत आह ॥ शरीरेति ॥ सांख्यप्रसिद्धं प्रधानमिति स्वतंत्रं मुख्यतः शब्दवाच्यमित्यर्थः ॥ वैदिकामिति भगवदधीनं तत्संबंध न शब्दवाच्यमित्यर्थः ॥ अत्र श्रुतिंचाह ॥ तथा चेति ॥ प्राक् तथाऽप्यपरोक्षीकृताव्यक्तानामित्यादिनैकं प्रयोजनमुक्तम्॥ अपरं च सप्रमा

शरीररूपकविन्यस्तगृहीतेरित्यादौ तु सांख्यप्रसिद्धं प्रधानं निषिध्य वैदिकमव्यक्तमेवोक्तम् ॥तथा च सौकरायणश्रुतिः शरीररूपिका अशरीरस्य विष्णोर्यतः प्रिया सा जगतः प्रसूतिरिति ॥ सुव्रतानां क्षिप्रं महदैश्वर्यं ददाति देवी न देव इति विशेषः ॥ सुवर्णवर्णां पद्मकरां च देवीं सर्वेश्वरीं व्याप्तजडां च

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते॥ ६

बुध्वा ॥ सेवेति वै सुव्रतानां तु मामान्महाविभूतिंश्रीस्तुदद्यान्न देव इत्यृग्वेदखिलेषु ॥ ॥ ५ ॥

मदुपासकानां भक्तानां न कश्चित्क्लेश इति दर्शयति ॥ ये त्वित्यादिना ॥

णकमाह ॥ सुव्रतानामिति ॥ बुध्येत्युक्तप्रकारेणोपासीना यदतिशेषः ॥ एतत्प्रयोजनं गीतायां न सूचितमितिन तत्रैवोक्तम् ॥ ५ ॥ नन्वव्यक्तोपासकानां क्लेशातिशयो गीतायां प्रतीयते भगवदुपासकानां तु तदभावो न प्रतीयते अतस्तदेतत्सर्वमितिकथमुक्तमित्यत आह॥मदुपासकानामिति

॥क्ल०॥ननु तत्तच्छ्वाद्यभिप्रेतप्रकारभेदेऽपि प्रधानमेकमेव तत्कथं सांख्यप्रसिद्धं प्रधानमित्याद्युक्तमित्यत आह॥स्वतंत्रमिति॥भगवदधीनामिति च मैत्रेयीत्युक्तेतिशब्दस्यार्थं समानकर्तृकतानिर्वाहकाध्याहारं च दर्शयति ॥ बुध्येत्युक्तप्रकारेणोपासीना ये इति ॥ ये उपासीनास्तेषां सुव्रतानामित्यन्वयः ॥ उपासीनायेति टीकायां तनुर्थंतपाठं भाष्ये एनीति पाठं चाश्रित्य भावबोधे उपासीनाय एत्येव प्रसन्ना भवत्येवेत्युक्तमिति मंतव्यम ॥ ५ ॥

१ अ० १ पा० ४ अ० १ सू० १ । २ श्वे.कट्येन ॥ ३ ऋग्वेदखिलश्रुतौ सेवेति त्यत्र सेवामि इति ॥

॥ श्री० ॥ भक्तानामित्यनेनेति ॥ भक्तत्वेनादरसूचनेनेत्यर्थः ॥ अन्यत्रेति ॥ इंद्रियसंयमनादावित्यर्थः ॥ विनेति ॥विनाऽव्यक्तोपासनं भवत्येव भगवदुपासकानां मोक्ष इति पूर्वोक्तमि त्यर्थः ॥ इत्येवेति ॥ परोक्षसमर्थं विनेत्यर्थः ॥ ननु विनाऽव्यक्तोपासनमित्यादिकमयुक्तं ॥ ये त्वित्यादिनाऽपि प्राकरणत्वादेव तत्श्लोकव्याख्यानावसर एव तदुक्तव्यं न पूर्वमित्यत आह॥ आ गामीति ॥ श्रुतौ तेषामव्यक्तादेः सकाशाद्भिन्नत्व फलं किं नु न किमपि सर्वेभ्योऽपि भिन्नं वासुदेवादेव भवतीत्यर्थः ॥ आर्तादीनां मध्य इति ॥ मोक्षधर्मे पूर्वमार्तादीनां प्रकृतत्वादिति भावः निराशीःष्विन कर्मकारिणामेकांतिनामहमेव गति प्राप्य इत्यथो न युक्त ॥ ते प्राप्नुवंतीत्यव्यक्तोपासकानामपि भगवत्प्राप्तिसद्भावेन तेषामिति विशिष्योक्त्ययोगात् ॥ देवस्तु ता नि साधनानीति प्रकृतार्थानुपपादकत्वेनासंगतत्वेऽत्यतः प्रकृते योगमित्यत्र ऽर्थ माह ॥ साधनादिसंपादक इति ॥ अनेन देवस्त्वित्यादिकं प्रमाणितं भवतीति ज्ञेयम् ॥ ६ ॥ ७ ॥८ ॥

भक्तानामित्यनेन नान्यथाऽत्यंतमादर इतिसूच्यते ॥ अथानन्येनैव योगेनेत्यादिना विनाऽव्यक्तोपासनमित्येतत्प्रतीयते ॥ उपासत इत्येवोक्त्या ऽतिशयोपासनाद्यभावः ॥ नचिरादित्यनेन नतावत्स्यादिकम् ॥ तेषामहं समुद्धर्तेत्यनेन देवस्त्वित्यादिकंआगामिगीतावाक्यमपेक्ष्यप्रा

उक्तं च सौकरायणश्रुतौ ॥ उपासते ये पुरुषं वासुदेवमव्यक्तादेर्भिन्नं किन्तु तेषामिति ॥ तेषामेकां

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्॥७

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ॥ निवसिष्यसि मय्येवअत ऊर्ध्वं न संशयः ॥८

तिनः श्रेष्ठास्ते चैवानन्यदेवताः ॥ अहमेवगतिस्तेषां निराशीः कर्मकारिणामितिच मोक्षधर्मे॥६॥७॥८॥

प्त्युध्यारोहायेतदुक्तमिति ॥ अत्रश्रुत्यादिसंमतिं चाह ॥ उक्तंचेति ॥ तेषामार्तादीनां मध्येगतिःसाधनादिसंपादकः ॥ ६ ॥ ७ ॥ ८ ॥

॥ कृ० ॥ अन्यत्रेति ॥ इंद्रियसंयमनादावित्यर्थः ॥ ननु भगवदुपासनेन मोक्ष इत्यादनमत्र व्यर्थ श्लोकाद्य जाते उक्तोपपादनस्य सुज्ञानत्वात् ॥ न तु पूर्वत्रेत्यत आह ॥ आगामीति॥ मोक्षधर्मे चतुर्विधा मम जना भक्ता एवं हि मे श्रुतमित्यार्तादीनां पूर्वं प्रकृतत्वादत ॥ आर्तादीनामिति ॥ ननुअव्यक्तोपासकानामपि भगवानेव गम्यः तत्किमहमेव गतिस्तेषां इति वि शिष्योच्यत इत्यत आह ॥ साधनादीति ॥ ६ ॥ ७ ॥ ८ ॥

१ निबोहि ॥ मामुपासस्वेतियावत् २ तदर्थमहिंद्रियकं ज्ञानसंपादय ३ निर्दुःखानंदानुभवात्मस्थितिप्राप्स्यसि ॥ ४ मदाधारत्वेन

॥ श्री० ॥९॥१०॥११॥अभ्यासोध्यानं॥तत्कथमिति॥ न हि फलान्साधनं श्रेय इति भावः ॥एवेति केवलमिति॥ध्यानप्रकारमज्ञात्वा कृताद्भ्यासाद्ध्यानाज्ज्ञानमेव केवलं ध्यानप्रका
रज्ञानमेव विशिष्यत इत्यर्थः ॥ अत्र सर्वत्रापि ज्ञानशब्देन ध्यानप्रकारज्ञानमेव विवक्षितमिति ध्येयम ॥ ननु ज्ञानमात्रात्मज्ञानं ध्यानमितिभाष्येण ज्ञानाद्ध्यानंविशिष्यत इत्य
त्रत्ययोर्ज्ञानध्यानशब्दयोः किमितिविशेषपरत्वमुच्यत इत्यतस्तन्निवर्तनीयामाशंकामाह ॥ ज्ञानाद्ध्यानमिति ॥

॥३॥१०॥११॥ननु ज्ञानमभ्यासस्य साधनं तत्कथं ततः श्रेयइत्यत आह ॥ अज्ञानेति एवेति केवलम् ॥ ज्ञानाद्ध्यानं विशिष्यत इत्यसत् ॥

॥ ९ ॥ १० ॥ ११ ॥ अज्ञानपूर्वादभ्यासाज्ज्ञानमेवविशिष्यते ॥

अथ चित्तं समाधातुं न शक्नोषि मयिस्थिरम्॥अभ्यासयोगेन ततोमामिच्छाप्तुंधनंजय॥ ९ ॥अ
भ्यासेऽप्यसमर्थोसि मत्कर्मपरमोभव ॥मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥अथैतद
प्यशक्तोऽसि कर्तुमद्योगमाश्रितः ॥ सर्वकर्मफलत्यागंततः कुरुयतात्मवान् ॥ ११ ॥ श्रेयोहि
ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम् ॥ १२ ॥

॥ कृ० ॥ ९ ॥ १० ॥ ११ ॥ ननु श्रवणमननात्मकशास्त्राभ्यासाज्जन्यतत्त्वनिर्णया सकाशात् [illegible] सिद्धमेव तन्निमर्थं श्रेयो हिज्ञानमभ्यासादित्यभ्यासपदं विशेषपरतया भाष्ये
व्याख्यातमित्याशंक्य व्याख्यातवीजमाह [illegible] ॥ ननु ज्ञानमिति ॥ श्रवणमननजन्यम् [illegible] निर्णय इत्यर्थ ॥ अभ्यासो नाम शास्त्राभ्यासः ॥ सद्विवि ॥ श्रवणमननजन्यतत्त्वज्ञा
नपूर्वभावी तदुत्तरभावीच ॥ आद्य श्रवणमननरूपः॥ [illegible] श्रवणमननं [illegible] निदिध्यासनात्मकरूप॥निदिध्यासनया [illegible] ॥ द्विविधा [illegible] संप्रोक्ता॥विष्णुशा
स्त्रावमर्शनम ॥ एकं ध्यानं हरेरन्यच्च [illegible] ॥ [illegible] ननु श्रवणादिजन्यतत्त्वज्ञानाद्ध्यान
स्योत्तमत्वं सिद्धमेवतत्कुतोभाष्ये ज्ञानध्यानशब्दयोर्विशेषपरत्व [illegible] ॥ज्ञानाद्ध्यानमिति ॥ज्ञानमात्रात् [illegible] ध्यानसामान्यस्योत्तमत्वं नायुक्तमित्यर्थः ॥

१ सत्यपिज्ञानेभगवतिमनसः स्थिरत्वमाधातुमशक्यभावात ॥ [illegible] ॥ २ मद्विषयकर्मानुष्ठानमेवंउत्तमसा
धनंगस्यसनथा ॥ ३ सर्वकर्मणांभगवदुद्देश्येनवानुष्ठानम ॥ ४ मत्कर्मत्वे [illegible] मय्यर्पणम

॥ श्री० ॥ असद्भाविनार्थकमित्यर्थः ॥ कुत इत्यत आह ॥ सध्यानस्यापीति ॥ केवलज्ञानवत् सध्यानस्यापि ज्ञानस्य पुरुषविशेषे संभवेन सामान्यवाचकज्ञानशब्दस्य सध्या नज्ञानपरत्वे ततः केवलस्य ध्यानस्योत्तमत्वासंभवादिति भावः ॥ नन्वस्तु तर्ह्यन एव बाधकात ज्ञानशब्दः केवलज्ञानपर इति चेन ॥ तथाऽप्यनुपपत्तिरित्याह ॥ अज्ञानपूर्वस्ये ति ॥ कस्मिंश्चित्पुरुष इत्यर्थः ॥ ततश्च सामान्यवाचकध्यानशब्दस्याज्ञानपूर्वध्यानपरत्वे अज्ञात्वा ध्यायिनो ध्यानात् ज्ञानमेव विशिष्यत इत्यज्ञानिध्यानतः केवलज्ञानस्यैवोत्तमत्वप्र तिपादकप्रमाणविरोधेन ज्ञानपूर्वध्यानस्य केवलज्ञानादुत्तमत्वासंभवादिति भावः ॥ उपपत्तिलब्धमिति ॥ पूर्वोक्तान्यथानुपपत्तिरूपोपपत्त्या ज्ञानाद्ध्यानमित्यत्र ज्ञानशब्दस्य केवल ज्ञानपरत्वं ध्यानशब्दस्य सज्ञानध्यानपरत्वं लब्धमित्यर्थः ॥ प्रत्यवरो अत्यंतनीच इत्यर्थः ॥ ध्यानादाधिक्ये सति ॥ कर्मफलत्यागस्येत्यर्थः ॥ कथमुपदिश्येतेत्यन्वयः ॥ नीचत्वाभिप्रा येणांते इति शेषः किं तु अभ्यासयोगेनत्यतः पूर्वं त्यागस्योपदेशः स्यादिति भावः ॥

सध्यानस्यापि ज्ञानस्य संभवात् ॥अज्ञानपूर्वस्य ध्यानस्य संभवाच्चेत्यत आह ॥ ज्ञानमात्रादिति ॥ उपपत्तिलब्धमर्थं श्रुत्याऽपि द्रढयति ॥ तथा चेति ॥ तत्सहितं ज्ञानसहितं ध्यानम् ॥ ततो ज्ञानमात्रादधिकम् ॥ ध्यानात्कर्मफलत्यागो विशिष्यत इत्येतदन्यथा प्रतीतिनिरासाय

ज्ञानमात्रात्सज्ञानं ध्यानम्॥तथा च सामवेदे अनभिम्लानशाखायाम् ॥अधिकं केवलाभ्यासाज्ज्ञानंतत्सहितंततः॥ध्या नं ततश्चापरोक्षं ततः शांतिर्भविष्यतीति॥ध्यानात्कर्मफलत्याग इति तु स्तुतिः ॥ अन्यथा कथमसमर्थोऽसीत्युच्यते ॥

व्याख्याति ॥ ध्यानादिति ॥ त्यागस्य प्रशस्तत्वमेवानेन लक्ष्यते न प्रतीतार्थे तात्पर्यमित्यर्थः॥कुत इत्यत आह ॥ अन्यथेति ॥ अथैतदप्यश क्तोऽसि कर्तुमिति ॥ ध्यानात्प्रत्यवरे कर्मयोगेऽप्यशक्तस्य कर्मफलत्यागः कथमन्यथाध्यानादाधिक्ये सत्युपदिश्येत इत्यर्थः ॥

॥ कृ० ॥ अश्रमत्वायोगे हेतुमाह ॥ सध्यानस्यापीति ॥ अत्र सर्वत्र ज्ञानशब्देन श्रवणमननजन्यतत्वनिर्णयो विवक्षित इत्यवधेयम ॥ उत्तमत्वायोगयुक्तिमाह ॥ अज्ञानपूर्वस्येति ॥ श्रवणादिसमकालध्यानस्येत्यर्थः ॥ अन्येतु ॥ ज्ञानमभ्यासस्येति॥ ध्यानप्रकारज्ञानं ध्यानस्य साधनमित्यर्थः ॥ भाष्ये ज्ञानपूर्वादभ्यासादित्यस्य ध्यानप्रकारज्ञानशून्याद्ध्यानादित्यर्थः ॥ ज्ञानाद्ध्यानमिति ॥ ध्यानप्रकारज्ञानाद्ध्यानमित्यर्थः ॥ एवं ज्ञानस्येति ॥ अज्ञानपूर्वस्येत्यपि व्याख्येयम ॥ तदुक्तं न्यायदीपिकायां षष्ठे ॥ सम्यग्ध्यानप्रकाराज्ञस्य ध्यानतो ध्यानप्र कारज्ञानमेवोत्तमम ॥ ध्यानप्रकारज्ञानसहितध्यानं ध्यानप्रकारमात्रतोऽधिकमिति ततोयुक्तमुक्तमित्याहुः ॥ उपपन्नेति ॥ ज्ञानध्यानशब्दयोःसामान्यपरत्वाभावे या युक्तिरुक्ता तल्लब्धज्ञा नमात्रात्सज्ञान ध्यानमित्यर्थः ॥ ननुस्तुत्यर्थवादत्वेऽपि आप्तोक्तगीताया कथं प्रामाण्यं प्रतीतार्थबाधादित्यत आह ॥ त्यागस्येति ॥ तथा च लक्ष्यार्थे प्रामाण्यमिति भावः ॥ प्राशस्त्यलक्षणाप्रकारश्च प्रागेवोपपादितः ॥

|| श्री० || तयोस्तु कर्मसंन्यासादिति वाक्यं प्रकृतोपयोगितया व्याचष्टे || कर्मफलरागसंन्यासादिति || कर्मयोगोऽपीति||ध्यानात्प्रत्यवरोऽपीत्यर्थः || वक्ष्यमाणेति ||कर्मफलाकांक्ष मित्यत्रेत्यर्थः||अफलाकांक्षमित्यनेन पौनरुक्त्यपरिहाराय विरागशब्दार्थमाह | शोभनेति|| विषयेष्विति शेषः||उपपत्तिमाहित्यनेनेति||ध्यानात् कर्मफलत्यागस्यावरत्वमाधिक्यं कर्मफलत्यागोप देशस्य ध्यानप्रत्यवरकर्मयोगासमर्थपुरुषविषयत्वोक्त्यन्यथानुपपत्तिरूपोपपत्त्या सहितत्वेनेत्यर्थः|| युक्त्यंतरं चेति||च शब्दोऽन्यथाऽनुपपत्तिरूपयुक्तिसमुच्चयार्थः || त्यागो हीति || त्या गानंतरं निवृत्तकर्मानुष्ठानेऽन्तःकरणशुद्धिवैराग्यद्वारा ज्ञानोत्पत्तौ सत्यामनंतरं ध्यानमिति क्रमोऽत्र द्रष्टव्यः || लक्ष्यार्थ इति || ध्यानात् कर्मफलत्याग इति च स्तुतिरित्यनेन प्रशस्तत्व रूपो यो लक्ष्यार्थ उक्तः स ध्यानादिकारणत्वरूप इति निष्कृष्योक्त इत्यर्थः || ध्यानादिकारणत्वेन प्रशस्तत्वमित्याशयः ||

कर्मसंन्यासात्कर्मफलरागसंन्यासात् कर्मयोगोऽपि विशिष्यते किमुत ध्यानयोगः वक्ष्यमाणकर्मादिसर्वाधिकम्॥परात्मन्॥परमात्मविषये विरागः शोभनाध्यासाभावः ॥ ननु तयोऽस्त्विति सर्वाधिकमिति चेत्तयोरपि वाक्यत्वात्कथंतद्विरोधेन ध्यानादितिवाक्यस्य स्वार्थे तात्पर्याभावो व्याख्यातइत्यत आह ॥ वाक्येति ॥ वाक्यत्वेन साम्येऽप्युपपत्तिसाहित्येन प्राबल्यादित्यर्थः ॥ इतरत्र ध्यानादितिवाक्यस्य प्रतीतेऽर्थे॥यु

तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यतइति चोक्तम् ॥ सर्वाधिकं ध्यानमुदाहरंति ध्यानाधिकेज्ञानभक्ती परात्मन् ॥ कर्माफलाकांक्षमयो विरागस्त्यागश्च न ज्ञानकलाफलार्हाश्चेति च काषायणशाखायाम् ॥ वाक्यसाम्येऽप्यसमर्थविषयत्वोक्तेस्तात्पर्याभाव इतरत्रप्रतीयते ॥ ध्यानादिप्राप्तिकारणत्वाच्च त्यागस्तुतिर्युक्ता

क्त्यंतरं चाह ॥ ध्यानादीनि ॥ त्यागो हि ध्यानज्ञाननिवृत्तकर्मानुष्ठानप्राप्तौ कारणत्वेन परीक्ष्य लोकानित्यादौ उच्यते ॥ न च फलास्साधनं श्रेयः ॥ अतोऽपीयं स्तुतिरेवेत्यर्थः ॥ अनेन लक्ष्यार्थोपि निष्कृष्योक्तो भवति ॥

|| कृ० || ननु कर्मसंन्यासो नाम यदि कर्माननुष्ठानं तदा ज्ञेयः सनित्यसंन्यासीयो न द्वेष्टि न कांक्षतीति गीताविरोधः इत्यत आह || कर्मफलरागेति || अफलाकांक्षमित्यनेन पुनरुक्ति निरासायाह || शोभनेति || उपपत्तीति|| कर्मफलत्यागोपदेशस्य ध्यानाधमकर्मयोगासमर्थपुरुषविषयत्वोक्त्यन्यथानुपपत्तिरूपा या कर्मफलत्यागस्य ध्यानाधमत्वसाधिकोपपत्तिः तत्सा हित्येनेत्यर्थः||लक्ष्यार्थ इति||ध्यानात्कर्मफलत्यागइत्यनेन प्रशस्तत्वं लक्ष्यतइत्युक्तम्||प्रशस्तत्वंनाम गुणवत्त्वंसच गुणोध्यानादीतिवाक्येन ध्यानादिप्राप्तिकारणत्वरूपतयानिष्कृष्योक्तइत्यर्थः

१ उत्तरार्धेवक्ष्यमाणंयत् कर्मादिसर्वंतस्मादधिकमित्यर्थः ॥

॥ श्री० ॥ त्यागरहितादिति [illegible] ॥ तस्मादनाने [illegible]
शक्तस्य त्यागपदस्य [illegible]
[illegible] त्यागस्य वेति [illegible] प्रकारद्वयमिति [illegible]
ध्यानस्य विशेषणतया [illegible]
[illegible] न संभवतीति भावः ॥ अन्यथाऽनुपपत्त्येति ॥ [illegible] ॥ तथाचेति ॥ [illegible]
[illegible] इत्यर्थः ॥ उक्तार्थेन [illegible] ॥ ननु ध्यानस्य [illegible]
ज्ञानमात्रेति ॥ [illegible]

प्रकारांतरेण व्याख्याति ॥ केवलेति॥त्यागरहितात् ध्यानात्॥ननु कुतो ध्यानादिति केवलस्य निर्धारणं कृतश्च कर्मफलत्याग इति तत्सहित ध्यानलक्षणात्या[illegible] वा ध्यानसाहित्येनोपस्कार इत्यतः प्रतिज्ञापूर्वकमाह॥ध्यानेति॥त्यागयुक्तं ध्यानं ध्यानयुक्तः त्याग इति द्विविधोक्त्योक्तं प्रकारद्वयं सूचयति॥अन्यथा॥केवलत्यागांगीकारे कथं चेत्यत्राप्यन्यथेति वर्तते ॥ न केवलमन्यथानुपपत्त्याऽयमर्थः सिद्धः किंतर्हि श्रुत्यापी

केवलध्यानात्फलत्यागयुक्तं ध्यानमधिकम् ॥ ध्यानयुक्तत्याग एव चात्रोक्तः ॥ अन्यथा कथं त्यागाच्छांतिरनंतरमित्युच्यते ॥ कथं च ध्यानादाधिक्यम् ॥ तथा चगौपवनशाखायाम् ॥ध्यानात्तु केवलात्त्यागयुक्तं तदधिकं भवेदिति ॥ न हि त्यागमात्रानंतरमेव मुक्तिर्भवति ॥ भवति च ध्यानयुक्तात् ॥

त्याह॥तथा चेति॥आद्यामन्यथानुपपत्तिमुपपादयति ॥ न हीति ॥ ततश्चापरोक्ष्यमित्युक्तश्रुतिविरोधादिति भावः॥उक्तांगीकारे कथमेतदनुपपत्त्यभाव इत्यत आह ॥ भवति चेति ॥ त्यागादिति संबंधः ॥ ज्ञानमात्रव्यवधानेनेति भावः ॥ द्वितीयानुपपत्तिस्तु तयोस्त्वित्युपपादितेव ॥
॥कृ०॥ ध्यानं ततश्चापरोक्ष्यमिति प्रमाणविरोधादाह ॥ ज्ञानमात्रेति॥ द्वितीयेति कथंचध्यानादित्येनेनोक्तेत्यर्थः॥तयोरित्वतीति॥तयोस्तु कर्मसंन्यासादित्युदाहृतगीतावाक्येनेत्यर्थः॥ १२॥ ॥३३२॥

॥ श्री० ॥ विहित इति ॥ सर्वकर्मफलत्यागं ततः कुर्वित्येनोक्तत्वादिति भावः ॥ तद्युक्तेति ॥ त्यागयुक्तेत्यर्थः ॥ पूर्वसंगतत्वादिति ॥ अथैतदप्यशक्तोऽसीति पूर्ववाक्यवि हितकेवलत्यागप्ररोचकत्वेन संगतत्वात् ध्यानात् कर्मफलत्याग इति च स्तुतिरिति न पूर्वव्याख्यानमेव युक्तं न तु केवलध्यानात् फलत्यागयुक्तं ध्यानमधिकमिति द्वितीयं व्याख्या नं केवलत्यागप्ररोचकत्वाभावेनासंगतत्वादित्यर्थः ॥ ध्यानांतरात् ॥ त्यागरहितात् केवलध्यानात् ॥ तन्माहात्म्य ॥ कर्मफलत्यागमाहात्म्यम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

नन्वथैतदप्यशक्तोऽसीत्यनेन केवलत्यागो विहितः ॥ तत्प्ररोचनाय श्रेयो हीति तस्य स्तुतिरुपक्रांता॥ नच केवलध्यानात् तत्फलत्यागयुक्तं ध्यानमधिकमिति व्याख्याने केवलत्यागस्तुतिर्लभ्यते किंतु तद्युक्तस्य ध्यानस्यैव ॥ अतः पूर्वसंगतत्वात्पूर्वमेव व्याख्यानं युक्तम् ॥ ननु द्विती यं असंगतेरित्यतआह ॥ केवलेति ॥ यथाऽनेन भृत्येन युक्तो राजा रिपूणा जेता ना ऽन्यथेत्युक्ते भृत्यस्य स्तुतिर्लभ्यते॥ तथैवमप्यस्मिन्नपि व्या

केवलत्यागस्तुतिरेवमपि भवति ॥ यथाऽनेनयुक्तो जेता नान्यथेत्युक्त ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ स

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते चयः॥हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी योमद्भक्तः स मे प्रियः॥१६॥

र्वारंभपरित्यागीत्यादेः सामान्यविशेषव्याख्यानव्याख्येयभावेनापुनरुक्तिः ॥

ख्याने केवलत्यागस्तुतिर्युक्ता ॥ ध्यानस्य ध्यानांतराधिक्ये तत्सहाय्यस्य हेतुत्वेनोक्तत्वादित्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ पुनरु क्तिदोषमाशंक्य परिहरति ॥ सर्वेति ॥ ॥ कृ० ॥ १३ ॥ १४ ॥ १५ ॥

१ अप्रियमकुर्वन् २ क्लेशस्थानंनिरूप्यततोरक्षिता ३ कृपावान् ४ हेयतयादुःखसर्वपर्यायमुन्नयस्यमः ५ अप्राप्यशंक शून्यतत्वानिश्चयवान् ६ लोकस्यभयहेतुर्नभवतीत्यर्थः ७ सर्वमीशाधीनंमत्वा ८ भक्तइत्यनुषज्यते॥

॥ श्री० ॥ सामान्यविशेषेति ॥ शुभाशुभशब्दयोरारंभविशेषवाचकत्वादिति भावः ॥ व्याख्यानेति ॥ येन केन चिदित्यधिकोक्तेरिति भावः॥ निष्ठेति ॥ क्तक्तवतू निष्ठेतिसूत्रात् मुक्त इत्यत्रत्येन भूतार्थकक्तप्रत्ययेनेत्यर्थः ॥ कालांतरे ॥ वर्तमानकाले भविष्यत्काले चेत्यर्थः ॥ ननु तर्हि न हृष्यतीत्यादिलटा वर्तमानकालीननिषेधलाभेऽपि अतीतभविष्यत्कालयोर्हर्षादिकं भविष्यतीति शंका स्यादित्यत उक्तम् ॥ क्रियाप्रबंध इति ॥ क्रियाप्रबंधः ॥ क्रिया सातत्यं तत्रार्थे नित्यप्रवृत्ते चेति सूत्रविहितेन लटेत्यर्थः ॥ तथा च मुक्त इत्यस्य सततं हर्षादिशून्य इत्यर्थो लभ्यत इति द्रष्टव्यम् ॥ इदम् ॥ यो न हृष्यतीत्येतत् ॥ किं तेनेति ॥ हर्षामर्षभयोद्वेगैरित्युक्तम् ॥ सिद्धेऽर्थ इति ॥ यो न हृष्यतीत्यनेनैवातीतकालीनहर्षनिषेधरूपेऽर्थे सिद्धेऽपि पुनर्हर्षादिभिर्मुक्त इति यद्वचनं तत् ॥ यो न हृष्यतीतिवाक्यस्य सार्वकालिकहर्षाभावप्रतिपादने तात्पर्याभावादुपचाररूपत्वमेवेति शंकायां तस्य तत्र तात्पर्यद्योतने तदर्थप्रतिपादने उपचारं परिहरतीत्यर्थः ॥ सिद्धेसत्यारंभो नियमार्थ इति न्यायादिति भावः ॥

सर्वारंभपरित्यागी शुभाशुभपरित्यागीत्यादौ सामान्यविशेषभावेन ॥संतुष्टः संततं संतुष्टो येन केन चिदित्यादौ व्याख्यानव्याख्येयभावेन हर्षामर्षभयोद्वेगैर्मुक्तो यो न हृष्यतीत्यत्र नोक्तप्रकारद्वयं संभवतीत्यत आह॥हर्षादिभिरिति॥ निष्ठाप्रत्ययेनातीतत्वप्रतीत्या कालांतरे हर्षादिकं भ

हर्षादिभिर्मुक्त इत्युक्ते कादाचित्कमपि भवतीति यो न हृष्यतीत्युक्तम् ॥ उपचारपरिहारार्थंपूर्वम् ॥

वतीत्याशंक्य क्रियाप्रबंधे विहितेन लटाप्रतिपादयतीत्यर्थः॥तर्हीदमेवास्तु किंतेनेत्यत आह॥उपचारेति॥सिद्धेर्थेवचनमुपचारंतात्पर्यद्योतनेन परिहरतीत्यर्थः॥

॥ क० ॥ परित्यागीत्यादाविति ॥ आदिपदादद्वेष्टा समः शत्रौ च मित्रे चेत्यादिग्रहः संतुष्टो येन केनचिदित्यादाविति ॥ आदिपदेन क्षमी समदुःखसुख इतिसंग्रहः ॥ व्याख्यानेति ॥ येन केन चिदिति निमित्तकथनाद्व्याख्यानत्वम् ॥ अतीतत्वप्रतीत्येति ॥ भूताधिकारे निष्ठाप्रत्ययविधानादिति भावः ॥ क्रियाप्रबंधइति ॥ क्रियासातत्यइत्यर्थः ॥ यथा तिष्ठंति पर्वताः स्रवंति नद्य इत्यादौ अवस्थानादेः सदातनत्वेनभूतभविष्यत्वाभावात्तत्कालयोगिकर्तृवर्तमानत्वस्याप्यभाव इति वर्तमाने लडित्यस्याप्रवृत्तेर्नित्यप्रवृत्ते च कालाविभागादिति वार्तिकेन लट् तथेहापि हर्षस्य नित्यं विद्यमानत्वं हृष्यतीतिलडिति भावः ॥ वार्तिकार्थस्तु नित्यंविद्यमाने अवस्थानादिरूपव्यापारे भूत भविष्यद्वर्तमानामिति कालविभागज्ञानाभावात्सदातनक्रियावाचकाद्धातोर्लट् वाच्य इति बोध्यः ॥ यद्यपीदं वार्तिकं प्रत्याख्यातम् ॥ तथापि नाइजऽसिन्यादिन्छऽन्त्पादने एतदुपादानं न विरुद्धम् ॥ प्रत्याख्यानपक्षेऽपि पर्वतादिकालनिराजादिस्थितिगतस्य प्रारब्धापरिसमाप्तत्वरूपवर्तमानत्वस्य पर्वतस्थितावप्यारोपाद्यथानित्यप्रवृत्तेऽपि लट् तथैवात्रापीति न कश्चिद्दोषः ॥ १६ ॥

॥ श्री० ॥ ननु ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्परा इत्यादिप्रपंचनरूपत्वं अद्वेष्टेत्यस्य संभवति [illegible] संन्यासत्वात्॥मय्यर्पितेत्यादेश्च मत्परा इत्युक्तविवरणरूपत्वात् मैत्रः करुण इत्यादीनां तूक्तविवरणरूपत्वाभावात् कथमित्याह प्रपंच एव उपयुक्तमित्यत आह ॥ तदुपलक्षितत्वेति ॥ये त्विति वाक्ये उपलक्षणया मैत्र्यादयोऽत्रोच्यमानाः सर्वेऽपि धर्माउपसकानामुक्ताः संति अतो ये त्विति [illegible] किमत इत्यत ॥ असंगोपासकानिति ॥ ये त्वक्षरमित्युक्तनिर्गुणोपासकानित्यर्थः ॥ एतत् ॥ अद्वेष्टेत्यादिगुणजातम ॥ सन्निहितेति ॥ [illegible] ॥ यो मद्भक्त इति ॥ ये त्वित्युक्तभगवदुपासकस्येत्यद्वेष्टेत्यादि [illegible] ॥ १६॥१७॥१८॥१९ ॥ ये त्वि त्युक्तमेवेति ॥ ये तु सर्वाणीत्युक्तत्वं [illegible] ॥

॥ कृ० ॥ १७ ॥ १८ ॥ १९ ॥

यो मद्भक्त इति भक्तिः पुनः पुनरुच्यते ॥ तत्प्रयोजनमाह ॥ आधिक्येति ॥ अद्वेष्टेत्यादिनोक्तेषु सर्वधर्मेषु भक्तेर्विशेषः ॥ अद्वेष्टेत्यादेःसंगत्यदर्शनात्तामाह ॥ ये त्विति ॥ प्रपंचस्तदुपलक्षितस्याभिधानम् ॥ असंगोपासकानधिकृत्यैतदुच्यत इत्यसत् ॥ सन्निहितसंबंधे सति व्यव

आधिक्यज्ञानार्थं भक्त्यभ्यासः ॥ ये तु सर्वाणि कर्माणीत्यादेः ॥ प्रपंचएवः॥१६॥ १७ ॥ १८॥ १९ ॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति॥शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ॥शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥
तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केन चित् ॥अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ॥ श्रद्दधाना मत्परमा भक्तास्तेतीवमेप्रियाः ॥ २० ॥

पिंडीकृत्योपसंहरति॥ ये तुधर्म्यामृतमिति ॥

हितसंबंधग्रहणायोगात्॥योमद्भक्तः स मे प्रिय इत्यादिवचनाच्च॥१६॥१७॥१८॥१९॥ये त्वित्युक्तमेव किमर्थमुच्यत इत्यतआह॥पिंडीकृत्येति।

॥ श्री० ॥ नन्वद्वेष्टेत्याद्युक्तद्वेषादिवर्जनादेर्धर्मविषयत्वासंभवात्कथं तद्विषयमित्युक्तमित्यत आह ॥ तदुपासनांगत्वादिति ॥ अनेनेतमिति ॥ धर्मादनपेतं धर्मपथ्यर्थन्यायादनपेते इत्यनेन धर्माद शब्दात् अनपेतार्थे यत्प्रत्ययविधानात् पथ्यमर्थ्यं न्याय्यमिति युक्तम् तथा च धर्मादनपेतं तदुपासनसाधनं धर्म्यमित्यर्थः ॥ धर्मश्चेति ॥ धारकत्वाद्धर्म इति व्युत्पत्तेरित्यर्थः ॥ अदृष्टं कृ तो धर्मो न भवतीति तत्र वक्तव्यं धर्मशब्देन प्रवृत्त धर्मं गृहीत्वा [illegible] निवृत्तधर्मादनपेतत्वाभावः स्यात् ॥ प्रवृत्तस्येति ॥ प्रवृत्तधर्मस्य द्वेषादिवर्जनविरोधित्वेन तदन पेतत्वासंभवादिति भावः ॥ न द्वितीय इत्याह ॥ निवृत्तस्येति ॥ एतादिति ॥ द्वेषादिवर्जने यत्नं ॥ कर्मणा शुद्धसत्त्वस्य [illegible] निवृत्तकर्मण एव द्वेषादिवर्जनसा धनत्वेन रागद्वेषादिवर्जनस्य निवृत्तधर्मसाधनत्वाद्युक्तमनपेत्वमिति भावः ॥ धर्मशब्दस्य विष्णुपरत्वे तु द्वेषादिवर्जनस्य विष्णूपासनसाधनत्वेन तत्साधन [illegible] युक्तमि ति ध्येयम् ॥ कर्मधारय इति ॥ धर्म्यं च तदमृतं चेति कर्मधारय इत्यर्थः ॥ [illegible] अमृतमिति [illegible] ॥ ननु तर्हि मृतिविरोधि मृतिनाशकमित्येतावत्प्राप्त्या मृ त्यादिसंसारेत्यर्थः कथं लभ्यत इत्यत आह ॥ मृतशब्दश्चेति ॥ [illegible] इत्यभिप्रेत्य मृत्यादिसंसारेत्युक्तमिति भावः ॥ ननु [illegible] युक्तम् ॥ तथा हि ॥ [illegible] क्रियायोग इति क्रियायो ग एवोपसर्गत्वस्योक्तत्वात् ॥ [illegible] ॥

धर्म्यामृतमित्येतदपर्यतार्थं व्याख्यातं धर्मशब्दं तावद्व्याख्याति ॥ धर्मइति ॥ तद्विषयं तदुपासनांगत्वात् धर्मादनपेतं धर्म्यं धर्मश्च विष्णुः ॥ ना दृष्टम् ॥ प्रवृत्तस्यासंभवात् ॥ निवृत्तस्यैतत्साधनत्वात् ॥ इदानीममृतशब्दं व्याकुर्वन् धर्म्यामृतमिति कर्मधारयोऽयमित्याह ॥ धर्म्यमिति ॥ नमृतं

धर्मो विष्णुस्तद्विषयं धर्म्यम् ॥ धर्म्यं मृत्यादिसंसारनाशकं चेति धर्म्यामृतम् ॥ श्रद्धास्तिक्यम् ॥

श्रद्धामास्तिक्यमुच्यत इत्यभिधानम् ॥

अमृतं नञ् विरुद्धार्थे मृतशब्दश्चोपलक्षक इत्यर्थः ॥ श्रद्दधानाइत्येतद्व्युत्पादयति ॥ श्रद्दिति ॥ ॥ श्री० ॥ नन्वद्वेष्टेत्याद्युक्तद्वेषाभावादेर्निर्विषयत्वात्कथं विष्णु विषयत्वमित्यत आह ॥ तदुपासनांगत्वादिति ॥ व्यापारानुबन्धिविषयत्वमित्यर्थः ॥ धर्मादनपेतत्वं नाम धर्मानुकूलत्वम् ॥ तत्र धर्मो यत्नादृष्टं वा प्रवृत्तादृष्टानुकूलत्वं वा ॥ निवृत्तादृ ष्टानुकूलत्वं वा ॥ आद्ये आह ॥ प्रवृत्तस्येति ॥ तस्य द्वेषाभावादिविरोधित्वादिति भावः ॥ अन्त्ये आह ॥ निवृत्तस्येति ॥ तस्य द्वेषाभावादिहेतुत्वेन तज्जन्यत्वायोगादिति भावः ॥

॥श्री०॥धात्वेव विलीनोऽर्थ उपसर्गेण काश्यत इत्युक्तत्वात् ॥ यदि न क्रियायोगो न विवक्षितस्तर्हि कारकक्रियावाचित्वमेव वक्तव्यं नास्ति प्ररूपद्रव्यमात्रार्थत्वम् अतः कथमेतादि त्यत आह॥ श्रच्छब्दस्येत्यादिना॥सत्ववाचित्वम् ॥ द्रव्यवाचित्वम् ॥ चादयोऽसत्व इत्यत्रासत्वपदस्याद्रव्यार्था इति व्याख्यातत्वात्॥ नन्वविरुद्धत्वे किमर्थमुपसर्गसंज्ञा क्रियत आह॥ उपसर्गत्वस्येति ॥ कार्यविशेषार्थत्वादिति ॥ ते प्राग्धातोरित्युक्तत्वेन धातोः ॥ प्राक् प्रयोगरूपकार्यविशेषार्थत्वादित्यर्थः ॥ श्रद्धानन्तरभेवान्तेत्यादौ श्रदादिशब्दस्य धातोः प्राक् प्रयोगस्तावदस्ति धातोः प्राक्प्रयोगश्च तेप्राग्धातोरितिसूत्रेणोपसर्गाणामेवोक्त इत्यतः श्रदादेर्द्रव्यवाचिनोऽपि प्राक्प्रयोगोपपत्त्यर्थमेवोपसर्गसंज्ञा कृतेत्याशयः ॥ अत एव वार्तिककृता उपसर्गवदिति प्रसिद्धोपसर्गवैलक्षण्यमुक्तमिति द्रष्टव्यम्॥२०॥इति यदुपतिगीताभाष्यटीकासुयुक्ताशयमतिललिताभिर्गीर्भिरावेदयित्री॥सुललितविवृतिर्या वृष्णिराड्ढात्रचीर्णासमगमदयमत्र द्वादशाध्याय अंतम् ॥२०॥इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायां द्वादशोऽध्यायः ॥

श्रच्छब्दस्योपसंख्यानमित्युपसर्गत्वेनोपसंख्यायमानस्याप्यस्य सत्ववाचित्वमविरुद्धम् ॥ उपसर्गत्वस्य कार्यविशेषार्थत्वात् ॥ २० ॥ इति

तद्दधानाः श्रद्दधानाः ॥ २० ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये द्वादशोऽध्यायः ॥१२॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु० भक्तियोगो नाम द्वादशोऽध्यायः ॥ १२ ॥

श्रीमदानंदतीर्थभगवत्पादविरचितस्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां द्वादशोऽध्यायः ॥

॥ कृ० ॥ नन्वसत्वार्थानामेव प्रादीनामुपसर्गत्वम् ॥ चादयोऽसत्वे प्रादय इति॥असत्वार्थानां प्रादीनां निपातत्वमुक्त्वा तेषामेवोपसर्गाः क्रियायोग इत्युपसर्गत्वोक्तेः अनुदेशग इत्यादौ द्रव्यार्थानामुपसर्गत्वदर्शनाच्च ॥अतः श्रच्छब्दस्योपसर्गत्वेनोपसंख्यानादुपसर्गत्वेऽसत्ववाचित्वमेव वाच्यम् ॥ तत्कथमास्तिक्यार्थत्वम्॥तस्य क्लीबत्वैकत्वाभ्यां द्रव्यत्वात् लिंगसंख्यान्वितं द्रव्यमित्युक्तेरित्यत आह ॥ श्रच्छब्दस्येति ॥ सत्ववाचित्व द्रव्यवाचित्वम् ॥ किमर्थं तर्ह्युपसर्गत्वमित्यत आह ॥ उपसर्गत्वस्येति ॥ कार्यविशेषेति ॥ अड्व्यवायाख्यकार्येत्यर्थः ॥ तथा चाहितकर्तव्यएवश्रच्छब्दस्योपसर्गत्वं नान्यदा ॥ श्रच्छब्दस्याङ्गात्तु संख्यानमित्यत्राङ्गादित्युक्तेरिति भावः ॥ २० ॥ इतिश्रीप्रमेयदीपिकाप्रकाशे द्वादशोऽध्यायः ॥

॥ इति श्रीमद्भगवद्गीतायां द्वादशोध्यायः ॥

॥ समाप्तः ॥

॥ श्री० ॥ श्रीरस्तु ॥ प्रणम्य यादवाचार्यगुरूणांपदपंकजे ॥ कुर्मस्त्रयोदशाध्यायटीकां [illegible] ॥ पुरुषभेद इति ॥ जीवेश्वरभेद इत्यर्थः ॥ चतुर्विधनाशाभावप्रतिपादकेन तु शब्देनेश्वरे जीवभेदस्य प्रतिपादितत्वादिति भावः ॥ ननु विविच्य प्रदर्शनविवक्षया [illegible] कथं पिंडीकृत्येतिपूर्वकालीनत्वार्थकक्त्वादेशभूतल्यप् प्रत्यय इत्यत आह ॥ गौण इति ॥ तथा च विविच्य प्रदर्शनविवक्षया कथं पिंडीकरणे [illegible] ॥ क्त्वार्थान्वय ॥ तदादेशभूतल्यप्प्रत्ययः ॥ तदेव दर्शयति ॥ पिंडीकरणार्थमिति ॥ प्रकरणशुध्येति ॥ [illegible] ॥ १ ॥ २ ॥ ३ ॥

पूर्वसंगतत्वेनाध्यायप्रतिपाद्यं दर्शयति॥पूर्वोक्तेति॥पूर्वमाद्यषट्समाप्तौ येन ज्ञानं ज्ञानसाधनमुक्तम्॥यच्चामानित्वादिभिः पदैर्ज्ञेयं ब्रह्मस्वरूपमुक्तम् ॥यदपि भूमिरापइत्यादिना क्षेत्रमुक्तम्॥यच्च नत्वेवाहमित्यादिना पुरुषभेद उक्तः तत्सर्वमनेनाध्यायेन दर्शयति भगवान् ॥ किमर्थं पिंडीकृत्य

॥ श्रीज्ञानदात्रेनमः ॥ ॐ पूर्वोक्तज्ञानज्ञेयक्षेत्रपुरुषान् पिंडीकृत्य विविच्य दर्शयत्यनेनाध्यायेन ॥१॥२॥ ३ ॥

अर्जुन उवाच॥प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च॥एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयंच केशव ॥१॥

॥ श्रीभगवानुवाच ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः॥२॥क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत॥क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥३॥

विक्षिप्तमेकीकृत्य गौणोऽत्र क्त्वाप्रत्ययःपिंडीकरणार्थमित्यर्थः॥पिंडीकरणे मिश्रत्वादप्रतिपत्तिरित्यत उक्तम्॥विविच्येति॥प्रकरणशुध्येत्यर्थः ॥१॥२ ३॥

॥ कृ० ॥ ननु विविच्य प्रदर्शननामप्रकरणशुद्ध्या [illegible] पिंडीकरणेन [illegible] न च तयोः पौर्वापर्यमस्ति ॥ न कथं [illegible] ॥समानकर्तृकयोः पूर्वकाल इत्युक्तेरित्यत आह ॥ गौण इति ॥ तुमनर्थलक्षक इत्यर्थः ॥ १ ॥ २ ॥ ३ ॥

१ अयंप्रश्नश्लोकः रा.श्रीपादसंमतः ॥ २ ज्ञ [illegible] ॥ ३ [illegible] ॥ ४ भगवतादर्शितेऽत्र [illegible] ॥ ५ अव्यक्तादिषु ॥

॥ श्री० ॥ वैयर्थ्यादिति ॥ न बहुव्रीहिनिर्वाहो भवति मत्वादय इति वचनं आदिपदेन इनेरपि ग्रहणादिति भावः ॥ कर्मधारयादिनिमभिप्रेत्याह ॥ यश्चामावितिति ॥ यद्विकारीत्यनेनेति ॥ कार्यस्यैव विकारत्वेन यत्कार्यजनकमित्यर्थकेण यद्विकारीत्यनेनैव यतः क्षेत्राद्यत्कार्यमुत्पद्यत इत्यर्थस्यावगमादिति भावः ॥ साध्याहारत्वादिति ॥ उत्पद्यत इति गीतायामश्रवणादिति भावः ॥ ननु यतश्चयदुत्पद्यत इत्यव्याख्याने विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवानित्यप्रतिज्ञातोक्तिः स्यात् ॥ अतस्तदनुरोधेनोत्पद्यत इत्यध्याहारेण व्याख्यानं कर्तव्यमित्यत आह ॥ विकारांश्चेति ॥ यादृगिति प्रतिज्ञावचनत्वेन यतश्च यत्स न इतिप्रतिज्ञातप्रेरकस्वरूपनिरूपणोपयोगिमप्रकारभेदनिरूपणत्वेन चान्यथोपपत्तेरित्यर्थः ॥ अपरस्त्विति ॥ यतः साधनेभ्यो यज्ज्ञेयं वस्त्विति प्रतिज्ञाया यज्ज्ञात्वाऽमृतमश्नुत इति गीतानुसारेण ज्ञानद्वारा प्राप्यत इत्युत्तरमुच्यत इति ज्ञातव्यम् ॥ अध्याहारादेवेति ॥ ज्ञेयं प्राप्यत इति पदद्वयस्येत्यर्थः

योविकारो यस्य तत् यद्विकारीति कश्चित्॥तदसत् ॥ बहुव्रीहितायामिनेर्वैयर्थ्यात् ॥ किं तु यश्चासौ विकारश्चेति यद्विकारः सोऽस्यास्तीति यद्विकारीति भावेनाह ॥ यदिति॥अत्र येन विकारेणेत्यनेन कर्मधारयं सूचयति ॥ युक्तमितीनेरर्थम् ॥ यतश्च यदित्येतयस्माच्च यत्कार्यमुत्प

यद्विकारि येन विकारेण युक्तंयतश्च यत् यतो याति प्रवर्तते ॥

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्॥ स च यो यत्प्रभावश्च तत्समासेनमेशृणु॥४॥

द्यत इति कश्चिद्व्याख्यातवान् ॥ तदयुक्तम् ॥ यद्विकारीत्यनेन गतार्थत्वात् ॥ साध्याहारत्वाच्च ॥ विकारांश्च गुणांश्चेत्यस्यान्यथोपपत्तेः ॥ अपरस्तु यतश्चामानित्वादिभ्यो यज्ज्ञेयं प्राप्यतइति ॥ तदप्यसत् ॥ अध्याहारादेव ॥

॥ कु० ॥ इनेर्वैयर्थ्यादिति ॥ मत्वर्थे बहुव्रीहिरित्युक्तः संबन्धबोधकबहुव्रीहिणैवमत्वर्थलाभादिति भावः ॥ कर्मधारयमिति ॥ न चैवमपि न कर्मधारयान्मत्वर्थीयाइति उक्तेरिनो वैयर्थ्यम् ॥ यत्र स्पष्टप्रतिपत्तिरुद्देश्या तत्र कर्मधारयादपि मत्वर्थीयाङ्गीकार न दोषः हितशालिमान्ग्राम इत्यादिदर्शनादिति भावः॥गतार्थत्वादिति ॥ तस्य यत्कार्यजनकमित्यर्थे पर्यवसानादिति भावः ॥ साध्याहारत्वाच्चेति ॥ गीतायामुत्पद्यत इत्यश्रवणादिति भावः॥ननु यतश्च यदित्यस्य कार्यप्रतिज्ञात्वाभावे विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥इतीयमप्रतिज्ञातोक्तिः स्यादित्यत आह॥विकारांश्चेति॥यतश्च यदिति प्रतिज्ञानं प्रेरकस्वरूपं वक्तुं भेदं यत्प्रकारकं क्षेत्रं तन्निरूपकत्वेनोपपत्तेरित्यर्थः॥अध्याहारादेवेति॥ज्ञेयंप्राप्यतइतिपदद्वयस्येतिशेषः ॥

॥ श्री० ॥ नन्वेवमत्र व्याख्यानेऽमानित्वमित्यादेर्ज्ञानसाधनवचनस्यानादिमदित्यादेर्ज्ञेयवचनस्य चाप्रतिज्ञातार्थत्वं स्यादित्यत आह ॥ अमानित्वमित्यादेरिति ॥ अनादिमदित्यादेः परं ब्रह्मेति स च य इति प्रतिज्ञातमुच्यतेऽन्यथाऽसम्भवात् इत्युत्तरभाष्यगीत्या साक्षात्प्रतिज्ञातवचनत्वेन अमानित्वमित्यादेस्तु साक्षात्परंब्रह्मज्ञानंप्रत्यावश्यकसाधनत्वेन प्रतिज्ञातोपयुक्तवचनत्वेनान्यथासि द्धिरित्यर्थः ॥ यदितीणो लडादेशस्य शत्रंतस्य रूपमिति ॥ भाष्ये यातीति वर्तमानार्थकत्वप्रयोगात् लडादेशेत्युक्तम् ॥ तथा च इण् गतावस्माल्लटि तस्य परस्मैपदिनि शत्रादेशे शकारऋकारयोर्लोपे अत इति स्थिते अचि श्नुधातुभ्रुवां य्वोरियङुवङाविति सूत्रेण प्राप्तियङादेशापवादकत्वेन ॥ इणो यण् ॥ इणोऽजस्य यणादेशः स्यादचि पर इति सूत्रे ण ॥ यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङमित्यगमनकस्येकारस्य यणादेशे य अत यदितिरूपमिति भावः ॥ ननु यदितीणोरूपं चेदिणो गत्यर्थकत्वाद्यातेश्च प्रापणार्थत्वाद्यातीति प्रतिपदं कथं दत्तम ॥ एतीति वक्तव्यत्वादित्यत आह ॥ इण इति ॥ ननु इणो यातेश्चाननिभिन्नार्थकत्वे यातीत्यस्य गच्छतीत्यर्थस्य स्पष्टत्वात् प्रवर्तते इति विवरणं किमर्थमित्यत आह ॥ सर्वस्ये ति ॥ गौणीति ॥ गमनशून्याकाशादेः क्षेत्रस्य कार्योन्मुखत्वाख्यप्रवृत्तिरूपगुणयोगादित्यर्थः ॥ ननु पूर्वं क्षेत्रज्ञशब्देन जीवः प्रकृत इत्यत आह ॥ क्षेत्रज्ञशब्दस्येति ॥ अतद्विषयत्वादिति ॥

अमानित्वमित्यादेरनादिमदित्यादेश्चान्यथासिद्धिरिति भावेनान्यथा व्याचष्टे ॥ यतश्चेति ॥ यतो यस्य प्रेरणया यदितीणो लडादेशशत्रंतस्य रूपम् ॥ इणो यातेश्चाननिभिन्नार्थत्वाद्यातीत्युक्तम् ॥ सर्वस्य क्षेत्रस्य गत्यभावाद्गौणीं वृत्तिमाश्रित्य विवृणोति ॥ प्रवर्तत इति स च य इ

स च प्रवर्तकः ॥

ति जीवप्रतिज्ञेति व्याख्यानमसत् ॥ तस्याप्रकृतत्वात् ॥ क्षेत्रज्ञशब्दस्यातद्विषयत्वादिति भावेनाह ॥ स चेति ॥

॥ कृ० ॥ ननु यदुक्तरीत्या यतश्चेत्यादिप्रतिज्ञाद्वयं न स्यात्तर्ह्यमानित्वमित्यादेरनादिमदित्यादेश्चाप्रतिज्ञातत्वं किं न स्यादित्याह ॥ अमानित्वमित्यादेरिति ॥ अमानित्वमित्यादेर्ज्ञानसाधन प्रतिपादकत्वस्यानादिमदित्यादेश्च स च य यत्प्रभावश्चेति प्रतिज्ञातार्थप्रतिपादकत्वस्य चोपपत्तेरित्यर्थः ॥ ननु यतो यातीत्यस्य स च य इत्यनेन पुनरुक्तिरित्यतो व्याचष्टे ॥ यस्य प्रे रणयेति ॥ एतच्च स्फुटीकरिष्यते ॥ ननु यदित्यस्य सर्वनामत्वेनार्थान्तरपरत्वाद्यातीति कथं यातीत्यत आह ॥ यदितीति ॥ इण गतावित्यस्माल्लटि तस्य शत्रादेशे शतुरपित्सार्व धातुकत्वेन ङित्वाद्गुणनिषेधे इयङ् प्राप्ते इणो यणिति यणादेशे च यदितिरूपमिति भावः ॥ ननु यदित्यस्येणो रूपत्वे एतीति वाच्यं यातीति तु कथमित्यत आह ॥ इणो यातेश्चेति ॥ प्रापयर्थानां गत्यर्थत्वेनाभिन्नार्थत्वाभावादित्यर्थः ॥ गौणीमिति ॥

॥ श्री० ॥ [illegible] ॥ यत क्षेत्रमिति ॥ च शब्दद्वयेति ॥ चशब्दार्थमनु चयस्य [illegible] ॥ तत्समासेनेत्यनेनान्वयादिति ॥ यतश्च यदिति यच्छब्दस्य तत्समासेनेति [illegible] ॥ अर्थभेदेति ॥ [illegible] ॥ ४ ॥ सूचकानीति ॥ प्रतिपादकानीत्यर्थः ॥ तथात्वात ॥ ब्रह्म प्रतिपादकत्वादित्यर्थः ॥ [illegible] ॥ रूढिमिति ॥ [illegible] ॥ ५० ॥ प्रसिद्धार्थं परित्यज्यार्थांतरपरत्वमाश्रित्येत्यर्थः ॥

यतः क्षेत्रं प्रवर्तत इति प्रवर्तकस्य प्रकृतत्वादित्याशयः॥नन्वेवं चेदं वक्तव्यम्॥किं यतश्च यत् स च य इत्येकैव प्रतिज्ञा उत द्वे॥नाद्यः॥ चशब्दद्वयानुपपत्तेः॥तत्समासेनेत्यनेनान्वयाच्च॥न द्वितीयः॥अर्थभेदाभावादित्यतो द्वितीयमंगीकृत्याह॥यतश्चेति॥ यतश्चयदितिवचनमस्मादिदंधर्मविशिष्टात्क्षेत्रं प्रवर्तत इतिवक्तुं प्रतिज्ञारूपम्॥ स च य इति वचनं प्रवर्तकस्य स्वरूपमात्रं वक्तुं प्रतिज्ञारूप

यतश्च यदित्यस्मात्प्रवर्तेत क्षेत्रमितिवचनं स च य इति स्वरूपमात्रम्४ ब्रह्मसूत्राणि शारीरकम्॥५॥इच्छादयो विका

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ५ ॥
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ ६ ॥
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥७॥

राः ॥७॥ मित्यर्थभेद इत्यर्थः॥४॥ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि ततश्च छंदसामपिवाक्यानां च तथात्वात् ऋषिभिरित्यादिकं व्यर्थं स्यादित्यतो रूढिमाश्रित्याह ॥ ब्रह्मेति॥ ॥५॥६॥ महाभूतानीत्यनुक्रम्यैतत्क्षेत्रं समासेन सविकारमुदाहृतमित्युक्तम्॥ तत्र न ज्ञायते किं क्षेत्रं के च तद्विकारा इत्यत आह ॥ इच्छादय इति॥ पूर्वं क्षेत्रमिति भावः॥७॥

तेन वस्तूनामनेकार्थत्वात् कथमेतदिति [illegible] ॥ एव धर्मविशिष्टादिति ॥ [illegible] ॥ ४॥५ ॥६ ॥ पूर्वं क्षेत्रमिति ॥ महाभूतानीति श्लोकोक्तमित्यर्थः ॥ ७ ॥ ॥२३७॥

१ महदहंकारादिप्रपंचम ॥ २ त्रिगुणात्मकत्वात् ॥ ३ [illegible] ॥ ४ [illegible] ॥ ५ [illegible] ॥

॥ श्री० ॥ तदिति ॥ ज्ञेयं यत्तदित्यादिना वक्ष्यमाणं प्रमेयमित्यर्थः ॥ दुर्मार्गे मनोवाक्कायकर्मणामवैपरीत्यस्य सम्यग्ज्ञानविरोधित्वादाह ॥ एतच्चेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

ननु षट्स्वर्थेषु प्रतिज्ञातेषु अमानित्वादिकमनंतर्भूतं किमित्युच्यत इत्यत आह ॥ स चेति ॥ इति प्रतिज्ञातमर्थद्वयं वक्तुं ज्ञेयं यत्तदित्यादिना ॥ न यादृशनादर्शन श्रवणेन तदनुभवारूढं भवतीत्याशयेनेति शेषः ॥ मानाहंकाराभ्यां दंभं पृथक् दर्शयति ॥ आत्मेति ॥ आ

स च यो यत्प्रभावश्चेति वक्तुं तज्ज्ञानसाधनान्याह ॥ अमानित्वमित्यादिना ॥ आत्मालपत्वं ज्ञात्वाऽपि महत्त्वप्रदर्शनं दंभः ॥ ज्ञात्वाऽपि स्वात्मनोऽल्पत्वं दंभोमाहात्म्यदर्शनमिति ह्यभिधानम् ॥ आर्जवम् ॥

अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवम् ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ८ ॥

इंद्रियार्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ९ ॥

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ १० ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ ११ ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ १२ ॥

मनोवाक्कायकर्मणामवैपरीत्यम् ॥ ८ ॥ ९ ॥ सक्तिःस्नेहः ॥ स एवातिपक्वोऽभिष्वंगः ॥ स्नेहः सक्तिः स एवातिपक्वोऽभिष्वंग उच्यत इत्यभिधानम् ॥ १० ॥ ११ ॥ तत्त्वज्ञानार्थदर्शनम् ॥

र्जवं ज्ञानसाधनं यथास्यात्तथा व्याचष्टे ॥ आर्जवमिति ॥ एतच्च सन्मार्ग इति ज्ञातव्यम् ॥ ८ ॥ ९ ॥ सक्त्यभिष्वंगशब्दयोरर्थभेदमाह ॥ सक्तिरिति ॥ १० ॥ ११ ॥ ननु तत्त्वज्ञानार्थदर्शनं नाम ज्ञानमेव तत्कथं ज्ञानसाधनेषूच्यतइत्यत आह ॥ तत्वेति ॥

॥ रू० ॥ मानाहंकाराभ्यामिति ॥ आत्मगुणश्लाघावादिर्मान स्यात् अन्याभिमानोऽहंकारइति विवेकः ॥ दुर्मार्गेमनोवाक्कायकर्मणामवैपरीत्यस्य ज्ञानविरोधित्वादाह ॥ एतच्चेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

१ आविद्यमानात्मगुणाभिमानमोहाभावः ॥ २ प्रतिक्षणमनुसंधानम् ॥ ३ हर्षविषादयोरभावः ॥ ४ इष्टानिष्टयोःप्राप्तिषु ॥ ५ रमाब्रह्मादिस्वातंत्र्यासंबंधन ॥

॥ श्री॰ ॥ **शास्त्रस्येति** ॥ अत्र तत्त्वज्ञानार्थं शास्त्रदर्शनमिति शास्त्रे येनाध्याहारः शास्त्रस्येति तु विग्रहप्रदर्शनार्थमिति ज्ञेयम् ॥ १२ ॥ **सूचितमिति** ॥ स च यो यत्प्रभावश्चेति वक्तु मित्यनेनेत्यर्थः ॥ इति व्याख्याने मतुपो वैयर्थ्यमित्यादिसंबंधः ॥ **तत्र हेतुर्नविद्यत इत्यादि** ॥ न बहुव्रीहिणैवार्थे भवंति मतुबादय इति वचनादिति भावः ॥ **बहुव्रीहित्वेति** ॥ नविद्यते आदिरस्येत्यनादीति बहुव्रीहित्वाश्रयणेनेत्यर्थः ॥ **विवक्षितार्थः** ॥ उत्पत्तिराहित्यम ॥ **कश्चिद्भेद इति**॥ परं तु ब्रह्म न हि भगवतोऽन्यदित्यादिना पूर्वभेदाभावस्य समर्थितत्वादिति भावः ॥ किं चाहं वासुदेवाख्या परा शक्तिरित्युक्ते कृष्णावतारमात्रस्यावताराणामवरत्वमुक्तं स्यात् ॥ न च तद्युक्तमित्याह ॥ **न चेति** ॥ **इत्युक्तमिति** ॥ परिपूर्णानि रूपाणि समान्यखिलरूपत इति द्वितीयांते प्रमाणोदाहरणेनेत्यर्थः ॥ **तानि चेति** ॥ आदिमंतीत्यर्थः ॥

शास्त्रदर्शनं तात्पर्यालोचनम् ॥ अत्र शास्त्रस्येत्यध्याहृत्य व्याख्यानमिति ज्ञातव्यम् ॥ १२ ॥ प्रतिज्ञातार्थद्वयप्रतिपादनाय ज्ञेयं यत्तदित्यादिकं वाक्यमिति सूचितम् ॥ तत्र केन तु किमुच्यत इत्यत आह ॥ परमिति॥ इति नामोक्त्या अन्यदनादिमदित्यादिकं यत्प्रभाव इति प्रतिज्ञातस्य प्रतिपादकमित्यर्थः॥आदिरस्यास्तीत्यादिमत् आदिमदनादिमदिति व्याख्यानेन विद्यतेआदिरस्येत्यनादीति बहुव्रीहित्वाश्रयणेनैव

अपरोक्षज्ञानार्थं शास्त्रदर्शनम् ॥ १२ ॥ परं ब्रह्मेति ॥ स च य इति प्रतिज्ञातमुच्यते ॥ अन्यद्यत्प्रभाव

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ॥ अनादि मत्परं ब्रह्म नसत्तन्नासदुच्यते ॥ १३ ॥

इति ॥ आदिमद्देहवर्जितमित्यनादिमत् ॥

विवक्षितार्थसिद्धेःमतुपो वैयर्थ्यमिति दोषं पश्यंतः केचिदनादीति मत्परमिति चपदं विच्छिद्याहंवासुदेवाख्या परा शक्तिर्यस्य तन्मत्परामिति व्याचक्षते॥तदसत्॥अर्थासंभवात्॥न हि ब्रह्मेति वासुदेवेति कश्चिद्भेदः ॥न चावतारेषु पारावर्यमित्युक्तमिति भावेन यथा मतुपो न वैयर्थ्यं तथा व्याचष्टे॥आदिमदिति॥आदिर्येषामस्तीत्यादिमंति न विद्यंतेआदिमंति यस्य तदनादिमत्॥सामर्थ्यात्तानिदेहेंद्रियगुणक्रियादीनीत्यर्थः॥

॥ कृ॰ ॥ शास्त्रश्रवणमात्रं नापरोक्षज्ञानसाधनमित्यत आह ॥ तात्पर्यालोचनमिति ॥ अर्थात् मननं शास्त्रनिमर्शेन भविष्यतीत्युक्तैरिति भावः ॥ १२ ॥ इति सूचितमिति ॥ स च यो यत्प्रभावश्चेति वक्तुं तज्ज्ञानसाधनान्याहेत्यनेनेति शेषः ॥ परं ब्रह्म यस्य स्वरूपप्रश्नस्य तत्वं समर्थयितुमिति शब्दात्परमध्याहार्यमाह॥इतिनामोक्त्येति॥ कश्चिद्भेद इति ॥परं तु ब्रह्म नहि भगवतोन्यदित्युक्त्वादिति भावः॥ [illegible] कृष्णस्य [illegible] तत्र युक्तमित्याह॥नचेति ॥परिपूर्णानि रूपाणिसामान्याखिलरूपतइत्यादिनोक्तमित्यर्थः ॥

१. तंत्रसार अ॰श्लो॰ १.७५ ध्यानसमाधिभ्यामपरोक्षज्ञानं भवतीति पूर्वमभिधाय अपरोक्षज्ञानसाधनांतरमाह ॥ दर्शनमित्यनुवर्तते ॥

॥ श्री० ॥ ब्रह्मणः कारणराहित्यप्रतिपादनमनेन क्रियत इति भाष्यांकमुपलक्षणपरमित्याह ॥ अथ वेति ॥ पूर्वोक्त एवेति ॥ एव [illegible] मनंगीकृत्य आदिरस्यास्तीत्यादिमत न आदिमत् अनादिमदिति पूर्वोक्त एव नञ्समास इत्यर्थः ॥ वैयर्थ्यमेवेति ॥ [illegible] ॥ अनादि [illegible] णामिति तावद्विवादं तथा च बहुव्रीहिरित्येव युक्तम् ॥ आदिशब्दस्य नित्य [illegible] विशेषणनिश्चिततामसेन [illegible] परब्रह्मविशेषणत्वोपपत्तेः नञ्समासत्वशंका त्वनुपपन्नैव ॥ नित्ययोगे मतुप् [illegible] परब्रह्मविशेषण [illegible] ॥ [illegible] बहुव्रीहिणा [illegible] युक्तम् ॥ वैदिकमित्यादि ॥ नञ्समासपक्षे अनादिमिति [illegible] ॥ बहुव्रीहिरित्यादि ॥ अनादित्वोक्ते न [illegible] संशयस्यादित्यर्थः ॥ नञ्समास श्रवणे [illegible] बाधकमित्यत आह ॥

अथवा ॥ पूर्वोक्त एव विग्रहः ॥ न च मतुपो वैयर्थ्यं वैदिकं लिंगव्यत्ययं विभक्तिलोपं वा मन्यमानस्य बहुव्रीहिर्वा नञ्समासो वायमिति संशयः स्यात् ॥ तथा च ब्रह्म स्वयं कारणं न भवतीत्यपि अर्थेन ॥तन्निवृत्त्यर्थं मतुपेनानादिशब्देन नञ्समासस्याश्रवणात् ॥ ये त्वे

अन्यथानादीत्येव स्यात् ॥ १३ ॥

वं प्रयोजनमनभिधाय मतुपः प्रयोगः श्लोकपूरणार्थं इत्युक्तवंतस्तान्निराचष्टे॥ अन्यथेति॥ अस्मदुक्तप्रयोजनद्वयानंगीकार इत्यर्थः ॥ सार्थकेन शब्दांतरेण श्लोकपूरणसंभवादिति भावः ॥

तथा चेति ॥ कारणमिति ॥ आदिशब्दस्य कारणवाचित्वादित्यर्थः ॥ प्रयोजनद्वयेति॥ आदिमत्त्वादिवर्जितत्वप्रतिपादनं ब्रह्म स्वयं कारणं न भवतीति शंकानिवृत्तिश्चेति प्रयोजनद्वयानंगीकारे अनादीत्येव स्यादतो मतुप् वैयर्थ्यमित्यर्थः ॥ ननु न वैयर्थ्यं श्लोकपूरणात् मतुपः प्रयोग इत्युक्तत्वादित्यत आह ॥ सार्थकेनेति ॥ अनादि मत्परं ब्रह्मेति यच्छब्दादिना शब्देन श्लोकपूरणसंभवात् ॥ न मत्वादिति तच्छब्दस्य तत्र मत्त्वेनापेक्षितत्वात् यच्छब्दस्येहसार्थकत्वादिति भावः ॥

॥कृ०॥तात्पर्यानुसारेणाह ॥अथ वेति॥ननु नञ्समासे वेति कथं संशय॥पुंस्त्वादि॰ पूर्वोक्तस्य नञ्समासा [illegible] यमतोकारादिशब्दस्य नित्यपुंस्त्वेन समासेऽपि नञावश्यकत्वात् परवल्लिंगं द्वंद्वतत्पुरुषयोरित्युक्तेरित्यत आह॥वैदिकमिति॥यातीति॥शंकानाभावाद्ब्रह्मयर्थः॥प्रयोजनद्वयेति॥आदिमत्त्वादि॥विनिवर्त्यानि॥इदं ब्रह्म स्वयं कारणं न भवतीति शंकानिरासश्चेतिप्रयोजनद्वयेत्यर्थः॥

।। श्री० ।। शब्दांतरमिति ।। न विद्यते आदिरस्येत्यनादी ति विग्रहमकृत्वा आदिः कारणमस्यास्तीत्यादिमत् न आदिमदिति शब्दांतरमेवेत्यर्थः ।। अयम् ।। अन्यथेत्यनेनोच्यमानः।।अन्यथेति।।बहुव्रीहिमनंगीकृत्यशब्दांतरस्याश्रयणेपि दोषस्तोद्दित्यर्थः।।दोषेति।यो विकारोऽस्यास्ति (अस्येति)बहुव्रीहिणैव विवक्षितार्थसंभवेन इनो वैयर्थ्यशंकायां यश्चासौ विकारश्चेति कर्मधारयं विधाय सोऽस्यास्तीति शब्दांतर मित्येव परिहारो वाच्यस्तद्वत्रापीति भाव ।। अल्पेन।।अनादीत्यनेन।।अभिमतार्थः ।।कारणराहित्यंबहुव्रीहित्वे यद्विकारमितिशब्दरूपम ।। कर्मधारयादिनिमित्ते यद्विकारीति शब्दरूपमित्यकारस्य इकारस्य चाविशिष्टत्वेन शब्दगौरवाभावादित्यर्थः ।। १३ ।। १४ ।। भासतेरिति ।। भासधातोः नंदिग्रहीत्यादिनाकर्त्रर्थे कपचाद्यच्प्रत्यये भासेत्यकारांतः साधुरित्यर्थः ।।

ननु बहुव्रीहिमाश्रित्य पुनर्मतुपः प्रयोगे दोषः स्यात ।। न चैवम् ।। किं तु शब्दांतरमेवैतत तत्कथमयं दोषः अन्यथा यद्विकारीत्यत्रापि दोषप्रसंगात ।। सैवम् ।। बहुव्रीहिविवक्षितत्वाऽल्पेन शब्देनाभिमतार्थप्रतिपादनसंभवे बहुयत्नाश्रयणस्य दोषत्वेनोक्तत्वात् ।। यद्विकारीत्यत्र गौरवाभावात् ।। १३ ।। १४ ।। अहं पग शक्तिर्यस्येति व्याख्यानेऽयोसंभवं कश्चिदन्यथाप्राह।। ब्रह्मणः सर्वविशेषप्रतिषेधेने

।। १४ ।। सर्वेंद्रियाणिगुणाश्चाभासयतीति सर्वेंद्रियगुणाभासम् ।।

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।। सर्वतः श्रुतिमल्लोके सर्वमावृत्यतिष्ठति ।। १४।।

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् ।। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।। १५ ।।

वात्र त्रिजिज्ञापयिषितत्वात ।। शक्तिमत्त्वप्रतिपादनं विरुद्धमिति ।। तदसत ।। अत्र विशेषत्वस्य दर्शनादिति भावेनाह ।। सर्वेति।। गुणांस्ताद्विषयानाभासयति ।। प्रत्यापयति ।। प्रत्यति।।नित्रा ।। भासतेः।। पचाद्यच् ।।

।। कृ० ।। शब्दांतरमिति ।। आदिः कारणमस्यास्तीत्यादिमत् न आदिमदनादिमत् ।। इति शब्दांतरमित्यर्थः ।। अर्थभेदं शब्दभेद इतिमतेनेदम ।। प्रकृते च बहुव्रीहिनञ्समासाभ्यां अत्यंताभावान्योन्याभावयोर्बोधनादर्थभेद इति ज्ञेयम ।। गौरवाभावादिति ।। बहुव्रीहित्वे यद्विकारमिति भवति ।। ततश्चात्रस्वाराधिक्यं कर्मधारयादित्वंतत्वे तु यद्विकारीति अतोमात्राधिक्यगौरवाभावादित्यर्थः ।। १३ ।। १४ ।। पचाद्यजिति ।। आभ्यत आङ्पूर्वोद्भिन्नमण्यन्ताद्भासतेः पचाद्यच् द्वितीये स्वार्थेण्यंतात् ।। उभयत्रापि णेरनिटीति लोपइति बोध्यम ।।

१ सर्वेंद्रियेषुस्वस्वेतरसर्वेंद्रियशक्तिमत्त्व व्यापकत्वेति ।।

॥ श्री० ॥ एवं सविशेषत्वप्रतिपादनपरतया ॥ कथं तर्हीत्यादि ॥ सर्वतः पाणिपादादिमतः सर्वेंद्रियवर्जितत्वाचरत्वयोर्गुणभोक्तुर्निर्गुणस्य चायोगादिति भावः ॥ इंद्रियवर्जितत्वादिरूपार्थस्यानुक्तेराह ॥ शब्देतीति ॥ द्वितीय इति ॥ वदंति न लौकिकाद्वैलक्षण्येऽभावशब्दमित्यादिरित्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ विकारेष्विति ॥अमानित्वादिधर्माणामपि विकारत्वादिति भावः ॥ तदनंतरम् ॥ विकारनिरूपणानंतरम् ॥ उपोद्घातेनेति ॥ ब्रह्मणस्तद्‌ज्ञानस्य च भक्त्येकसमपादकत्वेनादावुक्तमित्यर्थः

एवं सर्वतःपाणिपादं तत्सर्वभृत गुणभोक्तृ चेत्यादिकमप्युदाहार्यम् ॥कथं तर्हि सर्वेंद्रियविवर्जितं निर्गुणमचरमित्याद्युक्तमित्यतआह ॥इंद्रियेति॥आदिशब्दात्परं शब्देत्यध्याहार्यम्॥पुरस्तात्॥द्वितीये॥१५॥१६॥१७॥१८॥ननु ब्रह्मणि प्रतिपादिते केन साधनेनेदं बुध्यारूढं भवेदित्या

इंद्रियवर्जितत्वाद्यर्थ उक्तःपुरस्तात्॥१५॥१६॥१७॥१८॥विकारांतर्भावाज्ज्ञानसाधनं प्रथमत उक्तम् ॥

बहिरंतश्च भूतानामचरं चरमेव च ॥सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत्॥ १६॥अविभक्तं च भूतेषु विभक्तमिव च स्थितम्॥भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥१७॥ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्॥ १८ ॥इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १९ ॥

कांक्षायां साधनं पश्चाद्वक्तव्यम्तत्कुतःप्रथमत उ(मेतदु)क्तमित्यतआह॥विकारेति॥विकारेष्वंतर्भावं ज्ञापयितुं तदनंतरमुपोद्घातप्रक्रिययोक्तमिति भावः

॥ रु० ॥ गुणभोक्तृचेत्यादिकमिति ॥ आदिपदेन ग्रसिष्णु प्रभविष्णु चेत्यादिसंग्रहः ॥ कथं तर्हीति ॥ सर्वेंद्रियवर्जितत्वस्य सर्वतःपाणिपादमित्यादिना निर्गुणत्वस्य सर्वभृदित्यादिगुणोक्त्या चरगतिभक्षणयोरिति धातोर्भक्षणादिशून्यत्वरूपस्याचरत्वस्य गुणभोक्तृत्वादिना विरोधादिति भावः ॥ नन्विंद्रियवर्जितत्वाद्यर्थ उक्तस्य कथमभिधीयते उक्त इत्यनुपपन्नं इंद्रियवर्जितत्वादेः प्रागनभिधानात पष्ठीसमासत्वे बाधः अर्थस्य वाच्याभावादित्यतोऽध्याहारमंगीकृत्याह ॥ शब्देत्यध्याहार्यमिति ॥ इंद्रियवर्जितत्वादिप्रतिपादकशब्दस्य प्राक्तनेंद्रियवर्जितत्वादिरूपार्थ इत्यर्थः॥१५॥१६॥१७॥१८॥अंतर्भावशब्दस्य ज्ञानलक्षणत्वस्य ज्ञापननिमित्तापेक्षया॥ततश्चांतर्भावविज्ञानमुद्दिश्येति पर्यवस्यतीति भावेन व्याचष्टे ॥अंतर्भावं ज्ञापयितुमिति ॥

१ तिष्ठतीत्यनुवर्तते २ अन्यथाभावरहितम ॥ ३ सर्वत्रगमनशक्तिमत ॥ ४ सत्त्वस्थानेभ्योऽभिन्नम॥तद्‌गुणतेषु मिश्रोभेद॥५ अज्ञानात्प्रतीतम्॥६प्रलये॥७ सृष्टिकालेसर्वस्य रक्षकम ॥८ अव्यक्तान्मृत्योरज्ञानात् ॥ ९ प्रकाशस्वरूपम ॥१० अन्यानपेक्षतयास्वेनज्ञातव्यरूपम ॥

॥ श्री० ॥ प्रथममिति ॥ स च य इत्याद्यपेक्षया प्रथमं यतश्च यदिति प्रतिज्ञा तस्योत्तरं उपद्रष्टेति प्रथममनुक्त्वेत्यर्थः ॥ इत्येतत्कृत इति ॥ इत्येतयोः प्रतिज्ञात्योः उत्तरं अनादिमत्परं ब्रह्मेत्यादिना कृत उक्तमित्यर्थः ॥ बहुत्वस्येति ॥ अनल्पत्वस्येत्यर्थः ॥ हेत्वंतरोक्तिः ॥ साधनात्युपयोगादिति हेत्वंतरोक्तिः ॥ अलौकिकस्येत्यादि ॥ यावान्निर्विशेषः ॥ अनादिमत्त्वादिरूपालौकिकप्रभावस्यामानित्वादिधर्मरहितानां पुंसां लौकिकरीत्या बुद्ध्यारोहणामानित्वादिसाधनानां प्रभावस्य बुध्यारोहेत्युपयुक्तत्वात् ज्ञानसाधनामानित्वादिनिरूपणानंतरमेव प्रभावो निरूपितः ॥ राजादेर्लौकिकप्रेरकत्वस्य दर्शनेन लोकरीत्या कथं चित्प्रेरकत्वस्यामानित्वादिधर्मशून्यानामपि पुंसां बुध्यारोहसंभवेनामानित्वादेः प्रेरकत्वस्य बुध्यारोहउपयोगाभावाज्ज्ञानसाधनामानित्वादिनिरूपणानंतरमेवोद्देशक्रमानुसारेण प्राप्तमपि यतश्च यदित्यस्योत्तरं नोक्तमित्याशयः ॥ नन्वेव ज्ञानसाधननिरूपणानंतर प्रभावस्य निरूपणमस्तु स च य इत्युक्तप्रेरकस्वरूपस्य तदनंतरं निरूपणे का संगतिरित्यत आह ॥ तत्प्रसंगेनेति ॥ प्रभावनिरूपणप्रसंगेनेत्यर्थः ॥ अनादिमदित्यादिप्रभावप्रतिपादकशब्दस्य विशेष्यापेक्षायां परंब्रह्मेत्युक्तौ स च य इति प्रेरकस्वरूपनिरूपणं च तेन लब्धमिति भावः ॥ १९ ॥ प्रागेवेति ॥ क्षेत्रनिरूपणानंतरं विकारनिरूपणाच्च प्रागेवेत्यर्थः ॥

उद्देशक्रमानुसारेण यतश्चयादिति प्रथममनुक्त्वा स च योयत्प्रभावश्चेतत्कृत उक्तमित्यत आह॥ बहुत्वादिति ॥ सूचीकटाहनिर्माणादौ बहुत्वस्य प्राथम्यव्यभिचाराद्धेत्वंतरोक्तिः ॥ अलौकिकस्य प्रभावस्य बुध्यारोहे हि साधनानामत्युपयोगो न तु तावान् लौकिकस्य प्रे

बहुत्वात्साधनात्युपयोगात्प्रभावः ॥ १९ ॥ यतश्च यदिति वक्तुं प्रकृतिविकारपुरुषान् संक्षिप्याह ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि॥विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥२०॥

रकत्वस्यानुभावारोह इति ज्ञापयितुं ज्ञानसाधनानंतरमेव प्रभाव उक्तः॥तत्प्रसंगेन चेति भावः ॥॥१३ ॥ननु प्रकृतिं पुरुषं चैव विद्धीत्यादिकमप्रतिज्ञातं किमित्युच्यते॥मैवम्॥याहक्चेति प्रतिज्ञातस्यसप्रकारस्यक्षेत्रस्य कथनात् तत्प्रतिज्ञाक्रमेण प्रागेव कुतोनोक्तमित्यतआह॥यतश्चेति॥

॥ कृ० ॥ अलौकिकस्येति ॥ वेदैकगम्यस्येत्यर्थः ॥ लौकिकस्येति ॥ वेदशब्देतरप्रमाणगृहीतव्यत्विकानुमानसिद्धस्येत्यर्थः ॥ अनुमानं नेत्यम ॥ विमतंकिंनचिन्नियतम् ॥ अपर्याप्तशक्त्यादिमत्त्वात् ॥ रथादिवदिति ॥ तर्हिस्वरूपोक्तिरसंगतेत्यत आह ॥ तत्प्रसंगेनेति ॥ १९ ॥

वक्तव्यं प्राप्तमिति ॥ वक्तव्यतया प्राप्तमित्यर्थः ॥ वक्तुम् ॥ उपद्रष्टेत्यनेनेति शेषः ॥ प्रागपीति ॥ प्रेरकस्वरूपं वक्तुं सप्रकारं क्षेत्रमत्र प्रभावानंतरं तावद्वक्तव्यमेव ॥ तस्य यादृक्चेति प्रतिज्ञातसप्रकारक्षेत्रस्य प्रतिज्ञाक्रमानुसारेण पंच चेंद्रियगोचरा इत्यंतेन यच्चेति प्रतिज्ञातक्षेत्रस्वरूपनिरूपणानंतरमपि प्रवचने गौरवं स्यादित्यर्थः॥ तर्हि प्रकृतीत्यादिकथमिति॥ प्रकृतिशब्दवाच्यभूतादिक्षेत्रस्य यच्चेति प्रतिज्ञातविषयत्वान्महाभूतानीत्यनेनोक्तत्वाच्चेच्छादिविकाराणां यद्विकारीति प्रतिज्ञाविषयत्वादिच्छाद्वेष इत्यादिनोक्तत्वाच्च पुरुषपदोक्तजीवस्य क्षेत्रभिन्नत्वेन यच्चेत्यादिप्रतिज्ञाविषयत्वाभावात्कथं तदुक्तिर्यदि कृतेति प्रतिज्ञातोक्तित्वमिति भावः ॥ उत्तरमाह ॥ ईश्वरातिरिक्त इति ॥ चेतनाचेतनं चेतनसर्वं क्षेत्रमितीर्यत इति वचनादिति भावः ॥ विवक्षाविशेषेति ॥ तेषामत्यल्पइतिवक्ष्यमाणविवक्षाविशेषेत्यर्थः ॥

यतश्चयदिति प्रतिज्ञातं प्रेरकस्वरूपं तावत्प्रभावानंतरं वक्तव्यं प्राप्तम् ॥ तत्र प्रेरकस्य स्वरूपनिरूपणं प्रेर्यज्ञानमपेक्षते ॥ प्रेर्यं च सप्रकारं क्षेत्रम् प्रेरकस्वरूपं वक्तुं अनेन प्रेरणीयं सप्रकारं क्षेत्रमुच्यते ॥ तस्य प्रागपि वचने गौरवं स्यादितिभावः ॥ तर्हि प्रकृतीत्यादिकथमुच्यते ॥ ईश्वरातिरिक्तःसर्वोपिचेतनाचेतनवर्गः क्षेत्रमित्युच्यते ॥ तत्र प्रकृतिशब्देनमहाभूतानीत्यादिनोक्तानि चतुर्विंशतितत्वानि गृह्यंते ॥ विकारशब्देनेच्छाद्युपलक्षिताः क्षेत्रांतर्भूता अपि गुणत्रयाद्याः सर्वे विकारा विवक्षाविशेषवशेन पृथगुपात्ताः ॥ पुरुषशब्देनजीव इति ॥ यावत्संजायत इत्यादिना पुनर्वक्ष्यमाणत्वात्पुनरुक्तिदोषं परिहर्तुं संक्षिप्येत्युक्तम् ॥

॥ कृ० ॥ प्रेरकस्वरूपमिति ॥ प्रेरकस्य प्रेरणीयोगिधर्मविशिष्टत्वमित्यर्थः ॥ स्वरूपमात्रस्य परं ब्रह्मेति नामोक्त्याऽभिहितत्वात् ॥ एवमग्रेपि बोध्यम् ॥ प्रागपीति ॥ यादृक्चेति प्रतिज्ञानुसारात्पंचचेंद्रियगोचरा इत्यंतेन ॥ यच्चेति प्रतिज्ञातस्यात्रानंतरमपीत्यर्थः ॥ प्रकृतीत्यादिकथमिति ॥ महाभूतानीत्याद्युक्त्या एतत्क्षेत्रमित्युक्तत्वेन प्रकृत्यादीनां क्षेत्रत्वावगमादिति भावः ॥ ईश्वरातिरिक्त इति ॥ चेतनाचेतनं चेतनसर्वं क्षेत्रमितीरितम् ॥ शरीरमिदं कौंतेय क्षेत्रमित्यभिधीयत इति निर्णयोक्तेरिति भावः ॥ न चैवमेतत्क्षेत्रमिति गीताविरोधः ॥ तत्र समासेनेत्युक्ततया संक्षेपेणाभिधानात् ॥ अत्र ममप्रेक्षत्रोक्तेरिति ॥ प्रकृतिशब्देनेति ॥ गोभिः श्रीणीतमत्सरमितिवत्कारणशब्दस्य कार्ये लक्षणेति भावः ॥ नन्विच्छाद्वेष इत्यनेनेच्छादीनामेव विकारत्वेनोक्तत्वात् तद्विरोध इत्यत उक्तम् ॥ इच्छाद्युपलक्षिता इति ॥ ननु गुणत्रयादीनां पृथिव्यंतानां महाभूतानीत्याद्युक्तक्षेत्रांतर्भूततया प्रकृतिशब्देन ग्रहणात्कथं विकारशब्देन ग्रहणमित्यत उक्तम् ॥ क्षेत्रांतर्भूता अपि पृथगुपात्ता इति ॥ तत्र हेतुर्विवक्षाविशेषवशेनेति ॥ गुणत्रयादीनामुत्तरोत्तरं महदादिकारणत्वविवक्षया क्षेत्रत्वम् ॥ प्रकृत्याद्युपादेयत्वविवक्षया विकारत्वमिति विवक्षावशेनेत्यर्थः ॥

---

१ इतिशंका ॥ २ इदमुत्तरम् ॥

॥ श्री० ॥ नन्वेनमप्यत्र प्रकारनिरूपणात् याद्दक्चेति प्रतिज्ञातोक्तित्वं कथमस्येत्यत आह॥ सप्रकारानिति ॥ प्रकृतिपुरुषयोरनादित्वस्य सत्वादीनामल्पविकारस्वरूपस्य ग्राह्यता ॥ विकारत्वरूपस्य च प्रकारस्य निरूपणादिति भावः ॥ सत्वरजस्तमसां॥ उद्भूतानामिति शेषः ॥ पृथगुक्तिरिति ॥ विकारेभ्यः पृथगुक्तिरित्यर्थः॥ तेषामत्यल्पो विशेषो लयात्सर्ग इति भाष्ये लयात्पूर्वं सर्गकाले इत्यर्थो द्रष्टव्यः ॥ तेषामत्यल्पविशेषोदयात्सर्ग इति क्वचित्कः पाठः स समीचीनः सरसश्च ॥ कार्याकार्यगुणास्तिस्रो यत्र स्वल्पोद्भवो जनाविति वक्ष्यमाण प्रमाणेनैकवाक्यतालाभात्तेषां गुणानां सर्गकालेऽत्यल्पविशेषोदयादित्यर्थः ॥ प्रमाणे जना इत्युक्तत्वात्तदनुसारेणात्र सर्ग इत्युक्तम् ॥ प्रमाणे स्वल्पोद्भव इत्युक्तत्वादत्रात्यल्पविशेषोदयादित्युक्तम् ॥ सु इत्युक्तत्वादत्रातीत्युक्तम् ॥ अत्येति तु समं प्रमाणे उक्त इत्युक्तत्वा। अत्र विशेषोदयादित्युक्तमिति प्रमाणभाष्ययोरैकार्थ्यं द्रष्टव्यम्॥ कार्याश्चेत्यकार्याश्चेति तथा च जनौ सृष्टिकाले महाभूताद्यपेक्षयाल्पोपचयरूपस्वल्पोद्भवसद्भावात् कार्यत्वं बहूपचयाभावादकार्यत्वं चेत्यर्थः ॥ अनेनेति ॥ स्वमते पृथगुक्तौ निमित्तविशेषकथनेनेत्यर्थ ॥ अयुक्तमिति॥ तत्रैतादृशनिमित्तविशेषाभावः २०॥ कारणानामपीति ॥ कार्यकारणयोरभेदादिति भावः ॥

आह सप्रकारान्निरूपयति ॥ गुणाः सुखदुःखमोहा इति कश्चित् ॥ कार्यकारणलक्षणा इत्यन्यः ॥ तदुभयं निराकर्तुं व्याचष्टे ॥गुणाइति॥ ननु सत्वरजस्तमसामपि प्रकृतिविकारत्वाद्विकारांश्च गुणांश्चेति पृथगुक्तिः किमर्थेत्यत आह ॥ तेषामिति ॥ इतिज्ञापयितुमिति शेषः ॥

गुणाः सत्वादयः ॥ तेषामत्यल्पे विशेषो लयात्सर्ग इति विकाराःपृथगुक्ताः॥कार्याकार्यगुणास्तिस्रो य
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २१ ॥
तः स्वल्पोद्भवोजनाविति माधुच्छंदसशाखायां॥२०॥कार्यं शरीरम्॥शरीरं कार्यमुच्यत इत्यभिधानम् ॥

विकाराः पृथगुक्ता इति विकाराश्च गुणाश्च पृथगुक्ता इत्यर्थः ॥ कार्याश्चेतेकार्याश्च॥तिस्रस्त्रयः॥ अनेन सुखाद्यंगीकारे विकारेभ्यः पृथग्ग्रहणमयुक्तमित्यपि सूचितम् ॥२०॥ कारणानामपि कार्यत्वात् पृथगुक्तिर्व्यर्थेत्यतो रूढिमाश्रित्य कार्यकारणशब्दौ व्याख्याति ॥कार्यमिति ॥

॥ रु० ॥ याद्दक्चेति प्रतिज्ञातप्रकारोक्तित्वघटनाय व्याचष्टे ॥ सप्रकारानिति ॥ प्रकृतिपुरुषयोरनादिरूपस्य गुणत्रयादीनां प्रकृतिसंभवत्वरूपस्य च प्रकारस्योक्तेरिति भावः ॥ ननु विकारशब्देन गुणादीनां ग्रहणाद्गुणाः पृथङ् न वक्तव्या इत्यातो गुणा पृथगुक्ता इति वक्तव्यं विकाराः पृथगुक्ता इ गुच्यत इत्यतो व्याचष्टे ॥ विकाराश्चगुणाश्चेति ॥ २० ॥

१ पूर्वमितिशेषः ॥ सर्गइतिच्छेदः ॥

॥ श्री० ॥ अभ्यवहारादिरिति ॥ भुजपालनाभ्यवहारयोरिति धातोरिति भावः ॥ स्वीयतया साक्षात्कार इति ॥ देवदत्तादीनां यज्ञदत्तादिगतसुखदुःखादिविषयकपरोक्षानुभवेसत्यपि तद्भोक्तृत्वाभावात्तद्व्यावृत्त्यर्थं साक्षात्कार इत्युक्तम् ॥ सर्वज्ञत्वादीश्वरस्यापि देवदत्तादिगतसुखदुःखादिसाक्षात्कारसत्त्वेऽपि न तद्भोक्तृत्वमित्यतः स्वीयेत्युक्तमिति द्रष्टव्यम् ॥ भोगः प्रकृतेरेवेति ॥ यथोक्तं सांख्येन ॥ तस्मान्न बध्यते न मुच्यते नापि संसरति कश्चित् ॥ बध्यते संसरति मुच्यते च नानाश्रया प्रकृतिरिति ॥ न प्रकृतेर्योगः ॥ अयमाशयः ॥ भोक्तृत्वं हि न पुरुषस्य स्वभावः ॥ अपवर्गाभावप्रसंगात् ॥ आगन्तुकं तु नोपपद्यते ॥ अपरिणामित्वात् ॥ न च प्रतीतिविरोधः [illegible] ॥ [illegible] भोक्ताऽस्मि [illegible] स च प्रकृतिपुरुषविवेकाग्रहमात्रनिबंधन इति [illegible] द्रष्टव्यम् ॥ [illegible] स्वरूपकर्तृत्वांगीकारे स्वीयतया साक्षात्काररूपभोगस्यावश्यकत्वादित्याशय ॥ कार्येति ॥ [illegible] कार्यकारणकर्तृत्वे तदाकारेण परिणामे प्रकृतिर्हेतुरित्यर्थः ॥ २१ ॥ २२ ॥

भोक्तृत्व इत्यत्र प्रकृत्यर्थो भोगोऽभ्यवहारादिः सुखादिविषयो न संभवति अत आह ॥ भोग इति ॥ स्वीयतया साक्षात्कार इत्यर्थः ॥ भोगः प्रकृतेरेव न पुरुषस्य अतः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरिति कथमुक्तमिति सांख्याः ॥ तत्राह ॥ स हीति ॥ न तु प्रकृतिरचे

कारणानींद्रियाणि भोगोऽनुभवः॥स हि चिद्रूपत्वादनुभवति॥प्रकृतिश्च जडत्वादपरिणामिनी॥कार्यकार

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान्॥कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु॥२२॥

णकर्तृत्वे कारणं प्रकृतिं विदुः॥भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परमिति भागवते॥२१॥२२॥

तन्यादिति शेषः॥ ननु कार्यकारणकर्तृत्वे हेतुः प्रकृतिरित्युक्तम्॥कर्तृत्वं च ज्ञानेच्छाप्रयत्नयोगः तत्कथं प्रकृतेर्भोगासंभव इत्यत आह॥प्रकृतिश्चेति॥चस्त्वर्थः॥परिणामिकारणत्वात्कर्तृत्वमित्युपचर्यत इति भावः॥श्लोकार्थे पुराणसंमतिमाह॥कार्येति॥कारणं विदुरित्युत्तरार्धेऽनुवर्तते॥२१॥२२

॥ कृ० ॥ अभ्यवहारादिरिति ॥ पालनमभ्यवहारादीत्युक्तम् ॥ भुजपालनाभ्यवहारयोरित्यतोऽत्रेति भावः ॥ ननु सर्वज्ञत्वादीश्वरस्य [illegible] साक्षात्कारे चातिव्याप्तिरित्यत आह॥ स्वीयतया साक्षात्कार इति ॥ नन्वेवमपीश्वरस्य सर्वाभिमानित्वं [illegible] तथा [illegible] साक्षात्कारे पुनरतिव्याप्तिरिति चेन्न ॥ स्वसंबंधितासिस्वीयशब्देनाभिमानाख्यसंबंधस्य विवक्षितत्वात् ॥ अभिमानस्य च [illegible] ॥ न्यायमते मम शरीरमित्यत्रादृष्टस्य सबंधत्वदर्शनाच्चेति दिक् ॥ नीचोच्चतारूपविकारो भोग इति तु लक्षणांतरं तेन नीचोच्चत्वेन दुःखादिर्भोग इत्यभिधीयत इत्यनेन न विरोध इति बोध्यम् ॥ २१ ॥ २२ ॥

१ स्कं. ३ अ. २७ श्लो. ९ कार्यकारणकर्तृणांशरीरेंद्रियमनसांप्रकृतिप्रधानामिमां[illegible]कारणविदुः ॥ अत्रनन्वेऽपिकर्तृशब्द[illegible]औपचारिकमचेतनत्वादितिज्ञेयम् ॥

॥ श्री० ॥ औदासीन्येति ॥ अनुज्ञामात्रदातुर्लोके औदासीन्यदर्शनादिति भावः ॥ विरोधादिति ॥ तत्र भर्तृत्वादौ स्वातंत्र्यप्रतीतेरिति भावः ॥ क्रियावृत्तिश्चेति ॥ मंतृशब्दोक्तकर्तव्यालोचनरूपक्रियाया आवृत्तिः पुनरर्थकानुशब्दार्थ इत्यर्थः ॥ तृनोऽर्थ इति ॥ तृनस्ताच्छील्यादौ विहितत्वात् ॥ तत्रादिपदेन विशेषरूपार्थस्यापि ग्रहणादिति भावः ॥ ननु निरूपक इत्युक्तेऽप्याज्ञामात्रदातृत्वमत्रप्राप्तौदासीन्यमनिवार्यमेवेत्यत आह ॥ कर्तव्यस्येति ॥ अनेन मनुधात्वर्थ उक्तो भवति ॥ ततश्च प्रेरक इति भावः ॥ व्याख्यानांतर इति ॥जीवस्य सुखदुःखानां भोगशक्तिप्रदः सदा ॥परमः पुरुषो विष्णुरिति प्रमाणानुसारेण जीवानां भोक्तृत्वे भोगशक्तिप्रदाने परमात्मा हेतुरिति तात्पर्यगतव्याख्यानांतर इत्यर्थः॥तथा च तदपि व्याख्यानांतरमित्याशयः ॥ ननु य एवं वेत्ति पुरुषं प्रकृतिं चेत्यत्र पुरुषशब्देन जीवेश्वरयोः परामर्श इति भाष्ये व्याख्यानांतरे च समम्॥तत्र व्याख्यानांतरे च पुरुषशब्देन जीवः कुत्र प्रकृतः ॥ पुरुषःसुखदुःखानामित्यत्र पुरुषपदस्येश्वरपरत्वात्॥तथा च य एवं वेत्ति पुरुषमित्यत्र पुरुषपदेन तत्परामर्शो न संभवतीत्यत आह॥पुरुष इति॥एवं च व्याख्यानांतरे य एवं वेत्ति पुरुषमित्यत्रपुरुषपदेनोभयपरामर्शो युक्त इति भावः ॥

यतश्चयदिति वक्तुमित्युक्तम् तत्केनोच्यत इत्यत आह ॥ यतश्चेति॥ इति प्रतिज्ञातमिति शेषः ॥अनुमंता अनुज्ञातेति कश्चित्॥ तदसत् ॥ औदासीन्यप्राप्तौ भर्ता भोक्तेत्यादिविरोधादिति भावेन व्याचष्टे ॥ अनुमंतेति ॥ अनुशब्दः पुनरर्थे ॥ क्रियावृत्तिश्च तदर्थ इति ज्ञापनाय

यतश्चयदित्याह॥उपद्रष्टेति॥अनुमंता अन्वनु विशेषतो निरूपकः॥पुरुषः सुखदुःखानामिति जीव उक्तः॥

उपद्रष्टाऽनुमंता च भर्ता भोक्ता महेश्वरः॥परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषःपरः ॥२३॥

द्विरुक्तिः॥विशेषत इति तृनोर्थः॥निरूपकः ॥कर्तव्यस्यालोचकः॥य एवं वेत्ति पुरुषमित्यत्र पुरुषशब्दं व्याख्यातुमुपोद्घातमाह॥पुरुषइति॥सुखदुःखभोक्तृलिंगादिति भावः॥सुखदुःखानां भोक्तृत्वे भोगे हेतुः कर्तेति व्याख्यानमाश्रित्येदमुक्तं व्याख्यानांतरे तु भगवानेवात्र पुरुषःपुरुषप्रकृतिस्थो हीति जीवः

॥ कृ० ॥ पुनरर्थ इति ॥ अव्ययानामनेकार्थत्वादिति भावः ॥ तृनोऽर्थ इति ॥ तच्छीलादौ तृनोविधानादिति भावः ॥ ननु प्रेरकत्वोपयोगिनः प्रेर्यद्रष्टृत्वादयो धर्मा इह वक्तव्यत्वेनाभिप्रेताः अत एवोक्तं प्राक् ॥ एवं धर्मविशिष्टात्प्रवर्तते क्षेत्रमिति तन्निरूपकत्वं यदि ज्ञापकत्वं तदेंद्रियादेस्तथात्वेऽपि प्रेरकत्वाभावाद्व्यभिचारः ॥ यदि चोपदेष्टृत्वं तदाऽसिद्धिः ॥ ईश्वरस्य ब्रह्माद्युपदेष्टृत्वेऽपि क्षेत्रांतर्भूतसर्वोपदेष्टृत्वाभावादित्यत आह ॥ कर्तव्यस्यालोचक इति ॥ इदमनेनकर्तुंशक्यमिति विमर्शवानित्यर्थः ॥ व्याख्यानांतरे य एवं वेत्ति पुरुषमित्यत्र पुरुषपदेन जीवग्रहणसिद्ध्यर्थमाह ॥ पुरुषः प्रकृतिस्थो हीति ॥ ॥३४२

॥ श्री० ॥ नन्वत्र भाष्ये य एनं वेत्ति पुरुषं प्रकृतिं चेति जीवेश्वरौ सहैवोच्येते इत्युच्यते तत्र पुरुषपदेन कथमुभयोःपरामर्श अप्रकृतत्वादिति शंकायां पुरुषः सुखदुःखानामिति जीव
उक्त इत्यनेन जीवस्य प्रकृतत्वमुक्तम् ॥ ईश्वरस्य तु कथं प्रकृतत्वमित्यतः पुरुषः सुखदुःखानामिति जीव उक्त इति भाष्यमुपलक्षणपरमित्याह ॥ उपलक्षणमेतादिति ॥ पुरुषशब्देन
ति शेषोक्तिः ॥ द्विवचनेनेति ॥ य एनौ वेत्ति पुरुषौ प्रकृतिं चेति द्विवचनं गीतायां स्यादित्यर्थः ॥ तंत्रेणेति ॥ सकृदुक्तमनेकोपकारकं तंत्रम् ॥तदृयायाश्रयेणेत्यर्थः ॥ प्रागुक्तेति ॥
मोक्षो हि महापुरुषार्थ इति द्वितीयाध्यायोक्तेत्यर्थः ॥ तात्पर्यस्यशब्दधर्मत्वादाह ॥ न्यायव्युत्पादकस्येति ॥ कश्चिदिति ॥ सप्तभंगित्वादावित्यर्थः ॥ तत्सत्त्वमिति ॥ तस्यार्थस्य स
त्त्वमित्यर्थः ॥ महत्त्वमिति ॥ महत्त्वरूपोर्थ इत्यर्थः ॥ प्रामाण्यादिति ॥ प्रामाण्यस्यार्थसत्ताघटितत्वादिति भावः ॥ शंकाहेतुरिति॥विषयासत्त्वशंकाहेतुरित्यर्थः ॥

उपलक्षणमेतत् ॥ उपद्रष्टेतीश्वर उक्त इत्यपि द्रष्टव्यम् ॥ ततः किमित्यत आह ॥ पुरुषमिति॥ यत एवमुभावपि प्रकृतौ ॥ अतो य एनं वेत्ति
पुरुषमित्यत्र पुरुषशब्देन जीवेश्वरौ द्वावपि गृह्येते द्वयोरपि परामर्शसंभवात् ॥तर्हि द्वयोर्द्विवचनेन भाव्यमित्यत उक्तम् ॥ सहैवेति ॥ तंत्रेणे
त्यर्थः ॥ अत्र कश्चिद्य एनं वेत्ति पुरुषं साक्षादहमस्मीत्येवमध्याहारेण जीवेश्वरैक्यं व्याख्यातवान् ॥ तद्दूषयति ॥ अन्यत्रेति ॥ जीवेश्वरैक्ये
सर्ववेदानां प्राधान्येन यत्प्रतिपादकत्वं तद्विरोधः ॥ कथमित्यत आह ॥ उत्कर्षेहीति॥सर्वागमानामीश्वरस्य सर्वोत्कर्षे हि महातात्पर्यमित्यर्थः॥

**पुरुषं प्रकृतिमिति जीवेश्वरौ सहैवोच्येते ॥ अन्यत्र महातात्पर्यविरोधः ॥ उत्कर्षे हि महातात्पर्यम् ॥ त
था हि सौकरायणश्रुतिः ॥ अवाच्योत्कर्षे महत्त्वात्सर्ववाचां सर्वन्यायानां च महत्तत्परत्वम् ॥ वि
ष्णोरनंतस्य परात्परस्य तच्चापि ह्यस्त्येव न चात्र शंका ॥**

तत्कुतः प्रागुक्तयुक्तेः श्रुतेश्चेत्याह ॥ तथा हीति ॥ विष्णोर्महत्त्वादेवावाच्यत्वेनोक्ते सर्वोत्कर्षे सर्वासां वेदवाचां सर्वन्यायानां न्यायव्युत्पादक
स्य मीमांसाशास्त्रस्येति यावत् ॥ महत्तत्परत्वं महातात्पर्यम् ॥ अस्तूत्कर्षे महातात्पर्यम् ॥तथाप्युत्कर्षस्य सत्त्वं कुतः॥न हि जैनवाक्यस्य क
चिन्महातात्पर्येऽपि तत्सत्त्वमस्तीत्यत आह ॥ तच्चापीति ॥ न केवलं तत्र तात्पर्यं किं तु तन्महत्त्वमपि चास्त्येव ॥ धियां स्वतः प्रामाण्यादि
ति हेरर्थः ॥ स्वतःप्रामाण्येऽपि बाधकाद्विषयासत्त्वं भवति ॥ तदप्यत्र नास्तीत्याह ॥ न चात्रेति ॥ शंकेति ॥ शंकाहेतुर्बाधकमिति यावत् ॥

॥ कृ० ॥ भाष्यमंत पूर्वमीश्वरानुक्तेरुत्तरत्र कथं तद्ग्रहणमित्यत आह ॥ उपलक्षणायेति ॥ तंत्रेणेति ॥ सकृत्कृतमनेकोपकारकं तंत्रं तेनेत्यर्थः ॥ प्रागुक्तयुक्तेरिति ॥ मोक्षो
हि महापुरुषार्थ इत्यादिनेति शेषः॥तात्पर्यस्य शब्दधर्मत्वादाह ॥ न्यायव्युत्पादकस्येति ॥ काश्चिदिति ॥ जगतः सप्तभंगित्वादावित्यर्थः ॥

॥ श्री० ॥ उत्तरत्वेति ॥ न तत्प्रमाणं कवयो वदंतीत्यत्र हेतु[illegible] ॥ [illegible] ॥ अत उपजीव्यवेदविरोधाद्वा [illegible] ॥ अगमविरोधे ॥मा [illegible] ॥ [illegible] नावज्ञानत्वम ॥ न [illegible] ॥ [illegible] अतिपादयतीत्युपजीव्यवेद विरोधादप्रमाणमेव [illegible] ॥ [illegible] उपजीव्यवेदविरुद्धत्वादप्रमाणमेवेति ॥ यथो क्तमनुव्याख्याने ॥ आगमेन [illegible] ॥ [illegible] ॥ [illegible] प्रत्यक्षागमौ प्रति प्रतियोगिभू तमर्वाक्[illegible] ॥ एतनेति ॥ [illegible] वाच्य तस्य च वेदे नरप्रमाणेनासंभवात् वेदेनैव [illegible] युक्तिरपि न [illegible] ॥ [illegible] ॥ हरिणा दृष्टा श्रुता एवार्थेनेति ॥ श्रुत यो दृष्टश्चेति [illegible] ॥ [illegible] ॥

कथं बाधकाभाव इत्यत आह ॥ अत इति ॥ अत इत्यस्यानन्तरान्वयः॥ तत्रेश्वरस्य सर्वोत्कर्षे न यद्विरुद्धं मानं शंक्यते॥ तदपि किमक्षजा दौ ॥ अक्षजागमयोरन्यतरत् अथ वा युक्तिः ॥ आद्यं निराकरोति ॥ न तदिति ॥ कवयो न्यायविदः ॥ कुतः ॥ अतउपजीव्यवेदाविरोधात॥

अतो विरुद्धं तु यदत्र मानं तदक्षजाद्यथवाऽपि युक्तिः॥नतत्प्रमाणं कवयो वदंति न चापियुक्तिर्ह्यनुमाति हि दृष्टेरिति॥

एतेन द्वितीयोऽपि निरस्तः ॥ तथाऽपि विशेषं वक्तुमाह ॥ नचेति ॥ युक्तिरपि नैव मानं यतो दृष्टेः श्रुतेरूनमानजात्यैव दुर्बलज्ञानोत्पादिका भगवदुत्कर्षे सर्वागमानां महातात्पर्यमित्यत्र पत्रिनाया:श्रुतेः शेषेण योऽर्थोलब्धः सोऽपि प्रकृतोपयुक्त एव ॥

॥ क्रु० ॥ अप्रामाण्ये[illegible] न्यायविद इति ॥ [illegible] न्यायविद इत्यर्थः ॥ अत इत्यस्यानन्तरान्वय इत्यादर्शयति ॥ अत उ पजीव्यवेदाविरोधादिति ॥ ननु युक्तिरपि [illegible] किंतु [illegible] आह ॥ श्रुतेरिति ॥ यतस्ता हरिणा दृष्टा इत्युक्त्वा श्रुता दृष्टश्चेति [illegible] ॥ श्रुतिगुरु[illegible] बहुव्रीहिरिति भावेनाह ॥ दुर्बलज्ञानेति ॥ दुर्बलत्वे हेतुर्जात्येति ॥ उत्कर्षेणेत्यर्थ ॥

१ पंचरात्रमहाभारतमूलरामायणानि॥अनुकूलपुराणानि स्मृत्यन्तरादीन्यपि ग्राह्या ॥ २ अविरुद्धार्थप्रतिपादकत्वात् ॥

॥ श्री० ॥ प्रकृतोपयुक्तमेवदर्शयति ॥ उत्कर्षस्येति ॥ [illegible] प्रकृतमाहेति ॥ [illegible] ॥ अत इत्युक्तमिति॥ न तत्प्रमाणमित्यत्र हेतुकथनपरत्वात् इत्यनेनोक्तमित्यर्थः ॥ [illegible] ॥ ननु कर्षेहीत्युत्कर्षस्य प्रकृतत्वात् सत्त्वोत्क र्ष इति वक्तव्ये सदेवमाहात्म्यमिति कस्मादुक्तमित्यत आह ॥ उत्कर्षस्येति ॥ [illegible] संयोजना ॥ तथा चोत्कर्षे महातात्पर्यं सदेव नावांतर मित्यर्थः ॥ अंगीकृत्येति ॥ उत्कर्षतन्मत्त्वयोर्धर्मधर्मिभावेन भेदमंगीकृत्योभयत्र महातात्पर्याभावेन [illegible] ॥ [illegible] ॥ युक्तिभिरित्युपलक्षणमिति॥

उत्कर्षस्य सत्त्वाभावे जीवेश्वरैक्यस्य तद्विरोधाभावादनस्तं स्ववाक्येनाप्याह॥अत इति॥युक्तिभिरित्युपलक्षणम् ॥एतदपलापो भगवदुत्कर्ष स्याविद्यमानत्वादिकल्पनम्।अत इत्युक्तमेवार्थं विशदयति॥अत इति ॥ वेदविरोधादित्यर्थः॥आदिपदेनानित्यत्वं गृह्यते ॥ भगवदुत्कर्ष स्येति शेषः ॥ सापीत्यपिशब्देन प्रत्यक्षादेः समुच्चयः ॥ इतिशब्दो हेतौ ॥ बाधकाभावादित्यर्थः ॥ उत्कर्षस्य प्रकृतत्वेऽपि तच्चापीति

अतो युक्तिभिरप्येतदपलापो न युक्तः ॥ अतो यया युक्त्याऽविद्यमानत्वादि कल्पयति साप्याभासरू पेति सदेव माहात्म्यं वेदैरुच्यत इति सिध्यति ॥ अवांतरं च तात्पर्यं तत्रास्ति॥उक्तं च तत्रैव ॥अवांत रं तत्परत्वं च सत्त्वे महद्वाऽप्येकत्वात्तयोरनंत इति ॥

श्रौततच्छब्दव्याख्यानाय माहात्म्यमित्युक्तम्॥ननु प्रतिपन्नस्य विद्यमानत्वादिकं बाधकाभावेन कल्प्यम्॥स्वतः प्रामाण्यात्॥न चोत्कर्षस्य सत्त्वं वेदात्प्रतिपन्नम्॥उत्कर्षे तत्सत्त्वे च तात्पर्यांगीकारे वाक्यभेदप्रसंगादित्यत आह॥अवांतरं चेति॥चशब्दस्य तत्सत्त्वेचेत्यन्वयः॥उभयत्र महातात्पर्याभावान्न दोषः॥एतत्कुत इत्यत आह॥उक्तं चेति॥तत्रैव तस्यामेव श्रुतावंगीकृत्यचेदमुक्तं वस्तुतस्तूत्कर्षसत्त्वे महदपि तत्परत्वम्।

अनेन मूले युक्तिभिरपीत्यपिशब्दः प्रामादिक इति सूचितम् ॥अन्यथा सापीत्यपिशब्देन प्रत्यक्षादेःसंग्रह इतिवदत्राप्यपिपदेन प्रत्यक्षादेः संग्रह इत्येव ब्रूयात्॥यद्वैतदपलापोऽपिशब्दो भिन्नक्रमः पूर्वोक्तसमुच्चायक इत्याहुः॥श्रौततच्छब्देति ॥श्रुतावुत्कर्षे महत्त्वादिगुणयोः प्रकृतत्वेऽपि तदिति नपुंसकेन माहात्म्यस्यैव परामर्शो द्विभावः ॥ तत्र-पस्यार्थः॥सत्त्वइति ॥

१ उत्कर्षम् २ आदिपदेनानित्यत्वकल्पनम्॥तच्चाप्यत्रापि [illegible] इतिज्ञेयम् ॥२ स्वपदानित्यत्वर्थतइति [illegible] द्रष्टव्यम्॥३ एतत्पाठे टीकायां समुच्चयइत्यत्रसंग्रह इति पाठ इति ज्ञेयम् ॥

॥ श्री॰ ॥ तयोरित्येतेनैव पूर्णत्वाच्छ्रुतानंत इति पदमधिकमित्यत आह ॥ प्रकृतत्वादेवोक्तामिति ॥ विष्णोरनंतस्य परात्परस्येति पूर्ववाक्य इत्यर्थः ॥ प्रमाणम् ॥ उत्कर्षादिप्रतिपा दकम्॥तस्य ॥ प्रमाणप्रतिपादितोत्कर्षरूपार्थस्य ॥ नन्विति ॥ विधिनिषेधाभावेऽप्यप्रत्यक्षयोगादिति भावः ॥ तत्र॥सत्वे ॥ तात्पर्यांतरमिति ॥ उत्कर्षे तत्सत्वे च पृथक् तात्पर्यं न क ल्प्यम् ॥ उत्कर्षे महातात्पर्यमिथ्या तत्सत्त्वेऽपितात्सिद्धोऽस्तीति भावः ॥ अनन्तरातीताध्याय इति ॥ श्यामोथ वा हृदये सोऽष्टबाहुः ध्येयः स वै लोहितादित्यवर्ण इत्यादिश्रुतिरुदाहरणेन प्रपंचितामित्यर्थः ॥ इत्युक्तम् ॥ अत इत्यनेनेत्यर्थः ॥ विपर्ययस्यापीति॥ युक्त्यादिविरोधेनवेदस्याप्याभासत्वस्येत्यर्थः ॥ उपाधीति ॥ तथा चोपाधिप्रतिपक्षौ तु क नामातीवदुर्वचाविति वचनादुपाधिव्यभिचारसत्प्रतिपक्षादिभिर्युक्त्यादेराभासत्वं वक्तुं शक्यमिति भावः ॥ ननु युक्त्यादेरपि स्वतः प्रामाण्यात् किं विशिष्याभिधीयते स्वतः प्रमाणस्य वेदस्येत्यतस्तद्व्याचष्टे॥अपौरुषेयत्वादिना ॥ गुणेति॥ आप्तोक्तत्वेत्यर्थः ॥ ॥ कृ॰ ॥ ननु वस्तुतत्सत्वयोः सर्वत्राप्येकत्वात्किमनंत इति विशेषणेनेत्यत आह ॥ प्रकृतत्वादेवेति ॥ ननूत्कर्षे तत्स

कुतः ॥ अनंतसंबधिनोस्तयोरुत्कर्षस्य तत्सत्वस्य चैकत्वात् ॥ अनंत इति प्रकृतत्वादेवोक्तम् ॥एतदुक्तं भवति॥ प्रमाणं हि प्रवर्तमानं विधि रूपं निषेधरूपं वा न तदासीनं तस्य च बाधाभावे स्वत एवसत्वासत्वलक्षणौ विधिनिषेधौ सिध्यतः किं तत्र तात्पर्यांतरकल्पनयेति ॥ननु निराकारमेव ब्रह्मश्रूयते ॥ तत्कथं तद्गुणोत्कर्षे सर्वश्रुतीनां महातात्पर्यं स्यादित्यत आह ॥ श्यामत्वे चेति ॥ एतच्चानंतरातीताध्याये प्रपं

श्यामत्वाद्यभिधानाच्च ॥ युक्तं च पुरुषमतिकल्पितयुक्त्यादेराभासत्वम् ॥ अज्ञानसंभवात् ॥ न तु स्वतः प्रमाणस्य वेदस्याभासत्वम् ॥

चितम्॥वेदविरोधाद्युक्त्यादेराभासत्वमित्युक्तम्॥तदयुक्तम्॥नियामकाभावात्॥ विपर्ययस्यापि सुवचनादित्यत आह॥युक्तं चेति॥युक्तं संभावित म्॥अज्ञानसंभवात्॥अज्ञानमूलत्वसंभवात्॥अज्ञानं चोपाधिव्यभिचारादिविषयम्॥स्वतः प्रमाणस्यापौरुषेयतया पुरुषगुणानपेक्षप्रमाणभावस्य

त्वे च महातात्पर्याक्तौवाक्यभेदनादवस्थ्यम ॥ न च तयोरैक्यादद्दोषः ॥ तदुत्कर्षे तत्सत्वेचमहातात्पर्यमिति समुच्चयोक्त्ययोगादित्यत आह ॥ एतदुक्तंभवतीति॥ननु यदि ब्रह्मणः श्यामत्वादिकं तर्ह्यशब्दमस्पर्शमरूपमित्यादेः का गतिरित्यत आह ॥ एतच्चेति ॥ अरूपत्वादेस्त्वित्यादिनेति शेषः ॥ लौकिकरूपाद्यभावपरत्वं श्रुतेरिति भावः ॥ ननु युक्त्यादेराभासत्वं युक्तिसिद्धमिति कथम् ॥ अज्ञानसंभवादिति संभावकस्योक्तिरित्यत आह ॥ संभावितमिति ॥ अंततोयुक्त्यादौ कथमज्ञानसंभव इत्यत आह ॥ अज्ञानमूलत्वेति॥ननु करणप्रामाण्य स्योत्पत्तौ स्वतस्त्वं नाम प्रमाजननशक्तेर्ज्ञानजनकशक्त्यधिकत्वं तच्च युक्त्यादिसाधारणमिति ॥ स्वतःप्रमाणस्येति विशिष्योक्तिरयुक्तेत्यत आह ॥ अपौरुषेयतयेति ॥

१ पूर्वं अनंतस्येत्युक्तेः संबंधितोरित्येवोक्तम् ॥ एतेनात्र अनंत इति मतस्थंतत्वात् अनागतेयरूपसंबंधविशेषस्य भ.नात्सामान्योक्तिः कथमित्यपास्तम् ॥

॥ श्री० ॥ **अदर्शनमितीति** ॥ उपाधिव्यभिचारयोरदर्शनामिति भावः ॥ **संभवादिति** ॥ अज्ञानमूलकत्वसंभवादित्यर्थः ॥ ततश्च सावकाशत्वमिति भावः ॥ **असंभवादिति** ॥ अज्ञानमूलकत्वासंभवादित्यर्थः ॥ ततश्च निरवकाशत्वमिति भावः ॥ **आशंकमानानामिति** ॥ कर्मणि षष्ठी ॥ तथा च बहुष्वपि पुरुषेष्वज्ञानमाशंकमानान सिद्धांतिनः प्रति पूर्वपक्षिणाद्त्तो योऽतिप्रसंगस्तमाशंकयेत्यर्थः ॥ तर्हीतीति ॥ बहूनामप्यज्ञान इत्यर्थः ॥ सर्वत्राचामित्यतः पूर्वं कृतो न वाच्यमिति चेदितिवाक्यमध्याहार्यम ॥ समानश्चासावात्मा च सात्मा तस्य भावः ॥ सात्म्यं समानशब्दश्चैकत्वार्थक इत्याशयेनाह ॥ **सात्म्यमिति** ॥ आभासइतीति ॥ रूपरूपं प्रतिरूपो बभूवेति प्रतिबिंबत्वाच्च न मत्स्यादिसाम्यमिति सूत्रार्थः ॥

युक्तेरज्ञानमूलत्वसंभावनानिवर्तयत्यत आह ॥ अदर्शनं चेति ॥ संभवति॥शंकार्हमित्यर्थः ॥ एतदुक्तंभवति ॥ वेदस्य युक्त्यादेश्च परस्परविरोधे द्वयोः प्रामाण्यानुपपत्तावन्यतरस्याभासत्वे कल्पनीये युक्त्यादेरेव तत्कल्प्यं संभवात् ॥ न तु वेदस्यासंभवात् ॥ निरवकाशेन सावकाशस्य बाधदर्शनादिति ॥ पुरुषेष्वदर्शनमाशंकमानानामतिप्रसंगमाशंक्य निषेधति ॥ तर्हीति ॥ विपर्ययो भगवद्गुणोत्कर्षस्य ॥ सर्वत्रा

अदर्शनं च संभवत्येव पुंसाम् बहूनामप्यज्ञानात् ॥ तर्ह्यस्मदनधीतश्रुत्यादौ विपर्ययोऽपि स्यादिति न वाच्यम् ॥ यतस्तत्रैवाह ॥ नैव तद्विरुद्धावाचो नैव तद्विरुद्धा युक्तय इति ह प्रजापतिरुवाच प्रजापतिरुवाचेति ॥ तद्विरुध्धं च जीवसात्म्यम् ॥ आभास एव चेति चोक्तम् ॥

चामिति श्रुत्यैवोक्तत्वादिति परिहारे स्थितेऽन्यमप्याह॥ यत इति॥ तस्यामेवश्रुतावाह वेदपुरुषः ॥ एतद्विरुद्धाः ॥ भगवद्गुणोत्कर्षविरुद्धाः उत्कर्षे हीत्यादिनोक्तमुपसंहरति ॥ यदिति ॥ सर्ववेदानां यद्भगवद्गुणोत्कर्षे महातात्पर्यमुक्तं तद्विरुद्धं जीवसात्म्यमीश्वरेण जीवस्यैकात्म्यम् सूत्रेतिहासाविरुद्धं चेत्याह ॥ आभास इति ॥

॥ कु० ॥ननु संभवती यतेनोत्कटैककाटिकसंशय उक्तः॥ स चानेककोटिकसंशयस्थलेऽव्यापक इत्यत आह॥**शंकार्हमित्यर्थ** इति ॥ननुयुक्त्यादेर्वेदस्य च वैषम्यमात्रमुक्तं नत्वन्यतरस्याभासत्वे नियामकमित्यत आह ॥ **एतदुक्तमिति** ॥

१जीवस्यैतियोज्यम॥२ फलितार्थः ॥ सूत्रजइति अव्यतिकरइति चानुवर्तते अस्यार्थ स्तुजीवः प्रतिबिंबत्वेनहेतुः नैवपरइत्युक्तत्वयामाभावइति ॥ सूत्रेमत्स्यादिसाम्यनिषेधेन तद्दृष्टांतेनप्राप्तपरमेश्वरैक्यमपिनिषिद्धमितिफलतीति भावः ॥३ अध्याय २ पा. ३ अ. १८ सू ८ ॥

॥ श्री० ॥ कथं॥केन धर्मेण ॥ तम ॥ पुरुषम ॥ तथा ॥ तद्धर्मविशिष्टत्वेन ॥ नैतदिच्छंतीत्याद्यनंतरमध्याहार्यमाह॥ किंन्विति ॥ [illegible]
नेन पुनरुक्तिप्रसंगादाह ॥ व्याप्तमिति ॥ एकेति ॥ एकजीवेत्यर्थः ॥अनेकेति॥ अनेकजीवेत्यर्थः ॥ वैधर्म्याच्चेति सुप्तस्य न च दृष्टस्याति [illegible]
नोयं सर्प इत्याद्यनुभवात् ॥ न चात्र तादृशं प्रमाणमस्तीत्यर्थो द्रष्टव्यः ॥

बहव इति ॥ पक्षेपि किं सर्वे समा उतैकः श्रेष्ठः द्वितीये कोऽसावत्र पुरुषेषु श्रेष्ठः कथं च श्रेष्ठस्तं तथा वक्तुमर्हसि [illegible]
जगति किं तु बहवः ॥ तेषां बहूनां ॥ पुरुषाणां मध्ये यो योनिः यः कारणभूतः श्रेष्ठः ॥ तथा च तं पुरुषं तथा [illegible]
इदं व्याप्तम्॥स्यादेतत् ॥ सर्वं जगत्स्वप्नवदेकाज्ञानपरिकल्पितमित्येके ॥ इंद्रजालवदनेकाज्ञानकल्पितमित्यपरे॥अपकृष्ट[illegible]

जनमेजय उवाच॥बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ॥ को ह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति ॥ [illegible]
वैशंपायन उवाच ॥ नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह ॥ बहूनां पुरुषाणां हि यथैका योनिरुच्यते ॥ [illegible]
था तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमिति मोक्षधर्मे ॥ न च तत्सर्वं स्वप्नेंद्रजालवत् ॥ वैधर्म्याच्च [illegible]
स्वप्नादिवदिति भगवद्वचनम्॥न च स्वप्नवदेकजीवकल्पितत्वे मानं पश्यामः॥विपर्यये माश्चोक्ताः॥द्वितीये॥

पकृष्टस्य विश्वस्य मिथ्यात्वादुत्कर्षस्य सत्वं कथं स्यात्॥कथं च तत्र सर्ववेदानां महातात्पर्यमित्यत आह॥न चेति॥ भगवद्वचनं यत [illegible]
इतोऽप्येवमित्याह ॥ न चेति ॥ कल्पितत्वे विश्वस्य ॥ एवं बहुजीवकल्पितत्वेऽपीति वाच्यम्॥विपर्यये॥सत्यत्वे ॥

॥ कृ० ॥ को ह्यत्र पुरुषश्रेष्ठ इति प्रश्नघटनायामाह ॥ बहवइति ॥ पक्षेऽपीति ॥ तं तथेति प्रतिवचनगततथाशब्दस्याप्रमादादाह ॥ कथं च श्रेष्ठइति॥ दृष्ट[illegible]
यत्नेवासंगतिपरिहारायाक्षेपिकां संगतिमाह ॥ स्यादेतदित्यादिना ॥

१आदिपदेन रज्जुभुजंगादि॥२ नजाग्रदितिग्राह्यम् ॥ ३ रज्जुरियमितिग्राह्यम ॥ ४ आदिपदेनशुक्तिरजतादि ॥ ५ ब्रह्मैवेदंजगदितिबाधरूपम् ॥ ६ [illegible]
च अभाव इत्यनुवर्तते ॥ जगदितियोग्यतयालभ्यते॥ तथाचस्वप्नः जाग्रत्वरज्जुसर्पादिवत् जगदसत्॥स्वप्नएवायंनजाग्रत् रज्जुरियंनसर्पइत्यादिबाधविषयत्ववैलक्षण्य [illegible]

॥ श्री० ॥ पुराणेष्विति ॥ अविद्यमानोऽप्यवभाति हि द्वयो ध्यायतो विया स्वप्नमनोरथौ यथेति ॥ भागवतादिष्वित्यर्थः ॥ साक्षात् ॥ अनुवादेन ॥ सत्य इति ॥ तथा च न स्वप्न इत्युक्तमयुक्तमिति भावः ॥ मिथ्यार्थे जाग्रत्ते ॥ जाग्रद्दृष्टपदार्थापेक्षयैव प्राचुर्येण प्रतीयमानत्वात् तस्य न मिथ्यात्वात् तदपेक्षया न न स्वप्न इत्युक्तमित्यर्थः ॥ अहंग्रहोपास्तिरिति ॥ अहंत्वेन ज्ञात्वोपास्तिरित्यर्थः ॥ निर्देशेति॥तत्त्वमसीति प्रयोगासंगतेरिति भावः॥ त्र० ॥ पुराणेष्विति॥स्वप्नमनोरथौ यथेत्यादिष्वित्यर्थः॥स्वप्नदेशे चंचलत्वाभावादाह ॥

तर्हि कथं विश्वस्य पुराणेषु स्वप्नादिसाम्यमुच्यत इत्यत आह॥ उक्तं चेति॥ अयं प्रपंचः स्वप्न इवोच्यते॥ चंचलत्वादनित्यत्वात् विकारित्वाच्च ॥ न तु स्वप्नः साक्षान्मिथ्येति यावत् ॥ कुतः ॥ एतदेतस्य विच्छेदो बाधो न हीत्यर्थः ॥ यद्यपि स्वप्नः सत्यः ॥ तथाप्यंगीकारवादोऽयं मिथ्यार्थप्राचुर्याद्वा ॥ ननु जीवस्य ब्रह्मणि अहं ब्रह्मास्मीत्यहंग्रहोपास्तिस्तावत्कर्तव्या॥ जीवश्च न सर्वोत्कृष्टः ॥ ततश्च तेनैकीभूतस्येश्वरस्यकथं सर्वोत्कर्ष इत्यत आह ॥ नायमिति ॥ बुद्धिस्थस्यायमिति परामर्शः कुत इत्यत आह॥न हीति॥ किं तर्ह्युच्यत इत्यत आह॥जीवस्य हीति॥

उक्तं चायास्यशाखायाम् ॥ स्वप्नो ह वा अयं चंचलत्वान्न स्वप्नो न हि विच्छेद एतदितीति ॥ नायं दोषः ॥ नहीश्वरस्य जीवैक्यमुच्यते ॥ जीवस्य हीश्वरैक्यं ध्येयम् ॥

स्यादयं दोषो यद्यहं ब्रह्मास्मीत्यादिनेश्वरमुद्दिश्य तस्यानुत्कृष्टजीवैक्यमुच्येत ॥ नचैवं किं तु जीवमुद्दिश्य तस्येश्वरैक्यं अन्यथा ब्रह्म मदात्मकं भवतीति निर्देशप्रसंगादिति ॥ सत्यमेतत् ॥ जीवस्येश्वरैक्यमुच्यत इति ॥ तथाऽपि नोक्तदोषपरिहारः ॥

अनित्यत्वादित्यादि ॥ स्वप्नः सत्य इति ॥ तथा च तत्साम्योक्तिर्नास्ति चानित्यत्वादिना तदुपपादनं व्यर्थमिति भावः ॥ अंगीकारवाद इति ॥ परोक्तस्वप्नमिथ्यात्वमंगीकृत्य पुराणेषु तत्साम्योक्त्या प्रसक्तं विश्वमिथ्यात्वं निरसितुमयं प्रवाद इत्यर्थः॥न च मिथ्यार्थस्यानित्यत्वाद्यभावः दर्शने ॥मिथ्यात्वस्यानिर्वाच्यत्वादानन्दत्वात्॥ज्ञाननाश्यत्वाच्चानित्यत्वादि. सत्त्वादिति भावः॥स्वमतेनाह॥मिथ्यार्थेति॥तथा च सत्यग्रामादिस्वप्न.नृपापेक्षया बहुदेशा पुराणेषु स्वप्नसाम्योक्तिः प्रपंचस्य मिथ्यात्वप्रतिपादनाय न तदुपपादनं कृतमिति भाव ॥ननु स्वमते मिथ्यार्थस्यापि सत्त्वात्कथमनित्यत्वादिकं अनित्यत्वं नित्यत्वाभावः विकारित्वं एकप्रकारेणावस्थानमित्यस्य गमना ॥ अहंग्रहोपास्तिरिति॥अहंग्रहोपासक इत्यादिवक्ष्यमाणानुसारेणेदमुक्तम् ॥

१ स्कं. ११ अ. २ श्लो. ३८ ॥ विद्याविषयत्वध्यानेऽपि स्वस्याधीनत्वेन विद्यमानोऽपिद्वैतगते. ॥ यथामनोरथ. स्वप्नमतेन प्रतीयतेतथाहि द्वयमात तस्मादित्युत्तरेण. ॥

२ इत्यंतोशंका ॥ ३ इत्यादिउत्तरम् ॥ स्वमतेअसतोभानांगीकारात भानस्यनित्यत्वाभावः इति निश्चयम् ॥

॥ श्री० ॥ ब्रह्मणि ॥ विषये जीवस्य श्रुतं यदहंग्रहोपासनं तस्येत्यर्थः ॥ तदिति ॥ सारूप्यरूपं फलम् कुत इत्यत आह ॥ तथेति ॥

यदीश्वरो वस्तुतः सर्वोत्कृष्टःस्यात्तदा कथं जीवस्य तदैक्यं स्यात॥तस्यानुत्कृष्टत्वेनानुभवात् अतो जीवस्य ब्रह्मणि श्रु [illegible]
न्यथाऽनुपपत्त्येश्वरस्य सर्वोत्कृष्टत्वं मिथ्येत्यंगीकार्यमित्यत आह ॥ तदिति ॥ यज्जीवस्येश्वरेणैक्यमुच्यते तदपि न निरु [illegible]
म् ॥ किं तूपचारेणैवोच्यते ॥ उपचारबीजं सहेतुकमाह ॥ अत इति ॥ यतः साक्षादैक्यं नार्थः॥ अतोऽहं ब्रह्मास्मीत्यादावु [illegible]
बिंबत्वविरोधि प्रतिबिंबत्वादन्यं न भवति किंतु प्रतिबिंबत्वमेवेत्यर्थः॥ननु साक्षादैक्यं कुतो नार्थः॥कुतश्चोपचारेऽपि प्रतिबिं [illegible]

**तदपि न निरुपाधिकम् ॥ अतो न प्रतिबिंबत्वस्यविरोध्यैक्यम् ॥तथा च माधुच्छंदसश्रुतिः ॥ ऐक्यं [illegible]
बिंबेन विष्णोः जीवस्यैतदृषयो वदंतीति ॥ अहंग्रहोपासने च फलाधिक्यमाग्निवेश्यश्रुतिसिद्धम् ॥ [illegible]
पासकस्तस्य साम्यमभ्याशो हवाऽश्नुते नात्र शंकेति ॥ तदीयोऽहमिति ज्ञानमहंग्रह इतीरित इति [illegible] ।**

तआह ॥ तथा चेति ॥ जीवस्यापि विष्णोरैक्यं यदृषयो वदंति तत्प्रतिबिंबत्वेनैव निमित्तेन हीत्यर्थः ॥ इतश्चोपचारेणैवाहंग्रहोप [illegible] ।
अहमिति ॥ फलाधिक्यं मुख्यं फलमहंग्रहोपासनस्य हि परमं प्रयोजनमीश्वरसारूप्यापत्तिरेव श्रुत्योच्यते ॥ यदि च निरुपच [illegible]
स्यं स्यात् तदा तन्नोपपद्येत ॥ तं यथा यथोपासते तदेव भवतीतिश्रुतेरिति भावः ॥ अभ्याशः समीपम् ॥ अल्पेनैवकालेन [illegible]
प्युपचारेणैवाहंग्रह इत्याह ॥ तदीय इति ॥ भून्यंगोपास्यत इ(नामि)ति शेषः ॥

॥ कृ० ॥ ननैक्यस्य निरुपाधिकत्वनिषेधे सत्योपाधिकृतमस्य नैतत् सोपाधिकमैत्यनिष्टं प्रसक्तमित्यत आह ॥ निरुपचरितामिति॥ [illegible]
सर्वज्ञत्वादिनाऽनुभवसिद्धस्यापीत्यपरर्थः ॥ फलाधिक्य न तदोद्रेकः ॥ श्रुतौ सारूप्यमोक्षमात्रोक्तिरित्यत आह ॥ मुख्यफलमिति ॥ तदेव भवतीयेतद्रे [illegible]
त्वप्रकाशिकायाम ॥ दुर्गमत्वादाह ॥ समीपमिति ॥ समीपे निकटाभ्याससमानिकृष्टमनीसवादित्यमरोक्तोरिति भावः ॥

१ ऐक्यस्येत्यन्वेति ॥ एवंचभेदैक्ययोः सत्यत्वमनिष्टमित्यर्थः ॥ स्वमतेऽनौशयोर्भेदाभेदयोरभावादितिभावः ॥

॥३४६॥

॥ श्री० ॥ ननु तदधीनत्वं च ग्राह्यमिति कथमुच्यते प्रकारेण तस्य व्यावर्तितत्वादित्यत आह ॥ एवशब्द इति ॥ एतेनेति ॥ यदुक्तमित्यस्यापव्याख्याननिरासेनेत्यर्थः ॥ ॥ २३ ॥ २४ ॥ तस्येति ॥ प्रकृतिपुरुषविवेकज्ञानस्येत्यर्थः ॥

स्वतः साक्षादैक्यात् ॥नन्वग्निर्माणवकइत्याद्युपचारो भेदज्ञानसहचरितोदृष्टः ॥ न च प्रकृते तदस्ति ॥ तत्कथमुपचारेणाहंग्रहोपासनमित्य तोऽत्रापिभेदज्ञानसाहित्यमस्तीति सप्रमाणकमाह ॥ प्रतिबिंबेनेति॥ ननु बिंबत्वमंगीकृतं चेदैक्यमेवापन्नमित्यत आह ॥ प्रातिबिंब्यं चेति ॥ तदधीनत्वं च ग्राह्यम् ॥ तदीयोऽहमित्युक्तत्वात् ॥ एवशब्दस्त्वैक्यस्य व्यवच्छेदार्थः ॥एतेन क्षेत्रज्ञं चापि मांविद्धीत्यादेरपव्याख्यानमपास्तं

तद्वशत्वात् सोऽस्मीति भृत्यैरेव न तु स्वत इति च ॥ प्रातिबिंब्येन सोऽस्मि भृत्यश्चेतिभावना ॥ तथा ह्यायास्यशाखायाम् ॥ भृत्यश्चाहं प्रातिबिंब्येन सोऽस्मीत्येवंह्युपास्यः परमः पुमान् स इति ॥ प्राति

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैःसह ॥सर्वथा वर्तमानोऽपि न स भूयोऽपि जायते ॥ २४॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २५ ॥

बिंब्यं च तत्साम्यमेव ॥ २३ ॥ २४ ॥ सांख्येन वेदोक्तभगवत्स्वरूपज्ञानेन ॥

भवति ॥ २३ ॥ २४॥ अन्ये सांख्येन योगेनेत्यत्र कापिलतंत्रोक्तप्रकृतिपुरुषविवेकज्ञानं सांख्यमिति व्याख्यानमसत् ॥ कापिलतंत्रस्यावै दिकस्यात्र ग्रहणायोगात् ॥ तस्यभगवद्दर्शने प्रधानसाधनत्वायोगाच्चेति भावेनान्यथा व्याचष्टे ॥ सांख्येनेति ॥ ज्ञानेन परोक्षज्ञानेन ॥

॥०कृ॥गोगवययोरतिर्व्याप्तिरात॥ तदधीनत्वं चेति॥ एतेनेति॥ एकत्वनिराकरणेनेत्यर्थः॥ अपव्याख्यानमिति॥सर्वक्षेत्रेषु यः क्षेत्रज्ञो ब्रह्मादिस्तंबपर्यंतानेकक्षेत्राणाविप्रविभक्तः तं क्षेत्रज्ञं मांपरमेश्वरमसंसारिणं विद्धीति व्याख्यानमित्यर्थः ॥ २३ ॥ २४ ॥ तस्येति ॥ प्रकृतिपुरुषविवेकज्ञानस्येत्यर्थः ॥

१ जीवंपरमात्मानंच ॥ २ जडानजडांच ॥ ३ प्रमादादन्यायप्रवृत्तिमानपि॥ ४ प्रतिबिंबत्वाभावेऽपिसाम्यात ॥

॥ श्री० ॥ ननु गीतायामन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ अन्ये [illegible] श्रुत्वेति सांख्यानां [illegible] ॥ [illegible] सांख्यानां चेति कथमेत [illegible] रित्यत आह ॥ पाठानि ॥ [illegible] ॥ ज्ञान्यपी [illegible] ॥ न केवल [illegible] ॥ तथा न ज्ञान्यपि ध्यात्वा पश्यती तिसंबंधो द्रष्टव्यः ॥ उत्तरोत्तरगति ॥ [illegible] ॥ तत्र ध्यान [illegible] ज्ञान श्रवणोत्तर श्रवण [illegible] विवेको द्रष्टव्य ॥ [illegible] ॥ ध्याना दीत्यर्थः ॥ अवस्थेति ॥ एकस्यैव कर्मित्वश्रावकत्वज्ञानित्वध्यानित्वरूपावस्थाभेदेत्यर्थः ॥ २५ ॥ ॥ कृ० ॥ ननुगीतायामन्ये ध्यानेनेत्यत्र ध्यानादीनां केवलानामेवेश्वरदर्शनसाधनत्वमुच्यत [illegible] ॥ कर्मिणामिति ॥ दृष्टिः प्राप्येति शेषः ॥ पाठक्रमादर्थक्रमस्य प्राधान्याद्व्युत्क्रमेणोक्तिः ॥ कुत एतदित्यत आह ॥ तथा चेति ॥ ध्यात्वेत्येतज्ज्ञान्यपीत्युत्तरेणापि संबध्यते ॥ ननु सर्व

कर्मिणामपि श्रुत्वा ज्ञात्वा ध्यात्वा दृष्टिः॥ श्रावकाणां च ज्ञात्वा ध्यात्वा॥ सांख्यानां च ध्यात्वा ॥ तथा च गौपवनश्रुतिः॥कर्मकृच्चापि तच्छ्रुत्वा ज्ञात्वा ध्यात्वाऽनुपश्यति श्रावकोऽपि तथा ज्ञात्वा ध्यात्वा ज्ञान्यपि पश्यति॥अन्यथा तस्य दृष्टिर्हि कथंचिन्नोपजायत इति॥अन्य इत्यशक्तानामप्युपायदर्शनार्थम् ॥२५॥

त्र सर्वस्य संयोजने सत्येक एवायं प्रकारः स्यात्तथा च केचिदन्ये पर इत्युक्तमयुक्तं स्यादित्यत आह ॥ अन्यइति॥ ध्यानादावुक्तसाधने साक्षादशक्तानामपि [illegible] इत्याद्युक्तमित्यर्थः ॥ २५ ॥

सांख्येन योगेन कर्मयोगेन चापरे॥अन्ये [illegible] ॥पाठक्रमादिति ॥ [illegible] र्थाश्चेत्यत्र [illegible] ॥ [illegible] ॥ [illegible] ब्राह्मण [illegible] सु पाठक्रमस्य [illegible] ॥ [illegible] ॥ [illegible] तृतीयाश्रुते ॥ [illegible] पाकः अतः पाकस्य पश्चादनुष्ठाने यवागूः होमार्थे [illegible] ॥ तथा चैतदधिकरणोक्तन्यायेनार्थक्रमस्य प्राधान्यात्क्रमपाठ [illegible] ॥ [illegible] कर्मिकत्वादि ति भाव. ॥ ननु ये कर्मानुष्ठानादौ [illegible] ॥ साक्षादिति ॥ ननु [illegible] ॥ २५॥

॥ श्री० ॥२६॥ ननु यावत्संजायते इति गीतानुसारेण प्रकृतिधर्मादित्वेन वक्तव्येऽनंतरेक्ष्वरधर्मादित्वेन वचने कोहेतुरित्यत आह॥ ईश्वरधर्मस्येति॥ कार्योपादानत्वप्रकृत्युपादानक शरीरादियोगित्वरूपात् प्रकृतिपुरुषधर्मादित्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ॥ क० ॥ २६ ॥ ... ॥ अवस्थामिदमाश्रित्ये

॥ २६ ॥ तत्क्षेत्रं यच्चेत्यादिना प्रतिज्ञातस्य सर्वस्योक्तत्वात्किमुत्तरेणेत्यत आह ॥ पुनश्चेति ॥ उक्तस्य पुनर्वचने को हेतुरित्यत उक्तम् ॥ साम्यादीति ॥ ईश्वरधर्मस्योभयधर्मान्प्राधान्येन साम्यग्रहणम् ॥ नच प्रकृतिपुरुषधर्मकथनं यादृगिति प्रतिज्ञातेंऽतर्भवति ॥ ईश्वरधर्मकथ

॥ २६ ॥ पुनश्च प्रकृतिपुरुषेश्वरस्वरूपं साम्यादिधर्मयुक्तमाह ॥ यावदित्यादिना ॥ २७॥ २८ ॥ २९॥

अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते॥तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः॥२६॥
यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२७॥
समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥२८॥
समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ॥न हिनस्त्यात्मनाऽत्मानं ततो याति परां गतिम्॥२९॥
प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः॥यः पश्यति तथात्मानमकर्तारं स पश्यति॥३०॥

आत्मानं चाकर्तारं पश्यति सपश्यति॥ ३०॥

नं च यत्प्रभाव इति ॥ २७ ॥२८ ॥ २९॥ प्रकृत्यैव चेत्यत्रयः प्रकृत्यैव च कर्माणि क्रियमाणानि पश्यति स आत्मानमकर्तारं पश्यतीति कश्चिदन्वयमाह ॥ तदसत् ॥ तथाशब्दवैयर्थ्यापत्तेरिति भावेनान्यथाह ॥ आत्मानं चेति ॥

ति ॥ तथाचव्यक्तिभेदस्यबाधितत्वात् ॥ अन्यादिशब्दस्यावस्थाविशेषविशिष्टव्यक्तिभेदार्थतामिति भाव. ॥ ननु प्रकृत्यादिस्वरूपस्य धर्मगृहस्य वक्तव्यत्वे ईश्वरधर्मस्य साम्यस्य कंठरवे णाभिधाने कोहेतुरित्यत आह ॥ ईश्वरधर्मस्येति ॥ कार्योपादानत्वनुपादानकशरीरादियोगित्वरूपात्प्रकृतिपुरुषधर्मादित्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥

---

१ सांख्यपदोक्तज्ञानाशक्ताः ॥ अत्राप्यशक्ता कर्मयोगेनेति व्युत्क्रमेणान्वय. ॥ २ निवृत्तकर्मकर्तारोऽपिश्रवण.दिद्वारा ॥ एतेनतत्क्रतोः क्रतोरितिश्रुतौमासादितिन्नयम ॥ ३ संसारम ॥ ४ जीवजातम् ॥ ५ चित्प्रकृतिपरमात्मनोः संयोगात् ॥ मजायंतप्रादुर्भवतीत्यर्थः ॥६ तारतम्योपेतेषु जीवेषु ॥ ७ निःशेषाशेषमदुःखसरप्रकारम् ॥ ८ नरके न पातयति ॥९ बुध्या

॥ श्री० ॥ परमेश्वरमिति ॥ अनेन यः कर्माणि प्रकृत्यैव क्रियमाणानि पश्यति तथात्मानमकर्तारं पश्यति स परमेश्वरं पश्यतीत्यध्याहारेण वाक्ययोजनां सूचयता तथाशब्दस्य समुच्चयकत्वेनास्मन्मते सार्थकत्वमित्युक्तं भवति ॥ ३० ॥ एकस्थमिति ॥ एकस्मिन्नेव तिष्ठति प्रलय इत्येकस्थं ब्रह्म तदात्मकमित्यर्थः ॥ ३१ ॥ अनेन ॥ तस्येति वचनेन ॥ प्राप्नोतीति ॥ लेपप्राप्तीत्यर्थः ॥ ननु सादिगुणात्मकं चेति वक्तव्यत्वादित्यतो योजयति ॥ यद्व्ययीति॥ अथास्य निरुपादानकत्वाद्गुणात्मकत्वं च नास्तीति ज्ञेयम ॥

स पश्यति परमेश्वरम् ॥ ३० ॥ एकस्थमित्यस्यैकस्यात्मकामिति व्याख्यानं सर्वप्रमाणविरुद्धमिति भावेनाह ॥ एकस्थमिति ॥ तत एव च विस्तारमित्यस्य स्वस्मादेव विश्वस्य विस्तारमिति व्याख्यानमसदिति भावेनाह ॥ तत एवेति ॥ विस्तारमुत्पत्तिम् ॥ ३१ ॥ अव्यय इत्यनुवादेन लेपाभावमात्रं विधीयत इत्यन्यथाप्रतीतिनिरासार्थमाह॥न चेति॥एनेनाव्ययत्वमपि साध्यमप्राप्तत्वादित्युक्तं भवति ॥ तस्य विष्णोः

एकस्थम् ॥ एकस्मिन्विष्णौ स्थितम् ॥ तत एव च विष्णोर्विस्तारम्॥ ३१ ॥ न च व्ययादिस्तस्येत्याह॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३१ ॥

अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते॥३२॥

अनादित्वादिति॥ सादि हि प्रायो व्ययि गुणात्मकं च ॥

॥अनेन जीवविशेषणमेतत्॥तस्य प्राप्तिसद्भावेन प्रतिषेधोपपत्तेरिति निरस्तम्॥विष्णोरपि शरीरस्थोऽपीति प्राप्तेरुक्तत्वात् ।अनादित्वनिर्गुणत्वयोरव्ययत्वे हेतुत्वमुपपादयितुं व्याप्तिमाह॥ सादीति ॥ यद्व्ययि तत्प्रायः सादि गुणात्मकं चेति योजना॥प्रागभावे व्यभिचारपरिहाराय प्राय इत्युक्तम् ॥

॥ कृ० ॥ परमेश्वरमिति ॥ अनेन यः कर्माणि प्रकृत्यैव क्रियमाणानि पश्यति आत्मानं चाकर्तारं पश्यति स परमेश्वरं पश्यतीत्युक्तं तथाशब्दस्य समुच्चयार्थत्वेनोपयोग इत्युक्तं भवति॥ ॥३४८॥
॥३०॥३१॥ननु अनादित्वनिर्गुणत्वाभ्यामव्ययत्वे साध्ये व्यतिरेकव्याप्त्युपपादनाय सादि हीत्युक्तं न च तदुक्तं व्यतिरेकव्याप्तेः साध्याभावोक्तिपूर्वकं प्रदर्शनीयत्वादित्यत आह॥यद्व्ययीति॥

॥ श्री० ॥ माधवेति ॥ [illegible] प्रशंसना भवतीति भाव ॥ [illegible] ॥ [illegible]
भावात्मके साक्ष्यत्वेऽक्रियत्वं पुर्वोक्तन्यायेनोपपादित [illegible] इत्यत आह ॥ यथर्पायादिना ॥ माध्यामिति ॥ तथा च [illegible]
ति भावः ॥ लोकन इति ॥ [illegible] ॥३२॥३३॥३४॥ ननु [illegible] ॥नचैव
किं न.माविद्याध्वंसार्थकप्रकृतिमोक्ष [illegible] इत्यर्थः॥

ससाधेव गुणात्मकमेवेत्यवधारणेन यथाग्निनयोजना वा॥न करोति निर्गुणत्वादिति [illegible] क्रियागुणाभावः प्रतीयत इत्यत आह॥नकरोती
ति ॥ पुरस्तादुक्तमेव स्मारयति ॥ नेति ॥ [illegible] तथाऽपि तल्लोकतो ज्ञातुं

न करोतीत्यादेरर्थ उक्तः पुरस्तात्॥न लौकिकक्रियादि [illegible] ॥ अतो न प्रज्ञमित्यादिवदिति ॥ ३२ ॥

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथाऽत्मा नोपलिप्यते ॥ ३३॥
यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३४॥
क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥ ३५ ॥

॥ ३३ ॥ ३४॥ भूतेभ्यः प्रकृतेश्च

शक्यतइति लेपाभावमात्रं यथासर्वगतमित्युपपद्यते॥३२॥३३॥३४॥भूतप्रकृतिमोक्षमित्यस्य भूतानां प्रकृतिरविद्या तस्याः मोक्षमवसानलक्षण
मिति व्याख्यानमसत्॥भूतशब्दवैयर्थ्यात्॥अविद्याध्वंसस्यानुक्तत्वेनैवमिति [illegible] भाविनाह ॥भूतेभ्य इति॥अनेन भूतप्रकृतीति द्वंद्वः॥
॥ कृ० ॥ माधवेति ॥ [illegible] ॥ ३२ ॥ ३३ ॥ ३४ ॥

१ नकरोतीत्यत्र [illegible] ॥ निर्गुणत्वादित्यत्र [illegible] ॥ २ [illegible]
[illegible]

॥श्री० ॥ ननु पंचमी भयेनेति भयशब्दयोग एव पंचम्याः समासविधानात् [illegible] कथं भूतप्रकृतिभ्यो मोक्ष भूतप्रकृतिमोक्षमिति पंचमीसमास इत्यत आह॥पंचमीति॥ योगो वाक्यम् ॥ पंचमी येन केनापि समस्यते भयेन न समस्यतइति योगविभागो द्रष्टव्यः ॥ प्रागुक्त इति ॥ तथा [illegible] परामर्शो न युक्त इति भाव. ॥ मोक्षशब्देन मोक्षसाधनत्वा भः कथमित्यत आह ॥ कारण इति ॥ मुच्यते मोक्षणे इत्यस्माद्धातोर्मुच्यतेऽनेनेति करणे घञि [illegible] मोक्षशब्देन तत्साधनत्वार्थो युक्त इति भावः ॥ ननु एतज्ज्ञानमिति प्रोक्तमित्यमानित्वादीनां ज्ञानसाधनत्वेनोक्तत्वात्कथं मोक्षसाधनत्व[illegible]मित्यत आह ॥ ज्ञानसाधनमपीति ॥ परम्परया ज्ञानद्वारेत्यर्थ. ॥ ननु भाष्ये मोक्ष पदस्य भूतप्रकृतिपदसापेक्षत्वेनासमर्थत्वात्कथं [illegible] सापेक्षमसमर्थवद्भवतीति [illegible]इत्यत आह ॥ नित्येति ॥ [illegible] गुरुकुलमित्यादाविवोत्तरपदेन [illegible] नापि पूर्वपदेनापेक्षा न विद्यत इत्यर्थ ॥ [illegible] ॥ [illegible] आह ॥ समासद्वयेति ॥ भूतानि च प्रकृतिश्चेति द्वंद्वः भूतप्रकृतिभ्यो मोक्ष इति पंचमी तत्पुरुष इति समासद्वयमित्यर्थः ।

ततः पंचमीति योगविभागात्पंचमीतत्पुरुष इत्युक्तं भवति ॥ भूतेभ्यः पृथिव्यादिभ्यः॥ननु मोक्षो न प्रागुक्त इत्यत उक्तम्॥ मोक्षसाधनमिति ॥

करणेघञित्यर्थः ॥ मोक्षसाधनमपि नोक्तमित्यत आह ॥ अमानित्वादिकमिति ॥ ज्ञानसाधनमपि परंपरया मोक्षसाधनमिति भावः ॥ मो

मोक्षसाधनम् ॥ अमानित्वादिकम् ॥ ३५ ॥

क्षशब्दस्य नित्यसापेक्षत्वान्नासमर्थत्वम् ॥ यद्वा भूतेभ्यः प्रकृतेश्चेति समासद्वयसूचनार्थं पृथगेव वाक्यम् ॥

॥ कु० ॥ ननु भूतप्रकृतिभ्यो मोक्ष इति कथं पंचमी समास ॥ [illegible] न समासविधायकाभावात् ॥ पंचमीभयेनेत्यादीनां नियतविषयत्वादित्यत उक्तम् ॥ पंचमीति योगविभागादिति ॥ पंचमी भयेनेत्यत्र पंचमीति योगविभागादित्यर्थ ॥ भूतशब्देन [illegible]ग्रहणे तेभ्यो मोक्ष इत्यसंगतमित्यत आह ॥ पृथिव्यादिभ्य इति ॥ करणे घञिति मोक्ष साधन इति [illegible] शेष ॥ [illegible] ॥ननु समासे एकार्थीभावरूप सामर्थ्यं प्रयोजक मोक्षशब्दस्य चेतरसापेक्षत्वान्न सामर्थ्यम् ॥ सामर्थ्ये [illegible] ॥ न हि [illegible] कथं मोक्षसाधनमिति समास इत्यत आह ॥ मोक्षशब्दस्येति ॥ [illegible] नित्यसापेक्षस्थले एकदेशान्वयस्यापि दृष्टेरिति भाव ॥ समासद्वयेति ॥ भूतप्रकृती इति द्वंद्वः ॥ ततः पंचमीतत्पुरुष इति समासद्वयेत्यर्थः ॥ ३५ ॥

॥ श्री० ॥ तत इति ॥ [illegible] प्रयोग वाक्यमित्यर्थः ॥ ३५ ॥ इति [illegible]गीताभाष्यटीकासु[illegible]
[illegible] ॥ इति श्री[illegible]पादाराधकेन श्रीनिवासेन विर
चितायां श्रीमद्भगवद्गीताभाष्य[illegible] त्रयोदशोऽध्यायः ।

ततो मोक्षपदव्याख्यानं पूर्वोक्तमिति ॥ ३५ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचि

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥

॥ हरिः ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु० क्षेत्रक्षेत्रज्ञयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

तायां प्रमेयदीपिकायां त्रयोदशोऽध्यायः ॥

॥ कृ० ॥ इति श्रीमन्निर्मलाचार्यसुतकृष्णविरचिते प्रमेयदीपिकाभावप्रकाशे त्रयोदशोऽध्यायः ॥

॥ श्री० ॥ श्रीरस्तु ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ कर्म [illegible] भाष्यं [illegible] ॥ आपवृत्तपर्वायेति ॥ [illegible]मित्यर्थः ॥ कर्मध्यानलक्षण
मिति ॥ कर्मध्यानोभयरूपमित्यर्थ. ॥ इतिकर्तव्यतांशाभेति ॥ [illegible] कर्मध्यानलक्षण
[illegible]दिनिकर्तव्यतांशोपलक्षक इति भावः ॥ एवमेवोत्तरत्र [illegible] कर्मसमाधीतिकर्तव्यतांश[illegible] साधनश
नार्थमर्थवादमाहेति वक्ष्यति ॥ प्रपंचयतीति ॥ [illegible] कर्मादीतिकर्तव्यताविशे
इतिकर्तव्यतांशप्रपंचकग्रंथबहुत्वापेक्षयेत्यर्थ ॥ [illegible] आह ॥ प्राकृतान
च दर्शयतीतितात्पर्यं इति [illegible]ध्यायार्थमाह ॥ [illegible]

उत्तरेषां पंचानामध्यायानां प्रतिपाद्यमाह । साधनमिति ॥ योगं त्विमं शृण्विति प्रतिज्ञाताध्यायपरिसमाप्तेः कामवर्जनादीतिकर्तव्यता[illegible]
कर्मध्यानलक्षणं ज्ञानसाधनमुक्तम् ॥ [illegible]ध्यायैः प्रपंचयतीत्यर्थः ॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् इत्यादिना[illegible]

साधनकृज्ज्ञानदात्रे नमः ॥ ॥ ॐ साधनं प्राधान्येनोत्तरध्याये वक्ति॥१॥

श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥

माहात्म्यस्यापि वचनात्कथमेतदित्यत उक्तम् ॥ प्राधान्येनेति ॥ प्राचुर्यापेक्षया संग्राहकमेतदित्यर्थः ॥ अवान्तरप्रतिपाद्यभेदादध्यायभेदः ॥
तत्र यावत्संजायते किंचिदित्युक्तविवरणपूर्वकं कारणं गुणसंगोस्येत्युक्तं गुणानेवं प्रपंच्य तदत्ययसाधनमनेनाध्यायेनोच्यते ॥ १ ॥

॥ कृ० ॥ तदुत्तरपंचाध्याये कर्मध्यानलक्षणं साधनं [illegible] भागवत[illegible]कत्वम् इत्यन्वयः ॥ तथा[illegible] वक्तीत्ययोगा
त ॥ इतिकर्तव्यतायाः प्रथमषट्के तत्र तत्र प्रतिपादनात् [illegible] याति वाति ॥ [illegible] माहात्म्य[illegible] प्राधान्यात्तथापि [illegible] प्राधा
न्यमिति शंका परिहरन् कथ तदुत्तरपंचाध्याय्या इतिकर्तव्यता[illegible] च निरस्यति ॥ प्राचुर्यात्[illegible]मितिकर्तव्यता प्रपंचग्रंथबहुत्वापेक्षया संग्राहक
मित्यर्थ. ॥ एतेनाष्टादशे ज्ञान कर्म [illegible] ॥ [illegible] ॥ तत्र यावदिति । १ ॥

१ कर्मणिल्युट् ॥ ज्ञानव्यानांमध्ये उत्तमं ज्ञातव्यम् ॥

॥ श्री० ॥ २ ॥ **जडप्रकृतेरभिमानिनीति** ॥ लक्ष्मीरित्यर्थः ॥ **भगवती** ॥ महालक्ष्मीः ॥ **माहेश्वरी**॥उमादेवी॥ **ब्राह्मी** ॥ सरस्वती ॥ **कौमारी** ॥ कुमारः कामस्तत्पत्नी कौमारी रतिः ॥ **माहेंद्री** ॥ शची ॥ भगवती माहेश्वर्यादिसप्तेत्यर्थः ॥ **आद्याः** ॥ **माहेश्वर्याद्याः** ॥ **जीवा इति** ॥ दुःखस्पृष्टतनवा इत्यर्थः ॥ नित्यादुःखा रमाऽन्ये तु स्पृष्टदुःखा. समस्तगा इत्युक्तेरिति ध्येयम् ॥ तेन रमाया अपि जीवभूतां महाबाहो इति पूर्वं प्राणाधारत्वेन जीवत्वोक्तेर्माहेश्वर्यादीनां भगवत्या अन्यत्वे जीवत्वं कथं हेतुरुच्यत इति शंकाऽनवकाशइति ध्येयम् ॥ **प्रतीत एवेति** ॥ ममस्वरूपभूतेत्यध्याहृत्य व्याख्यानाकरणे मम योनिरिति प्रतीत एवान्वयेऽङ्गीकृतेमर्तीत्यर्थः ॥ **मम मातेतीति** ॥ भार्यायाश्च मातृत्वं बाधितमिति भावः ॥

॥२॥अत्र महद्ब्रह्मेतिजडाविद्योच्यत इति प्रतीतिनिरासार्थमाह॥महदिति॥प्रकृतिर्महालक्ष्मीः ॥ ननु सत्वं रजस्तम इतिजडा प्रकृतिर्वक्ष्यते॥ तत्संनिधानादत्रापि सैव युक्तेति चेत् ॥ न॥ तत्रापि चेतनप्रकृत्यभिधानात् ॥ कथमस्याः सत्वादिभेदभिन्नत्वमित्यत आह ॥ सा चेति ॥ जडप्रकृतेरभिमानिनी तत्कार्यसत्वादिगुणाभिमानिन्येतद्रूपत्रयवतीत्यर्थः ॥ ननु भगवती माहेश्वरीब्राह्मीकौमारीमाहेंद्रीश्रीभूदुर्गेति सप्तधा

॥ २ ॥ महद्ब्रह्म प्रकृतिः सा च श्रीभूर्दुर्गेति भिन्ना ॥ उमासरस्वत्याद्यास्तु तदंशयुताऽन्यजीवाः ॥ तथा च कापायणश्रुतिः ॥ श्रीर्भूर्दुर्गा महती तु माया सालोकसूतिर्जगतो बंधिकाच ॥ उमावागाद्या अन्यजी वास्तदंशास्तदात्मना सर्ववेदेषु गीता इति ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपि नोपजायंते प्रलये न व्यथंति च ॥२॥ मम योनिर्महद्ब्रह्म तस्मिन गर्भं दधाम्यहम्॥संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

भिन्नाऽगमेषूच्यते ॥ तत्कथं त्रिधा भिन्नोच्यत इत्यत आह ॥ उमेति ॥ आद्याश्चतस्रो भगवत्या अन्याः ॥ कुतः ॥जीवाः ॥ कथं तद्रूपत्वोक्तिः ॥ तदंशयुतास्तत्संनिधानोपेताः ॥ कुत एतदित्यत आह ॥ तथा चेति ॥ ममयोनिरित्येतत्परे व्याचक्षते ॥ मम स्वरूपभूता योनिः कारणं विश्वस्य ॥ प्रतीत एवान्वये मम मातेत्यापत्तेरिति ॥

॥ रू० ॥ ३ ॥ **महालक्ष्मीरिति** ॥ वक्ष्यमाणत्रिरूपत्वोपपादनायमहत्त्वविशेषणम् ॥ तथा च महालक्ष्मीर्लक्ष्म्यामूलरूपमित्यर्थः ॥

१नित्यमदुःखा॥२ तस्यामहालक्ष्म्या अंशोयासुताइतिविग्रहः ॥ ३ वक्ष्यमाणम् ॥ ४ संपाद्य ॥ ५ अनन्यसिद्धः स्वरूपनिरूपितम् ॥

॥ श्री० ॥ ननु योनिशब्दस्यैव व्याख्यानान्ममेत्यनुवादो व्यर्थ इत्यत आह ॥ ममेत्यनुवादेनेति ॥ अन्यथेति ॥ स्वरूपभूतविश्वस्येति पदद्वयाध्याहारे तत्र यथाश्रुतान्वयबाधः स्यादित्यर्थः ॥ अस्माकं तु प्रतीतान्वय एवेति भावः ॥ इत्यपीति ॥ योनिशब्दस्य गर्भाधानस्थले कारणे न प्रसिद्धिरित्याशयः ॥ ननु दुःखाद्यर्थस्य कथं मृषाप्रदर्शनरूपत्वमित्यतो बहुव्रीहिमाश्रित्याह ॥ मृषेति ॥ तथा चायथार्थज्ञानविषय इत्यर्थः ॥ पावकोऽग्निः ॥ श्रुतौ भूतात्मेत्यस्य भूतत्वमित्यर्थः ॥ यथाक्रम ॥ तदा भूमिः पंचभूतावरेति ॥

तन्निरासार्थमाह ॥ ममेति ॥ भार्येत्यर्थः ॥ ममेत्यनुवादेनान्यथा प्रतीतान्वयबाधः स्यादिति सूचयति ॥ प्रतीतान्वयांगीकारे मातेत्यपि प्रतीयेत तत्र कथं भार्येति निश्चय इत्यत आह ॥ न त्विति ॥ इति प्रतीतिः प्रसज्यत इति शेषः ॥ कुतो नेत्यत आह ॥ वाक्येति ॥ तस्मिन् गर्भं दधाम्यहमिति वाक्यशेषाद्भार्यार्थतानिश्चयात् ॥ श्रुतिबलाच्चेत्याह ॥ तथा हीति ॥ प्रकाशयंती प्रवर्तते ॥ अनयैव श्रुत्याऽन्यदपि ल

मम योनिरिति गर्भाधानार्था योनिः ॥ न तु माता ॥ वाक्यशेषात् ॥ तथा हि सामवेद शार्कराक्षश्रुतौ ॥ विष्णोर्योनिर्गर्भसंधारणार्था महामाया सर्वदुःखैर्विहीना॥ तथाऽप्यात्मानं दुःखिवन्मोहनार्थं प्रकाशयंती सह विष्णुना सेति अतः सीतादुःखादिकं मृषा प्रदर्शनमेव ॥ तथा कूर्मपुराणे ॥ न चेयं भूः ॥

भ्यमिति प्रसंगादाह ॥ अत इति॥ मृषाऽयथार्थं प्रदर्शनं यस्य तत्तथा ॥ इतश्चैवमेवेत्याह॥ तथेति ॥ तत्र ह्येवमुक्तम् ॥ दग्ध्वा मायामयीं सीतां भगवानुग्रहदीधितिः ॥ रामायादर्शयत्सीतां पावकोऽसौ सुरप्रिय इत्यादि॥ ननु महालक्ष्मीः श्रीभूदुर्गेति भिन्नेत्युक्तम् ॥भुवश्च गौर्भूत्वाऽश्रुमुखी खिन्नेति दुःखं प्रतीयते तत्कथं नदित्यत आह॥न चेति॥इयं भूताभिमानिनी प्रसिद्धाभूः॥ भगवत्या रूपं न भवति ॥किं त्वियमन्यैव

॥ कु० ॥ मातापितृरजोरूपगर्भाधानार्था योनिरित्यत आह ॥ भार्येत्यर्थ इति ॥ ननु योनिशब्दस्यैव व्याख्यानान्ममेत्यनुवादोऽनर्थकइत्यत आह ॥ ममेत्यनुवादेनेति ॥ बाध इति ॥ स्वरूपभूतेत्यध्याहारेण व्याख्यानादिति भावः ॥ प्रदर्शयंतीत्यत्र विरूपत्वाकांक्षायां क्रियामध्याहरति ॥ प्रकाशयंतीति ॥ ननर्थस्य मिथ्यात्वेऽपि ज्ञानस्य तदभावात्कथं मृषेत्युक्तमित्यत आह ॥ मृषाऽयथार्थेति ॥ इयं भूताभिमानिनीति ॥ अनेनेयमिति त्रिरावर्तनं ॥ तत्रैकस्यार्थः प्रसिद्धेति ॥ द्वितीयस्य भगवत्या रूपमिति तृतीयस्य किंत्वियमिति ॥

१. भारततात्पर्ये ॥ अ. २० श्लोक १०५ ॥ २ एतेषां शार्कराक्षश्रुतेर्भाष्येप्रदर्शयंतीमं(?)पाठइतिज्ञेयम् ॥

॥ श्री० ॥ वक्ष्यमाणप्रमाणानुसारादाह ॥ भिन्ने पद इति ॥ इतिशब्द इति॥ तथा च महदिति ब्रह्मेति शब्दवाच्याऽसीत्यर्थः ॥ ननु मम योनिर्महद्ब्रह्मेति पाठक्रमेणैव ममयोनिर्गर्भा धानार्था योनिरित्यादि व्याख्याय त्रिगुणा योनिरित्यादिप्रमाणं चोदाहृत्य महद्ब्रह्मप्रकृतिरिति च व्याख्याय महती ब्रह्मणीति प्रमाणमुदाहृत्य प्रकृतेर्महद्ब्रह्मशब्दवाच्यत्वोपपादने लाघवं म हद्ब्रह्मप्रकृतिरित्यादिव्युत्क्रमेण व्याख्याय पुनरुपस्थित्यर्थं महद्ब्रह्मशब्दवाच्या प्रकृतिरेवेति प्रतिज्ञारूपं गौरवं किमर्थमाश्रितमित्यत आह ॥ अर्थक्रमेणेति ॥ महद्ब्रह्मेत्यनुवादेन ममयोनि रिति विधीयते इत्येवं अनुवादविधानविषयभूतार्थयोः क्रमेणेत्यर्थः ॥ उद्देश्यस्य प्राथमिकत्वाद्विधेयस्य पश्चात्तनत्वादिति भावः ॥ ननु तर्हि तदुपपादनार्थं महती ब्रह्मणीति प्रमाणोदाहरणं तत्रैव कुतो न कृतमित्यत आह ॥ मत्स्यपुराणेति ॥ ३ ॥

कुत इत्यत आह ॥ तथा चेति ॥ महालक्ष्मरूपं भूरन्या इयं प्रसिद्धा तस्य तस्याः छाया प्रतिमा ॥ ननु रावणहरणादिकं भवतु मायासीतायाः वाल्मीकिदास्यं तावन्मत्स्यपुराणे साक्षात्सीताया एवोक्तम् ॥ दास्ये च दुःखमवर्जनीयमित्याशंकां प्रमाणपूर्वकमपाकरोति ॥ अत्रापेति ॥ श्रुतिरस्ति यतोऽत इति शेषः ॥ महद्ब्रह्म प्रकृतिरित्युक्तम् ॥ तत्र प्रमाणं वक्तुं व्यवहितत्वात्पुनः प्रतिजानीते ॥ महदिति ॥ महत्

तथा च सौकरायणश्रुतिः ॥ अन्या भूर्भूरियं तस्य च्छाया भूताऽवमा सा हि भूतैकयोनिरिति ॥ अत्रापि स्वेच्छया दास्यं जगतां प्रपितामहीत्यनभिम्लानश्रुतिः॥ मत्स्यपुराणोक्तमपि स्वेच्छयैव ॥ महद्ब्रह्मशब्दवाच्यापि प्रकृतिरेव महती ब्रह्मणी द्वे तु प्रकृतिश्च महेश्वर इति तत्रैव ॥ ३ ॥

ब्रह्मेति भिन्ने पदे ततः परमितिशब्दोऽध्याहार्यः ॥ कुत इत्यत आह ॥ महतीति ॥ तत्रैव मत्स्यपुराणे ॥ अर्थक्रमेण ममयोनिर्महद्ब्रह्मेत्यत्र व्युत्क्रमेण व्याख्यानम् ॥ मत्स्यपुराणोदाहरणप्रसंगादत्रोपपादनामिति ॥ ३ ॥

॥ कृ० ॥ ननु छाया त्वनातप काली प्रतिबिम्बार्कत्वगयोरित्युक्तेश्छायाशब्दः प्रतिबिम्बार्थः ॥ ननु च प्रतिमा निभरायाः साक्षाल्लक्ष्मीप्रतिबिम्बत्वम्॥ आभासिका त्वयेत्यादिविरोधादित्यत आह ॥ प्रतिमेति॥ आत्महतः समानाभिव्यञ्जकजातीयत्वोरित्याति महालक्ष्मीति स्यादित्यत आह॥ भिन्ने पद इति॥ ननु मम योनिर्महद्ब्रह्मेतिपाठक्रमान्ममयोनिरिति व्याख्येयम्॥ कुतो व्युत्क्रम इत्यत आह ॥ अर्थक्रमेणेति ॥ महद्ब्रह्म मम योनिरित्यन्वयक्रमेणेत्यर्थः॥ यद्यपीदं प्रागेव वक्तव्यं तथाऽप्युपपादनानुपपत्तिपरिहारप्रसङ्गादिहोक्तम् ॥ ननु शब्दवाच्यत्वसमर्थनाय महद्ब्रह्म प्रकृतिरितिवाक्यानंतरमेव महतीइति प्रमाणमुदाहार्यम ॥ लाघवात ॥ न त्वत्र प्रतिज्ञागौरवादित्यत आह ॥ मत्स्येति ॥ ३ ॥

१ भारततात्पर्य ॥ अ० १ श्लो०

॥ श्री० ॥ ४ ॥ प्रतिज्ञातमिति ॥ परं भूय.प्रवक्ष्यामीति प्रतिज्ञातम् ॥ ज्ञायत इति कर्मव्युत्पत्त्या ज्ञानमीश्वरादिमाहात्म्यं मम योनिरित्यादिश्लोकद्वयेनोक्तमित्यर्थः ॥ ननु साधनानुष्ठाने बंधप्रकारप्रदर्शनं कथमुपयोगीत्यत आह ॥ यो हीति ॥ विजिज्ञास्य ॥ विचार्य ॥ ५ ॥ ६ ॥

॥ ४ ॥ननु प्रतिज्ञातं ज्ञानं श्लोकद्वयेनोक्तं तत्किमुत्तरेण ग्रंथेनाध्यायासंगतमुच्यत इत्यत आह ॥ बंधेति ॥ यो हि बद्धोऽस्मीति जानाति स एव तन्निवृत्तिसाधनं विजिज्ञास्यज्ञात्वाऽनुतिष्ठति अतो बंधोच्छेदसाधनानुष्ठानाय तज्ज्ञापनार्थं जिज्ञासामुत्पादयितुं गुणत्रयकृतबंधप्रकारमा

॥ ४ ॥ बंधप्रकारं दर्शयति ॥ साधनानुष्ठानाय ॥ सत्त्वमित्यादिना ॥५॥६॥ तृष्णासंगयोः समुद्भवं तयोः कारणम्॥७॥

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ॥ तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥
सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ॥ निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५॥
तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ॥ सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् ॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥७॥

दौ तावद्दर्शयतीति नासंगतिरित्यर्थः॥५॥६॥अत्र रजस्तृष्णासंगसमुद्भवमित्यस्य तृष्णासंगाभ्यां समुद्भवोयस्येत्यपव्याख्यानमिति भावेन विग्रह प्रदर्शनपूर्वकमर्थमाह ॥ तृष्णेति ॥ समुद्भवत्यस्मादिति समुद्भवं कारणम् ॥

॥ रू० ॥ ४ ॥ ज्ञानमिति ॥ कृत्यल्युटो बहुलमिति कर्मणि ल्युट् ज्ञेयं भगवन्माहात्म्यमित्यर्थः॥५॥६॥समुद्भवत्यस्मादिति ॥ नात्र घञ् ॥श्रिणीभुवोऽनुपसर्गेइत्युपसर्गे उपपदे तत्पर्युदासात् ॥ किं तु समुत्पूर्वाद्भवतेरपादाने ऋदोरबित्यप् ॥ सार्वधातुकार्धधातुकयोरितिगुणो ऽवादेशश्चेति भावः ॥ न च पुंस्त्वापत्तिः पुमानित्यधिकृत्य प्रसवत इत्युक्तेरिति वाच्यम् ॥ भावार्थघञन्तस्यपुंस्त्वेऽपि कर्माद्यर्थनदंतस्य विशेष्यलिंगत्वात् ॥ संवत्समनुवर्तिष्यत इति महाभाष्यप्रयोगादिति ॥

१ कार्यव्यक्तयः ॥ २ महद्ब्रह्मेति संबंधः योनिः क्षेत्रकारणमित्यर्थः ॥ ३ तपुगुणेषुतासुदेवीषु च ॥४सत्वंगुणः तदभिमानिश्रीतत्वंच ॥ ५ न आमयो यस्मात्तत् ॥

॥ श्री० ॥ अन्यथेति ॥ रजोगुणस्य तृष्णासंगाभ्यां समुद्भवव्याख्यान इत्यर्थः॥ आविर्भाव इति ॥ तृष्णासंगाभ्यां रजोगुणस्याभिव्यक्तिमंगीकृत्य तत्परतया व्याख्यान इत्यर्थः ॥ गुणकार्येति ॥ सत्वादिगुणकार्यकथनप्रकरणे तृष्णासंगकार्यकथनं विरुद्धमित्यर्थः ॥ ७ ॥ अत्र हि प्रथमांतादज्ञानशब्दोपपदाज्जनीप्रादुर्भाव इति धातोः यत इत्यपादानार्थे डप्रत्यये टीभूतस्य अनीत्यस्यलोपे प्रत्ययाकारसंबंधे चाज्ञानजमिति भवतीति॥तदयुक्तम्॥सप्तम्यांजनेर्डः ॥ पंचम्यामजातौ॥अन्येष्वपिदृश्यत इति सूत्रत्रयेण सप्तम्यंते पंचम्यंते उपपदे अन्येष्वपिप्रथमादिकारकेषूपपदेषु सत्सु कर्तरि डप्रत्ययो भवतीत्युक्तत्वात् पंके जायते पंकाज्जायत इति वा पंकजमित्यादौ कर्त्तर्येव डप्रत्ययदर्शनाच्च कथमज्ञानं जायते यत इत्यपादानत्वार्थे डप्रत्ययमंगीकृत्य व्याख्यानमित्यत आह॥एतच्चान्येष्वपि दृश्यत इति दृशिग्रहणसामर्थ्याल्लभ्यत इति ॥अन्येष्वपिदृश्यत इत्यत्र पूर्वसूत्राड्डप्रत्ययस्यानुवृत्तिसंभवेन पुनर्दृश्यतइतिदृशिग्रहणवैयर्थ्याद्धचर्थ सत्किंचिदिष्टं ज्ञापयतीति॥न्यायेनापादानेऽपि डप्रत्ययो भवतीति दृशिग्रहणसामर्थ्याल्लभ्यत इत्यर्थः॥तथाचाज्ञानं जायते यत इत्यपादाने डप्रत्ययमंगीकृत्यव्याख्यानंयुक्तमितिभावः ॥८

अन्यथा प्रकृतिसंभवा इत्युक्तविरोधात् समुद्भवशब्देनाविर्भावो विवक्षित इति चेत् ॥ तथाऽपि गुणकार्यकथनप्रकरणविरोधात् ॥ ७ ॥ तमस्त्वज्ञानजमित्यस्याज्ञानाज्जातमित्यपव्याख्यां प्रत्याख्यातुमाह ॥ अज्ञानमिति ॥ एतच्चान्येष्वपि दृश्यत इति दृशिग्रहणसामर्थ्याल्लभ्यते॥

अज्ञानं जायते यतस्तदज्ञानम् ॥ प्रमादमोहौ तमस इति वाक्यशेषात् ॥ ८ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ॥प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥८॥

कुतः प्रतीत एवार्थो नेत्यत आह ॥ प्रमादेति ॥ वाक्यशेषेऽज्ञानस्य तमःकार्यत्ववचनादित्यर्थः ॥ ८ ॥

॥ क० ॥ अन्यथेति ॥ अपव्याख्यान इत्यर्थः ॥ ७ ॥ नन्वज्ञानं जायते यत इत्येतदुपपादनायाज्ञानशब्दोपपदाज्जनेरपादानेऽन्येष्वपिदृश्यत इति ड इति वक्तव्यं॥तत्कथम् ॥ कर्तरिक्तदितिसूत्रविरोधादित्यतआह ॥ एतच्चेति ॥ यद्वा ननु केवलाज्जनेः कर्तरि डः ततोऽज्ञानं जं यस्मादिति पंचम्यर्थे बहुव्रीहिः ॥ भाष्यं च विग्रहोक्तार्थप्रदर्शनपरमिति वाच्यम् ॥ न चैतद्युक्तम् ॥ अन्येष्वपिदृश्यत इत्यनेनोपपदे सत्येव डप्रत्ययविधानादित्यत आह ॥ एतच्चेति ॥ ८ ॥

॥ श्री० ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ॥ कृ० ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

सत्त्वं सुखे संजयति रजः कर्मणि भारत॥ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत॥ रजःसत्त्वंतमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥
सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११ ॥
लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा ॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन॥ १३ ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते ॥ तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

१ गुणस्तदभिमानिश्रीश्च ॥ २ सुखविषये ॥ ३ प्रवर्तयति ४ ॥ गुणस्तदभिमानिभूदेवीच ॥ ५ तद्विषये ॥ ६ । ७ मनसस्तत्वज्ञानशक्तिं प्रतिबध्य ॥ ८ गुणस्तदभिमानिदुर्गादेवीच ॥ ९ अधर्मेधर्मबुध्यादिरूपे ॥ १० आलस्यादावपि ॥ ११ उत्कटमनस्यकार्यदक्षंभवति ॥ एवमुत्तरत्रापि ॥ अत्रसत्वादिशब्दागुणमात्रपरानदेवीपराअपि ॥ तासांतु मोक्षसामीप्यम् ॥ प्रेरकश्चेश्वरएवेतिज्ञेयम् ॥ १२ श्रोत्रादिषु ॥ १३ ज्ञानात्मकः ॥ १४ धनादिरत्यागेच्छा ॥ १५ ॥ व्यर्थोद्यमः ॥ १६ काम्यकर्मणाम् ॥ १७ चित्तस्यानुपरतिः ॥ १८ अप्राप्ताभिलाषः ॥ १९ श्रोत्रादिषुशब्दादिज्ञानाभावः ॥ २० अनुद्यमः ॥ २१ अनवधानम् ॥ २२ विपर्ययः ॥ २३ म्रियते ॥ २४ विष्णुज्ञानिनाम् ॥ २५ देहान् ॥ सात्विककुलेजायतइत्यर्थः ॥२६॥ मृत्वा॥२७ काम्यकर्मिणां कुले॥२८ मृतः ॥२९ दैत्यानांकुले ॥

॥ श्री० ॥ आविवक्षेति ॥ गीतायामिति शेषः ॥ पञ्चीभ्रमं वारयति ॥ रजसइति पंचमीति ॥ मात्रास्तोकबिंदुशब्दानांपर्यायत्वमभिप्रेत्य मात्रयेत्यस्य दुःखेऽपि विशेषणत्वप्रतीतेराह ॥ स्तोकात्मकमिति ॥ अल्पं सुखं तदधिकं दुःखं चेत्यर्थः ॥ अज्ञानात् ॥ तमः फलात् ॥ तत्फलकस्य ॥ दुःखमात्रफलकस्य ॥ इत्यादि ॥ फलतारतम्यकथनम् ॥ १६ ॥ १७॥

दुःखशब्दः ॥ केवलदुःखवाचीत्यन्यथाप्रतीतिनिरासायाह ॥ रजस इति ॥ दुःखशब्देनोच्यत इति शेषः ॥ तत्कथमित्यत उक्तम् ॥ अल्पेति ॥ अल्पत्वात्सुखस्याविवक्षेति भावः ॥ कुत इत्यत आह ॥ तथा हीति ॥ रजस इति पंचमी ॥ मात्रयेति सुखविशेषणं स्तोकात्मकं

रजसस्तु फलं दुःखमित्यल्पसुखंदुःखम् ॥ तथा हि शार्कराक्ष्यशाखायाम् ॥ रजसो ह्येव जायते मात्रया सुखं दुःखं

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ॥ रजसस्तु फलं दुःखमज्ञानं तमसःफलम् ॥१६॥

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

तस्मात्तान्सुखिनो दुःखिन इत्याचक्षत इति ॥ अन्यथा दुःखस्यातिकष्टत्वात्तमोधिकत्वं रजसो न स्यात्॥१६॥१७॥

सुखं दुःखं चेत्यर्थः ॥ तान राजसकर्मि(र्म)णः॥ केवलदुःखार्थांगीकारे बाधकं चाह॥अन्यथेति॥ अतिकष्टत्वादज्ञानादपि कष्टत्वात् ॥ तत्फलकस्य रजसः ॥ तथा च मध्ये तिष्ठंति राजसाः ॥ अधो गच्छंति तामसा इत्याद्ययुक्तं स्यादिति भावः ॥ १६ ॥ १७ ॥

॥ कृ० ॥ बहुव्रीह्यर्थमत्वर्थमात्रं विवक्षयतां किमल्पत्वविशेषणेनेत्यतस्तत्कार्यं वक्तुमाक्षिपति ॥ तत्कथमिति ॥ तर्हि गीतायां दुःखमित्येवकथमुक्तमित्यर्थः ॥ स्तोकात्मकमिति ॥ मात्रा स्तोकमल्पमितिपर्याया इत्यभियुक्तोक्तेः प्रकृत्यादिभ्यस्तृतीया वाचोत्युक्ततृतीयायास्तादात्म्यार्थत्वाच्चेति भावः ॥ गीतायां रजःशब्दो राजसकर्मपरः ॥ पूर्वार्धे सात्त्विककर्मोक्तिसाहचर्यादिति ध्वनयितुं तानित्येतद्व्याचष्टे ॥ राजसकर्मण इति ॥ १६ ॥ १७ ॥

१ परापरतत्त्वविषयम् ॥ २ स्वर्गादिविषयासक्तिः ॥ ३ भवतइत्यन्वयः ॥ ४ अज्ञानंभवतीत्यर्थः ॥

॥ श्री० ॥ १८॥१९॥२०॥२१ ॥ तथाऽपि सूक्ष्मं सत्वगुणं च कांक्षेदित्याशंक्याह वक्ष्यमाणप्रमाणानुसारेण प्रायो न द्वेष्टि न कांक्षतीति भाष्याभिप्रायमाह॥ इदमुक्तं भवतीत्यादिना॥

॥ १८॥ नान्यं गुणेभ्यः कर्तारमिति स्वतंत्रकर्तृत्वं गुणानामेव नान्यस्येत्युच्यत इत्यपव्याख्याननिरासार्थमाह॥परिणामीति ॥ कुत एतदित्यत आह॥अन्यथेति॥गुणेभ्योऽन्यस्य कर्तृत्वाभावे॥मोक्षधर्मे परमेश्वरस्य कर्तृत्वमुक्तं तद्विरोधश्चेति वाक्यशेषः॥१९॥२०॥२१॥प्रकाशं च प्रवृत्तिं चे

॥ १८ ॥ परिणामिकर्त्तारं गुणेभ्योऽन्यं न पश्यति ॥ अन्यथा यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनि

ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः॥जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः॥१८॥
नान्यं गुणेभ्यःकर्तारं यदा द्रष्टाऽनुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१९॥गु
णानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥ अर्जुनउवा
च ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो॥ किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते॥॥२१॥
श्रीभगवानुवाच॥प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव॥न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति॥२२

मिति श्रुतिविरोधः॥नाहं कर्ता न कर्तात्वं कर्ता यस्तु सदाप्रभुरिति मोक्षधर्मे॥१९॥२०॥२१॥प्रायो न द्वेष्टि न कांक्षति

त्यनेन गुणातीतस्य सर्वथा सत्वादिगुणकार्येषु प्रकाशादिषु द्वेषाकांक्षे न स्त इत्युच्यत इत्यन्यथाप्रतीतिनिरासार्थमाह॥प्राय इति॥इदमुक्तंभवति

॥ कु० ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ ननु गुणातीतस्येश्वरस्य विषयप्रकाशादिषु द्वेषाकांक्षे नियमेन स्तः ॥ तत्कथमेवमुक्तमित्यतो वक्ष्यमाणप्रमाणानुसारेणाह ॥ इदमुक्तंभवतीति ॥

१ जनआदिलोकम् ॥ २ स्वर्गादौ ॥३ तमःपरिणामाज्ञानिनः॥ ४ निरयम् ॥ ५ तद्गुणपरिणामदेहेषुमकर्टीभूतान् ॥६ परब्रह्म ॥७ लक्षणैः ॥ ८ सामान्येनेत्यर्थः॥९सापवादमिति ॥

॥ श्री० ॥ लौकिकाः ॥ लौकिकार्थविषयाः ॥ तत्र स्थूलसत्वगुणाल्लौकिकार्थविषयकः प्रकाशो ज्ञानं भवति ॥ स्थूलरजोगुणात् ॥ लौकिकार्थविषयकप्रवृत्तिर्भवति ॥ स्थूलतमोगुणात् लौकिकार्थविषयको मोहो भवतीति विवेकः ॥ सूक्ष्मेभ्य इति ॥ सूक्ष्मसत्वरजस्तमोगुणेभ्यः परमेश्वरविषयकप्रकाशप्रवृत्तिमोहाः क्रमेण भवन्तीत्यर्थः ॥ तत्राद्येष्विति ॥ स्थूलसत्वादिगुणकार्येषु लौकिकार्थविषयकप्रकाशप्रवृत्तिमोहेष्वित्यर्थः ॥ तत्र स्थूलसत्वरजःकार्ययोर्लौकिकार्थविषयकमोहश्च प्रायेण नास्ति न तु सर्वथा॥कुतः ॥गुणातीतस्याप्यपरोक्षज्ञानिनः प्रारब्धवशात्कदाचिल्लौकिकार्थविषयकप्रकाशादौ आकांक्षामोहयोर्दर्शनादित्यर्थः ॥ द्वितीयेष्विति ॥ परमेश्वरविषयकेषु सूक्ष्मसत्वादिकार्येषु प्रकाशप्रवृत्तिमोहेष्वित्यर्थः ॥ तत्र सूक्ष्मसत्वरजःकार्ययोः परमेश्वरविषयकयोः प्रकाशप्रवृत्त्योराकांक्षा सूक्ष्मतमःकार्ये परमेश्वरविषयके मोहे द्वेषश्च सर्वथाऽस्त्येव नतु पूर्ववत्प्रायेणेत्यर्थः ॥ उक्तम् ॥ सामान्येनेत्यर्थः ॥ सूक्ष्मतम इति ॥ परमेश्वरविषयकमोहापादकमित्यर्थः ॥ दैवात् सूक्ष्मतमसा भगवद्विषयकविपरीतवृत्तिजननेनाऽपि प्रायसेन शीघ्रं तज्जह्यातीति ॥ तथा च रजस्तमःसत्वगुणान् प्रवृत्तान् प्रायो न च द्वेष्टि नचा

सत्वादयो गुणा द्विविधाः स्थूलाः सूक्ष्माश्च॥ तत्र स्थूलेभ्यो लौकिकाः प्रकाशप्रवृत्तिमोहाः जायंते ॥ सूक्ष्मेभ्यस्तु परमेश्वरादिविषयाः ॥ तत्राद्येषु गुणातीतस्य द्वेषाकांक्षे प्रायो न स्तः ॥ न तु सर्वथा प्रारब्धवशात्कदाचित्संभवात् ॥ द्वितीयेषु तु आकांक्षादिकं विद्यत एवे ति ॥

तथा हि सामवेदे भाल्लवेयशाखायाम् ॥ रजस्तमःसत्वगुणान्प्रवृत्तान्प्रायो न च द्वेष्टि न चापि कांक्षति॥ तथाऽपिसूक्ष्मं सत्त्वगुणं च कांक्षेद्यदि प्रविष्टं सुतमश्च जह्यादिति ॥ न हि देवा ऋषयश्च सत्वस्था नृपसत्तम ॥ हीनाः सत्वेन सूक्ष्मेण ततो वैकारिका मताः ॥

कुत एतदित्यत आह॥ तथा हीति ॥ यद्यपि न द्वेष्टीत्यादिकमुक्तम् ॥तथाऽपि॥ यदि सुतमः सूक्ष्मतमो दैववशात्तं प्रविष्टं स्यात् ॥ तदाऽसौ तज्जह्यात् ॥ द्विष्यात्॥ गुणातीतानां च सूक्ष्मसत्त्वसद्भावे भागवतवाक्यं च पठति ॥ नहीति

पि कांक्षेदिति सामान्येनोक्तम् ॥ तथाऽपि ॥ तत्स्थूलसत्वादिकार्यलौकिकार्थविषयकप्रकाशप्रवृत्तिमोहेषु प्रायः आकांक्षाद्यभाववत्परं मंतव्यम्॥ कुतः यतः सूक्ष्मं सत्वगुणं तत्कार्यभगवद्विषयकप्रकाशम् ॥ उपलक्षणमेतत्॥ सूक्ष्मरजोगुणकार्यां परमेश्वरविषयां प्रवृत्तिं च कांक्षेत॥ यदि सुतमः सूक्ष्मतमस्तत्कार्यपरमेश्वरविषयको मोहो यदि तं गुणातीतं ज्ञानिनं प्रविष्टः स्यात्तर्हि तं जह्यात्॥द्विष्यादिति श्रुत्यर्थो द्रष्टव्यः ॥ तथा च प्रकाशं च प्रवृत्तिं च मोहमेवचेति गीतावाक्यस्य स्थूलसत्वादिकार्यलौकिकार्थविषयकप्रकाशादिपरमित्युक्तं भवति ॥ तथा च भगवद्विषयं प्रकाशं च प्रवृत्तिं च सूक्ष्मरजःकार्यभूतां प्रवृत्तिं न द्वेष्टि निवृत्ता पुनः कांक्षति च सूक्ष्मतमःकार्यं भगवद्विषयकं मोहं प्रवृत्तं द्वेष्टि निवृत्तं च न कांक्षति च ॥ लौकिकविषयं प्रकाशं च प्रवृत्तिं च मोहं च प्रायो न द्वेष्टि न च कांक्षतीति गीतार्थो द्रष्टव्यः ॥

॥ श्री० ॥ तदा वैकारिका इति ॥ विकारो भौतिकदेहादिस्तद्धर्त्वेन सम्बन्धिन इत्यर्थ इत्याह ॥ तस्मात्तु सूक्ष्मसत्त्वाभावे परमेश्वरविषयकप्रकाशाभावे देवं सत्त्वमात्मोऽभावे परमेश्वरविषयकप्रवृत्त्यभावात स्थूलसत्त्वादिना केवलं लौकिकविषयक प्रकाशादिमत्त्वेन बहुतरान्तःकरणविकारप्राप्त्या वैकारिका स्मृता इत्यर्थ. ॥ त्रिभिरक्षरैरिति । अकारोकारमकारात्मकोंकारेण भगवदुपासक इतियावत ॥ पञ्चविंशक इति ॥चतुर्विंशतितत्त्वानि जीवो वा पञ्चविंशक इत्युक्तात्पंचविंशतिसंख्यापूरक. निषिद्धक्रियारहितत्वान्निष्क्रियः पुरुषो जीव इत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥ तुल्यत्वरूपधर्मस्यार्थ.नेकगत ॥ तुल्यत्ववाचिन शब्दस्येति ॥

यदि देवा ऋषयश्च सूक्ष्मेण सत्त्वेन हीनाः स्युः तदा सत्त्वस्या हानि नोच्येरन् किं नु ततस्तदा वैकारिकाः स्मृताः प्रसज्येरन्नत. किं कथं वैकारिको गच्छेत् पुरुषोत्तमम् ॥ तेषां मोक्षो न स्यादिति यावत ॥अस्ति च तेषां मोक्षोऽतः सूक्ष्मसत्त्ववंत एव त इत्यर्थः॥ सात्त्विकःसूक्ष्मसत्त्ववान् ॥ ससूक्ष्मसत्त्वसंयुक्तः संयुक्तस्त्रिभिरक्षरैः ॥पुरुषःपुरुषं गच्छेन्निष्क्रियः पंचविंशक इति ॥ सूक्ष्मसत्त्वप्रकरणात् ॥ मोक्षार्थनिश्चितो मोक्ष

कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तममिति मोक्षधर्मे ॥ सात्त्विकः पुरुषव्याघ्र भवेन्मोक्षार्थनिश्चित

उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥
समदुःखसुखस्वस्थः समलोष्टाश्मकांचनः॥तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः॥२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ॥ सर्वारंभपरित्यागी गुणातीतः सउच्यते॥२५॥

इतिच॥२२॥२३ ॥ २४॥तुल्यत्वार्थ उक्तः पुरस्तात्॥ २५ ॥

लक्षणे पुरुषार्थे निश्चितः २२ ॥ २३ ॥ २४ ॥ समदुःखसुखइत्यादिना सर्वथा सुखादौ तुल्यत्वबुद्धिरुच्यत इत्यन्यथाप्रतीतिनिरासार्थमाह ॥ तुल्यत्वेति ॥ तुल्यत्ववाचिनः शब्दस्यार्थ इत्यर्थः ॥

॥ कृ० ॥ वैकारिका इति ॥ विकारो भौतिकदेहादिः ॥ तत्र भवा इत्यर्थ. ॥ तत्कदेहयुक्ता इति यावत ॥ ननु वैकारिकोऽपि सन् पुरुषोत्तमं गच्छत्येवेति व्यभिचार इत्यत आह ॥ तेषामिति ॥ संयुक्तस्त्रिभिरक्षरैरिति ॥ त्रिवर्णात्मकप्रणवेन संयुक्तः तेन भगवदुपासक इति यावत ॥ निष्क्रिय इति ॥ निक्रियाशून्य इत्यर्थ. ॥ पंचविंशक इति ॥ पुरुषोऽव्यक्तं च महानहंकारो मनस्तथा ॥ दशेंद्रियाणि शब्दाद्या भूता पंचविंशति ॥ इति तत्रसंख्यापूरकत्वात् पंचविंश इत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥

१अचारमाह॥ननु उदासीन इत्यर्थः वर्णाश्रमधर्मानुष्ठानात॥ २सत्त्वादिभिः॥ ३तत्कृतविकारं न प्राप्नोति॥ ४स्व अर्थकर्माचरणायनचेष्टते इत्यर्थ.॥ ५धैर्ययुक्तः ६निर्विकारः ७जीव.॥ ८भूतैर्युक्ताः

॥ श्री० ॥ इत्यादीति ॥ प्रायः सर्वान् कामान् प्रजहातीति द्वितीयाध्यायोक्तरीत्येत्यर्थः ॥ २५ ॥ ब्रह्मशब्दम् ॥ ब्रह्मशब्दवाच्यम् ॥ प्रतिष्ठाऽहमिति ॥ प्रतिष्ठा धारकः पुमानिति वचनाद्धारकत्वं प्रतिष्ठाशब्दार्थः न हि स्वयं स्वस्य प्रतिष्ठापक इति भावः ॥ परब्रह्मत्वायेति व्याख्यान वाचकमाह ॥ अन्यस्येति ॥ भुवो भाव इति भुवो धातोर्भावे भवनरूपधात्वर्थविवक्षायां क्यप्प्रत्ययः स्यादिति सूत्रार्थः ॥ तथा च भूसत्तायामस्मात् भावे क्यप्प्रत्यये ककारलोपे भूयमिति रूपम् ॥ कित्वाद्गुणाभावः ॥ अन्यथा भोयेति स्यादिति द्रष्टव्यम्

प्रायःसर्वानित्याद्युक्तरीत्येति भावः॥२५॥ब्रह्मभूयायेत्यस्य परब्रह्मत्वायेति व्याख्यानं प्रमाणविरुद्धमिति भावेनान्यथा व्याचष्टे॥ब्रह्मवदिति॥नाब्रह्मशब्दं परं ब्रह्म किं तु मम योनिर्महद्ब्रह्मेति प्रकृता प्रकृतिस्त्व ब्रह्मणो हि प्रतिष्ठाऽहमित्युत्तरवाक्यात्॥तद्भूयं च न तादात्म्यं किं तु त

ब्रह्मवत्प्रकृतिवद्भगवत्प्रियत्वं ब्रह्मभूयम्॥ न तु तावत्प्रियत्वम् ॥ किं तु प्रियत्वमात्रम् ॥ब्रह्मा वापि तु मु

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६ ॥

क्ता वा न रमावत्प्रिया हरेरिति पाद्मे ॥ भूयाय ॥ भवाय ॥ ॥२६ ॥

द्भगवत्प्रियत्वमेवअन्यस्यान्यभावायोगादिति भावः॥ननु किं यावत्प्रकृतेर्भगवत्प्रियत्वं तावद्गुणातीतस्येत्यतः सप्रमाणमाह॥न त्विति॥तर्हि किं भूयशब्दःप्रियत्ववाची येनैवं व्याख्यायत इत्यत आह॥भूयायेति॥भुवो भाव इति वचनाद्भावो भवनं भूयशब्दार्थः ॥ब्रह्मवद्भावो ब्रह्मभूयम्॥

॥ कृ० ॥ उक्तरीत्येति ॥ प्रजहाति यदा कामानिति गीताव्याख्यानावसर इति शेषः ॥ २५ ॥ परब्रह्मत्वायेति ॥ स्यादुक्तमभुवं ब्रह्मत्वमित्यसरोक्तेरिति भावः ॥ ब्रह्मशब्दमिति ॥ बहुव्रीहिरयं ब्रह्मशब्दवाच्यमित्यर्थः ॥ तद्भूयं चेति॥ अत्र भावपदे क्यबन्तेन भूयशब्देन साधु ॥ अन्यादृशस्तु प्रामादिकः भावे नणकाचित्तयोऽन्य इति अमरेण स्यपोनन् नौणचेत्याद्युक्तणादिभिन्नानां भावार्थकृतां नपुंसकत्वोक्तेरिति ज्ञातव्यम ॥ तस्य भावस्यत्वात्तित्यादाविव भावशब्दो नपुंसक इति प्रतीतिनिरासायाह ॥ भावो भवनमिति ॥ प्रतीत एवार्थः किं न स्यादित्यत उक्तम ॥ भुवो भाव इतीति ॥ अनुपसर्गे सुप्युपपदे भुवो भावे क्यबिति सूत्रार्थः ॥ नात्र भावो धर्म ॥ क्यपः कृत्त्वेन तदर्थत्वायोगात ॥ तद्धितस्यैव तथात्वादिति भावः ॥ ननु एवमपि प्रियत्वप्रतिपादकशब्दाभावात्कथं प्रियत्वमित्युक्तमिति चोद्यं तदवस्थमेवेत्याशङ्कांपरिहर्तुं ब्रह्मभूयशब्दसमुदायार्थं तावदाह ॥ ब्रह्मवद्भाव इति ॥

॥ श्री॰ ॥ननु भुवोभावइत्यत्र वद सुपि क्यप्चेति पूर्वसूत्रात् सुपीत्यनुवृत्तेर्ब्रह्मणि भावोयेन ब्रह्मशब्देन विग्रहे तत्पुरुषाश्रयत्वेन अव्ययादाप्सुप इति अव्ययात्परस्य सुपो लोपे सुब्
तत्वाभावात् कथं तस्मिन्सुबन्ते उपपदे सति विहितो भुवो भाव इति सूत्रेण क्यप्प्रत्यय इत्यत आह ॥ **सुबन्तमात्रस्येति** ॥ सुबन्तत्वस्य श्रूयमाणत्वमपि न विवक्षितम् ॥ किं नाम सुब
न्तत्वमात्रं तच्च प्रत्ययलोपे प्रत्ययलक्षणं॥प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यादिति विधानेन प्रत्यये लुप्तेऽपि सुबन्तत्वात्सत्वेनुक्तस्मिन्नुपपदे तेन क्यप्प्रत्यय इति भाव ॥ ननु ब्रह्मवद्भूया
येति वतिः श्रूयेतेति चेत्तत्राह ॥ **वत्यर्थस्य चेति** ॥ वृत्तावेवेति ॥ ब्रह्मभूयायेति समासवाक्य इत्यर्थः ॥ वत्यर्थस्य समासवाक्येंऽतर्भावेदृष्टांतमाह ॥ **मयूरव्यंसकादिवदिति** ॥ मयूर
व्यंसकादयश्चेतिसूत्रेण मध्यमपदलोपविधानात् मयूरवद्व्यंसको मयूरव्यंसक इतिवद्ब्रह्मवद्भावो ब्रह्मभूयमिति मध्यमपदलोपसमासोऽयमितिभावः ॥

वदः सुपीति सुबन्तमात्रस्योपपदस्यानुवृत्तेः ॥ वत्यर्थस्य च वृत्तावन्तर्भावात् ॥ मयूरव्यंसकादिति वत् ॥

॥ कृ॰ ॥ ननु अमरटीकादौ ब्रह्मभवनंब्रह्मभूयं ब्रह्मणो भाव इति विग्रहदर्शनात् ॥ अनव्यय एव षष्ठ्यन्त एव ब्रह्मशब्द एव चोपपदे भुवः क्यप्प्रत्ययो भवतीति ज्ञायते ततश्च ब्रह्म
भूयशब्दस्य ब्रह्मवद्भावः कथमर्थःस्यादित्यत आह ॥ **वदः सुपीत्यत इति** ॥ **सुबन्तमात्रस्येति** ॥ मात्रशब्दःकार्त्स्न्यार्थो तेन नियमत्रयस्याविषयव्यवच्छेदः ॥ तदयमर्थः ॥भुवोभाव इति
सूत्रे वदः सुपीतिसूत्रात्सुपीत्यनुवृत्तौ ॥ तस्य च प्रत्ययग्रहणे तदन्तग्रहणमिति न्यायेन सुबन्त इत्यर्थः ॥ तस्मिंश्च सुबन्ते उपपदे भुवोधातोः क्यप् प्रत्ययः स्यात् भाव इति सूत्रार्थे ...
इत्यादिनियमोविवक्षितः ॥ तत्प्रत्यायकाभावात् ॥ सुपीत्यस्यैव सुबन्तमात्रप्रत्यायकत्वात् ॥ किं चानव्यय एवेति नियमे पुनर्भूयमित्यादि न स्यात् ॥ षष्ठ्यन्त एवेति नियमेऽष्टादशात्मके
ब्रह्मणि भावो ब्रह्मभूयमिति व्याख्यानं न स्यात् ॥ ब्रह्मशब्द एवेति नियमे देवभूयमित्यादि न स्यात्॥तस्मात्सुबन्तमात्रमुपपदमित्यंगीकर्तव्यम् ॥ तथा च ब्रह्मवच्छब्दस्याव्ययादाप्सुप
इति सुब्लोपेऽपि प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायेन सुबन्तत्वानपायाद्ब्रह्मभूयशब्दः ब्रह्मवद्भावःप्रतीयतएवेति ॥ ननु ब्रह्मवच्छब्दस्य भूयशब्देन समासो ब्रह्मशब्दस्य वा आद्ये
समासे वतिश्रवणापत्तिः ॥ अन्त्ये वत्यर्थप्रतीतिर्न स्यादित्यत आह ॥ **वत्यर्थस्य चेति** ॥ वृत्तिशब्दः समासपर्यायपरः ॥ अंतर्भावादित्यस्य समासार्थांतर्भूततया प्रतीतेरित्यर्थः ॥ततश्च
पक्षद्वयेऽपि समासशक्त्या वत्यर्थप्रतीतेर्नानुपपत्तिः ॥ इयांस्तु विशेषः ॥ आद्ये पक्षे वतिप्रत्ययो लुप्यते अन्ये तु स्वरूपेणैव स नास्तीति भावः ॥ ननु शब्दाभावेऽपि तदर्थप्रतीतिःसमुदा
यशक्त्या भवतीत्यनुपपन्नम् ॥ अदर्शनात् ॥ वतिप्रत्ययलोपश्च कथम् ॥ तद्विधायकाभावात् ॥ किं च स्वार्थैकव्यवस्थानेन समस्यमानपदार्थयोरसामर्थ्येन समासानुपपत्तिरित्यत आह ॥
मयूरव्यंसकादिवदिति ॥ मयूर इव व्यंसको मयूरव्यंसक इत्युपमानपूर्वपदकर्मधारयसमासेनेदम्॥आदिपदेन कुतोभयादिशब्दसंग्रहः ॥ अयमर्थः ॥ यथामयूरव्यंसक इतिप्रयोगे इव
शब्दाभावेऽपि समासशक्त्यैव तदर्थप्रतीतिरिवशब्दार्थेन व्यवधानात्सामर्थ्याभावेऽपि समास इवशब्दलोपश्च मयूरव्यंसकादयश्चेति समासादिनिपातनात् ॥ तथा च ब्रह्मभूयशब्देऽपि व
त्यर्थप्रतीतिः समासो वतिप्रत्ययलोपश्चोपपद्यते ॥ मयूरव्यंसक इत्येव समासः पूर्वनिपातनियमार्थं च सूत्रमिति यन्मतं तत्र का गतिरिति वाच्यम् ॥ तन्मतेऽपि नास्ति कुतोभ
यं यस्य सोऽकुतोभय इत्यादिसमर्थस्याप्युपपन्नत्वात् ॥ तदिदमुक्तं मयूरव्यंसकादिवदित्यादिपदेन ॥ तस्माद्ब्रह्मवद्भावोब्रह्मभूयशब्दार्थ इत्यंगीकारे न कश्चिद्क्षुद्रोपद्रवः॥

॥ श्री० ॥ ननु तर्हि ब्रह्मभूयायेत्यस्य प्रकृतिविद्रनायेत्यर्थः स्यात्स चायुक्त इति चेन्नत्राह ॥ वत्यर्थश्चेति ॥ प्रियत्वमिति ॥ प्रियत्वमात्रं न तु तावत्प्रि [illegible]मित्यर्थः ॥ २६ ॥ इति वचनादिति ॥ नहि स्वयं स्वस्य प्रतिष्ठापक इति भावः ॥ ब्रह्मणो हीत्यस्य परब्रह्मण इत्यर्थः ॥ न च प्रतिष्ठापकत्वोक्तिविरोधः ॥ [illegible] चिन्मात्रत्वेन [illegible]चारितत्वादित्याशं कते ॥ उपचारोऽसाविति ॥ मुख्य इति ॥ मुख्यं प्रतिष्ठापकत्वमर्मीकृत्य ब्रह्मण इत्यस्यार्थांतरं संभवति सति उपचरितार्थोपादानायोगादित्यर्थः ॥ मायाशब्दार्थकथनव्याजेनाध्यायां त मांगलिकं पदं निबध्नाति ॥ प्रकृता महालक्ष्मीरिति ॥ मत्तब्रह्मशब्देन प्रकृतत्वये. महाब्रह्मपदेन पूर्वं प्रकृता महालक्ष्मीरत्र मायाशब्दाच्चेत्यर्थः ॥२७॥ इतियदुपतिवरगीताभाष्य टीकासुयुक्ताशयमतिव्यक्तिभिर्गीभिर्विवृण्वती ॥ [illegible] चतुर्दशोऽध्यायमनमध्यायं आप ॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासे न विरचितायां श्रीमद्गीताभाष्यटीकाविवृतौ भावदीपिकाख्यायां चतुर्दशोऽध्यायः ॥

वत्यर्थश्च प्रियत्वमिति तदुक्तमिति भावः ॥ २६ ॥ ब्रह्मणो हीत्येतत्परब्रह्मणो हीति व्याचक्षते॥तदसत् ॥प्रतिमाऽहमिति वचनात् ॥ उप चारोऽसाविति चेन् न ॥ मुख्ये संभवति तदुपादानायोगादितिभावेनाह ॥ ब्रह्मण इति ॥ मायेतिप्रकृतामहालक्ष्मीः ॥ २७ ॥ इति श्रीम

ब्रह्मणो मायाया॥२७॥इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये चतुर्दशोऽध्यायः ॥१४॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्यच ॥ २७ ॥

इतिश्रीमद्भगवद्गीतासूपनिषत्सु०गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४

दानंदतीर्थभगवत्पादाचार्यविरचितस्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां चतुर्दशोऽध्यायः ॥

॥ कृ०॥एवमुपेद्धातेन ब्रह्मभूयशब्दसमुदायार्थमुक्त्वा प्रकृतमाह॥व प्रत्यर्थेति.वत्ययो हि सादृश्यं तच्च तद्भिन्ने सति तद्गतधर्मवत्त्वम्॥प्रकृते च प्रियत्वमेव तद्गतधर्म इति तदुक्तमित्यर्थः॥ ॥२६॥मायाशब्दस्यानेकार्थत्वेऽपि प्रकृते महालक्ष्मीपरत्वमत्र प्रकरणादिति मन्तव्यम्॥२७॥प्रकृतेति॥इतिश्रीमत्सुमलाचार्यसूरिसूनुकृष्णाविरचितेप्रमेयदीपिकाप्रकाशेचतुर्दशोऽध्यायः

॥ श्री० ॥ श्रीरस्तु ॥ प्रणम्ययादवाचार्यगुरूणां पदपंकजे ॥ कुर्वे पंचदशाध्यायगीतां भावदीपिकाम् ॥१॥ वृत्तम् ॥ रिथ ति ॥ विज्ञानशब्दार्थमाह ॥ भगव [illegible] वेन [illegible] व्युत्पत्त्या विज्ञानशब्दो भगवन्महिमापर इति भावः ॥ ततः ॥ विष्णुपरोक्षज्ञानेन निष्पापानन्तरम् ॥ वाजिरूपश्च नेता च वाजिनी पु [illegible] उच्यते इति [illegible] वाजिरूपश्चेति ॥

॥ अध्यायप्रतिपाद्यमर्थमाह ॥ संसारेति ॥ संसरत्यनेनेति संसारः ॥ प्रकृत्यादिकं क्षेत्रम् ॥ पूर्वाध्याये संसारकारणानां गुणानामेव वृत्तं द र्शितम् ॥ अत्र पुनः समग्रं संसारस्वरूपं प्रदर्श्य तदत्ययेच्छामुत्पाद्य तत्साधनजिज्ञासुं प्रति प्रागुक्तं साधनं प्रपंचयति ॥ तत्प्रसंगात्कृत्स्नं किंकं भगवन्महिमानं च दर्शयत्यनेनाध्यायेनेत्यर्थः ॥ जगद्वृक्षस्योर्ध्वमूलत्वं घटयितुमूर्ध्वशब्दाभिधेयं तावदाह ॥ ऊर्ध्व इति ॥ कुतः ॥

संसारच्छेत्रे नमः ॥ ॐ ॥ संसारस्वरूपतदत्ययोपायविज्ञानान्यस्मिन्नध्याये दर्शयति ॥ ऊर्ध्वो विष्णुः ऊ

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

र्ध्वपवित्रो वाजिनीवस्वमृतमस्मि द्रविणं सवर्चसमिति हि श्रुतिः ॥

श्रौतप्रयोगादित्याह ॥ ऊर्ध्वेति ॥ आदौ तावदहमूर्ध्वेन विष्णुना पवित्रो निष्पापोऽस्मि ततो वाजिरूपश्च नेता च ॥ वाजिनीः सूर्यः ॥ तत्र वसतीति वाजिनीवसुः ॥ तेन वाजिनीवसुना विष्णुना अमृतं प्रारब्धकर्मनिर्मुक्तश्चास्मि ॥

॥ कु० ॥ ऊर्ध्वमूलमित्यादिना प्रकृत्यादिक्षेत्रस्यैवोक्तत्वादाह ॥ संसरत्यनेनेति ॥ [illegible] भावः ॥ तत्त्वमप्यनुपपत्तिरेव संसारकारणीभूतानां [illegible] ऊर्ध्वमूलमित्यादिना प्रदर्शनाभावादित्य त आह ॥ प्रकृत्यादिकमिति ॥ अतिप्रसंग [illegible] संग्राह्यमाह ॥ क्षेत्रमिति ॥ ननु पूर्वाध्याये क्षेत्रस्य तदत्ययोपायस्य चोक्तत्वात्पुनरुक्तिः ॥ अत्र [illegible] ऽध्यायैक्यं चेन स्यात् ॥ अनंतरसंगतिश्च कथमित्यत आह ॥ पूर्वाध्याय इति ॥ तथा च पूर्वाध्यायोक्तवचनान्न पुनरुक्तिः ॥ अत एवानंतरसंगतिश्च ॥ क्षेत्रोक्तिः [illegible] प्रा संगिकत्वात्मा [illegible] प्राधान्येन प्रतिपाद्यत्वमित्यध्यायैक्यं चोपपद्यत इति भावः ॥ विज्ञानपदार्थमाह ॥ अलौकिकं भगवन्माहात्म्यमिति ॥ निष्पाप इति ॥ संचितपापशून्य इत्य र्थः ॥ वाजिरूपश्च नेता च वाजिनीः सूर्य उच्यत इति प्रमाणानुसारेणाह ॥ वाजिरूपश्चेति ॥

१ एतेषां मते एवंपाठः ॥ श्रीनिवासतीर्थानामनेमहिमानमितिज्ञेयम ॥

॥ श्री० ॥ सूर्यांतर्गतं विष्णुं प्राप्य प्रारब्धकर्मनिर्मोक इत्यत्र श्रुतिमाह ॥ स तेजसीति ॥ स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवमेवायमात्मा पाप्मभिः कर्मभिर्विनिर्मुच्यत इति बृहदारण्यकवाक्यादित्यर्थः ॥ अन्यत्तु स्पष्टम् ॥ वैश्वानरे सनातने देहे वा सूर्ये परात्मा ॥ विधूय सर्वपापानि याति किल ब्रह्मकेशवमिति॥ धनम् ॥ अनर्घ्यभनरूप ॥ सुखम् ॥ सुखरूपः ॥ ननु वर्चसा सहितं सवर्चं इति स्यात् सवर्चसमिति कथमित्यत आह ॥ वर्चसशब्द इति ॥ समासांतो वेति ॥ सवर्चसशब्दात् समासांताच्प्रत्यये सवर्चसमित्यकारांता भवति ॥ ननु केवलात् वर्चशब्दात् कथं समासांतप्रत्ययः ॥ ब्रह्महस्तिभ्यां वर्चस इति सूत्रेण ब्रह्महस्तिशब्दाभ्यां परस्य वर्चसशब्दादकारप्रत्ययो विहितः ब्रह्मवर्चस इति प्रयोगदर्शनात् इत्यत उक्तं ब्रह्महस्तिभ्यां वर्चस इत्यत्र योगविभागादिति ॥ ब्रह्महस्तिभ्यामित्येकं वाक्यं वर्चस इत्यपरं वाक्यम् ॥ तथा च ब्रह्महस्तिभ्यां परेण तथा केवलवर्चसश्चाकारप्रत्ययो भवतीत्यर्थः ॥ ननु प्रयोगदर्शनायोर्ध्वपवित्र इत्येतावदेवोदाहर्तव्यं अर्वाचीनश्रुत्यादिश्रुतिविशेषोदाहरणं कस्मात्कृतमित्यत आह ॥ विष्णुप्रसंगेति ॥ उक्तरीत्या वाजिनीवसुशब्दस्य विष्णुपरत्वादिति भावः ॥ तस्य तत्र प्रवृत्ताविति ॥ ऊर्ध्वशब्दस्य विष्णौ प्रवृत्तावित्यर्थः ॥ उत्तमत्वम् कथमूर्ध्वशब्दात् तन्निमित्तमित्यत आह ॥ उन्नतो हीति ॥ उन्नतोत्तमशब्दयोः पर्यायत्वादुन्नतत्वमेवोत्तमत्वमित्यर्थः ॥

स तेजसि सूर्ये संपन्न इति श्रुतेः ॥ ततश्च तेनैव सवर्चसं सप्रभं अनुभूयमानमिति यावत् ॥ द्रविणं धनं सुखं चास्मीत्यर्थः ॥ वर्चसशब्दो कारांतोऽप्यस्ति ॥ ब्रह्महस्तिभ्यां वर्चस इत्यत्र योगविभागात्समासांतो वा ॥ विष्णुप्रसंगदर्शनाय श्रुतिशेषोदाहरणम् ॥ इदानीं तस्य तत्र प्रवृत्तौ निमित्तमाह ॥ ऊर्ध्व इति ॥ उन्नतो ह्यूर्ध्व उच्यते ॥

ऊर्ध्वः उत्तमः

॥ कृ० ॥ सूर्यस्थविष्णोः प्रारब्धकर्ममोचकत्वे प्रमाणमाह ॥ स तेजसीति ॥ ननु वर्चशब्दस्य समासांतत्वे सवर्च इति वक्तव्ये सवर्चसमिति कथमुक्तमित्यत आह ॥ वर्चसशब्द इति ॥ योगविभागादिति ॥ वर्चस इति योगविभागात् अस्य सवर्चसमित्यत्र समासांतोऽच् प्रत्यय इत्यर्थः ॥ उपलक्षणमेतत् ॥ अच्प्रत्ययान्तत्वेऽत्राजिति योगविभागादित्यपि ग्राह्यम् ॥ उत्तमत्वं कथमूर्ध्वशब्दप्रवृत्तिनिमित्तमित्यत आह ॥ उन्नत इति ॥ उन्नत उत्तम इति नानर्थांतरमिति भावः ॥

---

१ पदार्थे इयं श्रुतिरुपलक्षणं ते परमुत्क्रमणात्पापमनोऽविनिर्मुक्त इति पाठः ॥ तत्र प्राक् पादोदरस्थानं तेजोरूपमयं श्रेयस्करमपरोक्षीकृत्य प्राप्त इति ॥ तथा नेयं श्रुतिर्वाजिनीवसुमित्यत्रमस्येति भावः ॥ २ भागवततात्पर्यब्राह्म स्कं. ५ अ० २ श्लो. २० ॥ ३ शिशुमारस्वरूपम् ॥ ४ वर्चशब्दाद्द्रविणमित्यम ॥ ५ अर्थक्रम ॥

॥ श्री० ॥ अत इति ॥ उक्तत्वाद्यानमत्वरूप[illegible]शब्दमुख्यार्थानुपपत्तेभावादित्यर्थः ॥ ब्रह्मादिलोकेति ॥ विष्णोः सर्वैश्वर्यादिलक्षणोद्भवत्वेन विष्णौ उर्ध्वं लाक्षणिकमित्येवं ल- क्षणयैवोर्ध्वशब्दस्य विष्णौ वृत्तौ निमित्तमित्यर्थः ॥ सूक्ष्मत्वादीति॥ [illegible] विष्णौ सत्वात्तस्य तत्र प्रवृत्तौ गौणी वृत्तिरेव निमित्तमित्यर्थः ॥ तसः सार्वविभक्तिकत्वादाह ॥ सर्वैश्चेति ॥ भूतानां शाखात्वमुपपादयति ॥ तानि हीति॥शाखानां मूलापेक्षया ऽपकृष्टत्वदर्शनात् भूतानामपि मूलभूतविष्णुजडप्रकृतिगुणत्रयापेक्षया ऽ- पकृष्टत्वाद्युक्तं शाखात्वमिति भावः ॥ सुपिस्थ इति [illegible] निमित्ताभावे नैमित्तिकस्याप्यभा- व इतिन्यायेन [illegible] श्वसस्याऽडागमो- ते श्वसशब्दे [illegible] वर्णविकारश्च तथा परो वर्णविकार[illegible] शौ ॥ [illegible] पृषोदरमिति ॥ अत्र हसतीति हस इति [illegible] वर्णविपर्ययेण सिंहशब्द भवति ॥ गूढश्चासावात्मा च गूढात्मेति [illegible] पश्चात् गुणेन सति [illegible] तकाररूपवर्णेना- शे पश्चाद्गुणे पृषोदरमिति[illegible] ॥ महारोतीति मयूर इत्यत्र [illegible] गूढात्मेत्यत्रैव सकारस्य तकारत्वेन विपरिणामरूपवर्णविकारे पृषोदरमित्यत्रैव धातुसकारस्य नाश इत्यवधेयम ॥

अतो ब्रह्मादिलोकस्थत्वादिलक्षणो सूक्ष्मत्वादिगुणयोगो वा नाश्रयणीयः ॥ सर्वतः सर्वस्मात्प्रपंचात् ॥ सर्वैश्च गुणैः ॥ अधःशाखमित्ये- तद्घटयन्नधःशब्दार्थनावदाह॥ अध इति॥शाखाः का इत्यत आह॥शाखा इति॥तानि हि मूलापेक्षयाऽपकृष्टानि ॥ननु वृक्षमात्रस्यसारूप्यम

सर्वतः ॥ अधो निकृष्टं शाखा भूतानि ॥ श्वोऽप्येकप्रकारेण न तिष्ठतीत्यश्वत्थः ॥

भिदधता कथमश्वत्थत्वमस्योच्यत इत्यत आह॥श्वोऽपीति॥सुपिस्थ इति कः॥श्वसः सकारस्य तकारो धातुसकारस्यलोपश्च निरुक्तत्वात् ॥

॥ क० ॥ अत इति ॥ मुख्यार्थेऽनुपपत्त्यभावादिति भावः ॥ ब्रह्मादिलोकस्थत्वादिति ॥ [illegible] निमित्तेन ब्रह्मादिलोकार्थो य उर्ध्वशब्दस्तेन तस्याविष्णुलक्षणेत्यर्थः ॥ द्वितीया- दिपदेन तदाश्रयत्वं ग्राह्यम ॥ सूक्ष्मत्वादीति ॥ सूक्ष्मत्वादिगुणेन [illegible] विष्णौ गौणी त्यर्थः ॥ वृक्षमात्रसाम्यमिति ॥ पृथङ्मूलं हरिस्तस्य जगद्वृ- क्षस्य भूमिवदिति नारायणश्रुतौ वृक्षमात्रमेवोक्तमिति भावः ॥ सुपिस्थ इति क इति ॥ सुपिस्थ इत्यत्र [illegible] योगविभागात्कः [illegible] लोपश्चेति भावः ॥

१ ब्रह्मणः आदिलोकः प्रथमस्थानम् ॥ तपसोऽतल्लोकत्वादिति भावः ॥ २ [illegible] आदिपदग्राह्यं मूलाननुगुणत्वं [illegible] ॥ ३ [illegible] ॥

॥ श्री० ॥ किमुतेति ॥ श्वोऽपि यदा न तिष्ठति तदा कालांतरे पश्चादौ न तिष्ठतीति किमु वक्तव्यमित्यर्थः ॥ ननु श्वोऽपीत्युक्त्वा तत्र स्थास्यतीति वक्तव्यं तिष्ठतीति कथमुक्तमित्यत आह ॥ लुडर्थ इति ॥ स्थास्यतीति भविष्यदर्थ इत्यर्थः ॥ अनादरो गर्हा ॥ लट् ॥ वर्तमानार्थे लट्प्रयोगः ॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्विति सूत्रादपिशब्दस्यानवगर्हार्थस्याभावगर्हायां लडपि जात्वोः ॥ गर्हायां च वर्तमानयोरपि ज त्वोर्योगे वर्तमाने लट् भवतीत्युक्तत्वेन प्रकृते श्वोऽपीति गर्हार्थे प्रापिशब्दयोगेन तिष्ठतीति वर्तमानार्थे लट्प्रयोगो युक्त इत्यर्थः ॥ वर्तमानातीतयोरिति ॥ तथा च वर्तमानातीतयोः पूर्वेद्युरित्यर्थः ॥ नन्वेवं कालत्रयविवक्षायामपि अद्यश्वः पूर्वेद्युर्न तिष्ठतीति लट्प्रयोगः पुनरप्ययुक्त इत्यत आह ॥ ततः क्रियाप्रबंध इति ॥ क्रियासातत्य इत्यर्थः ॥ तथा च न तिष्ठतीत्यस्य कालत्रयेऽप्यवस्थानं नेत्यर्थः संपद्यत इति द्रष्टव्यम् ॥ ननु वर्तमाने लडित्येव विहितत्वात् क्रियाप्रबंधे लट् कुतो विहित इति चेदुच्यते ॥ पर्वताः तिष्ठंतीत्यादिप्रयोगासिद्ध्यर्थं नित्यप्रवृत्ते चेति सूत्रेण नित्यं वर्तनाक्रियायां विवक्षितायां सत्यां लटो विधानादिति ज्ञेयं ॥ नहीति ॥ एकप्रकारेणानवस्थानरूपा स्वस्थता स्वेऽस्थ इत्यर्थः ॥ गायत्र्युष्णिगादिछंदसां मोक्षादिफलकारणत्वाभावादाह ॥ छंदसां वेदानामिति ॥

स्वस्थाता स्वस्थः ॥ स्वस्थो न भवतीत्यस्वस्थः किमुत कालांतर इत्यपिशब्दः ॥ ननु पदार्थानां बहुकालस्थायित्वदर्शनात्कथमेतदित्यत उक्तम् ॥ एकेति ॥ तिष्ठतीति लुडर्थेऽनादरसूचनाय लट् ॥ अथवाऽपिशब्देन वर्तमानातीतयोः समुच्चयः ॥ ततः क्रियाप्रबंधे लट् ॥ तर्ह्यव्यय

तथाऽपि न प्रवाहव्ययः॥पूर्वब्रह्मकाले यथास्थितिः॥तथा सर्वत्रापीत्यव्ययता॥फलकारणत्वाच्छंदसां पर्णत्वम्

मिति व्याघात इत्यत आह ॥ तथाऽपीति ॥ विकारित्वेऽपि ॥ एतदपि नास्ति ॥ जगत्प्रवाहस्य प्रलये व्ययादित्यत आह ॥ पूर्वेति ॥ छंदसां पर्णत्वं घटयति ॥ फलेति ॥ फलकारित्वसाहश्यादित्यर्थः ॥ तत्र फलं मोक्षादिकम् ॥ छंदसां वेदानाम् ॥

॥ कृ० ॥ श्वस्तनकालस्यानद्यतनभविष्यत्कालत्वात्तत्र चानद्यतने लुडिति लुड्विधानात्कथं श्वस्तिष्ठतीति विग्रहप्रदर्शनमित्यतो लुड्विधानानुसारेण विग्रहमाह ॥ श्वस्तनेति ॥ एवं तर्हि तिष्ठतीति लट्प्रयोगः किमर्थमित्यत आह ॥ तिष्ठतीति लुडर्थ इति ॥ अहन्यतत्पूर्वोत्तरार्धरात्रद्वयं वर्तमानोऽद्यतनः कालः तद्भिन्नभविष्यत्कालो लुडर्थस्तस्मिन्नित्यर्थः अनादरोऽतात्पर्यम् ॥ लुटि प्रयुक्ते श्वस्तनकाले तात्पर्यं ज्ञायते तथा च भविष्यत्काल एवैकप्रकारत्वाभावो न वर्तमानातीतयोरित्यापद्येत ॥ अतो लट् प्रयुक्तः तेन च श्वस्तिष्ठतीत्यनयोर्व्याघातादाप्तवाक्यस्य चाप्रामाण्यायोगात् ॥ श्वस्तनकाले वक्तुस्तात्पर्याभावो ज्ञायत इति भावः ॥ ननु श्वस्तिष्ठतीत्युक्त्वाच्छन्दर्थ तात्पर्यमिति किं न स्यान्नियामकाभावादित्यत आह ॥ अथवेति क्रियाप्रबंध इति ॥ क्रियासातत्ये लडित्यर्थः ॥ ननु फलकारणत्वलिंगेन पर्णत्वानुमानं व्याप्त्यादित्यत आह ॥ फलेति ॥ अभिलाषप्राप्त्यादिफलकारणत्वं छंदसां कथमित्यत आह ॥ अत्र फलं मोक्षादिकमिति ॥ आदिपदेन कामग्रहणम् ॥ काममोक्षफले ज्ञान इति तात्पर्यार्थः ॥ गायत्र्यादिछंदसां मोक्षादिफलकारणत्वाभावादाह ॥ वेदानामिति ॥१ ॥

॥ श्री० ॥ पत्रेभ्यो हि फलं जायत इति श्रुत्यनुसारादाह ॥ हि [illegible] ॥ [illegible] ॥ कारणगुणाः कार्ये [illegible] ॥ [illegible] भावः ॥ कारणइति ॥ कारणे पुष्टि नं कार्यमिति वचनादिति भावः ॥ प्रकर्षेति ॥ [illegible] इत्यर्थः ॥ स्यादिदं यदि गुणानाम [illegible] मूलत्वं स्यादित्यत आह ॥ सत्वादयश्चेति ॥ [illegible] इति भावः ॥ अत्र वृक्षसदृश [illegible] त्रिगुणत्रयात्म कत्वात्पृथग्ग्रहणमयुक्तं [illegible] निरस्तम् ॥

स्यादिदं यदि पर्णानां फलकारणत्वं स्यात्तदेव कुतः ॥ अन्वयव्यतिरेकाभ्यामित्याह ॥न हीति ॥ किं तु जात एवेत्यन्वयोऽपिवाच्यः ॥१॥

अधश्चेत्येतद्व्यनक्ति ॥ अव्यक्तेऽपीति ॥ अनेन तस्य शाखा भूतान्यधश्च स्वापेक्षयाऽपकृष्टे शरीरादौ कार्ये चोर्ध्वं च उत्तमे कारणेऽव्यक्ते च प्रसृताः ॥ सूक्ष्मरूपेण संतीति व्याख्यानं भवति ॥ प्रसृता [illegible] ॥ अधः पातालादावूर्ध्वं स्वर्गादावित्यादिव्याख्याने प्र

न हि कदाचिदप्यजाते पर्णे फलोत्पत्तिः ॥ १ ॥ अव्यक्तेपि सूक्ष्मरूपेण संति शरीरादौ च भूतानीत्यधश्चो

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ॥२॥

र्ध्वं च प्रसृताः ॥ गुणैः सत्वादिभिः ॥

कृतप्रक्रिये प्रसज्येत ॥ गुणशब्दस्यानेकार्थत्वात् गुणप्रवृद्धा इत्यत्र विवक्षितमर्थमाह ॥ गुणैरिति ॥ अर्वाचीनमूलैर्हि शाखाः प्रवृद्धा भवं

ति ॥ सत्वादयश्चार्वाचीनमूलानीति वक्ष्यंते (वक्ष्यति)

॥ कृ० ॥ इत्यादि व्याख्यान इति ॥ [illegible] इति व्याख्यानमादिपदेन ग्राह्यम् ॥ प्रकृतेति ॥ ऊर्ध्वमूलमधःशाखमित्येतत्परेण व्याख्यातम् ॥ ऊर्ध्वं ब्रह्म तन्मूलमस्येत्यूर्ध्वमूलम् ॥ [illegible] ॥ [illegible] ॥ तथा [illegible] प्रकृतत्वात् [illegible] ॥ अर्वाचीनेति ॥ [illegible] ॥ [illegible] इति भावः ॥

॥ श्री० ॥ विमर्दनेति ॥ [illegible] ॥ प्रक्रमेति [illegible] ॥

प्रकृतिः समूलमितिप्रमाणानुसारेण [illegible] ॥ आदिपदेनेति [illegible] ॥

त्यत आह ॥ तेषामपीति ॥ कथमिति ॥ [illegible] ॥ चरमभावीति [illegible] ॥

म ॥ कर्मणिकृतेप्रयत्नो [illegible] ॥ कर्मानुबंधेन ॥ [illegible] ॥

विषयाणां प्रवालत्वं घटयति ॥ प्रतीतिमात्रेति ॥ प्रतीतिसमयमात्र[illegible]त्वादित्यर्थः ॥ विमर्दनासहत्वसाम्यादिति भावः ॥ विषया प्रवाला इति संबंधः ॥ अथश्च मूलानीत्यत्र रागद्वेषादिवासनामूलानीति व्याख्यानमस्तु ॥ प्रक्रमविरोधादिति भावेनाह ॥ मूलानीति ॥ आदिपदेन जडाजडप्रकृत्योः सत्त्वादीनां च ग्रहणम्। तेषामप्युपमूलमित्यत्र विवक्षितत्वात्॥ ननु भगवतः कथं कर्मानुबंधित्वमित्यत आह॥

प्रतीतिमात्रसुखत्वात्प्रवालाः विषयाः ॥ मूलानि भगवद्रूपाणीति ॥ भगवानपि कर्मानुबंधेन हि फलं ददाति ॥

भगवानपीति ॥ अत्र कर्मानुबंधित्वं नाम कर्मानुसारित्वम्॥ तच्च कर्मसंबंधेन फलदातृत्वाद्भगवतोऽपियुक्तमित्यर्थः ॥ यद्वा कर्मैवानुबंधश्च रमभाविकारणं कर्मानुबंधस्तद्वत्त्वं कर्मानुबंधित्वम् ॥ तदपि कर्मानुबंधेन फलदातृत्वाद्भगवतो युज्यतइति ॥

॥ कृ० ॥ व्यावर्त्यकथनपूर्वकम् मात्रपदाभिप्रायमाह ॥ विमर्दनेति ॥ [illegible] ॥ ननु विषयानुद्दिश्य प्रवालत्वस्य [illegible] कथं प्रवाला विषया इति निर्देश इत्यत आह ॥ विषया इति ॥ रागद्वेषादीति ॥ [illegible] ॥ प्रक्रमेति ॥ [illegible] ब्रह्म तन्मूलमस्येति पेण व्याख्यातत्वादिति भावः ॥ [illegible] आह ॥ तेषामपीति ॥ [illegible] इति भावः ॥ कथं कर्मानुबंधित्वमिति॥ [illegible] आह॥यद्वेति॥ चरमभावीति ॥ कर्मणिकृते प्रयत्नोऽप्यवश्यं भावीति [illegible] बोध्यम्।

१ वेदाप्रामाण्यपरिहारभूतश्चासौविषम्यादिदोषश्चेतिविग्रहः ॥ [illegible] भावः ॥ २ रागद्वेषव्यतिरिक्तं [illegible] त्याद्यवांतरकारणंचराजपित्राज्ञादिकंतस्यसंग्रहायेत्यर्थः॥ ॥

॥ श्री० ॥ वृक्षानंतर्गतमिति ॥ वृक्षस्वरूपानंतर्गतमुक्तभूमिगमित्यर्थः ॥ सहभूताम् ॥ बीजवत् ॥ समग्रवृक्षस्वरूपानर्गतं ॥ पादाख्य ॥ प्रतानमुपचंद्र पुरमुपगतनत्यंतम् अमित्यर्थः ॥ देवादिशब्देनत्वच्छरीराणिविवक्षितानीत्याह ॥ देवादीनि ॥ उपशाखाइति ॥ शाखासंबन्धिन्य शाखाउपशाखाःदेवादिशरीराणिनशाखाभूतपंचमहाभूतविकारत्वेननतस्मर्वाचीनत्वादुपशाखाइत्यर्थः ॥ भूतसूक्ष्माणि ॥ शब्दादीनि ॥ मोक्षामोक्षशब्दाभ्यांपुनरुक्तिपरिहारायमुक्त्यमुक्तिशब्दविवक्षितमर्थमाह ॥ मुक्त्यमुक्तिशब्दाभ्यामिति ॥ मुक्तशब्देनेतिमुक्त्याख्यमोक्षरूपपुरुषार्थसाधनंज्ञानंमुक्तिशब्देनविवक्षितम ॥ तथाऽमुक्तिर्मुक्तीतरपुरुषार्थोयेनप्राप्यते तत्कामंकर्मामुक्तिशब्देनविवक्षितमित्यर्थः ॥

श्लोकद्वयार्थे श्रुतिसंमतिं चाह॥तथा चेति॥अस्य जगद्वृक्षस्यपृथग्वृक्षानंतर्गतम्‌सहभूतं मूलं समूलं अर्वाचीनमूलं भूम्यंतर्गतपादाख्यं छंदांसी त्यस्योपपादनम् ॥ पत्रेभ्यो हीति ॥ देवादिशरीराणि चोपशाखाः॥मात्राः भूतसूक्ष्माणि॥शिफाः जटाः ॥मुक्त्यमुक्तिशब्दाभ्यां मोक्षतदितरपु

तथा च भाल्लवेयशाखायाम् ॥ ब्रह्मवाऽस्य पृथङ्मूलं प्रकृतिः समूलं सत्त्वादयोऽर्वाचीनमूलम् ॥ भूतानि शाखा छंदांसि पर्णानि देवा नृतिर्यञ्चश्च शाखाः ॥ पत्रेभ्योहि फलं जायते ॥ मात्राः ॥ शिफाः ॥ मुक्तिः फलं अमुक्तिः फलं ॥

रुषार्थसाधने ज्ञानकर्मणी उच्येते ॥ फलमवांतरम ॥

॥ कु० ॥ पृषोदरादित्वात्पृथक्शब्दस्य समास इति भावेन समूलमित्येतद्व्याचष्टे॥सहभूतं मूलमिति॥प्रकृतिर्द्विविधा॥स्थूलप्रकृतिः सूक्ष्मप्रकृतिश्चेति ॥ तत्र भूमौ बीजे उप्ते सति प्रसिद्धवृक्षं प्रति भूमिवत् ॥ जगद्वृक्षं प्रतिमूलप्रकृतिनामिका स्थूलप्रकृतिरुपादानम ॥ पृथक्शब्देनतेनैवोक्तं तत् ॥ सत्त्वादिगुणोपादानभूता सूक्ष्मप्रकृतिस्तु प्रसिद्धवृक्षं बीजवदुपादानम् ॥ एवं स्थूलसूक्ष्मप्रकृतिद्वयं जगद्वृक्षस्य सहभूतम्॥इतीति यथ. ॥ ननु सत्प्रकृतेर्यतस्या सूक्ष्मप्रकृतिरर्वाचीना अतः समूलमित्येतेनैवार्वाचीनमूलमित्यस्य गतत्वात् तस्याऽर्वाचीनमूलमिति पुनरुक्तिरित्यत आह ॥ भूम्यंतर्गतेति ॥ बीजादिवत्तत्त्वतो पादाख्यमित्यर्थः ॥ सूक्ष्मं अर्वाचीनमकार्यत्वमर्वाचीनत्वं कार्यत्वमित्यर्थः ॥ सत्त्वादिगुणा द्विविधाः अकार्याः कार्याश्चेति ॥ तत्राद्याः कारणात्मनाऽवस्थिताः सत्त्वादयः तेषांसूक्ष्मप्रकृतिरूपाणां बीजवज्जगद्वृक्षोपादानत्वं प्रागुक्तम॥अन्यानां तु प्रसिद्धवृक्षे भूम्यंतर्गतमूलवत्तानीनमूलत्वमतोऽर्वाचीनं ऽतो न पुनरुक्तिरिति भावः॥ननु श्रीमद्भिःतन्मात्राः विषयास्तेषां मात्राः शिफा इति कथमुक्तिरित्यत्राह ॥ मात्राः भूतसूक्ष्माणीति ॥ भूतोपादानरूपाः पंचतन्मात्रा इत्यर्थः ॥द्विविधाः शब्दादयः भूतोपादानभूताः भोग्याश्चेति तत्राद्यानां शिफात्वमत्रोच्यते॥भूतरूपशाखान्तर्भावात्॥अंत्यानां तु तत्रैव विवक्षितमिति नानुपपत्तिरितिभावः॥ ॥३६०॥

॥ श्री० ॥ पुरुषार्थाविति ॥ मोक्षस्वर्गाख्याविव्यर्थः ॥ श्रेष्ठमिति ॥ रसःसारोऽग्रश्रेतिशब्दाःपर्यायवाचकाइतिवचनादित्याशय. ॥ अधश्चोर्ध्वंचप्रसृतास्तस्यशाखाइत्यत्रप्रमाणमुच्यतेश्रुतौअव्यक्तेचशाखाव्यक्तेचशाखा इति ॥ शाखाःभूतानिऊर्ध्वशब्दाभिधेयमहभूतमूलेऽव्यक्तेषमंति ॥ कारणेषुकार्यस्यसत्वात ॥ तथाव्यक्तेस्वापेक्षयापकृष्टेशरीरादौचसंतिकार्येषुकारणस्यसत्वात॥ अधश्चमूलान्यनुसंततानीत्यत्रप्रमाणमुच्यतेऽव्यक्तेचमूलंव्यक्तेचमूलमिति ॥ मूलंअर्वाचीनमुत्कृष्टं वा इदंपरंब्रह्मवाव्यक्तेवर्ततेइदंगीतानुक्तमव्यक्ते शाखाभूतभूतादौतत्कार्यशरीरादौचभगवद्रूपं जडाजडप्रकृतिरूपंसत्वादर्वाचीनरूपंचमूलंवर्ततइत्यर्थः ॥ २ ॥ प्रमाणबाधइति ॥ जगद्रूपस्यप्रत्यक्षेणोपलभ्यमानत्वादित्यर्थः ॥ तत्सापेक्षमिति ॥ तथत्येतद्यथाशब्दसापेक्षमित्यर्थः ॥ यथास्थितस्तथाकुतोनोपलभ्यतइत्यतआह ॥ विकारित्वादिनेति ॥ आदिपदेननाशांग्राह्य ॥

मोक्षामोक्षशब्दाभ्यां तु पुरुषार्थाविव रसः श्रेष्ठं फलम् ॥ गुणाः॥विषयाः ॥ अलोलपत्राणि प्रवालपर्णानि यस्यासौ तथोक्तः ॥ न स्थीयत इत्यनेनाश्वत्थशब्दार्थकथनम् ॥ तर्हि क्षणिकः॥ न॥स्थीयते प्रवाहव्ययो नास्तीत्यर्थः ॥ तस्योपपादनम् ॥ न हीति ॥ द्विरुक्तिस्तात्पर्यार्था

मोक्षो रसोऽमोक्षो रसः॥अव्यक्ते च शाखाः व्यक्तेचशाखाअव्यक्तेच मूलं व्यक्ते च मूलं एषोऽश्वत्थोगुणालोलपत्रोन स्थी

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ॥ ३ ॥

यतेननस्थीयते न ह्येष कदाचनान्यथा जायतेनान्यथा जायत इति॥२॥यथास्थितस्तथा नोपलभ्यते॥अंतादिर्विष्णुः ॥

॥ २ ॥ अस्य रूपं नोपलभ्यत इत्युक्ते प्रमाणबाधः ॥ अत उक्तम् ॥ तथेति ॥ तत्सापेक्षमित्यतः पृच्छति ॥ यथेति ॥ विकारित्वादिनेत्यर्थः ॥ जगतो देशकालाभ्यांपरिच्छेदस्योपलभ्यमानत्वान्नांत इत्याद्युक्तमयुक्तमित्यत आह ॥ अंतादिरिति ॥

॥क०॥२॥प्रमाणबाध इति॥वटादिरूपजगद्वृक्षस्योपलब्धेरितिभावः॥अत उक्तमिति॥गीतायामिति शेषः॥यथाशब्दपरामृश्यं दर्शयति॥विकारित्वादिनेति॥ आदिपदेन नाशित्वग्रहः॥

॥ श्री० ॥ संहर्तृत्वादेरिति ॥ [illegible] ॥ [illegible] अथर्वेति ॥ [illegible] ॥ [illegible] ॥ दध्योदनादिवदिति ॥ [illegible] ध्योदनादिवदित्यर्थः ॥ कुतो ॥ [illegible] प्रतीताथ [illegible] कारणत्वोक्तेरिति ॥ सबीजमुद्धृत्येति ॥ [illegible] सबीजम [illegible] ॥ [illegible] ॥

संहर्तृत्वादेरिति शेषः ॥ अत [illegible] ॥ [illegible] ॥ [illegible] कुतो ॥ तस्यानुपलभ्यमानत्वे प्रमाणमाह ॥ अनादीति ॥ आद्यंतरहितम् ॥ असंग एव शस्त्रमिति व्याख्यानस्य [illegible] ॥ [illegible] ॥ असंगः संगरहितं तेन सहितं ज्ञानमसंगशस्त्रम् ॥दध्योदनादि

त्वेमादिरंतो जगतोऽस्य मध्यमिति भागवते ॥ अनाद्यंतं परं ब्रह्म न देवा ऋषयो विदुरिति च मोक्षधर्मे ॥असंग शस्त्रेण संगराहित्यसहितेन ज्ञानेन ; ज्ञानासिनोपासनया छित्वेति भागवते ॥ छेदश्च विमर्श एव ॥

वत् ॥ कुतो साहित्यस्यांतर्भावादप्रयोग इति भावः ॥ प्रतीताथः कुतो [illegible] ज्ञानस्यैव तत्र कारणत्वोक्तेरित्याह ॥ ज्ञानेति ॥ छित्वेत स्य सबीजमुद्धृत्येति व्याख्यानमस्मदिति भावेनाह ॥ छेदश्चेति ॥ चस्त्वर्थः ॥ विमर्शो विवेक ॥

॥ कृ० ॥ ननु निर्गो भगवान्नादिरूपस्य कथमित्यत आह ॥ [illegible] नाहित्योगाद [illegible] सहितत्वप्रयोग स्यादित्यत आह ॥ दध्योदनादिवदिति ॥ आदिपदेन गुड [illegible] ॥ [illegible] भावकार्याः [illegible] सप्तमी गार्गेदप्तस्या भा [illegible] तद्वाचकश ब्दाप्रयोग. ॥ तथा प्रकृतेऽपि सर्वे [illegible] न परं [illegible] समासित्वस्याहित्या न च मुक्तिरेवः ॥ तस्यग जपुरुष इत्यादौ सत्र [illegible] ॥ ३ ॥

१. [illegible] ८ अ० ६ श्लो० ९. [illegible] अ० ४८ [illegible] संदेहइति आशयस्तदावतरण त् ज्ञायतइतिज्ञेयम्

॥ श्री० ॥ तस्यैकस्यैवेति ॥ येन विमर्शः कारस्यैवेत्यर्थः ॥ छेदं ॥ सर्वाने द्धारे ॥ तथा [illegible] ॥ निःशेषपुरंकार्यत्वादिनेत्यत्रादिनानादाग्रहणं ॥ ननु कारणापेक्षायामपि उपादानभूतंप्र
कृत्यायेत्कारणमस्तित्यत उक्तं चेतनेति ॥ निमित्तभूतेति ॥ [illegible] ॥ ननु पदामहत्त्वादिनाहंकारत यदिकंजायतेतदान
इनिष्ठात् [illegible] ॥ विमर्श एव छेद इत्यर्थः ॥
अतइत्यादि ॥ यतो विमर्श एव छेदो [illegible] आह विश्वेति ॥
व्याख्यानांतरपरित्यागेनैवं व्याख्याने को हेतुरित्यत आह ॥ ततश्चेति ॥ यतोविमर्श एव प्रकृत्यादेर्विश्वस्य छेदो न सर्वथोद्धारणम् ॥ तत एव तस्यैकस्यैवेदमबंधकं भवतीति युज्यते ॥ अन्यथैकेनछेदे कृते सर्वमुक्तिः स्यादिति भावः ॥ इतश्चायमेव छेद इत्याह ॥ तथाहीति ॥ अत्र ह्यश्वत्थमेनं छित्वा ततः परं तत्परिमार्गितव्यमिति विश्वछेदस्य ब्रह्मप्रतीतावनुपायत्वमुच्यते ॥ तथा हि ॥ विश्वस्य कार्यत्वादिना विमर्शे सति कार्यस्य कारणापेक्षत्वात् चेतनानधिष्ठितादुपादानादुत्पत्त्यसंभवात्परंपराणां मुख्यतोऽधिष्ठातृत्वायोगान्मूलस्थमुपादानकारणाधिष्ठा

ततश्च तस्यैवाबंधकं भवति ॥ तथा हि मूलस्थं ब्रह्म प्रतीयते ॥ तद्योक्तम् ॥ तच्छ्रुतावेव ॥ विमर्शो ह्य

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तंति भूयः॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

स्य छेदः ॥ स तत्र बध्नाति बध्नाति चान्यानिति ॥ ३ ॥ तदर्थं च तमेव

तृ ब्रह्म प्रतीयते न विश्वविनाशे ॥ अतो योऽयमवशाद्विमर्श एव छेदो न विनाश इति गम्यत इत्यर्थः ॥ विश्वमिथ्यात्वज्ञानमेव छेद इति चेत् न ॥ अस्य मिथ्याज्ञानत्वात् श्रुतिनिर्वादाच्चेत्यमेवेत्याह ॥ तच्चेति ॥ तेव प्रपद्ये येव प्रपद्येति तच्छ्रुतावेव ॥ अतस्तं छेदकत्वेन ॥ ३ ॥ वाक्यार्थस्यसमाप्तत्वात्तमेव चाद्यमिति व्यर्थमित्यतः संगतिं सूचयन्नाह ॥ तदर्थं चेति ॥ विमर्शोर्थंच ॥ विश्वविमर्शाद्ब्रह्मज्ञानं भवतु स विमर्श एव कथं स्यादित्याकांक्षां तदर्थमित्यनेन सूचयति ॥

॥ श्री० ॥ विधेय इति॥यमेत्यादिवत् लिङादिप्रत्ययेन विधेय इत्यर्थः॥इतिवचनम्॥उत्तमपुरुषवचनम्॥व्यत्यय इति॥विधायकत्वलाभाय लिङात्मनेपदिनः प्रथमपुरुषत्वे व्यत्यय इत्यर्थः॥

तर्हि चिच्छिदिषुं प्रति तदुपायो विधेयो न तु प्रपद्य इतिवचनं संगतमित्यतो व्यत्ययो बहुलमिति वचनमाश्रित्याह ॥ प्रपद्येतेति ॥

प्रपद्ये ॥ प्रपद्येत ॥ तच्चोक्तम् ॥ तत्रैव ॥ तं वै प्रपद्येत यं वै प्रपद्य न शोचति न हृष्यति न जायते न म्रियते तद्ब्रह्म मूलं तच्छित्सुरिति ॥

कुतो व्यत्यय इत्यतः श्रुतिस्मृतिसंवादादित्याह ॥ तच्चेति ॥ तद्विश्वं छित्सुः ॥

॥ कृ० ॥ चिच्छिदिषुरिति॥[illegible] मन [illegible] इति ध्येयम् ॥ ननु छिदेरनुदात्तत्वेनैकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधात् कथंचिच्छिदिषुमित्युक्तम्॥ अत्राहुः ॥ सूत्रे अनुदात्तादित्यस्योपदेश इति [illegible] ॥ अन्यथा कर्तुमित्यादावार्धधातुकस्य [illegible] प्रसंगात् ॥ नित्स्वरेण सप्रत्ययदात्तत्वात् ॥ नत्वेकाच इत्यस्य ॥ अतः श्रूयमाणैकाच इति पर्य वस्यति ॥ प्रकृते च सन्नन्तस्य छिदेः श्रूयमाणैकाच्त्वाभावेनेट्प्रतिषेधाभावाच्चिच्छिदिषुमिति युक्तमिति तदपरं न क्षमते॥ एकाच इत्यस्याप्युपदेश इत्यस्यावश्यकत्वात् ॥ अन्यथा निभित्सति पिपक्षतीत्यादावित्प्रतिषेधायोगात् [illegible] ॥ तस्य [illegible] क्विप्तः [illegible] क्विबाचार इत्याचारे क्विप् ॥ एवं चाचारक्विबन्तस्य धात्वंतर त्वाल्लक्षणप्रतिपदोक्तपरिभाषया नोक्तसूत्रेणेण्निषेधः ॥ अतश्चिच्छिदिषुमिति युक्तम् ॥ [illegible] ॥ छिदिशक्यार्थद्वैधीकरणमात्रत्वेनविमर्शरूपार्थलाभात् ॥ अ न्यथा तदलाभादित्याहुः ॥ तन्न ॥ [illegible] तदनुसरणमित्यस्याप्ययोगाच्च ॥ चि च्छिदिषु [illegible] ॥ वयं न भ्रमः ॥ अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ॥शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु इत्यत्र भर्तृहरिणा ये स्वतंत्राः प्रसिद्धार्थाः ॥ ये च [illegible] निराकाङ्क्षत्वादित्युक्तम् ॥ ततश्च पाणिन्यादिभि श्छिदेर्यदनुदात्तत्वमुक्तम् [illegible] ॥ न तु विमर्शार्थस्य [illegible] ॥ अत एव शब्देषु न तदुक्तिष्वित्यनेन तत्सदृशशब्दे पु शास्त्रार्थो न कर्तव्य इत्युक्तम् ॥ एवं च विमर्शार्थच्छिदेरि[illegible] उपदेशेऽनुदात्तादित्यनेन नेण्निषेधः ॥ ततः चिच्छिदिषुमिति युक्तमुक्तम् ॥श्लोके अनर्थकं संदिग्धार्थकं अप्रयुक्तं च क्रमेण विशेषणत्रयार्थं तदुक्तिषु तत्सदृशेष्वित्यर्थः ॥ अत एव सिमीते माता तस्याः स्वसा मातृष्वसा इत्यत्र मातृपितृभ्यां स्वसेति षत्वं नेति दिक् ॥ ननु प्र तिपदोक्तेष्वेवाभिव्यक्तपदार्था इति न्यायप्रवृत्तिरिति चेत् ॥ उच्यते॥ यथा [illegible] नानुदात्तत्वमुक्तन्यायात् ॥ ईयांस्तु विशेषः ॥ सर्वनामत्वे सूत्रोक्तमनुदात्तत्वं तु व्याख्याकारोक्तमिति ॥ ततश्च सर्वादीत्यादिसंज्ञाशब्दे सर्वनाम्नः स्मै इत्यादिकार्याभाववद्विमर्शार्थच्छिदावपि एकाच उपदेश इत्युक्तकार्याभाव इति न कश्चिद्दोषः॥

॥ श्री० ॥ ननु छिद् द्वैधीकरणेऽस्मात् सन्प्रत्यये नकारलोपे छिद् स इति जाते सनाशंसभिक्षउरिति सन्नंतत्वादुप्रत्यये छिद् स उ इत्यत्र सन्यङोरिति सनि परेऽभ्यासरूपे द्वित्वे छिद् छिद् इति जाते हलादिशेषे छिछिद् इति जाते अभ्यस्तछकारस्य अभ्यासे चर्चेति चर्त्वे चिछिद् इति जाते छिदः सेड्धातुत्वेनेडागमे इस उ इति जाते सस्य षत्वे चिछिदिषुरिति प्रातिपदिके जाते पश्चात्स्वाद्युत्पत्तौ चिछिदिषुरिति भवेत् छित्सुरिति कथमत आह ॥ **अभ्यासलोप इडभावश्छांदस इति** ॥ अत्र चकारःपरस्परसमुच्चायकोऽनुक्तस्य सस्य षत्वाभावस्य दस्य तत्वस्य च समुच्चायकः ॥तथाच छिद्अस्मात्सनि उप्रत्यये निर्वचनत्वादस्य तत्वे चछित् स उ छित्स इतिप्रातिपदिकनिष्पत्तौ सत्यां पश्चात्स्वाद्युत्पत्तौछित्सुरिति भवतीत्यर्थः ॥ अत्र तप्रक्षिद्वत्वाविपिस्वपूलिप्तुपस्नृप्याति ॥ सृपृलप्स्वपश्रुक्षिप स्कंदिहदिस्यादिछिदिभिदः ॥ इस हलंतेष्वनिट इत्यनिड्धातुसंग्रह इतिवचनेन छिदेरपि दकारस्य हलंतत्वेन हलंततयाऽनिट्त्वे नानिड्धातुमध्ये पाठात् कथमिडभावश्छांदस इत्युक्तमितिशंकायाः समाधानं विचार्यमस्तीति केचिदाहुः ॥ वस्तुतस्तु व्याकरणकारांतरमते सेड्धातुमध्ये छिदेः पाठादेवमुक्तमिति प्रतिभाति ॥ **पुरुषव्यत्यय इति** ॥ उत्तमपुरुषस्य प्रथमपुरुषत्वेन व्यत्ययः ॥ विचारमेवेत्यत्र विचारपदोपरि भारो द्रष्टव्यः ॥ **नचेतीति** ॥ कृष्णस्यैव सर्वशरण्यत्वेन तस्मादन्यः शरण्यो नास्ति यतोऽतोऽहं प्रपद्य इति भगवद्वचनमयुक्तमित्यर्थः ॥ **इति संबंधइति** ॥ इत्येवंशब्दयोरध्याहारेणेत्यर्थः ॥ **परिमार्गणत्वाभावादिति** ॥ भावनाविशेष एवायमिति भावः ॥ ४ ॥

अभ्यासलोप इडभावश्च छांदसः॥चिच्छिदिषुः॥विश्वविमर्शार्थीयत (र्थयन्त) ब्रह्मविश्वस्य मूलं तमेव पुरुषं प्रपद्येतेत्यर्थः॥प्रपत्त्या प्रसन्नेन नारायणेन दृष्टः॥ पुमान्प्रतिबुद्धो विश्वविमर्शक्षमो भवेदित्यर्थः ॥ इतश्च पुरुषव्यत्ययोऽत्र व्याख्येय इत्याह॥ छेदनेति ॥ अतस्तदुपादाय वि

नारायणेन दृष्टश्च प्रतिबुद्धो भवेत्पुमानिति च मोक्षधर्मे ॥ छेदनोपायो ह्यत्राकांक्षितः॥ न च भगवतोऽन्यः शरण्योऽस्ति ॥ ४ ॥

धानमेव संगतमिति शेषः ॥ न केवलमुत्तमपुरुषोऽत्रानुपयुक्तः ॥ किं त्वयुक्तश्चेत्याह ॥ न चेति ॥ तमेव प्रपद्य इत्येवं परिमार्गितव्यमिति संबंधस्त्वयुक्तः अस्य परिमार्गणत्वाभावात् ॥ ४ ॥

॥ कृ० ॥ नन्वेवं तद्युक्तरीत्या चिच्छिदिषुरिति वक्तव्यमित्यत आह ॥ **अभ्यासलोप इति** ॥ **प्रपत्त्येति** ॥ तदीयोऽहमित्यादिस्मृतिरूपया शरणागत्येत्यर्थः ॥ **उत्तमपुरुष इति** ॥ प्रपद्य इत्युत्तमपुरुषप्रयोग इत्यर्थः ॥ **अस्येति** ॥ तमेव प्रपद्य इत्यस्य ब्रह्मज्ञानत्वाभावादित्यर्थः ॥ ४ ॥

---

१ एतदारभ्य ॥ २ एतत्पर्यंतमपपाठइतिभाति ॥ ३ । ४ एतावान्ग्रंथोऽपि ॥ इणः परत्वाभावेनषत्वाभावस्य दस्यखरिचेति चर्त्वेन तकारस्यासिद्धत्वादिति भाति ॥

॥ श्री० ॥ ५ ॥ ननु स्वपदं च सुराम्नयान्नित्यादौ पदशब्दस्य स्थानार्थतःप्रमिमाणा नन स्वरूपं न गृहं प्राजैर्यामिति गीयत इत्यभिप्रायेण धामशब्दस्य तेजोवाचित्वागमादत्र गीता
यां पदधामशब्दौ स्थानतेजोवाचकौ किं न स्यातामित्यत आह ॥ स्थानतेजसोरिति ॥ ६ ॥ ७ ॥ तद्विपर्यासमिति ॥ जीवविषयमित्यर्थ. ॥ ईश्वरपदं तु जीवयोगेन मानकाशं सोऽपि
हिस्वशरीरेंद्रियादीनामिष्ट इति भाव.॥रूढार्थेति॥ईश्वर क्षमण आमद तिवचनेन प्रियो विश्वरपदमुख्यार्थेन प्रसिद्ध इति भावः॥प्रकृतिस्थानीत्येतत्त्रेधा व्याचष्टे शरीरावासाविसादिना॥
तर्हि ब्रह्मज्ञानसाधनं विश्वविसर्जनत साधनं च तत्प्रपत्तिरिति समस्तमुक्तं किमुत्तरेणेत्यत आह ॥ साधनांतरमिति ॥ ५ ॥
उत्तरवाक्यानां संगत्यप्रतीतेस्तां सूचयन्नाह ॥ स्वरूपमिति ॥ अनेन कीदृशं तत्पदं यत्प्राप्तिः पुरुषार्थ इत्याकांक्षायामिदमुच्यत इत्युक्तं भव
ति ॥ स्वरूपमित्यनेन पदमित्युक्तस्य धामेतिवक्ष्यमाणस्य चार्थोऽप्युक्तो भवति ॥ स्थानतेजसोरसंगतत्वात् ॥ ६ ॥ ७ ॥ पूर्ववाक्ये जीव

साधनांतरमाह ॥ निर्मानेति ॥ ५ ॥ स्वरूपं कथयति ॥ न तदित्यादिना ॥ ६ ॥ ७ ॥ कर्षतीत्युक्ते जी
निर्माणमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञै
र्गच्छंत्यमूढाः पदमव्ययं तत्॥५॥ न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न
निवर्तंते तद्धाम परमं मम ॥ ६ ॥ ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानीं
द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वै
तानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥
वस्य स्वातंत्र्यं प्रतीतं तन्निवारयति ॥ शरीरमित्यादिना ॥

स्य प्रकृतत्वात्तदुक्तमपि तद्विपर्यासमिति व्याख्यानमसत् ॥ ईश्वरपदरूढार्थपरित्यागदोषादित्याशयवान् संगतिं तावदाह ॥ कर्षतीति ॥ श
रीरावाप्तौ मूलकारणादुत्क्रमणे शरीरात् ॥

॥ क्र० ॥ ५ ॥ ननु पदधामशब्दयोः स्थानतेजोऽर्थत्वं किं न स्यादित्यत आह ॥ स्थानतेजसोरिति ॥ तत्परिमितिव्यामित्युक्तपरिमाणीयवादेः स्थानादावसंभवादिति भावः॥६॥
॥ ७ ॥ पूर्ववाक्य इति ॥ ममैवांश इति श्लोक इत्यर्थः ॥

॥ श्री० ॥ शरीरप्राप्तिरूपोत्पत्तिकाले प्रकृतिस्थानि पूर्वं स्वमूलकारणे स्थितानि इंद्रियाणि मूलकारणाच्छरीरं प्रकर्षति ॥ तथोत्क्रमणे मरणकाले पूर्वं प्रकृतिस्थानि स्वशरीरस्थानींद्रियाणि शरीरात् मूलकारणं प्रतिकर्षति तथा स्थितिसमये प्रकृतिस्थितानि स्वस्वगोलकेषु स्थितानींद्रियाणि गोलकेभ्यो विषयान्प्रतिकर्षतीत्येवं प्रकृतिस्थानीत्यस्य मूलकारणशरीरगोलकरूपार्थत्रयमभिप्रेत्य योजितं भवति ॥ पूर्वत्रोक्तमिति ॥ ममैवांश इति श्लोक इत्यर्थः ॥ पूर्वोक्तेति ॥ न हि प्रतिबिंबस्य क्रियेति पूर्वमस्वातंत्र्यस्य प्रतिपादितत्वेन तद्विरोधादित्यर्थः ॥ तदिति ॥ इंद्रियकर्षणादिरूपं कर्मेत्यर्थः ॥ लोकांतरं चेत्यनन्तरं नियामकत्वात् चेति शेषः कार्यः ॥ तथा चेश्वरः मूलकारणादिंद्रियाणि गृहीत्वा शरीरं संयाति उत्क्रमणे शरीरादेतानि गृहीत्वा मूलकारणं संयाति स्थितौ गोलकेभ्य एतानि गृहीत्वा विषयान्प्रति संयातीत्यर्थः ॥

स्थितौ गोलकादिभ्यो विषयान्प्रतींद्रियाणि जीवः कर्षतीति पूर्वत्रोक्तम् ॥ तथा च तस्य नियामकांतरानुक्त्या इंद्रियकर्षणे स्वातंत्र्यं प्रतीतम् ॥ तदयुक्तम् ॥ तथा च तस्य नियामकांतरानुक्त्या इंद्रियकर्षणे स्वातंत्र्यं प्रतीतम् ॥ तदयुक्तम् ॥ पूर्वोक्तविरोधादित्याशंक्येश्वरस्यैव तत्प्रतिपादयंस्तज्जीवस्य स्वातंत्र्यं निवारयतीत्यर्थः ॥ श्लोकद्वयोपादानाद्यादिपदम् ॥ अत्र शरीरावाप्त्युत्क्रमणयोरुक्तत्वादीश्वरस्य तदयोगा

यद्यदाशरीरमवाप्नोति उत्क्रामति जीवस्तदेश्वर एतानि गृहीत्वा संयाति ॥ यत्र यत्र च संयुक्तो धाता गर्भं पुनः पुनः ॥ तत्र तत्रैव वसति न यत्र स्वयमिच्छतीति मोक्षधर्मे ॥

त्कथमिदं तद्विषयमित्यतो व्याचष्टे॥ यदेति॥ जीव इति पूर्ववाक्यादनुवर्तते ॥ यदेतिश्रवणात्तदेतिलभ्यते ॥ एतानींद्रियाणि ॥ संयाति शरीरम् ॥ लोकांतरं च॥कुतोऽयमर्थ इत्यतो जीवस्य शरीरप्राप्तौ तावदीश्वराधीनत्वे प्रमाणसंमतिमाह ॥ यत्रेति ॥

॥ कृ० ॥ मूलकारणत्वादित्यादिना प्रकृतिस्थानीत्येतत्त्रेधा व्याकृतं भवति ॥ गोलकादिभ्य इति ॥ इंद्रियाधिष्ठानं गोलकशब्दार्थः ॥ आदिपदेनेंद्रियविषयसंग्रहणम् ॥ अयमर्थः ॥ गोलकेभ्यो विषयान्प्रति इंद्रियाणि कर्षति यदा जीवः प्रणिधानं करोति तदा मनःप्रभृति ज्ञानभूतान्यपि इंद्रियेभ्यो विषयविशेषान् प्रति कर्षति एवं प्रत्याहारादिकाले विषयविशेषोपक्षीणानि चक्षुरादीनि तेभ्यो विषयांतराणि प्रति कर्षति ॥ इत्यतः गोलकादिभ्यो विषयान्प्रति कर्षतीति ॥ पूर्वोक्तेति ॥ न हि प्रतिबिंबस्य क्रियेत्याद्युक्तविरोधादित्यर्थः ॥ ईश्वरस्यैव तत्प्रतिपादयन्निति ॥ ननु शरीरं यदिति श्लोके ईश्वरस्यानुक्त्या जीवस्य तदभावश्च न प्रतीयते तथा नेदं व्याख्यानं युक्तमिति चेदुच्यते ॥ जीव इंद्रियाणि कर्षतीति यदुक्तं तदेव शरीरं यदिति श्लोकेन नियामकांतरोक्त्या व्याख्यायते तत्र ईश्वरादेव तस्य स्वातंत्र्यमुक्तं वायुर्गंधानिवेति दृष्टांतोक्त्या न तत्प्रत्येते ॥ वायोर्गंधोपादानेऽन्यानपेक्षत्वात् ॥ ततश्चोक्तव्याख्यानं युक्तमेवेति ॥ नन्वेवं जीवः कर्षतीति कथमिति चेदुच्यते ॥ अत्र इतीति [illegible] ॥

॥ श्री० ॥ **संयुक्त इति** ॥ अनादिकाले जीवेन संयुक्त इत्यर्थः ॥ सयुजा सखायेति श्रुतेरिति भावः ॥ **मोक्षमपीति** ॥ तथा च यद्यपिशुभाशुभादिकं जानन् भवामि जानामीति याव त् तथाऽपि तन्न करोमीत्यर्थो द्रष्टव्यः ॥ **तास्ताइति** ॥ आशासु गमनादिक्रियाः हर्म्यासु रमणादिक्रिया, ह्रदासु प्लवनादिक्रिया इति तत्तदुचिताः क्रिया इत्यर्थः ॥ **वहामि॥** करोमी तियावत् ॥ हननादीत्यादिपदेन जित्वेत्युक्तजयरूपक्रियासंग्रहः ॥

संयुक्तः॥प्रेरकत्वेनसंयुक्तः (परमेश्वरो) यत्र यत्रैव योनौ गर्भधाता तत्र तत्रैव वसति जीवः॥प्रवृत्तावपीश्वराधीनत्वे जीवस्य प्रमाणसंवादमाह॥भावेति

भावाभावौ लौकिके शुभाशुभे गरीयः श्रेयो मोक्षमपि ॥ तथाऽपि तन्न करोमि साधयितुं न स्वतंत्रोऽस्मि ॥ किं तु आशासु दिक्षु ह र्म्यासु हर्म्येषु ह्रदासु ह्रदेषु ॥ तास्ताः क्रियाः कुर्वन्निव प्रतीयमानोऽहं यथेश्वरेण नियुक्तोऽस्मि तथा तां वहामि ॥ हननादिक्रियाः कृत्वा

भावाभावावपि जानन्गरीयो जानामि श्रेयो न तु तत्करोमि ॥ आशासु हर्म्यासु ह्रदासु कुर्वन्यथा नियुक्तोऽ स्मि तथा वहामीति च ॥ हत्वा जित्वापि मघवन्यःकश्चित्पुरुषायते ॥अकर्ता त्वेव भवति कर्तात्वेवकरोति तदि तिच॥तद्यथाऽनःसुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्यातीति च श्रुतिः॥

यः कश्चित्परमपुरुषवत्स्वातंत्र्यमात्मनोमन्यते सोऽप्यकर्तैव भवति ॥ यतस्तद्धननादिकर्तेश्वर एव करोति ॥ शरीरोत्क्रमणमपीश्वराधीन मित्यत्र श्रुतिसंमतिमाह ॥ तद्यथेति ॥ अनः शकटम् ॥ सुसमाहितं पुरुषेण सम्यगधिष्ठितमुत्सर्जद्ग्रामादिकमुत्सृजच्छारीर आत्माजीवः प्रा ज्ञेनात्मना परमात्मना अन्वारूढोऽधिष्ठितः ॥ उत्सर्जन शरीरमुत्सृजन् ॥

॥ कृ० ॥ **संयुक्तः प्रेरकत्वेन संयुक्त इति** ॥ अत्र संयुक्त इत्यनुवादेन प्रेरकत्वेन संयुक्त इति व्याख्यानम् ॥ क्वचित्तु संयुक्तः परमेश्वर इत्येव पाठः तत्र संयुक्तइत्यस्य प्रेरकत्वेन जीवसंयुक्त इत्यर्थो बोध्यः ॥ **हर्म्येष्विति** ॥ हर्म्यादिधनिनां वास इत्यमरोक्तेर्धनिनां वासस्थानेष्वित्यर्थः॥ शेषं तु ज्ञेयं शिष्टप्रयोगत इत्यमरोक्तेर्लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति म हाभाष्योक्तेश्च हर्म्यास्वित्यादिस्त्रीलिंगोपपत्तिः ॥ **परमपुरुषवदिति** ॥ पुरुष इवाचरति पुरुषायते ॥ कर्तुः क्यङ्सलोपश्चेति क्यङ् पुरुषश्च विष्णुः तत्साम्यं च तद्वत्स्वातंत्र्यज्ञानवत्त्वेनेति भावेनैवमुक्तम् ॥ **अनःशकटमिति** ॥ क्लीबेऽनः शकटोऽस्त्री स्यादित्यमरोक्तेरिति भावः ॥ सृजेस्त्रीदादिकत्वेन कथं शबित्यत आह ॥ **उत्सृजादिति** ॥

॥ श्री० ॥ **अनेकेषु** ॥ जीर्णतृणपर्णादिषु ॥ **गंधोपादाने** ॥ गंधदृष्टांतोपादाने ॥ आश्रयं विना केवलगुणानागमनादाह ॥**गंधवत इति**॥तथा च गीतायां गंधानिवेत्यनेन अर्थआयन्नं॥मिति भावः ॥ सूक्ष्माणीत्यस्यार्थोऽवयवानिति ॥ अत्र वायुर्गंधमिवाशयादित्यनुक्त्वा गंधानितिबहुवचनप्रयोगेनात्र गंधशब्दो द्रव्यवचनो न गुणवचन इति सूचितम्॥सत्वे गंधाः गुणे गंध इति द्रव्यवाचितायां नित्यबहुवचनांतत्वविधानात ॥ चादयोऽसत्वे इति वचनेन सत्वशब्दस्यद्रव्यवाचित्वावगमात॥ तदेतदभिप्रेत्य भगवत्पादैर्व्याख्यातं गंधानि च सूक्ष्माणीति तद्व्याख्टे ॥ **गंधवतः पुष्पाद्यवयवानिति** ॥ तथा च चंदनखंडरूपद्रव्यदानममयं अयं वा गंधः सुगंध इत्यादिरपप्रयोगइत्यवधेयमिति भावइत्याहुः ॥

वागित्यनेनोत्क्रमणे परदेवतावागादीन्याकर्षतीत्युच्यते॥अनेकेष्वाकृष्यमाणेषुसत्सु गंधोपादानेऽभिप्रायमाह॥गंधानिवेति॥गंधवतःपुष्पाद्यवयवानित्यर्थः

वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति च ॥ गंधानिव सूक्ष्माणि॥

॥ कृ० ॥ वाङ्मनसीत्यस्य प्रकृतोपयोगमाह ॥ **वागित्यनेनेति** ॥ ननु गंधशब्दस्य गुणवाचित्वे सूक्ष्माणीत्युपमानोपमेयसाधारणधर्मोक्तिविरोधः ॥गुणस्य सूक्ष्मत्वाभावात् ॥ यथा गंधस्य भूमेश्च न भावो व्यतिरेकर्त इति तृतीयस्कंधोक्तेराश्रयं विना गुणाकर्षणायोगश्चेत्यत आह ॥ **गंधवत इति** ॥ गंधो गंधक आमोदे संबंधे लेशगर्वयोः ॥ स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इत्युक्तेर्गंधशब्दस्य द्रव्यवाचित्वादिति भावः ॥ एतेन गंधानिति बहुवचनं च समाहितम् ॥ नचावयवागमनपक्षे व्यतिरेको गंधवदिति सूत्रविरोधः ॥ तत्रापि भागागमनस्यैवाभिप्रेतत्वात् ॥ अन्यथांऽशिनं विहायांशगतौ गंधदृष्टांतोपादानायोगात ॥ गंधस्य गुणत्वेनांशत्वाभावात् ॥नच गुणाद्वालोकवादित्युक्तालोकवद्गुणस्यैवागमनं किं न स्यादिति वाच्यम्॥ वैषम्यात् ॥ युक्तमालोकस्यागमनं तथात्वेऽपि स्वाश्रयं विहाय वृत्तेरभावात् ॥किं तु स्वाश्रयमविहायैवान्यत्रापि वृत्तिः गंधागमने तु स्वाश्रयं विहायान्यत्रैव वृत्तिः प्रसज्यते सा चोक्ततृतीयस्कंधवाक्यविरुद्धा ॥ गुणस्य तथात्वाभावयुक्तिविरुद्धता च ॥ न च व्यतिरेकसूत्रीयचंद्रिकाविरोधः ॥ तत्र स्थूलावयवागमनस्य दूषितत्वात् ॥ इह पुनरतिसूक्ष्मभागागमनांगीकारात् अत एव सूक्ष्माणीत्युक्तमिति दिक् ॥ ८ ॥

---

१ छांदोग्योपनिषत्॥अ. ६प्रपाठकेतिव्याख्यातः॥खंड८नञ्चाष्यटयंश्रुतिर्वागादिनियामकदेवतापरत्वेनव्याख्यानापिनियम्यैर्द्रिथैःसहैवेतिज्ञेयम्॥२अ.२८ श्लोक १९ ॥ ३ । ४ विनाभावः॥ ५ अ. २ पा. ३ अ. १३ सू. १ अणोरपिजीवस्य तदंशैर्व्यतिरेकोविभागोऽस्तियथापुष्पगंधस्यस्वांशैर्विभागस्तथेतिअथैकएवसन गंधवद्व्यतिरिच्यते इति ॥ अचिंत्ययेशशक्त्येवेतिश्रुतिस्मृतियतोऽतइतिसूत्रार्थः ॥६अ. २ पा. ३ अ.१२ सू. ७ अणोरपिजीवस्यचिद्गुणादेहव्याप्तिः दीपादेरेकत्रावस्थानेऽपि प्रकाशगुणेनावरकादिव्याप्तिरिवेतिसूत्रार्थः ॥

॥ श्री॰ इदम् ॥ शरीरं यदवाप्नोतीत्यादिवाक्यस्य ॥ [illegible]
छायेति जीवेंद्रियैर्भोग उच्यत इति भावः । लभ्यत इति । [illegible]
स्वातंत्र्यात् तदश्रवणे च तस्य [illegible]
शुभाविषयभोगस्योक्तत्वात् [illegible]
॥ गुणमेवेत्यर्थ इति । [illegible]
तात्पर्यकथनेन गुणान्वितमित्यनेन [illegible]
मिति व्याख्यानेऽर्थ [illegible]
इत्याहुः॥ वस्तुतस्तु गुणान्वित भुञ्जानमित्युक्तेः [illegible]

ननु श्रोत्रमित्यादिना विषयभोगोऽस्योच्यते ॥ न चेश्वरस्याभावस्ति ॥ किं तु जीवस्यैव तत्कथमिदमीश्वरविषयमित्यत आह । [illegible]
ति ॥ पुरस्तात् सप्तमे ॥८ ॥ अस्तीश्वरस्य भोगः ॥ किं तु जीवेंद्रियैर्नास्तीत्यतो जीवविषयमेतदित्यत आह ॥ इंद्रियैः [illegible]

भोगोऽस्यापि साधितः पुरस्तात् ॥ ८ ॥ इंद्रियद्वारापि सोऽपि भुंक्ते ॥ तद्य इमे वीणायां गायन्त्येते ते

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते॥ ९ ॥

गायंतीति च श्रुतिः ॥ गुणान्वितमेव भुङ्क्ते ॥

तं गायंतीत्यनेन हि तच्छ्रोत्रेण गानभोगो लभ्यते ॥ विषयभोगांगीकारे दुष्टस्यापि भोगः स्यादित्यत उत्तरवाक्यगतं [illegible] मित्या
ह ॥ गुणेति ॥ गुणमेवेत्यर्थः ॥

॥ कृ॰ ॥ राजाद्यंतर्गतामिति ॥ [illegible] भवति ॥

॥ श्री० ॥ एतद्भुंजानस्येति ॥ [illegible] ॥ न [illegible]
प्रसक्तिवारणाय भुंजानमित्यत्र [illegible] न तर्हि भुंजानमितिसामान्योक्त्या भगवतोऽ
शुभभोगस्यापि प्रतीत्वि[illegible] ॥ [illegible] पूर्ववाक्यम् ॥ अमुं सत्यज्ञानविद्योपासकं सर्वे
जीवदेहांतर्गतं हिरण्यगर्भं प्रति [illegible]
द्धिरित्याशयः ॥ ९ ॥ [illegible]
भावो विधीयत इति [illegible]
एवोत्तरत्र तदभाव इति [illegible] तृतीयः ॥ अत
पश्यंति ज्ञानचक्षुष इत्युक्ते [illegible] ॥ तथा न
[illegible]

एतद्भुंजानस्य विशेषणमिति केचित् ॥ तान्प्रत्याह ॥ न ह वा इति ॥ १ ॥ उत्क्रमेव [illegible] महाशंकानिरासार्थमग्रश्लोकद्वय
स्यसंगतिमाह ॥ नहीति ॥ यदि जीवातिरिक्तो देह नियामकः स्यादिति शेषः ॥ उत्क्रान्त्यादौ विमूढत्वमनुपलंभे कारणम् ॥ न तदभाव इत्यु

उत्क्रामंतं स्थितं वाऽपि भुंजानं वा गुणान्वितम्॥विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः॥१०॥
यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितम् ॥ यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः॥११॥

न ह वै देवान्पापं गच्छतीति श्रुतेः॥९तर्हि किमिति न दृश्यत इत्यत आह॥उत्क्रामंतमित्यादिना१०यतंतोऽज्ञानं प्राप्य
च्यत इति भावः ॥ १० ॥ यतंतो योगिनश्चेति कारणांतरमुच्यत इति प्रतीतिनिराकरणार्थमाह ॥ यतंत इति ॥

॥ क० ॥ भुंजानस्येति ॥ ननुप्राग्वदेकत्वविशेषणमित्यर्थ ॥ ९ ॥ १० ॥ कारणांतरमिति ॥ दर्शने ज्ञानचक्षुष्ट्वातिरिक्तं य आदिष्टं कारणांतरमित्यर्थः ॥

१ टीकायाम् ॥ २ बृहदारण्य अ. ३ ब्राह्मण ५ [illegible] ॥

॥ श्री० ॥ सर्वदेति ॥ अनन्यत्वादितिभावः ॥ तथा च नैनं पश्यंतीतिदर्शनाभावमप्य एवाकृतत्ववचनमयुक्तमिति द्रष्टव्यम॥ असंभव इति ॥ उत्पत्तेः प्रत्यक्षसिद्धत्वेनाकृतत्वासंभव इत्यर्थः ॥ ननु करोतेः शुद्धतायां प्रयोगो न दृष्ट इतिचेत्तत्राह ॥ केशानिति ॥ सिद्धानां केशानां करणासंभवाच्छोधनमेव तत्र करणशब्दार्थ इत्याशयः ॥ ११ ॥ स्वरूपमिति ॥ विज्ञानशब्दवाच्यभगवत्स्वरूपमित्यर्थः ॥१२॥ गामाविश्येत्यत्र गोशब्दो धेनुवाचीत्याशयेनाह ॥ धेनोरिति ॥ १३ ॥ १४ ॥

आत्माजीवश्चेत्सर्वदाऽकृत एव ॥ शरीरं चेदसंभव इत्यत आह ॥ अकृतेति ॥ आत्मा बुद्धिः ॥ अकृतत्वं चाशुद्धत्वम् ॥ केशान्करोतीत्यादौ शोधनेऽपि करोतेः प्रयोगादिति भावः ॥११॥ ननु न तद्भासयत इत्यादिना स्वरूपं कथितं तत्किमुत्तरेणेत्यत आह ॥ पूर्वोक्तमेवेति ॥ अथ अकृतात्मन अशुद्धबुद्धयः ॥ ११ ॥ पूर्वोक्तमेव ज्ञानं प्रपंचयति ॥ यदादित्यगतमित्यादिना ॥ १२ ॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ॥यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥गामाविश्य
च भूतानि धारयाम्यहमोजसा॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥१३॥अहं वैश्वानरो
भूत्वा प्राणिनां देहमाश्रितः॥प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४ ॥सर्वस्य चाहं हृदि सन्नि
विष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ १५॥

॥ १३ ॥ १४ ॥ गां भूमिम् ॥ वेदनिर्णयात्मिका मीमांसा वेदांताः॥

श्वमूलान्यनुसंततानीति यत्सर्वांतर्यामिस्वरूपं विज्ञानमुक्तं यच्चोर्ध्वशब्देन सर्वोत्तमत्वं तदध्यायशेषेण प्रपंचयतीत्यर्थः ॥ १२ ॥ धेनोरावेशेन भूतधारणे कारणमित्यत आह ॥ गामिति ॥ १३ ॥ १४ ॥ वेदांतकृदित्युपनिषदां कर्तेत्यन्यथाप्रतीतिनिरासार्थमाह ॥ वेदेति ॥

॥ कृ० ॥ सर्वदाऽकृत एवेति ॥ ततश्च नैनं पश्यंतीति दर्शनाभावमप्य एव विशिष्याकृतात्मान इत्युक्तयोग इति भावः ॥ ११ ॥ ननु यदादित्यगतमित्यादिना द्वाविमावित्यादिना च वक्ष्यमाणयोः सर्वांतर्यामित्वसर्वोत्तमत्वयोः प्रागनुक्तत्वात्प्रपंचयतीति कथमुक्तमित्यत आह ॥ अथश्चेति ॥ १२ ॥ १३ ॥ गीतायां पचाम्यन्नं चतुर्विधमिति ॥ भक्ष्यं भोज्यं लेह्यं चोष्यं चेत्यन्नं चतुर्विधम ॥ तत्र दंतैरवखंड्य यद्भुज्यते तद्भक्ष्यम ॥ यत्तु नितिकाठिन्यादतिप्रयत्नतत्खंडनापेक्षं चर्वयित्वैव निगीर्यते तद्भोज्यम ॥ लेह्यं प्रसिद्धम् ॥ यस्यौष्ठदशनरसनादिभिर्निष्पीडितस्य सफूत्कारेण मुखमारुतेन रसो निष्पीयते तच्चोष्यम ॥यथेक्षुखंडादीति ॥ १४ ॥

॥ श्री० ॥ मीमांसामेयशोधनमित्युक्तत्वेन वेदरूपशब्दनिर्णयात्मकत्वाभावादाह ॥ वेदो वेदार्थ इति॥ मीमांसा त्रिविधा ज्ञेया ब्राह्मी दैवी च कर्मिकीति वचनेन मीमांसायास्त्रैविध्यादत्र कर्ममीमांसादिग्रहणे तस्या जैमिन्यादिकृतत्वेनव्यासकृतत्वाभावादाह ॥ ब्राह्मीति ॥ कर्तेति ॥ व्यासरूपेणेति शेष ॥ स एव व्यासरूपेण वेदान्तकृद्वाहा इति तात्पर्योक्तेरिति ध्येयम् ॥ निगदेति ॥ निगदनमुच्चारणमेव तद्व्याख्यानमित्यर्थः ॥ तथा च कल ज्ञाने इत्यादिनानेकार्थत्वादिना कालः स्वार्थे कः ॥तथा च काल एव कालक इति स्पष्टमिति द्रष्टव्यम् ॥ ॥ १६ ॥ युक्तीति ॥ क्षरशब्दार्थतया सर्वजडग्रहणे बाधिकायाः जीवमात्रग्रहणे साधिकायाः युक्तेः सूचनार्थमित्यर्थः ॥ तदेव दर्शयति ॥ न हीति ॥ आकाशादिभूतपञ्चक एव रूढो न सर्वजडेषु अतः क्षरशब्देन जडमात्रग्रहणमयुक्तमित्यर्थः ॥ किं त्विति ॥ सर्वेष्विति शेष ॥ यद्वा जडमात्रे केवलजडएव रूढो न किं तु जीवेष्वपि अतो जीवा एव ग्राह्या इत्याशयः तथा च विनिगमनाभाव इत्यतो निरवकाशज्ञापकमाह ॥ पुरुषशब्दस्य चेति ॥ जीवग्रहणे साधकस्य जडग्रहणे बाधकस्येत्यर्थः ॥ अत्र द्वाविमौपुरुषाविति प्रक्रान्तपुरुषभेदस्यैवोच्य मानत्वेन क्षरशब्देन जडग्रहणे तत्र चेतनत्वापरपर्यायपुरुषत्वायोगात् ॥ जीवेषु तत्संभवात् क्षरशब्देन जीवा एव ग्राह्या न जडमिति भावः ॥ ॥ रु० ॥ अंतोऽस्त्री निश्चये नाश इति

वेदो वेदार्थः ॥ तस्यांतो निर्णयस्तदात्मिका तादर्थ्यात्ताच्छब्द्यं मीमांसा ब्राह्मी ॥ तस्याः कर्तेति शेषः ॥ कुत एतदित्यत आह ॥ तथा चेति ॥ युक्तिसूत्रकृद्वेदार्थनिर्णयार्थयुक्तिसूचकवाक्यकृत् ॥ स कालक इति द्वितीयेन कलधातोर्नानार्थतया प्रसिद्धत्वान्निगदव्या

तथा च सामवेदे प्राचीनशालाश्रुतिः ॥ स वेदांतकृत्सकालक इति स ह्येव युक्तिसूत्रकृत्सालक इति ॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥१६॥

॥ १५ ॥ क्षरभूतानि ब्रह्मादीनि ॥ कूटस्था प्रकृतिः ॥

ख्यानमेतदित्याचष्टे ॥ १५ ॥ क्षराक्षरशब्दौ जडजीवार्थावित्यपव्याख्याननिरासार्थमाह ॥ क्षरेति ॥ भूतग्रहणं युक्तिसूचनार्थम् ॥ न हि जडमात्रेभूतशब्दो रूढः ॥ किं तु जीवेष्वपि ॥ पुरुषशब्दस्य चैतदुपलक्षणम् ॥ प्रकृतिश्चेतना ॥

विश्वोक्तेराह॥अंतो निर्णय इति॥१५॥युक्तीति॥अक्षरशब्दस्य जडार्थत्वे बाधिका जीवार्थत्वे साधिका या युक्तिः तत्सूचनार्थमित्यर्थः ॥ तां युक्तिमाह ॥ न हीति ॥ तथा च क्षरशब्देन जडग्रहणे रूढिबाधः॥जीवग्रहणे च तदानुगुण्यमिति भावः ॥जीवेष्वपीति ॥ सदेहजीवा भूतानीत्युक्तेरिति भावः ॥ जडप्रकृतेः कूटस्थत्वाभावादाह ॥ प्रकृतिश्चेतनेति ॥

१ मात्रं कार्त्स्न्येऽवधारणइति कोशात्प्रथमांतात्सप्तम्यर्थे व्याख्यानम् ॥ २ द्वितीयांतात्सप्तम्यर्थे दर्शितं शेषः ॥

॥ श्री० ॥ **युक्तीति** ॥ प्रकृतिग्रहणे साधिकायाः जीवग्रहणे चाधिकायाश्च युक्तेः सूचनार्थमित्यर्थः ॥ तत्कथमित्यत आह ॥ **न हीति** ॥ कूटस्थत्वं निर्विकारत्वम् ॥ **विकारित्वादि** ति ॥ उच्चनीचतादिविकारित्वादित्यर्थः ॥ प्रकृतेस्तु नित्याभिव्यक्तमूलत्वेन नास्त्येव कूटस्थत्वमिति भावः॥ अत्र सर्वजीवा इत्यनुवादेन क्षर इति व्याख्यानमिति प्रतीयते तदसंगतं क्षरश ब्दस्यैव व्याख्येयत्वादेकवचनायोगश्चेत्यत आह ॥ क्षर इतीति ॥ एकवचनं तु वेदाः प्रमाणमितिवदुच्यत इति भावः ॥ **अर्शआदिभ्य इति** ॥ तथा च जालशब्दस्याप्यर्शआदिगण स्थेन तस्मान्मत्वर्थीयाच्प्रत्ययेचकारलोपे भस्य लकारस्थस्याकारस्य लोपे प्रत्ययाकारसंबंधेन सति जालेतिभवतीति द्रष्टव्यम् ॥ नन्वधुनाऽपि मातरिश्वनोलिंगदेहवत्त्वेन संसारबंधवत्त्वात् कथं तद्राहित्यरूपाजालत्वमित्यत आह ॥ **अभिमानाभावादिति** ॥ ब्रह्मानिरभिमानित्वाच्छरीरेष्वशरीरवानिति वचनात् ॥मातरिश्वनोऽपि भाविब्रह्मत्वादिति भावः॥१६॥१७॥१८॥

अक्षरं इति वक्तव्ये कूटस्थ इति वचनमपि युक्तिसूचनार्थमेव ॥न हि जीवानां कूटस्थत्वमस्ति सुखादिमत्त्वेन विकारित्वात् ॥ श्रुतिसंम त्याऽयमेवार्थ इत्याह ॥ तथा चेति ॥ क्षर इत्यनुवादेन प्रजापतीत्यादि व्याख्यानम् ॥ अन्यं परमात्मानम् ॥ क्षरांतर्भूतोऽपि मातरिश्वा वि

तथा च शार्कराक्षश्रुतिः ॥ प्रजापतिप्रमुखाः सर्वजीवाः क्षरोऽक्षरः पुरुषो वै प्रधानम् ॥ तदुत्तमंचान्य

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ १७॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥

मुदाहरंति जालाजालं मातरिश्वानमेकमिति ॥ १६ ॥ १७ ॥ १८ ॥

वक्षाविशेषेणाक्षरेऽपि भवतीत्युच्यते ॥ जालेति ॥ जालं संसारबंधः ॥ सोऽस्यास्तीति जालः ॥ अर्शादिभ्योऽच् ॥ तद्रहितश्चाजालः ॥ अभिमानाभावात् ॥ ॥ १६ ॥ १७ ॥ १८ ॥

॥ कृ० ॥ विकारित्वादिति ॥ नीचोच्चतादिरूपविकारोपेतत्वादित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥

१ न त्वनयोरेकः ॥ २ अत्रश्रुतिसंमतिमाह ॥ परमंचतनइति ॥ चतनश्चेतनानामिति हिश्रुतिः ॥ ३ भर्मैव स्वारेति ४ धारयतिपोषयतिच ॥ इयमुत्तमत्वेयुक्तिः ॥ ५ तत्प्रविष्टोऽ पिननश्यति इतियुक्त्यंतरम् ॥ ६तत्रहेतुः ॥ अचिंत्यशक्तिः ॥ ७ मनुअहमेवेत्य ह ॥ ८ पौरुषेयग्रंथे ॥ ९अपौरुषेयग्रंथे ॥

॥१९॥२०॥इति यदुपतिविरचिते गीताभाष्यटीकाप्रकाशे समाप्तिरचिताभिर्गीर्भिरावेश्यत्रै ॥ मृत्कितानिवृत्तिर्या वृद्धिगाह्यात्र चीर्णा दशम अगमदध्यायोऽसम्पाः सपंचः॥इति श्रीपद्मदुपसा चार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायां पंचदशोऽध्यायः ॥

॥१९ ॥ २०॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां पंचदशोऽध्यायः ॥

॥१९॥२०॥इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये पंचदशोऽध्यायः ॥ १५

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्॥ स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥
हरिः ॐ इति श्रीमद्भगवद्गीतासूपनिषत्सु० पुराणपुरुषोत्तमयोगो नाम पंचदशोऽध्यायः॥१५

॥ कृ० ॥ १९ ॥ २० ॥ इति प्रमेयदीपिकाभावप्रकाशे पंचदशोऽध्यायः ॥

१ तात्पर्यज्ञापनाय उक्तज्ञ. निरंतरमीति ॥ २ सर्वोत्तमत्वमिथ्यात्वभ्रमितिमोहरहितः ॥ ३ सर्वशास्त्रार्थज्ञानी ॥ ४ सर्वप्रकारेण ॥ ५ अनधिकारिणंप्रतिनेदंकथनीयमिति भावः ६ शिक्षणीयम् ॥ ७ अपरोक्षज्ञानी ॥ ८ मुक्तः ॥

॥ श्री०॥प्रणम्य यादवाचार्यगुरूणां पदपंकजे॥क्रियते [illegible] षोडशाध्यायस्य [illegible] ॥ तत्राध्याये अभयं दमादि इत्यादिना सुरासुरलक्षणमेवोच्यते ॥ अत
एवोक्तं तात्पर्यं देवासुरलक्षणमिति ॥ तथा चात्र पुमर्थसाधनानां [illegible] पुमर्थसाधनानां [illegible] निरूपणस्यात्रादर्शनादित्यतोऽन्यथाव्याख्या
नं [illegible] सुरासुरलक्षणमेवोच्यत इत्यभिप्रेत्याह ॥ यद्यपीत्यादिना ॥ साधनेति ॥ पुमर्थसाधनेति ॥ [illegible] तद्विरोधिनाम् ॥ मध्यविरोधिनः ज्ञानमोक्षयोरि
ति ॥ ज्ञानस्याप्यवान्तरपुरुषार्थत्वादिति भावः ॥ तथेति ॥ [illegible] पुमर्थसाधनादिनिरूपणेन देवासुरलक्षणमेवोच्य
त इति भावः ॥ देवद्विजेत्यादिनेति ॥ देवद्विजगुरुप्राज्ञपूजनं [illegible] ॥ शौचादेरपीति ॥

अध्यायप्रतिपाद्यं दर्शयति ॥ पुमर्थेति ॥ यद्यपि पूर्वयोरध्याययोः साधनप्रतिपादन एव तात्पर्यं तथाऽपि तन्न प्रपंचितम् ॥ किं नाम तेषां
स्वरूपम् ॥ साधनमनुतिष्ठता च तद्विरोधिनां त्यागोऽवश्यं कर्णीयः ॥ पूर्वाध्याये च निर्मानेत्यादिना पुमर्थयोर्ज्ञानमोक्षयोः साधनं यत्तो

ॐ ॥ साधनविघ्नहर्त्रेनमः ॥ ॐ ॥ पुमर्थसाधनविरोधिन्यनेनाध्यायेन दर्शयति

श्रीभगवानुवाच॥अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥१

प्यकृतात्मान इत्यादिना तद्विरोधि च संक्षेपेणोक्तम् ॥ तदुभयमिदानीं प्रपंच्यतेऽयम् ॥ सुरासुरलक्षणं च तथेति तदनेनाध्यायेन दर्शयतीत्य
र्थः ॥ तपो वक्ष्यमाणमिति कश्चित ॥ तदसत् ॥ देवद्विजेत्यादिनोक्तस्यात्र ग्रहणे शौचादेरपि तपोग्रहणेन गृहीतत्वात्पुनरुक्तिप्रसंगात ॥

॥ कृ० ॥ तात्पर्यमिति ॥ साधनं प्राधान्येनोक्तं [illegible] प्राग्[illegible] इति भावः ॥ न प्रपंचितमिति ॥ निर्मानेत्यादिना [illegible] साधनत
द्विरोधिनोरुक्तत्वान्नोक्तमित्यनुक्त्वा न प्रपंचितमित्युक्तिरिति [illegible] ॥ [illegible] किं तद्विरोधि [illegible] आह ॥ साधनमनुतिष्ठता चेति ॥ तदनन्तरलक्षणा संगतिः
कथमस्याध्यायस्येत्यत आह ॥ पूर्वाध्याय इति ॥ उक्तस्योक्ति [illegible] ॥ तर्हि [illegible] आह ॥ तदुभयमिति ॥ तर्हि
चतुर्दशाध्याय एव प्रपंच्यतां किं [illegible] ॥ इदानीमिति ॥ [illegible] इत्यर्थः ॥ ननु साधनतद्विरोधि [illegible] सुरासुरलक्षणं [illegible] आह ॥ सुरासुरेति॥
तथेति साधनं तद्विरोधि चेत्यर्थः ॥ [illegible] ॥ वक्ष्यमाणमिति ॥ [illegible] द्विजेत्यादिनेति शेषः॥शौचादेरपीति॥ [illegible] शौचादेरपि तपस्त्वोक्तेरिति भावः ॥

१ । २ जात्यकत्तनम् ॥ [illegible]

॥ श्री० ॥ शौचमार्जवमितितत्रोक्तशौचादिरपि स्वाध्यायस्तप आर्जवमित्यत्र [illegible] गृहीतम् [illegible] शौचं आर्जवमित्यत्र [illegible] शौचादेः पृथक्कथनं [illegible] स्यादित्यर्थः ॥ व
क्ष्यमाणेति ॥ वक्ष्यमाणतपोऽन्तर्गतमित्यर्थः ॥ यद्वेति ॥ शौचार्जवादि यद्वा ॥ अत्र [illegible] तद्व्यतिरिक्तमेव [illegible] ॥ तत वक्ष्यमाणान्तर्गतं यदत्र पृ
थगुच्यते तद्व्यतिरिक्तं तपः ॥ कायक्लेशरूपोऽसाधारणो गृहीतमेवेति ॥ [illegible] ॥ त
इत्यर्थः ॥राजाऽसौ [illegible] प्रधानेऽप्रधाने [illegible] तत्प्राधान्यमिति द्रष्टव्यम्
प्राधान्यमिति द्रष्टव्यम् ॥१॥ तत्त्वप्राप्तीति ॥ [illegible] ॥ ननु [illegible] परोपद्रवनिमित्त [illegible] परोपद्रवेति ॥

अतो वक्ष्यमाणान्तर्गतं यदत्र पृथगुच्यते तद्व्यतिरिक्तमेव ॥ तच्च प्रधानस्यैवोपलक्षणत्वोपपत्तेः नोपवासादीनि भावेन सप्रमाणकमाह ॥ तप इति ॥ १ ॥ पैशुनाभावोऽपैशुनं च परस्यापराधवचनमिति ॥ तदसत् ॥ शिष्यादिदोषानुवादस्यशिक्षार्थस्यापि तत्त्वप्राप्तेरित्याशयेनाह ॥ पैशु

तपो ब्रह्मचर्यादि॥ ब्रह्मचर्यादिकं तप इत्यभिधानम्॥१ ॥ पैशुनं परोपद्रवनिमित्तदोषाणां राजादेः कथनम् ॥

अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनम्॥दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम्॥२

नमिति॥ राजादेस्तच्छ्रावणम् ॥ परोपद्रवनिमित्तेनिदोषेषूपचारः ॥

॥ कृ० ॥ अत्रापि तेजः क्षमा धृतिः [illegible] तप इति व्याख्यायता किमुक्तं [illegible] आह ॥ तच्चेति ॥
तच्चनोपवासादीत्यन्वयः॥ किं तु ब्रह्मचर्यादीति शेषः ॥ [illegible] उक्तम् ॥ उपलक्षणत्वात् ॥ [illegible] प्रा
नस्येत्युक्तम् ॥१॥ननु कथनं नाम वचनव्यापारः [illegible] पैशुनं [illegible] ॥ [illegible] रा
जादेस्तदभावात् ॥ वचनक्रियाया द्विकर्मकत्वाभावाच्चेत्याशयेन कथनं नाम न वचनमात्रं किं तु [illegible] ॥ तत्र च राजादेः श्रोतृत्व [illegible]
षष्ठी शेषे इतिसूत्रेण षष्ठीति भावेन दोषाणां राजादेः कथनमित्यस्य फलितार्थमाह ॥ **राजादेस्तच्छ्रावणमिति** ॥ तर्हि राजादेः शिष्यादिदोषश्रावणस्य शिक्षार्थस्य पैशुनत्वप्रसंग इ
त्यत उक्तम् ॥ **परोपद्रवनिमित्तेति** ॥ तदप्युक्तम् ॥ दोषाणां स्वरूपेण परोपद्रवनिमित्तत्वाभावादित्यत आह ॥ **परोपद्रवनिमित्तेति** ॥ उपचार इति ॥

१. शौचादेरित्यापदेनसंगृहीतैकदेशप्रदर्शनार्थमिति ज्ञेयम् ॥ २ राजादेस्तु [illegible] दोषाणां कथनम् ॥

॥ श्री० ॥ राजादिश्रवणे दोषेषु नोपद्रवप्रयोजकत्वरूपैकगुणयोगादित्यर्थः ॥ अनेन ॥ परोपद्रवनिमित्तेनेति वचनेन ॥ परोपद्रवायेति ॥ राजादेः कथनमित्यर्थः ॥ ननु भीतेर्मानसिकत्वेन ज्ञानैकसत्वात् कथमदृष्टिरित्यत आह ॥ अनुत्पत्तिरिति ॥ तथात्वेन ॥ भीतिकारणत्वेन ॥ बालादीनामिति ॥ तथा च तेष्वपि दर्पमदादिव्यवहारः स्यादिति भावः ॥ अनेनेति ॥ अदृष्टिरित्यनेनेत्यर्थः ॥ धात्वर्थ इति ॥ दृप हर्षविमोहनयोरिति विमोहनरूपदृपधात्वर्थ इत्यर्थः ॥ विमोहनशब्देन सम्यग्ज्ञानाभावरूपादृष्टेर्विवक्षितत्वादित्याशयः ॥ दृप अस्मात् घञि लघूपधगुणे च दर्प इति रूपं द्रष्टव्यम् ॥ एतेनेति ॥ पैशुनस्वरूपकथनायोदाहृताभिधानशेषे दर्पस्वरूपकथनेनेत्यर्थः ॥ भेदमिति ॥ चंचलस्यैव लोलत्वेन लौल्यचापल्ययोरभेदशंकायामित्यर्थः ॥ ननु गीतायामलोलुत्वमित्युक्ते लौल्यमिति कथं भाषितमित्यत आह ॥ लोलुत्वेति ॥ एवमुक्तं लौल्यमित्युक्तम् ॥ २ ॥

अनेन परोपद्रवायेति सूचयति वचः कथनम् ॥ मदात्कारणात् ॥ भीतेरदृष्टिरनुत्पत्तिरिति यावत् ॥ भीतेर्भीतिकारणस्य तथात्वेनादृष्टिरिति वा ॥ बालादीनां भीतेरदर्शनं व्यावर्तयितुंमदादित्युक्तम् ॥ अनेन धात्वर्थोऽप्यनुगतः ॥ एतेनासुरलक्षणं दर्पोऽपिव्याख्यातः ॥ अलोलुत्वाचाप **परोपद्रवहेतूनां दोषाणां पैशुनं वचः ॥ राजादेस्तु मदाद्भीतेरदृष्टिर्दर्प उच्यत इत्यभिधानात् ॥ लौल्यंरागः ॥ रागो लौल्यं तथा रक्तिरित्यभिधानात् ॥ अचापलं स्थैर्यम् ॥ चपलश्चंचलोऽस्थिर इत्यभिधानात् ॥ २ ॥** ल्यत्वयोर्भेदं क्रमेण सप्रमाणकं दर्शयति ॥ लौल्यमिति ॥ लोलुत्वपर्यायोऽयमिति अत एवमुक्तम् ॥ २ ॥

॥ क्व० ॥ परोपद्रवनिमित्तशब्दस्य तादृशश्रवणविषयत्वे लक्षणा ॥ दोषनलक्षणयोः परोपद्रवप्रयोजकत्वसाम्येन गौणीत्यर्थः ॥ ननु दोषाणां पुरुषान्तरेषूपद्रवप्रयोजकत्वस्य फलोपाधेस्तस्यदर्शनेन शिष्यादिदोषेष्वपि सत्त्वयोग्यं उपद्रवप्रयोजकत्वमस्त्येव ॥ तेन नोक्तादिव्याप्तिपरिहार इत्यत आह ॥ अनेनेति ॥ तथा च परोपद्रवोद्देशेन राजादेः परदोषश्रावणं पैशुनमिति लक्षणं विवक्षितम् ॥ न चाशिक्षार्थं राजादेः शिष्यादिदोषश्रावणं तथा ॥ शिक्षार्थत्वविरोधात् ॥ अतो नातिप्रसंग इति भावः ॥ भाववोधे तु ॥ राजादेः तच्छ्रवणं परोपद्रवनिमित्तमिति दोषप्रचार इति पाठमाश्रित्य व्याख्यानमिति बोध्यम् ॥ ननु वचो वाक्यम् तस्य कथं पुरुषधर्मपैशुनत्वं वाक्यस्य पुरुषधर्मत्वाभावादित्यत आह ॥ वचः कथनमिति ॥ ननु भीतेर्ज्ञातिकमत्वात्कथमदृष्टिरित्यत आह ॥ अनुत्पत्तिरित्यावदिति ॥ धात्वर्थ इति ॥ दृपहर्षविमोहनयोरिति पठितो विमोहनरूपो धात्वर्थ इत्यर्थः ॥ दर्पशब्दस्य दृपप्रकृतिकत्वादिति भावः ॥ अनुगत इति ॥ विमोहनस्यादृष्टिरूपत्वादिति भावः ॥ अलोलुत्वाचापल्ययोर्भेदमिति॥ लोलः चपलतृष्णयोरित्यमरोक्तेर्लोलशब्दस्य चपलशब्दपर्यायत्वशब्दसमानार्थत्वात्तद्घटितालोलुत्वाचापल्यशब्दयोरन्यतरस्यव्यर्थप्रसक्तावभेदं दर्शयतीत्यर्थः ॥ ननु रागो लौल्यमित्यसंगतं व्याख्येयस्य लोलुत्वशब्दस्याव्याख्यानादित्यत आह ॥ लोलुत्वपर्याय इति ॥ यद्वा ननु लोलुत्वशब्द उकारान्तप्रकृतिकः लौल्यशब्दस्तु अकारान्तप्रकृतिकः ॥ ततो रागो लौल्यमिति व्याख्यानमयुक्तमित्यत आह ॥ लोलुत्वपर्याय इति ॥ २ ॥

॥ श्री० ॥ ३ ॥ ४ ॥ उत्तमजन्मेति ॥ तथा चाभिजातोऽसीत्यस्य सत्कुलप्रसूतोऽसीत्यर्थो द्रष्टव्यः ॥ अयं धातुः ॥ जनिधातुः ॥ द्वितीया ॥ संपदं दैवीमिति द्वितीया ॥ उपसर्गाणां क्रियासंबंधाभावे समाप्तक्रियात्वान्नित्वमभिप्रेत्याह ॥ अभिलक्ष्येति ॥ दैवीं संपदं देवत्वमभिलक्ष्योद्दिश्य जात इत्यर्थः ॥ लक्ष दर्शनांकनयोरिति लक्षधातोः सकर्मकत्वात् द्वितीया युक्तेत्यर्थः ॥ देवत्वेन ॥ प्राप्तदेवत्वेन ॥ देवेंद्रावतारत्वेनास्यापि देवत्वादिति भावः ॥ जनिसंबंध इति ॥ अभिजात उत्तमजन्मेति जनिसंबंध इत्यर्थः ॥ लक्ष्यसंबंध इति ॥ अध्याहृतलक्ष्यपदेन संबंध इत्यर्थः ॥उक्तानुपपत्तिः ॥ अर्जुनस्य देवत्वेनेत्युक्तानुपपत्तिः॥

अक्रोध इत्युक्तत्वात् क्षमेतिपुनरुक्तिरित्यत आह ॥ क्षमा त्विति ॥ क्रोधं दोषं अपकारं च न करोतीत्यक्रोधदोषकृत् ॥ शत्रोरपकर्तुः॥३॥
॥ ४ ॥ संपदं दैवीमभिजातोऽसीत्यत्राभिजात उत्तमजन्मा ॥ नायं धातुः सकर्मकः तत्कथं द्वितीयेत्याशंक्य अभिलक्ष्य जात इति केचि
क्षमा तु क्रोधाभावेन सहापकर्तुरनपकारः ॥ अक्रोधो दोषकृच्छत्रोः क्षमावान्स निगद्यत इत्यभिधा

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवंति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥
दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥
दैवी संपद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोऽसि पांडव ॥ ५ ॥

नात् ॥ ३ ॥ ४ ॥ दैवीं संपदमभिजातः प्रतिजातः ॥ ५ ॥
इत्याचक्षते॥ तदसत् ॥अर्जुनस्य देवत्वेन देवत्वमुद्दिश्य जन्मायोगादित्याशयवानाह ॥ दैवीमिति ॥ अनेनैतदाचष्टे॥नायमभिरुपसर्गः येन त
स्यजनिसंबंधे द्वितीयाऽनुपपत्तिर्लक्षिसंबंधे चोक्तानुपपत्तिः स्यात्

॥ कृ० ॥ दोषमपकारमिति ॥ दोषमित्यनूद्यापकारमिति विवृतम् ॥ ३ ॥ ४ ॥ उत्तमजन्मेति ॥ कुलीन इत्यर्थः ॥ अभिजातः[illegible]षिते न्याय्ये कुलीनप्राप्तरूपयोरिति विश्वे[illegible]रिति भावः ॥ अयं धातुरिति ॥ जनिधातुरित्यर्थः॥उपसर्गत्वे क्रियायोगः तंत्रम ॥ उपसर्गाः क्रियायोग इत्युक्तेः ॥ तत्र किं श्रुतक्रियायोगः अध्याहृतक्रियायोगो वेति विकल्प्याद्ये आह॥ तस्य जनिसंबंध इति ॥ अंत्ये आह ॥ लक्षिसंबंध इति ॥ लक्षदर्शनांकनयोरित्युक्तधात्वर्थक्रियायोग इत्यर्थः ॥

॥ श्री० ॥ अयमभिरुपसर्गो न चेत्तर्हि किमिति पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ प्रत्यर्थ इति ॥ न चाभेः कथं कर्मप्रवचनीयसंज्ञा लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति सूत्रेण प्रत्यादित्रयाणामेव लक्षणाद्यर्थचतुष्टयेषु कर्मप्रवचनीयतायाः उक्तत्वात्तेन चाभेरनुक्तत्वादित्यत उक्तम् ॥ प्रत्यर्थ इति ॥ तथा चाभीत्यस्य प्रत्यर्थकत्वात् तस्य च कर्मप्रवचनीयतायाः उक्तत्वादिति भावः ॥ ननु लक्षणाद्यर्थेषु कस्मिन्नर्थेऽत्र कर्मप्रवचनीयसंज्ञेत्यत उक्तम् ॥ लक्षण इति ॥ प्रतीत्यस्यार्थभूतं यल्लक्षणं तदर्थेऽयमभिः कर्मप्रवचनीयसंज्ञ इत्यर्थः ॥ तथाऽपि कथं द्वितीयोपपत्तिरित्यत आह ॥ तथा चेति ॥ कर्मप्रवचनीययुक्ते द्वितीयेति सूत्रेणेत्यर्थः ॥ वृक्षमभि विद्योतते विद्युदित्युदाहरणम् ॥ अत्राभेर्लक्षणार्थत्वमुपपादयति ॥ दृष्टान्तेन प्रकृतेऽप्युपपादयति ॥ यथेत्यादिना ॥ लक्षणं चिह्नं ज्ञापकमित्यर्थः ॥ दैवी संपदिति ॥ जातस्य तदाहिंसादिरूपा दैवी संपत् ॥ अभि पूर्वप्राप्तदेवत्वज्ञापिकेत्यर्थः ॥ एतद्विहायेति ॥ संपदं दैवीमभिजातस्येत्यादेः सामान्योक्तित्वेन यत्किंचित्पुरुषविषयकत्वमर्थेनातन्नविषयकत्वाभावात्तेन देवत्वमाद्दिश्य जात इत्यर्थोक्तावपि बाधकाभावादर्जुनविषयकत्वेनावगत संपदं दैवीमभिजातोऽसीति वाक्यमेव व्याख्यातमित्यर्थः ॥ अत एवं व्युक्तं विशदयति ॥ अर्जुनस्येति ॥ तथा चात्र देवत्वमुद्दिश्येति व्याख्यानं संभवतीत्याशयः ॥ एतदर्थत्वेति ॥ जातस्य पुंसो दैवी संपत् अभिलक्षणं जातस्य पुंस आसुरी संपत् अभिलक्षणमित्यर्थोपपत्तेरित्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥

किं तु प्रत्यर्थे लक्षणे कर्मप्रवचनीयः ॥ तथा च कर्मप्रवचनीययुक्ते द्वितीयोपपद्यते ॥ तथा वृक्षमभिवृक्षं प्रति विद्योतते इत्यत्र वृक्षो विद्योतनस्य लक्षणमित्यर्थः ॥ एवं दैवी संपज्जातस्य तव लक्षणमित्यर्थः ॥ संपद्यते तथाचार्जुनस्य प्राप्तदेवत्वविरोध इति ॥ अत एव संपदं दैवी

भाष्यं ॥ ६ ॥ ७ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च॥दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥६
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः॥न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥ ७॥

मभिजातस्य अभिजातस्य पार्थ संपदमासुरीमित्येतद्विहायेदं व्याख्यानम्॥अर्जुनस्य देवत्वप्रसिद्धेःएतत्साहचर्यात्तत्राऽप्येतदर्थत्वोपपत्तेः॥५॥६॥७॥

॥ कृ० ॥ लक्षणे इति ॥ परिच्छेदक इत्यर्थः ॥ परिच्छेदकं च विशेषणम् ॥ विशेषणमुपलक्षणं च ॥ तदुभयमपि लक्षणशब्देनाभिलक्षितमिति बोध्यम् ॥ ननु अभेर्लक्षणे कर्मप्रवचनीयत्वं कुत इत्यत उक्तम् ॥ प्रत्यर्थेति ॥ अयं भावः ॥ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इत्यनेन येष्वर्थेषु प्रतेः कर्मप्रवचनीयत्वमुक्तं तेष्वेव भागमात्रं वर्जयित्वाऽभिरभागे इत्यभेः कर्मप्रवचनीयत्वमुक्तम् ॥ अतो लक्षणे कर्मप्रवचनीयत्वं युक्तमेवेति ॥ लक्षणमिति ॥ उपलक्षणमित्यर्थः ॥ तव लक्षणमिति ॥ विशेषणमित्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ॥३७०॥

॥ १. सर्गाणां बहुत्वेऽपि शुभाशुभफलकारणत्वात् द्वयोरेव कथनम् ॥ २. द्विसंख्याद्वययुगः ॥ ३. विहिते ४. निषेधे ॥ ५. तात्पर्यं तेन नायकत्वम् ॥

॥ श्री० ॥ उप समीपे निषीदन्तीति व्युत्पत्तिं हृदि निधायाह ॥ रहस्यं नामेति ॥ मूर्तं चामूर्तं चेति ॥ वक्ष्यमाणसमीकरणानुसारेण प्राणशब्दार्थमाह ॥ मूर्तामूर्तेभ्योपीति ॥ पंचमहाभूतानामे
व प्राणिपरिहारायाह ॥ जगदितीति ॥ अबाध्यत्वरूपं सत्यत्वं यत्तद्वक्ष्यति स एवाह ॥ एव चाहेति ॥ अन्यथेति ॥ जगतः मुख्यसत्यत्वं इ यथेः ॥ आसां गवां मध्ये कृष्णा गौः
संदर्शीतमित्युक्ते इतरासां किंचित्सदर्शीत्वं लभ्यते एवं सत्यस्य सत्यमित्युक्ते तेषां पर्युक्तं ॥ इतरस्य मुख्यसत्यत्वं जगतस्तु मुख्य व्यावहारिकसत्यत्वं लभ्यत इति भावः ॥अ
त्र सत् त्यं इतिमत्यामित्यत्र विग्रहं दर्शयति ॥सच्च त्यच्चेति ॥ मूर्तामूर्तं चेत्यर्थः ॥ जगत इति ॥सच्च त्यदसत्यशब्दवाच्यस्य मूर्तामूर्तजगत इत्यर्थः ॥

न केवलं जगतो मिथ्यात्वादिवदतामसत्त्वमसत्यमप्रतिष्ठं त इत्यनेनोच्यते किं तु जगज्जन्मादिकारणं विष्णुं ये न मन्यंते तेषां सर्वेषाम पीति भावेनाह ॥ जगत इति ॥ तद्वैपरीत्येनेति ॥ न विद्यते सत्यमस्येत्यादि जगतः सत्यं विष्णुरित्यत्र श्रुतिमाह ॥ तस्येति ॥ तस्य वि ष्णोः सत्यस्य सत्यमिति ॥ उपनिषद्रहस्यं नाम ॥ कथम् प्राणा मूर्तामूर्तजगदिति यावत् ॥ सत्यमित्युच्यते ॥ तेषां प्राणानामेष विष्णुः

जगतः सत्यं प्रतिष्ठाईश्वरश्च विष्णुस्तद्वैपरीत्येनाहुः ॥ तस्योपनिषत्सत्यस्य सत्यमिति ॥ प्राणा वै स त्यं तेषामेष सत्यमिति हि श्रुतिः ॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च स्थितं च यच्च सच्च त्यच्चेति

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥ अपरस्परसंभूतं किमन्यत्कामहेतुकम् ॥८ ॥

॥ तस्योपनिषत्सत्यस्य सत्यमिति एष ह्येवैतस्माद्यति यामयति चेतीति प्राचीनशालाश्रुतिः ॥

सत्यमित्यर्थः ॥ एवं चेज्जगतो मुख्यं सत्यत्वं न भवेत् ॥ अन्यथा निर्धारणायोगादित्यतो मूर्तामूर्तात्मकस्य जगतः सत्यत्वं तावद न्यथा श्रुत्यैव व्याचष्टे ॥ द्वे वावेति ॥ रूपे प्रतिमे ॥ तत्र मूर्तं स्थितमिति ॥ सदिति चोच्यते ॥ अमूर्तं तु यदिति त्यदिति चोच्यत इत्यर्थः ॥तथा च सच्च त्यच्च सत्यमित्युक्तं भवति॥इदानीं जगतः सत्यत्वं विष्णोः श्रुत्या व्याचष्टे॥तस्येति॥

॥कृ०॥अत एवेत्युक्तं दर्शयति ॥ अर्जुनस्येति ॥ मूर्तामूर्तं चेति वक्ष्यमाणप्रमाणानुसारेणाह ॥ मूर्तामूर्तं जगदित्येतावादिति ॥ मूर्तामूर्तयोः स्वरूपत्वायोगादाह॥ प्रतिमे इति ॥ स च्च त्यच्चेति समाहारद्वंद्वांशमेः ॥ समासान्तेऽप्यश्लेष इति भावः ॥ जगत सत्यत्वमिति ॥ संबंधमात्रे षष्ठी ॥ जगत्प्रतिसत्यत्वमित्यर्थः ॥

१ तद्वाक्यस्योक्तार्थपूर्वकपेन्द्रदर्शकायाश्चेद्रियत्वं कर्दमभूतानामपाणशब्दग्रहणादाह ॥ एतत्समर्थनमद्वयते ॥ श्रुत्याऽऽहितयाप्रदर्शनपरत्वादितिभावः ॥ २ विप्रतिपत्तिसंबंधानाविष्करणवाचीतिनि यमादितिभावः ॥ ३ समासस्थानेऽदकारत्वप्रत्ययोपच्छादसत्यनुषंग ॥

॥ श्री० ॥ सर्वेन्द्रियविशरणेत्यादिश्रुतिमाश्रित्याह ॥ **विशरणादिकार्याणीति** ॥ अत्र सत्यमित्येव विवक्षितं ननु पूर्वेत्र सत्यमितीत्याशयेनाह ॥ **सच्च तदिति** ॥ ननु जगतः सत्यमित्या द्यर्थत्रयमध्ये जगतः सत्यं विष्णुरित्यत्र श्रुतिरुक्ता जगतः प्रतिष्ठा ईश्वर इत्यत्र कस्मात्र प्रमाणमुदाहृतमित्यत आह ॥ **प्रतिष्ठेति** ॥ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्र तिष्ठाः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामित्यादिना जगतः प्रतिष्ठा ईश्वरश्चेति प्रसिद्धमेवेत्यर्थः ॥ **अपरम्** ॥ पश्चात्कालीनं कार्यम् ॥ परस्मात् पूर्वकालीनात् कारणात् ॥ **प्रति षेधेति** ॥ असत्यमप्रतिष्ठमित्यादिप्रतिषेधप्रकरणादित्यर्थः ॥ **अत इति** ॥ प्रकरणाद्विरोधादित्यर्थः ॥ **स्यादेवाघेति** ॥ परस्परं संभूतं न भवतीति वदतां नियतमित्यर्थः ॥ परस्परं संभूतं न भवतीत्याहुरिति स्वव्याख्यानोपपादकत्वेन परस्परेति शब्दस्य व्याख्यानम् ॥ अधुना परकृतव्याख्यानासाधुत्वोपपादकत्वेनापि व्याख्येयमित्याह ॥ **परव्याख्यानेति** ॥ अपरं परस्मा त् संभूतमिति परव्याख्यानेत्यर्थः ॥ **तद्वचनम्** ॥ परस्परसंभवत्वचनम् ॥ **ईश्वरेति** ॥ अपरं परस्मात्संभूतमित्येव न तदीश्वरेण संभूतमितीश्वराक्षेप इत्यर्थः ॥ **पुनरुक्तेति** ॥ अनीश्वरमित्य नेनतदभावस्योक्तत्वेन पुनरुक्तिप्रसंगादित्यर्थः ॥ ८ ॥ ९ ॥

सादयति ॥ विशरणादिकं प्रापयतीति सत् ॥ यामयति नियन्छतीति यं सच्च तद्यच्च सत्यमित्यर्थः ॥ प्रतिष्ठेश्वरश्चेति प्रसिद्धमेव ॥ अ परस्परसंभूतमित्यस्यापरं परस्मात् संभूतमिति व्याख्यानमसत् ॥ प्रतिषेधप्रकरणात् ॥ अतःपरस्परसंभूतंनभवतीत्याहुरित्येव व्याख्येयम्॥स्या

परस्परसंभवो ह्युक्तः अन्नाद्भवंति भूतानीत्यादिना ॥ ८ ॥ ९ ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥

देवं ॥ यदि परस्परसंभवो भगवतोऽभिमतःस्यात् इत्यत आह ॥ परस्परेति ॥ यद्वानेन परव्याख्यानासाधुत्वमुपपादयति ॥ भगवतापरस्प रसंभवस्योक्तत्वात् तद्वचनं कथमासुरमिति ॥ ईश्वराक्षेपे तात्पर्यमिति चेत् न पुनरुक्तिप्रसंगात् ॥ ८ ॥ ९ ॥

॥ कृ० ॥ **सादयतीति** ॥ तथा चसदेवंतत्सूत्रणयमीरन्येयोऽपिदृश्यतइति सर्वेषां क्रियान्वयभावः ॥ **प्रतिषेधप्रकरणादिति**॥सत्यं नेत्यादिरूपेण निषेधस्य प्रकृतत्वादित्यर्थः॥**तद्वचनमिति**॥ अपरं परस्मात्संभूतमिति वचनमित्यर्थः ॥ **ईश्वराक्षेप इति** ॥ अपरं परस्मात्संभूतं न तदीश्वरादितीश्वरनिराकरणे तात्पर्यमित्यर्थः ॥ **पुनरुक्तीति** ॥ अनीश्वरमित्यनेनेति शेषः ॥ ८॥९

१ धात्वादेःष सइतिप्रवृत्त्यनंतरम्॥२छांदो.ग्यअ. ६प्रपाठक.१.खं.८.।३ सर्वेषां क्रियाकर्मादिन्यासनिवा...।४ दृष्ट्वा चित्ता...।५ ...श्रुतादौ उक्त.पंच.सुवांते ॥६ अनिष्टप्राप्तये

॥ श्री० ॥ किंविशेषणमिति ॥ अदुष्पूरकामव्यावर्तकं विशेषणं किमित्यर्थः ॥ हेत्वरयमिति ॥ तथा च हेतुगर्भविशेषणमिति भावः ॥ दुष्पूरो हीति ॥ भाष्ये हि शब्दवत्त्वात् गीतायां दुष्पूरमित्यस्य हेतुगर्भत्वं ज्ञायत इति द्रष्टव्यम ॥ विशेषणमेवेति ॥ इतरव्यावर्तकमेवेत्यर्थः ॥ दुष्पूरत्वाव्यभिचारादिति ॥ यदि कश्चित् अदुष्पूरः काम स्यात्तदेतद्व्यावर्तनायदं विशेषणं स्यान्नैवं कामस्य दुष्पूरत्वाव्यभिचारादिति भावेनाहेत्यर्थः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

॥ क्र० ॥ दुष्पूरत्वाव्यभिचारादिति

काममाश्रित्य दुष्पूरमिति कामस्य दुष्पूरत्वं किं विशेषणम् ॥ नेति ब्रूमः ॥ किं तर्हि कामस्य प्रवृत्तिहेतुत्वे हेतुत्वमुच्यत इति भावेनाह दुष्पूरो हि कामः ॥ पाताल इव दुष्पूरो मा हि क्लेशयते सदेति मोक्षधर्मे ॥ १० ॥११॥१२॥१३॥१४॥

काममाश्रित्य दुष्पूरं दंभमानमदान्विताः॥मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्ततेऽशुचिव्रताः॥ १०
चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः॥कामोपभोगपरमा एतावदिति निश्चिताः॥११॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः॥ईहंते कामभोगार्थमन्यायेनार्थसंचयान्॥१२॥
इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्॥इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥१३॥
असौ मया हतःशत्रुर्हनिष्ये चापरानपि॥ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी॥१४॥

॥ दुष्पूरोहीति ॥ विशेषणमेव किं न स्यात् ॥कामस्य दुष्पूरत्वाव्यभिचारादिति भावेनाह ॥ पाताल इवेति ॥ १०॥११॥१२॥१३॥ १४॥

॥ संभवे व्यभिचारे च स्याद्विशेषणमर्थवदित्युक्तेरिति भावः ॥ अनेन मदेत्यस्य दुष्पूरः क्लेशयतइत्युभयत्र प्यन्वयइत्युक्तम भवति ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

---

१ मरणांतां ॥ २ विषयभोगैकरताः ॥ ३ ऐहिकमेवफलंनामुष्मिकं ॥४ वाञ्छंति ॥ ५ प्राप्स्यामि ॥ ६ परमेश्वरः ॥७ कृतकृत्यः ॥

॥ श्री० ॥ १५ ॥ १६ ॥ १७ ॥ अधिकरणत्वमिति ॥ आत्मपरदेहेष्विति सप्तम्या आत्मपरदेहयोरधिकरणत्वप्रतीतेरिति भावः ॥ इत्यादीत्यत्र यादिशब्दार्थमाह ॥ कुर्वाणं चेति ॥ अधःशब्देन नरकाख्याधोगतिरुच्यते तस्याः सदाशब्देन नित्यत्वमित्यभिप्रेत्योक्तं ॥ सदाधो नित्यनरकमिति ॥ १८॥ १९ ॥ २० ॥

॥ १५ ॥ १६ ॥ १७ ॥ भगवद्देहस्यात्मपरदेहाधिकरणत्वं कथमित्यत आह ॥ मामिति॥ कुतो न कारयिता यदि स्यात्तर्हीदानीमकुर्वाणं मा

॥ १५ ॥ १६ ॥ १७ ॥ मामात्मपरदेहेष्विति न कस्य चिद्विष्णुः कारयिता ॥ यदि स्यान्मामपीदानीं कारयत्वित्यादि ईश्वरो यदि सर्वस्य कारकः कारयीत माम् ॥ अधेति वादिनं ब्रूयात्सदाऽधो यास्यसीति

आढ्योऽभिजनवानस्मि कोन्योऽस्ति सदृशो मया॥यक्ष्ये दास्यामि मोदिष्यइत्यज्ञानविमोहिताः१५
अनेकचित्तविभ्रांता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥
आत्मसंभाविताःस्तब्धा धनमानमदान्विताः ॥यजंते नाम यज्ञैस्ते दंभेनाविधिपूर्वकम् ॥ १७ ॥
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि॥मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥२०॥

सामवेदे यास्कश्रुतिः ॥ १८ ॥ १९ ॥ २० ॥

मपि कारयतु कुर्वाणं च निवारयतु इत्यर्थः ॥ सदाधो नित्यनरकम् ॥ १८ ॥ १९ ॥ २० ॥

॥ कृ० ॥ १५ ॥ १६ ॥ १७ ॥ आदिपदार्थमाह ॥ कुर्वाणं चेति ॥ सदाधइत्येतन्महानर्थो यथा स्यात्तथा व्याचष्टे ॥ नित्यनरकमिति ॥ १८ ॥ १९॥ २० ॥

१ कुलीनोऽस्मि ॥ २ नकोऽपि ॥ ३ अनेकचिन्तायुक्तमनसाविशेषेणभ्रांताः ॥ ४ पुत्रमित्रादिविषयकमोहाख्यजालेन ॥ ५ नरके ॥ ६ स्वेनैवसंपूज्याइतिमन्यमानाः ॥ ७ अनम्राः ॥ ८ धननिमित्तगर्वदर्पाभ्यां ॥ ९ नामयज्ञैरित्येकंवापदंनाम्नैवज्योतिष्टोमादयःअविधिपूर्वकत्वात् ॥ १० स्वमहित्वप्रदर्शनेनानिमित्तेन ॥ ११ तत्रापिअसुरयोनिषु ॥ १२ स्थापयामि ॥ १३ पुनःपुनः॥१४ नित्यनरकलक्षणाम् ॥

॥ श्री० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इति मद्भगवद्गीताभाष्यटीकाप्रकाशे यतिवरललिताभिर्गीर्भिर्गर्भवेदगिरा ॥ सुललितविवृतिर्या टीकागूढाऽत्र चीर्णा षड्धिकदशमोऽध्यायोऽस्तमस्यामवाप ॥ ॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायां षोडशोऽध्यायः ॥

॥२१॥२२॥२३॥२४॥इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यगीताभाष्यस्य टीकायांजयतीर्थमुनिविरचितायांप्रमेयदीपिकायांषोडशोऽध्यायः ॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये षोडशोऽध्यायः ॥ १६॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः॥कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्॥२१॥
एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः॥आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥२२॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः॥न ससिद्धिमवाप्नोति न सुखं न परां गतिम्॥२३
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४ ॥ हरिःॐतत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु०दैवासुरसंपत्तियोगो नाम षोडशोऽध्यायः ॥ १६ ॥

॥ कृ० ॥ २१॥२२॥२३॥२४॥इतिश्रीमन्निर्मलाचार्यसूरिसुतकृष्णविरचिते प्रमेयदीपिकाभावप्रकाशे षोडशोऽध्यायः ॥

---

१ उक्तपुरुषार्थविरोधिषु प्रधानं दोषत्रयमवश्यं त्याज्यमित्याह ॥ ततश्च कारणाभावान्नरकप्राप्तिरिति भावः ॥ २ नैकैकवर्जनमात्रेण कृतकृत्यतेत्याह ॥ ३ पुमर्थसाधनम् ॥ ४ मोक्षम् ॥ ५ स्वेच्छयैव यत्र क्वचन प्रवर्तते ॥ ६ पुमर्थोपायम् ॥ ७ ऐहिकम् ॥ ८ मोक्षम् ॥ ९ विवेकिनस्तव यस्मात् ॥ १० तस्मादिति अत्रान्वेति ॥

॥ श्री० ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ ... गुणभेदा गुणभेदास्ताभिर्निमित्ता इति विग्रहः तत्र योग्यतया श्रद्धादीनामित्यस्य लाभ इत्याशये ॥ गुणनि
नाह ॥ गुणनिमित्ता इति ॥ इत्युक्तत्वादिति ॥ ... शास्त्रानिति प्रमाणतया सर्वान् प्रति प्राप्तस्य प्रामाण्यबुध्या प
मित्तकश्रद्धादिभेदकथनस्य किं प्रयोजनमित्यत आह ॥ सात्विकानामिति॥श्रद्धादीनामित्यर्थः ॥ प्रतीतार्थ एवेति ॥ ... कथं तैर्विसृष्ट इत्या
रित्यागरूप उत्सर्गो यक्त इति भावः ॥ नाज्ञात्वेति ॥ ... स्यादिति भावः ॥
उक्तम् ॥ अर्थज्ञानपर्यंतोऽयं विधिरिति ॥ ... ॥ सात्विकानांपुमर्थसा

अध्यायार्थमाह ॥ गुणेति ॥ गुणनिमित्ताः श्रद्धादीनां भेदाः ॥ नान्यं गुणेभ्यः कर्तारमित्युक्तत्वात्प्रपंचयतीत्युक्तम् ॥ ... वेदविधानमप्रामाण्यबुध्यापरित्य
धनत्वादनुष्ठेयत्वमन्येषांनाद्दिष्टस्वाभावः ॥ ... ॥ शास्त्रविधिमुत्सृज्येत्यस्य ...

सर्वगुणपूर्णायनमः ॥ ॥ ॐ ॥ श्री॥गुणभेदान् प्रपंचयत्यनेनाध्यायेन ॥ शास्त्रविधिमुत्सृज्य अज्ञात्वा

अर्जुन उवाच ॥ ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयाऽन्विताः ॥ तेषां निष्ठा तु का

कृष्ण सत्वमाहो रजस्तमः ॥ १ ॥

॥वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मनेति विधिमुत्सृज्य हि तैः॥
... ॥ ननु प्राप्तपरित्याग उत्सर्गः ॥ एवं च
ज्येत्यर्थप्रतीतिं निवारयितुमाह ॥ शास्त्रेति ॥ ...
प्रतीतार्थ एव युक्तो न ज्ञात्वेति तत्राह ॥ वेद इति ॥ अर्थज्ञानपर्यंतोऽयं विधिः ॥

॥ कृ० ॥ ... गुणनिमित्ता इति ॥ अनेन गुणैर्भेदा इति विग्रहः योग्यतया श्रद्धादिसंबंध इ
त्युक्तं भवति ॥ इत्युक्तत्वादिति ॥ ... कल्पनीयं दृष्टं तं
र्थमित्यत आह ॥ सात्विकानामिति॥अज्ञात्वेति ... ॥
भवत्यदृष्टकल्पनस्यान्याय्यत्वेन ...

॥ श्री० ॥ तथा हि ॥ प्रमाणलक्षणे प्रथमस्याद्ये प्रथमाधिकरणे चिन्तितम् ॥ धर्मविचारशास्त्रम् [illegible] ॥ [illegible] स्वर्गाद्यनुष्ठानं वर्णाश्रमारंभणीयमथवा संशय ॥ तदर्थमिदं चिंतनी
यम् ॥ स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः [illegible] अक्षरग्रहणमात्रं [illegible] अक्षरग्रहणमात्रे [illegible] ज्ञायमान [illegible] अर्थज्ञानरूपदृष्टफलार्थ इति ॥ यद्यक्षरग्रह
णमात्रपर्यवसायी स्वाध्यायाध्ययनविधिः [illegible] नाध्ययनविधिर्विचारशास्त्रारंभप्रयोजकः ॥ यदि तु [illegible] अर्थज्ञानरूपदृष्टफलार्थः [illegible] न विचारमंतरेण संभवती
त्युक्तविधिर्विचारशास्त्रारंभप्रयोजक इति पूर्वपक्षसिद्धांतयोः फलविभागः ॥ पूर्वपक्षस्तु अर्थज्ञानार्थोऽध्ययनविधिरिति वदन् प्रष्टव्यः किमध्ययनमप्राप्तमध्ययनमत्रार्थज्ञानाय विधीयते किंवा
पक्षे प्राप्तमवघातवन्नियम्यत इति ॥ नाद्यः [illegible] वेदाध्ययनमर्थज्ञानपूर्वकमध्ययन [illegible] विधिनिरपेक्षेणाध्ययनेनार्थज्ञानहेतुत्वस्य प्राप्तत्वात् ॥ नद्वितीयः ॥ वैष
म्यात् ॥ अवघातनिष्पन्नैरेव तंडुलैः [illegible] दर्शपूर्णमासौ [illegible] न [illegible] प्रमाणमित्यस्य नियमस्तु अत्र तु गुरुपूर्वकाध्ययनं विना लिखितपाठ
जन्येनाप्यर्थज्ञानेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमो [illegible] ॥ [illegible] विचारशास्त्रारंभस्य न [illegible] ॥ नहि श्रूयमाणस्यविधेः कागतिरिति चेत्॥
स्वर्गापेक्षयाऽक्षरग्रहणमात्रं विधेयमिति वदामः ॥ [illegible] स्वर्गो विश्वजिन्न्यायेन कल्पनीयः ॥ [illegible] विनाऽपि विधिनाऽदृष्टलाभाद्गति तद्दर्शना ॥ कल्प्यस्तु विधिसा
मर्थ्यात् स्वर्गो विश्वजिदादिवदिति ॥ किं चैवं सति ॥ [illegible] स्नायादिति शास्त्रम् [illegible] ॥ अत्र वेदाध्ययनसमा [illegible] ॥ [illegible] वेदे धर्मविचाराय
गुरुकुल एवावासः कर्तव्यस्तेन [illegible] ॥ तस्माद्विचारशास्त्र [illegible] धर्ममिह [illegible] शास्त्राच्च धर्मविचारशास्त्रं नारंभणीयमिति ॥ सिद्धांतस्तु ॥ य
दुक्तं प्रमाणांतरसिद्धत्वान्नापूर्वविधिरिति तत्तथैव ॥ नियमविधिस्तु [illegible] ॥ यथा दर्शपूर्णमास [illegible] अवघातनियम [illegible] पूर्वस्य [illegible] एवमशेषक्रतुस
न्यमपूर्वं जातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्यापूर्वस्य [illegible] भविष्यति ॥ नियमादृष्टानर्थक्ये श्रूयमाणो विधिरनर्थकः स्यात् ॥ न च विश्वजिन्न्यायेन स्वर्गार्थत्वं युक्तम् ॥ दृष्ट
फलेऽर्थज्ञाने संभवत्यदृष्टकल्पनाया अयुक्तत्वात् ॥ [illegible] ॥ [illegible] फले [illegible] नादृष्टकल्पना ॥ [illegible] नियमार्थत्वाच्चानर्थक्यं भविष्यतीति ॥ नन्वेवमपि [illegible] व्याकरणा
धीतसांगस्याधीतवेदस्य पुरुषस्यार्थज्ञानसंभवान्न विचारशास्त्रस्य कृत्यमिति चेन्न ॥ ज्ञानमात्रस्य [illegible] निर्णयस्य विचाराधीनत्वात् ॥ न ह्यक्ताः शर्करा उपदधातीत्यत्र घृतेनैवांजनं न तै
लादिनेत्ययं निर्णयो व्याकरणेन निगमनिरुक्तादिना वा सिध्यति ॥ विचारशास्त्रं तु तेजो वै घृतमिति ॥ [illegible] वाक्यशेषादयं निर्णीयते ॥ अतो विचारो वैधः ॥ वेदमधीत्य स्नायादिति विचारशा
स्त्रं त्वध्ययनसमावर्तनयोः पूर्वापरीभावमात्रमवगमयति न तु [illegible] ॥ तस्माद्विचारशास्त्रमारंभणीयमित्येवमर्थज्ञानपर्यंतोऽयं वेदविधिरिति द्रष्टव्यम् ॥

॥ श्री॰ ॥ द्विजन्मन इति ॥ देहोत्पत्त्योपनयनेन चेति द्विवारं जन्मवतो ब्राह्मणादित्रैवर्णिकस्येत्यर्थः ॥ अनुगतेत्यस्यार्थो वेदतदर्थाधिगतियोग्यत्वेनेति ॥ ये इत्यस्य पाठो द्रष्टव्यः । ना
न मानूनबुद्धीनित्यनुवादवल्याद्विविर्लभ्यत इत्याह ॥ मानूनबुद्धयोऽपीति ॥ न पठंते नाभिगच्छंतीत्यन्वयो द्रष्टव्यः ॥ ननु बौद्धादिष्वामसत्वाभावात्ते तामसा इत्युक्ते कथं वक्तव्योक्तिवैयर्थ्य
दित्वं स्यादित्यत आह ॥ तदीयेति ॥ बौद्धादिसंबंधी यथ. ॥ बौद्धादीनां तामसत्वस्येति यावत् ॥ अविकल्पितत्वात् ॥ निश्चितत्वात् ॥ वक्तव्येति ॥ तामसा इत्युक्तत्वस्यानपेक्ष
त्वित्यर्थः ॥ तद्विरुद्धेति ॥ तद्विरुद्धोक्तिरूपो दोषश्च स्यादित्यर्थ. ॥ उत्तरत्वात्प्रयेति ॥ तथा अनुक्तत्वे बौद्धादितामसत्वनिरूपणोक्तिरूपमित्यर्थ ॥ कि स्यादिति । विरुद्धोक्ति
त्वं कथं स्यादित्यर्थः ॥ कथमितिचेत्तत्राह॥तथा चेति॥यथा तेषां पाक्षिकं सात्विकत्वमायाति तथा यो यच्छ्रद्ध इत्यत्र वक्ष्याम इत्यर्थः ॥वेदोक्तमप्रामाण्यबुध्या परित्यज्य श्रद्धयाऽन्विता
ये यजंते तेषां का निष्ठेति प्रश्ने विशेषणत्वेनोक्तां श्रद्धां सात्विकत्वादिना विभज्य तदाश्रयेण वेदाप्रामाण्यवादिनां सात्विकत्वादित्वरूपकथनेन पाक्षिकं सात्विकत्वं स्पष्टमिति भावः ॥

अयं च सर्वान्द्विजन्मनः प्रापस्तेनाज्ञानिभिरुक्तमृष्टश्च अतोऽज्ञात्वेति युक्तमित्यर्थः ॥अत्र श्रुतिसंमतिं चाह ॥ य इति ॥न चार्थमधिगच्छंति॥
सहानूनया वेदतदर्थाधिगतियोग्यया बुध्या वर्तमानानप्यानूनबुद्धयोऽपि ये वेदं न पठंत इति योज्यम्॥अप्रामाण्यबुध्या परित्यज्येत्येवार्थःकिं
न स्यादित्यत आह॥अन्यथेति ॥यद्यत्र वेदविरोधिनांबौद्धादीनां निष्ठा पृच्छ्येत तदा ते तामसा इत्येवोत्तरमुच्येत॥तदीयतामसत्वस्याविकल्पि

ये वै वेदं न पठंते न चार्थं वेदाङ्गांस्तान्विद्धि मानूनबुद्धानिति माधुच्छंदसश्रुतिः ॥ अन्यथा तामसा इ त्यवोच्येत ॥ न तु विभज्य ॥

तत्वादिति भावः॥न केवलं वक्तव्यानुक्तिरेवदोषः किं तु तद्विरुद्धोक्तिश्च स्यादिति भावेनाह॥न त्विति॥त्रिविधा भवति श्रद्धेत्यादिना श्रद्धा
विभज्योत्तरं नोच्येत इत्यर्थः॥एवमुक्तस्वचनेऽपि किं स्यादिति चेन्न वेदाप्रामाण्यवादिनामपि पाक्षिकं सात्विकत्वं स्यात॥तथा च वक्ष्याम ः॥

॥ कृ॰ ॥ क्रियाकांक्षायां न चार्थमित्यतः परं अध्याहार्यमाह ॥ न चार्थमधिगच्छंतीति ॥ गतं शेषमित्यनेन पद्यते ॥ ननु मानूनबुद्धीनित्यस्य वेदोऽज्ञानेति विशेषणत्वे वैय
र्थ्यमित्यत आह ॥ मानूनबुद्धयोऽपीति ॥ तथा च मूलं प्रदर्श्य इत्यादि तेन ... ॥ अविकल्पितत्वादिति ॥ पाक्षिकत्वाभावात॥ नियतत्वादिति यावत् ॥ ननूत्तर
श्रद्धाविभागस्योक्तत्वात्कथं वेदाप्रामाण्यवादिनां पाक्षिकसत्वसंभव इत्यत आह ॥ तथा च वक्ष्याम इति ॥ ... इति शेषः ॥ तथाहि वेदविधिमजानतां
विशेषणत्वेनोक्तां श्रद्धां सात्विकत्वादिना विभज्य तदाश्रयेण तेषां स्वरूपमुक्तम् इति त्रिविधेत्यादिना पर्य ... न ये शास्त्रविधिमुत्सृज्येत्यनेन वेदाप्रामाण्यवादिनां अग्रे तेषां
पाक्षिकं सात्विकत्वं स्यादिति युक्तमिति भावः ॥ यद्यपि स्पष्टमेतत् ॥ तत्र नाभिहितम् ॥ तथाऽप्यभिहितं वक्ष्याम इत्युक्तम् ॥ १ ॥

॥ श्री० ॥ तदपीति ॥ पाक्षिकं सात्त्विकत्वमपीत्यर्थः ॥ वेदविरोधित्वं ॥ वेदाप्रामाण्यवादित्वम् ॥ धर्मिणश्चेति ॥ सात्त्विकाश्चेत्यर्थः ॥ वेद इतीति ॥ अखिलोऽपि वेदो धर्ममूलं धर्मज्ञप्तेः कारणम्॥तद्विदाम्॥वेदविदां मन्वादीनां स्मृतिशीले॥स्मृतिस्तत्कृतो ग्रंथः शीलं मनोगतिश्च धर्ममूलमिति संबंधः॥तत्स्वरूपचित्तत्वाद्यो यो देवमनोगतः॥स एव धर्मो विज्ञेय इति वचनादिति ध्येयम् ॥ १ ॥ ननु श्रद्धां विभज्य तेषां स्वरूपं कस्मादुक्तव्यम् ॥ अज्ञानस्यैव भेदकत्वमंगीकृत्य तदाश्रयेण तेषां स्वरूपं कस्मान्नोच्यत इत्यत आह ॥ अज्ञानचेति ॥ कुत इत्यत आह ॥ त्रयाणामपीति ॥ सात्त्विकानां राजसानां तामसानां त्रयाणामप्यज्ञानसंभवादित्यर्थः ॥ नचाज्ञानप्रभेदानां भेदकत्वमंगीकृत्य तदाश्रयेणैव तेषां स्वरूपमुच्यतामित्यत आह ॥ न चाज्ञानस्येति ॥ तद्विशेषणत्वेन ॥ अज्ञानिविशेषणत्वेन ॥ तदाश्रयेणेति ॥ सात्त्विकत्वादिभेदभिन्नश्रद्धाश्रयेणेत्यर्थः ॥ २ ॥

तदपि स्यादिति चेत् न ॥ सात्त्विकत्ववेदविरोधित्वयोःसहानवस्थानादित्याह ॥ यदीति ॥ सहानवस्थानमपि कुतो निश्चेयमिति चेत् ॥ सात्त्विका हि धर्ममाचरंति ॥ सत्वाद्धर्मो भवेत्पुंसामितिवचनात् ॥ तथा च वेदविरोधिनो धर्मिणश्चेत्युक्तं भवति ॥ एवं च वेदविरोधी धर्म इत्यापद्येत॥तच्चानुपपन्नमित्याह॥न हीति॥कुतो नेत्यत आह॥वेद इति॥१॥ननु तेषां निष्ठा तु केति पृष्टे सात्त्विकत्वादिकं वक्तव्यम्॥त्रिवि

यदि सात्त्विकास्तर्हि नोत्सृष्टशास्त्राः ॥ न हि वेदविरुद्धो धर्मः ॥ वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदामिति हि स्मृ

॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ॥ सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

तिः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय इति च भागवते ॥ १ ॥ अतो विभज्याह ॥ त्रिविधेत्यादिना ॥ २ ॥

धेत्यादिकं तु किमर्थमुच्यत इत्यत आह ॥अत इति॥यतएवमर्जुनेन वेदविधिमजानतां निष्ठा पृष्टा अज्ञानं च भेदकं त्रयाणामपि संभवात्॥ न चाज्ञानस्य प्रभेदाः संति।अतः श्रद्धयान्विता इति तद्विशेषणत्वेनोक्तां श्रद्धां सात्त्विकत्वादिना विभज्य तदाश्रयेण तेषां स्वरूपमाहेत्यर्थः ॥२॥

॥ कृ० ॥ ननु तर्हि तद्विशेषणीभूताज्ञानं विभज्य निष्ठोच्यतामित्यत आह ॥ अज्ञानं चेति ॥ ननु अज्ञानानन्तभेदास्तदाश्रया निष्ठाभेदाः सन्तीत्यत आह ॥ न त्वज्ञानस्येति ॥२॥

१ स्कं. ६ अ. १ श्लो. ४० वक्तव्यत्वेनाविरोध. ॥ २ प्राणादृशां ?? ?? धारा ॥

॥ श्री० ॥ कथं न व्याहतमिति ॥ [illegible] ॥ तात्पर्यं मनसि निधायाह ॥ जीव इतीति ॥ येन ॥ वाक्येन ॥ ननु ॥ [illegible] ॥ ३ ॥ प्रतिज्ञातम् ॥ श्रद्धात्रैविध्यम् ॥ ४ ॥ ५ ॥

सात्विकत्वादिभेदेन श्रद्धा त्रिविधेत्युक्ता पुनः सत्वानुरूपा सर्वस्य श्रद्धा भवतीति वचनं कथं न व्याहतमित्यत आह॥ सत्त्वेति ॥ चित्तं चैतन्यम् ॥ जीव इति यावत् ॥ ननु श्रद्धास्वरूपमेव निरूपितम् ॥ न तु तदाश्रितत्वजीवस्वरूपमतो न संगतमुत्तरमित्यतो येन तदुच्यते तत्पठित्वा व्याचष्टे ॥ य इति ॥ इत्यादिज्ञानमिति शेषः ॥ राजसश्रद्धो राजसः ॥ तामसश्रद्धस्तामस इत्यर्थः ॥ ३ ॥तांशृण्विति प्रति

सत्त्वानुरूपा ॥ चित्तानुरूपा ॥ यो यच्छ्रद्धः स एव सः ॥ सात्त्विकश्रद्धः ॥ सात्त्विकइत्यादि ॥ ३ ॥ कः

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ ३ ॥
यजंते सात्त्विका देवान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥
अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥

सात्त्विकश्रद्ध इत्यादि विभज्याह ॥ यजंत इत्यादिना ॥ ४॥ ५ ॥

ज्ञातं नोच्यते ॥ यजंत सात्विका इत्यप्रस्तुतं चोच्यत इत्यत आह ॥ क इति ॥ इत्यादि जिज्ञासायामिति शेषः ॥ विभज्य श्रद्धास्वरूपम् ॥ प्रतिज्ञातं श्रद्धात्रैविध्यमेवोच्यते ॥ अतो नासंगतिरिति भावः॥ एतेन सात्विका इत्यादेः सात्विकश्रद्धा इत्यादिरर्थ उक्तो भवति।४ ॥५॥

॥ कृ० ॥ ननु यो यच्छ्रद्धः स एव स इत्यस्योपपादनाय सत्वानुरूपेत्युक्तम् ॥ [illegible] ॥ चैतन्यमिति॥ कचित्सत्वं जनार्दन इत्युक्तेः सत्व शब्दार्थत्वेनेश्वरचैतन्यग्रहणं उपपादनाल्लाभ एवेत्यत आह ॥ जीव इति यावदिति ॥ सत्वं जीवः कचित्प्रोक्त इति शब्दनिर्णयादिति भावः ॥ ३ ॥ ४ ॥ ५ ॥

१ शास्त्रविधानमजानंतोऽपि ॥ इतिसर्वत्रान्वयम् ॥ २ क्रमादयश्चत्वारइत्यादिप्रामितम् ॥ [illegible] ॥ तत्रविहितम् ॥ २ कुर्वंत ॥

॥ श्री० ॥ कर्शनाकर्शनरूपो विकारः ॥ ननु कर्शयन्तीति तावण्णिजंतोऽयं शब्दः ॥ तथा च तत्करोति तदाचष्ट इति ॥ करणाचक्षणाद्यर्थ एव णिचो विहितत्वात् पीडां करोतीति पीडयन् भृशमाचष्ट इति भृशयन्नित्यादिप्रयोगदर्शनेन च दृष्टेर्णिजर्थत्वाभावात् भगवत्कर्शनं नामाल्पत्वकरणमल्पत्वाचक्षणामित्येव वक्तव्यत्वेनाल्पत्वदृष्टिरेवेति कथमुक्तमित्यत आह ॥ प्रातिपदिकादिति ॥ प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चेति धातुसूत्रम् ॥ तस्यार्थः ॥ यस्मात्कस्माच्चित्प्रातिपदिकात् यस्मिन् कस्मिंश्चिद्धात्वर्थमात्रे विवक्षिते सति णिच् प्रत्ययो विकल्पेन भवति ॥ स च प्रत्यय इष्ठवद्भवति ॥ इष्ठनप्रत्ययकार्यभूतं यत् प्रातिपदिकटिलोपादि तत्कारी भवतीति ॥ एवं च प्रकृते कर्श प्रातिपदिकात् दृशिर् प्रेक्षण इति दृशधात्वर्थभूताया दृष्टेर्विवक्षितत्वात् तस्यां विवक्षितायां सत्यां णिच्प्रत्यये णकारचकारयोर्लोपे कृश इ इति जाते णिच्प्रत्ययस्येष्ठनप्रत्ययकार्यकारित्वेनोक्तत्वात्तस्य च टिलोपकारकत्वस्वभावस्यटेः॥भस्य टेर्लोपःस्यादिष्ठेमेयस्सु परत इत्युक्तत्वेन णिच्परे टीभूतस्य शकारपरस्य अकारस्य लोपे कृश इति जाते सार्वधातुकार्धधातुकयोरिति गुणे उरण्रपर इति गुणस्य च रपरत्वे कर्श् इ कर्शीति जातेऽस्माल्लटि तस्य शत्रादेशे शकारऋवर्णयोर्लोपे अत्इति जाते इकारस्य एकाररूपगुणे तस्य चापरत्वेऽयादेशेकर्शयादिति प्रातिपदिकसिद्धिः॥ पश्चात्स्वाद्युत्पत्तौ नुमागमे मित्त्वादंत्यादचःपरे जाते कर्शयन् त् स् इति स्थिते हल्ङ्याभ्य इति सोर्लोपे संयोगांततकारलोपे च कर्शयन्नित्यादि सिध्यतीति द्रष्टव्यम् ॥

ननु निर्विकारस्य भगवतः कथं मां चैवांतःशरीरस्थं कर्शयंत इति कर्शनमुच्यत इत्यत आह ॥ भगवदिति ॥ प्रातिपदिकाद्धात्वर्थे बहु

भगवत्कर्शनं नामाल्पदृष्टिरेव ॥

कर्षयंतः शरीरस्थं भूतग्राममचेतसः॥मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥

लमिति वचनात् दृष्टिरपि णेरर्थ इति भावः ॥

॥ कृ० ॥ ननु हेतुमति च तत्करोति तदाचष्ट इत्युक्तेः प्रयोजकव्यापारस्याख्यानकरणयोश्च णिजर्थत्वात्कथं दृष्टिर्णिजर्थ इत्यत आह ॥ प्रातिपदिकादिति ॥ बहुलमिष्ठवच्चेति पाठः ॥ प्रातिपदिकाद्धात्वर्थे वाच्ये बहुलं णिच् इष्ठन्प्रत्यये परे यथाकार्यं तथा णिचि परे स्यादित्यर्थः ॥ तथा च कृश्यतीति कर्शः ॥ कृशतनूकरणइत्यस्मादिगुपधज्ञाप्रीकिरःक इति के प्राप्ते वामरूपन्यायेन पचाद्यच् ॥ ततः कर्शप्रातिपदिकात् कर्शं पश्यतीतिदृशिधात्वर्थे णिच्॥ ॥ णौपरेइष्ठवदित्यतिदेशाट्टिलोपः ॥ कर्शीत्यस्य सनाद्यंता इति धातुत्वे तस्माल्लटि लटः शंत्रादेशे शपि सार्वधातुकेति धातोर्गुणे अयादेशे शपोऽकारस्यातोगुण इति पररूपे स्वाद्युत्पत्तौच कर्शयंत इति रूपम् ॥ तस्यार्थोऽल्पं पश्यंत इतीति बोध्यम् ॥ एतेन कृशप्रातिपदिकात् णिचि कृशयंत इति स्यादित्यपास्तम् ॥ अन्ये तु कर्शनं कर्शः ॥ भावे घञ् ॥ ततः अर्शआद्यच् ॥ ततो णिजादीत्याहुः ॥ दृष्टिरपि णेरर्थ इति ॥

॥ श्री० ॥ कथं परस्मामित्यत आह ॥ जीवरूपत्वेति ॥ [illegible] मामेवेति [illegible] ॥ त्रूत्रंतमिति ॥ [illegible] कर्शयन्तः ॥ [illegible] समासमांत द्वितीयात्वमिति भाव ॥ कर्मधारयत्वेति ॥ आसुराश्च ते निश्चयाश्चासुरनिश्चयास्तानिति [illegible] ॥ सामानाधिकरण्यमिति ॥ [illegible] सामानाधिकरण्यं पुरुषत्वनिश्च यानुगत [illegible] ॥ तद्रूपरूपार्थत्वाभाव [illegible] नथार्नान [illegible] गौणं न वद्यांनिनि [illegible]

मां चैव जीवरूपेणांतःशरीरस्थमिति [illegible] ॥ जीवरूपत्व [illegible] कृशीकरणत्वात ॥ मदनुशासना करणमेव मत्कर्शनमिति व्याख्यानानि [illegible] ॥ [illegible] ॥ उक्तव्याख्याने श्रुतिमपि चाह ॥ यद्वेति ॥ नैवं महत्त्वविरुद्धम् ॥ द्रष्टेति तृत्रंतम् ॥ कर्शकत्वस्योक्तत्वेन [illegible] ॥ [illegible] ॥ आसुर इति ॥ निश्चयः श्रद्धा ॥ कर्मधारयपक्षे

यो वै महांतं परमं पुमांसं नैवं द्रष्टा कर्शकः सोऽतिपापीत्यनामिम्लानश्रुतिः ॥ आसुरो निश्चयो येषां त आसुरनिश्चयाः ॥ दैवास्तु सात्त्विकाः प्रोक्ता दैत्या राजसतामसा इत्याग्नेवैश्यश्रुतिः ॥ ६ ॥

हि सामानाधिकरण्यं गौणं [illegible] ॥ [illegible] ॥ ननु प्रकरणात्तामसनिश्चयानिति वक्तव्यम् ॥ आसुरनिश्चयानिति कथमुक्तमित्यत आह ॥ [illegible] ॥

॥ श्री० ॥ [illegible] प्रतिपादितं [illegible] मुक्त्वा तत्करोतीत्याह [illegible] नियमा [illegible] ॥ तथैव न द्रष्टृत्वेन महत्त्वदर्शना [illegible] द्वितीयांत मस्तु तथाऽपि द्रष्टेति तृजयुक्तः [illegible] ॥ [illegible] निश्चयग्रहणमित्यत आह ॥ निश्चयः श्रद्धेति गौणानीति [illegible]

॥ श्री० ॥ देवपर्यायेति ॥ देवपर्यायशब्दाः सुरविबुधादिशब्दास्तद्वाच्या इत्यर्थः ॥ दैत्यपर्यायेति ॥ दैत्यपर्यायशब्दाः असुरादिशब्दास्तद्वाच्या इत्यर्थः ॥ तथा च तामसानामसुरशब्दवाच्यत्वादासुरानिश्चयानिति युक्तमित्याशयः ॥ ६ ॥ ७ ॥ ठन्प्रत्ययांतमिति ॥ अनंतरमेवानंतरं तथाचानंतरशब्दात् भवार्थे ठन्प्रत्ययेठस्येक इति सूत्रेण तस्येकादेशे भस्य रकारस्याकारस्य लोपे आनंतरिकेति जाते अजाद्यतष्टाबिति टापि आकारमात्रविहाय सर्वस्यापि लोपेऽकःसवर्णे दीर्घे आनंतरिकेति रूपम् ॥ न नु ठक्प्रत्ययांतमिति पाठः ॥ तथात्वे आनंतरशब्दात् ठक्प्रत्यये ककारलोपे ठस्येकादेशे आनंतरिकेति जाते टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ख्युनामिति सूत्रेण ङीपि आनंतरिकीति भाष्ये पाठः स्यादिति ज्ञेयम् ॥तत्काले ति॥सेवाव्यवहितकाल एवेत्यर्थः ॥ पश्चादिति॥ अव्यवहितकालंविना कालांतरेऽपीत्यर्थः ॥

सात्विकाः देवाः देवपर्यायवाच्याः प्रोक्ताः ॥ राजसास्तामसाश्च दैत्याः दैत्यपर्यायवाच्याः प्रोक्ता इत्यर्थः ॥६ ॥ ७ ॥ प्रीतिविवर्धनाः हृद्या इत्येतयोरर्थभेदमाह ॥ प्रीतिरिति ॥ आनंतरिकेति ॥ ठन्प्रत्ययांतं सेवाव्यवहितकाल इत्यर्थः ॥ प्रियं तत्कालसौख्यदमिदमिति वचनात् ॥

॥ ७ ॥ प्रीतिरानंतरिका ॥ हृद्यत्वं दर्शने ॥

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥७॥आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याःस्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

दर्शनेऽनुभवे सति पश्चादपि यन्मनोहारित्वं तद्धृद्यत्वम् ॥ हृद्यंपश्चान्मनोहारीति वचनादित्यर्थः ॥

॥ क० ॥ ननु तामसेति वाच्ये कथमासुरेत्युक्तमितिप्रश्नस्य तामसा आसुरशब्दवाच्या इत्युत्तरंसंगतं न त्वन्यदित्याशंक्य तथैव व्याख्यातुं सहपाठविरोधपरिहाराय देवास्त्वित्येतद्व्युत्क्रमेण व्याख्याति ॥ सात्त्विका इति ॥ ६ ॥ ७ ॥ ननु ठगंतत्वे ठनंतत्वे वा टिड्ढाणिति ङीपि सत्यानंतरिकीति स्यात् ॥ तेन निर्वृत्तमित्यादेष्ठगाद्यर्थस्य प्रकृतेऽविवक्षितत्वाच्चेत्याशंक्यानंतरिकशब्दार्थं वक्तुं तत्स्वरूपं निरूपयति ॥ आनंतरिकेति ठन्प्रत्ययांतमिति॥ अनंतरस्य भाव आनंतरं पौरुषमित्यादिवद्भावे ष्यञ्प्रत्ययस्तत्तस्त्वस्या अस्तीत्यानंतरिका ॥ अत इनिठनाविति ठन् ॥ ठस्येकः यस्येतिचेत्यकारलोपः तनस्त्रीत्वाट्टाप् एव सति आनंतरिकेति रूपं भवतीत्यर्थः ॥ अन्यत्सुगमम् ॥ ननु किं प्रकृत इत्यत आह ॥ सेवेति ॥ अनुभवेत्यर्थः ॥

१ सात्विकादिजनत्रयस्य ॥

॥ श्री० ॥ प्रसिद्धेति ॥ स्थायित्वापरपर्यायामित्यर्थः ॥ अचिरकाले ॥ निर्वृत्तपाकाः ॥ प्राप्तकालाः ॥ न तदैव पक्का भवंतीत्यस्य फलितमाह ॥ चिरकालं देह इति ॥ असंभवेति॥ तादृशाः पदार्था एव न संतीत्यसंभावनाशंकापरिहारायेत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

आहाराणां क्षणिकानामभावात्कथं स्थिरा इति विशेषणमित्यत आह ॥ स्थिराश्चेति ॥ चस्त्वर्थः प्रसिद्धं स्थैर्यं व्यावर्तयति ॥ तदैवाचिरका

स्थिराश्च न तदैव पक्वा भवंति ॥ तथा ह्याज्यादयः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥
यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥ ११ ॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम् ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

ल एव ॥ पक्वा निर्वृतपाकाश्चिरकालं देहे गुणप्रदा इत्यर्थः ॥ असंभवपरिहाराय तानुदाहरति ॥ तथा हीति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

॥ क० ॥ ननु पक्का इत्यत्र पच्यर्थस्य तदैवेत्यनेन तत्कालत्वमुक्तम् ॥ क्तप्रत्ययेन चातीतत्वमिति व्याघात इत्यत आह ॥ निर्वृतपाका इति ॥ न च निर्वृतेतिक्तेनातीतत्वमुक्तमिति व्याघाततादवस्थ्यम् ॥ अकर्मकत्वात्कर्तरि विहितस्यास्य भूताधिकारविहितत्वाभावादित्याशयात् ॥ ननु तदैव पक्का न भवंतीत्येतन्मांसादितामसाहारसाधारणं पललं च चतुर्दशेत्यादि वैद्यशास्त्रे चतुर्दशघटिकाद्यनंतरं मांसादिपाकस्योक्तत्वादित्यत आह ॥ चिरकालमिति ॥ गुणप्रदाः पुष्ट्यादिहेतवः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

१ दौर्मनस्यम् ॥ अनेनविशेषणेनदुःखादिजनकत्वाभावेकट्वादीनामपिसात्विकत्वमेवेतिज्ञेयम् ॥ २ दुर्गंधि . ३ अपवित्रम् . ४ अनुष्ठीयते ॥ ५ अपिचदंभार्थमेवेतिसंबंधः ॥ ६ अन्नदानहीनम् ॥

॥ श्री० ॥ १४ ॥ १५ ॥ यस्मादेवमिति ॥ यदनेन हीदं सर्वं मतं तस्मात्स मुनिर्यस्मात्स मुनिस्तस्मात्तं मुनीरित्याचक्षत इत्यर्थः ॥ मनज्ञान इति ॥ अत्रनकारस्थअकार उच्चारणार्थः ॥ मन इत्येव धातुः तस्मात् इकारप्रत्यये उपधाभूतस्य मकारस्थस्याकारस्य उकारादेशे मुनिरितिभवतीति द्रष्टव्यम् ॥

॥ १४ ॥ १५ ॥नन्वंगसौष्ठवं सौम्यत्वम् ॥ तत्कथं मानसं तप उच्यत इत्यत आह ॥ सौम्यत्वमिति ॥ मौनं वाङ्नियमनमित्यन्यथाप्रतीतिनिरासार्थमाह ॥ मौनमिति ॥ कुत एतदित्यत आह ॥ बाल्यमिति ॥ युक्तिबलोपेतत्वं बाल्यम् ॥ आगमज्ञत्वं पांडित्यम् ॥ अथ मुनि

॥ १४ ॥ १५ ॥ सौम्यत्वमक्रौर्यम् ॥ अक्रूरः सौम्य उच्यत इत्यभिधानम् ॥ मौनं मननशीलत्वम् ॥

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥
॥१५॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः॥भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥१६॥

बाल्यं चपांडित्यं च निर्विद्याथ मुनिरिति हि श्रुतिः ॥

र्मननशीलो भवतीत्यर्थः ॥ एतेनहीदमित्युक्तमर्थंयदनेनेति हेतुत्वेनोपादत्ते ॥ यस्मादेवं मुनिस्तस्मात्तं मुनिरित्याचक्षते ॥ मनज्ञान इत्यत इकारप्रत्ययः ॥ उपधाया उकारश्च ॥ मुनेर्भावश्चमौनम् ॥

॥ क्र० ॥ १४ ॥ १५ ॥ अंगसौष्ठवं सौम्यत्वमिति ॥ सौम्यं तु सुंदरे सोमदैवते इत्यमरेण सौम्यशब्दस्यसुंदरार्थकत्वोक्तेरिति भावः ॥ भाष्ये सौम्यत्वमक्रौर्यमिति सोमइव सौम्यःइवार्थेशाखादिभ्यो य इति यः ततःस्वार्थे प्रज्ञाद्यणस्य भावः ॥ सौम्यत्वमिति बोध्यम् ॥ पांडित्यमागमज्ञानं बाल्यं ॥ युक्तिमहायतेति प्रमाणानुसारेण व्याचष्टे ॥ ॥ युक्तीत्यादिना ॥ मननशील इति ॥ यद्यपि मौनं तूपासनासिद्धिरित्युक्तेर्ध्यानमेवमौनमित्यन्यत्रोक्तम् ॥ तथाऽपि मौनं मननशीलत्वमित्यर्थे श्रुतेरुक्तत्वात्तदानुकूल्यायैवं व्याख्यातं प्रकारांतरत्वाच्च न विरोधः मनेरुच्चोपधाया इति मनेरिन् उपधाकारस्य चोकार इत्याह ॥ मनज्ञान इत्यादिना ॥ अनुबंधलोपाभिप्रायेणेकार इत्येवोक्तम् ॥ ननु मुनिशब्दस्य मननशीलार्थत्वेऽपि मौनं मननशीलत्वमित्यत्र कथं श्रुतिर्मानमित्यत आह ॥ मुनेर्भाव इति ॥

१यथायोग्यम् ॥२ तत् ॥३ बृहदा०अ० ५ ब्रा० ५ कहोळाख्यम् ॥ स्वं०श्रु०१ ॥ ४ नितरांप्राप्य ॥

॥ श्री० ॥ मौनशब्दस्य [illegible] इत्येवंति ॥ आगमार्थस्येति । [illegible] इति पृच्छति ॥ किं त्विति ॥ [illegible] ॥ अत्रेति । मुनिर्मननशीलो भवतीत्यत्र मननशब्देन प्रसिद्धमननविवक्षायां वाक्यशब्देन पुनरुक्त [illegible] मननशब्दे [illegible] भवतीति न [illegible] ध्यानं [illegible] ॥ [illegible] ध्यानं [illegible] अतो मनन शब्देन ध्यानं ग्राह्यम ॥ ध्यानमननयोः [illegible] मानसत्व [illegible] ॥ वाक्यशब्देन प्रसिद्धमननमेवेति [illegible] । आगमार्थस्य युक्तिभिरनुसंधानमित्युक्ता वाक्यमपि युक्तिभिरनु [illegible] मननानंतरभाविनो मनसो [illegible] ध्यानमि [illegible] ॥ तत्कारणमिति ॥ [illegible] कारणमित्यर्थः ॥ मनसा वा अग्रे संकल्पयत्यथ वाचा व्याहरतीति श्रुतेर [illegible] ॥ [illegible] ॥ मौनपदेन च [illegible] कारणमनो नियमो लक्ष्यते आत्मविनिग्रह [illegible] चक्षुरादिनियम [illegible] चक्षुरादीन्द्रियनियमस्य विलक्षणत्वात् पृथक् न वक्तव्यमित्याशयेन कथंचिदित्युक्तम् [illegible] मननशीलत्वरूपमुख्यार्थः ॥१६॥

तच्च मननशीलत्वाख्यमागमार्थस्य युक्तिभिरनुसंधानम् ॥ उक्तार्थानंगीकारे बाधकमाह ॥ कथमिति ॥ मौनमिति विशेषः ॥ वाङ्नियम एव न मौनं किंत्वत्र तत्कारणमनोनियमो लक्ष्यत इति कश्चित् तदसत् ॥ आत्मविनिग्रह इति पुनरुक्तिदोषात् ॥ कथंचित् तत्परिहारेऽपि मुख्यार्थ

एतन ह्यिदं सर्वं मतं यदनेन ह्यिदं सर्वं मतं तस्मान्मुनिस्तस्मान्मुनिरित्याचक्षत इति भाल्लवेयश्रुतिः ॥

कथं चान्यथा मानसं तपः स्यात् ॥ १६ ॥

संभवे लक्षणाश्रयणस्यैव दोषत्वात् ॥ १६ ॥

॥ टी० ॥ ननु मननात्मज्ञानमेव मननं तस्य च मनोमात्रजन्यत्वात् [illegible] कथमित्यतो मननशीलत्वं निर्वक्ति ॥ तथेति ॥ अनुसंधानस्य मनोमात्रजन्यत्वाद्युक्तमुक्तमिति भावः ॥ तर्हि मानसतपस्त्वं कथमिति पृच्छति ॥ किं त्विति ॥ [illegible] ॥ अत्रेति ॥ ननु मौनपदेन [illegible] कारणत्वेनैव मनोनियमो लक्ष्यते ॥ आत्मविनिग्रहपदेन तु चक्षुरादिनियमहेतुत्वेन विषयस्मरणनियमहेतुत्वेन वा मनोनियमो लक्ष्यत इति न पुनरुक्तिरित्यत आह ॥ कथंचिदिति ॥ यद्वा ननु वागिन्द्रियस्यैव मनसः संयमो मौनपदेन लक्ष्यते ॥ आत्मविनिग्रहस्तु सर्वतो मनोनिरोधात्मकत्वात्सामान्यरूप इति न पुनरुक्तिरित्यत आह ॥ कथंचित् परिहारेऽपीति ॥ आत्मविनिग्रहपदेन तल्लाभेऽपि सामान्यविशेषभावेन पुनरुक्तिं वदतो गौरवमित्यभिप्रेत्य कथंचिदित्युक्तम् ॥ १६ ॥

१ अ० ३ पा० ४ अ० ४ तन्त्रमुनित्वस्यध्यानीभवतीतिव्याख्यानादितिभावः ॥ २ मनोऽनु [illegible] मपिप्रत्यक्षादेरितिभावः ॥

॥ श्री० ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ प्रकृतेति ॥ गुणनिमित्तश्रद्धादीनां भेदमाश्रित्य जीवस्वरूपकथनं हि प्रकृतं तदसंगतमित्यर्थः ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ओमित्यादिकं तु प्रकृतासंगतं कथमुच्यत इत्यत आह ॥ पुनश्चेति ॥

॥१७॥१८॥१९॥२०॥२१॥२२॥पुनश्च कर्मादीतिकर्तव्यताविधानार्थमर्थवादमाह॥ॐतत्सदित्यादिना॥

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः॥अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते॥१७॥
सत्कारमानपूजार्थं तपो दंभेन चैव यत् ॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ॥ देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम्॥२०॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च परिक्लिष्टं तद्राजसमुदाहृतं ॥ २१ ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥
ॐतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताःपुरा॥२३॥

॥ कृ० ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

१ कृतम् ॥ २ भगवदर्पणादियोगेनेतिग्राह्यम ॥ ३ तदिति अत्रान्वेति ॥ उपस्थितंयदितिपूर्वेत्रेतिज्ञेयम् ॥ ४ पातभयेनचलनहेतु ॥ ५ क्षयिष्णु ॥ ६ अविवेकादुराग्रहेण ॥ कर्मणिल्युट् ॥ ७दातव्यंवस्तु॥८पुण्ये ९ पुण्ये॥उत्तमकुलशीलाचारवते॥चतुर्थ्यविपर्ययः॥११पूर्वोपरथवन्नायंकर्मणिल्युडंतः॥किंतुभावे॥१२अन्याय.र्जितम्॥१३दुर्द्दैकवद्भावः॥अनुचितदेशकालयोः॥

॥ श्री० ॥ प्रकृतसंगतिमुपपादयति ॥ **यज्ञेत्यादिना** ॥ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यत इति यज्ञे सात्विकत्वहेतवोऽफलाकांक्षित्वविधिदृष्टत्वादयोऽसाधारणधर्मा उक्ताः ॥ श्रद्धया परया तप्तमिति तपसि सात्विकत्वहेतुभूतः परश्रद्धावत्त्वरूपोऽसाधारणधर्म उक्तः दातव्यमिति यद्दानं दीयतेऽनुपकारिणे इति दाने सात्विकत्वहेतुभूतोऽनुपकारिणंप्रति दातव्यमिति बुध्या देयत्वरूपोऽसाधारणधर्म उक्त इत्यवधेयम् ॥ **साधारणान्** ॥ ओंतत्सदित्यादीन् ॥ विहिताः पुरेत्यनेन पुराकल्पः ॥ आदिपदेन कियते मोक्षकांक्षिभिरित्यादिनोच्यमाना परकृतिर्ग्राह्या ॥ **भावार्थताम्** ॥ भावत्वर्थमुतव्यवहारणार्थताम ॥ **व्याख्यातीति** ॥ करणव्युत्पत्तिमाश्रित्येत्यर्थः ॥ **निर्दिश्यते** ॥ व्यवह्रियते॥ तदेव विवृणोति ॥ **भावार्थत्व इति** ॥ **निमित्तद्वयेनाति** ॥ जगद्यत्र ओतं स्वयं च जगत्योत इति निमित्तद्वयेनेत्यर्थ ॥ अवतेष्टिलोपश्चेतिवचनादिति ॥

कर्मेति यज्ञ उच्यते ॥ आदिपदेन तपोदाने ॥ इतिकर्तव्यतेत्थंभावः ॥ विधानार्थं प्रतिपादनार्थम् ॥ अफलाकांक्षिभिरित्यादिनोक्तत्वात्पुनश्चेत्युक्तम् ॥ यज्ञतपोदानानां सात्विकत्वादिहेतवोऽसाधारणा धर्माः प्रागुक्ताः साधारणांस्तु वक्तुं पुराकल्पादिरूपमर्थवादमाहेत्यर्थः ॥ ब्रह्मशब्दस्य हिरण्यगर्भाद्यर्थतां निर्देशशब्दस्य च भावार्थतां वारयितुं व्याख्याति॥ परस्येति ॥ निर्दिश्यतेऽनेनेति निर्देशोनाम कुत एतदित्यतो ही

परस्य ब्रह्मणो ह्येतानि नामानि ॥ ओतं जगद्यत्र स्वयं च पूर्णो वेदोक्तरूपोऽनुपचारतश्च ॥ सर्वैः शुभैश्चाभियुतो न चान्यैः ॐतत्सदित्येतमतो वदंतीति हि ऋग्वेदखिलेषु ॥

त्युक्तम् ॥ भावार्थत्वे ओम् तत्सदित्येतैः सामानाधिकरण्यानुपपत्तेर्नामार्थत्वमेवांगीकार्यम् ॥ ओमादिकं च परब्रह्मनामत्वेन प्रसिद्धमित्यर्थः ॥ तामेव प्रसिद्धिं दर्शयति ॥ ओतमिति ॥ ओतं प्रविष्टम् ॥ आश्रितं यत्र परमेश्वरे यः स्वयंच जगत्योतः प्रविष्टः पूर्णःअनुपचारतो मुख्यया वृत्त्या ॥ अवतीतं जगद्यत्रेत्यादिना ओंशब्दस्य निमित्तद्वयेन भगवति वृत्तिर्दर्शिता ॥ अवतेष्टिलोपश्चेति वचनात् ॥

॥ क० ॥ ननु कर्मशब्देनैव तपआदेर्लाभसंभवादादिपदं व्यर्थमित्यत आह ॥ **कर्मेति यज्ञ इति** ॥ नन्वत्र यज्ञादीनां सात्विकत्वादिप्रयोजकमुच्यते न तेषां तत्कथमितिकर्तव्यतेत्युक्तमित्यत आह ॥ **इत्थंभाव इति** ॥ धर्म इत्यर्थः ॥ विधिप्रत्ययादर्शनाद्विधानार्थमिति कथमुक्तमित्यत आह ॥ **प्रतिपादनार्थमिति** ॥ तर्हि पुनरुक्तिरित्यत आह ॥ **यज्ञतपोदानानामिति** ॥ **पुराकल्पादीति** ॥ आदिपदेनाश्रद्धया हुतमिति निंदासंग्रहः ॥ **एतदिति** ॥ ब्रह्मनिर्देशशब्दयोः परब्रह्मनामार्थत्वमित्यर्थः ॥ द्वितीयपादस्यच्छद्मार्थः इति विशेष्योक्तौ बीजं वक्तुमाह ॥ **अवतीतमिति** ॥ अवतेष्टिलोपश्चेतीति ॥

॥ श्री० ॥ अवरक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणेत्यादिधातोरत्र प्रवेशार्थकस्यावतेर्मन् प्रत्ययः प्रत्ययस्य टेर्लोप इति उणादिसूत्रार्थः एवं च अवेरस्मात् मन्प्रत्यये तत्र टीभूत स्यान्इत्यस्य लोपे अवम् इति जाते ॥ ज्वरत्वरेत्यादिनोपधाकारस्य वकारस्य चोठि कृते ऊऊइति जाते सवर्णदीर्घे ऊ इति जाते सार्वधातुकार्धधातुकयोरिति गुणे च सति ओमिति सिध्यती ति भावः ॥ नन्वत्र न ज्वरत्वरेति सूत्रेणोठः प्राप्तिः ॥ तत्र क्वौ अलादौ क्विति परतस्तद्विधानादत्र तदभावादिति चेत् उच्यते ॥ छ्वोः शूडनुनासिके चेति पूर्वसूत्रादनुनासिके चेत्य नुवर्तते एवं चानुनासिकस्य मकारस्यात्र परतो विद्यमानत्वात् ऊठ् स्यादेवयद्वा ओतुरित्यादिशब्दानां अक्वित्यपि बाहुलिकत्वेनोठमंगीकृत्य वैय्याकरणैः साधितत्वेन प्रकृतेऽक्वित्यपि ऊठः प्राप्तिरिति ध्येयम् ॥ वस्तुतस्तु छ्वोः शूडनासिके चेत्यनेनैवात्र धातुवकारस्योठि आद्गुण इति गुणे च कृते ओमिति रूपम् ॥ अत्रैत्येधत्यूठ्स्विति छंदस्त्वान्न भवति अत्र चोक्ता रस्य वर्णत्रयात्मकत्वप्रसिद्धिरप्यनुकूला भवतीति ज्ञेयम् ॥ अन्ये तु अवतेर्मनप्रत्यये बाहुलिके वकारस्य संप्रसारणे गुणे च सति ओमिति सिध्यतीत्याहुरित्याद्यस्मदाचार्यचरणकृतसुवा टिप्पण्यनुसारेणालोचनीयमित्युपरम्यते ॥ **साधुभावे चेति** ॥ शुभत्वमत्र साधुभावः ॥ इत्येतदयुक्तमिति ॥ ओमदित्येव वक्तव्यमिति भावः ॥ **नित्यपरोक्षत्वादिति** ॥ तथा चेश्वरस्यापि नित्यपरोक्षत्वादिति भावः ॥

सर्वैरित्यनेन सच्छब्दस्य ॥ साधुभावे चेति वक्ष्यमाणत्वात् ॥ तच्छब्दस्यतु न केनापि ॥ अत ओं तत्सदित्येतमित्ययुक्तमित्यत आह ॥

द्वितीयपादस्तच्छब्दार्थः ॥

द्वितीयेति ॥ वेदोक्तेति द्वितीयपादस्तच्छब्दार्थव्याख्यानपरः ॥ तदिति हि नित्यपरोक्षत्वमुच्यते ॥

॥ कृ० ॥ अवतेर्मन् प्रत्ययः प्रत्ययस्य टिलोपश्चेत्यर्थः ॥ न तु प्रकृतेष्टिलोपः ॥ तथात्वे डिदित्येव ब्रूयादिति बोध्यम् ॥ तथा च प्रवेशार्थादवतेर्मन् प्रत्ययस्तट्टिलोपः ज्वरत्वरेत्यका रवकारयोरूठौ तयोः सवर्णदीर्घः ॥ सार्वधातुकेति गुणश्चेति भावः ॥ **साधुभावे चेति** ॥ शुभधर्मे सच्छब्दवृत्तेर्वक्ष्यमाणत्वादित्यर्थः ॥ तथा च शुक्लादिशब्दस्य शौक्ल्यादिनिमित्तेन त द्वतिप्रवृत्तिवदत्रापि सच्छब्दस्य शुभधर्मनिमित्तेन तद्वतिवृत्तिरित्याशयः ॥ **न केनापीति** ॥ न च द्वितीयपादस्तच्छब्दवृत्तिप्रदर्शक इति वाच्यम् ॥ ओं सच्छब्दयोरुक्तप्रवृत्तिनिमित्त कत्वेउदाहृतनियामकवत्प्रकृते तदभावेन द्वितीयपादस्य परमात्मानुवादकत्वादित्याशयात् ॥ **नित्यपरोक्षत्वादिति** ॥ परोक्षे तदिति विजानीयादित्युक्तेरिति भावः ॥

॥ श्री० ॥ नन्वनुमानेनेद्यत्वेऽपि नित्यपरोक्षस्यार्थकतत्त्वश्रवणत्वासंभवात्कथं वेदैकवेद्यत्वमेव तत्कर्तृत्वमित्यत आह ॥ न चेति ॥ ब्राह्मणादिविधानेति ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुंस्त्युक्तब्राह्मणादिनिर्माणायोगादित्यर्थः ॥ स्तुत्यर्थमिति ॥ स्तुतौ नाविद्यमानोक्तिर्युक्तेत्यर्थः ॥ भूतोक्तीति ॥ तेनेत्यस्य परब्रह्मार्थत्वमंगीकृत्य विद्यमानोक्तित्वसंभवेऽविद्यमानार्थकस्तुत्यर्थत्वायोगादिति भावः ॥ आत्मपूजयाऽपि किं फलमित्यत आह ॥ आत्मपूजया प्राणिनां सुखार्थमिति ॥ द्विधेति ॥ ब्राह्मणादिविषये निर्माणार्थकत्वं वेदविषये व्यंजनार्थत्वमिति द्विधार्थकल्पनमित्यर्थः ॥ स्वातंत्र्यमिति ॥ सजातीयोच्चारणमनपेक्ष्योच्चारयितृत्वरूपमित्यर्थः ॥

न चेश्वरस्वरूपमनुमातुं शक्यम् ॥ अतो वेदैकवेद्यत्वात्तदित्युच्यतइति भावः ॥ सदोंशब्दयोःपरब्रह्मनामत्वे श्रुत्यंतरं चाह ॥ सदेवेति ॥ तेनेति निर्देशपरामर्शइति कश्चित् ॥ तदसदिति भावेनाह ॥ तेनेति ॥ कुत एतन्निर्देशस्य ब्राह्मणादिविधानायोगात ॥ निर्देशस्तुत्यर्थमिदमुच्यत इति चेत् न ॥ भूतोक्तिसंभवेन तदयोगात ॥ ब्रह्मणोऽपि ब्राह्मणादिविधानानुपपत्तेः ॥ प्रयोजनाभावादित्यतआह ॥ आत्मेति ॥

सदेव सोम्येदमग्र आसीदिति च ॥ ओमिति ब्रह्मेति च ॥ तेन ब्रह्मणा ॥ आत्मपूजार्थं वेदविधिर्व्यंजनम् ॥ मा तूक्ता पुरस्तात् ॥ २३ ॥

आत्मपूजया प्राणिनां सुखार्थं ब्राह्मणादयो विहिता इति संबंधः ॥ ब्राह्मणादिवद्वेदानामपि विधानं निर्माणमेवेति ॥ प्रतीतिनिरासार्थमाह ॥ वेदेति ॥ व्यंजनमेव विधानं न निर्माणमित्यर्थः ॥ सकृच्छ्रुतस्य विहितशब्दस्य द्विधाऽर्थकल्पनं कुत इति चेत् ॥ वेदापौरुषेयत्वस्यप्रमितत्वात्॥किं तत्प्रमाणमित्यत आह॥मा त्विति॥परमेश्वरस्य वेदव्यंजनं नाध्यापकवत्॥किं तु स्वातंत्र्यमप्यस्तीति ज्ञापयितुं विधिग्रहणं कृतम्॥

॥ रु० ॥ ननु नित्यपरोक्षत्वस्यानुमानैकवेद्यत्वेनाप्युपपत्तेः कथं वेदैकरूपत्वेन तच्छब्दप्रवृत्तिनिमित्तमुच्यत इत्यत आह ॥ न चेश्वरेति ॥ वैदिकेऽर्थेऽनुमानप्रामाण्यानभ्युपगमादिति भावः ॥ भूतोक्तीति ॥ परब्रह्मार्थत्वे तथा भूतोक्तिसंभवेनेत्यर्थः ॥ नन्वात्मपूजार्थमित्ययुक्तम् ॥ भगवत आप्तकामत्वादित्यत आह ॥ आत्मपूजयेति ॥ स्वातंत्र्यमपीति ॥ अत्र स्वातंत्र्यं नाम न वेदानुकूलकृतिमत्त्वं वेदानामकर्तृत्वापत्त्यादिदोषप्रसंगात ॥ किं तु नियोजनाभिप्रवेशनादौ परानपेक्षत्वम ॥

१ एतेषां संभवइति मतस्यांतः पाठ इति ज्ञेयम् ॥ २ उत्पत्त्युक्तेरित्यर्थः ॥

॥ श्री० ॥ कथं विधिग्रहणेन तज्ज्ञापनमित्यत आह ॥ वेदइत्यादिना ॥ विध्यात्मा ॥ यजेनेति विध्यात्मा अनर्थांतरं पर्याय इत्यर्थः ॥ नियोक्ता किं शब्दो वा उच्चारकपुरुषो वा ईश्व रो वा ॥ नाद्य इत्याह ॥ न चेति ॥ लोकेति ॥ लौकिकवाक्ये वक्तुरेव नियोक्तृत्वदर्शनादित्यर्थः ॥ द्वितीयमाशंक्य निषेधति ॥ न चेति ॥ अव्यवस्थापातादिति ॥ उच्चारकाणाम नंतत्वेन तेषामस्मच्छब्दवाच्यत्वप्राप्त्योपास्यत्वे ब्रह्मैवोपास्यमिति व्यवस्था न स्यादिति भावः ॥ तृतीयमभीष्टयति ॥ तस्मादिति ॥ अज्ञानीदोच्चारणमनपेक्ष्योच्चारयितृ त्वेन स्वतंत्रवक्ता परानधीनस्वाभिप्रायप्रवेशकर्ता भाव्यमित्यर्थः ॥ वक्ता ॥ यजेतिनियोक्ता ॥ ईश्वरस्यैव स्वतंत्रवक्तृत्वे लिङादिशब्दविधानरूपार्थस्येश्वरेण रचितत्वे लौकिकत्वात् विध्यात्मकवेदस्य पौ रुषेयत्वापत्तिरित्याशंक्य निषेधति ॥ नचैवमिति ॥ अनादीति ॥ शब्दार्थसंबंधस्यानादित्वादनादिकालसिद्धशब्दार्थसंबंधेनेश्वरो नियोक्तृत्वनीति नोत्प्रेक्षकत्वं तस्येत्यर्थः ॥ यथोक्तं भ गवत्पादैः ॥ नित्ययोगोऽपि शब्दानामर्थैर्नैव निषिध्यत इति ॥ उक्तं च जैमिनिना ॥ औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इति ॥ तथ च सर्वेषामपीश्वरवाक्यत्वेन तदभिप्रायप्रवेशमङ्गा वान्मामुपासीतेत्यादौ व्यवस्थेति भावः ॥ एवमेव क्वचित्तदितरपुरुषाभिप्रायप्रवेशोऽप्यस्ति ॥ अन्यथा संकल्पप्रार्थनादिवाक्यानामानर्थक्यप्रसंगादिति द्रष्टव्यम् ॥ २३ ॥ २४ ॥ २५ ॥

वेदोहि विध्यात्माऽस्ति विधिः प्रेरणं नियोग इति चानर्थांतरम् ॥ न च नियोक्तारमंतरेण नियोगः संभवति ॥ न च शब्दादीनां नियोक्तुत्वं संभवति ॥ लोकविरोधात् ॥ न चोच्चारक एव नियोक्ता मामुपासीतेत्यादावव्यवस्थापातात् ॥ तस्मात्स्वतंत्रेण वक्ता भाव्यम् ॥ न चैवं पौ

॥ २४ ॥ तत्फलं मे स्यादित्यनभिसंधाय ॥ २५ ॥

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तंते विधानोक्ताःसततं ब्रह्मवादिनाम् ॥ २४ ॥

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः॥दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः॥२५॥

रुषेयत्वापत्तिः ॥ अनादिसिद्धेनैव शब्दार्थसंबंधेन तस्य नियोक्तृत्वाभ्युपगमादिति ॥ २३ ॥ २४ ॥ तदित्यनभिसंधायेति वाक्यं ब्रह्मणीव यज्ञादावपि तच्छब्दस्य प्रवृत्तिं प्रतिपादयतीति ज्ञापयितुं योजयति ॥ तदिति ॥ वेदोक्तं स्वर्गादिकम् ॥ २५ ॥

॥ कृ० ॥ ननु लिङादिशब्दस्य तन्निष्ठव्यापाराख्यशब्दभावनाद्वारा पुरुषस्य तज्ज्ञानद्वारा वा ज्ञानाख्यतन्रूपभावनाया वा प्रवर्तकत्व तत्तद्वादिरीत्या किं न स्यादित्यत आह॥न चशब्दा दीनामिति॥लोकविरोधादिति॥लोके स्वतंत्रवक्तुरेव नियोक्तृत्वदर्शनेन तद्विरोधादिति भावः॥अव्यवस्थेति॥अस्मच्छब्दस्योच्चारकपुरुषवाचित्वादुच्चारकाणां सर्वेषामप्युपास्यत्वप्राप्तौ ब्रह्मै वोपास्यमिति व्यवस्था न स्यादित्यर्थः॥पौरुषेयत्वापत्तिरिति॥स्वतंत्रपुरुषप्रेरकत्वस्यैव पौरुषेयपदार्थत्वादिति भाव॥२३॥२४॥तच्छब्दप्रवृत्तिमिति॥वेदवेद्यत्वेननिमित्तेनेति शेषः॥२५

१ ओमित्यस्यभगवन्नामत्वात् ॥

॥ श्री० ॥ विवक्षितत्वादिति ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्चविहिताः पुरेत्यनेनेत्यर्थः ॥ सूचितमित्युक्तमिति ॥ प्रजननवाचकत्वे तु कमित्येवावक्ष्यदिति भावः ॥ ओमित्युक्त्वाऽन
भिसंधायफलमित्यादिभाष्येण यावद्गीतोक्तेतिकर्तव्यताऽनुक्तेस्तदर्थं भक्त्यातत्स्मरणपूर्वकमेव कर्म सदिति तात्पर्यं मनसि निधाय भाष्येऽनुक्तं पूरयति ॥ ब्रह्माभिसंधाय चेत्यादिना ॥
उक्तोंकारार्थज्ञानपूर्वकमित्यादीनां ब्राह्मणैः सहेत्यंतानां तपआदिकृतामितिभाष्येण प्रत्येकं संबंधो द्रष्टव्यः ॥ तृतीयार्थ इति ॥ निष्पादितमित्यत्र तपआदिकृतां कर्तृकरणयोस्तृतीयेति
कर्तरि तृतीयाविधानात्तपआदिकृद्भिर्ब्रह्मैव निष्पादितं भवतीत्यर्थो द्रष्टव्यः ॥

सद्भावे सत्तायामिति प्रतीतिनिरासार्थमाह ॥ सद्भावेति ॥ प्रजननं प्रागसतः सत्तापादनम्॥ यद्यपि सद्भावशब्दः सत्तामात्रवाची तथाऽप्यत्र
ब्रह्मणोजगज्जनकत्वस्य विवक्षितत्वात्सत्ताविशेषप्रजननपर इति ज्ञायत इति प्रतिपादयितुं सूचितमित्युक्तम् ॥ नन्वनेन यज्ञादीनां केतिक

सद्भावशब्देन प्रजननं सूचितम् ॥ ओमित्युक्त्वाऽनभिसंधाय फलं यज्ञदानतपआदिकृतामतिप्रीतेर्ना
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते॥प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥२६॥
मसाम्याद्ब्रह्मैव निष्पादितं भवतीत्याशयः॥२६॥

र्तव्यता प्रतिपादिता भवतीत्यत आह ॥ ओमिति ॥ उक्तोंकारार्थज्ञानपूर्वकं अनभिसंधाय फलं ब्रह्माभिसंधाय च ब्रह्मज्ञानभक्तिपूर्वकं त
द्विषयत्वेन निष्ठया वेदोक्तप्रकारेण ब्राह्मणैः सहेत्यपि ग्राह्यम् ॥आदिपदेन जपादिग्रहणम् ॥ षष्ठी तृतीयार्थे॥

॥ कृ० ॥ सद्भावशब्दस्य प्रजननार्थत्वमुपपादयितुं प्रजननशब्दार्थमाह ॥ प्रागसत इति ॥ कार्याकारेण प्रागसतस्तदाकारेण सत्तापादनमित्यर्थः॥उक्तमित्यनुक्त्वा सूचितमिति यदुक्तं त
त्कृत्यं वक्तुमाह ॥ यद्यपीति ॥ सत्ताविशेषेति ॥ लक्षणयेति शेषः ॥ यथाक्रमम् ॥ शक्यादन्येन रूपेण ज्ञाते भवति लक्षणे॥ ब्राह्मणाइत्यादिनोंकारस्य ब्रह्मणि निरुक्तत्वात् तदनुरो
धेनाह ॥ ओंकारार्थज्ञानपूर्वकमिति ॥ भाष्येगीतालब्धसर्वेतिकर्तव्यतानुक्तेस्तदर्थत्वेन तदुक्त्या तत्स्मरणपूर्वकमेव कर्मसदिति तात्पर्यानुसारेणाह॥ ब्रह्माभिसंधाय चेत्यादिना जपा
दीति ॥ आदिपदेन पूजादिग्रहणम् ॥ ननु निष्ठाप्रत्यययोगे न लोकेतिषष्ठीनिषेधात्कथं तपआदिकृतां निष्पादितमित्युक्तमित्यत आह ॥ षष्ठीतृतीयार्थ इति ॥ व्यत्ययेनेति शेषः ॥ त
था च कर्तृकर्मणोः कृतीत्युक्तषष्ठ्या एव नलोकेतिनिषेधो न व्यत्ययप्राप्तायाः येननाप्राप्तिन्यायादिति भावः ॥ यद्वा ॥ यदि शेषे षष्ठी तदा कर्तृत्वबोधो न स्यादित्यत आह ॥तृतीया
र्थइति ॥ कर्तृत्व इत्यर्थः॥नलोकेति निषेधस्यानित्यत्वादिति भावः ॥ कर्तृकरणयोस्तृतीयां बाधित्वेयं षष्ठीति ज्ञापयितुं कर्तरीत्यनुक्त्वा तृतीयार्थ इत्युक्तम् ॥

॥श्री०॥तच्छब्दानां संनिवेशनं कुत इत्याशङ्क्य श्रुत्यनुसारेणाह॥नामसाम्येनावगतात्तत्प्रतिमात्वादिति॥ब्रह्मवाचकोंतत्सदिति नामत्रयस्यान्यत्वम॥यज्ञादेर्ब्रह्मसंनिधानेन ब्रह्मप्रतिमात्वं विना नोपपद्यत इति तदन्यथाऽनुपपत्त्याऽवगतात् तत्प्रतिमात्वादित्यर्थः॥तत्र भाष्ये यज्ञादेर्नाम्नां [illegible] प्रतिपादितत्वप्रतीतेराह॥अत एवमिति॥ओमित्युक्त्वेत्यादिकं गीतारूढं करो ति॥अत्र हीति॥ओंतत्सदित्यनेनेति॥प्रतीकग्रहणमिदम॥इत्यादिना प्रकरणेनेत्यर्थः॥एवं ओंतत्सदित्यनेन यज्ञादीनामत्रयं ब्रह्मवाचकत्वेनावगतं तत्र ब्राह्मणास्तेनेत्यर्थेनोंकारस्तदित्यनाभि संधायेति श्लोकेन तच्छब्दः प्रशस्ते कर्मणीत्यनेन सच्छब्द इति नामत्रयं यज्ञादीनां [illegible] प्रतिपादितमित्यर्थः॥ब्रह्मणि यज्ञादौ च व्युत्पाद्येति ॥विहिता इत्यनेनैव तत्सृष्ट्वा तदेवानु प्राविशदिति प्रमाणबलेन विधायकस्य ब्रह्मणः ब्राह्मणादावेतत्त्वस्य विहितब्राह्मणादीनां विधायके ब्रह्मण्योंतत्सत्त्वस्य प्रतिपादनात् परस्परं प्रवेशनकर्तृत्वकर्मत्वाभ्यां ब्रह्मयज्ञाद्योरुभयोरपि ओंकारं व्युत्पाद्येत्यर्थः॥अत एवोमित्युदाहृत्य [illegible] ओंयज्ञादीति ब्रह्मप्रत्यायादि [illegible] इति मन्तव्यम॥उच्चारणाचार इति॥ओमित्युदाहृत्येत्यनेनेत्यर्थः

नामसाम्यात्॥नामसाम्येनावगतात्तत्प्रतिमात्वात्॥घटादीनामपि ब्रह्मप्रतिमात्वसाम्यात्को विशेषो यज्ञादेरित्यत उक्तमतिप्रीतेरिति॥ब्रह्मणः यज्ञादिषु नि ष्पादितं प्रतिष्ठापितम्॥अत एवं क्रियमाणे यज्ञादिकं सात्त्विकमन्यद्राजसं तामसं वेत्येवमितिकर्तव्यता प्रतिपादितेति वाक्यशेषः॥अत्र हि ओं तत्सदिनेन ब्र ह्मणो यन्नामत्रयं तद्यज्ञादेरपि वाचकमिति प्रतिपादितम॥तेन यज्ञादेर्ब्रह्मप्रतिमात्वं सूचितम्॥ब्राह्मणा इत्यादिनोंकारं ब्रह्मणि यज्ञादौ च व्युत्पाद्य तदुच्चा रणाचार उक्तः॥ [illegible] ॥ननु यदि ब्रह्मणि यज्ञादौ च नामसाम्याद्यज्ञादिकृता ब्रह्मनिष्पादकत्वं तदा [illegible] निष्पादकत्वं स्यात्सर्वनामसाम्यादित्यत आह ॥नामसाम्येनेति ॥

असाधारणनामसाम्येनेत्यर्थः॥तेन [illegible] स्यादिति निरस्तम॥तत्र साधारण्यं साम्य चेति व्याख्यातम॥परमसुख्यवृत्त्याऽसाधारण्यम ॥मुख्यवृत्त्या साम्यमित्यंगीकारा त्॥तथा च यज्ञादेरोमादिब्रह्मनामादिसाम्यम [illegible] ब्रह्मप्रतिमात्वं विनाऽनुपपन्नं [illegible] ॥ननु ब्रह्मणो [illegible] निष्पादितत्वमित्यत आह॥प्रतिष्ठापितमिति ॥ नन्वेवं सति यज्ञादीनां [illegible] प्रतिपादितेति [illegible] एवेत्यत आह॥अत एव क्रियमाणमिति॥ उक्तस्य सर्वस्यापि [illegible] गीतासूचितत्वं दर्शयति॥ अत्र हीति॥इत्यनेनेति॥वाक्येनेति शेषः॥प्रतिपादितमिति। ओं तत्सदिति यो ब्रह्मणो निर्देशः॥स [illegible] प्रतिपादयतीति॥त्रिविधः स्मृत इति व्याख्यानादिति भावः॥ विपूर्वाद्दधातेर्मूलविभुजादित्वात्कप्रत्यये अकारलोपे च विहित इति रूपं [illegible] सूचितमिति॥[illegible] ब्रह्मनामप्रयोगस्तस्य तत्प्रतिमात्वं यथा व्यासप्रतिमादाविति व्यासेरिति भावः॥न चैवमोमादिशब्दानां यज्ञादिष्वमुख्यत्वापत्तिरिति वाच्यम॥[illegible] संभवात॥अत एव प्राग्वाचकमित्युक्तम ॥ इत्यादिनेति॥सार्ध श्लोकग्रहणायादिपदम॥ब्रह्माणि यज्ञादौ च व्युत्पाद्येति। [illegible] परस्परम ॥ विहिता विष्णुना तेन विष्णुरेवमिति कीर्तितः ओंतत्सदित्सिन्निदं सर्वमिति चोक्तः स ओमितीति तात्पर्यनिर्णयानुसारेण ब्राह्मणा इति [illegible] परस्परं [illegible] ॥ तत्र ब्रह्मणि ब्राह्मणाद्याश्रयत्वनिमित्तं तत्स्वरूपमोंकारप्रवृत्तिनिमित्तं प्रतिपादितं तेनाविशति प्रविशति ब्राह्मणादिकं [illegible] ब्राह्मणादीनि [illegible] ॥ एवं [illegible] ब्रह्मनिर्मितत्वं चोंकारप्रवृत्तिनिमित्तं यज्ञादौ प्रति पादितं तेनाविशति प्रविशतीति [illegible] इति भावः ॥ तदुच्चारणाचार इति ॥ तस्मादित्यादिश्लोकेनेति शेषः ॥

॥ श्री० ॥ अर्थस्मरणपूर्वकमिति ॥ ओंकारस्य योगव्युत्पादनेनेत्यर्थः ॥ वेदोक्तप्रकारेणेति ॥ विधानोक्ता इत्यनेनेत्यर्थः ॥ ब्राह्मणैः सदेति ॥ ब्रह्मवादिनामित्यनेनेत्यर्थः ॥ यज्ञादिकं कार्यमिति ॥ यज्ञदानतपःक्रियाः प्रवर्तन्त इत्यनेनेत्यर्थः ॥ तच्छब्दो यज्ञादौ ब्रह्मणि चेति ॥ ब्रह्मोद्देश्यकत्वमग्रिमश्लोकस्थनिमित्तेन च यज्ञादौ तच्छब्दो व्युत्पादितः ते न फलमनभिसंधायेति लब्धम् ॥ वेदोक्तत्वरूपप्रवृत्तिनिमित्तेन ब्रह्मणि तच्छब्दो व्युत्पादितस्तेन ब्रह्माभिसंधायेति लब्धमिति भाव ॥ सच्छब्दो ब्रह्मणीति॥प्रजननेनेत्यर्थः॥२६॥

॥ रु० ॥ अर्थस्मरणपूर्वकमिति ॥ ज्ञानार्थमर्थस्मरणं गणानां समुदीरणेति स्मृतिगुणानां ज्ञानार्थत्वादिति भाव ॥ उच्चार्येति ॥ ॐ मित्युदाहृत्येत्युक्तत्वादिति भाव ॥ वेदोक्तप्रकारेणेति ॥ विधानोक्ता इत्युक्तत्वात् ॥ वेदेषु यज्ञादीनां तद्रूपोंकारप्रवृत्तिनिमित्तव्युत्पादनाच्चेति भावः ॥ ब्राह्मणैः सदेति ॥ ब्रह्मवादिनामित्युक्तत्वाद्ब्राह्मणैः यज्ञादीनां तद्रूपोंकारप्रवृत्तिनिमित्तव्युत्पादनाच्चेति भावः ॥ यज्ञादिकं कार्यमिति ॥ यज्ञदानतपःक्रियाः प्रवर्तन्त इति आचारोक्त्या [illegible] भाव ॥ सूचितमिति ॥ अर्थादुक्तमित्यर्थः ॥ यज्ञादौ ब्रह्मणि चेति ॥ तदेतदुक्तं [illegible] [illegible] यज्ञादौ प्रतिपादितं तत्र तच्छब्दप्रवृत्तिनिमित्तं नि

तेनार्थस्मरणपूर्वकमोंकारमुच्चार्य वेदोक्तप्रकारेण ब्राह्मणैः सदा यज्ञादिकं कार्यमिति सूचितम् ॥ तदित्यनेन तच्छब्दो यज्ञादौ ब्रह्मणि च व्युत्पादितः॥तेन फलमनभिसंधाय ब्रह्माभिसंधाय चेति लब्धम्॥सद्भाव इत्यनेन सच्छब्दो ब्रह्मणि व्याख्यातः॥तेन ब्रह्मज्ञानपूर्वकमिति लभ्यते॥२६॥

ष्फलं कर्म तत्स्यादिति श्रुतेः तथा च प्रवृत्तिनिमित्तप्रतिपादनद्वारा तच्छब्दो यज्ञादौ व्युत्पादितः [illegible] ब्रह्म स्यात् [illegible] [illegible] कर्म [illegible] जनार्दनः ॥ अभिसंहितं हि तत्सोंकं ततं वास्तगुणैः संदृति [illegible] नदेशत्वरूपं गुणपूर्णं च ब्रह्म समाप्यते स्यादित्यभिसंधायेत्यादियोजनाया [illegible] गुणपूर्णत्वं अभिसंहितत्वं चेति तच्छब्दप्रवृत्तिनिमित्तत्वयं ब्रह्मणि प्रतिपादितं तेन तच्छब्दो ब्रह्मणि व्युत्पादित इत्यर्थ ॥ सद्भाव इत्यनेनेति ॥ श्लोकेनेति शेषः ॥ अत्र श्लोके प्रजननत्वं [illegible] ॥ अक्लिष्टकारित्वं चेति सच्छब्दप्रवृत्तिनिमित्तद्वयमुक्तं तच्च ब्रह्मणि प्रसिद्धम् ॥ अतः प्रवृत्तिनिमित्तद्वारा सच्छब्दो ब्रह्मणि व्याख्यात इत्यर्थ ॥लभ्यत इति ॥ ओंतत्सदित्यादिप्रकरणस्य यज्ञादीनां सात्त्विकत्वादिनयोजकसाधारणधर्मप्रतिपादने तात्पर्यं वाच्यम् ॥ अन्यथाप्रकरणविरोधात् ॥ श्लोके च [illegible] सच्छब्दप्रवृत्तिनिमित्तं ब्रह्मणि व्युत्पादितं ॥ ततो ब्रह्मज्ञानपूर्वकत्वरूपं प्रयोजकं प्रतिपाद्यत इति लभ्यत इत्यर्थः ॥ २६ ॥

१ अत्रविधिप्रतिपादकपदाभावात् टीकायामुचितमित्युक्तम्॥२ एतेनार्थाद्यज्ञादिपूर्वनिर्देशः ब्रह्मण [illegible] गीतायां भाष्ये [illegible] व्युत्पादितत्वादिति सूचितमिति ज्ञेयम्

॥ श्री० ॥ ब्रह्मविषयत्वेनेति ॥ कर्म चैव तदर्थीयमित्यनेनेत्यर्थः ॥ निष्ठया चेति ॥ यज्ञे तपसि दाने च स्थितिरित्यनेनेत्यर्थः ॥ स्थितेर्निष्ठारूपत्वादिति भावः ॥ २७ ॥ अश्रद्धयेत्यनेनेति ॥ अश्रद्धया हुतादिरसत्त्वे सति तपसैव हुतादीनां सत्त्वे अश्रद्धाविरोधितया भक्तिनिमित्तत्वेन लभ्यत इति भावः ॥ वेदार्थत्वादिति ॥ आदिपदेन ब्रह्मसमूहत्वेन प्रतिपाद्यतया प्रविष्टत्वात् ब्रह्मणि चोदितत्वया प्रविष्टत्वादित्यर्थः ॥ गीतायां सनामाभ्यश्च तदर्थत्वमेवेति तदर्थीयमित्यर्थः ॥ ब्रह्मशब्दानामपि ॥ अनेन तस्य ब्रह्मणो वाचकानामोमादिशब्दानामिति व्याख्यातं भवति ॥ सन्निधेरिति ॥ संनिधेर्निमित्तादवगतं यद्रूपत्वं तत्प्रतिमात्वं तस्माद्ब्रह्मणः प्रतिनिधीयमानत्वादित्यर्थः ॥ तस्येति ॥ कर्तरि षष्ठी तेनोक्तप्रकारेण यज्ञादीनामनुष्ठात्रा ब्रह्म ज्ञातं व्यक्तं भवतीत्यर्थः ॥ ९८ ॥

यज्ञे तपसि कर्म चैवेत्यनेन यज्ञादिषु सच्छब्दो व्याख्यातः॥ तेन ब्रह्मविषयत्वेन निष्ठया चेति लब्धम् ॥ २७ ॥ अश्रद्धयेत्यनेन ब्रह्मभक्तिरपीति ॥ २८ ॥ अत्र श्रुतिसंमतिमाह ॥ तथा चेति ॥ ओंयज्ञाद्याः वेदार्थत्वात् ॥निष्फलं फलोद्देशरहितत्वात्तदर्थं ब्रह्मविषयम् ॥ एवं

॥२७॥तथा च ऋग्वेदखिलेषु ॥ ॐयज्ञाद्यानिष्फलं कर्म तत्स्यात्सद्वैतदर्थं कर्मेति वदंति देवाः ॥ तच्छब्दानां

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

सन्निधेर्ब्रह्मप्रतिस्तद्रूपत्वाज्जानितं ब्रह्म तस्यति ॥ २८ ॥

तच्छब्दानां ब्रह्मशब्दानाम् ॥ यज्ञादिषु संनिधेरवगततद्रूपत्वात्तत्प्रतिमात्वात् तस्योक्तप्रकारेण यज्ञादीनामनुष्ठातुः ॥ २८ ॥

॥ रू० ॥ सच्छब्दो व्याख्यात इति ॥ यज्ञे तपसीत्यनेन यज्ञादिषु निष्ठा सच्छब्दप्रवृत्तिनिमित्तमिति युक्तम् ॥ तथा च तादृशनिष्ठाविषयत्वेन यज्ञादिकं सदित्युच्यत इति लभ्यते ॥ कर्मचैवेत्यनेन भगवदर्थं यज्ञादिकर्मसदित्युच्यत इत्येवं सच्छब्दो यज्ञादौ व्याख्यात इत्यर्थः ॥ तेनेति ॥ कर्म चैवेत्यनेन ब्रह्मविषयत्वं लब्धम् यज्ञे तपसीत्यनेन निष्ठेति यथायोगमन्वयः॥२७॥अश्रद्धयेति ॥ न हि निंदा निंद्यं निंदितुं भवति॥अपि तु स्तुत्यं स्तोतुमिति न्यायेन भक्तिस्तुतौ तात्पर्यादिति भावः॥ब्रह्मशब्दानामिति॥ब्रह्मवाचकोमादिशब्दानामित्यर्थः॥२८॥

॥ श्री॰ ॥ इति यदुपतिविरगीताभाष्यटीकासुप्रकाशयमातिव्यक्तिताभिर्गीर्भिरावेदयित्री ॥ मुलक्लितविद्यतिर्गी तृष्णिगाढाऽत्र चीर्णौ दशम अगमदध्यायोऽतमस्यां समसः ॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रकाशिकायां सप्तदशोऽध्यायः ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां सप्तदशोऽध्यायः ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये सप्तदशोऽध्यायः ॥ १७ ॥

॥ हरिः ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु॰ त्रिगुणविभागो नाम सप्तदशोऽध्यायः ॥ १७॥

॥ कृ॰ ॥ इति श्रीमात्तिमल्लाचार्यसूरिसुनुकृष्णविरचिते प्रमेयदीपिकाप्रकाशे सप्तदशोऽध्यायः ॥

॥ श्री० ॥ प्रणम्य यादवाचार्यगुरूणां पदपंकजे ॥ क्रियतेऽष्टादशाध्यायटीका भावप्रदीपिका ॥ व्यर्थेति ॥ तथा च पुनरुक्तिरिति भावः ॥ संक्षिप्योपसंहरतीति ॥ तथा चोपसंहारार्थत्वात् न पुनरुक्तिरिति भावः॥ ननु ज्ञानं कर्म च कर्ता चेत्यादिना त्रैगुण्यस्यापि वचनात् ॥ कथमन्याप्रतिपाद्यत्वेन साधनमेवोक्तमित्यतोऽनुक्तत्रैगुण्यवादी चायमिति तात्पर्यं मनसि निधायाह ॥ अनुक्तमिति ॥ चतुर्दशाध्यायादावनुक्तमित्यर्थः ॥ १ ॥ नित्येत्यादि ॥ नित्यं संध्यावंदनादि ॥ नैमित्तिकं पितृश्राद्धादि ॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति वचनेन प्रत्यवायपरिहारार्थमेव तेषां कर्तव्यत्वादिति भावः ॥

॥ कृ० ॥ हरिः ॐ ननु त्या

अध्यायप्रतिपाद्यमाह ॥ पूर्वोक्तमिति ॥ साधनं ज्ञानसाधनम् ॥ उक्तस्योक्तिर्व्यर्थेत्याशंकानिरासाय संक्षिप्योपसंहरतीत्युक्तम् ॥ अनुक्तं त्रैगुण्यं च वक्तीत्यपि ग्राह्यम् ॥ १ ॥ काम्यानां कर्मणामित्येतं श्लोकं केचिद्व्याचक्षते ॥ काम्यानां कर्मणामश्वमेधादीनां स्वरूपेण त्यागः

अनंतगुणपूर्णायनमः ॥ ॐपूर्वोक्तं साधनं सर्वं संक्षिप्योपसंहरत्यनेनाध्यायेन ॥ १ ॥ फलानिच्छयाऽ

अर्जुनउवाच॥संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्॥त्यागस्य च हृषीकेश पृथक्के शिनिषूदन ॥ १ ॥ श्रीभगवानुवाच ॥ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥सर्वकर्मफलत्यागं प्राहुस्त्यागंविचक्षणाः ॥२ ॥

करणेन वा काम्यकर्मणो न्यासः संन्यासः ॥ त्यागस्तु फलत्याग एव ॥

संन्यासः ॥ नित्यनैमित्तिकादिसर्वकर्मफलत्यागस्त्याग इति ॥ तदसदिति भावेनाह ॥ फलेति ॥

गो हि पुरुषव्याघ्र त्रिविध इत्यादिना त्यागादीनां गुणनिमित्तकभेदोऽप्युच्यते ॥ तत्कथं साधनमित्येवोक्तमित्यत आह ॥ अनुक्तं त्रैगुण्यमिति ॥ गुणनिमित्तकभेदमित्यर्थः ॥ ननु चतुर्दशादौ त्रैगुण्यस्योक्तत्वात्पुनरुक्तिरित्यत उक्तम॥ अनुक्तमिति॥चतुर्दशाद्यनुक्तमित्यर्थ॥१॥नित्यनैमित्तिकादीत्यादिपदं संग्राह्यार्थम्॥अत एवाग्रे नित्यनैमित्तिकफलस्येत्येवोक्तम्॥

१ त्यागसंन्यासयोरापाततोऽर्थस्वप्रतीतेःप्रश्नः ॥ २ स्वरूपम् ॥

॥ श्री० ॥ नन्वकरणेन वेति पक्षांतेऽश्वमेधादीनां स्वरूपेण [illegible] त्यागमात्रं [illegible] आह ॥ वैकल्पिकेति ॥ [illegible] कर्माणि मम [illegible] फलानि चेति वक्ष्यमाणरीत्या फलेच्छया तदनिच्छया न कर्तुं योग्यत्वात् ज्योतिष्टोमादीनां वैकल्पिक [illegible] ॥ विशेषणत्यागेनेति ॥ फलकामना [illegible] विशेषणत्यागेन वर्थः ॥ नियतका
म्यानामिति ॥ कारीर्यादीनामित्यर्थः ॥ काम्यकर्मणामिति ॥ [illegible] ॥ नित्यनैमित्तिक [illegible] नियतनैमित्तिकफलस्यांतःकरणशुद्धेः स
र्वापेक्षितत्वेन त्यागो न युक्त इति [illegible] तर्हि संन्यासात् त्यागस्य कथं भेद इत्यत आह ॥ करणाकरणे त्विति ॥ त्याग इति शेष ॥ संन्यासशब्दार्थे तु करणं विवक्षितमिति भा
वः ॥ अत एव विशेषणत्यागेनेत्युक्तम् । तथा च [illegible] त्यागः संन्यासः [illegible] त्यागमात्रं त्याग इति द्वयोर्भेद इत्युक्तं भवति । [illegible] जनकेति
नित्यनैमित्तिकादीत्युक्तं [illegible] त्यागशब्दार्थं [illegible] ॥ नित्येति ॥ २ ॥

वैकल्पिककाम्यानां स्वर्गादिफलानिच्छया विशेषणत्यागेन त्यागो नियतकाम्यानां स्वरूपाकरणेन त्यागः संन्यासःकाम्यकर्मणामेव फलत्या
गस्तु त्यागः करणाकरणे तु न विवक्षित इत्यर्थः ॥ कुत एतदित्यत आह ॥ तथा हीति ॥ अकर्मणा अकरणेन जनकादिस्वपत्यादिभिर्मुमुक्षु

तथा हि प्राचीनशालश्रुतिः ॥ अनिच्छयाऽकर्मणा वाऽपि काम्यकर्मन्यासो न्यासःफलत्यागस्तु त्यागः इति ॥ २ ॥
भिरश्वमेधादीनामनुद्दिष्टफलानामनुष्ठानात्काम्यानां स्वरूपपरित्याग एव नित्यनैमित्तिकफलस्यांतःकरणशुद्धेः सर्वापेक्षितत्वेन तत्त्यागोनयुक्तः॥२॥
॥ टी० ॥ शब्दतः प्रतीत [illegible] ॥ वैकल्पिकेति ॥ अश्वमेधादीनामित्यर्थः ॥ एतान्यपि तु कर्माणि मम [illegible] फलानि [illegible] ॥ फलेच्छया तदनिच्छया
न कर्तुं योग्यत्वाद्वैकल्पिककाम्यत्वमिति भावः ॥ विशेषणेति ॥ काम्यत्वं नाम फलेच्छया क्रियमाणत्वम् ॥ [illegible] ॥ नियतकाम्यानामिति ॥ अश्वमेधादिवत्
नया विहितानां चित्रादियागानामित्यर्थः ॥ न [illegible] फलेच्छया तदनिच्छया [illegible] शक्यत्वाद्वैकल्पिकत्वं न शक्यत ॥ अश्वमेधादिनां [illegible] जनकादिभिस्तदननुष्ठानान्नि स्वकाम्यत्वमि
त्याशयात् ॥ किं च यथा ज्योतिष्टोमादीनां फलोद्देशेन च विधिः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिश्रवणात् ॥ तथा चित्रादियागानां न विधिः ॥ अतोऽपि नित्यकाम्यत्वमेतेषामिति ॥
काम्यकर्मणामेवेति ॥ वैकल्पिककाम्यानामेवेत्यर्थः ॥ नित्यनैमित्तिकस्य [illegible] नन्वेवं तर्हि संन्यासात् त्यागस्य कथं भेद इत्यत आह ॥ करणाकरणे त्विति ॥ लक्षणशरीरप्र
विष्टतयेति शेषः संन्यासशब्दार्थे तु करणं विवक्षितमिति भावः ॥ अत एव विशेषणत्यागेनेत्युक्तम् । तथा च [illegible] स्वर्गादिफलत्यागः संन्यासः ॥ तादृशफलत्यागमात्रं
त्याग इति द्वयोर्भेदो बोध्यः ॥ अपव्याख्यानं निराह ॥ जनकेति ॥ २ ॥

॥ श्री० ॥ वक्ष्यमाणरीत्या त्याज्यमित्युक्तपक्षस्यापि सिद्धांतत्वेन पूर्वपक्षत्वाभावादाह ॥ पूर्वोपन्यस्त इति ॥ यज्ञदानेत्येतदपेक्षया पूर्वोपन्यस्त इत्यर्थः ॥ अविरुद्ध इति ॥ न त्याज्यमित्युक्तपक्षेऽपि फलत्यागेन स्वरूपकरणस्य विवक्षितत्वादिति भावः॥नन्वेवमुभयोरपि पक्षयोरविरुद्धत्वे एकेऽपर इति विप्रतिपत्तिः कथमुद्भावितेत्याशयेन पृच्छति ॥ किं त्विति ॥उत्तरमाह॥आपातेति॥त्याज्यमित्यनेन स्वरूपत्याग एवोच्यते न त्याज्यमित्यनेन फलेच्छया कर्तव्यत्वमुच्यत इत्यापातप्रतीतिमपेक्ष्येत्यर्थः॥३॥परम॥अविरुद्धत्वम॥उत्तरवाक्यतात्पर्यमिति

त्याज्यं दोषवदित्यनेन हेयः कापिलानांपक्ष उपन्यस्त इति केचित् ॥ तदसदिति भावेनाह ॥ मनीषिण इति ॥ पूर्वपक्षः ॥ पूर्वोपन्यस्तः पक्षः ॥ ननु यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तादितिभगवन्मतविरुद्धोऽसौ कथं ग्राह्य इत्यत आह ॥ फलत्यागेनेति ॥ फलत्यागाभिप्रायेण यज्ञादेस्त्यागो विवक्षितस्तत्पक्षे न स्वरूपतः ॥कुतः मनीषिण इति विशेषणादेव ॥ अतो न भगवन्मतविरुद्धोऽसौ ॥ कर्मत्यागशब्दः

मनीषिण इत्युक्तत्वात्पूर्वपक्षोऽपि ग्राह्य एव ॥ फलत्यागेन त्यागो विवक्षितः ॥ यज्ञादेस्तत्पक्षे ॥ यस्तु क

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ॥ यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम॥त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४॥

र्मफलत्यागीति च वक्ष्यति ॥ अत एक एवायं पक्षः ॥ ३ ॥ तत्प्रकारं चाह ॥ निश्चयमित्यादिना ॥

कथं फलत्यागेनार्थेनार्थवानित्यत आह ॥ यस्त्विति ॥ नन्वेवं सति पूर्वोत्तरार्धोपन्यस्तयोः पक्षयोरविरोध आपद्यत इति चेत् सत्यमित्याह ॥ अत इति ॥ अतो मनीषिपक्षत्वादेकोऽविरुद्धः ॥ अयं पूर्वोत्तरार्धोपन्यस्तः किंत्वापातप्रतीतिमपेक्ष्य संदेहबीजत्वेन विप्रतिपत्तिरियमुद्भावितेतिभावः ॥ ३ ॥ न केवलं मनीषिण इति विशेषणसामर्थ्यादेवमुच्यते किं तु भगवताऽपि तदविरोधप्रकारस्य व्युत्पाद्यमानत्वादिति भावेनोत्तरवाक्यतात्पर्यमाह ॥ तदिति ॥

॥ कृ० ॥ साधुकापिलपक्षव्यावृत्त्यै हेय इत्युक्तम् ॥ पूर्वपक्षस्य व्याहतत्वं व्याहतमित्यत आह ॥ पूर्वोपन्यस्त इति ॥ अविरुद्ध इति ॥ न त्याज्यमित्युत्तरपक्षेऽपि फलत्यागेन स्वरूपकरणस्य विवक्षितत्वादिति भावः ॥ तर्ह्येक अपर इति विप्रतिपत्त्युद्भावनं कथमित्याशयेन पृच्छति ॥ किं त्विति ॥ उत्तरमाह ॥ आपातेति ॥ त्याज्यमित्यनेन स्वरूपत्याग एवोच्यते ॥ न त्याज्यमित्यनेन तु कर्तव्यत्वमित्यापातप्रतीतिमित्यर्थः ॥३॥उत्तरवाक्यतात्पर्यमिति ॥अनेन निश्चयमित्यादिनेत्यादिपदेन मेधावी छिन्नसंशय इत्यंतस्य ग्रहणमिति सूचितम्॥

॥श्री०॥अनेन निश्चयमित्यादिनेति भाष्ये आदिपदेन त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशय इत्यंतस्य ग्रहणमिति सूचितम्॥तावता ग्रंथेन पुरुषो हीति त्यागस्त्रिविधः प्रतिज्ञाय फलत्याग एव सात्त्विकत्यागः कर्मस्वरूपत्यागस्तु सात्त्विको राजसश्चेति प्रतिपादनेन मनीषिमतयोरविरोधप्रकारस्यैव व्युत्पादितत्वादिति भावः॥पारमहंस्यमेवेति॥तत्रोक्तयोर्यज्ञदानयोरभावादिति भावः॥तथा च पारमहंस्यमकर्तव्यमेवेत्यनेनावतारितमिति भावः॥ननु सत्याश्रमस्योत्तमाश्रमत्वादतिरुत्तममाश्रममाश्रयेदित्ययुक्तमित्यत आह॥यतिहंसादिरिति॥अत्रादिपदेन बहूदककुटीचरयोः संग्रहः॥हंसादीनां स्वरूपं तु॥यज्ञोपवीतवान् एकदंडी शिखारहितो हंसः त्रिदंडी शिखायज्ञोपवीतवान् ग्रामैकरात्रिर्बहूदः त्रिदंडी शिखायज्ञोपवीतवान् स्वपुत्रगृहे पुत्रदत्तान्नः कुटीचः॥शिखायज्ञोपवीतहीन एकदंडी परमहंस इति गीतातात्पर्यनिर्णयाद् द्रष्टव्यम्॥विद्याभययोर्दानकर्मत्वेन दानरूपस्याभावादाह॥विद्याभयविषयोपादानेति॥एवं च ज्ञानं यज्ञो येषां ते ज्ञानयज्ञाः॥ विद्याभयविषयं दानं येषां ते विद्याभयदानाः ब्रह्मचर्यादिरूपं तपो येषां ते ब्रह्मचर्यादितपसः॥ ज्ञानयज्ञाश्च ते विद्याभयदानाश्च ते ब्रह्मचर्यादितपसश्चेति बहुव्रीहित्रयगर्भः कर्मधारयो द्रष्टव्यः॥

न तु परमहंसानां यज्ञदानयोरभावात् कथमुच्यते न त्याज्यं कार्यमेवेति तत्राह॥ यज्ञेति॥ ननु ज्योतिष्टोमादिकमेव यज्ञो धनदानादिकमेव दानं गृहीत्वा पारमहंस्यमेव कुतो न निराक्रियत इत्यत आह॥ अन्यथेति॥ यतिहंसादिः॥ आस्थातुं प्राप्तुम्॥ उत्तमाश्रमं पारमहंस्यं॥

यज्ञभेद उक्तो द्रव्ययज्ञा इत्यादिना॥दाने त्वभयदानमंतर्भवति ॥ एतेषां मध्ये यत्किंचिद्यज्ञादिकं कर्तव्यमेवेत्यर्थः॥ अन्यथा ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा॥ यदीच्छेन्मोक्षमास्थातुमुत्तमाश्रममाश्रयेदित्यादिव्यासस्मृतिविरोधः ॥ ज्ञानयज्ञविद्याभयदानब्रह्मचर्यादितपसो हि ते ॥

नन्वेतेषां मध्य इत्येवं व्याख्यानेऽपि कथं परमहंसानां यज्ञादिसंभव इत्यत आह॥ ज्ञानेति ॥ बहुव्रीहित्रयगर्भः कर्मधारयोऽयम्॥ विद्याभयविषयं दानं येषां ते तथोक्तास्ते परमहंसाः॥

॥ रु०॥तत्रादौ त्यागो हीति त्यागस्त्रैविध्यं प्रतिज्ञाय फलत्याग एव सात्त्विकत्यागः॥ कर्मस्वरूपत्यागस्तु तामसो राजसश्चेति प्रतिपादनेन मनीषिमतयोरविरोधप्रकारस्यैव व्युत्पादितत्वादिति भावः॥ननु सत्याश्रमस्योत्तमत्वात्कथं यतिरुत्तमाश्रममाश्रयेदित्ययुक्तमित्यत आह॥यतिहंसादिरिति॥आदिपदेन बहूदककुटीचरयोर्ग्रहणम्॥परमहंसाः प्रकीर्तिताः॥ हंसो बहूदः कुटिज इत्युक्तोत्तमक्रमाभिप्रायेण हंसादिरित्युक्तम्॥स्थितेरकर्मकत्वादाह॥प्राप्तुमिति॥विद्याभयदानं येषामिति व्याख्यातमित्यत आह॥विद्याभयविषयमिति॥फलितकथनमेतत्॥ अन्यथा समासे विषयपदश्रवणप्रसंगात्॥विग्रहस्तु विद्याभययोर्दानं येषामिति वा विद्याभये दानं येषामिति वा बोध्यः॥ आद्ये षष्ठ्यर्थो विषयत्वम्॥ अंत्ये विद्याभयपदस्य तद्विषयकत्वे लक्षणेति दिक्॥

१ एतेन मनीषिण इति एके अपरे इत्युभयत्रान्वितमिति सूचितम्॥

॥ श्रीः ॥ पुराणेष्विति ॥ स्पष्टमेतत्पंचमस्कंधभागवतादिष्विति द्रष्टव्यम् ॥ उक्तवाक्यादेवेति ॥ ब्रह्मचारीत्यादिवाक्यस्मृतिवाक्यादेवेत्यर्थः ॥ एवमिति ॥ अधिकारिभेदेन पुराणा
नामयोजनइत्यर्थः ॥ एतत्प्रकरणमिति ॥ यज्ञदानतपःकर्म न त्याज्यमिति प्रकरणमित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

ननु पारमहंस्ये हि प्रवृत्तः प्रियव्रतो हिरण्यगर्भेण निवारित इति पुराणेषूच्यते ॥ तत्कथं पारमहंस्यकर्तव्यतेत्यत आह ॥ अतइति ॥ उ
क्तवाक्यविरोधादेव वाक्यत्वाविशेषात् पुराणवाक्यैनैव स्मृतेर्बाधःकिं न स्यादित्यत आह ॥ अन्यथेति ॥ एवमयोजने इतरेषां ब्रह्मचारीत्या

अतो यद्वचोन्यथाप्रतीयतेऽधिकारभेदेन तद्योज्यम् ॥ अन्यथेतरेषांगत्यभावात् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्॥यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च॥कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्६
नियतस्य तु संन्यासः कर्मणो नोपपद्यते॥ मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥७॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्॥स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥८॥
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन॥संगं त्यक्त्वा फलं चैव स त्यागःसात्त्विको मतः॥९

दीनां गत्यंतराभावादप्रामाण्यमेव प्रसज्यत इति शेषः ॥ एवं परमहंसानामपि यज्ञादिकर्तव्यतासंपादनेनेदमपि परास्तम् यत्केन चिदुक्त
म् ॥ अज्ञान्कर्मण्यधिकारिणोऽधिकृत्य एतत्प्रकरणं प्रवृत्तं न परमहंसपरिव्राजकानिति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ कृ० ॥ परमहंसपरिव्राजकानिति ॥ परमहमाख्ययतीनित्यर्थः ॥ परमहंसानां कर्माभावयुक्तिसूचनाय परिव्राजकग्रहणम् ॥ परित्यज्य सर्वं व्रजतीति तदर्थपर्यालोचनया सर्वकर्मा
भावप्रतीतेरिति भावः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

१ द्वंद्वैकवद्भावः ॥ २ ममताऽभिमानरूपस्नेहाख्यम् ॥ ३ नश्वरफलानि ॥ ४ युक्तोनभवति ॥ ५ स्वरूपत्यागएवत्यागोनफलसंगयोरितिमिथ्याज्ञानात् ॥ ६ प्रतिकूलवेदनीयरूपदुः
खकरम् ॥ ७ भगवत्प्रीतिरूपम् ॥ ८ वर्णाश्रमोचितम् ॥ ९ कर्मानुष्ठानमहितः ॥

॥ श्री० ॥ १० ॥ त्यागरूपार्थस्यार्थाभावादाह ॥त्यागशब्दार्थ इति ॥पूर्वपक्षबीजेति ॥ त्याज्यं दोषवदित्युक्तत्यागो यदि सर्वकर्मपरित्यागःस्यात्तदा तन्मतबीजं स्यात् सर्वकर्मपरित्यागः कर्तव्य इति पूर्वपक्षःस्यात् ॥ न चासौ युक्तः हि यस्माद्देहभृताशेषतः कर्माणि त्यक्तुं न शक्यंत इत्येवं पूर्वपक्षबीजनिरासार्थमित्यर्थः॥११ ॥कथं त्यागफलत्वेनोच्यत इति ॥संसारनिवृत्तेर्ज्ञानफलत्वादित्यर्थः॥अत्र संन्यासिनामित्यस्य त्यागिनामित्यर्थकत्वेन नरकस्वर्गमानुषरूपानिष्टेष्टमिश्ररूप॥कर्मफलरूपसंसारः संन्यासिना न भवतीत्युक्त्या तेन त्यागस्त्यागफलमिति लभ्यत इति भावः॥ननु त्यागस्तुतिरिति कस्मादुच्यते वास्तवमेव किं न स्यादित्यत आह॥उपपादितामिति॥ न हि त्यागमात्रानंतरमेव मुक्तिर्भवतीत्यादिना ह द्वादशाध्याय उपपादितमित्यर्थः ॥१२

॥ १० ॥ ननु इति मे पार्थेति भगवता स्वसिद्धांतो निष्टंकितः ॥ अतो न हि देहभृतेति किमुच्यत इत्यत आह ॥ अन्य इति ॥ सर्वकर्मपरित्यागलक्षणस्त्यागार्थस्त्यागशब्दार्थः ॥ पूर्वपक्षबीजनिरासार्थमिति शेषः ॥ ११ ॥ कर्मफलाभावो नाम संसारनिवृत्तिरेव सा कथं त्याग

॥१०॥अन्यस्त्यागार्थो न युक्त इत्याह ॥ न हीति ॥११ ॥ त्यागं स्तौति ॥ अनिष्टमिति ॥ १२ ॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते॥त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १०॥
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥११ ॥
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्॥भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥१२

फलत्वेनोच्यत इत्यत आह ॥ त्यागमिति ॥ उपपादितमेतत् त्यागाच्छांतिरित्यत्र ॥ १२ ॥

॥ कृ० ॥ १० ॥ पूर्वपक्षबीजमिति ॥ सर्वकर्मत्यागः कर्तव्य इति पूर्वपक्षे त्याज्यं दोषवदित्युपन्यस्तम ॥ मतमापातप्रतीतिमपेक्ष्य बीजं तन्निरासार्थमित्यर्थः ॥ ११ ॥ कथं त्यागफलत्वेनेति ॥ संसारनिवृत्तेर्ज्ञानफलत्वादिति भावः ॥ अनेन संन्यासिनामित्यस्य त्यागिनामित्यर्थः सूचितः ॥ नन्वन्वयव्यतिरेकाभ्यां कर्मफलाभावरूपसंसारनिवृत्तेस्त्यागसाध्यत्वमवगम्यते तत्कथमियं त्यागस्तुतिः ॥ मुख्यार्थे बाधकाभावादित्यत आह ॥ उपपादितमिति ॥ न हि त्यागमात्रानंतरमेव मुक्तिर्भवति ततश्चापरोक्ष्यम ॥ ततो मुक्तिर्भविष्यतीत्यादिविरोधादिति बाधकमुपपादितमित्यर्थः ॥ त्यागाच्छांतिरित्यत्रेति ॥ अन्यथा कथं त्यागाच्छांतिरनंतरमित्युच्यतेति भाष्योपात्ते त्यागाच्छांतिरित्यत्रेत्यर्थः ॥ १२ ॥

१ गीतायामनिष्टस्यपूर्वमुक्तत्वादत्र पूर्वनिपातः ॥ नरकादीनामनिष्टादीनां यथासंख्येनान्वयः ॥ २ सात्विकत्यागिनो विशेषणान्याह॥तत्कालदुःखदं कारकं क्लेशदं च ॥३ पूर्वानिपुण्यफले ॥

॥ श्री० ॥ आत्मव्यतिरिक्तान्येवेति ॥ जीवव्यतिरिक्तान्येवेत्यर्थः ॥ तथा च जीवातिरिक्तैरेव कारणैः क्रियाऽनिष्पत्तिप्रसंगो नास्तीत्याशयः ॥ ननुप्रामाणिकत्वेनाभ्युपगतार्थस्य सिद्धांतत्वात्तत्र कथं कारणानि प्रोक्तानीत्यत आह ॥ सिद्धांत इतीति ॥ परव्याख्याने बाधकमाह ॥ कापिलेति ॥ सांख्यं योगः पाशुपतं वैष्णवमेव च ॥ ज्ञानान्येतानि भिन्नानीत्यादिना मोक्षधर्मे इति शेषः ॥ उपनिषत्स्वपीति ॥ प्रत्युत ॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति कर्मकरणस्यावश्यकताया एव प्रतिपादनादित्यर्थः ॥ १३॥ तत्प्रबोधनायेति ॥ अधिष्ठानस्य करणे अंतर्भावस्य सुज्ञानायातद्भावयोग्यमधिष्ठानं निर्दिशतीत्यर्थः ॥

पंचेत्यादेः प्रकृतेन संगत्यप्रतीतेस्तामाह ॥ पुनरिति ॥ न केवलं काम्यानां कर्मणां न्यासः संन्यासः किं तु कर्तृत्वाभिमानत्यागश्चेत्येवं प्रागुक्तं संन्यासं पुनः प्रपंचयितुं आत्मनोऽकर्तृत्वे क्रियाऽनिष्पत्तिप्रसंगादंगीकार्ये कर्तृत्वे कथं तदभिमानत्यागो युक्त इत्याशंकापरिहारार्थमात्मव्यतिरिक्तान्येव कर्मकारणान्याहेत्यर्थः ॥ सांख्यशब्दः कापिलतंत्रे रूढः ॥ कृतं कर्म तस्यांतो निवृत्तिर्यत्रोच्यत इत्युपनिषत्सु कृतांतशब्दं कश्चिद्व्याख्यातवान् तदुभयं निवर्तयितुमाह ॥ सांख्य इति ॥ ज्ञानार्थः सिद्धांतोज्ञानसिद्धांतः सिद्धांत इति शास्त्रं लक्ष्यते ॥ कापिलतंत्रस्य निं

पुनः संन्यासं प्रपंचयितुं कर्मकारणान्याह ॥ पंचेत्यादिना ॥ सांख्ये कृतांते ॥ ज्ञानसिद्धांते ॥ १३ ॥ अ

पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥१३॥
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥१४॥

धिष्ठानं देहादिः ॥ कर्ताविष्णुःस हि सर्वकर्तेत्युक्तम् ॥

दितत्वात् ॥ उपनिषत्स्वपि कर्मत्यागाप्रतिपादनात् ॥ १३ ॥अधिष्ठानादि करण एवांतर्भूतमिति वक्ष्यति तत्प्रबोधनायाधिष्ठानं निर्दिशति ॥ अधिष्ठानमिति ॥ आदिपदेन भूम्यादि ॥ कर्ता जीव इति व्याख्यानमसादिति भावेनाह ॥ कर्तेति ॥ शरीरवाङ्मनोभिः क्रियमाणानां कर्मणां कर्ता कथं विष्णुरित्यत आह ॥ सहीति ॥

॥ कृ० ॥ ज्ञानस्य सिद्धांतत्वाभावादाह ॥ ज्ञानार्थ इति ॥ शाकपार्थिवादिरिति भावः ॥ ननु प्रामाणिकत्वेनाभ्युपगतार्थस्य सिद्धांतत्वात्सिद्धांते प्रोक्तानीति कथमित्यत आह ॥ शास्त्रं लक्ष्यत इति ॥ प्रतिपादकत्वं शक्यसंबंध इति कपिलतंत्रोक्तौ बाधकमाह ॥ कापिलेति ॥ अपव्याख्यां प्रत्याह ॥ उपनिषत्स्विति ॥ १३ ॥ शरीरवाङ्मनोजन्यकर्ममात्राधिष्ठानस्य प्रकृतत्वादाह ॥ भूम्यादीति ॥ आदिपदाद्धामाद्यधिकरणाग्न्यादिसंग्रहः ॥

॥ श्री० ॥ ननु तात्पर्ये त्रिविधः कर्मसंग्रह इति गीतावाक्यव्याख्यानावसरे दैवशब्देनेश्वरस्यमुख्यकर्तृत्वात् स्वतंत्रास्वतंत्रकर्त्रोः कर्तृशब्देनैवोक्तत्वात् [illegible] शा कर्तेतिपूर्ववाक्ये दैवशब्देनेश्वरः कर्तृशब्देन जीव उक्तइति ज्ञायते तथा च जीवस्याकर्तृत्वे प्रमाणमुक्तमिति न तस्य कर्तृशब्दार्थत्वानिराकरणे [illegible] स्वरा धीनत्वाभिप्रायेणेति ॥ भावसाधनेनेति ॥ भावो धात्वर्थः क्रियारूपस्य प्रतिपादकेत्यर्थः ॥ स्रुवादीति ॥ [illegible] भावसाधनत्वे होमादिक्रिया तदर्थं उत हस्तादिक्रिया नाद्य इत्याह॥ भावसाधनार्थस्येति ॥ भावप्रतिपादकशब्दार्थस्येत्यर्थः ॥ [illegible] तत्कारणमध्ये परिगणनमयुक्तमिति भावः न द्वितीय इत्याह ॥ चेष्टेति ॥ तथा च पुनरुक्तिरिति भावः ॥ पुनरुक्तिनामेत्याशंक्य ॥ वायवीया इति [illegible] हण इत्यर्थः ॥ कारकत्वेति ॥ क्रियाजनकत्वेत्यर्थः ॥ हस्तादीनां द्रव्याणां कारणत्वेन तत्क्रियाणामवान्तरव्यापारत्वेन कारकत्वेन प्राणादीनां करणत्वाभावे [illegible] व्यापारत्वेनापि क्रियाजनकत्वाभावेन कारकत्वानुपपत्तेरिति भावः ॥ कारकत्वम् ॥ क्रियाजनकत्वम् ॥ आत्माश्रयादिति भावः ॥

उक्तमुपपादितम् ॥ तथाऽपि जीवोऽत्र कर्ता किं न स्यादित्यत आह ॥ जीवस्य चेति ॥ अपराधीनत्वाभिप्रायेणेदं निराकरणं परमेश्वरे क तृत्वमंगीकृत्यान्यत्र जीवो व्याख्यात इत्यविरोधः ॥ भावसाधनताप्रतीतिनिरासार्थमाह ॥ करणमिति ॥ आदिपदेन स्रुवादि ॥ भावसाध नार्थस्य साध्यत्वाच्चेष्टाग्रहणेन च गृहीतत्वाच्च ॥ वायवीयाःप्राणापानाद्याश्चेष्टा इत्यसत् ॥ द्रव्याभिधाने चेष्टात्वानुपपत्तेः ॥ प्राणनःप्रभिधा

जीवस्य चाकर्तृत्वे प्रमाणमुक्तम् ॥ करणमिंद्रियादि च ॥ चेष्टाः क्रियाः हस्तादिक्रियाभिर्होमादिकर्माणि जायंते ॥

ने साध्यत्वात्कारकत्वानुपपत्तेरित्याशयवानाह ॥ चेष्टा इति॥ क्रियाणां साधकत्वात्कथं कारकत्वमित्यत आह॥हस्तादीति ॥ सावांतरव्यापार हि करणं कारकमुच्यते॥ तत्राधिष्ठानादिपदैर्व्यापारिणोनिर्दिश्यंते ॥ क्रियाशब्देन त्ववांतरा व्यापाराः ॥

॥ कृ० ॥ ननु द्वितीयाध्याये हि प्रतिनिषिद्धस्य क्रियत्वादिना जीवस्याकर्तृत्वनिषेधनार्थादीश्वरस्य कर्तृत्वप्रापणम् ॥ न चार्थिकस्योक्तत्वम् ॥ [illegible] इत्यत आह ॥ उपपादितमिति ॥ नन्वेवं सति स्वतंत्रास्वतंत्रकर्त्रोःकर्तृशब्देनोक्तेरिति [illegible] इत्यत आह ॥ अपराधीनत्वेति ॥ स्रुवादीति ॥ आदिपदेन [illegible] त्याद्युक्तकुठारादिसंग्रहः ॥ भावसाधनत्वे किं होमादिक्रिया विवक्षिता हस्तादिक्रिया वा ॥ आद्ये आह ॥ साध्य [illegible] ॥ चेष्टाग्रहणेनेति ॥ किं प्राणादिशब्देन प्रसिद्धि त्वात् प्राणादिद्रव्यमुच्यते॥उत व्यापारे [illegible] ॥ द्रव्येति॥ अंत्ये आह॥प्राणनादीति॥कारकत्वात॥प्राणादीनामकारणत्वेन तत्क्रियाणां [illegible] हस्तादिक्रियात्वव्यापारत्वेनापि कारकत्वायोगादित्यर्थः ॥नन्वेवं [illegible] नादिसंग्रहः ॥ तथा च नेयं क्रिया प्रतिकारणमात्राकिः स्यादित्यत आह ॥ सावांतरेति

१ आर्थिकोर्थइत्यर्थः ॥

॥ श्री० ॥ ननु क्रियाणां कथमवांतरव्यापारत्वं तज्जनकत्वाभावादित्यत आह ॥ कारकाश्रिताभिरित्यादिना ॥ अधिष्ठानाद्येवेति ॥ कर्तृकर्मकरणसंप्रदानापादानाधिकरणाख्यषट्कारकेषु अधिकरणकरणकर्त्राख्यकारकत्रयमेवोक्तमित्यर्थः ॥तदभावादिति॥नाडिक्षयभयजीवितमरणं [illegible] जागरणम्॥शयनक्रीडानि [illegible] भानुगणं नमकर्मकमाहुरित्युक्तत्वादित्यादिक्रियासु कर्मादीनां कारकाणामननुगमादित्यर्थः ॥ अधिष्ठानादीनां सर्वक्रियास्वनुगमः कुत इत्यत [illegible] नज्ञापकमित्याह॥तथा चेति ॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नर इत्यत्र शरीरशब्देनाधिष्ठानकारकस्य वाङ्मनःशब्देन करणकारकस्य नर इत्यनेन कर्तृकारकस्य च कर्ममात्रांशे [illegible] इत्यर्थः ॥ एवं तर्हीति ॥ कर्मादिकारकाणां सर्वक्रियास्वनुगमाभावेनावक्तव्यत्व इत्यर्थः ॥ मनस इति ॥ ध्यानकरणस्य मनोरूपेंद्रियस्यावांतरव्यापाररूपचेष्टाया अभावादित्यर्थः ॥ कारणत्वमुपपादयति ॥ ज्ञानएवेत्यादिना ॥ चेष्टाकारणामिति ॥ आत्मसंनिकर्षज्ञानद्वारा कारणमित्यर्थः ॥ ध्यानादिपूर्वक्षणे मनसि क्रियाऽसीत् [illegible] ध्यानमेव न संभवत इत्याह ॥ मनोनैश्चल्येति ॥ न चेत्यनंतरं मानसी चेष्टेति शेषः ॥ कारणम्॥ध्यानकारणम् [illegible] भावः॥ननु [illegible] संनिकर्षज्ञानजन्यसंस्कारद्वाराऽपि कथं ध्यानकारणत्वम् ॥ संस्कारस्यापि क्षणिकत्वादित्याशंक्याह॥संस्कारस्येति॥कर्तेत्यनेनेति॥अंतर्यामिणस्य व्यापार [illegible] कर्तृशब्देनोक्त [illegible] तद्व्यापारस्यापि चेष्टापदेनोक्तत्वादित्यर्थः॥सूर्यादय इति ॥देवपदवाच्याइत्यर्थः ॥

कारकाश्रिताभिरवांतरक्रियाभिः प्रधानक्रियाजननं च प्रसिद्धमेवेत्यर्थः ॥ नन्वत्र कारकाभिधानप्रसंगेऽधिष्ठानाद्येवोक्तं कर्मसंप्रदानापादानानि कुतो नोक्तानि ॥ अधिष्ठानादीनां सर्वक्रियानुगमात् ॥ कर्मादीनां तदभावादिति ब्रूमः॥ तथा च वक्ष्यति ॥ शरीरवाङ्मनोभिर्यदिति॥ एवं तर्हि चेष्टाऽपि न वक्तव्या ॥ ध्यानादिजनने करणस्य मनसश्चेष्टाभावेनाननुगमादित्यत आह ॥ ध्यानादेरपीति ॥ आदिपदेन स्मरणं गृह्यते ॥ ज्ञात एवार्थे ध्यानं भवति ॥ ज्ञानं चात्मेंद्रियसंनिकृष्टेनैव मनसा जायते ॥ संनिकर्षश्च मानसचेष्टाजन्यः ॥ अतो ध्यानादेरपि

ध्यानादेरपिमानसी चेष्टा कारणम् ॥ पूर्वतनी चेष्टाऽपि संस्कारकारणत्वेन भवति ॥ दैवमदृष्टम् ॥

मनःसंबंधिनी चेष्टा कारणं भवतीति भावः॥ ननु नियतपूर्वक्षणे सत्कारणं न च ध्यानादिपूर्वक्षणे मनसिक्रियाऽस्ति चिरातीतत्वात् ॥ मनोनैश्चल्यसाध्यत्वात्ध्यानादेः ॥न च संनिकर्षज्ञानद्वारा कारणं तस्यापि चिरातीतत्वादित्यत आह ॥पूर्वतनीति ॥ पूर्वतनीचिरातीताऽपि मानसी क्रिया संनिकर्षद्वारा ध्यानादिहेतुसंस्कारकारणत्वेन भवति ध्यानादेः कारणसंस्कारस्य स्थायित्वादित्यर्थः ॥ दैवमंतर्यामिव्यापार इति कश्चित् ॥ तदसत् ॥ कर्तेत्यनेनैवोक्तत्वात् ॥ चक्षुराद्यनुग्राहकाः सूर्यादय इत्यपरः ॥

॥ रू० ॥ अंतर्यामिव्यापार इति ॥ सर्वप्रेरकोऽन्तर्यामीत्यर्थः ॥ उक्तं चैवं श्रीधरेण ॥ चक्षुराद्यनुग्राहका इति ॥ आदिपदेन श्रोत्रादींद्रियवदेहाद्यधिष्ठानमपि ग्राह्यम् ॥

१ आदिपदेनसंप्रदानापादनयोर्ग्रहणम् ॥

॥ श्री० ॥करणादिशब्दैरेवेति॥अभिमान्यधिकरण[१]न्यायेनेति भावः॥देहादीनिभाष्यानुगेयाह॥देहइतीति॥मुख्यामुख्याधिष्ठानस्येत्यर्थः ॥छांदस इति॥हेतुर्नाकारणमिति हेतुशब्दस्यानित्यपुं
ल्लिंगत्वाभिधानादिति भावः॥१४॥१५॥ननुकिं॥निष्क्रिय त्वांक ॥निर्दोषपदनार्थेति ॥ स्वातंत्र्येण क्रियाशून्यस्यापराधीनकर्तृत्वं विरुद्धमिति तज्ज्ञानी भ्रांतइति निर्दोषपादनार्थेत्यर्थः॥१६

तदप्यसत् ॥करणादिशब्दैरेव गृहीतत्वादिति भावेनाह ॥ दैवमदृष्टमिति॥उक्तमर्थं श्रुतिसंमत्याऽपि समर्थयते॥तथा चेति॥देह इत्युपलक्षणम्॥ हेतुः कारणम् ॥ कर्म हेत्विति कचित्पाठः तत्र छांदसो लिंगव्यत्ययः ॥ १४ ॥ १५॥ नन्वेवं जीवस्य कर्मकारणेष्वनंतर्भावे व्याख्यायमाने तत्रैवंसतीत्युत्तरवाक्ये केवलमिति न युज्यते ॥ एकाकिनमात्मानं करणत्वेन मन्यमानस्य निंदाऽस्य सहायस्यकारणत्वप्रतीतेरित्यत आह ॥

तथा चायास्यश्रुतिः ॥ देहो ब्रह्मार्थेंद्रियाद्याः क्रियाश्च तथाऽदृष्टं पंचमं कर्महेतुरिति ॥ १४ ॥ १५ ॥किंच
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः॥ १५ ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ॥पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥हत्वाऽपि स इमाँल्लोकान्न हंति न निबध्यते॥१७॥
लं निष्क्रियम् ॥ एवं केवलमात्मानं निष्क्रियत्वाद्वदंति हीति तत्रैव ॥ १६ ॥तज्ज्ञानं स्तौति॥ यस्येति ॥

केवलमिति ॥ नात्र केवलशब्द एकाकिवचनः किं तु निष्क्रियत्ववाची ॥ तदुक्तिश्च निर्दोषपादनार्थेति भावः॥केवलशब्दस्य निष्क्रियार्थत्वं कुत इत्यत आह ॥ एनमिति ॥ तत्रैवायास्यश्रुतावेवोक्तम् ॥१६ ॥अवश्यं चैतदेवं यावतोत्तरश्लोके स्वात्मानमकारणं जाननः स्तुतिः क्रियते ॥ अन्यथा सहायस्य कारणत्वं जाननः स्तुतिः क्रियेतेति भावेनाह ॥ तदिति ॥ स्वात्मनो निष्क्रियत्वज्ञानम् ॥

॥ कृ० ॥ अत एवाह ॥ करणादिशब्दैरिति ॥ आदिपदेनाधिष्ठानादिसंग्रहः ॥ देहादीति भाष्यानुगेनाह ॥ उपलक्षणमिति ॥ १४ ॥ १५ ॥ निर्दोषपादनार्थेति ॥ स्वातंत्र्येण क्रियाशून्यस्यापराधीनकर्तृत्वं नास्तीति तज्ज्ञानी भ्रांत इति निर्दोषपादनार्थेत्यर्थे ॥ १६ ॥

१ अ० २ पा० १ अ० ३ सू० ५ ॐ अभिमानिव्यपदेशस्तुविशेषानुगतिभ्याम् ॥ मृदब्रवीदित्यादौ अभिमानिनो निर्देशव्यपदेशः ॥ तस्यतथासामर्थ्यात् अभिमन्यमानेसर्वत्रांशतोव्याप्तत्वाच्चेतितदर्थः ॥ २ कर्मणांकारकपटकसाध्यत्वेऽपि कर्मोपादानयोरन्तिरमात्रिकत्वादिनिज्ञेयम ॥

॥ श्री० ॥ बंधो दुःखादिरूपः अप्रामाणिकमेवंश्रद्धेयमित्याह ॥ इयंचेति ॥ इंद्रस्यापि [illegible] ॥ वक्तृगतेति॥ [illegible] ॥
आदिपदेन तदर्थस्य वेदादिसिद्धत्वं ग्राह्यम ॥ १७ ॥ नज्ञानादीति ॥ [illegible] ॥ आदिपदेन [illegible] ॥ [illegible] ॥ कर्मेत्यादि
नेत्यनेनकथमेतल्लभ्यतइत्यतआहेत्याह ॥ ज्ञानादित्रयमिति ॥ [illegible] ॥ यस्त्वादिति ॥ [illegible] अकर्तृत्वात्घटवदित्यनुमानंअक
र्तृत्वादितिहेतुवचनेनोक्तंभवतीतिभावः ॥ अयुक्तत्वमुपपादयति ॥ नियोक्तृरिति ॥ पुरुषस्येत्यर्थः ॥ प्रेरणम ॥ [illegible] ॥ [illegible] ॥ अनुपयुक्तत्वमुपपादयति ॥
॥ नचेति ॥ नापीत्यर्थः ॥ उक्ताशंकेति ॥ एवंतर्हीत्युक्तशंकेत्यर्थः ॥ ॥२०॥ [illegible] ॥ यस्त्वापद्ध्यते स ईषदहंकारीति [illegible]

ननु निरहंकारस्यापि इंद्रादेस्त्वष्ट्रवधादिनेपत्तबंधो दृश्यते ॥ तत्कथमेतदित्यत आह ॥ यस्त्विति ॥ इयं च कल्पना वक्तृगतत्वादिना युज्यते ॥
१७ ॥ यदिनजीवस्यकारणत्वंकथंतर्हितज्ज्ञानादेरुक्तस्वाक्येकर्मणामूलकारणत्वमुच्यते ॥ ज्ञानादित्रयंकर्मणांप्रवर्तकमितीत्याशंक्यतस्यार्थांतरं
विवक्षुस्तन्निवृत्त्योमाशंकामाह ॥ एवंतर्हीति ॥ यदिजीवोनकर्मणांकारणमित्यर्थः ॥ विधिःश्रौतःस्मार्तश्च ॥नप्रवर्तेततनश्चतद्द्व्यर्थप्रसंगइतिशे

यस्त्वापद्ध्यते स ईषदहंकारीच ॥ १७ ॥ एवं तर्हि न पुरुषमपेक्ष्य विधिः ॥ अकर्तृत्वादित्यत आह ॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

ज्ञानमिति ॥ त्रिविधा कर्मचोदना एतत्त्रिविधमपेक्ष्य कर्मविधिरिति त्रिविधेत्युच्यते ॥

षः ॥ एवंतर्हीत्युक्तस्यैवविवरणम् ॥ अकर्तृत्वादिति ॥ जीवस्यघटवदितिशेषः ॥ ननुज्ञानादिरूपेणकर्मचोदनायास्त्रैविध्यमयुक्तम् ॥ अनुपयुक्तं
चकथमुच्यतेनियोक्तुःप्रेरणंहिविधिः ॥ नचतज्ज्ञानादित्रयरूपम ॥ नचानेनोक्ताशंकानिवृत्तिरित्यतआह ॥ त्रिविधेति ॥

र्थः ॥ वक्तृगतत्वादिनेति॥वक्तुः कृष्णस्य आप्तत्वम आदिपदेन अर्जुनं प्रमत्तं तत्त्ववज्ञानोपदेशेन प्रवृत्तत्वं न ग्राह्यम तेनादिपदादर्थस्य वेदादिसिद्धत्वग्रहे वक्तृरित्यनन्वयं इत्य
पास्तम॥१७॥ननु विधिः प्रेरणम ॥ तथा च जीवो न विधिविषयः ॥ अकर्तृत्वाद्घटादिदित्येतदन्यथा सिद्धम ॥ अकर्तृत्वेऽपि तदज्ञानेन सामानाधिकरण्यादिविधिसंभवादित्यत आह ॥ श्रौतः
स्मार्तश्चेति॥ तथा च श्रुतिस्मृतिभिः प्रेरकस्येश्वरादेर्ज्ञानाभावान्नान्यथासिद्धिरिति भावः ॥ अयुक्तत्वमुपपादयति॥नियोक्तुरिति॥अनुपयुक्तत्वमुपपादयति॥न चेति॥

१ इंद्रस्यानिरहंकारित्वम ॥ पाठांतरेइंद्रस्येषदहंकारित्वम ॥ २ वक्तृरित्यत्र लक्षणम अध्याहारो वा ॥ ३ तस्यापदार्थेनान्वयः ॥ एवंनगीताकर्तुर्गीताकाराभिस्यचक्रमेणआप्तत्वाद्वेदादिसि
द्धत्वाद्युज्यतइतिटीकार्थइतिभावः ॥ एतेनवक्तृरित्यनन्वयइत्यपास्तम् ॥ ४ इत्यस्यपूर्वदेशान्वयः [illegible] ॥ ५ आदिपदेनमत्तादयः॥

॥ श्री० ॥ ननु ज्ञानमितीत्येवंप्रतीकस्यगृहीतत्वादेतत्रिविधमित्यादिव्याख्यानम् [illegible] किमर्थमित्यत आह ॥ स्पष्टेति ॥ व्याख्येयपदानामितिशेषः ॥ नन्वेवं ज्ञानादीनांकर्मविधिनिमित्तानामेवत्रैविध्यात् [illegible] आह ॥ निमित्तेति ॥ [illegible] ॥ इदम् ॥ करणंकर्मकर्तेत्यनेन ॥ नन्वधिष्ठानकार कस्यकथंकरणकारकेऽन्तर्भावइत्यत आह ॥ कांस्यपात्र्येति ॥ [illegible] करणत्वदर्शनादित्यर्थः ॥ आदिपदोक्तदैवस्यापिकरणेऽन्तर्भावमुपपादयति ॥ दैवेने ति ॥ अन्यथातिनितंकार्यंदैवेनकृतमन्यथेत्यादिरित्यर्थः ॥ [illegible] साधकतमत्वेनेति ॥ साधकतमंकरणमितिसूत्रादिति भावः ॥ नहिविवक्षामात्रेणप्रमेयसिद्धिरिति चेत्तत्राह ॥ विवक्षात इति ॥ वैयाकरणानामिति शेषः ॥ [illegible] ॥ न चेति ॥ तत्र ॥ करणकारके ॥ चे ष्टायाश्चावांतरव्यापारत्वेन कारकत्वाभावात् [illegible] ॥ [illegible] करणेऽन्तर्भाव श्चेष्टाया इत्यतो दूषणान्तरमाह ॥ कर्मेतीति ॥ चेष्टायाः [illegible] पृथग्ग्रहणादित्यर्थः ॥ श्री० ॥ ननु कर्मविधिनिमित्तानां त्रैविध्येऽपि कर्मचोदनायास्त्रैविध्योक्तिः ॥ स्पष्टप्रतीत्यर्थोऽनुवादःइत्यत्रेतिशेषः॥एततज्ञानादिकम्॥कर्माविधि. प्रवर्तकं जीवंप्रतीतिशेषः॥इतिशब्दोहेतौ ॥त्रिविधेत्युच्यतेकर्मचोदनानिमित्तकेनमित्ति

कभावेनाभेदोपचारइत्यर्थः ॥कर्मकारणानामुक्तत्वात्किमिदंपुनरुच्यतइत्यतआह ॥कारणानीति॥नहिकर्मसंग्रहइतिकथं कारणसंग्रहइति वक्त व्यत्वादित्यतआह ॥ कर्मेति ॥ कर्मशब्देनतत्कारणानिलक्ष्यंतइत्यर्थः ॥ यदिपंचानांकारणानामयंसंग्रहस्तर्हिकस्यकुत्रांतर्भावइत्यतआह ॥अ

कारणानि संक्षिप्याह ॥ करणमिति ॥ कर्मसंग्रहः ॥ कर्मकारणसंग्रहः॥ अधिष्ठानादिः कारण एवांतर्भूतः ॥

धिष्ठानादीति ॥ आदिपदेनदैवपदोक्तमदृष्टंगृह्यते॥कांस्यपात्र्याभुंक्तेदैवेनकृतमन्यथेत्यादिवत्साधकतमत्वेन विवक्षितत्वात्॥ विवक्षातः कारका णि भवंतीति वचनात् न चादिपदेन चेष्टायाः संग्रहः ॥ तत्र कारकांतर्भावस्यवक्तव्यत्वात् ॥ कर्मेति पृथग्ग्रहणाच्च ॥

कथमित्यत आह॥ निमित्तानि ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥ [illegible] प्रकृतिविकृतिभावेन पश्चात्प्रमोदो जायते अंगादं गात्संभवतीत्यादिवददृष्टस्याप्यपादानत्वादित्यत आह ॥ कांस्यपात्र्यादि ॥ [illegible] अपादानत्वाद्यधिकरणस्य करणत्वेनेदमुदाहरण मिति युक्तम् ॥ अपादानत्वेनाभिधानाद्विकरणत्वप्राप्तेः ॥ न चैवं [illegible] ॥ [illegible] ॥ [illegible] विवक्षातःकरणत्वमिति बोध्यम् ॥ इति व चनादिति ॥ उपलक्षणमेतत् ॥ क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ॥ [illegible] कर्तुरपरिवचनाच्चेत्यपि ग्राह्यम् ॥ तत्र कारकांतर्भावस्यैवेति ॥ चेष्टायाश्चावांतरव्यापारत्वेनाकारकत्वादिति भावः ॥

॥ श्री० ॥ अदृष्टमिति ॥ तथा चादिपदेन चेष्टाग्रहणे न दोष इति भावः ॥ अन्यत्र ॥ तात्पर्ये ॥ कर्तुरिति ॥ कर्तुः क्रियाया आप्तुमिष्टतमं कर्मसंज्ञं स्यात् ॥ यथा ग्रामं गच्छति देवदत्त इत्यत्र ग्राम इति द्रष्टव्यम् ॥ अगृहीतत्वादिति ॥ तत्र गृहीतानामेवानभीष्टस्य कथनीयत्वादिति भावः ॥ ननु प्रमाणं करणं तदितरेषां ग्रहणं न तु कर्मणस्तृतीयस्यात् कथं गीताद्वितीयार्धसंमतित्वेनैतत्प्रमाणोदाहरणमित्यत आह ॥ कर्मेतीति ॥ व्यस्तमिति ॥ कर्मेति पृथक्कारणमित्यर्थः ॥ समस्तमिति ॥ कर्मकारणानि समासप्राप्तत्वमित्यर्थः ॥ उक्तशंकेति एवं तर्हीत्युक्तशंकेत्यर्थः ॥ अस्ति ॥ यत इति शेषः ॥ तं प्रति ॥ जीवं प्रति ॥ नन्वेवमपि कथमुक्तशंकानिरासः अकर्तृत्वादिति तदुक्तहेतोर्दूषणानभिधानादित्यत आह ॥ एतदुक्तं भवतीति ॥ विधिज्ञानस्येश्वरेऽपि सत्त्वादाह ॥ यस्य स्वसंबंधितयेति ॥ अयं विधिर्मां प्रत्येव प्रवृत्त इत्येवंरूपेणेत्यर्थः ॥

न च कर्मादृष्टम् ॥ कर्म चेष्टेत्यन्यत्र व्याख्यातत्वात् ॥ कर्तुरीप्सिततमं कर्मेति कश्चित् ॥ तदसत् ॥ पंचसु कारणेषु तस्यागृहीतत्वात् ॥ श्लोकार्धे श्रुतिसंमतिं चाह ॥ तथा हीति ॥ कर्मेत्यावर्तनीयम् ॥ तत्रैकं व्यस्तम् ॥ परं समस्तम् ॥ ननु ज्ञानं ज्ञेयमित्यनेन कथमुक्तशंका निरास इत्यत आह ॥ अकर्तृत्वेऽपीति ॥ अपराधीनकर्तृत्वाभावेऽपि जीवस्य न तं प्रति विधिवैयर्थ्यम्॥ कुत इति हेतोरित्यन्वयः ॥ विधिश ब्देन तत् ज्ञानमुपलक्ष्यते॥ इच्छेत्यनेन प्रयत्नोऽपि ॥ उक्तकारणैरधिष्ठानादिभिः॥ अनेन ज्ञानं विधिविषयं चेच्छाप्रयत्नलक्षणमधिष्ठानादिल

तथा ह्यृग्वेदखिलेषु ॥ ज्ञानं ज्ञेयं ज्ञानिनं चोपलभ्य विधिरुत्थितः॥ करणं चैव कर्ता च कर्मकारणसंग्रह इ ति ॥ अकर्तृत्वेऽपि विधिद्वारेश्वरप्रसादादिच्छाप्रयत्नोक्तकारणैःकर्मद्वारा पुरुषार्थो भवतीति ॥

क्षणं पुरुषार्थलक्षणं च परिज्ञाता सर्वज्ञ ईश्वरश्च सर्वप्रेरको जीवे सन्निहितोऽस्ति॥अतस्तं प्रति कर्मचोदनेत्यर्थः सूचितो भवति ॥एतदुक्तं भवति॥नापराधीनकर्तृत्वं विधिविषयत्वे प्रयोजकं येन जीवंप्रति कर्मविधिवैयर्थ्यं स्यात्।तथा सतीश्वरस्यापि विधिविषयत्वापातात् किं तु य स्य स्वसंबंधितया विधिज्ञानं कर्म तत्फलं चोद्दिश्येच्छा तदनुगुणश्च प्रयत्नोऽधिष्ठानादिसन्निधानंकर्मसंबंधःफलभाक्त्वं चास्ति ॥तंप्रति कर्म विधयः प्रवर्तंते॥अस्ति चेदं समस्तं परमेश्वरप्रसादायत्तं जीव इति कथं न तं प्रति कर्मविधयःस्युरिति॥ एतत्संग्रहवाक्यमुत्तरवाक्यैर्विव्रियते॥

॥ कृ० ॥ ननु श्रुतौ द्वयोरुक्तत्वात्कथं संमतिरित्यत आह॥कर्मेत्यावर्तनीयमिति ॥ इच्छाप्रयत्नलक्षणमिति ॥ मदिष्टसाधनमिदं मया कार्यमिति ज्ञात्वा प्रवृत्तेरिति भावः ॥ जीवस्य कर्तृत्वाद्विधिविषयत्वमयुक्तमित्यस्य किमागतमित्यत आह ॥ एतदुक्तं भवतीति ॥ तथा सतीश्वरस्यापि विधिज्ञानादिभाव उपात्तेरिति भावः ॥ यस्य स्वसंबंधितयेति ॥ प्रत्येकमपां विधिविषयत्वे प्रयोजकता ॥ एवमनेन गीतोक्तकारणानित्यत्र विद्यमाना ॥ तत न वैयर्थ्यमिति बोध्यम् ॥

॥ श्री० ॥ तथा च जीवो न विधिविषयोऽकर्तृत्वादित्यत्र यदि परतंत्रकर्तृत्वाभावोऽभिप्रेतस्तदाऽसिद्धिः ॥ यदि च स्वतंत्रकर्तृत्वाभावस्तदाऽप्रयोजकता विध्यविषयत्वेऽप्रयोजकत्वात् तस्य स्वतंत्रकर्तृत्वाभावस्याभावेन विध्यविषयत्वेऽस्याप्रयोजकत्वात् तस्मिन् सत्यप्यसत्यप्रयोजकत्वादिति वचनादिति भावः ॥ असाधारण्याच्च तथा विरुद्धश्चेति तं कर्तृत्वं साधारण्या शयः॥स्वव्यापारे ॥ कर्मजननरूपेव्यापारे ॥ णिचमिति ॥ ईश्वरेण कर्म कारितमित्युक्त्या जीवस्यापि कर्तृत्वप्रतीतेरिति भावः ॥ काकतालीयवदिति ॥ ईश्वरं कर्म कृत्वैनं फलमपश्य स्माज्जातमिति यादृच्छिकसंवादिनेत्यर्थः ॥ समासाच्च तद्विषयादित्यनेन इवार्थविषयात् काकतालरूपसमासपदादस्मिन्निवार्थे छप्रत्यये तस्यादेशे च सति काकतालीयमिति रूपं सि ध्यतिः ॥ काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ ॥ काकस्यागमनं यादृच्छिकं तालस्य पतनं तेन पतता तालेन तस्य वधः ॥ तथा च काकागमनमिव तालपतनमिव काकतालीयमि ति विग्रहः॥काकतालादिशब्दयोरुक्तार्थसमासश्चास्मादेव ज्ञापकात् ॥यथाऽहुः॥इवार्थे काकतालादयस्समासाः अर्थाः इति ॥ ज्ञाप्यतेऽनेन योगेन प्रत्ययश्च विधीयत इति ॥ यत्तु नवीन टीकाकारेणोक्तं परिणततालपतनकाले काकोऽपि तद्वृक्षमाश्रयेत तत्र काकयोगस्य तालपतनेऽनन्वयत्वादिति विग्रहाद्यादृच्छिकः काकयोगः इति काकतालीयमित्युच्यत इति तदुक्तव्याकरण विध्यज्ञानमूलमित्युपेक्षणीयमित्यस्मदाचार्यचरणविरचितयुक्तिपादीयसुधाटिप्पण्यनुसारेणालोचनीयम् ॥

नन्वीश्वरश्चेत्प्रेरकोजीवशरीरेऽभ्युपगतस्तदा तत्प्रासादादेवेच्छाप्रयत्नयोरुत्पादात् ॥ किं तु विधिज्ञानमंगीक्रियत इत्यत आह॥ईश्वरेणेति ॥ इ च्छति प्रयतते चेति ॥ शेषः ॥अनेन विधिद्वारेश्वरप्रसादादिच्छोत्पत्त्यतात्त्वित्वं भवति॥उक्तकारणैः कर्मभवतीत्युक्तम् तेनाधिष्ठानादीनां स्वव्या पारे स्वातंत्र्यं प्राप्तं तन्निरासार्थमाह ॥ यदि चेति ॥ ईश्वरेणैव कर्म अधिष्ठानादीनि निमित्तमात्राणि कृत्वा कारितं भवति ॥ अत्र णिचं प्रयुं

ईश्वराधीनत्वेऽपि विधिद्वारा नियतस्तेनैव ॥ यदि चेच्छादिर्जायते तर्हि कारितमेवेश्वरेण ॥फलं च नियतम् ॥

जानस्य स्वातंत्र्यं चेति वक्ष्यमाणाभिप्रायः ॥ कर्मद्वारा पुरुषार्थो भवतीति पुरुषार्थसाधने कर्मणां प्राधान्यं प्राप्तं अत आह ॥ फलं चेति ॥ ईश्वरेणैवेति वर्तते यद्वा यदि चेत्यादिना वाक्यद्वयेन विधिविषयतासिद्धये कर्मफलसंबंधस्य काकतालीयता निराक्रियते ॥

॥ कृ० ॥ ननु कृतमित्यनुक्त्वा कारितमिति णिच्प्रयोगः किमर्थमित्यत आह ॥ अत्र णिचमिति ॥ वक्ष्यमाणेति ॥ स्वातंत्र्यं च जडमपेक्ष्येत्यनेनेति शेषः ॥ नन्वेवं सत्येवशब्दस्य व्यस्तान्वयो नियतपदवैयर्थ्यं चेत्यत आह ॥ यद्वेति ॥ कर्मफलसंबंधस्येति ॥ कर्मसंबंधस्य फलसंबंधस्य चेत्यर्थः ॥ काकतालीयेति ॥

१ इदंपूर्वोत्तरान्वयि

॥श्री०॥ नेश्वरमुक्तजडेष्विति॥जडे इच्छादिविरहाद्वा ईश्वरे मुक्तेषु च लीलया स्वेच्छया वा कर्मकर्मकरणसद्भावेऽपि फलेच्छादिजन्यकर्मनिबंधनफलाभावात् फलेच्छापूर्वककर्मजन्यफलसंबंधरूपविशिष्टं विधिविषयत्वप्रयोजकं नास्तीत्यर्थः ॥ कारणमिति॥ जीवस्य विधिविषयत्वे फलेच्छापूर्वककर्मजन्यफलसंबंधरूपं कारणमित्यर्थः ॥ अस्य ॥ अभिमानिककर्तृत्वस्य प्रयोजकत्वसमर्थनप्रकारमेव दर्शयति ॥ परमेश्वरेणेति ॥ क्रियास्वातंत्र्येति ॥ स्वतन्त्रः कर्तेति स्मरणादिति भावः ॥ तर्हि पूर्वं कर्तृत्वाभावप्रतिपादनेन विरोध इत्यत आह॥अपराधीनेति॥

इदं च नेश्वरमुक्तजडेषु विध्यविषयेष्वस्ति किं तु संसारिष्वेवेति भवति प्रयोजकम्॥ एवमेकं गीतोक्तं कारणमुक्त्वा भाष्यकारः कारणांतरं चाह ॥ वस्तुत इति ॥ वस्तुतः परमार्थतः ॥ अभिमानिकमहंकारकारितभ्रांतिप्रतीतम् ॥ तस्य जीवस्यैवेत्यवधारणेनास्य जीवं प्रतिविधिप्रवृत्तौ प्रयोजकत्वं समर्थयते ॥ परमेश्वरकृतासु क्रियासु स्वस्य स्वातंत्र्यं मन्यमानस्यापराधिनो विधिबंधलक्षणो दंड इति भावः ॥ प्रकारांतरमाह॥स्वातंत्र्यं चेति॥तस्येति वर्तते॥स्यादिदं विधिप्रवृत्ति (प्रवृत्तिविधि इतिपाठःकृष्णाचार्याणाम्)वैयर्थ्यम् यदि जीवस्य क्रियास्वातंत्र्यलक्षणं कर्तृत्वं सर्वथा न स्यात ॥ नचैवम ॥ ईश्वरायत्तस्य तस्यांगीकारात ॥ अपराधीनापेक्षया तदभावोक्तेः ॥

वस्तुतोऽकर्तृत्वेऽपि आभिमानिकं कर्तृत्वं तस्यैव ॥ स्वातंत्र्यं च

॥ कृ० ॥ अतर्कितोपनतत्वमित्यर्थः ॥ अत्र काकतालशब्दौ तदुभयनिष्ठक्रियार्थौ तत्र काकागमनमिव तालपतनमिव काकताल समासश्चतात्पर्यादिति आपत्कादिवार्थेनेति समासः ॥ काकतालमिव काकतालीयम् ॥ अन्यस्मिन्निवार्थे छः ॥ समासाच्च तद्विषयादिति समासादिवार्थे छप्रत्ययविधानात ॥ तस्य भावः ॥ काकतालीयता यथा खलु काकस्यागमनं तालस्य च पतनं तेन च पतता तालेन काकस्य वधः ॥ इदं च सर्वं यादृच्छिकं एवं चैत्रस्यागमनं चोरस्य समागमः ॥ तेन तद्वध इत्यनेन दृष्टांतेन काकतालीय इत्युच्यते ॥ सेयं काकतालीयता निराक्रियत इत्यर्थः ॥कथं काकतालीयता निराकृतेत्यतो वाक्यद्वयाभिप्रायमाह ॥ इदं चेति ॥ पुंसि ... कर्मसंबंधस्य ... नियतपदेन फलभाक्तवस्य जन्येच्छाद्याश्रयजीवमात्रवृत्तित्वोक्तेरिति भावः ॥ नेश्वरेति ॥ ईश्वरमुक्तयोरिच्छादिमत्वेऽपि ... इच्छादिरूपविशेष्याभावादिति भावः ॥ एवमेकं गीतोक्तकारणमिति क्वचित्पाठस्तत्रसमुदायापेक्षयैकवचनम ॥ अनेकमिति पाठस्तु सुगमः ॥ननु वस्तुत इति न सिद्धान्तप्रतिज्ञा ॥अकर्तृत्वेऽपीत्यस्याभिमानिकं कर्तृत्वमित्यनेन पुनरुक्तेः ॥ अकर्तृत्व इत्यनेनैवाभिमानिकमित्यनेनापि कल्पितत्वोक्त्या कर्तृत्वाभावबोधनादित्यत आह ॥ परमार्थत इति ॥ नन्वाभिमानिकं नाम अभिमाननिर्मितम ॥ तथा च तस्यापि वस्तुसत्त्वोपपत्त्या परमार्थतोऽकर्तृत्वोक्तिव्याघात इत्यत आह ॥ अहंकारकारितेति ॥ ननु भ्रांतिप्रतीतस्याप्यसत्वात्कथं विधिविषयत्वे निमित्तत्वमत आह ॥ परमेश्वरेति ॥कर्तृत्वभ्रांतिरेव विधिनिमित्तम्॥ तयोरपराधदंडात्मकत्वाच्च निमित्तनैमित्तिकभावोपपत्तिरिति भावः ॥ प्रवृत्तिविधीति ॥ विधिप्रवृत्तीत्यर्थः ॥ विधिप्रवृत्तावित्युक्तत्वादितिबोध्यम्॥

॥श्री०॥जडतौल्यमिति॥क्रियास्वातंत्र्यलक्षणं कर्तृत्वं तत्रास्तिष्ठतीत्या॥प्रयोगान्नेदृत्यस्तीति जडतौल्यमित्यर्थः॥तथा च जीवं प्रति विधिप्रवृत्तावेतादृशकर्तृत्वस्य प्रयोजकत्वे जडं प्रत्यपि तत्प्रवृत्तिः स्यादिति भावः॥नोदनादिनेत्यत्रादिपदेनाभिघातग्रहणम॥द्रव्यद्वयसंयोगो नोदना॥स्पर्शवद्वेगवद्द्रव्यसंयोगोऽभिघात इति द्रष्टव्यम। सत्तानुल्ययेति॥सत्तयानुल्ययेत्यर्थः॥इदं च क्रियाशक्तेरनादिसिद्धत्वोपपादनार्थमिति ज्ञातव्यम॥क्रियाशक्त्या न करणशक्त्या॥प्रमाणस्यानुभवोक्तप्रमाणेति निवारणायाह॥ उक्तप्रमाणैश्चेति॥१८॥नन्वत्राध्याये साधनं सक्षिप्योच्यते ऽतोऽज्ञानादिभेदकथनमसंगतमत आह ॥ सात्विकं हीति ॥ १९ । २० ॥ ॥ कृ०॥ नोदनादिनेति ॥ शब्द जनकसंयोगो नोदः ॥ आदिपदेन स्पर्शवद्वेगवद्द्रव्यसंयोगाख्याभिघात

न चैवं जडतौल्यमित्यत आह॥जडमपेक्ष्येति॥अधिकमिति शेषः॥जडं हि तदा परकृतेन नोदनादिना क्रियावद्भवति ॥ नन्वागंतुककारणमंतरेण स्वेच्छया जीवस्त्वनादिसिद्धया परमेश्वरप्रसादायत्तया सत्तानुल्यया क्रियाशक्त्या करोति युक्तस्तं प्रति कर्मविधिरिति ॥ नन्वेतत्सर्वं कुतः प्रमाणात्प्रति

जडमपेक्ष्यैवेति न प्रवृत्तिविधिवैयर्थ्यम् ॥ सर्वं चैतदनुभवोक्तप्रमाणसिद्धमिति ॥ न पृथक् प्रमाणमुच्यते ॥ १८॥ पुनः साधनप्रथनाय गुणभेदानाह॥ ज्ञानमित्यादिना॥गुणसंख्याने गुणगणनप्र

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९॥
सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

करणे ॥ १९ ॥ एकं भावं विष्णुम् ॥ २० ॥

पत्तव्यमित्यत आह॥सर्वं चेति॥ अनुभवेनोक्तप्रमाणैश्च विधिज्ञाने सर्तीच्छोत्पत्तिरित्यादिकं अनुभवसिद्धम्॥ ईश्वरप्रसादादित्यादिकं तु यथानियुक्तोऽस्मीत्याद्युदाहृतागमसिद्धम् ॥ पृथक् पुनः ॥१८ ॥ ज्ञानं कर्मेत्यादेः प्रकृतोपयोगाप्रतीतेस्तं दर्शयन्नाह ॥ पुनरिति॥ मोक्षसाधनम् प्रागपि गुणभेदानामुक्तत्वात्पुनरित्युक्तम् ॥ गुणसंख्यानशब्देन कापिलं शास्त्रमुच्यत इतिभावेनाह ॥ गुणेति ॥ तच्च वैदिकमभिप्रेतम् ॥ १९ ॥एक भावमिति सामान्येनोक्तं कोऽसौ भाव इत्याकांक्षायामाह ॥ एकमिति ॥ २० ॥

ग्रहः ॥ ननूक्तप्रमाणसिद्धत्वस्य पुनरुक्तित्वसंगेनोक्तप्रमाणस्यानुक्तौ हेतुरपि न ॥ उक्तप्रमाणानुक्तौ हेतुत्वमित्यत आह ॥ पृथक्पुनरिति ॥ १८ ॥ १९ ॥ २० ॥

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्॥वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥ २१ ॥
यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥ नियतं
संगरहितमरागद्वेषतःकृतम् ॥ अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥ यत्तु कामे
प्सुना कर्म साहंकारेण वा पुनः ॥ क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥
अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषम् ॥ मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥ मुक्तसं
गोऽनहंवादी धृत्युत्साहसमन्वितः ॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६ ॥ रागी
कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः॥हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७ ॥

१ उपलक्षणत्वेनतुशब्देनवाईश्वरविषयेसंदिग्धम ॥ एतेनैवराजसत्वम् ॥ २ ग्रहावत ॥ ३ जीव ॥ ४ युक्तिशून्यम ॥ मिथ्याज्ञानं ॥ ५ बहुलाज्ञानयुक्तत्वेन ॥ ६ ॥ हरेःसर्वोत्तमत्व ज्ञानभक्तिपूर्वकंवर्णाश्रमोचितम् ॥ ७ मदीयतास्नेहरहितम् ॥ ८ कीर्त्यकीर्त्यादौरागद्वेषहीनेन ॥ ९ फलप्राप्तीच्छाहीनेन ॥ १० कर्तृत्वाभिमानसहितेन ॥ फलप्राप्तीच्छयाच॥ ११ समुच्च ये ॥१२ बह्वायासयुक्तेन॥१३ अनुष्ठानानंतरमेवानुवध्यमानम॥१४ स्वनाशम॥१५ परपीडाम ॥१६ अविमर्श्य॥१७आत्मनःकर्मसामर्थ्यंच ॥१८ फलस्नेहहीनः॥ १९ सर्वस्यभगवदधीनत्व निश्चयादेवअहंकर्तेतिनवदति ॥ २० कर्मनर्जनीयदुःखसहनकातरताभ्यांसंयुक्तः ॥ २१ हर्षविषादहीनः ॥ २२ कीर्त्यादिकामः ॥ २३ कर्मापेक्षितद्रव्यव्ययशून्यः ॥ २४ हिंसास्वभा वः ॥ २५ द्रव्यादिशुद्धिरहितः ॥ २६ सिध्यसिध्योरितिशेषः ॥

॥ श्री० ॥ कालस्य दीर्घत्वं नाम न दशमित्यत आह ॥ चिरगतेनेति ॥ २८ ॥ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

दीर्घसूत्रित्वं कथं तामसत्वेहेतुरित्यतः सप्रमाणकंव्याचष्टे ॥ परेति ॥ दीर्घकालकृतं चिरातीतकालकृतम् ॥अनुचितं वचनायोग्यं परोपद्रवहे तुत्वात् ॥ दोषान्मात्सर्यादेः ॥ २८ ॥ २९ ॥ ३० ॥ यया धर्ममधर्मं चेति राजस्या बुद्धेर्धर्मादिविषयागाः अयथार्थज्ञानहेतुत्वमुच्यत इत्य

परकृतदोषंदीर्घकालकृतमप्यनुचितं यः सूचयति स दीर्घसूत्री॥परेणयः कृतो दोषोदीर्घकालकृतोपित्वा॥यस्तस्यसूचको

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः॥विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥ २९॥ प्रवृत्तिं च नि
वृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी॥ ३०॥यया धर्म
मधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्मं ध
र्ममिति या मन्यते तमसाऽवृता ॥सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या य
या धारयते मनः प्राणेंद्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ॥ ३३ ॥ ॥

दोषाद्दीर्घसूत्रीसउच्यतइत्यभिधानात२८।३०यथार्थत्वानियमाभावेराजस्याः ॥ अन्यथातामस्याः॥भेदाभावात्३१।३३

न्यथाप्रतीतिनिरासार्थमाह ॥ यथार्थत्वेति॥अयथावत्प्रजानातीत्यस्ययथार्थज्ञानजननियमाभावे तात्पर्यमित्यर्थः ।प्रतीत एवार्थः किं न स्यादि त्यत आह ॥ अन्यथेति ॥ राजस्या इति षष्ठ्यंतमनुवर्तते ॥ तामस्या इति पंचमी ॥ भेदाभावाद्भेदाभावप्रसंगात् ॥ ३१ ॥३२ ॥ ३३ ॥

॥ कु० ॥ ननु बहुकालकृतस्यात्यात्यतार्थवचनयोग्यत्वेन कथमनौचित्यमित्यत आह ॥ चिरातीतकृतमिति ॥ २८ ॥२९॥ ३० ॥ ३१ ॥३२॥३३ ॥

१ गुणभेदनिमित्तान ॥ २ श्रुत्व निश्चांकुरु ॥ ३ समारप्रवृत्तिं निवृत्तिं ॥ ४ मालरेतृर्धर्म । ५ असयनभयंनेनिविग्रहः॥ तेचकर्तव्याकर्तव्यानिमित्त ॥ ६ प्रकारम॥७ प्रकारम ॥
८ कर्तृत्वोपचारात्प्रथमा ॥ यर्यतिकरणत्वसंयम ॥ ९ सर्वोपपूर्वपरीत्यबुद्धीहतुर्धर्मेनमैत्र्याहारीनसुनयितुपृथक्त्वयमसूक्ति. ॥ १० सुकर्यतिशेष. ॥

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ॥प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ॥ अभ्यासाद्रमते यत्र दुःखांतं निगच्छति ॥ ३६ ॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥ तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥
विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥ परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥
यदग्रे चानुबंधे च सुखं मोहनमात्मनः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४०॥
ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ॥ कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥४१॥
शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥४२॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥४३॥
कृषिगोरक्षवाणिज्यं वैश्यं कर्म स्वभावजम् ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥४४

---

१ प्रकृष्टेनमदीयतासंगेन ॥ २ स्वप्नाद्युपलक्षितंसर्वंनिषिद्धग्राह्यम ॥ ३ मुंचे ॥ ४ दुःखनाशं ॥ ५ नितरांप्राप्नोति ॥ तत्सुखंत्रिविधमित्यर्थः ॥ ६ विष्णोःप्रसादाज्जातम् ॥ बुद्धेः प्रसादात्स्वतोविषयेष्वप्रवृत्तेर्जातम ॥ ७ तदुत्पन्नविषयानुभवात्ग्राह्यम ॥ ८ अधर्मेधर्मबुद्धिः ॥ ९ मुक्तत्वात्तत्त्वेष्वपिनित्यात्युक्तिः॥ १० समुच्चये॥ ११ द्विजन्मत्वेनैनिर्दिष्टातयितुंपृथङ्निर्देश ॥ १२ सत्वादिभिः ॥ १३ क्रोधानुत्पत्तिः ॥ १४ सामान्यतः ॥ १५ विशेषतः ॥ १६ प्रसह्यवित्ताहरणंशारीरदंडनंच ॥ अशिष्याणांशासनंचवणैनार्थविनाशनम् ॥ एषईश्वरभाव स्यान्नकार्यःक्षत्रियेतरैः ॥ इतिस्मृत्युक्तः ॥ १७ त्रैवर्णिकसेवारूपम ॥

॥ श्री०॥४५॥४६ ॥४७॥४८॥तदनंतरम्॥नैष्कर्म्यसिद्धिप्राप्त्यनंतरम् ॥ नैष्कर्म्यार्थी ॥ मोक्षार्थी ॥ योगस्येति ॥कर्मसमाधियोगरूपस्य सिद्धिस्तत्फलभूतमपरोक्षज्ञानमित्यर्थः ४९॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ नैष्कर्म्यसिद्धिं मोक्षमिति केचित् ॥ तदसत् ॥ तदनंतरं मां विशत इति वाक्यशेषविरोधादिति भावे नान्यथा व्याचष्टे ॥ नैष्कर्म्येति॥नैष्कर्म्यार्थासिद्धिर्नैष्कर्म्यसिद्धिः ॥ सा च योगस्येत्यर्थः ॥ ४९ ॥ सिद्धिं प्राप्त इति योगसिद्धिप्राप्त्यनंतरं

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ नैष्कर्म्यसिद्धिम् ॥ नैष्कर्म्यफलां योगसिद्धिं ॥ ४९ ॥ यथा येनोपायेन

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥
सहजं कर्म कौंतेय सदोषमपि न त्यजेत्॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥
सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे॥समासेन तु कौंतेय निष्ठा ज्ञानस्य या परा ॥५०॥

येन सिद्धिं प्राप्तो ब्रह्माप्नोति तथा निबोध ॥

ब्रह्मप्राप्त्युपायकथनं प्रतिज्ञायत इत्यन्यथाप्रतीतिनिरासार्थं व्याचष्टे ॥ यथेति ॥

॥ कृ० ॥४५ ॥ ४६॥४७॥४८॥ सा च योगस्येति ॥ ज्ञानस्येत्यर्थः ॥ अग्रे सिद्धज्ञाननिष्ठात्मकत्वेनाभिधानात् ॥ ४९ ॥

१ लभते ॥ २ चेष्टा ॥ ३ पुमर्थसाधनम् ॥ ४ सर्वकर्माणि ॥

॥ श्री० ॥ सिद्धिं प्राप्तो यथा तथा निबोधेत्येववक्तव्यत्वाद्ब्रह्माप्नोतीति व्यर्थमित्यत आह ॥ ब्रह्माप्नोतीति ॥ तमुपायम् ॥ अपरोक्षज्ञानोपायम् ॥ प्रतीत एवार्थः ॥ ब्रह्मप्राप्त्यु पायकथनरूपः ॥ ज्ञाननिष्ठात्मकत्वेनेति ॥ निश्चलापरोक्षज्ञानात्मकत्वेनेति यावत् ॥ अनपेक्षत्वादिति ॥ सिद्धिमपरोक्षज्ञानं प्राप्तो यथा येनोपायेन ब्रह्माप्नोति तथा निबोधेत्युक्तेऽपरो क्षज्ञानस्य ब्रह्मप्राप्तौ पुनः साधनांतरमापेक्षता प्रतीयेत तदयुक्तम् ॥ भेदतदंतरायाय मुक्तये साधनं भवेत् ॥ नर्ते निदंतगमाय निर्वाणायापरोक्षदृगिति वचनविरोधापत्तेरिति भावः ॥ ५० ॥ ॥ ५१ ॥ ५२ ॥ पुनर्भक्त्यादीनि ॥ मुक्तौ न पुनर्भक्त्यादिलाभाभावादिति भावः ५३ ॥ ५४ ॥

ब्रह्माप्नोतीत्यनुवादमात्रं तथा तमुपायम् ॥ प्रतीत एवार्थः किं न स्यादिति चेत् न ॥ सिद्धेर्ज्ञाननिष्ठात्मकत्वेनाभिधानात् ॥ ज्ञानस्य च ब्रह्मप्राप्तावनपेक्षत्वादिति भावेन निष्ठेत्येनद्व्याचष्टे॥येति॥५०॥५१॥५२॥ब्रह्मभूयाय ब्रह्मत्वायेति प्रतीतिनिरासार्थं व्याचष्टे॥ब्रह्मेति॥इत्यर्थइति

या सिद्धिर्ज्ञानस्य परा निष्ठा॥५०॥५१॥५२॥ब्रह्मभूयाय कल्पते ॥ ब्रह्मणि भावो ब्रह्मभूयम् ॥ब्रह्मणि स्थितिः

बुध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च॥शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥५१

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

॥ सर्वदा तन्मनस्कतेत्यर्थः ॥ ५३ ॥ ५४ ॥

शेषः॥भावो न जन्मादीत्याशयेन विवृणोति॥ब्रह्मणीति॥इयमपि न मुक्तिर्ब्रह्मभूतइति पुनर्भक्त्यादिलाभश्रवणादिति भावेनाह॥सर्वदेति॥५३॥५४॥

॥ क० ॥ ब्रह्मप्राप्तावनपेक्षत्वादिति ॥ ब्रह्मप्राप्तौ जनयितव्यायामधिकारिनिष्ठकारणांतरानपेक्षत्वादित्यर्थः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

---

१ निवृत्तकर्मादि ॥ २ अपरोक्षज्ञानम् ॥ ३ मध्येसंस्थाप्यतद्द्वारेत्यर्थः ॥ ४ मनः॥ ५ तदनुभवेच्छांविहाय॥ ६नियताहारवान्॥ ७ब्रह्मणिस्थितमनस्कः॥ ८ स्वतएवविषयेष्वप्रवृत्तमनाः

॥ श्री० ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६ ॥ ६१ ॥ कृ० ॥५५॥५६॥५७॥५८॥५९॥६०॥ ६१

॥ ५५ ॥ उत्तरग्रंथस्य संगतिं सूचयंस्तात्पर्यमाह ॥ पुनरिति ॥ उपसंहरति ॥ शास्त्रमिति शेषः ॥५६॥५७॥५८॥५९॥६०॥६१॥

॥ ५५ ॥ पुनरंतरंगसाधनान्युक्त्वोपसंहरति ॥ सर्वकर्माणीत्यादिना॥५६॥५७॥५८॥५९॥६०॥६१ ॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥५५॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९॥
स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥६०॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥

१ देशकालगुणैर्व्याप्तः ॥ २ यन्नामायद्रूपश्च ॥ ३ स्वयोग्यतानुसारेण ॥ ४ अहमस्वतंत्रमहमितिभावोऽहंकारः ॥ ५ मय्येवनिरुद्धचित्तः ॥ ६ अर्थांतरेऽथशब्दः ॥ ७ श्रुत्वानकरिष्यसि ॥ ८ पुरुषार्थहीनोभविष्यसि ॥ ९ अभ्युपेत्योक्त्वाऽकरणमशक्यंनेत्याह ॥ १० वृथैव ॥११ईश्वरेच्छा॥१२संस्कारेण॥१३तंगुरुस्नेहात ॥१४ शरीरस्थानि ॥ १५ स्वरूपभूतेच्छया

॥ श्री० ॥ निश्चितार्थः स तु ज्ञेयो यत्रात्मैव परोक्षतः ॥ उच्यत इति तात्पर्योदाहरणवचनमनुसंधायाह ॥ निश्चितार्थत्वाभिप्रायेणेति ॥ द्रोणं प्रति भीमवचनवदितिभाष्यम ॥ तथा हि महाभारते द्रोणपर्वणि शकटचक्रव्यूहप्रवेशकाले आदौ द्रोणेन भीमसेनं प्रत्युक्तम ॥शिष्य वार्जुनो युक्तस्त्वत्तोऽहंनैव सात्यकिः ॥ कथं त्वां मोचयिष्येऽहं पश्याद्य मम पौरुषमित्यादि ॥ अनंतरं द्रोणंप्रति भीमसेनेनोक्तम ॥ द्रोणो भीमेन नितृवन्मानिनोऽहर्निशमद्य॥अद्याभिमन्यवे द्रोणो भीमं नद्भत्करिष्यति ॥ भीम उक्त्वैतावद्वत् निधाय शिर अग्रतः ॥ मुक्त्वा शरानगणयन् रथं जग्राह सत्वर इति॥तथाच॥नित्करणरूपभीमसेनोक्तार्थस्य निश्चितत्वेन द्रोणं प्रति तद्वत्करिष्यति भीम इति परोक्षवचनं निश्चितार्थत्वाभिप्रायेणान्यथासिद्धं नस्व भिन्नस्य भीमत्वादिज्ञापकमेवं स्वस्मिन्नीश्वरत्वस्य निश्चितत्वात्तदभिप्रायेणेश्वर इत्यादिपरोक्षवचनमन्यथासिद्धं न कृष्णस्यानीश्वरत्वज्ञापकमित्यर्थ इति संप्रदायविदः॥६२॥६३॥६४॥६५॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति ॥ तमेव शरणं गच्छ तत्प्रसादादित्यादिरूपात्परोक्षवचनात्कृष्णस्यानीश्वरत्वं प्रतीयते ॥ तन्निराकर्तुमाह ॥ परोक्षेति ॥ निश्चितार्थत्वाभिप्रायेणान्यथासिद्धमिति शेषः ॥ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ सर्वधर्मान्परित्यज्येति ॥ वर्णाश्रमवि

परोक्षवचनं तु द्रोणं प्रति भीमवचनवत् ॥६२॥६३ ॥ ६४॥६५ ॥ धर्मत्यागः ॥ फलत्यागः ॥

तमेव शरणं गच्छ सर्वभावेन भारत ॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम्॥६२ ॥ इति ते ज्ञानमाख्यातंगुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥इष्टोऽसि मे दृढमितिततो वक्ष्यामि ते हितम् ॥ ६४॥ मन्मना भव मद्भक्तो मद्याजी मान्नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६ ॥

हितानामपि सर्वधर्माणां परित्यागो विधीयत इत्यन्यथाप्रतीतिनिरासार्थमाह ॥ धर्मेति ॥ ॥ कृ०इत्यादिरूपादिति॥आदिपदात्तत्प्रसादात्परां शांतिमित्यस्य संग्रहः॥ भाष्ये द्रोणं प्रति भीमवचनवदिति ॥ यदि शत्रुं त्वमात्मानमन्यसे तथाऽस्त्वित्याह ॥ एष ते सदृशं कर्म शत्रो भीमः करिष्यतीतिद्रोणपर्वणि द्रोणं प्रति भीमवाक्यवदित्यर्थः निश्चितार्थत्वेति ॥ निश्चितार्थः स तु ज्ञेयो यत्रात्मैव परोक्षतः ॥ उच्यते विष्णुना यद्वत्कृष्णेत्यादि कश्यप इत्युक्तेरिति भावः ॥ ६२॥ ६३ ॥६४ ॥ ६५॥

---

१ इत्याक्षेपः ॥ २ तत्वसारमुपसंहरण ॥ सारमनसारमुपसंहर्तुंप्रतिजानीते ॥ ३ नात्रसंदेहःकार्यइतिभावः

॥ श्री० ॥ अशाब्दइति ॥ फलत्यागरूपोऽर्थो धर्मत्यागशब्दलभ्यो न भवतीत्यर्थः ॥ व्याख्यातत्वादीति ॥ गीतायामेवेति शेषः॥ ६६ ॥ ६७॥६८॥६९॥७०॥७१॥७२॥७३॥७४॥

प्रतीत एवार्थः किं न स्यादित्यत आह॥कथमिति॥अस्मिंच्छास्त्रे क्रियत इतिशेषः॥अशाब्दोऽयमर्थ इति चेत् न ॥धर्मशब्दस्य स्वकार्यफलो

कथमन्यथा युद्धविधिः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत इति चोक्तम् ॥६६ ॥—॥ ७४॥

इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७॥

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यःप्रियतरो भुवि ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥ ज्ञानयज्ञेन ते नाहमिष्टः स्यामिति मे मतिः॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ॥ सोऽपि मुक्तः शुभान्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ॥ कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय॥७२॥अर्जुन उवा

च॥नष्टोमोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत॥स्थितोस्मि गतसंदेहःकरिष्येवचनंतव ॥७३ ॥

॥ संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं ॥७४॥

पलक्षणत्वात् ॥ एवमेव भगवता व्याख्यातत्वाच्चेत्याह ॥ यस्त्विति ॥६६॥ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

॥ कृ० ॥६६॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२॥७३॥७४॥

---

१ अतपस्काशुश्रूषभक्तासूयूनामुत्तरोत्तरं आधिक्येनानधिकारित्वंचशब्देभ्यः ॥ एतद्विरुद्धोऽधिकारीतिज्ञेयम ॥ २ ममभक्तेभ्यः ॥ ३ नाभूदितिचग्राह्यम् ॥४ पूजितः ॥ ५ एतेनश्रोतुरध्येतुर्व्याख्यातुःक्रमेणसुखाधिक्यमितिसूचितम् ॥ ६किमर्थेऽव्ययम ॥ ७ यथेच्छसितथाकुर्वित्याक्षपंपरिहर्तुमनुसरति ॥ ८ महानात्मामनोयस्य

॥ श्री० ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ प्रीतिमेवेति ॥ अधिकार्युत्तमवायुवतारभूतैरानंदतीर्थैराशास्या भगवत्प्रीतिरेव नान्या एकांतानां न कस्यचिदर्थे नारायणो देव इति वचनादिति भावः ॥ एतादिति ॥ तथा च पूर्णादोषमहाविष्णोर्गीतां भगवद्गीतां तदाख्यं ग्रंथमिति यावत् ॥ आश्रित्य पूर्णादोषमहाविष्णोः स्वरूपस्य निरूपणं लेशतो यत्कृतं तेन विभुर्मेसदा प्रीयतामित्यर्थः ॥ समापितग्रंथो भगवांष्टीकाकारः प्रचयगमनार्थं अंतेऽपि मंगलमाचरति ॥ करतलकलितेत्यादिना॥ इदं विश्वं समस्तं करसंबद्धामलकामिवयेनावगतं सजयतीत्यर्थः ॥ १॥ नतरुद्राद्यमरशिरोरत्नानां राज्या ॥ वीथ्यालिरावलिः पंक्तिश्रेणीरेखास्तु राजय इत्यभिधानात् पंक्त्या राजृदीप्ताविति धातोः कांत्या वा नितरां राजिते ॥ पूर्णबुद्धेः पदांबुजे नमामीत्यशेषमतिमंगलम्॥ २ ॥

॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ इदानीं समापितभाष्यो भगवानाचार्यो भाष्यनिर्माणस्य फलं भगवत्प्रीतिमेवाशास्ते ॥ पूर्णेति ॥ एतद्गीतामित्यनेन निरूपणमित्यनेन च संबध्यते ॥ तेनेतिश्रवणाद्यदिति लभ्यते॥करतलकलितामलकमिव प्रभुणा येनेदमवगतं विश्वम् ॥ स

॥७५॥–७८॥ॐपूर्णादोषमहाविष्णोर्गीतामाश्रित्यलेशतः॥निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ॥ ७५ ॥ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्॥केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥७६॥तच्च संस्मृत्यसंस्मृत्य रूपमत्यद्भुतं हरेः॥विस्मयो मे महाराजन्हृष्यामि च पुनःपुनः ॥७७ ॥यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः॥तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥७८॥

जयति जनकसुतायाः कांतः श्रीरघुनंदनो देवः ॥ १ ॥ नमामि व्यासदासस्य पूर्णबुद्धेः पदांबुजे ॥नतामरशिरोरत्नराजिनीराजिते सदा ॥ २ ॥

॥ कृ० ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ॥ ननु यदि पूर्णादोषेति गीताया एव विशेषणं न निरूपणस्य तदा यत्किंचिन्निरूपणमिति प्रतीयते ॥ तथा च भाष्यकारस्यानवरतमीश्वरप्रवणकायकरणवृत्तित्वाविरोधः॥यदि च निरूपणस्यैव तदा यत् किंचिद्गीतामित्यापद्यतेतच्च बाधितमित्यत आह॥एतदिति॥पूर्णेत्यादिविशेषणमित्यर्थः ॥ योग्यतासत्वादिति भावः ॥

१ श्रुतवानित्यन्वयः ॥ अव्यवधानेनेत्यर्थः ॥ २ वारत्रिकसुखहेत्वदृष्टकरम् ॥ ३ विश्वरूपम् ॥ ४ निश्चयइत्यर्थः ॥

॥श्री० इति यदुपतिवरगीताभाष्यटीकासुयुक्ताश्रयमतिललिताभिर्गीर्भिरावेदयित्री ॥ सुललितविवृतिर्याद्वाण्गिराद्धाऽत्रचीर्णा समगमदयमत्राष्टादशाध्याय अंतम् ॥ योऽयाचि त्रिदशैः कुमा
रतयेऽवातारि येनक्षितौ येनामोचि पितौग्रसेनिनिगडाद्धर्मोऽपि येनांकुरि॥ येनाभायि युधिष्ठिरो निजपदे भाग्यादिदं श्रीपतिं तं कृष्णं सदुपास्यमुद्धवजयज्ञानप्रदं संश्रये ॥ १ ॥ श्रीयादवा
र्यगुरुमानसनीरजस्य श्रीमध्वहृत्कमलवासिरमानिवासः ॥ व्यासोऽस्त्वनेन जयतीर्थमुनींद्रवाक्यगूढाशयप्रकटनेन ममाशु भूत्यै ॥ २ ॥ गीताभाष्यस्य टीकेयं यादवार्यकृपाबलात् ॥ विवृता
श्रीनिवासेन भूयाद्व्याख्योपकारिणी ॥३॥इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितायां श्रीमद्भगवद्गीताभाष्यटीकाविवृतौ भावप्रदीपिकाख्यायामष्टादशोऽध्यायः ॥१८॥

अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे ॥ वचोभिरमृतप्रायैः प्रीयंतां सततं बुधाः ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः ॥ १८॥ श्रीकृष्णार्प
णमस्तु ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु॥संकराख्यस्यदुर्योनेर्निःसृतेन रजस्वला ॥गीतानारी समीरेण शो

॥ हरिः ॐ तत्सदिति श्रीमद्भगवद्गीतासू० मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः ॥ १८ ॥

धिता हंसरूपिणा॥मायिनः शलभायंते भास्करस्तस्करायते॥यस्य तस्मिन्प्राणनाथे यतींद्रे भक्तिरस्तु मे ॥

श्रीमद्गीताभाष्यस्य टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां अष्टादशोऽध्यायः ॥ कृ० ॥ इति ॥ श्रीमत्त्रिमलसूरिसत्तमगुरुष्टीकाशयं व्याकरो
च्छ्रीवेदेशयतीशशिष्ययदुपत्याचार्यसंशिक्षितम् ॥ यं मह्यं तमिहाकृषं हरिगुरुप्रीत्यै स्वधीशुद्धये प्रीयंतां सततं बुधा मयि ततः संतो गुणग्राहिणः ॥ ॥ प्रवरोंवरजीकृष्णशर्मा त्रिमलसू
रिजः ॥ प्रमेयदीपिकाव्याख्यां शर्मदां निर्ममे सुधीः ॥ २ ॥ इति श्रीमत्त्रिमलाचार्यसूरिसूनुकृष्णविरचिते प्रमेयदीपिकाभावप्रकाशेऽष्टादशोऽध्यायः ॥ १८ ॥

१ संकराद्याः ॥ २ एतन्नामकोगीताव्याकर्ता ॥

इदं पुस्तकं जानोरीकरेत्युपाख्यमहादेवात्मजगणेशेन वेदांतसच्छास्त्रनिष्णातविद्वत्प्रवराचार्यवरखेडस्थराघवाचार्यौष्टपुत्रोपाह्वयानंताचार्यसाहाय्येन संशोध्यैकीकृत्यार्यसे
वकनाम्नि स्वकीयमुद्रायंत्रेंकित्वाप्रसिद्धमकारि प्रकाशयित्रा सर्वेऽधिकाराः स्वायत्ताः स्थापिताः मि० ज्येष्ठ शु० १५ शके १८०९ रविवासरे
ह्या ग्रंथासंबंधीं सर्वहक्क मालकानें आपलेकडे राखून ठेविले असत. तारीख ५ जून सन १८८७ ई०

॥ इति श्रीम[illegible]द्गवद्गीता ॥

श्रीसदानन्दतीर्थ-[illegible]-श्रीयतीन्द्र[illegible] [illegible]हिता श्रीनिवासतीर्थ-कृष्णाचार्य-

[illegible] [illegible]टीका समाप्ता

[illegible] दुर्गावरय[illegible]